Mānava-Dharma Śāstra

Mānava-Dharma Śāstra

[Institutes of Manu]

with the Commentaries of

Medhātithi, Sarvajñanārāyaṇa, Kullūka, Rāghavānanda, Nandana, and Rāmachandra

and an Appendix by

Vishvanāth Nārāyan Mandlik

with a foreword by

Prof. Albrecht Wezler

Munshiram Manoharlal
Publishers Pvt Ltd

S
29.1 59 2 G
M 294 d.m
V.1

SL NO. 075857

THE ASIATIC SOCIETY
CALCUTTA-700016
ACC NO. S 3069
DATE 9.9.92

PRICE
Rs 1500/-
For 3 Vols

COMPUTERISED
C 1957

ISBN 81-215-0567-2 (for the set)

First published in 1886
by Ganpat Krishnaji's Press, Bombay

© Munshiram Manoharlal Publishers Pvt. Ltd., New Delhi

Published by Munshiram Manoharlal Publishers Pvt. Ltd., Post Box 5715, New Delhi-110 055 and printed at Nice Printing Press, Khureji Khas, Delhi-110 051

Foreword

To reprint books on Indian culture and history which have been unavailable for a rather long period of time—whether text editions, translations or studies of various types—has quite evidently become one of the vital activities of Indian publishers. Though in some cases it may be doubted whether it was at all worthwhile to unearth a particular work, generally the reprints meet an obvious demand: they permit not a few individuals and institutions to enlarge considerably their collections of books on India. Unfortunately, however, all publishers concerned do not yet indicate clearly as a matter of course which book they have actually reprinted, by giving the full bibliographical data of the first publication. The pleasure one feels in seeing a rare and important book reprinted is almost totally marred if one is forced first to make an annoying and time-consuming inquiry into its publication history.

In view of the basically positive response to reprints, it is probably not necessary to justify in particular the present reissue of Vishvanāth Nārāyan Mandlik's edition of the *Mānava-Dharma Śāstra* [Institutes of Manu] with the Commentaries of Medhātithi, Sarvajñanārāyaṇa, Kullūka, Rāghavānanda, Nandana and Rāmachandra, originally published in 1886 at Bombay, as also of his edition of the Commentary of Govindarāja on the *Mānava-Dharma Śāstra* of the same year. Nevertheless it should be said that these two volumes formed a remarkable advance in the philological study of this famous Smṛti. Yet the number of libraries, not only in the West, which have a copy of them is very small indeed; and who is able today to pay the exorbitant prices demanded by antiquarians for one of the rare original copies they offer once in a while?

We do indeed now have a new and more comprehensive edition, and in theory one would expect that it obviated the need for a reissue of Mandlik's edition, viz. J.H. Dave's *Manu Smṛti* with Nine Commentaries..., published by the Bhāratīya Vidyā Bhavan and by now complete but for part 2 of vol. IV (Adhyāya 8). However, though this latter edition includes Maṇirāma's Ṭīkā and the incomplete commentary of Bhāruci also, it is not by any means of such a quality as to supersede Mandlik's work; on the contrary, it was by using Dave's edition that I came to realize fully the dire necessity of making Mandlik's work again accessible to the academic public. For Dave's edition not only falls short of what may be expected of a good edition, e.g. that quotations are identified, cross-references explained, etc., but the presentation of the text of the various commentaries is also such that one far too often is puzzled and wonders what the correct reading or at least what an intelligible reading, could be. In not a few cases—and

this is my main point—one has no choice but to depend on the help of another less carelessly prepared edition, namely that of Mandlik.

It is hence hoped that the present reprint will be welcomed by a wide group of scholars interested in things Indian and not only by those specialized in Dharmaśāstra. All of us have to thank the publisher, Mr. Ashok Jain of Messrs. Munshiram Manoharlal, for his far-sighted decision to publish this celebrated work again.

A. Wezler

Hamburg

MÁNAVA-DHARMA ŚÁSTRA

[INSTITUTES OF MANU],

WITH THE COMMENTARIES OF

MEDHÁTITHI, SARVAJÑANÁRÁYAṆA, KÚLLÚKA, RÁGHAVÁNANDA, NANDANA, AND RÁMACHANDRA,

AND AN APPENDIX

BY

THE HONORABLE RAO SAHEB

VISHVANÁTH NÁRÁYAN MANDLIK, C. S. I.; M. R. A. S.; F. R. G. S.; F.S.S. (LOND.),

ADDITIONAL MEMBER OF COUNCIL OF THE GOVERNOR-GENERAL OF INDIA,

VICE-PRESIDENT, BOMBAY BRANCH R. A. SOCIETY, FELLOW AND SYNDIC OF THE UNIVERSITY OF BOMBAY, GOVERNMENT PLEADER H. M'S HIGH COURT, BOMBAY,

&c.

॥ नहिसत्यात्परोधर्मः ॥

Trans: " No *Dharma* greater than truth. "

Bombay:

PRINTED AND PUBLISHED AT GANPAT KRISHNAJI'S PRESS, BY THE PROPRIETOR ÁTMÁRÁM KÁNOBA.

Ś. ŚAKE 1807.

A. C. 1886.

Copyright and right of translation reserved)

श्री

मानवधर्मशास्त्रम्

मेधातिथिसर्वज्ञनारायणकुल्लूकराघवानन्दनन्दनरामचन्द्र-
प्रणीतव्याख्याभिःपरिष्कृतं परिशिष्टोपेतंच

नामदार रावसाहेब तथा कम्पेनियन आफ धि स्टार आफ इण्डिया इत्युपपदधारिणा, भारतवर्षीय गव्हर्नरजनरल
कौन्सिलाभिधनीतिशास्त्रव्यवस्थाप्रणेतृमण्डलान्तःपातिना- रायल एशिएटिकसोसायटीरायल
जिओग्राफिकलसोसायटीस्टेटिस्टिकलसोसायटीत्यभिधानां विद्वत्पर्षदां
सभासदाऽऽद्यपर्षदो मुम्बापुरस्थशाखाया उपाध्यक्षेण,

मुम्बापुरगतयुनिव्हर्सिटीनामकसर्वविद्योपचयविचारमुख्यस्थानस्थव्यवस्थापकानां सिण्डिकेटनामकमण्डलान्तर्गतेन,

मुम्बास्थहायकोर्टाभिधन्यायाधिष्ठानगतगवर्मेण्टवकीलसंज्ञकेन

मण्डलिकोपाह्वेन

नारायणसूनुनाविश्वनाथेन

मुम्बापुर्यां

गणपतकृष्णाजीनामकमुद्रायन्त्रालये तदध्यक्षेण आत्मारामकान्होबाभिख्येन मुद्रितम्

प्रकाशितंच

(एतस्य सर्वेऽधिकाराः मुद्रयितास्वायत्तीकृत्यैवस्थापिताः)

शालिवाहन शाके	इसवीसन
१८०७	१८८६

प्रकरणानुक्रमणिका

पृष्ठम्

प्रस्तावना १–४

संहिता मेधातिथि-सर्वज्ञनारायण-कुल्लूक-राघवानन्द-नन्दन-रामचन्द्रप्रणीतव्याख्यासमेता । १-१५४३

प्रथमपरिशिष्टम् १५४५

१ हेमाद्रिमाधवादिभिर्मनूक्तत्वेन स्वीकृतेषु वचनेषु संप्रत्युपलब्धमुद्रितपुस्तकेष्वनुपलभ्यमानानि वचनानि १५४७

२ वृद्धमनुवचनानि १५५८

३ बृहन्मनुवचनानि १५६१

पुस्तकमुद्रणकाले गृहीतावशेषाः पाठभेदाः १५६३

मेधातिथिः । १५६३

कुल्लूकः । १५६९

राघवानन्दः । १५७७

नन्दनः । १५८७

प्रस्तावना.

वर्तमानन्यायसभासु व्यवहारोपयोगार्थं शालिवाहनशकस्य १७८६ तमे वर्षे धर्मशास्त्रप्रतिपादकेभ्योबहुग्रन्थेभ्यः सारमुद्धृत्यैकोहिन्दुधर्मशास्त्रनामकोऽल्पप्रबन्धः कैलासवासिनांविद्वद्वर्यगुर्जरोपनामकपाण्डुरङ्गोपाध्यायानांसाहाय्येन रचयित्वा प्रकाशितः । कतिपयवर्षेभ्योऽनन्तरं शालिवाहनशकस्य १८०० तमे वर्षे तस्मिन्नेव शास्त्रे द्वितीयं प्रबन्धमहंरचितवान् । तस्मिन् प्रथमंयाज्ञवल्क्यस्मृतिव्यवहारमयूखयोर्मूलं संशोध्य मुद्रयित्वा तयोराङ्गभाषायांटिप्पनीसहितमर्थप्रकाशनमकरवम् । तथाच तस्मिंश्चत्वारि परिशिष्टानि समगृह्णां येष्वेकोनविंशतिस्मृतिसापिण्ड्यविवाहदत्तकप्रकरणप्रतिष्ठोत्सर्गाः संक्षेपतोयथामति विवृताः । तथापि सर्वासांस्मृतीनामाद्या मूलभूता च या मनुस्मृतिस्तस्या उज्जीवनंमयावश्यंकर्तव्यमिति बहुकालंमनस्यासीत्तदनुरोधेन यत्नोऽप्यकारि । किन्त्वनभिज्ञलोकप्रमादेन प्राचीनपुस्तकानां बहुशोनष्टत्वात्कथमप्यवशिष्टानां बहुशोद्वीपान्तरंगतत्वाच्च पुस्तकप्रापणे मयाऽनल्पआयासोऽन्वभावि । तथापि नास्त्युद्यमवतां किमप्यसाध्यंनामेति श्रद्दधानः द्रव्यकालव्ययमगणयंस्तत्तत्स्थलेभ्योविद्वत्साहाय्येन पुस्तकानि प्राप्य मुद्रणउद्युक्तोऽभवम् । अनेकटीकायुतमेतादृशंपुस्तकं दृष्टिपथंनावतरतीति मनुस्मृतिप्रख्यापनेऽपूर्वोऽयंयत्नइति वदन् क्षन्तव्योयंजनोदयालुभिर्विद्वद्भिः ।

मुद्रणोपक्रमकाले प्रसिद्धक्षेत्रादिषु निवसतांविदुषांसकाशाद्यानि मानवधर्मशास्त्रपुस्तकानि समाहृत्य यथामति मूलेषु प्रामाणिकपाठान्निश्चित्यायंग्रन्थोमुद्रितस्तानि निर्दिश्यन्ते ।

अ—बंगालस्थएशियाटिकसोसैटिनामकपर्षदः पुस्तकालयात्प्रापितम् । एतत्कुल्लूकभट्टकृतटीकया सहितंवर्तते ।

क—उज्जनीनगरात्सोरटीबावेत्युपधाधारिभीरामभाऊशर्मभिः प्रेषितम् । इदन्तुमूलमेव ।

ख—उज्जनीनगरादाठवलेइत्युपान्ह्वभिर्नानासाहेबइतिनामभिः प्रेषितम् । इदंरामचन्द्रकृतटीकोपेतम् ।

ग, घ, ङ, च, — एतत्पुस्तकचतुष्टयंश्रीप्रयागक्षेत्रान्मुनशीतिप्रसिद्धसंज्ञाधारिभिर्हनूमानप्रसादनामभिः प्रेषितम् । एतन्मूलमेव ।

छ—खण्डवाइतिप्रसिद्धग्रामाद्रावबहादुरइत्युपपदधारिभिः खेरेत्युपनामकबल्लाळात्मजवासुदेवशर्मभिः प्रेषितम् । एतन्मेधातिथिभाष्यसमेतम् ।

ज, झ, —एतत्पुस्तकद्वयंमिरजइत्याख्यनगरान्महाबलोपनामकवामनभट्टैः प्रेषितम् । एतन्मूलमेव ।

ञ—सातारइतिप्रसिद्धनगरसन्निहितयौतेश्वरस्थानाद्दविडाख्यशङ्करात्मजरामचन्द्राभिधैः प्रेषितम् । इदमपि मूलमेव

ट, ठ, ड—एतत्पुस्तकत्रितयंपुण्यपत्तनाज्जोशीत्युपनामकबलवन्तरावैः प्रेषितम् । मूलमेव ।

ढ—अहमदाबादनामकनगराच्छेटेतिसंज्ञाधारिभिर्बेचरदासाभिधैः प्रेषितम् । मूलमेव

ण—श्रीशम्भुमहादेवक्षेत्रादिन्दापुरस्थजावडेकरोपनामकगोपालात्मजबलवन्तरावैः प्रेषितम् । मूलमेव ।

त—बङ्गालस्थएशियाटिकसोसैटिनामकसभायाः पुस्तकालयात्प्रापितम् । मूलमेव

थ—आष्टेनामकग्रामाल्लिमयेइत्युपनामकधोंडदेवात्मजगोविन्दाभिधैः प्रेषितम् । मूलमेव ।

द—लन्दननगरात्प्रापितम् । मूलमेव ।

ध—कालिकाताराजधान्यांमुद्रितम् । कुल्लूकभट्टकृतटीकासमवेतम् ।

न—मिरजइत्याख्यनगरान्महाबलेोपनामकवामनभट्टैः प्रेषितम् । राघवानन्दकृतटीकासहितम् ।

ब—बडोदाराजधान्याः सकाशाद्दापटेोपनामकसदाशिवात्मजवासुदेवैः प्रेषितम् । कुल्लूकभट्टकृतटीकासमेतम् ।

भ—जयपुरइत्याख्यनगराद्विडाख्यपण्डितलक्ष्मीनाथशास्त्रिभिः प्रेषितम् । राघवानन्दकृतटीकासमेतम् ।

म—मद्रासइत्याख्यस्थानाद्दिवाणबहादुरआररघुनाथरावाभिधैः प्रेषितम् । नन्दनकृतटीकायुक्तम् ।

य — पुण्यपत्तनाद्देडगांवकरोपनामकगणेशाभिधज्योतिर्विदांसकाशाज्जोशीत्युपनामकबलवन्तरावशर्मभिर्गृहीत्वा प्रहितम् मूलमेव

र—पुण्यपत्तनाद्गोखलेइत्युपनामकभट्टनारायणाभिधैः प्रेषितम् । मूलमेव ।

ल—जयपुरइत्याख्यनगराद्विडोपनामकलक्ष्मीनाथशास्त्रिभिः प्रेषितम् । मूलमेव ।

व—इदंतुलकीयम् । सर्वज्ञनारायणटीकासमेतम् ।

श अथवा क्ष —आष्टेनामकग्रामाल्लिमयेइत्युपाह्वधोंडदेवात्मजगोविन्दशर्मभिः प्रेषितम् । राघवानन्दकृतटीकासहितम् ।

एतानि पुस्तकानि समवलोक्य मूलगतान्पाठभेदानहं निश्चितवान् । तेचटिप्पनीरूपेणप्रदर्शिताः ।

अथ टीकापाठभेदास्तावत्कथ्यन्ते । भट्टमेधातिथिकृतव्याख्यायाः पाठभेदावङ्गलिपिपुस्तस्काद्गृहीताः । तेषु कतिपयाअस्मिन्ग्रन्थेऽधस्ताट्टिप्पनीरूपेण दत्ताः । अवशिष्टाश्चान्ते निवेशिताः । इण्डियाआफिसपुस्तकालयप्राप्तादष्टममेधातिथिरितिसंज्ञितपुस्तकाद्गृहीताः कतिपयाः पाठभेदास्तथैव टिप्पनीरूपेण दत्ताः सन्ति ।

कुल्लूकभट्टकृतटीकायाः पाठभेदाअसंज्ञितपुस्तकाद्गृहीतामूलएव दत्ताः । डाक्टरपिटरसननामभ्योलब्धे पुस्तके दृष्टानि पाठान्तराण्यग्रे दत्तानि सन्ति ।

राघ० २,३,४ एषु पाठभेदामूलग्रन्थएव दत्ताः । तथा च द्वितीयराघवानन्दपुस्तकस्यावशिष्टाः पाठास्तथैवपञ्चमपुस्तकस्थाःपाठभेदाश्चास्य ग्रन्थस्यान्ते विनिवेशिताः ।

नन्दनकृतव्याख्यायाः पाठान्तराण्यग्रे नियोजितान्येवसन्ति ।

टीकापुस्तकानि प्रेप्सोर्मे तदर्थंयत्नोऽनुपारतएव । अतऊर्ध्वंपुस्तकान्तराण्युपलभेय पाठभेदांश्च पश्येयंचेत् तानस्यमागामिन्यां मुद्रणावृत्तौ दर्शयिष्यामीति दृढमाशासे ।

इदानीं टीकापाठभेदाः केभ्योपुस्तकेभ्यो निश्चितास्तत्कथ्यते । आसुटीकास्वतिप्राचीनामेधातिथिकृता मनुभाष्यनाम्नी टीका वर्तते । तस्याः पुस्तकानि कालिकातावाराणसीन्दूरपुण्यपत्तनमुम्बापुरीलन्दनेभ्यः समानीतानि । तथापि सायंमेधातिधिभाष्यंनाद्याप्युपलब्धमित्येतत्पुस्तकदर्शनाद्व्यक्तंभविष्यति । अस्यांटीकायांयत्र [ ] एतादृशंचिन्हंवर्तते तत्र निर्दिष्टाङ्कसंमितावर्णाभ्रष्टाउपलब्धेषु च पुस्तकेषु न कस्मिंश्चिदपि लभ्यन्तइति विभावनीयम् । कालिकातानगर्या एशियाटिकसोसैटिनामकपर्षदः पुस्तकसङ्ग्रहालयस्थं (आ आ) इतिसंज्ञकंपुस्तकंख्रिस्तशकस्य १८२५ तमात्संवत्सरात्प्राग्लिखितमिव दृश्यते । तथा तस्यामेव नगर्यांसंस्कृतपाठशालायामन्यत्पुस्तकंवर्तते तत्पूर्वपुस्तकादेव प्रतिलिखितमिति तयोस्तुलनयाःस्पष्टमवभासते । तस्मिन्नप्येतादृशानि खण्डितस्थलानि सन्ति । तत्पुस्तकद्वयंकस्मात्पुस्तकात्प्रतिलिखितमितिनिर्णेतंसम्प्रति साधनंनोपलभ्यते । मेधातिथिभाष्यपुस्तकानामतीवविरलतया लब्धपुस्तकानां पाठनिश्चयेऽपर्याप्ततया च तस्मि-

नु शङ्कास्थानानि कतिचिद्वर्तन्तइतिजानन्नप्यकरणान्मन्दकरणंश्रेयइतिन्यायेन यथासंभवंशोधितस्य ग्रन्थस्य मुद्रणममुद्रणाद्वरमिति मनस्यकरवम्। एतद्भाष्यस्योद्धारे यः कोऽपि प्रवर्त्स्यति तस्य मदीययत्नात्किममि साहाय्यं स्याच्चेदात्मानंकृतार्थं मंस्ये। अस्याष्टीकायाः संशोधने विद्वन्मणीनांबोडसोपनामकराजारामशास्त्रिणामतीव साहाय्यं जातम्।

सर्वज्ञनारायणकृतटीकायास्त्रीणि पुस्तकानि लब्धानि। तेषांसमवलोकनात्प्रस्तुतटीका निश्चिता। तानि यथा

सर्व० १ एतत्स्वकीयंपुरातनटीकापुस्तकंगुर्जरदेशात्संप्राप्तम्। तत्तुप्रायः द्विशतवर्षेभ्योऽपि पुरातनमिति दृश्यते।

सर्व० २ एतज्जयपुरनगराद्द्रविडोपनामभिर्विद्वन्मणिलक्ष्मीनाथशास्त्रिभिर्लेखयित्वा प्रेषितम्।

सर्व० ३ इदंश्रीकाशीक्षेत्राद्बोडसोपधानैः कैलासवासिविष्णुशर्मभिः प्रेषितम्। तस्य प्रथमभागोऽतिप्राचीनोवर्तते। सतुप्रायस्त्रिशतवर्षेभ्योऽपि पुरातनइति पत्राक्षराभ्यामवभासते। तस्य आद्यानि पञ्चाशत्पत्राणि विनष्टानि। चरमभागोनूतनमालेख्य प्रेषितः। एते द्वेअन्त्ये पुस्तके गुर्जरदेशादेव प्रथमतः प्राप्तेइत्यनुमीयते।

कुल्लूककृतटीकायाः पुस्तकपञ्चकं लब्धम्। तद्यथा

कु० १ इदंस्वकीयंपुस्तकंहेगिष्टइत्युनामकहरशेटात्मजबापूशेटनामभीरामदासात्मजमहन्तमथुरादासनाम्नांपुस्तकादवतार्य स्वकीयशिलायन्त्रे मुद्रितंशालिवाहनशकाब्दाः १७८०।

कु० २ वर्णचिन्हितग्रन्थेष्वस्य अ इतिसंज्ञा वर्तते। तस्य उपरि वर्णनं कृतमेव।

कु० ३ नगरकरेत्युपनामकरावबहाद्दुरदाजीसाहेबनामभिः प्रेषितंतस्यास्मिन्पुस्तके क्वचित्स्थलेषु निवेशः कृतः।

कु० ४ इदंपुस्तकंएच्टीकोलब्रुकनाम्नाम्। तदिण्डियाआफिसपुस्तकालयाधिकारिभ्यः डाक्टररेनहोल्डरास्टनामभ्यउपलब्धम्। एतन्मदीय पुस्तकेन प्रायः सदृशम्।

कु० ५ मुम्बापुरस्थएल्फिन्स्टननामकपाठशालासंस्कृताध्यापकेभ्यः डाक्टरपिटरसननामभ्यः प्राप्तम्।

राघवानन्दकृतटीकायाः पञ्चपुस्तकानि लब्धानि तानि यथा

राघ० १ वर्णचिन्हितपुस्तकेष्वस्य पुस्तकस्य भइतिसंज्ञावर्तते तपदरिवर्णितमेव।

राघ० २ इदंपुस्तकंबुन्दीश्वरपुस्तकालयात् डाक्टरपिटर्सननामभिरानीतंदत्तंच। अस्य प्रायः राघवानन्दप्रथमपुस्तकेनसादृश्यंवर्तते। एतत्स्थपाठदर्शनेऽष्टमाध्यायस्य प्रथमश्लोकादारभ्य पञ्चाधिकशतश्लोकपर्यन्तंचतुर्थराघवानन्द इतिसंज्ञाप्रमादाद्दत्ता।

राघ० ३ संज्ञितग्रन्थेष्वस्य पुस्तकस्य नइतिसंज्ञा वर्तते। अस्य चतुर्थराघवानन्दस्य च बाहुल्येन सादृश्यादेकस्मादेवपुस्तकादेतद्द्वयं लिखितमथवैकस्मादन्यल्लिखितमिति भाति।

राघ० ४ संज्ञितग्रन्थेष्वस्य पुस्तकस्य शवा क्षवा संज्ञा वर्तते।

राघ० ५ इदंपुस्तकंकालिकातानगर्यांशोभाबाजारवासिभ्योराजाकोमलकृष्णबहादुरनामभ्योन्यायरत्नेत्युपपदधारिभिः पण्डितमहेशचन्द्रनामभिरानीय दत्तम्।

नन्दनकृतटीकापुस्तकद्वयंलब्धम्। तद्यथा

नं० १ एत्पस्तकंत्रावणकोरेश्वरैर्महाराजाधिराजरामवर्मभिः प्रेषितम्। तत्तु तैरेव संशोध्यास्मिन्पुस्तके निवेशनार्थंदत्तम्।

नं० २ संज्ञितपुस्तकेष्वस्य पुस्तकस्य मइतिसंज्ञा वर्तते। इदंदिवाणबहादुरोपपदधारिभिः आररघुनाथरावैः शर्मण्यदेशे

श्रीगणेशाय नमः॥ श्रीलक्ष्मीकेशवौ जयतः

[स्वयंभुवे नमस्कृत्य ब्रह्मणेऽमिततेजसे ॥ मनुप्रणीतान्विविधान्धर्मान्वक्ष्यामि शाश्वतान् ॥ १§ ॥]

मनुमेकाग्रमासीनमभिगम्य महर्षयः ॥ प्रतिपूज्य यथान्यायमिदंवचनमब्रुवन् ॥ १ ॥

(१) मेधातिथिकृतमनुभाष्यम्

श्रीकृष्णायनमः ॥ वेदान्तवेद्यतत्त्वाय जगच्चितयहेतवे । प्रध्वस्ताशेषदोषाय परस्मै ब्रह्मणे नमः ॥ १ ॥ चतुर्भिः पद्यश्लोकैर्विशिष्टकर्तृत्वमनन्यप्रमाणवेद्यपुरुषार्थोपदेशकत्वंचास्य शास्त्रस्य प्रतिपाद्यते प्रतिष्ठार्थम्। प्रतिष्ठिते हि शास्त्रे कर्तृभिः स्वर्गयशसी प्राप्येते यावत्संसारमनपायिनी च भवतः शास्त्रं च प्रतिष्ठां लभते । यदि तत्र केचिदध्ययनश्रवणचिन्तनादिषु प्रवर्तन्ते नच बुद्धिपूर्वव्यवहारिणोऽध्ययनादिष्वनवधृतप्रयोजनाः प्रवर्तितुमर्हन्त्यतःपुरुषार्थसिद्धावुपायपरिज्ञानार्थमिदंशास्त्रमारभ्यतइत्येतत्प्रतिपादनार्थं श्लोकचतुष्टयमाचार्यः पपाठ । नचवाच्यमन्तरेणैवादितः प्रयोजनवचनं वक्ष्यमाणशास्त्रपौर्वापर्यपर्यालोचनयैवेदंपर्यवस्यामः कितत्प्रतिपादनार्थेन यत्नेनेति किंच उक्तमपि प्रयोजनंयावत्परस्तान्नावमृष्टंतावन्न निश्चीयते नहि सर्वाणि पुरुषवचांस्यर्थेनिश्चयनिमित्तम् नचैषनियमः सर्वत्रप्रयोजनपरिज्ञानपूर्विकैव प्रवृत्तिः स्वाध्यायाध्ययनेऽतन्निबन्धनायाः प्रवृत्तेर्दर्शनात्। पौरुषेयेष्वपि ग्रन्थेषु नैव सर्वेषु प्रयोजनाभिधानमाद्रियते तथाहि भगवान्पाणिनिरनुक्त्वैवप्रयोजनम्अथ*शब्दानुशासनमिति सूत्रसंदर्भमारभते । अत्रोच्यते । आरम्भेऽनवधृतप्रयोजनानैव प्रथमतोग्रन्थमुपाददीरन् । अनुपादानाच्च कुतः शास्त्रंकात्स्न्र्येन पर्यालोचयेयुः। किंच पौर्वापर्यपर्यालोचनया योऽर्थोबुद्धिगोचरमावहति सएवत्वादितः संक्षेपेणोच्यमानः सुग्रहोभवति । तदुक्तम् । इष्टं हि विदुषांलोके समासव्यासधारणमिति । तत्तूक्तमपि न निश्चीयते पौरुषेयेभ्योवाक्येभ्योऽर्थनिश्चयाभावात् एवमेवायंपुरुषोवेदेतिभवति प्रत्ययोनत्वेवमर्थइति नात्र विवदामहे निश्चयोनास्ति नास्तीतिग्रन्थगौरवप्रसङ्गात्। अर्थसंशयेऽपि प्रवृत्तिसिद्धौ नियतविषयसंशयोत्पत्तिर्नान्तरेण प्रयोजनवचनम् । अनुक्ते हि किमिदंधर्मशास्त्रमर्थशास्त्रंकाकदन्तपरीक्षादिलक्षणरूपंवेत्यपि संशयः स्यात्। अभिहिते तु प्रयोजनेऽयंतावदेव महाश्रेयसः पन्थानंदर्शयामीति। न च मे प्रवृत्तस्य काचित्क्षतिरस्ति भवतु पर्यालोचयामीति प्रवृत्तिसिद्धिः। या तु स्वाध्यायाध्ययनेप्रवृत्तिः साऽऽचार्यप्रयुक्तस्य न स्वाधिकारप्रतिपत्त्या न हि तदानीं बालत्वात्स्वाधिकारंप्रतिपत्तुमुत्सहते परप्रयुक्त्यैव च प्रवृत्तिसिद्धिः। नाधिकारप्रतिपादनेनापि चावेद्यते । अतस्तत्र प्रवृत्तस्य प्रयोजनमर्थावबोधोऽतश्च प्रवृत्तिः। इह तु योऽनधीत्य द्विजोवेदमन्यत्र कुरुते श्रममिति गृहीतवेदस्याध्ययनाधिकारः। तदानींचाव्युत्पन्नबुद्धित्वात्प्रयोजनमन्विच्छति। भगवतः पुनः पाणिनेरतिसंक्षिप्तानि सूत्राणि नैवार्थान्तराभिधानपरत्वाशङ्का। तत्राकुमारंच यशः पाणिनेः प्रख्यातमिति सुप्रसिद्धप्रयोजनत्वादनुपन्यासः। अयंतु विततोग्रन्थोऽनेकार्थवादबहुलः सर्वपुरुषार्थोपयोगी तत्र सुखावबोधार्थे प्रयोजनाभिधाने न किंचित्परिहीणम्। द्वयेच प्रतिपत्तारोन्यायप्रतिसरणाः प्रसिद्धिप्रतिसरणाश्च। तत्र मनुर्वै यत्किंचावदत्तद्भेषजमिति ऋचोयजूंषि सामानि मन्त्राआथर्वणाश्च ये सप्तर्षिभिस्तु यत्प्रोक्तं-

---

§ अयंश्लोकः क, ख, ग, घ, च, ज, झ, ञ, ट, ठ, ड, ढ, त, थ, न, भ, य, र, ल, चिन्हितेषु पुस्तकेषु दृष्टः। तस्य व्याख्यानं सर्वज्ञनारायणराघवानन्दाभ्यां कृतंतृतीयचतुर्थपृष्ठयोः क्रमेण द्रष्टव्यम् ॥

* वस्तुतस्तु भाष्यारम्भइदम्।

तत्सर्वंमनुरब्रवीदित्याद्यर्थवादेतिहासपुराणादिभ्यः प्रख्यातप्रभावोलोकेतत्प्रसिद्ध्यैव वा निरूपितमूलपातेन प्रजापतिनैतत्प्रणीतमित्येतावतैव श्रोत्रियाः प्रवर्तन्त इति तान्प्रति कर्तृविशेषसंबन्धोऽपि प्रवृत्त्यङ्गम्। अतएवच प्रश्नप्रतिवचनभङ्ग्या प्रयोजनोपन्यासोमहर्षयः प्रष्टारः प्रजापतिर्वक्ता धर्मलक्षणश्चार्थोन लोकावगम्यः शास्त्रैकगोचरोऽयम्। यत्र महर्षयोऽपि सशेरतइत्येवंपरादेशोऽपि सतैः पृष्टइति नाहंपृष्टइति तथाऽऽत्मनोब्रह्मणोऽकृत्रिमप्रतिमत्वंचेत्येवमादिस्तद्युत्पादनार्थोयुक्तः-शास्त्रारम्भइति श्लोकचतुष्टयस्य तात्पर्यम्। यथा चानेन पुरुषार्थोपदेशपरता शास्त्रस्योच्यते तथा पदार्थप्रयोजनात्प्रतिपादयिष्यामः। तत्र मनुमभिगम्य महर्षयइदंवचनमब्रुवन् धर्मान्नोवक्तुमर्हसीति सपृष्टः प्रत्युवाच। श्रूयतामित्येवं प्रश्नप्रतिवचने एकार्थप्रतिपादके तात्पर्येण भवतः। अतोधर्माअत्रप्रतिपाद्यन्तइत्युक्तंभवति। धर्मशब्दश्च लोके श्रेयःसाधने प्रत्यक्षादिभिर्लौकिकैः प्रमाणैः शब्दादितरैरविहिते प्रयुज्यते। अतः सश्रूयतामिति संबन्धे विशिष्टपुरुषार्थसाधनत्वमुक्तं भवति। मनुर्नाम कश्चित्पुरुषविशेषोऽनेकवेदशाखाध्ययनविज्ञानानुष्ठानसंपन्नः स्मृतिपरंपराप्रसिद्धस्तमभिगम्याभिमुख्येन तत्समीपंगत्वा व्यापारान्तरत्यागेन यदृच्छया संगम्य। अनेनचाभिगमनप्रयत्नेन पृच्छ्यमानवस्तुगौरवंवक्तुश्च प्रामाण्यंख्याप्यते। नह्यकुशलः प्रतिवचने यत्नेन पृच्छ्यते। आगत्यैकाग्रमासीनमेकाग्रं स्थितमेकाग्रंसन्तंतत्वत्र बृस्याद्युपवेशनमासनमनुपयोगात्। आसनेन स्वस्थवृत्तिता लक्ष्यते। तथाभूतः प्रतिवचनसमर्थोभवति। अभिगम्येति केवलएव मनुः कर्मप्रश्नक्रियायास्त्वेकाग्रमासीनमिति विशेषणम्। कुशलप्रश्नानुरूपकथाप्रवृत्त्यादिनैकाग्रमविक्षिप्तमनस्कं ज्ञात्वा प्रश्नश्रवणे दत्तावधानमिदंवचनमब्रुवन्। एकाग्रशब्दोरूढ्या निश्चलतामाह। प्रत्याहारेण परित्यक्तरागादिदोषसंसर्गस्य विकल्पनिवृत्तौ तत्त्वावबोधचिन्तायांमनसः स्थैर्यमेकाग्रता। तथाभूतएव च संनिहितरूपशब्दादिविषयानवधारणे योग्योभवति न सदसद्विकल्पयुक्तः। अथवा योगतोऽग्रशब्दोमनसि वर्तते ऽर्थग्रहणेचक्षुरादिभ्योऽग्रगामित्वात्। प्रथमप्रवृत्तियुक्तः पुरःसरोलोकेऽग्रउच्यते। एकस्मिन्ध्येये ग्राह्ये वाऽग्रमस्येतिविग्रहोव्यधिकरणानामपि बहुव्रीहिर्गमकत्वात्। अत्रापि व्याक्षेपनिवृत्तिरेवैकाग्रता। प्रतिपूज्य यथान्यायम् न्यायः शास्त्रविहिता मर्यादा तामनतिक्रम्य यादृशी शास्त्रेणाभिवादनोपासनादिका गुरोः प्रथमोपसर्पणे पूजा विहिता तया पूजयित्वा भक्त्यादरौ दर्शयित्वा। महर्षयः ऋषिर्वेदस्तदध्ययनविज्ञानतदर्थानुष्ठानातिशययोगात्पुरुषेऽप्यृषिशब्दः महान्तश्च यऋषयश्च तेषामेव गुणानामत्यन्तातिशयेन महान्तोभवन्ति यथा युधिष्ठिरः श्रेष्ठतमः कुरूणामिति अथवा तपोविशेषात्पूजाख्यातिविशेषाद्वा महान्तः। इदंवचनमब्रुवन् उच्यतेऽनेनेतिवचनंवक्ष्यमाणंद्वितीयश्लोकप्रश्नवाक्यमिति। तदेव प्रत्यासन्नत्वादिदमिति प्रतिनिर्दिशति। येषामपि प्रत्यक्षवस्तुप्रतिनिर्देशकइदंशब्दस्तेषामपि बुद्धिस्थत्वात्प्रश्नस्य प्रत्यक्षता। अथवोच्यतइतिवचनंपृच्छ्यमानंवस्त्वब्रुवन्। वाक्पक्षइदं वाक्यमुच्चारितवन्तः। कर्मसाधने तु वचनशब्दइदमपृच्छन्। द्विकर्मकश्चतदाब्रूञ्। अकथितकर्मणा मनुना तिसृणांक्रियाणांमनुःकर्म ॥ १ ॥

(२) सर्वज्ञनारायणकृतमन्वर्थनिबन्धः

ॐनमःश्रीमहागणपतये ॥ अनेकशाखस्मृतिपारदर्शिसर्वज्ञनारायणनिर्मितेन ॥ मनुस्मृतेरर्थनिबन्धनेन बुधः स्वधर्मेषु धियंविधत्ते ॥ १ ॥ इहहि श्रुतिभ्यएवातिशयिततपःप्रज्ञाध्ययनप्रकर्षवत्परमाखिलपुरुषार्थसाधनसमधिगमः संभवन्नपि तासांदुरुहविप्रकीर्णार्थतया संभावितैकदेशोत्सादतया च प्रसिद्धपदप्रकरणादिशब्दबोधसाधनोपेतोत्सन्नशाखार्थस्मारकस्मृत्यादिसापेक्षएवार्वाचीनानामुदेतीति। निखिलस्य लोकस्य भावितपःप्रज्ञाध्ययनापकर्षविमर्शकारितकरुणापरवशः परमेष्ठी धर्मशास्त्रमेतत्प्रणीय मनुमध्यापयामास। मनुश्च भृगुमध्याप्य तन्मुखेन महर्षीनग्राहयामास। ततः पुनः सएव भृगुः

वेद नेतरइति । सकलवेदार्थादिमननान्मनुंमहर्षयइदंद्वितीयश्लोकवाक्यरूपमुच्यतेऽनेनेतिवचनमब्रुवन् । श्लोकस्यादौ मनुर्निर्देशोमङ्गलार्थः परमात्मनएव संसारस्थितये सार्वज्ञ्यैश्वर्यादिसंपन्नमनुरूपेण प्रादुर्भूतत्वात् तदभिधानस्य मङ्गलातिशयत्वात् । वक्ष्यति हि एनमेकेवदन्त्यग्निमनुमन्ये प्रजापतिमिति । एकाग्रंविषयान्तराव्याक्षिप्तचित्तम् । आसीनंसुखोपविष्टमीदृशस्यैवमहर्षिप्रश्नोत्तरदानयोग्यत्वात् । अभिगम्यअभिमुखंगत्वा । महर्षयोमहान्तश्चतऋषयश्चेतितथा । प्रतिपूज्य पूजयित्वा । यद्वा मनुना पूर्वंस्वागतासनदानादिना पूजितास्तस्य पूजांकृत्वेति प्रतिशब्दादुन्नीयते यथान्यायंयेन न्यायेन विधानेन प्रश्नः कर्तुंयुज्यते प्रणतिभक्तिश्रद्धातिशयादिना वक्ष्यतिच नापृष्टःकस्यचिद्ब्रूयान्नचान्यायेन पृच्छतइति । अभिगम्य प्रतिपूज्याब्रुवन्नितिक्रियात्रयेऽपिमनुमित्येवकर्म । अब्रुवन्नित्यत्राकथितकर्मता ब्रुविधातोर्द्विकर्मकत्वात् ॥ १ ॥

(४) राघवानन्दसरस्वतीकृतमन्वर्थचन्द्रिका.

श्रीगणेशाय नमः ॥ आनन्दमजरंब्रह्म सर्वानर्थविवर्जितम् ॥ गुरुंच नत्वा रचिता राघवानन्दभिक्षुणा ॥ १ ॥ मन्वर्थकुमुदग्रन्थिविकासनपटीयसी । चन्द्रिकास्तु मुदे विद्वद्धृदयाम्भोधिवर्धिनी ॥ २ ॥ भृगुणोक्तपदार्थोऽत्र वाक्यार्थमितये मया । विविच्यते समासेन श्रुतिन्यायानुसारिणा ॥ ३ ॥ कुल्लूकनारायणसंमतानि गोविन्दमेधातिथिवृद्धतानि ॥ ज्ञात्वा च वेदादिकमाकलय्य मनोर्मनःस्थंप्रकटीकरोमि ॥ ४ ॥ तत्र सर्वेभ्योमुनिवाक्येभ्योऽतिशयेनादर्तव्यंमनुवाक्यमित्यत्र श्रुतिस्मृतयः । तद्यथा । यद्वन्मनुरवदत्तद्भेषजंभेषजमितिश्रुतिः (अ)। स्मृतिरपि वेदार्थोपनिबन्धत्वात्प्राधान्यंहि मनोः स्मृतम् । मन्वर्थविपरीता तु या स्मृतिः सा न शस्यते ॥ तावच्छास्त्राणि शोभन्ते तर्कव्याकरणानिच । धर्ममोक्षोपदेष्टा तु मनुर्यावन्न दृश्यतइतिबृहस्पतिः । भारतेऽपि पुराणंमानवोधर्मः साङ्गोवेदश्चिकित्सितम् । आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिरिति । चिकित्सितंभिषक्शास्त्रं हेतुभिः प्रतिकूलतर्कैर्न हन्तव्यानि नान्यथयितव्यानि किंतु मीमांसितव्यानि । तथाच वक्ष्यति आर्षधर्मोपदेशंच वेदशास्त्राविरोधिना । यस्तर्केणानुसंधत्ते सधर्मंवेद नेतरः ॥ तर्केण मीमांसया अतश्च हैतुकस्तर्कीतिभेदेनोपादानंतार्किणः । तथाचाह मीमांसासंज्ञकस्तर्कः सर्ववेदसमुद्भवः । सोतोवेदोरुतांप्राप्तः काष्ठाम्बुलवणात्मवदिति ॥ अतएवात्र यद्वाक्यान्तरमुपादीयते न तत्प्रामाण्यदार्ढ्याय किंतु व्याख्यानदार्ढ्याय । अत्रर्षिभिः साकंमनोर्यः संवादोवृत्तोनिषेकादिःश्मशानान्तेष्ववान्तरजातिसहितानांचतुर्णांवर्णानामाश्रमाणांच तंमनुवचनमङ्गीकृत्य वक्तुंप्रववृते भगवान्भृगुः स्वयंभुवे नमस्कृत्येतिपञ्चभिः । स्वयंभुवे स्वभवनेऽन्यानपेक्षाय स्वयंदासास्तपस्विनइतिवत् अनादयइतियावत् । ब्रह्मणे बृहते अमिततेजसेअमितानि सृष्टिस्थितिसंहरणे तेजांसि सामर्थ्यानि यस्य तस्मै शाश्वतानवेदोक्तत्वेन नित्यान्॥१॥

[मनुमिति ।] एकाग्रंएकेषुधर्मवक्तृप्रधानेषुअग्र्यंश्रेष्ठंएकाग्रचित्तंवा । यथान्यायम् । न्यायोऽत्रक्षत्रियेषुब्राह्मणादीनांननमस्कारः किंतु वाक्पूजा तमनतिक्रम्य पृष्टवन्तइत्यर्थः ॥ १ ॥

(५) नन्दनकृतमनुव्याख्यानम्.

श्रीगणेशाय नमः ॥ मनुमिति मनुः स्वायंभुवस्तथाच वक्ष्यति स्वायंभुवोमनुर्धीमानिदं शास्त्रमकल्पयदिति । एकाग्रमवहितम् अनेन वक्ष्यमाणेष्वर्थेषु संदेहराहित्यमभिप्रेतम् । इदं वक्ष्यमाणम् ॥ १ ॥

(६) रामचन्द्रकृतमनुभावार्थचन्द्रिका.

ॐ श्रीसिद्धिगणेशाय नमः ॥ गङ्गांगणेशंगरुडाधिरूढंसिद्धेश्वरींसिद्धिसरस्वतींच । नमामि भक्त्या परया च नित्यं

(अ) यद्वैकिञ्चनमनुरवदत्तद्भेषजम् ॥

विश्वेश्वरंविश्वविबोधरूपम् ॥ १ ॥ श्रुत्वा कुल्लूक भट्टींच दृष्ट्वा चैव मिताक्षराम् । कृता वै रामचन्द्रेण मनुभावार्थचन्द्रिका ॥ २ ॥ हनूमानेव जानाति श्रमंसागरलङ्घने । तथैव ग्रन्थकर्तैव ग्रन्थकर्तुः परिश्रमम् ॥ ३ ॥ ये केचिदत्रसगुणानपि दूषयन्तःसन्तोऽप्यसन्तइति ते न विचारणीयाः । ये तु प्रगल्भमतयः कृतसारविज्ञालोकेषु ते कृतिमिमामवधारयन्तु ॥ ॥ ४ ॥ ऋषीणांसमवाये भृगुरुवाच मनुप्रणीतान्स्वायंभुवेन मनुना प्रणीतान्प्रवर्तितान्धर्मान्वक्ष्यामीति । कीदृशान्धर्मान्शाश्वतान्पारंपर्यक्रमागतान् पुनःकीदृशान् विविधान्षड्विधान् तद्यथा वर्णधर्मः १ आश्रमधर्मः २ वर्णाश्रमधर्मः ३ गुणधर्मः ४ निमित्तधर्मः ५ साधारणधर्मश्चेति ६ । तत्रवर्णधर्मः कथ्यते नित्यंमद्यंब्राह्मणोवर्जयेदित्यादिः । आश्रमधर्मः अग्नीन्धनभैक्ष्यचर्यादिः । वर्णाश्रमधर्मः पालाशोदण्डोब्राह्मणस्येत्येवमादिः । गुणधर्मः शास्त्रीयाभिषेकादिगुणयुक्तस्यराज्ञः प्रजापालनादिः । निमित्तधर्मः विहिताकरणप्रतिषिद्धसेवननिमित्तंप्रायश्चित्तम् । साधारणधर्मः अहिंसादिः नाहिंस्यात्सर्वाभूतानीतिश्रुतेस्तथाशौचाचारांश्चशिक्षयेदित्यादिः । किंकृत्वा ब्रह्मणे व्यापकाय नमस्कृत्य । कीदृशाय ब्रह्मणे स्वयंभुवे स्वयंभवतीति स्वयंभु तस्मै स्वयंभुवेऽजन्मत्वात् । पुनःकीदृशाय अमिततेजसे परिपूर्णतेजसइत्यर्थः । मनुमिति महर्षयः श्रवणधारणयोग्याएकाग्रमेकान्तआसीनंमनुमभिगम्य प्राप्येदंवचनंवक्ष्यमाणलक्षणमब्रुवन्नुक्तवन्तः । किं कृत्वा यथान्यायंप्रतिपूज्यपूजयित्वा यथान्यायंयेन यादृशी पूजा कर्तुंशक्यते तेन तथेति ॥ १ ॥

भगवन्सर्ववर्णानांयथावदनुपूर्वशः ॥ (अ) अन्तरप्रभवानांच धर्मान्नोवक्तुमर्हसि ॥ २ ॥

[जरायुजाण्डजानांच तथासंस्वेदजोद्भिदाम् ॥ भूतग्रामस्य सर्वस्य प्रभवंप्रलयंतथा ॥ १ ॥
आचारांश्चैव सर्वेषां कार्याकार्यविनिर्णयम् ॥ यथाकामं(x)यथायोगंवक्तुमर्हस्यशेषतः ॥ २ ॥ ऽऽ]

(१) मेधातिथिः । ऐश्वर्यौदार्ययशोवीर्यादिभगशब्दः सोस्यास्तीति मनुः । तेन संबोधनंभगवन्निति । वर्णशब्दश्च तिसृषु ब्राह्मणादिद्विजातिषु वर्तते । सर्वग्रहणंशूद्रावरोधार्थम् । इतरथा महर्षीणांपृष्टत्वात् । त्रैवर्णिकविषये च प्रश्नः कृतः स्यादनंतरंतन्मध्यद्वयोर्जात्योः संकरादेकाप्यपरिपूर्णा जातिः अन्तरे प्रभवउत्पत्तिर्येषांतेऽन्तरप्रभवाःअनुलोमप्रतिलोममूर्धावसिक्ताम्बष्ठक्षत्तृवैदेहिकादयः । न हि ते मातापित्रोरन्यतरयापि जात्या व्यपदेष्टुंयुज्यन्ते ॥ यथा रासभाश्वसंयोगजः खरोन रासभोनाश्वोजात्यन्तरमेव । अतोवर्णग्रहणेनाग्रहणात्पृथगुपादीयन्ते । नन्वनुलोमामातृजातीयाइष्यंते । नेति ब्रूमः । सदृशानेवतानाहुरिति मातृजातिसदृशास्तेतज्जातीयाएव सोप्येषांधर्मोवाचनिकोनवस्तुस्वभावसिध्दोतः प्रमाणांतरगोचरत्वात्धर्मपक्षपतितत्वे शास्त्रोपदेशार्हाएव । प्रतिलोमानामप्यहिंसादयोधर्मावक्ष्यंते । यत्तु धर्मादिनाइति तद्व्रतोपवासादिधर्माभावाभिप्रायेण सर्वपुरुषोपकारिता चानेन शास्त्रस्य प्रदर्श्यते । यथावदर्हत्यर्थे वतिः येन प्रकारेणानुष्ठानमर्हतिइदंनित्यमिदंकाम्यमिदमंगमिदंप्रधानंद्रव्यदेशकालकर्त्रादिनियमश्च प्रकारोर्हतेर्विषयः । अनुपूर्वशः । आनुपूर्वी क्रमः । येन क्रमेणानुष्ठेयानि सोप्युच्यताम् । जातकर्मानंतरंचौडमौंजीनिबंधनेत्यादि यथावदित्यत्र पदार्थविषयंकार्त्स्न्यमुपात्तंक्रमस्तुपदार्थोन भवत्यतः पृथगनुपूर्वशइत्युपात्तम् । धर्मशब्दः कर्तव्याकर्तव्ययोर्विधिप्रतिषेधयोरदृष्टार्थयोस्तद्विषयायांचक्रियायांदृष्टप्रयोगस्तस्य तु किमुभयंपदार्थउतान्यतरत्र गौणइति नायंविचारः क्रियते । ग्रंथांतरे विस्तरेण कृतत्वा-

---

(अ) अन्तरप्रभवाणांच ॥ सङ्करप्रभवानां, (क), (घ), (अ), चिन्हितपुस्तकेषु
(x) कामं=कालं (ग), (च) (ख)
(ऽऽ) (क), (ख), (ट), (त), अनयोर्व्याख्यानंनन्दनरामचन्द्राभ्यांकृतंषष्ठे पृष्ठे द्रष्टव्यम् ।

दिहानुपयोगाच्च सर्वथा तावदष्टकाः कर्तव्याः नकलंजंभक्षयेदित्यादावष्टकाविषया कर्तव्यता प्रतीयते । कलंजभक्षणविषयश्चप्रतिषेधः । तदाष्टकाख्यंकर्मधर्मस्तद्विषया वाकर्तव्यतेति फले न विशेषः । धर्मरूपोपदेशाच्चयत्तद्विपरीतमधर्मोसावित्यर्थात्सिध्यति । अतोधर्माधर्मावुभावपि शास्त्रस्यविषयइत्युक्तंभवति । तत्राष्टकाकरणंधर्मोब्रह्महत्यादिवर्जनंधर्मः । अष्टकानामकरणमधर्मोब्रह्महत्यायाश्चकरणमधर्मोऽतोधर्माधर्मयोर्विवेकः । अर्हसीतिसामर्थ्यलक्षणयायोग्यतया प्रवचनाधिकारमाचार्यस्याहुः ॥ यतस्त्वंसमर्थोधर्मान्वक्तुमतोधिकृतः सन्नध्येष्यसे ब्रूहीति योयत्राधिकृतस्तत्तेन कर्तव्यमिति सामर्थ्यगम्यंब्रूहीत्यध्येषणापदमध्याह्रियते । उक्तमदृष्टार्थे व्यापारमात्रेण धर्मशब्दोवर्तते । तत्र यथाष्टकादौ तस्य प्रयोगएवंचैत्यवन्दनादावपीति । तत्र कतमे धर्माअत्रोच्यन्तइति संशये धर्मविशेषप्रतिपादनार्थमुक्तसामर्थ्यप्रतिपादनार्थंचत्वमेकइति ॥ ॥ २ ॥

(२) **सर्वज्ञनारायणः** । भगवन्निति । यथावत् यस्य यत्प्रकारोधर्मस्तथा । अनुपूर्वशःब्राह्मणादिक्रमेण । अन्तरे भवानांच वर्णद्वयसंबन्धवतां प्रतिलोमजादीनाम् ॥ २ ॥

(३) **कुल्लूकभट्टः** । किमत्रुवन्नित्यपेक्षायामाह । भगवन्नित्यादि । ऐश्वर्यादीनांभगशब्दोवाचकः । तदुक्तंविष्णुपुराणे । ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसःश्रियः । ज्ञानवैराग्ययोश्चैव षण्णांभगइतीङ्गना ॥ मतुबन्तेन संबोधनंभगवन्निति । वर्णाब्राह्मणक्षत्रियवैश्यशूद्राः सर्वे च ते वर्णाश्चेति सर्ववर्णाः तेषामन्तरप्रभवाणांच संकीर्णजातीनांचापि अनुलोमप्रतिलोमजातानाम् । अम्बष्ठक्षतृकर्णप्रभृतीनांतेषांविजातीयमैथुनसम्भवत्वेन खरतुरगीयसंपर्काज्जाताश्वतरवज्जात्यन्तरत्वाद्वर्णशब्देनाग्रहणात्पृथक्प्रश्नः । एतेनास्य शास्त्रस्य सर्वोपकारकत्वंदर्शितम् । यथावत्योधर्मोयस्य वर्णस्य येन प्रकारेणार्हतीत्यनेनाश्रमधर्मादीनामपि प्रश्नः । अनुपूर्वशःक्रमेण जातकर्म तदनु नामधेयमित्यादिना धर्मान्नोऽस्मभ्यंवक्तुमर्हसि सर्वधर्माभिधाने योग्योभवसि तस्माद्ब्रूहीत्यध्येषणमध्याहार्यम् । यत्तु ब्रह्महत्यादिरूपाधर्मकीर्त्तनमप्यत्र तत्प्रायश्चित्तविधिरूपधर्मविषयत्वेन न स्वतन्त्रतया ॥ २ ॥

(४) **राघवानन्दः** । भगवन्पूजायुक्त ऐश्वर्यादिशालित्वात् ॥ (अ) सर्ववर्णानां विप्रराजन्यवैश्यशूद्राणां यथावत् याथातथ्येन अनुपूर्वशः ब्राह्मणाद्यानुपूर्व्या अन्तरप्रभवानां सङ्करजातानां अनुलोमप्रतिलोमतः धर्मान् निषेकादि-श्मशानान्तान्तेषु कर्तव्यान् भगवत्त्वादेव वक्तुंयोग्योसीति नोऽस्मभ्यम् ॥ २ ॥

(५) **नन्दनः** । न केवलं त्रैवर्णिकानामेव किंतुशूद्राणामपीत्युक्तंसर्वशब्दग्रहणेन । अन्तरप्रभवानांवर्णसंकरजातानाम् । धर्मान्विहितानुष्ठानप्रतिषिद्धवर्जनलक्षणान् ॥ २ ॥

जरायुजेति । भूतग्रामस्यमहदादितत्त्वसङ्घस्य । आचाराणामितिकार्याणांविवादपदानाम् । यथाकालमवसरेप्राप्ते । यथायोगमुचितोपायेन लक्षणेन प्रतिपदोक्त्याचेति यावत् ॥

(६) **रामचन्द्रः** । भगवन्निति । तत्र प्रश्नमाह । हेभगवन्सर्ववर्णानांब्राह्मणक्षत्रियविट्शूद्राणांयथावत्यथायोगंअनुपूर्वशःअनुक्रमेण नः अस्माकंधर्मान्वक्ष्यमाणलक्षणान् वक्तुमर्हसि च पुनःअन्तरप्रभवानांअनुलोमजातीनां मूर्द्धाभिषिक्तादीनां धर्मान्वक्तुंत्वमर्हसि ॥ २ ॥

[प्रश्नान्तरमाह जरायुजेति। द्वाभ्यां युग्मं । सर्वस्य भूतग्रामस्य चतुर्विधानांजरायुजादीनांउत्पत्तिप्रलयंनाशंवक्तुमर्हसि च

(अ) शालित्वात्= (क्ष) शालित्वा ॥

पुनः सर्वेषांब्राह्मणादीनांतथानुलोमजातीनांआचारान्वक्तुंत्वमर्हसि तथा कार्यस्यउक्तस्यअकार्यस्यच विनिर्णयंवक्तुंअर्हसि यथाक्रमंब्राह्मणादिवर्णक्रमंक्रमानुसारेण यथायोगंवक्तुमर्हसि ॥]

त्वमेकोह्यस्य सर्वस्य विधानस्य स्वयंभुवः ॥ अचिन्त्यस्याप्रमेयस्य कार्यतत्त्वार्थवित्प्रभो॥ ३ ॥

(१) **मेधातिथिः**। त्वमेवैकोऽसहायोऽद्वितीयः सर्वस्य विधानस्य कार्यतत्त्वार्थवित्। विधानंशास्त्रंविधीयन्तेऽनेन कर्माणीति तस्य स्वयंभुवोनित्यस्याकृतकस्यापौरुषेयस्य वेदाख्यस्य सर्वस्य प्रत्यक्षाक्षरस्यानुमेयाक्षरस्य चाग्निहोत्रंजुहु-यादभयंसहस्रमानवइत्येतयाहवनीयोपस्थाने विनियोगः। अष्टकाः कर्तव्याइत्यत्र तु स्मृत्यानुमीयते वेदः। बर्हिर्देवसदनं-दामीतिलिङ्गादनेन बर्हिर्लुनातीतिश्रुतेरनुमानम्। अयंहि मन्त्रोदर्शपूर्णमासप्रकरणे पठितोबर्हिर्लवनंच तत्राम्नातमनेनमन्त्रेण लुनीयादित्येतत्तु नास्ति। मन्त्रः पुनारूपाद्बर्हिर्लवनप्रकाशनसमर्थः। प्रकरणात्सामान्यतः सिद्धदर्शपूर्णमाससंबन्धः। स्वसा-मर्थ्येन तु बर्हिर्लवने प्रयुज्यते । एषा ह्यत्र प्रतीतिः प्रकरणाद्दर्शपूर्णमासावनेन मन्त्रेण कुर्यात्कथमिति यथाशक्नुयादि-त्यनुक्तापि शक्तिः सर्वत्र सहकारिणी। किंचशक्नोतिमन्त्रः कर्तुंबर्हिर्लवनंप्रकाशयितुंततः प्रकरणात्स्वसामर्थ्याच्चानेन मन्त्रे-णबर्हिर्लुनातीतिबुद्धौ शब्दआगच्छत्यविकल्पकविज्ञानैः पूर्वशब्दःप्रतीयतइति । सबुद्धिस्थः शब्दोऽनुमेयोवेदउच्यते। वेदत्वंच तस्यदर्शपूर्णमासवाक्यमन्त्रवाक्याभ्यांश्रुत्यन्तराभ्यांस्वसामर्थ्येनोत्थापितत्वादितिकुमारिलपक्षः। अथवा वि-धिर्विधानमनुष्ठानंप्रयोजनसंपत्तिस्तस्यस्वयंभुवोनित्यस्यानादिपरंपरायातस्य स्वयंभुवा वेदेन वा प्रतिपाद्यस्य श्रूयमाणाक्ष-रप्रतिपाद्यस्य प्रतिपन्नसामर्थ्यगम्यस्य च द्विविधोहि वैदिकोविधिः। कश्चित्साक्षाच्छब्दप्रतिपाद्योयथा सौर्यंचरुंनिर्वपेत्-ब्रह्मवर्चसकामइति सौर्ये चरौ ब्रह्मवर्चसकामोऽधिक्रियते । तस्य चरोर्ब्रह्मवर्चसंसाधयतइयमितिकर्तव्यताआग्नेयव-दित्यवगमयति। उभयत्रापिचेयंप्रतीतिः शब्दावगममूलत्वात्। शब्दोदयोऽपि शब्दादभिधानतः प्रतीयते। यथाभिधेय-प्रतिपत्तितोविशेषस्तुव्यवधानादिकृतोन शब्दतांविहन्ति। यथावापीस्थमुदकंहस्तेनाभिहतंप्रदेशान्तरमभिहन्ति तदपिहस्त-संयोगेनैवाभिहतंभवति नतु साक्षात्। शर्करारेचककर्मण्याद्यप्रयत्नकृताएवोत्प्लुत्योत्प्लुत्य पाताः। तादृशमेतद्वैकृते कर्माणि विशिष्टेतिकर्तव्यतासंबन्धोयएवंविश्वजिता यजेतेत्युत्पत्तिर्नाधिकारशून्यास्तीतिस्वर्गकामइत्यधिकारावगतिः प्रतिपन्नार्थ-सामर्थ्यगम्या। अन्यतोद्वैरूप्येविधानस्य सर्वस्येतिपदंसर्वस्य तात्पर्यमेवंरूपंवेदमूलाःस्मृतयइति ज्ञापयितुम्। द्वितीयेचैतद्दर्श-यिष्यामः। ननु लिङादिप्रतिपाद्योऽर्थः कर्तव्यतारूपोविधिः। सच सर्वत्र प्रत्यक्षशब्दप्रतिपाद्यएव। तत्र किमुच्यते। द्विवि-धाहि वैदिकोविधिरिति निर्वपेदितिकर्तव्यतावगम्यते। इतिकर्तव्यतार्थसामर्थ्यगम्या। उक्तेनप्रकारेण नैषदोषः। निर्वपे-द्यजेतेति न केवलेधात्वर्थविषयत्वेऽवगते परिपूर्णा कर्तव्यता भवति । यावदंशान्तराण्यधिकारेतिकर्तव्यताप्रयोगरूपाणि नावगतानि। एतैरंशैर्वेततरूपोविधिः प्रतीयते । अतोऽशरूपाण्यपि विधिशब्दाभिलप्यतया न विरुद्धान्येतदेवाह अ-चिन्त्यस्येति। अप्रत्यक्षस्येत्यर्थः । प्रत्यक्षंह्यनुभूयतइत्युच्यते। नचिन्त्यते नस्मर्यतइति । अप्रमेयस्य कल्प्यस्य प्रा-यशः स्मृतिवाक्यमूलस्य तद्धि प्रत्यक्षेण प्रमीयते। अतोऽप्रमेयस्येत्युच्यते। अथवाऽप्रमेयस्येयत्तया परिमातुमशक्यस्या-तिमहत्वादनेकशाखाभेदभिन्नोभेदोनशक्यते सर्वैःप्रमातुम्। अतएवाचिन्त्यस्य यदतिबहु तदुर्महत्वादचिन्त्यमित्युच्यते। यथाच लोके वक्तारोभवन्ति। अन्येषांगतिश्चिन्तयितुमप्येतन्नयुज्यतइति। मनःकिलसर्वविषयम्। अयंचातिमहत्वात्तस्यापि न विषयइति पदद्वयेन बाह्यान्तःकरणविषयतया महत्त्वस्य। एतेनाचार्यः प्रोत्साह्यते त्वयैव केवलेनैवंविधोवेदआगमितो-नस्तस्य यः कार्यरूपस्तत्त्वार्थस्तंवेत्सि जानीषे कार्यमनुष्ठेयमुच्यते। यत्र पुरुषोऽनुष्ठातृत्वेन विनियुज्यत इदंत्वया कर्तव्य-मिदंत्वया न कर्तव्यमित्यग्निहोत्रादि कर्तव्यम् कलञ्जभक्षणादि न कर्तव्यम्। प्रतिषेधोऽप्यनुष्ठानमेव। यद्ब्राह्मणवधस्यानन्-

ष्ठानंतदेव प्रतिषेधस्यानुष्ठानंप्रवृत्तिश्चक्रिया निवृत्तिश्चक्रियेति। नहि परिस्पन्दमानसाधनसाध्यमेवानुष्ठानमुच्यते किंतर्हि प्राप्ते तद्रूपे तन्निवृत्तिरपि यथाहितसेवीचिरायुरिति । यःप्राप्ते काले भुङ्क्तेऽप्राप्ते न भुङ्क्ते । अभोजनमपि हितमेव । अथवाकार्यशब्दः प्रदर्शनार्थोविधेः प्रतिषेधस्यच । एतावान्वेदस्य तत्त्वरूपः पारमार्थिकोऽर्थोयस्तुइतिवृत्तसंवर्णनरूपः सोरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वमिति ।सन तत्त्वार्थोविध्यन्तरेणैकवाक्यत्वात्प्रशंसापरत्वेन स्वार्थनिष्ठत्वाभावात्। अस्ति ह्यत्र विध्यन्तरम्। तस्माद्बर्हिषि रजतं न देयमितिसोरोदीदित्यादीनिपुरास्यसंवत्सराद्गृहेरोदनंभवतीत्यन्तानि तदेकवाक्यतापन्नानि बर्हिषि रजतदाननिन्दया तत्प्रतिषेधंस्तुवन्ति।तदुक्तंसाध्येऽर्थे वेदः प्रमाणं न सिद्धरूपे । अर्थवादानांहि सिद्धरूपोऽर्थोनहि तदर्थस्य कर्तव्यताप्रतीयते । विध्युपदेशपरत्वंच प्रतीयते । यदिच स्वार्थपराअपि स्युस्तदाविधिपरत्वंव्याहन्येत । ततश्च प्रतीयमानैकवाक्यतावबोधनेन च संभवत्येकवाक्यत्वे वाक्यभेदोऽन्याय्यः । नच साध्यस्य सिद्धार्थपरत्वेनैकवाक्यता घटते । तथाहि । न किंचिद्वेदेनोपदिश्यते कर्तव्यम् । अतश्चाप्रमाणमेव वेदःस्यात् । विध्यर्थता चावगम्यमाना लिङादीनांत्यक्ता स्यात् । तस्मात्कार्यरूपोवेदस्य तत्त्वार्थइतिमनुर्भगवानाह । जैमिनिनाप्युक्तम् कार्येऽर्थे वेदःप्रमाणम् । चोदनालक्षणोऽर्थोधर्मइति । अतश्चनिरवशेषपदार्थपरिज्ञानातिशययोगाद्धर्मप्रवचनसामर्थ्यसिद्धवदुपादायप्रभो इत्यामन्त्रणम् । हेप्रभो धर्माभिधानशक्त त्वमनुब्रूहि धर्माणिति । एवमनया त्रिश्लोक्या धर्मान्पृष्टउत्तरेण श्लोकेन प्रतिजज्ञे ॥ ३ ॥

(२) **सर्वज्ञनारायणः** । त्वमेकइति । स्वयंभुवः प्रजापतेरभिधेयतया संबन्धिनोविधानस्य विधेर्वेदस्याचिन्त्यस्यातर्क्यार्थस्याप्रमेयस्य प्रमाणान्तरागोचरस्य कार्यतयानुष्ठेयतया यत्तत्वंतात्विकोर्थस्तद्वेदितात्वमेवास्येकइत्यर्थः ॥ ३ ॥

(३) **कुल्लूकः** । सकलधर्माभिधानयोग्यत्वेहेतुमाह त्वमेकइत्यादि हिशब्दोहेतौ । यस्मात्त्वमेकोऽद्वितीयः । अस्य सर्वस्य प्रत्यक्षश्रुतस्य स्मृत्याद्यनुमेयस्य च विधानस्य विधीयन्तेऽनेनकर्माण्यग्निहोत्रादीनीति विधानंवेदस्तस्य स्वयंभुवोऽपौरुषेयस्याचिन्त्यस्य बहुशाखाविभिन्नत्वादियत्तया परिच्छेत्तुमयोग्यस्य । अप्रमेयस्य मीमांसादिन्यायनिरपेक्षतयाऽनवगम्यमानप्रमेयस्य । कार्यमनुष्ठेयमग्निष्टोमादि तत्त्वंब्रह्म सत्यंज्ञानमनन्तंब्रह्मेत्यादिवेदान्तवेद्यं तदेवार्थःप्रतिपाद्यभागस्तंवेत्तीति कार्यतत्त्वार्थवित्। मेधातिथिस्तु कर्ममीमांसावासनया वेदस्य कार्यमेव तत्त्वरूपोऽर्थ स्तंवेत्तीतिकार्यतत्त्वार्थ विदिति व्याचष्टे तन्न । वेदानांब्रह्मण्यपि प्रामाण्याभ्युपगमान्नकार्यमेव तत्त्वरूपोऽर्थः । धर्माधर्मव्यवस्थापनसमर्थत्वात्प्रभोइति संबोधनम् ॥ ३ ॥

(४) **राघवानन्दः** । त्वमिति । अस्य प्रत्यक्षादिसिद्धस्य सर्वस्य स्मृत्याद्यनुमेयस्य विधीयतेकर्मानेनेति विधानंवेदः तस्यविधानस्याग्निहोत्रादिकर्मकलापबोधकस्येति यावत् स्वयंभुवोऽपौरुषेयस्य ब्रह्मस्वयंभूरितिश्रुतेः । स्वयंभूरेषभगवान्वेदोगीतस्त्वयापुरा । शिवाद्याऋषिपर्यन्ताःस्मर्तारोऽस्यनकारकाइतिस्मृतेश्च । अचिन्त्यस्य अनेकशाखाभेदभिन्नत्वादियत्तयापरिच्छेत्तुमशक्यस्य । अप्रमेयस्य दुरधिगमार्थस्य अनेनार्थतोऽप्यचिन्त्यत्वमुक्तम् । कार्यतत्त्वार्थवित् कार्यंधर्मः तदेववेदस्यतात्पर्यविषयत्वात्तत्त्वं तद्वेत्तीति ।,तथेतिमेधातिथिः । वस्तुतस्तुकार्यंधर्मः तत्त्वार्थोब्रह्म तदुभयंवेदार्थस्तद्वित् अन्यथाज्ञानकाण्डस्य अप्रामाण्यापत्तिः कृत्स्नवेदार्थाविदित्वापत्तेश्च प्रभोइत्युभयकथने सामर्थ्यमुक्तम् ॥ ३ ॥

(५) **नन्दनः** । विधीयतइति विधानम् ।स्वयंभुवा भगवता विहितस्यअचिन्त्यस्य दुर्ज्ञानस्य । अप्रमेयस्यअपर्यन्तस्य । सर्वस्यप्राणिजातस्य । कार्यंधर्मस्तस्यतत्त्वंपारमार्थ्यंतस्यार्थःप्रयोजनमभ्युदयसिद्धिरूपंतत्त्वमेकोवेत्सि तेन भवानेव प्रष्टव्योनान्यइति ॥ ३ ॥

(६) **रामचन्द्रः** । त्वमिति। एकःअद्वितीयः हिहेत्वर्थे । अस्य विधानस्य सर्वस्य चतुर्विधस्य भूतग्रामस्य उद्भिदस्वेदजाण्डजजरायुजस्येत्यर्थः । कार्यतत्त्वार्थवित्वेत्तासि हे प्रभो मनो यःप्रभुःसर्वजानातीत्यर्थः । तथा स्वयंभुवोऽपौरुषस्य

कार्यतत्त्वार्थवित्। कीदृशस्य स्वयंभुवः अचिन्त्यस्य वाङ्मनसाभ्यामचिन्त्यप्रभावस्य। पुनःकीदृशस्य अप्रमेयस्य॥ ३॥

सतैः पृष्टस्तथा सम्यगमितौजामहात्मभिः॥ प्रत्युवाचार्च्यतान्सर्वान्महर्षीञ्छ्रूयतामिति॥ ४॥

(१) **मेधातिथिः**। समनुरमितौजास्तैर्महर्षिभिर्महात्मभिः पृष्टस्तथा तान्प्रत्युवाच श्रूयतामिति। तथा तेन प्रागुक्तेन प्रकारेण। पृच्छ्यमानवस्तुप्रश्नविधिश्च प्रकारवचने तथाशब्देऽन्तर्भूतः। तेनायमर्थस्तथापृष्टस्तान्धर्मान्पृष्टःप्रत्युवाच। अथवा तथेतिप्रकारमात्रमाचष्टेपृष्टइतिपूर्वश्लोकात्पृच्छ्यमानविशेषोबुद्धौ विपरिवर्ततएव। तेन यत्पृष्टस्तत्प्रत्युवाच श्रूयतामिति प्रश्नप्रतिवचनयोरेककर्मता सिद्धा भवति। तदाच तथाशब्दः श्लोकपूरणार्थः। आद्ये तु व्याख्याने तथाशब्दोपात्तैव प्रश्नप्रतिवचनयोरेककर्मता। सम्यक्शब्दः प्रतिवचनविशेषणंसम्यक्प्रत्युवाच। प्रसन्नेन मनसा न क्रोधादियोगेन। अमितौजाअक्षीणवाग्विभवोमितमनन्तमोजोवीर्यमभिधानसामर्थ्यमस्येति। महात्मतयामहर्षीणांधर्मशब्दत्वंमहर्षित्वंचाविरुद्धमित्याह महर्षीनिति। परार्थकारी सततंमहात्मेत्युच्यते। तेन यद्यपि स्वयंविद्वांसोऽधिगतयाथातथ्या अन्यथा महर्षित्वानुपपत्तेस्तथापि परार्थमपृच्छन्। मनुःप्रख्याततरप्रमाणभावः। एतेनयदुच्यते तल्लोकेनाद्रियते। प्रत्ययतोऽयंसमुपास्यतेऽतः शास्त्रावतारार्थमुपाध्यायीकुर्मः। अस्माभिश्चपृच्छ्यमानःप्रमाणतरीकरिष्यतेऽनेनेति। अतएवार्च्यतान्सर्वानित्यर्चनमविरुद्धम्। अन्यथाशिष्यस्योपाध्यायात्कीदृश्यर्चेति। अर्चयतेराङ्पूर्वस्यल्यबन्तस्यरूपमार्च्येति। पाठान्तरमर्चयित्वा तानिति। अत्र यथोच्यते। यदिमनुनाऽयंग्रन्थःकृतः परोपदेशीन युक्तः सतैःपृष्टःप्रत्युवाचेत्यहंपृष्टःप्रत्यब्रवमितिन्याय्यम्। अथान्यतरएव ग्रन्थस्य कर्ता मानवव्यपदेशः कथमिति। तदाचार्यप्रायेण ग्रन्थकाराः स्वमतंपरापदेशेन ब्रुवते। अत्राह अत्र परिहरन्तीत्येवमहंतैः पृष्टइति। योयः पूर्वतरःसप्रमाणतरोलोकेनाभ्युपगम्यते। तत्प्रमाणंबादरायणस्येति। अथवा भृगुणोक्ता संहितेयंमानवीतुस्मृतिरूपनिबद्धेति मानवव्यपदेशः। प्रत्युवाचतान्महर्षीन् किंतद्यदहंपृष्टस्ततः श्रूयतामिति॥ ४॥

(२) **सर्वज्ञनारायणः**। सतैरिति। सम्यग्विनयाभ्युपेतंयथाभवति। अमितौजा अमितबलः। आर्च्यार्चयित्वा॥४॥

(३) **कुल्लूकः**। सतैःपृष्टस्तथा सम्यगित्यादि। समनुस्तैर्महर्षिभिस्तथा तेन प्रकारेण पूर्वोक्तेन न्यायेन प्रणतिभक्तिश्रद्धातिशयादिना पृष्टस्तान्सम्यग्यथातत्त्वंप्रत्युवाच श्रूयतामित्युपक्रम्य। अमितमपरिच्छेद्यमोजःसामर्थ्यंज्ञानतत्त्वाभिधानादौ यस्य सतथा। अतएव सर्वज्ञसर्वशक्तितया महर्षीणामपि प्रश्नविषयः। महात्मभिर्महानुभावैः। आर्च्य पूजयित्वा आङ्पूर्वस्यार्चतेर्ल्यबन्तस्यरूपमिदम्। धर्मस्याभिधानमपि पूजनपुरःसरमेव कर्तव्यमित्यनेन फलितम्। ननु मनुप्रणीतत्वेऽस्य शास्त्रस्य सपृष्टःप्रत्युवाच इति न युक्तमहंपृष्टोब्रवीमीति युज्यते ऽन्यप्रणीतत्वे च कथंमानवीयसंहितेति। उच्यते प्रायेणाचार्याणामियंशैली यत्स्वाभिप्रायमपि परोपदेशमिव वर्णयन्ति। अतएव कर्माण्यपि जैमिनिःफलार्थत्वादिति जैमिनेरेव सूत्रम्। अतएव तदुपर्यपि बादरायणःसंभवादिति बादरायणस्यैव शारीरकसूत्रम्। अथवा मनूपदिष्टाधर्मास्तच्छिष्येण भृगुणा तदाज्ञयोपनिबद्धाः। अतएव वक्ष्यति एतद्वोऽयंभृगुःशास्त्रंश्रावयिष्यत्यशेषतइत्यतोयुज्यतएव सपृष्टःप्रत्युवाचइति। मनूपदिष्टधर्मोपनिबद्धत्वाच्च मानवीयसंहितेति व्यपदेशः॥ ४॥

(४) **राघवानन्दः**। तैर्महर्षिभिःपृष्टःसन्मनुरमितौजा धर्मब्रह्मणोवेदने शक्त आर्च्य संपूज्य श्रूयतामित्याह॥ ४॥

(५) **नन्दनः**। आर्च्य भवन्तएवसर्वधर्मज्ञा इतिवाचा संभाव्य। आत्मनः प्रवचनादरप्रकर्षार्थमुक्तं श्रूयतामिति॥ ४॥

(६) **रामचन्द्रः**। सइति तैर्महर्षिभिःसमनुःसम्यग्यथा स्यात्तथा पृष्टःसंस्तान् सर्वान्महर्षीन्प्रति श्रूयतामित्यभ्यर्च्य संपूज्योवाच। कीदृशःमनुःअमितौजाःअमितंओजःप्रभावोयस्यसः॥ ४॥

आसीदिदंतमोभूतमप्रज्ञातमलक्षणम् ॥ अप्रतर्क्यमविज्ञेयंप्रसुप्तमिव सर्वतः ॥ ५ ॥

(१) मेधातिथिः । क्वास्ताःक्व निपतिताःशास्त्रोक्तनिपतितान् धर्मानृपृष्टस्तानेव वक्तव्यतया प्रतिज्ञाय जगतोव्याकृतावस्थावर्णनमप्रकृतमपुरुषार्थंच । सोऽयंसत्योजनप्रवादः आम्रान्पृष्टः कोविदारानाचष्टइति । नचास्मिन्वस्तुनि प्रमाणंनचप्रयोजनमित्यतः सर्वएवायमध्यायो नाध्येतव्यः । उच्यते । शास्त्रस्यमहाप्रयोजनत्वमनेनसर्वेण प्रतिपाद्यते । ब्रह्माद्याः स्थावरपर्यन्ताः संसारगतयोधर्माधर्मनिमित्ता अत्र प्रतिपाद्यन्ते । तमसा बहुरूपेण वेष्टिताः कर्महेतुनेति । वक्ष्यतिच । एतादृष्ट्वातु जीवस्य गतीः स्वेनैव चेतसा । धर्मतोऽधर्मतश्चैव धर्मे दध्यात्सदा मनइति॥ ततश्च निरतिशयैश्वर्यहेतुर्धर्मस्तद्विपरीतश्चाधर्मस्तद्रूपपरिज्ञानार्थमिदंशास्त्रंमहाप्रयोजनमध्येतव्यमित्यध्यायतात्पर्यम् । सूक्तंत्वत्र मन्त्रार्थवादाः सामान्यतोदृष्टंच । तथाचमन्त्रः। तमआसीत्तमसा गूल्हमग्रेप्रकेतं सलिलंसर्वमाइदंतुच्छेनाभ्वपिहितंयदासीत्तमसस्तन्महिनाजायतैकम्। चन्द्रार्काद्यादिषु बाह्याध्यात्मिकेषु महाप्रलये प्रकाशेकेषु नष्टेषु तमएवकेवलमासीत् । तदपि तमः स्थूलरूपतमसा रूढंसंवृत्तम् । न हि तदानींकश्चिदपि ज्ञाताऽस्ति । अतोज्ञातुरभावान्न कस्यचितज्ञानमस्तीति तमसागूढमुच्यते । अग्रे भूतसृष्टेरर्वाकूप्रकेतमज्ञातंसर्वआः आसीदिदंसलिलंसरणधर्मकम् । क्रियावद्यत्किंचिच्चेष्टावत्तत्सर्वंनिश्चेष्टमासीत् । तुच्छेन सूक्ष्मेणाभूस्थूलमपिहितंप्रकृत्यात्मनि विशेषरूपंलीनमित्यर्थः । एतावता ऽव्याकृतावस्था जगतोद्योतिता । चतुर्थेन पादेनाद्या सृष्ट्यवस्थोच्यते । तमसस्तन्महिना महत्त्वेनैकंयदासीत्तदजायत विशेषात्मनाऽभिव्यज्यतेस्म । कर्मवशात्पुनः प्रादुर्बभूवेत्यर्थः । अथवा तस्यामवस्थायांतमःकर्मणा महत्त्वेनहिरण्यगर्भआत्मनाऽजायत प्रादुरासीत् । यथावक्ष्यति ततःस्वयंभूरिति । सामान्यतोदृष्टेन महाप्रलयेऽपि संभाव्यते । यस्य ह्येकदेशे नाशोदृष्टस्तस्य सर्वस्यापि नाशोदृश्यते । यथा शालापि कश्चिद्दह्यमाना दृष्टा कदाचित्सर्वोग्रामोदह्यते । ये च कर्तृपूर्वाभावास्ते सर्वे विनश्वरा गृहप्रासादादयःकर्तृपूर्वंचेदंजगत्सरित्समुद्रशैलाद्यात्मकम् । अतोगृहादिवन्नंक्ष्यतीति संभाव्यते । कर्तृपूर्वते व न सिद्धेतिचेत्तन्निवेशविशेषवत्त्वादिना गृहादिवत्सापि साध्यतइत्यादि सामान्यतोदृष्टम् । नच प्रमाणसिद्धौ तद्दूषणे वा प्रयतामहे ऽनिदंपरत्वाच्छास्त्रस्य । एतद्धियावन्न विचार्यनिरूपितं तावन्न सम्यगवधार्यते । तथा निरूपणे च तर्कशास्त्रता स्यान्नधर्मशास्त्रता ग्रन्थविस्तरश्च प्रसज्यते । प्रक्रियाबहुलं चेदंसर्वमुपन्यसिष्यते । क्वचित्पौराणी प्रक्रिया क्वचित्सांख्यानाम् । नतया ज्ञातयाऽज्ञातया वा कश्चिद्धर्माधर्मयोर्विशेषइतिनिपुणतया न निरूप्यते । अर्थितश्चित्ततएवान्वेष्या पदार्थयोजना । व्याख्यानमात्रंत्वध्यायस्योपदिश्यते तदेवकरिष्यामः । तात्पर्यमुपदर्शितमेव । आसीदिदंजगत्तमोभूतं तमइव । भूतशब्दोऽनेकार्थोऽप्युपमायांप्रयुक्तोयथा यत्तद्भिन्नेष्वभिन्नंछिन्नेष्वच्छिन्नंसामान्यभूतंसशब्दइतिसामान्यभूतइति सामान्यमिवेत्यर्थः । किंतमसा जगतः सादृश्यमतआह । अप्रज्ञातंविशेषाणांस्वभावानांविकाराणांप्रकृतावुपलयनादतः प्रत्यक्षेणाज्ञातम् । अनुमानात्तर्हि ज्ञायेत । तदपिह्यलक्षणम् । लक्षणंलिङ्गंचिन्हंतदपि तस्यामवस्थायां प्रलीनमेव सर्वविकाराणांविशेषात्मना विनष्टत्वात् । अप्रतर्क्यंयद्रूपमासीत्तर्कयितुमपि न तद्रूपतया शक्यम् । तर्कप्रकारमनुमानंनिषेधति । नसामान्यतोदृष्टमनुमानमस्ति । तद्रूपकावेदकंन विशेषतोदृष्टमतश्चाविज्ञेयम् । नैवतर्ह्यासीदसदेवाजायतेति प्राप्तमेतन्निषेधति प्रसुप्तमिव सर्वतः। नासतःसतउत्पत्तिः । उक्तंच सदेव सोम्येदमग्रआसीत् कथमसतःसज्जायेतेत्याद्युपनिषत्सु । अतश्च विज्ञेयमवच्छेदविषयैः प्रमाणैरागमात्तादृशादेव गम्यते । प्रसुप्तमिव जाग्रत्त्वमवत्तांपरित्यज्य संप्रसादावस्था सुषुप्तिर्दृष्टान्तत्वेनोपात्ता यथायमात्मासुषुप्तावस्थायांनिःसंबोधक्लेशप्रध्वस्ताशेषविकल्पआस्ते नचनास्तीतिशक्यते वक्तुं प्रबुद्धस्य सुखमस्वाप्समितिप्रत्य

भिज्ञानदर्शनात् । एवंजगदागमान्सिद्धार्थरूपादाभासानुमानेभ्यश्चतार्किकाणामवसीयते । आसीदिति। वर्तमानातुसावस्थान-कस्यविज्ञेयेत्यतउक्तमविज्ञेयंसर्वतोनैकदेशप्रलयइत्यर्थः ॥ ५ ॥

(२) **सर्वज्ञनारायणः** । अत्रच वर्णक्रमेण धर्मकथनस्याकाङ्क्षितत्वात् सर्वदेवसंभवतत्त्वोक्तिज्ञानाद्ब्राह्मणादिवर्णानांपूर्वपूर्वश्रैष्ठ्यप्रतिपादनस्येष्टत्वेन मुखादिविशिष्टस्थानोत्पादनेन च तेषांश्रेष्ठत्वात् तदभिधानार्थंशास्त्रप्रणायकब्रह्मोत्पत्तिप्रकारंच कथयितुंतस्यनिष्पत्तिजननद्वारा तत्पूर्वावस्थांतावदाह आसीदिदमिति। ततःशब्देन गुणैकदेशवाचिना तत्समुदायभूता प्रकृतिरुक्ता । जगतश्चोत्पत्तिसंमूढात्मकत्वेन तस्य सुप्रतिपादत्वात् । अप्रज्ञातंप्रत्यक्षागम्यम् । अलक्षणमलिङ्गम्। अप्रतर्क्यमतर्कविषयम् । अविज्ञेयंशब्दादिहीनतयाविशेषतोज्ञातुमशक्यम्। अधुनापि शब्दतःप्रतीयमानं यथाप्रतीयते तदाह प्रसुप्तमिवेति । वासनाकर्मशेषाणां पुरुषाणामवस्थानात्ततत्स्वरूपसाम्यम् । सर्वतःसर्वैःप्रकारैः । अतएवोर्क्तमिवेति ॥ ५ ॥

(३) **कुल्लूकः** । श्रूयतामित्युपक्षिप्तमर्थमाह आसीदिदमिति । ननु मुनीनांधर्मविषयप्रश्ने तत्रैवोत्तरंदातुमुचितं तत्कोयमप्रस्तुतः प्रलयदशायां कारणलीनस्य जगतःसृष्टिप्रकरणावतारः । अत्र मेधातिथिः समादधे। शास्त्रस्य महाप्रयोजनत्वमनेन सर्वेणप्रतिपाद्यते । ब्रह्माद्याःस्थावरपर्यन्ताःसंसारगतयोधर्माधर्मनिमित्ताअत्र प्रतिपाद्यन्ते तमसा बहुरूपेण वेष्टिताःकर्महेतुनेति। वक्ष्यति च । एताद्दृष्ट्वास्य जीवस्य गतीःस्वेनैव चेतसा । धर्मतोऽधर्मतश्चैव धर्मे दध्यात्सदामनइति[२] ततश्च निरतिशयैश्वर्यहेतुर्धर्मस्तद्विपरीतश्चाधर्मस्तद्रूपपरिज्ञानार्थमिदंशास्त्रंमहाप्रयोजनमध्येतव्यमित्याद्यध्यायतात्पर्यमित्यन्तेन गोविन्दराजस्यापीदमेव समाधानम् । नैतन्मनोहरम् धर्मस्वरूपप्रश्ने यद्धर्मस्य फलकीर्तनंतदप्यप्रस्तुतम् । धर्मोक्तिमात्राद्धि शास्त्रमर्थवत् । किंच कर्मणांफलनिर्वृत्तिंशंसेत्युक्ते महर्षिभिर्द्वादशे वक्ष्यमाणा सा वक्तुमादौ न युज्यते। इदंतु वदामः मुनीनांधर्मविषये प्रश्ने जगत्कारणतया ब्रह्मप्रतिपादनंधर्मकथनमेवेति नाप्रस्तुताभिधानम् । आत्मज्ञानस्यापि धर्मरूपत्वान्मनुनैव धृतिःक्षमादमोऽस्तेयंशौचमिन्द्रियनिग्रहः धीर्विद्या सत्यमक्रोधोदशकंधर्मलक्षणमिति दशविधधर्माभिधाने विद्याशब्दवाच्यमात्मज्ञानंधर्मत्वेनोक्तम् । महाभारतेऽपि आत्मज्ञानंतितिक्षा च धर्मःसाधारणोनृपेत्यात्मज्ञानंधर्मत्वेनोक्तम् । याज्ञवल्क्येन तु परमधर्मत्वेन यदाह इज्याचारदमाहिंसादानस्वाध्यायकर्म च । अयंतु परमोधर्मोयद्योगेनात्मदर्शनमिति । जगत्कारणत्वंच ब्रह्मलक्षणमतएव ब्रह्ममीमांसायांअथातोब्रह्मजिज्ञासेति सूत्रानन्तरंब्रह्मलक्षणकथनाय जन्माद्यस्य यतइति द्वितीयसूत्रंभगवान्बादरायणःप्रणिनाय अस्य जगतोयतोजन्मादिसृष्टिस्थितिप्रलयमितिसूत्रार्थः। तथा च श्रुतिः । यतोवाइमानि भूतानि जायन्ते येनजातानिजीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व । तद्ब्रह्मेतिप्राधान्येन जगदुत्पत्तिस्थितिलयनिमित्तोपादानब्रह्मप्रतिपादनमआत्मज्ञानरूपपरमधर्मावगमाय प्रथमाध्यायंकृत्वा संस्कारादिरूपंधर्मंतदङ्गतया द्वितीयाध्यायादिक्रमेण वक्ष्यतीति न कश्चिद्विरोधः । किंच प्रश्नोत्तरवाक्यानामेव स्वरसादयंमदुक्तोऽर्थोलभ्यते। तथाहि धर्मे पृष्टे मनुर्ब्रह्म जगतःकारणंब्रुवन् । आत्मज्ञानंपरंधर्मंवित्तेति व्यक्तमुक्तवान् ॥ प्राधान्यात्प्रथमाध्याये साधु तस्यैव कीर्तनम्। धर्मोऽन्यस्तु तदङ्गत्वाद्युक्तोवक्तुमनन्तरम् ॥ इदमित्यध्यक्षेण सर्वस्यप्रतिभासमानत्वात् जगन्निर्दिश्यते। इदंजगत्तमोभूतंतमसि स्थितंलीनमासीत्तमःशब्देन गुणवृत्त्या प्रकृतिर्निर्दिश्यते । तमइवतमः। यथा तमसि लीनाःपदार्थाअध्यक्षेण न प्रकाश्यन्त एवंप्रकृतिलीनाअपि भावानावगम्यन्तइति गुणयोगः । प्रलयकाले सूक्ष्मरूपतया प्रकृतौलीनमासीदित्यर्थः । तथाच श्रुतिः । तमआसीत्तमसा गूळ्हमग्रइति। प्रकृतिरपि ब्रह्मात्मनाऽव्याकृतासीत् । अतएवाप्रज्ञातमप्रत्यक्षंसकलप्रमाणश्रेष्ठतया प्रत्यक्षगोचरःप्रज्ञातइत्युच्यते तन्न भवतीत्यप्रज्ञातम् अलक्षणमन-

---

(२) मनु अध्याय १२ श्लोक २३

नुमेयंलक्ष्यतेऽनेनेति लक्षणंलिङ्गंतदस्य नास्तीतिअलक्षणम् अप्रतर्क्यंतर्कयितुमशक्यमदानींवाचकस्थूलशब्दाभावात्तच्छब्दतोऽप्यविज्ञेयम्। एतदेव च प्रमाणत्रयंसतर्कंद्वादशाध्याये मनुनाभ्युपगतम् अतएवाविज्ञेयमित्यर्थापत्त्याद्यगोचरमिति धरणीधरस्यापि व्याख्यानम्। न च नासीदेवेति वाच्यंतदानींश्रुतिसिद्धत्वात्। तथा च श्रूयते तद्धेदंतर्ह्यव्याकृतमासीच्छान्दोग्योपनिषच्च सदेव सौम्येदमग्रआसीदिदंजगत्सदेवासीद्ब्रह्मात्मनाआसीदित्यर्थः । सच्छब्दोब्रह्मवाचकःअतएव प्रसुप्तमिवसर्वतः । प्रथमार्थे तसिः स्वकार्याक्षममित्यर्थः ॥ ५ ॥

(४) **राघवानन्दः** । धर्मोपयोगिचातुर्वर्ण्यस्योत्पत्तिक्रमेणैव प्राधान्याप्राधान्यंमुखतोवक्तुं ब्रह्मज्ञानाय सृष्टेराविद्यकत्वं प्रकटयञ्छ्रोतव्यमाह आसीदित्यादि यावत्समाप्ति । इदमिदानींप्रमाणषट्कजधीयोग्यंजगत्सृष्टेःपूर्वंतमोभूतं तमःप्रधाना विद्यातदवच्छिन्नंब्रह्म तद्भूतंतत्प्राप्तंतत्तादात्म्यंगतं नतुतद्व्यतिरेकेणोपलब्धमासीदितियावत्। तेनशून्यमतंनिरात्ममतंचनिरस्तमतोब्रह्ममात्रपरिणतिरिति भास्करमतं परमाणूपादानमतंचनिरस्तं स्वात्मतमःस्वीकृतेः । तथा च श्रुतयः सदेवसोम्येदमग्रआसीत् एकमेवाद्वितीयंब्रह्मैवेदमग्रआसीत् तद्धेदंतर्ह्यव्याकृतमासीत् नासदासीन्नोसदासीत्तमआसीत् नैवेहकिंचनाग्रआसीत् मृत्युनैवेदमावृतमासीदित्यनेनात्रब्रह्मैवोपक्रान्तं संन्यासेनापहृत्यैनः प्राप्नोतिपरमांगतिमिति । मध्येऽपितदेवपरामृष्टं ब्रह्मान्तेच एवंयः सर्वभूतेषुपश्यन्नात्मानमात्मना । ससर्वसमतामेत्यब्रह्माभ्येति परंपदमिति॥ अत्रचाप्रज्ञातमिति कीर्तनादपूर्वता ऽऽद्यन्तमध्येकथनादभ्यासः परमांगतिमितिफलमितित्रितयंदर्शितम्। तथा आत्मैवदेवताः सर्वाः सर्वमात्मन्यवस्थितम् आत्मा हिजनयत्येषांकर्मयोगंशरीरिणामित्यर्थवादोपपत्ती दर्शिते तस्मादुपक्रमादिषड्विधलिङ्गोपेतंब्रह्मैवात्रविवक्षितम्। तथाच उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्। अर्थवादोपपत्ती चलिङ्गंतात्पर्यनिर्णयइतितच्छेषता धर्मस्य। तथाचश्रुतिः तमेवंवेदानुवचने न ब्राह्मणाविविदिषन्ति यज्ञेनदानेनेत्यादि । तथाधर्मेणपापमपनुदतीतिःश्रुतिः । स्मृतिरपि ज्ञानमुत्पद्यते पुंसांक्षयात्पापस्य कर्मणः । सर्वंकर्माखिलंपार्थ ज्ञाने परिसमाप्यतइत्यादिका । तदर्थंधर्मोपदेशोऽत्रैव सर्वेपि क्रमशस्त्वेते यथाशास्त्रंनिषेविताः । यथोक्तकारिणंविप्रं नयन्ति परमंपदमिति । सर्वेऽत्रोक्ताधर्मधीद्वारेणेतिशेषोऽन्यथा नतत्र दक्षिणायन्तिनाविद्वांसोऽतपस्विनइति श्रुतेर्बाधः। तथा तमेवविदित्वातिमृत्युमेति नान्यः पन्थाविद्यतेऽयनायेतिच । अनेन धीकर्मणोः कार्यकारणपरत्वप्रतीतेस्तयोः समविषमसमुच्चयोऽपिनिरस्तः । तथात्रैव । सम्यग्दर्शनसंपन्नः कर्मभिर्न निबध्यते। दर्शनेन विहीनस्तु संसारंप्रतिपद्यतइति । तस्माद्ब्रह्मधीशेषता धर्मस्य । धर्मस्तु देहादिसृष्टिंविना नेतीयंसृष्टिद्वारिकासंगतिः शास्त्रस्येति । अप्रज्ञातमनुपलब्धं प्रत्यक्षेण तेन चार्वाकमतंनिरस्तम्। अलक्षणं लक्षणमनुमानंतदगम्यं तेनसाङ्ख्यमतंनिरस्तं तेषांप्रकृतेर्नित्यानुमेयत्वात्। अप्रतर्क्यंतर्कावेद्यं तेन नैयायिकमतंनिरस्तम् । अविज्ञेयंतदानीमागमतः तेन मीमांसकमतंनिरस्तम्। तर्ह्यसन्नेत्याह प्रसुप्तमिव सर्वतः सर्वेषां सुप्तिरिव तत्र यथात्मभावंगतस्य विश्वस्य तस्मादेवोत्पत्तिस्तथाह । यथाअग्नेःक्षुद्राविस्फुलिङ्गाः प्रभवन्तिसरूपाएवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे वेदाः सर्वाणिभूतानि व्युच्चरन्ति जायन्ते तथान्यत्रापिमृत्युनैवेदमावृतमासीत् कथमसतः सज्जायेत नासतोविद्यतेभावोनाभावोविद्यतेसतइत्यादिश्रुतिस्मृति शतेनावगतसत्तत्त्वस्य नासत्वम् ॥ ५ ॥

(५) **नन्दनः** । तत्र सर्वतत्त्वेन सृष्टेः प्रथमंवक्तुमुचितत्वात्तांविवक्षुस्ततः पूर्वस्यांप्रलयावस्थायां जगदवस्थानं तावदाह आसीदिति । सर्वतः सर्वमिदंकार्यजातम् तमोमूलप्रकृतिः तत्तद्भूतकार्यावस्थांविहाय कारणतामधिगतम्। अलक्षणं लक्षणमाकारोधर्मः गन्धरसादिधर्मरहितमितियावत्। अनेनप्रत्यक्षाविषयत्वमुक्तम्। अप्रतर्क्यमित्यनुमानाविषयत्वमुक्तम्। अविज्ञेयमित्यागमाविषयत्वमुक्तम्। एवंप्रमाणत्रयाऽगोचरत्वादप्रज्ञातमुपरतक्रियत्वात्प्रसुप्तमिवासीत् ॥ ५ ॥

(६) **रामचन्द्रः** । आसीदिति । मनुरुवाच इदंविश्वंपूर्वंतमोभूतमासीत्। कीदृशंविश्वं न प्रज्ञातंकैश्चित् न प्रकर्षेणज्ञातं

नलक्षणंपूर्वापरंवायस्य तदलक्षणम् पुनःकीदृशंविश्वं अप्रतर्क्यंतर्कागोचरं तथाऽविज्ञेयं किमिव सर्वतःप्रसुप्तमिव॥५॥

ततःस्वयंभूर्भगवानव्यक्तोव्यञ्जयन्निदम् ॥ महाभूतादिवृत्तौजाःप्रादुरासीत्तमोनुदः ॥ ६ ॥

(१) **मेधातिथिः** । तस्यामहाराव्याअनन्तरंस्वयंभवतीति स्वयंभूः स्वेच्छया कृतशरीरपरिग्रहोन संसार्यात्मवत्कर्मपरतन्त्रंशरीरग्रहणमस्य । अव्यक्तो ध्यानयोगाभ्यासभावनावर्जितानामप्रकाशः अथवा अव्यक्तमिदमित्येवंपठितव्यम् । इदमव्यक्तावस्थंव्यञ्जयन् स्थूलरूपैर्विकारैः प्रकाशमानयन् । यदिच्छयापुनर्जगत्प्रादुर्भवति प्रादुरासीत्। प्रादुःशब्दः प्राकाश्ये । तमोनुदः तमोमहाप्रलयावस्था तांनुदति विनाशयति पुनर्जगत्सृजत्यतस्तमोनुदः । महाभूतानि पृथिव्यादीनि । आदिग्रहणात्तद्गुणाः शब्दादयोगृह्यन्ते तेषु वृत्तंप्राप्तमोजोवीर्यंसृष्टिसामर्थ्यंयस्य । सएवमुक्तः स्वयमसमर्थानि महाभूतानि जगन्निवर्तयितुं यदात्वंतु तेन तत्र शक्तिराधीयते तदावृत्ताद्यात्मना विक्रियन्ते । ननु प्रकृतिशक्त्यवस्थानि प्रकृतिरूपापन्नानि महाभूतानि जगत्सर्गादौ महाभूतशब्देनाभिप्रेतानि । पाठान्तरं महाभूतानुवृत्तौजाइति । अनुवृत्तमनुगतमिति प्रागुक्तएवार्थः ॥ ६ ॥

(२) **सर्वज्ञनारायणः** । ततइति । स्वयंभूर्भगवान् जगज्जननोचितवीर्यवानव्यक्तः प्रत्यक्षागम्यः परमात्मा व्यञ्जयन्निदं महाभूतेन्द्रियप्रकृतिव्यक्तं कुर्वन्नेव प्रादुरासीद्व्यक्तोऽभवत् । जगतस्तदुपादेयस्य व्यक्तिरेव तद्व्यक्तिर्नान्येत्यर्थः । महाभूतानामादौ सृष्टेरग्रे वृत्तौजाः प्रवृत्तबलः सृष्टौ तमोनुदोमोहापनोदकः सृष्टौ प्रलयकालिकतमोऽभिभवेन रजसः प्राबल्यात् ॥ ६ ॥

(३) **कुल्लूकः** । अथ किमभूदित्याह ततःस्वयंभूर्भगवानित्यादि । ततःप्रलयावसानानन्तरं स्वयंभूः परमात्मा स्वयंभवति स्वेच्छया शरीरपरिग्रहंकरोतीति न त्वितरजीववत्कर्मायत्तदेहः । तथा च श्रुतिः । सएकधा भवति द्विधा भवति । भगवानैश्वर्यादिसंपन्नः । अव्यक्तोबाह्यकरणागोचरोयोगाभ्यासावसेयइतियावत् । इदंमहाभूतादि आकाशादीनिमहाभूतान्यादिग्रहणान्महदादीनि च व्यञ्जयन्नव्यक्तावस्थंप्रथमंसूक्ष्मरूपेण ततःस्थूलरूपेण प्रकाशयन् । वृत्तौजावृत्तमप्रतिहतमुच्यतेऽतएव वृत्तिसर्गतायनेषु क्रमइत्यत्र वृत्तिरप्रतिघातइति व्याख्यातंजयादित्येन । वृत्तमप्रतिहतमोजःसृष्टिसामर्थ्यंयस्य सतथा । तमोनुदः प्रकृतिप्रेरकः । तदुक्तंभगवद्गीतायाम् मयाध्यक्षेण प्रकृतिःसूयते सचराचरमिति ॥ प्रादुरासीत्प्रकाशितोबभूव । तमोनुदः प्रलयावस्थाध्वंसकइति तु मेधातिथिगोविन्दराजौ ॥ ६ ॥

(४) **राघवानन्दः** । एवंकारणात्मना लयमुक्त्वा सृष्टिमाह ततइति । ततःप्रलयानन्तरं स्वयंभूः स्वभवनेऽन्यानपेक्षोऽ नादिरित्युक्तम् । तस्य सृष्टिसामर्थ्यंद्योतयति भगवानिति । उत्पत्तिंच विनाशंच भूतानामागतिंगतिम् । वेत्ति विद्यामविद्यांच सवाच्योभगवानित्युक्तेः । अव्यक्तः उपनिषच्छब्दातिरिक्तप्रमाणागम्यः । तथाचश्रुतिः । तंत्वौपनिषदंपुरुषं पृच्छामीतिव्यञ्जयन्वटकणिकायांस्थितं वटवृक्षंवटकणिकेवइदं । तदा तमोभूतमविद्याद्वाराऽऽत्मन्यन्तर्लीनंव्यञ्जयन् व्यक्ततामापादयन् प्रादुरासीत् कार्योन्मुखोऽभूदित्यन्वयः । तथाचश्रुतिः तदात्मानंस्वयमकुरुतेति । तन्नामरूपाभ्यामेव व्याक्रियतइति । कथंभूतः महाभूतादिवृत्तौजाः महाभूतादिर्महाभूतस्यादिरहङ्कारतत्त्वंतत्र वृत्तसृष्टिकारणसामर्थ्यलक्षणमोजोयस्य सः । तमोनुदः तमोऽभिभवरूपः सत्त्ववृत्तिरीक्षणंकुर्वाणः । तथाचश्रुतिः तदैक्षत बहुस्यांप्रजायेयेति । एतदेवेक्षणंमहत्तत्वंबुद्धिर्महानित्युक्तेः ॥ ६ ॥

(५) **नन्दनः** । विस्तरेण जगत्सृष्टिंवक्ष्यन्स्रष्टारंसृज्योपादानंसृज्यंच संक्षिप्यतावदाह ततइति । ततःप्रलयावसाने । स्वयमेवसर्वदा भवतीति स्वयंभूः । भगवाञ्ज्ञानबलैश्वर्यशक्तितेजोरूपः । अव्यक्तोदुर्विज्ञानः । विशेषणत्रयेण परस्य पुंसोनि

त्यत्वंस्वरूपंमहिमा चोच्यते । तमोनुदःप्रकृतेः प्रेरकःपरिणमयिता । महाभूतादिवृत्तौजास्तद्गुणसंविज्ञानोबहुव्रीहिः । तेषु महाभूतादिषु चतुर्विंशतितत्त्वेषु प्रवृत्तवीर्यः । अनयोर्विशेषणयोश्चायमर्थः । चतुर्विंशतितत्त्वानि तदनुप्रविष्टंच भगवद्वीर्यंजगदुपादानमिति । इदंकार्यजातंव्यञ्जयन्नाविष्कुर्वन्प्रादुरासीत् । प्रादुर्भावश्चात्रतत्त्वानुप्रविष्टस्य भगवतः शरीरवत्त्वेन व्यक्तीभावः ॥ ६ ॥

(६) **रामचन्द्रः** । ततइति । ततस्तस्मात्कारणादव्यक्तोभगवानिदंविश्वंव्यञ्जयन्प्रादुरासीद्यतःस्वयंभूः । कीदृशःतमोनुदःप्रकाशकर्ता । पुनःकीदृशः महाभूतादिर्महदादीनिभूतानि तेषामादिः । पुनःकीदृशः वृत्तौजामहदादीनांभूतानामादौ प्रधाने वृत्तौजावृत्तबलः ॥ ६ ॥

योऽसावतीन्द्रियग्राह्य[1]ः सूक्ष्मोऽव्यक्तःसनातनः ॥ सर्वभूतमयोऽचिन्त्यःसएव×स्वयमुद्बभौ ॥ ७ ॥

(१) **मेधातिथिः** । योसावितिसर्वनामभ्यांसामान्यतः प्रसिद्धमिवपरंब्रह्मोद्दिशति । योऽसौवेदान्तेष्वन्यासुचाध्यात्मविद्यास्वितिहासपुराणेषु च प्रसिद्धोवक्ष्यमाणैर्धर्मैः सएषप्रादुरासीदित्यत्रोक्तः स्वयमुद्बभावुद्भूतः शरीरग्रहणंकृतवान् । भातिरनेकार्थत्वादुद्भवे वर्तते । अथवा दीप्त्यर्थएव स्वयंप्रकाशआसीन्नादित्याद्यालोकापेक्षः । इन्द्रियाणामत्ययोऽतीन्द्रियम् । अव्ययीभावः । अतीन्द्रियग्राह्यः सुप्सुपेतिसमासः । इन्द्रियाण्यतिक्रम्य गृह्यते नकदाचिदिन्द्रियस्य गोचरः । अन्यदेव तद्योगजज्ञानंयेन गृह्यते । अथवेन्द्रियाण्यतिक्रान्तमतीन्द्रियं मनउच्यते । परोक्षत्वादिन्द्रियाणामविषयः । तथाचवैशेषिकायुगपज्ज्ञानानुत्पत्तिर्मनसोलिङ्गमित्यानुमानिकत्वंमनसः प्रतिपन्नास्तेन गृह्यते । तथाच भगवान्व्यासः । नैवासौ चक्षुषा ग्राह्यो नतु शिष्टैरपीन्द्रियैः । मनसा तु प्रयत्नेन गृह्यते सूक्ष्मदर्शिभिरिति ॥ प्रसन्नेन रागादिदोषैरकलुषितेन तदुपासनापरत्वेन लब्धसूक्ष्मदर्शनशक्तिभिः । सूक्ष्मइवसूक्ष्मोऽणुर्न ह्यसावणुस्थूलादिविकल्पानामाश्रयः । सर्वविकल्पातीतोह्यसौ । उक्तंच । यः सर्वपरिकल्पानामभ्यासेऽप्यनवस्थितः । तर्कागमानुमानेन बहुधा परिकल्पितः । व्यतीतोभेदसंसर्गाद्भावाभावौक्रमाक्रमौ । सत्यानृते च विश्वात्मा सविवेकात्प्रकाशतइति । सूक्ष्मत्वादव्यक्तः सनातनोव्यक्तस्वाभाविकेनानादिनिधनेनैश्वर्येण युक्तोयेषामपि कर्मप्राप्यंहैरण्यगर्भपदं तन्मतेपि सनातनत्वंत्यप्यादिमत्वेऽन्तत्वाभावात् । नहि सर्गादिफलभोक्तृत्वावस्था कदाचिदपैति । सर्वाणि भूतानि मया स्रष्टव्यानीत्येवंभावितचित्तोभूतात्मैवंसंपन्नः सर्वभूतमयइत्युच्यते । यथामृन्मयोघटोमृद्विकारत्वान्मृद्भिरारब्धशरीर एवंयःकश्चित्किंचिदत्यन्तंभावयति सतन्मयइत्युपचारादुच्यते । यथास्त्रीमयोयंपुरुषः ऋङ्मयोयजुर्मयइति। अथवाऽद्वैतदर्शनेनैव चेतनाचेतनानि भूतानि पृथक्के न सन्ति तस्यैवायंविवर्तः । अतोविवर्तानांभूतमयत्वात्तैश्चतस्याभेदाद्युक्तमेवतन्मयत्वम् । कथंपुनरेकस्यनानारूपविवर्तितोपपत्तिरेकत्वाद्विरोधिनी। उच्यते । एवमाहुर्विवर्तवादिनोयथा समुद्राद्वायुनाभिहिताऊर्मयः समुत्तिष्ठन्ति ते च न ततोऽभिपद्यन्ते नापिलिप्यन्ते सर्वथाभेदाभेदाभ्यामनिर्वाच्या एवमयंब्रह्मणोविश्वविवर्तः । अपिशब्दश्चात्र द्रष्टव्यः । स्वरूपे स्थितोऽग्राह्यो विवर्तावस्थायामिन्द्रियग्राह्यः । एवंसूक्ष्मः । अपिशब्दात् स्थूलावस्थायांस्थूलः । अव्यक्तोव्यक्तश्च शाश्वतोऽशाश्वतश्च । भूतमयस्तद्रूपरहितश्च । विवर्तावस्थाभेदेनैव व्याख्येयम् । अचिन्त्यः आश्चर्यरूपः सर्वविलक्षणया शक्त्या योगात् ॥ ७ ॥

(२) **सर्वज्ञनारायणः** । योऽसाविति । योऽसौ परमात्मा अतीन्द्रियोऽप्रत्यक्षः अग्राह्योऽधार्यः सूक्ष्मोमनसोऽप्यगो-

---

१ यग्राह्यः= योऽग्राह्यः (सर्वज्ञनारायणमते)

× सएव = सएष (ख, ग, घ, च, अ, ज झ, ड,)

चरः अव्यक्तोव्यञ्जकशून्यः सनातनोनित्यः सर्वभूतमयः सर्वप्राणिनां तदुपादानवत्त्वात् अचिन्त्यस्तर्कागम्यः सएवपरमात्मैषजगद्रूपेण स्वयमुद्बभावाविर्भूतइति । एवंविश्वस्योपादानप्रकृतिशक्तियुक्तः परमात्मैवेति दर्शितम् ॥ ७ ॥

(३) **कुल्लूकः** । योऽसाविति । योऽसाविति सर्वनामद्वयेन सकललोकवेदपुराणेतिहासादिप्रसिद्धंपरमात्मानंनिर्दिशति । अतीन्द्रियग्राह्यइन्द्रियमतीत्य वर्ततइत्यतीन्द्रियंमनस्तद्ग्राह्यइत्यर्थः । यदाहव्यासः । नैवासौ चक्षुषा ग्राह्योन च शिष्टैरपीन्द्रियैः । मनसातु प्रयत्नेन गृह्यते सूक्ष्मदर्शिभिः ॥ सूक्ष्मोबहिरिन्द्रियागोचरः । अव्यक्तोव्यक्तिरवयवस्तद्रहितः। सनातनोनित्यः । सर्वभूतमयःसर्वभूतात्मा अतएवाचिन्त्यःइयत्तया परिच्छेत्तुमशक्यः । सएव स्वयमुद्बभौ महदादिकार्यरूपतया प्रादुर्बभूव उत्पूर्वोभातिः प्रादुर्भावेवर्तते. धातूनामनेकार्थत्वात् ॥ ७ ॥

(४) **राघवानन्दः** । किंच योसाविति । अतीन्द्रियश्चासौ ग्राह्यश्चेति न चक्षुषा गृह्यते नापि वाचेति श्रुतेः । चक्षुराद्यविषयत्वेपि शब्दजन्यलक्षणावृत्तिविषयतया ग्राह्यः सूक्ष्मोनिरवयवोऽतएवाव्यक्तः सनातनोनित्यः सर्वभूतमयः सर्वभूतानामभिन्ननिमित्तोपादानत्वात् । तथाच जन्माद्यस्य यतइति ब्रह्मलक्षणसूत्रे यतोवाइमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मेति । अभिन्ननिमित्तोपादानब्रह्मलक्षणार्थश्रुतिरुदाहृता कार्यस्याविद्यकतया कल्प्यत्वात्कारणतयाऽचिन्त्योऽपि विचारासहोऽप्यात्मा पञ्चभूतकारणतांगतइत्याह स्वयंउद्बभाविति । प्रादुरासीदित्यस्यानुवादमात्रम् ॥ ७ ॥

(५) **नन्दनः** । सृष्टौ भगवान्स्वयमेव प्रवर्तते नान्यनियोगेनेत्याह योऽसाविति । संपन्नयोगसंस्कारंमनोऽतीन्द्रियंतेनग्राह्यः । अतीन्द्रियग्राह्यइत्ययमेव साधुः पाठः। सूक्ष्मः अणोरणीयान् । अव्यक्तः दर्शनागोचरः ।सनातनःअनादिनिधनः । योऽसावेवंलोकशास्त्रप्रसिद्धः सएषपरमः पुमान्सर्वभूतमयः प्रपञ्चरूपःस्वयं न कस्यचिन्नियोगेन नापिकर्मवशेनोद्बभौव्यक्तोबभूव । एतदुक्तंभवत्यतीन्द्रियग्राह्यत्वादिगुणयुक्तोऽपि सदसद्विपरीतेन जगदाकारेण स्फुरन्स्वेच्छयाविहरतीति । नन्वतीन्द्रियग्राह्यत्वादिकल्याणगुणयुक्तस्य तत्प्रतिभटप्रपञ्चरूपधारणंकिमर्थमितिचोदनायामचिन्त्यइत्युक्तम् । अचिन्त्यः दुर्विज्ञानोदुर्निरूपाहीश्वरप्रवृत्तिः ॥ ७ ॥

(६) **रामचन्द्रः** । यइति । सएवेश्वरः स्वयमुद्बभौ स्वयमुत्पन्नः । योऽसावतीन्द्रियोमनोग्राह्यइन्द्रियाण्यतिक्रम्य वर्तते सः । पुनःकीदृशः मनोवाक्कायकर्मभिरग्राह्यःसूक्ष्मः । पुनःकीदृशःअव्यक्तःन व्यक्तोऽव्यक्तः । पुनःकीदृशः सनातनःलयेऽपियोवर्तते ॥ ७ ॥

सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः ॥ अपएव ससर्जादौ तासु बीजमवासृजत् ॥८॥

(१) **मेधातिथिः** । सपूर्वनिर्दिष्टविशेषणोहिरण्यगर्भः समवर्तताग्रइत्यादिभिर्मन्त्रैर्लब्धहिरण्यगर्भाभिधानः । प्रजाविविधानानारूपाःसिसृक्षुः स्रष्टुमिच्छन्नपाः उदकमादौ प्रथमंससर्जोत्पादितवान् । शरीरात्स्वाद्यत्तेन गृहीतंशरीरमद्वैतदर्शने । प्रधानमेव । तस्येदंशरीरंतदिच्छानुवर्तित्वात् स्वतःस्वशरीरनिर्माणहेतुत्वाच्च सर्वलोकानांशरीरंकिंभौतिकेन व्यापारेण कुद्दालखननादिना ससर्ज नेत्याह । कथंतर्ह्यभिध्यायापउत्पद्यन्तामेवमिच्छामात्रेण । अत्रेत्थंचोच्यते ।

---

(८) भिध्याय = भिध्यायन् (ख, घ,)

(१।८) बीज = वीर्य (च, ग, क, ख)

(२।८) सृजत् = क्षिपत् (क)

C1957
ASIATIC SOCIETY

पृथिव्यादीनांतदानीमभावादपांसृष्टानांकआधारः। अन्येभ्यइदमुच्यते स्रष्टुरपि परमेश्वरस्य गृहीतशरीरस्य कआधारइत्यपि वाच्यम्। अथ विलक्षणैश्वर्यातिशययोगादन्यैव सा कर्तृशक्तिरसङ्गचोद्या प्रकृतधर्मसामान्येनेत्येवमेष्वपि द्रष्टव्यम्। तासु वीर्यंशुक्रमवासृजत् न्यषिञ्चत् ॥ ८ ॥

(२) **सर्वज्ञनारायणः**। अथ सृष्टिक्रममाह सोभिध्यायेति। शरीराच्छरीरतुल्याच्छक्तिभूतात्प्रधानादुपादानीभूतात्सिसृक्षुः प्रजा अपः ससर्ज। बीजाधारतया वीर्यं बीजभूता भूतमात्राः ॥ ८ ॥

(३) **कुल्लूकः**। सोऽभिध्यायेति। सपरमात्मा नानाविधाःप्रजाःसिसृक्षुरभिध्यायापोजायन्तामित्यभिध्यानमात्रेणापएव ससर्ज। अभिध्यानपूर्विकांसृष्टिंवदतोमनोःप्रकृतिरेवाचेतनाऽस्वतन्त्रा परिणमतइत्ययंपक्षोन संमतः किंतु ब्रह्मैवाव्याकृतशक्त्यात्मना जगत्कारणमिति त्रिदण्डिवेदान्तसिद्धान्तएवाभिमतःप्रतिभाति। तथा च छान्दोग्योपनिषत् तदैक्षत बहुस्यांप्रजायेयेति। अतएव शारीरकसूत्रकृता व्यासेन सिद्धान्तितमीक्षतेर्नाशब्दमिति। ईक्षतेरीक्षणश्रवणान्न प्रधानंजगत्कारणम् अशब्दं न विद्यते शब्दः श्रुतिर्यस्य तदशब्दमिति सूत्रार्थः। स्वाच्छरीरादव्याकृतरूपादव्याकृतमेव भगवद्भास्करीयवेदान्तदर्शने प्रकृतिस्तदेव तस्य च शरीरमव्याकृतशब्देन पञ्चभूतबुद्धीन्द्रियकर्मेन्द्रियप्राणमनःकर्माविद्यावासनाएव सूक्ष्मरूपतया शक्त्यात्मना स्थिताअभिधीयन्तेऽव्याकृतस्य च ब्रह्मणा सह भेदाभेदस्वीकारात्। ब्रह्माद्वैतंशक्त्यात्मना च ब्रह्म जगद्रूपतया परिणमतइत्युभयमप्युपपद्यते। आदौ स्वकार्यभूमिब्रह्माण्डसृष्टेःप्रागपांसृष्टिश्चेयंमहदहङ्कारतन्मात्रक्रमेण बोद्धव्या महाभूतादिव्यञ्जयन्निति पूर्वाभिधानादनन्तरमपि महदादिसृष्टेर्वक्ष्यमाणत्वात्। तास्वप्सुबीजंशक्तिरूपमारोपितवान् ॥ ८ ॥

(४) **राघवानन्दः**। ततोहिरण्यगर्भस्योत्पत्तिमाह सोऽभिध्यायेति। सईश्वरोऽभिध्याय सृज्यमानसूक्ष्मप्रपञ्चमाभिमुख्येन मायावृत्तिभिरालोच्य स्वादध्यस्ताच्छरीरादवच्छेदकतया शरीरस्थानीयादविद्यातोविचित्रशक्तितोऽपः ससर्जेत्यन्वयः। आदौ। सृष्टेः। किंकुर्वन् विविधाः स्थावरादिभेदभिन्नाः प्रजाः सिसृक्षुरपोऽपञ्चीकृतपञ्चभूतानि अण्व्योमात्राविनाशिन्योदशार्धानांच याःस्मृताः। ताभिः सार्धमिदंसर्वंसंभवत्यनुपूर्वशइत्यत्रोपसंहारे वक्ष्यमाणत्वात् पूर्वजन्मनि हिरण्यगर्भेण यजमानावस्थेन क्षिप्तान्यग्निहोत्रादिसमवायीनि तासु बीजं हिरण्यगर्भोऽहमित्यादिवासनावासितकर्तृत्वाद्यवच्छिन्नंचैतन्यमवासृजत्प्रकटतामनयदपञ्चीकृतंपञ्चभूततत्कार्यलिङ्गशरीरावच्छिन्नचैतन्यस्य हिरण्यगर्भत्वात्। तथा। तपसा चीयते ब्रह्म ततोऽन्नमभिजायते। अन्नात्प्राणइति श्रुतेः। अन्नमत्रापञ्चीकृतपञ्चभूतानि तस्मात्प्रागोहिरण्यगर्भोभिजायतइत्यनुषङ्गः ॥ ८ ॥

(५) **नन्दनः**। तत्त्वसृष्टिंसंक्षेपेणोक्त्वा तात्त्विकींसृष्टिंविस्तरेण वक्तुमुपक्रमते सइति। सभगवान्स्वाच्छरीराद्विविधाः प्रजाःसिसृक्षुरित्यभिध्यायापः सृष्ट्वा तत्रस्ववीर्यमुप्त्वा तदण्डाकारेण परिणमय्य तत्रहिरण्यगर्भाख्यमात्मनः शरीरंसंपाद्य तस्मादेवोपादानात् प्रजासृजेयमितिविगणय्येत्यर्थः। आदावण्डादौ वीर्यमण्डपरिमाणानुगुणंशक्तिविशेषमवासृजदुप्तवानंशेनानुप्राविशदित्यर्थः ॥ ८ ॥

(६) **रामचन्द्रः**। सइति। ईश्वरोऽभिध्याय ध्यानंकृत्वा कुतःसृष्टिंकरोमीति ध्यात्वा स्वात्शरीराद्विविधाःप्रजाः सिसृक्षुः सन्नादौ सृष्ट्यादावपएव ससर्ज। तास्वप्सु बीजंचिच्छक्तिमवासृजत् ॥ ८ ॥

तदण्डमभवद्धैमंसहस्रांशुसमप्रभम् ॥ तस्मिञ्जज्ञे स्वयंब्रह्मा सर्वलोकपितामहः ॥ ९ ॥

(१) **मेधातिथिः** । प्रथमंप्रधानंसर्वतोभवमृद्रूपंसंपद्यते । हिरण्यगर्भवीर्यसंयोगात्काठिन्यंप्रतिपद्यते । तदण्डंसमभवदित्युच्यते। हेम्नइदंहैमं स्वर्णमयमित्यर्थः । अंशुसामान्यात्तस्य सुवर्णमयस्य । ननु नागमिकोयमर्थो न चात्र इवशब्दः श्रूयते तत्र कथमुपचारतोव्याख्यानमसति प्रमाणान्तरे । उच्यते । वक्ष्यति ताभ्यांशकलाभ्यांतु दिवंभूमिंचनिर्ममइति। इयंभूमिर्मृन्मयी न सर्वतः सुवर्णमयीत्यतउपचारआश्रितः। सहस्रांशुरादित्यइत्यर्थः । अंशवोरश्मयस्तत्तुल्या प्रभा दीप्तिरस्तस्याण्डस्य तस्मिन्नण्डे स्वयंब्रह्मा जातोजज्ञे संभूतः। ब्रह्माहिरण्यगर्भएव । स्वयमितिउक्तार्थम्। योगशक्त्या प्राग्गृहीतंशरीरंपरित्यज्यान्तरण्डमनुप्राविशत् । अथाशरीरएवयः ससर्ज ततोऽन्तरण्डंस्वशरीरंजग्राह । अथवाऽन्योयोऽसावित्यत्रनिर्दिष्टः। अन्यश्चायमण्डजोब्रह्मेति । तथाचवक्ष्यति तद्विसृष्टइति। तेनेश्वरेण सृष्टः । कथंतर्हि स्वयंजज्ञे स्वयंभुवश्च तत्र ब्रह्मोच्यते । नैषदोषः ।पितृनाम्ना पुत्रोव्यपदिश्यते । आत्मा जज्ञआत्मनइति । अनिदंपरेभ्य आगमेभ्योलिखितमाचार्येण नचात्राभिनिवेष्टव्यम् । सएव स्वयंजायतामन्योवा तेन सृज्यतामिति न धर्माभिधानउपयुज्यतइत्युक्तम् । सर्वलोकानांपितामहइति संजातस्योपचारतोवास्तवदृष्टत्वात् पितुरपि सकाशादधिकः पितामहःपूज्यः ॥ ९ ॥

(२) **सर्वज्ञनारायणः** । तदण्डमिति । तद्बीजंयद्वसृष्टं तेजः तस्य च तेजोधातूत्कटतांवक्तुमुक्तं सहस्रांशुसमप्रभमिति । तस्मिन्नण्डे ब्रह्मशब्दस्य नानार्थत्वात्सर्वलोकपितामहइत्युक्तम् । पितुरपि तज्जन्यत्वात्पितामहः ॥ ९ ॥

(३) **कुल्लूकः** । तदण्डमभवद्धैममिति । तद्बीजंपरमेश्वरेच्छया हैममण्डमभवत् । हैममिव हैमंशुद्धिगुणयोगान्न तु हैममेव । तदीयैकशकलेन भूमिनिर्माणस्य वक्ष्यमाणत्वाद्भूमेश्चाहैमत्वस्य प्रत्यक्षत्वादुपचाराश्रयणम् । सहस्रांशुरादित्यस्तत्तुल्यप्रभंतस्मिन्नण्डे हिरण्यगर्भोजातवान् येन पूर्वजन्मनि हिरण्यगर्भोऽहमस्मीति भेदाभेदभावनया परमेश्वरोपासना कृता तदीयंलिङ्गशरीरावच्छिन्नजीवमनुप्रविश्य स्वयंपरमात्मैव हिरण्यगर्भरूपतया प्रादुर्भूतः । सर्वलोकानांपितामहोजनकःसर्वलोकपितामहइति वा तस्य नाम॥ ९ ॥

(४) **राघवानन्दः** । ततोविराड्जज्ञेइत्याह तदिति । तत्पूर्वोपस्थितजलरूपमपञ्चीकृतंपञ्चीकृतपञ्चभूताण्डाकारेणाभवत्परिणनाम सोऽकामयत द्वितीयोमआत्माजायेतेत्युपक्रम्य तंजातमभिव्याददातीति श्रुतेः । सहिरण्यगर्भोद्वितीयविषयककामनांकृत्वा तंपुत्रस्थानीयं ब्रह्माण्डंजनयित्वाऽन्तंमुखमभिव्याददादिति श्रुतेरर्थः । तेन हिरण्यगर्भस्य कार्यंविराडिति । हैमंबहुलप्रकाशं न तु हेममयंमपञ्चीकृतपञ्चभूतमयत्वादण्डस्य । अहंगौरइति मनुष्यदेहआत्माभिमानइव तत्र तच्चैतन्याभिमानोवृत्तइत्याह तस्मिन्नित्यादि । तस्मिन्नण्डे ब्रह्माविराड्जज्ञेऽभिमानी जातः पञ्चीकृतपञ्चभूताभिमानिनस्तस्यैव चैतन्यस्य विराट्त्वात्। तथा च श्रुतिः आपएवेदमग्रआसुस्ताआपः सत्यमसृजन्त सत्यंब्रह्म ब्रह्म प्रजापतिं प्रजापतिर्देवानिति । अपञ्चीकृतपञ्चभूतानि ताः सत्यंहिरण्यगर्भंजनयामासुः । सत्यंकर्तृ ब्रह्म विराजं जनयामास । तच्च ब्रह्म कर्तृ प्रजापतिंमनुंसच मनुर्देवाञ्जनयामासेत्यनुषज्यतइति श्रुतेरर्थः । तथा च वार्त्तिकम् । आपोब्रह्मणुतराः सत्यमसृजन्तइति श्रुतिः । क्रियाविज्ञानशक्त्यात्मा सोतिब्रह्माऽसृजत्परः। विराड् ब्रह्माथ ससृजे मनुंदेवं प्रजापतिम् । मनुर्देवान्मनुष्यांश्च स्थास्नु कृत्स्नंचरिष्णुचेति । क्रियाविज्ञानशक्त्यात्मा हिरण्यगर्भः स्वकार्याद्विराड्ब्रह्मणःपरोवर्ततइति परशब्दार्थः ॥९

---

(९) तस्मिन् = यस्मिन् (ख, च)

२

THE ASIATIC SOCIETY CALCUTTA
Ac. S 3069 9.9.92

(५) **नन्दनः** । ता जलानुप्रविष्टं भगवद्वीर्यम् । हैमंहेमनयम् । अतएव हि ब्रह्मा हिरण्यगर्भाख्यस्तस्मिन्नण्डेस्वयमेव भगवान् ब्रह्मस्वरूपधारी जज्ञे ॥ ९ ॥

(६) **रामचन्द्रः** । तदण्डमिति । तन्नीजंहैमंसुवर्णमयंप्रकाशरूपमण्डमभवत् । कीदृशमण्डंसहस्रांशुसमप्रभंतस्मिन्नण्डे स्वयमीश्वरोब्रह्मा कीदृशोब्रह्मा सर्वलोकपितामहः ॥ ९ ॥

आपोनाराइति प्रोक्ताआपोवै नरसूनवः ॥ तायदस्यायनंपूर्वंतेन नारायणः स्मृतः ॥ १० ॥

[नारायणपरोव्यक्तादण्डमव्यक्तसंभवम् ॥ अण्डस्यान्तस्त्विमेलोकाःसप्तद्वीपाचमेदिनी ॥]

(१) **मेधातिथिः** । यः कुत्रचिन्नारायणशब्देन कर्तृज्ञानशक्त्यतिशययोगेन जगत्कारणपुरुषतयागमेष्वाम्नातः सोऽयमेव नशब्दभेदादर्थभेदः । ब्रह्मा नारायणोमहेश्वर इत्येकएवार्थोनोपासनाकर्मतया भिद्यते । तथा च द्वादशे दर्शयिष्यामः । यथाचैतत्तथोच्यते । आपोनाराइत्यनेन शब्देन प्रोक्ताः । ननु नायंवृद्धव्यवहारेऽथच न तथा प्रसिद्धोऽतआह आपोवै नरसूनवः । सभवेद्भगवान्नरः पुरुषइतिप्रसिद्धः । आपश्च तस्य सूनवोऽपत्यानि । अतस्तानरशब्देनोच्यन्ते । दृष्टोहि पितृशब्दोऽपत्ये वसिष्ठस्यापत्यानि वसिष्ठाभगवतस्ताबभ्रुमण्डुलोमकइत्यभेदोपचारेण ताआपोनरशब्दवाच्याः । यत येन प्रकारेण अस्य प्रजापतेः पूर्वमयनंप्रथमसर्गआश्रयोवा गर्भस्थस्य तेन हेतुना नारायणः स्मृतः । नराअयनमस्येति नरायणइति प्राप्तेन्येषामपि दृश्यतइतिदीर्घः पूरुषइतियथा । अथवा सामूहिकोऽण् ॥ १० ॥

(२) **सर्वज्ञनारायणः** । आपइति । नाराइति नाम्नाऽऽपः प्रोक्ताः । नरस्य नेतुः परमात्मनोहि सूनवोऽपत्यानि ताः पूर्वंसृष्ट्यादावस्य ब्रह्मणस्ता अयनंस्थानंतेन नारायणोब्रह्मा । यथा विष्णुपुराणे । ब्रह्मा नारायणाख्योऽसौ कल्पादौ भगवान्पुरेति ॥ १० ॥

(३) **कुल्लूकः** । इदानीमागमप्रसिद्धनारायणशब्दार्थनिर्वचनेनोक्तमेवार्थंद्रढयति आपोनाराइत्यादि । आपोनाराशब्देनोच्यन्ते । अप्सु नाराशब्दस्याप्रसिद्धेस्तदर्थमाह । यतस्तानराख्यस्य परमात्मनःसूनवोऽपत्यानि । तस्येदमित्यण्प्रत्ययः । यद्यप्यणिकृते ङीप्प्रत्ययः प्राप्तस्तथापि छान्दसलक्षणैरपि स्मृतिषु व्यवहारात्सर्वे विधयश्छन्दसि विकल्प्यन्तइति पाक्षिकोङीप्प्रत्ययस्तस्याभावपक्षे सामान्यलक्षणप्राप्ते टापि कृते नाराइतिरूपसिद्धिः । आपोऽस्य परमात्मनो ब्रह्मरूपेणावस्थितस्य पूर्वमयनमाश्रयइत्यसौ नारायणइत्यागमेष्वाम्नातः । गोविन्दराजेन तु आपोनराइति पठितंव्याख्यातंच । नरायणइतिप्राप्ते अन्येषामपि दृश्यतइति दीर्घत्वेन नारायणइति रूपम् । अन्येत्वापोनाराइति पठन्ति ॥ १० ॥

(४) **राघवानन्दः** । संप्रति तस्यैव जगत्कारणस्य परमेश्वरस्य हिरण्यगर्भान्तर्यामित्वंप्रदर्शयन्नारायणाभिधानमाह । आपइति । अपश्चीकृतानिपञ्चभूतानि नरइति नृनयेइति स्मरणादात्मनएव नामान्तरमिति । ततएवात्मनआकाशः संभूत आकाशाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यःपृथिवीति श्रुतेः । अतएव नरसूनवस्ताआपोयद्यस्मादस्य परमेश्वरस्य हिरण्यगर्भजननकालेऽयनमयनमिवाभूवंस्ततोनारायणस्ताआश्रित्य तज्जनकत्वात् । अतोऽयनंस्वमहिम्नप्रतिष्ठितस्या

---

(१०) तायवस्थायनंपूर्वं = अयनंतस्यताःपूर्वं (ग, ङ, न)

(२) अयं (क, ग,) चिन्हितयोःपुस्तकयोः दृश्यते ॥ (ख) पुस्तके टीकायांदृश्यते न मूले ॥

(च) पुस्तके एतच्छ्लोकस्थानेऽयं श्लोक पठितः । सहस्रशीर्षा पुरुषोरुक्मबाहुस्त्वतीन्द्रियः ॥ ब्रह्मानारायणाख्यस्तु सुष्वाप सलिले तदा ॥

आयनान्तरानुपपत्तेः अण्डाभिमानिनारायणइति केचित्। तन्न। नारायणः परोऽव्यक्तादण्डमव्यक्तसंभवम्। अण्डस्यान्तस्त्विमे लोकाः सप्तद्वीपा च मेदिनीति ब्रह्माण्डपुराणोक्तेः। अव्यक्तादपि परोनारायणः सकथं ब्रह्माण्डमात्राभिमानी स्यादिति॥ १०॥

(५) **नन्दनः**। अथभगवतोजलसृष्टिलब्धांसंज्ञांसनिर्वचनामाह आपोनाराइति। आपोनाराइति प्रोक्ताः। कुतो नरस्य पुरुषस्य सूनवोभगवता सृष्टाइत्यर्थः। वैशब्दोहेतौ। ताःआपः. अस्य नरस्य पूर्वंप्रथममयनमनुप्रवेशस्थानमासीत्तेननारायणः स्मृतः॥ १०॥

(६) **रामचन्द्रः**। आपइति। नाराइत्यापःप्रोक्ताः। वै निश्चयेन। आपोनरसूनवो नराख्यस्य परमात्मनोनारा जीवसमूहास्ता आपो यद्यस्मादस्य ईश्वरस्य पूर्वमयनं शयनस्थानमासीत्। तेन नारायणः स्मृतः नारायणः परो व्यक्तात् अण्डस्यान्तास्त्विमे लोकाः सत्पद्वीपा च मेदिनी। पिप्पलबीजन्यायेनेत्यर्थः॥ १०॥

यत्तत्कारणमव्यक्तंनित्यंसदसदात्मकम्॥ तद्विसृष्टः सपुरुषोलोके ब्रह्मेति कीर्त्यते॥ ११॥

(१) **मेधातिथिः**। कारणमेव न कार्योन परेच्छाविधेयशरीरः। स्वाभाविकेन महिम्ना युक्तमव्यक्तंनित्ययुक्तमित्युक्त्वा विरुद्धस्य भावाभावरूपधर्मद्वयस्य योगउच्यते। अर्वाग्दर्शनानांतद्विषयायाउपलब्धेरभावात्सत्ताव्यवहारयोग्यत्वादसदात्मेत्युच्यते। आगमेभ्यः सर्वस्यास्य तत्कारणत्वावगमात्सदात्मकम्। अतः प्रतिपत्तृत्वभेदादुभयतोऽपि व्यवहारोब्रह्मण्यविरुद्धः। ननुच सर्वएव भावाएवंरूपाःतेन रूपेण सदात्मकाः पररूपेणासन्तः किमुच्यते ब्रह्मण्यविरुद्धइति उच्यते अद्वैतदर्शनेनैवान्यद्ब्रह्मणः किंचिदस्तीति किंतत्परंयत्तद्रूप तयाऽभावइत्युच्यते। तेन विसृष्टउत्पादितोऽन्तरण्डंनिर्मितःपुरुषोलोके ब्रह्मेतिकीर्त्यते। योऽसावुग्रतपसांदेवासुरमहर्षीणांवरदानार्थंतत्रतत्रोपविष्टइति महाभारतादौ श्रूयते सएषतेन महापुरुषेण परेणब्रह्मणा प्रथमंविसृष्टः। अन्येतु त्वमेवैकइत्याद्यन्यथा वर्णयन्ति। अस्येतिप्रत्यक्षाभिनयने जगन्निर्दिश्यते सर्वस्यास्यजगतोयद्विधानंनिर्माणंतत्स्वयंभुवः संबन्धेऽचिन्त्यमद्भुतरूपंविचित्रमतिमहदप्रमेयं न शक्यंसर्वेण ज्ञातुम्। तथाऋषिः। कोअद्धावेदकइहप्रवोचत् कुतआजाताकुतइयंविसृष्टिरिति। किमिदंजगत्सर्वमुपादानमवेक्ष्य जायतउत नैर्माणिकमात्रम्। यद्यबुधस्य दर्शनंकिमीश्वरेच्छाधीनमुत केवलकर्मवशजमुत स्वाभाविकमप्रमेयम् तथा किंमहदादिक्रमेणोत्पद्यतउत द्व्यणुकादिक्रमेणास्य त्वंकार्यतत्त्वमर्थंच वेत्सि। कार्यंमहतोऽहङ्कारोविशेषस्तन्मात्राण्यहंकारस्य तन्मात्राणांविशेषाःपञ्चमहाभूतानि। अहङ्कारस्येन्द्रियाण्येकादश। विशेषाणामपि पिण्डीकार्यंब्रह्मादिस्तम्बपर्यन्ताः। तेषामपिप्रत्ययात्तत्त्वंस्वभावोयथा महतोमूर्तिमात्रत्वंप्रधानस्य सर्वस्य विकारावस्था महदित्युच्यते। प्रकृतेर्महानितिप्रकृतिः प्रधानमित्येकोऽर्थः। अहङ्कारस्यतत्त्वमस्मिन्प्रत्ययमात्रत्वमविशेषाणामविशेषप्रत्ययसंवेद्यत्वमिति। अर्थः प्रयोजनंपुरुषार्थमिदंवस्तस्त्वनेन प्रकारेण पुरुषायोपयुज्यते इमंचार्थंसाधयति। यद्यपिधर्मजिज्ञासमानस्य जगन्निर्माणज्ञता आचार्यसंबन्धिनी न क्वचिदुपकारिणी नच प्रष्टव्या तथाप्यन्यतोदुर्विज्ञानंमहर्षीणांवैषम्याज्जगन्निर्माणमादौप्रश्नार्हंभवति। मनोह्यवचनीयम्। यद्वस्तुप्रमाणषट्कस्याप्यविषयस्तदपि त्वमार्षेण चक्षुषा वेत्सि। धर्मःपुनर्वेदगोचरः सोऽवश्यंत्वया विज्ञातइत्येवंप्रकृतविषयैव प्रवक्तृप्रशंसा। एवंस्तुत्या प्रोत्साहितोजगन्निर्माणमेव तावद्वक्ति आसीदिदमिति। ततःस्वयंभूरिति। प्रधानमेवैतैः शब्दैरभिधीयते। स्वयंभवति परिणमति विक्रियामेति महदादितत्त्वभावेन। नकश्चिदीश्वरः स्वभावसिद्धोऽस्ति यथेच्छमचेतनं प्रधानमनुवर्तते वस्तु-

---

२ नित्यम्= लोके (च)

स्वभावएवायं तदुत प्रकृतिरूपंप्रधानंपुनर्विक्रियते । यथाक्षीरमचेतनं मण्डकावस्थाभिर्दधीभवति । भगवानिति। स्वव्यापारईश्वरोमहाभूतादिद्वारेण प्रवृत्तः । स्वकार्योत्साहओजः सामर्थ्यम् । आदिशब्दः प्रकारे व्यवस्थायांतेन महदादि-कारणमव्यक्तंभवति । विकारावस्थायांप्रच्युतंप्राग्रूपात्सूक्ष्मभावात्प्रकाशमयंतमोनुदतीत्युच्यते । अर्थशब्दाध्याहारेण वा प्रधाने पुल्लिङ्गनिर्देशः । पुरुषशब्दश्चप्रधानादिषु दृष्टः । तेषामिदंतु सप्तानांपुरुषाणामिति । योऽसाविति पूर्ववत् । सोऽभिध्याये-ति। अभिध्यानगुणतोऽचेतनात्प्रधानस्याभिधानासंभवात् । यथा कश्चिदभिध्यायैव कार्यंनिवर्तयेदन्यकार्यनिरपेक्षमेव वस्तु-स्वाभाव्येन परिणममानमीश्वरेच्छानपेक्षतयाभिध्यायेत्युच्यते । अपआदौ ससर्ज । महाभूतान्तरापेक्षया तासामादित्वंनतु महदादितत्त्वोत्पत्तेः । वक्ष्यति हि तेषामिदंतुसप्तानामिति । प्रथमंतत्त्वोत्पत्तिस्तथा भूतानाम् । तासु वीर्यमिति । वीर्यं-शक्तिमवासृजत् । प्रधानमेव कर्तृ भवति । सर्वतः प्रधानंपृथिव्यादिभूतोत्पत्तौ काठिन्यमेति । अण्डरूपंसंपद्यते । तदण्ड-मिति । यथा तत्त्वानि स्त्रीपुरुषसंयोगंविनोत्पन्नानि प्रथममेवंपूर्वकर्मवशेन ब्रह्माऽपि स्वमहिम्नैवायोनिजंतस्य शरीरंदंशमश-कादिवत् । तद्विसृष्टस्तेन प्रधानेन विसृष्टस्तन्मयत्वात्तच्छरीरस्य तद्विसृष्टइत्युच्यते । शेषंपूर्ववत् । यदत्रार्थतत्त्वंतदस्मा-भिरुक्तमेव । अर्थवादाएते यथाकथंचिद्गुणवादेन नीयन्ते ॥ ११ ॥

(२) **सर्वज्ञनारायणः** । यत्तदिति । कारणंविश्वस्य हेतुरव्यक्तंसदानुपलभ्यरूपं नित्यमनाशि सदसदात्मकंवर्तमानावर्तमानात्मकंसर्वस्य तत्रोपादेयत्वेन स्थितः तेन परमेश्वरेण प्रधानेन च विसृष्टोयः पुरुषः सब्रह्मा कीर्त्यते ॥ ११ ॥

(३) **कुल्लूकः** । यत्तत्कारणमव्यक्तमित्यादि । यत्तदिति सर्वनामभ्यांलोकवेदादिसर्वप्रसिद्धंपरमात्मानंनिर्दिशति । कारणंसर्वोत्पत्तिमतामव्यक्तंबहिरिन्द्रियागोचरंनित्यमुत्पत्तिविनाशरहितंवेदान्तसिद्धत्वात्सत्स्वभावम् प्रत्यक्षाद्यगोचरत्वा-दसत्स्वभावमिव । अथवा सद्भावजातमसद्भावस्तयोरात्मभूतम् । तथा च श्रुतिः ऐतदात्म्यमिदंसर्वमिति । तद्विसृ-ष्टस्तेनोत्पादितः सपुरुषः सर्वत्र ब्रह्मेति कीर्त्यते ॥ ११ ॥

(४) **राघवानन्दः** । हिरण्यगर्भजोहि ब्रह्माभूरादिलोकस्य कारणमिति वक्तुंतदण्डमित्युक्तमनुवदति यदिति द्वाभ्याम् । अपञ्चीकृतपञ्चभूतात्मकमप्शब्दवाच्यं तदेवाव्यक्तमाविष्णोर्व्यक्तं ज्ञातंकार्यतया अतएव हिरण्यगर्भादेः कारणंच सत्पृथिव्यप्तेज इतित्रयम् । असतद्द्वयंवाकाशौभूतद्वयं तदुभयात्मकंनित्यंकारणात्मना अमरादेवाइतिवद्वा । अन्यथाऽद्वैतश्रुतिविरोधः । तैर्हिरण्यगर्भावच्छेदकैः सूक्ष्मभूतैः पञ्चीकृततामापन्नैः सृष्टोजनितः पञ्चीकृतपञ्चभूतावच्छिन्न-श्चिदात्मापुरुषो विराट् ब्रह्मेति कथ्यतइत्यन्वयः ॥ ११ ॥

(५) **नन्दनः** । अथाण्डोद्भवस्यसंज्ञामाह यदिति । कारणशब्देन भगवानुच्यते सदसदात्मकंसदितिकारणमसदि-तिप्रकृत्यादिकार्यं प्रपञ्चउभयमात्मादेहोयस्य तथोक्तम् । तद्विसृष्टःतेन कारणाख्येनभगवता सृष्टः पुरुषशब्दोऽयंराजपुरुष-शब्दवदधिकारवचनोभगवन्नियोगकरइत्यर्थः ॥ ११ ॥

(६) **रामचन्द्रः** । यत्तदिति । यदव्यक्तंकारणंतन्नित्यंब्रह्म । कीदृशंब्रह्म । सदसदात्मकम् कार्यकारणात्मकं तद्ब्रह्म तद्ब्रह्मणा विसृष्टः विशेषेण सृष्टःसन् सोपुरुषः लोके ब्रह्मेति कीर्त्यते ॥ ११ ॥

तस्मिन्नण्डे सभगवानुषित्वा परिवत्सरम् ॥ स्वयमेवात्मनोध्यानात्तदण्डमकरोद्द्विधा ॥ १२ ॥

(१) **मेधातिथिः** । सभगवान्ब्रह्मा परिवत्सरंसंवत्सरमुषित्वातस्मिन्नण्डे स्थित उत्पन्नःसर्वज्ञः कथंनिर्गच्छेयमितिध्यातवान् । तदण्डमकरोद्द्विधा तावता कालेन गर्भःपरिपच्यते । अण्डमपि तावत्कालेन भेदजातं परिपाकादतः काकतालीयन्यायेन तदण्डमकरोद्द्विधेत्युच्यते ॥ १२ ॥

(२) **सर्वज्ञनारायणः** । तस्मिन्निति । सएव तस्मिन्नण्डे परिवत्सरंवत्सरमभिव्याप्य स्वयमेवद्विधाकरोदात्मनोध्यानादात्मसंबन्धिनोधारणाविशेषात् ॥ १२ ॥

(३) **कुल्लूकः** । तस्मिन्नण्डेसभगवानित्यादि । तस्मिन्पूर्वोक्तेऽण्डे सब्रह्मा वक्ष्यमाणब्रह्ममानेन संवत्सरमुषित्वा स्थित्वाऽऽत्मनैवाण्डंद्विधा भवत्वित्यात्मगतध्यानमात्रेण तदण्डंद्विखण्डंकृतवान् ॥ १२ ॥

(४) **राघवानन्दः** । तस्मिन्नण्डे ब्रह्माण्डे सउषित्वा परिवत्सरंसंवत्सरंस्थित्वाऽऽत्मनोध्यानादहंन्निदात्मा देहादिविलक्षणइत्यनुसंधानादण्डंद्विधा भूम्यन्तरिक्षेअकरोदित्यन्वयः ॥ १२ ॥

(५) **नन्दनः** । परिवत्सरशब्दोऽण्डद्विधाकरणानुगुणपरिमाणकालवचनआत्मनोध्यानादिदमण्डंद्विधाकृत्यशकलाभ्यांदिवंभूमितयोर्मध्येऽन्तरिक्षलोकं च करवाणीति विगणय्य स्वयमेवात्मेच्छया न प्राकृतपुरुषवत्पराधीनइत्यर्थः॥ १२ ॥

(६) **रामचन्द्रः** । तस्मिन्निति । पञ्चभिराह । सःकर्ता सर्वत्र सम्बध्यते । सभगवानात्मनोध्यानात्किंकार्यंमिति विचिन्त्य तदण्डंस्वयमेव द्विधाकरोत् । किङ्कृत्वा तस्मिन्नण्डे परिवत्सरंसहस्रवत्सरमुषित्वा वासंकृत्वा ॥ १२ ॥

ताभ्यांसशकलाभ्यांच दिवंभूमिंच निर्ममे॥मध्ये व्योमदिशश्चाष्टावपांस्थानंच शाश्वतम्॥१३॥

[वैकारिकंतैजसंच तथाभूतादिमेवच ॥ एकमेवत्रिधाभूतमहानित्येव संस्थितम्॥ १ ॥

इन्द्रियाणांसमस्तानांप्रभवंप्रलयंतथा ॥ *]

(१) **मेधातिथिः** । शकलमण्डकपाले ताभ्यामण्डकपालाभ्यामुत्तरेण दिवंनिर्ममे निर्मितवानधरेण पृथिवीमध्ये व्योमाकाशंदिशोऽष्टौच प्रागाद्याः । अवान्तरदिग्भिर्दक्षिणपूर्वादिभिः सहापांस्थानमन्तरिक्षे समुद्रमाकाशंच पृथिवीपातालगता ॥ १३ ॥

(२) **सर्वज्ञनारायणः** । ताभ्यामिति । शकलाभ्यामधः शकलात्भूमिमूर्ध्वशकलाद्दिवम् । शकलस्य लोकावच्छेदकतया प्रकृतिताविवक्षया पञ्चमी । व्योमान्तरिक्षलोकं दिशःकाष्ठाअष्टौ निर्मितवान् । अपांस्थानंसमुद्रम् ॥ १३ ॥

(३) **कुल्लूकः** । ताभ्यांसशकलाभ्यांचेत्यादि । शकलंखण्डंताभ्यामण्डशकलाभ्यामुत्तरेण दिवंस्वर्लोकमधरेण भूर्लोकमुभयोर्मध्यआकाशंदिशश्चान्तरालदिग्भिः सहाष्टौ समुद्राख्यमपांस्थानंस्थिरंनिर्मितवान् ॥ १३ ॥

(४) **राघवानन्दः** । ततोभूरादिचतुर्दशभुवनानांनिर्माणमाह ताभ्यामिति । शकलाभ्यांखण्डाभ्यांनिर्ममइत्यन्वयः । तदण्डंनिरवर्तत । तत्संवत्सरस्य मात्रामशयतत्तन्निरभिद्यत तेआण्डकपाले रजतंच सुवर्णंचाभवताम् तद्यद्रजतंसेयंपृथिवी यत्सुवर्णंसा द्यौरित्यादिश्रुतेः । मात्रांपरिमाणं व्याप्याशयत तस्थौ । अपांस्थानंसमुद्राख्यं यद्वास्तेयमुदकंसमुद्रइतिश्रुतेः । बस्तिर्मूत्रस्थानम् । शाश्वतंस्थिरं द्विपरार्धकालपर्यन्तस्थायित्वात् ॥ १३ ॥

(५) **नन्दनः**। सब्रह्माताभ्यामखण्डखण्डाभ्यांदिवंस्वर्गादिलोकषट्कंभूमिंसप्तपातालांस्वर्गभूम्योरूर्ध्वाधोऽवस्थितयो-

---

(१३) ताभ्यांसशकलाभ्यां = ताभ्यांचशकलाभ्यां (ख)

= —— मण्डकपालाभ्यां (च)

वपांस्थानंचशाश्वतम् = वपांस्थानमकल्पयत् (ग,)

* अयं सार्धश्लोकः (क, ग, ट,) चिन्हितेषु पुस्तकेषु दृष्टः ॥

मध्ये व्योमान्तरिक्षलोकमष्टौदिशश्च तासु शाश्वतंयावत्प्रलयावस्थानमपांस्थानंसमुद्रांश्चनिर्ममे । एवंतावद्ब्रह्मा भगवतःस्व-यमनुप्रविष्टतत्त्वसंघातविग्रहोभगवता सृष्टोभगवन्मयउक्तः ॥ १३ ॥

(६) **रामचन्द्रः** । ताभ्यामिति । सब्रह्मा ताभ्यांशकलाभ्यांखण्डाभ्यांदिवंस्वर्गंभूमिंच निर्ममे । तयोः शकलयोर्मध्ये व्योम च पुनःअष्टौ दिशः । कीदृशंव्योमशाश्वतमपांजलानांस्थानमास्पदम् ॥ १३ ॥

उद्बबर्हात्मनश्चैव मनः सदसदात्मकम् ॥ मनसश्चाप्यहङ्कारमभिमन्तारमीश्वरम् ॥ १४ ॥

(१) **मेधातिथिः** । तत्त्वसृष्टिरिदानीमुच्यते या च यथावयवा पश्चादुक्ताऽर्थान्पूर्वैति तथोक्तम् । तत्प्रधानात्स्व-स्माद्रूपान्मनउद्धृतवान् । प्रातिलोम्येनेयंतत्त्वोत्पत्तिरिहोच्यते । मनसःपूर्वमहंकारमभिमन्तारमहमित्यभिमानिताहंकारस्य वृत्तिः । ईश्वरंकार्यनिर्वर्तनसमर्थम् ॥ १४ ॥

(२) **सर्वज्ञनारायणः** । उद्बबर्हेति । आत्मनः स्वस्मादेव स्वस्मिन् सुसूक्ष्मतया स्थितंमनोमहत्तत्त्वमुद्बबर्ह तत्त्वभूत मुत्पादयामास । अहंकारमनांसि परमार्थतोऽभिन्नान्यप्यध्यवसायाभिमानविकल्पव्यापारभेदमात्रभिन्नानीति कथयितुं तत्र तत्र मुक्तात्मविध्यर्थं ब्रह्मणोमनउक्तं सदसदात्मकं वर्तमानावर्तमानात्मकं तस्मान्मनसो ऽहंकारमीश्वरमीशानादिकर्तृ धर्मवन्तमभिमन्तारंस्वेच्छाभिमननशीलव्यापारधर्मम् ॥ १४ ॥

(३) **कुल्लूकः** । इदानींमहदादिक्रमेणैव जगन्निर्माणमिति दर्शयितुंतत्त्वसृष्टिमाह उद्बबर्हात्मनश्चैवेत्यादि । ब्रह्मा-आत्मनःपरमात्मनःसकाशात्तेन रूपेण मनउद्धृतवान्परमात्मनएव ब्रह्मस्वरूपेणोत्पन्नत्वात्परमात्मनएव च मनःसृष्टिर्वेदान्त-दर्शनेन प्रधानात् । तथा च श्रुतिः । एतस्माज्जायते प्राणोमनःसर्वेन्द्रियाणि च । खंवायुर्ज्योतिरापश्चपृथ्वी विश्वस्य धारि-णी । मनश्च श्रुतिसिद्धत्वाद्युगपज्ज्ञानानुत्पत्तिलिङ्गाच्च सदप्रत्यक्षत्वादसदिति । मनसःपूर्वमहङ्कारतत्त्वमहमित्यभिमाना-ख्यकार्ययुक्तमीश्वरंस्वकार्यकरणक्षमम् ॥ १४ ॥

(४) **राघवानन्दः** । हिरण्यगर्भसृष्ट्यनन्तरमस्मदादिलिङ्गशरीरजन्म वक्तव्यमासीत् । अपञ्चीकृतभूतकार्य-त्वात्तस्य तदिदानीमाह उद्बबर्हेति द्वाभ्याम् । उद्बबर्ह जनितवानात्मनःस्वस्माज्जीवस्य भोगार्थंवा । एतस्माज्जायते प्राणो-मनःसर्वेन्द्रियाणि च । खंवायुर्ज्योतिरापश्च पृथिवी विश्वधारिणीति ॥ तन्मनोकुरुत आत्मन्वी स्यामितिश्रुतेः । मनआ-दिका सर्वासृष्टिस्तस्य सदसदात्मकं तादृशापञ्चीकृतकार्यत्वात् मनसइति मनोवृत्त्यनन्तरभाविन्यौअहङ्कारबुद्धिसंकल्य अभिमत्य निश्चिनोति इदमित्थमितिनिश्चयात्मिका बुद्धिः । अहङ्कारंविशिनष्टि अभिमन्तारमीश्वरमिति । अभिमन्तारमहंगौ-रइत्याद्यभिमानिनमीश्वरंस्वातन्त्र्यात् सर्वप्रवृत्तेरहङ्काराधीनत्वादीश्वरः न ह्यनहंकृतिः प्रवर्ततइति ॥ १४ ॥

(५) **नन्दनः** । इदानींतस्य सर्वभूतानि सिसृक्षतउपादानंश्लोकत्रयेणाह उद्बबर्हेति । आत्मनःआत्मसंबन्धि । सद-सदात्मकम् प्रकृतिविकृत्यात्मकम् ।मनःमहत्तत्त्वम् । तथाचोक्तं मनोमहान्मतिर्ब्रह्मापूर्बुद्धिःख्यातिरीश्वरइति । मनसोमह-त्तत्त्वादनन्तरमभिमन्तारमस्मिताप्रत्ययरूपमीश्वरंसर्वकर्मप्रवर्तकमहङ्कारंचोद्बबर्होद्धृतवान् ॥ १४ ॥

(६) **रामचन्द्रः** । उद्बबर्हेति । सआत्मनःसकाशात्सदसदात्मकंकार्यकारणात्मकंमनउद्बबर्होद्धृतवानाविर-करोत् । अपि निश्चयेन । मनसःसकाशादहङ्कारमसृजत् । कीदृशमहङ्कारमभिमन्तारमहमस्मीति भावः । पुनः कीदृशम् । ईश्वरंमृष्ट्यादिकार्ये प्रभुम् ॥ १४ ॥

महान्तमेव चात्मानंसर्वाणि त्रिगुणानि च ॥ विषयाणांग्रहीतॄणि शनैः पञ्चेन्द्रियाणि च ॥१५॥
[अविशेषान् विशेषांश्च विषयांश्चपृथग्विधान् ॥+]

(१) **मेधातिथिः** । महानितिसंज्ञायांसांख्यानांतत्त्वंप्रसिद्धम् । आत्मानमिति महतासामानाधिकरण्यम् । सर्वपिण्डसृष्टौ च महत्तयानुरूपमतआत्मव्यवहारः । अहङ्कारात्पूर्वपूर्वेण न्यायेन ससर्ज सर्वाणि त्रिगुणानि च । यथानुक्रान्तंयथानुक्रम्यते तत्सर्वंत्रिगुणंसत्वरजस्तमांसि गुणाः । क्षेत्रज्ञाः केवलंनिर्गुणाः प्राकृतोभागः सर्वः सत्त्वरजस्तमोमयः । पञ्चेन्द्रियाणि तेषांनिर्देशविषयाणांरूपरसादीनांयथास्वं ग्रहीतॄणि विज्ञानजनकानि पञ्च श्रोत्रंत्वगित्यादिना वक्ष्यन्ते विशेषनामच शब्दान्विषयांश्च शब्दस्पर्शरूपरसगन्धान्पृथिव्यादीनि च ॥ १५ ॥

(२) **सर्वज्ञनारायणः** । महान्तमेवेति । महान्तंच मनोनाम तत्त्वमात्मानमात्मनोजीवस्यावच्छेदकत्वात्तद्व्यपदेशः । सर्वाणि मनोऽहंकारधर्मेण त्रिगुणानि गुणत्रयात्मकानि । प्रकृतानि पञ्चेन्द्रियाणि च शनैः क्रमेणोद्ववर्ह विषयग्रहणव्यापाराणि च तानि ॥ १५ ॥

(३) **कुल्लूकः** । महान्तमेव चात्मानमित्यादि । महान्तमिति महदाख्यतत्त्वंमहङ्कारात्पूर्वंपरमात्मनएवाव्याकृतशक्तिरूपप्रकृतिसहितादुद्धृतवान् । आत्मनउत्पन्नत्वादात्मानमात्मोपकारकत्वाद्वा । यान्यभिहितान्याभिधास्यन्ते च तान्युत्पत्तिमन्ति सर्वाणि सत्त्वरजस्तमोगुणयुक्तानि विषयाणांशब्दस्पर्शरूपरसगन्धानांग्राहकाणि शनैःक्रमेण वेदान्तसिद्धेन श्रोत्रादीनि द्वितीयाध्यायवक्तव्यानि पञ्चबुद्धीन्द्रियाणि चशब्दात्पञ्च पाय्वादीनि कर्मेन्द्रियाणि शब्दतन्मात्रादीनि च पञ्चोत्पादितवान् । नन्वभिध्यानपूर्वकसृष्ट्यभिधानाद्वेदान्तसिद्धान्त एव मनोरभिमतइति प्रागुक्तंतन्नसंगच्छते । इदानींमहदादिक्रमेण सृष्ट्यभिधानाद्वेदान्तदर्शनेन च परमात्मनएवाकाशादिक्रमेण सृष्टिरुक्ता । तथा च तैत्तिरीयोपनिषत् तस्माद्वाएतस्मादात्मनआकाशःसंभूत आकाशाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवीति । उच्यते । प्रकृतितोमहदादिक्रमेण सृष्टिरितिभगवद्भास्करीयदर्शनेऽप्युपपद्यत इति तद्विदोव्याचक्षते । अव्याकृतमेव प्रकृतिरिष्यते तस्य च सृष्ट्युन्मुखत्वंसृष्ट्याद्यकालयोगरूपंतदेव महत्तत्त्वंततोबहुस्यामित्यभिमानात्मकेक्षणकालयोगित्वमव्याकृतस्याहंकारतत्त्वम् । ततआकाशादिपञ्चभूतसूक्ष्माणि क्रमेणोत्पन्नानि पञ्चतन्मात्राणि ततस्तेभ्यएव स्थूलान्युत्पन्नानि पञ्चमहाभूतानि सूक्ष्मस्थूलक्रमेणैव कार्योदयदर्शनादिति न विरोधः । अव्याकृतगुणत्वेपि सऽत्त्वरजस्तमसांसर्वाणि त्रिगुणानीत्युपपद्यते । भवतुवा सत्वरजस्तमःसमतारूपैव मूलप्रकृतिः भवन्तु च तत्त्वान्तराण्येव महदहङ्कारतन्मात्राणि तथापि प्रकृतिर्ब्रह्मणोऽनन्येति मनोः स्वरसः । यतोवक्ष्यति सर्वभूतेषु चात्मानंसर्वभूतानि चात्मनीति ॥ तथा । एवंयःसर्वभूतेषु पश्यत्यात्मानमात्मना । ससर्वसमतामेत्य ब्रह्माभ्येति परंपदमिति ॥ १५ ॥

(४) **राघवानन्दः** । महान्तमिति । महानहैरण्यगर्भोबुद्धिः सर्वव्यष्टिबुद्धिव्यापकत्वादात्मानं महदवच्छिन्नंचित्तएवात्मत्वव्यवहृतेरात्मनःसर्वार्थकारित्वान्महत्वमात्मायत्नोधृतिर्बुद्धिरित्याद्यभिधानाद्वा । क्रमवैपरीत्यंवा महान्तंसृष्ट्वाहङ्कारमसृजत् ततोमनोऽसृजदिति । सवाणि त्रिगुणादीनि मनआदीनि त्रीणि सर्वाणि कार्याणि त्रिगुणात्मकानीति वा तत्र गुणशब्दप्रयोगो जडांशस्य प्राधान्यद्योतनार्थः । चकारोऽवधारणार्थः । अस्मिन्नेवमहति चित्तमन्तर्गतं किंच विषयाणांग्रहीतॄणि विषयाणांशब्दस्पर्शरूपरसगन्धादीनां ग्रहीतॄणि ग्रहणसाधनानि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि शनैःरपञ्ची-

+ (क, ग,) चिन्हितपुस्तकयोः ॥

कृतभूतक्रमेण । चकारःकर्मेन्द्रियप्राणवर्गाणां समुच्चयार्थः। व्यष्टिलिङ्गदेहस्य एकोनविंशतित्वादेकोनविंशतिमुखइति-श्रुतेः ॥ १५ ॥

(५) नन्दनः । महान्तमात्मानंस्थूलमन्तःकरणंमनइतियावत् । तत्तत्स्वरूपेण विषयरूपेणेन्द्रियरूपेण च त्रिगुणीभूता यावस्था तांत्रिगुणानीति तन्मात्राण्युच्यन्ते । तानिच सर्वाणितथा विषयाणांग्रहीतॄणि पञ्च ज्ञानेन्द्रियाणि चकारात् कर्मेन्द्रियाणि पञ्चशनैः क्रमादुद्बर्हेत्यनुवर्तते । अनेन श्लोकद्वयेनैतदुक्तंभवति । आत्मीयानांमहदहङ्कारमनस्तन्मात्रज्ञानकर्मेन्द्रियाणामात्मविदंशप्रवेशेन सर्वभूतपरिणामदर्शनात्सएवभगवानुपादानमिति ॥ १५ ॥

(६) रामचन्द्रः । महान्तमिति । सआत्मानंमहान्तमेव महत्तत्वरूपंचाकरोत् । च शब्दात्सर्वाण्यहङ्कारादीनि त्रिगुणानि त्रिगुणात्मकानि राजसाहङ्कारतामसाहङ्कारसात्विकाहङ्काररूपाणि ॥ १५ ॥

तेषांत्ववयवान्सूक्ष्मान्षण्णामप्यमितौजसाम् ॥ सन्निवेश्यात्ममात्रासु सर्वभूतानि निर्ममे ॥ १६ ॥

(१) मेधातिथिः । तेषांषण्णांयाआत्ममात्रास्तासु सूक्ष्मानवयवान्सन्निवेश्य सर्वभूतानि निर्ममे । तत्र षट्संख्यया वक्ष्यमाणानि पञ्चतन्मात्राणिअतिक्रान्तश्चाहंकारः प्रतिनिर्दिश्यते । आत्ममात्रास्तेषांत्वविकारस्तन्मात्राणांभूतानि । अहङ्कारस्येन्द्रियाणि पृथिव्यादिषु भूतेषु शरीररूपतया तिष्ठत्सु सूक्ष्मानवयवांस्तन्मात्राहङ्कारात् संनिवेश्य यथास्थानयोजनंकृत्वा सर्वभूतानि देवमनुष्यतिर्यक्पक्षिस्थावरादीनि निर्ममे । एतदुक्तंभवति । षडविशेषाअवयवाएकदेशारम्भकाः सर्वस्य जगतस्तस्य तदारब्धत्वात्सूक्ष्मत्वंतन्मात्रसंज्ञयैव सिद्धम् तानि संनिवेश्य संनिहत्य तेषामेवात्ममात्रास्तद्विकाराः । भूतेन्द्रियाणि निर्ममे तैश्च पिण्डष्टिम् । चकारान्मात्रास्वित्यत्र मात्राभिरिति युक्तः पाठः ॥ १६ ॥

(२) सर्वज्ञनारायणः । तेषामिति । एतस्मादीश्वरात् प्राणमनसेइन्द्रियाणांमहदहंकारमनोरूपप्रकारवतश्चान्तःकरणस्येत्येवं षण्णांमहौजसां कार्योत्पत्तावतिबलानां सूक्ष्मानवयवानिति । एवंस्वपुत्रादि देहस्यलिङ्गदेहभूतानात्मनः स्वप्रकाशस्य मात्रास्वंशेषु सन्निवेश्यावच्छेदकत्वेन कल्पयित्वा सर्वभूतानि प्राणिजातानि तटस्थानि ॥ १६ ॥

(३) कुल्लूकः । तेषांत्ववयवान्सूक्ष्मानित्यादि । तेषांषण्णांपूर्वोक्ताहङ्कारस्य तन्मात्राणांच ये सूक्ष्माअवयवास्तानात्ममात्रासु षण्णांत्वविकारेषु योजयित्वा मनुष्यतिर्यक्स्थावरादीनि सर्वभूतानि परमात्मा निर्मितवान् । तत्र तन्मात्राणांविकारः पञ्चमहाभूतानि । अहङ्कारस्येन्द्रियाणि पृथिव्यादिभूतेषु शरीररूपतया परिणतेषु तन्मात्राहङ्कारयोजनांकृत्वा सकलस्य कार्यजातस्य निर्माणम् । अतएवामितौजसामनन्तकार्यनिर्माणेनातिवीर्यशालिनाम् ॥ १६ ॥

(४) राघवानन्दः । समष्टिलिङ्गशरीरस्य हिरण्यगर्भीयस्योक्तव्यष्टिलिङ्गशरीराणि कार्यमित्यावेदयजीवात्मनामाविर्भावमाह तेषामिति । तत्र च मनआदिचतुष्टयंमनोरूपान्तःकरणेनैकीकृत्य कर्मेन्द्रियाणि प्राणांश्च ज्ञानेन्द्रियत्वेन गृहीतानीति षट्कंषण्णामित्युपसंहारात् पूर्वसृष्टेन लिङ्गेन प्राणाद्येन सयुज्यते । तेन युक्तस्य बन्धोवै तेन मुक्तस्य मुक्ततेति ब्रह्माण्डपुराणोक्तेः । पूर्वाष्टकस्य षट्त्वंतर्भाववदेकोनविंशतेरप्यन्तर्भावः । मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षतीति भगवदुक्तेः ॥ षट्त्वंतत्र प्रकृतिर्गोलकोऽवयवान्कार्यभूतान्दुरदृष्टवशेन परिच्छिन्नत्वात्सूक्ष्मानस्मदाद्यदृश्यरूपान्षण्णां मनआदीनाममितौजसांसमष्टिरूपाणां जगन्मण्डलव्यापिनाम् । सर्वएव समाः सर्वो-

---

(१६) षण्णामप्यमि= षण्मयानमि (ख)

मात्रासु= मात्रास्तु (क)

न्तइति श्रुतेः। आत्ममात्रास्वपरिच्छिन्नस्यैकस्यात्मनउपाधिवशादवयववत्प्रतीयमानेष्वात्मसु ममैवांशोजीवलोके जीवभूतःसनातनइति स्मृतेरंशोनानाव्यपदेशादित्यादिसूत्राच्च तासु मनआदिषडवयवान्सूक्ष्मान्संनिवेश्य तत्तददृष्टवशेनलिङ्गदेहात्मनस्तादात्म्याध्यासंगमयित्वा सर्वभूतानि सर्वाञ्जीवान्निर्ममइत्यन्वयः। लिङ्गशरीरावच्छिन्नानामेव व्यवहर्तृजीवत्वात् ससप्तदशकेनैव राशिना युज्यते पृथगिति व्यासोक्तेरुपाध्यवच्छिन्नत्वमेवनिर्माणंन वस्तुतः। तथा च श्रुतिः। एतस्मादात्मनः सर्वे प्राणा लोकाः सर्वे यस्मात्सर्वाणिभूतानि सर्वएवात्मानोव्युच्चरन्तीति। व्युच्चरन्ति जायन्तइत्यर्थः ॥ १६ ॥

(५) **नन्दनः**। तच्छब्देन महदहङ्कारमनस्तन्मात्रज्ञानकर्मेन्द्रियाणि परामृश्यन्ते। तत्रोत्तरेषांत्रिगुणज्ञानकर्मेन्द्रियाणांवर्गत्रयाभिप्रायेण षण्णामित्युक्तम्। अमितौजसामुपयुज्यमानेष्वप्यवयवेषु दीपवदक्षय्यवीर्याणाम्। अवयवानात्ममात्रासु स्वजीवांशेषु सन्निवेश्यात्मकार्येसर्वभूतानि देवमनुष्यादीन्निर्ममे। एतानिसर्वभूतोपादानमित्येतावदेवात्र विवक्षितं न पुनः सृष्टिरित्यवगन्तव्यं द्विधाकृत्वेत्यादिना तस्यावक्ष्यमाणत्वात् ॥ १६ ॥

(६) **रामचन्द्रः**। तेषामिति तेषांषण्णामिन्द्रियाणांमध्ये षष्ठंमनः। अहङ्कारात्पञ्चतन्मात्राणामवयवानात्ममात्रासु शब्दादिपञ्चसु विकारेषु संनिवेश्य सर्वाणि भूतानि निर्ममे ॥ १६ ॥

यन्मूर्त्यवयवाःसूक्ष्मास्तस्येमान्याश्रयन्ति षट् ॥ तस्माच्छरीरमित्याहुस्तस्य मूर्तिमनीषिणः ॥ १७ ॥

(१) **मेधातिथिः**। मूर्तिःशरीरंतदर्थास्तत्संपादकाअवयवाःसूक्ष्माःषडुक्तस्वरूपाश्च विशेषाख्यास्तानीमानीन्द्रियाणि वक्ष्यमाणानि च भूतान्याश्रयन्ति। तस्योत्पत्तेर्भूतान्याश्रयन्तीत्युच्यते। तदाश्रयोत्पत्तिस्तेषाम्। पठितंच पञ्चभ्यः पञ्चभूतानीतियद्येन कारणेनाश्रयन्ति तस्मात्कारणाच्छरीरम्। तस्य प्रधानस्य येयंमूर्तिः शरीरमित्युच्यते। मनीषिणः मनीषाबुद्धिस्तद्वन्तः। पण्डिताः। अथवा विपरीतःकर्तृभावः। सूक्ष्माःकर्तारइन्द्रियाणि कर्म। अवयवाश्चेन्द्रियाणामाश्रयभावंप्रतिपद्यमानाआश्रयन्तीत्युच्यते। यथा बहुभिर्भुक्तइति भोजयन्भुक्तइत्युच्यते। अथवाऽनेकार्थत्वाद्धातूनामाश्रयन्ति जनयन्तीत्यर्थः ॥ १७ ॥

(२) **सर्वज्ञनारायणः**। यन्मूर्त्यवयवाइति। यद्यस्मान्मूर्तिभूतालिङ्गदेहभूतास्ते ऽवयवाः षट् तस्यात्मनइमानि स्थूलशरीराणि आश्रयन्तः श्रयणात् स्थूलशरीरमिति ॥ १७ ॥

(३) **कुल्लूकः**। यन्मूर्त्यवयवाःसूक्ष्माइत्यादि। यस्मान्मूर्तिःशरीरंतत्संपादकाअवयवाःसूक्ष्मास्तन्मात्राहङ्काररूपाः षट्तस्य ब्रह्मणःसप्रकृतिकस्येमानि वक्ष्यमाणानि भूतानीन्द्रियाणि च पूर्वोक्तानि कार्यत्वेनाश्रयन्तितन्मात्रेभ्योभूतोत्पत्तेः अहङ्काराच्चइन्द्रियोत्पत्तेः। तथा च पठन्ति प्रकृतेर्महांस्ततोहङ्कारस्तस्माद्गणश्चषोडशकः तस्मादपि षोडशकात्पञ्चभ्यःपञ्चभूतानि तस्मात्तस्य ब्रह्मणोया मूर्तिःस्वभावस्तांतथापरिणतामिन्द्रियादिशालिनींलोकाःशरीरमिति वदन्ति षडाश्रयणाच्छरीरमिति। शरीरनिर्वचनेनानेन पूर्वोक्तोत्पत्तिक्रमएव दृढीकृतः ॥ १७ ॥

(४) **राघवानन्दः**। लिङ्गशरीरस्य सृष्टिमुक्त्वा तदवच्छिन्नजीवस्यापि सृष्टिमुक्त्वा स्थूलशरीरसृष्टिवदञ्छरीरपदव्युत्पत्तिमाह यदिति। यत्यस्मात् नस्य हिरण्यगर्भस्य मूर्तेरपञ्चीकृतपञ्चभूतात्मकस्य लिङ्गस्य मूर्तेःकायस्य द्वेवावब्रह्मणोरूपेमूर्तंचामूर्तं चेति श्रुतेः। अवयवा अवयवप्रायाः सूक्ष्मा अदृश्यरूपाः षट्मनआदयइमानि प्रत्यक्षसिद्धानि पञ्चीकृतपञ्च-

---

(१७) स्तस्येमान्या=स्तानिमान्या (क)

भूतारब्धानि चतुर्विधजरायुजाण्डजस्वेदजोद्भिज्जरूपाणि स्थूलशरीराणि भोगायतनत्वेनाश्रयन्ति । अतोमूर्तीनांमनआदीनामाश्रयत्वाच्छरीरंमूर्तिमाहुस्तस्य जीवात्मनः । अतएवेन्द्रियाश्रयंशरीरमिति तार्किका अवयवगतद्रव्यपरिमाणंमूर्तिरिति मूर्तिलक्षणमाहुः । तेन सर्वःप्रपञ्चोमूर्तिः । श्रुतावमूर्तपदंसूक्ष्मतापरम् ॥ १७ ॥

(५) **नन्दनः** । हिरण्यगर्भशरीरस्य सर्वभूतोपादानत्वंशरीरशब्दनिर्वचनेनाप्याह यदिति । तस्य ब्रह्मणोमूर्त्यवयवादेहांशाः षट्पूर्वोक्तामहदादयः । इमानीतिपूर्वश्लोकोक्तानांपरामर्शः । आश्रयन्ति व्याप्नुवन्तीतियावत् । तस्माच्छ्रयणाच्छरीरमिति तस्य ब्रह्मणोमूर्तिमाहुर्नैरुक्ताः । एतदुक्तंभवति । सर्वभूतान्यंशैरुपादानत्वेन श्रयतीतिहिरण्यगर्भशरीरस्य शरीरत्वंनपुनः प्राकृतपुरुषशरीरवच्छीर्यतइति ॥ १७ ॥

(६) **रामचन्द्रः** । यन्मूर्तीति । यद्यस्मात्कारणात्मूर्तेरहङ्काररूपस्यात्मनोवयवाःसूक्ष्मा अन्यविषया इन्द्रियाणि षट्पञ्च तन्मात्राआश्रय न्तीति ॥ १७ ॥

तदाविशन्ति भूतानि महान्ति सह कर्मभिः॥ मनश्चावयवैः सूक्ष्मैः सर्वभूतकृदव्ययम्॥ १८ ॥

(१) **मेधातिथिः** । तदेतत्प्रधानंसर्वभूतकृद्भवति । अव्ययमविनाशंकारणात्मना कथंसर्वाणि भूतानि करोति । यतस्तदाविशन्तीमानि । कानि पुनस्तानि । मनः सूक्ष्मैरवयवैः सह तन्मात्रैर्बुद्ध्यहंकारेन्द्रियलक्षणैः । अनन्तरंमहान्ति भूतानि पृथिव्यप्तेजोवाय्वाकाशाख्यानि । सहकर्मभिर्धृतिसंहननपक्तिव्यूहावकाशाः पृथिव्यादीनांयथाक्रमं कर्माणि । तत्र धृतिः कारणंसरणपतनधर्मस्य । एकशोऽवस्थानंसंग्राहकाद्विकीर्णस्य संहननं यथा पांसवोविकीर्णाउदकेन संहन्यन्ते पिण्डीक्रियन्ते । पक्तिरन्नौषधतृणादेस्तेजसः कार्यतया प्रसिद्धा । व्यूहोविन्यासः सन्निवेशः अवकाशोमूर्त्यन्तरेण प्रतिबन्धः । नहियस्मिन्देशे मूर्तिरेका स्थिता तत्र मूर्त्यन्तरस्य स्थानंसुवर्णपिण्डे न कस्य चिदन्तः संभवः । मनोग्रहणंसर्वेन्द्रियप्रदर्शनार्थम् । कर्मग्रहणेन च कर्मेन्द्रियाणि वा गृह्यन्ते । अथवा तत्कार्यसूक्ष्मैरवयवैर्युक्तं महान्ति भूतान्यधितिष्ठति पश्चादित्येवं योजना इन्द्रियाणि च मनःशब्दस्य प्रदर्शनार्थत्वात् ॥ १८ ॥

(२) **सर्वज्ञनारायणः** । तदाविशन्तीति । तदिति लिङ्गशरीरं महान्ति भूतानि स्थूलदेहारम्भकाण्याविशन्ति सहकर्मभिर्धर्मैरधर्मैश्च धर्माधर्मौ चापि तत्रैव सूक्ष्मतया स्थितौकार्योत्पादार्थमभिव्यक्तौ तदाश्रयतइत्यर्थः । मनश्च अव्ययाभिव्यक्तिंप्राप्तम् । अवयवैरिवावयवैर्ज्ञानेच्छाद्वेषप्रयत्नधर्माधर्मभावनासंस्कारैः सूक्ष्मैर्दुर्विवेकभेदैः सहितंसर्वभूतकृत्सर्वप्राण्युपादानीभूतशरीरमव्ययं प्रलयेप्यात्यन्तिकनाशशून्यमाश्रयन्ते ॥ १८ ॥

(३) **कुल्लूकः** । तदा विशन्ति भूतानीत्यादि । पूर्वश्लोकेतस्यैति प्रकृतंब्रह्मात्र तदिति परामृश्यते । तद्ब्रह्म शब्दादिपञ्चतन्मात्रात्मनावस्थितंमहाभूतान्याकाशादीन्याविशन्ति तेभ्यंउत्पद्यन्ते सह कर्मभिः स्वकार्यैः तत्राकाशस्यावकाशदानंकर्म वायोर्व्यूहनंविन्यासरूपंतेजसः पाकोऽपांसंग्रहणंपिण्डीकरणरूपंपृथिव्याधारणम् । अहङ्कारात्मनावस्थितंब्रह्म मनआविशत्यहङ्कारादुत्पद्यतइत्यर्थः । अवयवैःस्वकार्यैःशुभाशुभसंकल्पसुखदुःखादिरूपैःसूक्ष्मैर्बहिरिन्द्रियागोचरैः सर्वभूतकृत्सर्वोत्पत्तिनिमित्तंमनोजन्यशुभाशुभकर्मप्रभवत्वाज्जगतः । अव्ययमविनाशि ॥ १८ ॥

(४) **राघवानन्दः** । उक्तमर्थंसंकलयति तदिति । तत्स्थूलशरीरजातं तत्तददृष्टाकृष्टं कर्मीभूतंमहान्ति भूतानि कर्तृणि वेष्टनरूपाण्यारम्भकतया विशन्ति मनश्च जीवोपाधिःसह कर्मभिर्धर्माद्यैरवयवप्रायैरिन्द्रियैश्च सह भोगार्थंप्रवि-

शतीत्यनुषज्यते मनुष्योहमित्याद्यभ्यासमनुभवतीत्यर्थः। सर्वभूतकृदिति मनसोविशेषणं तस्यैव कर्तृत्वादिसूचनार्थम्। अव्ययंज्ञानातिरिक्तानाश्यम् ॥ १८ ॥

(५) **नन्दनः** । हिरण्यगर्भशरीरंतु सर्वभूतानांशरीरोपादानत्वेनोपयुज्यमानमपि न कदाचिदपि क्षीयतइत्याहतदिति । तत् हिरण्यगर्भशरीरंसूक्ष्मैरवयवैः सर्वभूतकृत् सर्वभूतानिकुर्वाणमप्यक्षय्यावयवंयथा भवति तथाऽव्ययंमहान्ति भूतान्यहङ्कारमनस्तन्मात्रज्ञानकर्मेन्द्रियाणि मनश्च महत्तत्त्वंच कर्मभिर्जीवैःसहाविशन्ति ॥ १८ ॥

(६) **रामचन्द्रः** । तदेति । तस्मिन्काले कर्मभिः सह महान्ति महत्तत्त्वादीनि भूतानि पृथिव्यादीनि अहङ्कारात्मनः शरीर आविशन्तिच पुनःषष्ठंमनःकर्तृभूतंसूक्ष्मैरवयवैःसह प्रविशति । कीदृशंमनः सर्वभूतकृत् । पुनः कीदृशंमनः । अव्ययंविनाशरहितम् । पुनः कीदृशं वासनात्मकम् ॥ १८ ॥

तेषामिदंतु समानांपुरुषाणांमहौजसाम् ॥ सूक्ष्माभ्योमूर्तिमात्राभ्यः संभवत्यव्ययाद्व्ययम् ॥ १९ ॥

(१) **मेधातिथिः** । सूक्ष्मात्स्थूलमुत्पद्यते सम्भवति । अव्ययाद्व्ययमित्येतावति तात्पर्यं नतु षण्णांसमानांवा तत्त्वानांमात्राभ्यइति । चतुर्विंशतितत्त्वानि तानिसृष्टौ सर्वेषांनिमित्तम् । अथवा पिण्डसृष्टौ सप्तैव प्रधानंकारणम् । षडविशेषाः सप्तमोमहांस्तेभ्योभूतेन्द्रियाण्युत्पद्यन्ते । तेषु चोत्पन्नेषु पिण्डीभवति शरीरम् । अथ यावत्प्रधानादुपसंभृतसर्वविकारादेकीभूताद्व्ययंबहुधा विप्रकीर्णंविश्वरूपंजगदुत्पद्यते किं युगपदेव समस्तैर्विकारैःस्थूलरूपैः प्रधानंविक्रियते । नेत्याह तेषामिदमिति । यादृशः प्रागुक्तःक्रमस्तेनैव प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद्गणस्तु षोडशकइतिपुरुषशब्दस्तत्त्वेपुरुषार्थत्वात्प्रयुक्तः। महौजसांस्वकार्येवीर्यवताम् । अपरिमितविकारहेतुत्वान्महत्त्वम् । तेषांयाःसूक्ष्मामूर्तिमात्रामूर्तिःशरीरं तदर्थामात्रास्ताभ्यइदंभवति । अतउच्यतेऽव्ययाद्व्ययमिति । काःपुनस्तेषांसूक्ष्मामात्राः । नहितन्मात्राणामन्यमात्राः संभवन्ति येनतेषांसूक्ष्मामात्राइतिव्यतिरेकउपपद्यते । नतेषांस्वागतमात्रापेक्षत्वम् । किंतर्हि तन्मात्रेभ्यः सूक्ष्मोमहान्महतः प्रभुरिति ॥१९॥

(२) **सर्वज्ञनारायणः** । तेषामिति । अन्तःकरणंपञ्चेन्द्रियाण्यात्ममात्रा च तदवच्छिन्नेति सप्त । तेषांपुरुषाणांपुरुषदेहे सीदतां कार्योत्पादने महांबलानां सूक्ष्माभ्योलिङ्गमूर्तिरूपाभ्यो मात्राभ्योऽव्ययाच्च प्रकृतेर्व्ययंविनाशि स्थूलदेहरूपंकार्यंसंभवत्युत्पद्यते ॥ १९ ॥

(३) **कुल्लूकः** । तेषामिदंतुसमानामित्यादि । तेषांपूर्वप्रकृतीनांमहदहङ्कारतन्मात्राणांसप्तसंख्यानांपुरुषादात्मनउत्पन्नत्वात् तद्वृत्तिग्राह्यत्वाच्च पुरुषाणांमहौजसांस्वकार्यसंपादनेन वीर्यवतांसूक्ष्मायामूर्ति । मात्राःशरीरसंपादकभागास्ताभ्यइदंजगन्नश्वरंसंभवत्यनश्वराद्यत्कार्यंतद्विनाशि स्वकारणे लीयते । कारणंतु कार्यापेक्षया स्थिरं परमकारणंतु ब्रह्म नित्यमुपासनीयमित्येतद्दर्शयितुमयमनुवादः ॥ १९ ॥

(४) **राघवानन्दः** । संप्रति स्थूलभूतगुणान्वक्तुं स्थूलशरीरस्य तत्कार्यत्वमनुवदन्निवाह तेषामिति द्वाभ्याम् । इदंस्थूलदेहं पुरुषाणां मनआदिपुरुषान्तानां समानांमहौजसां यन्मण्डलव्यापिनांतेषांभोगार्थं सूक्ष्माभ्योऽपञ्चीकृताभ्यो यामूर्तिमात्राःपञ्चीकृतानि महाभूतानि ताभ्यस्तदिदंस्थूलशरीरं संभवत्युत्पद्यतइत्यन्वयः । अव्ययात् अव्ययंजीवं अतत्यवच्छिनत्तीति अव्ययात् प्रथमान्तं स्थूलदेहविशेषणम् स्वतश्च व्ययंप्रत्यक्षंविनाशीति ॥ १९ ॥

(५) **नन्दनः** । यदुक्तंहिरण्यगर्भशरीरादपहृतंमहदादितत्त्वंतदंशाजीवाश्च सर्वभूतोपादानमिति तदिदंनिगमयति तेषामिति । समानांमहदहङ्कारमनस्तन्मात्रज्ञानकर्मेन्द्रियजीवानांपुरत्वेन शरीरत्वेन शेरतइतिमहदादीनांपुरुषत्वं पुरेशेरतइति जीवानाम । हौजसामक्षयशक्तीनामव्ययाद्ब्रह्मशरीरात्संभूताभ्यःसूक्ष्माभ्योमूर्तिमात्राभ्यः शरीरनिष्पादनक्षमाभ्योव्य-

यं नश्वरमिदंकार्यजातंसंभवति । हिरण्यगर्भशरीरस्थाः सप्ततत्त्वमात्राः कार्यजातस्योपादानमित्यर्थः ॥ १९ ॥

(६) **रामचन्द्रः** । तेषामिति । तेषांसप्तानांपुरुषाणांमहदहङ्कारपञ्चतन्मात्राणामवयवामसूक्ष्माः सूक्ष्माभ्योमूर्तिमात्राभ्यः शब्दस्पर्शरूपरसगन्धेभ्यः । अव्ययादीश्वराद्ययंविश्वंसंभवतीति ॥ १९॥

आद्याद्यस्य गुणंत्वेषामवाप्नोति परःपरः॥ योयोयावतिथश्चैषांससतावद्गुणःस्मृतः॥ २०॥

(१) **मेधातिथिः** । पूर्वश्लोके केचिदन्यथासप्तसंख्यांपरिकल्पयन्ति । पञ्चेन्द्रियाणि चक्षुरादीनि वर्गीकृतान्येकीभवन्ति । बोधहेतुतयैकेन धर्मेण योगादेकत्वेन निर्दिश्यन्ते । एकंकर्मेन्द्रियाणि तौचवर्गद्वित्वाद्वौपुरुषौभवतः । पञ्चभूतानि भेदेनैव निर्दिष्टानि कार्यवैलक्षण्यात् । तदेवंसप्तपुरुषास्तेषांया मूर्त्यर्थाः सूक्ष्मामात्रा निर्माणकार्याणि तन्मात्राण्यहङ्कारश्च । अन्यत्समानम् । अतश्च भूतानांपूर्वश्लोके संनिधानादेषामिति तेषांप्रतिनिर्देशः । यद्यपि च व्यवहिते बहूनि च तानि संनिहितानि तथापि यद्दहार्थः प्रतिपाद्यते विशिष्टसंख्याकर्तृगुणवत्त्वंतद्भूतानामेव संभवति नान्येषांप्रकृतत्वेसत्यपि । अतोऽयंश्लोकार्थएषांभूतानांयदाद्यन्तवत्तस्ययद्रूपंततोनन्तरंपठितं । तत्तत्पूर्वस्यसंबन्धेन गुणंगृह्णाति । गुणशब्देन शब्दादयः पञ्चोच्यन्ते । आद्यत्वंचात्रवक्ष्यमाणया व्यवस्थयाऽऽकाशंजायतइति । गुणत्वंच शब्दादीनांतत्रैव वक्ष्यति । योयआकाशादिलक्षणोऽर्थोयावतिथः यावतांपूरणः । वतेरिथुक् । द्वितीयेतृतीयेवस्थानेस्थितः सतावद्गुणस्तावन्तोगुणास्तस्य भवन्ति । द्वितीयस्थाने स्थितोद्विगुणइत्यादि परस्पराद्याद्यगुणसंबन्धित्वंप्रथमेर्धश्लोकउक्तम् । तत्र यः स्वशब्देन यस्यैव योगुणोऽभिहितस्तस्य शब्दगुणंविदुस्तद्रूपगुणमुच्यतइत्यादि । ततश्चपूर्णगुणावाप्तौ द्वैगुण्यमाकाशंवर्जयित्वा भूतानांप्राप्तमतउक्तं योयोयावतिथइति । तेन द्विगुणोवायुस्त्रिगुणंतेज श्चतुर्गुणाआपः पञ्चगुणा भूमिरिति । आद्याद्यस्येति कथम् । आद्यस्याद्यस्येहभवितव्यं । नित्यवीप्सयोरितिद्विवचनेन । यथापरःपरइति । छन्दोभिरविशेषात् स्मृतीनांलुग्वृत्तानुरोधाच्चैवंपठितम् ॥ २० ॥

(२) **सर्वज्ञनारायणः** । आद्याद्यस्येति । तेषामिति योग्यतया महान्ति भूतानीति प्राक्प्रक्रान्तानि महाभूतानि परामृशति । आकाशवायुतेजोजलक्षितिक्रमेणोत्पत्तेस्तत्क्रमेणाद्यस्याद्यस्य पूर्वस्य पूर्वस्य गुणंशब्दस्पर्शरूपरसगन्धान्यतमरूपंपरःपरआप्नोति स्वगुणेन च युज्यत इत्यर्थः योयोयावतिथोयावत्पूरणः सतावद्गुणः प्रथमएक गुणोऽन्यैः क्रमेण द्व्यादिगुणाइत्यर्थः ॥ २० ॥

(३) **कुल्लूकः** । आद्याद्यस्य गुणंत्वेषामित्यादि । एषामिति पूर्वतरश्लोके तदा विशन्तिभूतानीत्यत्र भूतानांपरामर्शः । तेषांचाकाशादिक्रमेणोत्पत्तिक्रमःशब्दादिगुणवत्ता च वक्ष्यते । तत्राद्याद्यस्याकाशादेर्गुणंशब्दादिकंवाय्वादिःपरःपरः प्राप्नोति । एतदेव स्पष्टयति योयइति । एषांमध्ये योयोयावतांपूरणोयावतिथःवतेरिथुक् ससद्वितीयादिः द्वितीयोद्विगुणः तृतीयस्त्रिगुणइत्येवमादिर्मन्वादिभिःस्मृतः । एतेनेतदुक्तंभवति आकाशस्य शब्दोगुणः वायोःशब्दस्पर्शौ तेजसःशब्दस्पर्शरूपाणि अपांशब्दस्पर्शरूपरसाः भूमेःशब्दस्पर्शरूपरसगन्धाः । अत्र यद्यपि नित्यवीप्सयोरिति द्विर्वचनेनाद्यस्याद्यस्येति प्राप्तंतथापि स्मृतीनांछन्दःसमानविषयत्वात्सुपांसुलुगिति प्रथमाद्यस्य सुपूलुक् तेनाद्याद्यस्येति रूपसिद्धिः ॥ २० ॥

(४) **राघवानन्दः** । अतएव मूर्तिमात्राशब्दवाच्यानां स्थूलपञ्चमहाभूतानांगुणान्संकलयति आद्याद्यस्येति । एषामुक्तानामाकाशादिस्थूलपञ्चमहाभूतानांमध्ये योयोभूतविशेषोयावतिथो यावतांपूरणःस्मृतो मनीषिभिः ससतावद्गुणः । तेनाकाशाद्वायोर्द्वितीयतया वायोर्गुणद्वयम् एवमुत्तरत्रापि तेन स्थूलशरीरतावद्गुणोपलब्धिरिति भावः । देहस्य पञ्चात्मकत्वेपि पृथिवीमयआपोमयस्तेजोमयोवायुमयआकाशमयइति श्रुतौ तत्तत्प्राधान्यमात्रंविवक्षितम् ॥ २० ॥

(५) **नन्दनः** । अथपञ्चभूतानांगुणगणसंख्यानप्रसङ्गादाह आद्येति। तेषांपञ्चानांपुरुषाणांमध्यआद्याद्यस्य पूर्वपूर्वस्य गुणाःशब्दादिकास्तानेतान्परः परः पुरुषःप्राप्नोति । ततश्च योयोयावतिथोयावतांपुरुषाणांयावत्संख्याकःसतावद्गुणः स्मृतः। एतदुक्तंभवति । आकाशः पुरुषः तस्यैकोगुणः शब्दः । वायुर्द्वितीयस्तस्य द्वौ शब्दस्पर्शौ। तेजस्तृतीयस्तस्य त्रयः शब्दस्पर्शरूपाणि । आपश्चतुर्थस्तस्य चत्वारः शब्दस्पर्शरूपरसाः। भूमिःपञ्चमस्तस्य पञ्चशब्दरूपरसगन्धाइति । एवंतावत्सर्वभूतानि सिसृक्षतोहिरण्यगर्भस्य स्वशरीरंभूतमित्युक्तम् ॥ २० ॥

(६) **रामचन्द्रः** । आद्येति । एषांपञ्चमहभूतानाम् । आद्याद्यस्य परःपरमवाप्नोति । तद्यथाआकाशस्य शब्दगुणं वायोः स्पर्शगुणं वायौ शब्दस्पर्शौ भवतः तेजसो रूपगुणं तेजसि शब्दस्पर्शरूपाणि भवन्ति । एवमप्यग्रेऊत्द्यम् । येषांपञ्च महाभूतानांयोयोयावतिथो यावत्सङ्ख्यावान् ससतावत्सङ्ख्याकगुणयुक्तः स्मृतः तद्यथाशब्दस्पर्शरूपरसगन्धापञ्चगुणापृथ्वीत्यादि ॥ २० ॥

सर्वेषांतु सनामानि कर्माणि च पृथक्पृथक् ॥ वेदशब्देभ्यएवादौ पृथक्संस्थाश्च निर्ममे॥ २१॥

(१) **मेधातिथिः** । सप्रजापतिः सर्वेषामर्थानांनामानि चक्रे । यथा कश्चित् पुत्राणांजातानामन्येषांवा संव्यवहारार्थंकरोति । वृद्धिरादैच् धीश्रीस्त्रीमितिशब्दार्थसंबन्धंकृतवान् गौरश्वः पुरुषइति । कर्माणिच निर्ममे । धर्माधर्माख्यान्यदृष्टान्यग्निहोत्रादीनिच । सृष्ट्वाच कर्माणि तत्र संस्थाव्यवस्थाश्चकार । इदंकर्म ब्राह्मणेनैव कर्तव्यं कालेऽमुष्मै च फलाय । अथवा दृष्टार्थामर्यादा संस्था गोप्रचारइहच प्रदेशेनकर्तव्यउदकं । सस्यसेकार्थममुष्मिन्ग्रामे नदेयं । यावत्तस्माद्ग्रामादस्माभिरयमुपकारोन लब्धः । दृष्टानि च कर्माणि निर्ममे । तत्र यान्यदृष्टार्थानि तानि वेदशब्देभ्योवैदिकेभ्योवाक्येभ्यः । ननु सर्वस्य तेनैव सृष्टत्वात्तस्यैवत्वात्तत्त्याद्वेदं ससर्ज कर्मानुष्ठानपरिपालनार्थमित्येवंवक्तव्यं वेदसृष्टिश्च वक्ष्यते अग्निवायुरविभ्यश्चेत्यत्रान्तरे । उच्यते । भिन्नमत्रदर्शनम् । केचिदाहुरन्यस्मिन्कल्पे वेदास्तेनाधीतास्तेच महाप्रलयेन प्रलीनाः पुनरन्यस्मिन् कल्पे सुप्तप्रबुद्धवत्सर्वंप्रथमंप्रतिभाति स्वप्नपठितोयथा कस्यचिच्छ्लोकः प्रतिभाति । भाति च वेदेगौरनुबन्ध्याऽश्वस्तूपरोगोमृगइत्यादिवाक्येभ्यः शब्दानुस्मृतिपूर्वकं झटिति तानर्थान्स्मृत्वोत्पद्यमानांश्च पदार्थान् दृष्ट्वा तस्यार्थस्यायंशब्दः कल्पान्तरे नामासी त्संप्रत्यस्यैवक्रियतामित्युभयंवेदशब्देभ्यएव नामानि कर्माणि च सृष्टवान् । अथवा नैववेदाः प्रलीयन्ते महाप्रलयेऽपि । योसौपुरुषः केषांचिदिष्टस्तथावेदाआसते । सएवान्तरण्डं ब्रह्माख्यंपुरुषंनिर्माय वेदानध्यापयामास । एवं स ब्रह्मा वेदशब्देभ्यः सर्वंनिर्मितवान् । यदत्रतत्त्वंतदस्माभिरुक्तमेव । अथ पौराणिकीप्रक्रियाप्रयुज्यते सास्माभिःप्रदर्श्यतएव । आदौ जगत्सर्गइत्यर्थः । अथवादौ यानि नामान्यनपभ्रष्टानि न पुनरिदानींतनान्यशक्तिजानि गव्यादीनि पृथक् । यथा शरीरत्वसमुदायरूपमेवंनिर्ममे । किंतर्हि पृथक् ॥ २१ ॥

(२) **सर्वज्ञनारायणः** । सर्वेषामिति । नामानि ब्राह्मणइत्यादीनि । कर्माणि याजनादीनि । वेदशब्देभ्योऽधिगम्यनिर्ममेध्यवस्थापितवान् । पृथग्विभिन्नाःसंस्थाःसंस्थानानि द्विपात्त्वादीनि ॥ २१ ॥

(३) **कुल्लूकः** । सर्वेषांतु सनामानीत्यादि । सपरमात्माहिरण्यगर्भरूपेणावस्थितःसर्वेषांनामानि गोजातेर्गौरिति अश्वजातेरश्वइति । कर्माणि ब्राह्मणस्याध्ययनादीनि क्षत्रियस्य प्रजारक्षादीनि । पृथक्पृथक् यस्य पूर्वकल्पे यान्यभूवन् । आदौ सृष्ट्यादौ वेदशब्देभ्यएवावगम्य निर्मितवान् । भगवता व्यासेनापि वेदमीमांसायांवेदपूर्विकैव जगत्सृष्टिर्व्युत्पादिता । तथा च शारीरकसूत्रं शब्दइति चेन्नातःप्रभवात्प्रत्यक्षानुमानाभ्याम् । अस्यार्थः देवतानांविग्रहवत्त्वे वैदिके वज्रादिशब्दे देवतावाचिनि विरोधः स्याद्वेदस्यादिमत्त्वप्रसङ्गादिति चेन्नास्तिविरोधः । कस्मादतःशब्दादेव जगतःप्रभवा-

दुत्पत्तेः प्रलयकालेपि सूक्ष्मरूपेण परमात्मनि वेदराशिःस्थितःसइह कल्पादौ हिरण्यगर्भस्य परमात्मनएव प्रथमदे-हिमूर्तेर्मनस्यवस्थान्तरमनापन्नः सुषुप्तप्रबुद्धस्येव प्रादुर्भवति तेन प्रदीपस्थानीयेन सुरनरतिर्यगादिप्रविभक्तंजगदभिधेयभूतंनिर्मिमीते कथमिदंगम्यते प्रत्यक्षानुमानाभ्यांश्रुतिस्मृतिभ्यामित्यर्थः। प्रत्यक्षंश्रुतिरनपेक्षत्वात् अनुमानंस्मृतिरनुमीय-मानश्रुतिसापेक्षत्वात । तथा च श्रुतिः एतइति वै प्रजापतिर्देवानसृजतासृग्रमइति मनुष्यानिन्दवइति पितॄस्तिरःप-वित्रमिति ग्रहानसवइति स्तोत्रंविश्वानीति शस्त्रमिति सौभगायेत्यन्याःप्रजाः। स्मृतिस्तु सर्वेषांतु सनामानीत्यादिका मन्वा-दिप्रणीतैव। पृथक्संस्थाश्चेति । लौकिकीश्च व्यवस्थाः कुलालस्य घटनिर्माणंकुविन्दस्य पटनिर्माणमित्यादिकविभागेन निर्मितवान्॥ २१ ॥

(४) **राघवानन्दः** । एतइति । प्रजापतिर्देवानसृजतासृग्रमइति मनुष्यानिन्दवइति पितॄंस्तिरः पवित्रमिति ग्रहानसवइति स्तोत्रंविश्वानीति शस्त्रंसौभगाये त्येताःप्रजास्तथाभूरिति भूमिमसृजदित्यादि श्रुतिमाश्रित्याह सर्वेषांत्विति। नामानि देवोऽयं मनुष्योऽयं इत्यादीनि कर्माणि यजनयाजनादीनि । पृथक्संस्थाः कुलालस्य कम्बुग्रीवादि घट-निर्माणं कुविन्दस्य पटनिर्माणं द्विचतुष्पदाद्याकृतीर्वा निर्ममइत्यन्वयः । पुरश्चक्रे द्विपदःपुनश्चक्रे चतुष्पदइति श्रुतेः। पुरःशरीराणि ॥ २१ ॥

(५) **नन्दनः**। इदानींतेन सृज्यमानानांभूतविशेषाणांनामकर्मरूपपृथक्करणंकुतस्त्यमित्यपेक्षायामाह सर्वेषामिति। सब्रह्मानामानि देवामनुष्याः पशवइत्यादीनि कर्माणि देवाएवंकुर्वन्तु मनुष्याएवंपशवएवमितिसंस्थाः संस्थानानि रूपाणी-तियावत् देवानामेवंसंस्था मनुष्याणामेवंपशूनामेवमिति । वेदशब्देभ्योमन्त्रार्थवादेतिहासादिपर्यालोचनया निर्ममे॥ २१ ॥

(६) **रामचन्द्रः**। सर्वेषामिति । सब्रह्मा सर्वेषांप्राणिनांब्राह्मणादीनांवर्णानांनामान्येवंपृथक्पृथक्निर्ममे । आदौ सृष्ट्यादौ वेदशब्देभ्यो वेदाभ्यासेभ्यः ब्राह्मणोस्य मुखमासीद्बाहूराजन्यः कृतइत्यादिभ्यः श्रुतिभ्योज्ञात्वा पृथक्कर्माणि ब्राह्मणादीनांनिर्ममे पृथक् संस्थांस्थितिंत्रिलोक्याःसंस्थांमर्यादांनिर्ममे ॥ २१ ॥

कर्मात्मनांच देवानांसोऽसृजत्प्राणिनांप्रभुः ॥ साध्यानांच गणंसूक्ष्मंयज्ञंचैव सनातनम् ॥ २२ ॥

(१) **मेधातिथिः** । कर्मात्मानः शरीरिणः प्राणिनः कर्मसु तत्परामनुष्याउच्यन्ते । तेषामर्थसिद्धये यज्ञमसृ-जत्। ये ब्रह्मोपासनात्वभिरताः पुत्रपश्वादिफलार्थिनो द्वैतपक्षाश्रितास्तेकर्मानुष्ठानपरत्वात्कर्मात्मानउच्यन्ते। षष्ठ्यपि तादर्थ्येब्रूतइति तदर्थंयज्ञमसृजदिति गम्यते । देवानांच गणंतदर्थमेवासृजत् । तंकर्मात्मानंचेत्ययमदेशे चः पठितः। तस्य देशांदेवानामित्यतोनन्तरंयज्ञंससर्ज । अग्निरग्नीषोमाविन्द्राग्नीइत्यादिंयज्ञसिद्ध्यर्थंदेवानांगणमसृजत्। तथा साध्या-नांदेवानांगणमित्यनुषज्यते । भेदेनोपादानमहविर्भाक्त्वात्तेषांस्तुतिभाजएव तेकेवलम् । यत्र पूर्वे साध्याः सन्तिदेवाइति। साध्यावै नाम देवाइति। साध्यावैनाम देवाआसन्। अथवा ब्राह्मणपरिव्राजकवत् । सूक्ष्मंमरुतोरुद्राङ्गिरसइत्येतदपेक्षया साध्यगणः सूक्ष्मः । साध्यग्रहणंचान्यासामप्यहविःसंबन्धिनीनांदेवतानांवेनोस्तुनीतिरित्यादीनांप्रदर्शनार्थम् । अन्ये तु कर्मात्मनांदेवानांप्राणिनामिति समानाधिकरणानिमन्यन्ते। कर्माणि आत्मा स्वभावप्रतिलम्भोयेषांते कर्मात्मानः। यागा-दिकर्मनिवर्तनपरत्वात् प्रधानतयावा कर्मात्मानः। काश्चिद्देवतायागादिकर्मण्येव स्वरूपतइतिहासेश्रूयन्ते यथेन्द्रोरुद्रोविष्णु-रिति। अन्यासांतु यागएवदेवतात्वंन स्वरूपतः। अक्षाग्रावाणोरथाङ्गानि। नहि यथा भारते इन्द्रादीनांवृत्रादिभिरसुरैर्युद्धादि कर्मऽश्रूयते तथाक्षादीनांवर्ण्यते । अस्तिचसूक्तहविःसंबन्धेतेषामपिदेवतात्वम् । अक्षाणां प्रावेपामाइति ग्राव्णांप्रेतेवद-न्त्विति। वनस्पतेवीड्वङ्गइतिरथाङ्गानाम्। अतएव प्राणिनामिति। द्विविधाहि देवताः। प्राणवत्यस्तद्रहिताश्च। यथेन्द्रादयः

पुरुषविग्रहाः प्राणवन्तः पुराणेवर्ण्यन्ते। नाक्षादयइतिहासदर्शना। अतश्चायंसर्वःसर्गादिप्रपञ्चः। चशब्दश्चात्र द्रष्टव्यः। प्राणिनामप्राणिनामपि निरुक्तदर्शनेऽपि द्विविधा देवता। अश्वामानोमित्रइति। शकुनिः कनिक्रददिति। गावआगावो अग्मन्निति। एताः प्राणवत्यः। प्राणाउक्ताः। सनातनग्रहणंयज्ञविशेषणंपूर्वकल्पेऽपि यज्ञस्यभावात्प्रवाहनित्यतया नित्यत्वम्॥ २२॥

(२) **सर्वज्ञनारायणः**। कर्मात्मनामिति। कर्मात्मनांदेवदेहहेतुरूपकर्मयुक्तात्मनांदेवानां ये कर्मणा देवत्वमामुवन्ति तेषांकर्मदेवानांगणमसृजत्। ये तु देवसुतत्वेनाजानदेवास्तेदेवैरेव सृज्याः। तथा प्राणिनामन्येषां पितृयक्षादीनांगणं तथा साध्यानांपूर्वकल्पदेवानांगणं यज्ञंयज्ञकर्माभिमानिनंपुरुषम्॥ २२॥

(३) **कुल्लूकः**। कर्मात्मनांच देवानामित्यादि। सब्रह्मा देवानांगणमसृजत्। प्राणिनामिन्द्रादीनां कर्माण्यात्मास्वभावोयेषांतेषामप्राणिनांच ग्रावादीनांदेवानांसाध्यानांच देवविशेषाणांसमूहंयज्ञंचज्योतिष्टोमादिकं कल्पान्तरेऽप्यनुमीयमानत्वान्नित्यं साध्यानांच गणस्य पृथग्वचनंसूक्ष्मत्वात्॥ २२॥

(४) **राघवानन्दः**। सर्वभूतानि निर्ममइत्युक्तांसृष्टिंविवृण्वन् विराट्सृष्टिमाह कर्मात्मनामिति दशभिः। कर्मात्मनां कर्मणैव प्राप्तदेवत्वानां ये कर्मणादेवत्वमायान्तीति श्रुतेः। कर्मणोयज्ञादेः स्वरूपनिर्वाहकत्वेन वा अमुकस्यै देवतायै इदंनममेति त्यागोद्देश्यत्वात् प्राणिनांमध्ये सूक्ष्ममस्मदाद्यदृश्यरूपंदेवानांगणमसृजत्। तथा साध्यानांगणंयज्ञंकर्म सनातनंवैदिकम् कर्मब्रह्मोद्भवंविद्धीति स्मृतेरवश्यफलदत्वात्॥ २२॥

(५) **नन्दनः**। अथलोकतन्त्रप्रवर्तकभाषाभिमानिनीनांदेवतानांसृष्टिंचतुर्भिः श्लोकैराह कर्मेति। प्राणिनामर्थप्राप्त्यर्थार्जनादीनि स्वभावप्राप्तान्याहारनिद्रादीनि च यानि कर्माणि तदभिमानिनोदेवाः कर्मात्मानः कर्मनिर्वर्त्यफलाभिमानिनस्तुदेवाःसाध्यास्तेषामुभयेषांसूक्ष्मंसंशयितंगणंतथा सनातनमादिकालप्रवाहरूपेण नित्यंयज्ञंयज्ञाभिमानिनींचदेवतांसोऽसृजत्॥ २२॥

(६) **रामचन्द्रः**। कर्मेति॥ सप्रभुः हिरण्यगर्भः कर्मात्मनांगणमसृजत् च पुनः प्राणिनांगणमसृजत् साध्यानांगणमसृजत् सनातनमविनाशंसूक्ष्ममतीन्द्रियंयज्ञमपूर्वंचैवासृजत्॥ २२॥

अग्निवायुरविभ्यस्तु त्रयंब्रह्म सनातनम्॥ दुदोह यज्ञसिद्ध्यर्थमृग्यजुःसामलक्षणम्॥ २३॥

(१) **मेधातिथिः**। तिस्रएव देवताअग्निप्रभृतयइति नैरुक्ताः संत्यप्यभिधाननानात्वे। अतस्तेनदर्शनेननोच्यते। एताभ्यस्तिसृभ्योयज्ञसिद्ध्यर्थेयागसंप्रदानत्वात्तासांचतुर्थी। त्रयमृग्यजुःसामलक्षणंब्रह्म वेदाख्यंदुदोह। द्विकर्मकोऽयंधातुः प्रधानंकर्म त्रयमप्रधानेनद्वितीयेन कर्मणा भवितव्यम्। नच तदस्ति। अतः पञ्चम्येवेयमिति मन्यामहे। अग्न्यादिभ्योदुदोहाक्षारयदभावयत्। कथं पुनरग्न्यादिभ्योवर्णात्मा शब्दोमन्त्रवाक्यानि ब्राह्मणवाक्यानिच भवेयुः। किंनोपपद्यते। कःशक्तीरदृष्टाअसतीर्वक्तुमर्हति। नाख्यातार्थोविकल्पयितुंयुक्तः। पञ्चमी तर्हि किमर्थं दुहियाचीतिद्वितीयया भवितव्यम्। किंच दृष्टप्रमाणविरोधी प्राग्वृत्तोऽर्थउच्यमानोमनसः परितोषमाधत्ते प्रामाणिकानांपरित्वतोविरोधः। स्वरूपपरत्वाश्रयणेनैषामागमानामृग्वेदएवाग्नेरजायत यजुर्वेदोवायोः सामवेदआदित्यादिति। अग्न्यादयोऽपिदेवताऐश्वर्यभाजोनिरतिशयशक्तिश्च प्रजापतिस्तत्रकानामानुपपत्तिः। अस्मिन्दर्शनेपञ्चम्यपिविवक्ष्या। अतः कारकाणि कथितान्यत्रापादानसंज्ञेत्यपादानविवक्षायांभाष्ये समर्थितानि। अन्यदर्शने कथंचतुर्थीतावद्युक्तैव। अर्थवादाश्चैते तत्र द्वितीयंकर्मात्मैव प्रजापतिरात्मानंदुदोह। दोहनंचाध्यापनंपरसंक्रान्तिसामान्येन। अथापिपञ्चमी तत्राप्याग्नेयामन्त्राआदावृग्वेदेऽतोऽग्नेरजायतेत्यु-

च्यतेयजुर्वेदेऽपिइषेत्वोर्जेत्वेति । इडन्नंतन्मध्यस्थानत्वाद्वायुना वर्षदानेन क्रियते । ऊर्क्प्राणः स वायुरेव । अत आदितो-वायुकार्यसंबन्धाद्वायोरित्युपमा । अथवाध्वर्यवमार्त्विज्यं बहुप्रकाराश्चेष्टाश्च सर्वावायोरित्यनेन सामान्येन वायोर्जन्म यजुर्वेदस्यानधिकारस्यसामगीत्ययोग्यत्वादुत्तमाध्ययनानि सामान्युत्तमस्थानश्चादित्यइति ॥ २३ ॥

(२) **सर्वज्ञनारायणः** । अग्निवाय्विति । अयंब्रह्म वेदत्रयंदुदोहान्तर्धृतमाकृष्टवान् ॥ २३ ॥

(३) **कुल्लूकः** । अग्निवायुरविभ्यस्त्वित्यादि । ब्रह्म ऋग्यजुःसामसंज्ञंवेदत्रयं अग्निवायुरविभ्यआकृष्टवान् सनातनंनित्यम् । वेदापौरुषेयत्वपक्षएव मनोरभिमतः । पूर्वकल्पे ये वेदास्तएवपरमात्ममूर्तेर्ब्रह्मणःसर्वज्ञस्य स्मृत्यारूढाः । तानेव कल्पादौअग्निवायुरविभ्यआचकर्ष । श्रौतश्चायमर्थोन शङ्कनीयः । तथा च श्रुतिः अग्नेर्ऋग्वेदोवायोर्यजुर्वेदआदित्यात्सामवेदइति । आकर्षणार्थत्वाद्दुहिधातोर्नाग्निवायुरवीणामकथिनकर्मता किंत्वपादानतैव यज्ञसिद्ध्यर्थंत्रयीसंपाद्यत्वात् यज्ञानांआपीनस्थक्षीरवद्विद्यमानानामेव वेदानामभिव्यक्तिप्रदर्शनार्थम् । आकर्षणवाचकोगौणोदुहिःप्रयुक्तः ॥ २३ ॥

(४) **राघवानन्दः** । अग्निवायुरविभ्यइति । अग्नेर्ऋग्वेदोवायोर्यजुर्वेद आदित्यात्सामवेदइतिश्रुतेः । ब्रह्म वेदंसनातनंनित्यं विसदृशक्रमराहित्यात् यथापूर्वमकल्पयदिति श्रुतेः । सुप्तप्रबुद्धस्येवाविर्भावाच यज्ञसिद्ध्यर्थं आध्वर्यवौद्गात्रादिभेदेनैव यज्ञःसिध्यतीति दुदोहादित्यादिद्वाराविश्वकारान्यथा वेदस्यकर्त्रानन्त्यप्रसङ्गात् ॥ २३ ॥

(५) **नन्दनः** । अग्निंवायुंरविंचसृष्ट्वातेभ्यइत्यर्थः । ब्रह्म वेदाभिमानिनींदेवतांदुदोह प्रादुष्कृतवान् । तदुक्तंचह्वृच ब्राह्मणे ऋग्वेदएवाग्नेरजायत यजुर्वेदोवायो स्सामवेदआदित्यादिति ॥ २३ ॥

(६) **रामचन्द्रः** । अग्निरिति । सनातनंब्रह्मत्रयंवेदत्रयमग्निवायुरविभ्यो दुदोह यज्ञसिध्यर्थम् । कीदृशंब्रह्म ऋग्यजुःसामलक्षणं अग्नेः सकाशात ऋग्वेदः वायोः सकाशाद्यजुर्वेदः रवेः सकाशात्सामवेदइति निर्ममे निर्मितवानितिसिद्धम् ॥ २३ ॥

कालंकालविभक्तीश्च नक्षत्राणि ग्रहांस्तथा ॥ सरितःसागराञ्छैलान्समानि विषमाणि च ॥ २४ ॥

(१) **मेधातिथिः** । धर्मसामान्यादाह । द्रव्यात्मा कालोवैशेषिकाणांक्रियारूपोऽन्येषामादित्यादिगतिप्रतानआवृत्तिमान् । कालविभक्तयोविभागामासर्त्वयनसंवत्सराद्या । नक्षत्राणि कृत्तिकारोहिण्यादीनि । ग्रहाआदित्यादयः । सरितोनद्यः । सागराःसमुद्राः । शैलाःपर्वताः । समानि स्थलान्येकरूपाभूभागाः खातप्रदरवर्जिताः । विषमाणिआरोहावरोहवन्ति ॥ २४ ॥

(२) **सर्वज्ञनारायणः** । कालमिति ॥ कालंसामान्यकालात्मानं पुरुषं कालविभक्तीः कालविभागकल्पाद्यभिमानिदेवताः नक्षत्राण्यश्विन्यादीनि समानि समवस्थानानि विषमाणि विषमस्थानानि ॥ २४ ॥

(३) **कुल्लूकः** । कालंकालविभक्तीश्चेत्यादि । अत्रससर्जेत्युत्तरश्लोकवर्तिनी क्रिया संबध्यते । आदित्यादिक्रियाप्रचयरूपंकालंकालविभक्तीर्मासर्त्वयनाद्याः नक्षत्राणि कृत्तिकादीनि ग्रहान्सूर्यादीन् सरितोनदीः सागरान्समुद्रान् शैलान्पर्वतान् समानि समस्थानानि विषमाणि उच्चनीचरूपाणि ॥ २४ ॥

(४) **राघवानन्दः** । कालमादित्यक्रियाप्रचयं कालविभक्तीर्मासर्त्वयनाद्याः समानि एकाकारसंस्थानानि मनुष्यान् विषमाणीति देवादितिरश्चः ॥ २४ ॥

(५) **नन्दनः** । चन्द्रादित्याश्विन्यादिग्रहनक्षत्रस्पन्दनः सामान्यलक्षणः कालः । कालविभक्तिस्त्रुटिलवादिरवयवः । नक्षत्राणि कृत्तिकादीनि । ससर्जेति वक्ष्यमाणत्वेन संबन्धः । एताआन्तरिक्ष्योदेवताः । सरिदादयोभौम्याः ॥ २४ ॥

(६) **रामचन्द्रः** । कालमिति । युग्मंसब्रह्माचेमाःप्रजाःस्रष्टुमिच्छंस्तदापूर्वमिमांसृष्टिंससर्ज कालादिसृष्टिंससर्ज

तद्यथापूर्वंकालंकालात्मकसंवत्सररूपं कालमसृजत् च पुनः कालविभक्तीःकालस्य विभागांश्च षड्तून् अयनादींश्च पुनः नक्षत्राणि अश्विन्यादीनि तथा नवग्रहांश्च सूर्यादीन्ससर्ज सरिदादींश्चससर्ज ॥ २४ ॥ २५ ॥

तपोवाचंरतिंचैव कामंच क्रोधमेव च ॥ सृष्टिंससर्ज चैवेमांस्रष्टुमिच्छन्निमाः प्रजाः ॥ २५ ॥

(१) **मेधातिथिः**। रतिर्मनसः परितोषः । कामोऽभिलाषोमन्मथोवा। अन्यत्प्रसिद्धम्। एवमादिकांसृष्टिंससर्ज मामत्रश्लोके पूर्वां च या सृष्टिरुक्ता। इमाःप्रजाःस्रष्टुमिच्छन् देवासुरयक्षराक्षसगन्धर्वाद्यास्तदुपकरणंतदात्मधर्मवच्छरीरंध- र्मंचादावसृजदित्यर्थः। अथ केयंवाचोयुक्तिः सृष्टिमसर्जेति यएवार्थःसृष्टिंकृतवानिति। सर्वेधातवः करोत्यर्थस्यविशेषाव- च्छिन्नेवर्तन्ते पचति पाकंकरोति यजति यागंकरोति। तत्रकृदन्ताद्विशेषेऽवगतआख्यातगतोधातुः करोत्यर्थमात्रप्रति- पादनपरोभवति । तस्मिन्नपिकृतश्चित्प्रतिपन्ने पुनःप्रतिपादनेऽनुवाददोषोमाभूदिति कालकादिषुतात्पर्यम्। अथवासृज्य- मानविशेषाः प्रमाणावच्छिन्ना सृष्टिःसामान्यसृष्टेः कर्म यथा स्वपोषंपुष्टइति ॥ २५ ॥

(२) **सर्वज्ञनारायणः** । तपइति। तपोऽनशनादि वाचमक्षरादिकां रतिंकामसुखं कामंरूयभिलाषं क्रोधंद्वेषम् इमांसृष्टिंतपआदिकामन्यांच पूर्वोक्तांसृष्टिंससर्ज इमावर्तमाना प्रजास्तत्तद्वारास्रष्टुमिच्छन् ॥२५ ॥

(३) **कुल्लूकः** । तपोऽवाचमित्यादि। तपःप्राजापत्यादि वाचंवाणीं रतिंचेतःपरितोषं काममिच्छां क्रोधंचेतो विकारं इमांएतच्छ्लोकोक्तांपूर्वश्लोकोक्तांच सृष्टिंचकार। सृज्यतइति सृष्टिः कर्मणि क्तिन्। इमाःप्रजावक्ष्यमाणादेवादिकाः कर्तुमिच्छन् ॥ २५ ॥

(४) **राघवानन्दः**। तश्चान्द्रायणादि वाचंस्मृत्यादिरूपां रतिंचेतःपरितोषं कामंरूयाद्यभिलाषं · क्रोधमाशादे र्हेतुम्। सृष्टिमिति सृज्यतेइति सृष्टिः। तपआदेर्विशेषणम् सृष्टिंससर्जेति पाकंपचतीति वत्। प्रकृत्यर्थोऽविवक्षितः ॥ २५॥

(५) **नन्दनः**। वाचंसरस्वतींतपःप्रभृतयो भूतधर्माभिमानिन्योदेवता इमाः प्रजाः स्रष्टुमिच्छन्नासांदेवमनुष्यादी- नांसृष्टिंनित्यर्थमित्यर्थः इमांकर्मात्मनामित्यारभ्यानुक्रान्तांसृष्टिंससर्ज चकार ॥ २५ ॥

कर्मणां च विवेकार्थंधर्माधर्मौ व्यवेचयत् ॥ द्वन्द्वैरयोजयच्चेमाःसुखदुःखादिभिःप्रजाः ॥ २६ ॥

(१) **मेधातिथिः**। धर्माधर्मौव्यवेचयद्विवेकेन पृथग्भावेन व्यवस्थापितवान् अयंधर्मएवायमधर्मएव। ननुच नैवायंविवेकोऽस्ति सन्तिहि कर्माण्युभयरूपाणि धर्माधर्मात्मकानि यथा दुःशबलानि वैदिकानि कर्माणि हिंसासाधन- त्वात् यथाज्योतिष्टोमस्वरूपेण धर्मोहिंसाङ्गत्वात्त्वधर्मइति अतआह कर्मणांतु विवेकाय। कर्मशब्देनात्रप्रयोगः कर्मणामनुष्ठानमुच्यते। सएव पदार्थोऽन्यथाप्रयुज्यमानोविपरीतस्वभावोभवति। धर्मःसन्नधर्मरूपतामापद्यतेऽधर्मोधर्मत्वम्। तथा हिंसैव हिंसाबहिः प्रयुज्यमानाअधर्मः सः नहिंस्यात्सर्वभूतानीतिप्रतिषेधगोचरत्वात् । अन्तर्वेदिकृताअग्नीषोमीयेधर्मो- विधिलक्षणत्वात् । एवंतयोर्धर्मस्तदेवतु दम्भेनासमर्थोनवाक्रियमाणमधर्मः । एवंदेवरगमनं स्त्रीणामधर्मोगुरुनियुक्ता- नांपुत्रार्थिनीनांघृताक्ताद्यनुग्रहेणधर्मः। अतः स्वरूपैकत्वेऽपि प्रयोगभेदाद्धर्माधर्मव्यवस्था। एकत्वंच प्रमाणान्तरदृष्ट्यातु- स्वरूपभेदएव। अथच कर्मफलेषु कर्मशब्दः कारणे कार्योपचारात्। तेनैतदुक्तंभवति कर्माणित्यवेचयत्कर्मफलविभागा- य। कः पुनः कर्मणांफलविभागोऽतउक्तंद्वन्द्वैरयोजयत्सुखदुःखादिभिः । धर्मस्यफलंसुखमधर्मस्यदुःखम्। अतउभयका- रिणोद्वन्द्वैर्योज्यन्तेधर्मकारित्वात्सुखेनाधर्मकारित्वाद्दुःखेन । द्वन्द्वशब्दोऽयंरूढ्या परस्परविरुद्धेषु पीडाकरेषु वर्ततेशीतो-

---

(२५) तपोवाचं=तपोबलं (ख)

ण्णवृष्ट्यातपक्षुत्सौहित्यादिषु । आदिग्रहणंसामान्यविशेषभावेनज्ञेयम् । केवलौ सुखदुःखशब्दौ स्वर्गनरकयोर्वाचकौ निरतिशयानन्दपरितापवचनौवा । विशेषस्वर्गग्रामपुत्रपश्वादिलाभस्तदपहारश्चादिशब्दस्यविषयः । कर्मणांपूर्वमुत्पत्तिरुक्ताऽनेनतेषामेवप्रयोगविभागः फलविभागश्चप्रजापतिनाकृतइतिप्रतिपाद्यविवेकः ॥ २६ ॥

(२) **सर्वज्ञनारायणः** । कर्मणामिति । कर्मणांकार्याणामकार्येभ्योविवेकार्थंधर्माधर्मसाधने कर्मणी व्यवेचयत् द्वन्द्वैरन्योन्यविरुद्धरूपतया सदा युग्मतयैव बुद्धिसन्निहितैः सुखदुःखकामक्रोधादिभिः इमाःप्रजाःसृष्टाःअयोजयत् ॥ २६ ॥

(३) **कुल्लूकः** । कर्मणांचेति । धर्मोयज्ञादिः सच कर्तव्यः अधर्मोब्रह्मवधादिः सनकर्त्तव्यः इतिकर्मणांविभागाय धर्माधर्मौव्यवेचयत् पृथक्त्वेनाभ्यधात् । धर्मस्य फलंसुखं अधर्मस्य फलंदुःखं धर्माधर्मफलभूतैर्द्वन्द्वैःपरस्परविरुद्धैःसुखदुःखादिभिरिमाःप्रजाःयोजितवान् । आदिग्रहणात् कामक्रोधरागद्वेषक्षुत्पिपासाशोकमोहादिभिः ॥ २६ ॥

(४) **राघवानन्दः** । सृज्यमानकारणमाह कर्मणामिति । अश्वमेधादिर्धर्मकारणंब्राह्मणवधाद्यधर्मकारणमिति कर्तव्याकर्तव्यार्थंव्यवेचयत् विवेकेनोक्तवान् । द्वन्द्वैःसुखदुःखाद्यैः ॥ २६ ॥

(५) **नन्दनः** । इदंकार्यमिदंवर्ज्यमिति ज्ञानंविवेकः । तदर्थं धर्माधर्मौ व्यवेचयदसंकीर्णरूपौ कृतवान् । इमाः प्रजाः सुखदुःखादिभिर्द्वन्द्वसृष्टैर्योजितवान् ॥ २६ ॥ २७ ॥

(६) **रामचन्द्रः** । कर्मणामिति । ब्राह्मणादीनांविवेकाय ब्राह्मणस्य इदंकर्म क्षत्रियस्य इदंकर्मेति विवेकाय धर्माधर्मौ व्यवेचयत्व्यचारयत् । च पुनः इमाःप्रजाःद्वन्द्वैःसुखदुःखादिभिःअयोजयत् समयोजयत् ॥ २६ ॥

अण्व्योमात्राविनाशिन्योदशार्धानांतु याःस्मृताः ॥ ताभिःसार्धमिदंसर्वंसंभवत्यनुपूर्वशः ॥ २७॥

(१) **मेधातिथिः** । उपसंहारोऽयम् । दशार्धानांपञ्चानांमहाभूतानां या अण्व्यःसूक्ष्मामात्राअवयवास्तन्मात्रा स्ताविनाशिन्यः परिणामधर्मित्वात् स्थौल्यप्रतिपत्याविनाशिन्यउच्यन्ते ताभिः सार्धमिदंजगत्सर्वंसम्भवत्युत्पद्यते । अनुपूर्वशः क्रमेण । सूक्ष्मात्स्थूलंस्थूलात्स्थूलतरम् । यादृशोवाक्रमउक्तःप्राक् ॥ २७ ॥

(२) **सर्वज्ञनारायणः** । अण्व्यइति । दशार्धानांपञ्चानांभूतानांया अण्व्यःसूक्ष्मामात्राः अवयवाः विनाशिन्यः प्राप्तस्वप्रकृतिलयास्तन्मात्ररूपास्ताभिःसार्धंविश्वंकारणोत्पत्तिक्रमेण संभवति ॥ २७ ॥

(३) **कुल्लूकः** । अण्व्योमात्राइति । दशार्द्धानांपञ्चानांमहाभूतानांयाःसूक्ष्माःपञ्चतन्मात्ररूपाविनाशिन्यः पञ्चमहाभूतरूपतया विपरिणामिन्यः ताभिःसहउक्तंवक्ष्यमाणंचेदंसर्वमुत्पद्यते । अनुपूर्वशःक्रमेण सूक्ष्मात्स्थूलंस्थूलात्स्थूलतरमित्यनेन सर्वशक्तेर्ब्रह्मणोमानससृष्टिः कदाचित्तत्त्वनिरपेक्षास्यादितीमांशङ्कामपनिनीषन्तद्द्वारेणैवेयंसृष्टिरिति मध्ये पुनःपूर्वोक्तंस्मारितवान् ॥ २७ ॥

(४) **राघवानन्दः** । अपएव ससर्जादावित्यत्रोक्ता । अपोऽनुवदन्तासां सर्वोपादानत्वमाह अण्व्यइति । दशार्धानांपञ्चानां अपञ्चीकृतानां आपएवेदमग्रआसुरित्याद्यप्शब्दवाच्यानां जगल्लक्षणकार्यं प्रत्युपादानकारणानां अण्व्यः सूक्ष्मामात्राः मीयन्तेअमूः विनाशिन्यः जनितत्वात् ताभिश्च सार्धंइदंचैतन्यं हिरण्यगर्भादिस्थावरपर्यन्तं अनुपूर्वशःहिरण्यगर्भाण्डादिक्रमेण जगद्बभूवेत्यर्थः । तत्र ताभ्योऽपञ्चीकृतभूतमात्राभ्योऽन्तःकरणचतुष्टयंइन्द्रियदशकंप्राणपञ्चकंच समष्टिव्यष्टिरूपंपुनस्ताभ्यः पञ्चीकृताभ्यः चतुर्दशभुवनानि ब्रह्माण्डं जरायुजाण्डजस्वेदजोद्भिज्जचतुर्विधस्थूलशरीरं भोग्य-

---

(२७) सार्धं=विश्वं (च)

चान्नपानादिकंभवतीति । वेदान्तप्रक्रियातत्रापञ्चीकृतानि परस्पराप्रविष्टानि पञ्चीकृतानि तु पञ्चभूतानि द्दशधाकृतानि स्वेतराविभक्तार्धभागेषु स्वस्वाष्टमांशप्रवेशात् ॥ २७ ॥

(६) **रामचन्द्रः** । अण्व्यइति । दशार्धानां पञ्चतन्मात्राः याःअविनाशिन्यःमात्राःविषयाःताःमात्राःअण्व्यः सूक्ष्माःस्मृताः तु पुनःताभिःसार्द्धंसर्वेइदंविश्वंअनुपूर्वशः क्रमशःसम्भवति उत्पद्यते ॥ २७ ॥

यंतु कर्मणियस्मिन्सन्ययुङ्क्तप्रथमंप्रभुः ॥ सतदेव स्वयंभेजे सृज्यमानः पुनःपुनः ॥ २८ ॥

(१ (**मेधातिथिः** । अस्यायमर्थः । यद्यपि प्रजापतिरीश्वरो भूतसृष्टौ शक्नोति यथेच्छंप्राणिनः स्रष्टुं तथापि न पूर्वकल्पकृतानि कर्माण्यनपेक्ष्य प्राणिनः सृजति येन यादृशंपुराकल्पे कर्म कृतंतत्कर्माक्षिप्तायांजातौतंजनयति प्रजात्यन्तरेशुभेन कर्मणा तत्फलोपभोग्यायांदेवमनुष्यादिजातौ जनयति विपरीतेन तिर्यक्प्रेतादिषु । यथैवभूतेन्द्रियगुणाः कल्पादौ प्रकृतिस्था उद्भवन्ति एवंकर्माण्यपि प्रलये स्वप्रकृतिस्थानि पुनरुद्भवन्ति सर्गादौ । ततः शेषेणेत्येषन्यायस्तत्राप्यस्त्येव । यदि तर्हिकर्मापेक्षोत्पत्तिः क्वप्रजापतेरैश्वर्यमुपयोगि कीदृशंवासापेक्षस्यैश्वर्यं तस्मिन्नसतिजगतउत्पत्तेः। कथमनुपयोगः नतमन्तरेण स्थित्युत्पत्तिप्रलयाः सन्तिनित्यत्वात्तस्यस्वकर्मणि कारणं तदिच्छापि प्रकृतिपरिणामश्च । एतस्याः कारणसामग्र्याइदंजगदुत्पद्यते तिष्ठति प्रलीयतेच । सापेक्षस्याप्यैश्वर्येन विहन्यते यथेह राजादिरीश्वरोभृत्यादीनूफलेनयोजयेदेवमेत्रादिकर्मानुरूपेणैव योजयति नचानीश्वरः । ननुनास्यश्लोकस्यायमर्थः प्रतीयते । किंतर्हिप्रतीयते । विधातुरेव प्राणिनां कर्मविनियोगे स्वातन्त्र्यम् । सयंप्राणिनंप्रथमं सर्गादौयस्मिन्कर्मणि हिंसात्मके तद्विपरीतेवान्ययुङ्क्त सतदेव कर्मभजतेकरोति न पित्रादेरनुशासनमपेक्ष्य स्वेच्छयान्यथाप्रवर्तते । किंतर्हि प्राक्प्रजापतिनियोगवशात्साध्वसाधुवात्वयमन्यानुशासननिरपेक्षोऽनुतिष्ठति । सृज्यमानः पुनर्जायमानः कल्पान्तरेऽस्मिन्नेव वा कल्पे प्रजापतिरेव क्षेत्रज्ञांस्तत्कर्तृत्वेननियुङ्क्ते। अतस्तन्नियोगमेवानुवर्तमानाः प्राचीनंशुभमशुभंवाकर्मकुर्वन्ति। तदुक्तम् । कर्तृत्वंप्रतिपद्यन्तेअनीशाःस्वेषु कर्मसु। महेश्वरेण प्रेर्यन्तेशुभेवायदिवाशुभइति । अज्ञोजन्तुरनीशोऽयमात्मनः सुखदुःखयोः । ईश्वरप्रेरितोगच्छेत्स्वर्गंवाश्वभ्रमेववा । उच्यते । एवंसति कर्मफलसंबन्धस्त्यक्तः स्यात् पुरुषकारानर्थक्यंच स्यादग्निहोत्रादिकर्माद्युपदेशो ब्रह्मोपासनाश्च व्यर्थाःप्रसज्येरन् । यएवेश्वरस्वरूपाऽनभिज्ञास्तएव दृष्टादृष्टार्थेषु कर्मसु प्रवर्तेरन् । ये तु तदधीनंकर्तृत्वंभोक्तृत्वंच मन्यन्ते तेषांसर्वत्राप्रवृत्तिप्रसङ्गः । कृतमपि न तत्कर्म फलति अकर्तारोऽपि भोक्ष्यामहइतिमन्यमानाउदासीरन् नच व्याधिरिवापथ्याद्विदुषांबलादिच्छोपजायते कर्तृत्वईश्वरप्रेरणया । अथ कर्मफलतृष्णा तदिच्छा निश्चिता अस्मात्कर्मणइदंकर्तृफलंभवतीति । नतर्हि यंतुकर्मणीत्येतदपिशास्त्रादेव नियोगः प्रतिपत्तव्यः । तस्माद्यंपुरुषंसप्रभुः प्रथमंन्ययुङ्क्तानादौ संसारे प्रथमंवर्तमानपेक्ष्यंनियोक्तृत्वंचास्यसर्वभावेषुदिक्कालनिमित्तकारणत्वात् । अन्ये तु व्याचक्षते । जात्यन्तरापन्नस्यात्मनोनपूर्वजातिसंस्कारापेक्षा अतः स्वभावानुवृत्तिः यंजातिविशेषं यस्मिन्कर्मणि नियुक्तवान् परवधादौ स सिंहादिजातीयआत्मासंपन्नोमनुष्यत्वेमार्दवमभ्यस्तमपि हित्वा जातिधर्मंप्रतिपद्यते । अन्येनानुपदिष्टमपि स्वाभाव्यात्प्रजापतिकृतत्वात्कर्माणिबलवन्तिप्रागभ्यासंजात्यन्तरगतस्यविस्मारयन्तीतिप्रदर्शितंभवति । एतदेवविस्तारयति ॥ २८॥

(२) **सर्वज्ञनारायणः** । अणूनांनित्यत्वपक्षंनिरस्यति यंत्विति । यंयज्जातीयं यत्रकर्मण्यन्नभक्षणाद्यशनादिरूपेकर्मणि न्ययुङ्क्त सतज्जातीयस्तदेव तज्जातीयं कर्म स्वयंतेनाप्रेरितोभेजे ॥ २८ ॥

---

(२८) यंतु=यत्तु (ग, च.)

(३) **कुल्लूकः** । यंतुकर्मणीति । सप्रजापतिर्यंजातिविशेषंव्याघ्रादिकंयस्यांक्रियायांहरिणमारणादिकायांसृष्ट्यादौ नियुक्तवान् सजातिविशेषःपुनःपुनरपि सृज्यमानः स्वकर्मवशेन तदेवाचरितवान् । एतेन प्राणिकर्मसापेक्षंप्रजापतेरुत्त-माधमजातिनिर्माणंन रागद्वेषाधीनमिति दर्शितम् । अतएव वक्ष्यति यथा कर्मतपोयोगात्सृष्टंस्थावरजङ्गममिति ॥ २८ ॥

(४) **राघवानन्दः** । कर्मपूर्वप्रज्ञयोर्हेतुतामाश्रित्याह यमिति । यंब्राह्मणादिं यस्मिन्याजनादौ तथा यंव्याघ्रादिं यस्मिन्हिंसादौ प्रथमंन्ययुङ्क्त सतदेव कर्म स्वयंभेजे । किंभूतः पुनःपुनःसृज्यमानः ॥ २८ ॥

(५) **नन्दनः** । नकेवलंसुखदुःखादिभिर्द्वन्द्वैः प्रजाब्रह्मा योजितवान्किंतु तद्धेतुभूतैः कर्मभिरपीत्याह यंतु क-र्मणीति । प्रभुरीश्वरः प्रथमंगर्भनिषेककाले यंदेहिनं यस्मिनकर्मण्ययुङ्क्तअयोजयतसदेही तदेवेश्वरनियुक्तमेव कर्म स्वयंअनन्यापेक्षयाभेजेन केवलमेकस्मिन्नेवजन्मनीश्वरनियुक्तंकर्म देही भजतेऽपितु सर्वस्मिन्नपि जन्मनि तस्मिन्नि-षेककाले नियुक्तंभजतइत्युक्तं सृज्यमानः पुनः पुनरिति ॥ २८ ॥

(६) **रामचन्द्रः** । यमिति । सप्रभुःसमर्थःयस्मिन्कर्मणि यंपुरुषंप्रथमंप्रथमतः न्ययुङ्क्त संयुक्तमकरोत् पुनःपुनः सृज्यमानःसन्सःजातिविशेषस्तदेव कर्म जन्मान्तरकर्म स्वयंभेजेभजतीत्यर्थइतिसिद्धम् ॥ २८ ॥

हिंस्राहिंस्रे मृदुक्रूरे धर्माधर्मावृतानृते ॥ यद्यस्य सोऽदधात्सर्गे तत्तस्य स्वयमाविशत् ॥ २९ ॥

(१) **मेधातिथिः** । हिंस्रंपरप्राणवियोगकरंसर्पसिंहहस्त्यादि । तद्विपरीतमहिंस्रंरुरुपृषतादि । मृदुपेशलमनायासम् । क्रूरंकठिनं परदुःखोत्पादनात्मकम् । अन्यत्प्रसिद्धम् । यदेतद्विशःप्रसिद्धंकर्म जाततंततोयस्ययदेवअदधाद्दत्तवानकल्पितवान् सप्रजापतिः सर्गे सृष्ट्यादौ पूर्वकर्मानुरूप्यमवेक्ष्य तत्कर्मसंसृष्टः प्राणी स्वयमाविशत्प्रतिपद्यते । भूतकालता न विवक्षि-ता । आद्यत्वेऽपि जातिधर्मस्यानुपदिष्टस्य स्वयंप्रतिपत्तिदर्शनात् । अत्रदृष्टान्तः ॥ २९ ॥

(२) **सर्वज्ञनारायणः** । नकेवलं तादृशमेवकर्म किंतुधर्माधर्मसाधने अप्येवमित्याह हिंस्राहिंस्रेरिति । हिंस्रं-कर्मव्याघ्रादेः अहिंस्रंशशादेः मृदु दुःखाजनकंक्रूरंदुःखजनकं धर्माधर्मौ धर्माधर्मसाधने कर्मणी आत्मप्रतिकूले ऋतं-सत्यंस्वर्गादिहेतुः अनृतंमिथ्या यद्यस्य सोऽदधात् व्यदधात् कर्तव्यतया सर्गे सर्गादौ तत्तज्जातीयंसतज्जातीयःस्वय-मीश्वरेच्छांविना प्राविशत्प्राप्नोति ॥ २९ ॥

(३) **कुल्लूकः** । एतदेव प्रपञ्चयति हिंस्राहिंस्रेत्यादि । हिंस्रंकर्म सिंहादेःकरिमारणादिकं अहिंस्रंहरिणादेः मृदु दयाप्रधानंविप्रादेः क्रूरंक्षत्रियादेः धर्मोयथा ब्रह्मचार्यादेःगुरुशुश्रूषादिः अधर्मोयथा तस्यैव मांसमैथुनसेवादिः । ऋतंसत्यं-तच्च प्रायेण देवानां अनृतमसत्यंतदपि प्रायेण मनुष्याणां तथा च श्रुतिः सत्यवाचोदेवाअनृतवाचोमनुष्याइति तेषां-मध्ये यत्कर्म सप्रजापतिः सर्गादौ यस्याधारयत्सृष्ट्युत्तरकालमपि सतदेव कर्म प्राक्तनादृष्टवशात्स्वयमेव भेजे ॥ २९ ॥

(४) **राघवानन्दः** । तथाहिंस्रंहिंसनं अहिंस्रंतद्भिन्नंमृदु मार्दवं क्रूरंक्रौर्यं संविद्याकर्मणीसमन्वारभेते पूर्वप्रज्ञाचेति विद्याविहितादिचतुर्विधंज्ञानंपूर्वप्रज्ञा पूर्वानुभूतविषयवासनातंगमनागमनशीलिनंशमाचारभेते स्वफलदाने न समनुगच्छती-ति श्रुतेरर्थः । स्मृतिरपि । प्रकृतिंयान्ति भूतानि निग्रहःकिंकरिष्यतीत्यत्र प्रकृतिः पूर्वप्रज्ञास्तनपानादिसंस्कारः ॥ २९ ॥

(५) **नन्दनः** । एतमेवार्थंविशदयति हिंस्रेति । हिंस्राहिंस्रे मृदु क्रूरेइतिच भावप्रधानोनिर्देशः हिंसाहिंसे मार्दवक्रौर्ये

---

(२९) माविशत्=माविशेत् (ख, ञ, च, ज, झ, ढ, य)

धर्माधर्मावृतानृतेइत्येवमादिषु शुभाशुभेष्वीश्वरोयत्कर्म यस्य देहिनः सर्गे जन्मन्यदधाद्दत्तवांस्तत्तस्देही स्वयमेवाविशत्कृतवान् ॥ २९ ॥

(६) **रामचन्द्रः** । हिंस्रेति जन्मान्तरकर्माह प्राक्तनकर्मत्स्वभावमाह । सब्रह्मा यस्य पुंसःयत्स्वभावंतत्सर्गे जन्मकाले तस्य अदधात् तत्स्वभावःस्वयंहिंस्राहिंस्रेत्याविशत् । तत्र दृष्टान्तमाह ॥२९॥

यथर्तुलिङ्गान्यृतवःस्वयमेवर्तुपर्यये ॥ स्वानि स्वान्यभिपद्यन्ते तथा कर्माणि देहिनः ॥ ३० ॥

(१) **मेधातिथिः** । अचेतनाअपियथाभावास्तन्मर्यादयैव व्यवस्थितस्वभावाःएवंचेतनाअपि पुरुषकृतकर्मसहायेन प्रजापतिना कृतांमर्यादां नातिक्रामन्ति यस्यांजातौजातास्तदेव कुर्वन्ति नान्यदिच्छन्तोऽपि शक्नुवन्ति कर्तुम् । ऋतवोवसन्तादयः स्वलिङ्गानिचिन्हानि पत्रफलकुसुमशीतोष्णवर्षादीनि । पर्यये । यस्यर्तोर्यःपर्यायः स्वकार्यावसरस्तस्मिन् स ऋतुस्तंधर्मंस्वयमेव प्रतिपद्यते नपुरुषप्रयत्नमपेक्षते । चूतमञ्जर्योवसन्तेस्वयमेव पुष्यन्ति न मूले सलिलसेकमपेक्षन्ते । एवं पुरुषकर्माण्यदृष्टानि । नास्तिसपदार्थो योमकर्मापेक्षते । तथाहि वर्षाणांस्वभावोयोवृष्टिप्रदोभवतिच । राजदोषाद्राष्ट्रदोषाद्वा कदाचिदवग्रहः तस्मात्कर्मशक्तिरेवानपसार्या । वृत्तानुरोधादसकृदनुग्रहणम् । अन्ये तु श्लोकत्रयमप्यन्यथा व्याचक्षते । कर्मशक्तीनांस्वभावनियमोऽनेनोच्यतइत्याहुः । यत्फलंयस्मिन्कर्मण्याहितंप्रजापतिना सकर्मविशेषः पुनःपुनः सृज्यमानोऽनुष्ठीयमानः स्वयंतत्फलं भजते ददातीत्यर्थः । तेन यागःकृतोयदा फलिष्यति न तदाकिंचिदपेक्षत इति प्रतिपादितंभवति । सर्वोहिस्वकृतावपि मन्त्रिपुरोहितादिवाक्यमपेक्षते नैवंयागः । दृष्टस्तु व्यापारस्तेनापेक्ष्यते । दृष्टादृष्टकारणद्वयजन्यत्वात्सर्वस्यकार्यस्यादृष्टान्तरापेक्षानिषिध्यतेतदानीम् । कर्माणीष्टानिष्टफलप्रदानि विधिप्रतिषेधविषयाणि कर्माणि द्विशउदाहरति हिंस्राहिंस्रेइति । हिंसाप्रतिषिद्धा । तस्यानरकादिफलप्रदानंनियमितम् । योब्राह्मणायावगुरेत् योमामकायावगुरेत्तंशतेनयातयादितिवाक्यशेषेभ्यःसा ततः स्वभावान्न च्यवते। प्रायश्चित्तेषु विशेषंवक्ष्यामः। अहिंसाविहितम् । तस्यापिनैष्टफलदानात्स्वभावच्युतिरस्ति । धर्माधर्मयोरेव विशेषायते । विहितंकर्म धर्मः प्रतिषिद्धमधर्मस्तयोर्विशेषाः सत्याऽनृतादयः सत्यंविहितमनृतंप्रतिषिद्धम् । एवंसर्वाणि पूर्वोत्तरपदानि विहितप्रतिषिद्धविशेषप्रदर्शनानि। अव्यभिचरितदृष्टकार्यकारणसंबन्धीनि कर्माणि । दृष्टान्तःयथर्तुलिङ्गानीति । शेषंसमानम् ॥ ३० ॥

(२) **सर्वज्ञनारायणः** । यथर्त्विति । ऋतुलिङ्गानि चूतकुसुमादीनि ऋतोः पूर्वर्तोःपर्ययेऽपगमे स्वयमनादिष्टा एव कर्माणि हिंस्रादीनि ॥ ३० ॥

(३) **कुल्लूकः** । अत्र दृष्टान्तमाह यथर्त्विति । यथा वसन्तादिऋतवऋतुचिन्हानि चूतमञ्जर्यादीनि ऋतुपर्यये स्वकार्यावसरे स्वयमेवाप्नुवन्ति तथदेहिनोऽपि हिंस्रादीनि कर्माणि ॥ ३० ॥

(४) **राघवानन्दः** । तेषामावश्यकफलारम्भकत्वे दृष्टान्तोयथेति । यथर्तुंवसन्ताद्यृतुमनतिक्रम्य लिङ्गानिऋतुलिङ्गानि वासन्तशारदीयानि फलपुष्पाणिऋतवःवसन्तादयः ऋतुपर्ययेअग्रिमवसन्तादावपि यथा प्रपद्यन्ते तथा स्वस्वकर्माणि देहिनः सृष्ट्यन्तरे प्रपद्यन्तइत्यन्वयः ॥ ३० ॥

(५) **नन्दनः** । तमेवार्थंदृष्टान्तेनस्थापयति यथर्त्विति । ऋतुलिङ्गानि सहकारमल्लिकाकदम्बकुसुमादीनि स्वानि स्वानि कर्माणि स्वस्य स्वस्येश्वरेण विहितानि ॥ ३० ॥

(६) **रामचन्द्रः** । यथेति । ऋतवः पर्यये ऋतूनांपर्यये ऋत्वन्तेयथा अन्यर्तुलिङ्गानि स्वयमेवभवन्तिकेश्चिदनोद्यमानत्वात् तथा देहिनःप्राणिनः कर्माणि प्राक्तनानि स्वानि स्वानिअभिपद्यन्ते प्रपद्यन्ते ॥ ३० ॥

लोकानांतु विवृद्ध्यर्थंमुखबाहूरुपादतः ॥ ब्राह्मणंक्षत्रियंवैश्यंशूद्रंच निरवर्तयत् ॥ ३१ ॥

(१) **मेधातिथिः**। पृथिव्यादीनांलोकानांविवृद्ध्यर्थं वृद्धिः पुष्टिर्बाहुल्यंवाब्राह्मणादिषु चतुर्षुवर्णेषु सत्सु त्रयाणांलोकानांवृद्धिः। इतः प्रदानंदेवाउपजीवन्ति। चेतनायागाद्यधिकृताअतस्तैः कर्म कृतमुभौ लोकौ वर्धयति । पुरुषकर्मप्रचोदितादेवाः । आदित्याज्जायते वृष्टिरिति अस्यापि लोकस्य सृष्टिर्वृद्धिः ब्राह्मणादीन्वर्णान्निरवर्तयन्निर्वर्तितवान्। असृजन्मुखबाहूरुपादतः। यथाक्रमं मुखाद्ब्राह्मणं स्वमुखावयवेभ्योदैव्या शक्त्या निर्मितवान् अद्यतनानांसर्वेषांमिथुनसंप्रयोगद्वारेण तत्त्वेभ्यउत्पत्तिदर्शनात्। परमार्थतः स्तुतिरेषावर्णानामुत्कर्षापकर्षप्रदर्शनार्थम्। सर्वेषांभूतानांप्रजापतिःश्रेष्ठस्तस्यापि सर्वेषामङ्गानांमुखंब्राह्मणोऽपि सर्वेषांवर्णानां प्रशस्यतमः। एतेन सामान्येन ब्रह्ममुखादुत्पन्नइत्युच्यतेमुखकर्माध्यापनाद्यतिशयाद्वा मुखतइत्युच्यते। क्षत्रियस्यापि बाहुकर्मयुद्धंवैश्यस्याप्यूरुकर्मपशुरूपं रक्षतोगोभिश्चरन्तिभिर्भ्रमणंस्थलपथवारिपथादिषु वाणिज्यायैगमनम्। शूद्रस्य पादकर्मशुश्रूषा ॥ ३१ ॥

(२) **सर्वज्ञनारायणः** । लोकानामिति। मुखादिना मुखेन होमादिना ब्राह्मणं क्षत्रेण रक्षयेदित्यादिक्रियाभिस्तैस्तैर्वर्णैर्लोकरक्षणसंवर्तनार्थम् ॥ ३१ ॥

(३) **कुल्लूकः** । लोकानांन्विति । भूलोकानांबाहुल्यार्थंमुखबाहूरुपादेभ्योब्राह्मणक्षत्रियवैश्यशूद्रान्यथाक्रमंनिर्मितवान्। ब्राह्मणादिभिःसायंप्रातरग्नावाहुतिःप्रक्षिप्ता सूर्यमुपतिष्ठते सूर्याद्वृष्टिर्वृष्टेरन्नमन्नात्प्रजाबाहुल्यं। वक्ष्यंति च अग्नौप्रास्ताहुतिःसम्यगादित्यमित्यादि । दैव्या च शक्त्या अर्थादित्यो(१)ब्राह्मणादिनिर्माणम् । ब्राह्मणोन विशङ्कनीयः श्रुतिसिद्धत्वात्। तथा च श्रुतिः ब्राह्मणोऽस्य मुखमासीदित्यादि ॥ ३१ ॥

(४) **राघवानन्दः** । वेदादिष्वधिकारार्थंवर्णानांजनिस्थानकृतश्रैष्ठ्यान्याह लोकानांत्विति। विवृद्ध्यर्थंस्वधर्मानुष्ठानेन विविधप्रकारवृद्ध्यर्थं निरवर्तयत् मुखादिभ्योविप्रादिचतुष्टयंजनितवान् ॥ ३१ ॥

(५) **नन्दनः** । अथचातुर्वर्ण्याभिमानिनांदेवतानांसृष्टिमाह लोकानामिति । लोकानांप्रजानांविवृद्ध्यर्थंबाहुल्यार्थंनिरवर्तयत् सृष्टवान्। प्रभुरित्यनुवर्तते ॥ ३१ ॥

(६) **रामचन्द्रः** । मुखबाहुरुपादतःलोकानांविवृध्यर्थंब्राह्मणादीन्वर्णान्निरवर्तयत्प्रावर्तयत् ॥ ३१ ॥

द्विधा कृत्वाऽऽत्मनोदेहमर्धेन पुरुषोऽभवत् ॥ अर्धेन नारी तस्यांसविराजमसृजत्प्रभुः ॥ ३२ ॥

(१) **मेधातिथिः**। एषासृष्टिः साक्षात्परस्य पुरुषस्य। इयंतुब्रह्मणस्तस्यैवेत्यन्ये। यत्तदन्तरण्डंसमुद्भूतंशरीरंतद्द्विधाकृत्वाऽर्धेन पुरुषोऽभवत् पुमान्संपन्नः शुक्रसेकसमर्थोऽर्धेन नारीगौरीश्वरभङ्ग्याऽथवा पृथगेवतांनिर्मितवान्। तांनिर्माय तस्यांमैथुनेन धर्मेण विराडितियस्यनाम प्रसिद्धंतंजनितवान्। एतदुच्यतेप्रजापतिःस्वांदुहितरमगच्छत्। इदमपि जायापत्योः शरीरमात्रभेदात् सर्वत्रकार्येष्वविभागात् तदालम्बनंद्वैधंकारवचनम् ॥ ३२ ॥

(२) **सर्वज्ञनारायणः**। द्विधेति। एतच्च प्रजानांमनसा सृष्टिमसृजत्। स्वदेहंद्विधा कृत्वा तदर्धेन पुमान्संपन्नः। अपरार्धेन नारी लोकसृष्टिमुपदेष्टुम् ॥ ३२ ॥

(३) **कुल्लूकः**। द्विधाकृत्वेति। सब्रह्मा निजदेहं द्विखण्डंकृत्वा अर्द्धेन स्त्री तस्यांमैथुनधर्मेणविराट्संज्ञंपुरुषंनिर्मितवान्। श्रुतिश्च ततोविराडजायतेति ॥ ३२ ॥

---

(१) अथादित्यो=मुखादिभ्यो (अ)

(४) **राघवानन्दः** । संप्रति मन्वादिद्वारामैथुनजांसृष्टिमाह द्विधेति नवभिः । आत्मनोदेहंद्विधा कृत्वा स्थितादस्माद्ब्रह्मणः पूर्वार्धावच्छिन्नोजगत्सृष्टिभावितान्तःकरणोजीवोमन्वाख्यः पुरुषोभवत् तादृशजीवान्तरमुत्तरार्धावच्छिन्नं शतरूपाख्या नारी बभूव तस्यांभोग्यत्वेनोपस्थितायां तद्भोक्तृत्वेनतंमन्वाख्यं विराजमयूयुजत्ससृजे विविधराजमानत्वात् विराजमिति ससृजे मनुंदेवं प्रजापतिरिति वार्तिकोक्तेः । अतःश्रुतिः । सवै नैव रमेनत्तस्मादेकाकी नरमते सद्वितीयमैच्छत् सहैतावानास यथा स्त्रीपुमांसौ संपरिष्वक्तौ सइममेवात्मानंद्वेधा यातयत्ततः पतिश्च पत्नी चाभवताम् । अतएव भागवतमपि । तस्य कायमभूद्द्वेधा यत्कायमभिचक्षते । ताभ्यांरूपविभागाभ्यांमिथुनसमपद्यत । यस्तु तत्र पुमान्सोभून्मनुःस्वायंभुवःस्वराट् । स्त्री चासीच्छतरूपाख्या महिष्यस्य महात्मनः । ततोमैथुनधर्मेण प्रजाएधांबभूविरइति ॥ ३२ ॥

(५) **नन्दनः** । अथसर्व भूतानांसृष्टिंवक्तुमुपक्रमते द्विधाकृत्वेति ॥ ३२ ॥

(६) **रामचन्द्रः** । द्विधेति । प्रभुः ब्रह्मात्मनःस्वंस्वंदेहंद्विधाकृत्वा अर्द्धेन दक्षिणाङ्गेन च पुरुषःअभवत् अर्द्धेन वामाङ्गेन नारी स्त्रीअभवत् तस्यांनार्यांस पुरुषःविराजंविराट् पुरुषं स्वायंभुवसंज्ञंमनुमसृजत् उदपादयत् ॥ ३२ ॥

तपस्तप्त्वा ऽसृजद्यंतु सस्वयंपुरुषोविराट् ॥ तंमांवित्तास्य सर्वस्य स्रष्टारंद्विजसत्तमाः ॥ ३३ ॥

(१) **मेधातिथिः** । सविराट्तपस्तप्त्वायंपुरुषमसृजत तंमांवित्त जानीध्वम् । एवंस्मृतिपरंपरया नात्रवः किञ्चिदविदितंमम वर्णयितव्यमस्ति । तन्मध्येशुद्धिमात्मनआचष्टे । अस्य सर्वस्य स्रष्टारमनेन सर्वशक्तिमाह । जन्मकर्मातिशयवन्तंमां मत्यपि तरीकरिष्यतीत्यभिप्रायः निश्चयोत्पत्त्यर्थंचान्यतोऽवगतेऽपि मनुजन्मनि स्वयमभिधानात् । यथाऽन्यतः श्रुतोऽपि कश्चित्पृच्छ्यते देवदत्तस्यत्वं पुत्रइति बाढमिति तेनोक्ते निश्चयउपजायते । अभिजनवर्णनंकवीनामत्रपाकरं सत्यामपि पारंपर्येणामस्तुतौ । द्विजसत्तमाइत्यामन्त्रणम् । सत्तमाः साधुतमाः श्रेष्ठाइति यावत् ॥ ३३ ॥

(२) **सर्वज्ञनारायणः** । तपस्तप्त्वेति । स्वयमसृजदित्यन्वयः । पुरुषःपुरुषशब्देन श्रुतौप्रसिद्धः तंमांजानीत अस्य सकलस्य परंपरया च स्रष्टारम् ॥ ३३ ॥

(३) **कुल्लूकः** । तपस्तप्त्वेति । सविराट्तपोविधाय यंनिर्मितवान्तंमांमनुंजानीत । अस्य सर्वस्य जगतःस्रष्टारंभोद्विजसत्तमाः । एतेन स्वजन्मोत्कर्षसामर्थ्यातिशयावभिहितवान् लोकानांप्रत्ययितप्रत्ययार्थम् ॥ ३३ ॥

(४) **राघवानन्दः** । एतद्व्यनक्ति तपइति । यंमनुंतमेव मांवित्तजानीत स्रष्टारंतेषांमरीच्यादीनांस्रष्टृदेहावच्छिन्नानां द्विजसत्तमाद्विजश्रेष्ठाः ॥ ३३ ॥

(५) **नन्दनः** । न ब्रह्माणमपेक्षितवानित्युक्तंस्वयमिति स्त्रियमपेक्षितवानित्युक्तम् पुरुषइति ॥३३॥ ॥३४॥ ॥३५॥

(६) **रामचन्द्रः** । तपइति । स पुरुषःविराट्तपस्तप्त्वायंपुरुषमसृजत् हे द्विजसत्तमाः तंमांसंवित्तजानीत । कीदृशंमांअस्य विश्वस्य स्रष्टारम् ॥ ३३ ॥

अहंप्रजाःसिसृक्षुस्तु तपस्तप्त्वा सुदुश्चरम् ॥ पतीन्प्रजानामसृजंमहर्षीनादितोदश ॥ ३४ ॥

(१) **मेधातिथिः** । अहमसृजमुत्पादितवान् । दशप्रजापतीन्महर्षीन् । आदितःसुदुश्चरंतपःकृत्वा सुष्ठु दुःखेन तपश्चर्यंतेऽतिपीडाकरंबहुकालं च । तान्महर्षीन्नामतोनिर्दिशति ॥ ३४ ॥ ३५ ॥

(२) **सर्वज्ञनारायणः** । अहमिति । प्रजाःसिसृक्षुर्मरीच्यादिद्वारा आदितःसर्गादौ ॥ ३४ ॥

(३) **कुल्लूकः** । अहमिति । अहंप्रजाः स्रष्टुमिच्छन् सुदुश्चरंतपस्तप्त्वा दशप्रजापतीन् प्रथमंसृष्टवान् तैरपि प्रजानांसृज्यमानत्वात् ॥ ३४ ॥

(४) **राघवानन्दः** । अहमपि तथा चक्रेइत्याह अहमिति । महर्षीन् प्रजानांपतीन्दशासृजमित्यन्वयः । आदितः आदौ ॥ ३४ ॥

(६) **रामचन्द्रः** । अहमिति प्रजाःसिसृक्षुः अहंप्रजानांपतीन्महर्षीन् आदितःप्रथमतः दशअसृजंसृष्टवान् । मरीच्यादीन्देवनिकायान् देवसमूहान् ॥ ३४ ॥

मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम् ॥ प्रचेतसं वसिष्ठंच भृगुं नारदमेव च ॥ ३५ ॥

(२) **सर्वज्ञनारायणः** । मरीचिमिति दशेत्यस्य प्रपञ्चः ॥ ३५ ॥

(३) **कुल्लूकः** । मरीचिमित्यादि । तएते दश प्रजापतयोनामतोनिर्दिष्टाः ॥ ३५ ॥

(४) **राघवानन्दः** । नामतस्तानेवाह मरीचिमिति । प्राचेतसंदक्षम् ॥ ३५ ॥

एतेमनूंस्तु सप्तान्यानसृजन्भूरितेजसः ॥ देवान्देवनिकायांश्चमहर्षींश्चामितौजसः ॥३६॥

(१) **मेधातिथिः** । एते महर्षयः सप्तान्यान्मनूनसृजन् । अधिकारशब्दोऽयं मनुरिति । मन्वन्तरे यस्य प्रजासर्गे तत्स्थितौ वाऽधिकारउक्तेन प्रकारेण समनुरित्युच्यते । भूरितेजस् अमितौजसइतिचैकएवार्थः । एकंप्रथमान्तंस्रष्टृविशेषणम् । द्वितीयान्तंस्रष्टव्यानांमन्वादीनां विशेषणम् । ननु देवाब्रह्मणैव सृष्टाः । सत्यं नसर्वे अपरिमिताहिदेवसंघाताः । देवनिकायाहिदेवस्थानानि स्वर्गलोकब्रह्मलोकादीनि ॥ ३६ ॥

(२) **सर्वज्ञनारायणः** । एतइति । प्रजापतिःसर्गद्वारा परंपरया सप्तान्यान्प्रजापतीन् मनून्मनुनाम्नोऽसृजन् । सावर्णिमनुनाष्टमेन सह स्वायंभुवादन्ये स्वारोचिषादयः सप्तेत्यष्टमव्यवच्छेदार्थम् । तेनाऽन्येपि षण्मनवउपलक्ष्यन्ते । देवानिति । देवान् वस्वादीन् तेषांनिकायान् विमानानीति केचित् नितरांकायोयेषु तानि देवनिकायानि संघचारीणि विश्वादीनीत्यन्ये ॥ ३६ ॥

(३) **कुल्लूकः** । एते मनूंस्त्विति । एतेमरीच्यादयोदश भूरितेजसोबहुतेजसोऽन्यान् सप्तापरिमिततेजस्कान् मनून्देवान् ब्रह्मणासृष्टान् देवनिवासस्थानानि स्वर्गादीन्महर्षींश्च सृष्टवन्तः । मनुशब्दोऽयमधिकारवाची । चतुर्दशसु मन्वन्तरेषु यस्य यत्र सर्गाद्यधिकारः सएतस्मिन्मन्वन्तरे स्वायंभुवस्वारोचिषादिनामभिर्मनुरिति व्यपदिश्यते ॥ ३६ ॥

(४) **राघवानन्दः** । तेषामपि कृत्यमाह एतइति । एते मरीच्यादयो मनून्मन्वन्तराधिपान् सावर्णिप्रभृतीन्भूरितेजसः भूरीणि एकसप्ततियुगपरिमितः कालस्तत्रत्यादेवतास्तदिन्द्रोमनुपुत्राऋषयः ईश्वरावतारश्चएते षट्तेजांसि मन्वन्तरपालने सहकारीणि येषांते तथेति कर्मणोविशेषणम् । देवनिकायान् देवस्थलानि देवभृत्यान्वामहर्षीन् वामदेवादीन् ॥ ३६ ॥

(५) **नन्दनः** । ब्राह्मणश्च ब्राह्मणी च क्षत्रियश्च क्षत्रिया च वैश्यश्च वैश्या च शूद्रश्च शूद्राचे त्यष्टौ शास्त्रेषु मानवा उच्यन्ते । एतेषुब्राह्मणामनुत्वेन मरीच्यादयोमनुनैव हि सृष्टा असृष्टा ब्राह्मणीप्रभृतयः सप्त शिष्यानेतानसृजुः देवान् इन्द्रा दीन् देवनिकायान् मरुद्गणादीन् ॥ ३६ ॥

यक्षरक्षःपिशाचांश्च गन्धर्वाप्सरसोऽसुरान् ॥ नागान्सर्पान्सुपर्णांश्च पितॄणांच पृथग्गणान् ॥३७॥

(१) **मेधातिथिः** । यक्षादीनांस्वरूपभेदश्चेतिहासादिप्रमाणकएव नप्रत्यक्षादीनामन्यतमेन परिच्छिद्यते । तत्रवैश्रवणानुचरायक्षाः । रक्षांसिबिभीषणादयः । तेभ्यः क्रूरतराःपिशाचाः अशुचिमरुदेशादिवासिनोनिकृष्टायक्षराक्षसेभ्यः हिंस्रास्तुसर्वएव । छद्मकरणेन केनचित्प्राणिनांजीवमाकर्षन्त्यदृष्टया शक्त्या व्याधींश्चजनयन्तीत्यैतिह्यासिकामन्त्रवादिन

श्च गन्धर्वादेवानुचरागीतनृत्तप्रधानाः। अप्सरसोदेवगणिका उर्वश्याद्याः। असुरादेवशत्रवो वृत्रविरोचनहिरण्याक्षप्रभृतयः। नागावासुकितक्षकादयः। सर्पाः प्रसिद्धाः। सुपर्णाः पक्षिविशेषागरुत्मत्प्रभृतयः। पितरः सोमपाज्यपादिनामानः स्वस्थाने देववद्वर्तन्ते तेषांगणमसृजन्॥ ३७॥

(२) **सर्वज्ञनारायणः**। यक्षामणिभद्रादयः। रक्षांसिदैत्यजातिविशेषाः क्रव्यादाः। पिशाचाःपिशुनचेतसोदैत्यजातिभेदा अक्रव्यादादेवसत्वाः। नागानाभेरूर्ध्वंनराकाराः अधःसर्पाकृतयः। सर्पास्तदन्ये फणिधराः। सुपर्णाःगरुडादयःपक्षिभेदाः। पितॄणांगणानग्निष्वात्तादीन्॥ ३७॥

(३) **कुल्लूकः**। यक्षरक्षइति। एतेऽसृजन्निति पूर्वस्यैवात्रानुषङ्गः उत्तरत्र च श्लोकद्वये च। यक्षोवैश्रवणस्तदनुचराश्च रक्षांसि रावणादीनि पिशाचास्तेभ्योऽपकृष्टाः अशुचिमरुदेशनिवासिनः गन्धर्वाश्चित्ररथादयः अप्सरसउर्वश्यादयः असुराविरोचनादयः नागावासुक्यादयः सर्पास्ततोपकृष्टाः अलगर्दादयः सुपर्णागरुडादयः पितॄणामाज्यपादीनांगणःसमूहः। एषांच भेदइतिहासादिप्रसिद्धोनाध्यक्षादिगोचरः॥ ३७॥

(४) **राघवानन्दः**। यक्षेति। यक्षावैश्रवणादयः। रक्षांसि रावणादयः। पिशाचाःपूतिनरमांसाशिनः। गन्धर्वाश्चित्ररथादयः। अप्सरसः उर्वशीप्रभृतयः। असुराः हिरण्याक्षादयस्तान्। नागान्देवाकृतिसफणान् अनन्तादीन्। सुपर्णान्गरुडादीन्। पितॄणांपृथग्गणानग्निष्वात्तादीन्॥ ३७॥

(५) **नन्दनः**। नागाःसौरसेयाः सर्पाः काद्रवेयाः। तदुक्तंमहाभारते सुरसाजनयन्नागानकद्रूराजंस्तुपन्नगानिति॥ ३७॥

विद्युतोऽशनिमेघांश्च रोहितेन्द्रधनूंषि च॥ उल्कानिर्घातकेतूंश्च ज्योतींष्युच्चावचानि च॥ ३८॥

(१) **मेधातिथिः**। मेघोदरदृश्यंप्रभास्वज्योतिर्विद्युदुच्यते। यस्यास्तडित्सौदामिनीत्यादयः पर्यायाविशेषाश्रयाः। अशनिःशिलाभूताहिमकणिका सूक्ष्मदृश्यश्च वर्षधारादिवत्पतन्त्योवेगवद्वातप्रेरिताःसस्यादिविनाशिन्यउच्यन्ते। मेघाअभ्रोदकमरुज्ज्योतिःसंघाता आन्तरिक्षाः। रोहितंदण्डकारमन्तरिक्षे नीललोहितरूपंकदाचिद्दृश्यते। आदित्यमण्डललग्नंकदाचित्। कदाचित्प्रदेशान्तरेपि। तस्यैवविशेष इन्द्रधनुःवक्रत्वंधनुराकारताऽधिकास्य। उल्कासंध्याप्रदोषादौविसारिप्रभाण्युत्पातेदिक्षु पतन्ति यानि ज्योतींषि दृश्यन्ते। निर्घातःभूम्यन्तरिक्षउत्पातशब्दः। केतवउत्पातेदृश्यमानानि शिखावन्तिज्योतींषि। प्रसिद्धान्यन्यान्यपिध्रुवागस्त्यारुन्धतीप्रभृतीनि नानाप्रकाराणि॥ ३८॥

(२) **सर्वज्ञनारायणः**। विद्युतोविद्युदधिष्ठात्रींदेवताम्। एवमुत्तरेषु। रोहितमृज्विन्द्रधनुः। निर्घातोव्योममद्गुरः। ज्योतींषिनक्षत्रादीनि। उच्चावचानि नानाभेदानि॥ ३८॥

(३) **कुल्लूकः**। विद्युतइति। मेघेषु दृश्यंदीर्घाकारं ज्योतिर्विद्युत् मेघादेव यज्ज्योतिर्वृक्षादिविनाशकंतदशनिः मेघाःप्रसिद्धाःरोहितंदण्डाकारंनानावर्णंदिवि दृश्यते यज्ज्योतिस्तदेव वक्रमिन्द्रधनुः। उल्कारेखाकारमन्तरिक्षात्पतज्ज्योतिः। निर्घातोभूम्यन्तरिक्षगतउत्पातध्वनिः। केतवःशिखावन्तिज्योतींषि उत्पातरूपाणि अन्यानि ज्योतींषि ध्रुवागस्त्यादीनि नानाप्रकाराणि॥ ३८॥

---

(१) र्दी=र्घा (आ)

(४) **राघवानन्दः** । किंच विद्युतइति । रोहितंनानाकारदण्डायमानं तदेवेन्द्रधनुः। निर्घातोन्तरिक्षजउत्पातध्वनिः केतवः शिखावन्ति ज्योतींषि । उच्चावचानि ग्रहनक्षत्रताराः ॥ ३८ ॥

(५) **नन्दनः** । ऋजुदीर्घमिन्द्रायुधं रोहितमिन्द्रायुधंशक्रधनुस्तदेवर्जुरोहितं इत्यमरसिंहेनाभिहितम् । निर्घातः पवनाहतस्य वायोर्वेगोभूगतः । तथा च संहितायामुक्तम् पवनः पवनाभिहतो गगनादवनौयदासमापतति भवतितदा-निर्घातइति । केतवः सपुच्छनक्षत्राणि । ज्योतींषिनक्षत्राणि ॥ ३८ ॥

किंनरान्वानरान्मत्स्यान्विविधांश्चविहङ्गमान् ॥ पशून्मृगान्मनुष्यांश्च व्यालांश्चोभयतोदतः॥३९॥

(१) **मेधातिथिः** । अश्वमुखाः प्राणिनोहिमवदादिपर्वतेषु भवन्तितेकिंनराः । वानरा मर्कटमुखापुरुषविग्रहाः। विहङ्गमाः पक्षिणः । अजाविकोष्ट्रगर्दभादयः पशवः । मृगारुरुपृषतादयः । व्यालाः सिंहव्याघ्रादयः । द्वेदन्तपङ्क्तीउत्तराधरे येषांभवतस्तेउभयतोदतः ॥ ३९ ॥

(२) **सर्वज्ञनारायणः** । किंनरानिति । किंनरानराश्वमूर्तिमिश्रदेहाः। पशूनग्राम्यारण्यान् । मृगानारण्यचराण्यरण्यसदः। व्यालान्हिंस्रान्व्याघ्रादीन् । उभयतोदतःउभयोष्ठप्रान्तदंष्ट्रावतः ॥ ३९ ॥

(३) **कुल्लूकः** । किंनरानिति । किन्नराअश्वमुखादेवयोनयोनरविग्रहाः । वानराःप्रसिद्धाः । मत्स्यारोहितादयः । विहङ्गमाःपक्षिणः। पशवोगवाद्याः । मृगाहरिणाद्याः। व्यालाःसिंहाद्याः । उभयतोदतःद्वे दन्तपङ्क्तीयेषांउत्तराधरेभवतः ॥३९॥

(४) **राघवानन्दः** । किंच किन्नरान् अश्वमुखनराकारान् । विहङ्गमान्पक्षिणः । पशून्गवादीन् । मृगान्हरिणादीन् ग्रामारण्यभेदेनवा । व्यालान् सिंहादीन् । उभयतोदतः उभयतोदन्तपङ्क्तिर्येषांअश्वादीनांतानपि ॥ ३९ ॥

(५) **नन्दनः** । आस्याधरोत्तरभागयोर्दन्तायेषांतउभयतोदतोगर्दभादयः ॥ ३९ ॥

कृमिकीटपतङ्गांश्च यूकामक्षिकमत्कुणम् ॥ सर्वं च दंशमशकंस्थावरंच पृथग्विधम् ॥ ४०॥

[यथाकर्म यथाकालं यथाप्रज्ञं यथाश्रुतम् ॥ यथायुगंयथादेशं यथावृत्ति* यथाक्रमम् ॥ १×॥]

(१) **मेधातिथिः** । कृमयोऽत्यन्तसूक्ष्माः प्राणिनः । कीटास्तेभ्यईषत्स्थूलाभूमिचराः । पतङ्गाः शलभादयः । स्थावरंवृक्षपर्वतादिः । पृथग्विधंनानाप्रकारम् । क्षुद्रजन्तवइत्येकवद्भावः ॥ ४० ॥

(२) **सर्वज्ञनारायणः** । कृमीति । कृमयोमलादिसंभवाःक्षुद्रजन्तवः। कीटायोनिजाःपिपीलिकादयः। मत्कुणउद्दंशः। स्थावरंवृक्षादि ॥ ४० ॥

(३) **कुल्लूकः** । कृमिकीटेति । कीटाःकृमिभ्यःकिंचित्स्थूलाः । पतङ्गाःशलभाः । यूकादयःप्रसिद्धाः । क्षुद्रजन्तवइत्यनेनएकवद्भावः । स्थावरंवृक्षलतादिभेदेन विविधप्रकारम् ॥ ४० ॥

(४) **राघवानन्दः** । किंच कृमयः अपादाः। सपादाः कीटाः। पतङ्गाःशलभादयः। मत्कुणाउद्दंशाः । दंशास्तु वनमक्षिकाः । यूकादीनामेकवद्भावः क्षुद्रजन्तुत्वज्ञापनार्थ : असृजन्नित्यन्वयः ॥ ४० ॥

(५) **नन्दनः** । पतङ्गान् शलभान्समृजुरित्यनुवर्तते ॥ ४० ॥

× (क, ख, ञ)

* यथावृत्ति=यथोत्पत्ति (ख)

एवमेतैरिदंसर्वंमन्नियोगान्महात्मभिः ॥ यथाकर्म तपोयोगात्सृष्टंस्थावरजङ्गमम् ॥ ४१ ॥

(१) **मेधातिथिः** । एवमितिप्रक्रान्तप्रकारप्रत्ययपरामर्शः । एतैर्महात्मभिर्मरीच्यादिभिः । इदंसर्वंस्थावरजंगमंसृष्टम् । यथाकर्म यस्यजन्मान्तरे यादृशंकर्म तदपेक्षं । यस्यांजातौ यस्य तु युक्तमुत्पत्तुंकर्मवशात्सतस्यामेवोत्पादितः । मन्नियोगान्मदाज्ञया । तपोयोगान्महत्कृत्वा तपः । यावत्किंचिन्महदैश्वर्यंतत्सर्वंतपसा प्राप्यमित्येतदनेनाह ॥ ४१ ॥

(२) **सर्वज्ञनारायणः** । एवमिति । मन्नियोगात्मज्ज्ञानोपदेशात् आत्मनस्तपोयोगात् यथाकर्मयादृगुत्पाद्यानां कर्म तदनुरूपेण ॥ ४१ ॥

(३) **कुल्लूकः** । एवमेतैरिति । एवमित्युक्तप्रकारेण एतैर्मरीच्यादिभिरिदंसर्वंस्थावरजङ्गमंसृष्टम् । यथाकर्म यस्य जन्तोर्यादृशंकर्म तदनुरूपंतस्य देवमनुष्यतिर्यगादियोनिषूत्पादनंमन्नियोगात्मदाज्ञया तपोयोगान्महत्तपःकृत्वा सर्वमैश्वर्यंतपोऽधीनमिति दर्शितम् ॥ ४१ ॥

(४) **राघवानन्दः** । जङ्गमसृष्टिमुपसंहरन् स्थावरसृष्टिं ब्रुवाणोजरायुजस्वेदजान् प्रतियोगितया भिनत्ति एवमिति दशभिः । स्थावरजङ्गमं जङ्गमवत्स्थावरमपि सृष्टमित्यर्थः । आज्ञागुरूणांह्यवधारणीयेति मानयन्नाह मन्नियोगादिति । मममनोर्नियोगादाज्ञातः । मरीच्यादिमहात्मभिरित्यनेन महतामप्यकार्यकारित्वंयत्स्थावरादिसृष्टिः ॥ ४१ ॥

(५) **नन्दनः** । यथाकर्म सृज्यमानप्राणिकृतकर्मानुरूपम् । तपोयोगाज्ज्ञानयोगेन सृज्यमानदेहिकर्माणि ज्ञानचक्षुषा दृष्ट्वेत्यर्थः ॥ ४१ ॥

(६) **रामचन्द्रः** । एवमिति । एवंमन्नियोगात् एतैर्ऋषिभिर्मरीच्यादिभिः तपोयोगात् स्थावरजङ्गमंसृष्टं यथाक्रमंपूर्वसृष्ट्यादिक्रमेण ॥ ४१ ॥

येषांतु यादृशंकर्म भूतानामिहकीर्तितम् ॥ तत्तथा वोऽभिधास्यामि क्रमयोगंच जन्मनि ॥ ४२ ॥

(१) **मेधातिथिः** । येषांभूतानांयादृशंकर्म स्वभावतोर्हिंस्रमहिंस्रंवा तद्वत्तथैवकीर्तितम् । इदानींजन्मक्रमयोगमभिधास्यामि । क्व पुनः कर्म कीर्तितं यत्रेदंयक्षरक्षइत्यादि नामनिर्देशो न कर्मनिर्देशः । उच्यते नामनिर्देशादेव कर्मावगतिः कर्मनिमित्तत्वादेषांनामप्रतिलम्भस्य । तथाहि यक्षणाद्रक्षणाद्वा यक्षाः । रहसिक्षणनाद्रक्षांसि । पिशिताशनात्पिशाचाः । अद्भ्यः सृताइत्यप्सरसः । अमृताख्यायाःसुरायाअलाभादसुरा इत्याद्यप्यूह्यम् । जन्मनि क्रमयोगोजरायुजाण्डजाइत्यादिवक्ष्यते ॥ ४२ ॥

(२) **सर्वज्ञनारायणः** । येषांत्विति । यज्जातीयस्य यदध्यापनादि कर्म कीर्तितंविक्षिप्तंतदिहाभिधास्यामि । तथा जन्मनि क्रमयोगंयेन क्रमेण यज्जायते येन च जराय्वादिना युक्तंयज्जायते तच्चाभिधास्यामि ॥ ४२ ॥

(३) **कुल्लूकः** । येषामित्यादि । येषांपुनर्यादृशंकर्म इहसंसारे पूर्वाचार्यैःकथितं यथौषध्यःफलपाकान्ताबहुपुष्पफलोपगाः ब्राह्मणादीनांचाध्ययनादि कर्म तत्तथैव वोयुष्माकंवक्ष्यामि जन्मादिक्रमयोगंच ॥ ४२ ॥

(४) **राघवानन्दः** । येषांप्राणिनांजन्मनिमित्तंयादृशंकर्म स्थावराणांकायिकंनिषिद्धाचरणं पश्वादीनांवाचनिकंदेवादीनांकायादिजंपुण्यंमनुष्यादीनांउभयमिति इहमनुना कीर्तितंयत्तदभिधास्यामीत्यन्वयः । क्रमयोगंच ब्राह्मणादिक्रमेण ॥ ४२ ॥

---

(४१) मन्नियोगात्=सन्नियोगात् (क, च) (४२) येषां=तेषां (ख)

(५) **मन्दनः** । अथ वृत्तमर्थंवर्तिष्यमाणं च विवेचयति येषामिति । येषांभूतानांयादृशानांयत्प्रकारंपूर्वकृतंकर्म तेषां-तत्प्रकारंफलमिहसृष्टौभवतीतिवःकीर्तितम् । इदानींजन्मनि क्रमयोगंत्वभिधास्यामि जन्मतारतम्यं च क्रमहेतुकमभि-धास्यामीत्यर्थः । तच्च तारतम्यंपशवइत्यादिनाश्लोकषट्केणवक्ष्यमाणजरायुजाण्डजस्वेदजोद्भिज्जलक्षणमित्यनुसंधातव्यम् ॥ ४२ ॥

(६) **रामचन्द्रः** । येषामिति । येषांभूतानां चतुर्विधानांयादृशंकर्मेहकीर्तितं तथातत्कर्म वः युष्माकं अभिधास्यामि । च पुनः । जन्मनि क्रमयोगंक्रमानुसारेण कथयिष्यामि ॥ ४२ ॥

पशवश्च मृगाश्चैव व्यालाश्चोभयतोदतः ॥ रक्षांसिच पिशाचाश्च मनुष्याश्च जरायुजाः ॥ ४३ ॥

(१) **मेधातिथिः** । एते जरायुजाःजरायुरुल्बंगर्भशय्या तत्रप्रथमंतेसंभवन्ति ततोमुक्ताजायन्ते । एषएतेषांजन्म-क्रमः । दन्तशब्दसमानार्थोदत्शब्दोऽन्योस्तीत्युभयंतोदतइति प्रथमाबहुवचने रूपंयुज्यते ॥ ४३ ॥

(२) **सर्वज्ञनारायणः** । तत्र लघुत्वादादौ जन्मक्रममाह पशवश्चेति । एते जरायुजाःजरायुसहिताजायन्ते ॥ ४३ ॥

(३) **कुल्लूकः** । पशवश्चेति । जरायुर्गर्भावरणचर्म तत्र मनुष्यादयःप्रादुर्भवन्ति पश्चान्मुक्ताजायन्ते । एषामेव जन्म-क्रमःप्रागुक्तोविवृतः । दन्तशब्दसमानार्थोदच्छब्दःप्रकृत्यन्तरमस्ति तस्येदंप्रथमाबहुवचनेरूपंउभयतोदतइति ॥ ४३ ॥

(४) **राघवानन्दः** । किंच पशवश्चेति । जरायुरुल्बंगर्भपरिवेष्टनत्वक्ततोजाताः पशवइत्याद्यनुवादोजरायुज-त्वंविधेयम् ॥ ४३ ॥

(६) **रामचन्द्रः** । पशवइति । पश्वादिमनुष्यान्ताः जरायुजाः स्मृताः ॥ ४३ ॥

अण्डजाःपक्षिणःसर्पानक्रामत्स्याश्चकच्छपाः ॥ यानि चैवंप्रकाराणि स्थलजान्यौदकानिच ॥ ४४ ॥

(१) **मेधातिथिः** । नक्राः शिशुमारादयः । कच्छपः कूर्मः । यानिचैवंप्रकाराणि कृकलासादीनि स्थलजानि । एवंरू-पाण्यौदकानि जलजानि शङ्खादीनि ॥ ४४ ॥

(२) **सर्वज्ञनारायणः** । अण्डजाइति । एवंप्रकाराणि स्थलजानि नकुलादीनि । औदकानि मण्डूकादीनि । एता-न्यण्डयुक्तानि जायन्तइत्यर्थः ॥ ४४ ॥

(३) **कुल्लूकः** । अण्डजाःपक्षिणइति । अण्डआदौ सम्भवन्ति ततोजायन्तइतिएषांजन्मक्रमः । नक्रःकुंभीरः । स्थल-जानि कृकलासादीनि । औदकानिशङ्खादीनि ॥ ४४ ॥

(४) **राघवानन्दः** । एवंपक्षिणइत्याद्यनुवादोऽण्डजत्वंविधेयम् । एवंमशकाद्यनुवादःस्वेदजत्वंविधेयम् । औदजा-निउदकजातानि ॥ ४४ ॥

(६) **रामचन्द्रः** । अण्डजाइति । अण्डजाः पक्षिणः । औदकानि जलजातान्यनन्तानि । अण्डजास्मृताः द्विविधाः-स्थलजाउदकजाः ॥ ४४ ॥

स्वेदजंदंशमशकंयूकामक्षिकमत्कुणम् ॥ ऊष्मणश्चोपजायते यच्चान्यत्किंचिदीदृशम् ॥ ४५ ॥

(१) **मेधातिथिः** । स्वेदः पार्थिवानांद्रव्याणामग्न्यादित्यादितापसंबन्धादन्तःक्लेदस्ततोजायतेदंशमशकादि । अन्यद-पियदीदृशमत्यन्तसूक्ष्मंपुत्तिकापिपीलिकादि यदूष्मणउपजायते । ऊष्मास्वेदएव तद्धेतुर्वातापःउपजायन्तेतिवा पाठोयेचान्ये केचिदीदृशाइति पठितव्यम् ॥ ४५ ॥

(२) **सर्वज्ञनारायणः** । स्वेदजमिति । स्वेदस्तेजसोष्णाजलावयवाः । ऊष्मणा ये जायन्ते कृमयः । यच्चान्यदण्डजादिजातौ । ईदृशंवृश्चिकाद्यपि ॥ ४५ ॥

(३) **कुल्लूकः** । स्वेदजमिति । स्वेदःपार्थिवद्रव्याणांतापेन क्लेदः ततोदंशमशकादिर्जायते । ऊष्मणश्च स्वेदहेतुतापादपिअन्यत्दंशादिसदृशंपुत्तिकापिपीलिकादि जायते ॥ ४५ ॥

(४) **राघवानन्दः** । एवंमशकाद्यनुवादः स्वेदजत्वंविधेयम् । ऊष्मणःस्वेदहेतुतापात् । ईदृशंयूकादितुल्यम् ॥ ४५॥

(६) **रामचन्द्रः** । स्वेदजमिति । ऊष्मणः सकाशात्स्वेदजंदंशादिमत्कुणान्तमुपजायते यच्चान्यत्किञ्चित् ईदृशं स्वेदजंस्मृतम् ॥ ४५ ॥

उद्भिज्जाःस्थावराःसर्वे बीजकाण्डप्ररोहिणः ॥ ओषध्यःफलपाकान्ताबहुपुष्पफलोपगाः ॥४६॥

(१) **मेधातिथिः** । उद्भेदनमुद्भित्भावेक्विप् । ततोजायन्तइतिउद्भिज्जाः । उप्तंबीजंभूमिंच भित्त्वा विदार्यजायन्ते वृक्षाः । सर्वे बीजात्काण्डाच्चप्ररोहन्ति जायन्ते मूलस्कन्धादिनादृढीभवन्ति । तथौषध्यः ओषधयइतियुक्तमीकारःकृदिकारादिति छान्दसोवा । इदंतासांस्वाभाविकंकर्म पाकान्ताः फलपाकः अन्तो नाशआसामिति । पक्वे फले व्रीह्यादयोनश्यन्ति बहुना च पुष्पफलेनोपगताः युक्ताभवन्ति । ओषधीनांवृक्षाणांचयथासंभवमेतद्विशेषणम् ॥ ४६ ॥

(२) **सर्वज्ञनारायणः** । उद्भिज्जाइति । भुवमुद्भिद्यजायन्त इत्युद्भिज्जाः स्थावराइत्यस्य प्रपञ्चः । बीजकाण्डेत्यादि । बीजप्ररोहिणो ये बीजाज्जायन्ते काण्डप्ररोहिणोये शाखायारोपिताजायन्ते । फलस्य पाकएवान्तो नाशकोयासांता ओषध्योपि बहुपुष्पफलाउद्भिज्जाइत्यर्थः ॥४६ ॥

(३) **कुल्लूकः** । उद्भिज्जाइति । उद्भेदनमुद्भित् भावे क्विप् ततोजायन्तेऊर्ध्वंबीजंभूमिंच भित्त्वेत्युद्भिज्जावृक्षाः ते च द्विविधाःकेचिद्बीजादेव जायन्ते केचित्काण्डात्शाखाएव रोपितावृक्षतांयान्ति । इदानींयेषांयादृशंकर्म तदुच्यते ओषध्यइति । ओषध्योव्रीहियवादयःफलपाकेनैव नश्यन्ति बहुपुष्पफलयुक्ताश्चभवन्ति । ओषधिशब्दादेवकृदिकारादक्तिन इति ङीपादीर्घत्वेओषध्यइति रूपम् ॥ ४६ ॥

(४) **राघवानन्दः** । उद्भिज्जाः ऊर्ध्वंभिनत्तीतिउद्भित् तज्जनित्वंविधेयं तत्रापि बीजमुद्भिद्य जातास्तरवः भूमिमुद्भिद्य जातास्तृणवृक्षादयः बीजकाण्डप्ररोहिणः प्ररोहोङ्कुरः बीजप्ररोहिणोवटाश्वत्थादयः काण्डाश्छिन्ना अच्छिन्नावाशाखास्तेभ्यःजाताः इक्षुगुडूच्यादयः बदर्यादयश्च बहूनि पुष्पाणि फलानि च यासां व्राह्यादिजातीनाम् ॥ ४६ ॥

(५) **नन्दनः** । बीजप्ररोहिणआम्रादयः । काण्डप्ररोहिणःकेतक्यादयः । फलपाकान्ताः कदल्यादयः । बहुपुष्पफलोपगानिष्पावकादयः ॥ ४६ ॥

(६) **रामचन्द्रः** । सर्वेस्थावरा वृक्षजातयः उद्भिज्जाःउद्भिज्जातीयाः एकानि बीजानि जातानि एकानि काण्डरुहाणि वल्ल्यादीनि वटरुहाणि यथा छेदनजातानि लताप्रतानिनीवीरुदित्यमरः ॥ ४६ ॥

अपुष्पाःफलवन्तोये ते वनस्पतयःस्मृताः ॥ पुष्पिणःफलिनश्चैव वृक्षास्तूभयतः स्मृताः ॥ ४७ ॥

(१) **मेधातिथिः** । विना पुष्पेण फलंजायते येषांते वनस्पतयःकथ्यन्ते न वृक्षाः । पुष्पिणःफलिनश्च वृक्षाउभययोगात्क्वचिद्वनस्पतयोवृक्षाअपिउच्यन्ते वृक्षाश्चवनस्पतयोऽपि । तत्र विशेषहेतुत्वंदर्शयिष्यामः । वयंतुब्रूमः । नायंशब्दा-

---

(४६) स्थावराः=तरवः (ग, घ, च, अ, ज, झ, ढ)

र्थसंबन्धविधिर्व्याकरणस्मृतिवत् । तेननायमर्थोयएवंस्वभावास्तेवनस्पत्यादिशब्दवाच्याः । किंतर्हि पुष्पफलानांजन्मोच्यते । तस्य वक्तव्यतया प्रकृतत्वात्क्रमंयोगंतु जन्मनीति द्विधा फलानामुत्पत्तिःअन्तरेणपुष्पाणिजायन्ते पुष्पेभ्यश्च एवंपुष्पाणि वृक्षेभ्यश्च । तेन यद्यप्येवमभिधानंये फलिनस्तेवनस्पतयोज्ञेयास्तथापि प्रकरणसामर्थ्याद्यत्तदोर्व्यत्ययःकर्तव्यः ये वनस्पतयइति एवंमसिद्धास्तेऽपुष्पाः फलवन्तस्तेभ्यः पुष्पमन्तरेण फलानिजायन्तेइतिसामर्थ्याच्चायंक्रमोऽवतिष्ठते । यथावाससास्तम्भंपरिवेष्टयेति वाससिपरिधातव्येऽयमर्थोऽस्य भवति स्तम्भेनिधाय वासः परिधापयेति। प्रसिद्धमप्येतदनूद्यते तमसा बहुरूपेणेत्येतत्प्रतिपादयितुम् ॥ ४७ ॥

(२) **सर्वज्ञनारायणः** । अपुष्पाइति । ते वनस्पतयउद्भिज्जाःस्मृताः । उभयतः उभयेन पुष्पफलाभ्याम् ॥ ४७ ॥

(३) **कुल्लूकः** । अपुष्पाइति । नास्य श्लोकस्याभिधानकोषवत्संज्ञासंज्ञिसंबंधिपरत्वमप्रकृतत्वात् । किंतु क्रमयोगंच जन्मनीति प्रकृतंतदर्थमिदमुच्यते । ये वनस्पतयस्तेषांपुष्पमन्तरेणैव फलजन्म इतरेभ्यस्तु पुष्पाणि जायन्ते तेभ्यःफलानीति एवंवृक्षाउभयरूपाः । प्रथमान्तात्तसिः ॥ ४७ ॥

(४) **राघवानन्दः** । अपुष्पाः पुष्पंविनैव फलवन्तोये ते वनस्पतयः पुष्पिनःपुष्पपूर्वकाःफलिनः तेउभयेपिवृक्षाः ॥ ४७ ॥

(५) **नन्दनः** । अपुष्पाइति । पुष्पैर्विनाफलवन्तउदुम्बरादयोवनस्पतयः पुष्पिणः फलिनश्चूतपनसादयः फलिनः फलग्राहिण उभयत उभयथेत्यर्थः । उभयथेतिसाधुः पाठः ॥ ४७ ॥

गुच्छगुल्मंतु विविधंतथैव तृणजातयः ॥ बीजकाण्डरुहाण्येव प्रतानावल्ल्यएव च ॥ ४८ ॥

(१) **मेधातिथिः** । याःसंहताभूमेर्बद्धाएकमूलाअनेकमूलाश्चलताउत्तिष्ठन्ति नच वृद्धिंमहतींप्राप्नुवन्ति तासांसंघातो गुच्छगुल्मशब्दवाच्यः । तृणमूलकादिस्तयोस्तुभेदः । पुष्पवदपुष्पकृतोवान्यावा तृणजातयः कुशशाद्वलशङ्खपुष्पीप्रभृतयः । प्रतानादीर्घाभूमिगतास्तृणप्ररोहाः । वल्ल्योव्रततयः भूमेरुत्पत्य वृक्षमन्यंवा कंचित्परिवेष्ट्योर्ध्वमारुहन्ति । सर्वमेतत्वृक्षवत्बीजकाण्डरुहम् ॥ ४८ ॥

(२) **सर्वज्ञनारायणः** । गुच्छेति । गुच्छोमल्लिकादिः । गुल्मोवंशादिः । प्रतानाश्चैव वल्ल्यश्च वीरुधःपरिकीर्तिताः इत्युत्तरार्धपाठः । वीरुधःकीर्तिताश्चोद्भिज्जाइत्यर्थः ॥ ४८ ॥

(३) **कुल्लूकः** । गुच्छगुल्मंत्विति । मूलतएव यत्र लतासमूहोभवति न च प्रकाण्डानि ते गुच्छामल्लिकादयः । गुल्माएकमूलाःसंघातजाताःशरेक्षुप्रभृतयः तृणजातयःउलपाद्याः । प्रतानास्तन्तुयुक्तास्त्रपुषालाबूप्रभृतयः वल्ल्योगुडूच्यादयः याभूमेर्वृक्षमारोहन्ति एतान्यपिबीजकाण्डरुहाणि । नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यामिति नपुंसकत्वम् ॥ ४८ ॥

(४) **राघवानन्दः** । गुच्छाः पृथक्जनिपूर्वकं मिलितामल्लिकाद्याः गुल्माएकमूलाःशरादयः प्रतानाःकूश्माण्डालाबुप्रभृतयः सांकुशाःवल्ल्योवासन्त्यादयः एतान्यपि बीजकाण्डरुहाणीत्यनुवादः ॥ ४८ ॥

(५) **नन्दनः** । गुच्छगुल्मं स्तबकवद्गुल्मंशेफालिकादि । प्रतानामल्लिकादयः । वल्ल्यः कारवल्ल्यादयः ॥ ४८ ॥

---

(४८) रुहाण्येव=रुहश्चैव (ग, च)

तमसा बहुरूपेण वेष्टिताःकर्महेतुना ॥ अन्तःसंज्ञाभवन्त्येते सुखदुःखसमन्विताः ॥ ४९ ॥

(१) **मेधातिथिः** । कर्मअधर्माख्यंहेतुर्यस्य तमसस्तेन वेष्टिताव्याप्ताः । बहुरूपेण विचित्रदुःखानुभवनिमित्तेन । यद्यपि सर्वंत्रिगुणं तथाप्येषांतमउद्रिक्तमपचिते सत्त्वरजसी अतस्तमोबाहुल्यान्नित्यंनिर्वेददुःखादियुक्ताअधर्मफलमनुभवन्तः सुचिरमासते । सत्त्वस्यापि तत्र भावात् कस्यांचिदवस्थायांसुखलेशमपि भुञ्जते । तदाह सुखदुःखसमन्विताइति अन्तः संज्ञाबुद्धिस्तल्लिङ्गस्य बहिर्विहारव्याहारादेः कार्यस्य चेष्टारूपस्याभावादन्तःसंज्ञाउच्यन्ते । अन्यथान्तरेवसर्वः पुरुषश्चेतयते । अथवा यथा मनुष्याः कण्टकादितोदंमाकृचेतयन्तेनैवंस्थावराः तेहि महान्तंमतोदंपरशुविदारणादिदुःखसंज्ञामपेक्षन्ते यथा स्वापमदमूर्च्छावस्थागताः प्राणिनः ॥ ४९ ॥

(२) **सर्वज्ञनारायणः** । तमसेति । तमसा गुणेन बहुरूपेण नानाविधेनाल्पबहुत्वादिना कर्महेतुना अधर्मसंभवेन वेष्टिताव्याप्ताः अन्तः संज्ञामानसज्ञानमात्रवन्तः । तदेवोक्तंसुखेनेति । उपलक्षणंज्ञानादेरप्येतत् ॥ ४९ ॥

(३) **कुल्लूकः** । तमसेति । एते वृक्षादयस्तमोगुणेन विचित्रदुःखफलेनाधर्मकर्महेतुकेन व्याप्ताःअन्तश्चैतन्याभवन्ति । यद्यपि सर्वे चान्तरेव चेतयन्ते तथापि बहिर्व्यापारादिकार्यविरहात्तथा व्यपदिश्यन्ते । त्रिगुणारब्धत्वेपि चैषांतमोगुणबाहुल्यात्तथा व्यपदेशः । अतएव सुखदुःखसमन्विताः । सत्त्वस्यापि भावात् कदाचित्सुखलेशोपि जलधरजनितजलसम्पर्कादेषांजायते ॥ ४९ ॥

(४) **राघवानन्दः** । स्थाणुमन्ये प्रपद्यन्ते शरीरत्वाय देहिनइति श्रुतिमाश्रित्याह तमसेति । कर्महेतुना कायिकनिषिद्धाचरणजेनहेतुना शरीरजैः कर्मदोषैर्याति स्थावरतांनर इति वक्ष्यमाणत्वात् । अतोबहुरूपेण स्थावरसृष्टीनामनन्तत्वात् अन्तःसंज्ञाः पेपीयमानस्तिष्ठतीति श्रुतेः तस्मात्पश्यन्ति पादपाइति स्मृतेश्च । एतदन्ताः स्थावरान्ताःगतयइति गतिःफलोपभोगार्थगमनम् तयाउत्पत्तिरपि लक्षिता ॥ ४९ ॥

(५) **नन्दनः** । स्थावराणांचैतन्योपलम्भात्कर्मफलानुभवःकथमित्याशङ्क्य परिहरति तमसेति । एते स्थावरादयः ॥ ४९ ॥

(६) **रामचन्द्रः** । तमसेति । कर्महेतुनाबहुरूपेणएतेउद्भिज्जाः अन्तःसंज्ञाःसुखदुःखसमन्विताः भवन्ति मोक्षधर्मेप्युक्तंशीतोष्णग्राहिणःभवन्ति ॥ ४९ ॥

एतदन्तास्तु गतयोब्रह्माद्याःसमुदाहृताः ॥ घोरेऽस्मिन्भूतसंसारे नित्यंसततयायिनि ॥ ५० ॥

(१) **मेधातिथिः** । एषोऽन्तोऽवसानंवल्लीगतिर्यासांगतीनांताएतदन्ताः । कृतकर्मफलोपभोगार्थमात्मनस्तच्छरीरसंबन्धोगतिरुच्यते । अस्याः स्थावरात्मिकायागतेरन्या निकृष्टा दुःखबहुला गतिर्नास्ति । ब्रह्मगतेश्चान्याऽऽद्योत्तमागतिरानन्दरूपा नास्ति । एतागतयः शुभाशुभैः कर्मभिर्धर्माधर्माख्यैः प्राप्यन्ते । परब्रह्मावाप्तिस्तु मोक्षलक्षणा केवलानन्दरूपा ज्ञानात् ज्ञानकर्मसमुच्चयाद्वेति वक्ष्यामः । भूतसंसारे भूतानांक्षेत्रज्ञानांसंसारे जन्ममरणप्रबन्धे आत्यन्तरागमने । घोरेप्रमादालस्यवतांभीषणे । इष्टवियोगानिष्टयोगोत्पत्त्या सततंसर्वकालंगमनशालिनि विनाशिन्यसारेऽपि नित्यंघोरे

---

(४९) अन्तःसंज्ञा=अतःसंज्ञा (क)
=अन्तसंज्ञा (अ, ज, झ, ढ)
सुखदुःख=फलपुष्प (भ, न)

न कदाचिदघोरे। देवादिगतिष्वपिसुचिरंस्थित्वा मर्तव्यमिति नित्यंघोरः। तदनेन धर्माधर्मनिमित्तत्वसंवर्णनेन संसारस्य शास्त्रस्य महाप्रयोजनता प्रतिपादिता भवति। शास्त्रादि धर्माधर्मयोर्विवेकज्ञानमित्यध्येतव्यम्॥ ५० ॥

(२) **सर्वज्ञनारायणः**। एतदन्ताइति। स्थावरान्ताब्रह्माद्यागतयोविविधाभवन्त्यस्मिन् भूतानांप्राणिनांसंसारे नित्ये अविच्छिन्नप्रवाहे सततयायिनि सर्वदा नाशशीले। नित्यमिति पाठे नित्यंघोरइत्यन्वयः ॥५०॥

(३) **कुल्लूकः**। एतदन्ताइति। स्थावरपर्यन्ताब्रह्मोपक्रमागतयउत्पत्तयःकथिताः भूतानांक्षेत्रज्ञानांजन्ममरणप्रबन्धे दुःखबहुलतया भीषणे सदाविनश्वरे ॥ ५० ॥

(४) **राघवानन्दः**। भूतसंसारेभूतः क्षेत्रज्ञःतस्य संसारे प्रवाहरूपेण नित्यंसततयायिनि अनुवर्तमानं सततं सान्तत्यंअनवच्छिन्नमिति यावत् जायस्व म्रियस्वेत्यनुपरमश्रवणात्॥ ५० ॥

(५) **नन्दनः**। सृष्टिमुपसंहरति एतदिति। गतयस्तत्तत्कर्मफलानुरूपदेहप्राप्तयः। एतदन्ताःस्थावरान्ताः ॥ ५० ॥

(६) **रामचन्द्रः**। एतदिति। अस्मिन्भूतसंसारे ब्रह्माद्यागतयःएतदन्ताःस्थावरान्ताः पापपुण्यानांगतयःब्रह्मादिस्तम्बपर्यन्ताउदाहृताः। कीदृशेऽस्मिन्घोरे। पुनःकीदृशे नित्यंसततयायिनि गच्छति अनित्यत्वात्॥ ५० ॥

एवंसर्वंससृष्ट्वेदंमांचाचिन्त्यपराक्रमः॥ आत्मन्यन्तर्दधे भूयः कालंकालेन पीडयन्॥ ५१॥

(१) **मेधातिथिः**। एवंकिंचित्साक्षात्किंचित्प्रजापतिनियोगेन सभगवान् सर्वमिदंजगत्सृष्ट्वोत्पाद्यमांच जगत्स्थितौ नियोज्य स्वेऽन्तरेऽचिन्त्यआश्चर्यरूपोमहान् प्रभावः पराक्रमः सर्वविषयाशक्तिर्यस्य ससृष्ट्वाऽन्तर्दधेऽन्तर्धानंकृतवानिच्छागृहीतशरीरंयोगशक्त्योज्झित्वा पुनरप्रकाशःसंवृत्तः। आत्मनीति। यथाऽन्येभावाः प्रकृतावन्तर्धीयन्त एवंसोऽन्यत्रेत्येवं न। किंतर्ह्यात्मन्येव प्रलीनः नहितस्यान्याप्रकृतिरस्ति यत्रान्तर्धीयेत सर्वभूतानांतत्प्रकृतित्वात्। जगत्सर्वव्यापारान्निवृत्तिर्वाऽन्तर्धानम्। भूयः कालंकालेन पीडयन् सृष्ट्वेत्येतत्क्रियापेक्षः शतार्द्धष्टव्यः प्रलयकालंसर्गस्थितिकालेन विनाशयन्। भूयः पुनरित्यर्थः। वक्ष्यत्यनन्ताः सर्गसंहाराइति ॥ ५१ ॥

(२) **सर्वज्ञनारायणः**। एवमिति। सोचिन्त्यपराक्रमः प्रलयकाल आत्मन्यन्तर्दधे अन्तर्हितान्यकरोत्। भूयः पुनःपुनः। कालंसृष्टिकालं प्रलयकालेन पीडयन्॥ ५१ ॥

(३) **कुल्लूकः**। इत्थंसर्गमभिधाय प्रलयदशामाह एवंसर्वमिति। एवंउक्तप्रकारेण इदंसर्वंस्थावरजङ्गमंजगत्सृष्ट्वा सप्रजापतिरचिन्त्यशक्तिरात्मनि शरीरत्यागरूपअन्तर्धानंकृतवान्। सृष्टिकालंप्रलयकालेन नाशयन्प्राणिनांकर्मवशेन पुनःपुनःसर्गप्रलयान्करोतीत्यर्थः॥ ५१ ॥

(४) **राघवानन्दः**। तस्य लयसृष्टीस्वापप्रबोधत्वेन निरूपयति एवमिति द्वाभ्याम्। मांचसृष्ट्वेत्यनुषज्यते। आत्मनिहिरण्यगर्भे अन्तर्दधे तिरोहितोभूत्। भूयइति। प्रवाहानादित्वसूचनार्थम्। कालंसर्गकालंकालेन चतुर्युगसहस्रान्तब्राह्मसंज्ञकेन प्रलयकालेन पीडयन्निरोधयन्॥ ५१ ॥

(५) **नन्दनः**। एवंतावन्महदादिहिरण्यगर्भपर्यन्तायाः सृष्टेर्भगवत्कर्तृत्वंचराचरसृष्टेर्हिरण्यगर्भकर्तृत्वंचोक्तम्। इदानींहिरण्यगर्भमन्वादयश्चराचरसृष्टेरपि निमित्तमात्रमेव नसाक्षात्स्रष्टारः साक्षात्स्रष्टा तु सभगवान्नान्यः तच्चनकस्यचिद्दर्शयतीत्याह एवमिति अचिन्त्यपराक्रमोऽप्रमेयशक्तिः। सइति परमप्रकृतस्य भगवतः परामर्शोन तु तत्सृष्टस्य हिरण्यगर्भस्य अचिन्त्यपराक्रमइतिविशेषणेन। योऽसावतीन्द्रियग्राह्यःसूक्ष्मोव्यक्तःसनातनः सर्वभूतमयोऽचिन्त्यइत्यचिन्त्यशब्देन भगवतएव प्रत्यभिज्ञाप्यमानत्वात्। सएव स्रष्टा कालं कालेन प्राणिनांकर्मानुरूपंसुखकालंदुःखकालेन दुःखकालं-

सुखकालेन च पीडयन्भूयोभूयस्तिरस्कुर्वन्नात्मनि स्वस्मिन्नन्तर्दधेस्वरूपेन कस्यचिद्दर्शितवानित्यर्थः ॥ ५१ ॥

(६) **रामचन्द्रः** एवमिति । सईश्वरः इदंविश्वंसर्वंएवंसृष्ट्वा मांच सृष्ट्वा आत्मनि भूयः अन्तर्दधे । किंकुर्वन् कालंपूर्वकालं कालेनोत्तरकालेन प्रयाणकालेन पीडयन् ॥ ५१ ॥

यदा सदेवोजागर्ति तदेदंचेष्टते जगत् ॥ यदा स्वपिति शान्तात्मा तदा सर्वंनिमीलति ॥ ५२ ॥

(१) **मेधातिथिः** । सदेवोयदा जागर्ति यदेतदिच्छतीदंजगदुत्पद्यतामेतांस्थितिंच कालमियन्तलभतामिति तदा चेष्टते । मानसवाचिकभौतिकैर्व्यापारैरान्तरैर्बाह्यैश्च श्वासप्रश्वासाहारविहारकृषियागादिभिर्युक्तंभवति । यदा स्वपिति यदानिवृत्तेच्छोभवति जगत्सर्गस्थितिभ्यांतदा सर्वंनिमीलति प्रलयंप्राप्नोति । जागर्यास्वापश्च प्रजापतेरिच्छा प्रवृत्तिनिवृत्ती उच्येते । शान्तात्मत्वंभेदावस्थोपसंहारः ॥ ५२ ॥

(२) **सर्वज्ञनारायणः** । तत्प्रपञ्चयति यदेति । जागर्ति सृष्ट्यर्थं चेष्टते स्वपिति ततोविरमति शान्तात्मानिवृत्त प्रयत्नः ॥ ५२ ॥

(३) **कुल्लूकः** । अत्रहेतुमाह यदेति । यदा सप्रजापतिर्जागर्ति सृष्टिस्थितीइच्छति तदेदंजगच्छ्वासप्रश्वासाहारादिचेष्टांलभते । यदा स्वपिति निवृत्तेच्छोभवति शान्तात्माउपसंहारमनाः तदेदंजगत्प्रलीयते ॥ ५२ ॥

(४) **राघवानन्दः** । देवोद्योतनात्मकः जागर्ति स्थूलाकाशाद्याकारेण च विवर्तते चेष्टते कर्मकरोति यदा स्वपिति निमीलति न चेष्टते ॥ ५२ ॥

(५) **नन्दनः** । अथस्थितिप्रलयकालावाह यदेति । यथा सभगवाञ्जागर्तिदेवत्वेन प्रभुत्वेन कुर्वद्रूपोभवति चेष्टते जीवति शान्तात्माऽकुर्वद्रूपः स्वपितियोगेन निद्राति निमीलति न चेष्टते ॥ ५२ ॥

(६) **रामचन्द्रः** । यदेति । सदेवईश्वरःयदाजागर्ति तदेदंजगच्चेष्टते उत्पद्यते । यदाशान्तात्मासन्स्वपिति । लीनचेष्टोभवति तदा सर्वं जगत् निमीलति लयंप्राप्नोति ॥ ५२ ॥

तस्मिन्स्वपति तु सुस्थे कर्मात्मानःशरीरिणः ॥ स्वकर्मभ्योनिवर्तन्ते मनश्च ग्लानिमृच्छति ॥ ५३ ॥

(१) **मेधातिथिः** । पूर्वव्याख्याश्लोकोऽयंविस्पष्टार्थः । स्वस्थे सुस्थिरे । शान्तात्मवच्छुद्ध रूपे स्वात्मन्यवस्थानमौपाधिकभेदनिवृत्तिः । कर्मात्मानः कर्मप्रधानाः संसारिणः क्षेत्रज्ञाः शरीरिणः कर्मसंबन्धेन शरीरसंबन्धानुथवादेवमुच्यन्ते । तस्मिन्स्वपति शयाने स्वकर्मभ्योनिवर्तन्ते । दान्निवर्तते । शरीरचेष्टानिवृत्तिरेतेनोच्यते । मनश्च ग्लानिमृच्छति । एतेनान्तरव्यापारनिवृत्तिः । अतोबाह्यान्तर व्यापारनिवृत्तिः । अतोबाह्यान्तरव्यापारनिवृत्त्या प्रलयःप्रतिपादितोभवति । ग्लानिर्निरुत्साहः स्वव्यापारेऽशक्ततामृच्छतिप्राप्नोति ॥ ५३ ॥

(२) **सर्वज्ञनारायणः** । अस्मिन्निति । स्वस्थे स्वमात्रवेदिनि कर्मात्मानःकर्मसहिता आत्मानः नकेवलंकर्माणि कुर्वन्ति मनोपि तेषांवृत्तिशून्यंभवतिइत्याह मनश्चेति ॥ ५३ ॥

(३) **कुल्लूकः** । पूर्वोक्तमेव स्पष्टयति तस्मिन्स्वपतीति । तस्मिन्प्रजापतौ निवृत्तेच्छे सुस्थे उपसंहृतदेहमनोव्यापारे कर्मलब्धदेहाःक्षेत्रज्ञाः स्वकर्मभ्योदेहग्रहणादिभ्योनिवर्तन्ते । मनःसर्वेन्द्रियसहितंवृत्तिरहितंभवति ॥ ५३ ॥

(४) **राघवानन्दः** । किंच तस्मिन्निति । निवर्तन्ते न कर्म कुर्वन्ति ग्लानिं सर्वेन्द्रियसहितमनः निवृत्तव्यापारतामृच्छति स्थूलाकाशाद्यभावेन तदारब्धस्थूलजरायुजादि देहाभावात् आकाशाद्यभावश्च आकाशंजायते तस्मात्तस्य शब्द-

---

(५२) निमीलति=प्रलीयते (क, च)

गुणंविदुरिति वक्ष्यमाणत्वात् । तस्मिन्हिरण्यगर्भे स्वस्थे स्वस्मिन्नात्मीये कारणे तिष्ठति सति स्वयंविराट्स्वपिति लीयते। स्वपतीति पाठे स्वस्थे हिरण्यगर्भे तस्मिन् स्वपति लीने विराजि सति । व्यधिकरणे सप्तम्यौ । अयमेव दैनंदिनप्रलयो-वक्ष्यते । तावती रात्रिरित्यादिनानात्र हिरण्यगर्भस्य प्रलयइति सिद्धान्तः ॥ ५३ ॥

(५) **नन्दनः** । तस्मिन्भगवति स्वस्थआत्मस्थेजगद्व्यापारतउपरते कर्मात्मानोऽनुभवितव्यफलकर्मयुक्तात्मानः स्वकर्मभ्यस्तदानींभुज्यपानेभ्यः क्रियमाणेभ्यश्च मनश्च महत्तत्वंच जगदितियावत् तत्कार्यत्वाज्जगतो ग्लानिसंकोचंप्रलय-मितियावत् ॥ ५३ ॥

(६) **रामचन्द्रः** । तु पुनस्तस्मिन् ईश्वरे स्वपति सति कर्मात्मानःशरीरिणःसर्वकर्मभ्योनिवर्तन्ते । च पुनः मनः-ग्लानिंलयंगच्छति प्राप्नोति ॥ ५३ ॥

युगपत्तु प्रलीयन्ते यदा तस्मिन्महात्मनि ॥ तदायंसर्वभूतात्मा सुखं स्वपिति निर्वृतः ॥ ५४॥

(१) **मेधातिथिः** । यत्तदोर्व्यत्ययेनायंश्लोकोव्याख्यातव्यः । अन्यथा पूर्वश्लोकापेक्षयेतरेतराश्रयः प्रसज्येत । एतदुक्तंयदा स्वपिति तदा निमीलतिसर्वं । सुखंस्वपिति निर्वृतः सुखस्वरूपमेव परब्रह्म न तस्य स्वापावस्था-यांसुखमन्यदादुःखम् । स्वापश्च तस्य यादृशः सप्रागुक्तएवनिर्वृतिश्च तस्य सर्वकालम् । नह्यसौ परमात्माऽविद्योपप्लव-तरङ्गैराघृश्यते। केवलसुखमयस्तस्य सर्वस्य कर्तृत्वंप्रपद्यते । यथाऽयंपुरुषउपरतोगृहकृत्येभ्यः कृतकृत्यतयार्जितंमया धनं-गृहोपयोगि निरुपद्रवश्चास्मि संवृत्तइत्येवंसुखंस्वपिति निर्वृतोनिराशङ्कात्मबाधएवमुपमीयतेऽसावपि । तस्याऽपीदंजगत् कुटुम्बभूतमितिप्रशंसा । प्रधानविषयोवाऽयंश्लोकोवर्णनीयः । तदा प्रधानंस्वपिति । यदा युगपत्सर्वाणि भूतानि तत्र प्रलीयन्ते तदात्मतांकारणरूपतामापद्यन्ते विकारावस्थामुद्गच्छन्ति युगपद्यावन्तित्रैलोक्योदरवर्तीनि । स्वापश्च परिणाम निवृत्तिर्न पुनर्ज्ञानोपसंहृतिश्चैतस्य प्रधानस्य सुखंचोपचारतोऽचेतनत्वादेव ॥ ५४ ॥

(२) **सर्वज्ञनारायणः** । यदास्येदृशःस्वापस्तदाह युगपत्त्विति । युगपत् समकाले भुवनचतुष्टयंयदा लीयते तदा-स्यास्वपतोपि स्वापउच्यतइत्यर्थः । यदाऽयंसर्वभूतानामात्माधिष्ठानसुखदुःखप्रायवृत्तिजनकरजोगुणविरहेण निर्वृतो निवृत्ताज्ञानावरणः ॥ ५४ ॥

(३) **कुल्लूकः** । इदानींमहाप्रलयमाह युगपत्त्विति । एकस्मिन्नेव काले यदा तस्मिन्परमात्मनि सर्वभूतानि प्रलयं-यान्ति तदायंसर्वभूतानामात्मानिर्वृतः निवृत्तजाग्रत्स्वप्नव्यापारः सुखंस्वपिति सुषुप्तइव भवति । यद्यपि नित्यज्ञानानन्द स्वरूपे परमात्मनि न सुप्वाप तथापि जीवधर्मोऽयमुपचर्यते ॥ ५४ ॥

(४) **राघवानन्दः** । हिरण्यगर्भोपि नङ्क्ष्यति इति ज्ञापयन् महाप्रलयमाह युगपदिति । यदाद्विपरार्धकाले युग-पत् हिरण्यगर्भविराड्भ्यांसह पूर्वोक्ताकर्मात्मानोजीवाःसंस्कारमात्रावशेषाः परब्रह्मणि प्रलीयन्ते तदायंसर्वभूतात्माईश्वरः सुखंस्वपिति निर्वृतः सुखंस्वानन्दंनिर्वृतः प्राप्तः जगद्व्यापारोपरमः। स्वपितीत्युपचर्यते स्वस्य स्वापप्रबोधयोरभावात् ॥ ५४ ॥

(५) **नन्दनः** । प्रलयकाले जीवाः कुत्र तिष्ठन्ति भगवतश्च किंकृत्यमित्यपेक्षायामाह युगपदिति । सर्वकार्याणांनि-जोनाशोयुगपच्छब्दप्रयोगोक्तः । महात्मनि महावकाशे प्रलीयन्ते । शरीरिणइत्यनुषङ्गः । सर्वे भूतात्मानोजीवायस्मिन्निति ससर्वभूतात्मा स्वेनानन्देन निर्वृतोजगत्कार्यचिन्ताराहित्येन सुखंस्वपिति ॥ ५४ ॥

(६) **रामचन्द्रः** । युगपदिति । तस्मिन्महात्मनि महत्तत्वे युगपत्तदाशरीरिणः प्रलीयन्तेलीनाभवन्ति ॥ ५४ ॥

तमोयंतु समाश्रित्य चिरंतिष्ठति सेन्द्रियः ॥ न च स्वंकुरुते कर्म तदोत्क्रामति मूर्तितः ॥ ५५ ॥

(१) **मेधातिथिः** । इदानीं संसारिणः पुरुषस्य मरणं देहान्तर प्राप्तिश्चाभ्यां श्लोकाभ्यां कथ्यते । तमोज्ञाननिवृत्तिस्तां समाश्रित्य चिरंतिष्ठत्यास्ते सेन्द्रियः नचस्वं कुरुते कर्म श्वासप्रश्वासादिकं तदा मूर्तितः शरीरादुत्क्रामति गच्छति । ननुच सर्वगतआत्माऽऽकाशवद्विभुस्तस्य कीदृश्युत्क्रान्तिः । कर्मोपार्जितशरीरत्यागएवोत्क्रान्तिः न पुनर्मूर्तस्यैवार्थस्य देशाद्देशान्तरगमनम् । अथवा कैश्चिदिष्यते अस्त्यन्यदन्तराभवंशरीरंसूक्ष्मंयस्येयमुत्क्रान्तिः । अन्यैस्त्वन्तराभवदेहोनेष्यते । यथाह भगवान्व्यासः अस्मिन्देहे व्यतीते तु देहमन्यन्नराधिप । इन्द्रियाणि व सन्त्येव तस्मान्नास्त्यन्तराभवः । सांख्याअपि केचिन्नान्तराभवमिच्छन्ति विन्ध्यवासप्रभृतयः । कोयमन्तराभवोनामास्मिञ्छरीरे नष्टे मातृकुक्ष्यादिस्थानंद्वितीयशरीरग्रहणार्थंयावन्न प्राप्तंतावदन्तरा निरुपयोगिशरीरमुपजायते सूक्ष्मंयस्य न क्वचित्संयोगोनाम्यादिदाहोन महाभूतैःप्रतिबन्धः । अन्येतु मूर्तिंपरमात्मानमाहुः । सर्वात्मरूपः परमात्मा समुद्रस्थानीयस्ततः प्रादुर्भवन्तिजीवाअविद्यावशाद्भेदमुपयान्तिमहोदधेरिवोर्मयः । तस्य च ततोनिष्क्रामतःपुर्यष्टकाख्यंलिङ्गमभ्युपगम्यते । धर्माधर्मपूर्वकृतवशात्प्रत्येकस्य जीवस्य वासः स्थानीयंसूक्ष्मंशरीरम् । यथापुराणउक्तम् पुर्यष्टकेन लिङ्गेन प्राणाख्येन सयुज्यते । तेनबद्धस्य वैबन्धोमोक्षोमुक्तस्य तेनतु ॥ ते च प्राणापानव्यानोदानसमानाः पञ्चभूतेन्द्रियवर्ग एवंकर्मेन्द्रियवर्गोऽष्टमंमनइत्येतत्पुर्यष्टकम् । तच्छरीरंन नश्यत्यामो क्षावस्थायाः । तदुक्तं संसरति निरुपभोगभावैरधिवासितंलिङ्गम् ॥ ५५ ॥

(२) **सर्वज्ञनारायणः** । प्रलयप्रसङ्गेन मूर्च्छामृत्यूअपिदर्शयति यमोयमिति । तमोगुणमाश्रित्य चिरंतिष्ठति तथा च रजसोभिभूतत्वात्सेन्द्रियोमनःप्रभृतीन्द्रियवानपि न स्वयं कर्मकुरुते तदा मूर्च्छितोभूत्वोत्क्रामति । जीवस्थलिङ्गदेहः प्रदेशान्तरे तिष्ठति सेयंमूर्च्छेत्युच्यते ॥ ५५ ॥

(३) **कुल्लूकः** । इदानींप्रलयप्रसङ्गेन जीवस्योत्क्रमणमपि श्लोकद्वयेनाह तमोयमिति । अयंजीवस्तमोज्ञाननिवृत्तिप्राप्य बहुकालमिन्द्रियादिसहितस्तिष्ठति । नचात्मीयकर्म श्वासप्रश्वासादिकंकरोति तदा मूर्तितःपूर्वदेहादुत्क्रामति अन्यत्र गच्छति लिङ्गशरीरावच्छिन्नस्य जीवस्यउत्क्रमानद्गमनमप्युपपद्यते । तथा चोक्तं बृहदारण्यके तमुत्क्रामन्तंप्राणोनूत्क्रामति प्राणमनूत्क्रामन्तंसर्वे प्राणाअनूत्क्रामन्ति । प्राणाइन्द्रियाणि ॥ ५५॥

(४) **राघवानन्दः** । प्रलयप्रसङ्गेन मरणमाह तमइति द्वाभ्याम । अयंजीवात्मा यदा तमोचैतन्यमाश्रित्य जडत्वंप्राप्य देहाद्यध्यासपरित्यागात् एवमेवायमात्मेदंशरीरंनिहत्याविद्यां गमयित्वान्यत्रशिवतरं कल्याणतररूपंतनुतइति श्रुतेः । बहुकालंसेन्द्रियः वागादीन्द्रिययुक्तोपि न च कर्म कुरुते सुषुप्तिवत् श्वासादिकमपि कुतः । यतः मूर्तितःस्थूलशरीरात् ॥ ५५ ॥

(५) **नन्दनः** । अयंभगवांस्तमोमूलप्रकृतिमाश्रित्य यदा चिरंयावत्प्रलयंकालंतिष्ठति तदा सेन्द्रियोमूर्तिमानभवति जगदाकारेण स्फुरतीत्यर्थः । किंच तमः समाश्रित्यायंस्वकर्मदिदृक्ष्यादिकंयदा न कुरुते तदा मूर्तितउत्क्रामति जगदाकारेण न स्फुरतीत्यर्थः ॥ ५५ ॥

(६) **रामचन्द्रः** । तमइति । यदा तमःसमाश्रित्य सेन्द्रियःसचिरंतिष्ठति स्वंकर्म न कुरुते तदा मूर्तितउत्क्रामति मूर्तितोनिर्गतएवभवति ॥ ५५ ॥

---

(५५) तमोयन्तु=तमोयदा (क, ख, ग)

यदाणुमात्रिकोभूत्वा बीजं स्थास्नु चरिष्णुच ॥ समाविशति संसृष्टस्तदा मूर्तिंविमुञ्चति ॥ ५६ ॥

(१) **मेधातिथिः** । अण्व्यः सूक्ष्मामात्राअवयवायस्य सोऽणुमात्रिकः । पुर्यष्टकमन्तराभवदेहोवा । स्वभावतएव वाऽऽत्मनः सूक्ष्माः यथोक्तम् सएषआत्माऽन्तर्हृदयेऽणीयानित्यादिबीजंशरीरोत्पत्तिकारणम् । स्थास्नुवृक्षादिजन्महेतुभूतं-चरिष्णुजङ्गमंसमाविशत्यधितिष्ठति प्रतिनिबध्यतेयदा संसृष्टः प्राणादिभिस्तदा मूर्तिंविमुञ्चत्याबध्नाति शरीरंगृह्णातीत्यर्थः॥५६

(२) **सर्वज्ञनारायणः** । मृतिमाह यदेति । अणुमात्रिकोमनसानुभावच्छेदात्तत्तुल्यपरिमाणः संसृष्टोलिङ्गदेहेनस-हितः स्थास्नुस्थावरंचरिष्णु जङ्गमंच बीजरेतःशोणितादि प्रविशतिततदामूर्तिं पूर्वदेहं त्यजति सम्रत्युरित्यर्थः ॥ ५६ ॥

(३) **कुल्लूकः** । कदा देहान्तरंगृह्णातीत्यतआह यदाणुमात्रिकइति । अणवोमात्राःपुर्यष्टकरूपा यस्य सोऽणुमा-त्रिकः । पुर्यष्टकशब्देन । भूतादीन्यष्टावुच्यन्ते । तदुक्तंसनन्देन भूतेन्द्रियमनोबुद्धिवासनाकर्मवायवः अविद्या चाष्टकंप्रोक्तं-पुर्यष्टमृषिसत्तमैः । ब्रह्मपुराणेप्युक्तम् पुर्यष्टकेन लिङ्गेन प्राणाद्येन सयुज्यते । तेन बद्धस्य वैबन्धोमोक्षोमुक्तस्य तेन तु ॥ यदाऽणुमात्रिकोभूत्वासंपद्य स्थास्नु वृक्षादिहेतुभूतंचरिष्णु मानुषादिकारणंबीजंप्रविशत्यधितिष्ठति तदा संसृष्टःपुर्यष्टकयुक्तोमू-र्तिंस्थूलदेहान्तरंकर्मानुरूपंविमुञ्चतिगृह्णाति ॥ ५६ ॥

(४) **राघवानन्दः** । सदा मरणकालेउत्क्रामति देहान्तरार्थं किंभूतः अणुमात्रिकाः अणवोऽणुतुल्यामात्राः पुर्यष्ट-करूपा अवच्छेदत्वेन यस्य चैतन्यस्य सतथा पुर्यष्टकेन लिङ्गेन प्राणाद्येन सयुज्यते तेनबद्धस्य बन्धोवै मोक्षोमुक्तस्य-मुक्तता । तेनन्वित्युक्तम् । बीजंविद्याकर्मवासनाः भूत्वासम्प्राप्य तंविद्याकर्मणीसमन्वारभेते पूर्वप्रज्ञाचेति श्रुतेरुक्तत्वात् । तदनुरूपेण सृष्टंस्थावरंजङ्गमंवा विशति वृक्षोहं मनुष्योहमिति अभिमन्यते । संसृष्टः पूर्वादृष्टेन जन्मनानियुक्तः सन्मुञ्चति च मूर्तिंपूर्वामिति ॥ ५६ ॥

(५) **नन्दनः** । अथसृष्टिकालमाह यदेति । अणुमात्रिकंचैतन्यांशीभूयबीजंतत्त्वसंघातंसमाविशत्यनुप्रविशतिसंसृ-ष्टोसृष्ट्यांमूर्तिंजगद्विमुञ्चति सृजति जगदाकारेणस्फुरतीत्यर्थः ॥ ५६ ॥

(६) **रामचन्द्रः** । यदेति । देहत्यागो वर्ण्यते । यदाअणुमात्रकोभूत्वा स्थास्नु स्थावरेषु चरिष्णु चरेषु बीजं-बीजरूपंसमाविशति संसृष्टः संयुक्तःतदामूर्तिं शरीरंमुञ्चति ॥ ५६ ॥

एवं सजाग्रत्स्वप्नाभ्यामिदंसर्वंचराचरम् ॥ संजीवयति चाजस्रंप्रमापयति चाव्ययः ॥ ५७ ॥

(१) **मेधातिथिः** । उपसंहारः पूर्वोक्तस्य । आत्मसंबन्धिभ्यांजाग्रत्स्वप्नाभ्यांचराचरंस्थावरंजङ्गमंजीवयति मारय-तिच जगत् । अव्ययोऽविनाशी ॥ ५७ ॥

(२) **सर्वज्ञनारायणः** । एवमिति । स्वेन जाग्रता सञ्जीवयति स्वीयेन स्वप्नेनाव्ययोऽविनाशी प्रमापयति मा-रयति चरमचरंच अजस्रंसर्वदा ॥५७ ॥

(३) **कुल्लूकः** । प्रासङ्गिकंजीवस्योत्क्रमणमभिधाय प्रकृतमुपसंहरति एवंसजाग्रत्स्वप्नाभ्यामिति । सब्रह्मा अनेन प्रकारेण स्वीयजाग्रत्स्वप्नाभ्यामिदंस्थावरजङ्गमंसञ्जीवयति मारयति च । अजस्रंसततम् ।अविनाशीअव्ययः ॥ ५७ ॥

(४) **राघवानन्दः** । प्रकृतमनुसरति एवमिति । जाग्रत्स्वप्नाभ्यां दैनंदिनसृष्टिप्रलयाभ्यां प्रमापयति नाशयति स्वप्नोऽत्र सुषुप्तिः स्वपितीत्युक्तेः ॥ ५७ ॥

---

(५६) संसृष्टोदिति पाठान्तरम् (नन्दनः)

(५) **नन्दनः** । प्रकरणार्थमुपसंहरति एवमिति । जागृदितिपाठः । जागृज्जागरणं सम्पदादित्वान्क्विप् । अजस्रमविच्छेदेन ॥ ५७ ॥

(६) **रामचन्द्रः** । एवमिति । सईश्वरः जाग्रदवस्थासुस्थितः सन्निदं चराचरंसर्वमेवमजस्रंसञ्जीवयति । स्वप्नेस्थितःसन्अजस्रमिमंप्रमापयति नाशयति स्वयमव्ययः देशतःकालतश्च ॥ ५७ ॥

इदंशास्त्रंतु कृत्वासौ मामेव स्वयमादितः ॥ विधिवद्ग्राहयामास मरीच्यादींस्त्वहंमुनीन् ॥ ५८ ॥

(१) **मेधातिथिः** । इह शास्त्रशब्देन स्मार्तोविधिप्रतिषेधसमूहउच्यते नतु ग्रन्थस्तस्य मनुना कृतत्वात् । तथा हि मानवइति व्यपदेशोऽस्येतरथा हि हैरण्यगर्भइति व्यपदिश्येत । केचित्तु हिरण्यगर्भेनापि कृते ग्रन्थे मनुना बहूनां प्रकाशितत्वात्तेन व्यपदेशोयुज्यतएव यथा हिमवति प्रथममुपलभ्यमाना गङ्गाऽन्यतोप्युत्पन्ना हैमवतीति व्यपदिश्यते यथा च नित्यदर्शनात्काठकंप्रवचनंकठेन व्यपदिश्यते । सत्स्वप्यन्येष्वध्येतृष्वध्यापयितृषु च प्रवचनप्रकर्षात्कठेनव्यपदेशः । नारदश्च स्मरति शतसाहस्रोऽयंग्रन्थः प्रजापतिना कृतस्ततःसमन्वादिभिः क्रमेण संक्षिप्तइति । अतोऽन्यकृतत्वेऽपि मानवव्यपदेशोन विरुद्धः । शास्त्रशब्देनग्रन्थाभिधानमपिशासनरूपाऽर्थप्रतिपादकत्वाद्दृष्टमेव । मामेव ग्राहयामासाहंतेनाध्यापितइत्यर्थः । स्वयमादितोविधिवदित्येभिः पदैरागमस्याविभ्रंशउच्यते । ग्रन्थकारेण हि स्वकृतोग्रन्थोयः स्वयमध्याप्यते प्रथमंतत्र मात्रापि न परिहीयते । अन्यस्य हि तस्मादधिगतवतोऽन्यमध्यापयतोनतद्ग्रन्थाविनाशे यत्नोभवति कर्तुरप्यध्यापितपूर्वस्य प्रतिष्ठापितोपि मया पूर्वमयं ग्रन्थइति द्वितीयवारंप्रमादालस्यादिना भ्रंशः संभाव्यत अतआदितइत्युक्तम् । विधिवच्छिष्योपाध्याययोरनन्यमनस्कतादिगुणोऽवहितचित्तताविधिः । अर्हेवतिः । मरीच्यादींस्त्वहंमुनीन्मरीच्यादयः प्रसिद्धप्रभावास्तैरप्येतन्मत्सकाशादधीतमित्यात्मनोविशिष्टशिष्यसंबन्धेन सिद्धमौपाध्यायिकंदर्शयन्महर्षीणांशास्त्रमाहात्म्येन च श्रद्धातिशयंजनयत्यध्ययनाविरामाय । एवंविधमेतन्महच्छास्त्रंयन्मरीच्यादिभिरप्यधीतम् । एषचेदृशोमहात्मा मनुस्तेषामुपाध्यायइति युक्तमेतस्य सकाशादेतद्ग्रन्थाध्ययनमित्याशास्त्रपरिसमाप्तेर्नोपरमन्ते श्रोतारइत्युभयथापि शास्त्रप्रशंसा ॥ ५८ ॥

(२) **सर्वज्ञनारायणः** । इदमिति । इदंस्मार्तधर्माधर्मोपादानहानात्मकं न ग्रन्थंशास्त्रं सर्वज्ञोहिरण्यगर्भात् प्राप्य मांभृगुनामानमेव कृपयाऽध्यापयामास । पुनरहंमरीच्यादिदशमुनीन् बहुविशिष्टेभ्यःशिष्येभ्यः आदितःसर्वेभ्यः पूर्वम् ॥५८॥

(३) **कुल्लूकः** । इदंशास्त्रमिति । असौ ब्रह्मेदंशास्त्रंकृत्वा सृष्ट्यादौ मामेव विधिवच्छास्त्रोक्तावबुजातानुष्ठानेनाध्यापितवान् । अहंतु मरीच्यादीनध्यापितवान् । ननु ब्रह्मकृतत्वेऽस्य शास्त्रस्य कथंमानवव्यपदेशः । अत्र मेधातिथिः शास्त्रशब्देन शास्त्रार्थोविधिनिषेधसमूहउच्यते तंब्रह्मा मनुंग्राहयामास मनुस्तु तत्प्रतिपादकंग्रन्थंकृतवानिति न विरोधः । अन्ये तु ब्रह्मकृतत्वेप्यस्य मनुना प्रथमंमरीच्यादिभ्यः स्वरूपतोऽर्थतश्च प्रकाशितत्वान्मानवव्यपदेशः वेदापौरुषेयत्वेपि काठकादि व्यपदेशवत् । इदंतूच्यते ब्रह्मणा शतसाहस्रमिदंधर्मशास्त्रंकृत्वा मनुरध्यापितआसीत्ततस्तेन च स्ववचनेन संक्षिप्य शिष्येभ्यःप्रतिपादितमित्यविरोधः । तथा च नारदः शतसाहस्रोयंग्रन्थ इति स्मरति स्म ॥ ५८ ॥

(४) **राघवानन्दः** । गुरुपरंपरागतमिदंशास्त्रं न स्वमनीषाकल्पितमित्याह इदमिति । आदितः सृष्ट्यादौ असौ विराट्ब्रह्मा मांमनुंआह मनुर्मरीच्यादीन्मुनीन् ग्राहितवानस्मीत्यन्वयः । आदावस्य मनुवक्तृत्वं कर्तृत्वंतु विराजएवेति ध्वनिः ॥ ५८ ॥

(५) नन्दनः । एवंतावज्जगत्सृष्टिप्रलयावुक्तौ इदानींमर्यादानांस्थापनंशास्त्रसंप्रदायोपन्यासद्वारेणस्थितिमभ्याह इदमिति । शास्त्रस्य तदा मनसि विपरिवर्तमानत्वादिदमिति परामर्शोयुज्यते ॥ ५८ ॥

(६) रामचन्द्रः । मनुरुवाच । असावीश्वरइदंशास्त्रं कृत्वामामेवादितः विधिवत्स्वयंग्राहयामास । तु पुनः मरीच्यादीन्मुनीन्ग्राहयामास ग्राहयतिस्म ॥ ५८ ॥

एतद्वोऽयंभृगुः शास्त्रंश्रावयिष्यत्यशेषतः ॥ एतद्धिमत्तोऽधिजगे सर्वमेषोऽखिलंमुनिः ॥ ५९ ॥

(१) मेधातिथिः । एतच्छास्त्रंवोयुष्माकमयंभृगुरशेषतः सर्वंश्रावयिष्यति कर्णपथंनेष्यत्यध्यापयिष्यति व्याख्यास्यतिच । एतच्छास्त्रस्यैतदा प्रत्यवमर्शः । एतच्छास्त्रमेषमुनिरखिलमशेषंमत्तोमत्सकाशादधिजगेऽधिगतवाञ्ज्ञातवान् । गुरुमुखाद्विद्यानिष्क्रामतीव शिष्यः प्रतिगृह्णातीवेत्यतोपादाने तसिर्मत्तइति युक्तः । भृगुस्तु महर्षीणांप्रख्याततरस्वभावः । तस्य प्रवक्तृत्वनियोगेनानेकाशेषनिरतिशयविद्याविदामागमनपरंपरयागतमेतच्छास्त्रमितिप्रदर्श्यते । अतश्च केषांचिदयमपि प्रवृत्तिप्रकारोदृश्यते । बहुभ्योमहात्मभ्यः शास्त्रमिदमवतीर्णमिति किमिति नाधीमहइत्यध्ययनादिप्रवृत्त्याभिमुख्यंशास्त्रे जन्यते ॥ ५९ ॥

(२) सर्वज्ञनारायणः । एतदिति । अखिलंकृत्स्नम् ॥ ५९ ॥

(३) कुल्लूकः । एतद्वोयमित्यादि । एतच्छास्त्रमयंभृगुः युष्माकमखिलंकथयिष्यति यस्मादेषोऽशेषमेतन्मत्तोऽधीतवान् ॥ ५९ ॥

(४) राघवानन्दः । भृगोरपि गुर्वधीनविद्यत्वंसूचयति एतदिति । मत्तोमनोःअधिजगे ज्ञातवान् सर्वमखिलं एतेनाक्षरमात्रमप्यस्य न त्याज्यमित्यर्थः ॥ ५९ ॥

(५) नन्दनः । अखिलंनिरवशेषम् ॥ ५९ ॥

(६) रामचन्द्रः । एतदिति । अयंभृगुः एतच्छास्त्रंधर्मशास्त्रंच अशेषतःश्रावयिष्यति मुनिःभृगुःएतत् शास्त्रंसर्वमेव अखिलंसरहस्यंमत्तःसकाशात्अधिजगे ज्ञातवान् । गैशब्दे इत्यस्य धातोरूपं अधिजगेये गत्यर्थास्ते ज्ञानार्थाः ॥ ५९ ॥

ततस्तथा सतेनोक्तोमहर्षिर्मनुना भृगुः ॥ तानब्रवीदृषीन्सर्वान्प्रीतात्मा श्रूयतामिति ॥ ६० ॥

(१) मेधातिथिः । समहर्षिर्भृगुस्तेन मनुना तथोक्तएषवःश्रावयिष्यतीति नियुक्तस्ततोऽनन्तरंतानृषीनब्रवीच्छ्रूयतामिति । प्रीतात्माऽनेकशिष्यसन्निधावहमत्र नियुक्तइति बहुमानेन प्रीतात्मत्वंप्रवक्तृत्वयोग्यतयाज्ञाकरोऽहमनेन संभावितइत्यात्मनि भृगोर्बहुमानः ॥ ६० ॥

(२) सर्वज्ञनारायणः । ततइति । सभृगुरित्यात्मनि परोक्षत्वारोपेण ॥ ६० ॥

(३) कुल्लूकः । ततस्तथेति । सभृगुर्मनुना तथोक्तोऽयंश्रावयिष्यतीतियस्मादेषोऽधिजगइत्युक्तः ततोऽनन्तरमनेकमुनिसन्निधौ गुरुसम्भावनया प्रीतमनास्तानृषीन्प्रत्युवाच श्रूयतामिति ॥ ६० ॥

(४) राघवानन्दः । अध्यापनेपि गुर्वाज्ञावश्यकतामाह ततइति । तान्मनुसमीपे पूर्वोपस्थितान् प्रीतात्मा प्रीतियुक्तः । एतेमनूंश्च समान्यानित्यनेन सावर्ण्याद्यामनवउक्ताअपरइति विशेषणात् सावर्ण्यादिभ्यः स्वायंभुवाद्याभिन्नाः अन्यथा मनूनांचतुर्दशत्वंव्याहन्येत ॥ ६० ॥

(५) नन्दनः । तथा तेनोक्तोयुष्मानयंभृगुरेतच्छास्त्रंश्रावयिष्यतीति मनुनोक्तः ॥ ६०॥

(६) रामचन्द्रः ततइति । भृगुरुवाच भृगुः धर्मानाह । ततःमनुवचनानन्तरं समहर्षिर्भृगुः तान्सर्वानृषीनृश्रूयतामित्यब्रवीत् । कीदृशःप्रीतात्मा प्रफुल्लितात्मा तथा तेन मनुनोक्तः ॥ ६० ॥

स्वायंभुवस्यास्य मनोःषड्वंश्यामनवोऽपरे ॥ सृष्टवन्तःप्रजाःस्वाःस्वामहात्मानोमहौजसः ॥ ६१ ॥

(१) मेधातिथिः । उपाध्यायोधर्मान्पृष्टोजगदुत्पत्त्यादि वर्णितवान् । तथैवशिष्योऽपि तन्नियुक्तस्तच्छेषमेव वर्णयितुमारब्धः । अस्येति साक्षात्कारेण मनुंप्रत्यवमृशति । अस्मदुपाध्यायस्य स्वायंभुवइतिख्यातस्य षडन्येऽपरेमनवोवंश्याएकस्मिन्वंशे कुले जाताः सर्वेवंश्याः । सर्वे हि साक्षाद्ब्रह्मणा सृष्टा इत्येककुलसंभवाद्वंश्याउच्यन्ते । अथवा एकस्मिन्कार्येऽधिकृतावंश्या एककर्मान्वयेन प्राणिनांवंशव्यवहारोभवति । द्वौ मुनी व्याकरणस्यवंश्यौ तंचैकंधर्मंदर्शयति सृष्टवन्तःप्रजाः स्वास्वाः इति । मन्वतरे मन्वन्तरे यस्य मनोरधिकारः सएव प्रजानांपूर्वमन्वन्तरविनष्टानांस्रष्टा पालयिता च । अतोयेन याः प्रजा सृज्यन्ते तास्तस्य स्वाभवन्ति ॥ ६१ ॥

(२) सर्वज्ञनारायणः । स्वायंभुवस्येति । अस्य वंशभवाः अन्ये षण्मनवोपि स्वाइति अन्येप्युपलक्ष्याः पूर्ववत् । ६१ ।

(३) कुल्लूकः । स्वायंभुवस्येति । ब्रह्मपुत्रस्यास्य मनोःषड्वंशप्रभवाअन्येमनवः एवंकार्यकारिणःस्वस्वकाले सृष्टिपालनादावधिकृताःस्वाःस्वाःप्रजाउत्पादितवन्तः ॥ ६१ ॥

(४) राघवानन्दः । एते तु कश्यपवंश्याःकिंनामानइत्यपेक्षायामाह स्वायंभुवस्येति त्रिभिः । सृष्टिकरणे तेषांसामर्थ्यमाह अमितौजसइति अमितंओजोबलंज्ञानंतपश्च येषांते तथा ॥ ६१ ॥

(५)नन्दनः । स्वयंभुवोभगवतः शिष्यत्वात्स्वायंभुवइदंशास्त्रमित्यनेनभगवतोहि मनुःशिष्यत्वेनोक्तः ॥ ६१ ॥

(६) रामचन्द्रः । अस्य मनोः षट् वंश्याःअपरे मनवश्चासन् ॥ ६१ ॥

स्वारोचिषश्चोत्तमश्च तामसोरैवतस्तथा ॥ चाक्षुषश्च महातेजाविवस्वत्सुतएवच ॥ ६२ ॥

(१) मेधातिथिः । तान्मनून्नामतोनिर्दिशति । महातेजाइति विशेषणम् । अन्यानि नामानि रूढ्या संबन्धेन वा । विवस्वत्सुतइति समासपदरूपंशब्दान्तरंकृष्णसर्पनरसिंहादिशब्दवत् ॥ ६२ ॥

(२) सर्वज्ञनारायणः । स्वारोचिषइति । विवस्वत्सुतः प्रकृतमन्वन्तराधिपः ॥ ६२ ॥

(३) कुल्लूकः । स्वारोचिषश्चेति । एते भेदेन मनवःषट् नामतोनिर्दिष्टाः ॥ ६२ ॥

(४) राघवानन्दः । तेषांनामापेक्षांपूरयति । स्वारोचिषइत्यादिनामानि । विवस्वत्सुतोयमः ॥ ६२ ॥

(६) रामचन्द्रः । स्वेति । तेषांमनूनां नामान्याह द्वाभ्यां स्वारोचिषइत्यादिना । विवस्वत्सुतोवैवस्वतः ॥ ६२ ॥

स्वायंभुवाद्याःसप्तैते मनवोभूरितेजसः ॥ स्वेस्वेन्तरे सर्वमिदमुत्पाद्यापुश्चराचरम् ॥ ६३ ॥

[कालप्रमाणंवक्ष्यामि यथावत्तन्निबोधत* ॥]

(१) मेधातिथिः । अत्र सप्त मनवोमया प्रोक्ताः । अन्यत्र चतुर्दशसंपद्यन्ते । स्वे स्वेन्तरेऽवसरे प्राप्तेऽधिकारकाले

---

(६२) उत्तमश्च=औत्तमिश्च (अ, द, ध)

* (गं) ॥ इदमर्धं (क) चिन्हितपुस्तके सप्ततिनमश्लोकेपठितम् ।

इति यावत् । उत्पाद्य प्रजा आपुः पालितवन्तः । स्वे स्वेन्तरेऽधिकारावसरे यस्य मनोर्यस्मिन्काले प्राप्तः सर्गस्थितिपालनाधिकारः । अन्येत्वन्तरशब्दंमासादिशब्दवत्कालविशेषवाचिनंमन्यन्ते तदयुक्तम् । मनुशब्दोपसंहितः कालविशेषविषयोमन्वन्तरोनाम कालोनतु केवलइति ॥ ६३ ॥

(२) **सर्वज्ञनारायणः** । स्वायंभुवाद्याइति । आपुर्व्याप्तवन्तश्चराचरंतत्सर्वमध्यतिष्ठन्नित्यर्थः ॥ ६३ ॥

(३) **कुल्लूकः** । स्वायंभुवेति । स्वायंभुवमुखाःसप्तामी मनवः स्वीयस्वीयाधिकारकालेइदंस्थावरजङ्गममुत्पाद्य पालितवन्तः ॥ ६३ ॥

(४) **राघवानन्दः** । इदानीं वर्तमानःस्वेस्वेऽन्तरे स्वकीयस्वकीयमन्वन्तरे इदंस्वानुरूपाः प्रजाउत्पाद्य चराचरंसर्वंआपुः रक्षितवन्तः मनूनांस्वायंभुवादीनां नामतएव मन्वन्तराणामपि नामानीति ध्येयम् ॥ ६३ ॥

(५) **नन्दनः** । अन्तरशब्देन कालविशेषउच्यते । आपुःपान्तिस्म ॥ ६३ ॥

(६) **रामचन्द्रः** । स्वारोचिष २ औत्तम ३ तामस ४ रैवत ५ चाक्षुष ६ वैवस्वत ७ एतेस्वायंभुवाद्याः सप्तमनवः स्वेस्वेन्तरे इदं सर्वंचराचरंमुत्पाद्यापुः अगमन् ॥ ६३ ॥

निमेषादशचाष्टौच काष्ठा त्रिंशत्तुताः कला ॥ त्रिंशत्कलामूहूर्तः स्यादहोरात्रंतु तावतः ॥ ६४॥

(१) **मेधातिथिः** । स्थितिप्रलयकालपरिमाणनिरूपणार्थंज्योतिःशास्त्रगोचरंकालविभागंवक्तुमुपक्रमते । अष्टादश निमेषाः काष्ठानाम कालोभवति । त्रिंशत्काष्ठाः कलात्रिंशत्कलात् । एकोमुहूर्तः स्यात् । तावतःत्रिंशदित्यर्थः । त्रिंशन्मुहूर्तमहोरात्रम् । विद्यादिति क्रियापदमाहृत्य तावदिति द्वितीयाबहुवचनम् ॥ ६४ ॥

(२) **सर्वज्ञनारायणः** । अथ सृष्टिकालसङ्ख्यार्थंकालविभक्तीर्गणयति निमेषाइति । अक्षिपक्ष्मद्वयसंयोगहेतुः कर्मनिमेषः । सयदा शीघ्रस्तदपेक्षयापञ्चदशनिमेषाःकाष्ठा पुराणेषूक्ता । अत्रतुमन्दकर्माभिप्रायेणाष्टादशेति । ताःकाष्ठाः त्रिंशत्कला । तावतस्तावन्तःविभक्तिव्यत्ययात्त्रिंशदित्यर्थः । तावतेतिक्वचित्पाठः ॥ ६४ ॥

(३) **कुल्लूकः** । इदानीमुक्तमन्वन्तरसृष्टिप्रलयादिकालपरिमाणपरिज्ञानायाह निमेषादशचाष्टाविति । अक्षिपक्ष्मणोःस्वाभाविकस्यउन्मेषस्य सहकारीनिमेषः तेष्टादशकाष्ठानामकालः त्रिंशच्च काष्ठाःकलासंज्ञकः त्रिंशत्कलाःमुहूर्ताख्यःकालःतावांश्चत्रिंशन्मुहूर्त्तानहोरात्रंकालंविद्यात् । तावतइति द्वितीयानिर्देशात् विद्यादित्यध्याहारः ॥ ६४ ॥

(४) **राघवानन्दः** । कालंकालविभक्तीश्चेत्युक्तं सर्गादिज्ञापनार्थंविवृणोति निमेषाइति दशभिः । पक्ष्मणोःस्वाभाविकः कम्पोनिमेषःसच मनुष्याधिकारकं शास्त्रमिति न्यायान्मनुष्यस्यैव देवानांनिमेषाभावाच्च तेषामष्टादशनिमेषैःकाष्ठा स्यात् । काष्ठानांत्रिंशताकलास्यात् कलानांत्रिंशतामुहूर्तः दण्डद्वयम् । तावतोमुहूर्तान्त्रिंशन्मुहूर्तान्अहोरात्रंकालंविद्यादिति शेषः ॥ ६४ ॥

(५) **नन्दनः** । अथ सृष्टिसंहारौ कालतः परिच्छेत्तुंकालपरिमाणविभागंतावन्नवभिः श्लोकैराह निमेषाइति । तावतः तावन्तस्तेमुहूर्ताः ॥ ६४ ॥

(६) **रामचन्द्रः** । मन्वन्तरस्य परिमाणार्थं कालस्यपरिमाणमाह निमेषेति । अष्टादशनिमेषैःकाष्ठासंज्ञोच्यते ।

---

(६३) चापुश्च=चायुश्च (क, ख, ग)

* स्वाभाविकस्य उन्मेषस्य सहकारी=स्वभाविकःउन्मेषसंकोचः (अ)

तास्तुत्रिंशत्काष्ठाःकलात्रिंशत्कलात्मकःकालोमुहूर्तःस्यात् । तावतामुहूर्तेन त्रिंशदिति त्रिंशन्मुहूर्तात्मके न कालेन अहोरात्रंस्यात्मानुषाणाम् ॥ ६४ ॥

अहोरात्रे विभजते सूर्योमानुषदैविके ॥ रात्रिःस्वप्नाय भूतानांचेष्टायै कर्मणामहः ॥ ६५ ॥

(१) **मेधातिथिः** । अथ कोयंनिमेषोनाम । अक्षिपक्ष्मगोर्नैसर्गिककर्मोन्मेषसहचारी । अन्यैस्तु पठितं यावताकालेनाविकृतमक्षरमुच्चार्यते सनिमेषः । अहश्च रात्रिश्च तेअहोरात्रे । तयोर्विभागंकरोति । आदित्यउदितआदित्येयावत्तदीयारश्मयोदृश्यन्तेतावदहर्व्यवहारः । अस्तमिते तु प्रागुदयाद्रात्रिव्यवहारः । मनुष्यलोके देवलोके वा यत्र तदादित्योन व्याप्नोति रश्मिभिस्तत्र कथमयमहोरात्रविभागोविज्ञेयोऽतआह रात्रिःस्वप्नायेति । स्वयंप्रभेषु भूतेषु नित्यप्रकाशत्वात्कर्मचेष्टाकार्यारम्भेण स्वापेन च विभागः । यथैवौषधीनांनियतः प्रादुर्भावकालः स्वाभाव्यादेवंकर्मचेष्टास्वापावपि कालस्वभावतएव नियतौ ॥ ६५ ॥

(२) **सर्वज्ञनारायणः** । अहोरात्रेइति । सूर्योयथा मानुषमहोरात्रंविभजते तथा दैविकमप्ययनस्य सूर्यगत्यधीनत्वात् । पित्र्याहोरात्रस्य तु तिथिनियतत्वेन चन्द्रनियम्यत्वान्न सूर्योनियामकः । मानुषलौकिकइतिक्वचित्पाठः । तत्र मानुषलोकसंबन्धिनीइत्यर्थः । यद्यपिलोके तादृगन्धकारादेव रात्रित्वाभिव्यञ्जकस्याभावस्तथापि चेष्टानिवृत्त्यैतथोच्यतइत्याह रात्रिरिति । स्वस्याभिर्व्याप्तिर्बाह्यनिवृत्तिकृता स्वप्नश्चेष्टानिवृत्तिः तदर्थंयःकालः सरात्रिः भूतानां कर्मणांक्रियाणां चेष्टायै निष्पादनाय ॥ ६५ ॥

(३) **कुल्लूकः** । अहोरात्रेइति । मानुषदैवसम्बन्धिनौ दिनरात्रिकालावादित्यःपृथक्करोति । तयोर्मध्ये भूतानांस्वप्नार्थंरात्रिर्भवति । कर्मानुष्ठानार्थंच दिनम् ॥ ६५ ॥

(४) **राघवानन्दः** । एतत्सर्वंसूर्यक्रियाकृतमित्याह अहोरात्रेइति । मानुषदैविकेइति ब्राह्मपित्र्ययोरप्युपलक्षणम् । स्वप्नाय निर्व्यापाराय । चेष्टायै कर्मणांकर्मानुष्ठानार्थंबहिरिन्द्रियाणांप्रवृत्त्यर्थंवा । भूतानांमनुष्यपितृदेवब्रह्मणाम् ॥ ६५ ॥

(५) **नन्दनः** । अहोरात्रपरिच्छेदकारणमाह अहोरात्रेइति । मानुषदैविके मनुष्यदेवसंबन्धेअहोरात्रेसूर्यउदयास्तमयाभ्यांविभजते । पित्र्यहोरात्रस्याप्युपलक्षणमेतत् ॥ ६५ ॥

(६) **रामचन्द्रः** । अहरिति । सूर्यः स्वगत्या मानुषदैविके अहोरात्रे अहश्च रात्रिश्च अहोरात्रेविभजते विभागंकरोति । भूतानांप्राणिनांरात्रिःस्वप्नाय शयनार्थं कर्मणांचेष्टायै कर्मणांक्रियायैअहःसंज्ञः ॥ ६५ ॥

पित्र्ये रात्र्यहनी मासःप्रविभागस्तुपक्षयोः ॥ कर्मचेष्टास्वहःकृष्णःशुक्लःस्वप्नाय शर्वरी ॥६६॥

(१) **मेधातिथिः** । योमनुष्याणांमासः सपितृणामहर्निशम् । कतरदहः कतमा च रात्रिरिति प्रविभागः इदमहरियंरात्रिरित्येषविभागः । पक्षयोःपञ्चदशरात्रिसंमितयोरर्धमासयोर्व्यवस्थितः पक्षाश्रितइत्यर्थः । एकः पक्षोहरपरोरात्रिस्तयोश्च भिन्नस्वभावत्वान्नियतक्रमत्वाच्च विशेषमाह । अहः कृष्णःपक्षः शुक्लःपक्षः शर्वरी रात्रिः । कर्मचेष्टाभ्यइति युक्तः पाठोयथा स्वप्नायेति तादर्थ्यमेवविषयभावेन विवक्षितंवृत्तानुरोधादतःसप्तमी ॥ ६६ ॥

(२) **सर्वज्ञनारायणः** । पित्र्येइति । पक्षयोःपक्षाभ्यांविभागः कर्मचेष्टासु पितृकर्मार्थं चेष्टासु कर्तव्यासु कृष्णः पक्षोहस्त्वेनहेतुः । एवमुत्तरत्र ॥ ६६ ॥

(३) कुल्लूकः । पित्र्येइति । मानुषाणांमासःपितॄणामहोरात्रेभवतः । तत्र पक्षद्वयेन विभागः कर्मानुष्ठानाय † पूर्वपक्षोऽहः स्वापार्थंशुक्लपक्षोरात्रिः ॥ ६६ ॥

(४) राघवानन्दः । ततःकिमित्यतआह पित्र्येइति । प्राधान्यान्निमेषाइत्यनेन प्राप्तमानांनृणांपञ्चदशाहोरात्रैःपक्षः तयोर्द्वयंमासः । सच पित्र्येराज्यहनी प्रविभागः पक्षयोःप्रविभक्तयोः पक्षयोर्मध्ये कृष्णोहः । सच साधुःकर्मचेष्टासु पितॄणांशुक्लःपक्षःशर्वरी सच तेषांस्वप्नायेति तयोर्विभागः। अहरित्यतिदेशोयंखलेकपोतन्यायेन कार्यार्थः। अविकृते तादृशे काले यथा पशुर्बध्यते तथात्र कृष्णपक्षश्राद्धादिकं क्रियतइति ॥ ६६ ॥

(५) नन्दनः । अथ पितॄणामहोरात्रपरिमाणमाह पित्र्येइति । प्रविभागउच्यतइतिशेषः । कर्मचेष्टासु कर्मचेष्टार्थमित्यर्थः । पितृलोकेसूर्यः । कृष्णपक्षे ननु शुक्लपक्षे । तस्मात्कृष्णशुक्लपक्षौ पितॄणामहोरात्रेतेनपित्र्यकर्मानुष्ठाने कृष्णपक्षः प्रशस्तइति शास्त्रेषूच्यते ॥ ६६ ॥

(६) रामचन्द्रः । पितॄणामहोरात्रमाह पित्र्यइति । मासःकृष्णादिमासःपित्र्ये पितॄणांराज्यहनी रात्रिश्च अहश्च राज्यहनी च कृष्णशुक्लपक्षयोःप्रविभागः । कर्मचेष्टासुअहःस्मृतःकृष्णपक्षोऽहःस्मृतःशुक्लःशुक्लपक्षःस्वप्नाय निद्रायैशर्वरीरात्रिसंज्ञेति ज्ञेयमिति ॥ ६६ ॥

दैवे राज्यहनी वर्षं प्रविभागस्तयोः पुनः ॥ अहस्तत्रोदगयनंरात्रिःस्याद्दक्षिणायनम् ॥ ६७ ॥

(१) मेधातिथिः । वर्षंमनुष्याणांद्वादशमासास्तदेकमहोरात्रंदेवानाम् । तयोश्च विभागउदगयनदक्षिणाभ्यांतत्रोदीचींदिशमभिप्रतिष्ठमानस्यादित्यस्य षण्मासाउदगयनंभवति । अयनंगमनमधिष्ठानंवा । तस्यांदिशि षण्मासानादित्यउदति । ततः परावृत्तस्य दक्षिणायनम् । तथा हि दक्षिणांदिशमाक्रम्योदीचींहित्वा ह्युदयंकरोति ॥ ६७ ॥

(२) सर्वज्ञनारायणः । दैवेइति । उदगयनात्सूर्यक्रियानिमित्ततोक्तेः सौरमानऋतुवत्सरस्यैवाहोरात्रत्वंन चान्द्रमानेन ॥ ६७ ॥

(३) कुल्लूकः । दैवे राज्यहनी वर्षमिति । मानुषाणांवर्षंदेवानांरात्रिदिने भवतः । तयोरप्ययंविभागः नराणामुदगयनंदेवानामहः । तत्र प्रायेण दैवकर्मणामनुष्ठानं दक्षिणायनंतु रात्रिः ॥ ६७ ॥

(४) राघवानन्दः । तथादैवेइति । नृद्वादशभिर्मासैः वर्षंतच्चदैवे राज्यहनी तयोरुदगयनंदैवकर्मयज्ञादि प्रवृत्त्यर्थमहः दक्षिणायनंरात्रिरिति विभागः ॥ ६७ ॥

(५) नन्दनः । देवलोके सूर्यउत्तरायणे दृश्यते न तु दक्षिणायने । तस्मादेतद्देवानामहोरात्रम् ॥ ६७ ॥

(६) रामचन्द्रः । दैवइति देवानामहःपरिमाणमाह । वर्षंसंवत्सररूपं कालंदेवानांराज्यहनीइत्युच्यते पुनस्तयोराज्यन्होः प्रविभागःक्रियते । तत्र विभागे उदगयनं उत्तरायणं देवानामहरुच्यते । दक्षिणायनंरात्रिःस्यात् ॥ ६७ ॥

ब्राह्मस्य तु क्षपाहस्य यत्प्रमाणं समासतः ॥ एकैकशोयुगानांतु क्रमशस्तन्निबोधत ॥ ६८ ॥

(१) मेधातिथिः । ब्रह्मा प्रजानांस्रष्टा तस्य योलौकिकस्तत्रक्षपाहस्याहोरात्रस्य यत्प्रमाणंयुगानांचैतत्समासतः संक्षेपेण निबोधत मत्सकाशाच्छृणुत । एकैकशएकैकस्य युगस्य वक्ष्यमाणस्य प्रकरणस्य पिण्डार्थकथनार्थोऽयंश्लोकः श्रोतॄणामवधारणार्थः । तथा च संनुध्यन्ते निबोधतेति । प्रकृते कालविभागे पुनः प्रतिज्ञाकरणंतत्त्वज्ञापनार्थम् । तेन वक्ष्य-

---

† पूर्वपक्षः=कृष्णपक्षः (अ)

माणोऽर्थो न शास्त्रारम्भशषएवापि तु धर्मायापि । तथाच वक्ष्यति ब्राह्मंपुण्यमहर्विदुरिति । तद्वेदनाच्च पुण्यंभवतीत्यर्थः ॥ ६८ ॥

(२) **सर्वज्ञनारायणः** । ब्राह्मस्येति । क्षपाहस्याहोरात्रस्य । समासतःसंक्षेपतः ॥ ६८ ॥

(३) **कुल्लूकः** । ब्राह्मस्येति । ब्रह्मणोऽहोरात्रस्य यत्परिमाणंप्रत्येकंयुगानांच कृतादीनांतत्क्रमेण समासतःसङ्क्षेपतःशृणुत । प्रकृतेपि कालविभागे यद्ब्रह्मणोऽहोरात्रस्य पृथक्प्रतिज्ञानंतत्तदीयज्ञानस्य पुण्यफलज्ञानार्थम् । वक्ष्यति च ब्राह्मंपुण्यमहर्विदुरिति । तद्वेदनात्पुण्यंभवतीत्यर्थः ॥ ६८ ॥

(४) **राघवानन्दः** । किंच मनुष्यस्य युगानांसत्यत्रेताद्वापरकलिसंज्ञकानांचतुर्णांप्रमाणंतुब्रह्मणः क्षपाहस्यक्षपारात्रिःतया सहअहःक्षपाहः तस्य प्रमाणमिति प्रतिज्ञाद्वयम् । प्रमाणं परिमाणम् ॥ ६८ ॥

(५) **नन्दनः** । ब्राह्मस्य हैरण्यगर्भस्य प्रमाणंपरिमाणंक्रमशोऽर्थक्रमेण ननिर्दिष्टक्रमेण ॥ ६८ ॥

(६) **रामचन्द्रः** । ब्रह्मणः दिवसस्य परिमाण कालमाह ब्राह्मेति । ब्राह्मस्य क्षपाहस्य क्षपा रात्रिः अहःदिवसः एतयोःयत्प्रमाणं वर्षाणां यत्परिमाणं अहंकथयिष्ये । समासतः कृतादीनांएकैकशःपरिमाणं क्रमशोवक्ष्ये ॥ ६८ ॥

चत्वार्याहुः सहस्राणि वर्षाणांतत्कृतंयुगम् ॥ तस्य तावच्छतीसंध्या संध्यांशश्चतथाविधः॥६९॥

(१) **मेधातिथिः** । प्रकृतत्वाद्दैविकानि वर्षाणि परिगृह्यन्ते । तथा च पुराणकारः इत्येतदृषिभिर्गीतं । दिव्यया संख्यया द्विजाः दिव्येनैव प्रमाणेन युगसंख्या प्रकीर्तिता ॥ तानि चत्वारिसहस्राणि कृतयुगंनामकालस्तस्य कृतयुगस्य तावन्त्येव शतानि चत्वारि संध्या । संध्यांशस्तस्य तथाविधस्तत्परिमाणश्चत्वारिवर्षशतानीत्यर्थः। तत्रातीतस्य कालस्यागामिनश्च स्वभावानुवृत्तिः सा संध्या । उभयकालधर्मानुविधानंसंध्यांशोयत्रेषत्पूर्वधर्मानुवृत्तिर्भूयसी भाविनोयुगस्य ॥६९॥

(२) **सर्वज्ञनारायणः** । चत्वारीति । देवमानेन चत्वारि सहस्राणि वर्षाः कृतम् । तस्य च चत्वार्येव शतानिदैवेन सन्ध्या पूर्वसन्ध्या सन्ध्यांशउत्तरयुगादिसन्ध्याभागतयोत्तरसन्ध्योच्यते सोपितावानेवेत्यर्थः ॥ ६९ ॥

(३) **कुल्लूकः** । चत्वार्याहुरिति । चत्वारि वर्षसहस्राणि कृतयुगकालंमन्वादयोवदन्ति तस्य तावद्वर्षशतानि सन्ध्यासन्ध्यांशश्च भवति । युगस्य पूर्वासन्ध्याउत्तरश्च सन्ध्यांशः । तदुक्तं विष्णुपुराणे तत्प्रमाणैः शतैःसन्ध्यापूर्वा तत्राभिधीयते । सन्ध्यांशकश्च तत्तुल्योयुगस्यानन्तरोहियः ॥ सन्ध्यासन्ध्यांशयोरन्तर्यःकालोमुनिसत्तम । युगाख्यःसतुविज्ञेयःकृतत्रेतादि संज्ञकः ॥ वर्षसङ्ख्याचेयंदिव्यमानेन तस्यैवान्तरप्रकृतत्वात् दिव्यैर्वर्षसहस्रैस्तु कृतत्रेतादि संज्ञितम् चतुर्युगंद्वादशभिस्तद्विभागंनिबोध म इतिविष्णुपुराणवचनाच्च ॥ ६९ ॥

(४) **राघवानन्दः** । तत्र सत्ययुगसङ्ख्यामाह चत्वारीति । कृतंसत्याख्यं वर्षाणांदेवसंवत्सराणांचतुर्युगपरिमाणेन दैवद्वादशसहस्रस्य न्यूनताप्राप्तिंसन्ध्यासन्ध्यांशाभ्यांपूरयन्नाह तस्येति । तावच्छती चतुःशती सन्ध्यासन्ध्यांशः सन्ध्ययोःपूर्वापरभागः सतथाविधश्चतुःशतपरिमाणः तेनाष्टशताधिकचतुःसहस्रपरिमितंकृतम् ॥ ६९ ॥

(५) **नन्दनः** । वर्षाणांदेववर्षाणांसन्ध्यायुगारम्भकालः सन्ध्यांशोयुगावसानकालः ॥ ६९ ॥

(६) **रामचन्द्रः** । युगानांपरिमाणमाह चत्वारीति । वर्षाणां चत्वारि सहस्राणि तत्कृतयुगमाहुः । तस्य कृतयुगस्य सन्ध्या तावती चत्वारिंशत् शतानि भवन्ति तथाविधः तेनप्रकारेण सन्ध्यांशश्च तावती चतुःशतानि भवन्ति ॥ ६९ ॥

इतरेषु ससंध्येषु ससंध्यांशेषु च त्रिषु ॥ एकापायेन वर्तन्ते सहस्राणि शतानि च ॥ ७० ॥

(१) **मेधातिथिः** । कृतयुगादन्येषु त्रेतादिषु सन्ध्यासन्ध्यांशसहितेषु सहस्राण्येकापायेन वर्तन्ते । हानिरपायः । एकंसहस्रंहीनं त्रेतायां कृतयुगात् । एवं त्रेताऽतोद्वापरस्य द्वापरात्कलेः । एवं च त्रीणिवर्षसहस्राणि त्रेता द्वे द्वापर एकंक-लिरिति भवति । शतानिहीयन्ते सन्ध्यातदंशयोर्विशिष्टोहः संघातोयुगाख्यस्तस्य विशेषाः कृतादयः। तावच्छतीति ईकारः स्मर्तव्यः । इह स्मृतिः तावतांशतानांसमाहारस्तावच्छब्दस्यबहुगणवतुडतीति वत्वन्तत्वात्संख्यासंज्ञायांसत्यां संख्यापूर्वो-द्विगुरिति द्विगुसंज्ञायां सत्यां टापोपवादोद्विगोरिति ङीप् । शतंपरिमाणमस्य यत्तदेतेभ्यइति वतुप् । आसर्वनाम्नइत्या-कारः । अन्यथाबहुव्रीहौ तावन्तिशतानियस्याः शतशब्दस्याकारान्तत्वादजाद्यतष्टाबिति टापाभवितव्यम् । तस्मिन्कृते तावच्छताइतिस्यादित्यभिप्रायः ॥ ७० ॥

(२) **सर्वज्ञनारायणः** । इतरेष्विति । ससन्ध्येषु ससन्ध्यांशेषु युगेषु यावन्त्युक्तान्यब्दसङ्ख्यात्वेन शतानि सह-स्राणि च तान्येकैकसंख्यापायेनोक्तक्रमादन्ययुगेषु । सहस्रत्रयंशतत्रयंच त्रेतायाः द्वे द्वे द्वापरस्यैकैकंकलेरित्यर्थः ॥७०॥

(३) **कुल्लूकः** । इतरेष्विति । अन्येषु त्रेताद्वापरकलियुगेषु सन्ध्यासन्ध्यांशसहितेषुएकहान्या सहस्राणि शतानि च भवन्ति । तेनैवंसम्पद्यते । त्रीणि वर्षसहस्राणि त्रेतायुगंतस्य त्रीणि वर्षशतानि सन्ध्यासन्ध्यांशश्च । एवंद्विवर्षसहस्रेद्वापरः तस्य द्वे वर्षशतेसन्ध्या सन्ध्यांशश्च । एवंवर्षसहस्रंकलिः तस्यैकवर्षशतंसन्ध्यासन्ध्यांशश्च ॥ ७०॥

(४) **राघवानन्दः** । इतरेषु त्रेताद्वापरकलिसंज्ञकेषुएकापायेनेत्ययमर्थः । त्रेताख्यंयुगंषट्शताधिकसहस्रत्रितयप-रिमितम् । द्वापराख्यं चतुःशताधिकसहस्रपरिमितम् । कलिसंज्ञकं द्विशताधिकसहस्रपरिमितमिति ॥ ७० ॥

(५) **नन्दनः** । इतरेषु त्रेताद्वापरकलियुगेषु । एकापायेनएकलोपेन ॥ ७० ॥

(६) **रामचन्द्रः** । इतरेषु त्रेतादिषु त्रिषु सन्ध्येषु सन्ध्यांशेषु सहस्राणि शतानि च एकापायेनएक चरणन्यूना-ब्देनप्रवर्तन्ते । तद्यथा त्रेतायुगंत्रीणि सहस्राणि त्रिशतानि पूर्वसन्ध्या तथा सन्ध्यांशश्च त्रिशतानि च द्वापरंयुगंद्विसहस्राणि द्विशतानि सन्ध्या तथा सन्ध्यांशः द्विशतानि कलिः कलियुगं एकसहस्रमेकशतसंन्ध्या तथा सन्ध्यांशः एकशतम् ॥ ७०॥

यदेतत्परिसंख्यातमादावेव चतुर्युगम् ॥ एतद्द्वादशसाहस्रंदेवानांयुगमुच्यते ॥ ७१ ॥

(१) **मेधातिथिः** । यदेतदिति लौकिकीवाचोयुक्तिः । समुदायेनप्रक्रान्तोऽर्थः परामृश्यते । यदेतच्चतुर्युगंपरिसंख्यातं चत्वारिसहस्राणीत्यादिना निश्चितसंख्यमादौ प्रागस्मादिच्छ्लोकाकस्य चतुर्युगस्य द्वादशभिः सहस्रैर्देवानांयुगमुच्यते । द्वाद-शचतुर्युगसहस्राणि देवयुगंनामकालइत्यर्थः । सहस्रशब्दात्स्वार्थेऽण् । द्वादशचतुर्युगसहस्राणि परिमाणं यस्मिन्निति विग्रहः ॥ ७१ ॥

(२) **सर्वज्ञनारायणः** । यदेतदिति । एतच्चतुर्युगंद्वादशसाहस्रंद्वादशभिर्वत्सरसहस्रैर्दैविकैर्भवति । तच्च देवाना-मेकंयुगमुच्यते ॥ ७१ ॥

(३) **कुल्लूकः** । यदेतदिति । एतस्य श्लोकस्यादौ यदेतन्मानुषंचतुर्युगंपरिगणितंएतद्देवानांयुगमुच्यते । चतुर्युग-शब्देनसन्ध्यासन्ध्यांशयोरग्रमिशङ्कायामाह एतद्द्वादशसाहस्रमिति । स्वार्थेऽण् । चतुर्युगैरेव द्वादश*संख्यैर्दिव्यंयुगमिति तु मे-धातिथिभ्रमोनादर्तव्यः मनुनानन्तरंदिव्ययुगसहस्रेण ब्रह्माहस्याप्यभिधानात् विष्णुपुराणे च मानुषचतुर्युगसहस्रेण ब्रह्मा-

---

* द्वादश=द्वादशसहस्र (अ)

हकीर्तनान्मानुषचतुर्युगेनैव दिव्ययुगानुगमनात्। तथा च विष्णुपुराणम् कृतत्रेताद्वापरंच कलिश्चेति चतुर्युगम्। प्रोच्यते तत्सहस्रंतु ब्रह्मणोदिवसोमुने ॥ ७१ ॥

(४) **राघवानन्दः** । दैवयुगमाह यदिति । एतानि द्वादशसहस्राणि क्रियापरिच्छेदकानि यस्य ॥ ७१ ॥

(५) **नन्दनः** । साहस्रंदेवानामिति पूर्वोत्तराभ्यां संगच्छते ॥ ७१ ॥

(६) **रामचन्द्रः** । एतद्द्वादशसहस्रंद्वादशसहस्रककालोदेवानांयुगमुच्यते ॥ ७१ ॥

दैविकानांयुगानांतु सहस्रंपरिसंख्यया ॥ ब्राह्ममेकमहर्ज्ञेयंतावतीरात्रिमेवच ॥ ७२ ॥

(१) **मेधातिथिः** । दैवयुगसाहस्रंब्राह्ममेकमहः । तावती ब्रह्मणोरात्रिर्दैवयुगसहस्रमेव । परिसंख्यया संख्यानेन यत्सहस्रमितिसंबन्धः । श्लोकपूरणार्थश्चायमनुवादः । नह्यसंख्यया सहस्रादिव्यवहारः । हेतौतृतीया ॥ ७२ ॥

(२) **सर्वज्ञनारायणः** । दैविकानामिति । रात्रिःप्रलयकालः ॥ ७२ ॥

(३) **कुल्लूकः** । दैविकानामिति । देवयुगानांसहस्रंब्राह्मदिनंज्ञातव्यंसहस्रमेव रात्रिः । परिसंख्ययेति श्लोकपूरणोऽर्थानवादः ॥ ७२ ॥

(४) **राघवानन्दः** । ब्राह्ममहराह । दैविकानांदेवमानेन द्वादशसहस्राब्दात्मकानांपरिसंख्यया गणनया सहस्रं ब्राह्ममहः । ब्रह्मात्रविराट्तस्य संबन्धितया तावतीरात्रिःदेवयुगसहस्रपरिमितेत्यर्थः । अतोभिधानंदैवे युगसहस्रे द्वे ब्राह्मशतत्वेत्वहोरात्रे मनुष्याणांयुगानामष्टौ सहस्राणि । कृतं त्रेताद्वापरंचकलिश्चेति चतुर्युगम् प्रोच्यते तत्सहस्रंतु ब्रह्मणोदिवसं मुनेइति विष्णुपुराणोक्तेः ॥ ७२ ॥

(५) **नन्दनः** । ब्राह्मंहैरण्यगर्भम् ॥ ७२ ॥

(६) **रामचन्द्रः** । दैवानांयुगानांसहस्रसङ्ख्यया ब्राह्ममहः ब्रह्मणः एकंज्ञेयंरात्रिरेवतावती संख्यायुगानांसहस्रसङ्ख्ययारात्रिर्ज्ञातव्या ॥ ७२ ॥

तद्वै युगसहस्रान्तंब्राह्मंपुण्यमहर्विदुः ॥ रात्रिंच तावतीमेव तेऽहोरात्रविदोजनाः ॥ ७३ ॥

(१) **मेधातिथिः** । युगसहस्रमन्तोयस्याह्नस्तद्युगसहस्रान्तम् येमनुष्याएतज्जानते तेऽहोरात्रविदः । किंतेषामित्यपेक्षायां पुण्यभवतीति संबन्धः । ब्राह्मस्याह्नः परिमाणवेदनंपुण्यंमतस्तद्वेदितव्यमितिस्तुत्या विधिप्रतिपत्तिः ॥ ७३ ॥

(२) **सर्वज्ञनारायणः** । नन्वस्तु ब्रह्मणोदिनव्यवस्था रात्रिव्यवस्थातुकथंसूर्यगत्यादेस्तदवच्छेदकस्याभावादत आह तद्यतइति । ये ब्रह्मलोकनिवासिनः स्वलोकस्थोपाध्यवच्छेदेन ब्राह्ममहर्युगसहस्रपरिसमाप्तंविदुस्ते रात्रिमपि तावतीमेव तथा च तल्लोकस्थोपाधिरेवावच्छेदइत्यर्थः । पूर्वंचतुर्मुखापवर्गानन्तरकल्पभाविचतुर्मुखतासृष्टिरुक्ता ॥ ७३ ॥

(३) **कुल्लूकः** । तद्वैयुगेति । युगसहस्रेणान्तःसमाप्तिर्यस्य तद्ब्राह्ममहस्तत्परिमाणांच रात्रिंये जानन्तितेऽहोरात्रज्ञाइति स्तुतिरियम् । स्तुत्या च ब्राह्ममहोरात्रंज्ञातव्यमिति विधिः परिकल्पते । अतएततत्पुण्यहेतुत्वात्पुण्यमितिविशेषणकृतम् ॥ ७३ ॥

(४) **राघवानन्दः** । किंच तद्वाइति । पुण्यंपुण्य हेतुत्वात् । तद्वै युगेत्यनुवादः । अहोरात्रत्वंविधेयम् ॥ ७३ ॥

---

(७३) तद्वैयुगसहस्रान्तं=तथैवयुगसाहस्रम् (क)
=एतयुगसहस्रंतु (ग)
=एतयुगसहस्रान्तं (ख)

(५) नन्दनः । अथ हिरण्यगर्भाहोरात्रविदांफलमाह तद्वाइति । युगसहस्रान्तंदेवयुगसहस्रान्तंत्वपरिमाणविदांपुण्यफलप्रदत्वात्पुण्यंतद्ब्राह्ममहस्तावतींरात्रिंच ये विदुस्ते जनाअहोरात्रविदोभवन्ति ब्रह्मलोकंप्राप्य ब्रह्माहोरात्रपरिवृत्तिमनुसंदधतइत्यर्थः ॥ ७३ ॥

(६) रामचन्द्रः । दैविकेप्यन्यन्मतम् । ते ब्रह्मलोकनिवासिनोजनाः अहोरात्रविदः ब्रह्मणः अहोरात्रंजानन्ति॥७३॥

तस्य सोऽहर्निशस्यान्ते प्रसुप्तःप्रतिबुध्यते ॥ प्रतिबुद्धश्च सृजति मनःसदसदात्मकम् ॥ ७४ ॥

(१) मेधातिथिः । सब्रह्मा तावतींदीर्घांनिशामनुभूय निद्रांप्रतिबुध्यते । ततःपुनर्जगत्सृजति । स्वापोब्रह्मणउक्तरूपः । नह्यसौ प्राकृतपुरुषवत्स्वपिति नित्यंप्रतिबोधात् । तत्र सर्गक्रममाह मनः सदसदात्मकमिति । ननु चापएवससर्जादावित्युक्तम् । केचिदाहुर्द्विविधः प्रलयः महाप्रलयोऽवान्तरप्रलयश्च । अवान्तरप्रलये ऽयंक्रमः । मनश्चात्र न तत्त्वान्तर्गतंतस्य पूर्वमुत्पन्नत्वात् । किंतर्हि प्रजापतिः प्रबुद्धः मनःसर्गाय सृजति नियुङ्क्तइत्यर्थः । द्वितीयेतुमहाप्रलयपक्षे मनः कारणत्वान्महत्तत्वमेवमनस्ततश्च प्रागुक्तंमहानिति । पुराणेहि मनोमहान्मतिर्बुद्धिर्महत्तत्वं च कीर्त्यते।पर्यायवाचकाः शब्दामहतः परिकीर्तिता इति ॥ ७४ ॥

(२) सर्वज्ञनारायणः। अथतस्यैवाहोराम्यन्तर्भाविनमवान्तरसृष्टिक्रममाह तस्येति । मनोमहान्तंवर्तमानावर्तमान वस्तूपादानभूतम् ॥ ७४ ॥

(३) कुल्लूकः । तस्येति । सब्रह्मा तस्य पूर्वोक्तस्य स्वीयाहोरात्रस्य समाप्तौ प्रतिबुद्धोभवति । प्रतिबुद्धश्च स्वीयंमनःसृजति भूर्लोकादित्रयसृष्टये नियुङ्क्ते न तु जनयति । तस्य महाप्रलयानन्तरंजातत्वादनष्टत्वाच्चावान्तरप्रलये भूर्लोकादित्रयमात्रनाशात् सृष्ट्यर्थमनोनियुक्तिरेव मनःसृष्टिः । तथा च पुराणे श्रूयते मनःसिसृक्षया युक्तंसर्गाय निदधे पुनरिति । अथवा मनःशब्दोयंमहत्तत्त्वपरएव । यद्यपि तन्महाप्रलयान्तरमुत्पन्नंमहान्तमेव चेत्यादिना सृष्टिरपि तस्योक्ता तथाप्यनुक्तंभूतानामुत्पत्तिक्रमंतद्गुणांश्च कथयितुं महाप्रलयानन्तरितामेव महदादिसृष्टिंभूतसृष्टिंच हिरण्यगर्भस्यापि § परमार्थत्वात्तत्कर्तृतामनुवदति । एतेनेदमुक्तंभवति । ब्रह्मा महाप्रलयानन्तरितसृष्ट्यादौपरमात्मरूपेण महदादितत्त्वानि जगत्सृष्ट्यर्थंसृजति । अतएव शेषे वक्ष्यति इत्येषासृष्टिरादितइति । अवान्तरप्रलयानन्तरंतु मनःप्रभृतिसृष्टावभिधानक्रमेणैव प्राथम्यप्राप्तिरित्येषासृष्टिरादितइति निष्प्रयोजनोनुवादःस्यात् ॥ ७४ ॥

(४) राघवानन्दः । अहोरात्रादिपरिमाणफलमाह तस्येति । अहर्निशस्य अहश्चनिशाचेति अहर्निशंतस्य निशायाअन्तइत्यर्थः । प्रतिबुद्धः किंचकारेत्याह प्रतिबुद्धश्चेति । मनोलिङ्गशरीरंतत्तत्प्राण्यदृष्टसंयुक्तं सृजति प्रेरयति पुनर्भोगाय तन्मनोऽकुरुतात्मन्वीस्यांततआपोजायन्तइति श्रुतेः॥ ७४ ॥

(५) नन्दनः । सभगवांस्तस्यब्रह्मणोऽहर्निशस्यअह्नांनिशानांचान्तेआयुषोऽन्तइत्यर्थः । नचैवंनिशान्तइत्येववक्तव्यम् । प्रसुप्तस्तावन्तंकालमुपरतक्रियोभूत्वा प्रतिबुध्यते पुनः सृष्ट्युन्मुखोभवति । सदसदात्मकंप्रकृतिविकृत्यात्मकम् । अत्र मनश्शब्देन महदहंकारमनांसि गृह्यन्ते नातिमहत्त्वात्तेषांवैषम्यस्य ॥ ७४ ॥

(६) रामचन्द्रः । तस्येति सब्रह्मा तस्य सहस्राहर्निशस्यान्ते प्रसुप्तः शयनंकरोति निद्रायाअन्तेप्रतिबुध्यते जागर्ति । प्रतिबुद्धः सन्सदसदात्मकंकार्यकारणात्मकंमनः सृजति ॥ ७४ ॥

---

§ परमार्थ=परमात्म (अ)

मनःसृष्टिंविकुरुते चोद्यमानंसिसृक्षया ॥ आकाशंजायते तस्मात्तस्य शब्दंगुणंविदुः ॥ ७५॥

(१) **मेधातिथिः** । उक्ताऽप्येषा तत्त्वस्यसृष्टिर्योविशेषोनोक्तस्तत्प्रतिपादनाय पुनरुच्यते ब्रह्मणा चोद्यमानं-तस्मान्नोदितादाकाशंजायते । तस्याकाशस्य शब्दाख्योगुणोभवति । गुणआश्रितउच्यते । आकाशांतस्याश्रयोनह्याकाश विना शब्दस्य संभवः ॥ ७५ ॥

(२) **सर्वज्ञनारायणः** । मनइति । सृष्टिंसृज्यंविकुरुते तद्रूपेण विक्रियते । ईश्वरस्य सिसृक्षया प्रेर्यमाणंतस्ये-च्छया तस्मादहंकारतया परिणतात् यद्यद्विशिष्टमेव गम्यते सतस्य गुणइति राजवार्त्तिकम् ॥ ७५ ॥

(३) **कुल्लूकः** । मनःसृष्टमिति । मनोमहान्सृष्टिंकरोति परमात्मनःस्रष्टुमिच्छया प्रेर्यमाणंतस्मादाकाशमुत्पद्यते । तच्च पूर्वोक्तानुसारादहङ्कारतन्मात्रक्रमेणाकाशस्य शब्दंगुणंविदुर्मन्वादयः ॥ ७५ ॥

(४) **राघवानन्दः** । लिङ्गशरीराभिव्यक्त्यनन्तरं स्थूलाकारादिसृष्टिः अतआह मनइति । सृष्टेर्मनः कर्तृ चोद्यमा-नंजीवादृष्टाकृष्टंसतसृष्टिंस्थूलाकारादि कुरुते हिरण्यगर्भावच्छेदकत्वेनापञ्चीकृतानामाकाशादीनांतदानींसत्त्वात् न तेषांप्रजा-पतिसृष्टत्वमिन्द्रियाणांवा ॥ ७५ ॥

(५) **नन्दनः** । सिसृक्षया भगवतः ॥ ७५ ॥

(६) **रामचन्द्रः** । मनइति । सिसृक्षया सृष्टेः शिक्षया नोद्यमानंतामसाहंकारात्मकंमनः सृष्टिंविकुरुते करोति तस्मा-त्तामसाहंकारात्आकाशंआकाशसंज्ञंप्रथमंजायते तस्याकाशस्यगुणंशब्दंविदुः शब्दगुणमाकाशमित्यर्थः ॥ ७५ ॥

आकाशात्तु विकुर्वाणात्सर्वगन्धवहः शुचिः ॥ बलवाञ्जायते वायुःसवै स्पर्शगुणोमतः ॥ ७६ ॥

(१) **मेधातिथिः** । भूताद्भूतान्तरस्योत्पत्तिर्नेष्यते । महतः सर्वभूतानामुत्पत्त्यभ्युपगमात्तेनैवंव्याख्यायते । आका-शादनंतरंमहतोविकुर्वाणात्स्पर्शमात्राभावंगताद्वायुर्जायते सर्वगन्धाञ्छुचीनशुचींश्च वहति । अथचशुचिः पवित्रः । बलवा-न्काचिच्चलनक्रतिश्चेष्टारूपा सा वायुकर्मणः कम्पाक्षेपोर्ध्वाधस्तिर्यग्गमनादिलक्षणा यत्किञ्चिच्चलितंस्पन्दितंतत्सर्ववाय्वा-यत्तमित्येतत्प्रदर्शयितुंबलवानित्युक्तम् । उत्तरत्रापियाःपञ्चम्यस्तानजन्यर्थापेक्षाः किंतर्हि वायोः परतोऽनन्तरमित्येव योजनीयाः ॥ ७६ ॥

(२) **सर्वज्ञनारायणः** । आकाशात्त्विति । सर्वगन्धवहइति तदर्थक्रियोपदर्शनम् ॥ ७६ ॥

३) **कुल्लूकः** । आकाशादिति । आकाशात्तुविकारजनकात्सुरभ्यसुरभिगन्धवहःपवित्रोबलवांश्च वायुरुत्पद्यते । सच स्पर्शाख्यगुणवान्मन्वादीनांसंमतः ॥ ७६ ॥

(४) **राघवानन्दः** । आचार्यस्य गुणत्वेषामित्यत्रोक्तान् भूतगुणान्प्रपञ्चयितुंतान्यनुवदति आकाशमिति सार्ध-त्रिभिः । आकाशमत्र स्थूलंविकुर्वाणात् कार्याकारेण परिणममानात् । शुचिःपावनः पन्थानश्च विशुध्यन्ति सोमसूर्यांशु-मारुतैरित्युक्तेः ॥ ७६ ॥

(६) **रामचन्द्रः** । आकाशादिति । आकाशात्तु विकुर्वाणाद्रूपान्तरंप्राप्नवतः वायुर्जायते सवैवायुः स्पर्श-गुणोमतः ॥ ७६ ॥

वायोरपि विकुर्वाणाद्विरोचिष्णु तमोनुदम् ॥ ज्योतिरुत्पद्यते भास्वत्तद्रूपगुणमुच्यते ॥ ७७॥

(१) **मेधातिथिः** । विरोचिष्णुभास्वदिति समानार्थेन शब्दद्वयेन स्वपरप्रकाशता प्रतिपाद्यते । स्वयंदीप्तिमत्परंच भासयति ॥ ७७ ॥

(२) **सर्वज्ञनारायणः**। तमोनुदमन्धकारविरोधि । भास्वत् परप्रकाशकदीप्तिमत् । ज्योतिस्तेजः ॥ ७७ ॥

(३) **कुल्लूकः**। वायोरपीति । वायोरपि तेजउत्पद्यते विरोचिष्णु परप्रकाशकंतमोनाशनंभास्वत्प्रकाशकंतच्च गुणरूपमभिधीयते ॥ ७७ ॥

(४) **राघवानन्दः**। रोचिष्णु परप्रकाशकं अतएव तमोनुदं भास्वत्स्वप्रकाशम् ॥ ७७ ॥

(६) **रामचन्द्रः**। वायोरिति । विकुर्वाणाद्रूपान्तरंप्राप्नुवतः सकाशाज्ज्योतिरुत्पद्यते तस्य च ज्योतिषः रूपंगुणमाहुः । अन्यत्सर्वविशेषणंज्ञातव्यम् ॥ ७७ ॥

ज्योतिषश्च विकुर्वाणादापोरसगुणाःस्मृताः ॥ अद्भ्योगन्धगुणाभूमिरित्येषा सृष्टिरादितः ॥ ७८ ॥

[परस्परानुप्रवेशाद्धारयन्तिपरस्परम् ॥ गुणंपूर्वस्यपूर्वस्य धारयन्त्युत्तरोत्तरम् ॥ †]

(१) **मेधातिथिः**। रसोमधुरादिः सलिलगुणोगन्धःसुरभिरसुरभिश्च सभूमेर्गुणः । तथा च वैशेषिकाः क्षितावेवगन्धइत्येतेसांसिद्धिकाएकैकस्य गुणाः संसर्गात्तुसंकीर्यन्तेतदुक्तंयोयोयावतिथइति । एतच्च गुणानुकथनमध्यात्मचिन्तायामुपयुज्यते । उक्तंहि पुराणकारेण दशमन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः । भौतिकास्तुशतंपूर्णंसहस्रंत्वभिमानिनः ॥ अहंकारचिन्तकाः । महात्मकाःसहस्राणि दशतिष्ठन्तिविज्वराः। पूर्णंशतसहस्रंतु तिष्ठन्त्यव्यक्तचिन्तकाः । पुरुषंनिर्गुणंप्राप्यपरिसंख्या न विद्यते ॥ ७८ ॥

(२) **सर्वज्ञनारायणः**। ज्योतिषस्त्विति । रसगुणत्वमात्मा स्वभावोवा यासांतारसगुणात्मिकाः । आदितोवान्तरसृष्ट्यादौ । जलभूम्योरर्थक्रियायाःप्रसिद्धत्वेनानभिधानम् ॥ ७८ ॥

(३) **कुल्लूकः**। ज्योतिषश्चेति । तेजसआपउत्पद्यन्ते । ताश्च रसगुणयुक्ताअद्भ्योगन्धगुणयुक्ता भूमिरित्येषा महाप्रलयानन्तरसृष्ट्यादौ भूतसृष्टिः । तैरेव भूतैरवान्तरप्रलयानन्तरमपि भूरादिलोकत्रयनिर्माणम् ॥ ७८ ॥

(४) **राघवानन्दः**। आदितः स्थूलब्रह्माण्डसृष्टेःपूर्वम् ॥ ७८ ॥

(५) **नन्दनः**। गन्धवहा गन्धगुणा । आदितोऽण्डसृष्टेः प्राक् ॥ ७८ ॥

(६) **रामचन्द्रः**। ज्योतिषइति ज्योतिषस्तु विकुर्वाणात् आपः उत्पद्यन्तेकीदृशः आपः रसगुणात्मकाः रसः गुणोयासांताः रसगुणात्मकाः अद्भ्यः सकाशात्भूमिरुत्पन्ना जाता कीदृशी भूमिः गन्धगुणाआदितः प्रथमतः एवासृष्टिः उदिता ॥ ७८ ॥

[**रामचन्द्रः**। परस्परेति । महाभूतानांआकाशादीनां परस्परानुप्रवेशात्परस्परम् धारयन्ति । तद्यथा कारणस्य आकाशस्यकार्ये वायौ प्रवेशः । एवमग्रेप्यूह्यम् । पूर्वपूर्वस्य उत्तरोत्तरंगुणंधारयन्ति तद्यथा आकाशस्य शब्दंगुणंवायोःस्पर्शगुणं वायौ शब्दस्पर्शौभवतः तेजसः रूपंगुणं तेजसिशब्दस्पर्शरूपाणिभवन्ति । एवमपिअग्रेऊह्यम् ॥ १ ॥]

यत्प्राक्द्वादशसाहस्रमुदितंदैविकंयुगम् ॥ तदेकसप्ततिगुणंमन्वन्तरमिहोच्यते ॥ ७९ ॥

(१) **मेधातिथिः**। एकसप्ततिर्दैविकानि युगानि मन्वन्तरंनामकालः ॥ ७९ ॥

---

† अयं (ख, ग, अ) चिन्हितपुस्तकेषु दृष्टः ।

(७९) सप्ततिगुणं=सप्ततियुगं (च)

(२) **सर्वज्ञनारायणः**। यत्प्रागिति । एकसप्ततिगुणंकिंचिदधिकमित्यल्पत्वान्नोक्तम् । मनोरधिकारलाभस्या न्तरमेकमनुपालनावच्छिन्नःकालइत्यर्थः ॥ ७९ ॥

(३) **कुल्लूकः**। यत्प्रागिति । यत्पूर्वंद्वादशवर्षसहस्रपरिमाणंसन्ध्यासन्ध्यांशसहितंमनुष्याणांचतुर्युगंदेवानामेकंयुग-मुक्तंतदेकसप्ततिगुणितंमन्वंतराख्यःकालइह शास्त्रेऽभिधीयते । तत्रैकस्य मनोःसर्गाद्यधिकारः ॥ ७९ ॥

(४) **राघवानन्दः**। मन्वन्तरसङ्ख्याख्यापनार्थंपूर्वोक्तमनुवदति यदिति । दैवैकयुगसप्ततिपरिमितंमन्वन्तरमि-त्यर्थः ॥ ७९ ॥

(५) **नन्दनः**। अथ मन्वन्तरंकालेन परिच्छिनत्ति यत्प्रागिति । द्वादशसाहस्रंदेववर्षाणांगणः ॥ ७९ ॥

(६) **रामचन्द्रः** । यदिति । तद्दैविकंयुगंएकसप्ततिगुणंमन्वन्तरसंज्ञकं कालइहोच्यते । परमेष्ठीपितामहइत्यमरः ॥ ७९ ॥

मन्वन्तराण्यसंख्यानि सर्गःसंहारएव च ॥ क्रीडन्निवैतत्कुरुते परमेष्ठी पुनःपुनः ॥ ८० ॥

(१) **मेधातिथिः**। नैषांसंख्याविद्यतइत्यसंख्यानि । ननु चतुर्दशमन्वन्तराणीति संख्या श्रूयते ज्योतिःशास्त्रादौ-उच्यते आवृत्त्या ह्यसंख्यानि यथा द्वादशमासाः । सर्गसंहारयोरप्यावृत्तिरनुपरतैव । क्रीडन्निवैतत्कुरुतइति सुखार्थितया क्रीडातस्यचाप्तकामत्वादानन्दैकरूपत्वाच्च न क्रीडाप्रयुक्तौ सर्गसंहारावतइवशब्दः प्रयुक्तःअत्रपरिहारःप्रागुक्तएव । ली-लयापिकौतुकेनापिलोके राजादीनांप्रवृत्तिर्दृश्यतइति ब्रह्मविदः ॥ ८० ॥

(२) **सर्वज्ञनारायणः**। मन्वन्तराणीति । असङ्ख्यान्येकस्मिन्ब्रह्मायुषि क्रीडन्निवेति किमर्थं करोतीतिप्रयोज-नप्रश्ननिरासार्थम् ॥ ८० ॥

(३) **कुल्लूकः**। मन्वन्तराणीति । यद्यपि चतुर्दशमन्वन्तराणि पुराणेषु परिगण्यन्ते तथापि सर्गप्रलयानामानन्त्या दसङ्ख्यानि आवृत्त्यासर्गः संहारश्चासङ्ख्यः । एतत्सर्वंक्रीडन्निव प्रजापतिःपुनःपुनःकुरुते । सुखार्थाहि प्रवृत्तिःक्रीडा तस्यचाप्तकामत्वान्नसुखार्थितेति* इव शब्दःप्रयुक्तः । परमेस्थानेऽनावृत्तलक्षणे तिष्ठतीति परमेष्ठी । प्रयोजनं विना परमा-त्मनःसृष्ट्यादौ कथं प्रवृत्तिरिति चेत् लीलयैव एवंस्वभावत्वादित्यर्थः व्याख्यातुरिव करताडनादौ । तथा च शारीरकसूत्रं लोकवत्तुलीलाकैवल्यम् ॥ ८० ॥

(४) **राघवानन्दः**। सृष्ट्यादि ब्रह्मणोलीलामात्रमित्याह मन्विति ॥ ८० ॥

(५) **नन्दनः** । असंख्यानीयत्तया रहितानि । एतत्जगत् । परमेष्ठीभगवान् । यत्नराहित्यमुक्तंक्रीडन्निवेतिस्प-ष्टम् ॥ ८० ॥

चतुष्पात्सकलोधर्मःसत्यंचैव कृते युगे ॥ नाधर्मेणागमःकश्चिन्मनुष्यान्प्रतिवर्तते ॥ ८१ ॥

(१) **मेधातिथिः**। चत्वारःपादायस्य चतुष्पाद्धर्मः। यागादेश्च धर्मत्वात्तस्यचानुष्ठेयस्वभावत्वाद्धिप्रहाभावान्नपाद-शब्दः शरीरावयववचनः किंतर्हि अंशमात्रवचनः। नहि धर्मस्य शरीरमस्ति पुरुषविधंपशुपक्ष्यादिविधंवा । तेन स्वांशैश्च-तुर्भिरुपेतश्चतुष्पादुच्यते । तेन योयंधर्मः चतुष्पात्कृतयुग आसीत् यागस्य तावत्प्रयोगावस्थस्य चत्वारोहोतृकाः । होता

---

* सुखार्थितेति=सुखार्थेति (अ)

ब्रह्मा उद्गाता अध्वर्युरिति चत्वारोवर्णाः कर्तारआश्रमा वा सर्वथा यावान्वेदेधर्मउक्तः ससर्वस्तस्मिन्कालेऽशतोपिनहीनः अविगुणः सर्वोऽनुष्ठीयते । बाहुल्येन चतुःसंख्याः । एवंदानादिष्वपि योज्यम् । दाता द्रव्यं पात्रंभावस्तुतिः अथवा यागदानतपांसि ज्ञानंच । तथा वक्ष्यति तपः परमिति । अथवा धर्मप्रतिपादकंवाक्यंधर्मः तस्य च चत्वारः पादाः चत्वारिपदजातानि । नामाख्याते चोपसर्गनिपाताश्च । तथा चाह चत्वारिवाक्परिमितापदानितानि विदुर्ब्राह्मणाये मनीषिणः । मनसईषिणः समर्थाविद्वांसोधार्मिकाः । अयत्वे तु गुहायां त्रीणि निहितानि नेङ्गयन्ति न हि प्रकाशन्ते । तुरीयंभागंवैदिकानांमनुष्यावदन्ति । एतदुक्तंभवति किंचिदन्तरितम् । नच काचिद्वेदशाखा । अयत्वे तु बह्वन्तरितम् । सत्यंचैवंसकलमित्यनुषङ्गः । सत्यपि सत्यस्यविहितत्वाद्धर्मत्वे प्राधान्यार्थः पृथगुपदेशः हेत्वर्थे वा । सकलस्य धर्मानुष्ठानस्य सत्यंहेतुः येत्वनृतिनस्तेलोकावर्जनार्थंकिंचिदनुतिष्ठन्त्यन्यत्त्यजन्ति । नाधर्मेण निषिद्धेन मार्गेण कश्चिदागमोविद्या वार्थोवानुष्टातुरुपवर्ततआगच्छति युगस्वाभाव्यान्नमनुष्याअधर्मेण विद्यामागमयन्ति नापि धनमर्जयन्ति । विद्याधने धर्मानुष्ठानकारणे तत्परिशुद्धिः सकलधर्मसद्भावस्यहेतुत्वेन नोच्यते ॥ ८१ ॥

(२) सर्वज्ञनारायणः । चतुष्पादिति । धर्मोहितपोज्ञानयज्ञदानपादचतुष्टयवान् सत्यमूर्धा । अधर्मस्तुचौरिकानृतमायाख्यचरणत्रयमात्रात् । यथाचाधर्माभावात्तदा कृते संपूर्णएवंचतुष्पाद्धर्मः । सत्यंचैव सकलं । आगमोर्थागमोनाधर्मेणोपवर्तते । यतइतिसाकल्यहेतुः ॥ ८१ ॥

(३) कुल्लूकः । चतुष्पात्सकलोधर्मइति । सत्ययुगे सकलोधर्मश्चतुष्पात्सर्वाङ्गसम्पूर्णआसीत् । धर्मे मुख्यपादासंभवात् वृषोहि भगवान्धर्मइत्याद्यागमे वृषत्वेन कीर्तनात्तस्य पादचतुष्टयेन सम्पूर्णसत्त्वात्सत्ययुगेऽपियज्ञादि धर्माङ्गांसर्वैरङ्गैःसमग्रत्वात्सम्पूर्णत्वपरोऽयंचतुष्पाच्छब्दः । अथवा तपःपरमित्यत्र मनुनैव तपोज्ञानयज्ञदानानांचतुर्णांकीर्तनात् तस्य पादचतुष्टयेन सम्पूर्णत्वात्पादत्वेन निरूपिताःसत्ययुगे समग्राइत्यर्थः । तथा सत्यंच कृतयुगमासीत्सकलधर्मश्रेष्ठत्वात् सत्यस्य पृथक्ग्रहणम् । तथा न शास्त्रातिक्रमेण धनविद्यादेरागमउत्पत्तिर्मनुष्यान्प्रतिसम्पद्यते ॥ ८१ ॥

(४) राघवानन्दः । तत्रादौ त्रेतादिषु पादशोधर्मस्य ह्रासंवक्तुंसत्ययुगस्य धर्मस्य संपूर्णतांदर्शयति चतुष्पादिति । वृषोहि भगवान्धर्मइत्यागमात् तपोज्ञानयज्ञदानानांपादत्वेन निरूपणम् । अतएवाह सकलइति । कलाअवयवाःपादलक्षणाः तपआदयस्तैःसहितः सत्यस्य सकलधर्मवत्त्वेन श्रेष्ठत्वज्ञापनाय पृथङ्निर्देशः । सत्यमिति । अधर्मेण शास्त्रनिषेधेन धर्मविद्यादेरागमउत्पत्तिर्मनुष्यान्नगच्छतीत्यर्थः ॥ ८१ ॥

(५) नन्दनः । अथोक्तपरिमाणानांकृतादियुगानांस्वभावंषड्भिः श्लोकैराह चतुष्पादिति । चतुष्पाच्चातुर्वर्ण्याश्रयः । सकलः संपूर्णः । सत्यस्य पृथगुपादानंप्राधान्यप्रतिपत्त्यर्थम् । आगमोऽर्थादेः प्राप्तिः । नाधर्मोनागमः कश्चिदितिचपठन्ति । तत्रायमर्थः । नाधर्मोमनुष्यानुपवर्तते । आगमःशास्त्रंसचापिनोपावर्तते । शास्त्रापेक्षातत्रनास्ति । स्वयमेव धर्मंधर्मफलंच ते साक्षात् कुर्वन्तीत्ययमेव साधुः पाठउत्तरश्लोकानुगुण्यात् ॥ ८१ ॥

(६) रामचन्द्रः । चतुरिति । कृते युगे चतुष्पात्चतुश्चरणः सकलः पूर्णः धर्मः सत्यसंज्ञकः अधर्मेण कश्चिदर्थागमः स्वीकारः मनुष्यान्प्रति नोपवर्तते ॥ ८१ ॥

इतरेष्वागमाद्धर्मःपादशस्त्ववरोपितः ॥ चौरिकानृतमायाभिर्धर्मश्चापैति पादशः ॥ ८२ ॥

(१) मेधातिथिः । कृतयुगादन्येषु युगेष्वागमाद्वेदाख्याद्धर्मः पादशः युगेयुगे पादेनावरोपितोऽपनीतः अन्तर्हितःतावदेवशाखापुरुषाद्यांग्रहणावधारणशक्तिवैकल्याद्योऽप्ययत्वे धर्मोज्योतिष्टोमादिःप्रचरति सोऽपिचौर्यादिभिः पाद-

शोहीयते । ऋत्विजांयजमानानांदातृणांसंप्रदानानांचतैर्दोषैर्युक्तत्वान्नयथाविधिधर्मोनिष्पद्यते । फलमतीयथोक्तं न परि- प्राप्यते तेन धर्मापायहेतूनांचौरिकादीनांनयुगैर्यथासंख्यंसर्वेषामयोपलम्भात् ॥ ८२ ॥

(२) सर्वज्ञनारायणः । इतरेष्विति । त्रेतादिष्वर्थागमार्थात् निषिद्धात्पादशः तपआद्येकैकपदार्थापचयेनधर्मो वरोपितः तानेव निषिद्धागमान् धर्मस्य त्रीन्पदार्थान् । चौरिकेति । चौरिकापरस्वापन्हवः । अनृतंमिथ्योक्तिः । माया पर- विप्रलम्भसाधनाचरणम् ॥ ८२ ॥

(३) कुल्लूकः । इतरेष्विति । सत्ययुगादन्येषु त्रेतादिषु आगमात् अधर्मेण धनविद्यादेरर्जनात् तस्यैव पूर्वश्लोके प्रकृतत्वात् । आगमाद्वेदादिति तु गोविन्दराजोमेधातिथिश्च । धर्मोयागादिः । यथाक्रमंप्रतियुगं पादंपादमवरोपितोहीनः कृतस्तथाधनविद्यार्जितोऽपि योधर्मः प्रचरति सोऽपि चौर्यासत्यछद्मभिः प्रतियुगं पादशोन्हासापगच्छति । त्रेतादियुगेः सहचौरिकानृतच्छद्मनां न यथासङ्ख्यं सर्वत्र सर्वेषांदर्शनात् ॥ ८२ ॥

(४) राघवानन्दः । इतरेषु त्रेतादिषु आगमान् चौरिकादेःपादशः अंशेन तपआदिचतुर्णामिति शेषः । अवरोपित- स्त्याजितः अतएवाह चौरिकेति ॥ ८२ ॥

(५) नन्दनः । इतरेषु त्रेतादिष्वागमाच्छास्त्राद्धर्मोऽभ्यवसीयते । सतु धर्मः पादशोऽवरोपितः । धर्माभ्यवसायाव- रोपणमेव धर्मावरोपणमभिप्रेतम् । चौरकमितिपाठः । चौरकंचौर्यमनोज्ञातित्वाद्वुञ् । द्वितीयोत्रधर्मशब्दोनुष्ठानवचनः ॥८२॥

(६) रामचन्द्रः । इतरेष्विति । इतरेषु त्रेतादिषु युगेषु अधर्मस्य आगमात् अधर्मात्पादशः एकचरणः धर्मः अव- रोपितः न्यूनचरणः कृतः । तद्यथा त्रेतायुगे चौरिकारूपेणाधर्मेण धर्मः पादशः अपैतिएकचरणन्यूनोभवति । द्वापरेअनृता- ख्येनाधर्मेण द्वितीयः पादः धर्मस्यअपैति नाशमेति । कलौमायाख्येनाधर्मेण धर्मस्य तृतीयः पादः नाशमेति ॥ ८२ ॥

अरोगाःसर्वसिद्धार्थाश्चतुर्वर्षशतायुषः ॥ कृते त्रेतादिषु ह्येषामायुर्ह्रसति पादशः ॥ ८३ ॥

(१) मेधातिथिः । अधर्मस्य रोगकारणस्याभावादरोगः । रोगोव्याधिः । सर्वएव चत्वारोवर्णाः सिद्धाभिमेतार्थाः । अर्थः प्रयोजनम् अथवा सर्वेऽर्थाः सिद्धाः येषांकाम्यानांकर्मणांप्रतिबन्धकाभावादव्याक्षेपेणाशेषफलसिद्धिः । चतुर्वर्षशता- युषइति । ननु सहषोडशंवर्षशतमजीवदिति परममायुर्वेदे श्रूयतेअतएवाहुः वर्षशतशब्दोऽत्रवयोभेदप्रतिपादकः चत्वारि- वयांसिजीवन्तीति । नपुरायुषः प्रमीयते नाप्राप्यचतुर्थवयोम्रियते । अतएव द्वितीये श्लोकार्धे वयोन्हसतीत्याह । पूर्वत्र वयसोवृद्धानुक्तायामुत्तरत्र तस्यैवन्हासाभिधानोपपत्तिः । पादशइति । नचात्र चतुर्थोभागः पादःकिंतर्हि भागमात्रमंशत- आयुःक्षीयतइत्यर्थः । तथा च केचिद्बालाम्रियन्ते केचित्तरुणाः केचित्प्राप्तजरसः परिपूर्णमायुर्दुर्लभम् ॥ ८३ ॥

(२) सर्वज्ञनारायणः । अरोगाइति । सर्वःसिद्धएवार्थोपेक्षितोवा कर्मणांयत्नेन येषांते सर्वसिद्धार्थाः । वयो- न्हसतीत्युपलक्षणम् आरोग्यसिद्धार्थत्वे अपीति प्राहम् ॥ ८३ ॥

(३) कुल्लूकः । अरोगाइति । रोगनिमित्ताधर्माभावादरोगाः सर्वसिद्धकाम्यफलाः प्रतिबन्धकाधर्माभावाच्चतुर्वर्षश- तायुष्ट्वंच स्वाभाविकमधिकायुःप्रापकधर्मवशादधिकायुषोपिभवन्ति । तेन दशवर्षसहस्राणि रामोराज्यमकारयदित्यविरो- धः । शतायुर्वैपुरुषइत्यादिश्रुतौ तु शतशब्दोबहुत्वपरःकलिपरोवा । एवंरूपामनुष्याःकृतेभवन्ति । त्रेतादिषु पुनःपादपादमा- युरल्पंभवतीति ॥ ८३ ॥

(४) राघवानन्दः । किमसाध्यंधर्मस्येति साश्चर्यमाह अरोगाइति । सर्वसिद्धार्थाःसर्वेआरम्भाः फलन्ति । चतु- र्वर्षशतायुषइति शतायुर्वैपुरुषइतिश्रुतेः । विरोधे त्वनपेक्षंस्यादसतिह्यनुमानमिति न्यायेन शतपरिमितंपुरुषायुरेव अधि-

कंनु तपोविद्यावशात् अतएव दशवर्षसहस्राणि रामोराज्यमकारयदित्यादिसंगतम् । यद्वावर्षशतशब्दोबाल्यादिवयश्चतुष्क-परः तेन शतान्तएव म्रियतेइत्यर्थः । न तु कलियुगमधिकृत्य श्रुतेःप्रवृत्तिः तस्याः साधारण्यात् । ऱ्हासवचनंतु तपोविद्याराहित्यसूचनपरम् ॥ ८३ ॥

(५) **नन्दनः** । कृतयुगे पुरुषाणांस्वभावप्राप्तमायुश्चत्वारिवर्षशतानि । यत्पुनरितिहासपुराणेषु तेषांतत्र बहुवर्ष-साहस्रजीवित्वमुक्तंतत्तु तेषांश्रद्धया साधितमिति वेदितव्यम् । तथाचमहाभारते कृतयुगपुरुषानधिकृत्य स्मर्य्यते । याव-द्यावत्कृता श्रद्धा देहंधारयितुंनृणाम् । तावत्तावदजीवंस्ते नासीद्यमकृतंभयमिति ॥ ८३ ॥

(६) **रामचन्द्रः** । अरोगेति । कृतयुगे चतुर्वर्षशतायुषः प्रजाभवन्तित्रेतादिषु युगेषु एषांप्रजानांवयः पादशः ह्रसति तद्यथा त्रेतायुगे प्रजानांआयुः त्रिशतानि द्वापरे युगे प्रजानांआयुर्द्वेशते कलौशतमित्यर्थः ॥ ८३ ॥

वेदोक्तमायुर्मर्त्यानामाशिषश्चैव कर्मणाम् ॥ फलन्त्यनुयुगंलोके प्रभावश्च शरीरिणाम् ॥ ८४ ॥

(१) **मेधातिथिः** । केचिदाहुर्वैदिकैः कर्मभिः सहस्रसंवत्सरादिभिरपेक्षितमायुर्वेदोक्तम् । तदनुयुगंफलति युगानु-रूपेण संपद्यते न सर्वेषु युगेषु । नाद्यकश्चित्सहस्रसंवत्सरजीवीयःसर्वश्चिरंजीवतिसवर्षशतंतदपरेनाद्रियन्ते यतोदीर्घसत्रेषु संवत्सरशब्दे दिवसेषुव्यवस्थापिते विधेयान्तरविरोधाद्वाक्यभेदापत्तेः । एषहितत्र ग्रन्थः । पञ्चपञ्चाशतस्त्रिवृतः संवत्सरा-इत्यादि । तत्रत्रीण्यहानिगवामयनप्रकृतित्वात्प्राप्तानि विशिष्टानुसंख्या पञ्चपञ्चाशतइत्यप्राप्तविधेया । यद्यपरा संवत्सरता प्रतीयेत वाक्यंभिद्येत तत्रावश्यमन्यतरस्यानुवादआश्रयितव्यः । संवत्सरशब्दः सौरसावनादिमानभेदेन षष्ट्यधिकशतत्र-यात्मनोऽहःसंघातादन्यत्रापि दृष्टप्रयोगएवेति । तस्यैवलक्षणया दिवसेष्वनुवादोयुक्तइति । अन्ये तु मन्त्रार्थवादेषु शत-मिन्नुशरदोऽन्ति देवाः शतायुर्वै पुरुषः इति । शतशब्दश्च बहुनामसु पठितोबहुत्वंचानवस्थितम् । युगानुरूपेण दीर्घजी-विनोल्पायुषश्च भवन्ति । यथाश्रुतव्याख्याने तु कलौ सर्वे शतायुषश्च भवन्ति । अथ वायुःकाम्यस्य यानि कर्माणि नच तत्र प्रमाणंश्रुतम् । तत्रानुयुगंपरिमाणंवेद्यम् । आशिषोन्यापिफलविषयावेदशासनाःकाम्यानांकर्मणामः आयु-षःकाम्यत्वेपिप्राधान्यात्पृथगुपदेशः । तथाह्याह आयुर्वै परमः कामः । प्रभावोऽलौकिकी शक्तिरणिमादिगुणयोगः अभिशापोवरदानम् । अनुयुगंफलन्तीति सर्वत्र योज्यम् ॥ ८४ ॥

(२) **सर्वज्ञनारायणः** । वेदोक्तमिति । यद्यपि शतायुःपुरुषइति वेदे पठ्यते तदेव चतुर्वर्षशतमेव शतवर्षत्वेनो-क्तम् । भवति हि वर्षादेः परिमाणोत्कर्षोदेवादिषु तद्विशिष्टमनुष्येष्वपीति ग्राह्यम् । तथा कर्मणामनुष्ठितानामाशिषोपि यथाकारीर्यादिभिःफलान्यर्थतानि अनुयुगंयुगानुरूपेग फलन्ति । यथाकृते कारीर्यादिभिःशीघ्रंमहतीवं वृष्टिः न तथा त्रेतादावित्यर्थः । तथा परमतप आदिज्ञाशक्तिरनुयुगंफलति । कृते तदैव फलत्यन्यदा विलम्बेनेत्यर्थः ॥ ८४ ॥

(३) **कुल्लूकः** । वेदोक्तमायुरिति । शतायुर्वैपुरुषइत्यादि वेदोक्तमायुः कर्मणांच काम्यानांफलविषयाःप्रार्थना ब्राह्मणादीनांच शापानुग्रहक्षमत्वादिप्रभावायुगानुरूपेणफलन्ति ॥ ८४ ॥

(४) **राघवानन्दः** । अतएवाह वेदोक्तमायुरित्यादि । अयमर्थः शतायुर्वै पुरुषइति वेदोक्तमायुः काम्यकर्मणा माशिषः फलंशरीरिणांशापानुग्रहप्रभावश्चअनुयुगंयुगेयुगे फलतिअसति प्रतिबन्धे सेत्स्यतीत्यर्थः ॥ ८४ ॥

(५) **नन्दनः** । आयुश्चतुर्वर्षशतादि । आशिषः फलानि । प्रभावः शापानुग्रहादिशक्तिः । अनुयुगंयुगानुरूप्येण पूर्णानिहीनानि हीनतराणि हीनतमानि चभवन्तीत्यर्थः ॥ ८४ ॥

---

(८४) प्रभावश्च=प्रभावाश्च (ख)

(६) **रामचन्द्रः** । वेदोक्तमिति । अनुयुगंयुगानुरूपंलोके सर्वंफलमित्यर्थः ॥ ८४ ॥

अन्ये कृतयुगे धर्मास्त्रेतायांद्वापरे परे ॥ अन्ये कलियुगे नृणांयुगह्रासानुरूपतः ॥ ८५ ॥

(१) **मेधातिथिः** । युक्तोऽस्य कालभेदेन पदार्थस्वभावभेदस्योपसंहारः धर्मशब्दोन यागादिवचनएव किंतर्हि पदार्थगुणमात्रे वर्तते । अन्ये पदार्थानांधर्माः प्रतियुगंभवन्ति यथा प्राक्दर्शितम् । यथावसन्तेन्यः पदार्थानांस्वभावोऽन्योग्रीष्मेन्य एववर्षास्वेवंयुगेष्वपि । अन्यत्वंचात्र न कारणानादृष्टकार्यत्यागेन कार्यान्तरजनकत्वमप्यपरिपूर्णस्य कार्यस्योत्पत्तेः शक्तेरपचयात्तदाहुर्युगन्हासानुरूपतइति । ह्रासोन्यूनता ॥ ८५ ॥

(२) **सर्वज्ञनारायणः** । अन्यइति । युगह्रासस्यानुरूपेण शक्त्यपेक्षया धर्माअवस्थिताइत्यर्थः ॥ ८५ ॥

(३) **कुल्लूकः** । अन्यइति । कृतयुगेऽन्येधर्माभवन्ति त्रेतादिष्वपि युगापचयानुरूपेणाधर्मवैलक्षण्यम् ॥ ८५ ॥

(४) **राघवानन्दः** । अतएवाह । अन्यइति । सकलासकलाभ्यांभिन्नाइति अतआह युगन्हासानुरूपतइति युगान्हासोयुगेयुगे धर्मन्हासः तदनुसारेण पृथक्कम न तु शूद्रस्य वेदाध्ययनं विप्रस्य सेवेति भावः ॥ ८५ ॥

(५) **नन्दनः** । युगन्हासानुरूपतः परेन्येभवन्तीत्यनुषङ्गः । यथायुगानामादौ धर्मा न तथा मध्ये यथामध्ये न तथाऽन्तइत्यर्थः ॥ ८५ ॥

(६) **रामचन्द्रः** । अन्येति । कृतादीनांयुगानांधर्माः युगह्रासानुरूपतः भवन्तितत्राह तपइति । कृतेतु मानवाधर्मास्त्रेतायांगौतमाः स्मृताः । द्वापरे शङ्खलिखिताः कलौ पाराशराः स्मृताः ॥ ८५ ।

तपःपरंकृतयुगे त्रेतायांज्ञानमुच्यते ॥ द्वापरे यज्ञमेवाहुर्दानमेकंकलौ युगे ॥ ८६ ॥

[ब्राह्मंकृतयुगंप्रोक्तं त्रेतातुक्षत्रियंयुगम् ॥ वैश्योद्वापरमित्याहुः शूद्रःकलियुगःस्मृतः ॥ ‡]

(१) **मेधातिथिः** । अयमन्योयुगस्वभावभेदः कथ्यते । तपःप्रभृतीनांवेदे युगभेदेन विधानाभावात्सर्वदा सर्वाण्यनुष्ठेयानि । अयंत्वनुवादोयथाकथंचिदाख्येयः । इतिहासेषु ह्येवंवर्ण्यते । तपःप्रधानतच्चमहाफलम् । दीर्घायुषोरोगवर्जितास्तपसिसमर्थाभवन्त्यनेनाभिप्रायेणोच्यते । ज्ञानमध्यात्मविषयंशरीरक्लेशादन्तर्नियमोनातिदुष्करः । यागे तु न महाक्लेशइति द्वापरे यज्ञः प्रधानम् । दाने तु नशरीरक्लेशोनान्तः संयमो न चातीवविद्वत्तोपयुज्यतइति सुसंपादना ॥ ८६ ॥

(२) **सर्वज्ञनारायणः** । तपइति । परंअभ्यर्हितंतपो ऽन्येष्वपि ज्ञानादिषु क्रियमाणेषु तपोज्ञनाशकाद्यतिबलैरेव शक्यतइति कृते तस्य प्राधान्यम् । त्रेतायां ज्ञानम् मन्दबलतया तपस्यशक्तानांकृतयुगानुष्ठिततपः परिपक्वकषायाणांज्ञाने सामर्थ्यसंभवात् । तत्राप्यशक्तानांहोमाद्यल्पव्यापारोयज्ञएव द्वापरे शक्यइति तत्प्रधानोद्वापरे धर्मः । यज्ञाङ्गबहुव्यापारशून्यतया यज्ञादप्यल्पायाससाध्यं दानमेकंकलौ तपःप्रभृति च शक्यमेवेत्यर्थः ॥ ८६ ॥

(३) **कुल्लूकः** । तपःपरमिति । यद्यपि तपःप्रभृतीनि सर्वाणि सर्वयुगेष्वनुष्ठेयानि तथापि सत्ययुगे तपःप्रधानंमहाफलमिति ज्ञाप्यते । एवमात्मज्ञानंत्रेतायुगे द्वापरे यज्ञः दानंकलौ ॥ ८६ ॥

(४) **राघवानन्दः** । सर्वयुगेषु चतुर्णामनुष्टेयत्वेपि प्राधान्येनानुष्ठेयार्थमाह तपइति तपोध्यानं ज्ञानमात्मधीः शास्त्रधीर्वा ॥ ८६ ॥

---

(८५) युगह्रासानुरूपतः=तत्तद्धर्मानुरूपतः (ठ)

‡ अयं (ख) पुस्तके दृष्टोरामचन्द्रेण व्याख्यातश्च

(५) **नन्दनः** । धर्मभेदमेवदर्शयति तपइति । तपः सात्त्विकोनिवृत्तिधर्मः रजस्तमोमयंत्कर्म तपसस्तत्तल्लक्षण मितिमहाभारतेस्मरणात् । परंप्रधानंज्ञानंनानाशास्त्रविज्ञानम् । यज्ञंफलाभिसंधियुक्तंयत्कर्मएवशब्दाभ्यांपूर्वपूर्वधर्मानादरः सूचितः ॥ ८६ ॥

रामचन्द्रः । [ब्राह्ममिति । कृतयुगंब्राह्मंप्रोक्तंसत्त्वगुणसंज्ञमित्यर्थः। त्रेतायुगंक्षत्रियाधिष्ठितंसत्त्वरजोगुणमित्यर्थः। द्वापरंवैश्यः वैश्याधिष्ठितंरजस्तमोभ्यांयुक्तम् । कलियुगः शूद्रः शूद्राधिष्ठितः तमोगुणरूपः एवंतद्रूपमाचार्याआहुः ॥ १ ॥]

सर्वस्यास्य तु सर्गस्य गुप्त्यर्थंसमहाद्युतिः ॥ मुखबाहूरुपज्जानांपृथक्कर्माण्यकल्पयत् ॥ ८७ ॥

(१) **मेधातिथिः** । उक्तः कालविभागः । ब्राह्मणादीनांगुणाइदानींकथ्यन्ते । तत्रायमुपक्रमः । सर्वस्यसर्गस्य सर्वेषांलोकानांगुप्त्यर्थंरक्षार्थंमहातेजाःप्रजापतिः मुखादिजातानांब्राह्मणादीनांचतुर्णांवर्णानांदृष्टादृष्टार्थानिकर्माण्यकल्पयद्व्यवस्थापितवान् ॥ ८७ ॥

(२) **सर्वज्ञनारायणः** । येषांतु यादृशमिति प्राक्प्रतिज्ञातंप्रक्रमते सर्वस्येति । गुप्त्यर्थंब्राह्मणैर्यज्ञादिद्वारा अन्यैरक्षणादिद्वारा गुप्तिरक्षांकर्तुं ॥ ८७ ॥

(३) **कुल्लूकः** । सर्वस्यास्येति । सब्रह्मा महातेजा अस्य सर्गस्यसमग्रस्याग्नौ प्रास्ताहुतिरिति न्यायेन रक्षार्थंमुखादिजातानांब्राह्मणादीनांविभागेन कर्माणि दृष्टादृष्टार्थानि निर्मितवान् ॥ ८७ ॥

(४) **राघवानन्दः** । संप्रत्यनुवादपुरःसरंप्रतिवर्णंव्यवस्थयाधर्मानाह सर्वस्येति पञ्चभिः । सर्वस्य सृज्यमान प्रपञ्चस्य सब्रह्मा मुखबाहूरुपज्जानांपृथक्कर्माण्यकल्पयदित्यन्वयः । तथाच श्रुतिः ब्राह्मणोस्य मुखमासीदित्यादि पद्भ्यांशूद्रइति व्यधिकरणनिर्देशोवेदानधिकारसूचनार्थः । अकल्पयदिति यथापूर्वमकल्पयदिति श्रुतिस्मरणार्थः । तेनानादिव्यवस्थेति ॥ ८७ ॥

(५) **नन्दनः** । अथवर्णधर्मनियमोऽपि हिरण्यगर्भेणैव कल्पितस्तस्मादविमर्शमादरोत्रकर्तव्यइत्यभिप्रायेणाहसर्वस्येति । हिरण्यगर्भस्सर्गस्य प्रपञ्चस्य मुखबाहूरुपज्जातीनांब्राह्मणादीनांमुखादञ्जनातत्वोपन्यासोवर्णानामुत्कर्षापकर्षप्रदर्शनार्थः ॥ ८७ ॥

(६) **रामचन्द्रः** । अतःपरंचतुर्वर्णादीनांकर्माण्याह प्रथमंब्राह्मणस्यधर्ममाह सर्वस्येति । मुखबाहूरुपज्जानांब्राह्मणक्षत्रविट्शूद्राणांकर्माणि पृथक्पृथक्अकल्पयत सकल्पयामास ॥ ८७ ॥

अध्यापनमध्ययनंयजनंयाजनंतथा ॥ दानंप्रतिग्रहंचैव ब्राह्मणानामकल्पयत् ॥ ८८ ॥

(१) **मेधातिथिः** । तानीदानींकर्माण्युच्यन्ते ॥ ८८ ॥

(२) **सर्वज्ञनारायणः** । अध्यापनमिति । अध्यापनंयज्ञादिविद्यानां ब्राह्मणानाम् । स्पष्टमन्यत ॥ ८८ ॥

(३) **कुल्लूकः** । अध्यापनमिति । अध्यापनादीनामिह सृष्टिप्रकरणे सृष्टिविशेषतयाभिधानंविधिस्तेषामुत्तरत्र भविष्यति । अध्यापनादीनि षट्कर्माणिब्राह्मणानांकल्पितवान् ॥ ८८ ॥

(४) **राघवानन्दः** । कर्माण्येवाह अध्यापनमिति । अध्यापनंशिष्येभ्यःप्रतिपादनम् ॥ ८८ ॥

(५) **नन्दनः** । कानि पुनस्तानिकर्माणीत्यपेक्षायामाह अध्यापनमिति ॥ ८८ ॥

(६) रामचन्द्रः। ब्राह्मणस्य षट्कर्माण्याह अध्येति। स्वयंअधीयीत शिष्यानूअध्यापयेदित्यर्थः। स्वयंयजेत्अन्यान्याजयेत्दानंदद्यात्स्वयंगृह्णीयाच्च ॥ ८८ ॥

प्रजानांरक्षणंदानमिज्याध्ययनमेव च ॥ विषयेष्वप्रसक्तिश्च क्षत्रियस्यसमासतः ॥ ८९ ॥

(१) मेधातिथिः । विषयाभिलाषजनकागीतशब्दादयोभावाउच्यन्ते । तत्रासंगः पुनः पुनरसेवनम् ॥ ८९॥

(२) सर्वज्ञनारायणः। प्रजानामिति । विषयेषुस्त्र्यादिषु प्रसक्तिमतिशयेनचित्तस्य निवेशनम्। यद्यपि विप्रादेरप्येतदवश्यंकार्यं तथापि विप्रादीनांव्यसनैर्नापकर्षणंयएव व्यसनी तस्यैव नाशोराज्ञस्तु व्यसनाकृष्टत्वे राष्ट्रस्यैव विनाश इत्येतदर्थमत्रोक्तम् ॥ ८९ ॥

(३) कुल्लूकः। प्रजानामिति। प्रजारक्षणादीनि क्षत्रियस्यकर्माणि कल्पितवान्। विषयेषु गीतनृत्यवनितोपभोगादिष्वप्रसक्तिस्तेषांपुनरनासेवनं समासतःसंक्षेपेण ॥ ८९ ॥

(४) राघवानन्दः । इज्या यज्ञः। अप्रसक्तिरनासङ्गः ॥ ८९ ॥

(६) रामचन्द्रः। क्षत्रस्य धर्मानाह प्रजेति। प्रजानांरक्षणंदानंइज्या यागः अध्ययनंवेदाध्ययनंविषयेअप्रसक्तिमनासक्तिसब्रह्माआदिशति ॥ ८९ ॥

पशूनांरक्षणंदानमिज्याध्ययनमेव च ॥ वणिक्पथंकुसीदंच वैश्यस्य कृषिमेव च ॥ ९० ॥

(१) मेधातिथिः । वणिक्पथः वणिक्कर्मणा स्थलपथवारिपथादिना धनार्जनमुपयुज्यमानदेशान्तरीयद्रव्यसन्निधापनं यस्य राज्ञोविषये वसति। कुसीदंवृद्ध्याधनप्रयोगः ॥ ९० ॥

(२) सर्वज्ञनारायणः । पशूनामिति। वणिक्पथंवाणिज्यम्। कुसीदंवृद्धिजीवनम्। एषु च त्रयाणामपि वर्णानां इज्याध्ययनदानान्यदृष्टार्थानीतराणि जीविकाः ॥ ९० ॥

(३) कुल्लूकः। पशूनामिति। पशूनांपालनादीनि वैश्यस्य कल्पितवान्। वणिक्पथंस्थलजलादिना वाणिज्यं कुसीदंवृद्ध्याधनप्रयोगः ॥ ९० ॥

(४) राघवानन्दः। वणिक्पथंवाणिज्यम्। कुसीदंलाभेन वित्तवर्धनम् ॥ ९० ॥

(५) नन्दनः। वणिक्पथंवाणिज्यार्थंस्थलजलयात्राम्। कुसीदंवार्धुष्यंअकल्पयदित्यनुवर्तते ॥ ९० ॥

(६) रामचन्द्रः। पशूनामिति वैश्यस्य धर्मानाह कुसीदंवृद्धिजीविका ॥ ९० ॥

एकमेव तु शूद्रस्य प्रभुःकर्म समादिशत् ॥ एतेषामेववर्णानांशुश्रूषामनसूयया ॥ ९१ ॥

(१) मेधातिथिः। प्रभुः प्रजापतिरेकंकर्म शूद्रस्यादिष्टवान्एतेषांब्राह्मणक्षत्रियवैश्यानांशुश्रूषा त्वया कर्तव्याऽनसूययाऽनिन्दया चित्तेनापितदुपरि विषादो न कर्तव्यः। शुश्रूषा परिचर्या तदुपयोगिकर्म करणंशरीरसंवाहनादिचित्तानुपालनम्। एतद्दृष्टार्थंशूद्रस्यअविधायकत्वान्नैकमेवेति नदानादयोनिषिध्यन्ते । विधिरेषांकर्मणामुत्तरत्र भविष्यति अतः स्वरूपविभागेन यागादीनांतत्रैव दर्शयिष्यामः ॥ ९१ ॥

---

(८९) विषयेष्वप्रसक्तिश्च क्षत्रियस्यसमादिशत् ॥ (न, भ ल, य, ग, क,)

———————— क्षत्रियाणामकल्पयत् ॥ (ख)

(२) **सर्वज्ञनारायणः** । एकमेवेति । शुश्रूषाऽद्वेषो अशुश्रूष्यमाणेष्वपि द्विजेषु तद्धितैकस्मिंश्चन ब्राह्मणे क्षत्रिय वैश्ये वा शुश्रूषा परिचरणम् । एतच्चास्य जीविकार्थंपारत्रिकंच । अतएवास्यजीविकात्वेन प्रसिद्धेः पारत्रिकत्वेनाध्यय नादेः प्रसङ्गमाशंक्यैकमेवेति व्यवच्छिनत्ति ॥ ९१ ॥

(३) **कुल्लूकः** । एकमेवत्विति । प्रभुर्ब्रह्माशूद्रस्य ब्राह्मणादिवर्णत्रयपरिचर्यात्मकंकर्म निर्मितवान् । एकमेवेति प्राधान्यप्रदर्शनार्थंदानादेरपि तस्य विहितत्वात् । अनसूयया गुणानिन्दया ॥ ९१ ॥

(४) **राघवानन्दः** । एकमेवेत्यापद्यपि धर्मान्तरव्यावृत्त्यर्थं प्रभुःविराट् अनसूययेत्ययमभिप्रायः द्विजानांवेदा-ध्ययनाद्युत्कर्षासहिष्णुतया तत्र न प्रवर्तितव्यं वेदमुपशृण्वतः त्रपुजतुभ्यांकर्णपूरणमिति श्रुतेः । प्राणान्तिकप्रायश्चित्त श्रवणादिति भावः ॥ ९१ ॥

(५) **नन्दनः** । अनसूययाऽनहंकारेण ॥ ९१ ॥

(६) **रामचन्द्रः** । एकमिति एतेषां चतुर्णांवर्णानांसेवा अनसूयया निष्कपटेनेत्यर्थः ॥ ९१ ॥

ऊर्ध्वंनाभेर्मेध्यतरःपुरुषःपरिकीर्तितः ॥ तस्मान्मेध्यतमंत्वस्य मुखमुक्तंस्वयंभुवा ॥ ९२ ॥

(१) **मेधातिथिः** । आपादान्तान्मेध्यः पुरुषस्तस्य नाभेरूर्ध्वमतिशयेन मेध्यंततोऽपि मुखम् । एतच्चस्वयमेव जगत्कारणपुरुषेणोक्तम् ॥ ९२ ॥

(२) **सर्वज्ञनारायणः** । चतुर्वर्णकार्यमुक्त्वा प्रकृतशास्त्राध्यापकत्वेन ब्राह्मणान्नियन्तुंतत्प्रशंसामुपक्रमते ऊर्ध्वंना भेरिति । कृत्स्नएव पुरुषोमेध्यस्त्वस्य नाभेरूर्ध्वं मेध्यतरं तस्मात्अपि मुखं मेध्यतममित्यर्थः ॥ ९२ ॥

(३) **कुल्लूकः** । इदानींप्राधान्येन सर्गरक्षार्थत्वाद्ब्राह्मणस्य तदुपक्रमधर्माभिधानत्वाच्चास्य शास्त्रस्य ब्राह्मणस्य स्तुतिमाह ऊर्ध्वमिति । सर्वतएव पुरुषोमेध्यःनाभेरूर्ध्वमतिशयेन मेध्यःततोपि मुखमस्य मेध्यतमंब्रह्मणोक्तम् ॥ ९२ ॥

(४) **राघवानन्दः** । इदानीमर्थवादपूर्वकंब्राह्मणस्यैव श्रैष्ठ्यंहव्यकव्यादिभोक्तृत्वंनिध्यादिस्वामित्वमेतच्छास्त्राधि-कारित्वंच विधत्ते ऊर्ध्वमिति षोडशभिः ॥ ९२ ॥

(५) **नन्दनः** । एवंतावद्वर्णधर्माणांश्रद्धेयतमत्वमुक्तम् । इदानींतत्प्रवचनाधिकारिणांब्राह्मणानांवैशिष्ट्यंवक्तुमाह ऊर्ध्वमिति । तस्मान्नाभेरूर्ध्वप्रदेशादत्रसामान्येन पुरुषाणांमुखोत्कर्षवचनं ब्राह्मणोत्पत्तिस्थानस्यहिरण्यगर्भस्योत्कर्षस्य प्रतिपत्त्यर्थम् ॥ ९२ ॥

(६) **रामचन्द्रः** । ऊर्ध्वमिति । नाभेःऊर्ध्वंमेध्यतरःअतिशयेन मेध्यः मेध्यतरःहृदये मध्ये पुरुषः पुरुषसंज्ञकः कीर्तितःसर्वतःवृत्वाऽत्यतिष्ठद्दशाङ्गुलमिति श्रुतिः । तस्मात् पुरुषाधिष्ठितात् तस्य स्वयंभुवःमुखंमेध्यतमंज्ञेयम् ॥ ९२ ॥

उत्तमाङ्गोद्भवाज्ज्यैष्ठ्याद्ब्रह्मणश्चैव धारणात् ॥ सर्वस्यैवास्य सर्गस्य धर्मतोब्राह्मणःप्रभुः॥ ९३॥

(१) **मेधातिथिः** । ततःकिमतआह । उत्तमाङ्गंमूर्धा ततउद्भवउत्पत्तिर्ब्राह्मणस्य । ज्येष्ठश्चासावन्येभ्योवर्णेभ्यः पूर्वंब्रह्मणा सृष्टः। ब्रह्मणोवेदस्य धारणात्तस्य हि सविशेषंतद्धितमतः सर्वस्य जगतोऽस्माद्धेतुत्रयाद्ब्राह्मणः प्रभुः प्रभुरिव । प्रभुर्विनयेनोपसर्पणीयः । तदाज्ञायांच धर्मे स्थातव्यंधर्मतः प्रभुर्धर्मेप्रभुरित्यर्थः । आद्यादित्वात्तसिः ॥ ९३ ॥

(२) **सर्वज्ञनारायणः** । ततःकिमतआह उत्तमाङ्गेति । तादृङ्मेध्यतमंब्रह्ममुखोद्भवत्वात् । तत्रापि प्रथमजन्मरू-पात् ज्यैष्ठ्यात् वेदस्य च क्षत्रियाद्यपेक्षाया सम्यक्धारणात् । सर्गस्य सृज्यमानस्य । धर्मतोन बलतः। प्रभुर्यथेष्टविनियोग कारी ॥ ९३ ॥

(३) कुल्लूकः । ततःकिमतआह उत्तमाङ्गोद्भवादिति । उत्तमाङ्गंमुखंतदुद्भवत्वात् क्षत्रियादिभ्यःपूर्वोत्पन्नत्वादध्यापनव्याख्यानादिना युक्तस्यातिशयेन वेदंधारणात् सर्वस्यास्य जगतोधर्मानुशासनेन ब्राह्मणःप्रभुः । संस्कारस्य विशेषात्तु वर्णानांब्राह्मणःप्रभुः ॥ ९३ ॥

(४) राघवानन्दः । तस्मात्ततोपिउत्तमाङ्गंशिरः तदेकदेशोमुखंतदुद्भवत्वाज्ज्यैष्ठ्यात्प्रथमजत्वात् । ब्रह्मवाइदमग्रआसीदिति श्रुतेः । ब्रह्मब्राह्मणजातिः ब्रह्मणोवेदस्य सर्गस्य सृष्टस्य ब्राह्मणादेः धर्मादौ शास्ता । अन्योन्यंगुरवोविप्राइत्युक्तेः विप्रस्यापि विप्रःशास्ता ॥ ९३ ॥

(५) नन्दनः । उत्तमाङ्गंमुखंमेध्यतममित्युक्तत्वाद्ब्रह्मणोवेदस्य धारणादध्यापनात् । धर्मतोन्यायतोहेतोरित्यर्थः प्रभुःस्वामी ॥ ९३ ॥

(६) रामचन्द्रः । उत्तमाङ्गेति । उत्तमाङ्गात् उद्भवोयस्य सउत्तमाङ्गोद्भवःतस्मात्उत्तमाङ्गोद्भवात् ब्राह्मणोस्य मुखमासीदिति श्रुतिः ज्यैष्ठ्यात् प्रथमोत्पन्नत्वात्ब्रह्मणः वेदस्य धारणात् अस्य सर्वस्यैव सर्गस्य विश्वस्य ब्राह्मणः धर्मतः प्रभुःस्मृतः ॥ ९३ ॥

तंहि स्वयंभूः स्वादास्यात्तपस्तप्त्वादितोऽसृजत् ॥ हव्यकव्याभिवाह्याय सर्वस्यास्य च गुप्तये ॥ ९४

(१) मेधातिथिः । पूर्वस्यैव हेतुत्रयस्यविशेषार्थमिदम् । अन्यस्यापिपुरुषस्योत्तमाङ्गंप्रधानम् । तंपुनर्ब्राह्मणंस्वयंभूः स्वादास्यान्मुखादसृजत् । तपश्च कृत्वैषोत्तमाङ्गादुत्पत्तिः । ज्यैष्ठ्यमाह आदितः । यद्देवानुद्दिश्य क्रियते तद्धव्यंपितॄनुद्दिश्य तत्कव्यंतयोरभिवहनायदेवान्पितॄंश्च प्रति प्रापणाय अभिवाह्यायेति भावे कृत्यः कथंचिद्द्रष्टव्यः सकर्मत्वाद्वहतेः । तेनच कर्मणा सर्वस्य त्रैलोक्यस्य गुप्तिः परिपालनंभवति । इतः प्रदानंदेवाउपजीवन्ति । ते च शीतोष्णवर्षैरोषधीः पाचयन्ति । अतःपरस्परोपकाराद्गुप्तिः ॥ ९४ ॥

(२) सर्वज्ञनारायणः । अन्यदप्याह तंहीति । यतःस्वादास्यादादितोऽसृजत्तपस्तप्त्वाअतस्तपः प्रभावादपि प्रभुरसौ न त्वेवमन्ये तपसा सृष्टाइत्यर्थः । हव्यंदेवभागः कव्यंपित्र्यभागस्तद्रूपंयदभिवाह्यमभिवर्तनीयं तस्मै तदर्थंतस्य देवपितृप्राप्तयइति यावत् । गुप्तयेहोमजन्यवृष्टिद्वारा ॥ ९४ ॥

(३) कुल्लूकः । कस्योत्तमङ्गादयमुद्भूतइत्यतआह तंहि स्वयम्भूरिति । तंब्राह्मणं ब्रह्मा आत्मीयमुखात् दैवपित्र्येहविःकव्ये वहनाय तपःकृत्वा सर्वस्य जगतोरक्षायैच क्षत्रियादिभ्यःप्रथमंसृष्टवान् ॥ ९४ ॥

(४) राघवानन्दः । अभिवाह्याय साक्षात्वहनाय देवाद्यर्थंगुप्तये संरक्षणाय च यथा गुप्तंच धनमुत्तरकाले सुखहेतुस्तथा ब्राह्मणार्पितमपि । ब्राह्मणोहि निधिर्देवइति वक्ष्यति ॥ ९४ ॥

(५) नन्दनः । नचैषांहेतुनामसिद्धिराशङ्कनीयेत्याह तंहीति । आस्यान्मुखाद्धव्यकव्यातिवाह्याय । हव्यंदैवंकव्यंपित्र्यमतिवाह्यमतिवाहनंप्रापणंदेवान्पितॄंश्च हव्यकव्यादिमन्त्रैः प्रापयितुमितियावत् । अत्रस्वादास्यादित्युत्तमाङ्गोद्भवत्वंसमर्थ्यते । तपस्तप्त्वेत्यादरातिशयः । आदिनइतिज्यैष्ठ्यम् । हव्यकव्यातिवाह्यायेतिवेदधारणम् । अस्यगुप्तयइतिप्रपञ्चरक्षणम् । गुप्तिश्चाध्यापनयाजनप्रतिग्रहैरित्यत्रगन्तव्यम् । ९४ ॥

(६) रामचन्द्रः । तमिति । स्वयंभूः तपस्तप्त्वा स्वात्आस्यात् मुखात् आदितः तंब्राह्मणं हव्यकव्याभिवाह्याय असृजत् । हव्यकव्यानांअभिवाह्यः हव्यकव्याभिवाह्यः तस्मै हव्यंदेवानां कव्यं पितॄणांप्रापकायेत्यर्थः ॥ ९४ ॥

यस्यास्येन सदाश्नन्ति हव्यानि त्रिदिवौकसः॥ कव्यानि चैव पितरः किंभूतमधिकंततः॥९५॥

(१) **मेधातिथिः**। हव्यादिवहनंपूर्वोक्तंदर्शयति । त्रिदिवमोकोगृहंयेषान्तएवमुच्यन्ते। स्वर्गवासिनोदेवाः। ब्राह्मणेनभुक्तमन्नंदेवाउपतिष्ठन्ति श्राद्धे पित्र्यस्य कर्मणोङ्गभूतंविश्वेदेवानुद्दिश्य ब्राह्मणभोजनंविहितम्। तदपेक्ष्यैतदुक्तम्। किंभूतमन्यदधिकंश्रेष्ठंततस्तस्मादिति। स्वयंविस्मर्यते। देवाः पितरश्चोत्तमस्थानामध्यमस्थानाश्चाप्रत्यक्षान तेषांभोजनोपायोऽन्योस्त्यन्यतोब्राह्मणभोजनादतोमहान्ब्राह्मणः॥ ९५॥

(२) **सर्वज्ञनारायणः**। यस्यास्येनेति। आस्येनाभ्यवहरणसाधनभूतेन॥ ९५॥

(३) **कुल्लूकः**। पूर्वोक्तहव्यकव्यवहनंस्पष्टयति यस्यास्येनेति। यस्य विप्रस्य मुखेन श्राद्धादौ सर्वदा देवाहव्यानि पितरश्चकव्यानि भुञ्जते ततोन्यत्प्रकृष्टतमंभूतंकिंभवेत्॥९५॥

(४) **राघवानन्दः**। तमेवाह यस्येति। यस्य ब्राह्मणस्यास्येन मुखेन ब्राह्मण्ये मनुष्येष्विति श्रुतेः। अग्निरिवदेवइति शेषः। हव्यानि देवतोद्देश्यानि चरुपुरोडाशादीनि कव्यानि पित्रुद्देश्यानि श्राद्धादीनि किंभूतंजन्तुःदत्तस्य फलप्रापकंवा ततोविप्रात्॥ ९५॥

(६) **रामचन्द्रः**। यस्येति। यस्य ब्राह्मणस्य आस्येन मुखेन देवताःपितरश्चहव्य कव्यानि अश्नन्तिभुञ्जते। ततःब्राह्मणात्अधिकांकिंभूतंकःप्राणाधिक इत्यर्थः॥ ९५॥

भूतानांप्राणिनः श्रेष्ठाः प्राणिनांबुद्धिजीविनः॥ बुद्धिमत्सु नराःश्रेष्ठानरेषु ब्राह्मणाःस्मृताः॥९६॥

(१) **मेधातिथिः**। पृथिव्यांये भावाः स्थावरावृक्षादयोजङ्गमाः कृमिकीटादयस्तेभूतशब्देनोच्यन्ते। तेषांये प्राणिनआहारविहारादिचेष्टासमर्थास्तेश्रेष्ठाः प्राणिनस्तेहि महत्तरंसुखमनुभवन्ति। तेषांये बुद्ध्या जीवन्ति हिताहितेविचिन्वन्ति श्वशृगालादयः ते हि घर्मेणोपतप्ताः छायामुपसर्पन्ति शीतेनार्दिता आतपंनिराहारंस्थानंत्यजन्ति। तेषामधिकतरामनुष्यास्तेषांच ब्राह्मणा ते हि लोके पूज्यतमाः। नच सर्वेण परिभूयन्ते जातिमात्राश्रयंहि तद्वधे महत्पापश्चित्तम्॥ ९६॥

(२) **सर्वज्ञनारायणः**। तर्हियथा तथा ब्राह्मणः श्रेयानित्यध्ययनादिप्रकर्षोव्यर्थइति नेत्याह भूतानामिति। भूतानामाकाशादिभूतविशेषाणांमध्ये प्राणिनः प्राणवन्तः शरीरभूतानि भूतानि तेषावरःस्वपररूपाणांमध्येवराःबुद्धिजीविनः। स्वबुद्धिकृतचेष्टया स्वहिताचरणक्षमाःश्रेष्ठाः॥ ९६॥

(३) **कुल्लूकः**। भूतानामिति। भूतारब्धानांस्थावरजङ्गमानांमध्ये प्राणिनःकीटादयःश्रेष्ठाः। कदाचित्सुखलेशात्। तेषामपि बुद्धिजीविनःसार्थनिरर्थदेशोपसर्पणापसर्पणकारिणःपश्वादयः। तेभ्योपि मनुष्याःप्रकृष्टज्ञानसंबन्धात्। तेभ्योपि ब्राह्मणाःसर्वपूज्यत्वात् अपवर्गाधिकारयोग्यत्वाच्च॥ ९६॥

(४) **राघवानन्दः**। भूतानांस्थावरजङ्गमानांमध्ये प्राणिनोजङ्गमाःमहीलतादिभ्यःश्रेष्ठाः। तेष्वपि बुद्धिजीविनः पशुतिर्यञ्चः। तेषु नराः॥ ९६॥

(५) **नन्दनः**। नच सर्वत्र ब्राह्मणेषु तुल्यबुद्धिः कर्तव्येतिश्लोकाभ्यामाह भूतानामिति। अनयोः पूर्वश्लोकोदृष्टान्तार्थः। भूतानांजङ्गमस्थावराणांप्राणिनोजङ्गमाः बुद्धिजीविनः पश्वादयः॥ ९६॥

(६) **रामचन्द्रः**: भूतानां चराचरादीनां मध्ये प्राणिनः प्राणवन्तः श्रेष्ठाः॥ ९६॥

ब्राह्मणेषु च विद्वांसोविद्वत्सु कृतबुद्धयः ॥ कृतबुद्धिषु कर्तारःकर्तृषु ब्रह्मवेदिनः ॥ ९७ ॥

[तेषांनपूजनीयोन्यस्त्रिषु लोकेषु विद्यते ॥ तपोविद्याविशेषेण पूजयन्तिपरस्परम् [1] ॥ १ ॥]

[ब्रह्मविद्भ्यः परंभूतं न किंचिदिहविद्यते § ॥]

(१) मेधातिथिः । विदुषांश्रेष्ठ्यंमहाफलेषु यागादिष्वधिकारात् । तेषामपि कृतबुद्धयः परिनिष्ठितवेदतत्त्वार्था नबौद्धादिभिः कलुषीक्रियन्ते । तेषामपिकर्तारः कर्मणामनुष्ठातारः । ते हि विहितकरणात्प्रतिषिद्धासेवनाच्च नोपहन्यन्ते तेषामपि ब्रह्मस्वरूपत्वात्तत्रह्यक्षय्यानन्दः ॥ ९७ ॥

(२) सर्वज्ञनारायणः । विद्वांसःकर्मकाण्डदण्डनीत्यादिवेदितारः । कृतबुद्धयः कुशलाः सम्यक्तत्वज्ञाः । कर्तारोविदि त्वानुष्ठातारः । ब्रह्मवादिनोब्रह्मकाण्डार्थ तत्त्वविदः । ब्रह्मवेदिनइति क्वचित्पाठः । अत्र च सर्वत्रपूर्वपूर्वविशेषणवतामेवोत्तरो त्तरविशेषणसंबन्धावैशिष्ट्यमन्यथा ब्राह्मणत्वस्याप्युत्तरेष्वननुवृत्त्यापत्तेः ॥ ९७ ॥

(३) कुल्लूकः । ब्राह्मणेषु चेति । ब्राह्मणेषु तु मध्ये विद्वांसोमहाफलज्योतिष्टोमादिकर्माधिकारित्वात् । तेभ्योपि कृतबुद्धयःअनागतेऽपि कृतं मयेति बुद्धिर्येषांशास्त्रोक्तानुष्ठानेषूत्पन्नकर्तव्यताबुद्धयइत्यर्थः । तेभ्योपि अनुष्ठातारःहिताहितप्राप्तिपरिहारभागित्वात् । तेभ्योपि ब्रह्मविदःमोक्षलाभात् ॥ ९७ ॥

(४) राघवानन्दः । तेष्वपि विद्वांसःयज्ञशास्त्रविदः । तेषु कृतबुद्धयः कृतंकर्तव्यं ब्राह्मणेन मयेदमिति बुद्धिर्येषां तथा आलस्यादिना केवलं न कुर्वन्तीति । तथात्वनिश्चये अनुष्ठातारोये ते कर्तारः । तेष्वपि ब्रह्मविदोब्रह्मतत्त्वज्ञाः श्रेष्ठाइति सर्वत्रानुषज्यते सर्वकर्मणांपारंपर्येण ब्रह्मण्येव तात्पर्येणोपयोगात् सर्वंकर्माखिलंपार्थज्ञाने परिसमाप्यतइति भगवदुक्तेः ॥ ९७ ॥

(५) नन्दनः । विद्वांसोवेदविदः । कृतबुद्धयः परिचितवेदार्थाः । कर्तारश्चोदितकर्मकृतः । ब्रह्मवेदिनः परमार्थवेदिनः । एवंवदता ब्रह्मविद्भिरपि कर्मकर्तव्यमितिसूचितम् । ९७ ॥

(६) रामचन्द्रः । ब्राह्मणेष्विति । सम्यक्कृता बुद्धिर्यैस्ते कृतबुद्धयस्तेषु कृतबुद्धिषु कर्मकर्तारः श्रेष्ठाः । कर्मकर्तृषुब्रह्मवेदिनः श्रेष्ठाः ॥ ९७ ॥

उत्पत्तिरेव विप्रस्य मूर्तिर्धर्मस्य शाश्वती ॥ सहि धर्मार्थमुत्पन्नोब्रह्मभूयाय कल्पते ॥ ९८ ॥

(१) मेधातिथिः । विद्वत्तादिगुणसंबन्धिनोब्राह्मणस्य विशेषे दर्शिते जातिमात्रंब्राह्मणंकश्चिदवमन्येत तन्निवृत्त्यर्थमिदमुच्यते । उत्पत्तिरेव गुणानपहाय जन्मैव ब्राह्मणस्य जातिरेव शाश्वतीधर्मस्य मूर्तिः शरीरम् । धर्मार्थमुत्पन्नो द्वितीयेनजन्मनोपनयनेन संस्कृतः सा हि तस्य धर्मार्थोत्पत्तिर्ब्रह्मत्वाय कल्पते संपद्यते । धर्मशरीरमुज्झित्वा परानन्दभाग्भवतीति श्रुतिः ॥ ९८ ॥

(२) सर्वज्ञनारायणः । उत्पत्तिरिति । याविप्रस्य शरीरोत्पत्तिः साधर्म्यस्य मूर्तिर्मूर्तावस्था शरीर्यवस्थेति यावत् । शाश्वती चिरस्थायिनी विप्रस्योत्पत्त्या धर्मस्य चिरमुपचयसिद्धेः । तदाहसहीति । धर्मार्थेधर्मोत्पादनार्थंकिंचान्येभ्योस्यैतदधिकं यथासौ ब्रह्मभूयाय कल्पते मोक्षाय समर्थो न क्षत्रियादयः पारिव्राज्यानधिकारात् । अतएवोक्तंपुराणे क्षत्रियस्यापि यतिधर्मोविधीयतइति। यतिधर्मोयमनियमादिः नतुयतितैव अत्रापि षष्ठाध्याये ब्राह्मणस्येत्युपसंहरिष्यति ९८

---

(१) (ट, ड) पुस्तकद्वये   § (क, ग)

(३) **कुल्लूकः**। उत्पत्तिरेवेति। ब्राह्मणदेहजन्ममात्रमेव धर्मस्य शरीरमविनाशि यस्मादसौधर्मार्थंजातःधर्मानुगृहीतात्मज्ञानेन मोक्षायसंपद्यते ॥ ९८ ॥

(४) **राघवानन्दः**। अत्र हेतुरुत्पत्तिरिति। मूर्तिर्देहइव शाश्वती शश्वत् निरन्तरंधर्महेतुत्वात् ब्रह्मभूयाय ब्रह्मत्वाय मुक्तयइति यावत्। अन्यथा ब्राह्मण्यावाप्तिर्व्यर्थैवेति भावः ॥९८ ॥

(५) **नन्दनः**। वर्णान्तरेभ्योब्राह्मणस्यवैशिष्ट्यंजन्मतएव नसंस्कारविशेषतइत्याह उत्पत्तिरिति। उत्पद्यतइत्युत्पत्तिः शरीरम्। कल्पते शक्नोति ॥ ९८ ॥

(६) **रामचन्द्रः**। उत्पत्तिरिति। विप्रस्य मूर्तिः धर्मस्य मूर्तिरित्यर्थः शाश्वती एषाउत्पत्तिः उदिता। सः ब्राह्मणः ब्रह्मभयाय ब्रह्मरूपाय कल्पते समर्थोभवेदित्यर्थः ॥ ९८ ॥

ब्राह्मणोजायमानोहि पृथिव्यामधिजायते ॥ ईश्वरःसर्वभूतानांधर्मकोशस्य गुप्तये ॥ ९९ ॥

(१) **मेधातिथिः**। सर्वलोकस्योपरिभवति। श्रैष्ठ्यमुपरिभावेनाह। ईश्वरः सर्वभूतानामिति प्रभुत्वंधर्माख्यस्य कोशस्य गुप्तये जायते। द्रव्यसंचयः कोशउपमानाद्धर्मसंचयउच्यते कोशइति ॥ ९९ ॥

(२) **सर्वज्ञनारायणः**। ब्राह्मणइति। जायमानएव पृथिव्यां पृथिव्याधीश्वरोभूत्वा जायते। नतुक्षत्रियादिः। अतोसौ सर्वभूतानामीश्वरः। स्वेच्छयाआदिष्टा यतः उपदेशादिद्वारा धर्मस्य रूपंस्वकोशस्य गुप्तयेऽसौ जनितः ॥ ९९ ॥

(३) **कुल्लूकः**। ब्राह्मणइति। यस्माद्ब्राह्मणोजायमानः पृथिव्यामधिउपरि भवति श्रेष्ठइत्यर्थः। सर्वभूतानांधर्मसमूहरक्षायै प्रभुःब्राह्मणोपदिष्टत्वात्सर्वधर्माणाम् ॥ ९९ ॥

(४) **राघवानन्दः**। किंच जायमानोजातमात्रः पृथिव्यांवर्तमानानामाधिक्येन आधिक्यमाह ईश्वरइति। धर्मकोशस्य वेदस्य वेदाद्धर्मोहि निर्बभौ तथा ब्रह्मकर्मोद्भवंविद्धीति स्मृतेः ॥ ९९ ॥

(५) **नन्दनः**। पृथिव्यांपृथिवीजातेष्वधिजायतउपरिजायते सर्वस्माद्विशिष्टइत्यर्थः। अतएवसर्वभूतानामीश्वरः। धर्मकोशस्य वेदस्य ॥ ९९ ॥

(६) **रामचन्द्रः**। ब्राह्मणेति। जायमान उत्पन्नमात्रो ब्राह्मणः पृथिव्यांसर्वभूतानांधर्मकोशस्य धर्मएव भाण्डागारः तस्य गुप्तये रक्षणाय ईश्वरः प्रभुः ॥ ९९ ॥

सर्वंस्वंब्राह्मणस्येदंयत्किंचिज्जगतीगतम् ॥ श्रैष्ठ्येनाभिजनेनेदंसर्वंवै ब्राह्मणोऽर्हति ॥ १०० ॥

(१) **मेधातिथिः**। असंतुष्टस्य प्रतिग्रहादिषु पुनः प्रवृत्तौ दुष्कृतितामाशङ्क्य समाधत्ते। सर्वमिदंत्रैलोक्यान्तर्वर्तिधनंब्राह्मणस्यस्वंनात्रप्रतिग्रहोविद्यते प्रभुत्वेनासौ गृह्णाति न प्रतिग्रहीतृतयेति। प्रशंसैषा न विधिरतएवार्हतिशब्दः। अभिजनोऽभिजाततावििशिष्टत्वम् ॥ १०० ॥

(२) **सर्वज्ञनारायणः**। सर्वस्वमिति। सर्वस्याब्राह्मणस्य यत्संबन्धिस्वंतत् ब्राह्मणस्यैव। एतच्च तस्य हरणे दोषाल्पत्वेनोपचारात् तत्रहेतुः श्रैष्ठ्येनेति। अभिजन उत्पत्तिस्थानंपुण्यरूपम् ॥ १०० ॥

(३) **कुल्लूकः**। सर्वस्वमिति। यत्किंचिज्जगद्गतिधनंतद्ब्राह्मणस्य स्वमिति स्तुत्योच्यते। स्वमिवस्वं न तुस्वमेव ब्राह्मणस्यापि मनुनास्तेयस्यवक्ष्यमाणत्वात्। तस्माद्ब्रह्ममुखोद्भवत्वेनाभिजनेन श्रेष्ठतयासर्वंब्राह्मणोर्हति सर्वग्रहणयोग्योभवत्येव। वै अवधारणे ॥ १०० ॥

(४) **राघवानन्दः**। अभिजनेन उत्कृष्टस्थानजन्मना ॥ १०० ॥

(६) **रामचन्द्रः**। सर्वेति । इदंवस्तु यत्किञ्चित्स्वल्पमपि वस्तु जगतीगतंसर्वस्व ब्राह्मणस्येत्यर्थः । इदंसर्वविश्व स्याधिपत्यंब्राह्मणःश्रेष्ठत्वेनअर्हति । अभिजनेनकुलाभिमानेन ॥ १०० ॥

स्वमेव ब्राह्मणोभुङ्क्तेस्वंवस्तेस्वंददातिच ॥ आनृशंस्याद्ब्राह्मणस्य भुञ्जते हीतरेजनाः ॥१०१॥

(१) **मेधातिथिः**। यत्परगृह आतिथ्यादिरूपेण भुङ्क्तेतदात्मीयमेव नैवंमन्तव्यंपरपाकेनेति । स्वंवस्ते याचित्वाऽ याचित्वा वा वस्त्रंलभते नासौतस्य लाभाय अपितु स्वकृत्याच्छादनेविनियोगः । निष्ठतु तावदात्मोपयोगि गृह्णाति तत्र प्रभूतंयदन्येभ्योददाति परकीयंतदपितस्य नानुचितम् । आनृशंस्यंकारुण्यंतदीयया महासत्त्वतया पृथिव्यां राजानः स्वा- निधनान्युपयुञ्जते । अन्यथा यद्यसाविच्छेदहमेतदादायस्वकार्ये विनियुञ्जीयेति तदा सर्वे निर्धनाः निरुपयोगाःस्युः॥१०१॥

(२) **सर्वज्ञनारायणः**। स्वमेवेति । क्षत्रियादेर्यत्स्वार्जितमपि भुङ्क्ते आच्छादयति ददाति च तद्ब्राह्मणस्वमेव अतस्तद्धनोपभोक्तृत्वात्तस्यासौ भेष्यइव भेष्यो भृत्यःभृत्यइवेत्यतआह आनृशंस्यादिति । ब्राह्मणस्य करुणया प्राणिनां- स्वेच्छया भोग्यत्वंधनस्य विसृष्टत्वान्न मुख्याप्रभुतेत्यर्थः ॥ १०१ ॥

(३) **कुल्लूकः**। स्वमेवेति । यत्परस्याप्यन्नंब्राह्मणोभुङ्क्तेपरस्य च वस्त्रंपरिधत्ते परस्य गृहीत्वान्यस्मै ददाति तदपि ब्राह्मणस्य स्वमिव पूर्ववत्स्तुति एवंसति ब्राह्मणस्य कारुण्यादन्ये भोजनादि कुर्वन्ति ॥ १०१ ॥

(४) **राघवानन्दः**। वस्ते परिदधाति वसनादिकं आनृशंस्यादकार्पण्यात् कारुण्याद्वा ॥ १०१ ॥

(६) **रामचन्द्रः**। स्वमिति । ब्राह्मणःस्वमेव वस्तु भुङ्क्तेभोजनंकरोति । स्वंवस्ते स्ववस्तु स्ववस्त्रंवस्तेआच्छादय- ति । वसआच्छादनेइत्यस्य धातोःरूपम् । ब्राह्मणस्य आनृशंस्यात्कृपातइतरेजनाःक्षत्रियादयः भुञ्जतेभोगंकुर्वतंइत्यर्थः ॥ १०१ ॥

तस्य कर्मविवेकार्थंशेषाणामनुपूर्वशः ॥ स्वायंभुवोमनुर्धीमानिदंशास्त्रमकल्पयत् ॥ १०२ ॥

(१) **मेधातिथिः**। सर्वस्या ब्राह्मणश्रुतेः फलप्रदर्शनार्थश्लोकोऽयम् । एवंविधमिदंमहार्थशास्त्रंयत्तस्य स्वमहि- म्नाऽऽत्यन्तिकेन महत्तमस्य ब्राह्मणस्य कर्मविवेकार्थं इमानि कर्माणि कर्तव्यानीमानि वर्ज्याणि एषविवेकस्तदर्थंशेषाणांच क्षत्रियादीनामनुपूर्वशः प्राधान्याद्ब्राह्मणस्यानुषङ्गात्क्षत्रियादीनामिदंशास्त्रमकल्पयत्कृतवान् ॥ १०२ ॥

(२) **सर्वज्ञनारायणः**। प्रकृतमाह तस्येति । तस्य ब्राह्मणस्य धर्माधर्मविवेकार्थंशेषाणांक्षत्रियाणां वैश्यानांचानु- पूर्वशो ब्राह्मणमुखेन अकल्पयत् ॥ १०२ ॥

(३) **कुल्लुकः**। इदानींप्रकृष्टब्राह्मणकर्माभिधायकतया शास्त्रप्रशंसांप्रक्रमते तस्य कर्मविवेकार्थमिति । ब्राह्मणस्य कर्मज्ञानार्थंशेषाणांक्षत्रियादीनांच स्वायंभुवोब्रह्मपुत्रोधीमान्सर्वविषयज्ञानवान्मनुरिदंशास्त्रंविरचितवान् ॥ १०२ ॥

(४) **राघवानन्दः**। तस्य ब्राह्मणस्य कर्मविवेकार्थंइमानि कर्माणि कर्तव्यानि नेमानीति निर्घोषेण शुद्ध्यर्थं शे- षाणांक्षत्रियादीनांचइदंमन्वाख्यंशास्त्रं अकल्पयत् पूर्वसर्गानुरोधात् ॥ १०२ ॥

(५) **नन्दनः**। स्तेयादिषु पतनदण्डप्रायश्चित्तोपदेशादेवंतावद्ब्राह्मणवैशिष्ट्यमुक्तम् । इदानींशास्त्रप्रयोजनमाह तस्ये- ति। तस्य ब्राह्मणस्य शेषाणांक्षत्रियादीनांच शास्त्रमकल्पयत्पूर्वंभगवता विस्तरेणकृत्वा प्राहितंस्वयंकृतंग्रन्थंसंगृहीतवान् । नैवंचेदिदंशास्त्रंकृत्वेत्यनेन विरोधः प्रसज्येत ॥ १०२ ॥

(६) **रामचन्द्रः** । तस्येति । तस्य ब्राह्मणस्य कर्मविवेकार्थंशेषाणांक्षत्रियादीनांकर्मविवेकार्थंअनुपूर्वशःक्रमेण स्वायंभुवोमनुःइदंशास्त्रंअकल्पयत्कल्पयामासेत्यर्थः ॥ १०२ ॥

विदुषा ब्राह्मणेनेदमध्येतव्यंप्रयत्नतः ॥ शिष्येभ्यश्च प्रवक्तव्यंसम्यङ्नान्येन केन चित् ॥१०३ ॥

(१) **मेधातिथिः** । अध्येतव्यंप्रवक्तव्यमित्यर्हेकृत्योन विधौ । द्वितीयादध्यायात्प्रभृतिशास्त्रंप्रवर्तिष्यते । अयंह्यध्यायोऽर्थवादएव नात्र कश्चिद्विधिरस्ति । तेन यथा राजभोजनाः शालयइति शालिस्तुतिर्न राज्ञोऽन्यस्येति तद्भोजननिषेधः एवमत्रापि नान्येन केनचिदिति नायंनिषेधः केवलंशास्त्रस्तुतिः । सर्वस्मिञ्जगति श्रेष्ठोब्राह्मणः सर्वशास्त्राणांशास्त्रमिदमतस्तादृशस्य विदुषोब्राह्मणस्याऽध्ययनप्रवचनार्हेन सामान्येन शक्यते अध्येतुंप्रवक्तुंवा । अतएवाह प्रयत्नतइति । यावन्नमहान्प्रयत्न आस्थितोयावन्नशास्त्रान्तरैस्तर्कव्याकरणमीमांसादिभिः संस्कृतआत्मातावदेतत्प्रवक्तुं न शक्यते । अतएवाध्ययनेन श्रवणंलक्ष्यते । तत्र हि विद्वत्तोपयोगिनी नसंपाठे । विधौह्यध्ययने विद्वत्ताऽदृष्टायैव स्यान्नच विधौ श्रवणमध्ययनेन लक्ष्यतइति युक्तंवक्तुंन विधेये लक्षणार्थता युक्ता । अर्थवादे तु प्रमाणान्तरानुसारेण गुणवादो न दोषाय । तस्मात्त्रैवर्णिकाधिकारंशास्त्रमेतच्च परस्ताद्विशेषतोवक्ष्यते ॥ १०३ ॥

(२) **सर्वज्ञनारायणः** । विदुषेति । प्रयत्नतोवश्यमध्येतव्यम् । अन्ययोस्त्वनियमः । शिष्येभ्यस्तु प्रवचनमन्येन न कर्तव्यं किंतु विप्रेणैव । सम्यक्यथाविधि ॥ १०३ ॥

(३) **कुल्लूकः** । विदुषेति । एतच्छास्त्राध्ययनफलज्ञेन ब्राह्मणेन एतस्य शास्त्रस्य व्याख्यानाध्यापनोचितंप्रयत्नतोऽध्ययनंकर्तव्यं शिष्येभ्यश्चेदंव्याख्यातव्यं नान्येन क्षत्रियादिना । अध्ययनमात्रंतुव्याख्यानाध्यापनरहितंक्षत्रियवैश्ययोरपि निषेकादिश्मशानान्तैरित्यादिना विधास्यते । अनुवादमात्रमेतदिति मेधातिथिमतं तन्नमनोहरं द्विजैरध्ययनंब्राह्मणेनैवाध्यापनव्याख्यानेइत्यस्यालाभात् । यत्तु अधीयीरंस्त्रयोवर्णाइत्यादि तद्वेदविषयमिति वक्ष्यति । विप्रेणैवाध्यापनमिति विधानेन संभवत्यपि अनुवादत्वमस्येति वृथामेधातिथेर्ग्रहः ॥ १०३ ॥

(४) **राघवानन्दः** । विदुषाधीतवेदवेदाङ्गेन प्रयत्नतः प्रयत्नेन सम्यक् यथाविधिना नान्येन क्षत्रियादिना । अयमर्थः । इदंहि धर्मशास्त्रंधर्मवत्कृत्यंच विप्रस्यैव न राजन्यादेः । तेनात्र विधिनिषेधाभ्यांविप्रएवाधिक्रियते । वैदिकत्वाविशेषेपि बृहस्पतिसवइवअध्येतव्यमित्यर्हार्थेनान्येनेति । राजभोजनाःशालयइति वन्नान्येषांनिषेधइति मेधातिथिः॥१०३॥

(५) **नन्दनः** । अथ शास्त्राध्ययनेऽधिकारिणमाह विदुषेति । विदुषा साङ्गवेदविदा । प्रयत्नतआदरेण । अन्येनाविदुषा ब्राह्मणेन विदुषाऽपि क्षत्रियेणेत्यर्थः ॥ १०३ ॥

(६) **रामचन्द्रः** । विदुषेति । ब्राह्मणेनइदंधर्मशास्त्रंअशेषतःसम्पूर्णतःप्रयत्नतःअध्येतव्यं सम्यक्ज्ञानेनसम्यक्प्रकारेणकेनचित्अविदुषाशिष्येभ्यःवक्तव्यम् ॥ १०३ ॥

इदंशास्त्रमधीयानोब्राह्मणःशंसितव्रतः ॥ मनोवाग्देहजैर्नित्यंकर्मदोषैर्न लिप्यते ॥ १०४ ॥

(१) **मेधातिथिः** । एवंसंबन्धिद्वारेण ब्राह्मणार्थतया शास्त्रंस्तुत्वाऽधुनासाक्षात्स्तौति । इदंशास्त्रंजानानः शंसितव्रतोभवतीति परिपूर्णयमनियमानुष्ठायी भवति । शास्त्रादननुष्ठाने प्रत्यवायंज्ञात्वातद्भयादनुतिष्ठति सर्वान्यमनियमान्यथाशास्त्रंसर्वमनुतिष्ठति । अनुतिष्ठन्विहितातिक्रमप्रतिषिद्धकर्मजनितैर्दोषैर्न लिप्यते न संबध्यते ॥ १०४ ॥

---

(१०३) शिष्येभ्यश्चप्रवक्तव्यं=शिष्येभ्यश्च प्रकर्तव्यं (ठ, भ, र, ल,)

(२) सर्वज्ञनारायणः। शास्त्रप्रशंसांमक्रमते इदमिति । शंसितव्रतः चीर्णव्रतः कर्मजन्यैर्दोषैः पापैर्मनोवाक्कायकारणभेदभिन्नैर्न लिप्यते प्रत्यवायज्ञानेन तत्राप्रवृत्तेः ॥१०४॥

३ कुल्लूकः । इदंशास्त्रमिति । इदंशास्त्रंपठन्नेतदीयमर्थंज्ञात्वा शंसितव्रतोऽनुष्ठितव्रतः मनोवाक्कायसम्भवैःपापैर्नसंबध्यते ॥ १०४ ॥

(४) राघवानन्दः । शंसितव्रतोनुष्ठितब्रह्मचर्यादिव्रतः कर्मदोषैःपापैः ॥ १०४ ॥

(५) नन्दनः । शास्त्राध्ययनस्यफलमाह इदमिति ॥ १०४ ॥

(६) रामचन्द्रः । इदमिति । शंसितव्रतःपरिपूर्णव्रतःब्रह्मचर्ययुक्तः ॥ १०४ ॥

पुनाति पङ्क्तिवंश्यांश्च सप्तसप्त परावरान् ॥ पृथिवीमपि चैवेमांकृत्स्नामेकोऽपि सोऽर्हति ॥ १०५॥

[यथात्रिवेदाध्ययनं धर्मशास्त्रमिदंतथा ॥ अध्येतव्यंब्राह्मणेन नियतंस्वर्गमिच्छता ‡॥ १ ॥]

(१) मेधातिथिः । पङ्क्तिपावनोभवति । विशिष्टानुपूर्वीकः संघातः पङ्क्तिरुच्यते तांपुनाति निर्मलीकरोति । सर्वे दुष्टास्तत्सन्निधानाददुष्टाः संपद्यन्ते । वंश्यान्स्वकुलसंभूतान्सप्तपरानुपरितनान्पित्रादीनागामिनोऽवराञ्जनिष्यमाणान्समुद्रपर्यन्तांपृथिवींप्रतिग्रहीतुमर्हन्ति । धर्मज्ञताहि प्रतिग्रहाधिकारे हेतुरितश्च सर्वे धर्माज्ञायन्ते ॥ १०५ ॥

(२) सर्वज्ञनारायणः । पुनातीति । पुनाति निष्पापांकरोति । पङ्क्तिंएकपङ्क्तिस्थांजनतां वंश्यान्स्ववंशे जातान् पूर्वापरान् सप्तसप्त । पृथिवीमिति विद्यानिमित्तकं दानपात्रत्वमुक्तम् । पृथिवींभूमात्रमर्हति । किंवा वाच्यमपि चेमांपृथ्वींकृत्स्नां सर्वधनपूर्णामर्हतीति ॥ १०५ ॥

(३) कुल्लूकः । पुनातीति । इदंशास्त्रमधीयानइत्यनुवर्तते । अपांक्त्योपहतांपंक्तिमानुपूर्व्यानिविष्टजनसमूहंपवित्रीकरोति वंशभवांश्च सप्तपरान्पित्रादीन्अवरांश्च पुत्रादीन्पृथिवीमपि सर्वांसकलधर्मज्ञतया पात्रत्वेन गृहीतुंयोग्योभवति ॥१०५॥

(४) राघवानन्दः । किंच पुनातीति । पङ्क्तिम् । यस्यांपङ्क्तौभुङ्क्ते पठति वा परावरानपित्र्यादीन् अवरानपुत्रादीन्विशिष्टसंस्कारवत् कुलजत्वात् कृत्स्नांससागरमेखलां एतच्छास्त्राधिगमेन धर्मज्ञता प्रतिग्रहेहेतुः ॥ १०५ ॥

(५) नन्दनः । शास्त्राध्यायिनोवैशिष्ट्यमाहपुनातीति ॥ १०५ ॥

(६) रामचन्द्रः । पुनातीति । पङ्क्तिवंश्यांश्चवंशेभवावंश्यास्तान् ॥ १०५ ॥

[यथेति । त्रिवेदाध्ययनंत्रयाणांवेदानांअध्ययने यथाफलंभवेत्स्वर्गसाधनंभवेत् । तथा स्वर्गइच्छता ब्राह्मणेन नियतंइदंधर्मशास्त्रंअध्येतव्यम् ॥ १ ॥]

इदंस्वस्त्ययनंश्रेष्ठमिदंबुद्धिविवर्धनम् ॥ इदंयशस्यमायुष्यमिदंनिःश्रेयसंपरम् ॥ १०६ ॥

(१) मेधातिथिः । स्वस्त्यभिप्रेतस्यार्थस्याविनाशोऽयनंप्रापणंस्वस्ति प्राप्यते येन तत्स्वस्त्ययनंश्रेष्ठमन्येभ्योजपहोमादिभ्यः । नहि शास्त्रमन्तरेण तेषामनुष्ठानंसंभवति अतस्तदनुष्ठानहेतुत्वाच्छ्रेष्ठमेतत् । अथवा धर्मज्ञानार्थवाक्यान्येव श्रेयस्यान्यनुष्ठानंतु क्लेशकरमतउच्यते श्रेष्ठमिति । इदंबुद्धिविवर्धनम् शास्त्रे ह्यासेव्यमाने तदर्थस्य प्रकाशनाद्ग्रन्थि-

‡ (ख, ड,) चिह्नितपुस्तकयोर्दृष्टोरामचन्द्रेण व्याख्यातश्च ।

प्रमोक्षाद्बुद्धिविवृद्धिः प्रसिद्धैव । इदंयशस्यं धर्मज्ञः संशयानैः पृच्छ्यमानः ख्यातिंलभते यशसो निमित्तंयशस्यं-विद्वत्तौदार्यादिगुणवत्तया प्रसिद्धिर्यशः । निःश्रेयसंदुःखाननुविद्धायाः प्रीतेः स्वर्गापवर्गलक्षणायास्तत्प्राप्तिहेतुकर्मज्ञानहेतु-त्वान्निःश्रेयसंपरंश्रेष्ठम् ॥ १०६ ॥

(२) **सर्वज्ञनारायणः** । इदंस्वस्त्ययनमिति । स्वस्तिसमृद्धिस्तस्याः अयनंस्थानंश्रेष्ठं धर्मादीनांप्रशस्ततमं निःश्रेयसं निश्चितस्य श्रेयसोमोक्षस्य साधनम् ॥ १०६ ॥

(३) **कुल्लूकः** । इदमिति । अभिप्रेतार्थस्याविनाशःस्वस्ति तस्यायनंप्रापकंएतच्छास्त्रस्याध्ययनं स्वस्त्ययन जपहोमादिबोधकत्वाच्च श्रेष्ठंस्वस्त्ययनान्तरात्प्रकृष्टंबुद्धिविवर्द्धनमेतच्छास्त्राभ्यासेनाशेषविधिनिषेधपरिज्ञानात् । यशसे हितं यशस्यंविद्वत्तया ख्यातिलाभात्परंप्रकृष्टं निःश्रेयसंनिःश्रेयसस्य मोक्षस्योपायोपदेशकत्वात् ॥ १०६ ॥

(४) **राघवानन्दः** । स्वस्त्ययनंमाङ्गल्यंस्वस्ति अभिप्रेतार्थाविनाशस्यअयनप्रापणमिति वा । श्रेष्ठ्यंदृष्टादृष्टार्थत्वात् । बुद्धिविवर्धनमबुद्धिःसद्बुद्धिः आयुष्यंपरदारादिसेवाराहित्यादृष्टाकृष्टायुः क्षयाभावात् । निःश्रेयसं संस्काराचारकर्मादिपरंपरया तत्त्वज्ञानसाधनम् । परमितिविशेषणात् यस्यैतेअष्टाचत्वारिंशत्संस्काराभवन्ति ब्रह्मणःसायुज्यंसलोकतांगच्छतीत्या-द्युक्तेः ॥ १०६ ॥

(५) **नन्दनः** । शास्त्रप्रसङ्गमाह इदमिति । स्वस्त्ययनंस्वस्तिकल्याणंधर्मइति यावत्तत्प्राप्त्युपायः स्वस्त्यनम् । यशस्यंयशस्करम् । निःश्रेयसमपवर्गनिमित्तम् ॥ १०६ ॥

(६) **रामचन्द्रः** । इदंधर्मशास्त्रंपरमुत्कृष्टंनैश्रेयसंमोक्षसाधनमित्यर्थः ॥ १०६ ॥

अस्मिन्धर्मोखिलेनोक्तोगुणदोषौचकर्मणाम् ॥ चतुर्णामपिवर्णानामाचारश्चैव शाश्वतः ॥१०७॥

(१) **मेधातिथिः** । इदानींस्वशास्त्रस्य स्वविषये साकल्येन वृत्तेरन्यनिरपेक्षतामाह । कश्चिद्योनाम धर्मः ससर्वः शास्त्रेऽस्मिन्कात्स्न्येनाभिहितोन तस्माद्धर्मज्ञानाय शास्त्रान्तरापेक्षा कर्तव्येत्यतिशयोक्तिः स्तुतिः । अस्मिञ्छास्त्रे धर्मःस्मार्तोऽखिलेन निःशेषेणोक्तौ गुणदोषौ च कर्मणामिष्टानिष्टे फले गुणदोषौ कर्मणांयागादिब्रह्महत्यादीनाम् । एवंहि साकल्यं-भवति यदि कर्मस्वरूपमिति कर्तव्यताफलविशेषः कर्तृविशेषसंबन्धोनित्यकाम्यताविवेकः । एतत्सर्वंगुणपदेन प्रतिज्ञातम् । धर्मइत्युक्ते कर्मग्रहणंवृत्तपूरणार्थम् । चतुर्णामपिवर्णानामेतदपि साकल्यार्थम् । योनाम कश्चिद्धर्मेऽधिकृतस्तस्य सर्वस्ये-तोधर्मलाभः । आचारश्चैव शाश्वत आचारप्रमाणकोधर्म आचारइत्युक्तः द्वितीये चैनंविवेक्ष्यामः । शाश्वतोवृद्धपरंपरया नेदानींतनैः प्रवर्तितः ॥ १०७ ॥

(२) **सर्वज्ञनारायणः** । अस्मिन्निति । धर्माधर्मसाधनं कर्मगुणदोषौ हिंसादिकर्मणी वैधत्वे गुणवत्त्वम वैधत्वे दोषवत्त्वमिति । आचारःसाक्षाद्धर्ममजनयन्नपिधर्मसाधनाङ्गमाचमनादि ॥ १०७ ॥

(३) **कुल्लूकः** । अस्मिन्धर्मइति । अस्मिन्कात्स्न्येन धर्मोऽभिहितइति शास्त्रप्रशंसा । कर्मणांच विहितनिषिद्धानामिष्टानिष्टफले वर्णचतुष्टयस्यैव पुरुषधर्मरूपआचारः शाश्वतःपारंपर्यागतः । धर्मत्वेप्याचारस्य प्राधान्यख्यापनाय पृथङ्निर्देशः ॥ १०७ ॥

(४) **राघवानन्दः** । अखिलेन समग्रेण गुणदोषौ विहितस्य करणगुणःनिषिद्धाचरणंदोषःतदुभयमप्युक्तम् ॥१०७॥

(५) **नन्दनः** । अत्र कारणमाह अस्मिन्निति । कर्मणांविहितप्रतिषिद्धानांगुणदोषाविष्टफलंगुणेअनिष्टंदोषः । धर्माधिकारनिमित्तंशौचाचमनादिलक्षणः क्रियाविशेषआचारः ॥ १०७ ॥

(६) **रामचन्द्रः** । अस्मिन्निति । अस्मिन्धर्मशास्त्रेअखिलेन प्रकारेण धर्मउक्तः । अस्मिन्धर्मशास्त्रे चतुर्णामपिवर्णानांगुणदोषौउक्तौ । शाश्वताःपारम्पर्यक्रमागताःआचाराउक्ताः ॥ १०७ ॥

आचारःपरमोधर्मःश्रुत्युक्तःस्मार्तएवच ॥ तस्मादस्मिन्सदायुक्तोनित्यंस्यादात्मवान्द्विजः ॥१०८॥

(१) **मेधातिथिः** । परमः प्रकृष्टोधर्म आचारस्तथा श्रुतौ वेदे यउक्तःस्मार्तः स्मृतिषूक्तस्तस्मादाचारधर्मे नित्ययुक्तःस्यान्नित्यमनुतिष्ठेदात्मवानात्मनोहितमिच्छन् । सर्वस्याऽऽत्माऽस्त्यतोमतुपा तद्धितपरत्वमुच्यते ॥ १०८ ॥

(२) **सर्वज्ञनारायणः** । नन्वाचारोयदिनसाक्षाद्धर्महेतुः किमिति कर्तव्यइत्यतआह आचारइति । यद्यप्यसावङ्गमेव न प्रधानंतथाप्ययमपि परमोधर्मस्तंविनाप्यप्रवृत्तेः । सच श्रुत्युक्तः दीक्षादौ नवनीताभ्यञ्जनादिः आचमनादिःस्मार्तः यद्यप्यसावपिश्रौतस्तथापि श्रुतेःप्रत्यक्षायाः तत्परया भूलोकेऽनध्ययनात्स्मार्ततोक्ता । अस्मिन्नाचारे । सदायुक्तउद्युक्तः । आत्मवान्धृतिमान् ॥ १०८ ॥

(३) **कुल्लूकः** । प्राधान्यमेव स्पष्टयति । आचारइति । युक्तोयत्नवान् आत्महितेच्छुःसर्वस्यात्मास्तीतिआत्मशब्देनआत्महितेच्छा लक्ष्यते ॥ १०८ ॥

(४) **राघवानन्दः** । आचारहीनं न पुनन्ति वेदा इत्युक्तिमालम्ब्यवेदार्थानुष्ठानहेतुमाचारंविधास्यंस्तमेव सप्रमाणकंस्तौति आचारइति त्रिभिः । सदा युक्तःसर्वदोद्युक्तः आत्मवान्पारलौकिकात्मतत्त्वज्ञानंतदभावेआचारंविश्वसन् प्रहृष्टमनावा ॥ १०८ ॥

(५) **नन्दनः** । धर्मएवनिःश्रेयससाधनं तस्मात्सएव वक्तव्यः किमाचारेणेतिचेदत्राह आचारइति । श्रुत्युक्तोग्निहोत्रहोमादिः स्मार्तोऽष्टकादिः । अस्मिन्नये ॥ १०८ ॥

(६) **रामचन्द्रः** । आचारेति । श्रुत्युक्तःस्मृत्युक्तएवआचारःपरमोधर्मःउक्तः । तस्मात्कारणात् आचारे सदा युक्तःस्याद्द्विजःनित्यंआत्मवान्भवेत्जितेंद्रियःभवेत् ॥ १०८ ॥

आचाराद्विच्युतोविप्रोन वेदफलमश्नुते ॥ आचारेण तु संयुक्तः संपूर्णफलभाग्भवेत् ॥१०९॥

(१) **मेधातिथिः** । प्रकारान्तरेणेयमाचारस्तुतिः । आचारात्प्रच्युत आचारहीनो न वेदफलंप्राप्नोति । वेदविहितकर्मानुष्ठानफलंवेदफलमित्युक्तम् । समग्राणिवैदिकानि कर्माण्यनुतिष्ठन्यद्याचारभ्रष्टोन ततः पुत्रकामादिफलमश्नुतइतिनिन्दा । एषएवार्थोविपर्ययेणोच्यते । आचारेणतुसंयुक्तः सकलंफलंप्राप्नोति । काम्यानांचात्र यद्वदन्ति संपूर्णवचनादाचारहीनस्याप्यस्ति काम्येभ्यः फलसंबन्धोन कृत्स्नफललाभइति तन्न ।किंचिदर्थवादत्वादस्य ॥ १०९ ॥

(२) **सर्वज्ञनारायणः** । आचारादिति । विच्युतःसम्यगकर्ता वेदफलंवैदिककर्मफलंसंपूर्णनाश्नुते व्यङ्गात्तादृक्फलासिद्धेः अतएवाह आचारेणत्विति ॥ १०९ ॥

(३) **कुल्लूकः** । आचारादिति । आचाराद्विच्युतोविप्रोन वैदिकंफलंलभेत् । आचारयुक्तःपुनःसमग्रफलभाग्भवति ॥ १०९ ॥

(४) **राघवानन्दः** । आचारात् यथाविध्याचमनादेः ॥ १०९ ॥

---

(१०८) परमोधर्मः=प्रथमोधर्मः (ख)   सदायुक्तो=समायुक्तो (मेधा०)

(५) **नन्दनः** । श्रौतस्मार्ताचाराणामादरार्थमेतमेवार्थंप्रपञ्चयति आचारादितिद्वाभ्याम् वेदफलं । वेदोक्तफलंधर्मफलमितियावत् ॥ १०९ ॥

(६) **रामचन्द्रः** । आचारेति । वेदफलंवेदाध्ययनंनअश्नुते नप्राप्नोति ॥ १०९ ॥

एवमाचारतोदृष्ट्वा धर्मस्य मुनयोगतिम् ॥ सर्वस्यतपसोमूलमाचारंजगृहुः परम् ॥११०॥

(१) **मेधातिथिः** । यार्त्किचित्तपः प्राणायाममौनयमनियमकृच्छ्चान्द्रायणानशनादि तस्य सर्वस्य फलप्रसवे मूलमाचारोऽतस्तमेव मुनयस्तपःफलार्थिनोमूलत्वेन कारणतया जगृहुः गृहीतवन्तः। आचारान्दृष्ट्वा धर्मस्यमुनयोगतिंप्राप्तिमतिक्लेशकरंतपस्तदाप्याचारहीनस्य न फलतीति श्रुतिः ॥ ११० ॥

(२) **सर्वज्ञनारायणः** । गतिंप्राप्तिं तपसः प्रधानस्य धर्मसाधनस्य मूलंवृक्षस्येवमूलं प्रधानमङ्गम् ॥ ११० ॥

(३) **कुल्लूकः** । एवमिति । उक्तप्रकारेणाचाराद्धर्मप्राप्तिंमुनयोबुद्ध्वा तपसश्चान्द्रायणादेःसमग्रस्य कारणमाचारमनुष्ठेयतया गृहीतवन्तः । उत्तरत्र वक्ष्यमाणस्याचारस्य इह स्तुतिःशास्त्रस्तुत्यर्था ॥ ११० ॥

(४) **राघवानन्दः** । आचारतः आचारानुष्ठानेन शुद्धान्तःकरणात् धर्मस्य गतिंस्वरूपंदृष्ट्वा ज्ञात्वा सर्वस्य तपसो धर्मस्य आचारोमूलमित्यनुष्ठेयतया जगृहुरित्यन्वयः ॥ ११० ॥

(५) **नन्दनः** । अथशिष्टपुरुषव्यवहारेण धर्मस्याचाराधीनत्वंद्रढयति एवमिति । यथामुनयस्तात्पर्येणधर्मान्तरमुपेक्षितवन्तो न तथा कदाचिदाचारम् । तस्मादाचाराधीनत्वंधर्मस्य दृष्टवन्तइत्यभिप्रायः ॥ ११० ॥

(६) **रामचन्द्रः** । एवमिति । अस्मिन्धर्मशास्त्रेएतद्वस्तूनांसङ्ग्रहंअष्टभिःकथयिष्ये ॥ ११० ॥

जगतश्च समुत्पत्तिंसंस्कारविधिमेवच ॥ व्रतचर्योपचारंच स्नानस्यच परंविधिम् ॥ १११॥

(१) **मेधातिथिः** । उक्तधर्माअत्र विशिष्यन्ते । श्रोतृप्रवृत्त्यर्थंचानन्तफलता धर्मस्योक्ता एतदन्तास्त्वित्यादिना । तत्रातीन्द्रियोऽयमनन्तोदुष्पारइति मन्वानाअवसीदेयुरतउत्साहजननार्थंशास्त्रार्थसंकलनात्मिकामनुक्रमणींपठति । एतावन्त्यत्र वस्तूनि नातिबहूनि शक्यन्तेश्रद्दधानैः पुरुषैर्ज्ञातुमिति संक्षेपोपदिष्टमार्गआक्रम्यमाणोन दुःसहोभवतीति । *जगतश्च समुत्पत्तिमिति* कालपरिमाणंतत्स्वभावभेदो ब्राह्मणस्तुतिरित्यादि सर्वंजगदुत्पत्तावन्तर्भूतम् । एतच्चार्थवादतयोक्तंन प्रमेयतया । *संस्कारविधिंव्रतचर्योपचारंच* गर्भाधानादयः संस्काराः तेषांविधिः कर्तव्यता ब्रह्मचारिणोव्रतचर्यायाउपचारोनुष्ठानमितिकर्तव्यता वा । एतद्द्वितीयाध्यायप्रमेयार्थः । स्नानं गुरुकुलान्निवर्तमानस्य संस्कारविशेषः । दाराणामधिगमनं भार्यासंग्रहः । विवाहानांब्राह्मादीनां तत्प्राप्त्युपायानांचलक्षणं स्वरूपाधिगमनेहेतुम् । महायज्ञाः पञ्चवैश्वदेवादयः। श्राद्धस्य पितृयज्ञस्य नकल्पोविधिरितिकर्तव्यता । परग्रहणंशाश्वतग्रहणंच वृत्तपूरणार्थम् । एषतृतीयाध्यायार्थः। वृत्तीनांजीवनोपायानांधनार्जनात्मकानांभृत्यादीनांलक्षणं स्नातकस्यसमाप्तवेदाध्ययनस्य गुरुकुलान्निवृत्तस्य व्रतानि नेक्षेतोद्यन्तमादित्यमित्यादीनि । एषचतुर्थोऽर्थः । भक्ष्याभक्ष्यंपञ्चपञ्चनखाभक्ष्या अभक्ष्यंपलाण्डादि शौचंकालकृतजन्मादावुदकादिनाच द्रव्यशुद्धिः । स्त्रीधर्मयोगः सबन्धोबाल युवेत्यादि । एतत्पाञ्चमिकम् । तापसाय हितंतापस्यं तपःप्रधानस्तापोवानप्रस्थस्तस्यधर्मस्तापस्यं मोक्षः परिव्राजकधर्मः सन्यासश्च तद्विशेषएव सच तत्रैव दर्शयिष्यते । षष्ठाध्यायवस्त्वेतत् । राज्ञः पृथिवीपालनाधिकृतस्य प्राप्तैश्वर्यस्य धर्मोऽखिलोदृष्टार्थोऽदृष्टार्थश्च । एषसप्तमाध्यायगोचरः । कार्याणामृणादीनांविनिर्णयोविचार्यसंशयच्छेदेनावधारणमनुष्ठेयनिश्चयः। साक्षिणांचप्रश्ने योविधिः प्राधान्यात्पृथग्निर्देशः। आप्त-

मिको ऽयमर्थः धर्मःस्त्रीपुंसयोरित्येकादशे स्थितयोः प्रवासवियुक्तयोश्च परस्परंवृत्तिः । ऋक्थविभागधर्मः । द्यूतंतद्विषयोविधिः द्यूतशब्देनोक्तः । कण्टकादीनांचोराटविकादीनांशोधनं राष्ट्रान्निरसनोपायः । यद्यपि विभागादिरष्टादशपदान्तर्गतत्वात्कार्याणांचेत्यनेनैवोपादानाद्दणादानादिवन्नपृथङ्निर्देश्योऽध्यायेभदात्तुपृथङ्निर्देशः । वैश्यशूद्रयोरुपचारः स्वधर्मानुष्ठानम् । एतन्नवमे । संकीर्णानांक्षत्रियवैदेहकादीनांसंभवमुत्पत्ति मापद्धर्मंच स्ववृत्त्याऽजीवतांप्राणात्यये योधर्मः । एतद्दशमे । प्रायश्चित्तविधिरेकादशे । संसारगमनंधर्मेण धर्मी लक्ष्यते । संसारी पुरुषआत्मा तस्य गमनंदेहाद्देहान्तरप्राप्तिरथवासंसारविषयाः पृथिव्यादयोलोकाउच्यन्ते । तत्र गमनंपूर्ववत्त्रिविधमुत्तमाधममध्यमंकर्मसंभवंशुभाशुभकर्मनिमित्तम् निःश्रेयसं न केवलंकर्मनिमित्तागतयउक्तायावद्यतः परमन्यच्छ्रेयोनास्ति तदुपायोप्यध्यात्मज्ञानमुक्तम् । कर्मणांच विहितप्रतिषिद्धानांगुणदोषपरीक्षा ॥ १११ § ॥

(२) **सर्वज्ञनारायणः** । अथ संक्षिप्यशास्त्रवाच्यमर्थजातमाह जगतश्चेति श्लोकैरष्टभिः । जगतः समुत्पत्तिंप्रथमेध्यायेउक्तवान् । संस्कारोजातकर्मादिः व्रतचर्या नियमचरणंव्रतिनः । उपचारंगुरोःशिष्यस्य । स्नातकस्यविधिंगुरुकुलसमावृत्तसंस्कारस्य ॥ १११ ॥

(३) **कुल्लूकः** । इदानींशिष्यस्य सुखप्रतिपत्तये वक्ष्यमाणार्थानुक्रमणिकामाह जगतश्चसमुत्पत्तिमिति पाषण्डगणधर्मांश्चेत्यन्तम् । जगदुत्पत्तिर्यथोक्ता ब्राह्मणस्तुतिश्चसर्गरक्षार्थत्वेन ब्राह्मणस्य शास्त्रस्तुत्यादिकंच सृष्टावेवान्तर्भवति । एतत्प्रथमाध्यायप्रमेयम् । संस्काराणांजातकर्मादीनांविधिमनुष्ठानंब्रह्मचारिणोव्रताचरणंउपचारंच गुर्वादीनामभिवादनोपासनादि । सर्वोद्वन्द्वोविभाषयैकवद्भवतिइत्येकवद्भावः । एतद्द्वितीयाध्यायप्रमेयम् । स्नानंगुरुकुलान्निवर्तमानस्य संस्कारविशेषस्तस्य प्रकृष्टंविधानम् ॥ १११ ॥

(४) **राघवानन्दः** । संप्रति द्वादशभिरध्यायैर्यत्प्रतिपाद्यंतत् संक्षेपतः सुखप्रतिपत्त्यर्थंप्रतिजानीते जगतश्चेत्यष्टभिः । समुत्पत्तिप्राप्तिरिदं तमोभूतमित्यादिनोक्तं सृष्ट्यादित्रयमिति । प्राथमिकंसंस्कारविधिंजातकर्मादेर्विधानम् । व्रतचर्योपचारं ब्रह्मचारिव्रताचरणम् । उपचारंगुर्वादीनांपूजाभिवादनादीनि । द्वैतीयकम् । स्नानस्य समावर्तनाख्यस्य ॥ १११ ॥

(५) **नन्दनः** । अथशास्त्रविषयानर्थानध्येतृप्ररोचनार्थंसंक्षेपेणानुक्रामति जगतइति । संस्कारोनिषेकादिः । व्रतचर्या ब्रह्मचारिधर्मः । उपचारोगुरुशुश्रूषाम् ॥ १११ ॥

(६) **रामचन्द्रः** । जगतइति । प्रथमतःजगदुत्पत्तिंसंस्कारविधिम् ॥ १११ ॥

दाराधिगमनंचैव विवाहानांच लक्षणम् ॥ महायज्ञविधानंचश्राद्धकल्पंचशाश्वतम् ॥ ११२ ॥

(२) **सर्वज्ञनारायणः** । दाराधिगमनंदाराणांयादृशानां अधिगमनंकार्यम् । विवाहानांब्राह्मादीनाम् । महायज्ञावैश्वदेवादिः । श्राद्धस्यपित्र्यस्य कर्मणः कल्पंप्रकारम् ॥ ११२ ॥

(३) **कुल्लूकः** । दाराधिगमनमिति । दाराधिगमनंविवाहः तद्विशेषाणांब्राह्मादीनांच लक्षणांमहायज्ञाःपञ्चवैश्वदेवादयः श्राद्धस्य विधिःशाश्वतःप्रतिसर्गमनादिप्रवाहप्रवृत्त्या नित्यः । एषतृतीयाध्यायार्थः ॥ ११२ ॥

---

§ जगतश्चेत्यादि संसारगमनमित्यन्तनांसमानां श्लोकानां व्याख्या अत्रैव द्रष्टव्या

(४) **राघवानन्दः** । दाराधिगमनंविवाहः । विवाहानां ब्राह्मादीनांलक्षणमाख्यायेत्यादि । महायज्ञविधानंवैश्वदेवादयः पञ्चयज्ञास्तेषांविधानमनुष्ठानम् । श्राद्धकल्पंश्राद्धविधिंशाश्वतं प्रवाहानादितइति । तार्तीयके ॥ ११२ ॥

(६) **रामचन्द्रः** । दारेति । गम्यागम्यदाराणांअधिगमनंप्राप्तिअष्टविवाहानांलक्षणंपञ्चयज्ञविधानंवैश्वदेवविधानम् ॥ ११२ ॥

वृत्तीनांलक्षणंचैव स्नातकस्य व्रतानि च ॥ भक्ष्याभक्ष्यंच शौचंच द्रव्याणांशुद्धिमेव च ॥ ११३॥

(२) **सर्वज्ञनारायणः** । वृत्तीनांधनार्जनानांप्राणयात्रार्थानाम् । स्नातकस्य स्नातस्य व्रतान्यभ्युदयसाधनान्यकरणेप्रत्यवायकारीणि । भक्ष्यंदध्याद्यभक्ष्यं लशुनादि । शौचं सूतकादि । शुद्धिंद्रव्याणांतैजसादीनां शुद्धिपाविध्यम् ॥ ११३ ॥

(३) **कुल्लूकः** । वृत्तीनामिति । वृत्तीनांजीवनोपायानांऋतादीनां लक्षणं स्नातकस्य गृहस्थस्य व्रतानि नियमाः । एतच्चतुर्थाध्यायप्रमेयम् । भक्ष्यंदध्यादि अभक्ष्यंलशुनादि शौचंमरणादौ ब्राह्मणादिर्दशाहादिना द्रव्याणांशुद्धिमुदकादिना॥११३॥

(४) **राघवानन्दः** । वृत्तीनांजीवनोपायानांशिलोञ्छादिभेदभिन्नानाम् । स्नातकस्य स्नातकादिनवकल्पस्य व्रतानि नियमाः एतस्माद्ग्राह्यमेतस्मान्नेति । चातुर्थिकम् । भक्ष्यंदध्यादि अभक्ष्यंलशुनादि । शौचंमरणादौ दशाहादिना । शुद्धिर्द्रव्याणांचोदकादिना ॥ ११३ ॥

(५) **नन्दनः** । वृत्तीनांजीवनानाम् । स्नातकस्यगृहस्थस्य ॥ ११३ ॥

(६) **रामचन्द्रः** । वृत्तीति । द्रव्याणांवस्तूनांशुद्धिमेव च ॥ ११३ ॥

स्त्रीधर्मयोगंतापस्यंमोक्षंसंन्यासमेव च ॥ राज्ञश्च धर्ममखिलंकार्याणांच विनिर्णयम् ॥ ११४ ॥

(२) **सर्वज्ञनारायणः** । स्त्रीणांधर्मयोगं धर्मसंयोगंधर्मसंबन्धम् । तापस्यंवानप्रस्थम् । मोक्षंमोक्षहेतुकर्मसंन्यासंकर्मफलत्यागम् राज्ञोधर्मंधर्मसाधनम् । कार्याणांव्यवहाराणाम् ॥ ११४ ॥

(३) **कुल्लूकः** स्त्रीधर्मयोगमिति । स्त्रीणांधर्मयोगंधर्मोपायंएतत्पाञ्चमिकम् । तापस्यंतपसे वानप्रस्थाय हितंतस्यधर्मम् । मोक्षहेतुत्वान्मोक्षंयतिधर्मम् । यतिधर्मत्वेपि संन्यासस्य पृथगुपदेशःप्राधान्यज्ञापनार्थः । एषषष्ठाध्यायार्थः । राज्ञोभिषिक्तस्य सर्वोदृष्टादृष्टार्थोधर्मः । एषसप्तमाध्यायार्थः । कार्याणामृणादीनामर्थिप्रत्यर्थिसमर्पितानां विनिर्णयोविचार्यतत्त्वनिर्णयः ॥ ११४ ॥

(४) **राघवानन्दः** । स्त्रीधर्मयोगंस्त्रीनिमित्तकधर्मोपायमिति पाञ्चमिकम् । तापस्यंवानप्रस्थानांधर्मः । मोक्षंमोक्षहेतुत्वात् यतिधर्मःयतिधर्मत्वेपि सन्यासस्य पृथगुपदेशःप्राधान्यख्यापनायेति षाष्ठम् । राज्ञोभिषिक्तस्य अखिलंजाङ्गलंदेशमित्यादि दृष्टादृष्टार्थमिति साप्तमिकम् । कार्याणामृणादीनाम् ॥ ११४ ॥

(५) **नन्दनः** । स्त्रीधर्मयोगंस्त्रीधर्मलक्षणम् । तापस्यंवानप्रस्थधर्मः । कार्याणांविवादपदानाम् ॥ ११४ ॥

(६) **रामचन्द्रः** । स्त्रीति । कण्टकानांशोधनंचौरमायाणांशोधनम् ॥ ११४ ॥

साक्षिप्रश्नविधानंच धर्मंस्त्रीपुंसयोरपि ॥ विभागधर्मंद्यूतंच कण्टकानांच शोधनम् ॥ ११५॥

(२) **सर्वज्ञनारायणः** । स्त्रीपुंसयोर्धर्म्यमन्योन्यकार्यम् । विभागोधनविभजनम् । कण्टकानांचौरादीनामुपद्रवहेतूनांशोधनं तद्वधज्ञानोपायम् ॥ ११५ ॥

(३) **कुल्लूकः** साक्षीतिसाक्षिणांच प्रश्नेयद्विधानंव्यवहाराङ्गत्वेपि साक्षिप्रश्नस्य विधाननिर्णयोपायत्वात्पृथङ्निर्देशः। एतदाष्टमिकम्। स्त्रीपुंसयोर्भार्यापत्योः सन्निधावसन्निधौ च धर्मानुष्ठानंऋक्थभागस्य च धर्मम्। यद्यपि ऋक्थभागोपिकार्याणांच विनिर्णयमित्यनेनैव प्राप्तस्तथाप्यध्यायभेदात्पृथङ्निर्देशः। द्यूतविषयोविधिर्द्यूतशब्देनोच्यते कण्टकानांचौरादीनांशोधनंनिरसनम्॥ ११५॥

(४) **राघवानन्दः** । साक्षिणांव्यवहाराङ्गत्वेपि प्रधानत्वख्यापनार्थं पृथङ्निर्देशइत्याष्टमिकम् । स्त्रीपुंसयोःसंनिधानासंनिधाननिबन्धनंधर्मानुष्ठानम्। धनविभागस्य व्यवहाराङ्गत्वेपि अध्यायपृथक्त्वात्पृथक्त्वनिर्देशः। द्यूतंद्विविधम। कण्टकानांचोराणांशोधनंनिरसनम्॥ ११५॥

(५) **नन्दनः** । स्त्रीपुंसधर्मोदम्पतिभ्यामन्योन्यस्मिन्कर्तव्यधर्मः॥ ११५॥

वैश्यशूद्रोपचारंच संकीर्णानांच संभवम्॥ आपद्धर्मंच वर्णानांप्रायश्चित्तिविधिंतथा॥ ११६॥

(२) **सर्वज्ञनारायणः** । वैश्यशूद्राभ्यांकार्यमुपचारम् । वर्णस्य संकीर्णानामनुलोमप्रतिलोमानां आपद्धर्ममापदि धर्मोत्पादनविधिम्। प्रायश्चित्तस्याधर्मनिवर्तककर्मणोविधिम्॥ ११६॥

(३) **कुल्लूकः** । वैश्यशूद्रोपचारंचेति। वैश्यशूद्रोपचारं स्वधर्मानुष्ठानंएतन्नवमे। एवंसङ्कीर्णानां अनुलोमप्रतिलोमजानामुत्पत्तिमापदि च जीविकोपदेशंआपद्धर्मंएतद्दशमे। प्रायश्चित्तविधिमेकादशे॥ ११६॥

(४) **राघवानन्दः** । वैश्यशूद्रोपचारंच स्वस्वधर्मानुष्ठानमिति नावमिकम्। सङ्कीर्णानामनुलोमप्रतिलोमजानांसंभवमुत्पत्तिम्। आपद्धर्मंजीविकान्तराद्युपदेशइति दाशमिकम्। धर्मभिक्षुकादिप्रायश्चित्तविधानमित्यैकादशिकम्॥ ११६॥

(५) **नन्दनः** । वैश्यशूद्रोपचारंतयोराचारंधर्ममितियावत्॥ ११६॥

(६) **रामचन्द्रः** । संसारस्य। गमनागमनंत्रिविधंकर्मकायिकवाचिककर्मसंभवंवक्ष्ये ॥ ११६ ॥

संसारगमनंचैव त्रिविधंकर्मसंभवम् ॥ निःश्रेयसंकर्मणांच गुणदोषपरीक्षणम्॥ ११७॥

(२) **सर्वज्ञनारायणः** ! संसारोजीवस्य गमनं उत्तमाधममध्यमधर्मसंभवत्वेन त्रिविधम् कर्मणांनिःश्रेयससाधनवत्त्वम्। कर्मणामेवगुणदोषयोः पुण्यहेतुत्वपापहेतुत्वयोः परीक्षणम्॥ ११७॥

(३) **कुल्लूकः** संसारगमनमिति। संसारगमनंदेहान्तरप्राप्तिरूपंउत्तममध्यमाधमभेदेन त्रिविधं शुभाशुभकर्महेतुकम्। निःश्रेयसमात्मज्ञानंसर्वोत्कृष्टमोक्षलक्षणस्यश्रेयोहेतुत्वात् । कर्मणांच विहितनिषिद्धानांगुणदोषपरीक्षणम् ॥ ११७ ॥

(४) **राघवानन्दः** । संसारगमनंचैव । तिर्यग्योन्यादिप्राप्तिम् उत्तममध्यमाधमभेदेनत्रिविधंकायिकंवाचिकंमानसिकंचेति निःश्रेयसंतत्वज्ञानात् कर्मणांविहितनिषिद्धानामिति द्वादशिकम्॥ ११७॥

(५) **नन्दनः** । त्रिविधंनोवाक्कायभेदेन कर्मणांनैःश्रेयसंश्रेयोनिःश्रेयसंतत्रभवंनैःश्रेयसम्। संस्काराणांकर्मणांमध्येप्रकृष्टतरंकर्मेत्यर्थः॥ ११७।

इतिलक्ष्मणाचार्यात्मजेन श्रीवीरमल्लप्रियसखेन श्रीनन्दनेनविरचिते मानवव्याख्याने प्रथमोध्यायः॥ १ ॥

देशधर्मान्जातिधर्मान्कुलधर्मांश्च शाश्वतान्॥पाषण्डगणधर्मांश्च शास्त्रेऽस्मिन्नुक्तवान्मनुः॥११८॥

(१) **मेधातिथिः** । तदेव साकल्याभिधानं द्रढयति । प्रतिनियते देशेऽनुष्ठीयमाना न सर्वस्यां पृथिव्यां

ते देशधर्माः । ब्राह्मणादिजात्याश्रयाजातिधर्माः । कुलधर्माः प्रख्यातवंश प्रवर्तिताः । पाखण्डं प्रतिषिद्धव्रतचर्या । गणः-संघातो वणिक्कारुकुशीलवादीनाम् । तान्सर्वधर्मान्भगवान्मनुरस्मिञ्छास्त्र उक्तवान् ॥ ११८ ॥

(२) **सर्वज्ञनारायणः** । देशधर्मास्तत्तद्देशासाधारणधर्मास्तत्र तत्र प्रसङ्गेन न तु कण्ठरवेण । एवंजातिधर्मान् ब्राह्मणादिजातिधर्मान् । कुलधर्मान् तत्तदसाधारणगोत्रधर्मान् । पाषण्डधर्मान्पाषण्डान् प्रतियेन्यैःकार्याधर्माः तेपाषण्ड-धर्मास्तथागणधर्मानैगमादिगणधर्मास्तान्प्रति तैर्वाकर्तव्यास्तान् ॥ ११८ ॥

(३) **कुल्लूकः** । देशधर्मानिति । प्रतिनियतदेशेऽनुष्ठीयमानादेशधर्माः । ब्राह्मणादिजातिनियताजातिधर्माः । कुलविशे-षाश्रयाःकुलधर्माः । वेदबाह्यागमसमाश्रयाप्रतिषिद्धव्रतचर्यापाषण्डं तद्योगात्पुरुषोपि पाषण्डः तन्निमित्तायेधर्माः पाषण्डिनो विकर्मस्थानित्यादयःतेषांपृथग्धर्मानभिधानात् । गणःसमूहोवणिगादीनाम् ॥१८॥

(४) **राघवानन्दः** । देशधर्मान्प्रतिनियतदेशानुष्ठेयहोलिकादिधर्मानिति । जातिधर्मान्ब्राह्मणादिजातिनियतानध्या-पनादीन् । कुलधर्मादीन्षष्ठेन्नप्राशनंमासीत्यादिकान् । पाखण्डधर्मान्वेदबाह्याचारान् । गणःसंघातस्तद्युक्तानांवणिक्कारुकु-शीलवादीनांधर्मान् ॥ ११८ ॥

(६) **रामचन्द्रः** । अस्मिञ्छास्त्रेएतेषांवस्तूनांनिर्णयंमनुःउक्तवान्पूर्वम् ॥ ११८ ॥

यथेदमुक्तवाञ्छास्त्रंपुरा पृष्टोमनुर्मया ॥ तथेदंयूयमप्यद्य मत्सकाशान्निबोधत ॥ ११९ ॥

इतिमानवेधर्मशास्त्रेभृगुप्रोक्तायांसंहितायांप्रथमोऽध्यायः ॥ १ ॥ ॥ ७ ॥ श्रीकृष्णाय नमः

(१) **मेधातिथिः** । तदेव साकल्याभिधानंद्रढयति । प्रतिनियते देशेऽनुष्ठीयमाना नसर्वस्यां पृथिव्यान्ते देशधर्मा ब्राह्मणादिजात्याश्रयाजातिधर्माः । कुलधर्माः प्रख्यातवंशप्रवर्तिताइति पाखण्डप्रतिषिद्ध व्रतचर्याऽऽवाह्य स्मृतिसमाश्रया स्तत्रये धर्माः । पाखण्डिनोविकर्मस्थानिति । गणोगणःसंघातो वणिक्कारुकुशीलवादीनाम् । तान्त्सर्वान्भगवान्मनुरस्मिञ्छा स्त्रउक्तवान् । यथेदमुक्तवाञ्छास्त्रंपुरापृष्टोमनुर्मया । तथेदंयूयमप्यद्य मत्सकाशान्निबोधत अवधानार्थः प्रतिबोधः ॥ ११९॥

इतिश्रीभट्टमेधातिथिविरचिते मनुभाष्ये प्रथमोऽध्यायः ॥ १ ॥ ७ ॥ ॥ ॥ ७ ॥

(२) **सर्वज्ञनारायणः** । यथेदमिति । यथा येन श्लोकादिनिबन्धनप्रकारेण ॥ ११९ ॥

श्रीनारायणसर्वज्ञकृतावृत्तिर्मनुस्मृतेः । कुनिबन्धकृतव्याख्यामियंदूरे निरस्यति । सर्वज्ञनारायणकृतौ मनुसमस्त व्यवहारापातनिकानाम प्रथमोध्यायः ॥ १ ॥

(३) **कुल्लूकः** । यथेदमिति । पूर्वमया पृष्टोमनुर्यथेदंशास्त्रमभिहितवान् तथैवान्यूनानतिरिक्तंमत्सकाशाच्छृणुते-ति ऋषीणां श्रद्धातिशयार्थंपुनरभिधानम् ॥ १९ ॥ ॥ इतिश्रीकुल्लूकभट्टकृतायांमन्वर्थमुक्तावल्यांमनुवृत्तौ प्रथमो-ऽध्यायः ॥ १ ॥

(४) **राघवानन्दः** । अध्यायमुपसंहरति यथेदमिति ॥ ११९ ॥

॥ इतिश्रीराघवानन्दसरस्वतीविरचितायांमन्वर्थचन्द्रिकायांप्रथमोध्यायः ॥ १ ॥ ७ ७

(६) **रामचन्द्रः** । मत्सकाशाद्भृगुःभृगोःसकाशात्यूयंऋषयोनिबोधत जानीतेति ॥ ११९ ॥

इतिश्रीरामचन्द्रविरचितायांचन्द्रिकायांमानवे धर्मशास्त्रे जगदुत्पत्तिप्रकरणंनाम प्रथमोध्यायः ॥ १ ॥

श्री

अथ द्वितीयाध्यायः

विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिः ॥ हृदयेनाभ्यनुज्ञातो योधर्मस्तंनिबोधत ॥ १ ॥

(१) मेधातिथिः । प्रथमोऽध्यायः शास्त्रप्रतिपाद्यार्थतत्त्वदर्शनार्थोऽनुक्रान्तः । जगत्सृष्ट्यादिवर्णनं च तच्छेषमेव व्याख्यातम् । इदानींशास्त्रमारभते । तत्र प्रतिज्ञातोर्थोजगत्सर्गादिवर्णनेन व्यवायाद्विस्मृतइत्यनुसंधानार्थंपुनः शिष्यान्प्रति बोधयति । योधर्मोभवतांशुश्रूषितस्तमिदानींमयोच्यमानंनिबोतावहिताभूत्वा शृणुत । प्रथमेऽध्याये पञ्चषाः श्लोकाः प्रयोजनादिप्रतिपादनार्थाः । परिशिष्टमर्थवादरूपम् । तच्चेन्नातिसम्यगवधारितंनधर्मपरिज्ञाने महतीक्षतिः । इह तु साक्षाद्धर्मउपदिश्यते । ततोऽवधानवद्भिरवधारणीयोऽयमर्थइति पुनरुपन्यासफलम् । धर्मशब्द उक्तार्थोऽष्टकाद्यनुष्ठानवचनः । बाह्यदर्शनिनस्तुभस्मकपालादि धारणमपि धर्मंमन्यन्ते । तन्निवृत्त्यर्थंविद्वद्भिरित्यादीनि विशेषणपदानि । विद्वांसः शास्त्रसंस्कृतमतयः प्रमाण प्रमेयस्वरूपविज्ञानकुशलाः । तेच वेदार्थविदोविद्वांसोनान्ये यतोवेदादन्यत्रधर्मंप्रति ये गृहीतप्रामाण्यास्ते विपरीतप्रमाणप्रमेयग्रहणादविद्वांसएव । एतच्चमीमांसातस्तत्त्वतोनिश्चीयते । सन्तः साधवः प्रमाणपरिच्छिन्नार्थानुष्ठायिनोहिताहितप्राप्तिपरिहारार्थाययत्नवन्तः । हिताहितंच दृष्टंप्रसिद्धम् । अदृष्टंच विधिप्रतिषेधलक्षणम् । तदनुष्ठानबाह्याअसन्तउच्यन्ते । अतउभयमत्रोपात्तं ज्ञानमनुष्ठानंच । विद्यमानतावचनः सच्छब्दोन संभवत्यानर्थक्यात् । यद्धि येन सेव्यते तत्तेन विद्यमानेनैव सेवानुष्ठानशीलता । भूतप्रत्ययेनानादिकालप्रवृत्ततामाह । नायमष्टकादिधर्मोऽद्यत्वे केनचित्प्रवर्तितइतरधर्मवदेतदेव नित्यशब्देन दर्शयति । यावत्संसारमेषधर्मः । बाह्यधर्मास्तु सर्वे मूर्खदुःशीलपुरुषप्रवर्तिताः कयन्तंकालंलब्धावसराअपि पुनरन्तर्धीयन्ते । नहि व्यामोहो युगसहस्रानुवर्तीभवति । सम्यग्ज्ञानमविद्ययासंच्छन्नमपि तत्क्षयेनिर्मलतामेवैति । न हितस्य निर्मलतया छेदः संभवः इति । अद्वेषरागिभिर्बाह्यधर्मानुष्ठाने द्वितीयंकारणम् । व्यामोहः पूर्वमुक्तः । अनेन लोभादयउच्यन्ते रागद्वेषग्रहणस्य प्रदर्शनार्थत्वात् । लोभेन मन्त्रतन्त्रादिषु प्रवर्तयन्ति । अथवा रागद्वेषयोर्लोभोन्तर्भूतः । आत्मानियेभोगोपयोगासरेण जीवितुमसमर्थालिङ्गधारणादिना जीवन्ति । तदुक्तंभस्मकपालादि धारणं नग्नता काषाये च वाससीबुद्धिपौरुषहीनानांजीविकेति । द्वेषोविपरीतानुष्ठानकारणम् । द्वेषप्रधानाहि नातीव तत्त्वावधारणे समर्थाभवन्त्यतोऽधर्ममेव धर्मत्वेनाध्यवस्यन्तीति । अथवोभावपि रागद्वेषौ तत्त्वावधारणे प्रतिबन्धकौ । सत्यामपि कस्यांचिच्छास्त्रवेदनमात्रायां लब्धेऽपि विद्वद्व्यपदेशे रागद्वेषवत्तया विपरीतानुष्ठानंसंभवति । जानानाअपि यथावच्छास्त्रंकस्यचिद्द्वेष्यस्योपघाताय प्रियस्य चोपकाराय कौटसाक्ष्याद्यधर्मंसेवन्ते तेषांवेदमूलमेवानुष्ठानमित्यशक्यनिश्चयंकारणान्तरस्य रागद्वेषलक्षणस्य संभवादतस्तत्प्रतिषेधः । अत्रचोच्यते सद्भिरिति सच्छब्दः साधुतावचनोवर्णितः । कीदृशीच साधुता तस्य यदि रागद्वेषाभ्यामधर्मे प्रवृत्तिः संभाव्यते तस्मादद्वेषरागिभिरिति न वक्तव्यम् । एवं तर्हिहेतुत्वेनोच्यते । यतोरागादिवर्जिताअतः । सन्तोभवन्ति । रागद्वेषप्रधानत्वाभावश्चात्र प्रतिपाद्यते । न सर्वेण सर्वंतदभावयोग्यावस्थागतस्य हेतोर्निरन्वयमुच्छिद्यते । तथाच श्रुतिः नहवै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्तीति । रागो-

विषयोपभोगगृध्नुता तत्प्रतिषेधव्यापारोद्वेषः। लोभोमात्सर्यमसाधारण्येन स्पृहा परस्य चैतन्माभूद्विभवोऽप्यस्यापीति। चित्तधर्माएते। अथवा चेतनावत्सुस्त्रीसुतसुहृद्वान्धवादिषु स्नेहोरागः लोभोऽचेतनेष्वपि धनादिषु स्पृहा। हृदयेन हृदयशब्देन चित्तमाचष्टे। अनुज्ञानंच हृदयस्य प्रसादः। एषाहि स्थितिरन्तर्हृदयवर्तीनिबुद्ध्यादितत्त्वानि। यद्यपि बाह्यहिंसाभक्ष्यभक्षणादिषु मूढाधर्मबुद्ध्या प्रवर्तन्ते तथापि हृदयाक्रोशनंतेषांभवति। वैदिके त्वनुष्ठाने परितुष्यति मनः। तदस्य सर्वस्यायमर्थः। न मया तादृशोधर्मउच्यते यत्रैते दोषाः सन्ति किंतु यएवंविधैर्महात्मभिरनुष्ठीयते स्वयंच यत्र चित्तंप्रवर्तयति वा। अत आदरातिशयउच्यमानेषु धर्मेषु युक्तः। अथवा हृदयंवेदः। सह्यधीतोभावनारूपेण हृदयस्थितोहृदयम्। ततश्चत्रितयमत्रोपात्तम्। यदि तावदविचार्यैव स्वाग्रहात्काचित्प्रवृत्तिः कस्यचित्तथाप्यत्रैवयुक्ता। एतद्धृदयेनाभ्यनुज्ञातइत्यनेनोच्यते। अथाप्ययंन्यायोमहाजनोयेन गतः सपन्थाइति तदप्यत्रैवास्ति। विद्वांसोह्यत्र निष्कामाः प्रवृत्तिपूर्वाअनिन्द्याश्च लोके। अथाप्रामाणिकीप्रवृत्तिः सापि वेदप्रामाण्यात्सिद्धैवेति। सर्वप्रकारंप्रवृत्त्याभिमुख्यमनेन जन्यते। अन्येत्वेतंश्लोकंसामान्येन धर्मलक्षणार्थंव्याचक्षते। एवंविधैर्यः सेव्यते सधर्मोऽवगन्तव्यः। प्रत्यक्षवेदविहितस्य स्मार्तस्य वाचारतः प्राप्तस्य सर्वस्यैतल्लक्षणंविद्यते। अत्रतु यएतैः सेव्यते तंधर्मंनिबोधतेतिपाठोयुक्तः ॥ १ ॥

(२) **सर्वज्ञनारायणः**। अथ प्रकृतप्रतिज्ञातंधर्मसाधनमभिधातुमवतारयति। विद्वद्भिर्विद्यावद्भिःसद्भिराचारपरैः द्वेषःक्रोधानुबन्धो रागोभिलाषानुबन्धः तद्रहितैःसेवितोयो धर्मोधर्महेतुः तथा सेव्यमानोपि हृदयेन शङ्कावतांनाभ्यनुज्ञायते चेन्नासौ धर्मोऽतउक्तं हृदयेनेति। अभ्यनुज्ञातःस्वीकृतः एवंविधोयोधर्मस्तं अस्माच्छास्त्रान्निबोधत। तत्तत्कालपठ्यमानश्रुतिप्रतिपादितोपि हि धर्मस्ततएव प्रसिद्धोपि दुरुहपदवाक्यार्थसंकीर्णश्रुतिप्रमाणकतया स्मृतिमपेक्षतएव ॥ १ ॥

(३) **कुल्लूकः**। प्रकृष्टपरमात्मज्ञानरूपधर्मज्ञानाय जगत्कारणंब्रह्म प्रतिपाद्याधुना ब्रह्मज्ञानाङ्गभूतसंस्कारा दिरूपंधर्मंप्रतिपिपादयिषुर्धर्मसामान्यलक्षणंप्रथममाह विद्वद्भिरिति। विद्वद्भिर्वेदविद्भिः सद्भिर्धार्मिकैरागद्वेषशून्यैरनुष्ठितः। हृदयेनाभिमुख्येन ज्ञातइत्यनेन श्रेयःसाधनमभिहितम्। तत्र हि स्वरसान्मनोभिमुखीभवति वेदविद्भिर्ज्ञातइति विशेषणोपादानसामर्थ्यात् ज्ञातस्य वेदस्यैव श्रेयः साधनज्ञाने कारणत्वंविवक्षितम्। खड्गधारिणा हतइत्युक्ते धृतखड्गस्यैव हनने प्राधान्यमतोवेदप्रमाणकःश्रेयःसाधनंधर्मइत्युक्तम्। एवंविधोयोधर्मस्तंनिबोधत। उक्तार्थसंग्रहश्लोकाः। वेदविद्भिर्ज्ञातइति प्रयुञ्जानोविशेषणम्। वेदादेव परिज्ञातोधर्मइत्युक्तवान्मनुः॥ हृदयेनाभिमुख्येन ज्ञातइत्यपि निर्दिशन्। श्रेयः साधनमित्याह तत्रह्यभिमुखंमनः॥ वेदप्रमाणकःश्रेयःसाधनंधर्मइत्यतः। मनूक्तमेव मुनयःप्रणिन्युर्धर्मलक्षणम्॥ अतएव हारीतः अथातोधर्मंव्याख्यास्यामः श्रुतिप्रमाणकोधर्मःश्रुतिश्च द्विविधा वैदिकी तान्त्रिकीच। भविष्यपुराणे धर्मःश्रेयःसमुद्दिष्टंश्रेयोभ्युदयलक्षणम्। सतु पञ्चविधःप्रोक्तोवेदमूलःसनातनः॥ अस्य सम्यगनुष्ठानात्स्वर्गोमोक्षश्च जायते। इह लोके सुखैश्वर्यमतुलंच खगाधिप॥ श्रेयःसाधनमित्यर्थः। जैमिनिरपि इदमपि धर्मलक्षणमसूत्रयत् चोदनालक्षणोऽर्थोधर्मइति। उभयचोदनया लक्ष्यतेऽर्थः श्रेयःसाधनंज्योतिष्टोमादिः अनर्थः प्रत्यवायसाधनंश्येनादिः तत्र वेदप्रमाणकंश्रेयःसाधनंज्योतिष्टोमादिधर्मइति सूत्रार्थः। स्मृत्यादयोऽपि वेदमूलत्वेनैव धर्मेप्रमाणमिति दर्शयिष्यामः। गोविन्दराजस्तु हृदयेनाभ्यनुज्ञातइत्यन्तःकरणविचिकित्साशून्यइतिव्याख्यातवान्। तन्मते वेदविद्भिरनुष्ठितःसंशयरहितश्च धर्मइति धर्मलक्षणंस्यात्। एवंच दृष्टार्थग्रामगमनादिसाधारणंधर्मलक्षणंविचक्षणान श्रद्दधते। मेधातिथिस्तु हृदयेनाभ्यनुज्ञातइति यत्र चित्तंप्रवर्तयतीति व्याख्यायाथवा हृदयंवेदः सह्यधीतोभावनादिरूपेण हृदयस्थितोहृदयमित्युच्यतइत्युक्तवान्॥ १ ॥

(४) **राघवानन्दः** । एवमाचारतोदृष्ट्वा धर्मस्य मुनयोगतिमित्यनेन पूर्वाध्याये धर्मंउपक्षिप्तस्तमनुष्ठातृविशेषानुष्ठेयत्वेनाह विद्वद्भिरिति । विद्वद्भिःधर्मबुद्ध्याअनुष्ठेयत्वेन वेदवेदार्थविद्भिःसद्भिःवेदप्रमाणकाग्निहोत्राद्यनुष्ठानवद्भिःएतेन बौद्धादीनां परजिगीषाकुतूहलादिना वेदतत्त्वार्थवित्वेपि वेदार्थाननुष्ठातृत्वेनाशिष्टताव्याख्याता । अद्वेषरागिभिरित्यनेन श्येनयागवामदेव्युपासनादीनांवेदचोधितत्वेपि दृष्टार्थतया न धर्मतेति दर्शितम् । हृदयेनेति शास्त्रद्वैधे सति साधूनां मनस्यतीवेष्टोयःस धर्मः । तथाच व्यासः वैकल्पिके आत्मतुष्टिः प्रमाणमिति । तंनिबोधतेत्यन्वयः । इति तु कामयमान एतावान्वैकामइति श्रुतेरत्यन्तकामात्मता निन्दिता ॥ १ ॥

(५) **नन्दनः** । धर्मोनित्यंसेवितोधर्मत्वेननित्यमनुष्ठितोनशोकमोहादिना कादाचित्केन निमित्तेन किंच हृदयेनाभ्यनुज्ञातइदमेवश्रेयइतिस्वारस्ययुक्तेनहृदयेनस्वीकृतोननुक्रोशता । एवंभूतोयोऽर्थस्तंधर्मंव्यवस्यत हे महर्षयोनिश्चिनुत । तंधर्मंव्यवस्यतेतिसाधु पाठः ॥ १ ॥

(६) **रामचन्द्रः** । विद्वद्भिः सेवितः धर्मः तंधर्मंनिबोधत कीदृशैः सद्भिः नित्यंअद्वेषरागिभिः रागद्वेषरहितैः यः धर्मःहृदयेनअभ्यनुज्ञातः मनसा ज्ञातः ॥ १ ॥

कामात्मता न प्रशस्ता न चैवेहास्त्यकामता ॥ काम्योहिवेदाधिगमः कर्मयोगश्च वैदिकः ॥ २ ॥

(१) **मेधातिथिः** । फलाभिलाषः कर्मप्रवृत्तेर्हेतुर्यस्य सकामात्मा तद्भावःकामात्मता । तत्प्रधानताआत्मशब्देन प्रतिपाद्यते । सान प्रशस्ता निन्दिता अतश्च निन्दया प्रतिषेधानुमाने न कर्तव्येति प्रतीयते । अर्थात्सौर्यादीनांसर्वेषांकाम्यानांनिषेधोऽयम् । अथवाकिंविशेषेण ब्रूमः सौर्यादीनामिति सर्वमेवक्रियानुष्ठानंफलसिद्धार्थंन स्वरूपनिष्पत्तये । नच काचन निष्फलाक्रिया । यदपि नकुर्वीत वृथाचेष्टामिति भस्मनिहुतंविषयान्तरे देशराजवार्ताद्यन्वेषणंतत्रापि क्रियाफलंविद्यते किंतु प्रधानफलंस्वर्गग्रामादि पुरुषस्य यद्दृष्टादृष्टयोरुपयुज्यते तदभावाद्वृथाचेष्टेत्युच्यते । अथोच्यते । भवतु क्रियाफलवती तद्विषयेऽभिलाषोन कर्तव्योवस्तुस्वाभाव्यात्फलंभविष्यति । अत्रापि सौर्यादीनामफलत्वंकाम्यमानंफलंज्ञातं नानिच्छोस्तद्भविष्यतीति । नच लौकिकीप्रवृत्तिर्दृश्यते फलाभिसन्धिनिरपेक्षा । नचात्र विशेषः श्रुतावैदिकेषु कर्मसु फलंनाभिसंधेयमिति । तत्र फलवत्सु श्रुतेषु कामनानिषेधादप्रवृत्तौ श्रुतिविरोधः । नित्येषु तु प्राप्तिरेव नास्ति । विशेषानुपादानाच्च लौकिकव्यापारनिवृत्तौ दृष्टविरोधः तदिदमापतितम् न किंचित्केनचित्कर्तव्यंसर्वैस्तूष्णींभूतैः स्थातव्यम् । उच्यते । यत्तावदुक्तंकाम्येषु सौर्यादिषु निषेधप्रसङ्गइतितत्र वक्ष्यति यथा संकल्पितांश्चेहसर्वान्कामान्समश्नुतइति । निषेधेहि कुतः संकल्पः कुतश्च कामावाप्तिः । तदपि विशेषानुपादानाल्लौकिकेपि प्रसङ्गइति । तत्रोपात्तएव विशेषः योधर्मस्तंनिबोधतेति धर्मस्य प्रकृतत्वात् । यदप्युक्तंनित्येषु फलाश्रयणात्फलाभिसन्धेःप्राप्तिरेव नास्ति किंनिषेधेनेति तत्राप्युच्यते । फलाभावात्कश्चित्सम्यक्शास्त्रार्थमजानानोन प्रवर्तेत । सौर्यादिषु चाश्रुतफलेषु फलाभिसन्धिपूर्विकांप्रवृत्तिंदृष्ट्वासामान्यतोदृष्टेन यत्कर्तव्यं तत्फलहेतोः क्रियतइत्यश्रुतमपि फलमभिसंदधीत तन्निवृत्त्यर्थमिदमारभ्यते । यद्यप्ययंन्यायोयत्फलवच्छ्रुतंतत्तथैव कर्तव्यम् यदापि निष्फलमेव कर्तव्यतया शास्त्रेण यावज्जीवादिपदैर्विनैव विश्वजिन्न्यायेनफलकल्पनयावगमितं तस्यान्यथानुष्ठाने प्रसङ्गएव नास्ति तथापि यएतंन्यायंप्रतिपत्तुमसमर्थः सवचनेन प्रतिपाद्यते । न्यायतः प्रतिपत्तौ हि गौरवम् । वचनात्तु लघीयसी सुखप्रतिपत्तिरितिसुहृद्भूत्वाप्रमाणसिद्धमर्थमुपदिशतिस्म । नचैवेहास्त्यकामता । कामशब्दोयंयद्यपि हृच्छयवचनोदृष्टस्तथापि तस्येहासंभवात्कामइच्छाभिलाषइत्यनर्थान्तरम् । तत्र वक्ष्यमाणपर्यालोचनया फलाभिलाषेण-

न सर्वत्र प्रवर्तितव्यमित्ययमर्थःस्थास्यति। परस्तु कामात्मतामिच्छामात्रसंबन्धमात्रपदार्थमन्वानश्चोदयति। नचैवेहास्त्यकामतेति। नचेह लोके काचिदकामिनः प्रवृत्तिरस्तीत्यर्थः। आस्तांतावत्कृषिवाणिज्यादि व्युत्पन्नबुद्धिना क्रियमाणम् यः स्वयंवेदाधिगमोवेदाध्ययनंबालः कार्यते पित्रादिना ताड्यमानःसोपि न काममन्तरेणोपपद्यते। अध्ययनंहि शब्दोच्चारणरूपम्। नचोच्चारणमिच्छया विना निर्घातध्वनिवदुत्तिष्ठति। इच्छति चेत्किमिति ताड्यतइति सैव तथेच्छोपजन्यते। अभिमतेतु विषये स्वयमुपजायतइत्येतावान्विशेषः। यश्चायंवैदिकोवेदविहितकर्मयोगोदर्शपूर्णमासादिकर्मानुष्ठाने नित्यत्वेनावगतः सोपि न प्राप्नोति। नह्यनिच्छतोदेवतोद्देशेन स्वद्रव्य त्यागोपपत्तिः। तस्मात्कामात्मतानिषेधे सर्वश्रौतस्मार्तकर्मनिषेधः प्रसक्तइति ॥ २ ॥

(२) सर्वज्ञनारायणः। धर्ममात्रमभिधेयतया प्रतिज्ञातमत्रावमृशति। कामात्मता रागपरता न प्रशस्ता आयत्यांनाभ्युदयहेतुः कामतः कर्मणि प्रवृत्तौ पुनःपुनर्वासनानुच्छेदे संसारानुच्छेदात्। न चाकामताइहलोकेस्ति। संभवत्वादुपपादयतिकाम्योहीति। वेदानामधिगमोध्ययनंकाम्यःकामविषयःकामनोपनिबद्धयजनयाजनादितात्पर्येण तत्र प्रवृत्तेरध्ययनानन्तरंकर्तव्योपि वैदिकोवेदप्रतिपादितःकर्मयोगःकर्मप्रयोगःकाम्यःकामनाविषयःतद्द्वाराध्ययनमपितथेत्यर्थः ॥ २ ॥

(३) कुल्लूकः। कामात्मतेति। फलाभिलाषशीलत्वंपुरुषस्य कामात्मता सा न प्रशस्ता बन्धहेतुत्वात्। स्वर्गादिफलाभिलाषेण काम्यानि कर्माण्यनुष्ठीयमानानि पुनर्जन्मने कारणंभवन्ति। नित्यनैमित्तिकानि त्वात्मज्ञानसहकारितया मोक्षाय कल्पन्ते। न पुनरिच्छामात्रमनेन निषिध्यते तदाह न चैवेहास्त्यकामतेति। यतोवेदस्वीकरणंवैदिकसकलधर्मसंबन्धश्चेच्छाविषयएव ॥ २ ॥

(४) राघवानन्दः। सर्वेषांकर्तव्यस्य तु काममूलता प्रत्यक्षसिद्धा तस्तत्रव्यवस्थामाह कामात्मतेति चतुर्भिः। इहेति प्राणिभूमौअतीव फलाभिलाषिता कामात्मता तदभावस्त्वकामता तथाचकिंकार्यमित्यपेक्षायामाह वेदाधिगमेति वेदाधिगमःवेदतदर्थज्ञानंवैदिकःवेदप्रमाणकोऽग्निहोत्रादिः चकारात्स्मार्तोपि धर्मपत्नीसंयोगादिःकाम्यः। एतेनैवपुमर्थसिद्धेः न सर्वत्र काममूलप्रवृत्तिरितिभावः ॥ २ ॥

(५) नन्दनः। अस्मिञ्छास्त्रेऽनुशिष्यमाणस्य धर्मस्य प्रवृत्तिफलस्यापि निवृत्तिफलत्वंक्रियाविशेषसाध्यमिति चतुर्भिः श्लोकैराह कामात्मतेति। चोदितेषु कर्मसु फलाभिसंधिः कामात्मता सा न प्रशस्ता निन्दिता प्रतिषिद्धेतियावत्। न च कर्मणः स्वरूपप्रवृत्तिनिष्कामता प्रशस्तेत्युक्तं नचैवेहाऽस्त्यकामतेति। ईहा प्रवृत्तिः। अत्रहेतुरुक्तः काम्योहीति। वेदाध्ययनंवेदार्थज्ञानंच वेदाधिगमः कर्मयोगः पञ्चमहायज्ञादिकः काम्यःकामसाध्यःतौकाममन्तरेणदुष्करावित्यभिप्रायः ॥ २ ॥

(६) रामचन्द्रः। कामेआत्मा यस्य सः कामात्मनोभावः कामात्मताप्रशस्ता न सकामता ईहाः चेष्टाः प्रशस्ता न वेदाधिगमः काम्यःवेदानांअधिगमःअध्ययनंकाम्यः कामार्हः च पुनः कर्मयोगः कर्ममार्गः वैदिकः वेदैश्चोक्तः काम्यः कार्यः ॥ २ ॥

संकल्पमूलःकामोवैयज्ञाःसंकल्पसंभवाः ॥ व्रतानियमधर्माश्च सर्वेसंकल्पजाःस्मृताः ॥ ३ ॥

(१) मेधातिथिः। ततश्च यदुक्तंयागस्य कामेन विना नस्वरूपनिष्पत्तिरिति तदनेन विस्पष्टंकृत्वा कथयति।

संकल्पोयागादीनांमूलं कामस्यच। यागादींश्चिकीर्षन्नवश्यंसंकल्पंकरोति। संकल्पे च क्रियमाणे तत्कारणेन कामेन संनिधातव्यमनिष्टेनापि यथा पाकार्थिनोज्वलनंकुर्वतस्तत्समानकारणोधूमोऽप्यनिष्टोजायते। तत्र नशङ्कयं यज्ञादयः करिष्यन्ते कामश्च न भविष्यतीति। अथकोयंसंकल्पोनाम यः सर्वक्रियामूलम्। उच्यते। यच्चेतःसंदर्शनंनाम यदनन्तरं प्रार्थनाध्यवसायौ क्रमेण भवतः। एते हि मानसाव्यापाराःसर्वक्रियाप्रवृत्तिषु मूलतांप्रतिपद्यन्ते। नहि भौतिकाव्यापारास्तमन्तरेण संभवन्ति। तथाहि प्रथमंपदार्थस्वरूपनिरूपणम्। अयंपदार्थइमामर्थक्रियांसाधयतीतियज्ज्ञानंसइह संकल्पाऽभिप्रेतः। अनन्तरंप्रार्थना भवति इच्छासैव कामः। कथमहमिदमनेन साधयामीतीच्छायां सत्यामध्यवस्यति करोमीति निश्चिनोतिसोऽध्यवसायः। ततःसाधनोपादाने बाह्यव्यापारविषये प्रवर्तते। तथाहि बुभुक्षित आदौ भुजिक्रियां पश्यति ततइच्छति भुञ्जीयेति ततोऽध्यवस्यति व्यापारान्तरेभ्योविनिवृत्य भोजनं करोमीति ततः कर्मकरणस्थानाधिकारिणआह सज्जीकुरुत रसवतींसंचारयतेति। नन्वेवंसति न यज्ञादयः संकल्पमात्राद्भवन्ति अपितु संकल्पप्रार्थनाध्यवसायेभ्यः तत्र किमुच्यते यज्ञाः संकल्पसंभवाइति। संकल्पस्याद्यकारणत्वाददोषः। अतएवोत्तरत्र नाकामस्य क्रिया काचिद्दृश्यतइति वक्ष्यति। व्रतानि मानसोऽध्यवसायोव्रतमिदंमया यावज्जीवंकर्तव्यमिति यद्विहितम् यथा स्नातकव्रतानि। यमधर्माः प्रतिषेधरूपाः। अहिंसादयः कर्तव्येषु प्रवृत्तिर्निषिद्धेभ्योनिवृत्तिर्नान्तरेण संकल्पमस्ति ॥ ३ ॥

(२) **सर्वज्ञनारायणः**। तथाऽपरमप्याह संकल्पेति। संकल्पएतत्फलंममसंपद्यतामिति फलाभिलाषःतन्मूलः कामःसाक्षात्प्रयत्नहेतुःतत्साधनविषयेच्छा। न चैतावता वैदिककर्मणांकामहेतुकता सिध्यतीत्यतउक्तंयज्ञाइति। यज्ञाःपाकयज्ञहविर्यज्ञसोमयज्ञजपयज्ञरूपाः। व्रतानि स्नातकव्रतादीनि। यमानिषिद्धाननुष्ठाननियमाः। सर्वे संकल्पजाःसंकल्पाच्चकामइति। सर्वाणि रागजानि रागश्च तद्विरुद्धविषयद्वेषानुबन्धः। ततःकथंधर्मद्वेषिणांविदुषांरागद्वेषराहित्यंसंभवतीत्याक्षेपतात्पर्यम् ॥ ३ ॥

(३) **कुल्लूकः**। अत्रोपपत्तिमाह संकल्पमूलइति। अनेनकर्मणेदमिष्टंफलंसाध्यतइत्येवंविषया बुद्धिः संकल्पः। तदनन्तरमिष्टसाधनतयावगते तस्मिन्निच्छा जायते तदर्थंप्रयत्नंकुरुते चेत्येवंयज्ञाः संकल्पप्रभवाः। व्रतानि यमरूपाश्च धर्माश्चतुर्थाध्याये वक्ष्यमाणाः। सर्वइत्यनेन पदेनान्येऽपि शास्त्रार्थाः संकल्पादेव जायन्तइच्छामन्तरेण तान्यपि न संभवन्तीत्यर्थः। गोविन्दराजस्तु व्रतान्यनुष्ठेयरूपाणि यमधर्माः प्रतिषेधार्थकाइत्याह ॥ ३ ॥

(४) **राघवानन्दः**। सच कामःसंकल्पमूलइत्याह संकल्पमूलइति काम जानामि ते मूलंसंकल्पात्किलजायसे इत्याद्युक्तेः। संकल्पोनामानेन कर्मणेदंफलंसाध्यमिति निश्चयः। तदनन्तरमिष्टसाधनतयावगते तस्मिन्कर्मणि कामः तदनन्तरंप्रयत्नइत्येवं यज्ञाःसंकल्पसंभवाइति मनसा संकल्पयति वाचा विलपति कर्मणा चोपपादयतीति श्रुतेः ॥ ३ ॥

(५) **नन्दनः**। एतदेवमपश्चयतिसंकल्पमूलमिति। संकल्पः कर्मानुष्ठानाध्यवसायः तस्य मूलंकारणंकामः। यज्ञाइतिगृहस्थधर्मोलक्ष्यते। व्रतानीति ब्रह्मचारिधर्मः। यमधर्माइतिवानप्रस्थसन्यासिधर्माः ॥ ३ ॥

(६) **रामचन्द्रः**। कामः इच्छासंकल्पमूलः कामः। संकल्पः कर्म मानसमित्यमरः ॥ ३॥

अकामस्य क्रियाकाचिद्दृश्यते नेह कर्हिचित् ॥ यद्यद्धि कुरुते किंचित्तत्तत्कामस्य चेष्टितम् ॥४॥

(१) **मेधातिथिः**। पूर्वेण शास्त्रीये प्रवृत्तिनिवृत्ती संकल्पाधीने व्याख्याते। अनेन लौकिकेषु कर्मसु तदधीनतोच्यतइति विशेषः। नेह लोके कर्हिचित्कदाचिदपि जाग्रदवस्थायां किंचिदनुष्ठेयत्वेनानिच्छतःसंभवति। यत्किंचिल्लौकिकंवैदिकंवा कुरुते कर्मविहितंप्रतिषिद्धंच तत्सर्वंकामस्य चेष्टितम् ॥ ४ ॥

(२) **सर्वज्ञनारायणः** । किंचाद्यापि या काचित्क्रिया काममूलैवेत्याह अकाम्यस्येति । कारणप्रोषितंव्यतिरे-कमुक्त्वान्वयमाह यद्यद्धीति ॥ ४ ॥

(३) **कुल्लूकः** । अत्रैव लौकिकंनियमंदर्शयति अकामस्येति । लोके या काचिद्भोजनगमनादिक्रिया साप्यनिच्छतोन कदाचिद्दृश्यते । ततश्चसर्वंकर्म लौकिकंवैदिकंच यद्यत्पुरुषः कुरुते तत्तदिच्छाकार्यम् ॥ ४ ॥

(४) **राघवानन्दः** । किंच प्रवृत्तेःकाममूलतामन्वयव्यतिरेकाभ्यामाह अकामस्येति । नात्र प्रमाणयुक्त्य पेक्षेति भावः ॥ ४ ॥

(५) **नन्दनः** । आश्रमाणांतत्तत्प्रधानत्वाद्व्यतिरेकान्वयाभ्यामेतदेव निगमयति अकामस्येति ॥ ४ ॥

(६) **रामचन्द्रः** । कर्हिचित्कदाचित् अकामस्य निष्कामस्य क्रिया न दृश्यते ॥ ४ ॥

तेषु सम्यग्वर्तमानोगच्छत्यमरलोकताम् ॥ यथा संकल्पितांश्चेह सर्वान्कामान्समश्नुते ॥ ५ ॥

[असद्वृत्तस्तुकामेषु कामोपहतचेतनः ॥ नरकंसमवाप्नोति तत्फलंन समश्नुते ॥ १ ॥

तस्माच्छ्रुतिस्मृतिप्रोक्तं यथाविध्युपपादितम् ॥ काम्यं कर्मेहभवति श्रेयसे न विपर्ययः+ ॥ २ ॥]

(१) **मेधातिथिः** । हेतुत्वाच्चेष्टितंकामस्यैवेत्युक्तं तदिदमतिसंकटं कामात्मता नप्रशस्ता नचानया विना किंचिद-नुष्ठानमस्ति अत्रप्रतिविधत्ते । तेषु कामेषु सम्यग्वर्तितव्यम् । कापुनःसम्यग्वृत्तिः यद्यथा श्रुतंतत्तथैवानुष्ठेयंनित्येषु फलना-भिसंधेयम् । अश्रुतत्वात्काम्येषु त्वनिषेधः । तथा तेषांश्रुतत्वात्फलसाधनतयैव तानि विधितोवगम्यन्ते । फलानिच्छोस्तद-नुष्ठानमश्रुतकारणं स्यात् । नित्येषु फलाभिसंधिर्व्यामोहएव । नह्यभिसंधिमात्रात्प्रमाणतोऽनवगते फलसाधनत्वे फलमुत्पद्य-ते । एवंकुर्वन्गच्छति प्राप्नोत्यमरलोकताम् अमराः देवास्तेषांलोकः स्वर्गः तन्निवासादमरेषु लोकशब्दः स्थानस्थानिनोरभे-दात् । मञ्चाःक्रोशन्तीतिवत् । तेनायंसमासः अमराश्च ते लोकाश्चअमरलोकास्तद्भावः अमरलोकता देवजनत्वंप्राप्नोति देवत्वंप्राप्नोतीत्यर्थ । वृत्तानुरोधादेवमुक्तम् । अथवाऽमरांल्लोकयति पश्यत्यमरलोकः । कर्मण्यण्तदन्ताद्भावप्रत्ययः । देवदर्शीसंपद्यते । अनेनापि प्रकारेण स्वर्गप्राप्तिरेवोक्ता भवति । अथवाऽमरइव लोक्यते लोके । अर्थवादश्चायंनात्र स्वर्गः-फलत्वेन विधीयते नित्यानांफलाभावात्काम्यानांच नानाफलश्रवणात् । तेन स्वर्गप्राप्त्या शास्त्रानुष्ठानसंपत्तिरेवोच्यते लक्ष-णया यदर्थंकर्मण्यनुष्ठानंतत्संपद्यतइत्यर्थः । तत्रनित्यानांप्रत्यवायानुत्पत्तिर्विध्यर्थसंपत्तिर्वाप्रयोजनम् । काम्येषुतुयथासंक-ल्पितान्यथाश्रुतंसकल्पितान्प्रयोगकाले यस्य कर्मणोयत्फलंश्रुतंतत्संकल्पादभिसंधाय मनसा कामयित्वेदमहमतः फलंप्रा-प्नुयामिति । ततःसर्वान्कामान्काम्यानर्थान्समश्नुते प्राप्नोति । अतः परिह्रता संकटापत्तिः यतोनसर्वविषयः कामोनिषि-ध्यते किंतर्हि नित्येषु फलाभिलाषलक्षणः । साधनसंपत्तिस्तु काम्यैव । ब्रह्मवादिनस्तु सौर्यादीनांनिषेधार्थंकामात्मतेति-मन्यन्ते । फलार्थितयाक्रियमाणाबन्धात्मकाभवन्ति । निष्कामस्तु ब्रह्मार्पणन्यायेन कुर्वन्मुच्यते । तदुक्तंभगवता कृष्ण-द्वैपायनेन माकर्मफलहेतुर्भूः । तथा साधनानामकृत्स्नत्वान्मौर्ख्यात्कर्मकृतस्तथा । फलस्य चाभिसंधानादपवित्रोविधिः स्मृतइति । बहवश्चात्र व्याख्याविकल्पाअसारत्वात्तु न प्रदर्शिताः ॥ ५ ॥

(२) **सर्वज्ञनारायणः** । तत्रसमाधिः तेष्विति । तेषु यज्ञादिषु सम्यक्कामपरतांविहायकेषुचिदीश्वरार्पणबु-द्ध्या केषुचित्तत्कालोपनिपतितावश्यसंपाद्यफलार्थतयावर्तमानोऽमरलोकतांन म्रियते यत्र सोमस्तादृशोलोकोयत्र तद्भावं-मोक्षंगच्छति भगवत्यर्पितैः फलार्थंतु कृतैर्यथासंकल्पितान् कामान् काम्यानि फलान्यश्नुते ॥ ५ ॥

+ (क, ग) मध्येउपलब्धौ ।

(३) **कुल्लूकः**। सम्प्रति पूर्वोक्तंफलाभिलाषनिषेधंनियमयति तेषुसम्यग्वर्तमानइति। नात्रेच्छानिषिध्यते किंतु शास्त्रोक्तकर्मसु सम्यग्वृत्तिर्विधीयते। बन्धहेतुफलाभिलाषंविना शास्त्रीयकर्मणामनुष्ठानंतेषु सम्यग्वृत्तिः सम्यग्वर्त्तमानोऽमरलोकताममरधर्मकंब्रह्मभावंगच्छति मोक्षंप्राप्नोतीत्यर्थः। तथाभूतश्च सर्वेश्वरत्वादिहापि लोके सर्वानभिलषितान्प्राप्नोति। तथा च छान्दोग्ये सयदा पितृलोककामोभवति सङ्कल्पादेवास्यपितरःसमुत्तिष्ठन्तीत्यादि ॥ ५ ॥

(४) **राघवानन्दः**। ततःकिमित्याह तेष्विति। तेषु कर्मसु सम्यगिति अर्थकामाद्युपाधिंविना प्रवर्तते योनुष्ठाता सोऽमरलोकतांस्वर्गंसाक्षात्मुक्तिंवा सत्त्वशुद्धिद्वारेति भावः। इह च मर्त्य लोके कामान्पशुपुत्रादीन् अश्नुते प्राप्नोति। इह संकल्पितान्वा परलोके प्राप्नोति यथा क्रतुरस्मिंल्लोके पुरुषोभवति तथेतःप्रेत्य भवतीति श्रुतेः। क्रतुरत्र संकल्पः ॥ ५ ॥

(५) **नन्दनः**। फलनैरपेक्ष्येण कर्मानुष्ठायिनः फलातिशयमाह तेष्विति। तेषु वेदाऽधिगमादिषु सम्यग्वर्तमानः-समीचिनंवर्तमानः। समीचीनवृत्तित्वंचकर्मफलत्यागेनचोदितकर्मानुष्ठानम्। अमरलोकतांशाश्वतलोकान्मुक्तिमित्यर्थः। इहास्मिंल्लोके यथासंकल्पितान्स्वसंकल्पानुरूपान्कामान्भोगान्। केचित्तु वक्ष्यमाणयोर्धर्मप्रवृत्तिनिवृत्त्योः प्रतिपक्षनिराकरणपरत्वेन श्लोकचतुष्टयमिदानींव्याचक्षते। कामात्मतेतिकामात्मता निषिद्धेष्वपिप्रवर्तकः कामप्रकर्षः नचैवेहास्त्यकामतेतिकामस्यात्यन्तोच्छेदः प्रतिषिध्यते कार्यवशेन कामस्यावर्जनीयत्वात्अविहितत्वेन सर्वत्र कामोदुस्त्यजइत्यर्थः। काम्योहीत्यर्धेन कारणतोऽपि कामस्यावर्जनीयत्वंप्रतिपाद्यते। संकल्पमूलमिति। सम्यगधिगतंज्ञानंसंकल्पःतत्संभवो-यज्ञाद्यनुष्ठानलक्षणः कामोऽपि संकल्पमूलत्वेनावर्जनीयःसिद्धइत्यर्थः। अकामस्येत्यत्र नास्ति व्याख्याविकल्पः। तेष्विति। सम्यग्वर्तमानःसमीचीनकामःसमीचीनसंकल्पश्च। अमरलोकतांदेवत्वमिति ॥ ५ ॥

(६) **रामचन्द्रः**। तेषु कर्मसु वर्तमानः अमरलोकतांस्वर्गलोकप्राप्तिंगच्छति काम्यस्य चेष्टितकर्मणश्चेष्टितमित्यर्थः ॥ ५ ॥

वेदोऽखिलोधर्ममूलंस्मृतिशीले च तद्विदाम् ॥ आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥ ६ ॥

(१) **मेधातिथिः**। कोस्याभिसंबन्धः। यावता धर्मोऽत्र वक्तव्यतया प्रतिज्ञातः सच विधिप्रतिषेधलक्षणः। तत्र नवेदस्य धर्ममूलता विधेया। वेदोधर्ममूलत्वेन ज्ञातव्योधर्मप्रामाण्यआश्रयणीयः अन्तरेणैवोपदेशंतत्सिद्धेः। नहि मन्वाद्युपदेशसमधिगम्यंवेदस्य धर्ममूलत्वमपि त्वबाधितविषयप्रतीतिजनकत्वेनापौरुषेयतया च पुरुषसंसर्गदोषैरपि मिथ्याभिधानाशङ्काभावात् स्वतश्च शब्दस्यादुष्टत्वात्प्रत्यक्षवत्स्वतःप्रामाण्यसिद्धिः। अथोच्यते न्यायतः सिद्धंवेदस्य प्रामाण्यमनूद्य मन्वादिस्मृतीनांतन्मूलता वचनेन ज्ञाप्यतइति तदपिन। तत्रापि पूर्वज्ञानसापेक्षत्वात्स्मरणस्य भ्रान्तिविप्रलम्भादीनांमहाजनपरिग्रहादिना निरस्तत्वादतीन्द्रियार्थदर्शनमशक्यभावाच्च पुरुषस्य च स्वानुभवसिद्धेर्वेदार्थस्मरणस्य वेदमूलतैवावशिष्यते। नहि वेदविदांकार्यार्थविषये स्मरणंसंभवति। वेदस्यच मूलत्वेन मूलान्तरकल्पनायाऽनवसरः। नाप्येतद्युज्यते वक्तुं स्मृतिशीले च तद्विदामित्येतदप्यनूद्यते बाह्यस्मृतीनामप्रामाण्याय यतस्तासांन्यायतएव सिद्धमप्रामाण्यम्। नहि शाक्यभोजकक्षपणकादीनांवेदसंयोगसंभवोयेनतन्मूलतया स्वविषयेप्रमाणंस्युः स्वयमनभ्युपगमात्तैश्च वेदस्याप्रामाण्याभिधानात्प्रत्यक्षवेदविरुद्धार्थोपदेशाच्च। तत्रासंभवस्तासु स्मृतिषु वेदाध्ययननिषेधात्। सतिहि वेदाध्येतृत्वे बुद्धादीनांतन्मूलतास्यान्नवेति जायतेविचारणा। यत्रतु तत्संबन्धीदूरापेतस्तत्र कातन्मूलताशङ्का। स्वयंच मुलान्तरंस्मृतिपरंपरायातमभ्युपगच्छन्ति। पश्याम्यहंभिक्षुकानांदिव्येन चक्षुषा सुगतिंदुर्गतिंच। एवंसर्वएव बाह्याभोजकपाञ्चरात्रिकनिर्ग्रन्थानार्थ-

वादपाशुपतप्रभृतयःस्वसिद्धान्तानांप्रणेतॄन्पुरुषातिशयान्देवताविशेषांश्च प्रत्यक्षतदर्थदर्शिनोऽभ्युपयन्ति । न वेदमूलमपि धर्ममभिमन्यन्ते । प्रत्यक्षेण च वेदेन विरुद्धास्तत्रार्थाउपदिश्यन्ते । तथाहि हिंसाचेद्धर्मउच्यते संसारामोचकादिभिः साचात्र प्रत्यक्षतःप्रतिषिद्धा । तथान्यत्र तीर्थस्नानमधर्मोऽभ्युपेयते इहत्वहरहःस्नायात्तीर्थानिसेवेतेति च विधिः । तथाग्निष्टोमीयवधः क्वचित्पापहेतुरिष्यते सच ज्योतिष्टोमविधिना विरुद्धः । तथान्ये सर्वानेव यागहोमानात्मार्थान्संमन्यन्ते देवताभेदविधिभिर्नानादैवत्यास्तेत्रगमिताअतोविरोधः । येप्याहुर्ग्रहणाग्रहणवदुदितानुदितहोमकालवत्प्रत्यक्षश्रुतिविरोध दर्शनात् स्यात्संभवः शाखान्तरस्योच्छिन्नस्यानुच्छिन्नस्य वा तद्विरुद्धार्थविधिपरस्य । अनन्ताहि वेदशाखास्ताः कथमेकस्य प्रत्यक्षाउत्सादश्च संभवतीति । तत्र स्यात्तादृशी वेदशाखा यस्यामयंनरास्थिपात्रभोजननग्नचर्मादिरुपदिष्टोभवेत् । उच्यते न वयंब्रूमः वेदविरुद्धार्थोपदेशात्संभवइति । किंतु समकक्षत्वात्तयोर्विकल्पितप्रयोगयोरव्याघातः । इहतु कल्प्योवेदेन च प्रत्यक्षविरोधिकल्पनायाअवसरः । नच संभवमात्रेण तावता निश्चयः । निश्चितस्तु तद्विरुद्धप्रत्यक्षविधिनिश्चितेन । नवानिश्चितंबाध्यते । शाखोत्सादपक्षंचात्रैव श्लोके परस्तात्प्रपञ्चयिष्यामः । सर्वत्र च प्रत्यक्षश्रुतिभिर्मन्वादि स्मृतीनांव्यतिषङ्गः क्वचिन्मन्त्रेण क्वचिद्देवतयाक्वचिद्द्रव्यविधिभिः । नच बाह्यासु तत्संभवतीति तासामप्रामाण्यम् । एवमाचारस्यापि वेदविद्भिरदृष्टार्थतयाचर्यमाणस्य स्मृतिवदेव प्रामाण्यंमूलसंभवात् । असाध्वाचारस्यापि दृष्टकारणादिसंभवादविद्वुषांच भ्रान्त्यादिसंभवादप्रामाण्यम् । एवमात्मनस्तुष्टेरपि । यदि च वेदस्मृत्याचाराणांमन्वाद्युपदेशसमधिगम्यंप्रामाण्यं मन्वादीनांकथंतत्राप्युपदेशान्तरात् स्मार्तेच मनुरब्रवीदित्यादेस्तत्र कथंतस्मादिदंप्रमाणमिदमप्रमाणमिति युक्तितएतदवसेयम् । नोपदेशतस्तथाचायमनर्थकः श्लोकः । एतत्समानरूपाउत्तरेपि । अत्रोच्यते । इहये धर्मसूत्रकाराअव्युत्पन्नपुरुषव्युत्पादनार्थंपदार्थसंपादनपरतया ग्रन्थसंदर्भानारभन्ते तत्र यथैवाष्टकादीनांवेदात्स्वयंकर्तव्यतामवगम्य परावबोधनार्थमुपनिबन्धः । एवंप्रमाणान्तरसिद्धस्य वेदप्रामाण्यादेः सन्तिकेचित्प्रतिपत्तारोये न्यायतस्तत्त्वविवेचनासमर्थाऊहापोहादिरूपबुद्ध्यभावात् । तान्प्रति न्यायसिद्धोप्यर्थः सुहृदुपदेशवदुपदिश्यते तत्र यन्न्यायतः सिद्धंवेदस्य धर्ममूलत्वंतदेवानेनानूद्यते । वेदोधर्ममूलंधर्मस्य मूलत्वेन वेदोविचार्य युक्त्या सिद्धोनात्राप्रामाण्यशङ्का कर्तव्या । भवन्ति च लोके प्रमाणान्तरसिद्धानामर्थानामुपदेष्टारः । न त्वया जीर्णेभोक्तव्यमजीर्णप्रभवाहि रोगाः । नचैतद्वक्तव्यम् ये न्यायतोवेदस्य धर्ममूलत्वं न शक्नुवन्तिप्रतिपत्तुं ते वचनादपि न प्रत्येष्यन्ति । यतोदृश्यते । यआप्तत्वेन प्रसिद्धास्तदीयंवचनमविचार्यैव के चन प्रमाणयन्ति । तदेवंसर्वमिदंप्रकरणंन्यायमूलं न वेदमूलम् । अन्यत्रापि व्यवहारस्मृत्यादौ यत्र न्यायमूलता तत्र यथावसरंदर्शयिष्यामः । अष्टकादीनांयथा वेदमूलता तथात्रैव निर्दिश्यते । वेदशब्देनर्ग्यजुःसामानि ब्राह्मणसहितान्युच्यन्ते । तानि चाध्येतॄणां वाक्यान्तरेभ्यः प्रसिद्धभेदान्युपदेशपरंपरासंस्कृताअध्येतारः श्रुत्वेव वेदोयमिति प्रतिपद्यन्ते यथा ब्राह्मणोयमिति । तत्रवाक्यसमूहेऽप्यग्निमीळेऽग्निर्वैदेवानामवमइत्यादौ संसमिद्युवसेऽथमहाव्रतमित्यन्ते वेदशब्दः प्रयुज्यते तदवयवभूतेषु केवलेषु वाक्येष्वपि । नच ग्रामादि शब्दवद्गौणमुख्यता विद्यते । तत्रसमुदायेषु हिवृत्ताः शब्दाअवयवेष्वपि वर्तन्तइत्येषन्यायः । ग्रामशब्दोहि प्रसिद्धभूयिष्ठप्रयोगः समुदायएव ग्रामोदग्धइत्यादि पदसंबन्धात्तदवयवेवर्तते । कतिपयशालादाहेपि लौकिकाग्रामोदग्धइति प्रयुञ्जते । अथवा तत्रापि समुदायवचनएव । दाहस्त्वेकदेशवर्तीसमुदायसंबन्धितया व्यपदिश्यते । अवयवद्वारकएव समुदायस्य क्रियासंबन्धः । एषएवसमुदायस्य क्रियासंबन्धोयोवयवानाम् । नह्यवयवान्परिहाप्य समुदायोद्रष्टुं स्प्रष्टुंवाऽशक्यते । व्युत्पाद्यते च वेदशब्दःविदन्त्यनन्यप्रमाणवेद्यंधर्मलक्षणमर्थमस्मादिति वेदः । तच्च वेदत्वमेकैकस्माद्वाक्याद्भवति न यावानृग्वेदादिशब्दवाच्योऽध्यायानुवाकसमूहः । एवंचोदाहरणे जिह्वाच्छेदइत्येकवाक्यविषयोप्ययंदण्डः ।

कृत्स्नोधिगन्तव्यइतिकृत्स्नग्रहणंसकलवेदवाक्याध्ययनप्राप्त्यर्थमन्यथाकतिचिद्वाक्यान्यधीत्य कृतीस्यान्नपुनःकृत्स्नं वेदमिति। अत्रैतन्निरूपयिष्यामः। सच वेदोबहुधाभिन्नः सहस्रवर्त्मा सामवेदःसात्यमुग्रिराणायनीयादि भेदेन। एकशतमध्वर्यूणांकाठकवाजसनेयकादि भेदेन। एकविंशतिबाह्वृच्या आश्वलायनैतरेयादि भेदेन। नवधाआथर्वणंमौदकपैप्पलादकादि भेदेन। ननु नैव केचिदाथर्वणंवेदंमन्यन्ते यतस्त्रयीविद्या ऋचः सामानियजूंषीति वेदैरशून्यस्त्रिभिरेतिसूर्यः तथा त्रैवेदिकं व्रतंचरेदित्यादौ न क्वचिदाथर्वणानामप्यस्ति प्रतिषेधश्चश्रूयते तस्मादाथर्वणेन न शंसेदिति अतस्त्रयीबाह्यानाथर्वणिकान्पाषण्डिनः प्रतिजानते तदयुक्तम्। अविगानेन शिष्टानांवेदव्यवहाराच्छ्रुतीरथर्वाङ्गिरसीरित्यत्रापिव्यवहारःश्रुतिर्वेदइत्येकोर्थः। नच वेदशब्दवाच्यतामिहोत्रादिवाक्यानामपि धर्मप्रामाण्ये कारणं। इतिहासायुर्वेदयोरपि वेदव्यवहारदर्शनादितिहासपुराणंपञ्चमंवेदानांवेदमिति। किंतर्ह्यपौरुषेयत्वेसत्यनुष्ठेयार्थावबोधकत्वाद्विपर्ययाभावाच्च। तच्चाथर्ववेदेऽपि सर्वमस्ति ज्योतिष्टोमादि कर्मणांयजुर्वेदादिष्विव तत्राप्युपदेशात्। अभिचारमूलकर्मादिकर्मणांबाहुल्येन तत्रोपदेशादवेदत्वमितिविभ्रमः। केषांचिदभिचाराहिपरप्राणवियोगफलत्वात्प्रतिषिद्धाः। आथर्वणिकैश्च तएव प्राधान्येनानुष्ठीयन्तेराजपुरोहितैरतस्तेनिन्द्यन्ते। यत्तुवेदरशून्यइत्यादावथर्ववेदस्यानिर्देशइति अर्थवादाएते किंतत्र निर्देशेनानिर्देशेनवा। मन्त्रभेदाभिप्रायंचैतद्वचनं त्रयोवेदास्त्रयी विद्येत्यादि। नहि चतुर्थमन्त्रजातमस्ति ऋग्यजुःसामव्यतिरेकेण प्रैषनिविन्निगदेन्द्रगाथादीनामत्रैवान्तर्भावात्। अथर्ववेदेचर्चएवमन्त्रत्वेन समाम्नाताः। अतऋग्वेदएवायंमन्त्राभिप्रायेण। यस्तु प्रतिषेधः सविपरीतसाधनः प्राप्तौ सत्यां प्रतिषेधोपपत्तेः। अयंवास्यार्थः। अथर्ववेदाधीतैर्मन्त्रैस्त्रैवेदिकंकर्म न मिश्रयेत्। वाचः स्तोमेसर्वाऋचः सर्वाणि यजूंषि सर्वाणि सामानि विनियुक्तानि तत्राथर्ववेदाधीतानांप्रतिषेधः। सवेदोविशिष्टः शब्दराशिरपौरुषेयोमन्त्रब्राह्मणाख्यो नेकशाखाभेदभिन्नोधर्मस्य मूलंप्रामाण्यपरिज्ञाने हेतुः कारणंमूलम्। तच्च वेदस्मृत्योर्धर्मप्रतिज्ञापकतयैव न निवर्तकतया नचस्थितिहेतुतया वृक्षस्येव। धर्मशब्दश्च प्राग्व्याख्यातः। यत्पुरुषस्य कर्तव्यंप्रत्यक्षाद्यवगम्य विलक्षणेन स्वभावेन श्रेयःसाधनंकृषिसेवादि भवति। पुरुषस्यकर्तव्यतस्यच तत्साधनत्वस्वभावोऽन्वयव्यतिरेकाभ्यामवगम्यते। यादृशेन व्यापारेण कृष्यादेर्व्रीह्यादिसिद्धिः साऽपि प्रत्यक्षाद्यवगम्यैव। यागादेस्तु साधनत्वंयेन च रूपेणापूर्वोत्पत्तिव्यवधानादिनां तन्न प्रत्यक्षाद्यवगम्यम्। श्रेयश्चाभिलषितस्वर्गग्रामादिफलप्राप्तिः सामान्यतः सुखशब्दवाच्या। व्याधिनिर्धनत्वासौख्यनरकादिफलप्राप्तिः सामान्यतोदुःखशब्दवाच्या तत्परिहारश्च। अन्ये तु परमानन्दादि रूपंश्रेयः। अयंधर्मोब्राह्मणवाक्येभ्योऽवगम्यतेलिङ्गादियुक्तेभ्यः क्वचिच्चमन्त्रेभ्योपि वसन्तायकपिञ्जलानालभतइत्येवमादिभ्यः। तत्रकामपदयुक्तानि वाक्यानि फलार्थमनुष्ठानमवगमयन्ति। सौर्यंचरुंनिर्वपेद्ब्रह्मवर्चसकामोवैश्वदेवींसांग्रहिणींनिर्वपेद्ग्रामकामइति। तानि फलमनिच्छता नक्रियन्ते। अन्यानि यावज्जीवादि पदैर्नित्यतयासमर्पितानि तानि न फलहेतोरनुष्ठीयन्ते फलस्यास्याश्रुतत्वात्। नचविश्वजिता यजेतेत्यादिवदश्रुतफलत्वेऽपि फलकल्पनायतोयावज्जीवादिपदैर्विनैव फलेन कर्तव्यतयावगम्यन्ते। तत्राकरणे शास्त्रार्थातिक्रमदोषस्तत्र तत्परिहारार्थतानि क्रियन्ते। प्रतिषेधानामपि ब्राह्मणोनहन्तव्यः सुरानपेयेत्येषैववार्तानहि फलार्थंप्रतिषिद्धवर्जनमपितु प्रत्यवायपरिहारार्थम्। अखिलःकृत्स्नः। नाकिंचित्पदवर्णोमात्रावा यन्न धर्माय। अत्रचोदयन्ति। ननुच विध्यर्थवादमन्त्रनामधेयात्मकोवेदोधर्मश्च स्वभावइत्युक्तम्। तन्नयुक्तंयद्विधिवाक्यानिधर्मेप्रमाणंस्युः। तेभ्योहियागादिविषया कर्तव्यता प्रतीयतेअग्निहोत्रंजुहोति दध्नाजुहोति यदग्नये च प्रजापतये च सायंजुहोति स्वर्गकामोजुहोतीति। अत्रह्यग्निहोत्राख्यंकर्म कर्तव्यतया प्रतीयते। दध्नेति तत्रैव द्रव्यम्। यदग्नये चेति देवता स्वर्गकामइत्यधिकारः। यत्त्वग्निर्वै सर्वादेवताअग्निरेव दैव्योहोता सदेवानाव्हयति च जुहोति चेत्यादयः। तथा प्रजापतिर्वपामात्मनउदखिददित्यादयो। नतैः किंचित्कर्तव्यमुपदिश्यते केवलंपुरावृत्तम-

न्यद्वा सांप्रतिकंभूतमनुवदन्ति । प्रजापतिना पुराआत्मनोवपोत्खाताउत्खिदतुमावाउत्खिदतुकिमस्माकमेतेन । तथाग्ने-रपि सर्वदेवतात्मत्वमाग्नेयकर्मण्युपयुज्यते । अग्निशब्देनोद्देशार्थनिवृत्तेरन्यदेवत्वेऽन्यत्वादग्नेरुद्देशएव नास्ति । आवाहन-स्यापि वचनान्तरेणाग्निमग्नआवहेत्यादिना विहितत्वात्सदेवानाव्हयति च जुहोति चेत्यादिरनर्थकः । मन्त्राअपि न मृत्यु-रासीदमृतंनर्तार्हि सुदेवोऽद्यप्रपतेदनावृदित्यादयोभाववृत्तपरिदेवनादिरूपार्थाभिधायिनः कंधर्मंप्रमिमते । तस्मिन्काले न मृत्यु-र्जातोनाप्यमृतंजीवितंप्राक्सृष्टेर्भूतानामनुत्पन्नत्वान्नकस्यचिज्जीवितमासीन्नापि मृत्युः प्रलये सर्वेषांमृतत्वाद्भवतुवा मृत्यु-र्मावा न किंचिदेतेन कर्तव्यमुपदिष्टंभवति । एवंसुदेवोऽसौ महापुण्योदेवतुल्योमनुष्योयोद्यप्रपतेच्छ्वभ्रआत्मानंक्षिपेदनावृदा-वृत्तिः प्रत्युज्जीवनंयस्मात्प्रपातान्न भवति । उर्वश्याविप्रलब्धः पुरूरवाः परिदेवयांचक्रे तथा नामधेयमुद्भिदा यजेत बलभिदा यजेतेत्यादि न कस्यचिदर्थस्य क्रियायाःद्रव्यस्य वा विधायकमाख्यातेन क्रियायाविधानादद्रव्यवचनत्वाच्च बलभिदादेः सोमस्य चाव्यक्तचोदनत्वेन प्रकृतितः प्राप्तत्वान्न क्लेशेन द्रव्यवचनता कल्प्यते । तस्मान्नाम्नायेन धर्मउपदिश्यते । अतः कथमुच्यते कृत्स्नोवेदोधर्ममूलमिति । उच्यते । अनयैवाशङ्कयाऽखिलग्रहणंकृतंयतः सर्वेषामेतेषांधर्मप्रतिपादनपरत्वम् । तथा ह्यर्थवादानैव विधायकेभ्योवाक्येभ्यःपृथगर्थाः येन धर्मंनप्रमिमीरन् । विभज्यमानसाकाङ्क्षत्वे विधिपरत्वावगमात्त-त्परत्वे च सिद्धायामेकवाक्यतायां यथा तदर्थानुगुण्यंप्रतिपद्यन्ते तथाव्याख्येयाः । अतःप्रजापतेर्वपोत्खादनवचनंन स्वार्थनिष्ठंकिंतर्हि विधिशेषम् । नच विधेयंद्रव्यगुणाद्यर्थवादेभ्यः प्रतीयतइतिप्रकारान्तरेण विधेयार्थस्तावकत्वेन तच्छे-षतांप्रतिपद्यन्ते । तदपि तत्र प्रतीयतएव । इत्थंनाम पशुयागः कर्तव्योयदसत्सुपशुषु गत्यन्तराभावात्प्रजापतिनात्मैव-पशुत्वेन कल्पितोवपा चोत्खिन्ना यतस्तत्सहितान्येव विधायकानि यत्रार्थवादाःसन्ति । यद्यपि तैर्विनापि भवति वि-ध्यर्थावगतिर्विध्युद्देशादेव वसन्तायकपिञ्जलानालभतइति तथापि न तेषामानर्थक्यम् । तेषु हि सत्सु नकेवलादवगतिः । नच केन चित्कृतोवेदोयेनोच्यते यथान्यत्र न सन्तितथात्रापि माभूवन् । सत्स्वर्थवादेष्वस्माभिर्गतिर्वक्तव्या सा चोक्ता । नचायमलौकिकोऽर्थोलोकेपि हि स्तुतिपदानि दृश्यन्ते विधिशेषभूतान्येव । यथा भृति दाने प्रवृत्तस्य स्वामिनः कश्चिद्भृ-तकःप्रीत्याचष्टेसाधुर्देवदत्तोनित्यसंनिहितः परिचर्याभूमिज्ञस्तत्परश्चेति । अतोविधेयार्थस्तुतिद्वारेणार्थवादाविधायकाएव । तथा क्वचिदर्थवादादेव विधेयविशेषावगतिर्यथाक्ताः शर्कराउपदधाति । अत्र ह्यञ्जनसाधनंसर्पिस्तैलादि यत्किंचिद्वि-धिनापेक्षितम् । तेजोवैघृतमित्यर्थवादे घृतस्तुत्या घृतमध्यवसीयते । एवंप्रतितिष्ठन्तियएतारात्रीरुपयन्तीति रात्रिष्वर्थ-वादादधिकारावगमस्तस्मादर्थवादाअपि धर्ममूलम् । मन्त्रास्तु केचिद्विधायकाएव यथा वसन्ताय कपिञ्जलानिति । आघारे देवताविधिमान्त्रवर्णिकएव । नहि तत्रदेवता कर्मोत्पत्तिवाक्ये श्रुता नापि वाक्यान्तरेण विहिता । मन्त्रस्तु विहितोनियुक्तःइतइन्द्रइत्यादिः । अतोस्मान्मन्त्रवर्णाद्देवताप्रतिपत्तिः । सहस्रशश्च मान्त्रवर्णिकादेवताविधयः सन्ति । येप्यन्ये क्रियमाणानुवादिनस्तेपिस्मृतिलक्षणंधर्ममेव बुद्धंकुर्वन्तीति । भवतिधर्ममूलमनुष्ठेयार्थप्रकाशनेन । नाम त्वाख्या-तार्थादभिन्नार्थमाख्यातार्थवत्सुप्रसिद्धधर्ममूलभावम् । गुणविधयश्च प्रायशोनामाश्रयाएव । शरदिवाजपेयेन यजेतस्वारा-ज्यकामोवाजपेयेनेति । तस्मात्सिद्धंकृत्स्नस्य वेदस्यधर्ममूलत्वम् । अन्ये तु श्येनादिवाक्यानांधर्मोत्पत्तिमत्त्वाभावमा-शङ्कमानानिषेधानांच न लशुनंभक्षयेदित्यादीनामखिलग्रहणंमन्यन्ते । अभिचाराहि श्येनादयोमारणात्मानोहिंसारूपाः । क्रूरत्वाच्च हिंसायाअभिचाराणांच प्रतिषेधादधर्मत्वमतोन कृत्स्नोवेदोधर्ममूलम् । कर्तव्यश्चधर्मउक्तः । ब्रह्महत्यादिश्च नकर्तव्यः । अतः कथं तद्वाक्यानि धर्ममूलंस्युः । किंच येऽपि पशुयागाअग्नीषोमीयादयस्तेपि हिंसासाधकत्वाद्दूरापेतधर्म-भावाः । हिंसाहि पापमिति सर्वप्रवादेष्वभ्युपगमः । उक्तंच यत्रप्राणिवधोधर्मः अधर्मस्तत्र कीदृशः । कथंपुनरियमाश-

ष्ठा ऽपनुद्यते अखिलग्रहणात् । नह्यस्यान्यत्प्रयोजनमस्ति । हेतुर्नोक्तइतिचेदागमग्रन्थोयंसिद्धमर्थमाह । हेत्वर्थिनोमीमांसातोविनीयन्ते । अस्माभिरुक्तं यआगममात्रेणप्रतिपत्तारस्तान्प्रत्येतदुच्यते । विवरणकारास्तुयुक्तिलेशंमत्रदर्शयन्ति यदुक्तं श्येनादयः प्रतिषिद्धत्वादधर्मइति तत्सत्यम् तथापि प्रतिषिद्धेष्वपि तेषु योऽत्यन्तप्रवृद्धद्वेषोन हिंस्याद्भूतानीत्यतिक्रान्तनिषेधाधिकारस्तस्य ते शत्रुवधलक्षणांप्रीतिमनुष्ठीयमानांनिर्वर्तयन्तीत्येतावतांशेन वेदस्य धर्ममूलत्वं श्येनादिवाक्येष्वपि न विहन्यते । निषेधेष्वपियोरागतः प्रवृत्तोहनने स निषेधे नियुज्यते। एतदेव निषेधस्यानुष्ठानंयन्निषिध्यमानस्याननुष्ठानम् । अग्नीषोमीयादौ तु नैब हिंसाप्रतिषेधोस्ति द्वेषलक्षणायाल्लौकिक्याहिंसायानिषेधेननिषिद्धत्वात्। शास्त्रीयातु विधिलक्षणा न निषेधेन विषयीक्रियते लौकिक्यां चरितार्थत्वान्निषेधस्य । नचसामान्यतोदृष्टेन हिंसात्वाल्लौकिकहिंसावैद्दिक्याः पापहेतुत्वमापादयितुं शक्यते यतोन हिंसात्वंपापहेतुत्वेकारणं अपितु प्रतिषेधेन विषयीकरणम् । नचात्रप्रतिषेधोऽस्तीत्युक्तम् । कैश्चित्तु मूलशब्दः कारणपर्यायोव्याख्यायते । धर्मस्यवेदोमूलंप्रतिष्ठा कारणंसाक्षात्प्रणाड्याच । स्वाध्यायमधीयीत ऋग्वेदंधारयन्विप्रइत्यादि चोदनासु साक्षादग्निहोत्रादिकर्मस्वरूपज्ञापकतया प्रणाड्या । स्मृतिशीलेच तद्विदामनुभूतार्थविषयंविज्ञानंस्मृतिरुच्यते । तच्छब्देन वेदःप्रत्यवमृश्यते । तंविदन्ति तद्विदः । वेदार्थविदामिदंकर्तव्यमिदं न कर्तव्यमिति यत्स्मरणंतदपि प्रमाणम् । ननु च स्मृतिर्नप्रमाणमित्याहुः साहि पूर्वप्रमाणावगतप्रमेयानुवादिनी नाधिकमर्थंपरिच्छिनत्तीति वदन्ति ।सत्यम् । ये स्मरन्ति तेषामाद्यमेव तत्र शब्दादि प्रमाणंनात्मीया स्मृतिः । अस्माकंतु मन्वादिस्मृतिरेवप्रमाणम् । नहि वयंतामन्तरेणान्यतोष्टकादिकर्तव्यतामवगच्छामः । तच्च मन्वादीनामीदृशंस्मरणंतत्कृतेभ्योवाक्येभ्यः स्मृतिपरंपरायातेभ्योऽवसीयते । तस्माच्च स्मरणादनुभूतोऽयमर्थः प्रमाणेन मन्वादिभिरितिनिश्चिनुमोयतएते स्मरन्ति । नह्यननुभूतस्य स्मरणोपपत्तिः । ननु कल्पयित्वा ग्रन्थमुपनिबध्नीयुरननुभूयैवकेन चित्प्रमाणेन यथोत्पाद्यवस्तु कथानकंकेचन कवयः कथयेयुः । अत्रोच्यते । भवेदेवंयद्यत्र कर्तव्यतोपदेशोनस्यात् । कर्तव्यतोपदेशोह्यनुष्ठानार्थः । नचकेन चित्स्वेच्छया कल्पिते बुद्धिपूर्वव्यवहारिणोऽनुष्ठातुमर्हन्ति । भ्रान्त्याप्यनुष्ठानसिद्धिरिति चेत्स्यादप्येकस्य भ्रान्तिः सर्वस्य जगतोभ्रान्तिर्यावत्संसारभाविनीचेत्यलौकिकी कल्पना । नच संभवति मन्वादीनांवेदमूलत्वे भ्रान्त्यादेरवसरः । अतएव प्रत्यक्षतो मन्वादयोधर्मान्ददृशुरिति नाभ्युपगम्यते । इन्द्रियैरर्थानांसन्निकर्षे यज्ज्ञानंतत्प्रत्यक्षम् । नच धर्मस्येन्द्रियैः सन्निकर्षः संभवति तस्य कर्तव्यतास्वभावत्वात् । असिद्धंच कर्तव्यम् सिद्धवस्तुविषयश्च संनिकर्षः । अनुमानादीनि तदात्वे यद्यप्यसन्तमर्थमवगमयन्ति पिपीलिकाण्डसंचारेण हि भविष्यन्तींवृष्टिमनुमिमते तथापि नतेभ्यः कर्तव्यतावगतिः । तस्मात्कर्तव्यतास्मरणस्यानुरूपकारणकल्पनायांवेदएवोपदिश्यते । सच वेदोऽनुमीयमानोमन्वादिभिरुपलब्धः । इदानीमुत्सन्नासा शाखा यस्याममीस्मार्ताधर्माआसन् । तथा किमेकाशाखाऽथबह्व्यस्तासु च कश्चिदष्टकादिः कस्यांचिदित्येतदनुमानंप्रवर्तते । अथाद्यत्वे पठ्यन्तएवताः शाखाः किंतुविप्रकीर्णास्ते धर्माः कस्यांचिच्छाखायामष्टकादीनांकर्मणामुत्पत्तिः कस्यांचिद्द्रव्यंक्वचिद्देवता क्वचिन्मन्त्रइत्येवं विप्रकीर्णानां मन्वादयोऽत्रोपसंहारंसुखावबोधार्थंचक्रुः । अथमन्त्रार्थवादलिङ्गमात्रप्रभवाएते धर्माः । अथायमनादिरनुष्ठेयोर्थोऽविच्छिन्नपारंपर्यसंप्रदायायातोवेदवन्नित्यउतास्मदादीनामिव मन्वादीनामपिपरप्रत्ययानुष्ठानोनित्यानुमेयश्रुतिकइत्येवमादि बहुविकल्पंविचारयन्तिविवरणकाराः । एतावांस्तुनिर्णयोवैदिकमेतदनुष्ठानंस्मार्तानांवैदिकैर्विधिभिर्व्यतिषङ्गावगमादनुष्ठातृणांच तद्दृष्टानुष्ठानाद्व्यतिषङ्गश्च दर्शितः । क्वचिद्वैदिकमङ्गंप्रधानंस्मार्तंक्वचिदेतदेव विपरीतंक्वचिदुत्पत्तिः क्वचिदधिकारः क्वचिदर्थवादइत्येवंसर्वएव स्मार्तावैदिकैर्व्यतिषक्ताः । निपुणतश्चैतन्निर्णीतमस्माभिःस्मृतिविवेके । स्मार्तवैदिकयोर्नित्यंव्यतिषङ्गात्परस्परम् । कर्तृतः कर्मतो

वापि विप्रयुज्येते न जातुतौ ॥ प्रत्यक्षश्रुति निर्दिष्टंयेनुतिष्ठन्ति केचन । तएव यदि कुर्वन्तितथास्याद्वेदमूलता ॥ प्रामाण्यकारणंमुख्यंवेदविद्भिः परिग्रहः । तदुक्तंकर्तृसामान्यादनुमानंश्रुतीः प्रति ॥ विशेषनिर्धारणे तु न किंचित्प्रमाणंनच प्रयोजनम् उत्सादोऽपि संभाव्यते दृश्यन्ते हि प्रविरलाध्येतृका अद्यत्वेपि शाखास्ताभ्यःसंभाव्य भाव्युत्सादाभ्यो विधिमात्रमर्थवादविरहितमुद्धृत्योपनिबद्धंस्मृतिकारैरिति कैश्चिदभ्युपगम्यते । ब्राह्मणोक्ताविधयस्तेषामुत्सन्नाः पाठाः प्रयोगादनुमीयन्तइत्यापस्तम्बः । अत्रतुयैवंमहाप्रयोजनाशाखा यस्यां सर्वे स्मार्तागार्ह्याश्च सर्ववर्णाश्रमधर्माआम्नातास्तस्याउपेक्षणमसंभाव्यम् । सर्वाध्येतॄणांचोत्सादइत्यादि बह्वदृष्टंप्रकल्प्यम् । विप्रकीर्णानांत्वर्थवादगहनानांक्रत्वर्थपुरुषार्थतया च दुर्विज्ञानानांप्रयोगोन्नयनमभियुक्तानांन्यायतोनिश्चितार्थानांघटते । अस्मिंस्तु पक्षे विरोधद्वयस्यापि प्रत्यक्षश्रौतत्वाद्विकल्पेन स्मृतेर्बाधः । सचविशिष्टानांनाभिप्रेतः । स्मृतिकाराश्च बाधमनुमेयश्रुतिमूलत्वंच प्रतिपन्नाः । एवमप्याह गौतमः ऐकाश्रम्यंत्वाचार्याः प्रत्यक्षविधानाद्गार्हस्थ्यस्येति । यदि हि मन्वादीनांप्रत्यक्षास्ताः शाखाअभवन्केयंवाचोयुक्तिर्गार्हस्थ्यस्य प्रत्यक्षविधानादिति । ननुसर्वएवाश्रमाः प्रत्यक्षविधानाः स्वमतमेव चैतद्गौतमेनाचार्यापदेशेनोपदिष्टंतस्याश्रमविकल्पमित्याद्युपक्रम्यानेनोपसंहृतत्वात् । मन्त्रार्थवादप्रमाणभावोऽप्यविरुद्धः । यद्यप्यर्थवादाविध्युद्देशस्तुतिपरा न स्वार्थस्य विधायकास्तथापि केषांचिदन्यपरतैव नोपपद्यते यावत्स्वार्थविषयोविधिर्नावगमितः यथास्तेनोहिरण्यस्यसुरां पिबंश्चेत्यादेःपञ्चाग्निविधिशेषतैवमेतावतैव नोपपद्यते यावद्धिरण्यस्तेयादेःप्रतिषेधोनावगमितः । यएतांविद्यामधीते सहिरण्यस्तेयाद्यप्याचरंस्तैश्च संवसन्नपतति अन्यथा तु पततीत्यवगतिरविरुद्धा । अथविध्युद्देशोविधेः प्रतिपादकोनार्थवादइति केनैषा परिभाषा कृता । एतेपतन्ति चत्वारइत्यत्राप्याख्यातश्रवणमस्ति । लिङादयोनसन्तीति चेत्प्रतितिष्ठन्तीति रात्रिष्वपि नैवलिङ्श्रुतिरस्ति । अथ तत्राधिकाराकाङ्क्षायामेकवाक्यतायां सत्यां पञ्चमलकारादिकल्पनया विध्यवसायः एवमत्रापि भविष्यति । बहवश्च द्रव्यदेवताविधयोर्थवादावगम्याः सन्ति । तत्र यस्य विधेः शेषाअर्थवादास्तद्विधिनैव द्रव्यदेवतादेरपेक्षितत्वाद्विशेषसमर्पणमात्रे व्यापारान्तर्गतविशेषावगतिरर्थवादाधीना न दोषाय । इह तु तदसंबद्धस्य विध्यन्तरस्येष्यमाणत्वाद्वाक्यभेदापत्तिरतश्च न प्रकृतिशेषता । तदभावे च तन्मूलप्रतिषेधावगतिर्नस्यादतश्चाक्ताः शर्कराउपदधाति तेजोवै घृतमित्यनेन वैषम्यमित्याहुः । तदसत् । सत्यप्यर्थान्तरत्वे तदेकवाक्यता मूलत्वादस्याऽवगतेर्नास्तिवाक्यभेदाभिचोद्यापत्तिः । मन्त्राः प्रयोगप्रकाशत्वेन रूपादेवावगतास्तस्य प्रयोगस्यान्यतोसिद्धेः प्रकाशकत्वनिर्वहणाय प्रकाश्यंकल्पयन्ति । नवा सतोरुत्पत्त्यधिकारयोः प्रकाशनमष्टकायाःसंभवतीत्युत्पत्त्यधिकारविनियोगप्रयोगबोधकामन्त्राः । एवंमान्त्रवर्णिकाश्च विधयोभ्युपगम्यन्ते यथाचारे देवताविधिश्चतुष्पाद्विधर्मोभ्युपगतस्तत्राल्पतरांशः श्रुतः सकलेतरांशबोधहेतुस्तथाविधएव विधौसंबन्धग्रहणादिति सर्वथा तावत्संभवति वेदसंयोगः । मनुर्बहुभिर्बहुशाखाध्यायिभिः शिष्यैरन्यैश्च श्रोत्रियैः संगतस्तेभ्यः शाखाः श्रुत्वा ग्रन्थंचकार ताश्च मूलत्वेन प्रदर्श्यग्रन्थंप्रमाणीकृतवान् । एवमन्ये तत्प्रत्ययादनुष्ठानमारब्धवन्तोन मूलोपलम्भे यत्नंकुर्वन्ति । अस्माकंचैतदनुमानम् । अतोविरोधे सत्यपि तुल्ये श्रौतत्वेबाधोपपत्तिः । प्रत्यक्षया श्रुत्या प्रयोगसंपत्तौ श्रुत्यन्तरंप्रत्याकाङ्क्षैव नास्ति । यथा सामिधेनीषु साप्तदश्यपाञ्चदश्ययोः पाञ्चदश्येन प्रकृतिरवरुद्धा साप्तदश्यंप्रत्यक्षश्रुतमपि नाकाङ्क्षति । आभिधानिकोह्यर्थः सन्निकृष्यतेऽभिहितार्थाकाङ्क्षावगम्यंप्रत्ययंविप्रकर्षाद्दुर्बलंबाधते । नचैतावताऽप्रामाण्यापत्तिः यथा प्राकृतान्यङ्गानि विकृतिषु चोदकप्राप्तानि वैकृतिकैर्विरुध्यमानानिबाध्यन्ते तद्वदेव द्रष्टव्यम् । यत्र । संप्रदायविच्छेदस्तत्रच परंपरापत्तिः । नहि तत्र कस्यचित्प्रमाणंप्रवृत्तम् । नित्यानुमेयपक्षोऽपि संप्रदायपक्षान्नातीव भिद्यते । मन्वादि स्मरणस्य वयंमूलंपरी-

क्षिप्तुंप्रवृत्ताः । यदिच तेषामप्यसावनुमेयोवेदोवयमिव न ते स्मर्तारः । नच यः पदार्थोन कस्यचित्प्रत्यक्षस्तस्यानुमेयता- संभवत्यन्वयासंभवात् । क्रियादिषु सामान्यतोऽस्त्येव संबन्धदर्शनम् । यदि वार्थापत्त्यवसेयाः क्रियादयोनचेहान्यथा- नुपपत्तिरस्ति । तस्मादस्तिमन्वादीनामस्मिन्नर्थे वेदसंबन्धोन पुनरयमेव प्रकारइति निर्धारयितुंशक्यम् । द्रढीयसी कर्तव्य- तावगतिर्वेदविदांवेदमूलैव युक्ता कल्पयितुंन भ्रान्त्यादिमूलेत्यवगत्यनुरूपकारणकल्पना कृता भवति । तत्रोत्सादविप्र- कीर्णमन्त्रार्थवादेप्रत्यक्षचोदनाकारणानांसंभवात्कल्प्यत्वमुपदिश्यते । प्रत्यक्षोऽपि विधिः क्वचिन्मूलत्वेन दृश्यते न मलवद्वा- ससा सह संवसेदिति । सचाध्ययने चोपनयने च पठ्यते । तदेतल्लेशतोऽस्माभिरुक्तम् । विस्तरस्तु स्मृतिविवेकाज्ज्ञातव्यः । शाखाः काश्चित्समुत्सन्नाःपक्षोनैषमतोमम । पक्षेस्मिन्नप्रमाणंहि बव्हदृष्टंप्रसज्यते ॥ उपपन्नतरःपक्षोविक्षिप्तानांततस्ततः । उत्पत्त्यादि समाहारः प्रायशोदृश्यते ह्यदः ॥ अनेकशिष्योपाध्यायैः श्रोत्रियैरादृतोपरैः । शक्तोरचयितुंश्रुत्वा शाखांतांतीकुत श्चन ॥ उपपन्नस्तदानींच दृष्टमूलैः परिग्रहः । निश्चयोऽस्माकमप्यत्र यथा संभवतः स्थितः ॥ प्रयोगद्योतकामन्त्राद्योतनं- तस्य नामतः । नर्तेधिकारोत्पत्तिभ्यांप्रयोगस्यास्ति संभवः ॥ विशिष्टदेवतालाभआघारे मान्त्रवर्णिकः । प्रकाशकत्वान्मन्त्र- स्य तन्निर्वहणहेतुकः ॥ यासिद्धेरूपएकस्मिन्रूपान्तरगतिर्भवेत् । नसास्वरूपनाशाय विश्वजित्यधिकारवत् ॥ प्रतिपन्ने विधौ युक्तंतत्संबन्धार्थकल्पनम् । गतिर्मन्त्रार्थवादेभ्योन दृष्टा चेद्विधेः क्वचित् ॥ लिङादिगम्यंभगवान्विधिंस्मरति पाणि- निः । नशक्तास्ते विधिंवक्तुंसिद्धवस्त्वभिधायिनः ॥ व्याख्येयोगुणवादेन योर्थवादादतत्परात् । अर्थोधिगन्तुमिष्येत कथं- स्यात्तस्य सत्यता ॥ भिन्द्युर्द्वाक्यंन प्रतिष्ठाः साकाङ्क्षारात्रयोयतः । विशेषे तद्गते युक्ता वाक्यशेषावगम्यता ॥ स्तेयादीनां- निषेधेपि विध्यन्तरगतिर्ध्रुवा । ततश्च वाक्यभेदः स्यान्नोपन्यासस्ततः समः ॥ वाचःस्तोमे प्रयुज्यन्ते सर्वे मन्त्रविधिश्रुतेः । नाष्टकादौ विशेषोस्ति हेतुर्मन्त्रस्य बोधने ॥ विनासामान्यसंबन्धाल्लिङ्गं च विनियोजकम् । नच नास्त्यस्य संबन्धोविना प्रकरणादिभिः ॥ परिहारंब्रुवन्त्यत्र केचित्तन्मूलवादिनः । रात्रिषु प्रतितिष्ठन्तीत्यसत्स्वेवलिङादिषु ॥ पञ्चमेन लकारेण तदर्थ- गतिरिष्यते । पतन्तिनम्लेच्छितवाइत्यादिषु तथा भवेत् ॥ ऋचांविधिर्वाचिस्तोमे सर्वदाशतयीरिति । दशभ्योमण्डलेऽभ्य- स्तावर्जिताः पठिताबहिः ॥ सामान्यसंबन्धकारीसमाख्यैवेति गीयते । समाख्यागृह्यमन्त्राणांतेन तेनास्ति कर्मणाम् ॥ पञ्चा- ग्निविद्याशेषत्वंहिरण्यस्तेन निन्दया । स्तेनोहिरण्यवाक्यस्य न विना तन्निषेधतः ॥ शेषत्वावगमोऽर्थात्तु तदकर्तव्यता तु या । द्रढिम्नेशेषतायाःसा न पुनस्तद्विरोधिनी ॥ नित्यानुमेयपक्षोयोवाप्यागमपरंपरा । तयोरन्धप्रवाहत्वंन भेदः कश्चिदीक्ष्य- ते ॥ एवंच सति यागौतमेन प्रत्यक्षविधानता गार्हस्थ्यस्योक्ता सा शब्दस्याव्यवहितव्यापाराभिप्रायेण । श्रवणानन्तरंयो- र्थः प्रतीयते सप्रत्यक्षःयस्तु प्रतीतेऽर्थे तत्सामर्थ्यपर्यालोचनया गम्यः सविलम्बितत्वात्प्रतिपत्तेर्नप्रत्यक्षइति सर्वमुपप- न्नम् । स्मृतिशीलेचतद्विदाम् । स्मृतिश्चशीलंच स्मृतिशीले शीलं रागद्वेषप्रहाणमाहुस्तच्चधर्ममूलं वेदस्मृतिवन्नज्ञापक- तया किंतु निवर्तकत्वेन । रागद्वेषप्रहाणाद्धिधर्मोनिर्वर्तते । ननु च श्रेयःसाधनंधर्मइत्युक्तम् । रागद्वेषप्रहाणमेव चतत्स्व- भावम् । तत्रासति व्यतिरेके किमुच्यते रागादिप्रहाणाद्धर्मोनिर्वर्ततइति । उक्तमस्माभिर्धर्मशब्दोयंस्मृतिकारैः कदाचि द्वि- धिनिषेधविषयभूतायां क्रियायां प्रयुज्यते । कदाचित्तदनुष्ठानजन्यआफलप्रदानावस्थायिनिकस्मिंश्चिदर्थे तस्य च सद्भावे शब्दएव प्रमाणम् । यदिहि यागस्तथाविधंवस्त्वनुत्पाद्य विनश्येत्तदा कालान्तरे कुतः फलोत्पत्तिः । तदेतद्वस्तुधर्मशब्दे- नात्राभिप्रेतं तस्य शीलंमूलमिति नकिंचिदनुपपन्नम् । तदभिप्रायाएव व्यवहाराः । एकएव सुहृद्धर्मोनिधनेऽप्यनुयाति यः इति । क्रियायाअनुष्ठानसमनन्तरमेव नाशात्कुतः कालान्तरान्वयः । अत्र चोद्यते । ननु सर्वएव श्रुतिस्मृतिविहितो ऽर्थोधर्मस्य मूलंशीलस्यापि तत्रान्तर्भावाद्भेदेनोपादानमनर्थकंविधायिष्यते च इन्द्रियाणांजयेयोगंसमातिष्ठेद्दिवानिशम् । यस्मिञ्जिते जितावेतौभवतः पञ्चकौ गणाविति । अयमेव मनसोजयोयोरागद्वेषयोः परित्यागइतिवक्ष्यामः । केचिदाहुरा-

दरार्थः पृथगुपदेशः एतद्धि सर्वकर्मणामनुष्ठानउपयुज्यते स्वप्रधानंच अग्निहोत्रादि कर्मवत्। सर्ववर्णधर्मश्चायं सर्वाश्रमधर्मश्च तैः सामान्यधर्म लक्षणावसरेऽस्मिन्नुच्यते । वयंतु ब्रूमः समाधिः शीलमुच्यते । तथाहिशीलसमाधाविति धातुषु पठ्यते। समाधानंच मानसोधर्मः । यच्चेतसोऽन्यविषयव्याक्षेपपरिहारेण शास्त्रार्थनिरूपणप्रवणतातच्छीलमुच्यते। द्वन्द्वश्चाय मितरेतरयोगे तेन रपस्परसापेक्षयोः स्मृतिशीलयोः धर्मंप्रति प्रामाण्यमेवाभिप्रेतं न पूर्ववन्निर्वर्तकत्वम्। एतदुक्तंभवति। समाधानवती या स्मृतिःसा प्रमाणं न स्मृतिमात्रम्। तेन सत्यपि वेदार्थवित्त्वे यदतत्पराणांस्मरणंन तद्धर्ममूलं भ्रान्त्यादि संभवाच्छास्त्रार्थावधानशून्यानाम् । शब्दइह पठ्यते सतद्विदामित्यस्मादनन्तरंद्रष्टव्यः वृत्तानुरोधात्त्वेवंपठितः। समुच्चयार्थश्चासौ पूर्वप्रकृतस्य च समुच्चेतव्यस्याभावात्तृतीये पादे यत्साधूनामित्युक्तंतत्समुच्चिनोति । अतस्त्रीणि विशेषणान्यत्राश्रीयन्ते । विदुषामुपाध्यायादागमितविद्यानांतथा तदभ्यासपराणामनुष्ठानपराणांच स्मृतिः प्रमाणम्। एतत्सर्वमन्वादिनामासीदिति स्मर्यते। नान्यथा तत्कृतेषु ग्रन्थेषुशिष्टानांपरिग्रहोपपत्तिः। यद्येवंस्पष्टमेव वक्तव्यं मन्वादिवाक्यानि धर्ममूलमिति किमेतेन लक्षणेन। सत्यम्। यःकथंचित्तत्प्रामाण्ये विप्रतिपाद्येत तंप्रति न्यायशास्त्रप्रसिद्धंप्रामाण्यहेतुकथनमेतत् । अद्यत्वेऽपि यस्यैतद्धेतुसद्भावः सोऽपि मन्वादिवद्ग्राह्यवाक्यः स्यात्। तथा चविदुषांप्रायश्चित्ताद्युपदेशे तथा भूतएव परिषत्त्वेन प्रमाणीभवन्ति एकोपि वेदविद्धर्मंयोव्यवस्येद्द्विजोत्तमइति। अतएव स्मर्तृपरिगणना मनुर्विष्णुर्यमोऽङ्गिराइति निर्मूला। तथा हि पैठीनसिबौधायनप्रचेतःप्रभृतयः शिष्टैरेवंरूपाः स्मर्यन्ते नच परिगणनायामन्तर्भाविताः सर्वथा यामविगानेन शिष्टाः स्मरन्ति वदन्तिवा। एवंविधैर्गुणैर्युक्तं तेन चैतत्प्रणीतमिति तस्य वाक्यंसत्यपि पौरुषेयत्वे धर्मे प्रमाणंस्यादिति स्मृतिशीलेच तद्विदामित्यस्यार्थः । अद्यत्वे यएवंविधैर्गुणैर्युक्तईदृशेनैव च हेतुना ग्रन्थमुपनिबध्नीयात्सउत्तरेषांमन्वादिवत्प्रमाणीभवेत्। इदानींतनानांतु यदेव तत्र तस्याप्र बोधकारणंतदेव तेषामस्तीति न तद्वाक्यादवगतिः। इदानींतनोहि यावन्मूलंनदर्शयति तावन्नविद्वांसस्तद्वाक्यंप्रमाणयन्ति। दर्शिते तु मूले प्रमाणीकृते ग्रन्थे कालान्तरे यदि कथंचिदष्टकादिमूलतुल्यता स्यात्तदा तेषांशिष्टपरिग्रहान्यथानुपपत्त्या तन्मूलानुमानंयुक्तम् । आचारश्चैव साधूनांचशब्देन वेदविदामिति संबध्यते । पदद्वयेन शिष्टत्वंलक्ष्यते । शिष्टानांयआचारः सोपि धर्मे मूलम्। आचारोव्यवहारः अनुष्ठानं यत्रश्रुतिस्मृतिवाक्यानि न सन्ति शिष्टाश्च धर्मबुद्ध्यानुतिष्ठन्ति तदपि वैदिकमेव पूर्ववत्प्रतिपत्तव्यम्। यथाविवाहादौ कङ्कणबन्धनादि माङ्गलिकत्वेन यत्क्रियते या च कन्यायास्तदहर्विवाहयिष्यमाणायाः प्रख्यातवृक्षयक्षचतुष्पथादि पूजा देशभेदेन तथा चूडासंख्यादेशभेदश्च या चातिथ्यादीनांगुर्वादीनांचानुवृत्तिः प्रियहितवचनाभिवादनाभ्युत्थानादि रूपा तथा पृश्निसूक्तंतृणपाणयोऽधीयते अश्वमेधमश्वंयथासमर्पयन्तः ईदृशआचारः। एषोऽपि हिस्वभावभेदेन पुरुषाणांमनः स्वास्थ्यादौःस्थ्यादिभेदेनानेकरूपः प्रतिविशेषमानन्त्यादशक्योग्रन्थेनोपनिबद्धुम्। यदेव बहुशः प्रियेत्युपलक्षितंतदेवावसरान्तरे विपरीतंसंपद्यते। तथा पर्युपासनंगृहस्थेनातिथेः क्रियमाणंकस्यचित्प्रीतिकरंप्रमायंमृत्यव तिष्ठति। अन्यस्त्वन्यथानियन्त्रणया नलभ्यत आसितुमस्मिन्संनिहितइति पर्युपासनमेव विरज्यति। तत्र सामान्यतःशक्यंवेदानुष्ठानंन विशेषतः । अष्टकादीनांतु नियतैकरूपसमस्तप्रयोगस्मरणमित्येषस्मृत्याचाराणांभेदः। आत्मनस्तुष्टिरेव च धर्ममूलमित्यनुषज्यते वेदविदांसाधूनामिति च । अस्याश्चधर्ममूलत्वप्रामाण्येनैवेत्याहुः । यत्र ह्येवंविधानामनुष्ठेयेर्थेमनः प्रसीदति द्वेषोन भवति सधर्मः। ननु च यस्य प्रतिषिद्धएवार्थेमनः प्रसीदेत्सधर्मं प्राप्नोति विहिते च किंकथितंस्यात् सन धर्मइति। एवमेतदीदृशानांमहात्मनांमतिमतां महाप्रभावोमनः प्रसादोयेनाधर्मोऽपि धर्मतामेति धर्मश्चाधर्मतां न रागद्वेषादिदोषवताम्। यथारुमायां यत्किंचिद्द्रव्यंप्रविशति तत्सर्वंलवणसात्संपद्यते एवंवेदविदा सहसोत्पन्नेन मनः परि-

तोषेण सर्वनिर्मलीक्रियते । अतोयथा प्रतिषिद्धमपि ग्रहणंषोडशिनि विधिनानुष्ठीयमानंनदोषाय । नचात्र ग्रहणवद्विकल्पः। प्रतिषेधाह्यात्मतुष्टिव्यतिरेकेणान्यत्र विषये व्यवस्थाप्यन्ते । अथवानैवतेषामधर्मेआत्मापरितुष्यति यथाविषघ्नीमेवौषधीं नकुलोदशति नान्याम् अतउच्यते नकुलोयांयांदशति सासाविषघ्नीति । इह भवन्तश्चाहुः ये वैकल्पिकाः पदार्थास्तेषु यस्मिन्पक्षे मनः प्रसीदति सपक्षआश्रयितव्यः । वक्ष्यति च द्रव्यशुद्धौ प्रायश्चित्तेषु च तस्मिंस्तावत्तपः कुर्याद्यावत्तुष्टिकरंभवेत् । अथवा योऽश्रद्दधानोनास्तिकतया तस्यानधिकारमाह । नास्तिकस्य हि न वैदिकंकर्मकुर्वतोप्यात्मा तुष्यति । अतस्तेन क्रियमाणमपि कर्मनिष्फलमेव । अथवा सर्वकर्मविषयोभावप्रसादउपदिश्यते । अनुष्ठानकाले क्रोधमोहशोकादित्यक्त्वा प्रमुदितेन भाव्यम् । अतश्च शीलवदस्याः सर्वशेषतया धर्ममूलत्वाभिधानम् ॥ ६ ॥

(२) सर्वज्ञनारायणः । एवंधर्मंव्यवस्थाप्य तत्र प्रमाणान्याह । वेदोखिलइति अखिलःसार्थवादः तेषामपि विधितात्पर्यात् सवेदोधर्मस्य मूलंप्रमाणम् । यत्र साक्षात्श्रुतिर्नोपलभ्यते तत्र कथं तदुक्तं स्मृतिशीलेचेति । वेदविदांया स्मृतिर्वाक्यविशेषविवक्षोत्पादिकार्थविशेषेविषय चिन्तातत्प्रभवत्वात् वाक्यमपिस्मृतिः । वेदेनुपलभ्यमाने सा धर्मेप्रमाणम्। तस्याअप्यनुपलम्भे यत्र वेदविदांबहूनांशीलं चित्तस्य स्वभावप्रवणता सापि धर्मस्यमूलम् । यथा श्रुतिः यद्वैकिंचानूचानोभ्यूहतितदार्षेयंवेदयन्तीति । तस्याप्यनुपलम्भउक्तमाचारइति । साधवोवेदार्थसाधनप्रवृत्ताः तेषामाचारः स्वस्वपूर्वकालीनसाध्वनुष्ठितस्य प्रतिसंधानमनुष्ठानं तच्च प्रमाणंधर्मे लब्धशीलादन्यप्रयुक्तत्वशङ्कारहितान्निर्धारितमूलंमिथ्याप्रसिद्धमूलताशङ्काकलुषितमीषत्प्रत्यवरमिति क्रमार्थः । यत्राचारोऽपि नोपलभ्यते तत्राह आत्मनइति । वक्ष्यति च यत्कर्म कुर्वतोस्यस्यात्परितोषइति । तदयमर्थः यत्र विषये वेदादिकं धर्मप्रमाणचतुष्टयं सदपि नोपलब्धंउत्सादादिवशात् तत्र यत्कर्म कुर्वतश्चेतसोऽलाघवापरनामाप्रसादातिशयः तस्य साधकत्वे सएव प्रमाणम् । किंत्वेकपुरुषप्रतिभानतयास्याः शीलाचाराभ्यां बहुजनप्रतिभानप्रदनुष्ठानरूपत्वेनान्योन्यसंवादप्रामदार्ढ्याभ्यां किंचिदपकृष्टत्वमिति ॥ ६ ॥

(३) कुल्लूकः । इदानींधर्मप्रमाणान्याह वेदोऽखिलोधर्ममूलमिति । वेदऋग्यजुःसामाथर्वलक्षणः ससर्वोविध्यर्थवादमन्त्रात्माधर्मे मूलंप्रमाणमर्थवादानामपि विध्येकवाक्यतयास्तावकत्वेन धर्मे प्रामाण्यात्। यदाह जैमिनिः विधिनात्वेकवाक्यत्वात्स्तुत्यर्थे न विधीनांस्युः ।मन्त्रार्थवादानामपि विधिवाक्यैकवाक्यतयैव धर्मे प्रामाण्यंप्रयोगकाले चानुष्ठेयस्मारकत्वंवेदस्य च धर्मे प्रामाण्यंयथानुभवकरणत्वरूपंन्यायसिद्धम् । स्मृत्यादीनामपि तन्मूलत्वेनैव प्रामाण्यप्रतिपादनार्थमनूद्यते । मन्वादीनांच वेदविदांस्मृतिर्धर्मे प्रमाणम् । वेदविदामिति विशेषणोपादानाद्वेदमूलत्वेनैव स्मृत्यादीनांप्रामाण्यमभिमतम् । शीलंब्रह्मण्यतादिरूपम् । तदाह हारीतः ब्रह्मण्यता देवपितृभक्तता सौम्यताऽपरोपतापिताऽनसूयता मृदुताऽपारुष्यं मैत्रता प्रियवादित्वंकृतज्ञता शरण्यता कारुण्यंप्रशान्तिश्चेति त्रयोदशविधंशीलम् । गोविन्दराजस्तु शीलंरागद्वेषपरित्यागइत्याह । आचारःकम्बलवल्कलाद्याचरणरूपः ।साधूनांधार्मिकाणामात्मतुष्टिश्च वैकल्पिकपदार्थविषया धर्मे प्रमाणम् । तदाह † गर्गः । वैकल्पिकेआत्मतुष्टिःप्रमाणम् ॥ ६ ॥

(४) राघवानन्दः । अधुना प्रत्यक्षवेदमात्रप्रमितोधर्मइतितु नार्थइत्याह वेदइति चतुर्भिः । अखिलऋग्यजुःसामाथर्वाणःधर्ममूलंधर्मे प्रमाणम् । स्मृतिशीले स्मृतिमन्वाद्याख्या शीलंवृत्तंचरित्रम् । तद्विदामनुष्ठेयत्वेन वेदार्थविदाम् । ब्रह्मण्यतापितृदेवभक्तता अपरोपतापिता मृदुता अनसूयताअपारुष्यंमैत्रता प्रियवादित्वं कृतज्ञता शरण्यता कारुण्यंप्र

† गर्गव्यासः (अ)

शान्तिरितित्रयोदशविधशीलमिति हारीतोक्तंवा । अत्र स्मृतिः श्रुत्यविरोधिनी ग्राह्या । तथा च सूत्रं विरोधे त्वन पेक्षंस्यादसति ह्यनुमानमिति । प्रत्यक्षश्रुतिविरोधे स्मृत्यादिहेयम । यथासवोदुम्बरीवेष्टयितव्येति । असति तद्विरोधेअनु मानंयथाष्टकाःकर्तव्याइति स्मृतिवाक्यंवेदानुमापकतया मानमित्यर्थः । आचारोविवाहादौ कङ्कणबन्धादिःसाधूनाममत्सरा णांतुष्टिर्मनसःपरिणामविशेषःसोपि धर्मे मानमित्यन्वयः ॥ ६ ॥

(५)नन्दनः । अथधर्मप्रमाणान्युपन्यस्यति वेदइतिजातावेकवचनम् । धर्ममूलंधर्मस्य प्रमाणंन केवलंविध्यादेशएव धर्मप्रमाणं किंतु मन्त्रार्थवादावपीत्युक्तमखिलइति । तद्विदांवेदार्थविदाम् । स्मृतिर्धर्मशास्त्रेतिहासपुराणानि । शीलंच-धर्ममूलंसत्संभावनीयताहेतुः आत्मगुणसंपच्छीलम् । तदुक्तंमहाभारते तत्तु कर्म तथा कुर्यायेन श्लाघ्येत संसदि । शीलं-समासेनैतत्तेकथितंकुरुनन्दनेति । अत्रोदाहरणंयुधिष्ठिरस्य यक्षरूपधारिणोधर्मात्सोदरानादरेण नकुलजीविवरणम् । तद्विदामाचारश्चैवधर्ममूलम् । आचारोव्याख्यातः । साधूनांपरमधार्मिकाणामात्मनस्तुष्टिर्मनसोरुचिःसाचधर्ममूलंप्रमाणान्तरागोचरत्वेन धर्मत्वंप्रति संशयितेष्वर्थेषु योऽर्थोधर्मत्वेन साधूनांमनसे रोचते सधर्मइत्यर्थः ॥ ६ ॥

(६) रामचन्द्रः । अखिलोवेदो धर्मस्यप्रमाणम् । च पुनः । तद्विदांधर्मविदांस्मृतिशीले स्मृतिश्च शीलंच स्मृतिशीले धर्मस्यमूले भवतः शुचौ तु चरिते शीलमित्यमरः । आचारः सदाचारः साधुतुष्टिरेव साधुतुष्टिकर्ता च पुनः आत्मनः स्वस्य तुष्टिकर्ता ॥ ६ ॥

यःकश्चित्कस्य चिद्धर्मोमनुना परिकीर्तितः ॥ ससर्वोऽभिहितोवेदे सर्वज्ञानमयोहिसः ॥ ७ ॥

(१)मेधातिथिः । यदुक्तंवेदवित्संबन्धेन स्मृतेः प्रामाण्यंतदनेन प्रकटयति । यः कश्चिद्धर्मोवर्णधर्मआश्रमधर्मः संस्कारधर्मः सामान्यरूपोविशेषरूपश्च कस्यचिद्ब्राह्मणादेर्वर्णस्य मनुनापरिकीर्तितः ससर्वोपिवेदेऽभिहितः प्रतिपादितोयथाचैतत्तथा पूर्वश्लोकउक्तम् । सर्वज्ञानमयोहि सः सर्वेषांज्ञानानामदृष्टविषयाणांहेतुर्निमित्तंवेदः सर्वैर्ज्ञानैर्निर्मितइवेतिज्ञाने तद्विकारत्वमध्यारोप्य मयट्कृतः । योहि यद्विकारः सतन्मयस्तत्स्वभावइत्युच्यते । वेदश्च ज्ञानहेतुत्वात्तन्मयइति । यत्कार्यदर्शने कारणंकार्यस्वभावमिति । अथवा सर्वज्ञानाद्धेतोरागतोहेतुमनुष्येभ्यइति मयट्क्रियते ॥ ७ ॥

(२)सर्वज्ञनारायणः । यःकश्चिदिति । यःकश्चिदिदानीमनुपलभ्यमान मूलवान् वेदोपि कस्यचित्संकीर्णस्यापि सर्वेषां वेदानांयत्ज्ञानं तत्प्रायोहि सइत्यनुधापयेपितस्य सवेदः प्रत्यक्षएवेत्यर्थः ॥ ७ ॥

(३)कुल्लूकः । वेदादन्येषांवेदमूलत्वेन प्रामाण्येऽभिहितेऽपिमनुस्मृतेः सर्वोत्कर्षज्ञापनायविशेषेण वेदमूलतामाह यःकश्चिदिति । यःकश्चित्कस्यचिद्ब्राह्मणादेर्मनुना धर्मउक्तः ससर्वोवेदे प्रतिपादितः । यस्मात्सर्वज्ञोऽसौमनुः । सर्वज्ञतया चोत्सन्नविप्रकीर्णपठ्यमानवेदार्थंसम्यग्ज्ञात्वा लोकहितायोपनिबद्धवान् । गोविन्दराजस्तु सर्वज्ञानमयइत्यस्य सर्वज्ञानारब्धइव वेदइति वेदविशेषणतामाह ॥ ७ ॥

(४) राघवानन्दः । सर्वासांस्मृतीनांवेदमूलत्वेपि मनुस्मृतेरतिशयमाह यइति । कस्य चित्पुंसःसवेदःसर्वज्ञानमयःसर्वेषांज्ञानानामदृष्टविषयाणांहेतुतया निर्मितःसर्वविषयज्ञानबलोभगवतःपूर्वपूर्वसर्गसदृशतया कार्यत्वेपि सर्वार्थप्रकाशकत्वात् ॥ ७ ॥

(५)नन्दनः । एषुपूर्वंपूर्वंबलीयः वेदविदांस्मृतिः प्रमाणमित्युक्तम् वेदवित्तमत्वान्मनुनाप्रणीतंशास्त्रंस्मृत्यन्तरेभ्यः प्रमाणमित्यभिप्रायेणाह यःकश्चिदिति । सर्वज्ञानमयः सर्ववेदार्थज्ञानप्रकृष्टः ॥ ७ ॥

(६) रामचन्द्रः । यः कश्चित्धर्मः कस्यचिद्विप्रादेः धर्मः मनुना परिकीर्तितः सः सर्वः धर्मः वेदेअभिहितः उक्त सवेदः सर्वज्ञानमयः सर्वजानातीत्यर्थः । यद्वा समनुः सर्वज्ञानमयः ॥ ७ ॥

सर्वंतु समवेक्ष्येदंनिखिलंज्ञानचक्षुषा ॥ श्रुतिप्रामाण्यतोविद्वान्स्वधर्मे निविशेत वै ॥ ८ ॥

(१) मेधातिथिः । सर्वज्ञेयकृतकाकृतकशास्त्रगोचरंप्रत्यक्षादिगोचरंसमवेक्ष्यैतज्ज्ञानचक्षुषा तर्कव्याकरण- निरुक्तमीमांसादिविद्यास्थानश्रवणचिन्तनात्मकेन चक्षुरिव चक्षुः शास्त्राभ्यासोज्ञानस्य कारणत्वसामान्यात् । यथा चक्षुषा रूपंज्ञायते एवंशास्त्रेण धर्मइति सामान्यंसमवेक्ष्य सम्यग्विचारपूर्वकंनिरूप्य श्रुतिप्रमाणतोवेदप्रामाण्येन धर्मे निविशेतधर्ममनुतिष्ठेत् । सर्वेषु हि शास्त्रेषु सम्यग्ज्ञातेषुवेदप्रामाण्यमेवावतिष्ठते नाज्ञातेषु । तथाहि तानि शास्त्राणि निपुणत्वेन चिन्तयन्ति नतेषांप्रामाण्ये सम्यग्युक्तिरस्ति वेदे त्वस्तीति निश्चिनोति । सर्वग्रहणंज्ञेयविशेषणम् । निखिलश- ब्दश्च समवेक्ष्येतिक्रियाविशेषणम् । निखिलंसमवेक्ष्य निःशेषेणपूर्वपक्षेण शास्त्रान्तराणांप्रामाण्ये वेदस्य वा प्रामाण्येयाव- न्त्यःकाश्चन युक्तयः प्रतिभासन्ते ताः सर्वाः प्रदर्श्य सिद्धान्तसिद्धैर्हेतुभिर्यथालक्षणलक्षितैर्निराकृत्य स्वपक्षसाधने चोप- न्यस्तेवेदप्रामाण्यमवतिष्ठतइति निखिलशब्देन प्रदर्श्यते । तेन तौनिखिलसर्वशब्दौ पर्यायावपि भिन्नविषयत्वान्नपुनरुक्तौ । स्वग्रहणमनुवादः । योह्यन्यस्य धर्मः सोन्यस्याधर्मएव ॥ ८ ॥

(२) सर्वज्ञनारायणः । सर्वन्त्विति । सम्यगवेक्ष्यालोच्य इदंमानवशास्त्रं एतच्छास्त्रोक्तेन ज्ञानरूपचक्षुषाऽनुपलभ्य- मानवेदमूलेषुकर्मसु उपलभ्यमानतन्मूलेनच श्रुतेरपि प्रामाण्यतः प्रमाणत्वेन सिद्धेः तदुक्ते स्वंधर्मे स्वसंपाद्येधर्मे निविशेत नितान्तमन्तर्भवेत् । वैप्रसिद्धौ ॥ ८ ॥

(३) कुल्लूकः । सर्वन्त्विति । सर्वशास्त्रजातंवेदार्थावगमोचितंज्ञानंमीमांसाव्याकरणादिकंज्ञानमेव चक्षुस्तेन निखि- लंबद्विशेषेण पर्यालोच्य वेदप्रामाण्येनानुष्ठेयमवगम्य स्वधर्मेऽवतिष्ठेत ॥ ८ ॥

(४) राघवानन्दः । ततःकिंतत्राह सर्वमिति । ज्ञानचक्षुषा ज्ञायते ऽनेनेति ज्ञानंगुरुःसएव चक्षुस्तेनोपदिष्टमवेक्ष्य शब्दतोर्थतश्चाधीत्येत्यर्थः । इदंमनुशास्त्रंश्रुतिप्रामाण्यतःश्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्याभिर्गृहीततात्पर्यार्थः । विद्वान् स्वधर्मेअनुष्ठेये कर्तव्याकर्तव्येति विशेषतःप्रवर्तेत ॥ ८ ॥

(५) नन्दनः । शीलादिभ्यःश्रुतिस्मृतीबलीयस्यावित्यभिप्रायेणाह सर्वमिति । इदंश्रुत्यादिप्रमाणजातम् । निखिलंनि- रवशेषम् । ज्ञानचक्षुषा बुद्ध्या । श्रुतिप्रामाण्यतः श्रुतिशब्दःस्मृतेरप्युपलक्षणार्थउत्तरश्लोकानुगुण्याच्छ्रुतिसमत्वाभ्यु- पगमाच्च ॥ ८ ॥

(६) रामचन्द्रः । इमंनिखिलंसर्वधर्मविप्रादीनांधर्मंज्ञानचक्षुषाअवेक्ष्य विचार्य विद्वान्श्रुतिप्रामाण्यात्वै निश्चयेन निविशेतस्वधर्मे प्रविष्टोभवेत् ॥८ ॥

श्रुतिस्मृत्युदितंधर्ममनुतिष्ठन्हि मानवः ॥ इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमसुखम् ॥ ९ ॥

(१) मेधातिथिः । योनास्तिकतया वैदिकानि निष्फलानि कर्माणीति व्यामुग्धः नतदनुष्ठाने प्रवर्तते तस्य प्रवृत्त्य- र्थंसुहृद्भूत्वेष्टफलप्रदर्शनंकरोति । तिष्ठतु तावदन्यत्फलंश्रुतौ स्मृतिषु च यदुदितमुक्तंधर्माख्यंकर्मतदनुतिष्ठन्निहास्मिंल्लोके यावज्जीवति तावत्कीर्तिंप्रशस्यतांपूज्यतांसौभाग्यंलभते न्याय्ये पथि स्थितोमहापुण्योयमिति सर्वेण पूज्यतेप्रियश्च सर्व- स्यभवति । प्रेत्य देहान्तरे यस्मादन्यदुत्तमनास्ति तत्सुखंप्राप्नोति प्रायेण स्वर्गकामस्याधिकारी । निरतिशया च प्रीतिः

स्वर्गस्ततउच्यते अनुत्तममिति । तस्मान्नास्ति कस्यापि दृष्टफलार्थिनोऽत्रैव प्रवृत्तिः प्रयुक्तेत्येवंपरमेतत् ॥ ९ ॥

(२) **सर्वज्ञनारायणः** । अत्रफलमाह श्रुतीति । श्रुतिस्तत्कालोपलभ्या अनुत्तमंसुखंस्वर्गाख्यंमोक्षाख्यंच । अत्र चशीलादीनामनुक्तिरपकृष्टत्वकथनार्थम् अतएव वक्ष्यमाणस्य श्रुतिस्मृत्यमीमांस्यत्वस्य शीलादावपि प्रसङ्गंनिवारयितुं श्रुतिस्मृतिपदार्थौ व्याकर्तव्यौ ॥ ९ ॥

(३) **कुल्लूकः** । श्रुतिस्मृत्युदितमिति । श्रुतिस्मृत्युदितंधर्ममनुतिष्ठन्मानवइह लोके धार्मिकत्वेनानुषङ्गिकींकीर्तिंपरलोके च धर्मफलमुत्कृष्टंस्वर्गापवर्गादिसुखरूपंप्राप्नोति । अनेन वास्तवगुणकथने श्रुतिस्मृत्युदितंधर्ममनुतिष्ठेदितिविधिःकल्प्यते ॥ ९ ॥

(४) **राघवानन्दः** । किंच श्रुतीति । अनुत्तमंनास्त्युत्तमंयस्मात् । मानवःमनुष्याधिकारकंशास्त्रमिति न्यायात् ॥९॥

(५) **नन्दनः** । श्रुतिस्मृत्योस्तुल्यकक्षतांविशदयति श्रुतीति ॥ ९ ॥

(६) **रामचन्द्रः** । श्रुतिस्मृत्युदितंश्रुतिस्मृतिभ्यांयत्उदितंउक्तंधर्ममानवः अनुतिष्ठन्इहलोके प्रेत्य परलोके कीर्तिंसुखमवाप्नोति ॥ ९ ॥

श्रुतिस्तु वेदोविज्ञेयोधर्मशास्त्रंतु वै स्मृतिः॥ ते सर्वार्थेष्वमीमांस्ये ताभ्यांधर्मोहि निर्बभौ ॥ १० ॥

(१) **मेधातिथिः** । किमिदंशब्दार्थसम्बन्ध स्मरणमभिधानकोशशास्त्रमात्मभूः परमेष्ठीत्यादिवन्नधर्मशास्त्रंयेनेदमुच्यते श्रुतिस्तु वेदोविज्ञेयोधर्मशास्त्रंतुवै स्मृतिरिति उच्यते। इहसदाचारोन श्रुतिर्नस्मृतिर्निबन्धाभावान्निबद्धाक्षराहिस्मृतयः प्रसिद्धाऽतस्तस्यस्मृतित्वमुपपादयति।यत्कार्यंधर्मग्राम्यथंतद्धर्मशास्त्रंयत्र धर्मःशिष्यते कर्तव्यतया प्रतीयते सा स्मृतिः।निर्बन्धानिभावप्रयोजक शिष्टसमाचारादपि धर्मस्य कर्तव्यतावगतिःसोऽपि स्मृतिरेव । ततश्च यत्र कस्मैचित्कार्याय स्मृतेरुपादानंतत्र सदाचारोपि ग्रहीतव्यः । धर्मशास्त्रंचेत्स्मृतिर्वेदोऽपि सर्वमुख्यंधर्मशासनमिति तस्यापि स्मृतित्वप्रसङ्गस्तन्निवृत्त्यर्थमाह श्रुतिस्तु वेदोविज्ञेयः । यत्रश्रूयते धर्मानुशासनशब्दः.साश्रुतिः। यत्र च स्मर्यते सा स्मृतिः। तच्च समाचारे प्यस्तीत्यतः सोऽपि स्मृतिरेव । नहि तत्राप्यस्मृतवैदिके शब्दे प्रामाण्यमथवा श्रुतिग्रहणंस्मृतेर्वेदतुल्यत्वार्थांकिंपुनःश्रुतिस्मृत्योः समानंकार्यं यत्समाचारेप्यन्येन प्राप्यते।उच्यते। ते सर्वार्थेष्वमीमांस्ये ते श्रुतिस्मृती सर्वेष्वर्थेष्वत्यन्तासंभाव्येष्वपि दृष्टविषयैः प्रमाणैर्यथा तत्मादेवहिंसालक्षणात्पदार्थात्कचिदभ्युदयः क्वचित्प्रत्यवायः सुरापानान्नरकः सोमपानात्पापशुद्धिरित्यादौ पक्षप्रतिपक्षगमनेन विचारोन कर्तव्यः । आशङ्कनपक्षान्तरसंभावनंमीमांसनम् । यथाहिंसा चेत्पापहेतुः स्वरूपाविशेषाद्वैदिक्यपि तथा भवितुमर्हति । अथवैदिक्यभ्युदयहेतुर्लौकिक्यपि तथा स्यात् । तद्रूपसमानत्वाद्यस्ययद्रूपंवेदादवगतंतस्य तद्विपरीतरूपसंभावनमसत्तर्काश्रयैरसम्यग्घेतुभिर्यद्विचारणंतत्सिद्धान्ताभिनिवेशः सइह प्रतिषिध्यते । न पुनरयमर्थोवेदस्याद्यः पूर्वपक्षउतत्विद्यः सिद्धान्तइत्येषामीमांसानिषिध्यते । यतोवक्ष्यति यस्तर्केणानुसंधत्ते सधर्मंवेद नेतरइति । किंपुनरयमदृष्टार्थोमीमांसनप्रतिषेधः नेतिब्रूमः । ताभ्यांधर्मोहि निर्बभावनेनतार्किकप्रमाणानांवेदार्थविपरीतसाधनानामाभासतामाह । ईदृशाहितेषांहेतवोवैदिकी हिंसा पापहेतुः हिंसात्वाल्लौकिकहिंसावत् । तत्र हिंसायां पापहेतुत्वंन कुतश्चिदन्यतः प्रमाणात्सिद्धमन्तरेणागमम् । एवंचेन्नास्तिहिंसायाः पापसाधन सिद्धोहेतुः यावदागमः प्रामाण्येन नाभ्युपगतः । अभ्युपगतेचागमप्रामाण्ये तद्विरुद्धे हेतुर्न युज्यतेअप्रामाण्यापत्तेरागमस्य । ततश्चेतरेतरव्यापारः पूर्वंप्रामाण्येन परिग्रहः पश्चादप्रामाण्यमिति । सोऽयं स्ववचनविरुद्धः पक्षोनैनं तार्किका अनुमन्यन्ते ममसातावन्ध्येतिवदागमविरुद्धश्च । अथोच्यतेनैवागमः प्रमाणंक

र्थंतद्विरोधोद्भावनंदूषणम् । अनृतव्याघातपुनरुक्तदोषेभ्यः । कारीर्यादिकर्मणांतत्समनन्तरंफलार्थितयाऽनुष्ठीयमानानांन नियमतोऽनुष्ठानसमनन्तरंफलप्राप्तिः । कालान्तरेभविष्यतीतिचेदुक्तमत्र कृता शरदि कारीरी भृशंशुष्यन्तु शालिषु । वसन्ते जायते वृष्टिस्तस्यादौनभवेत्फलमिति । यान्यप्यन्यत्र भाविफलानि ज्योतिष्टोमादीनि तत्रापि निरन्वयविनाशात्कर्मणो वर्षशते फलंभविष्यतीति निःसंदिग्धवैतानिकव्यवहारोपममेतत् । तस्मादनृतम् । व्याघातःउदिते होतव्यमनुदिते जुह्वतोदोषः। प्रातःप्रातरनृतंतेवदन्तिपुरोदयाज्जुह्वति येऽग्निहोत्रम् । तथाऽनुदिते होतव्यंयथातिथये प्रद्रुतायदद्यात्तादृगेतद्यज्जुहुयादित्येकत्रोदितहोमोविधीयतेऽनुदितहोमनिन्दया । तदेवविपरीतमन्यत् । तत्रैकः पक्षआश्रीयतामित्यनभ्यवसायः यदेवाग्निहोत्राद्येकस्यां शाखायांविद्यते तदेवशाखान्तरेपि । सर्वशाखाप्रत्ययमेकंकर्मेत्यभ्युपगमः । ततश्च पुनरुक्तंतत्रानृतमेव तत्रभवतीत्येतेनैव पादेन प्रतिपाद्यते । यतोवेदाद्धर्मएव कर्तव्यतामात्रंयागादिविषयंनिर्बभौ विभाति गम्यते । न पुनः कालविशेषः फलस्योत्पत्तावधिकारवाक्येषु कालविशेषाश्रवणाद्विधितोहि फलंभवतीत्येतावद्गम्यते । कालावच्छेदोन विधिः । धात्वर्थसंबन्धिनोहि कालविभागाभूतभविष्यद्वर्तमानाः। नचैतद्धात्वर्थफलंकिन्तुवैधम् । धात्वर्थफलंहि तदानीमेवनिर्वर्तते । देव तोद्देशेनद्रव्यत्यागः हविर्विकारादि यदिकश्चित्कस्यचिदाज्ञाकारोभवति तेन प्रेष्यते गच्छ याहि ग्राममिति सआज्ञासंपादने प्रवृत्तः कदाचित्प्रारम्भएव वेतनफलंलभते कदाचिन्मध्ये कदाचित्कृतआज्ञाविषये समनन्तरमन्येषुर्वाकालान्तरेऽथवा एवमेतच्छास्त्रफलमनियतकालम् । दिव्यवृष्ट्यादेस्तु स्वाभाव्येन प्रसक्तिमात्रंगम्यते । ननुतदहरेवोत्पत्तिः प्रतिसंबन्धकानि च यथा फलस्यैवंविधस्य लोके भवन्ति तथा वेदेपि पुराकृतंदुष्कृतादि । तथा च वेदएवैतद्दर्शयति यदि न वर्षेत्तथैव वसेदिति । सर्वस्वादौतु विवदन्ते नैतत्क्रतुफलम् । अङ्गमेतत्स्मरणम् । क्रतुफलंयः कामयेतानामयः स्वर्गलोकमियामिति । यच्चोक्तंहिंसायांलोकवेदयोर्न विशेषइति तत्र शास्त्रावगम्योहि तस्याऽयंस्वभावोन प्रत्यक्षादिगोचरस्तत्र च भेदः । रागलक्षणा लौकिकीहिंसा विधिलक्षणाऽलौकिकी हिंसा विधिलक्षणा त्वग्नीषोमीयस्येति महान्भेदः । तस्मान्न किंचिद्वेदेऽनृतम् व्याघातंपरस्तात्परिहरिष्यतिश्लोकेनैव ॥ १० ॥

(२) **सर्वज्ञनारायणः** । श्रुतिस्त्विति । तुशब्देन शीलादिशब्दव्यवच्छेदः । वेदइति प्रसिद्धतामाह । धर्मशास्त्रप्राधान्येन यत्रानुशासनीयं तद्धर्मशास्त्रम् । अमीमांस्ये तद्विरुद्धतर्कविचारादिभिर्न बाधनीये शीलादिकंतद्विरोधे बाध्यमेवेत्यर्थः । निर्बभौ प्रकाशितः ॥ १० ॥

(३) **कुल्लूकः** । श्रुतिस्त्विति । लोकप्रसिद्धसंज्ञासंज्ञिसम्बन्धानुवादोऽयंश्रुतिस्मृत्योःप्रतिकूलतर्केणामीमांस्यत्वविधानार्थस्मृतेः श्रुतितुल्यत्वबोधनेनाचारादिभ्योबलवत्त्वप्रतिपादनार्थंच । तेन स्मृतिविरुद्धाचारोहेयइत्यस्य फलम् । श्रुतिर्वेदःमन्वादिशास्त्रंस्मृतिः । तेउभेप्रतिकुलतर्कैर्न विचारयितव्ये यतस्ताभ्यांनिःशेषेण धर्मोबभौ प्रकाशतांगतः ॥ १० ॥

(४) **राघवानन्दः** । श्रुतिस्मृत्युदितमित्युक्तंतत्र का श्रुतिः का च स्मृतिरित्याकाङ्क्षायामाह श्रुतिस्त्विति । धर्मशास्त्रंधर्मप्रतिपादकंमन्वादि तस्य च कर्तृविशेषात्प्रामाण्यम् । तदाह याज्ञवल्क्यः कर्तारोधर्मशास्त्राणांमनुर्विष्णुर्यमोङ्गिराः । वसिष्ठदक्षसंवर्तशातातपपराशराः । आपस्तम्बोशनोव्यासाःकात्यायनबृहस्पती । गौतमःशङ्खलिखितौ हारीतोत्रिरहंतथेति । श्रुतिस्मृती सर्वार्थेषु ज्ञातव्येषुअमीमांस्ये प्रतिकूलतर्केण न विचारयितव्येइति कुल्लूकः तन्न । सर्वार्थेषु मीमांस्येएवइतिपाठः । तथा च सर्वार्थेषु ज्ञातव्येषु मीमांस्ये एव धर्मस्यातीव सूक्ष्मत्वात् । यस्तर्केणानुसंधत्ते-

सधर्मवेदनेतरइति । त्रयंसुविदितंज्ञेयंकार्यसिद्धिमभीप्सतेति । त्रयंप्रत्यक्षानुमानशब्दाः । मीमांसा हि पूजितविचारवचनेऽथातोधर्मजिज्ञासेत्यादि । तत्र जातंतया श्रुत्यादिषट्कैर्निर्णेतव्येऐन्द्र्यागार्हपत्यमुपतिष्ठते अस्याःश्रुतेरन्निपरतावत् ॥ १० ॥

(५) नन्दनः । श्रुतिस्मृत्योस्तुल्यकक्ष्यतामेव प्रकान्तरेणाहश्रुतिस्त्विति ॥ १० ॥

(६) रामचन्द्रः श्रुतिः वेदः स्मृतिर्धर्मशास्त्रंते श्रुतिस्मृती सर्वार्थेषु सर्वकार्येषु अमीमांस्येअविचार्ये । मानविचारणे-इत्यस्य धातोरूपम् । ताभ्यांश्रुतिस्मृतिभ्यांधर्मः निर्बभौ नितरांबभौ ॥ १० ॥

योऽवमन्येत ते मूले हेतुशास्त्राश्रयाद्द्विजः ॥ ससाधुभिर्बहिष्कार्योनास्तिकोवेदनिन्दकः ॥ ११ ॥

(१) मेधातिथिः । असत्यप्रामाण्यहेतोर्वेदस्य योद्विजोहेतुशास्त्राश्रयाद्धेतुशास्त्रंनास्तिकतर्कशास्त्रंबौद्धचार्वाकादिशास्त्रं यत्र वेदोऽधर्मायेति पुनः पुनरुद्घुष्यते तादृशंतर्कमाश्रित्य योऽवज्ञांकुर्याच्छ्रुतौ स्मृतौ च केनचिदकार्यान्निवर्त्यैतमैवंकार्षीः प्रतिषिद्धंवेदेनेति तमनादृत्य चिकीर्षेत्किनाम वेदे यदि वेदे स्मृतिषु वा प्रतिषिद्धंकितयोः सम्यक्प्रामाण्यमस्तीति कथयेन्मनसा वाविचिन्तयेत्तर्कशास्त्रेषु निबद्धादरोयदि दृश्येत ससाधुभिः शिष्टैर्बहिःकार्यस्तत्तत्कार्येभ्योयाजनाध्यापनातिथिसत्कारादिभ्यः । क्रियाविशेषस्यानिर्देशाद्द्विद्वर्हाभ्यइति गम्यते यतोऽविद्वान्सम्यगसंस्कृतात्मा तार्किकगन्धितयैवंव्यवहरति आसु च क्रियासु विद्वानधिक्रियते । अतएव पूर्वश्लोके विचारईदृशः प्रतिषिध्यते यतस्तदवज्ञानपरतया क्रियते । ननु यतस्तदर्थविशेषजिज्ञासयैवमर्थमेवहेतुमाह नास्तिकोवेदनिन्दकः । अतश्च पूर्वपक्षे योवेदस्याप्रामाण्यंब्रूयान्नासौ नास्तिकःस्यात् । सिद्धान्तदार्ढ्यार्थमेवपूर्वपक्षे हेतुकथनंवेदनिन्दकइति । स्मृतिग्रहणं नकृतंतुल्यत्वेनोभयोः प्रकृतत्वादन्यतरनिर्देशेनैव सिद्धमुभयस्यापि ग्रहणमित्यभिप्रायः ॥ ११ ॥

(२) सर्वज्ञनारायणः । यइति । तथा च शीलादिभिस्तदपवादेधर्मव्यवस्थैव न स्यात् अतस्तदुभयंन विचार्यम् । हेतुशास्त्रंश्रुतिविरोधितर्कशासनम् । बहिष्कार्यःसाधुभावात् । सहि नास्तिकोनास्ति परलोक इत्येवंच वर्तते । वेदानांचनिन्दकोभवति । अतोबहिष्कार्यइत्यर्थः ॥ ११ ॥

(३) कुल्लूकः । योवमन्येतेति । यःपुनस्ते द्वे श्रुतिस्मृती द्विजोऽवमन्येत सशिष्टैर्द्विजानुष्ठेयाध्ययनादिकर्मणोनिःसार्यः । पूर्वश्लोके सामान्येनामीमांस्येइति मीमांसानिषेधादनुकूलमीमांसापि न प्रवर्तनीयेति भ्रमोमाभूदिति विशेषयति हेतुशास्त्राश्रयात् वेदवाक्यमप्रमाणंवाक्यत्वाद्विप्रलम्भकवाक्यवदित्यादिप्रतिकूलतर्कावष्टम्भेन चार्वाकादिनास्तिकइव । नास्तिकोयतोवेदनिन्दकः ॥ ११ ॥

(४) राघवानन्दः । अतएवाह यइति । अवमन्येतअप्रमाणोयंवेदःस्वर्गकामोयजेतेत्यादेर्भुञ्जानस्तृप्यतीतिवत्कार्यकारणादृष्टेःग्रावाणःश्रुणुतेत्यादेरर्थव्यभिचाराच्चेत्यादिहेतुशास्त्रम् । वेदनिन्दकत्वेन पतितत्वात्सर्वधर्मानधिकारित्वमाह बहिष्कार्यइति ॥ ११ ॥

(५) नन्दनः । तेश्रुतिस्मृती । वेदस्मृतिनिन्दकइत्येव वक्तव्ये वेदनिन्दकइत्युक्तंस्मृतेरपितन्मूलत्वाद्वेदत्वाभ्युपगमनेनोक्तम् ॥ ११ ॥

(६) रामचन्द्रः । यः पुरुषः तेउभे श्रुतिस्मृतीहेतुशास्त्राश्रयात्हेतुः तर्कविद्या पाखण्डशास्त्राश्रयात् अवमन्येतसः साधुभिर्बहिष्कार्यः वेदनिन्दकत्वात् ॥ ११ ॥

---

(११) योऽवमन्येत तेमूले= योऽवमन्येत तेतूभे । (अ, च, ज, झ, ट, ठ, ड, ढ, न, ब, भ, य, ल, मेधा०)

वेदःस्मृतिःसदाचारःस्वस्य च प्रियमात्मनः॥ एतच्चतुर्विधंप्राहुःसाक्षाद्धर्मस्य लक्षणम्॥ १२ ॥

(१) **मेधातिथिः** । यस्त्वेतमर्थमविदित्वा वेदशब्दस्य विवक्षितार्थत्वमेव मत्वा स्मृतिनिन्दकस्य न बहिष्कारोनेन-वेदनिन्दकस्यैव विहितइतिप्रतिपद्येत तंप्रत्याह नात्र कश्चिद्विशेषः वेदनिन्दाप्रतिषेधेन स्मृतिसदाचारात्मतुष्टीनामपि निन्दकस्य बहिष्कारोनेन विहितस्तेषामपि वेदमूलधर्माभिधानमतः स्मृत्यादिनिन्दकोवेदनिन्दकएव । ननु श्लोकद्वयेननार्थः। एवंवक्तव्यं । श्रुत्यादीनात्मतुष्ट्यन्तान्हेतुशास्त्राश्रयान्द्विजः । योनिन्देत्सबहिष्कार्यः साधुभिर्नास्तिकत्वतः । उच्यते । नाचार्याग्रन्थगौरवंमन्यन्ते । बुद्धिगौरवंयत्नेन परिहरन्ति तस्मिन्हिसत्यसम्यगवबोधोधर्मस्य सच पुरुषार्थविहन्ति । भेदनिर्देशेपि हि चोदयेयुर्वेदग्रहणमेवकर्तव्यं सर्वस्य धर्मस्य वैदिकत्वात तस्माद्विस्पष्टार्थभेदेनोभयनिर्देशः। संक्षिप्तरुचीनांपूर्वश्लोकोऽन्येषांश्लोकद्वयम्।स्वस्य चप्रियमात्मनइत्यनेन प्रागुक्ताऽऽत्मतुष्टिरेवोक्ता। स्वग्रहणंवृत्तपूरणार्थम्। एतत्साक्षाद्धर्मस्य लक्षणनिमित्तं ज्ञापकं न पुनः प्रत्यक्षम् यथा नैरुक्तंसाक्षात्कृतधर्माणइति। विधाशब्दः प्रकारवचनः। एकमेव धर्मेप्रमाणंवेदाख्यं तस्यत्वेते भेदाः स्मृत्यादयः। अन्ये रूपसंहारार्थमिमंश्लोकंव्याचक्षते । समामंधर्मलक्षणप्रकरणमिति पुनः पाठः समाप्तिंसूचयति यथा द्विरभ्यासोवेदाङ्गेषुसंस्थाजपेनोपतिष्ठन्तउपतिष्ठन्तइति । तथा च पिण्डीकृतइव प्रागुक्तोऽर्थोत्रदिवर्तते । यथा नैयायिकाअनित्यः शब्दइतिप्रतिज्ञाय साधनोपन्यासंकृत्वा निगमयन्ति तस्मादनित्यः शब्दइति । प्रायेण चैषा ग्रन्थकाराणांरीतिः । तथा महाभाष्यकारोऽपि क्वचित्सूत्रंवार्तिकंवा पठित्वा व्याख्याय पुनः पठति ॥१२ ॥

(२) **सर्वज्ञनारायणः** । वेदस्मृत्योरेवात्र पुनःपुनरभिधानात शीलादीनांव्यवच्छेदोमाभूदितिप्रागुक्तानि मूलानि सक्षिप्य दर्शयति वेदइति । सदाचारपदंबहूनां साधूनामपि प्रतिपत्तिविषयतामात्रकृतानुष्ठानपरम्। तेन शीलग्रहः स्वस्य स्वीयस्यात्मनःमनसःप्रियंसाक्षात् साक्षादिव साक्षात्कारइवेत्यर्थः आचारादात्मप्रीतिरपि प्रमाणमेव धर्मे किंतु तयोः नात्यन्तंश्रुतिस्मृतिवन्निःशङ्कंप्रवृत्तिहेतुतेति च तात्पर्यसंक्षेपः ॥ १२ ॥

(३) **कुल्लूकः** । इदानींशीलस्याचारएवान्तर्भावसंभवाद्वेदमूलताएव तत्त्वं न स्मृतिशीलादिप्रकारनियमइति दर्शयितुं चतुर्धा धर्मप्रमाणमाह वेदइति । वेदोधर्मप्रमाणंसक्वचित्प्रत्यक्षःक्वचित्स्मृत्यानुमितःइत्येवंतात्पर्यं नतु प्रमाणपरिगणने ।अतएव श्रुतिस्मृत्युदितंधर्ममित्यत्र द्वयमेवाभिहितवान् । सदाचारः शिष्टाचारः । स्वस्य चात्मनः प्रियमात्मतुष्टिः ॥ १२ ॥

(४) **राघवानन्दः** । वेदोखिलइत्यत्रोक्तमनुवदंस्तत्रान्येषांसंमतिमाह वेदइति । वेदइत्यत्र पाठक्रमःस्मृतेर्वेदोमूलमिति सूचनार्थः। स्मृतिपूर्वकत्वाद्यन्तरितआचारः । आचारेष्वनुष्ठानंप्रत्यक्षम् । कर्तव्यताधीस्तु स्मृतिमूलैव । लोभाद्यसत्त्वे स्वस्य वेदार्थानुष्ठातुःप्रियंरागाद्यनुपहिततंतदपि धर्मे प्रमाणमित्यन्वयः। संमतिंद्योतयति प्राहुरिति । लक्षणंमानम् ॥ १२ ॥

(५) **नन्दनः** । धर्मप्रमाणान्युपसंहरतिवेदइति । सदाचारशब्देनात्र शीलस्यापि परिग्रहः । लक्ष्यतेनेनेतिलक्षणंप्रमाणम् ॥ १२ ॥

(६) **रामचन्द्रः** । वेदः वेदोक्तधर्मः स्मृतिः स्मृत्युक्तधर्मः सदाचारः सतामाचारः आत्मनः स्वस्य यत्प्रियंतद्यथा स्वकीयस्य बन्धोः आत्मनश्च प्रियंयत् । चकारः समुच्चये । आत्मनः प्रियं परदाराभिमर्शनंप्रियंभवेत्चेत्तन्नबन्धूनांतत्प्रियंन तस्मात्स्वस्यआत्मनः प्रियंएतच्चतुर्विधंधर्मंप्राहुः ॥ १२ ॥

अर्थकामेष्वसक्तानांधर्मज्ञानंविधीयते ॥ धर्मजिज्ञासमानानांप्रमाणंपरमंश्रुतिः॥ १३ ॥

(१) मेधातिथिः । गोभूमिहिरण्यादिधनमर्थः । तत्रसक्ति स्तात्पर्येण तदर्जनरक्षणार्थंकृषिसेवादिव्यापारकरणम् । कामः स्त्रीसंभोगः तत्रसक्तिर्नित्यंतदासेवनं तदङ्गानांचगीतवादित्रादीनाम् । तद्वर्जितानांपुरुषाणांधर्मज्ञानंधर्मावबोधोविधीयते विशेषेणधीयते व्यवस्थितंभवति । धाआधारइत्यस्यैतद्रूपम् । किमर्थंपुनस्तत्र सक्तानांनभवति धर्मज्ञानंयावता तेपि यथा लक्षणंतदविरोधिन्यवसरे भोजनादावितिहासश्रवणादन्योपदेशात्समाचाराद्वा शक्नुवन्तिज्ञातुमित्यतआह धर्मजिज्ञासमानानामिति । मुख्यंप्रमाणं धर्मेवेदः सचतैर्नशक्योज्ञातुम् । अत्यन्त दुर्विज्ञानोह्यसौ निगमनिरुक्तव्याकरणतर्कपुराणमीमांसाशास्त्रश्रवणमपेक्षते स्वार्थबोधे । न चेयान्ग्रन्थराशिः सर्वव्यापारपरित्यागेन विनाशक्यआसादयितुम् । समाचारेतिहासादेः कतिपयेधर्माअवगम्यन्ते । न वेदादिवत्समस्ताङ्गयुक्तोज्योतिष्टोमादिप्रयोगः । अतउक्तंप्रमाणंपरमंश्रुतिः । नतुसमाचारादेःप्रामाण्यापकर्षः तदुक्तं योऽहेरिव धनाद्भीतोमिष्टान्नाच्च विषादिव । राक्षसीभ्यइव स्त्रीभ्यःस विद्यामधिगच्छति । अपरेत्वर्थकामदृष्टफलैषिणउच्यन्ते । तत्र सक्तानांपूजाख्यात्यादिकामानांदृष्टफलार्थितया लोकपक्तिमात्र प्रयोजनानांन धर्मज्ञानंधर्मानुष्ठानंविधीयत उपदिश्यते। ज्ञायतेऽस्मिन्निति ज्ञानमनुष्ठानमित्युच्यते।अनुष्ठीयमानोहि धर्मोव्यक्ततरोभवति शास्त्रावगमकातरोऽपिअतोऽनुष्ठानंधर्मज्ञानमुच्यते ।अतएतदुक्तंभवति । यद्यपि धर्मानुष्ठानाल्लोकऽपत्यादि दृष्टंप्रयोजनमुपलक्ष्यते तथापि न तत्सिद्धिपरतया तत्रप्रवर्तितव्यम् । किंतर्हि शास्त्रेण तच्चोदितमिति कृत्वा तथा च प्रवृत्तौ यदि दृष्टमपिभवति भवतु न विचार्यते । तथा च श्रुतिः स्वाध्यायस्य दृष्टंफलमनुवदति यशोलोकपक्तिरिति । लोकः पच्यमानश्चतुर्भिरेनंभुनक्ति । अर्चयादानेनाजेयतया चावध्यतयेत्यादि । श्लोकश्चात्र भवति यथेक्षुहेतोरिह सेचितंपयस्तृणानिवल्लीरपि च प्रसिञ्चति । तथा नरोधर्मपथेन संचरन्यशश्चकामांश्च वसूनि चाश्नुते । ननु च यस्ययः स्वभावोऽवगतः सोऽन्योद्देशेनाप्यनुष्ठीयमानो न स्वभावाच्च्यवते करोत्येव तत्कार्यम् यथा विषमौषधोद्देशेनापि पीतंहन्त्येव । अतोदृष्टार्थतयाप्यनुष्ठीयमानानि कर्माणि शास्त्रीयाण्यदृष्टार्थान्यपि भविष्यन्ति । कोभवतोमत्सरोलोकावर्जनहेतुतया न प्रवर्तितव्यमिति येनात्थ-अतआहधर्मजिज्ञासमानानां वेदो धर्मे प्रमाणम् । तेन चैतदुक्तं दृष्टफलकामार्थिनांनादृष्टंभवति । न केवलमदृष्टंनभवति । यावत्प्रतिषिद्धसेवनादधर्मोऽपि भवति ॥ १३ ॥

(२) सर्वज्ञनारायणः । तत्रापि श्रुतेः प्राधान्यमाह अर्थेति । धर्मविरोधिनोरर्थकामयोः प्रबन्धेन प्रवृत्तिःसङ्गस्तद्रहितानामेव धर्मज्ञानंविधेयम् । तदीयस्यैव धर्मज्ञानस्य प्रवृत्तिपर्यन्तत्वात्तेषांच परमंप्रमाणं श्रुतिरेव । अतः श्रुतिरेकवाक्यतयैव स्मृतेरप्यादरणीयतेत्यर्थः ॥ १३ ॥

(३) कुल्लूकः । अर्थकामेष्विति । अर्थकामेष्वसक्तानामर्थकामलिप्साशून्यानांधर्मोपदेशोऽयम् । येऽत्वर्थकामसमीहयालोकप्रतिपत्त्यर्थंधर्ममनुतिष्ठन्ति न तेषांकर्मफलमित्यर्थः । धर्मंच ज्ञातुमिच्छतांप्रकृष्टंप्रमाणंश्रुतिः । प्रकर्षबोधनेन च श्रुतिस्मृतिविरोधे स्मृत्यर्थोनादरणीयइति भावः । अतएव जाबालः श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी । अविरोधे सदा कार्यंस्मार्तंवैदिकवत्सता ॥ भविष्यपुराणेऽप्युक्तम् श्रुत्यासह विरोधे तु बाध्यते विषयंविना । जैमिनिरप्याह विरोधे त्वनपेक्षंस्यादसतिह्यनुमानकम् । श्रुतिविरोधे स्मृतिवाक्यमनपेक्ष्यमप्रमाणमनादरणीयमसति विरोधे मूलवेदानुमानमित्यर्थः ॥ १३ ॥

(४) **राघवानन्दः** । संप्रति अधिकारिणं विशिनष्टि अर्थकामेष्विति । असक्तानां अलोलुपानां तद्वयाणां धर्मे अनाश्वासात् धर्मज्ञानं धर्मानुष्ठानं विधीयते कर्तव्यतया उपदिश्यते । परमं प्रमाणं परं तत्त्वम् ॥ १३ ॥

(५) **नन्दनः** । यथा धर्मस्य श्रुत्यादीनध्यवसायमूलं तथार्थकामेष्वनतिसक्तिरपीत्यभिप्रायेणाह अर्थेति । प्रमाणेषु बलाबलजिज्ञासायामुक्तमुत्तरार्धम् । श्रौतस्मार्तसंनिपाते श्रौतं प्रमाणं बलीय इत्यर्थः ॥ १३ ॥

श्रुतिद्वैधं तु यत्र स्यात्तत्र धर्मावुभौ स्मृतौ॥ उभावपि हि तौ धर्मौ सम्यगुक्तौ मनीषिभिः ॥१४ ॥

(१) **मेधातिथिः** । प्रागुक्तोव्याघातः परिह्रियते । यत्र श्रुत्योर्द्वैधं विरुद्धाभिधानं यं धर्मोऽयमिति काचिच्छ्रुतिराह तमेवाधर्ममित्यन्या तत्र उभावपि तौ धर्मावनुष्ठेयौ विकल्पेन । तुल्यबले हि ते श्रुती । तत्रेयं प्रमाणमियं नेत्यशक्यो विवेकः । अतएकार्थतुल्यबलविरोधे विकल्प इत्युभावपि तौ धर्मावित्युक्तम् । तत्र समुच्चयः प्राप्नोति । एवमुभौ धर्मौ भवतोऽन्यथा एकः स्यात् । नेति ब्रूमः । पर्यायेणापि प्रयोगेनोभयशब्दस्य प्रवृत्तिविरोधः न ह्ययं सापेक्ष्यद्वयविषयएव । न्याय्यश्च विकल्पः । यथाऽग्निहोत्राख्यमेकं कर्म तस्य कालत्रयमुपदिष्टं तत्र कर्म प्रधानं कालो गुणः नचैकस्मिन्प्रयोगे कालत्रयसंभवः नच कालानुरोधेन प्रयोगावृत्तिर्युक्ता नाङ्गानुरोधेन प्रधानमावर्तनीयम् तस्मान्न्याय्योऽयं तुल्यबलविरोधे विकल्प इति न वचनादुभावपि हि तौ धर्मौ । ननु च कोभेदस्तत्र धर्मावित्यस्मादेतस्य न कश्चित् । पूर्वेण स्वमतमुपन्यस्तमुत्तरेणान्यैरपि मनीषिभिरेतदेवोक्तमिति स्वमतमाचार्यान्तरमतसंवादेन द्रढयति ॥ १४ ॥

(२) **सर्वज्ञनारायणः** । श्रुतिद्वैधमिति । द्वैधं विरुद्धार्थद्वयदर्शकत्वं तस्मिन्नव्यवस्था उभौ धर्मौ तत्तच्छास्त्रीयपरतया विकल्पेनवा । सम्यगित्यव्ययम् । समीचीनौ मनीषिभिरुक्तौ यत इत्यर्थः ॥ १४ ॥

(३) **कुल्लूकः** । श्रुतिद्वैधंत्विति । यत्र पुनः श्रुत्योरेव द्वैधं परस्परविरुद्धार्थप्रतिपादनं तत्र द्वावपि धर्मौ मनुना स्मृतौ तुल्यबलतया विकल्पानुष्ठानविधानेन च विरोधाभावः । यस्मान्मन्वादिभ्यः पूर्वतरैरपि विद्वद्भिः सम्यक् समीचीनौ द्वावपि तौ धर्मावुक्तौ समानन्यायतया स्मृत्योरपि विरोधे विकल्प इति प्रकृतोपयोगस्तुल्यबलत्वाविशेषात् । तदाह गौतमः तुल्यबलविरोधे विकल्पः ॥ १४ ॥

(४) **राघवानन्दः** । प्रातः प्रातरनृतं ते वदन्ति पुरोदयाज्जुह्वति येऽग्निहोत्रं तथा अतिथये प्रहुताय बलिं हरन्ति यदुदिते जुहोतीत्यर्थवादोपेतोदिते जुहोतीत्यनुदिते जुहोतीत्यादि श्रुतिमाश्रित्याह श्रुतिद्वैधमिति । द्वाभ्याम् ॥ १४ ॥

(६) **रामचन्द्रः** । यत्र यस्मिन्कार्ये श्रुतिद्वैधं भवेत् तत्र तस्मिन्कार्ये उभौ धर्मौ स्मृतौ उभावपि तौ धर्मौ महर्षिभिः सम्यगुक्तौ ॥ १४ ॥

उदितेऽनुदिते चैव समयाध्युषिते तथा ॥ सर्वथा वर्तते यज्ञ इतीयं वैदिकी श्रुतिः ॥ १५ ॥

[श्रुतिं पश्यन्ति मुनयः स्मरन्ति तु यथा स्मृतिम् ॥ तस्मात्प्रमाणं मुनयः प्रमाणं प्रथितं भुवि ॥ १ ॥

धर्मव्यतिक्रमो दृष्टः श्रेष्ठानां साहसं तथा ॥ तदन्वीक्ष्य प्रयुञ्जानाः सीदन्त्यपरधर्मजाः ॥ २ ॥†]

(१) **मेधातिथिः** । उदाहरणमिदमनन्तरप्रदर्शिते विरोधे । यएते त्रयः कालाइतरेतरनिन्दया होमस्य विहिताः तत्रायमर्थः श्रुतिवाक्यानाम् । सर्वथावर्तते यज्ञः सर्वप्रकारो होमः प्रवर्तते प्रवर्तनीय इत्यर्थः । या उदितहोमनिन्दा सा

---

† (क, ग, ट)

न तत्प्रतिषेधार्था किंतर्ह्यनुदितहोमविध्यर्था । एवमितरत्रापि । तेनायमर्थउक्तोभवति सर्वथा कर्तव्यएतेषांकालानामन्यतमस्मिन्काले तत्रयस्मिन्कुतस्तत्र संपूर्णःशास्त्रार्थोभवतीतीयवैदिकी श्रुतिरेवंपरा अस्मिन्नर्थेऽस्यास्तात्पर्येन पुनर्निन्द्यमानप्रतिषेधे । यज्ञोहोमोग्निहोत्राख्योऽभिमेतोयागहोमयोर्यतोनात्यन्तंभेदः । देवतामुद्दिश्य द्रव्यस्य स्वत्वत्यागोनेदंमम देवतायाइदमिति यागः । एतच्चस्वरूपंहोमेऽप्यस्ति । अयंतु विशेषोयष्टव्यस्य होमे प्रक्षेपोऽधिकआरोपण विशेषोऽप्यादावतोयज्ञशब्देनात्र होमस्याभिधानम् । होमेह्येतेकालाःश्रुतावाम्नातान यागमात्रे । उदितादिशब्दैश्चोदिते होतव्यमित्यादिका श्रुतिरेकदेशेन लक्ष्यते । येयमुदिते होतव्यंनोदितेहोतव्यमिति श्रुतिः सैवंपरेत्येवंयोजना । समयाध्युषितशब्देन समुदायेनैवोषसः कालउच्यते । अन्येतु पदद्वयमेतदित्याहुः । समयाशब्दः समीपवचनः समीपिनमपेक्षते । उदितानुदितयो । सन्निधानात्तत्र समीपंसंध्याकालः । अध्युषितंरात्रेर्विवासकालोव्युष्टायां रात्रावित्यर्थः । कासु चिच्छ्रुतिष्वेवंपठितंकासुचिदेवमिति श्रुतिवाक्यानुकरणमेषा स्मृतिस्तत्रकिंपदद्वयमे तदुतैकमिति ततएवनिर्णयः । अतोविकल्पेनैकंहोमाख्यंकर्मप्रतिकालत्रयेऽपि श्रुतिविधानान्नास्तिविरोधः । सिद्धरूपे हि वस्तुनीतरेतरविरुद्धरूपसमावेशासंभवस्तस्माद्विरोधोन साध्ये साध्यंह्यनेनापि सिध्यत्यनेनापीति एवमवगम्यते । तत्र कुतोविरोधः । एषएवच स्मृतीनांविरुद्धानांविकल्पोन्याय्यः ॥ १५ ॥

(२) **सर्वज्ञनारायणः** । विरोधमुदाहरति उदितइति । समयाध्युषिते उदयसमीपे यज्ञोग्निहोत्रहोमः वैदिकी वेदरूपाश्रुतिःशब्दः एतत्श्रुतिविरोधउक्तं स्मृत्योरप्यन्योन्यविरोधेद्रष्टव्यम् ॥ १५ ॥

(३) **कुल्लूकः** । अत्र दृष्टान्तमाह उदितेऽनुदितेचैवेति । सूर्यनक्षत्रवर्जितःकालःसमयाध्युषितशब्देनउच्यते । उदयात्पूर्वमरुणकिरणवान्प्रविरलतारकोऽनुदितकालः परस्परविरुद्धकालश्रवणेऽपि सर्वथा विकल्पेनाग्निहोत्रहोमःप्रवर्तते । देवतोद्देशेन द्रव्यत्यागगुणयोगाद्यज्ञशब्दोऽत्र गौणः । उदितेहोतव्यमित्यादिका वैदिकी श्रुतिः ॥ १५ ॥

(४) **राघवानन्दः** । समयाध्युषिते सूर्यनक्षत्ररहिते काले अत्र व्यवस्थित विकल्पोऽधिकारी भेदेन सर्वथा त्रिष्वपि पक्षेषु होमस्य । नित्यत्वसिद्धिरित्यर्थः । वर्तते कर्तव्यतया ॥ १५ ॥

(५) **नन्दनः** । अत्रोदाहरणमाह उदितइति । समयाध्युषितेउदितानुदितइत्यर्थः । सूर्यइतिशेषः । अतएव स्मृत्यादिद्वैधेऽपि न्यायोऽवगन्तव्यः ॥ १५ ॥

(६) **रामचन्द्रः** । श्रुतिद्वैधेदृष्टान्तमाह । उदिते जुहुयात्अनुदितेजुहुयात्तथा समयाध्युषितेउदितसमये जुहुयात् यज्ञः सर्वथावर्ततइतीयं वैदिकी श्रुतिः । कात्यायनः रात्र्यास्तु षोडशेभागे ग्रहनक्षत्रभूषिते । कालंचानुदितंज्ञात्वा होमंकुर्याद्विचक्षणः ॥ तथाचप्रातः समये नष्टे नक्षत्रमण्डले । रविर्यावन्नदृश्येतसमयाध्युषितंचतत् ॥ रेखामात्रंच दृश्येत रश्मिभिश्च समन्वितः । उदितंतंविजानीयात्तत्र होमंप्रकल्पयेत् ॥ बौधायनापस्तम्बाश्वलायनप्रभृतिभिरुदितेउदयानन्तरंहोमःकार्यः । मध्यंदिनवाजसनेयिभिरनुदितेउदयात्पूर्वंहोमःकार्यइत्युक्तम् ॥ १५ ॥

निषेकादिश्मशानान्तोमन्त्रैर्यस्योदितोविधिः॥तस्य शास्त्रेऽधिकारोस्मिञ्ज्ञेयोनान्यस्य कस्यचित् ॥ १६ ॥

(१) **मेधातिथिः** । विदुषा ब्राह्मणेनेदमध्येतव्यमिति पठन्ति सचार्थवादः । तत्र तव्यप्रत्ययदर्शनात्कस्यचिद्विधिभ्रान्तिः स्यात्तथा च सति क्षत्रियवैश्ययोरध्ययनंनिवर्ततइत्येतदाशङ्कानिवृत्यर्थोऽयंश्लोकः क्षत्रियवैश्ययोः प्राप्तिंदर्शयति । तथा यथा कामी शूद्रोऽप्यप्रतिषेधादध्येतुंप्रवर्तेत तन्निवृत्यर्थमपीत्येवमिमंश्लोकंपूर्वे व्याचचक्षिरे । शास्त्रशब्दो-

यंमानवग्रन्थवचनः अधिकारोमयैतदनुष्ठेयमित्यवगमः। नच शब्दराशेःसिद्धस्वभावस्यानुष्ठेयत्वावगतिः संभवति। नहि-द्रव्यमनाश्रित्य क्रियाविशेषंसाध्यतयावगम्यते। अतः शास्त्रविषयायांकस्यांचित्क्रियायामधिकारइत्यवगम्यते। तत्र-कश्चस्तयस्तावन्नविषयतया प्रतीयन्ते। श्वसोरभवत्यर्थत्वात्। श्वस्तिसंबन्धे ह्ययमर्थः प्रतीयते शास्त्रस्य यद्भवनंया श्वसत्ता तामनुतिष्ठेदिति। नचान्यदीयायांसत्तायामन्यस्यानुष्ठातृत्वसंभवः। करोत्यर्थेऽपि न संभवति पदानांनित्यत्वाद्वा-क्यानांचान्येन कृतत्वात्। अतः शास्त्रसहचारिण्यध्ययनक्रिया प्रतीयते। अतोऽयमर्थउक्तोभवति। शास्त्राध्ययने तस्या-धिकारः यथैवाध्ययने तथैव तदर्थश्रवणेऽपि। नचादिमत्वान्मानवस्य ग्रन्थस्य कथंतद्विषयोविधिरनादिवेदमूलइति शक्यते वक्तुम्। उच्यते। यानि कानि च शास्त्रप्रतिपादकानि वाक्यानि न तानि शूद्रेणाध्येयानीति शक्यते। सामान्यतो-ऽनुमानंयानि वेदवाक्यानि यानि तदर्थव्याख्यानवाक्यानि व्याख्यातॄणांतत्प्रतिरूपकाणि तान्यपि प्रवाहनित्यतया-नित्यान्येव। अनुष्ठानंतु शास्त्रविषयः तत्र चातुर्वर्णस्याधिकारः। नन्वेवंसत्यनुपात्तकर्तृविशेषेषु सामान्यधर्मेषु शूद्रस्या-धिकारप्रसङ्गः। यथा च न भवति तथा च तत्र तत्र कथयिष्यामः। ननु कथमध्ययनावबोधाधिकारनिषेधे कर्मा-धिकारः नह्यविदितकर्मरूपस्य तदनुष्ठानसंभवः नचाध्ययनमन्तरेण तदर्थावबोधसंभवः नचावेद्योऽधिक्रियते। सत्यम्। परोपदेशादपि यावत्तावत्सिध्यति परिज्ञानंयंब्राह्मणमाश्रितः शूद्रोयोवार्थतः प्रवृत्तः सएवंशिक्षयिष्यतीदंकुरुवे दंकुर्विति। अतोनकर्मानुष्ठानप्रयुक्ते शूद्रस्याध्ययनवेदने स्त्रीवत्परप्रत्ययादप्यनुष्ठानसिद्धेः यथा स्त्रीणांभर्तृविधैव प्रसङ्गादुपकरोति। न कर्मश्रुतयोविद्यांप्रयुञ्जतेतेषामेव स्वप्रत्ययोऽनुष्ठानहेतुर्येषांस्वाध्यायोऽध्येतव्यइति विधिरस्ति पुंसां सच पुंसांत्रैवर्णिका-नांतेषामपि नार्थज्ञानप्रयुक्तेऽध्ययनवेदनेअपितु विधिद्वयप्रयुक्ते आचार्यकरणविधिना स्वाध्यायाध्ययनंविधिना च। निषे-कोगर्भाधानंसआदिर्यस्य संस्कारकलापस्य सनिषेकादिः गर्भाधानंच विवाहादनन्तरंप्रथमोपगमे विष्णुर्योनिंकल्पयत्विति मन्त्रवत्केषांचि द्विहितं परेषामागर्भग्रहणात्प्रत्यृतु। श्मशानमन्तोऽस्येतिश्मशानान्तः। श्मशानशब्देन मृतशरीराणि यत्र-निधीयन्तेतत्स्थानमुच्यते। तच्च साहचर्यात्पितसंस्कारंपराचीमिष्टिंलक्षयति साहिमन्त्रवती न स्थानम्। अनेन च द्वि-जातयोलक्ष्यन्ते। तेषांहिमन्त्रवन्तःसंस्काराःद्विजातीनामितिनोक्तम्। विचित्राश्लोकानांकृतिः स्वायंभुवस्यास्य मनोः। मन्त्रैरुदितउक्तोविधिरितिनायंसंबन्धः। नहिमन्त्राविधिंवदन्तिंकिंतर्हिप्रयोगावस्थस्य विधेयस्य स्मारकानविधायकाः। तस्मादेवंव्याख्येयंमन्त्रैर्युक्तः समन्त्रकोयेषामयंविधिरिति नान्यस्य कस्य चिदित्यनुवादोद्विजातीनांनियतत्वात्। अथवाक-श्चिन्मन्येत द्विजातीनामयंविहितोऽवश्यकर्तव्यः। शूद्राणांत्वशिष्टोप्रतिषिद्धइति तदा शङ्कानिवृत्त्यर्थमिदमुक्तम् ॥ १६ ॥

(२) **सर्वज्ञनारायणः**। निषेकोरेतः। सेकःगर्भाधानम्। श्मशानमन्त्येष्टिः। अधिकारोध्ययनेनान्यस्य शूद्रस्य संकरस्यवा ॥ १६ ॥

(३) **कुल्लूकः**। निषेकादीति। गर्भाधानादिरन्त्येष्टिपर्यन्तोयस्यवर्णस्य मन्त्रैरनुष्ठानकलापउक्तोद्विजातेरित्यर्थः तस्यास्मिन्मानवधर्मशास्त्रे ऽध्ययने श्रवणे ऽधिकारोन त्वन्यस्य कस्य चिच्छूद्रादेः। एतच्छास्त्रानुष्ठानंचयथाधिकारं सर्वैरेवकर्तव्यम्। प्रवचनंत्वस्याध्यापनंव्याख्यानरूपंब्राह्मणकर्तृकमेवेति विदुषा ब्राह्मणेनेत्यत्रव्याख्यातम् ॥ १६ ॥

(४) **राघवानन्दः**। विदुषा ब्राह्मणेनेदमध्येतव्यमित्युक्तेतत्र पतितस्य ब्रह्मबन्धोः प्रकारान्तरेण संपादितवि-द्यस्य नास्त्यधिकारइत्यभ्यासे नद्रढयन्नाह निषेकादिरिति। यस्य मन्त्रैःसाक्षाद्विधिरनुष्ठेयत्वेनोदितःतस्यैवात्राधिकारः। तेन क्षत्रियवैश्ययोः श्रवणाधिकारिता। अत्र अपर्युदस्ततया त्रैवर्णिकोनिषेकादियोग्योविवक्षितःअन्येषांश्मशानान्तत्त्वाद्य-भावात्। निषेकोगर्भाधानम्। श्मशानान्तोदाहकालीनान्त्येष्टिः। अस्मिनूशास्त्रे सर्वेषांहितशासनात् ॥ १६ ॥

(५) नन्दनः । धर्मप्रमाणयोः श्रुतिस्मृत्योरध्ययनाधिकारिणमाहनिषेकेति । मन्त्रैः सहितोविधिः क्रियाकलापः । तस्य त्रैवर्णिकस्य अस्मिन्प्रकृतेशास्त्रे श्रुतिस्मृत्याख्येअधिकारः अध्ययनाधिकारः । अन्यस्यशूद्रस्य ॥ १६ ॥

(६) रामचन्द्रः । यस्य पुंसःमन्त्रैर्निषेकादिर्गर्भाधानादिश्मशानान्तःविधिःतस्य पुंसःअस्मिन्शास्त्रे अधिकारोभवेत् कस्य चिदन्यस्य नाधिकारः ॥ १६ ॥

सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम् ॥ तंदेवनिर्मितंदेशंब्रह्मावर्त्तंप्रचक्षते ॥ १७ ॥

(१) मेधातिथिः । उक्तानि धर्मे प्रमाणानि विरोधे च विकल्पोऽभिहितोऽधिकारिणश्च सामान्येनोक्ताः । इदानींयेषु योग्यतया धर्मोऽनुष्ठेयतामापद्यते तेदेशावर्ण्यन्ते । सरस्वतीनाम नदीअपरा दृषद्वती तयोर्नद्योर्यदन्तरंमध्यंतंदेशंब्रह्मावर्तइत्यनया संज्ञया प्रचक्षते व्यवहरन्तिशिष्टाः । देवग्रहणमवध्यवधिमतोः स्तुत्यर्थंदेवैः सनिर्मितोऽतः सर्वेभ्योदेशेभ्यः पावनतरइति ॥ १७ ॥

(२) सर्वज्ञनारायणः । उक्तंशिष्टाचारं व्यवस्थापयितुं शिष्टस्य निमित्तानिवासदेशविशेषानाह सरस्वतीति । दननद्योर्देवैरपि सेव्ययोर्नद्योः देवनिर्मितं देवैरुत्तमदेशतया विहितम् । ब्रह्मावर्ततेऽनुवर्तते यत्र स ब्रह्मावर्तः ॥ १७ ॥

(३) कुल्लूकः । सरस्वतीति । धर्मस्य स्वरूपंप्रमाणंपरिभाषांचोक्त्वेदानींधर्मानुष्ठानयोग्यदेशानाह । सरस्वतीदृषद्वत्योर्नद्योरुभयोर्मध्यंब्रह्मावर्तंदेशमाहुः । देवनदीदेवनिर्मितशब्दौ नदीदेशप्राशस्त्यार्थौ ॥ १७ ॥

(४) राघवानन्दः । आचारश्चइत्युक्तंतत्र किंदेशीयःसआचारःकिंप्रमाणकःकस्माद्गुरोःशिक्षणीयइत्यपेक्षांपूरयंस्तेषांवसतिनियममाह सरस्वतीति सप्तभिः । देवनिर्मितंदेवैर्निर्मितंदेवोदेवता तदुद्देश्यकयज्ञादि तदर्थंनिर्मितंदेवैरधिष्ठितं वा ब्रह्मावर्तमित्यपूर्वसंज्ञा ॥ १७ ॥

(५) नन्दनः । पूर्वसतामाचारः प्रमाणमित्युक्तंसपुनः कुत्रत्यानामित्यपेक्षायांवक्तुमारभतेसरस्वतीति । अत्रदेवसंबन्धवचनंप्रशंसार्थम् । ब्रह्म धर्मः आवृत्तमागतंमहर्षीणामत्र प्रतिभातमिति ब्रह्मावर्तः ॥ १७ ॥

(६) रामचन्द्रः । पुण्यदेशानाह । सरस्वतीदृषद्वत्योर्यदन्तरंदेवनद्योःगङ्गायमुनयोःअन्तरंदेशंदेवनिर्मितंब्रह्मावर्तसंज्ञंप्रचक्षते ॥ १७ ॥

तस्मिन्देशे यआचारःपारम्पर्यक्रमागतः ॥ वर्णानांसान्तरालानांससदाचारउच्यते ॥ १८ ॥

[विरुद्धाच विगीताच दृष्टार्थादिष्टकारणे ॥ स्मृतिर्नश्रुति मूलास्याद्याचैषासंभवश्रुतिः॥१॥ ऽऽ]

(१) मेधातिथिः । अथास्मिन्देशे यआचारस्तस्य प्रामाण्ये किंविद्वत्ता शिष्टता चोपाधिरङ्गीक्रियतेअथाविदुषामशिष्टानांच देशोपाधिरेव प्रमाणम् । किंचातः यदि नापेक्ष्यते यत्तदुक्तं आचारश्चैव साधूनामिति विशेषणद्वयमनर्थकम् । नत्वसाध्वाचारस्य धर्ममूलतोपपद्यतेवेदसंयोगासंभवात् । अथापेक्ष्यते देशविशेषसंबन्धानुपकारोनहि देशान्तरेऽपिशिष्टसमाचारस्याप्रामाण्यंशक्यते वक्तुम् । उच्यते। प्रायिकमेतदभिधानंप्रायोवृत्त्यास्मिन्देशे शिष्टानांसंभवइत्युक्तंतस्मिन्देशे यआचारः ससदाचारइति । अन्ये तु देशान्तरे मातुलदुहितुः परिणयनाद्देशाचारनिषेधार्थमिदमित्याहुः स्तदयुक्तम् । अविशेषेणैवोक्तदेशकुलजातीनामविरुद्धंप्रकल्पयेत् सच विरुद्ध ऊर्ध्वंसप्तमामितृबन्धुभ्योमातृबन्धुभ्यश्च पञ्चमादित्येतेनास्मिन्नपि देशेऽनुपनीतेन सहभोजनादिराचारोनैव धर्मत्वेनेष्यते । नच स्मृतिविरुद्धस्याचारस्य प्रामाण्यसंभवः । श्रुति-

---

ऽऽ मेधा० ।

विप्रकर्षादाचारात्स्मृतिरनुमातव्या स्मृतेः श्रुतिः स्मृतिस्त्वव्यवहितामेव श्रुतिमनुमापयति । किंचकारणग्रहाच्चैवमदेराचा रस्य रूपवतींमातुलकन्यांकामयमानांराजभयाद्गूढवन्तः कन्यागमनंदण्डोमाभूदिति । अन्येत्वविद्वांसोयेनास्य पितरोयाता- इत्यस्य यथा श्रुतमर्थंगृहीत्वा धर्मोयमितिप्रतिपन्नाः । अपिच । एतास्तिस्रस्तु भार्यार्थे नोपयच्छेतेति प्रायश्चित्तंश्रुत- मपि भ्रान्तिहेतुराभ्यस्तिस्तृभ्योऽन्यानप्रतिषिद्धाइति । यथाचास्य नायमर्थस्तथा वक्ष्यामः । नच दृष्टकारणयोः स्मृत्या- चारयोः प्रामाण्यम् । उक्तंचभट्टपादैः विरुद्धाचविगीताच दृष्टार्थादिष्टकारणे । स्मृतिर्नश्रुतिमूलास्याद्याचैषासंभवश्रुतिः ॥ त- स्मादेतान्द्विजातयोदेशान्संश्रयेरन्नित्येतद्विधिशेषादेशप्रशंसार्थवादाएते परंपरैव पारंपर्यमन्यस्मादन्यमुपसंक्रामति । तस्माद- न्यंततोऽप्यन्यमित्येवंरूपः प्रवाहः परंपराक्रमः तदविच्छेदस्ततआगतः संप्राप्तः संकीर्णयोनयोंऽतरालाः तत्सहितानां वर्णानाम् ॥ १८ ॥

(२) **सर्वज्ञनारायणः** । आचार आचर्यमाणोधर्मः पारंपर्यंपित्रादिपरंपराक्रमेणागतोन त्वधुनातनेन केनचि- दनुष्ठितः । अन्तरालाः संकरजाताः । सदाचारः सद्भिराचीर्णोधर्मइत्युच्यते ॥ १८ ॥

(३) **कुल्लूकः** । तस्मिन्देशइति । तस्मिन्देशे प्रायेणशिष्टानांसभवात्तेषांब्राह्मणादिवर्णानांसंकीर्णजातिपर्यन्तानांयआ- चारःपारम्पर्यक्रमागतोनत्विदानींतनःससदाचारोऽभिधीयते ॥ १८ ॥

(४) **राघवानन्दः** । तस्मिन्पारंपर्यक्रमप्रमाणआचारःसान्तरालानांअन्तरालःसंकरजातिः तत्सहितानांआन्तरो- ऽव्यवहितः किंचिन्न्यूनोवा ॥१८ ॥

(५) **नन्दनः** । सान्तरालानंवर्णसंकरजसहितानांससदाचारः । तस्यधर्मंप्रतिप्रामाण्यमित्यर्थः ॥ १८ ॥

(६) **रामचन्द्रः** । तस्मिन्ब्रह्मावर्तैकदेशे पारंपर्यक्रमागतःयःआचारःसआचारःवर्णानांब्राह्मणादीनांतथाचान्तरा- लानांवर्णद्वयजातानांअनुलोमप्रतिलोमजातीनांसःसदाचारःईषदुच्यते ॥ १८ ॥

कुरुक्षेत्रंच मत्स्याश्च पञ्चालाः शूरसेनकाः ॥ एषब्रह्मर्षिदेशोवै ब्रह्मावर्तादनन्तरः ॥ ॥ १९ ॥

(१) **मेधातिथिः** । देशनामधेयान्येतानि कुरुक्षेत्रेसमन्ततपञ्चकंप्रसिद्धंकुरवस्तत्रक्षयंगताःकुरुत वा सुकृतंक्षिप्रमत्र त्राणंभवतीति व्युत्पत्तिः मत्स्यादयः शब्दाबहुवचनान्ताएव देशवचनाः । ब्रह्मर्षिदेशइति समुदायसंज्ञा । देवनिर्मितोदेशो- ब्रह्मावर्तः देवेभ्यः किंचिन्न्यूनाब्रह्मर्षयइत्यतोऽयंदेशोब्रह्मर्षिसंबन्धाद्ब्रह्मावर्तान्न्यूनः । तथाचाहुब्रह्मावर्तादन्तरईषद्भिन्नः तत्रेष- दर्थोयथानुष्णांयवागूंपिबेदाममयावीतीषदुष्णामुपदिशन्ति । अनन्तरशब्दोवभेदवचनः । नारीपुरुषतोयानमन्तरंमहदन्तरमिति- यथा ॥ १९ ॥

(२) **सर्वज्ञनारायणः** । सूरसेनकाःसूरसेनाख्यनृपतिना निवासत्वेननिर्मिता नामसुरोपलक्षितदेशाः अनन्त- रोनिर्विशेषः ॥ १९ ॥

(३) **कुल्लूकः** । कुरुक्षेत्रमिति । मत्स्यादिशब्दाबहुवचनान्ताएव देशविशेषवाचकाः पञ्चालाःकान्यकुब्जदेशाः शूरसेनकामथुरादेशाः । एषब्रह्मर्षिदेशोब्रह्मावर्तात्किंचिदूनः ॥ १९ ॥

(४) **राघवानन्दः** । ब्रह्मर्षिदेशइत्यपि समाख्या ॥ १९ ॥

(५) **नन्दनः** । अत्रापि ब्रह्मर्षिसंबन्धवचनंप्रशंसार्थम् । अनन्तरःकिंचिन्न्यूनः ॥ १९ ॥

---

(१९) शूरसेनका=रसशूनजाः (क, ख, च,)

(६) रामचन्द्रः । ब्रह्मवर्तादनन्तरःइषन्न्यूनइत्यर्थः । कुरुक्षेत्रेति । एषःब्रह्मर्षिदेशःकुरुक्षेत्रादिदेशाःमहर्षिणांवासयोग्याभवन्तीत्यर्थः ॥ १९ ॥

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ॥ स्वंस्वंचरित्रंशिक्षेरन्पृथिव्यांसर्वमानवाः ॥ २० ॥

(१) मेधातिथिः । एतेषु देशेषु कुरुक्षेत्रादिषु प्रसूतस्याग्रजन्मनोब्राह्मणस्य सकाशात्स्वंस्वंचरित्रमाचारंशिक्षेरञ्जिज्ञासेरन् । तस्मिन्देशइत्यनेनैतद्व्याख्यातम् ॥ २० ॥

(२) सर्वज्ञनारायणः । एतत्पदेन ब्रह्मावर्तस्यापि ग्रहणं चरित्रं चरणीयम् ॥ २० ॥

(३) कुल्लूकः । एतद्देशइति । कुरुक्षेत्रादिदेशजातस्य ब्राह्मणस्य सकाशात्सर्वमनुष्याआत्मीयमात्मीयमाचारंशिक्षेरन् ॥ २० ॥

(४) राघवानन्दः । अग्रजन्मनःब्राह्मणात्चरित्रंचरणमनुष्ठानंधर्मस्य येन तच्चरित्रंधर्मोपदेशमिति यावत् आचारं वा ॥ २० ॥

(५) नन्दनः । अग्रजन्मनः ब्राह्मणस्य शिक्षन्तेअवगच्छन्ति ॥ २० ॥

(६) रामचन्द्रः । एतद्देशप्रसूतस्य महर्षिदेशप्रसूतस्य अग्रजन्मनःसकाशात्पृथिव्यांसर्वमानवाःस्वंस्वंचरित्रमाचारंशिक्षेरन्शिक्षयेयुः ॥ २० ॥

हिमवद्विन्ध्ययोर्मध्यंयत्प्राग्विनशनादपि ॥ प्रत्यगेव प्रयागाच्च मध्यदेशःप्रकीर्तितः ॥ २१ ॥

(१) मेधातिथिः । उत्तरस्यांदिशि हिमवान्पर्वतोदक्षिणस्यां विन्ध्यः विनशनंसरस्वत्याअन्तर्धानदेशः । प्रयागोगङ्गायमुनयोःसंगमः एतान्देशानवधीन्कृत्वा मध्यमध्यदेशनामानंदेशंविद्यात् । नात्युत्कृष्टोनातिनिकृष्टइत्यतोयमध्यदेशोनतु पृथिवीमध्यभवत्वात् ॥ २१ ॥

(२) सर्वज्ञनारायणः । धर्मप्रसंगेन ततोपकृष्टान्यपि देशान्तराणि निवासार्थंदर्शयति । हिमवदिति । विनशनं यत्र सरस्वती विनष्टा मध्यः पृथिव्याजघनस्थानीयोदेशः ॥ २१ ॥

(३) कुल्लूकः । हिमवदिति उत्तरदक्षिणदिगवस्थितौ हिमवद्विन्ध्यौपर्वतौ तयोर्यन्मध्यंविनशनात्सरस्वत्यन्तर्धानदेशाद्यत्पूर्वंप्रयागाच्च यत्पश्चिमंसमध्यदेशनामा देशःकथितः ॥ २१ ॥

(४) राघवानन्दः । हिमवान्उत्तरस्यःपर्वतोदाक्षिणात्योविन्ध्यःविनशनात्कुरुक्षेत्रात्प्रयागात्प्रत्यगेव पश्चिमंइतिचतुःसीमावच्छिन्नंयदधिकृत्य श्रुतं यागनियोगयुक्तानांवाराणस्यांमृतस्य च । सागतिर्घटिकार्धेन मध्यदेशनिवासिनामिति ॥ २१ ॥

(६) रामचन्द्रः । विनशनात्प्राक्कुरुक्षेत्रात्प्राक्प्रयागात्प्रत्यक्इयंभूमिःमध्यदेशः मध्यदेशसंज्ञःप्रकीर्तितः ॥ २१ ॥

आसमुद्रात्तु वै पूर्वादासमुद्रात्तु पश्चिमात् ॥ तयोरेवान्तरंगिर्योरार्यावर्तंविदुर्बुधाः ॥ २२ ॥

(१) मेधातिथिः । आपूर्वसमुद्रादापश्चिमसमुद्राद्योऽन्तरालवर्ती देशस्तथा तयोरेव पूर्वश्लोकोपदिष्टयोर्गिर्योः पर्वतयोर्हिमवद्विन्ध्ययोर्यदन्तरंमध्यंसआर्यावर्तोदेशोबुधैः शिष्टैरुच्यते । आर्यावर्तन्तेतत्र पुनःपुनरुद्भवन्त्याक्रम्याक्रम्यापि न चिरंतत्र म्लेच्छाः स्थातारोभवन्ति । आङत्रमर्यादायां नाभिविधौ तेन समुद्रद्वीपानि नार्यावर्तः एते चतसृषु दिक्षु

देशावधयउपात्ताः । प्राच्यां पूर्वसमुद्रःप्रतीच्यांपश्चिमः । उदग्दक्षिणयोर्हिमवद्विन्ध्यौ एतौ ह्यवधित्वेनोपात्तौ । न तयो-रार्यावर्तत्वमस्त्यतस्तत्र निवासाभावे प्रामद्दंमाह ॥ २२ ॥

(२) सर्वज्ञनारायणः । तयोर्हिमवद्विन्ध्ययोःपर्वतयोर्मध्यं आरात् पापेभ्योगता आर्यास्तस्मिन्नावर्तन्ते भ्रमन्ति नतु मर्यादयावसन्तीत्यार्यावर्तः ॥ २२ ॥

(३) कुल्लूकः । आसमुद्रात्त्विति । आपूर्वसमुद्रादापश्चिमसमुद्राद्धिमवद्विन्ध्ययोश्च यन्मध्यंतमार्यावर्तदेशंपण्डिता जानन्ति । मर्यादायामयमाङ्नाभिविधौ तेन समुद्रमध्यद्वीपानांनार्यावर्तता । आर्याअत्रावर्तन्ते पुनःपुनरुद्भवन्तीत्या-र्यावर्तः ॥ २२ ॥

(४) राघवानन्दः । एवंपूर्वपश्चिमसमुद्राभ्यन्तरयोर्विन्ध्यहिमवतोर्मध्यदेशः सआर्यावर्तइत्यर्थः । तयोर्हिमवद्वि-न्ध्ययोःगिर्योःपर्वतयोः । आङत्रमर्यादायाम् । तेन समुद्रद्वीपानांपर्वतयोश्चनार्यावर्तत्वम् । उक्तार्यावर्तव्याप्योमध्यदेशस्त-द्व्याप्योब्रह्मर्षिदेशःतद्व्याप्योब्रह्मावर्तइत्यर्थः ॥ २२ ॥

(५) नन्दनः । आर्याअस्मिन्वर्तन्तइत्यार्यावर्तः । हिमवद्विन्ध्ययोरित्यादिश्लोकद्वयेऽप्येतद्देशमसृतस्येति श्लोक-स्यानुषङ्गः । एतेषुब्रह्मावर्तादिष्वाचारविप्रतिषेधेपूर्वपूर्वदेशाचारोबलीयानित्यवगन्तव्यम् ॥ २२ ॥

(६) रामचन्द्रः । पूर्वात्आसमुद्रात्पश्चिमात्आसमुद्रात्तयोःगिर्योःहिमवद्विन्ध्ययोः अनन्तरंआर्यावर्तंप्रचक्षतेकथ-यन्ति ॥ २२ ॥

कृष्णसारस्तु चरति मृगोयत्र स्वभावतः ॥ सज्ञेयोयज्ञियोदेशोम्लेच्छदेशस्त्वतःपरः ॥ २३ ॥

(१) मेधातिथिः । कृष्णश्वेतः कृष्णपीतोवा कृष्णसारङ्गोमृगोयत्र चरति निवसति । संभवउत्पत्तिर्यत्र देशे तस्य स्वभावतोन पुनर्देशान्तरात्प्राशस्त्योपायनादिना निमित्तेनानीतस्य कियन्तमपि कालंनिवासःसदेशोयज्ञियोयागार्हो-बोद्धव्यः । अतः कृष्णमृगचरणात्परोन्योम्लेच्छदेशः म्लेच्छाः प्रसिद्धाः । चातुर्वर्ण्यजात्यपेताः प्रतिलोमजातीयानधि-कृतामेदान्ध्रशबरपुलिन्दादयः । नचानेन यागाधिकरणताऽस्यदेशस्य विधीयते । समेयजेतेतिवच्चरतीति वर्तमाननिर्देशात् । नहियत्रैव चरितुंप्रवृत्तस्तदैव तत्र यागःशक्यः कर्तुं यागस्य हिदेशोऽधिकरणंतत्साधनकर्त्रादिकारकाश्रितद्रव्यादिधारण द्वारेणच द्वयोर्मूर्तयोरेककाले एकदेशे स्थानसंभवः । नच कालान्तरलक्षणा न्याय्या विधौ लक्षणायाअन्याय्यत्वाच्चभो-क्तंशूर्पाधिकरणे एतद्धिक्रियतइत्युच्यतइति ननु च नाभिव्यापकएवाधेयोयेन कृत्स्ना धाराभिव्याप्त्यैवाधिकरणार्थनि-वृत्तिः स्यात्तिलेषु तैलमितिवत् । किंतर्हि एकदेशसंबन्धिनाप्याधेयेन भवति कृत्स्नस्याधारभावः । प्रासादआस्ते रथम-धितिष्ठतीति । एवमिह ग्रामनगरसमुदायस्य नदीपर्वतान्ताद्यवधिकस्य देशस्य प्रकृतत्वादेकदेशोऽपि पर्वतारण्यादौ च-रन्सर्वमाधारी करोति । तेनायमदोषोमूर्तयोर्नैकदेशः संभवति । उच्यते । नैवात्र यष्टव्यमिति विधिरस्ति जानातेः प-रोविधायकश्रुतो न यजेः यागस्य तत्रार्हता श्रुता यागार्होऽसौ देशइति । सा च यागार्हता सत्यपि विधौ घटते । एते-षुदेशेषु यागाङ्गानि दर्भपलाशखदिरादीनि प्रायेण च भवन्ति । अधिकारिणश्च त्रैवर्णिकावैद्याश्च तेष्वेव देशेषु दृश्यन्ते । अतएतदवलम्बनोयागार्हतानुवादः । कृत्योपि ज्ञेयइत्यध्यारोपितविध्यर्थोजर्तिलयवाग्वाजुहुयादिति वद्विधिवन्निगदार्थ-वादएव । यच्चोक्तंम्लेच्छदेशस्त्वतःपरइत्येषोपिप्रायिकोऽनुवादएव । प्रायेण ह्येषु देशेषु म्लेच्छाभवन्ति । नत्वनेन देशसंब-न्धेन म्लेच्छावक्ष्यन्ते । स्वतस्तेषांप्रसिद्धेर्ब्राह्मणादि जातिवत् । अथार्थद्वारेणायंशब्दः प्रवृत्तोम्लेच्छानांदेशइति तत्र यदि कथंचिद्ब्रह्मावर्तादि देशमपि म्लेच्छाआक्रमेयुः तत्रैवावस्थानंकुर्युर्भवेदेवासौम्लेच्छदेशः । तथा यदि कश्चित्क्षत्रियादि आ

तीयोराजा साध्वाचरणोम्लेच्छान्पराजयेतचातुर्वर्ण्यंवासयेत् म्लेच्छांश्चार्यावर्तइव चाण्डालान्व्यवस्थापयेत्सोपि स्याद्यज्ञियः। यतोन भूमिः स्वतोदुष्टा संसर्गाद्धिसादुष्यत्यमेध्योपहतेव । अतउक्तदेशव्यतिरेकेणापि सतिसामर्थ्ये त्रैवर्णिकेनाकृष्णमृगचरणेऽपि देशे यष्टव्यमेवतस्मादनुवादोयम् । सज्ञेयोयज्ञियोदेशांम्लेच्छदेशस्त्वतःपरइत्युत्तरविधिशेषः ॥ २३ ॥

(२) सर्वज्ञनारायणः। स्वभावतोन त्वन्येननीतः सआर्यावर्तात् बहिर्भूतोपि याज्ञिकोयज्ञार्हः अतः परोयो म्लेच्छानायज्ञानुष्ठानानर्हाणामेव निवासदेशः एतेनाचारशिक्षानिवास यज्ञानुष्ठानोचितादेशाःक्रमादुक्ताः ॥ २३ ॥

(३) कुल्लूकः । कृष्णसारस्त्विति । कृष्णसारोमृगोयत्र स्वभावतोवसति न तु बलादानीतः सयज्ञार्होदेशोज्ञातव्यः। अन्योम्लेच्छदेशोन यज्ञार्हइत्यर्थः ॥ २३ ॥

(४) राघवानन्दः । यथा यज्ञस्य दर्शादिकालोङ्गंतथा कृष्णसारविशिष्टदेशोपीत्याह कृष्णइति । स्वभावतःबलात्कारंविना ॥ २३ ॥

(५) नन्दनः। अथ सर्वदेशेषु यज्ञार्हदेशमाह कृष्णेति। स्वभावतः स्वैरम्। अतःपरएभ्योब्रह्मावर्तादिभ्योऽन्योम्लेच्छदेशः। म्लेच्छाहियज्ञानधिकृताः ॥ २३ ॥

(६) रामचन्द्रः। कृष्णसारःमृगःयत्रदेशेस्वभावतःस्वच्छन्दतःचरति विचरति। सदेशःयज्ञियःयष्टुंयोग्यः यज्ञार्होज्ञेयःजानीयात्। ततःपरःअन्यदेशःम्लेच्छदेशउच्यते ॥ २३ ॥

एतान्द्विजातयोदेशान्संश्रयेरन्प्रयत्नतः ॥ शूद्रस्तु यस्मिन्कस्मिन्वा निवसेद्वृत्तिकर्शितः ॥ २४ ॥

(१) मेधातिथिः। यदर्थंदेशसंज्ञाभेदकथंतमिदानींविधिमाह। एतान्ब्रह्मावर्तादीन्देशान्द्विजातयोदेशान्तरेऽपि जाताआश्रयेरञ्जन्मदेशंत्यक्त्वा ब्रह्मावर्तादिदेशसंश्रयणंप्रयत्नेन कर्तव्यम्। अत्र केचिदाहुरदृष्टार्थएवायमेतद्देशसंश्रयणविधिः सत्यपिदेशान्तरेप्यधिकारसंभवे एतेषु देशेषु निवासः कर्तव्यः। तत्र कल्पाधिकारत्वे यदि वा गङ्गादितीर्थस्नानवदेतद्देशनिवासविधिः पावनत्वेन कल्प्यते। यथैव काश्चिदापः पवित्रतराएवंभूमिभागाअपि केचिदेव पवित्राः। यथोक्तंपुराणेयदि वा संश्रयणादेव स्वतन्त्रात्स्वर्गोविश्वजिन्न्यायेनैतौ द्वावपि पक्षावप्राप्तौ यद्यप्राप्तः संश्रयोविधीयते कल्प्येताप्यधिकारः। तत्रचिन्त्यते। कतरःपक्षोयुक्तइति। सत्त्वनित्यकाम्यानामुक्तस्तथानित्योदेशएवानुष्ठानसंभवादधिकृतानांप्राप्तएव। नह्येतद्देशव्यतिरेकेण कृत्स्नधर्मानुष्ठानसम्भवः। तथाहि हिमवति तावत्काश्मीरादौ शीतेनार्दितान बहिः संध्योपासनेऽधिक्रियन्ते। नच यथा विधिस्वाध्यायसंभवः। प्राग्वोदग्वा ग्रामादुपनिष्क्रम्येति। नहि हेमन्तशिशिरयोरहरहर्नदीस्नानादि संभवः। इदमेव च द्विजातयइति वचनंलिङ्गंनकश्चिदेव देशोसति म्लेच्छसंबन्धेस्वतएव म्लेच्छदेशः। अन्यथा तद्देशसंबन्धान्म्लेच्छत्वे कथंद्विजातित्वम्। अथोच्यते न गमनमात्रान्म्लेच्छताऽपितु निवासात्सचानेन प्रतिषिध्यते। तच्च न। संश्रयोऽत्र श्रुयतेसच देशान्तरे भवतस्तत्त्यागेनान्यदेशसंबन्धोन संश्रितस्यैव संश्रयणम्। अन्यथा एवमेवावक्ष्यदेतान्देशांस्त्यक्त्वा नान्यत्र निवसेत्। अथसिद्धेसंश्रयणे तद्वचनमन्यनिवृत्त्यर्थमिति परिसंख्यातथास्यात्तस्याश्च त्रयोदोषाः। अर्थहानिर्लक्ष्यते। एतान्देशानजह्यादिति नश्रुतार्थसंभवे लक्षणायुक्ता। अतएव न भूतपूर्वगतिरतस्माल्लिङ्गमिदंन देशसंबन्धेन पुरुषाम्लेच्छाः किंतर्हि पुरुषसंबन्धेन म्लेच्छदेशता। शूद्रस्य द्विजाति शुश्रूषायाविहितत्वात्तद्देशनिवासे सर्वदाप्राप्ते तत्राजीवतोदेशान्तरनिवासोऽभ्यनुज्ञायते। यदा बहुकुटुम्बतया शुश्रूषा शक्त्या वा द्विजातीयमाश्रितः। सएनंबिभृयात्तदादेशान्तरेसंभवति धनार्जने निवसेत्तत्रापि न म्लेच्छभूयिष्ठे किंतर्हयज्ञिये म्लेच्छावृते यानासनाशनादि क्रियानिमित्तस्य संसर्गस्यापरिहार्यत्वात्तद्भावापत्तिप्रसङ्गात्। वृत्तिकर्शितोवृत्त्यभावपीडितः वृत्तिरात्मकुटुम्बस्थितिसमर्थंधनम्। तदभावे

यत्कर्शनंतत्संबन्धितयोच्यते । यथावर्षकृते सुभिक्षसुभिक्षे वर्षाभावकृतंदुर्भिक्षंवर्षकृतत्वेनव्यपदिश्यते ॥ २४ ॥

(२) **सर्वज्ञनारायणः** । सर्वे चैते निवासयोग्याइत्याह । एतानिति । म्लेच्छदेशादन्यान् प्रयत्नतोमहताऽध्यायासेन यस्मिन्कस्मिन्म्लेच्छदेशेपि वृत्तिकर्शितानतु स्वस्थः सोपि जीवनसंभवे सद्देशेष्वेव निवसेत् द्विजातिषु वृत्तिकर्शितोन म्लेच्छदेशे संवसेदित्यर्थः ॥ २४ ॥

(३) **कुल्लूकः** । एतानिति । अन्यदेशोद्भवाअपि द्विजातयोयज्ञार्थत्वाददृष्टार्थत्वाच्चैतान्देशान्प्रयत्नादाश्रयेरन् । शूद्रस्तु वृत्तिपीडितोवृत्त्यर्थमन्यदेशमप्याश्रयेत् ॥ २४ ॥

(४) **राघवानन्दः** । आश्रयेरन्नित्यनेनान्यत्र वसतिरयोग्येतिभावः । शूद्रस्य वसतेर्नैनियमइत्याह शूद्रस्त्विति । वृत्तिकर्शितःवृत्त्यर्थः ॥ २४ ॥

(५) **नन्दनः** । एतान्ब्रह्मावर्तादीन्कृष्णसारस्वैरसंचरितदेशपर्यन्तान्प्रयत्नतआपद्यपि संश्रयेरन्नधिवसेयुः । एतेषु च पूर्वपूर्वदेशः । प्रशस्तइत्यवगन्तव्यम् ॥ २४ ॥

(६) **रामचन्द्रः** । वृत्तिकर्शितःशूद्रःयस्मिन्कस्मिन्देशे निवसेत्द्विजाःएतान्संश्रयेयुः ॥ २४ ॥

एषा धर्मस्य वोयोनिःसमासेन प्रकीर्तिता ॥ संभवश्चास्य सर्वस्य वर्णधर्मान्निबोधत ॥ २५ ॥

(१) **मेधातिथिः** । यस्मिंस्तस्मिन्नित्यनियममाह अतिक्रान्तस्य सर्वस्य ग्रन्थार्थस्य पिण्डार्थकथनमविस्मरणार्थम् । योनिः कारणम् । समासेन संक्षेपेण संभवश्चेति प्रथमाध्यायार्थानुमर्शः । अस्य सर्वस्येति जगन्निर्माणंबुद्ध्या प्रत्यक्षीकृत्य निर्दिशति । वर्णानुष्ठेयाधर्मावर्णधर्मास्तान्निबोधत विस्तरेणेति शेषः । इह पञ्चप्रकारोधर्मइति विवरणकाराः प्रपञ्चयन्ति । वर्णधर्मआश्रमधर्मोवर्णाश्रमधर्मोनैमित्तिकोगुणधर्मश्चेति । तत्र योजातिमात्रमपेक्ष्य प्रवृत्तोन वयोविभागेनाश्रमादिकमाश्रयति सवर्णधर्मोयथा ब्राह्मणोनहन्तव्यः । ब्राह्मणेन सुरानपेयेतिजातिमात्रस्यान्त्यादुच्छ्वासादेषधर्मः । आश्रमधर्मोयत्र जातिर्नापेक्ष्यते केवला तदाश्रमप्रतिपत्तिराश्रीयते । यथा ब्रह्मचारिणोग्नीन्धनभिक्षाचरणे वर्णाश्रमधर्मउभयापेक्षः यथा मौर्वीज्याक्षत्रियस्येत्यादिना श्रमान्तरे । नच जात्यन्तरस्य धारणमस्याउदाहरणम् । प्रथमोपादानन्तूपनयनधर्मोनाश्रमधर्मः । उपनयनंवाश्रमार्थंनाश्रमधर्मः । नैमित्तिकोद्रव्यशुद्ध्यादिः । गुणमाश्रितोगुणधर्मः षड्भिःपरिहार्यश्चेत्यादि बाहुश्रुत्येन गुणेनैतेधर्मा .एवमभिषिक्तस्य क्षत्रियस्य येधर्मास्तदेतद्वर्णग्रहणेन सर्वंगृहीतमितिदर्शितम् । अवान्तरभेदस्तुनेत्येवावतिष्ठते । पुरुषत्वमात्राश्रिताअवर्णधर्माअपि सन्तितेऽपि भेदेन वाच्याः स्युः । एवमन्योऽपि भेदोप्यूह्यः । वर्णग्रहणंचात्र प्रदर्शनार्थंनान्तरप्रभवव्युदासार्थंपूर्वप्रतिज्ञातत्वात्तदनुवादिनी ह्येषा प्रतिज्ञा ॥ २५ ॥

(२) **सर्वज्ञनारायणः** धर्मस्याचर्यमाणस्य धर्मसाधनस्य कर्मणोवा योनिरुत्पत्तिस्थानं अस्य सर्वस्य प्राणिजातस्य संभवउत्पत्तिः वर्णधर्मास्तत्तद्वर्णनियतान् धर्मान् उपलक्षणंचैतत अन्तरप्रभवधर्ममाश्रमधर्मांश्चेत्यपि ॥ २५ ॥

(३) **कुल्लूकः** । एषा धर्मस्येति । एषा युष्माकंधर्मस्य योनिः संक्षेपेणोक्ता । योनिर्ज्ञप्तिकारणं वेदोऽखिलोधर्ममूलमित्यादिनोक्तमित्यर्थः । गोविन्दराजस्त्विहधर्मशब्दोऽपूर्वाख्यात्मकधर्मेवर्ततइति विद्वद्भिः सेवितइत्यत्र तत्कारणेऽष्टकादौ वापूर्वाख्यस्य धर्मस्य योनिरितिव्याख्यातवान् । संभवश्चोत्पत्तिर्जगतइत्युक्ता । इदानींवर्णधर्माञ्छृणुत वर्णधर्म-

---

(२५) सर्वस्य=धर्मस्य (थ)

शब्दश्च वर्णधर्माश्रमधर्मवर्णाश्रमधर्मगुणधर्मनैमित्तिकधर्माणामुपलक्षकः । ते च भविष्यपुराणोक्ताः । वर्णधर्मः स्मृतस्त्वेकआश्रमाणामतःपरम् । वर्णाश्रमस्तृतीयस्तु गौणोनैमित्तिकस्तथा । वर्णत्वमेकमाश्रित्य योधर्मः संप्रवर्तते । वर्णधर्मः सउक्तस्तु यथोपनयनंनृप । यस्त्वाश्रमंसमाश्रित्यअधिकारःप्रवर्तते । सखल्वाश्रमधर्मस्तु भिक्षादण्डादिकोयथा । वर्णत्वमाश्रमत्वंच योऽधिकृत्य प्रवर्तते । सवर्णाश्रमधर्मस्तु मौञ्जीया मेखला यथा । योगुणेन प्रवर्तेत गुणधर्मः सउच्यते । यथामूर्धाभिषिक्तस्यप्रजानांपरिपालनम् । निमित्तमेकमाश्रित्य योधर्मः संप्रवर्तते । नैमित्तिकः सविज्ञेयः प्रायश्चित्तविधिर्यथा ॥ २५ ॥

(४) **राघवानन्दः** । वक्ष्यमाणंवक्तुंवृत्तंनिगमयति एषेति । योनिःकारणम् । श्रुतिस्मृतिसदाचारब्राह्मणोपदेशैर्विना धर्मोन जायतइति भावः । संभवः प्रथमाध्यायोक्तःसर्गः । वर्णधर्मानिति तेन भविष्यपुराणोक्तानांवर्णमाश्रित्ययोधर्मोवर्णधर्मःसउच्यते । यथा विप्रेण हन्तव्यःसुरापेया न च द्विजैः । यस्त्वाश्रमंसमाश्रित्यअधिकारःप्रवर्तते ॥ सखल्वाश्रमधर्मस्तुभिक्षादण्डादिकोयथा । वर्णत्वमाश्रमत्वंच योधिकृत्य प्रवर्तते ॥ सवर्णाश्रमधर्मस्तुमौञ्जीयंमेखला यथा ॥ योगुणेन समुद्भूतोगुणधर्मःस उच्यते ॥ यथामूर्धाभिषिक्तस्य प्रजानांपरिपालनम् । निमित्तमेकमाश्रित्य योधर्मः संप्रवर्तते ॥ नैमित्तिकः सविज्ञेयः प्रायश्चित्तं विधीयते । इत्यादिवर्णाश्रमगुणनैमित्तिकधर्माणांपञ्चानांसंग्रहः ॥ २५ ॥

(५) **नन्दनः** । योनिः कारणंपरिज्ञानोपायइति यावत् । संभवश्चास्यसर्वस्येति प्रथमाधार्थानुभाषणम् ॥ २५ ॥

(६) **रामचन्द्रः** । युष्माकंएषा धर्मस्य योनिःउत्पत्तिः ज्ञप्तिकारणंप्रकीर्तिता तथा अस्य सर्वस्य विश्वस्य सम्भवः उक्तः ॥ २५ ॥

वैदिकैःकर्मभिःपुण्यैर्निषेकादिर्द्विजन्मनाम् ॥ कार्यःशरीरसंस्कारःपावनःप्रेत्य चेह च ॥ २६ ॥

(१) **मेधातिथिः** । मन्त्रप्रयोगावैदिककर्माणि । वेदमन्त्राइहाभिप्रेतास्तेषांयान्युच्चारणानि तानि तत्रभवान्यतोऽध्यात्मादित्वाट्ठक् वेदमूलत्वाद्वोपचरितोवैदिकशब्दः । कर्मशब्देन च इतिकर्तव्यतारूपंकर्म गृह्यते । ततश्च कर्मभिर्निषेकादिः संस्कारःकार्यइति साध्यसाधनभेदोपपत्तिः । प्रधानंनिषेकोमन्त्रोच्चारणमितिकर्तव्यतानिषेकोयोनौ शुक्रनिक्षेपः सआदिर्यस्य संस्कारकलापस्य वक्ष्यमाणस्योपनयनपर्यन्तस्यैकवचनंशरीरसंस्कारइति समुदायापेक्षम् संस्कारशब्देन च सगुणशरीरनिर्वर्तकमुच्यते । तत्र निषेकाद्यानि विशेषजनकान्येतदेवाह पावनइति पावयति । अशुद्धतामपकर्षति पावनः । प्रेत्य चेह चेति। संस्कृतस्य सर्वत्रदृष्टादृष्टफलेषु कर्मसुकारीरीज्योतिष्टोमादिष्वधिकारादुभयलोकोपकारकत्वमाह । पुण्यैःशुभैर्मंगलैरितियावत् । सौभाग्यमावहन्तिदौर्भाग्यंचापनुदन्तीति पुण्यपावनशब्दयोरर्थभेदः द्विजन्मनामिति शूद्रपर्युदासार्थम् । संस्कार्यनिर्देशश्चायंलक्षणया च त्रैवर्णिकाः प्रतीयन्ते । नहि तदानींद्विजन्मानोभवन्ति ॥ २६ ॥

(२) **सर्वज्ञनारायणः** । वेदोक्तैःक्रियाविशेषैः पुण्यैः पुण्यसाधनैर्गर्भाधानादिभिः शरीरसंस्कारः शरीरगतातिशयजननंकार्यं इहैहिकफलेषु कर्मसु कर्तव्येषु पावनोनधिकारहेतुःपापनाशकः एवंप्रेत्येत्यत्रापि तत्र निषेकः पित्रैव कार्यः ततोन्यानि कर्माण्यन्येनापि संस्कारश्रुतेर्नित्यत्वस्थितेरन्येनापि करणसंभवाच्च ॥ २६ ॥

(३) **कुल्लूकः** । वैदिकैरिति । वेदमूलत्वाद्वैदिकैः पुण्यैः शुभैर्मन्त्रयोगादिकर्मभिर्द्विजातीनांगर्भाधानादिशरीरसंस्कारःकर्तव्यः । पावनःपापक्षयहेतुः । प्रेत्य परलोके संस्कृतस्य यागादिफलसम्बन्धात् । इह लोके च वेदाध्ययनाद्यधिकारात् ॥ २६ ॥

(४) **राघवानन्दः** । निषेकादिसंस्कारस्यैव खादिरादिवदधिकारार्थतास्वतन्त्रफलताचेत्याह वैदिकैरिति ।

वैदिकैः कर्मभिर्वेदमन्त्रप्रयोगैः प्रेत्यचेति संस्कृतस्यैव वैधकर्मद्वारा स्वर्गमोक्षौ इह च वेदाद्यधिकारिता ॥ २६ ॥

(५) नन्दनः । वैदिकैः । श्रौतस्मार्तैः । नकेवलंयस्मिञ्छरीरे संस्कारःकृतस्तस्यैव पावनः किल भविष्यतोऽपीत्युक्तंप्रेत्यचपावनइति ॥ २६ ॥

(६) रामचन्द्रः । द्विजन्मनांब्राह्मणक्षत्रियविशांनिषेकादिःशरीरस्य संस्कारःगर्भादिसंस्कारःमन्त्रैः पुण्यैः कर्मभिः कार्यः ॥ २६ ॥

गार्भैर्होमैर्जातकर्मचौडमौञ्जीनिबन्धनैः ॥ बैजिकंगार्भिकंचैनोद्विजानामपमृज्यते ॥ २७ ॥

(१) मेधातिथिः । उक्तंसंस्कारप्रयोजनंपावनः शरीरसंस्कारः पुण्यश्च तत्र पावनत्वमुच्यते दुष्टस्य दोषापकर्षणम् । कुतः पुनः शरीरस्य दुष्टतेत्याशङ्कायामाह । बैजिकंगार्भिकंचैनइति बीजे भवंबीजनिमित्तंवा बैजिकंएवंगार्भिकम् । एनः पापमदृष्टंदुःखकारणंतस्य बीजगर्भयोर्निमित्तभावादशुचित्वमात्रमिहोच्यते । शुक्रशोणिते पुरुषस्य बीजंतेच स्वभावादशुचिनी गर्भाधान्यपि दोषसंक्रान्त्या दुष्टैव । अतस्तन्निमित्तमशुचित्वंपुरुषस्य संस्कारैरपमृज्यतेऽपनुद्यते । तानीदानींकांश्चिन्नामधेयेन कांश्चित्संकार्यविशेषोपलक्षितान्कृत्वा निर्दिशति । गार्भैर्होमैः । गर्भेसंभूतेनार्याःक्रियन्ते । गर्भंवाग्रहीतुंगर्भप्रयोजनकत्वाद्गार्भाः । नारी तत्र द्वारमात्रंप्रयोजकस्तु गर्भएवातस्तत्प्रयुक्तत्वाच्च तदर्थाहोमाःपुंसवनसीमन्तोन्नयनगर्भाधानानि । होमशब्दउपलक्षणार्थः कर्ममात्रस्य । नहिगर्भाधानंहोमएतेषांच कर्मणांद्रव्यदेवतादिरूपंगृह्यस्मृतिभ्योऽवसातव्यम् । यथैव गार्भैर्होमैरेवंजातकर्माख्येन संस्कारेण । एवंचौडेन चूडार्थः चौडः मौञ्जीनिबन्धनमुपनयनम् । तत्रहि मुञ्जविकारीमेखला बध्यते । अतस्तेनोपनयनकर्मोपलक्ष्यते । बन्धनमेवनिबन्धनंनिर्वृत्तेपूरणःजातकर्मादीनि संस्कारनामधेयानि कृतद्वन्द्वानि करणविभक्त्या एनोपमार्जनस्य निर्दिश्यन्ते । संस्कारश्च सर्वः संस्कार्येकार्यान्तरशेषभूते कृतार्थे करिष्यमाणार्थे वा कंचिद्दृष्टमदृष्टंवाविशेषमादधातिव्रीहीनवहन्तीति । व्रीहिभिर्यजेतेति यागंनिवर्तयिष्यतांतुषकणविप्रमोक्षोदृष्टोविशेषआदधाति शिरसोऽवतार्य स्रजंशुचौ देशे निदधातीति । उपभुक्तयाआकीर्णाकारायाः प्रतिपत्तिनियमाददृष्टःस्रजोविशेषस्तत्रेमे संस्काराः शरीरशुद्ध्यर्थाः श्रुताः नच गन्धाद्यपकर्षणंमृद्वारिसंबन्धादिवशरीरे दृश्यते । तेनेयंजन्मादिकालशुद्धिवददृष्टविशेषा शुद्धिर्वेदितव्या । एतया च शुद्ध्या पूतः श्रौतस्मार्तेषु कर्मस्वधिक्रियते । यथा मन्त्रपूतमाज्यंहोमे लौकिके तुकार्ये द्रव्यशुद्ध्यैव शुद्धिर्यथाज्यस्य भोजनादौ । स्पृश्यताहि कुमारस्याद्भिर्गात्राणि शुध्यन्तीत्येतावतैव भवति । तथा चाह । न तद्युप स्पर्शनादशौचमिति । कथंपुनः कर्मार्थत्वमेतेषांयुक्तमुत्पवनस्याद्यद्वारकंप्रकरणेन विनियोगात् अमीतु बाह्या न कस्यचित्कर्मणः प्रकरणे श्रुताः । अतः पुरुषद्वारिका कर्मार्थता दुर्भणा । नचासति कार्योपयोगे स्वरूपतः संस्कारएव निर्वर्त्यः । तथासति संस्कारतैव हीयेत प्रधानकर्मता स्यात् । अतश्च कार्यः शरीरसंस्कारइति कुमारे जाते पुरान्यैरालम्भादिति च द्वितीया श्रुतिर्बाध्येत । शक्तुञ्जुहोतीति वह्निनियोगभङ्गःस्यात्तत्रचाधिकारकल्पनेत्यादिबहुसमंजसंप्राप्नोति । उच्यते न वयंश्रुत्या प्रामाण्यापेक्ष्यंतादर्थ्यमंगललक्षणंब्रूमः । अपितूपकारकत्वंतच्चानङ्गत्वेऽप्युपपद्यते । यथाधानविधिः स्वाध्यायाध्ययनविधिश्च । नह्यत्र श्रुत्यादयः सन्ति । यदाहवनीये जुहोतीत्याहवनीयादयोविनियुक्ताः । अलौकिकत्वाच्चतत्स्वरूपस्याधानविधिनैव सिद्धिर्वसन्ते ब्राह्मणोग्नीनादधीतेति । अतआहवनीयादि निर्वृत्तिद्वारेणाधानंक्रतुषूपयुज्यते नचाङ्गम् । अध्ययनविधिरप्यर्थावबोधद्वारेण क्रतूपकारकएव ममी संस्काराएतत्संस्कृतस्याध्ययनविधिनिष्पादितोध्ययनविध्यर्थस्य विवाहः कृतविवाहस्याधानमाहिताग्नेरधिकारइत्यस्ति संस्कारकार्योपयोगिता बाह्यपुरुषसंस्काराणाम् । निषेकप्रहान्य सर्वत्रापि पितुरधिकारस्तथा च जातकर्मणि मन्त्रःआत्मावै पुत्रनामासीति । तस्य ह्यपत्यो-

त्पादनमपत्यानुशासनंच विहितम्। ऋणानि त्रीण्यपाकृत्येति। तस्मादनुशिष्टंपुत्रंलोक्यमाहुरिति अनुशासनंच स्वाधिकारप्रतिपादनंतच्च वेदाध्यापनेनार्थावबोधपर्यन्तेन भवतीति वक्ष्यामः। अतएवोभयोपकारकाःसंस्काराअपत्योत्पत्तिविधौ पितुर्माणवकस्य च संस्कृतसाध्यासु क्रियासु तस्मात्पितुरधिकारस्तदभावेतत्स्थानापन्नस्य तथा चाह असंस्कृतास्तु संस्कार्याभ्रातृभिः पूर्वसंस्कृतैरिति ॥ २७ ॥

(२) **सर्वज्ञनारायणः**। गर्भे गर्भावस्थायांकर्तव्यैर्निषेकादिकर्मभिः तथा होमैरपि सीमन्तकर्मादिनामकैर्गार्भैरेत्र जातानन्तरकर्तव्यैश्चजातकर्मादिभिः तैश्च बैजिकंपितृगतंतत्तत्पापविशेषदूषितंशुक्रसंभवंपापं तथा गर्भोमातृरजस्तद्दोषसंभवंच पापंद्विजानामपनीयते अथोपनयनादिभिः संस्कारैरुपनीतस्य देहशोधनार्थानीत्यर्थः ॥ २७ ॥

(३) **कुल्लूकः**। कुतःपापसंभवोयेनैषांपापक्षयहेतुत्वमतआह गार्भैरिति। ये गर्भशुद्धये क्रियन्ते ते गार्भाः। होमग्रहणमुपलक्षणंगर्भाधानादेरहोमरूपत्वात्। जातस्य यत्कर्ममन्त्रवत्सर्पिःप्राशनादिरूपंतज्जातकर्म। चौडंचूडाकरणकर्म। मौञ्जीनिबन्धनमुपनयनम्। एतैर्बैजिकंप्रतिषिद्धमैथुनसंकल्पादिनाच पैतृकरेतोदोषाद्यत्पापंगार्भिकंचाशुचिमातृगर्भवासजंतद्द्विजातीनामपमृज्यते ॥ २७ ॥

(४) **राघवानन्दः**। शरीरसंस्कारइत्युक्तंतत्र कथंकस्य संस्कारस्तत्राह गार्भैरिति द्वाभ्यां। गर्भंधेहि सिनीवालीत्यादिमन्त्रोक्तैः गर्भसंस्कारैः गार्भहोमैः सीमन्तोन्नयनादिमयुक्तैः जातकर्म जातस्य यत्कर्म समन्त्रकंसर्पिः प्राशनादिरूपंतत्। चौडंचूडाकर्म।मौञ्जीनिबन्धनंमौञ्जीनिबध्यतेऽनेनेति मौञ्जीनिबन्धनंउपनयनं एतैरेनः पापमपमृज्यते नाश्यते भ-ऽयतीति यावत्। बैजिकंप्रतिषिद्धमैथुनसंकल्पादिना पैतृकरेतोदोषेणोत्पन्नं। गार्भिकंअशुचिमातृगर्भवासजंमातुर्व्यभिचारसंकल्पजं च। यन्मे माता प्रलुलोभेत्यादिश्रुतेः ॥ २७ ॥

(५) **नन्दनः**। पित्रादिना कार्यैः संस्कारैरपनेयंपापमाह गार्भैरिति। गार्भैर्निषेकपुंसवनविष्णुबलिसीमन्तोन्नयनसंबन्धिभिर्जातकर्मचौलमौञ्जीबन्धनैश्च। मौञ्जीबन्धनमुपनयनम्। बैजिकंगार्भिकंपितुश्चमातुश्चापराधैःकृतमित्यर्थः ॥ २७ ॥

(६) **रामचन्द्रः**। गार्भैः गर्भसंस्कारहोमैः शंडामर्कादीनांहोमैः जातकर्मभिः चौलमौञ्जीनिबन्धनैरेतैः संस्कारैर्द्विजानांबैजिकमेनः अपमृज्यते पापंनाशमेति बैजिकंशुक्रशोणितसम्बन्धजमित्यर्थः। गोत्रव्याधिसंक्रमनिमित्तम् ॥ २७ ॥

स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया सुतैः ॥ महायज्ञैश्च यज्ञैश्च ब्राह्मीयंक्रियतेतनुः ॥ २८ ॥

(१) **मेधातिथिः**। येषु कर्मसु माणवकस्य संस्काराउपकारकास्तानिदानीमुदाहरणमात्रेण दर्शयति। अध्ययनक्रिया स्वाध्यायशब्देनात्राभिमेता तस्याएव विषयनिर्देशस्त्रैविद्येनेति। व्यवधानेप्यर्थलक्षणः संबन्धोयस्य येनार्थसंबन्धइति न्यायेन। अतएव सामानाधिकरण्येऽपि श्रुते विषयविषयिभावोविभक्तिविपरिणामेन। त्रयाणांवेदानामध्ययनेनेत्यर्थः। त्रयएव वेदाः त्रैविद्यंचातुर्वर्ण्यादिवद्रूपसिद्धिः। अथवा स्वाध्यायेनेति। वेदाध्ययनंत्रैविद्येनेति तदर्थावबोधः। व्रतैः सावित्रादिभिर्ब्रह्मचारीकर्तृकैः होमैर्व्रतादेशनकाले ये क्रियन्ते। यदि वा सायंप्रातः समिद्भिरग्नीन्धनंब्रह्मचारिणोहोमशब्देनाग्न्याधारसंबन्धसामान्यादुच्यते। अथ किंसमिदाधानंन होमोयेनैवमुच्यतेसंबन्धसामान्यादिति न भवतीति ब्रुवन्ति अदनीयद्रव्यसाध्यत्वाद्यागहोमयोः। कथंतर्हि सायंप्रातश्च जुहुयात्ताभिरग्निमतंद्रितइत्युक्तम्। लक्षणया समिदाधानंहोमशब्देनोच्यते। यथैव हूयमानंद्रव्यमग्नौप्रक्षिप्यते। एवंसमिन्धनार्थाः समिधोऽप्यतएतेन सामान्येन समिन्धनमेव होमइत्युच्यते। उत्पत्तिवाक्ये हि समिधमादध्यादितिश्रुतम्। जुहुयात्ताभिरग्निमित्यनुवादोयमन्यार्थइति परस्ताद्वक्ष्यामः। नचानुवा-

दे लक्षणादोषः। इदंतु युक्तंयन्मेध्यमात्रद्रव्यसाध्यौ यागहोमौ। तथाच सति बह्व्यश्चोदनायथार्थाभवन्ति। यथा सूक्तवाकेन प्रस्तरंप्रहरतीति। तत्र हि प्रस्तरंद्रव्यमाहुर्हरतिंचयजतिं। अथ वचनादसौताह्शएव यागः। दर्भाश्चाप्यदनीयाः केषांचित्। कथंशाकलहोमे। तत्रापि द्विशकलान्यभ्यादधातीत्युत्पत्तिरितिचेद्ग्रहयज्ञे कागतिः। ग्रहेभ्यएकैकस्यैसमिधोजुहुयादर्कादीनां अतोयत्र जुहुयादिति देवतासंबन्धश्च काष्ठादेरपि श्रुतउत्पत्तिवाक्ये सोपि होमएव। इज्ययादेवर्षिपितर्पणेन। एषतावदुपनीतस्य ब्रह्मचर्येक्रियाकलापः। इदानींगृहस्थधर्माः। सुतैरपत्योत्पत्तिविधिना महायज्ञैः। पञ्चभिर्ब्रह्मयज्ञादिभिः। यज्ञैः श्रौतैर्ज्योतिष्टोमादिभिः ननु यद्येषांकर्मणांकिंचित्प्रयोजनंस्यात्तदा तदधिकारयोग्यतोत्पत्त्यर्थाबाह्याः संस्काराअर्थवन्तः स्युः। अतआह ब्राह्मीयंक्रियते तनुः। ब्रह्म परमात्मा कारणपुरुषः तस्येयंसंबन्धिनी तनुः शरीरमेतैः श्रौतस्मार्तैः सर्वैः कर्मभिः क्रियते। ब्रह्मसंबन्धिता च तद्भावापत्तिलक्षणा सहि परः पुरुषार्थः। संबन्धान्तराणि सर्वस्य कस्यचित्कारणत्वेन सिद्धत्वान्नाभिलषितव्यानि। ततोमोक्षप्राप्तिरुक्ता भवति। ब्राह्मीत्यनेन तनुशब्देन च तदधिष्ठाता पुरुषोलक्ष्यते। तस्य ह्येते शरीरद्वारकाः संस्काराः तस्यैव च मोक्षप्राप्तिःशरीरस्य पञ्चतापत्तेः। अन्ये त्वाहुर्ब्रह्मत्वप्राप्तौ योग्या क्रियते। नहि कर्मभिरेव केवलैर्ब्रह्मत्वप्राप्तिः प्रज्ञानकर्मसमुच्चयात्किल मोक्षः एतैस्तु संस्कृतआत्मोपासनास्वधिक्रियते। तथा च श्रुतिः यएतदक्षरंगार्ग्यविदित्वा यजते जुहोति तपस्तप्यते अधीते ददात्यन्तवदेवास्य तद्भवतीति। ननु च नैतेषांकर्मणांब्रह्मप्राप्तिः फलंश्रुतम्। तथा हि नित्यानि तावदश्रुतफलान्येव कल्पनायां च पौरुषेयत्वंयावज्जीवादिपदैश्च नित्यतायाअवगमितत्वाद्विश्वजिन्न्यायोऽपि नास्त्यथास्मादेववचनादेतत्फलत्वमिति। यदुच्येतमोक्षार्थिनः तदाधिकारः स्यात्तथा च नित्यत्वहानिस्ततश्च श्रुतिविरोधः। निष्फलं न कश्चिदनुतिष्ठति तत्रानर्थक्यमिति चेत् कामनानुष्ठानात्प्रमाणस्य प्रमेयावगतिरर्थः साचेत्कृताजातमर्थवत्त्वम्। अस्तिचात्र कर्तव्यतावगतिःसत्यां च तस्यामकरणे शास्त्रार्थातिक्रमस्ततश्च प्रत्यवायईदृशएवार्थेलिङादीनांवृद्धव्यवहारे व्युत्पत्तिः। योहि भृत्यादिः कर्तव्यंनकरोति कस्यचिदाज्ञातुः सवेतनार्थीवेतनं न लभते। यदिवा प्रत्यवायेन योज्यते। तत्र फलस्याश्रुतत्वान्न फलानुत्पत्तिः प्रत्यवायः। अपितु दुःखेन योजनंनित्येषु। एवंसर्वपुरुषाधिकारोनित्यः समर्थितोभवति। तस्मान्ननित्यानांकिंचित्फलम् काम्यानांत्वन्यदेव फलं न मोक्षः श्रुतत्वात्तत्र कथमेतत्सर्वकर्मानुष्ठानसाध्यः परः पुरुषार्थइति। अतएवकैश्चिदर्थवादोऽयमिति व्याख्यायते। संस्कारविधिः स्तुत्यर्थः। अत्र च ब्राह्मीयमिति यत्किंचिदालम्बनमाश्रित्य गुणवादेन नीयते। ब्रह्म वेदस्तदुच्चारणार्हा तत्कर्माधिकारिणी च। यत्तर्हि गौतमेनोक्तम्। चत्वारिंशत्संस्कारा इति। तत्कथंतत्र हि सोमसंस्थाऽपि संस्कारत्वेनोक्ता नच प्रधानकर्मणांसंस्कारत्वोपपत्तिः। नाप्येतदर्थवादतया शक्यंव्याख्यातुमविशेषत्वात्। तत्राप्यात्मगुणशेषसंस्कारत्वाध्यारोपेण स्तुतिः। एवमिहापि संस्कारैः संस्कारान् समानीकृत्यतुल्यफलताध्यारोपेण संस्काराणामवश्यकर्तव्यतामाचष्टे तथाच संस्कारप्रकरणान्नोत्कृष्यते स्तुतिः क्रियतइति च वर्तमानापदेशोनविधिविभक्तिस्तत्र कुतोब्रह्मप्राप्तेः फलत्वावगमः। नचात्र कर्माणि विधीयन्ते येनाधिकाराकाङ्क्षायां सत्यपि वर्तमाननिर्देशे रात्रिसत्रे प्रतिष्ठावत्फलनिर्देशः स्यात्। तस्मात्संस्कारस्तुत्यर्थमेवसर्वमेतदुच्यते। येऽपि विभागेन वर्णयन्ति नित्यानां ब्रह्मप्राप्तिफलंकाम्यानांतु यथा श्रुतमेव तदप्यप्रमाणंसर्वस्यार्थवादत्वात्तदन्तरेण च फलंनित्येष्वनुष्ठानसिद्धेः। प्रतिपादितत्वात्तदुक्तंकामात्मता नप्रशस्तेति॥ २८॥

(२) **सर्वज्ञनारायणः**। उपनयनानन्तरंक्रियमाणेन स्वाध्यायेन व्रतैः स्वाध्यायसमयमारभ्य कर्तव्यैः सायंप्रातरग्निसमिन्धनादिभिःस्नातकव्रतादिभिश्च होमैरुपाकरणोत्सर्जनहोमैः त्रैविद्येन षट्त्रिंशदब्दचर्यवेदत्रयाध्ययनार्थं गुरु-

कुलवासेन त्रैविद्येन स्वाध्यायेनेति व्यस्तपदसंबन्धः इज्यया पाकयज्ञेन हविर्यज्ञैः सुतैः पुत्रोत्पादनेन महायज्ञैः ब्रह्मयज्ञाद्यैः पञ्चभिर्यज्ञैरग्निष्टोमादिभिः सामयज्ञैः इयमेतस्मिनूलोके या तनुर्देहः सब्राह्मी ब्रह्मप्राप्तियोग्याक्रियते अपाकृतर्णत्रयस्य मोक्षोपायेधिकारात् ॥ २८ ॥

(३) **कुल्लूकः** । वेदाध्ययनेन व्रतैर्मधुमांसवर्जनादिनियमैर्होमैःसावित्रचरुहोमादिभिःसायंप्रातर्होमैश्च त्रैविद्याख्येन च व्रतेष्वप्राधान्यादस्यपृथगुपन्यासः । इज्यया ब्रह्मचर्यावस्थायांदेवर्षिपितृतर्पणरूपया गृहस्थावस्थायांपुत्रोत्पादनेन महायज्ञैः पञ्चभिर्ब्रह्मयज्ञादिभिः । यज्ञैर्ज्योतिष्टोमादिभिः । ब्राह्मी ब्रह्मप्राप्तियोग्येयंतनुस्तन्ववच्छिन्नआत्माक्रियते कर्मसहकृतब्रह्मज्ञानेन मोक्षावाप्तेः ॥ २८ ॥

(४) **राघवानन्दः** । स्वाध्यायेन वेदाध्ययनेन व्रतैर्मधुमांसादिवर्जनात्मकैःहोमैः । सायंप्रातःसमिदाधानैः । त्रैविद्येन षट्त्रिंशदाब्दिकाख्यादिव्रतेन । इज्यया ब्रह्मचारिक्रियमाणदेवर्षिपितृतर्पणरूपया । सुतैःपुत्रोत्पादनैः । एकवाक्योपात्तत्वेनैषांत्वाष्ट्रंपात्नीवतंजुहोतीतिवतसमुच्चयः । महायज्ञैःवैश्वदेवादिपञ्चभिः । यज्ञैःज्योतिष्टोमादिभिः । ब्राह्मी ब्रह्मप्राप्तियोग्या तनुःक्रियतइत्यन्वयः ॥ २८ ॥

(५) **नन्दनः** । अथोत्तरेषांसंस्काराणांफलविशेषमाह स्वाध्यायेनेति स्वाध्यायेन वेदाध्ययनेन । व्रतैः प्राजापत्यादिभिः । होमैःसमिदाधानादिभिर्नित्यनैमित्तिकैः । त्रिविद्यावेदेतित्रैविद्यस्तस्य भावस्त्रैविद्यंवेदत्रयार्थज्ञानमितियावत् । इज्यया स्मार्तेन पाकयज्ञेन सुतशब्देन समावर्तनंविवाहश्चोपचर्यते । महायज्ञैर्देवर्षिपितृमनुष्यभूतब्रह्मयज्ञैरग्न्याधानादिभिः । ब्राह्मीब्रह्मप्राप्त्यर्हा ॥ २८ ॥

(६) **रामचन्द्रः** । वेदाध्ययनेनव्रतैः होमैः त्रिविधेन वेदत्रयोक्तकर्मणा श्रुतैः पुत्रोत्पत्तिभिः एतैर्धर्मैः ब्राह्मीब्रह्मप्राप्तियोग्याइयंतनुः क्रियते ॥ २८ ॥

प्राङ्नाभिवर्धनात्पुंसोजातकर्म विधीयते ॥ मन्त्रवत्प्राशनंचास्य हिरण्यमधुसर्पिषाम् ॥ २९ ॥

(१) **मेधातिथिः** । वर्धनंछेदनंजातकर्मेति कर्मनामधेयमेतत् । रूपंचास्य गृह्यस्मृतिभ्योज्ञातव्यंकस्य पुनः कर्मणोजातकर्मेति नाम तदर्थमुक्तंप्राशनंहिरण्यमधुसर्पिषाम् । अस्येति दारकंव्यपदिशन्ति । कर्मवाऽस्य जातकर्मणइदंप्रधानम् । यन्मन्त्रवत्प्राशनमिति । समन्त्रकंमन्त्रेण कर्तव्यमित्यर्थः मन्त्रस्यचेहानुक्तत्वात् । सर्वस्मृतीनांचैकार्थ्याद्यदन्यत्रोक्तंतदत्रापि प्रतीयते तेन गृह्यस्मृतिषु ये मन्त्राउपात्तास्तैर्मन्त्रवदिति द्रष्टव्यम् यदि गृह्यस्मृतयोऽपेक्ष्यन्तेद्रष्टव्यनिर्देशोऽपि न कर्तव्यः । एवंहि तत्र पठ्यते । सर्पिर्मधुनी हिरण्यनिकाषंहिरण्येन प्राशयेत् । प्रातर्ददामि मधुनोघृतस्येति । किंच बह्व्योगृह्यस्मृतयोभिन्नाश्च प्रतिगृह्यंमन्त्राः । अन्यापि भिन्नेतिकर्तव्यतातत्र काऽऽश्रीयतामिति न विद्मः । अथ चरणसमाख्या नियामिकाभविष्यति व्यर्थस्तर्हि जातकर्माद्युपदेशस्ततएवसिद्धेः । कठानांगृह्यंबह्वृचमाश्वलायनानांच गृह्यमिति यथैन समाख्यायते सतदुक्तमनुष्ठास्यतीति । उच्यते । दृष्टादिनिर्देशेन सुस्पष्टंकर्मैकत्वमिति प्रतीयते । तथा हिप्रत्यभिज्ञा सिद्धिः। तदेवेतन्नामधेयकंचेदंकर्मातस्तदेवेदमिति भूयसा दृष्टंतद्गुणयोगेन प्रत्यभिज्ञायते । सति चैकत्वे यदङ्गंजातंक्वचिन्नोक्तंतदनिबद्धमन्यतआनेतव्यम् यथासर्वशाखाप्रत्ययमेकंकर्म एवंसर्वस्मृतिप्रत्ययमपि । यत्तु बहुत्वाद्गृह्यस्मृतीनांकाऽऽश्रीयतामित्यनध्यवसायः । सर्वासांप्रामाण्याविशेषादेकार्थानांचविकल्पः। भिन्नार्थानांसमुच्चयः। चरणसमाख्यातुनैव नियामिका यतो न समाख्यया पुरुषस्य नियतः संबन्धः गोत्रप्रवरवत् । यैव शाखायेनाधीता सएव तथा समाख्यायतेकठोबह्वृचइति । नचाध्ययने नियमोऽस्त्यनेनेयंशाखाऽध्येतव्येति । अनेकशाखाध्ययनमप्यस्ति वेदानधीत्येति तत्र त्रिवेदाध्यायिनः सर्वेव्यपदेशाः

प्रवर्तन्ते । केऽप्यूचुः कठो बह्वृच इति तत्रावश्यं विकल्प आस्थेय एकशाखाध्यायिनस्तु यद्गृह्यं यया शाखया समाख्यायते तदुक्तमेव तस्य युक्तं कर्तुम् । एष हि तदुक्तमेव शक्नोति कर्तुं तच्छाखा मन्त्रा एव तेनाधीताः शक्नोति तान्प्रयोक्तुं तमेव वावृतं वेद वेदने च कर्मानुष्ठानार्थं वेदाध्ययनं येन तावतो मन्त्रान्कर्मोपयोगिनोऽध्येष्यत इत्युच्यते । स्वाध्याय विधिवशेन वेदाध्ययनं अनधीतवेदस्यनाधिकारो' न कर्मप्रयुक्तमध्ययनम् । अत इयं समाख्या मन्त्रविशेषविनियोगनिमित्तैव कठानां गृह्यं वाजसनेयिनां गृह्यमिति । यस्यां शाखायां ये मन्त्रा अधीतास्ते यत्र बाहुल्येन विनियुक्तास्तद्गृह्यं तथा समाख्यायते । प्रमाणं गृह्यस्मृतिः साकठनामियमिति व्यपदिश्य माना बह्वृचानामपि स्वार्थावगमनं करोत्येव कर्तव्यता वेदस्य स्वार्थस्मृतीनां च । अवगतायां च कर्तव्यतायां कर्तृविशेषश्रावणे स्वाधिकारो न स्याद्यथा च तनूनपाति प्रयाजे वसिष्ठानां निषेधाद्वा पतितम् । नचेह द्वयमप्यस्ति । नच शक्यं कल्पयितुं नहि कठानां बाह्वृच्यं न प्रमाणं बह्वृचानां वा काठकं यतो य एव कठः स एवा कठो सति तच्छाखाध्यायेन । गोत्रं तु नियतमित्यसमान एवार्थः । स्वसूत्रं यः परित्यज्य परसूत्रेण वर्तत इति । यद्येतदस्ति तदेव क्व तर्हि स्वकं यदधीतं तदर्थः शक्यो नुष्ठातुं । तेन स्वाधीतां शाखामतिक्रम्यपित्राद्यधीतशाखया कर्माणि कुर्यात्तद्गृह्यं च समाश्रयेन्न तस्य शाखात्यागदोषः पित्रादीनां वा शाखात्यागः यैर्माणवकः क्रमाधीतां शाखां नाध्यापितः माणवकस्यात्र दोषो नास्ति यदा मृतपितृको जाबालवदयं बालः स्वयमाचार्यमाश्रयेत्तदा षेनास्य पितरो याता इत्यनेन शास्त्रेण सैवाध्येतुं युक्ता स्यात् । अथात्मशाखाध्ययनं न संभवति तदा स्वशाखात्यागः । अतः स्थितमिदं सर्वे सर्वासु स्मृतिषु जातकर्माद्युपदिश्यते तत्र भिन्नार्थं मन्त्रजातं समुच्चीयते विरुद्धं विकल्प्यते समानार्थं च । पुंस इति स्त्रीनपुंसकव्यावृत्त्यर्थम् । अन्ये त्वविवक्षितं पुमर्थं मन्यन्ते । द्विजन्मनामिति सामान्येन त्रैवर्णिकानां संस्कार्यत्वेन प्रकृतत्वात्संस्कार्यश्च प्रधानमुद्देशो न च प्रधाने लिङ्गसंख्यादिविशेषणं विवक्ष्यते । ग्रहं संमार्ष्टीति सत्यप्येकवचने सर्वे ग्रहाः संमृज्यन्ते । ज्वरितं ज्वरमुक्तं च दिनान्ते भोजयेन्नरमिति नार्या अपि ज्वरिताया एष एव भोजनकालस्तथा च प्राप्तमतिषेधस्त्रीणाममन्त्रिका तु कार्या इयं स्त्रीणामावृदिति नपुंसकानां च पाणिग्रहणदर्शनं यथार्थितानुदारैः स्यात्क्लीबादीनामिति तत्रोच्यते । नायं पुंशब्दो मनुष्यजातिवचनो नरशब्दवद्येन विभक्तिवाच्यलिङ्गं न विवक्ष्येत एष हि सर्वत्र स्थावरमूर्तामूर्तगतं लिङ्गविशेषं प्रसवरूपमाचष्टे । प्रातिपदिकार्थो ह्यत्र लिङ्गं विभक्तिवाच्यस्य ह्यर्थस्य विवक्षाविवक्षे युज्येते यतो न विभक्तेर्वचनमेवैकं प्रयोजनं कर्माद्यर्थान्तराभिधानेनाप्यर्थवत्त्वात् । इह त्वविवक्षायामानर्थक्यमेव प्राप्नोति पुंस्पदस्य यथा तत्रैव ग्रहप्रातिपदिकार्थो विवक्ष्यते । वाक्यानर्थक्यपरिहाराय । अथोच्येत नप्रत्ययार्थमात्रस्य विवक्षा कृत्स्नोऽपि पदार्थ उपदिश्यमानविशेषणं न विवक्ष्यते । यथा यस्योभयं हविरिति सत्यप्युभयपदश्रवणे दधिपयसोरन्यतरावृत्तावपि तदेव प्रायश्चित्तं नविवक्षित उभयशब्दः । अत्र केचित्परिहारमाहुः नैतत्तेन समानं महि हविरर्थः । पञ्चशरावो हविर्विनाशे हि नैमित्तिको धिकारः । इह तु माणवकार्था एव संस्काराः । एष त्वप्रयोजको विशेषः वाक्यभेदभयाद्विशेषणविवक्षा नेष्यते । तादर्थ्येऽपि वाक्यभेदो नैवापैति तस्मादयं परिहारः एतदेवोत्पत्तिवाक्यं जातकर्मणो वैदिकैः कर्मभिरित्येतदुपक्रमं तत्र पुमानेव संस्कार्यतया निर्दिष्टस्तदविवक्षायां वाक्यानर्थक्यं यथा तत्रैव हविः पदं विवक्ष्यते । यद्येवं शूद्रस्यापि प्राप्तिर्जातिविशेषानिर्देशान्न प्राप्स्यति मन्त्रसाध्यत्वात् । अथवा द्विजन्मनामिति वाक्यशेषः को भविष्यति नच तदानीं विधेयार्थविषयत्वेन निर्दिष्टो येन तत एव संस्कार्यावगतौ पुंस इत्येतदुभयं पदविवक्षितमाशङ्क्येत स्त्रीणां त्वमात्रेऽपि विधानमुपपद्यते क्लीबस्यापि दारदर्शनं वातरेता यः क्लीबो भयव्यञ्जनो प्रवृत्तेन्द्रियो वा बहुप्रकारव्यावृत्तिकरं जातकर्मादिसंस्कारकालेऽपरिछेद्यत्वाच्छक्यप्रतीकारत्वाच्च नच योननियतो धर्मः सोधिकारं व्यावर्तयति यथाऽद्रव्यत्वं न ह्यद्रव्यनियतं जातिवद्ययवाद्रव्यः सोऽपि द्रव्यवान्भवति । चिरमधनो भूत्वा भवत्यन्हा महाधनः ईदृशस्यैव षंढस्य वधे पलालभारकशुद्धिः स-

ह्यसंस्कृतोनुपनीतः शान्त्यैव कस्यचित्तिष्ठति। अतःस्थितंपुंसामेवैते संस्काराएभिर्विधीयन्ते। विध्यन्तरेण स्त्रीणाममन्त्रकाःनपुंसकस्य नैवसन्तीती ॥ २९ ॥

(२) सर्वज्ञनारायणः। वर्धनं छेदनं जातकर्म तन्नामकंकर्म मन्त्रवन्मेध्यं तेदेव सवितेत्यादि मन्त्रयुक्तंयद्धिरण्यसंसृष्टानांमधुसर्पिषां अस्य शिशोःप्राशनंतदपि प्रागेव नाभिच्छेदात् एतच्च गृह्यसूत्रेषु जातकर्म जातसाक्षादिवएतदङ्गमनुर्मन्यते पुंसो न नपुंसकस्य स्त्रीणांतु वक्ष्यते ॥ २९ ॥

(३) कुल्लूकः। नाभिच्छेदनात्प्राक्पुरुषस्य जातकर्माख्यःसंस्कारःक्रियते तदाचास्यस्वगृह्योक्तमन्त्रैःस्वर्णमधुघृतानांप्राशनम् ॥ २९ ॥

(४) राघवानन्दः। जातकर्मान्नप्राशनचौडोपनयनानांयोग्यकालंदर्शयन्स्वरूपमाह। प्रागिति। दशभिः। नाभिवर्धनात्नाभिच्छेदात्। वृधुच्छेदनइत्यस्य धातोरूपम्। मन्त्रवत्प्राशनमेव सुवर्णादेरस्य जातस्य। द्विजातेःकर्म। जातकर्म ॥ २९ ॥

(५) नन्दनः। अथ जातकर्मणः कालंस्वरूपंचाहप्रागिति। वर्धनंछेदनम् ॥ २९ ॥

(६) रामचन्द्रः। नाभिवर्द्धनात्प्राक्नालच्छेदात्प्राक्पूर्वंजातकर्म विधीयते जातकर्मणि हिरण्यमधुसर्पिर्भिः अस्य कुमारस्य मन्त्रवत्मन्त्रपूर्वकंप्राशनंकार्यम् ॥ २९ ॥

नामधेयंदशम्यांतु द्वादश्यांवास्य कारयेत् ॥ पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते ॥ ३० ॥

(१) मेधातिथिः। दशम्यां तिथौ द्वादश्यां वास्य दारकस्य नामधेयंकुर्वीत। णिजर्थोनविवक्षितः तथाच गृह्यंदशम्यामुत्थाप्य पिता नामकरोतीति नामैव नामधेयंयेन शब्देन कार्येष्वाहूयते तन्नाम प्राङ्नाभिवर्धनादितिजातकर्मणःप्रकृतत्वाज्जन्मनःप्रभृतिदशमीद्वादश्यौ गृह्येते न चन्द्रतिथी। इह केचिद्दशमीग्रहणमाशौचनिवृत्तिरित्युपलक्षणार्थंवर्णयन्तिअतीतायामिति चाध्याहारः दशम्यामतीतायांब्राह्मणस्य द्वादश्यां क्षत्रियस्य पञ्चदश्यांवैश्यस्येति। तदयुक्तंलक्षणायां प्रमाणाभावाज्जातकर्मवदाशौचेऽपि करिष्यते यदितु ब्राह्मणभोजनंविहितंकचित्तदा युक्तालक्षणा। यदि दशमीद्वादश्यौ वक्ष्यमाणगुणयुक्ते भवतः तदा तयोः कर्तव्यमथन तदाऽन्यस्मिन्नपि पुण्येहनि पुण्यान्यहानि द्वितीयापञ्चम्यादीनि पुण्यंप्रशस्तंनवमीचतुर्दश्यादयोरिक्तास्तिथयअपुण्याः मुहूर्तोलग्नंकुंभादि तस्मिन्पुण्ये पापग्रहैरनधिष्ठिते गुरुभ्यांच दृश्यमाने लग्नशुद्धिर्ज्योतिषादवगम्यते। नक्षत्रे च गुणयुक्ते। नक्षत्रंश्रविष्ठादि तस्मिन्नहनिगुणयुक्तंभवतिनक्षत्रगुणाश्च क्रूरग्रहपापग्रहविष्टिपातविवर्जितंवा शब्दः समुच्चये। तेन प्रशस्तायांतिथौ नक्षत्रे च शुद्धे लग्नइत्युपदिष्टंभवति। समुच्चयश्च ज्योतिषावगम्यः। अयंच परमार्थः दशमीद्वादशीभ्यामर्वाङ्न कर्तव्यम्। उत्तरकालंच यदहर्नक्षत्रलग्नंपरिशुद्धंतदहरेव कर्तव्यम् ॥ ३० ॥

(२) सर्वज्ञनारायणः। नाम्नोव्यवस्थापनं दशम्यांतिथौ द्वादश्यांवाकारयेत्। स्वयंकरणाशक्तावन्येनापि इत्येतदर्थंकारयेदित्युक्तम्। मम नामप्रथमंजातवेदःपिता माताचदधतुरिति मन्त्रलिङ्गात्पित्रोरेव मुख्यत्वेनाधिकारात् तत्रच तिथिन्ह्रासवृद्ध्योरपि दशमतिथावेव नामधेयं न दशमेहन्येवेत्येतदर्थंस्त्रीलिङ्गनिर्देशः क्वचिद्रात्रिविशेषणतया स्त्रीलिङ्गत्वम्। तथा चाहोरात्रोपलक्षण मित्याहुः। पुण्ये मङ्गलयोग्ये वा यत्र क्वापि तिथौ तादृशेवा मुहूर्ते लग्ने नक्षत्र मात्रे वा ज्योतिषोक्तगुणवतीति पक्षत्रयं पूर्वोक्तपक्षद्वयासंभवे ॥ ३० ॥

(३) कुल्लूकः। जातकर्मेतिपूर्वश्लोके जन्मनः प्रस्तुतत्वाज्जन्मापेक्षयैव दशमे द्वादशे वाऽहन्यस्य शिशोर्नामधेयंस्वयमसंभवे कारयेत्। अथवा ऽशौचे तु व्यतिक्रान्ते नामकर्मविधीयतइति शङ्खवचनाद्दशमेऽहन्यतीतेएकादशाहइति व्या-

व्येयम् । तत्राप्यकरणे प्रशस्ते तिथौ प्रशस्तएव मुहूर्ते नक्षत्रे च गुणवत्येव ज्योतिषावगते कर्तव्यम् । वा शब्दोऽवधारणे ॥ ३० ॥

(४) **राघवानन्दः** । नामेति दशम्यामिति पूर्वाशौचनिवृत्तिपरम् । आशौचेतु व्यतिक्रान्तेनामकर्म विधीयतइति शङ्खोक्तेः । सामीप्येसप्तमीवा । अहन्येकादशे नामेति याज्ञवल्क्यः । एकादशेऽहन्यपिनामकुर्यादिति श्रुतेः । द्वादशीपदंप्राशस्त्यपरमतएवाह । पुण्यमित्यादि ॥ ३० ॥

(५) **नन्दनः** । दशम्यांद्वादश्यांतिथौ जन्मदिनाद्दशमे द्वादशे वादिनइत्यर्थः । पुण्येमुहूर्तइत्यन्वयः ॥ ३० ॥

(६) **रामचन्द्रः** । रात्रौकर्माधिकारोनास्ति तेन कारणेन एकादशेऽहनि नामधेयंनामकर्मकारयेत् । दशमदिवसे वा द्वादशेन्हिवाकारयेत् कार्यव्यग्रतया द्वादशेन्हि नामकरणं यदा न जातंतदा सुमुहूर्ते पुण्येन्हिगुणान्विते नक्षत्रेज्योतिर्विदादिष्टे काले शुक्रास्तादिवर्जिते काले नामधेयंकार्यम् विष्णुपुराणवचनात् ततस्तु नामकुर्वीत पितैवदशमेहनीत्यादि वाक्यम् । शंखः दशमेहनि सूतिकांपूर्वंसव्यतः उत्थाप्य कुशरान्नस्य पिण्डवर्द्धनंनाम कर्म कार्यमितिवा ॥ ३० ॥

मङ्गल्यंब्राह्मणस्य स्यात्क्षत्रियस्य बलान्वितम् ॥ वैश्यस्य धनसंयुक्तंशूद्रस्यतु जुगुप्सितम् ॥ ३१॥

(१) **मेधातिथिः** । इदानींयादृशंनामकर्तव्यंतन्नियमयतिस्वरूपतोर्थतश्च तत्र स्वरूपमवधारयिष्यन्नाहमङ्गलाय हितंतत्र वा साधुमाङ्गल्यमिति व्युत्पत्तिः । अभिमतस्यार्थस्य चिरजीवित्वबहुधनादेर्दृष्टादृष्टसुखफलस्य सिद्धिर्मङ्गलं । तदभिधानमेव शब्दाभ्यर्हितत्वंसाधुत्वंचेति तद्धितसिद्धिःनाभिप्रेतार्थसिद्धिप्रतिपादनमेव विवक्षितं । किंतर्हि यआशास्यते तद्वचनेनैव सिद्धिसमासाद्यायुःसिद्धिर्धनसिद्धिःपुत्रलाभइत्यादेः प्रतीयते । तद्धिताद्धा हितनिमित्तप्रयोजनार्थीयात् तत्र गृह्येतद्धितान्तंप्रतिषिद्धंकुसंकुर्यान्न तद्धितमिति । समासेपि पदद्वयैकार्थीभावस्तत्र बव्हक्षरप्रयोगप्रसंगोयतोवक्ष्यति शर्मवद्ब्राह्मणस्येत्युपपदनियमंतत्र चतुरक्षरे त्र्यक्षरे वा नाम्नि शर्मशब्दे चोपपदे पञ्चाक्षरंषडक्षरंनामभवति तच्च प्रतिषिद्धंद्व्यक्षरचतुरक्षरंवा कुर्यादिति तेन यत्किंचित्प्रार्थेण सर्वस्याभिलषणीयमभर्हितंपुत्रपशुग्रामकन्याधनादि तद्वचनाः शब्दानामधेयत्वेनविनियोक्तव्याः शर्मान्तास्तेन गोशर्मा धनशर्मा हिरण्यशर्मा कल्याणशर्मा मङ्गल्यशर्मेत्यादिशब्दपरिग्रहः सिद्धोभवति । अथवा मङ्गलंधर्मस्तत्साधनंमङ्गल्यंनामकतमत्पुनर्धर्मसाधनंनाम यएते देवताशब्दाः इन्द्रोग्निर्वायुः तथा ऋषिशब्दावसवोविश्वामित्रोमेधातिथिस्तेषामपि धर्मसाधनमस्ति ऋषींस्तर्पयेत्पुण्यकृतोमनसा ध्यायेदिति देवतानामृषीणांच द्विजानांपुण्यकर्मणांप्रातःप्रबुद्धःश्रीकामोनरोनामानि कीर्तयेदितिमङ्गल्यग्रहणाच्च यदप्रशस्तंयमोमृत्युरित्यादितन्निरस्यते यच्चानर्थकंडित्थादियदृच्छानिमित्तं क्षत्रियस्यबलान्वितं बलसंयुक्तं बलवाचि अन्वयः संबन्धशब्दःचार्थेन संबन्धः प्रतिपादकभावएव । सामर्थ्यंतद्येन येन प्रतिपाद्यते तादृशंनाम क्षत्रियस्य कर्तव्यंशत्रुंतपः दुर्योधनः प्रजापालइत्यादिविभागेन च नामनिर्देशोजातिबलचिन्हंएवंवैश्यस्य धनसंयुक्तंनचात्र पर्यायाएव गृह्यन्तेधनंवित्तंस्वापतेयमिति किंतर्हियेन प्रकारेण प्रतिपत्तिः यदिवा धनादि शब्दप्रयोगादर्शसंबन्धाद्वा धनकर्मा महाधनः गोमान्धान्यग्रहइत्येवंसर्वत्र द्रष्टव्यं तथाचान्वितादिशब्दप्रयोगोबलान्वितंधनसंयुक्तमिति । इतरथा एवमेवावक्ष्यद्बलनामानि कुर्यादिति । स्वबलाद्बलार्थवाचिनामामन्त्याच्च पुरुषव्यक्तीनांदुःखधाने भेदे व्यवहारोच्छेदएवस्यात् । शूद्रस्य जुगुप्सितंकृपणकोदीनः शबरकइत्यादिस्वल्पत्वाद्बलाद्यर्थवाचिनामानन्त्याच्च ॥३१ ॥

---

(३१) वैश्यस्यधनसंयुक्तंशूद्रस्यतुजुगुप्सितम् ॥ (ख, ट, ठ)

————————शूद्रस्यप्रेष्यसंयुतम् ॥ (क, त, थ,)

(च, ग,) एतयोःपुस्तकयोःद्वावपि पाठौदृश्येते ॥

(२) सर्वज्ञनारायणः । मङ्गल्यवत् भद्रमित्यादि राज्ञः क्षत्रस्य बलसमन्वितं उदयवीरइत्यादि धनसंयुक्तं धन करंइत्यादि जुगुप्सितं पाण्डुरित्यादि ॥ ३१ ॥

(३) कुल्लूकः । ब्राह्मणादीनांयथाक्रमंमङ्गलबलधननिन्दावाचकानि शुभबलवसुदीनादीनि नामानि कर्तव्यानि॥३१॥

(४) राघवानन्दः । मङ्गल्यंमङ्गलदं श्रवणेन बलान्वितंबलसूचकं धनसूचकंधनवत्वख्यापकं जुगुप्सितांद्विजदास-द्विजगुप्तरूपम् ॥ ३१ ॥

(५) नन्दनः । मङ्गल्यंविष्णुमित्रादि । बलान्वितंपरंतपादि । धनसंयुक्तंनिधिपालादि । जुगुप्सितंपैलवकादि । अत्रनामधेयमित्यनुकर्षः । कारयेत्पिताऽन्योवा तत्स्थानीयः ॥ ३१ ॥

(६) रामचन्द्रः । मङ्गल्यमिति । नामकरणंत्रिभिराहब्राह्मणस्य नाम माङ्गल्यंशर्मान्तंस्यात्तद्यथा विष्णुशर्मेति नाम । क्षत्रियस्य नाम रक्षासमन्वितंबलान्वितंनाम तद्यथा नृसिंहवर्मेति । वैश्यस्य नाम पुष्टिवृद्धिसमन्वितंकुर्यात् धनपतिरिति नाम शूद्रस्य नाम प्रेष्यसंयुक्तंकुर्यात् तद्यथा कृष्णदासेति नाम ॥ ३१ । ३२ ॥

शर्मवद्ब्राह्मणस्य स्याद्राज्ञोरक्षासमन्वितम् ॥ वैश्यस्य पुष्टिसंयुक्तंशूद्रस्य प्रेष्यसंयुतम् ॥ ३२ ॥

(१) मेधातिथिः । अत्र स्वरूपग्रहणंपाठानुक्रमश्चादौ मङ्गल्यमेते शर्मशब्दाः । तथाचोदाहृतं । क्षत्रियादिनाम्नांतु नैतत्संभवति रक्षाशब्दस्य स्त्रीलिङ्गस्य श्रवणात्पुंसांसामानाधिकरण्यानुपपत्तेः तस्मादेकोपक्रमत्वात्समाचाराच्च सर्वत्रार्थ-ग्रहणंवाक्यभेदाच्च समुच्चयः यन्मङ्गल्यंतच्छर्मार्थवच्छर्मशरणमाश्रयः । सुखंचार्थग्रहणात्स्वामिदत्तभवभूत्यादिशब्दप-रिग्रहः इन्द्रस्वामीन्द्राश्रयः इन्द्रावतोपि तदाश्रयता प्रतीयतेएवंसर्वत्रोन्नेयम् । अथ कोयंहेतुर्वाक्यभेदात्समुच्चयइति । व्रीहिभिर्यजेत यवैर्यजेतेति किंन समुच्चयइति । उच्यते । लिङ्गदर्शनमात्रमेतत्पौरुषेयत्वात् । ग्रन्थस्य विकल्पेऽभि-प्रेतमङ्गल्यंशर्मवद्वेति लाघवादवक्ष्यत् । वाक्यभेदे हि द्विराख्यातोच्चारणंतद्गुरुभवति रक्षा परिपालनंपुष्टिर्वृद्धिगुप्तिश्च । गोवृ-द्धोधनगुप्तइति । प्रेष्योदासोब्राह्मणदासोदेवदासोब्राह्मणाश्रितोदेवताश्रितइति ॥ ३२ ॥

(२) सर्वज्ञनारायणः । एवंनामान्युक्त्वा तत्रेदमितिनित्यान्वितानि पदान्याह शर्मवदिति । अन्ते शर्मपदवत् रक्षासमन्वितंयतिरित्यादिवत् पुष्टिसंयुक्तं आप्योगोमीत्यादि धनबाहुल्यख्यातं प्रेष्यपदवत् प्रेष्यसंयुक्तं दासादि-पदवत् ॥ ३२ ॥

(३) कुल्लूकः । इदानीमुपपदनियमार्थमाह शर्मवद्ब्राह्मणस्येति । एषांयथाक्रमंशर्मरक्षापुष्टिप्रैष्यवाचकानि कर्तव्या-निशर्मवर्मभूतिदासादीन्युपपदानि कार्याणि । उदाहरणानि तु शुभशर्मा बलवर्मा वसुभूतिः दीनदास इति । तथा च यमः शर्म देवश्च विप्रस्य वर्म त्राता च भूभुजः । भूतिदत्तश्च वैश्यस्य दासःशूद्रस्य कारयेत् । विष्णुपुराणेऽप्युक्तं शर्मवद्ब्राह्मणस्यो-क्तंवर्मेति क्षत्रसंयुतम् गुप्तदासात्मकंनाम प्रशस्तंवैश्यशूद्रयोः ॥ ३२ ॥

(४) राघवानन्दः । एतान्येवोत्तरपदत्वेन वर्णानुरूपव्यवस्थित्या समाचारान्निगमयति शर्मवदिति यथाह यमः । शर्मदेवश्च विप्रस्य वर्मत्राता च भूभुजः । भूतिर्दत्तश्च वैश्यस्य दासःशूद्रस्य कारयेदिति भूतिपदंपुष्टेरुपलक्षणम् । एतेन पूर्वपदे नियमाभावः । द्व्यक्षरंचतुरक्षरंवा नामकुर्यादिति स्मृतेः । मङ्गलादिसूचकंदेवादीनांहर्षादिनामकार्यंशर्मादिपदंत्वर्थपरंतेन शर्मशरणमित्यादीति मेधातिथिः ॥ ३२ ॥

(३२.) प्रेष्यसंयुतम्=प्रैष्यसंयुतम् (अ, द)
राज्ञोरक्षासमन्वितम्=राज्ञोवर्मसमन्वितम् (ब)

(५) नन्दनः । मकारान्तरमाहशर्मेति । शर्मवत्सुखवत्सुखप्रकाशनसमर्थमित्यर्थः । एवमुत्तरत्र । यथासुमतिसुमन्तुरित्यादि । रक्षासमन्वितंधृतराष्ट्रादि । पुष्टिःसमृद्धिस्तेनसंयुक्तम् । तेनधनसंयुक्तमित्यनेननपुनरुक्तिः । यथासीरभद्रादि । भैष्यसंयुतंपशुसखादि । अन्ये तु शर्मादीनांशब्दपरत्वमेवमन्यन्ते । नत्वर्थपरत्वम् ॥ ३२ ॥

स्त्रीणांसुखोद्यमक्रूरंविस्पष्टार्थंमनोहरम् ॥ मङ्गल्यंदीर्घवर्णान्तमाशीर्वादाभिधानवत् ॥ ३३ ॥

(१) मेधातिथिः । पुंसइत्यधिकृतत्वात्स्त्रीणामप्राप्तौ नियम्यते । सुखेनोद्यते सुखोद्यंस्त्रीबालैरपि यत्सुखेनोच्चारयितुंशक्यते तत्स्त्रीणांनाम कर्तव्यं बाहुल्येन स्त्रीणांस्त्रिभिर्बालैश्च व्यवहारस्तेषांच स्वकारणसौष्ठवाभावान्न सर्वसंस्कृतशब्दमुच्चारयितुंशक्तिरस्ति । अतोविशेषेणोपदिश्यते तत्तुपुंसामसुखोद्यमभ्यनुज्ञायते । उदाहरणंमङ्गलदेवीचारुदती सुवदनेत्यादि प्रत्युदाहरणंशर्मिष्ठा सुश्लिष्टाङ्गीति । अक्रूरमक्रूरार्थवाची क्रूरार्थवाचिक्रूरार्थंडाकिनीपरुषेति । विस्पष्टार्थंयस्यार्थोव्याख्यानगम्यो न भवति श्रुतएव विदुषामविदुषांवार्थप्रतीतिंकरोत्य विस्पष्टार्थंयथा कामनिधाकारीषगन्ध्येति । कामस्य निधेव निधा तया कामस्तत्रैव तिष्ठतीति । एवंयावन्नव्याख्यातंतावन्नावगम्यते । एवंकारीषगन्धेर्दुहिताकारीषगन्ध्येति व्याख्यानमपेक्ष्यते मनोहरंचित्ताल्हादकरंश्रेयसीविपरीतंतु काणाक्षी शर्मवती रुद्रवतीतिमङ्गलविपरीतमभागा मंदभागेति दीर्घोवर्णोन्तेयस्य विपरीतंशरत् आशिषंवदतीत्याशीर्वादमभिधानशब्दः तयोर्विशेषणसमासस्तद्यस्मिन्नास्ति विद्यते तदाशीर्वादाभिधानवत्सपुत्राबहुपुत्राकुलवाहिकेति एतेह्यर्थाआशीर्विषयाविपरीताअप्रशस्ता अलक्षणेति । अथमङ्गलस्याशीर्वादस्य च कोविशेषः । न कश्चिद्वृत्तपूरणार्थंतु भेदेनोपादानम् ॥ ३३ ॥

(२) सर्वज्ञनारायणः । सुखोद्यंदुरुच्चाराक्षररहितं अक्रूरंहिंसादितीक्ष्णार्थशून्यं विस्पष्टार्थंशीघ्रेणार्थप्रत्यायकं मनोहरंप्रीतिजनकार्थवत् मङ्गल्यंशुभहेतुत्वसूचकं दीर्घवर्णान्तमीकाराद्यन्तं आशीर्वादाभिधानवत् । आशीर्वादाभिधायिप्रत्ययादियुक्तं यशोदेत्यादि स्त्रीणां अत्रवचनरूपसमुच्चये तात्पर्यं किंचैकद्विरूपवत्त्वे ॥ ३३ ॥

(३) कुल्लूकः । स्त्रीणामिति । सुखोच्चार्यमक्रूरार्थवाचिव्यक्ताभिधेयंमनःप्रीतिजननंमङ्गलवाचिदीर्घस्वरान्तंआशीर्वाचकेनाभिधानेन शब्देनोपेतंस्त्रीणांनाम कर्तव्यंयथा यशोदादेवीति ॥ ३३ ॥

(४) राघवानन्दः । सुखोद्यंअनायासोच्चार्यंअक्रूरंप्रीतिजनकंशर्मदायशोदेत्यादि ॥ ३३ ॥

(५) नन्दनः । सुखोद्यंसुखेन वदितुमीरयितुंशक्यंयशोदादि । अक्रूरंसुमित्रादि । विस्पष्टार्थंचित्राङ्गदादि । मनोहरंचारुमत्यादि । मङ्गल्यंकल्याणादि । दीर्घवर्णान्तंसुमङ्गलादि । आशीर्वादाभिधानवत्आशीर्वाचकशब्दयुक्तंसुभद्रादि । अत्रापि नामधेयंस्यादित्यनुकर्षः ॥ ३३ ॥

(६) रामचन्द्रः । स्त्रीणामिति । स्त्रीणांकन्यानांनाम सुखोद्यमिति । सुखेनोच्चारणीयमित्यर्थः अक्रूरंक्रूरत्वरहितमिति ॥ ३३ ॥

चतुर्थे मासि कर्त्तव्यंशिशोर्निष्क्रमणंगृहात् ॥ षष्ठेऽन्नप्राशनंमासि यद्वेष्टंमङ्गलंकुले ॥ ३४ ॥

(१) मेधातिथिः । जन्मचतुर्थमासे गृहाद्बहिर्निष्क्रमणमादित्यदर्शनंशिशोर्बालस्य कर्तव्यम् । त्रीन्मासानन्तर्गर्भगृहएव वासयेत् । शिशुग्रहणंशूद्रस्यापि प्राप्त्यर्थं । एवंषष्ठे मास्यन्नप्राशनंपञ्चमासान्क्षीराहारएव । यद्वा कुलेदारकस्य श्रेयस्यंमङ्गल्यंपूतना शकुनिकैकवृक्षोपहारादि प्रसिद्धंकालविशेषे वा तत्कर्तव्यमयंच संस्कार शेषः तेन नामधेयमुक्त-

लक्षणव्यतिरेकेणापि यथा कुलधर्मलभ्यते । इन्द्रस्वामी इन्द्रशर्मा इन्द्रभूमि इन्द्रघोषइन्द्ररातइन्द्रविष्णुइन्द्रदेवइन्द्रज्योतिइन्द्रयशाइत्यादि कुलभेदेनोपपन्नंभवति ॥ ३४ ॥

(२) **सर्वज्ञनारायणः** । जन्मदिनाच्चतुर्थे गृहात् प्रसवगृहात् । जन्मदिनादेव षष्ठे मास्यन्नप्राशनंयच्च गृह्योक्तविधानवदन्नभक्षणम् । यद्वेष्टमिति । अयनमपि यत्कर्णवेधादिइष्टमपेक्षितमनिर्दिष्टकालंकर्म यच्च मङ्गलं शुभंकरंशिशूनां कुले तेषु तेषु कुलेष्वसाधारणंकर्म तदपिषष्ठएवेत्यर्थः ॥ ३४ ॥

(३) **कुल्लूकः** । चतुर्थे मासीति । चतुर्थे मासे बालस्य जन्मगृहान्निष्क्रमणमादित्यदर्शनार्थंकार्यम् । अन्नप्राशनंच षष्ठे मासे ऽथवाकुलधर्मत्वेन यन्मङ्गलमिष्टंतत्कर्तव्यंतेनोक्तकालादन्यकालेपिनिष्क्रमणम् । तथा च यमः ततस्तृतीये कर्तव्यंमासि सूर्यस्य दर्शनम् । सकलसंस्कारशेषैश्चायंतेननामांशर्मादिकमप्युपपदंकुलाचारेण कर्तव्यम् ॥ ३४ ॥

(४) **राघवानन्दः** । निष्क्रमणंसूर्यावलोकनार्थम् । ततस्तृतीये कर्तव्यंमासि सूर्यस्य दर्शनमिति यमोक्तेःतृतीयं चतुर्थोपलक्षणं इष्टंकुलधर्मतया ॥ ३४ ॥

(५) **नन्दनः** । निष्क्रमणं गृहाच्चन्द्रादित्यदर्शनम् । अयमपिकश्चित्संस्कारविशेषः । कुले कुलधर्मानुसारेणेत्यर्थः ॥ ३४ ॥

(६) **रामचन्द्रः** । कुले स्वकुले यद्वाइष्टंमङ्गलंचूडाख्यंकुलाचारमित्यर्थः ॥ ३४ ॥

चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः ॥ प्रथमेब्दे तृतीये वा कर्तव्यंश्रुतिचोदनात् ॥ ३५ ॥

(१) **मेधातिथिः** । चूडा शिखा तदर्थंकर्म चूडाकर्म केषु चिन्मूर्द्धदेशेषु केशानांस्थापनंरचना विशेषश्चैतच्चूडाकर्मोच्यते । प्रथमवर्षेतृतीये वा यहसौस्थित्याविकल्पः श्रुतिनोदनादित्यनुवादस्तन्मूलतयैव प्रामाण्यस्योक्तत्वात् । अथवा श्रुतिशब्देन नविध्यायकान्येव वाक्यान्युच्यन्ते । किंतर्हिमन्त्रास्ते च चूडाकर्मव्यञ्जनाइतिवदहष्टंप्रकाशयन्तियत्क्षुरेण मार्जयेतेत्यादि तेन समन्त्रकमेतत्कर्मेत्युक्तंभवति विशेषापेक्षायां गार्ह्योविधिरङ्गीक्रियते । अतः शूद्रस्य नायंसंस्कारः द्विजातिग्रहणाच्च अनियतकालंतु केशवपनंशूद्रस्यार्थप्राप्तं न निवार्यते ॥ ३५ ॥

(२) **सर्वज्ञनारायणः** । सर्वेषांद्विजातीनां न विप्रस्यैवधर्मतः कुलधर्मानुसारेण शिखाकरणात् प्रथमेब्देतृतीयेवाब्दे कर्तव्यं श्रुते मन्त्ररूपायाश्चोदनालिङ्गतायाःप्रवर्तत्वात् मन्त्रश्च यत्र बाणाःसंपतन्ति कुमाराविशिखाइवेति । बाणवत्संपतनयोग्यता तृतीयएव संभवतिइति कुमारपदेनाभिधाने ततःप्रागवस्थापि विज्ञायेतेति विशिष्टाविशिष्टशिखाइति विशेषेणकृतमिति ॥ ३५ ॥

(३) **कुल्लूकः** । चूडाकर्मेति । चूडाकरणंप्रथमे वर्षे तृतीये वा द्विजातीनांधर्मतो धर्मार्थंकार्यंश्रुतिचोदनात् । यत्रबाणाः संपतन्तिकुमाराविशिखाइवेति मन्त्रलिङ्गात्कुलधर्मानुसारेणायंव्यवस्थितविकल्पः । अतएवाश्वलायनगृह्यम् । तृतीयेवर्षेचौलंयथाकुलधर्मंवा ॥ ३५ ॥

(४) **राघवानन्दः** । चूडाकर्म केषुचिन्मूर्धदेशेषुकेशानांस्थापनविशेषः । तृतीये वर्षे चौलमित्याश्वलायनोक्तेः । श्रुतिचोदनात् । यत्रबाणाःसंपतन्ति कुमाराविशिखाइवेति श्रुतेः । सशिखंतेषांछेदनम् ॥ ३५ ॥

(५) **नन्दनः** । चूडा शिखा । द्विजातिग्रहणेन शूद्रस्य पर्युदासः । धर्मतःकुलधर्मतः । चूडानिवेशदेशविशेषश्च गोत्र-

---

* शेष=विषय (अ)

विशेषेण स्मर्यते दक्षिणतश्चूडा वसिष्ठानांवामतोभारद्वाजानामुभयतः काश्यपानामिति । चूडाकर्मण्यादरातिशयंमकाशयति श्रुतिचोदनादिति । श्रूयतेहि । कुमाराविशिखाइवेति ॥ ३५ ॥

(६) रामचन्द्रः । सर्वेषांद्विजातीनांधर्मतः चूडाकर्मप्रथमेब्दे कार्यंश्रुतिनोदनात् तृतीयवर्षेकुर्यात् ॥ ३५ ॥

गर्भाष्टमेऽब्देकुर्वीत ब्राह्मणस्योपनायनम् ॥ गर्भादेकादशे राज्ञोगर्भात्तुद्वादशे विशः ॥ ३६ ॥

(१) **मेधातिथिः** । गर्भस्थस्य यः संवत्सरस्ततआरभ्यते योष्टमोद्वः गर्भशब्देसाहचर्यात्संवत्सरोलक्ष्यते नहि मुख्यया वृत्या गर्भस्य संवत्सरोष्टमइति व्यपदेशंलभते तस्मिनौपनायनंब्राह्मणस्य कुर्वीत । उपनयनमेवौपनायनंस्वार्थिकोऽणअन्येषामपिदृश्यत इत्युत्तरपदस्य दीर्घः छांदसत्वाद्वोभयपदवृद्धिः उपनयनमिति हि एषसंस्कारोवेदविदांगृह्यस्मृतिषु प्रसिद्धोमौञ्जीबन्धनापरपर्यायः । उपनीयते समीपंप्राप्यते येनाचार्यस्य स्वाध्यायाध्ययनार्थंकुड्यंकटंवा कर्तुंतदुपनयनं । विशिष्टस्य संस्कारकर्मणोनामधेयमेतत् । गर्भादेकादशे राज्ञः । गर्भात्प्रभृति गर्भाद्वा परोयएकादशोद्वस्तत्र क्षत्रियस्य कर्तव्यम् । राजशब्दोयंक्षत्रियजातिवचनोनाभिषेकादिगुणयोगमपेक्षते ग्रन्थेषु तथा प्रयोगदर्शनाद्ब्राह्मणादिजातिशब्दसाहचर्याच्चगुणविधिषु च क्षत्रियशब्ददर्शनात्क्षत्रियस्य तुमौर्वीति यस्तु राजशब्दस्य क्षत्रियादन्यत्र जनपदेश्वरे वैश्यादौ प्रयोगः । सगौणइति वक्ष्यामः मुख्ये चासति गौणस्य ग्रहणम् । तथाच गृह्यकारः । अष्टमेवर्षेब्राह्मणमुपनयेदेकादशेक्षत्रियं द्वादशे वैश्यमिति । भगवांश्च पाणिनिः एवमेव प्रतिपन्नोराज्ञः कर्म राज्यंइति राज्यशब्दस्य राज्यशब्दंप्रतिप्रकृतित्वंब्रुवन्नेव जनपदैश्वर्येण राजशब्दार्थप्रसिद्धिमाह । एवंगर्भात्तु द्वादशेब्दे विशः वैश्यस्य ॥ ३६ ॥

(२) **सर्वज्ञनारायणः** । तन्मातुर्गर्भग्रहणदिनादष्टमे तत्रापि उपनयनंपित्राकार्यमसंभवेन्येनापि कारयितव्यमित्येतदर्थमुपनयनमिति प्रयोजनव्यापारः पित्रादीनांदर्शितः राज्ञः कर्तव्यः ॥ ३६ ॥

(३) **कुल्लूकः** । गर्भाष्टमइति । गर्भवर्षादष्टमे वर्षे ब्राह्मणस्योपनायनंकर्तव्यम् । उपनयनमेवोपनायनमन्येषामपि दृश्यतइति दीर्घः । गर्भैकादशे क्षत्रियस्य गर्भद्वादशे वैश्यस्य ॥ ३६ ॥

(५) **नन्दनः** । नामधेयादिषु जन्मारभ्यकालसंख्योक्ता उपनयनेसामाभूदितिगर्भग्रहणम् । गर्भशब्देनच गर्भसहचरितोब्दोऽपिविवक्षितः । गर्भाष्टमे गर्भादारभ्याष्टमे । उपनयनमेवोपनायनम् । उपनयनात्पूर्वमेव जन्मतएव ब्राह्मण्यमस्तीति सूचितम् ब्राह्मणस्येत्यब्दसंख्यानियमस्यायमभिप्रायः ब्रह्मक्षत्रविशांगायत्रत्रैष्टुभजागतैश्छन्दोभिः । सहजत्वंश्रूयते तैरेव तेषामुपनयनम् तस्मादुपनयनाब्दाअपिस्वस्वच्छन्दोऽक्षरसमसंख्याभवितुमर्हन्तीति ॥ ३६ ॥

(६) **रामचन्द्रः** । अतः परंद्विजानांउपनयनकालमाहब्राह्मणस्योपनयनंगर्भाष्टमेऽब्दे गर्भाष्टमे वर्षे उपनयनंकार्यं राज्ञः गर्भातएकादशे वर्षे वा कर्तव्यम् । वैश्यस्य गर्भात्द्वादशे वर्षे जन्मद्वादशे वा वर्ष इत्यर्थः ॥ ३६ ॥

ब्रह्मवर्चसकामस्य कार्यंविप्रस्य पञ्चमे ॥ राज्ञोबलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे ॥ ॥ ३७ ॥

(१) **मेधातिथिः** । पितृधर्मेणापत्यंव्यादिशति ब्रह्मवर्चसी मे पुत्रः स्यादिति पुत्रकामनया पुत्रोव्यपदिष्टस्तत्काभस्येति पुत्रस्य बालत्वान्नैवंविधा कामना संभवति । न नुचैवमन्यकृतात्कर्मण अन्यस्य फलेऽभ्युपगम्यमानेऽकृताभ्यागमदोषापत्तिः । अकाम्यमानंच फलंभवत्येतदप्युत्क्रान्तशब्दप्रमाणन्यायमर्यादयोच्यते । नैषदोषः श्येनवदेतद्भविष्यति श्येनमभिचरन्करोत्यभिचर्यमाणश्च म्रियते । अथोच्यतेकामिनएवैतत्फलंशत्रुमरणंहि यजमानः कामयते तदेव

चाप्नोतीति नाकर्तृगामिता फलस्य । अत्रापि विशिष्टपुत्रवत्तालक्षणमुपनेतुरेवफलंयथा पुत्रस्यारोग्येण पितुः प्रीतिः एवंब्रह्मवर्चसेनाप्यतोऽधिकृतस्य कर्तुश्च पितुरेव तत्फल मन्वयानुसारीहि शास्त्रार्थावसायइहच पुत्रस्य फलकामेनैवंकर्तव्यमित्यन्वयः प्रतीयते । नच यथाश्रुतान्वयापरोकिंचनप्रमाणमस्ति । एतेन पितुरौर्ध्वदेहिकः पुत्रकृतउपकारोव्याख्यात स्तत्रापिहि पुत्रः कर्ता पितृतृप्तिश्च फलंतथाच लिङ्गमात्मावै पुत्रनामासीति । पित्रैव हि तावच्छ्राद्धमात्मसंप्रदान कंवस्तुतः कृतमेव येनाप्यन्न्योत्पादनमेवमर्थमेवकृतं । यथा सर्वत्वारे मृतस्यार्भकावमानाद्ये पराश्चपदार्थास्तेष्वपि यजमानस्यैव कर्तृत्वंब्राह्मणाः संस्थापयतयज्ञमिति प्रैषेण दक्षिणाभिर्वरणेन वा प्रयोगसमाप्तावृत्विजांविनियोक्तृत्वादेवमिहापि तादर्थ्येन पुत्रस्योत्पादनाद्यत्श्राद्धादिकंपित्रर्थंक्रियते पित्रैव तत्कृतंभवति अध्ययनविज्ञानसंपन्नब्रह्मवर्चसंबलंसामर्थ्यमाभ्यन्तरंबाह्यंचोत्साहशक्तिर्महाप्राणताचेतदाभ्यन्तरंबाह्यंच हस्त्यश्वरथपदातिकोशसंपत्तद्युक्तत्वांगाभ्युच्चयंसांयौगिकानांवार्थानामिति । ईहाचेष्टा बहुना धनेन कृषिवाणिज्यादिव्यवहारः सर्वत्र गर्भादिसंख्याच वर्षाणांगर्भादिति ह्यनुवर्तते ॥ ३७ ॥

(२) **सर्वज्ञनारायणः** । सुततपः प्रभृतिभिरुत्कर्षोब्रह्मवर्चसं पञ्चमेजन्मत आरभ्य बलार्थिनःसामर्थ्यातिशयार्थिनः ईहाकृष्यादावुद्यमःतदतिशयार्थिनः अत्र बालस्य तादृक्कामनायाअसंभवेपि तत्पित्रादिकामनायाएव तदीयत्वोपचारेणोपनयन सामानाधिकरण्यात् एतादृक्कामस्य पुत्रस्येत्यधिकरणेषष्ठीवा ॥ ३७ ॥

(३) **कुल्लूकः** । ब्रह्मवर्चसकामस्येति । वेदाध्ययनतदर्थज्ञानादि प्रकर्षकृततेजोब्रह्मवर्चसंतत्कामस्य ब्राह्मणस्य गर्भपञ्चमे वर्षे उपनयनंकार्यम् क्षत्रियस्य हस्त्यश्वादिराज्यबलार्थिनोगर्भषष्ठे वैश्यस्य बहुकृष्यादिचेष्टार्थिनोगर्भाष्टमे गर्भवर्षाणामेव प्रकृतत्वात् । यद्यपि बालस्य कामना न संभवति तथापि तत्पितुरेव तद्गतफलकामना तस्मिन्नुपचर्यते ॥ ३७ ॥

(४) **राघवानन्दः** ब्रह्मवर्चसकामस्येति । ब्रह्मवर्चसंवृत्तस्वाध्यायनिमित्तंतेजः बलार्थिनःबलंहस्त्यश्वादि शारीरंवा । ईहार्थिनःईहाकृष्यादिचेष्टा । अत्र फलंएकस्य तूभयत्वे संयोगपृथक्त्वमिति न्यायेन । अस्यार्थःएकस्य कर्मणउभयार्थे वचनद्वयेन श्रुतेः । फलसाधनाभेदइत्यर्थः ॥ ३७ ॥

(५) **नन्दनः** । ब्रह्मतेजोब्रह्मवर्चसंपञ्चमे गर्भात्पञ्चमेऽब्दे ॥ ३७ ॥

(६) **रामचन्द्रः** । विप्रस्य पञ्चमे वा वर्षे कार्यं राज्ञः षष्ठे वा वैश्यस्य अर्थार्थिनः अष्टमे वा वर्षेकार्यम् ॥ ३७ ॥

आषोडशाद्ब्राह्मणस्य सावित्री नातिवर्त्तते ॥ आद्वाविंशात्क्षत्रबन्धोराचतुर्विंशतेर्विशः ॥ ३८ ॥

(१) **मेधातिथिः** । एवंतावन्मुख्यकाम्यावुपनयनकालावुक्तौ । इदानींपितुरभावे व्याध्यादिना वा कथंचिदनुपनीते माणवके कालातिपत्तावनुपनेयता प्राप्ता सत्यपि कालस्याङ्गत्वेतदभावेऽधिकारनिवृत्ते यथा सायंप्रातःकालातिपत्तावग्निहोत्रस्याकरणे । अतोविहितकालव्यतिरेकेण प्रतिप्रसवार्थमिदमारभ्यते यावत्षोडशंवर्षंगर्भादारभ्य तावद्ब्राह्मणस्योपनयनार्हता न निवर्तते । सावित्रीशब्देन तदनुवचनसाधनमुपनयनाख्यंकर्म लक्ष्यते नातिवर्तते नातिक्रान्तकालंभवतीत्यर्थः । एवमाद्वाविंशात्क्षत्रबन्धोः क्षत्रियजातियस्येत्यर्थः बन्धुशब्दोयंक्वचित्कुत्सायांप्रवर्तते । यत्त्वंकथंचेच्छ ब्रह्मबन्धाविति ज्ञातिवचनोयथा ग्रामताजनताचैवबन्धुताच सहायता महेंद्रस्याप्यगम्यासौ भूमिभागभुजांकृतः । द्रव्यवचनोजात्यन्ताच्छबन्धुनीति तत्र पूर्वयोरर्थयोरसंभवात्तृतीयोर्थोगृह्यते । द्वाविंशतेःपूरणोद्वाविंशोब्दः तद्धितार्थः । आचतुर्विंशतेर्विशः प्राप्नोप्यत्र पूरणप्रत्य-

योवृत्तानुरोधान्नक्तः प्रतीयतेतुतदर्थः । नहि समुदायविषयायाश्चतुर्विंशतिसंख्यायाअवधित्वेन संभवःतदवयवस्तु चतुर्विंशोभवति संवत्सरोवधिः । आङ्मभिविधौ व्याचक्षते लिङ्गदर्शनंचोदाहरन्ति गायत्र्या ब्राह्मणमुपनयीत त्रिष्टुभा राजन्यं-जगत्या वैश्यमित्येतेषांच छंदसामियता कालेन द्वौ पादौ पूर्यैते। तावन्तंकालंबलवन्ति नत्यजन्ति स्वाश्रयभूतान्वर्णान्। तृतीये तु पादेऽप्रक्रांतेगतरसान्यतिवयांसि न्यूनसामर्थ्यानि भवन्ति समाप्तिमुपयान्ति यथा पञ्चाशतास्थविरोमनुष्यइत्यतश्च-नैतेन वयमुपासितानीति त्यजन्ति तंवर्णंततो न गायत्रोब्राह्मणो न त्रैष्टुभोराजन्यो न जागतोवैश्यइति। सविता देवता यस्याऋचः सा सावित्री सा च गायत्रीद्रष्टव्या। प्रदर्शिता गृह्याच्चएवंक्षत्रियस्य त्रिष्टुप् सावित्री आकृष्णेनेति वैश्यस्य जगती ॥ विश्वारूपाणीति ॥ ३८ ॥

(२) **सर्वज्ञनारायणः**। यथोक्तसमयउपनयनाशक्तौ षोडशाब्द समाप्तिपर्यन्तं ब्राह्मणस्य सावित्री नातिवर्तते नातिक्रान्तकालाभवति। आङत्राभिविधौ तच्छब्दः पादाक्षरवदब्दसमवाय उपनयनमिति हारीतवचने गायत्री त्रिष्टुब्जगतीनां क्रमात् ब्राह्मणादिवर्णसंबन्धिनां छन्दसांपादाक्षरसङ्ख्यै रब्दैरुपनयनस्य विधेर्मुख्यासंभवे च तद्वैगुण्यस्य काले युक्तत्वे क्षत्रबन्धोःक्षत्रजातेः ॥ ३८ ॥

(३) **कुल्लूकः**। आषोडशादिति। अभिविधावाङ् ब्राह्मणक्षत्रियविशामुक्ताष्टमैकादशद्वादशवर्षद्वैगुण्यस्य विवक्षितत्वात्। षोडशवर्षपर्यन्तंब्राह्मणस्य साविञ्यर्थेवचनमुपनयनंनातिक्रान्तकालंभवति। क्षत्रियस्य द्वाविंशतिवर्षपर्यन्तं वैश्यस्य चतुर्विंशतिवर्षपर्यन्तम्। अत्र मर्यादायामाङ्केचिद्व्याख्यापयन्ति यमवचनदर्शनात्। तथा च यमः पतिता यस्य सावित्रीदशवर्षाणिपञ्च च। ब्राह्मणस्य विशेषेण तथा राजन्यवैश्ययोः ॥ प्रायश्चित्तं भवेदेषांप्रोवाच वदतांवरः। विवस्वतः सुतःश्रीमान्यमोधर्मार्थतत्त्ववित् ॥ सशिखंवपनंकृत्वा व्रतंकुर्यात्समाहितः। हविष्यंभोजयेदन्नंब्राह्मणान्सप्त पञ्चवा ॥ ३८ ॥

(४) **राघवानन्दः**। उपनयनस्योत्तरावधिंद्योतयन्सार्थवादंतैःसह संसर्गंनिषेधति आषोडशादितित्रिभिः। आङत्र-मर्यादायां गर्भादित्यनुवर्तते नातिवर्तते अतिक्रान्तता सती प्रायश्चित्तंविनाऽधिकारित्वेन सावित्रीपतितान्प्रतिसावित्री नाधिगच्छति। पतिता यस्य सावित्री दशवर्षाणि पञ्चचेत्युपक्रम्य। सशिखंवपनंकृत्वा व्रतंकुर्यात्समाहितः। हविष्यंभोजयेदन्नंब्राह्मणान्सप्त पञ्च चेति। यमोक्तप्रायश्चित्तम् ॥ ३८ ॥

(५) **नन्दनः**। आषोडशाब्दात्आकारोऽत्राभिविधिवचनः मुख्यकल्पसंख्याद्वैगुण्यात्सावित्रीप्रधानत्वादुपनयनस्य सावित्रीतितस्य भेदोपचारनिर्देशः। क्षत्रबन्धोः क्षत्रियस्येति। यावच्चतुर्विंशतेराचतुर्विंशात् ॥ ३८ ॥

(६) **रामचन्द्रः**। उपनयनार्थकार्यव्यग्रतया स्वस्य स्वस्य कालातिक्रमोभवेच्चेत्तर्हि किंकर्तव्यंतत्राह। ब्राह्मणस्य षोडशवर्षपर्यन्तंऔपनायनिकः कालः क्षत्रियस्यद्वाविंशतिवर्षपर्यंतं विशश्चतुर्विंशतिवर्षपर्यन्त उपनयनकालः। अतः सावित्रीपतितोभवेत् ॥ ३८ ॥

अतऊर्ध्वंत्रयोप्येते यथाकालमसंस्कृताः ॥ सावित्रीपतिताव्रात्याभवन्त्यार्यविगर्हिताः ॥ ३९ ॥

(१) **मेधातिथिः**। अस्मात्कालादूर्ध्वंपरेण त्रयोप्येते वर्णाः ब्राह्मणादयोयथाकालंयस्योपनयनकालसूत्रानुकल्पिकेप्यसंस्कृताअकृतोपनयनाः सावित्री पतिता। उपनयनभ्रष्टाभवन्तिव्रात्याश्च संज्ञयाऽऽर्यैः शिष्टैः विगर्हिताः निंदिताः व्रात्यसंज्ञाव्यवहारप्रसिद्ध्यर्थोयंश्लोकः। अनुपनेयत्वंतु पूर्वेण च सिद्धमुक्तमार्यैर्निन्दितइति ॥ ३९ ॥

(२) **सर्वज्ञनारायणः**। यथाकालंषोडशादर्वाक् सावित्री पतिताः कालातिक्रमेण सावित्र्याअपगताः व्रात्याव्रात्यसंज्ञाः संज्ञान्वोत्तरव्यवहारोपयुक्ताः आर्याः पापेभ्यः आराद्गताः ॥ ३९ ॥

(३) **कुल्लूकः**। अतऊर्ध्वमिति । एतेब्राह्मणादयोयथाकालंयोयस्यानुकल्पिकोप्युपनयनकालउक्तः षोडशवर्षादिपर्यन्तंतत्रासंस्कृतास्तदूर्ध्वंसावित्रीपतिताउपनयनहीनाःशिष्टगर्हिताव्रात्यसंज्ञाभवन्ति । संज्ञाप्रयोजनंच व्रात्यानां याजनंकृत्वेत्यादिनाव्यवहारसिद्धिः ॥ ३९ ॥

(४) **राघवानन्दः** व्रात्याइत्यपूर्वसंज्ञा ॥ ३९ ॥

(५) **नन्दनः**। अतः षोडशाब्दादिभ्यः असंस्कृताअनुपनीताः सावित्रीपतिताः। सावित्र्युपदेशहीनाः। व्रात्याः व्रात्यनामानः ॥ ३९ ॥

(६) **रामचन्द्रः** । पितैवोपनयेत्पुत्रांस्तदभावे पितामहः। तदभावे पितृव्यः स्यात्तदभावे तु सोदरः ॥ कालातिक्रमेप्रायश्चित्तमाह अतऊर्ध्वंषोडशद्वाविंशवर्षादूर्ध्वंएते द्विजाः संस्कारहीनाः शूद्रप्रायाभवन्ति । अकृतप्रायश्चित्तमाह योगीश्वरः । व्रात्यस्तोमात्कृतोः व्रात्यस्तोमसंज्ञात्क्रतोर्यज्ञादित्यादिनाकृते तु । वात्यस्तोमयज्ञउपनयनाधिकारोभवत्येव॥ ३९॥

नैतैरपूतैर्विधिवदापद्यपि हि कर्हिचित् ॥ ब्राह्मान्यौनांश्च सम्बन्धान्नाचरेद्ब्राह्मणैःसह ॥४०॥

(१) **मेधातिथिः**। कापुनरेषांनिन्देत्याह। एतैर्व्रात्यैरपूतैरकृतप्रायश्चित्तैर्विधिवद्यादृशोविधिः।प्रायश्चित्ते शास्त्रेणोपदिष्टः तान्श्चारयित्वा त्रीन्कृच्छ्रानित्यापद्यपि हिकर्हिचित्कस्यांचिदप्यापदि नसंबन्धानाचरेत्कुर्यात्तैः सह किंसर्वसंबन्धनिषेधोनेत्याह। ब्राह्मान्यौनांश्च । ब्रह्मवेदः। तन्निमित्तान्संबन्धान्याजनाध्यापनप्रतिग्रहान्। नते याज्याः न याजकाः कर्तव्याः एवंनाध्याप्यानैतेभ्योध्येतव्यंवेदार्थविदुषः प्रतिग्रहाधिकारादेषोपि ब्राह्मसंबन्धोभवति। यौनः संबन्धः कन्यायादानादाने। ब्राह्मणग्रहणंप्रदर्शनार्थम्। अस्माच्च दोषदर्शनाद्व्रात्यता परिहारार्थे पितुरभावोपि व्युत्पन्नबुद्धिनामाणवकेनाप्यात्मनात्मोपनाययितव्यइति प्रतीयते । तथाच । श्रुतिः सत्यकामोजाबालः सहहारिद्रुमतंगौतममियाय ब्रह्मचर्यंभवति वक्ष्यामीति स्वयमांचार्यमभ्यर्थितवानुपनयनार्थम् ॥ ४० ॥

(२) **सर्वज्ञनारायणः** । विधिवशं व्रात्याहोमादिनायेनपूतास्तैः ब्राह्मान्वैदिकानध्यापनादिसंबन्धान्यौनान्कन्यादानप्रतिग्रहरूपान् ब्राह्मणइति वचनं क्षत्रादेस्तत्संबन्धे तादृक्दोषाभावकथनार्थं ब्राह्मणैरित्यपिपाठे तद्दोषाधिक्योपदर्शनार्थं तदिति ग्राह्यम् ॥ ४० ॥

(३) **कुल्लूकः**। नैतैरिति । एतैरपूतैर्व्रात्यैर्यथाविधि प्रायश्चित्तमकृतवद्भिःसहापत्कालेऽपिकदाचिदध्यापनकन्यादानादीन्संबन्धान्ब्राह्मणोनानुतिष्ठेत् ॥ ४० ॥

(४) **राघवानन्दः**। ब्राह्मान्ब्रह्म वेदस्तन्निमित्तकान्अध्ययनाध्यापनादीन्यौनान्ब्राह्मायष्टौ विवाहान् ॥ ४० ॥

(५) **नन्दनः**। अपूतैरकृतप्रायश्चित्तैः । ब्राह्मानध्ययनाध्यापनादीन्यौनान्कन्यादानप्रतिग्रहादीन् । अत्रब्राह्मणशब्दस्त्रैवर्णिकवचनएतच्छब्देन प्रकृतवर्णत्रयपरामर्शिनासामानाधिकरण्यावगमात् ॥ ४० ॥

(६) **रामचन्द्रः**। आपद्यपिकर्हिचिदपूतैः अकृतप्रायश्चित्तैः एतैः त्रिभिर्वर्णैः सह ब्राह्मणः ब्राह्मान्संबन्धान्नाचरेत्वेदाध्ययनसंबन्धान् न कारयेत् च। पुनः यौनान्योनिसम्बन्धान्विवाहादीन्एतैः अकृतप्रायश्चित्तैः सह न आचरेत् न वर्तयेत् ॥ ४० ॥

कार्ष्णरौरवबास्तानि चर्माणि ब्रह्मचारिणः ॥ वसीरन्नानुपूर्वेण शाणक्षौमाविकानि च ॥ ४१॥

(१) **मेधातिथिः** । कृष्णशब्दोयद्यपि कृष्णगुणयुक्तवस्तमात्रे वर्तते कृष्णा गौः कृष्णः कम्बलइति तथापीह स्मृत्यन्तराद्रौरवसाहचर्याच्च मृगएव प्रतीयते रुरुर्मृगजातिविशेषः बस्तः छागः सर्वत्र विकारेऽवयवेवा तद्धितः । कृष्णाजिनं ब्राह्मणोरुरुचर्मक्षत्रियोवैश्यश्छागचर्म वसीरन्नाच्छादयेयुः शणक्षुमोर्णास्तत्र कृता नि च वस्त्राणि । च शब्दः समुच्चये । तत्रानुत्तरीयाणि शाणादीनि चर्माण्युत्तरीयाण्यौचित्यात्कौपीनाच्छादनानि च वस्त्राण्यानुपूर्व्येण नैकैकस्य सर्वैरभिसंबन्धोनापिव्युत्क्रमेण । प्रथमस्य ब्रह्मचारिणः प्रथमेन चर्मणा वस्त्रेणच संबन्धोद्वितीयस्य द्वितीयस्थानस्थेन । तथाच दर्शितं । ननु चान्तरेणापि वचनंलोकतएवैतत्सिद्धंचूर्णिताक्षिप्तदग्धानांवज्रानिलहुताशनैरिति यथाक्रमंसंबन्धप्रतिपत्तिःचूर्णिता वज्रेणाक्षिप्तानिलेनदग्धाऽग्निनेति । उच्यते भवेदेवंयदि भेदेन निर्देशस्यात्समसङ्ख्यात्वंच । इहतु ब्रह्मचारिणइत्येकशब्दोपादानात्तत्क्रमोवगम्यते त्रयश्च ब्रह्मचारिणः षडनुदेशिनः त्रीणि चर्माणि वस्त्राणि । आनुपूर्वग्रहणे तु सति वाक्यान्तरोपात्तः क्रमआश्रीयते । तथाच चर्मभिः संबध्यपुनर्ब्रह्मचारिपदमावर्त्यवासोभिः संबध्यते । ततः संख्यास.. यसिद्धिः । ईदृशएव विषये भगवता पाणिनि ना यत्नः कृतोयथासंख्यमनुदेशः समानामिति ॥ ४१ ॥

(२) **सर्वज्ञनारायणः** । कृष्णः कृष्णोमृगः तस्य चर्माचैरुत्पादितं रौरवंरुरोः बास्तंछागस्य एतान चर्माणि विप्रादयःक्रमाद्वसीरन्नुत्तरीयाणि कुर्युः अजिनंत्वेवोत्तरमित्यापस्तम्बवचनात् । तथाशणातसीमेषरोमसूत्र कृतानि वासांसि क्रमाद्वसीरन् अर्थादधः षण्णांविधेयानांत्रिषु यथाक्रमभावभ्रमनिरासार्थमानुपूर्वेणेति त्रिषु त्रिषु क्रमइत्यर्थः ॥ ४१ ॥

(३) **कुल्लूकः** । कार्ष्णइतिविशेषानभिधानेऽपि मृगविशेषोरुरुसाहचर्यात् हारिणमैणेयंवा कार्ष्णंवाब्राह्मणस्येत्यापस्तम्बवचनाच्च कृष्णमृगोगृह्यते । कृष्णमृगरुरुच्छागचर्माणि ब्रह्मचारिणउत्तरीयाणि वसीरन् चर्माण्युत्तरीयाणीतिगृह्यवचनात् । तथाशणक्षुमामेषलोमभवान्यधोवसनानि ब्राह्मणादयः क्रमेण परिदधीरन् ॥ ४१ ॥

(४) **राघवानन्दः** । ब्राह्मणादीनांब्रह्मचारिनियतवस्त्रमेखलायज्ञोपवीतदण्डानुपादानपरिमाणसहितानाह कार्ष्णेति सप्तभिः । कार्ष्णंकृष्णंहरिणंसंबंधिहारिणंऐणेयं वा कृष्णंब्राह्मणस्येति आपस्तम्बस्मरणात् । रुरुर्व्याघ्रःरुरुर्नखबिलक्षदिति क्रमदीपिकायाम् बस्तोऽजःएतान्युत्तरीयाणि शाणादीनि वसनानि तत्र शाणंशणसूत्रनिर्मितंक्षौमंक्षुमाएरण्डिपर्यायःआविकंअविर्मेषस्तल्लोमजं अत्र यथासङ्ख्यंविवक्षितम् ॥ ४१ ॥

(५) **नन्दनः** । कृष्णः कृष्णमृगः रुरुः पृषतमृगः बस्तश्छागविशेषः । तत्संबन्धीनिकार्ष्णरौरवबास्तानि । शणविकारः शाणम् क्षुमाऽतसी । तद्विकारःक्षौमंअविश्छागविशेषोरक्तवर्णः तद्रोमकृतमाविकम् । चर्माण्युत्तरीयाणिशाणादीन्यन्तरीयाणीतिविवेकः ॥ ४१ ॥

(६) **रामचन्द्रः** । ब्राह्मणस्य कार्ष्णाजिनसंज्ञंचर्म धार्यं । क्षत्रस्य रौरवंरुरुजातीयमृगस्य चर्म रौरवाजिनंधार्यं । वैश्यस्य ब्रह्मचारिणःबास्तंअजाजिनंधार्यं आनुपूर्व्येण ब्राह्मणक्षत्रियवैश्यैःएतानि चर्माणि शाणक्षौमाविकानि पक्षान्तरे पूर्वेषामभावेवसीरन्आच्छादयेयुः । शाणस्यइदंशाणंक्षुमाअतसी तस्यइदंक्षौमं ॥ ४१ ॥

मौञ्जीत्रिवृत्समा श्लक्ष्णा कार्या विप्रस्य मेखला ॥ क्षत्रियस्य तु मौर्वीज्या वैश्यस्य शणतान्तवी ॥ ४२ ॥

(१) **मेधातिथिः** । मुञ्जस्तृणजातिस्तद्विकारोमौञ्जीसाब्राह्मणस्य मेखला रशना कर्तव्यामध्यबन्धनी त्रिवृत्त्रिगुणा

समा नक्वचित्सूक्ष्मा न क्वचित्सूक्ष्मतरा किंतर्हिसर्वतएव समा श्लक्ष्णा तनुत्वगुणयुक्ता परिघृष्टा च। क्षत्रियस्य पुनर्ज्या धनुर्गुणाः साकदाचिच्चर्ममयी भवति कदाचित्तृणमयी भङ्गोमादिरज्जुर्वा तदर्थमाह। मौर्वीति तया धनुषोवतारितया श्रोणीबन्धः कर्तव्यः यद्यपि त्रिवृत्तादिर्गुणोमेखला मात्राश्रितोमौंञ्ज्याएव तथापि ज्यायाः स्वरूपनाशप्रसंगान्नभवति। शणतन्तुविकारः शणतान्तवी छांदसत्वादुत्तरपदवृद्धिः अथवाकेवलात्तन्तुशब्दात्तद्धिते कृते तदन्तस्य शणैः संबन्धः। शणानांतान्तवीति। विकृतेर्विकारः शणतान्तवी॥ प्रकृतिसंबन्धितयाव्यपदिश्यते। गव्यंघृतंदेवदत्तस्य पौत्रइति तंतुः सूत्रंशणमौञ्जीवत्कर्तव्या। गृह्यकारैर्वैश्यमेखलाया स्त्रिवृत्तादिधर्मः सुस्पष्टएवोक्तः॥ ४२॥

(२) सर्वज्ञनारायणः। मौञ्जीमुञ्जत्वक्कृता त्रिवृत् त्रिगुणवलिता समामध्येनिम्नोन्नतशून्या श्लक्ष्णा मृदुस्पर्शा मौर्वीनामौषधिभेदकृतावाधनुषि गुणत्वेनार्पिता अतएवास्यां त्रिवृतेतिनान्वितं ज्यात्वापगमापत्तेः शणतन्तुकृतायांतु त्रिवृत्त्वमन्वीयतेऽविरोधात्॥ ४२॥

(३) कुल्लूकः। मौञ्जीति। मुञ्जमयी त्रिगुणासमगुणत्रयनिर्मिता सुखस्पर्शा ब्राह्मणस्य मेखला कर्तव्या क्षत्रियस्य मुर्वामयी ज्याधनुर्गुणरूपा मेखला। अतोज्यात्वविनाशापत्तेस्त्रिवृत्त्वंनास्तीति मेधातिथिगोविन्दराजौ। वैश्यस्य शणसूत्रमयी। अत्रत्रैगुण्यमनुवर्ततएव त्रिगुणाः प्रदक्षिणामेखलाइति सामान्येन प्रचेतसा त्रैगुण्याभिधानात्॥ ४२॥

(४) राघवानन्दः। मौञ्जीति मुञ्जः शरत्वक्त्रिवृत्त्रिगुणासमा गुणगतान्यूनातिरिक्तपरिमाणा श्लक्ष्णामृद्वीमौर्वी ज्या मूर्वातृणविशेषः तद्विकृतिः ज्याया धनुषः सैव त्रिगुणा प्रदक्षिणा मेखला भवतीति प्रचेतसोवचनात् मेखलात्रयं तुल्यंत्रयाणाम्॥ ४२॥

(५) नन्दनः। त्रिवृत् त्रिवृद्गुणासमा सगुणा श्लक्ष्णा परिघर्षणेन सुखस्पर्शा मूर्वायाविकारोमौर्वीतिज्याविशेषणम्॥ ४२॥

(६) रामचन्द्रः। मुञ्जोद्भवामौञ्जीत्रिवृत्मेखला समा ग्रन्थिरहिता ब्राह्मणस्य कार्या। क्षत्रियस्य मौर्वीज्या मेखला कार्या। मुरस्तृणविशेषःमुरोद्भवामौर्वीज्या मेखला कार्या। वैश्यस्य शणतान्तवतृणस्य वा मेखलातन्तोःसूत्रस्य वा मेखला कार्या। शणतान्तवमिश्रिता वा कार्या॥ ४२॥

मुञ्जालाभे तु कर्तव्याः कुशाश्मन्तकबल्वजैः॥ त्रिवृता ग्रन्थिनैकेन त्रिभिःपञ्चभिरेव वा॥४३॥

(१) मेधातिथिः। आदिशब्द लोपमत्रस्मरन्ति। मुञ्जाद्यलाभइति कर्तव्याइति च बहुवचनमुपपन्नतरंभिन्नजातिसंबन्धितया सुव्यक्तोमेखलाभेदः एकजातिसंबन्धित्वेतुकेवलव्यक्तिभेदालम्बनंबहुवचनंस्यात्। विप्रस्येति च प्रकृतस्य बहुवचनेन परिणामः कर्तव्यः विकल्पश्चैकविषयत्वे स्यात् नच संभवत्यां गतौ विकल्पोयुक्तः तेन मुञ्जाभावेकौशी। कौश्याऽभावेऽश्मन्तकेनशाणानांबल्वजैस्तृणौषधिवचनात्कुशादयः प्रतिनिधिनियमश्चायंकुशाद्यभावेप्यन्यन्मुञ्जादिसदृशमुपादेयंत्रिवृता ग्रन्थिनैकेन। नायंग्रन्थिसंख्याभेदोवर्णभेदेन। अपि तु प्रत्येकंविकल्पः। कुशादिमेखलास्वप्ययंग्रन्थिभेदोधर्मभेदश्चोद्यमानः स्मृत्यन्तरसमाचारस्यानित्यत्वेपि द्रष्टव्यः॥ ४३॥

(२) सर्वज्ञनारायणः। अश्मन्तकाइतिउलपः मुञ्जालाभइति विशेषनिर्देशात् मौर्वीशाण्यलाभे क्षत्रियवैश्याभ्यां अन्यःतत्सदृशः प्रतिनिधिः वाचनिकएवोपादेयः केचित्तु प्रतिनिधौ त्रित्वदर्शनात् वर्णक्रमेणाव्वयमाहुः। तथा च मुञ्जालाभइत्यादिपदंलुप्तंद्रष्टव्यं सा च मौञ्जी त्रिगुणवलिता त्रिवृता कटौ त्रिवेष्टनेन धार्यात्रिभिरपि च वेष्टनैरेकोग्रन्थिः त्रयो-वा पञ्च वा वाशब्दोविप्रादिक्रमेणान्वयनिरासार्थः। केचित्प्रवरसङ्ख्याव्यवस्थया ग्रन्थिविकल्प इत्याहुः एतच्च प्रति

निधिसंनिधिपाठेऽपि मुख्येनाप्यन्वितं तत्रापि ग्रन्थ्यादेरपेक्षितत्वात् वित्तस्य दैव्योग्रन्थिर्माविश्रसदिति ग्रन्थिंकृत्वेति मौघामेव लौगाक्षिस्मरणाच्च ॥ ४३ ॥

(३) कुल्लूकः । मुञ्जालाभेत्विति । कर्तव्याइति बहुवचननिर्देशाद्ब्रह्मचारित्रयस्य प्रकृतत्वान्मुख्यालाभेत्रिष्वप्यपेक्षायाः समत्वात् । कौशादीनांच तिसृणांविधानान्मुञ्जाद्यलाभइति बोद्धव्यम् । कर्तव्याइति बहुवचनमुपपन्नतरं भिन्नजातिसंबन्धितयेति ब्रुवाणस्य मेधातिथेरपिबहुवचनपाठः संमतः मुञ्जाद्यलाभे ब्राह्मणादीनांत्रयाणांयथाक्रमंकुशादिभिस्तृणविशेषैर्मेखलाःकार्याः । त्रिगुणेनैकग्रन्थिनायुक्तास्त्रिभिर्वापञ्चभिर्वा । अत्र च वाशब्दनिर्देशाद्ग्रन्थीनां न विप्रादिभिः क्रमेणसंबन्धः किंतु सर्वत्र यथाकुलाचारंविकल्पः । ग्रन्थिभेदश्चायंमुख्यामुख्यापेक्षासंभवाद्ग्रहीतव्यः ॥ ४३ ॥

(४) राघवानन्दः । उक्तमुख्यालाभे यथासङ्ख्यं प्रतिनिधीनाह मुञ्जेति मुञ्जस्य मुञ्जाद्यस्य अलाभे मुञ्जादिवेषीकामिति श्रुतेः मुञ्जं अश्मन्तको मालवतृणमिति नारायणसर्वज्ञः बल्वजइति बगई इतिप्रसिद्धतृणं वा शब्दोत्र यादृच्छिकार्थः तेन खले चालनीन्यायात् ग्रन्थीनांविप्रादिषु न क्रमनियमः यथा कुलाचारंव्यवस्था ॥ ४३ ॥

(५) नन्दनः । मुञ्जग्रहणंमूर्वाशणतन्त्वोरप्युपलक्षणम् । कुशादयोविप्रादीनांयथासंख्यम् । अश्मन्तकंदारुविशेषः बल्वजस्तृणविशेषः । अत्रमेखलेत्यनुषज्यते । मेखलानांमुख्यानामनुकल्पोक्तानांचग्रन्थिविकल्पउत्तरार्धेनोक्तः । त्रिवृतात्रिगुणेन । एकेन ग्रन्थिना त्रिभिर्ग्रन्थिभिः पंचभिर्वोपलक्षिता । त्रयाणांवर्णानांनियमेन ग्रन्थिविकल्पोऽयमुक्तः । नात्रयथासंख्यंवाशब्देन सर्वेषामेकविषयत्वावगमात् ॥ ४३ ॥

(६) रामचन्द्रः । मुञ्जालाभे ब्राह्मणस्य कुशैःकार्या मेखला । क्षत्रियस्य अश्मन्तकःतृणविशेषस्तस्य वा मेखला कार्या । वैश्यस्य बल्वजैःवा मेखला कार्या । एकेन त्रिवृता मौञ्जी कार्या त्रिभिर्वाग्रन्थिभिःत्रिवृता कार्या पञ्चभिर्ग्रन्थिभिः त्रिवृता वा कार्या ॥ ४३ ॥

कार्पासमुपवीतंस्याद्विप्रस्योर्ध्ववृतंत्रिवृत् ॥ शणसूत्रमयंराज्ञोवैश्यस्याविकसौत्रिकम् ॥ ४४ ॥

(१) मेधातिथिः । उपवीतशब्देन वासोविन्यासविशेषउच्यते । वक्ष्यत्युद्धृते दक्षिणे पाणाविति तच्च धर्म मात्रंतस्य नकार्पासता संभवत्यतोधर्मेण धर्मी लक्ष्यतेयस्यासौविन्यासस्तत्कार्पासमुच्यते । अर्शआदित्वाद्वा मत्वर्थीयोकारः कर्तव्यःउपवीतवदुपवीतमिति। ऊर्ध्ववृत्तंऊर्ध्वादिशंप्रतिवर्त्यते वेष्ट्यते त्रिवृत्त्रिगुणंकर्तनिकाभ्योलब्धसूत्रभावस्यत्रिगुणीकृतवेदमूर्धनि वर्तनंविधीयते। संहत्य तन्तुत्रयमूर्ध्ववेष्टनेन रज्ज्वाकारंकृत्वातेनोपवीतंकुर्यात्साचरज्जुरेकैव धारयितव्यातिस्रःपञ्चसप्तवा यज्ञसंबन्धाद्धितयज्ञोपवीताख्यांलभते। यज्ञार्थोयमुद्यतइति भक्तयोपचर्यते तत्रेष्टिपशुसोमानांयज्ञरूपतयैकत्वादेकतन्तुकंक्रियते । अग्नित्रयसाध्यत्वादहीनैकाहसत्रभेदाद्वात्रितन्तुकंसोमसंस्थानांसप्तसंख्यत्वात्सप्तवा तन्तवः त्रीणिसवनानित्रिसंध्येनेति पञ्चसूत्राभावेपि पद्मादिनापि कर्तव्यम् । स्मृत्यन्तरएवमुक्तं । अविको मेषस्तस्य सूत्रंतेन कृतंआविकसूत्रिकंअध्यात्मादित्वाठञ्कर्तव्यः । अविकसूत्रिकमिति वा पठितव्यंतत्र च मत्वर्थीयेठना रूपसिद्धिः ॥ ४४ ॥

(२) सर्वज्ञनारायणः । उपवीतं ब्रह्मसूत्रं त्रिवृत् त्रिसूत्रकं तच्चोर्ध्ववृतंप्रदक्षिणवलितं तान्यपि सूत्राणि त्रिभिः सूत्रैः कृतानीति स्मृत्यन्तरसिद्धं तानि चाप्रदक्षिणवलितानि सामर्थ्यात् आविकेन सूत्रेण कृतमाविकसूत्रम् ॥ ४४ ॥

(३) कुल्लूकः । कार्पासमिति । यदीयविन्यासविशेषस्योपवीतसंज्ञांवक्ष्यति तद्धर्मिब्राह्मणस्य कार्पासंक्षत्रियस्य शणसूत्रमयंवैश्यस्य मेषलोमनिर्मितम् । त्रिवृदिति त्रिगुणंकृत्वा ऊर्ध्ववृतंदक्षिणावर्तितं एतच्चसर्वत्रसंबध्यते यद्यपि

गुणत्रयमेवोर्ध्ववृतंमनुनोक्तंतथापितन्त्रिगुणीकृत्य त्रिगुणंकार्यम्। तदुक्तंछन्दोगपरिशिष्टे। ऊर्ध्वंतुत्रिवृतंकार्यं तन्तुत्रयमधोवृतम्। त्रिवृतंचोपवीतंस्यात्तस्यैकोग्रन्थिरिष्यते। देवलोप्याह यज्ञोपवीतंकुर्वीत सूत्राणि नवतन्तवः ॥ ४४ ॥

(४) राघवानन्दः। किंच कार्पासमिति ऊर्ध्ववृतंपूर्वंऊर्ध्वाकारेण वृतंत्रिगुणितंयत्सूत्रंअधोवृतंत्रिवृत्तदेव त्रिवृत्कार्यम्। तदुक्तंछन्दोगपरिशिष्टे ऊर्ध्वंतुत्रिवृतंकार्यंतंतुत्रयमधोवृतम्। त्रिवृतंचोपवीतंस्यात्तस्यैकोग्रन्थिरिष्यतइति॥ अतोनवगुणंप्राप्तम्। तथा च देवलः यज्ञोपवीतं कुर्वित सूत्राणिनवतन्तवइति। कार्पासवत्शणसूत्रादावपि ज्ञेयम् ॥ ४४ ॥

(५) नन्दनः। कार्पासंकार्पासविकारःकार्पाससूत्रमितियावत्। ऊर्ध्ववृतंसव्यहस्ततलेविन्यस्यदक्षिणहस्ततलेचोर्ध्वमावर्तितमूर्ध्ववृतंत्रिवृदितिच शणाविकसूत्रयोरपिमत्येकं विशेषणे। आविकसूत्रिकंअविभवंआविकंरोमेतियावत्। सूत्रिकंसूत्रनिर्मितमविरोमसूत्रनिर्मितमित्यर्थः ॥ ४४ ॥

(६) रामचन्द्रः। विप्रस्यउपवीतंकार्पासंस्यात्। कार्पाससूत्रस्येत्यर्थः। त्रिवृत्ऊर्द्ध्ववृतंकार्यंतत्त्रिवृत्जातंतत्अधःसकाशात् तत्नवगुणंऊर्ध्वंकार्यंउदीच्यानांमतम्। अथदाक्षिणात्यानांमतम्। पूर्वतन्तुत्रयंअधोवृतंअधःसकाशात्उर्द्ध्वंकार्यंतत्त्रिवृतंऊर्ध्वंनवगुणंअधःकार्यम् ॥ ४४ ॥

ब्राह्मणोबैल्वपालाशौ क्षत्रियोवाटखादिरौ ॥ पैलवौदुम्बरौ वैश्यो दण्डानर्हन्ति धर्मतः ॥ ४५॥

(१) मेधातिथिः। सत्यपि द्वन्द्वनिर्देशे गुणविधिष्वेकत्वश्रवणात्केशान्तकइति प्रतिगृह्येप्सितंदण्डमिति च विकल्पितमेकदण्डधारणंप्रतीयते बैल्वः पालाशोब्राह्मणस्य दण्डइति गृह्ये गौतमीये चैकदण्डग्रहणमेवोक्तम्। इह केवला दण्डसत्ता श्रूयते॥ दण्डानर्हन्तिदण्ड्याएते ब्रह्मचारिणांयोग्याःकस्यांक्रियायांइत्येतदत्र चोक्तंउत्तरत्र भविष्यति प्रतिगृह्येप्सितमिति। तस्मिंश्च ग्रहणेदण्डस्योपायत्वाद्विवक्षितमेकत्वमतइह द्विवचननिर्देशोदेवश्चेद्वर्षेद्वहवः कर्षिकुर्युरिति यथा प्राप्तानुवादः बिल्वपलाशवटखदिरपीलूदुम्बरवृक्षजातिविशेषनामधेयानि। बिल्वस्य विकारोवयवोवा बैल्वः। एवंसर्वत्रदर्शनार्थाश्चैते यज्ञियावा सर्वेषामिति वचनात्। एतान्दण्डान्वक्ष्यमाणे कार्ये अर्हन्ति। धर्मतः शास्त्रतः ॥ ४५ ॥

(२) सर्वज्ञनारायणः। धर्मतः कुलशीलानुरोधेन द्वयोर्द्वयोरन्यतरोबिल्वादिर्यस्य कुले यःपरिगृहीतइत्यर्थः। अतएवात्रन विकल्पोसवर्णेपि न द्विद्विदण्डसमुच्चयः शङ्क्यः प्रतिगृह्येप्सितं दण्डमिति वक्ष्यमाणत्वात् औदुम्बरःकाष्ठसाहचर्यान्न ताम्रमयः ॥ ४५ ॥

(३) कुल्लूकः। ब्राह्मणइति। यद्यपि द्वन्द्वनिर्देशेन समुच्चयावगमाद्धारणमपि समुच्चितस्यैव प्राप्तंतथापि केशान्तिकोब्राह्मणस्यदण्डः कार्यइति तथा प्रतिगृह्येप्सितंदण्डमिति विधावेकत्वस्य विवक्षितत्वात्। बैल्वःपालाशोवादण्डइति वासिष्ठे विकल्पदर्शनात्। एकस्यैव दण्डस्य धारणंविकल्पितयोरेवैकब्राह्मणसंबन्धात् समुच्चयोद्वन्द्वेनानूद्यते ब्राह्मणादयोविकल्पेन द्वौ द्वौ दण्डौ वक्ष्यमाणकार्ये कर्तुमर्हन्ति ॥ ४५ ॥

(४) राघवानन्दः। तेषांदण्डान्विधत्ते ब्राह्मणइति। बैल्वपालाशावित्यादिषु द्वन्द्वसाहित्यबोधनेपि विकल्पः। वक्ष्यति प्रतिगृह्येप्सितंदण्डमिति विधेयगतैकवचननिर्देशात्। बैल्वः पालाशोवाब्राह्मणदण्डः इति वासिष्ठेविकल्पदर्शनाच्च ॥ ४५ ॥

(५) नन्दनः। अत्र द्वन्द्वनिर्देशेऽपिदण्डानांविकल्पएव विवक्षितः प्रतिगृह्येप्सितंदण्डमित्येकवचननिर्देशो न वक्ष्यमाणत्वात्। पैप्पलआश्वत्थः। धर्मतः समानधर्मयोगादित्यर्थः। ब्राह्मणोबैल्वदण्डंधर्मतोऽर्हत्युभयोरपि ब्रह्मवर्चससंबन्धसामान्यात्। ब्रह्मवर्चसाधिकरणंब्राह्मणः। बैल्वस्तुब्रह्मवर्चसविकारः असौवाऽऽदित्योयतोऽजायत ततोबिल्वउदतिष्ठत-

सयोन्येवब्रह्मवर्चसमवरुन्द्धेइतिश्रुतेः । ब्राह्मणः पालाशंचार्हत्युभयोर्गायत्रत्वात्गायत्रोवै ब्राह्मणः गायत्रः पर्णइति श्रूयते । वाटदण्डंक्षत्रियोधर्मतोऽर्हत्युभयोरेकवर्णत्वात् । तदुक्तमैतरेयब्राह्मणेक्षत्रंवाएतद्वनस्पतीनांयन्न्यग्रोधः क्षत्रंवैराजन्यइति। क्षत्रियः खादिरंचार्हति धर्मतउभयोर्बलिष्ठत्वसामान्यात् । वैश्यः पैप्पलंदण्डंधर्मतोऽर्हत्यश्वत्थवैश्ययोरोजःसंबन्धसामान्यात् मरुतोवाएतदोजोयदश्वत्थः । मरुतोवैदेवानांविशइतिहिश्रुतेः । वैश्यऔदुम्बरंचार्हतिधर्मतउभयोरपि पशुसंबन्धसामान्यात् पशुपालोवैश्यः प्रसिद्धः पशुविकारउदुम्बरः ऊर्क्पशवइतिश्रुतेः । पैलवेतिपाठे समानधर्मयोगोन्वेष्टव्यः पीलोर्गुडफलः स्रंसीत्यमरः ॥ ४५ ॥

(६) **रामचन्द्रः** । द्विजानांदण्डानाह । ब्राह्मणस्य बैल्वपालाशौ भवतः पालाशस्याभावेबिल्वःबिल्ववृक्षस्य दण्डःकार्यः । राज्ञःवाटखादिरौ वटवृक्षस्य वा खदिरवृक्षस्य वा दण्डः । वैश्यस्य पैलवः । पीलुवृक्षोद्भवोवा दण्डःउदुम्बरवृक्षजोवा दण्डः । एतान्धर्मतःधारयितुमर्हन्ति ॥ ४५ ॥

केशान्तिको ब्राह्मणस्य दण्डः कार्यः प्रमाणतः ॥ ललाटसंमितोराज्ञः स्यात्तु नासान्तिको विशः ॥ ४६ ॥

(१) **मेधातिथिः** । आकारविशेषवचनोदण्डशब्दः दीर्घकाण्डसम्मितायामंदण्डइत्युच्यते । कियत्तस्य दैर्घ्यमित्यपेक्षायामाह केशान्तंगच्छति प्राप्नोति केशान्तगोमूर्ध्वप्रमाणः पादाग्रादारभ्य मूर्द्धावधिः केशान्तगः केशावाऽन्तोऽस्येति केशान्तकः समासान्तःककारः प्रमाणतः प्रमाणेनानेन युक्तोदण्डः कार्यः कारयितव्योब्राह्मणस्याचार्येण ललाटसंमितः ललाटान्तमितः ललाटान्तप्रमाणः ललाटमात्रे चतुरङ्गुलेन मीयमानस्य दण्डशब्दवाच्यत्वाभावादेवंव्याख्यायते पादाग्रादारभ्य यावल्ललाटान्तंप्राप्तः । एवंविशोवैश्यस्य नासान्तगइति ॥ ४६ ॥

(२) **सर्वज्ञनारायणः** । केशाएवान्तोइवच्छेदोयस्य ललाटोपरिस्थकेशपर्यन्तइत्यर्थः ललाटसंमितो ललाटादधोमितः ॥ ४६ ॥

(३) **कुल्लूकः** । केशललाटनासिकापर्यन्तपरिमाण क्रमेणब्राह्मणादीनांदण्डाः कर्तव्याः ॥ ४६ ॥

(४) **राघवानन्दः** । दण्डानांपरिमाणमाह केशेति । केशान्तगइति मेधातिथिः । केशान्तश्च मूर्धावधिःब्रह्मरन्ध्रमिति यावत् । केशान्तिकइति पाठेपि सएवार्थः ॥ ४६ ॥

(५) **नन्दनः** । ललाटसंमितः ललाटान्तिकः ॥ ४६ ॥

(६) **रामचन्द्रः** । दण्डस्य प्रमाणमाह । ब्राह्मणस्य दण्डःप्रमाणतःकेशान्तिकःकार्यः । राज्ञः दण्डःललाटसम्मितःललाटपर्यन्तउक्तः । विशःवैश्यस्यदण्डः नासान्तिकःनासिकापर्यन्तंस्यात् ॥ ४६ ॥

ऋजवस्तेतु सर्वेस्युरव्रणाःसौम्यदर्शनाः ॥ अनुद्वेगकरानृणांसित्वचोनाग्निदूषिताः ॥ ४७ ॥

(१) **मेधातिथिः** । ऋजवः अवक्राः सर्वे इत्यनुवादः प्रकृतत्वाविशेषात् । अव्रणाअच्छिद्राः सौम्यंप्रियंकरं दर्शनमेषान्ते सौम्यदर्शनाः वर्णपरिशुद्धाः । अकण्टकिताश्च अनुद्वेगकराः नैतैःकश्चिदुद्वेजयितव्यः श्वा वा मनुष्योवा नृणामिति प्रदर्शनार्थं । सत्व च अतष्टाः अनग्निदूषिताः वैद्युतेन दावोत्थेन वाऽस्पृष्टाः ॥ ४७ ॥

(४६) केशान्तिको=केशान्तगो (मेधा) । एवं नासान्तगइति ।

(२) **सर्वज्ञनारायणः**। अव्रणामध्ये काष्ठभागे छेदशून्याः सौम्यदर्शनाभयहेतवः अनुद्वेगकरानिम्नोन्नतादिदोषेणाधृत्यहेतवः नाग्निदूषिता अग्निसंबन्धेन भ्रष्टपूर्वरूपाः ॥ ४७ ॥

(३) **कुल्लूकः**। ते दण्डाअव्रणाअक्षताः शोभनदर्शनाः सवल्कला अग्निदाहरहिता भवेयुः ॥ ४७॥

(४) **राघवानन्दः**। किंच ऋजवइति ऋजुताऽवक्रता अव्रणाः छिद्ररहिता अनुद्वेगकरा नातिस्थूलाः ॥ ४७ ॥

(५) **नन्दनः**। ते दण्डाः ॥ ४७ ॥

(६) **रामचन्द्रः**। अग्निदूषिता दण्डा न कार्याः न व्रणाः ॥ ४७॥

प्रतिगृह्येप्सितंदण्डमुपस्थायच भास्करम् ॥ प्रदक्षिणंपरीत्याग्निंचरेद्भैक्षं यथाविधि ॥ ४८ ॥

(१) **मेधातिथिः**। प्रावृतेषु चर्मसु मेखलाबन्धनंकर्तव्यम्। आबध्यमेखलामुपनयनंकर्तव्यंकृतेचोपवीते दण्डग्रहणंदण्डंगृहीत्वा भास्कर आदित्यउपस्थेयः अभिमुखंस्थित्वाऽऽदित्यदैवतैरभिधानमादित्यस्य कर्तव्यंगृह्यान्मन्त्रावगमः अन्या चेतिकर्तव्यता ततएव यत्सर्वसाधारणंतदिहोच्यते प्रदक्षिणंपरीत्यसर्वतोगत्वाग्निंचरेत्कुर्यात्। भैक्षंभिक्षाणां समूहोभैक्षंतच्चरेद्याचेत यथाविधीति वक्ष्यमाणविध्यनुवादः भिक्षाशब्देन स्वल्पपरिमाणंभक्ताद्युच्यते ॥ ४८ ॥

(२) **सर्वज्ञनारायणः**। ईप्सितं उपनयनकालएव नियतत्वेनपरिगृहीतजातीयं मध्ये विजातीयं ग्रहणनिषेधार्थमेतत् उपस्थाय सौरैर्मन्त्रैः परीत्य वेष्टयित्वा त्रयमप्येतत्भिक्षाङ्गंयथाविधिवक्ष्यमाणविधिना ॥ ४८ ॥

(३) **कुल्लूकः**। न च तैःप्राणिजातमुद्वेजनीयमित्याह प्रतिगृह्येप्सितमिति । उक्तलक्षणं यामुमिष्टंदण्डंगृहीत्वाऽऽदित्याभिमुखंस्थित्वाग्निंप्रदक्षिणीकृत्य यथाविधि भैक्षं याचेत् ॥ ४८ ॥

(४) **राघवानन्दः**। भास्करोपस्थानंभिक्षायाः पूर्वकालेपीत्याह उपस्थायेति । परीत्याग्निंअग्निंपरिक्रम्य प्रदक्षिणंयथास्यात्तथा न सव्यापसव्येन भिक्षेत भैक्षंभिक्षासमूहः ॥ ४८ ॥

(५) **नन्दनः**। वैकल्पिकयोरीप्सितम् । भिक्षैव भैक्षंभिक्षांयाञ्चांचरेत्कुर्यात् । ब्रह्मचारीतिशेषः । केचिदेतद्भैक्षाचरणमुपनयनाङ्गमाहुरन्येतु नित्यम्। नित्यपक्षे भास्करोपस्थानमग्निप्रदक्षिणंचाह्निककर्मोपलक्षणम् ॥ ४८ ॥

(६) **रामचन्द्रः**। ईप्सितंदण्डंयथोक्तंदण्डंप्रगृह्य भास्करमुपस्थाय कस्य ब्रह्मचारिणइतिउपस्थायअग्निंप्रदक्षिणंपरीत्यकृत्वा यथा विधिवद्भैक्ष्यंचरेत् ॥ ४८ ॥

भवत्पूर्वंचरेद्भैक्षमुपनीतोद्विजोत्तमः॥ भवन्मध्यंतु राजन्यो वैश्यस्तु भवदुत्तरम् ॥ ४९ ॥

(१) **मेधातिथिः**। भिक्षा प्रार्थनावाक्यमत्र भैक्ष्यशब्देनोच्यते। तस्य हि भवच्छब्दपूर्वता संभवति । भक्तादेरन्नस्य स्त्रीणांच प्रथमंभिक्षमाणतयोपदेशात्प्रार्थनायां च प्रार्थ्यमानस्य संबोध्यत्वात्संबुद्धिविभक्त्यन्तः स्त्रीलिङ्गोभवच्छब्दः प्रयोक्तव्यः क्रमएव चात्रादृष्टाऽर्थोनियम्यते यथार्थंतु शब्दप्रयोगो भवति भिक्षांदेहीति कुतः पुनः संस्कृतशब्दार्थलाभः यावतास्त्रियः संबोध्यन्तेताश्च संस्कृतंनावबुध्यन्ते । नित्यमुपनयनंतस्य च शब्दोच्चारणमङ्गत्वेनोक्तमितिनित्याश्चापभ्रंशाः न तैर्नित्यस्य संयोगउपपद्यते। तथैव च शिष्टाअसाधुरूपश्रुत्यैकदेशसादृश्येन साधून्संस्मृत्यार्थंप्रतियन्त्यसाधुरनुमानेन वाचकइति दर्शनेन गाशब्दोहि सादृश्याद्गोशब्दमनुमापयति । ततोर्थप्रतिपत्तेरेवंस्त्रियः सादृश्यादसाधुभ्यःसाधूनुत्पन्नसंबन्धात्स्मृत्वातेभ्योर्थंप्रत्येष्यन्ति । स्वल्पाक्षरंचैतत्पदत्रयंसर्वत्रप्रसिद्धंस्त्रीभिरपि सुज्ञानं। एवंभवन्मध्यंक्षत्रियः भिक्षांभवति देहीति । तथा वैश्योभवच्छब्दउत्तरमस्येति भवदुत्तरंवाक्यंसमासार्थः। उपनीतइति भूतप्रत्ययनिर्देशादाह्निकेपिवृत्त्यर्थे भैक्ष्यचरणेऽयमेव विधिरिति दर्शयति। एवप्रोक्तोहि द्विजातीनामौपनायनिकइत्यत्रोपनयनप्रकरणमुपसंहरन्नु-

पनयनाङ्गस्यापि भैक्ष्यस्यायमेव विधिरित्याह । अन्यथाकरणादुपनयनाङ्गमेवैतत्स्याद्दिवा न प्रत्ययसामर्थ्यात्प्रकरणं-बाधित्वा वृत्त्यर्थएव भैक्ष्यउपनीयमानस्यतदङ्गंयद्भैक्षंयच्चाहरहर्वृत्त्यर्थंतत्र सर्वत्रायंधर्मः ॥ ४९ ॥

(२) **सर्वज्ञनारायणः** । चरेदिति याच्ञांलक्षयति । अतःकर्मभिर्भैक्षमिति तेन भिक्षांदेहीति वाक्यरचनार्थसिद्धा तस्य वाक्यस्यादिमध्यान्तेषु वर्णक्रमेण सगौरवसंबोधनार्थी भवत्पदंकार्यमिति विधियुते तच्च संबुध्यंतं सामर्थ्यात् स्त्रीप्रत्ययवच्च तासामेव भिक्षाप्रार्थनविषयतया विधानात् तेन भवति भिक्षांदेहीत्यादि प्रार्थनावाक्यम् ॥ ४९ ॥

(३) **कुल्लूकः** । ब्राह्मणोभवति भिक्षांदेहीति भवच्छब्दपूर्वंभिक्षांयाचन्वाक्यमुच्चारयेत् । क्षत्रियोभिक्षांभवति देहीति भवन्मध्यं । वैश्योभिक्षांदेहि भवतीति भवदुत्तरम् ॥ ४९ ॥

(४) **राघवानन्दः** । प्राथमिकभिक्षाङ्गभूतसंबोधनपदस्य स्थानंनियमयन्तद्दात्रीराहद्वाभ्यां । भवत्पूर्वमिति । भवति भिक्षांदेहि भिक्षां भवतिदेहि भिक्षांदेहिभवतीत्येवंप्रयोगः ॥ ४९ ॥

(५) **नन्दनः** । यथाविधीतियदुक्तंतदाहभवदिति । भवच्छब्दमुपनयनाङ्गत्वेनोक्तोप्ययंभिक्षाचरणविधिः सार्वत्रिकः प्रत्येतव्यः ॥ ४९ ॥

(६) **रामचन्द्रः** । उपवीतोद्विजोत्तमःकृतयज्ञोपवीतःभवत्पूर्वंभैक्ष्यंचरेत् । राजन्यःभवन्मध्यंचरेत् । वैश्यःभवदुत्तरंभैक्ष्यंकार्यं । तद्यथा ब्राह्मणःॐभवतिभिक्षांदेहीति उच्चरेत् । क्षत्रियःभिक्षांभवति देहीतिउच्चरेत् । भिक्षांदेहिभवतीत्येवंवर्णक्रमेण ज्ञेयम् ॥ ४९ ॥

मातरंवा स्वसारंवा मातुर्वा भगिनींनिजाम् ॥ भिक्षेत भिक्षांप्रथमं याचैनं नावमानयेत् ॥ ५० ॥

(१) **मेधातिथिः** । मात्रादयः शब्दाः प्रसिद्धार्थाः निजांसोदर्यांयाचैनंविमानयेत् । विमानना अवज्ञानं नदीयतइति प्रत्याख्यानं । तथा च गृह्यं । अप्रत्याख्यायिनमग्रे भिक्षेताप्रत्याख्यायिनींवेति । तदेव हि मुख्यंप्राथम्यं यदुपनीयमानस्याहरहस्तु न विमानना भयमाश्रयणीयम् ॥ ५० ॥

(२) **सर्वज्ञनारायणः** । एवंच गुरोःकुले नभिक्षेतेत्यादेर्वक्ष्यमाणनिषेधस्यापवादः अतस्तत्रापि गुरुपदमाचार्यपरमेव तेन पितुराचार्यपरत्वेपि तद्गृहभिक्षणं न निषिद्धं निजांसोदरीं भिक्षेत याचेत प्रथमतोभिक्षारम्भेनित्यं याचैनमित्यवशिष्टेपि स्त्रीलिङ्गनिर्देशात् स्त्रीष्वेव भैक्षचरणम् ॥ ५० ॥

(३) **कुल्लूकः** । उपनयनाङ्गभूतांभिक्षांप्रथमंमातरंभगिनींवा मातुर्वाभगिनींसहोदरांयाचेत् । या चैनं ब्रह्मचारिणंप्रत्याख्यानेन नावमन्येत पूर्वासंभवउत्तरापरिग्रहः ॥ ५० ॥

(४) **राघवानन्दः** । अप्रत्याख्यायिनींचाग्रे भिक्षेतेति गृह्योक्तेः । अतोमातरंप्रथमंभिक्षेत निजांसोदरांयाचैनंन विमानयेत् नतिरस्कुर्यात् । विमानितोबालोब्रह्मचर्यव्रते क्षुब्धःस्यादिति भावः ॥ ५० ॥

(५) **नन्दनः** । पूर्वंस्त्रियमेवानुमन्त्र्य भिक्षेत न पुमांसमित्याह मातरमिति । विमानना प्रत्याख्यानम् भिक्षानियमोऽयंप्रथमभिक्षाविषयः । देवयज्ञैरहोनानामित्यादिनाद्वितीयादौ नियमंवक्ष्यति ॥ ५० ॥

(६) **रामचन्द्रः** । निजांभगिनींभिक्षांभिक्षेत याचेत् यएवंब्रह्मचारिणं न विमानयेत् न अवमन्येत ॥ ५० ॥

समाहृत्य तु तद्भैक्षंयावदन्नममायया ॥ निवेद्यगुरवेश्नीयादाचम्य प्राङ्मुखःशुचिः ॥ ५१ ॥

(१) **मेधातिथिः** । समाहृत्येति शब्दोबह्वीभ्यआहरणंदर्शयति । नैकस्याः सकाशाद्बह्व्योग्रहीतव्याः । तदिति

---

(५१) यावदन्नं=यावदर्थं (मेधा०)

यस्यानन्तरंशब्दसंनिधिर्वृत्यर्थस्य नप्राकरणिकस्योपनयनाङ्गस्य । तस्यहिगृह्यकारै रनुप्रवचनीयं श्रपयेदिति विहितं न भोजनंतिष्ठेदहः शेषमितिच कृतप्रातराशस्य चोपनयनं अतोनोपनयनाङ्गंभैक्षभोजनं । यावदर्थं यावता भैक्ष्येण तृप्त्याख्यप्रयोजननिर्वृत्तिः न बहुभिक्षितव्यममाययानिवेद्य गुरवे न कदन्नेन संस्कृतमन्नंप्रच्छाद्य कदन्नंगुरोः प्रकाशयेत् । तदन्नंकिल एषनग्रहीष्यतीत्यनया बुद्ध्यानिवेदनमिदंप्राप्तमिति प्रकटीकरणम् । अगृहीते गुरुणानुज्ञातोनाश्नीयात् । कथंपुनर्निवेदनमदृष्टसंस्कारार्थमेव न भवतीतिहासप्रामाण्यात् तथाच भगवान्व्यासः । त्रितकूपाख्याने गुरुणा गृहीतमिति दर्शितवान् । अनुज्ञातोभुञ्जीतेति यत्कचिच्छ्रूयते । आचम्य प्राङ्मुखः आचमनेप्राङ्मुखतेयमानन्तर्यादिति केचित्तदयुक्तम् । प्रागुदङ्मुखइत्याचमनेदिङ्नियमोभविष्यति तस्माद्भोजने नैवसंबन्धः शुचिश्चाण्डालादि दर्शनमशुचिदेशाक्रमनिष्ठीवनादिकृताचमनस्य भोजनकालेऽनेन निषिध्यते ॥ ५१ ॥

(२) **सर्वज्ञनारायणः** । यावदर्थंयावत् स्वोपयुक्तांअमायया प्रतारणाद्यकृत्वा निवेद्य उपदर्श्यप्राङ्मुखआचम्येति भोजनाङ्गाचमनउदङ्मुखतानिवृत्तिः न तु प्राङ्मुखोऽश्नीयादित्यर्थः तद्यद्यात्राचमनंनित्यतःप्राङ्मुखत्वंच विधीयतइत्याहुः शुचिःकृतसम्यक्शौचो नाप्रयतः गृहस्थस्य भोजने प्राक्प्रत्यङ्मुखतारूपदिङ्नियमः स्मृत्यन्तरसिद्धोमनोरप्यभिमतएव तस्यापि श्रुतिमूलत्वात् तथा च तादृङ्नियमोब्रह्मचारिणो नास्तीत्येतदर्थः ॥ ५१ ॥

(३) **कुल्लूकः** । तद्भैक्ष्यंबहुभ्यआहृत्य यावदन्नंतृप्तिमात्रोचितंगुरवे निवेद्य निवेदनंकृत्वा ऽमायया न कदन्नेन सदन्नंप्रच्छाद्यैवमेतद्गुरुर्ग्रहीष्यतीत्यादिमायाव्यतिरेकेण तदनुज्ञातआचमनंकृत्वा शुचिःसन्भुञ्जीत प्राङ्मुखः ॥ ५१ ॥

(४) **राघवानन्दः** सायंतनादिसंचयपुरःसरंगुरवे निवेद्यैव भुञ्जीतेत्यादिनियममाह समाहृत्येति अमायया निवेद्य जुषदन्नेन सदन्नंप्रस्थायान्यत्र स्थापयित्वा वा किंचिन्निवेदयेदिति । अष्टौग्रासामुनेःभोक्ताःषोडशारण्यवासिनः । द्वात्रिंशत्तु गृहस्थस्य यथेष्टंब्रह्मचारिणइति ॥ ग्रासनियमाभावपरं नतु बहुवारपरंअतउक्तंयावदर्थंयावतोदरपरिपूर्तिस्तथान्नाद्यादन्नंतथान्तरेति वक्ष्यति तेन भोजनद्वयम् ॥ ५१ ॥

(५) **नन्दनः** । भैक्षंभिक्षासमूहम् । यावदर्थंयावन्मृष्टाशनम् । अमायया रागद्वेषपरित्यागेन । गुरवे निवेद्य गुरुमनुज्ञाप्येत्यर्थः । गुरुनिवेदनंचभिक्षासंस्कारार्थम् ॥ ५१ ॥

(६) **रामचन्द्रः** । यावदर्थंयावतअर्थप्रयोजनंतत्भैक्ष्यंअन्नंसमाहृत्यआनीयअमायया गुरवे निवेद्य तदाज्ञया गुरोः आज्ञयाऽऽचम्य प्राङ्मुखःसन्नश्नीयात् ॥ ५१ ॥

आयुष्यंप्राङ्मुखोभुङ्क्तेयशस्यंदक्षिणामुखः ॥ श्रियंप्रत्यङ्मुखोभुङ्क्तेऋतंभुङ्क्तेह्युदङ्मुखः ॥ ५२ ॥
[सायंप्रातर्द्विजातीना मशनंस्मृतिनोदितम् ॥ नान्तरेभोजनंकुर्यादग्निहोत्रसमोविधिः ॥ १ ॥ †]

(१) **मेधातिथिः** । निष्कामस्य प्राङ्मुखस्य भोजनंविहितंनित्यतयेदानींकाम्याविधयउच्यन्ते । आयुषे हितं आयुष्यंप्राङ्मुखोभुंक्तइति । यदि तद्भोजनादायुः प्राप्यते ततआयुष्यंतद्भवति तेनायमर्थः संपद्यते । आयुष्कामः प्राङ्मुखो भुञ्जीतअधिकारद्वयंप्राच्यांनित्यंकाम्यंच । आयुष्कामः फलमभिसंदधीतइतरस्तु न तथेति यथा नित्यमग्निहोत्रंस्वर्गकामस्य चा सकृत्प्रयोगात्तन्त्रेण फलकामस्य नित्योऽप्यधिकारोनिवर्तते । एवंयशः कामोदक्षिणामुख इमे काम्याएवविधयः । श्रियमिच्छन्श्रियं नव्यजन्ताच्छता कृतः श्रियैहितंवा श्रियमिति मकारान्तः पाठः । आयुष्यादिवत्प्राण्यङ्गत्वात्स्वार्थे भुजिर्वर्तते यथार्तेभुङ्क्तइति श्रियंभोजनात्प्राप्नोतीति तथा च द्वितीयान्तः पाठः श्रियमिति । तादर्थ्ये वाचतुर्थी श्रियै प्रत्यगिति । ऋतं-

† (ख, ट) । परंतु (ग) पुस्तके स्मृतिनोदितंमित्यस्यस्थानेश्रुतिनोदितमिति वर्तते ।

सत्यंयज्ञश्च तत्फलंवा स्वर्गः स्वर्गकामउदङ्मुखोभुञ्जीत। अन्तरेणापि विधिप्रत्ययमप्राप्तत्वाद्विध्यर्थावगतिः पञ्चमलकारादिकल्पनया। एवमेतद्दिग्विभागेन भोजनंफलविशेषार्थं। विदिग्भोजनंत्वर्थप्राप्तं नित्येन प्राङ्मुखतानियमेनोपपद्यते। अयंच काम्योविधिर्नब्रह्मचारिणएव भैक्ष्यभोजनविषयोऽपि तुगृहस्थादीनामपि भोजनमात्राश्रितः तथा चाश्नीयादितिप्रकृते भुंक्त-इत्याख्यातान्तरनिर्देशोलिङ्गमितरथाश्नीयादिति यतोनिःसंदिग्धा प्रकृतविषयता प्रतीयते। तदेवनिरदेक्ष्यत्। भुङ्क्इति तु निर्देशे किंप्रकृतएवार्थःशब्दान्तरेण निर्दिष्टउतशब्दार्थतया भोजनमात्रमिति संदेहआख्यातावृत्तावर्थान्तरावगतिर्नप्रकृतप्रत्यभिज्ञानमेव। यत्तु विधिप्रत्ययाभावादर्थवादएवायंपूर्वशेषइति चोक्तः परिहारवचनानि त्वपूर्वत्वादिति नच पूर्वैकवाक्यता हेतुर्विभज्यमानसाकाङ्क्षत्वादिररिति। यद्यप्युत्तरेषांचैतदवरोधीत्यनेनातिदेशेन ब्रह्मचारिधर्मोपि पुरुषमात्रविषयः स्यात्फलंतु नस्याद्गुणकामनायां हि नातिदेशात्प्रवृत्तिमनुमन्यंते। गोदोहनेन पशुकामस्य प्रणयेत्। खादिरंवीर्यकामस्येति विकृतिषु नेष्यते कैश्चित्॥ ५२॥

(२) **सर्वज्ञनारायणः**। सर्वासुदिक्षुफलानिदर्शयति आयुष्यमिति। यत्भुंक्ते तदायुष्यमायुषोहितमिति योज्यं यदुदङ्मुखोभुंक्ते तत्श्रियंभुंक्तइत्यावर्तनीयं एवमृतमित्यत्रापि ऋतंयज्ञःसत्यंवा॥ ५२॥

(३) **कुल्लूकः**। इदानींकाम्यभोजनमाह आयुष्यमिति। आयुषे हितमन्नंप्राङ्मुखोभुङ्क्ते आयुःकामःप्राङ्मुखोभुङ्क्इत्यर्थः। यशसे हितंदक्षिणामुखः श्रियमिच्छन्प्रत्यङ्मुखः ऋतंसत्यंतत्फलमिच्छन्नुदङ्मुखोभुञ्जीत॥ ५२॥

(४) **राघवानन्दः**। प्राङ्मुखइत्युक्तंतत्र गोदोहनन्यायेन गुणफलंविधास्यन्नाह। आयुष्यमिति। चमसेनापः-प्रणयेद्गोदोहनेन पशुकामस्यइत्यत्र श्रुतौ यथा चमसमुपलक्षणीकृत्य गोदोहनप्रवेशेन पशुफलमेवंभोजनमाश्रित्य प्राङ्मुखत्वमुपलक्षणीकृत्य दक्षिणामुखादिप्रवेशोयथोक्तफलाय आयुष्यमायुषेहितंतेनायुःकामःप्राङ्मुखोश्नीयादिति। एवमन्यत्र श्रियं श्रियमिच्छन् ऋतंसत्यमिच्छन् विदिग्भोजनंतुप्राङ्मुखत्वनियमेन निरस्तम्॥ ५२॥

(५) **नन्दनः**। अथकाम्यभोजनविधिमाहआयुष्यमिति। प्राङ्मुखोयदन्नंभुङ्क्तेतदायुष्यंतदायुष्करमित्यर्थः। दक्षिणामुखोयद्भुङ्क्तेतद्यशस्यंयशस्करमित्यर्थः। पश्चान्मुखोयद्भुङ्क्तेतच्छ्रियंश्रीकरमित्यर्थः। उदङ्मुखोयद्भुङ्क्तेतदृतमृतनिमित्तंसत्यवादित्वनिमित्तमित्यर्थः॥ ५२॥

(६) **रामचन्द्रः**। ऋतंसत्यंउदङ्मुखःसन्भुंक्ते। एतद्भोज्यंकाम्यपरम्॥ ५२॥

[**रामचन्द्रः**। सायमिति अन्तरेदिवसमध्येभोजनं न कुर्यात् अग्निहोत्रसमोविधिः॥ १॥]

उपस्पृश्य द्विजोनित्यमन्नमद्यात्समाहितः॥ भुक्त्वा चोपस्पृशेत्सम्यगद्भिः खानि च संस्पृशेत्॥५३॥

(१) **मेधातिथिः**। आचमनोपस्पृशतिशब्दौ समानार्थौशुद्ध्यर्थसंस्कारविशेषवचनौ शिष्टव्यवहारादवगम्येते यद्युपस्पृशतिरर्थान्तरे पठितश्चमिरप्यदनमात्रे तथापि विशेषएव सोपसर्गयोः प्रयोगदर्शनात्तदर्थतैव प्रतीयते। स्पृशेः सामान्यविषयत्वेऽपि प्रयोगोनियामकोगडिर्वदनैकदेशे पठ्यते। सच कपोलएव गण्डइति प्रयुज्यते। नैकदेशान्तरे पुष्यसिद्ध्यौ नक्षत्रमात्रे पठ्येते विशेषे च वर्तेते। धाय्याशब्दः सामिधेनीमात्रे पठ्यते। आवापिकीषु च वर्तते। अतोपएवाचम्येत्यर्थः। सएवोपस्पृश्येतिसचपरस्ताद्विधायिष्यते। सामानाधिकरण्यंचानयोर्दृश्यते नित्यकालमुपस्पृशेदित्यभिधाय त्रिराचामेदित्याहातःसमानार्थउक्तेप्याचम्येति भोजनार्थतयाऽऽचमने पुनर्वचनमानन्तर्यार्थमनन्तरमेवभुञ्जीत न व्यापारान्तरेणव्यवदधीत। तथा च भगवान्व्यासः पश्चार्द्रोभुञ्जतेनित्यंतेषु वत्स्याम्यहंहरे॥ श्रीः किलैवमाह। द्वौ हस्तौ द्वौचपादावास्यंच एषापंचार्द्रतायाचोपस्पर्शनानन्तरंभुञ्जानस्य भवति न विलम्बमानस्य। इहापि वक्ष्यत्यार्द्रपादस्तु भुञ्जीतेति स्नातकव्रतेषु

तस्यापौनरुक्त्यंच वक्ष्यामः। नित्यग्रहणंप्रकरणाद्ब्रह्मचारीधर्मभोजनतामाविज्ञायि भोजनमात्रधर्मोयथास्यादुपदेशतएव। अत्र द्विजग्रहणंभोक्तृमात्रधर्मार्थंचाहुः नित्यग्रहणंचानुवादंनते सम्यग्मन्यन्ते। यदिद्विजशब्दः प्रकृते ब्रह्मचारिणि न समाविशेन्तदा स्यादपि। यदा तु तस्याप्येतदभिधानंतदा नान्तरेण नित्यग्रहणंप्रकरणबाधोपलभ्यते समाहितः भुज्यमानंद्रव्यंस्वात्मशक्तिंचावेक्षमाणोन्यचेतस्कस्यहि गुरुविरुद्धवादादिवर्जनं स्वात्म भोजनंच नस्याद्भुक्त्वा चोपस्पृशेत् लेहादिलेपापनयनंद्रव्यशुद्धावुक्तं कुते तस्मिन्भुक्तवतइदमाचमनंविधीयते। अत्र केचिन्मन्यन्तेशुध्यर्थमेकमाचमनंसुप्त्वाक्षुत्वा च भुक्त्वाचेति। अनेनादृष्टार्थंद्वितीयंकर्तव्यम्। एवंच पठ्यतेआचान्तःपुनराचमेदिति। एतत्पञ्चमे स्थापयिष्यामः सम्यगिति वैधतामाचनपदार्थस्यानुवदति यादृशोविधिरुक्तस्तंसर्वमनुतिष्ठेदद्भिः खानिचसंस्पृशेत् खानि छिद्राणि शीर्षण्यानि ननु चैतदुक्तमेव खानि चैव स्पृशेदद्भिरिति। आत्मशिरसोर्व्यावृत्त्यर्थमिति केचित्। यदा शुचिःसन्भोजनार्थतयैवाचामति। येषांच भोजनोत्तरकालमेकंशुध्यर्थमाचमनमपरमदृष्टार्थंतत्रादृष्टार्थआत्मशिरसी नस्पृश्येते शुध्यर्थंतु तादृशमुत्पन्नंतस्य संपूर्णाङ्गस्यप्रयोगोवक्ष्यते शौचेप्सुःसर्वदाचामेदिति यदिवा विधिप्रत्यभिज्ञानार्थंशास्त्रीयमेतदाचमनं नलौकिकमिति। ज्ञानाङ्गविशेषसंबन्धस्यतदङ्गिनिर्देशेतदेवेदमिति प्रत्यभिज्ञानसिद्धिः। अतश्च यत्राचामेदिति श्रुतं तत्र नयस्य कस्यचिद्द्रव्यस्य भक्षणमात्रंप्रतीयते किंतर्हि शास्त्रीयस्यसंस्कारस्य सपरिकरस्येति यदुक्तंतद्दर्शितंभवति॥ ५३॥

(२) **सर्वज्ञनारायणः**। समाहितः वैश्वानरोपासनादिरूपचित्तसमाधिमान् भुक्त्वाचोपस्पृशेदाचामेत् तथाप्राणादि क्रियाशक्त्यधिष्ठातृदेवतानामाप्यायनस्यप्राणाहुतिभिः कृतत्वात् बुद्धिशून्यात्मकबुद्धीन्द्रियाधिष्ठातृदेवतानां आप्यायनार्थं खानि बुद्धीन्द्रियाधिष्ठानछिद्राण्यद्भिः सहितेन हस्तेनोपस्पृशेदित्याचमनाङ्गं खस्पर्शनादन्यत् भोजनाङ्गमेतद्विहितं आचमनाङ्गंतु वक्ष्यति। एतच्चोपस्पृशेत्यादि गृहस्थादीनामपीति कथयितुं नित्यमित्युक्तं सर्वदायावज्जीवमित्यर्थः॥ ५३॥

(३) **कुल्लूकः**। निवेद्यगुरवेऽश्नीयादाचम्येति यद्यपि भोजनात्प्रागाचमनंविहितंतथाप्यद्भिःखानि च संस्पृशेदिति गुणविधानार्थोऽनुवादः। नित्यंब्रह्मचर्यानन्तरमपि द्विजआचम्यान्नंभुञ्जीत। समाहितोऽनन्यमनाः। भुक्त्वाचाचामेदिति सम्यग्यथाशास्त्रंतेन। प्रक्षाल्य हस्तौ पादौ च त्रिःपिबेदम्बुवीक्षितंइत्यादि दक्षाद्युक्तमपि संगृह्णाति। जलेन खानीन्द्रियाणि षट्छिद्राणिच स्पृशेत्। तानि च शिरःस्थानि घ्राणचक्षुःश्रोत्रादीनि ग्रहीतव्यानि। खानि चोपस्पृशेच्छीर्षण्यानीति गोतमवचनात्। उपस्पर्शनंकृत्वा खानि संस्पृशेदिति पृथग्विधानात् त्रिरब्भक्षणमात्रमाचमनंखस्पर्शनादिकमितिकर्तव्यता इति दर्शितम्॥ ५३॥

(४) **राघवानन्दः**। आचम्येत्युक्तंतदनुष्ठानंज्ञापयन्तत्करणकालंभोजननियमंसार्थवादंचाह उपस्पृशेदिति दशभिः। उपस्पृशेदाचामेत् वामहस्तस्थाभिरद्भिःसम्यक्यथाशास्त्रंखानि शीर्षण्यानीन्द्रियाणि चकाराद्धृदयशिरसी॥ ५३॥

(५) **नन्दनः**। उपस्पृश्याचम्य नित्यमाश्रमान्तरेऽपि। समाहितोऽनन्यपरः। खानि नेत्रादीनि। अद्भिः सह॥ ५३॥

(६) **रामचन्द्रः**। द्विजः अपउपस्पृश्य आचम्य अन्नं अद्या द्भक्षयेत्। भुक्त्यनन्तरंअपउपस्पृशेतआचामेत् अद्भिःजलैःखानि छिद्राणि मुखनासिकादीनि संस्पृशेत्॥ ५३॥

पूजयेदशनंनित्यमद्याच्चैतदकुत्सयन्॥ दृष्ट्वा हृष्येत् प्रसीदेच्च प्रतिनन्देच्च सर्वशः॥ ५४॥

(१) **मेधातिथिः**। अद्यतइत्यशनंभक्तसक्तुपूपाद्युच्यते। तदशनार्थमानीतंदेवतारूपेण पश्येत्। एषा वै परमा-

देवता यदन्नन्तस्य सर्वेषां । भूतानांसृष्टत्वेन स्थितिहेतुतया च यद्दर्शनंसास्य पूजा । अथवा प्राणार्थत्वेन भावनंध्यानं-यजन्ममतदर्थत्वंसंपूजयतिमांसदेति नमस्कारादिना वा प्रणम्य ग्रहणंपूजा । अद्याच्चैतदकुत्सयन् । कदन्नतया दुःसंस्कारो-पग्रहणेन वा कुत्साहेतु संभवे नान्नंकुत्सयेत् । किमिदमश्यते । अरुचिकरंधातुवैषम्यजनकमित्येवमादिनाभिधानेन नाक्षिपेत् । यदि तु तद्रूपंभवति तदा नाद्यान्नकुत्सयन्नद्याद्दृष्ट्वैव हृष्येत् । पुत्रस्याादिसंदर्शनेन चिरप्रवासप्रत्यागतइव तुष्येत प्रीयेत प्रसीदेच्च निमित्तान्तरजमपि कालुष्यमन्नदर्शनेन हित्वा मनःप्रसादमाश्रयेत् । प्रतिनन्देच्च सम्भूय्याशंसनंप्रतिनन्दनं नित्ययुक्ताएतै नस्यामेत्यादरोपदर्शनमभिनंदनंसर्वशः सर्वदा । अन्यतरस्यामिति व्यवस्थितविभाषाविज्ञानात्समम्यर्थे शसकर्तव्यः । सर्वदेति वा पठितव्यम् ॥ ५४ ॥

(२) **सर्वज्ञनारायणः** । पितुंनुस्तोषमित्यादिमन्त्रैरत्र स्तुतिः पूजाअकुत्सयन् विरसमेतदन्नमित्याद्यनवदन् हृष्ये-त्सऽन्तोषंकुर्यात् प्रसीदेद्दुतान्न द्वेषोपि पूर्वंतदेतन्निवर्तयेत् प्रतिनन्देत् प्रीतिद्योतकवचनान्युच्चारयेत् ॥ ५४ ॥

(३) **कुल्लूकः** । सर्वदाऽन्नंपूजयेत् प्राणार्थत्वेन ध्यायेत् । तदुक्तमादिपुराणे अन्नंविष्णुः स्वयंप्राहइत्यनुवृत्तौ । प्राणार्थं मांसदाध्यायेत्समांसंपूजयेत्सदा । अनिन्दंश्चैतदद्यात्तुदृष्ट्वाहृष्येत्प्रसीदेच्चेति ॥ हेत्वन्तरमपि खेदमन्नदर्शनेन त्यजेत् प्रतिनन्देत् । नित्यमस्माकमेतदस्त्वित्यभिधायवन्दनंप्रतिनन्दनम् । तदुक्तमादिपुराणे अन्नंदृष्ट्वाप्रणम्यादौ प्राञ्जलिःकथये-त्ततः । अस्माकंनित्यमस्त्वेतदिति भक्त्या स्तुवन्नमेत् ॥ सर्वशःसर्वमन्नम् ॥ ५४ ॥

(४) **राघवानन्दः** । किंचपूजयेदितिअश्यतइत्यशनमन्नंपूजयेद्ब्रह्मदृष्ट्यापश्येत्अकुत्सयन्अनिन्दयन्हृष्येत् अ-होप्राणतृप्तिर्भविष्यतीति प्रसीदेत् तत्काले प्रकारान्तरोपस्थितंखेदंत्यजेत्अभिनन्देत्नित्यंमेस्यादिति ॥ ५४ ॥

(५) **नन्दनः** । नित्यमाश्रमान्तरेऽपिपूजयेद्देवतामिव सत्कुर्यात् । प्रसीदेद्न्यस्मै कुपितोऽपि । सर्वदाअभोजनस-मयेऽपि ॥ ५४ ॥

(६) **रामचन्द्रः** । प्रथमंनित्यंअशनंअन्नंपूजयेत् । एतत् अन्नंअकुत्सयन् अद्यात्भक्षयेत् अन्नं । दृष्ट्वा हृष्येतप्रसीदेत् प्रसन्नोभवेत ॥ ५४ ॥

पूजितंह्यशनंनित्यंबलमूर्जं च यच्छति ॥ अपूजितंतु तद्भुक्तमुभयंनाशयेदिदम् ॥ ५५ ॥

(१) **मेधातिथिः** । पूर्वविधिशेषोयमर्थवादोनतु फलविधिः फलविधौहिकाम्योयंविधिः स्यादूर्जकामस्य बलका-मस्य च ततश्चनित्यशब्दोनोपपद्येत पूजितंह्यशनं नित्यमिति अतोयंयावज्जीविकः प्राङ्मुखतावंनियमः । अपूजितंभुक्तंमु-भयंनाशये द्बलमूर्जंच बलंसामर्थ्यमनायासेन भारोद्यमनादिशक्तता कृशस्याप्यूर्जंमहाप्राणताऽङ्गोपचयः महाकायोमहा-बलश्चभवति ॥ ५५ ॥

(२) **सर्वज्ञनारायणः** । बलंसामर्थ्यं ऊर्जं मुत्साहं ॥ ५५ ॥

(३) **कुल्लूकः** । पूजितमिति । यस्मात्पूजितमन्नंसामर्थ्यंवीर्यंच ददात्यपूजितंपुनरेतदुभयंनाशयति तस्मात्सर्वदा-ऽन्नंपूजयेदिति पूर्वेणैकवाक्यतापन्नमिदंफलश्रवणम् । सन्ध्यावन्दनादावनुपात्तदुरितक्षयवन्नित्यंकामनाविषयत्वेनापि नित्यश्रुतिरविहतानित्यश्रुतिविरोधात् । फलश्रवणंस्तुत्यर्थमिति तु मेधातिथिगोविन्दराजौ ॥ ५५ ॥

(४) **राघवानन्दः** । पूजिताशनेदृष्टफलमाह पूजितमिति । बलंदैहिकंऊर्जंअप्रयत्नोपस्थितान्नंव्यतिरेकेदोष-माह अपूजितमिति । भक्तंभुज्यतइतिअन्नंउभयंबलमूर्जंच ॥ ५५ ॥

(५) **नन्दनः** । पूजाकुत्सनयोरर्थवादमाहपूजितमिति । तत्रापि भक्तमित्यपकृष्य संबध्यते । नित्यमचलंशाश्वतम् । बलमूर्जमुत्साहम् । उभयमिदंबलंचोर्जंच ॥ ५५ ॥

(६) **रामचन्द्रः** । पूजितंसंस्कृतंअन्नंबलंऊर्जंप्रभावंनियच्छति । अपूजितंअन्नंयद्भुक्तंइदंतुउभयंबलंओजःनाशयेत् ॥ ५५ ॥

नोच्छिष्टंकस्य चिद्दद्यान्नाद्याच्चैव तथान्तरा॥नचैवात्यशनंकुर्यान्न चोच्छिष्टःक्वचिद्व्रजेत् ॥ ५६ ॥

(१) **मेधातिथिः** । पात्रीस्थमन्नमास्यस्पर्शदूषितमुच्छिष्टमुच्यते तन्न कस्यचिद्दद्यादनेनैव सिद्धे स्नातकव्रतेषु यः शूद्रविषयः प्रतिषेधः सतत्रैवनिरूपयिष्यते चतुर्थ्यां प्राप्तायां षष्ठीसंबन्धमात्रनिषेधार्थायेऽपिदत्तमिदमलभ्यमिति न विदुस्तेषामपि भोजनाय प्रकल्पंश्वबिडालादीनाम् । नह्यत्र ददात्यर्थः परिपूर्णस्वत्वनिवृत्तिमात्रंदातुः परस्य सत्वापत्तिर्नास्ति। अन्तराशब्दोमध्यवचनः । द्वौ भोजनकालौ सायंप्रातश्चततोन्यस्मिन्काले न भुञ्जीत । अथवा व्यवधाने नान्तराशब्दः त्यक्तभोनव्यापारः क्रियान्तरेण व्यवधीय पुनस्तदेव प्राक्पात्रगृहीतंन भुञ्जीत । स्मृत्यन्तरे तु विशेषः पठ्यते । उत्थानाचमनव्यापेतमिति केचित्तु विच्छेदमन्तरमाचक्षते । सव्येन पाणिना पात्रमन्वालभ्य दक्षिणेनावदाय प्राणायास्ये जुहोतीति श्रूयते । तत्र यः सव्येन पात्रस्यानुग्रहस्तदनन्तरंनचैवात्यशनमतिमात्रमशनंकुर्यात् एतच्चानारोग्यकारणंगुरुविरुद्धादीनांप्रदर्शनार्थंहेतूपदेशान्मात्राशितायाश्चायुर्वेदादतिमात्रता बोद्धव्या । यावदशितमन्नमुदरपूरंनकरोति सम्यग्जीर्यति तावदशितव्यम् । त्रयः कुक्षेर्भागाअध्यर्धमन्नस्य भागार्धपानस्य भागोदोषसंचाराय । अन्यथा नारोग्यंनचोच्छिष्टः क्वचिद्व्रजेदतश्चोच्छिष्टमपनीय शुचित्वमापादिते तस्मिन्नेव देशआचान्तव्यम् ॥ ५६ ॥

(२) **सर्वज्ञनारायणः** । नोच्छिष्टमिति । उच्छिष्टं पात्रोच्छेषणं एतदन्नमन्तरासायंप्रातरंतरातयोर्मध्येनाद्यात् ॥ अनशनंशक्त्यजरणादन्नादधिकशासनं क्वचिदुच्छिष्टासन्निकर्षान्निकर्षादन्यत्र ॥ ५६ ॥

(३) **कुल्लूकः** । भुक्तावशेषंकस्यचिन्नदद्यात् । चतुर्थ्यांप्राप्तायांसंबन्धमात्रविवक्षया षष्ठी । अनेनैव सामान्यनिषेधेन शूद्रस्याप्युच्छिष्टदान निषेधे सिद्धे नोच्छिष्टंन हविष्कृतमिति शूद्रगोचरनिषेधश्चातुर्थः स्नातकव्रतत्वार्थः । दिवासायंभोजनयोश्च मध्ये न भुञ्जीत वारद्वयेऽप्यतिभोजनं न कुर्यान्नातिसौहित्यमाचरेदिति चातुर्थस्नातकव्रतार्थम् । उच्छिष्टः-सन्क्वचिन्न गच्छेत् ॥ ५६ ॥

(४) **राघवानन्दः** । किंचनेति । उच्छिष्टंभुक्तावशिष्टंकस्यचिदिति संबन्धिसामान्यप्रयोगात्शूद्रादेरपि निषेधोब्रह्मचारिविषयः । यत्तु वक्ष्यति उच्छिष्टमन्नंदातव्यंजीर्णानिवसनानि चेति तत् स्वदासविषयं । चातुर्थिकंतु । नोच्छिष्टंन बहिष्कृतमिति शूद्रसामान्यविषयमिति भेदः । अन्तरामध्यान्हसायाम्हकालीनयोर्भोजनयोर्मध्येनाद्याद्ब्रह्मचार्यपि सायंप्रातर्द्विजातीनामशनंदेवनिर्मितमिति भोजनद्वित्वमाप्तेः ॥ ५६ ॥

(५) **नन्दनः** । एतदुच्छिष्टमन्तरा भोजनमध्ये भोक्तव्योच्छिष्टमाचार्यपित्रादिभिर्दत्तंनाद्यात् ॥ ५६ ॥

(६) **रामचन्द्रः** । अथान्तरा भोजनमध्येएतदुच्छिष्टंनाद्यात्नभक्षयेत् । अत्यशनंबहुभोजनंन कुर्यात्शरीरस्यारोग्यार्थत्वात्उच्छिष्टःसन्क्वचिन्न व्रजेत्न गच्छेदिति ॥ ५६ ॥

अनारोग्यमनायुष्यमस्वर्ग्यंचातिभोजनम् ॥ अपुण्यंलोकविद्विष्टंतस्मात्तत्परिवर्जयेत् ॥ ५७॥

(१) **मेधातिथिः** । दृष्टमूलतानत्यशनप्रतिषेधस्याचष्टे । अनारोग्यंव्याध्युत्पत्तिर्ज्वरोदरादिपीडा विषूचिकादिना

जीवितनाश अनायुष्यंसर्वतएवात्मानंगोपायेदिति शरीरपरिरक्षादि व्यतिक्रमादस्वर्ग्यंनरकप्राप्तिः स्वर्गाभावेन प्रतिपद्यते। अपुण्यंदौर्भाग्यकरंलोकविद्विष्टंबहुभोजितया निन्द्यते तस्मात्कारणादत्यशनंपरिवर्जयेन्न कुर्यात् ॥ ५७ ॥

(२) **सर्वज्ञनारायणः** । रोगजनकत्वादनायुष्यं ततएव स्वविहितकर्माशक्तिस्तुत्वादस्वर्ग्यं अपुण्यंच अपुण्यं पापंतद्धेतुरपुण्यंलोकविद्विष्टं बह्वयमश्नातीति प्रसिद्धेर्लोकद्वेषकरत्वात् मृत्यूपरोधसंभवाच्च ॥ ५७ ॥

(३) **कुल्लूकः** । अतिभोजने दोषमाह अनारोग्यमिति । अरोगोरोगाभावस्तस्मैहितमारोग्यं । आयुषेहितमायुष्यं-यस्मादतिभोजनमनारोग्यमनायुष्यंच भवत्यजीर्णजनकत्वेन रोगमरणहेतुत्वात् । अस्वर्ग्यंच स्वर्गहेतुयागादिविरोधित्वात् । अपुण्यमितरपुण्यप्रतिपक्षत्वात् । लोकविद्विष्टंबहुभोजितया लोकैर्निन्दनात् । तस्मात्तन्नकुर्यात् ॥ ५७ ॥

(४) **राघवानन्दः** । अत्यशनमतीव निन्दितमिति दृष्टादृष्टार्थतामाह अनारोग्यमिति । अनारोग्यंबह्वाशि-नोविषूचिकादिरोगदर्शनात्अनायुष्यंअजीर्णेन धातुक्षयात्बहुतरभोजनउदरगरिम्णाकाम्यनित्यानधिकृतत्वेन स्वर्गपुण्ये न स्यातांलोकविद्विष्टमयंबहुभोजी लुब्धइत्यादिद्वेषविषयमिति भावः ॥ ५७ ॥

(५) **नन्दनः** । अनारोग्यमनारोग्यकरंतस्मादनायुष्यंनियमादिक्रमहेतुत्वादपुण्यंतस्मादस्वर्ग्यम् ॥ ५७ ॥

ब्राह्मेण विप्रस्तीर्थेन नित्यकालमुपस्पृशेत् ॥ कायत्रैदशिकाभ्यांवा नपित्र्येण कदाचन ॥ ५८ ॥

(१) **मेधातिथिः** । तीर्थशब्देन पवित्रमुदकाधिकरणमुच्यते । तारणाय पापप्रमोचनाय च तिष्ठतीति तीर्थं । क्वचित्तुतरन्त्यनेनेति तीर्थमुदकावतरणमार्गः । इह तूदकाधारकरतलैकदेशउच्यते स्तुत्या वा तीर्थशब्दप्रयोगोनहि तत्र नित्यस्थाआपस्तेनोपस्पृशेदाचामेद्ब्राह्मेणेत्येतदपि स्तुत्यर्थमेव ब्रह्मा देवतास्येति नहि तीर्थस्यदेवताभवत्ययागरूपत्वाद मंत्रत्वाच्च यागरूपतांच केन चिद्धर्मेण शुद्धिहेतुत्वादिनाध्यारोप्य देवता तद्धितः नित्यकालंशौचार्थे कर्माङ्गेच कः प्रजापतिः सदेवतास्येति कायं एवंत्रिदशादेवताअस्येति त्रैदशिकंत्रिदशशब्दाद्देवताणिकृते स्वार्थेकः देवतात्वंच पूर्ववत् । एभिस्तीर्थै-रुपस्पृशेद्विप्रग्रहणमविवक्षितं यतः क्षत्रियादीनांविशेषंवक्ष्यति । नचासत्यां सामान्यतः प्राप्तौ विशेषविधानमुपपद्यते कण्ठगा-भिस्तु भूमिपइत्यादि नपित्र्येण पितृदैवत्येन कदाचिदपि स्फोटपिटकादिना ब्राह्मादितीर्थेष्वयोग्यतामायातेष्वपि ननु चावि-धानवदेव पित्र्यस्याप्राप्तिरस्त्यत्राशंका पितृतीर्थज्ञापनार्थतावत्पित्र्यंतयोरवश्यंवक्तव्यं नच तस्येह कार्यनिर्दिश्यते कार्या कांक्षायां प्रकृतत्वात्तेन कार्येण संबन्धआशंक्येतात्पुनः प्रतिषेधे सति पित्र्यमिति समाख्ययैव कार्यावगतिरुदकतर्पणादि पितृकर्म एतेन तीर्थेनकर्तव्यं । एवंस्तुतिरन्वयिनी भवति श्रुतिनोदितत्वाच्च ब्राह्मादीनांतदभावे प्राप्ताशंकानिवृत्त्यर्थयुक्तम-स्याभिधानम् ॥ ५८ ॥

(२) **सर्वज्ञनारायणः** । पूर्वविहितस्याचमनस्य प्रकारमाह ब्राह्मेणेति । नित्यकालंगार्हस्थ्यादिकालेपि कथंचि-त्तत्रव्रणादिनाचमनासंभवे कायत्रैदशिकाभ्यांतयोरन्यतरेणेत्यर्थः । कायंप्राजापत्यं । तयोरपि व्रणादि दूषत्वे तीर्थेनैवाच-मेन्न तु तीर्थसाम्यात् पित्र्येण तदर्थं न पित्र्येणेत्युक्तं विप्रइति प्राधान्यादुक्तं शूद्रवैश्ययोरप्याचमनविधिःतस्य चेति कर्तव्यतापेक्षत्वात् ॥ ५८ ॥

(३) **कुल्लूकः** । ब्राह्मेणेति । ब्राह्मादिसंज्ञेयंशास्त्रे संव्यवहारार्था स्तुत्यर्था च न तु मुख्यंब्रह्मदेवताकत्वंसं-भवत्ययागरूपत्वात् । तीर्थशब्दोऽपि पावनगुणयोगाद्ब्राह्मेण तीर्थेन सर्वदाविप्रादिराचामेत् । कःप्रजापतिस्तदीयस्तस्येदमि-त्यण् इकारश्चान्तादेशः । त्रैदशिकोदेवस्ताभ्यांवा पित्र्येण तु तीर्थेन न कदाचिदाचामेदप्रसिद्धत्वात् ॥ ५८ ॥

(४) **राघवानन्दः** । आचमनाङ्गतीर्थान्याह ब्राह्मेणेति । कायेतिकःप्रजापतिःतस्येदंतथा त्रैदशिकं त्रिदशादेवास्तेषामिदंउपस्पृशेदाचामेत् ॥ ५८ ॥

(५) **नन्दनः** । भोजनस्याद्यन्तयोरुपस्पर्शनंविहितं तत्प्रकारोनोक्तस्तमिदानीमाहब्राह्मेणेति । ब्राह्मेण हिरण्यगर्भदैवत्येनतदभावे कायेन कः प्रजापतिः दक्षः तद्दैवत्यंकायं तदभावेत्रैदशिकेन त्रिदशदैवत्येन । कुतोऽयंविकल्पनाभ्युपगमः देवतातारतम्यवत्तीर्थतारतम्यस्याप्रतीयमानत्वेनतुल्यविकल्पत्वसंभवात् । अत्र देवतासंबन्धेन तीर्थवचनंप्ररोचनार्थम् ॥ ५८ ॥

(६) **रामचन्द्रः** । विप्रःब्राह्मेणतीर्थेन नित्यकालंपादप्रक्षालनपूर्वकंअपस्पृशेतआचामेत् । कायत्रैदशिकाभ्यांवा कायेनदैवेन तीर्थेन वा पित्र्येण कदाचन न पितृतीर्थेन कदाचिदपिनाचामेत् ॥ ५८ ॥

अङ्गुष्ठमूलस्य तले ब्राह्मं तीर्थं प्रचक्षते ॥ कायमङ्गुलिमूलेऽग्रे दैवं पित्र्यं तयोरधः ॥ ५९ ॥

(१) **मेधातिथिः** । अङ्गुष्ठस्य मूलमधोभागः । तस्यतलप्रदेशोब्राह्मंतीर्थं । हस्ताभ्यन्तरंतलमाह महारेखांतमभिमुखमात्मनोब्राह्मंहस्तमध्ये अङ्गुलीनांमूलेदण्डरेखायाऊर्ध्वंकायमग्रे अङ्गुलीनांदैवमुपसर्जनीभूतोपि मूले अङ्गुलिशब्दः सापेक्षत्वादग्रशब्दस्य संबध्यते पित्र्यंतयोरधः । अत्रापि गुणीभूतस्याङ्गुलीशब्दस्याङ्गुष्ठस्य च संबन्धः प्रदेशिनी चात्राङ्गुलिर्विवक्षिता । तयोरध अन्तरंपित्र्यंस्मृत्यन्तरशिष्टप्रसिद्धिसामर्थ्यादेवंव्याख्यायते यथा श्रुतान्वयासंभवात्तथा च शंखः अङ्गुष्ठस्याधरतः प्रागग्रायाश्चरेखायाब्राह्मंतीर्थंप्रदेशिन्यङ्गुष्ठयोरन्तरापित्र्यंकनिष्ठान्तरलयोः कायंपूर्वेणाग्रमङ्गुलीनांदैविकमिति॥५९॥

(२) **सर्वज्ञनारायणः** । एतच्च ब्राह्मणस्य दक्षिणहस्ते पञ्चतीर्थानिइति प्रचेतसस्मृतेर्दक्षिणएवाङ्गुष्ठमूलस्थलइति करस्याधोभागमध्यमभिप्रैति ब्राह्मं ब्रह्मदैवतं एवंकायादौ काये अङ्गुलिपदंकनिष्ठापरं कनिष्ठादेशिनीति याज्ञवल्क्यवचनात् । अग्रइत्यङ्गुलीपदमन्वीयते तच्च सर्वांगुलिपरमग्रं करस्य वेति वचनात् तयोरित्यत्राङ्गुष्ठाङ्गुल्यौ प्रकृते तत्र चाङ्गुलीतर्जनीदेशिनी याज्ञवल्क्यवचनात् तथा च तयोरिवइति द्वयोरधोमूलं द्वयोर्मध्यभागे ग्राह्यम ॥ ५९ ॥

(३) **कुल्लूकः** । ब्राह्मादितीर्थान्याहअङ्गुष्ठमूलस्येति । अङ्गुष्ठमूलस्याधोभागे ब्राह्मं कनिष्ठाङ्गुलिमूले कायमङ्गुलीनामग्रे दैवमङ्गुष्ठप्रदेशिन्योर्मध्ये पित्र्यंतीर्थं मन्वादयआहुः । यद्यपि कायमङ्गुलिमूले तयोरधइत्यत्र चाङ्गुलिमात्रश्रुतंतथापि स्मृत्यन्तराद्विशेषपरिग्रहः । तथा च याज्ञवल्क्यः । कनिष्ठादेशिन्यङ्गुष्ठमूलान्यग्रंकरस्यच । प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् ॥ ५९ ॥

(४) **राघवानन्दः** । ब्राह्मेणेत्याद्युक्तंतल्लक्षणान्याह अङ्गुष्ठेत्यादिना । अङ्गुलिमूले कनिष्ठिकाङ्गुलिमूले । अग्रे प्राङ्गुष्ठानामङ्गुलीनांतयोरङ्गुष्ठदेशिन्योः । तथा च याज्ञवल्क्यः । कनिष्ठादेशिन्यङ्गुष्ठमूलान्यग्रंकरस्य तु । प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमादिति ॥ ५९ ॥

(५) **नन्दनः** । तानि पुनस्तीर्थानि कुत्रत्यानीत्यपेक्षायामाह अङ्गुष्ठेति । अङ्गुष्ठमूलस्य तले हस्ततलमूलमध्ये या रेखा तस्यामूलेब्राह्मंतीर्थम् । अङ्गुलिमूलंनामतलमध्यप्रदेशः तत्रहि मूलमङ्गुलीनांचतसृणांतत्रकायमग्रे तलस्याग्रेऽङ्गुलीनांचतसृणांप्रथमपर्वणिदैवंतीर्थम् । तयोरङ्गुष्ठाङ्गुल्योरधःतर्जन्यङ्गुष्ठयोर्मध्य मित्यर्थः । तत्र पित्र्यंतीर्थमेवंव्याख्यातंस्मृत्यन्तरेसंगच्छते ॥ ५९ ॥

(६) **रामचन्द्रः** । तत्तीर्थमाह अङ्गुष्ठस्य तले ब्राह्मंब्राह्मसंज्ञंतीर्थंप्रचक्षते । कनिष्ठिकायांमूलंकायंप्रजापतिसंज्ञंतीर्थमाहुः । अङ्गुल्यग्रे दैवसंज्ञंतीर्थंभवति तयोरधःपित्र्यंपितृसंज्ञंतीर्थंभवतीत्यर्थः ॥ ५९ ॥

त्रिराचामेदपःपूर्वंद्विःप्रमृज्यात्ततोमुखम् ॥ खानि चैव स्पृशेदद्भिरात्मानंशिरएव च ॥ ६० ॥

(१) मेधातिथिः । अन्यतमेन तीर्थेन त्रिरपउदकमाचामेदास्येन जठरंप्रवेशयेत्ततउदकभक्षणानन्तरंद्विरभ्यासेन मुखमोष्ठद्वयंपरिमृज्यादोष्ठश्लिष्टानामुदकावयवानांसोदकेन हस्तेनापनयनंप्रमार्जनमत्र कुतः पुनर्हस्तेनेति समाचारात्तीर्थाधिकाराद्वातीर्थेनैवाद्भिरिति चोत्तरत्र श्रुतमत्राप्यपकृष्यते । दृष्टार्थत्वाच्च प्रमार्जनस्य मुखशब्दएकदेशे यथोक्ते वर्तते । खानि छिद्राणि चोपस्पृशेदद्भिर्हस्तगृहीताभिः स्पर्शनमेवोपस्पर्शनंमुखस्य च प्रकृतत्वान्मुख्यानामेव खानामेषस्पर्शनविधिः गौतमश्चाह । खानि चोपस्पृशेच्छीर्षण्यान्यात्मानमिति हृदयंनाभिंवा निर्दिशति । उपनिषत्सुहिह्यन्तर्हृदयमात्मानंपश्येदिति कथ्यते । अतोहृदयस्यायंस्पर्शः क्षेत्रज्ञस्यात्मनोविभोः । अमूर्तस्य न स्पर्शसंभवः नाभिमालभेतेति कश्चित्स्मर्यते तेन नाभिमन्यामहे शिरःप्रसिद्धंस्मृतीनांचैकार्थ्यादामणिबन्धात्पाणीप्रक्षालयेत्येवमादिलभ्यते तथाऽशब्दकरणंवाङ्नियमः पादाभ्युक्षणं महाभारते प्रक्षालनमपि पादयोर्दर्शितम् ॥ ६० ॥

(२) सर्वज्ञनारायणः । आचमनप्रयोगस्वरूपमाह त्रिरिति । आचामेतपिबेदुक्ततीर्थेन मुखंमुखरन्ध्रंसलोमकोष्ठोपरिद्विः प्रमृज्यात् । खानीन्द्रियाणि सजलेन पाणिनास्पृशेदद्भिरिति वचनादार्द्रत्वेपि पुनःपुनर्जलमुपादायस्पर्शःकार्य इत्युक्तं । आत्मानमिति तत्स्थानं हृदयम् ॥ ६० ॥

(३) कुल्लूकः । सामान्येनोपदिष्टस्याचमनस्यानुष्ठानक्रममाह त्रिराचामेदिति । पूर्वब्राह्मादितीर्थेन जलगण्डूषत्रयंपिबेत् । अनन्तरंसंवृत्यौष्ठाधरौ वारद्वयमङ्गुष्ठमूलेन संमृज्यात् संवृत्याङ्गुष्ठमूलेन द्विःप्रमृज्यात्ततोमुखमितिदक्षण विशेषाभिधानात् । खानि चेन्द्रियाणि जलेन स्पृशेन्मुखस्य सन्निधानान्मुखखान्येव । गौतमोऽप्याह । खानि चोपस्पृशेच्छीर्षण्यानि हृद्यन्तर्ज्योतिःपुरुषइत्युपनिषत्सु हृदयदेशत्वेनात्मनः श्रवणादात्मानंहृदयंशिरश्चाद्भिरेव स्पृशेत् ॥ ६० ॥

(४) राघवानन्दः । तत्रसङ्ख्यामाह त्रिरिति । प्रमृज्यादितिओष्ठश्लिष्टानामुदकावयवानांसोदकेन हस्तेनापनयनमिति मेधातिथिः । खानि शीर्षण्यानि इंद्रियाणि चक्षुःश्रोत्रनासिकाःआत्मानंहृदयंउक्तानुवादमायोयम् ॥ ६० ॥

(५) नन्दनः । मुखमास्यमोष्ठावितियावत् । अद्भिःसह । आत्मानंहृदयम ॥ ६० ॥

(६) रामचन्द्रः । अपःपूर्वंत्रिवारंआचामेत् । ततआचमनानन्तरंमुखंद्विःप्रमृज्यअद्भिःखानि मुखादीनिछिद्राणि स्पृशेत् । च पुनःआत्मानंहृदयंशिरएव स्पृशेत् ॥ ६० ॥

अनुष्णाभिरफेनाभिरद्भिस्तीर्थेन धर्मवित् ॥ शौचेप्सुःसर्वदाचामेदेकान्ते प्रागुदङ्मुखः ॥ ६१ ॥

(१) मेधातिथिः । उष्णशब्दः क्वाथोपलक्षणार्थः तथा हि पठ्यतअशृताभिरद्भिरिति । एवंच ग्रीष्मोष्मतप्ताः स्वभावोष्णाश्च न प्रतिषिध्यन्ते । फेनग्रहणंबुद्बुदानामपिप्रदर्शनार्थं । पठितंच हीनाभिः फेनबुद्बुदैरिति तीर्थेन धर्मविदिति वृत्तपूरणमेव शौचमाप्तुमिच्छुः शौचेप्सुः शुद्धिकामइत्यर्थः नान्यथा शुद्धोभवति सर्वदा न प्रकरणाद्भोजनएव किंतर्हि नेतरोविण्मूत्रादिशुद्धिष्वप्यपांभक्षणे कर्मत्वात्तृतीयानिर्देशोन भक्षमाणानामेवायंधर्मोऽपितु करणभूतानामपि पादाभ्युक्षणादौ । वयंतु ब्रूमोभक्षणेऽपि कर्मणमेवापोनहि तासामाचमनंसंस्कारः । एकान्तेशुचौदेशएकान्तेहि जनैरनाकीर्णः प्रायेण शुचिर्भवति प्रागुदङ्मुखः । मुखशब्दः प्रत्येकमभिसंबध्यते । प्राङ्मुखउदङ्मुखोवा । एवंहि गौतमेन पठितम् । विग्रहश्चैवंकर्तव्यः प्रागुदङ्मुखमस्येति । नायंद्वंद्वगर्भोबहुव्रीहिरपि तु बहुव्रीहिरेव । द्वंद्वगर्भतायां समाहारे समासान्तेनाकारेण भवितव्यमितरेतरयोगेपि नैव । नहि युगपदुभयदिङ्मुखता संभवति तत्र कश्चिदाचमनभागः प्राङ्मुखेन कर्तव्यः कश्चिदुदङ्मुखेने-

त्यापतति। नचैकदेशआचमनं नच दिगर्थउपादेयोयेन परस्परापेक्षे संबध्येयातां नापि दक्षिणपूर्वादिवत्प्रागुदक्शब्दोपराजितायादिशोवाचकत्वेन प्रसिद्धोयेन दिक्समासबहुव्रीहिर्ज्ञायते। तस्मान्नायंवृत्यन्तरगर्भोबहुव्रीहिरतोविकल्पः। उदात्हृतंच स्मृत्यन्तरे प्राङ्मुखउदङ्मुखोवा शौचमारभेतेति। यथाबृहद्रथन्तरसाम षडहइति केषु चिदहरहः सुबृहत् केषुचिद्रथन्तरंनत्वेकस्मिन्नहनि समस्तोभयसामत्वम् ॥ ६१ ॥

(२) सर्वज्ञनारायणः। अमृताभिरिति शङ्खस्मृतेराग्नं न मौल्यं निषिद्धं एकान्ते कंचिदस्पृशन् प्रागुदङ्मुखःप्राङ्मुखउदङ्मुखोवा ॥ ६१ ॥

(३) कुल्लूकः। अनुष्णाभिरिति। अनुष्णीकृताभिः फेनवर्जिताभिर्ब्राह्मादितीर्थेन शौचमिच्छन्नेकान्तेजनैरनाकीर्णे शुचिदेशइत्यर्थः। प्राङ्मुखउदङ्मुखोवा सर्वदाचामेत्। आपस्तम्बेन तप्ताभिश्च कारणादित्यभिधानाद्व्याध्यादिकारणव्यतिरेकेण नाचामेत्। व्याध्यादौ तु उष्णीकृताभिरप्याचमने दोषाभावः। तीर्थव्यतिरेकेणाचमने शौचाभावइति दर्शयितुमुक्तस्यापितीर्थस्य पुनर्वचनम् ॥ ६१ ॥

(४) राघवानन्दः। अपोर्विशिनष्टि। अनुष्णेति। तीर्थेन ब्राह्मेणेत्युक्तेन शौचेप्सुःशुचितामिच्छुःप्रागुदङ्मुखःप्रत्येकंविशिष्टंच तज्जलावधिंविधत्ते त्हृदिति ॥ ६१ ॥

(५) नन्दनः। अनुष्णाभिरनग्नितप्ताभिः। तीर्थेन मुख्यानुकल्पेषु यथासंभवमन्यतमेन। एकान्ते शुद्धे देशे। प्रागुदङ्मुखईशानदिङ्मुखः प्राङ्मुखोवा। अत्राचमनकल्पेनुक्तंसर्वधर्मशास्त्रान्तरेषु विद्यादित्यभिप्रायेणोक्तंधर्मविदिति ॥ ६१ ॥

(६) रामचन्द्रः। धर्मवित्ब्राह्मेनअद्भिःएकान्तेएकाग्रचित्तःसनसर्वदाआचामेत्। प्राङ्मुखोवाउदङ्मुखोवा ॥ ६१ ॥

त्हृद्गाभिःपूयते विप्रःकण्ठगाभिस्तुभूमिपः॥ वैश्योद्भिःप्राशिताभिस्तु शूद्रःस्पृष्टाभिरन्ततः॥६२॥

(१) मेधातिथिः। उक्तमाचमनं तीर्थेनापांभक्षणं परिमाणंतु नोक्तमतस्तदवधारणार्थमाह। त्हृदयंगच्छन्तिप्राप्नुवंतित्हृद्गाः अन्येष्वपि दृश्यतइति गमेर्डः त्हृदयस्यत्हृदिति योगविभागात्हृदादेशः पूयते पवित्रतांप्राप्नोत्यशुचित्वंव्यावर्तते स्पर्शाईषदूनचुलुकमात्रप्रमाणः। कण्ठगाभिस्ताभिः। कण्ठमात्रव्यापिनीभिः भूमिपः क्षत्रियः भूमेराधिपत्यंक्षत्रियस्य विहितंतेन प्रसिद्धेन कर्मणा क्षत्रियजातिर्लक्ष्यते। आधिपत्यविवक्षायां राजधर्मेष्वेवावक्ष्यत्। वैश्यः प्राशिताभिरन्तरास्यप्रवेशिताभिः कण्ठमप्राप्ताअपि शुद्धिहेतवोवैश्यस्य शूद्रः स्पृष्टाभिरन्तत अन्तेनेत्याद्यादित्वात्तृतीयार्थे तसिः। अन्तशब्दोयंसमीपवचनोस्त्युदकान्तेगतउदकसमीपमिति गम्यते। अस्त्यवयववचनोवस्त्रान्तोवसनान्तइत्युभयत्रापि वर्तमानः संबन्ध्यन्तरमपेक्ष्यते। अस्य समीपंकस्य वावयवइति तत्रेहयेन स्थानेन वर्णान्तराणामाचमनंविहितंतीर्थैर्जिह्वोष्ठे नचतदन्तेमेति प्रतीयते समीपवचनस्तु नसंभाव्यः विधीयमानस्याचमनस्य तत्साध्यत्वासंभवात्स्पर्शेपि प्राशनमस्ति जिह्वोष्ठे नहि स्पृश्यमानस्य रसास्वादनमवश्यंभावि तत्र वैश्यपरिमाणात्किञ्चिन्न्यूनतात्रविवक्षिता जिह्वामूलंयावद्वैश्यस्य जिह्वाग्रंशूद्रस्य द्रवत्वादुदकस्यापरिहार्योऽवध्यतिक्रम अवध्य प्राप्तौ त्वशुद्धिः सर्वश्चायंतीर्थविभागोदक्षिणहस्तस्योपस्पर्शने हस्तस्यौचित्याद्दक्षिणाचारतायाश्च पुरुषधर्मतया विहितत्वादेवमर्थमेव चास्मिन्नवधाविदमुच्यते ॥ ६२ ॥

(२) सर्वज्ञनारायणः। त्हृद्गाः त्हृदयप्राप्ताः यावत्य आपोत्हृदयप्राप्तियोग्यास्ताभिः पीत्वा यावद्धृदयप्राप्तिस्तावत्पतितेन गण्डूषान्तरपातमित्यर्थात्सिद्धं प्राशिताभिर्वक्त्रविवरप्रवेशमात्रेण अन्ततोमुखमान्तभागेनोष्ठौ न स्पृष्टाभिः संबद्धाभिरित्यर्थः ॥ ६२ ॥

(३) **कुल्लूकः** । त्द्ङ्गाभिरित्याचमनजलपरिमाणमाह । ब्राह्मणोत्हृदयगामिनीभिः । क्षत्रियःकण्ठगामिनीभिर्वैश्यो-न्तरास्यप्रविष्टाभिः । कण्ठमप्राप्ताभिरपिशूद्रोजिव्हौष्ठान्तेनापिस्पृष्टाभिरद्भिःपूतोभवति। अन्ततइति तृतीयार्थे तसिः ॥ ६२ ॥

(४) **राघवानन्दः** । प्राशिताभिः तालुगाभिः अन्ततोजिह्वाग्रेण शूद्रइति स्त्रीणामुपलक्षणम् । शुध्येरंस्त्रीचशूद्रश्च । सकृत्स्पृष्टाभि रन्ततइति याज्ञवल्क्यवचनात् । अनेनैव जलपरिमाणमपिमामम् ॥ ६२ ॥

(५) **नन्दनः** । प्राशिताभिर्जिह्वागताभिः । अन्ततो ऽन्तेनास्यान्तेनौष्ठेनेत्यर्थः ॥ ६२ ॥

(६) **रामचन्द्रः** । विप्रःत्द्ङ्गाभिःअद्भिःपूयते । भूमिपःकण्ठगाभिःअद्भिःपूयते । प्राशिताभिःअद्भिःतालुगताभिःवैश्यःपूयते । स्त्री च शूद्रश्च अन्ततःवर्णान्ततः स्पृष्टाभिःअद्भिः पूयते ॥ ६२ ॥

उद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजः॥ सव्ये प्राचीनआवीती निवीतीकण्ठसज्जने ॥६३॥

(१) **मेधातिथिः** । ननु च लोकतः सिद्धाः पदार्थाधर्मशास्त्रेप्याश्रीयन्ते न पदार्थसंविज्ञानार्थानि मन्वादिवाक्यानि व्याकरणाभिधानकाण्डस्मृतिवत् । उक्तमस्माभिर्योनातिप्रसिद्धोर्थस्तंचेल्लक्षयन्ति किमुपालम्भमर्हन्ति अस्ति चात्र किंचित्प्रयोजनमन्यदप्याचमनक्रममुच्यमानमुपसंव्यानादिकमाचमनाङ्गंयथा विज्ञायते । यद्यप्युपवीतधारणंव्रतार्थतया पुरुषार्थतया वा सर्वदाप्राप्तंतथापि तेन विनाचमनंपरिपूर्णमेव स्यात् असत्यस्मिन्वचने व्रते वैगुण्यंपुरुषदोषश्चस्यात्। अथ पुनरन्तरेणोपवीतमाचमनंकृतमप्यकृतसमंदोषश्च स्यादप्यशुचिना कृतमपांभक्षणमिति कथंपुनः केवलस्योपवीतस्यैवाचमनाङ्गता यावतान्यदप्यत्र निर्दिष्टंप्राचीनावीति च उच्यते । प्राचीनावीतंत्वशब्देनैव पित्र्ये कर्मणि विहितंतत्रार्थवत्तायामुपयातायां नाकृतार्थेनोपवीतेन विकल्पितुमर्हति निवीतमप्यभिचारेर्थवत् । यद्यप्यत्र निवीतस्य विनियोगोनास्ति तथापिस्मृतीनांचैकार्थादन्यत्रयोविनियोग स्तेनेहाप्यर्थवत्ता भवत्येव पाणिग्रहणंबाहूपलक्षणार्थमुद्धृतबाहुर्यतोलोकउपवीतीत्युच्यते । सार्वकालिकंचोपवीतंवक्ष्यामः। नच केवलपाणावुद्धृतउपवीतीसव्येउद्धृते प्राचीनावीती समासपदान्नामधेयम समासस्तु वृत्तानुरोधितया कण्ठसज्जने कण्ठेसज्जनंसङ्गःस्थापनं यदा वस्त्रस्य सूत्रस्य वान्यतरोपि बाहुरुद्ध्रियते तदा निवीती भवति॥६३॥

(२) **सर्वज्ञनारायणः** । उद्धृतइति । उद्धृते ब्रह्मसूत्रोपरिस्थिते अर्थात्सव्ये अधस्थे सव्येउद्धृते अर्थादन्यस्मिन्नधस्थे प्राचीनावीती प्राणावित्युभयत्र बाहुपरं कण्ठसद्भावे कण्ठमावेष्ट्य । बाहुद्वयोपरि उपवीतसङ्गे अर्थात पुरतो लम्बमानेअत्र चोपवीति प्रदेशात् ततःस्मारितं कार्पासमुवीतमित्यत्र स्थितं उपवीतमुद्धरणादिप्रतियोगितया ग्राह्यम् ॥ ६३ ॥

(३) **कुल्लूकः** । उद्धृतेइत्याचमनाङ्गतामुपवीतस्य दर्शयितुमुपवीतलक्षणंततःप्रसङ्गेनप्राचीनावीतीत्यादिलक्षणमाह । दक्षिणे पाणावुद्धृते वामस्कन्धस्थिते दक्षिणस्कन्धावलम्बे यज्ञसूत्रे वस्त्रेवोपवीती द्विजःकथ्यते । वामपाणावुद्धृते दक्षिणस्कन्धस्थिते वामस्कन्धावलम्बे प्राचीनावीती भण्यते । सव्ये प्राचीनआवीतीति छन्दोनुरोधादुक्तं । तथा च गोभिलः दक्षिणंबाहुमुद्धृत्य शिरोऽवधाय सव्येंसेप्रतिष्ठापयति दक्षिणस्कन्धमवलम्बनंभवत्येवंयज्ञोपवीती भवति सव्यंबाहुमुद्धृत्यशिरोऽवधायदक्षिणेंऽसे प्रतिष्ठापयति सव्यंकक्षमवलम्बनंभवत्येवंप्राचीनावीतीभवति निवीतीकण्ठसज्जनइति शिरोवधाय दक्षिणपाण्यादावप्यनुद्धृते कण्ठादेव सज्जनकृजुमालम्बे यज्ञसूत्रेवस्त्रेचनिवीती भवति ॥ ६३ ॥

(४) **राघवानन्दः** । अयज्ञोपवीती कथंब्राह्मणःस्यादिति श्रुतेः । यज्ञोपबीतंपरमंपवित्रंप्रजापतेर्यत्सहजंपुरस्तात् ।

---

* स्कन्ध=कक्ष (अ)

आयुष्यमग्र्यंप्रतिमुञ्च शुभ्रंयज्ञोपवीतंबलमस्तु ते जइति मन्त्रलिङ्गात्। यदुपव्ययते देवलक्ष्ममेवतत्कुरुते । त्रिवृत्सूत्रंत्यजेद्विद्वान्बहिःसूत्रंत्यजेदु धइतिश्रुतेर्यज्ञोपवीतिनाआचान्तोदकेन कृत्यमिति गोभिलस्मरणात् । विशिखोव्युपवीतश्च यत्करोति न तत्कृतमित्यादिस्मृतेश्च । नित्यवत्प्राप्तयज्ञसूत्रानुवादेन तत्तत्कर्मनियतोपवीतत्वादेर्लक्षणमाह । उद्धृतेति। उपवीतंदेवानांनिवीतंमनुष्याणांप्राचीनावीतंपितॄणामितिश्रुतेर्दक्षिणंबाहुमुद्धृत्य सव्येंसेप्रतिष्ठापयति दक्षिणंकक्षमवलम्बंभवति एवंयज्ञोपवीतीत्यादिस्मृतेश्च अतएवाभिधानं। उपवीतंयज्ञसूत्रंप्रोद्धृते दक्षिणे करे। प्राचीनावीतमन्यस्मिन्निवीतंकंठलंबितमिति ॥ यज्ञोपवीतमाश्रित्य त्रितयविधिरिति सदोपवीतिना भाव्यमिति बाधित्वानिवीतित्वादेः प्रवेशइतिकेचित् ॥ ६३ ॥

(५) नन्दनः । कथंसन्निवेशमुपवीतमित्यपेक्षायामाहउद्धृतइति । सूत्रस्य ग्रीवासज्जने निवीतमितिसंज्ञा तददस्यास्तीतिनिवीती । निवीतस्यमध्येदक्षिणेपाणावुद्धृते यः संनिवेशविशेषः तदुपवीतंनाम तदस्यास्तीत्युपवीती। सव्ये पाणावुद्धृते तु यः संनिवेशविशेषस्तत्प्राचीनावीतंनाम। तदस्यास्तीतिप्राचीनावीती। अत्र प्राचीनावीतनिवीतयोरुपन्यासः प्रासङ्गिकः। इमंश्लोकमुपरिष्टाद्दश श्लोकानतीत्य पठन्ति तल्लेखकजनप्रमादादित्यवगंतव्यम् ॥ ६३ ॥

मेखलामजिनंदण्डमुपवीतंकमण्डलुम् ॥ अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि मन्त्रवत् ॥६४ ॥

(१) मेधातिथिः । विनष्टानामप्सु प्रासनमन्येषांच ग्रहणमत्र विधीयते । प्रासनग्रहणयोः पौर्वापर्ययथा श्रुतमेवास्माच्च पुनरुपादानान्नैषामुपनयनाङ्गतैव तदङ्गत्वे हि तत्प्रयोगापवर्गितैव स्यात् । किंतर्हि यावद्ब्रह्मचर्यधारणंचअथ किमुपनयनकालएव प्राक्कर्मनिष्पतेः । दैवान्मानुषाद्वा प्रतिबलाद्विनष्टानांप्रतिपत्तिर्न संभवति प्रयोगसमाप्त्यर्थंच पुनरुपादानंयथा कपालस्य येनैवमुच्यतअस्मात्पुनरुपादानाद्धारणमनुमीयते । उच्यते । ग्रहणंतावद्दण्डस्य चोदितंमेखलायाबन्धनन्तत्र सूत्रस्यविन्यासस्तावदुपनयनाङ्गत्वेनावश्यंकर्तव्यं। कृते तस्मिन्कुतः शास्त्रार्थःउत्तरकालंकिंतैर्नष्टैरनष्टैर्वाऽङ्गनाशे च प्रतिपत्तिविशेषःकर्मोपकारकोभवति।नच तेषांकिंच न कार्यमाम्नातंयेन तत्सिद्ध्यर्थंविशिष्टेकाले वाचनिकमुपादानमकृतत्वाच्च कार्यस्य तत्प्रयुक्तंपुनरुपादानमर्थसिद्धमुच्यते । तस्मात्प्रतिपत्तिविधानादुपादानवचनाच्च धारणमङ्गं नच प्रयोगापवर्गि यतः कमण्डलुनोपनयनोत्तरकालानुवर्तिना तुल्यवन्निर्देशात्तेषामप्युत्तरत्रानुवृत्तिः प्रतीयते । सा च व्रताङ्गमतउभयार्थामेखलादयः प्रकरणादुपनयनार्था निवृत्ते चोपनयने दर्शनाद्यावद्ब्रह्मचर्यभाविनः कमण्डलुनाचोदकार्थः कर्तव्योस्मादेव प्रतिपत्तिविधानादन्यथा यदा कमण्डलुस्तदेयंप्रतिपत्तिरिति पाक्षिकत्वंस्यात्तत्रदण्डधारणंप्रतिगृह्य दण्डंभिक्षांचरेदिति क्रमाद्भैक्ष्यचर्याङ्गत्वमेव प्राप्तं समाचाराद्भैक्षेऽर्थेऽपि भ्रमणंभवत्येव । ननु सर्वदैव करतलधृतदण्डस्य स्थानासनशयनभोजनादीनि तथा चस्वाध्याये ब्रह्मांजलिवक्ष्यति मन्त्रवदित्युपनयनविधिना ग्रहणमनुवदति तत्र च मेखलायामन्त्रो न दण्डस्य ॥ ६४ ॥

(२) सर्वज्ञनारायणः । प्रासनमादौ ततोन्यग्रहणंपूर्वपरिग्रहकालप्रयुक्त मन्त्रैःकमण्डलावपि बौधायनेन मन्त्रः पठितः ॥ ६४ ॥

(३) कुल्लूकः । मेखलामिति । मेखलादीनि विनष्टानि भिन्नानि छिन्नानि च जले प्रक्षिप्यान्यानि स्वस्वगृह्योक्तमन्त्रैर्गृह्णीयात् ॥ ६४ ॥

(४) राघवानन्दः । जीर्णोपवीतमप्सुप्रास्यनूतनंग्राह्यमितिअप्सुप्रास्येति चात्वाले कृष्णविषाणांप्रास्यतीति वत् प्रतिपत्तिः मन्त्रवदिति क्रियाविशेषणंस्वगृह्योक्तेन मन्त्रेण गृह्णीयादित्यर्थः ॥ ६४ ॥

(५) नन्दनः । पूर्वमजिनमेखलादीनिधार्यत्वेनोक्तानि इदानींतद्विनाशे किंकर्तव्यमित्याहमेखलामिति । अत्रसूत्रमेवोपवीतिशब्देनोच्यते न संनिवेशविशेषः । विनष्टानि जीर्णानिध्वस्तानिवा । कमण्डलुधारणस्य पूर्वमविहितत्वान्मेखलादिवदवश्यंभावोनाभिमतइत्यवगन्तव्यम् ॥ ६४ ॥

(६) रामचन्द्रः । विनष्टानि । मेखलादीनिअप्सुप्रास्य विनिक्षिप्यअन्यानिनूतनानि मन्त्रवत्मन्त्रपूर्वकंगृह्णीयात् ॥ ६४ ॥

केशान्तःषोडशे वर्षे ब्राह्मणस्य विधीयते ॥ राजन्यबंधोर्द्वाविंशे वैश्यस्य द्व्यधिके ततः ॥ ६५ ॥

(१) मेधातिथिः । केशान्तोनाम संस्कारः सगर्भषोडशे वर्षे ब्राह्मणस्य कर्तव्यः । तस्य च स्वरूपपरिज्ञाने गृह्यमेव शरणं द्वे वर्षेऽधिके यस्य द्वाविंशस्तस्य तस्मिन्द्व्यधिके द्वाविंशेऽथवा कालमात्रमन्यपदार्थः ततोद्वाविंशाद्वर्षाद्व्यधिके काले वैश्यस्येति द्विशब्दस्य च वर्षाण्येव संख्येयानि प्रकृतानि हि तानि ॥ ६५ ॥

(२) सर्वज्ञनारायणः । सर्वान्केशान्वापयन्तइति क्वचित् गृह्ये विकल्पेन गोदान कर्मणि सर्वकेशवपनविधेस्तेनोपलक्षणेन गोदानकर्मकेशान्त उच्यते केशानामन्तोत्रेति व्युत्पत्त्या ॥ ६५ ॥

(३) कुल्लूकः । केशान्ताख्योगृह्योक्तसंस्कारोगर्भादिसंख्यावर्षाणामिति बौधायनवचनाद्गर्भषोडशे वर्षे ब्राह्मणस्य क्षत्रियस्य गर्भद्वाविंशे वैश्यस्य ततोद्व्यधिकेगर्भचतुर्विंशे कर्तव्यः ॥ ६५ ॥

(४) राघवानन्दः । गृह्योक्तसंस्कारविशेषस्य कालमाह । केशान्तइति षोडशइत्यागर्भात् । तथा च बौधायनः । केशान्ताख्यःस्वगृह्योक्तःसंस्कारोगर्भादिसङ्ख्यावर्षाणामिति द्व्यधिके ततश्चतुर्विंशतिवर्षेएतदेव पुनर्गोदानाख्यंकर्म॥ ६५ ॥

(५) नन्दनः । षोडशे जन्मनआरभ्य । ततोद्व्यधिके चतुर्विंशे ॥ ६५ ॥

(६) रामचन्द्रः । द्विजानांगोदानाख्यंकर्माह । ब्राह्मणस्य केशान्तःसंस्कारःगोदानाख्यंकर्मेत्यर्थः । षोडशे वर्षेविधीयते । क्षत्रियस्य द्वाविंशे वर्षे केशान्तसंस्कारःकार्यः । वैश्यस्य द्व्यधिके द्वाभ्यांअधिके चतुर्विंशे वर्षे केशान्तंकर्म ॥ ६५॥

अमन्त्रिका तु कार्येयंस्त्रीणामावृदशेषतः ॥ संस्कारार्थं शरीरस्य यथाकालं यथाक्रमम् ॥ ६६ ॥

(१) मेधातिथिः । इयमावृद्विशेषतस्त्रीणाममंत्रिका कार्या जातकर्मणआरभ्येयंसंस्काराणामावृत्परिपाटी सेतिकर्तव्यता कः संस्कारकलापइति यावत् । संस्कारार्थंशुद्ध्यर्थंशरीरस्य पौंस्नमेव स्त्रीणामपि प्रयोजनमाह । यथा कालंयस्मिन्काले यः संस्कारउक्तस्तंकालमनतिक्रम्य पदार्थानतिवृत्तौ यथासादृश्येऽव्ययीभावः । एवंक्रमेपि द्रष्टव्यम् । मन्त्रमात्ररहितायाआवृतोविहितत्वादयथाकालक्रमप्राप्तिरेवनास्तीत्यतोनिषेधोनित्यानुवादोवृत्तपूरणार्थः । एतावद्विवक्षितंस्त्रीणांचैतेअमन्त्रकाइति ॥ ६६ ॥

(२)सर्वज्ञनारायणः । प्राङ्नाभिवर्धनात्पुंसइत्यनुवर्ततेऽतःस्त्रीणामप्यमी विधिः इयमावृज्जातकर्मादि क्रियापरिपाटी गर्भाधानादेस्तत्पूर्वकर्मणः स्त्रीत्वानिश्चयेनामन्त्रकत्वायोगात् अशेषतः सकलाङ्गवती संस्कारार्थं बैजिकगार्भिकदोषहत्याक्षत्वाद्यधिकारसिद्ध्यर्थं यथाकालंदशम्यांनामधेयमित्यादिकालेपि कार्या संभवेन्येनापि स्वकाले च कर्तुं शक्तानां कालान्तरेपि नामकरणादीनां यथोक्तक्रमेणैवानुष्ठानमित्येतदर्थं यथाक्रममित्युक्तम् । अत्र शूद्रस्य विशेषानभिधानात् नामकरणगुणविधेश्च स्त्रीणामेवामन्त्रकंसर्वंकार्यमिति गम्यते ॥ ६६ ॥

(३) कुल्लूकः । अमन्त्रिकेति । इयमावृदयंजातकर्मादि क्रियाकलापः समग्रउक्तकालक्रमेण शरीरसंस्कारार्थंस्त्रीणाममन्त्रकःकार्यः ॥ ६६ ॥

(४) राघवानन्दः । तेषु स्त्रीणांविशेषमाह । अमन्त्रिकात्विति द्वाभ्याम् । आवृन्नूजातकर्मादिक्रियाकलापपरिपाटी-अमन्त्रिकाअत्रो पयुक्ताहोमास्तु समन्त्रकाएव ॥ ६६ ॥

(५) नन्दनः । एवंतावज्जातकर्मादयः संस्काराः पुंसामुक्ताः स्त्रीणामप्येतानमन्त्रकानतिदिशतिअमन्त्रकेति । आवृन्नप्रयोगः क्रियेतियावत् ॥ ६६ ॥

(६) रामचन्द्रः । स्त्रीणांकन्यानां आवृन्नूजातकर्मादिक्रिया प्रधानक्रिया अमन्त्रिका कर्तव्या आविवाहंशरीरस्य संस्कारार्थं यथाकालंकालानुसारेण ॥ ६६ ॥

वैवाहिकोविधिःस्त्रीणांसंस्कारोवैदिकःस्मृतः ॥ पतिसेवा गुरौ वासोगृहार्थोऽग्निपरिक्रिया ॥ ६७ ॥

[अग्निहोत्रस्य शुश्रूषा सायमुद्वासमेव च ॥ कार्यं पत्न्या प्रतिदिनं इतिकर्मच वैदिकम् ॥ १ ॥ [1]]

(१) मेधातिथिः । पूर्वेणावृद्वचनेन जातकर्मादिवदुपनयनेप्यमन्त्रके प्राप्ते तदापत्तिवचनंविवाहस्य तन्निवृत्त्यर्थमारभ्यते । वेदग्रहणार्थोवैदिकः संस्कारउपनयनाख्योयः सस्त्रीणांवैवाहिकोविधिः । विवाहे भवोविवाहविषयोविवाहसाध्यःअतोविवाहस्योपनयनस्थाने विहितत्वात्तस्य निवृत्तिर्यदि विवाहस्तत्कार्यंकरोहन्त प्राप्तंवेदाध्ययनंप्राप्ता च व्रतचर्योपनयनंनाम माभूद्वदुभयमपि निवर्तयति । पतिसेवा गुरौ वासः पतिंयत्सेवतउपचरत्याराधयति सएवास्या गुरौ वसतिः गुरौ वसत्याऽध्ययनंकर्तव्यंन चास्या गुरौवासोस्त्यतःकुतोध्ययनं गृहार्थोगृहकृत्यानि रन्धनपारिणह्यप्रत्यवेक्षणादीनि यानि नवमेवक्ष्यन्तेऽर्थस्य संग्रहे चैनामित्यादि सायंप्रातब्रह्मचारिणोयत्समिदाधानंतदेवास्या गृहकृत्यमग्निक्रियया च यावान्यम नियमसमूहोब्रह्मचारिणः ससर्वउपलक्ष्यते । एवंचैतदुक्तंविवाहस्योपनयनापत्यंयथैवमनुष्योयोपनयनात्प्रभृतिश्रौताःस्मार्ताआचाराप्रामाश्च विधयोभवन्ति प्राकृतः कामचारवादभक्षत्वमेवंस्त्रीणांप्राग्विवाहात्कामचारः परस्मात्श्रौतस्मार्तेष्वधिकारएवंवा पदयोजना विवाहएव स्त्रीणांवैदिकः संस्कारउपनयनमनुपनयनेऽपि विवाहे भक्तयोपनयनत्वमुच्यते । किंतदुपनयनेन विवाहस्य साम्यंयेनास्य तद्यपदेशअतआहपतिसेवेत्यादि ॥ ६७ ॥

(२) सर्वज्ञनारायणः । उपनयनंतु न कार्यंतासां विवाहसंस्कारस्य तत्स्थानीयत्वादित्यर्थः । वैदिकोवेदाधिगमार्थउपनयनरूपः धर्मातिदेशार्थं तदङ्गसंपादनोक्तापतिसेवेति यथा गुरुशुश्रूषा व्रतिनस्तेनैव प्रकारेण स्त्रियापतिः शुश्रूष्यः । यथाचाप्रमादेनाभ्युपचरणंतत्र यथागृहार्थेषु गृहप्रयोजनेषु पाकादिष्वप्रमत्तया भाव्यमित्यर्थः । परिष्क्रिया परिचर्या शूद्रस्य तु द्विजसेवैव गुरौ वासइति ग्राह्यम् ॥ ६७ ॥

(३) कुल्लूकः । अनेनोपनयनेऽपि प्राप्ते विशेषमाह वैवाहिकइति । विवाहविधिरेव स्त्रीणांवैदिकःसंस्कारउपनयनाख्योमन्वादिभिःस्मृतः । पतिसेवैव गुरुकुले वासोवेदाध्ययनरूपः । गृहकृत्यमेवसायंप्रातःसमिद्धोमरूपोऽग्निपरिचर्या । तस्माद्विवाहादेरुपनयनस्थाने विधानादुपनयनादेर्निवृत्तिरिति ॥ ६७ ॥

(४) राघवानन्दः । वैवाहिकोवक्ष्यमाणविवाहसंबन्धीसंस्कारःउपनयनसंस्कारस्थानीयः । तेन तन्निवृत्तिः वैदि-

---

(६७) संस्कारो वैदिकःस्मृतः=औपनायनिकः स्मृतः (ठ)

(६७) गृहार्थोग्निपरिक्रिया=गृहार्थोग्निपरिग्रहः (क)

=गृहार्थेग्निपरिक्रिया (ख, ग)

1 (ख)

कः वेदमन्त्रकृतःविवाहस्तु समन्त्रकइत्युक्तेः। तासांपतिसेवैव गुरुकुलवासतया विधीयते। अकरणेप्रत्यवायस्मरणात्। करणे च स्तुतिस्मरणात्। एवंगृहार्थोगृहकृत्यमेव सायंप्रातःसमिद्धोमरूपाग्निपरिचर्या ॥ ६७ ॥

(५) नन्दनः। उपनयनान्तंतासांसमन्त्रकं तच्चविवाहएवेत्याह वैवाहिकइति। संस्कारउपनयनम्। वैदिकः समन्त्रकः। तत्रगुरुकुलवासोऽग्निकार्यंचोत्तरार्धेनोक्तम्। गृहार्थः गृहकार्यम्। अग्निपरिक्रियाऽग्निपरिचर्या। विवाहस्योपनयनत्वप्रतिपादनंततऊर्ध्वंकामचारवादभक्षादिवर्जनार्थम् ॥ ६७ ॥

(६) रामचन्द्रः। स्त्रीणांसंस्कारः वैवाहिकोविधिः वैदिकःवेदमन्त्रैःस्मृतः स्त्रीधर्मानाह पतिसेवा गुरौ वासः गुरोः आचार्यस्यसमीपेवासः। कार्यःअग्नेः परिक्रिया गृहार्थे पाकनिमित्तम् ॥ ६७ ॥

[रामचन्द्रः। अग्निहोत्रस्येति स्त्रीभिः। अग्निहोत्रस्य शुश्रूषा कार्या सायंकालेउद्वासंवैदिकं अग्निकर्म प्रतिदिनं पत्न्या कार्यम् ॥ १ ॥]

एषप्रोक्तोद्विजातीनामौपनायनिकोविधिः ॥ उत्पत्तिव्यञ्जकःपुण्यःकर्मयोगंनिबोधत ॥ ६८ ॥

(१) मेधातिथिः। प्रकरणोपसंहारः। एतावदुपनयनप्रकरणम्। अत्रयदुक्तंतत्सर्वमुपनयनार्थम्। ननु केशान्तोप्येवंप्राप्नोति नानिवृत्तउपनयने स्वकाले तस्य विधानात् प्रकरणेऽपि पठितस्य वाक्यादन्यार्थता भवति। तथा च केशान्तः समावृत्तस्यापि कैश्चिदिष्यते। उपनयने भवऔपनायनिकउत्तरपदस्य दीर्घत्वं। पूर्ववदुत्पत्तिस्तन्मातापित्रोः सकाशाज्जन्मतांव्यनक्ति प्रकाशयति। सगुणतां करोतीत्युत्पत्तिव्यञ्जकः जातोप्यजातसमोऽनुपनीतोधिकाराभावात्। अतोयंविधिरुत्पत्तिव्यञ्जकः पुण्यइत्युक्तार्थमुपनीतस्य येन कर्मणा योगः संबन्धोधिकारोयत्तेनोपनीतेन कर्तव्यंतदीदानींवक्ष्यमाणंनिबोधत ॥ ६८ ॥

(२) सर्वज्ञनारायणः। उपनयनसंबन्धःउत्पत्तेर्द्वितीयस्याद्विजत्वरूपायाव्यञ्जकोजनकः कर्मयोगमुपनेयस्य कर्मणासंबन्धम् ॥ ६८ ॥

(३) कुल्लूकः। एषइति। औपनायनिकइत्यनुशतिकादित्वादुभयपदवृद्धिः। अयंद्विजातीनामुपनयनसम्बन्धी कर्मकलापउक्तः। उत्पत्तेर्द्वितीयजन्मनोव्यञ्जकः ॥ ६८ ॥

(४) राघवानन्दः। वार्तिष्यमाणकर्मयोगंवक्तुंवृत्तंकीर्तयति एषइति। औपनायनिकउपनयनसंबन्धीउपनयनपर्यन्तोवाउपनीतस्य येन कर्मणा योगस्तंउत्पत्तिव्यञ्जकउत्पत्तेर्द्वितीयजन्मनां व्यञ्जकःपुण्यस्तत्प्रदः ॥ ६८ ॥

(५) नन्दनः। उत्पत्तिव्यञ्जकोमातापितृजन्मविशेषकः उपनयनस्य संस्कारान्तरेभ्यः प्रधानसंस्कारत्वंप्रतिपादितं पुण्यइति कर्मयोगंकर्माभ्यासंशौचाचारादिषुकौशलम् अत्रापिद्विजातीनामित्यनुकर्षः कर्मयोग्यमितिचपठन्ति ॥ ६८ ॥

(६) रामचन्द्रः। अतः कर्मयोगंनिबोधत ॥ ६८ ॥

उपनीय गुरुःशिष्यंशिक्षयेच्छौचमादितः ॥ आचारमग्निकार्यंच सन्ध्योपासनमेव च ॥ ६९ ॥

(१) मेधातिथिः। शिक्षयेद्युत्पादयेच्छौचमादितः। अदित इति वचनेनाचारादिभ्यः प्रागुपदेशः शौचस्येष्यते। किंतर्ह्यनियतक्रमकाः परस्परमेते केवलमुपनयनानन्तरंव्रतादेशनंवक्ष्यति।आदिष्टवेदव्रतस्य च वेदाध्ययनमतोग्नीन्धनसं-

ध्योपासनयोः समन्त्रकत्वादकृतेव्रतादेशे मन्त्रोच्चारणमप्राप्तंविधीयते शौचंचानियतकालंतदवश्यंतदहरेवोपदेष्टव्यमे- वमाचारोपि । अतइदमादितइति वचनमादरार्थं न प्रथमोपदेश्यतांशौचस्य विधत्ते । शौचमेकालिङ्गइत्याद्याचमनान्तम् । आचारोगुर्वादीनांप्रत्युत्थानासनदानाभिवादनादिभिः । अग्निकार्यमग्न्याधानकार्यंसमित् समिन्धनं संध्यायामादित्यस्यो- पासनंतत्स्वरूपभावनंसंध्यायाउपासनंएवंवा पूर्वांसंध्यामित्यादि । एषव्रतधर्मः ॥ ६९ ॥

(२) सर्वज्ञनारायणः । शौचंमृज्जलपरिमाणनियमादिविशिष्टं आदितःपूर्वंआचारं अभिवादनादि अग्निकार्यं समिदाधानं सन्ध्योपासनं सन्ध्यात्रयस्याचरणम् ॥ ६९ ॥

(३) कुल्लूकः । इदानीमुपनीतस्य येन कर्मणायोगस्तंशृणुतेत्याह उपनीय गुरुरिति । गुरुः शिष्यमुपनीय प्रथम- मेकालिङ्गेगुदेतिस्रइत्यादिवक्ष्यमाणंशौचंस्नानाचमनाद्याचारमग्नौसायंप्रातःसमिद्धोमानुष्ठानंसमन्त्रकसन्ध्योपासनविधिंचशि- क्षयेत् ॥ ६९ ॥

(४) राघवानन्दः । तत्रादौ गुरुशिक्षणीयमाह उपनीयेति । शिष्यमिति लिङ्गसङ्ख्येअविवक्षिते अष्टवर्षंब्राह्म- णमुपनयीतेत्यादिश्रुतेर्जातिवत्पशुमालभेतेतिवत्‌विधेयगतत्वात्पूर्वाभ्यामेकवाक्योपात्तत्वाच्च । अतोवक्ष्यति । अध्येष्यमा- णइत्येकवचनान्तंशौचंवक्ष्यतेएकालिङ्गइत्यादिभिःअग्निकार्यंअग्नौ सायंप्रातःसमिद्धोमानुष्ठानम् ॥ ६९ ॥

(५) नन्दनः । शौचंहस्तपादादिप्रक्षालनम् । आचारमाचमनादिकम् ॥ ६९ ॥

अध्येष्यमाणस्त्वाचान्तोयथाशास्त्रमुदङ्मुखः।ब्रह्माञ्जलिकृतोध्याप्योलघुवासाजितेन्द्रियः ॥७०॥

(१) मेधातिथिः । अध्ययनधर्मानिदानीमाह । प्रत्यासन्ने भविष्यति लृडयंद्रष्टव्यः । अध्ययने प्रवर्तमान अध्ययन- मारभमाण अध्येतुमिच्छन्निति यावत् । उदङ्मुखोध्याप्यः गौतमीयं तु प्राङ्मुखोवा शिष्यः प्रत्यङ्मुखआचार्यइति आचान्तो- यथाशास्त्रमिति प्रागुक्तमाचमनविधिंस्मारयति ब्रह्माञ्जलिः कृतोयेनेति । आहिताग्न्यादेराकृतिगणत्वान्निष्ठान्तस्य परनिपातः । ब्रह्माञ्जलिकृदिति वा पाठः।लघुवासाधौतवासाः प्रक्षालनेन लघुनी वाससी भवतः। अतोलघुत्वेन वाससः शुद्धिर्लक्ष्यते।अ- थवायंरोमादिस्थूलवसनः चित्तव्याक्षेपताड्यमानोन प्रहारंवेदयेत्ततश्च न युक्तः पठेत् । अपनीयमाने तु वाससि गुरोःखेदः स्यात् । निरावरणे च काये रज्वादिना ताड्यमानोमहतींबालोवेदनामनुभवेदतोदृष्टार्थंलघुवासस्त्वम् । जितानि नियमितानी- न्द्रियाण्युभयान्यपि येन सजितेन्द्रियः नइततस्ततोवीक्षेत यत्किंचिन्नशृणुयादध्ययनेऽवहितोभवेदित्युक्तंभवति ॥ ७० ॥

(२) सर्वज्ञनारायणः । यथाशास्त्रमाचान्तः उदङ्मुखःशिष्यः प्राङ्मुखेनाध्याप्यो ब्रह्माञ्जलिकृतः कृतब्रह्माञ्जलिः लघुवासाः स्वल्पवासाः जितेन्द्रियोनन्यमनाः ॥ ७० ॥

(३) कुल्लूकः । अध्येष्यमाणइति । अध्ययनंकरिष्यमाणः शिष्योयथाशास्त्रंकृताचमनउत्तराभिमुखःकृताञ्जलिः- पवित्रवस्त्रःकृतेन्द्रियसंयमोगुरुणा अध्याप्यः प्राङ्मुखोदक्षिणतःशिष्यउदङ्मुखोवेति गौतमवचनात्प्राङ्मुखस्याप्यध्ययनम् । ब्रह्माञ्जलिकृतइति वाहिताग्न्यादिष्वित्यनेन कृतशब्दस्य परनिपातः ॥ ७० ॥

(४) राघवानन्दः । शिष्यस्य वेदग्रहणनियममाह अध्येष्यमाणइति त्रिभिः । लघुवासा गुरुतोलघुवासाःप- वित्रवासावाएवंविधएवाध्याप्यः ॥ ७० ॥

(५) नन्दनः । अथाध्ययननियमानाहअध्येष्यमाणमिति । यथाशास्त्रमाचान्तः प्राङ्मुखस्य गुरोर्दक्षिणतउदङ्मुख- आसीनः । अध्याप्योगुरुणा ब्रह्मचारी लघुवासाअनुल्बणवस्त्रः । ब्रह्माञ्जलिकृतः कृतब्रह्माञ्जलिः ॥ ७० ॥

(६) रामचन्द्रः । पूर्वं आचान्तःयथाशास्त्रं यथावेदंउदङ्मुखअध्येष्यमाणः शिष्यःब्रह्माञ्जलिकृतःसन्अ-ध्याप्यः ॥ ७० ॥

ब्रह्मारम्भेवसाने च पादौ ग्राह्यौ गुरोःसदा ॥ संहत्य हस्तावध्येयं स हि ब्रह्माञ्जलिः स्मृतः ॥७१ ॥

(१) **मेधातिथिः** । ब्रह्मशब्दोयमनेकार्थोप्यध्ययनाधिकारादत्र वेदवचनः प्रतीयते । तस्यारम्भेनिमित्तसमन्वे-षा । अध्ययनाधिकारादेव च तद्विषयाऽध्ययनक्रिया तस्यायमारम्भः प्रथमावृत्तिः पुरुषस्य तत्रेदपादग्रहणंवेदस्य तुया-न्यायक्षराण्यग्निमीळेइषेत्वाअग्नआयाहीति न सोत्रारम्भउच्यते । नहि तस्य निमित्तभावः संभावितः नित्यत्वात् । कादा-चित्कंहि निमित्तंभवति तेनैतदुक्तंभवति । वेदाध्ययनमारिप्समानोगुरोः पादसंग्रहणंकुर्यात्कृत्वा ततः स्वाध्यायाक्षराण्यु-च्चारयेन्न पुनः प्रवृत्ताध्ययनक्रियः पादौगृण्हीयात् । ननु चाद्य क्रियाक्षणआरम्भः सच निमित्तंविद्यमानस्य च निमित्तत्वं युक्तंजीवनस्येव । अत्र गेहदाहाद्यतीतमपि निमित्तंतत्र . तथैव श्रवणम् । तस्मात्सहप्रयोगएवाध्ययनपादोपसंग्रहणयोर्यु-क्तः । उच्यते । अध्यापनाध्यवसायआरम्भउच्यते । नाद्यः क्रियाक्षणः यदैव गुरुरधीष्वेत्याह तदैवाध्यवस्यति माणवकः । अतस्तदनन्तरंपादोपग्रहउपकारप्रवृत्तस्य गुरोश्चित्तप्रसादनमेतत् यथा लोके कश्चिदुपकारप्रवृत्तंसभाजयतिवाचा ननुवयवम-स्मात्पापान्मोचिताइति । अनक्षरा चेयमध्येषणोपसन्नाः स्वाध्ययनायेति। नहि गुरुरुपरोध्योध्यापयति केवलमुपसदनम-स्य कर्तव्यसंबोधार्थमवसरोध्ययनस्येति । अतः कृतोपसदनस्य वेदाक्षरोच्चारणमपि च संहत्य हस्तावध्येतव्यमित्युच्य-ते । तत्राधीयानः पादोपसंग्रहणविधिमतिक्रमेत । अवसानंसमाप्तिरध्ययनादुपरमः यद्यपि ब्रह्मशब्दआरम्भेगुणभूतस्तथा-प्यवसानस्य सापेक्षत्वात्सन्निहितत्वाद्ब्रह्मपदेनैव संबन्धः प्रयते ऽन्यस्याश्रुतत्वात्सदाग्रहणमन्वहंभाविप्रयोगारम्भावसान-योरेषविधिर्यथास्यादितरथा यएव व्रतादेशानन्तरोमुख्यप्रारम्भः तत्रैव स्यात् । अथान्वारम्भणीयादर्शपूर्णमासारम्भे चो-दितोयएवाधानानन्तरभावी दर्शपूर्णमासप्रयोगारम्भःतत्रैव भवति । न मासिकप्रयोगारम्भे । न मासिकप्रयोगारम्भेप्रातः प्रातरारभ्य यावदाह्निकंनिवृत्तंप्रपाठकद्वयमात्रपरिमाणंतावदेकैव साध्ययनक्रियेत्यंतरा कथंचिद्विच्छेदेपि पुनः प्रवृत्ताना-रम्भशब्दवाच्यतास्तीति न पुनः पादोपसदनंक्रियते । स्मृत्यन्तरे च पठ्यते पादोपग्रहणंगुरोःप्रातरन्वहमिति । संहत्य संलग्नौ संश्लिष्टौ परस्परंकृत्वाऽध्येयंकच्छपकर्णवदिति यःसंनिवेशोहस्तयोः प्रसिद्धस्तथा कर्तव्यःसहिब्रह्माञ्जलिः । पदार्थकथनमेतत् ॥ ७१ ॥

(२) **सर्वज्ञनारायणः** । सदाप्रत्यहंसंहत्य हस्तौ हस्ततले संमील्य ॥ ७१ ॥

(३) **कुल्लूकः** । ब्रह्मारम्भेवसानेचेति । वेदाध्ययनस्यारम्भेकर्तव्ये समापने च कृते गुरोःपादोपसंग्रहणंकर्तव्यं हस्तौ संहत्य संश्लिष्टौ कृत्वाऽध्येतव्यंसएव ब्रह्माञ्जलिःस्मृतइति पूर्वश्लोकोक्तब्रह्माञ्जलिशब्दार्थव्याकारः ॥ ७१ ॥

(४) **राघवानन्दः** । किंच ब्रह्मेति। ब्रह्मारम्भे वेदस्याध्ययनसमाप्त्योर्ब्रह्माञ्जलिकृतइत्युक्तं तल्लक्षणमाह संहत्येति । अञ्जलिरत्र कदलीपुष्पाकारः ॥ ७१ ॥

(५) **नन्दनः** । ब्रह्माञ्जलिंवक्ष्यतिब्रह्मारम्भइति । सदाअहरहः । ग्राह्यौब्रह्मचारिणा ॥ ७१ ॥

(६) **रामचन्द्रः** । ब्रह्मारम्भे वेदारम्भे तथा वेदावसाने गुरोः पादौ ग्राह्यौ भवतः । हस्तौ संहत्य संयोज्य अ-ध्येयं सहि ब्रह्माञ्जलिःस्मृतः ॥ ७१ ॥

व्यत्यस्तपाणिना कार्यमुपसङ्ग्रहणंगुरोः ॥ सव्येन सव्यःस्प्रष्टव्योदक्षिणे न च दक्षिणः ॥७२॥

(१) **मेधातिथिः** । यदुपसंग्रहणंपूर्वश्लोके गुरोरुक्तंतद्यस्तपाणिना कार्यं कीदृशः पुनः पाण्योर्व्यत्यासः कर्तव्यइत्यतआह । सव्येन हस्तेन सव्यः पादस्प्रष्टव्यः स्पर्शः कर्तव्योनतु चिरंनिपीडयासितव्यं । एषच व्यत्यासोयुगपदितरेतरदिक्संचारेण हस्तयोर्भवति अग्रतः स्थितेनसंमुखेन गुरोरुपसंग्रहणंकर्तव्यम् । तत्र वामोदक्षिणमार्गंनीयते दक्षिणे वाममित्येवंसव्येन सव्यः स्पृष्टोभवति दक्षिणे न च दक्षिणइत्येषपाणिव्यत्यासः अन्येतु विन्यस्तपाणिनेति पठन्ति । स्पर्शादेव च विन्यासेसिद्धे नाग्नितप्तायःपिण्डस्पर्शनवद्दाहभयादङ्गुल्यग्रमात्रेण स्पर्शनं न कर्तव्यमपितु हस्तौविन्यसितव्यौ निधातव्यौपीडनंतु पीडाकरंनिषिद्धमितिवर्णयन्ति ॥ ७२ ॥

(२) **सर्वज्ञनारायणः** । उपसंग्रहणप्रकारमाह व्यत्यस्तेति । व्यत्यस्तौ दक्षिणोत्तरौ स्वस्तिकाकारेण संहतौ पाणी यस्यएवंचार्थादाभिमुख्येनाभिवादने सव्येन हस्तेन सव्यस्य पादस्य स्पर्शःप्राप्तः तथापि यत्र पर्यङ्कबन्धादिवशात् व्यत्यस्त पादएवास्ते गुरुः तत्र पाणि व्यत्यासो न कार्यः तथा सन्ध्यायामात्माभिवादने सव्येन हस्तेन सव्यस्य पादस्य स्पर्शः स्पर्शार्थत्वात् व्यत्यासस्यइत्येतदर्थंसव्येन सव्यइत्युक्तम् ॥ ७२ ॥

(३) **कुल्लूकः** । व्यत्यस्तपाणिनेति । पादोपसंग्रहणंकार्यमित्यनन्तरमुक्तंतद्व्यत्यस्तपाणिना कार्यमिति विधीयते । कीदृशोव्यत्यासःकार्यइत्यतआह सव्येनपाणिनासव्यःपादोदक्षिणेनपाणिनादक्षिणःपादः गुरोः स्प्रष्टव्यः । उत्तानहस्ताभ्यांचेदंपादयोः स्पर्शनंकार्यम् । यदाह पैठीनसिः उत्तानाभ्यांहस्ताभ्यांदक्षिणेन दक्षिणं सव्यंसव्येन पादावभिवादयेत् । दक्षिणोपरिभावेन व्यत्यासोवार्यःशिष्टसमाचारात् ॥ ७२ ॥

(४) **राघवानन्दः** । गुरोःपादौ ग्राह्यावित्युक्तं तत्प्रकारमाह व्यत्यस्तेति । उपसंग्रहणंपादयोरितिशेषः एतद्व्यनक्ति सव्येनेति सव्येन स्वस्य वामहस्तेन सव्योगुरोः पाद एवमुत्तरत्रनायंक्रमः तथा च पैठीनसिः । उत्तानाभ्यां दक्षिणंदक्षिणेन सव्यंसव्येन पादावभिवादयेदिति ॥ ७२ ॥

(५) **नन्दनः** । कथंग्राह्यौ पादावित्यपेक्षायामाह व्यत्यस्तेति । उपसंग्रहणंगुरुपादस्पर्शः । अस्यव्याख्यानमुत्तरार्धम् । सव्येन पाणिना सव्यः पादः स्पृष्टव्यः ॥ ७२ ॥

अध्येष्यमाणंतु गुरुर्नित्यकालमतन्द्रितः ॥ अधीष्व भोइतिब्रूयाद्विरामोस्त्विति चारमेत् ॥ ७३ ॥

(१) **मेधातिथिः** । अध्येष्यमाणमित्यादीनि प्राग्व्याख्यातानि पदानि गुरोरयंनियोगः । गुरोर्यदा माणवकोध्यापयितुमभिलषितस्तदाधीष्वभोइत्यामन्त्रयितव्यः । अनामन्त्रितेन न गुरुः खेदयितव्य उपदिशानुवाकमिति । उक्तंच । आहूतश्चाप्यधीयीतेति विरामोस्त्वित्येतंशब्दंसमुच्चार्यारमेतन्निवर्तेत । कः गुरुरेव । प्रथमान्त निर्देशात् । अथवा गुरुणोत्सृष्टोनिवर्तेत । न स्वेच्छया एवंच तदाख्यायते । यदा गुरुर्विरामोस्त्विति ब्रूयात्तदा विरमेद्ब्रह्मचारी । अन्ये त्वध्येतृमात्रस्य शिष्याणामुपाध्यायस्य च उपरमणकाले धर्ममिममिच्छन्ति । तथा च स्मृत्यन्तरम् । स्वाध्यायमधीत्य विरमणकाले प्रदेशिन्या पृथिवीमालभ्य स्वरतीति ब्रूयाद्विरपृष्टमिति सामसु विरामः परमास्वृक्षुआरमस्त्वथर्वसु । अतन्द्रितअनलसः । तन्द्राऽऽलस्यंतद्योगात्पुरुषस्तन्द्रितइत्युच्यते त्यक्तालस्यमतन्द्रितः । अनुवादश्चायंनात्र तन्द्राश्रमः नत्वियमाशङ्काकर्तव्या । यअतन्द्रितस्तस्यायंविधाः । आलस्यवतस्त्वन्यः ॥ ७३ ॥

(२) **सर्वज्ञनारायणः** । अध्ययनार्थंशिष्योगुरुमधीष्वेति ब्रूयात् स्वाध्यायान्ते विरामोस्त्विति ब्रूयात् । अत्र पाठे अधीष्वेत्यन्तर्भावितण्यर्थंशिष्येण गुरुंप्रति वाच्यम् । अध्येष्यमाणंतु गुरुरिति क्वचित्पाठः । तत्र गुरुणात्तद्वाच्यम् ॥ ७३ ॥

(३) **कुल्लूकः** । अध्येष्यमाणमिति । अध्ययनंकरिष्यमाणंशिष्यंसर्वदाऽनलसोगुरुरधीष्व भो इतिप्रथमंवदेत् । शेषे विरामोऽस्त्वित्यभिधायविरमेन्निवर्तेत ॥ ७३ ॥

(४) **राघवानन्दः** । गुरुशिष्ययोर्नियममाह अध्येष्यमाणंत्विति त्रिभिः । अध्येष्यमाणंशिष्यंअधीष्वभोइति ब्रूयात्तथा विरामोस्त्विति विरामोस्त्वित्युक्तेः आरमेत् निवर्तेताध्ययनात् शिष्यइति शेषः ॥ ७३ ॥

(५) **नन्दनः** । अधीष्वेतिप्रार्थनायांलकारः विधेरत्रायुक्तत्वात् । ब्रूयात्ब्रह्मचारी ॥ ७३ ॥

(६) **रामचन्द्रः** । अतन्द्रितः गुरुः अध्येष्यमाणंशिष्यंभोशिष्यअधीष्वइति ब्रूयात् अन्यत्र क्रीडातःविरामःअस्तुइतिवारयेत् ॥ ७३ ॥

ब्रह्मणःप्रणवंकुर्यादादावन्ते च सर्वदा ॥ स्रवत्यऽनोङ्कृतंपूर्वंपरस्ताच्च विशीर्यति ॥ ७४ ॥

(१) **मेधातिथिः** । अत्रापि पूर्वोक्तेन न्यायेन ब्रह्मणआदावन्तेच प्रणवंकुर्यात् । ब्रह्मविषयायाअध्ययनक्रियाया- इति द्रष्टव्यम् । प्रणवशब्दॐकारविषयस्तथा वक्ष्यति स्रवत्यनोंकृतमिति । सर्वदाग्रहणमध्ययनविधिमात्रधर्मोयथास्यादितरथा प्रकरणाद्ग्रहणार्थएव ब्रह्मचारिणः स्यात् । अस्मिन्स्तुसतियोप्यविस्मरणार्थोयच्चारहरहः स्वाध्यायमधीयीतेति गृहस्थादीनांतत्र सर्वत्र सिद्धंभवति । संध्याजपादौतु स्वशब्देन विधास्यति । एतदक्षरमेनांचेति । नचायंवेदधर्मोयेन यत्र कुत्रचिद्वैदिकवाक्योच्चारणमारभेत तत्रप्राप्नुयादतोहोममन्त्रजपशास्त्रानुवचनयाज्यादीनामारम्भेनास्तिप्रणवोन्यत्राप्युदाहरणार्थे वैदिकवाक्यव्याहारे तस्मात्स्थितंप्राकरणिकस्वाध्यायाध्ययनविधिधर्मार्थं सर्वदाग्रहणम् । प्रणवप्रयोगस्यान्वाहिकारम्भार्थता.तु नित्यकालग्रहणानुवृत्त्यैव सिद्धा । अस्यार्थवादःस्रवत्यनोंकृतंपूर्वंप्रारम्भअनोंकृतंब्रह्मस्रवति ॐमितिकृतंॐशब्देन संस्कृतं । साधनंकृतेति समासः । अथवा ॐकृतमित्युच्चारितोयस्मिन्ब्रह्मणि तदोंकृतंमुखादित्वात्परनिपातः परस्ताच्च समाप्तौ चकारेणानोंकृतमिति संबध्यते । स्रवति विशीर्यत इत्युभाभ्यामपि नैष्फल्यमध्ययनस्य प्रतिपाद्यते । अधीतंब्रह्म यस्मिन्कर्मणि विनियुज्येत तन्निष्फलंभवतीति निन्दार्थवादश्च पाकार्थेनिषिक्तस्याप्राप्तपाकक्षीरादेरवच्छिद्रिते भाजने यद्दतस्ततोविक्षेपः प्रक्षरणंतत्स्रवतीत्युच्यते तच्च पाकस्य पिण्डीभूतस्य भोग्यतांप्राप्तस्य योविनाशः सविशरणम् ॥ ७४ ॥

(२) **सर्वज्ञनारायणः** । आदावन्ते च प्रणवंकुर्याद्गुपादयात् सर्वदा ब्रह्मयज्ञादावपि पूर्वंप्राग्गृहीतं स्रवतिनश्यतिपरस्तात्गृहीष्यमाणंविशीर्यते ग्रहणकालेएव सम्यक्नगृह्यते ॥ ७४ ॥

(३) **कुल्लूकः** । ब्रह्मणः प्रणवमिति । ब्रह्मणोवेदस्याध्ययनारम्भेऽध्ययनसमाप्तौ चोङ्कारंकुर्यात् । यस्मात्पूर्वंयस्योङ्कारोन कृतस्तत्स्रवति शनैःशनैर्नश्यति यस्य पुरस्तान्न कृतस्तद्विशीर्यत्यवस्थितिमेव न लभते ॥ ७४ ॥

(४) **राघवानन्दः** । ॐकाराद्यन्तमध्ययनंनियमयति ब्रह्मणइति । ब्रह्मणोवेदस्य पूर्वमनोंकृतंब्रह्म स्रवति च्यवते स्वरवर्णतः विशीर्यते । यदप्यधीतंतदपि विस्मृतंस्यादिति प्रणवोच्चारणेर्थवादः ॥ ७४ ॥

(५) **नन्दनः** । ब्रह्मणोवेदस्याध्येतव्यप्रदेशस्यादावन्तेच सर्वदासदाआश्रमान्तरेऽपिआद्यन्तयोरनोङ्कृतंब्रह्म । ब्रह्मगीतमदृष्टसाधनंपरम् ॥ ७४ ॥

(६) **रामचन्द्रः** । ब्रह्मणः वेदस्यारम्भे अध्ययनारम्भे सदा प्रणवंकुर्यात् । अनोंकृतंपूर्वंवेदः स्रवति ॐकारंउच्चरति परस्तादध्ययनात् पश्चादध्ययनाद्वेदः विशीर्यते विस्मरणं यातीत्यर्थः ॥ ७४ ॥

प्राक्कूलान्पर्युपासीनःपवित्रैश्चैव पावितः॥ प्राणायामैस्त्रिभिःपूतस्ततॐकारमर्हति ॥ ७५ ॥

(१) **मेधातिथिः** । कूलशब्दोदर्भाग्रवचनः तान्पर्युपासीनः तेषु प्रागग्रेषु दर्भेषूपविष्टइत्यर्थः । अधिशीङ्स्थासामिति स्थाआआसामित्याङ्प्रश्लेषात्कर्मत्वंपरि उपआआसीनइतीहाप्याङाश्लिष्टनिर्दिष्टोद्रष्टव्यः पर्युपशब्दावनर्थकौ। पवित्रैर्दर्भैरेवेमादितः शुचित्वमापादितः । अघमर्षणादिषु मन्त्रोनेह पवित्रशब्देनोच्यते । ब्रह्मचारिणस्तदानीमनधीतत्वात्तेषांन च दर्भाः स्वरूतामात्रेण काश्चिक्रियामकुर्वतः पावने करणंभवन्तीति । अवान्तरव्यापारापेक्षया स्मृत्यन्तरे प्राणोपस्पर्शनंप्रतीयते । आह च गौतमः । प्राणोपस्पर्शनंदर्भैः प्राक्कूलेष्वासनंच प्राणायामैस्त्रिभिः पूतःमुखनासिकासंचारी वायुः प्राणस्तस्यायामोनिरोधः शरीरे धारणंबहिर्निष्क्रमणनिषेधः तस्यस्मृत्यन्तरे धारणकालस्य मानंसमाम्नातं । मन्त्रानुस्मरणंच प्रतिप्रणवसंयुक्तांगायत्रींशिरसा सह । त्रिर्जपेदायतप्राणःप्राणायामः सउच्यते ॥ वसिष्ठेन भगवता महाव्याहृतयोप्युक्ताः मन्त्रावसानएव निरोधावधिरन्यस्यानाम्नातत्वात्सर्वस्मृतीनांचासति विरोधएकार्थत्वादिहाप्येवमेवानुष्ठानम् । नन्वेवमितरेतराश्रयः स्यादकृतेषु प्राणायामेषुओंकारोनकर्तव्योन चोंकारेण विना प्राणायामोनिवर्तते । नैषदोषः । त्रिर्जपेदिति प्राणायामेषुमानसव्यापारेणोंकारस्य स्मरणमुच्यते । नहिनिरुद्धप्राणस्य शब्दोच्चारणंसंभवति । यद्यपि जपः कश्चिद्वाग्व्यापारसाध्योभवति। स्वाध्यायाध्ययनेतु पुनरुच्चारणंविवक्षितं। अध्ययनक्रियायाएवंरूपत्वाच्छब्दक्रियायां धातुः श्रोत्र ग्राह्यश्च शब्दोन केवलेन मनसा गृह्यते । न चायमोंकारधर्मोयेनान्यत्रापि तस्मिन्नुच्चार्यमाणेऽपि प्रसज्येत । उक्तंच स्वाध्यायारम्भेकर्तव्यइत्योंकारधर्मत्वे हि लौकिकेषु वाक्येष्वोमिति ब्रूमइत्यादिषु प्रसज्येत । गौतमेन तुपठितम् । प्राणायामास्त्रयः पञ्चदशमात्राइति मात्राशब्देन चाविकृतस्य स्वरस्याकारादेर्यावान्कालः सउच्यते तत्र विरोधात्स्मृत्यन्तरोक्तः कालोनास्ति नच मन्त्रस्मरणंतत्रानोंकाराअपिप्राणायामाः सन्तीति नेतरेतराश्रयदोषापत्तिः । ततॐकारमर्हतिकर्तुमिति शेषः यदा यंसमुदायएवरूढिरूपेण प्रणववचनः यदातुकरणंकारः ॐमित्येतस्यकारउच्चारणमोङ्कारस्तदानास्ति पदान्तरापेक्षा । प्रणवशब्देन कर्तव्यतामुक्त्वाऽत्रौंकारमित्यनुवदत्यतएतावेकार्थौ । तथा च दर्शितम् ॥ ७५ ॥

(२) **सर्वज्ञनारायणः** । प्राक्कूलानि कूलमग्रं प्रागग्रेषु दर्भेषूपरि वेष्टयित्वा स्थितेष्वासीनः पवित्रैर्दर्भैः पावितः । यथा गौतमः प्राणोपस्पर्शनंदर्भैरिति प्राणाइन्द्रियाणि प्राणदेशोहृदयं वा प्राणायामैरिति प्राणायामास्त्रयःपञ्च दशमात्राइति गौतमः । ॐकारंब्रह्मणआदिभूतम् ॥ ७५ ॥

(३) **कुल्लूकः** । प्राक्कूलानिति । प्राक्कूलान्प्रागग्रान्दर्भानध्यासीनः पवित्रैःकुशैः करद्वयस्थैः पवित्रीकृतः प्राणायामास्त्रयःपञ्चदशमात्राइति गौतमस्मरणात् पञ्चदशमात्रैस्त्रिभिः प्राणायामैः प्रयतोऽकारादिलघ्वक्षरकालश्च मात्रा ततोऽध्ययनार्थमोङ्कारमर्हति ॥ ७५ ॥

(४) **राघवानन्दः** किंच प्रागिति । प्राक्कूलान्प्रागग्रान् कुशानिति शेषः । पवित्रैर्हस्तद्वयस्थैतकुशैः ॥ ७५ ॥

(५) **नन्दनः** । प्राक्कूलान्कुशान्परि प्रागग्रेषु पवित्रैर्मन्त्रप्रोक्षणादिभिः । ओङ्कारमोङ्कारोच्चारमर्हति प्राप्नोति । एषविधिः प्रथमाध्ययनपरः सर्वदेतिवचनाभावात् ॥ ७५ ॥

(६) **रामचन्द्रः** । प्राक्कूलान्कुशान्गृहीत्वा गुरुंपर्युपासीत पवित्रैःकुशैःपावितः त्रिभिःप्राणायामैःपूतोभवेत् ओंकारोच्चारणार्थंसः अर्हति ॥ ॥ ७५ ॥

---

(७५) उपासीनः=उदासीनः (च)

अकारंचाप्युकारंच मकारंच प्रजापतिः ॥ वेदत्रयान्निरदुहद्भूर्भुवःस्वरितीति च ॥ ७६ ॥

(१) **मेधातिथिः** । पूर्वस्य विधेरर्थवादः । अक्षरत्रयसमाहाररूपॐकारस्तत्रैकैकस्य व्युत्पत्तिमाह । वेदत्रयात्रिभ्योवेदेभ्यः निरदुहदुद्धृतवान्यथा दध्नोघृतमुद्ध्रियते । नकेवलमक्षरत्रयंयावदिदमपरंभूर्भुवःस्वरिति ॥ ७६ ॥

(२) **सर्वज्ञनारायणः** । प्रणवस्य प्रकृतस्तुतौ कार्यायांव्याहृतिगायत्र्योः स्तुतिस्तयोरप्यादौ जपार्था ॐ कारमात्रजपस्तु प्रागुक्तस्तदसंभवे निरबृंहदुद्धृतवान् इतीति। इतीति द्वयेन मकारद्वयाभिधानेन भूर्भुवः स्वरित्येवं प्रकाराव्याहृतयः संगृहीताः ॥ ७६ ॥

(३) **कुल्लूकः** । अकारंचेति । एतदक्षरमेतांचेति वक्ष्यति तस्यायंशेषः । अकारमुकारंमकारंच प्रणवावयवभूतं ब्रह्म वेदत्रयादृग्यजुःसामलक्षणाद्भूर्भुवःस्वरिति व्याहृतित्रयंच क्रमेण निरदुहदुद्धृतवान् ॥ ७६ ॥

(४) **राघवानन्दः** । प्राणायामपूतस्यैव प्रणवोच्चारणाधिकारइत्युक्तेस्तदङ्गगायत्रीप्रणवव्याहृतिसंयुक्तंज्ञापयन् आदौ प्रणवस्य वेदत्रयसारतामाह अकारंचेति द्वाभ्यां । वेदत्रयातृग्यजुःसामभ्यः निरदुहत्उद्धृतवान् दध्नइव नवनीतम् ॥ ७६ ॥

(५) **नन्दनः** । वेदग्रहणारम्भे व्याहृतित्रयसावित्र्योरपि प्रयोज्यतांश्लोकद्वयेनाह अकारमिति । निरदुहन्निश्चकर्ष । अस्यानन्तरंद्वितीयस्येतिकरणस्यान्वयः पश्चात्भूर्भुवःस्वरितिचेत्यन्वयः । ततोऽयमर्थः इतिएवंयथाऽकारादीन्वर्णान्निरदुहदेवंभूर्भुवःस्वरितिचनिरदुहदिति ॥ ७६ ॥

(६) **रामचन्द्रः** । प्रजापतिःअकारंऋग्वेदाददूदुहत् उकारंच यजुर्वेदाददूदुहत् । मकारंसामवेदाददूदुहत् । ऋग्वेदाद्भूःअदुहत् । यजुर्वेदात्भुवः । सामतः स्वरिति अदुहत् । तिस्रः व्याहृतयःभवन्ति ॥ ७६ ॥

त्रिभ्यएव तु वेदेभ्यःपादंपादमदूदुहत् ॥ तदित्यृचोस्याःसावित्र्याःपरमेष्ठी प्रजापतिः ॥ ७७ ॥

(१) **मेधातिथिः** । अयंतत्सवितुर्वरेण्यमित्येतस्याः गायत्र्याउत्पत्त्यर्थवादोविधानार्थः । पूर्वश्लोकेचार्थवादादेव व्याहृतीनामपि विधानम् । क्रमस्तु पाठावगम्यः वक्ष्यति च । एतदक्षरमेतांच जपन्व्याहृतिपूर्विकामिति । अदूदुहदुधृतवानिति । यद्यपि तदित्येतत्प्रतीकेन तत्सवितुर्वृणीमहइतित्रा शक्यते लक्षयितुंनतुसा त्रिपदेति । त्रिपदेव ग्राह्या त्रिपदाचैव सावित्रीति कश्यपादयोपि प्रजापतयः सन्त्यतोविशिनष्टि । परमेष्ठीति हिरण्यगर्भः सहि परमे स्थानेऽनावृत्तिलक्षणे स्थित आदरातिशयार्थंचैतत्सावित्र्याः साक्षात्किलेयंसर्वमुख्येन प्रजापतिना वेदेभ्यः समुद्धृतेति ॥ ७७ ॥

(२) **सर्वज्ञनारायणः** । अदूदुहत्सारप्राप्त्यर्थमाकृष्टवान् सावित्र्याः सावित्रीति निरुपपदेन पठनरूढात्तत्सवितुर्वरेण्यमिति गृह्यते न तत्सवितुर्वृणीमहइत्यादयः ॥ ७७ ॥

(३) **कुल्लूकः** । त्रिभ्यएवेति । तथात्रिभ्यएव वेदेभ्य ऋग्यजुःसामभ्यस्तदित्यृचइति प्रतीकेनानूदितायाः सावित्र्याः पादंपादमिति त्रीन्पादान् ब्रह्माचकर्ष । परमेस्थाने तिष्ठतीति परमेष्ठी ॥ ७७ ॥

(४) **राघवानन्दः** । तेभ्योगायत्र्यास्त्रीन्पादानदूदुहदित्याह त्रिभ्यइति। तदित्यृचः तत्सवितुरित्याद्यायाऋचः परमेष्ठी हिरण्यगर्भः आपोज्योतिरित्यादिशिरोपि ज्ञेयं । सव्याहृतिंसप्रणवांगायत्रींशिरसासह । त्रिःपठेदायतप्राणः प्राणायामः सउच्यतेइति श्रुतेः । गायत्रींशिरसासार्धंजपेद्व्याहृतिपूर्विकां । प्रतिप्रणवसंयुक्तां त्रिरयंप्राणसंयमइति याज्ञवल्क्योक्तेश्च ॥ गायत्रीत्युपलक्षणंत्रिष्टुब्जगत्योः संवत्सरे षण्मास्येचतुर्विंशत्यहे द्वादशाहे षडहे त्र्यहे वा सद्यश्लेषगायत्रींब्राह्मणायानुब्रू-

यादाग्नेयोवै ब्राह्मणइति श्रुतेः। त्रिष्टुभंराजन्यस्य जगतींवैश्यस्य सर्वेषांवागायत्रीमिति त्रिष्टुभंक्षत्रियाय त्रिष्टुप्छंदस्कां तथावैश्याय प्रजापतिदृष्टांजगतीछन्दस्कांसवितृदेवत्यांरुक्मपाशविमोचनेउखासंभरणे विनियुक्तांविश्वरूपाणि प्रतिमुंचते कविः प्रासावीद्भद्रंद्विपदे चतुष्पदे विनाकमख्यत्सविता वरेण्योनुप्रयाणमुषसोविराजति॥ इत्येतामृचंप्रब्रूयात् बृहस्पतिदृष्टस-वितृदेवत्यांदेवसवितः प्रसुव यज्ञंप्रसुव यज्ञपतिंभगाय दिव्यो गन्धर्वः केतपूः केतन्नः पुनातु वाचस्पतिर्वाचमद्यः स्वदा-तिनः स्वाहाजपेत्वाज्यविनियुक्ताम् ॥ ७७ ॥

(५) नन्दनः। तदितितत्सवितुरितिसावित्र्याः सवितृदैवत्यायाऋचोऽदूदुहदधुक्षत् । तस्माद्वेदत्रयसारत्वाद्व्याहृ-तित्रयसावित्र्यौ वेदारम्भे प्रयोज्येति ॥ ७७ ॥

(६) रामचन्द्रः । तस्मात् कारणात् अस्याःसावित्र्याःऋचःइति निश्चितं त्रिभ्यएव वेदेभ्यः पादं पादं अदूदुहत् ॥ ७७ ॥

एतदक्षरमेतांच जपन्व्याहृतिपूर्विकाम् ॥ संध्ययोर्वेदविद्विप्रोवेदपुण्येन युज्यते ॥ ७८ ॥

(१) मेधातिथिः। सत्यपि स्वाध्यायविधिप्रकरणैकवाक्यात्संध्याजपविधिरयंतत्र गायत्र्याऽनुवादः प्रणवव्याहृ-तीनामप्राप्तविधिअत्र कश्चिदाह। नायंसंध्याविधिरप्रकरणात् विधिर्हिभवन्ब्रह्मचारिणः स्यात्तस्य प्रकृतत्वात्। नच तस्य संभवतीहहि वेदविदित्युच्यते। नच तस्य प्रथमोपनीतस्य वेदवित्त्वमस्त्यपिच फलमत्र श्रूयते। वेदपुण्येन युज्यते। नित्यस्य संध्योपासनविधिः न फलार्थः नचैतद्विद्मः किमिदंवेदपुण्यंनामफलंयेनयोगोयंजपउच्यते। यदि तावद्वेदाध्ययनत्वा-द्यत्पुण्यमभिप्रेतंतदवाप्तिर्वेदपुण्येनयोगोभिप्रेतस्तत्रयस्तावदयंप्रकृतः स्वाध्यायविधिस्तस्य नार्थावबोधादृते किंचित्फलम-स्त्यश्रुतत्वाद्दृष्टत्वाच्चार्थावबोधस्य कल्पनापि नास्ति। यश्च गृहास्थदीनांविधिरहरहः स्वाध्यायमधीयीतेति सोपि नित्यएव यत्तत्रफलश्रवणं पयोदधिघृतंमध्विति सोर्थवादएव तस्मान्नायंविधिः विधौ हि सर्वमेतद्विवक्षितव्यं यदात्वयमर्थवादस्तदा जपन्निति प्रकृतमध्ययनमुच्यते वेदपुण्येनेत्येतदपि यथाकथंचिन्नीयते । अत्रोच्यते वाक्येन प्रकरणंबाध्यतइत्युक्तमेव। यतएव वेदवित्पदं संध्यापदंचन प्रकृतविषयताम्येति ततएवान्यत्रायंविधिः संध्ययोरेतत्त्रयंजपेदित्येतावान्विधिः वेद-वित्पदमनुवदिष्यते गृहस्थादीनांवेदवित्त्वस्यसंभवाद्ब्रह्मचारिणोवेदवित्त्वंन संभवतीति चेत्किंतदीयेन संभवेन यथा प्राप्तानु-वादे हि सचाश्रमिणामधिकारः कर्तृविशेषणेहि वेदवित्पदे ब्रह्मचारिणोनाधिकारः स्यात्कथंपुनरस्यानुवादः वाक्यभेदप्रस-ङ्गात्। विधौ संध्याविधौ प्राप्ते प्रणवव्याहृतयस्तावदप्राप्तास्तत्रविधातव्या तत्रयद्यपरंवेदविदिविधीयते तदा वाक्यभेदः स्यात् प्राप्ते हि कर्मणि नानेकार्थविधानंसंभवति प्रणवव्याहृतिनांतु नानुवादः संभवति। तेनायमत्र वाक्यार्थः संध्ययो-र्यत्सावित्रींजपेदित्युक्तं तत्रायमपरोगुणः प्रणवव्याहृतीपूर्विकांतांजपेत्। विप्रग्रहणंच तदा प्रदर्शनार्थमेव। यदप्युक्तं फल-मत्रश्रूयते नित्यश्चायंविधिः संध्यायाः कोनामायंविरोधः नित्यएव तस्मिन्गुणे कामोभविष्यति। प्रणवव्याहृतीगुणकात्त-स्मादिदंफलमिति। यथा गोदोहनप्रणयनकादग्निहोत्रात्पशवः फलं। गोदोहनेन पशुकामस्य प्रणयेदिति वाक्यसामर्थ्येन अभ्येतुश्चैतदुक्तं न त्वयंकाम्योविधिः स्मृत्यन्तरे हिनित्यएवायंविधिः स्पष्टएवोक्तोगायत्रींशिरसासार्धंजपेद्व्याहृतिपूर्विका-मिति। फलानामवगमोभवतैवोक्तः। अयंह्यर्थोवेदपुण्येनेति वेदे यत्सन्ध्योपासनात्पुण्यमुक्तं तेनत्रिकमेतज्जपन्युज्यते न केवलंगायत्रीं । पुण्यंच धर्मः वेदमूलत्वात्स्मृतीनांस्मृत्युक्तमपि वेदपुण्यतया व्यपदिश्यते वेदस्य पुण्यंवेदपुण्यंकिंच वेदस्यपुण्यंयत्नेन प्रतिपाद्यते पठ्यमानाद्धिवेदाद्यज्जायते तदपि शक्यते तस्येति वक्तुम् किंत्वसाधारणत्वात्प्रतिपाद्यमेव युक्तंव्यपदेष्टुंनोत्पाद्यंयागादयोधर्ममुत्पादयन्ति। प्रतिपादकस्तु वेदएव येभ्यस्यस्य पादस्य सामर्थ्यमाहुः। यदुक्तंनित्यत्वा-

ध्यायइति तत्र संध्यायां त्रिकजपादेव कृतार्थाभवन्तीति तदप्यसत्। एवंसति तेन विधिना विकल्पेत। तत्र च पाक्षिको नित्यत्वाध्यायतायाबाधःस्यात्। नचाबाधे संभवति बाधोभ्युपगंतव्यः। एतदक्षरमित्योंकारस्य प्रतिनिर्देशः। ननु च नैतदेकमक्षरंद्वे वा त्रीणिवा उच्यते। अक्षरशब्देन केवलंस्वरउच्यते। व्यञ्जनसंयोगश्च तत्रेह यादृशः प्रकृतः तादृशस्याभिधानम्। एतांच तत्सवितुर्वरेण्यमिति सावित्रीं व्याहृतयः पूर्वायस्यास्तांव्याहृतीपूर्विकांतिस्रः प्रकृताएव ताव्याहृतयोगृह्यन्ते प्रकृतपरत्वादस्य नसमस्तत्यानन्ताः ॥ ७८ ॥

(२) **सर्वज्ञनारायणः**। प्रसंगादन्यदप्येतैः कार्यमाह एतदिति। वेदविदिति वेदाध्ययनवान् ननु गायत्रीमात्रसारोपीति श्रुतिदर्शनादनधीत वेदोपि वेदपुण्येन कृत्स्नवेदाध्ययनफलेन ॥ ७८ ॥

(३) **कुल्लूकः**। यतएवमतएतदक्षरमिति। एतक्षरमोङ्काररूपमेतांच त्रिपदांसावित्रींव्याहृतित्रयपूर्विकांसन्ध्याकाले जपन्वेदज्ञोविप्रादिर्वेदत्रयाध्ययनपुण्येन युक्तोभवति। अतःसन्ध्याकाले प्रणवव्याहृतित्रयोपेतांसावित्रींजपेदिति विधिः कल्प्यते ॥ ७८ ॥

(४) **राघवानन्दः**। संन्यस्याजपार्थमानुपूर्वींप्रदर्शयति एतदिति। एतदक्षरंओंकाराक्षरंएतांतत्सवितुरित्यादिप्रचोदयादित्यन्तांभूर्भुवःस्वरिति व्याहृतयः प्रणवात्परस्मिन्पूर्वे च व्याहृतयोयस्यातदित्यादिकायाः तामित्यर्थः वेदपुण्येन वेदत्रयाध्ययनजतुल्यपुण्येन ॥ ७८ ॥

(५) **नन्दनः**। अथप्रणवव्याहृतिसावित्रीणांमाहात्म्यंप्रसङ्गादाह एतदति। अक्षरंप्रणवम्। एतांसावित्रीम्। विप्रशब्दोऽत्रक्षत्रियवैश्ययोरप्युपलक्षणार्थः। वेदविद्वेदविदः पुण्येन युज्यते वेदत्रयार्थविदोवेदत्रयजापिनश्चयत्फलंतल्लभतइत्यर्थः ॥ ७८ ॥

(६) **रामचन्द्रः**। एतदक्षरमोंकारंएतांत्रिपदींव्याहृतिपूर्विकांसन्ध्ययोर्जपन्तदा वेद पुण्येन वेदाध्ययनजन्यपुण्येन युज्यते ॥ ७८ ॥

सहस्रकृत्वस्त्वभ्यस्य बहिरेतत्त्रिकंद्विजः ॥ महतोप्येनसोमासात्त्वचेवाऽहिर्विमुच्यते ॥ ७९ ॥

(१) **मेधातिथिः**। बहिरित्यनावृतोदेशउच्यते तेनैतदुक्तंभवति। ग्रामनगराभ्यांबहिररण्ये नदीपुलिनादौ सहस्रवारानभ्यस्याऽऽवर्त्य नतु कृत्वसुचोप्यावृत्तिः प्रतिपाद्यते। अभ्यस्येत्यनेनापि तत्रपौनरुक्त्यं। सामान्यविशेषभावाददोषः। अभ्यस्येत्यनेन सामान्यतोभ्यासउक्तस्तत्र विशेषापेक्षायां सहस्रकृत्वेति नच कृत्वसुजंतादेवोभयाऽवगतिस्तस्य क्रिया विशेषापेक्षत्वात्। नहि देवदत्तः पञ्चकृत्वोन्हइत्युक्ते यावद्भुङ्क्तइति तेनोच्यते तावद्वाक्यार्थः समाप्यते। ननु चाभ्यस्येत्यनेनापि न काचिद्विशिष्टाक्रियोपात्ता सत्यं जपः प्रकृतस्तमभ्यस्येति प्रतीयते। आवृत्तिः पौनःपुन्येन सेवामहतोप्येनसः महत्पापंच ब्रह्महत्यादि। ततोपि मुच्यते किंपुनरुपपातकेभ्यःअपिः संभावने नसमुच्चये भेदोपादानेन समुच्चयावगमोयथा देवदत्तस्यात्र प्रभुत्वंयज्ञदत्तस्यापीह न तथा निर्देशः केभ्यः पुनरुपपातकेभ्योयंमोक्षउच्यते। गोवधादीन्युपपातकानि तानि च प्रतिपापमाम्नातप्रायश्चित्तानि सरहस्यानि यानि वा संवेत्ति नकृतान्यनुक्तपरिहाराण्यवश्यंभावितया च ज्ञायते। कृतानीति। तेषामपि नित्यानिसंध्योपासनादीन्यपनोदकानि। यदिचैतत्प्रायश्चित्तंस्यात्तदा तत्रैवावक्ष्यत्। जपेद्वै नियताहारः त्रिर्वैवेदस्य संहितामिति चेत्प्रायश्चित्ते चास्मिन्प्रायश्चित्तप्रकरणमेवानर्थकंस्यात्। कोहि देववशप्राप्तोजपमात्रसाध्यांनिष्कृतिंहित्वा कृच्छ्रेषुशरीरप्राणहरेष्वभ्यवस्येत्। उक्तंच। अर्के चेन्मधुविन्देत किमर्थंपर्वतंव्रजेत्। इष्टस्यार्थस्य संप्राप्तौ कोविद्वान्यत्नमाचरेत् ॥ तथा पणलभ्यंहि न प्राज्ञः क्रीणाति दशभिःपणैरिति। नच प्रकृतेनै-

कवाक्यताबीजंकिंचिद्विभज्यमानसपेक्षत्वाद्यस्ति येनतच्छेषतयार्थवादउच्यते अत्रोच्यते । विधिरेवायंपापप्रमोचनार्थ-एवायंप्रयोगः । यत्तूक्तंविषमशिष्टैर्विकल्पोन सिध्यतीति जपप्रायश्चित्तएवास्मिन्विकल्पार्थोभविष्यति । अघमर्षणादिभिः सर्वपापापनोदनमुक्तंतेनास्य विकल्पअघमर्षणे हि त्र्यहमुपवासउक्तः । इहाप्यन्नेव मासिकेन प्रयोगेण शुध्यति। ततो न दूरविप्रकृष्टे न तपसा समीयते येन विषमशिष्टता स्यात् । अथवा पूर्वकृतस्यैनसः शुद्धिरेषा ग्रहादौ स्थित्यादीसूचिते दैवे दोषे तस्मान्मोक्षअनिष्टमेनउच्यते । तस्मान्मुच्यते तत्फलेननसंबध्यतइत्यर्थः । त्वचेवाहि जीर्णया त्वचामुक्तः सर्पोयथा भवति निरवशेषेण पापनाशएतेन प्रतिपाद्यते । यत्तुदौश्चर्यादिसूचितंपूर्वकृतमशुभंतत्र स्मृत्यन्तरे प्रायश्चित्तमाम्नातंबहु तत्प्रायश्चित्तेष्वेव निदर्शयिष्यामः । एतदेवाभिप्रेत्योक्तं । जपतांजुह्वतांचैव विनिपातोन दृश्यतेइति ॥७९॥

(२) सर्वज्ञनारायण । बहिर्ग्रामात् त्रिकंप्रणवव्याहृतिगायत्रीरूपं महतोब्रह्महत्यादेरपि अबुद्धिपूर्वकृतव्रात्यब्राह्मणवधादिरूपात् मासात्कालमात्रात् त्वचेत्यादिदृष्टान्तोदार्ष्टान्तिकदार्ढ्यार्थः ॥ ७९ ॥

(३) कुल्लूकः । सहस्रकृत्वइति सन्ध्यायामन्यत्र कालएतत्प्रकृतंप्रणवव्याहृतित्रयसावित्र्यात्मकंत्रिकंग्रामाद्बहिर्नदीतीरारण्यादौ सहस्रावृत्तिजपित्वामहतोऽपि पापात्सर्पइवकञ्चुकान्मुच्यते । तस्मात्पापक्षयार्थमिदंजपनीयमित्यप्रकरणेऽपिलाघवार्थमुक्तम् । अन्यत्रैतत्त्रयोच्चारणमपि पुनः कर्तव्यंस्यात् ॥ ७९ ॥

(४) राघवानन्दः । किंच तस्याजपविशेषे फलविशेषमाह सहस्रेति। त्रिकंप्रणवादित्रयंबहिः ग्रामात् न घरण्यादौ त्वचः कञ्चुकात्त्वउपमानार्थः त्वचेवेति क्वचिन्महतोब्रह्महत्यादेः तस्मात्सर्वपापक्षयकामेनैषाजपनीयेतिभावः ॥ ७९ ॥

(५) नन्दनः । बहिः संध्याभ्यामन्यस्मिन्कालेऽपिग्रामाद्बहिरितिवा ॥ ७९ ॥

(६) रामचन्द्रः । तुपुनः जलाद्बहिर्गत्वाएतत्त्रिकंत्रिपदांसहस्रकृत्वःसहस्रसङ्ख्यांजपित्वामहतोपिएनसःपापात् मासात्मासपर्यन्तात् विमुच्यते ॥ ७९ ॥

एतयर्चाविसंयुक्तः काले च क्रियया स्वया ॥ ब्रह्मक्षत्रियविड्योनिर्गर्हणांयाति साधुषु ॥ ८० ॥

(१) मेधातिथिः। एतया सावित्र्या विसंयुक्तोहीनसंध्योपासनस्त्यक्तस्वाध्यायश्च गर्हणांनिन्दांसाधुषु विशिष्टेषु याति । प्राप्नोति । कीदृशींगर्हणांप्राप्नोत्यतआह । काले च क्रियया स्वया कालआषोडशादित्यस्मिन्वियुक्तेमतेनिन्द्यते । एवमुपनीतोपि स्वाध्यायारम्भयोग्यः सावित्रीवर्जितोव्रात्यएव भवति त्रयाणांया साधारणी स्वक्रिया सह निर्दिष्टा साचोपनयनमेव कालशब्दश्चैव मर्थवान् । अध्ययनादिस्वकर्मविवक्षायामेतावदेववाच्यंस्यात् । यक्रिया या स्वयेति योनिशब्दोजन्मपर्यायो जात्यर्थंगमयतिविप्रादिजातीयइत्यर्थः । अर्थवादोयंव्रात्यप्रायश्चित्तार्थः ॥ ८० ॥

(२) सर्वज्ञनारायणः । विसंयुक्तोवियुक्तः स्वया कृतयाअग्निहोत्रादिकया गर्हणांनिन्दांग्रहणमितिपाठे ग्रहणंपरिग्रहं तत्रापिसंयुक्तइत्यकारप्रश्लेषेण पाठः ॥ ८० ॥

(३) कुल्लूकः । एतयर्चेति । सन्ध्यायामन्यत्र समयक्रचैतयासावित्र्यावियुक्तस्त्यक्त सावित्रीजपःस्वकीययाक्रिययासायंप्रातर्होमादिरूपया स्वकाले त्यक्तोब्राह्मणः क्षत्रियोवैश्योपि सज्जनेषु निन्दांगच्छति तस्मात्स्वकाले सावित्रीजपंस्वक्रियांच न त्यजेत् ॥ ८० ॥

(४) राघवानन्दः । एतद्वैमुख्येदोषमाह एतयेति । एतयाऋचातत्सवितुरित्यादिकया विसंयुक्तः परित्यक्तः क्रिययासन्ध्याग्निहोत्रादिकया चगर्हणांनिन्द्यताम् ॥ ८० ॥

(५) **नन्दनः** । एतयर्चा प्रणवव्याहृतिपूर्वया सावित्र्या विसंयुक्तः काले च क्रियया स्वयेत्युपन्यासोदृष्टान्तार्थः । यथासन्ध्योपासनादिस्वकर्मणावियुक्तस्तथेति । गर्हणांयाति साधुषु दोषभूयिष्ठत्वात्साधुभिस्त्याज्यइत्यर्थः । अपरेतु-मन्यन्तेएतयर्चा विसंयुक्तोऽनुपनीतअतएव तत्तत्कालविहितस्वकर्मरहितोविप्रक्षत्रियविड्योनिजातोऽपि सन्तु त्याज्यतां-यातीति ॥ ८० ॥

(६) **रामचन्द्रः** । एतयाऋचा गायत्र्या विसंयुक्तः विरहितः काले जपकाले च पुनः स्वया क्रियया सायंप्रात-र्होमादिक्रियया विसंयुक्तःरहितःविप्रक्षत्रियविड्योनिः साधुषु गर्हणांयाति ॥ ८० ॥

ओंकारपूर्विकास्तिस्रोमहाव्याहृतयोऽव्ययाः॥ त्रिपदा चैव सावित्री विज्ञेयंब्रह्मणोमुखम्॥८१॥

(१) **मेधातिथिः**। ॐकारःपूर्वोयासांताॐकारपूर्विकाः । महाव्याहृतयः प्रकृताएव भूर्भुवःस्वरित्येते शब्दाअभिधी-यन्ते । अव्ययाअविनाशिन्यः फलस्य दीर्घकालत्वादेवमुच्यते । अन्यथा सर्वएव शब्दानित्याइति विशेषणमनर्थकम् । त्रि-पदातत्सवितुरित्येषा सावित्री ब्रह्मणोमुखं । आद्यत्वान्मुखव्यपदेशअतश्चारम्भअध्येयमेतदित्यस्यैवार्थवादः । अथवा मुखं-द्वारमुपायोब्रह्मप्राप्तिरनेन भवतितदेवाह ॥ ८१ ॥

(२) **सर्वज्ञनारायणः**। ब्रह्मणोवेदस्य मुखं ततस्तदारभ्य एतत्त्रयजपःकार्यइत्यर्थः ॥ ८१ ॥

(३) **कुल्लूकः** । ॐकारपूर्विकेति ओङ्कारपूर्विकास्तिस्रोव्याहृतयोभूर्भुवःस्वरित्येताअक्षरब्रह्मावाप्तिफलत्वेनाव्ययाः त्रिपदा च सावित्रीब्रह्मणोवेदस्य मुखमाद्यं तत्पूर्वकवेदाध्ययनारम्भात् । अथवा ब्रह्मणः परमात्मनः प्राप्तेर्द्वारमेतद-ध्ययनजपादिना निष्पापस्य ब्रह्मज्ञानप्रकर्षेण मोक्षावाप्तेः ॥ ८१ ॥

(४) **राघवानन्दः** । मुमुक्षूणांतदेव शरणमित्याह ॐमिति । अव्ययां अव्ययफलदात्रीं ब्रह्मणःपरंब्रह्मणःमुखंप्रा-प्त्युपायंवेदस्य प्रधानभूतंवा ॥ ८१ ॥

(५) **नन्दनः** ।ब्रह्मणोवेदस्य मुखंशरीरम् । तथा च सामुद्रिकवचनंमुखमर्धशरीरस्येति । अथवाब्रह्मणोमुखंवे-दाधिगमनद्वारम् ॥ ८१ ॥

(६) **रामचन्द्रः** । त्रिपदा चैव सावित्री ब्रह्मणःवेदस्य मुखंआद्यंतत्पूर्वकंवेदाध्ययनंविज्ञेयं ओंकारपूर्विकामहा व्याहृतयःतिस्रःअव्ययाःतद्यथा ओंभूः ओंभुवः ओंस्वरितित्रयः व्याहृतयःअथवा ब्रह्मणःपरमात्मनःप्राप्तःमुखंद्वारंएतद-ध्ययनजपादिना ॥ ८१ ॥

योऽधीतेऽहन्यहन्येतांत्रीणि वर्षाण्यतन्द्रितः ॥ सब्रह्मपरमभ्येति वायुभूतःखमूर्तिमान् ॥ ८२ ॥

(१) **मेधातिथिः** । आकाशइव सर्वव्यापीविभुः संपद्यते खमूर्तिः ख स्वभाववान् ननु मूर्तिःशरीरमाकाशस्य शरी-राभावात् । अथ किमिदंब्रह्म यद्रूपापत्तिरुच्यते । परमात्माऽऽनन्दरूपः यस्येमे क्षेत्रज्ञाः पवनजवोद्धतस्य वारिराशेरिवो-र्मयः । ते यथा प्रशान्तावस्थे तस्मिन्तद्रूपाभवन्ति । एवममीतद्रूपाआत्मानः संपद्यन्ते । विशेषतश्च सर्वमेतद्द्वादशे वक्ष्यते । अध्ययनमिदंगायत्र्याश्चोदितंन जपोन चावृत्तिगणनास्ति । अतन्द्रितइतिवचनाद्बहुकृत्वः करणंप्रतीयते । सकृत्प्रयोगे हि नास्ति तन्द्राशङ्कामोक्षार्थिनोयंविधिः ॥ ८२ ॥

---

(८२) खमूर्तिमान्=स्वमूर्तिमान (ज, झ,)

(२) **सर्वज्ञनारायणः**। वायुभूतोऽप्रतिहतगतिः खमूर्तिमान्शुद्धः ॥ ८२ ॥

(३) **कुल्लूकः**। अतएवाह योऽधीतइति । यःप्रत्यहमनलसः सन्सावित्रींप्रणवव्याहृतियुक्तांवर्षत्रयमधीते सपरंब्रह्मा-भिमुखेन गच्छति सवायुभूतोवायुरिवकामचारी जायते खंब्रह्मतदेवास्य मूर्तिरिति खमूर्तिमान्भवति शरीरस्यापिनाशात् ब्रह्मैवसंपद्यते ॥ ८२ ॥

(४) **राघवानन्दः**। किंच यइति । अधीतेअभ्यस्यति संख्यापूर्वोक्तैव वायुभूतःवायुर्वैगौतमतत्सूत्रमित्यादिश्रुते-र्हिरण्यगर्भपदवींप्राप्य खमूर्तिमान् आकाशवद्देहाद्यनवच्छिन्नःब्रह्म भवेदिति क्रममुक्तिरित्यर्थः ॥ ८२ ॥

(५) **नन्दनः**। एतांप्रणवव्याहृतिपूर्विकांसावित्रीम् । अतन्द्रितः शक्तौ सत्यां न कदाचिदप्यनन्यपरः । वायुभूतः सर्वव्यापी । खमूर्तिमान् लेपरहितः । परंब्रह्माभ्येति परस्मिन्ब्रह्मणि लीयते ॥ ८२ ॥

(६) **रामचन्द्रः**। अहनिअहनि प्रत्यहंएतांत्रिपदींयःअधीते त्रीणि वर्षाणि त्रिवर्षपर्यन्तंसपुरुषःपरंब्रह्मअभ्येति ब्रह्मत्वंएति वायुभूतःवायुरूपःखमूर्तिमान् अमूर्तित्वात् ॥ ८२ ॥

एकाक्षरंपरंब्रह्मप्राणायामाःपरंतपः ॥ सावित्र्यास्तु परंनास्ति मौनात्सत्यंविशिष्यते ॥ ८३ ॥

(१) **मेधातिथिः**। ॐकारएकाक्षरंतत्परंब्रह्म । ब्रह्मप्राप्तिहेतुत्वात् । तदर्थभावनयाब्रह्मप्राप्तेरेवमुच्यते । ॐमिति ब्रह्माभिधानम् । एवंह्याहुस्तस्य वाचकः प्रणवइति तत्परंप्रकृष्टंकुतोऽन्याभ्योब्रह्मोपासनाभ्योऽन्नंब्रह्मेत्युपासीता दित्योब्रह्मेत्यादेशइति एवमाद्याभ्यउपासनाभ्यः ॐकारोपासनाप्रकृष्यते । अध्ययनादेव तत्प्राप्त्यभिधानात् । शब्द स्यैव च ब्रह्मत्वेन श्रवणात् । शब्दब्रह्मणि निष्णातः परंब्रह्माधिगच्छतीति । सर्वोह्यर्थोवाग्व्यवहारानतीतोवाचश्च सर्वस्या ॐकारोमूलं तथाच श्रुतिस्तद्यथाशङ्कुना सर्वाणि पत्राणि संतृण्णान्येवमोंकारेण सर्वा वाक्संतृण्णाॐकारएवेदंसर्वमिति । अन्तर्द्धानमनुस्मृतिः आश्रयभावापत्तिर्वाकथंपुनः सर्वावागोंकारेण संतृण्णा वैदिक्यास्तावदोंकारपूर्वकत्वमुक्तम् । लौकिक्या-अपि तदादीनि वाक्यानि स्युरित्यापस्तम्बवचनात् उपनिषद्भाष्ये चैतदन्यथा व्याख्यातंतत्त्विहानुपयोगान्नप्रदर्शितम् । प्राणायामशब्दआचमनवद्विशिष्टेतिकर्तव्यताके प्राणनिरोधे वर्तते । परंतपश्चांद्रायणादिभ्यः किंपुनस्तस्य श्रेष्ठ्यंभक्तिरे-षा सावित्र्याः परंमन्त्रज्ञानंनास्ति । एषामिति प्रशंसा मौनात्सत्यंविशिष्यते । मौनंवाङ्नियमउच्यते तस्य च नियमउच्यते । यत्फलंतं मियमउच्यते । यत्फलंततोधिकंसत्यवचनात्प्राप्यते सत्यवचने विध्यर्थोपि तथानुष्ठितोभवति । मौने तु केवल-मनृतप्रतिषेधानुष्ठानमेव । अर्थवादोयंश्लोकः ॥ ८३ ॥

(२) **सर्वज्ञनारायणः**। परंब्रह्म परमोवेदः प्राणायामसत्ययोः प्रसङ्गात्श्रुतेःपरंजप्यंनास्ति सत्यंविशिष्यते । उभ-यत्रानृतानविधानसाम्येपि सत्याभिधाननियमाधिक्यात् ॥ ८३ ॥

(३) **कुल्लूकः**। एकाक्षरमिति । एकाक्षरमोङ्कारःपरंब्रह्म परब्रह्मावाप्तिहेतुत्वादोङ्कारस्य जपेन तदर्थस्य च परब्रह्मणोभावनया तदवाप्तेः । प्राणायामाः सप्रणवसव्याहृतिसशिरस्कगायत्रीभिस्त्रिरावृत्तिभिः कृताश्चान्द्रायणादिभ्यो-ऽपि परंतपः । प्राणायामाइति बहुवचननिर्देशात्त्रयोऽवश्यंकर्तव्या इत्युक्तम् । सावित्र्याःप्रकृष्टमन्यन्मन्त्रजातंनास्ति । मौनादपि सत्यंवाग्विशिष्यते । एषांचतुर्णांस्तुत्या चत्वार्येतान्युपासनीयानीति विधिः कल्प्यते । धरणीधरेण तु । एकाक्ष-रपरंब्रह्मप्राणायामपरंतपइति पठितंव्याख्यातंच एकाक्षरंपरंयस्यतदेकाक्षरपरंएवंप्राणायामपरमिति मेधातिथिप्रभृतिभि-र्वृद्धैरलिखितंयतः लिखमात्पाठान्तरंतत्र स्वतन्त्रोधरणीधरः ॥ ८३ ॥

(४) **राघवानन्दः** । संप्रति मुमुक्षूणांसंनिपत्योपकारकाणि ब्रुवन्व्रीह्यादिसाध्यहिंसात्मकानि कर्माणि निन्दति एकाक्षरमितिद्वाभ्याम् । एकाक्षरंप्रणवःपरंब्रह्मतदभिधायकत्वात् तस्य वाचकःप्रणवइति पातञ्जलोक्तेः । परंतपःशरीरशोषणपापनाशकत्वसाम्यात्प्राणायामेन पातकमित्युक्तेः अतआह मौनात्सत्यमिति । मौनात् तूष्णींभावात्सत्यंप्रणवादिजपः उपक्रमोपसंहाराभ्यांजपएवतात्पर्यात् ॥ ८३ ॥

(५) **नन्दनः** । शास्त्रान्तरेषु ब्रह्मप्राप्तेरुपायःसमाधिरित्युक्तंतस्मादपिप्रणवादित्रिकजपोविशिष्टतरइत्याह एकाक्षरमिति । एकाक्षरंप्रणवः परंब्रह्मब्रह्मस्वरूपत्वात् । तथाहि ब्रह्मनन्दिवाक्यंओमित्यात्मेति । प्रतीमइति । तथाचोपनिषद्युक्तंओमितिब्रह्मेति । प्राणायामशब्देन व्याहृतयो लक्ष्यन्ते । ताः खल्वातमितोः प्राणानायम्य रेचयतः प्रजापतेरास्याद्रेचकशब्दरूपानिर्गताः । तथाहि श्रुतिः सचतुर्होत्रातप्यतसोऽताम्यत् । सभूरितिव्याहरत् सद्वितीयमतप्यत । सोऽताम्यत् सभुवइतिव्याहरत् सतृतीयमतप्यत सोऽताम्यत् ससुवरितिव्याहरदिति । परमतपःसाधनत्वात्परमंतपः । मौनंतूष्णींभावः समस्तेन्द्रियोपरतिः समाधिरितियावत् । सत्यंजपःसत्यरूपत्वात् । एतदुक्तंभवति प्रणवः परब्रह्मस्वरूपं व्याहृतयः परमतपःसाधनभूताः साविच्या विशिष्टंनकश्चिदस्ति तस्मात्तेषांजपः समाधेरपिविशिष्यतइति ॥ ८३ ॥

(६) **रामचन्द्रः** । एकाक्षरंपरंब्रह्म ओंकाररूपंपरंब्रह्मप्राणायामाःप्राणसंयमाःपरंउत्कृष्टंतपः साविच्याःजपात्परंनास्ति । मौनात्सत्यंविशिष्यते । प्रलापरहितंमौनंप्रलापोनर्थकंवचः इत्यमरः ॥ ८३ ॥

क्षरन्ति सर्वावैदिक्योजुहोति यजति क्रियाः ॥ अक्षरंदुष्करंज्ञेयंब्रह्म चैव प्रजापतिः ॥ ८४ ॥

(१) **मेधातिथिः** । यावन्तः केचन वैदिकाहोमाअग्निहोत्रादयोये च यागाज्योतिष्टोमादयः ते सर्वे क्षरंतिन परिपूर्णफलाभवन्ति । फलंवा तदियंस्रवत्याशु विनश्यति अक्षरंत्वेतदोंकाराख्यमक्षरंज्ञेयमक्षयफलं । ब्रह्मीभूतस्य न पुनः संसारापत्तिः अतोक्षयफलत्वादक्षरमुच्यते । एकोक्षरशब्दउद्देश्यः । संज्ञाशब्दो द्वितीयोयौगिकः क्रियाशब्दः ब्रह्मैवतदेव प्रजापतिश्चोङ्कारएव । स्तुतिरेषा जुहोति यजतीति धातुनिर्देशस्तयोः क्रियाप्रतिपाद्यार्थायागहोमाः । व्यक्त्यपेक्षंबहुत्वं । अथवाधात्वर्थनिर्देशएवायंजुहोति यजतीति क्रियास्तद्व्यतिरिक्तादानाद्यादृंद्वश्चायंजुहोति यजतीति च क्रियाश्च होमयागौ प्राधान्यात्पृथगुपादीयेते । अथ युक्ताओंकारस्य स्तुतिः । केवलस्यापि जपविधानार्थेति केचित् नहि प्रकृतविधिशेषतैवात्र पुनःपरामर्शाभावात् । वैश्वानरे द्वाष्टत्वादीनांयदष्टाकपालोभवति । गायत्र्याचैनंब्रह्मवर्चसेन पुनाति यन्नव कपालस्त्रिवृतैवास्मिंस्तेजोदधातीति । सर्वत्र वैश्वानरपदापेक्षया तदेकवाक्यत्वे संभवति न वाक्यभेदकल्पनयाविध्यन्तरसंभव इह त्वक्षरंज्ञेयमिति । न पूर्वापेक्षानापि साविच्यादीनांपुनः परामर्शोस्ति । अतः स्वपदार्थैरेव वाक्यार्थपरिसमाप्तेर्नान्यशेषता । ज्ञेयमित्यत्र कृत्योविधायकः ब्रह्मपदेन च संबन्धाद्ब्रह्मरूपतया ज्ञेयमुपास्यंभावनीयं भाव्यमाने च तस्मिन्मानसजपउक्तो भवति ॥ ८४ ॥

(२) **सर्वज्ञनारायणः** । विनाशिफलाः क्षितपूधातुस्वरूपनिर्देशेविहितोपि शिष्टैरर्थनिर्देशेपि प्रयुज्यते । जुहोतिरुपविष्टहोमः । यजतिस्तिष्ठद्धोमः । अक्षरमोंकारोक्षरमविनाशिफलं ब्रह्मा परमात्मा निराकारोपासने साकारोपासनेतु तदीयरूपशक्तिः प्रजापतिरोंकारार्थभूतौअक्षरौ उपासकानामनाशिफलदौ ॥ ८४ ॥

(३) **कुल्लूकः** । क्षरन्तीति । सर्वावेदविहिताहोमयागादिरूपाः क्रियाः स्वरूपतः फलतश्च विनश्यन्ति । अक्षरंतु

---

(८४) दुष्करं=त्वक्षरं (क, ख, ग, घ, च, मेधा०)

प्रणवरूपमक्षयंब्रह्मप्राप्तिहेतुत्वात् । फलद्वारेणाक्षरंब्रह्मीभावस्याविनाशात्कथमस्य ब्रह्मप्राप्तिहेतुत्वमतआह ब्रह्मचैवेति । चशब्दोहेतौ । यस्मात्प्रजानामधिपतिर्यद्ब्रह्म तदेवायमोङ्कारः स्वरूपतोब्रह्मप्रतिपादकत्वेन चास्य ब्रह्मत्वंउभयथापि ब्रह्मत्वेन प्रतिपादकत्वेन वायमुपासितोजपकाले मोक्षहेतुरनेन दर्शितम् ॥ ८४ ॥

(४) **राघवानन्दः** । किंचान्यत्क्षरन्ति हिरण्यगर्भपदस्यासाधकत्वान्नतत्र दक्षिणायंतीति श्रुतेः । दक्षिणाअग्निहोत्रादिपराः अतएवाक्षरमित्यादि अक्षरंअविनाशि तदेवब्रह्मप्रजापतिर्हिरण्यगर्भश्च एतद्वै सत्यकामःपरंचापरंच यदोंकारइति श्रुतेः परापरब्रह्मप्राप्त्युपायत्वात् ॥ ८४ ॥

(५) **नन्दनः** । क्षरन्तिस्वरूपतः फलतश्चनश्यन्ति । अक्षरंप्रणवादित्रिकंनक्षरंविनश्वरफलंन भवति । ब्रह्मा परमात्मलक्षणः । प्रजापतिर्मुख्यः । चकारोऽत्रदृष्टान्तार्थः । प्रणवादित्रिकवाच्यपरमात्मायथा न क्षरति तद्वत्तद्वाचकंप्रणवादित्रिकमपीति । श्रौतस्मार्तानिकर्माणि न क्षरफलानि प्रणवादिकस्यस्वरूपतोर्थतश्चानश्वरत्वात् । तज्जपफलमप्यनश्वरमित्यभिप्रायः ॥ ८४ ॥

(६) **रामचन्द्रः** । सर्ववैदिक्यःजुहोति अग्निष्टोमादिना यजति वैश्वदेवादिकंजुहोतिइत्यादिक्रियाःक्षरन्तिस्रवन्ति अक्षरं ओंकारंअक्षरंअविनाशिरूपंज्ञेयंप्रजापतिःब्रह्मब्रह्मैव वेदस्वरूपमेव ज्ञेयम् ॥ ८४ ॥

विधियज्ञाज्जपयज्ञोविशिष्टोदशभिर्गुणैः ॥ उपांशुःस्याच्छतगुणःसाहस्रोमानसःस्मृतः ॥ ८५ ॥

(१) **मेधातिथिः** । विधिविषयोयज्ञोविधियज्ञोज्योतिष्टोमादिर्यत्कर्म यजेतेति चोदितंप्राप्तेन व्यापारेण ऋत्विगादिसर्वाङ्गसंपत्त्याक्रियते सविधियज्ञइहोच्यते । जपस्तु न यज्ञः । प्रशंसया यज्ञउपचारेणोच्यते । अतोनासौ विधियज्ञः सविशिष्टः प्रकृष्टः श्रेष्ठोयज्ञोज्योतिष्टोमादिर्दशभिर्गुणैः महाफलत्वमेतेन जपस्योच्यते । यदेव यागात्फलंतदेव बहुतरजपात्प्राप्यते नच यागेभ्यः श्रौतेभ्योजपस्याधिकफलत्वंयुक्तंतथाहि सति कः शरीरधनपरिक्षयरूपेषु यागेष्वध्यवस्येत् । तस्मात्प्रशंसैषा पूर्णाहुत्या सर्वान्कामानवाप्नोतीतिवत् । एतावदस्यार्थस्तदेव स्वर्गादिफलमवाप्यते । किंतु लोकवत्प्रयत्नविशेषात् । फलपरिमाण विशेषोविशेषित्वात् । यज्ञस्य स्वर्गग्रामपुत्रपश्वादियस्य यज्ञस्ययत्फलंतत्तज्जपात्प्राप्यते । उपांशुः शतगुणः यदन्योनशृणोति समीपस्थोपि सहस्रगुणः साहस्रोमानसोव्यापारमात्रेण यश्चिन्त्यते जपमात्रविषयउपांशुत्वादिगुणः प्रकृतस्य योधीतेत्यनेन विच्छेदात्तेन यः प्रायश्चित्तादौ जपोयः शान्तिकोयश्चाभ्युदयिकः सर्वत्रैते गुणाः सहस्रमस्यास्तीति साहस्रः गुणानांप्रकृतत्वात्सहस्रगुणसद्भावः प्रतीयते । गुणशब्दश्चावयववचनः फलभूमा च संबन्धादवगम्यते ॥ ८५ ॥

(२) **सर्वज्ञनारायणः** । विधियज्ञोवेदोभूयसाग्रन्थेन विहितोयज्ञोग्निष्टोमादिर्दर्शपूर्णमासादिश्च जपयज्ञउच्चैरपि क्रियमाणोदशगुणफलः अक्षराणांव्यक्तत्वस्यान्योन्यसंश्लिष्टज्ञाने रूपस्यैवजपत्वात् । उपांशुःपराश्रवणीयशब्दोच्चारणंमानसः स्वस्यापि मनोमात्रग्राह्याक्षरः साहस्रःसहस्रगुणोविधियज्ञादेव ॥ ८५ ॥

(३) **कुल्लूकः** । विधियज्ञादिति । विधिविषयोयज्ञोविधियज्ञोदर्शपौर्णमासादिस्तस्मात्प्रकृतानांप्रणवादीनांजपयज्ञोदशगुणाधिकः । सोप्युपांशुश्चेदनुष्ठितस्तदा शतगुणाधिकः । यत्समीपस्थोऽपि परोनशृणोति तदुपांशु । मानसस्तु जपः सहस्रगुणाधिकः यत्र जिव्हौष्ठंमनागपिनचलति समानसः ॥ ८५ ॥

(४) **राघवानन्दः** । जपस्यश्रेयस्त्वंप्रदर्शयन्तद्विशेषे फलभूमानमाह विधीति । विधियज्ञादग्निहोत्रादेःजपयज्ञो वाचिकःदशभिर्गुणैर्विशिष्टोदशगुणफलदःसएवोपांशुत्वेनानुष्ठितःशतगुणफलदः । उपांशुरिति यत्समीपस्थोजनोनशृणोति

सएवमानस ईषदपिजिह्वोच्चारणरहितः । ननु । नकर्मणामनारंभान्नैष्कर्म्यंपुरुषोश्नुतेइत्यादेः कागतिरितिचेत्तत्राह । कर्मजडानप्रति ॥ ८५ ॥

(५) **नन्दनः** । यतएवमतोयज्ञान्तरेभ्योजपयज्ञोविशिष्टतरइतिश्लोकद्वयेनाह विधियज्ञादिति । विधियज्ञादग्निहोत्रादेर्जपयज्ञोदशभिर्गुणैर्विशिष्टः साधनवैगुण्यदोषराहित्यात् । उपांशुजपयज्ञोविधियज्ञाच्छतगुणः । मनसोजपयज्ञोविधियज्ञात्साहस्रःसहस्रगुणः ॥ ८५ ॥

(६) **रामचन्द्रः** । जपयज्ञः जपरूपोयज्ञः विधियज्ञातअग्निष्टोमादियज्ञात्दशभिर्गुणैः विशिष्टउत्कृष्टः उपांशुःकिंचित्श्रवणयोग्यः उपांशुः जपः शतगुणः स्यात् मानसोजपः सहस्रगुणः स्मृतः ॥ ८५ ॥

ये पाकयज्ञाश्चत्वारोविधियज्ञसमन्विताः ॥ सर्वेते जपयज्ञस्य कलांनार्हन्तिषोडशीम् ॥ ८६

(१) **मेधातिथिः** । महायज्ञाः पाकयज्ञाउच्यन्ते । ब्रह्मयज्ञंवर्जयित्वा चत्वारोयज्ञाभवन्ति । विधियज्ञाउक्तास्तैः समन्विताः । सहिताः कलामंशंषोडशींनार्हन्ति । षोडशेन भागेन न समाभवन्ति । अथवार्हतिः प्राप्त्यर्थेमूल्यपणनेवर्तते ॥ अर्हशब्दात्क्विपंकृत्वाअर्हन्तिरूपम् ॥ ८६ ॥

(२) **सर्वज्ञनारायणः** । अस्तुतावद्विधियज्ञमात्रमान्यैरपि यज्ञैर्मिलितस्य जपयज्ञस्य साम्यमित्याह चत्वारोये देवभूतमनुष्यपितृयंज्ञरूपाः ब्रह्मयज्ञस्य जपयज्ञप्रवेशादपाकयज्ञत्वाच्च विधियज्ञोग्निष्टोमादिः षोडशींकलाअग्रंनार्हन्तिमूल्यार्थं न लभन्ते ॥ ८६ ॥

(३) **कुल्लूकः** । ये पाकयज्ञाइति । ब्रह्मयज्ञादन्ये ये पञ्च महायज्ञान्तर्गतावैश्वदेवहोमबलिकर्मनित्यश्राद्धातिथिभोजनात्मकाश्चत्वारः पाकयज्ञा विधियज्ञादर्शपौर्णमासादयस्तैः सहिताजपयज्ञस्य षोडशीमपिकलांन प्राप्नुवन्ति जपयज्ञस्य षोडशांशेनापि न समाइत्यर्थः ॥ ८६ ॥

(४) **राघवानन्दः** । तत्कार्यमंन्तःकरणशुद्धिरपि जपसाध्येत्याह यइति द्वाभ्याम् । पाकयज्ञावक्ष्यमाणाःविधियज्ञादर्शपौर्णमासादयः ॥ ८६ ॥

(५) **नन्दनः** । पाकयज्ञशब्दोऽत्राल्पवचनः । चत्वारोदेवपितृमनुष्यभूतभेदात् ॥ ८६ ॥

(६) **रामचन्द्रः** । ये चत्वारः पाकयज्ञाः वैश्वदेवादयः विधियज्ञसमन्विताः अग्निहोत्रादियज्ञसमन्विताः सर्वेजपयज्ञस्य षोडशींकलांनार्हन्ति ॥ ८६ ॥

जप्येनैव तु संसिध्येद्ब्राह्मणोनात्र संशयः ॥ कुर्यादन्यन्न वाकुर्यान्मैत्रोब्राह्मणउच्यते ॥ ८७ ॥

(१) **मेधातिथिः** । जप्येनैव सिद्धिंकाम्यफलावाप्तिंब्रह्मप्राप्तिंवा प्राप्नुयात् नात्र तद्विशङ्का कर्तव्या यज्ज्योतिष्टोमादिभ्योमहाप्रयासेभ्योभावनाभ्यश्च यल्लब्धव्यंतज्जपेन कथंसिध्यतीति सिद्ध्यत्येव । कुर्यादन्यन्नित्यंज्योतिष्टोमादि । अथवा तदपि न कुर्याद्यतोमैत्रोब्राह्मणउच्यते । मित्रमेव मैत्रंसर्वभूतमैत्रीरतेन ब्राह्मणेन भवितव्यम् । अग्निषोमीयपशुहिंसायां च कुतोमैत्री । अयमर्थवादएव । न पुनः पश्वङ्गकर्मप्रतिषेधः पूर्वशेषत्वावगतेः प्रत्यक्षश्रुतिविहितत्वाच्च तेषामतिक्रान्तोजपविधिः ॥ ८७ ॥

(२) **सर्वज्ञनारायणः** । संसिध्येन्मोक्षंलभेत । तद्विरोधेनान्यन्नकुर्यादित्युपक्रम्य स्वसिद्धान्तमाह न कुर्यादिति । मैत्रोहिंस्रोविधियज्ञानांबीजपश्वादिहिंसयैवावृत्तिरित्यर्थः ॥ ८७ ॥

(३) कुल्लूकः । जप्येनैवेति । ब्राह्मणोजप्येनैव निःसन्देहांसिद्धिंलभते मोक्षप्राप्तियोग्योभवति । अन्यद्वैदिकंयागादिकंकरोतु न करोतु वा यस्मान्मैत्रोब्राह्मणोब्रह्मणःसंबन्धीब्रह्मणिलीयतइत्यागमेषूच्यते । मित्रमेव मैत्रः स्वार्थेऽण् । यागादिषु पशुबीजादिवधान्न सर्वप्राणिप्रियतासंभवति । तस्माद्यागादिना विनापि प्रणवादिजपनिष्ठोनिस्तरतीति जपप्रशंसा न तु यागादीनांनिषेधस्तेषामपिशास्त्रीयत्वात् ॥ ८७ ॥

(४) राघवानन्दः । जप्येन मन्त्राणांजपेन संसिध्येदंन्तःकरणशुद्धिंलभेत धर्मेण पापमपनुदतीति महतोप्येनसोमासात्त्वचेवाहिर्विमुच्यतइति । जपतोनास्ति पातकमिति श्रुतेः । स्मृतिःयांअन्ययागादिकंमैत्रःमित्रःसूर्यःतद्दैवत्यःगायत्र्युपासकः अथवा प्राणिमात्रप्रियःअण्स्वार्थिकःब्राह्मणोब्रह्मनिष्ठःकृतसाक्षात्कारउच्यते स्वमूर्तिमानित्युक्तम् । स ब्राह्मणः केनस्याद्येनस्यादित्यादिश्रुतेः ॥ ८७ ॥

(५) नन्दनः । ब्राह्मणस्य विशेषेण जपः परमोधर्मइत्याह जप्येनेति । संसिध्येन्मुक्तोभवति । अन्यत्कर्म कुर्यान्नवा कुर्यात् । अत्रहेतुर्मैत्रोब्राह्मणइति । सर्वानुकूल्यं मैत्री तद्वान् मैत्रः । अतोहिंसानुबन्धिनोविधियज्ञाद्ब्राह्मणस्य जपयज्ञोविशिष्टतरइति ॥ ८७ ॥

(६) रामचन्द्रः । ब्राह्मणःगायत्र्या जाप्येनैव संसिध्येत् अन्यजपादिकं कुर्याद्वा न वा कुर्यात् ब्राह्मणःमैत्रःअहिंस्रःउच्यते ॥ ८७ ॥

इन्द्रियाणांविचरतांविषयेष्वपहारिषु ॥ संयमे यत्नमातिष्ठेद्विद्वान्यन्तेव वाजिनाम् ॥ ८८ ॥

(१) मेधातिथिः । इन्द्रियाणांसंयमे यत्नमातिष्ठेदित्येतावाञ्छास्त्रार्थःपरिशिष्टोर्थवादः । आसंध्योपासनविधेः संयमः प्रतिषिद्धेषुविषयेषु प्रवृत्तिपरिहारोप्रतिषिद्धेष्वप्यतिसक्तिर्वर्जनं तत्र प्रतिषिद्धपरिहारस्तैरेव प्रतिषेधैः सिद्धः । अप्रतिसिद्धेष्वप्यतिसक्तिनिषेधार्थोयंश्लोकसंघातःएतदेवाह विचरतांविषयेषु स्वातंत्र्येण वस्तुशक्त्या प्रवर्तमानानामपहारिषु विषयेष्वपहरन्त्याकर्षन्त्यात्मसात्कुर्वन्ति । पारतन्त्र्यमापादयन्ति । पुरुषानपहारिणोविषयामनोहरायउच्यन्ते तत्र विचरतांविविधंविशेषेणचरतांयदीन्द्रियाणि विशेषेण न चरेयुरपरिहारिणोपि तदा विषयाः किंकुर्युः भवन्तुवा निरङ्कुशानीन्द्रियाणि यदि विषयाः प्रत्याख्यायिकास्तथापि सुसंयमःपुरुषेणात्मा यतस्तूभयंसापराधमतोयत्नआस्थेयोदुर्नियमानि ह्येतानि नियन्तेव वाजिनांयन्तासारथिरश्वानां यथा रथयुक्तानांस्वभावतोविचलनशीलानांसंयमे नियमे यत्नंकरोति न तदानिच्छया उन्मार्गेण वहन्ति । विधेयतांतस्य भजन्तएवमिन्द्रियाणि विधेयीकर्तव्यानि ॥ ८८ ॥

(२) सर्वज्ञनारायणः । जप्ये अवश्योपसंहार्यमङ्गंदर्शयति इन्द्रियाणामित्यादिना । अपहारिष्विन्द्रियावकर्षकेषु यन्तेवेत्येकाग्रतार्थं दृष्टान्तः ॥ ८८ ॥

(३) कुल्लूकः । इदानींसर्ववर्णानुष्ठेयंसकलपुरुषार्थोपयुक्तमिन्द्रियसंयममाह इन्द्रियाणामिति । इन्द्रियाणांविषयेष्वपहरणशीलेषु वर्तमानानांक्षयित्वादिविषयदोषाज्ज्ञानन्संयमेयत्नंकुर्यात्सारथिरिवरथनियुक्तानामश्वानाम् ॥ ८८ ॥

(४) राघवानन्दः । अनुपसंहृतेन्द्रियाणांजपोपिनफलायेति तदर्थमत्याहारमाह । इन्द्रियाणामिति । अपहारिषुइन्द्रियाणि स्वप्रवणंकर्तुंशीलेषु यन्ताअश्वनियमनसारथिरिव संयमनंकुर्यात् ॥ ८८ ॥

(५) नन्दनः । एवंतावद्ब्रह्मचारिणोवेदाध्ययनधर्माउक्ताः प्रसङ्गात्प्रणवव्याहृतिसावित्रीमाहात्म्यंचोक्तं इदानींतस्येन्द्रियसंयममाह इन्द्रियाणामिति । अपहारिष्विन्द्रियापहारिषु ॥ ८८ ॥

(६) **रामचन्द्रः** । अपहारिषु हरणशीलेषु विषयेषु विचरतांइन्द्रियाणांसंयमे यत्नंआतिष्ठेत्विद्वान् कइव वाजिनंयन्तेव ॥ ८८ ॥

एकादशेन्द्रियाण्याहुर्यानि पूर्वे मनीषिणः ॥ तानि सम्यक्प्रवक्ष्यामि यथावदनुपूर्वशः ॥ ८९ ॥

(१) **मेधातिथिः** । संख्यानिर्देशोयंप्रमाणान्तरगम्योन पदार्थः सौहार्देनतु व्युत्पाद्यते । तानि पूर्वेमनीषिणआहुः । परस्तान्नामतः कर्मतश्च वक्ष्यामि । आनुपूर्व्यमनाकुलता पूर्वग्रहणान्नेयंतार्किकैरेव व्यवस्था कल्पिता । किंतु पूर्वेषामप्याचार्याणांस्थितैव । एतामजानतोनागमिकइति लोकैरपि दृश्यते । इत्यतोयंवेदितव्याः प्रसिद्धाः पदार्थाव्याख्याताश्च प्राक् ॥ ८९ ॥

(२) **सर्वज्ञनारायणः** । नियमान्दर्शयति एकादशेति । यथावत् स्वस्वप्रकारवत्तया ॥ ८९ ॥

(३) **कुल्लूकः** । एकादशेति । पूर्वपण्डितायान्येकादशेन्द्रियाण्याहुस्तान्यर्वाचांशिक्षार्थंसर्वाणि कर्मतोनामतश्च क्रमाद्वक्ष्यामि ॥ ८९ ॥

(४) **राघवानन्दः** । तानि कतीत्यपेक्षायामाह एकेति । पूर्वे ब्रह्मादयः आनुपूर्वशःश्रोत्रादिक्रमेण ॥ ८९ ॥

(६) **रामचन्द्रः** । इन्द्रियाणामुत्पत्तिमाह । यानिएकादशेन्द्रियाणि पूर्वे मनीषिणःआहुः । तानि सम्यक् प्रवक्ष्यामिअनुपूर्वशः ॥८९॥

श्रोत्रंत्वक्चक्षुषीजिह्वानासिकाचैव पञ्चमी ॥ पायूपस्थंहस्तपादंवाक्चैव दशमी स्मृता ॥ ९० ॥

(१) **मेधातिथिः** । श्रोत्रादीनि प्रसिद्धान्यधिष्ठानभेदाच्चक्षुषीइति द्विवचनमन्यत्र तदाधारायाः शक्तेरेकत्वादेकवचनं । उपस्थःशुक्रोत्सर्जनः पुंसोजवस्तदाधारश्च स्त्रियाः । द्वन्द्वनिर्दिष्टयोः प्राण्यङ्गत्वादेकवद्भावः वाक्त्वादि शब्दाभिव्यञ्जकः शरीरावयववचनः नाम निर्देशोयम् ॥ ९० ॥

(२) **सर्वज्ञनारायणः** । जिह्वा रसना वागभिधानशक्तिरास्यगता त्वक्च चक्षुश्च त्वक्चक्षुषी आधारभेदेपीन्द्रियशक्तेरेकत्वात् द्व्याधारत्वेपि चक्षुरादेकैकमिन्द्रियम् करौपादावित्याधारापेक्षंद्वित्वम् ॥ ९० ॥

(३) **कुल्लूकः** । श्रोत्रमिति । तेष्वेकादशसु श्रोत्रादीनि दशैतानि बहिरिन्द्रियाणि नामतोनिर्दिष्टानि । पायूपस्थंहस्तपादमिति द्वन्द्वश्चप्राणितूर्यसेनाङ्गानामिति । प्राण्यङ्गद्वन्द्वत्वादेकवद्भावः ॥ ९० ॥

(४) **राघवानन्दः** । तेषांस्वरूपंसंख्यांकार्यंचाह श्रोत्रमिति त्रिभिः । स्वरूपंश्रोत्रमित्यादि सङ्ख्यांपञ्चेत्यादिः कार्यंधीकर्मजनकताएषांमध्ये स्वगुणेन संकल्पेनोभयात्मकमुभयगुणमेकं यस्मिन्मनसि जिते गणौधीन्द्रियकर्मेन्द्रियात्मकौ ॥ ९० ॥

(५) **नन्दनः** । त्वक्चक्षुषीइतिद्वन्द्वसमासः ॥ ९० ॥

(६) **रामचन्द्रः** । श्रोत्रंश्रवणंत्वक्चक्षुषी नेत्रे जिह्वा पञ्चमी नासिका पायुर्गुदंउपस्थंगुह्येन्द्रियं हस्तौ पादौ एते पञ्चएषांएकादशेन्द्रियाणांमध्ये पञ्चश्रोत्रादीनि पञ्चबुद्धीन्द्रियाणि ज्ञानेन्द्रियाणि पाय्वादीनि पञ्चकर्मेन्द्रियाण्याहुः ॥ ९० ॥

बुद्धीन्द्रियाणि पञ्चैषांश्रोत्रादी न्यनुपूर्वशः ॥ कर्मेन्द्रियाणि पञ्चैषां पाय्वादीनि प्रचक्षते ॥ ९१ ॥

(१) **मेधातिथिः** । कार्यमिदानीमेषामाहस्वरूपाऽवधारणार्थं । न हितानि प्रत्यक्षाणि बुद्धीन्द्रियाणिजनकानि कार्य-

कारणानि । कार्यकारणसंबन्धे षष्ठी श्रोत्रादीन्यनुपूर्वशआदिशब्दस्य प्रकारार्थतामाविज्ञायीति । अनुपूर्वशः क्रमेणेत्यर्थः । क्रमश्च सन्निवेशापेक्षोभवत्यतः पूर्वश्लोकोक्ता व्यवस्थाऽऽश्रीयते । कर्मेन्द्रियाणि परिस्पन्दात्मकमत्र कर्म विवक्षितम् ॥ ९१ ॥

(२) **सर्वज्ञनारायणः** । शब्दादिज्ञानजननरूपाणि बुद्धीन्द्रियाणि उत्सर्गादिक्रियारूपाणि कर्मेन्द्रियाणि ॥ ९१ ॥

(३) **कुल्लूकः** । बुद्धीन्द्रियाणीति । एषांदशानांमध्ये श्रोत्रादीनिपञ्चक्रमोक्तानि बुद्धेः करणत्वात्बुद्धीन्द्रियाणि । पाय्वादीनि चोत्सर्गादिकर्मकरणत्वात्कर्मेन्द्रियाणि तद्विदोवदन्ति ॥ ९१ ॥

(५) **नन्दनः** । बुद्धीन्द्रियाणि ज्ञानेन्द्रियाणि ॥ ९१ ॥

एकादशंमनोज्ञेयंस्वगुणेनोभयात्मकं ॥ यस्मिन् जिते जितावेतौ भवतःपञ्चकौ गणौ ॥९२॥

(१) **मेधातिथिः** । एकादशसंख्यापूरकंमनइन्द्रियाणांस्वोगुणोमनसः संकल्पः तेनोभयंशुभमशुभंवासंकल्पयति। अथवाबुद्धीन्द्रियेषु कर्मेन्द्रियेषु स्वविषयप्रवृत्तौ संकल्पमूलत्वादुभयात्मकमुच्यते। तस्मिञ्जिते एतौ बुद्धीन्द्रियवर्गः कर्मेन्द्रियवर्गश्च पञ्चकौ प्राक्प्रदर्शितपरिमाणौजितौ भवतः॥ ९२ ॥

(२) **सर्वज्ञनारायणः** । स्वगुणेन बुद्धिकर्मजनकत्वेन उभयात्मकं बुद्धीन्द्रियकर्मेन्द्रियरूपं यस्मिन्जितइति प्राधान्यकथनंपञ्चकौपञ्चभिःपरिमितौ बुद्धीन्द्रियकर्मेन्द्रियवर्गौ ॥ ९२ ॥

(३) **कुल्लूकः** । एकादशमिति । एकादशसंख्यापूरकंच मनोरूपमंतरिन्द्रियंज्ञातव्यम् । स्वगुणेन संकल्परूपेणोभयरूपेन्द्रियगणप्रवर्तकत्वरूपम् । अतएव यस्मिन्मनसि जित उभावपिपञ्चकौबुद्धीन्द्रियकर्मेन्द्रियगणौजितौ भवतः पञ्चकाविति तदस्यपरिमाणमित्यनुवृत्तौ । सङ्ख्यायाः संज्ञासङ्घसूत्राध्ययनेष्वितिपञ्चसंख्यापरिमितसंघार्थेकः ॥ ९२ ॥

(५) **नन्दनः** । बुद्धिकर्मोत्पादनसामर्थ्यलक्षणसंकल्पस्वगुणस्तेनोभयात्मकंकर्मेन्द्रियात्मकं च । यस्मिञ्जिते-उभयात्मके मनसि जिते । पञ्चकौ ज्ञानकर्मेन्द्रियात्मकौ ॥ ९२ ॥

(६) **रामचन्द्रः** । मनः एकादशेन्द्रियंज्ञेयंस्वगुणेन उभयात्मकंज्ञानेन्द्रियकर्मेन्द्रियरूपंयस्मिन्मनसि जितेएतौ पञ्चकौ भवतः ॥ ९२ ॥

इन्द्रियाणांप्रसङ्गेन दोषमृच्छत्यसंशयम् ॥ सन्नियम्य तु तान्येव ततःसिद्धिंनियच्छति ॥ ९३ ॥

(१) **मेधातिथिः** । प्रसङ्गस्तत्परता तेन हेतुभूतेन दृष्टमदृष्टंच ऋच्छति प्राप्नोति । नात्र संशयोनिश्चितमेतत् । संनियम्य तानीन्द्रियाणि ततः सिद्धिमभिप्रेतार्थावाप्तिंश्रौतस्मार्तकर्मणामनुष्ठानफलंनिःशेषंगच्छतिप्राप्नोति ॥ ९३ ॥

(२) **सर्वज्ञनारायणः** । प्रसंगेन विषयेषु संगेन दोषंपापंऋच्छति प्राप्नोति तेषांनियमनात् सिद्धिंमोक्षंनियच्छति लभते ॥ ९३ ॥

(३) **कुल्लूकः** । मनोधर्मसंकल्पमूलत्वादिन्द्रियाणांप्रायेण प्रवृत्तेःकिमर्थमिन्द्रियनिग्रहःकर्तव्यइत्यतआह इन्द्रियाणामिति । यस्मादिन्द्रियाणांविषयेषु प्रसक्त्या दृष्टादृष्टंच दोषंनिःसंदेहंप्राप्नोति तान्येव पुनरिन्द्रियाणि सम्यङ्नियम्य सिद्धिंमोक्षादिपुरुषार्थयोग्यतारूपां लभते । तस्मादिन्द्रियसंयमंकुर्यादिति शेषः ॥ ९३ ॥

(४) **राघवानन्दः** । अनुपसंहारे दोषंकीर्तयनन्तःकरणे फलमाह इन्द्रियाणामिति । प्रसंगेनेन्द्रियार्थेष्वभिषक्त्यादोषंसंसाराख्यंसिद्धिंमनःशुद्धिद्वारा मोक्षाख्यांतथा च गीता सिद्धिंप्राप्तोयथा ब्रह्म तथाप्नोतिनिबोधमइति ॥ ९३ ॥

(५) नन्दनः। प्रसङ्गेन विषयेषु निरङ्कुशया प्रवृत्त्या ॥ ९३ ॥

(६) रामचन्द्रः। पुरुषःइन्द्रियाणांप्रसङ्गेन संयोगेन दोषंऋच्छति प्राप्नोति। असंशयंतानिइन्द्रियाणि सन्नियम्यजित्वा सिद्धिंनियच्छति प्राप्नोति ॥९३ ॥

न जातु कामःकामानामुपभोगेन शाम्यति ॥ हविषा कृष्णवर्त्मेव भूयएवाभिवर्धते ॥ ९४ ॥

(१) मेधातिथिः। तिष्ठतुतावद्विषयाभिलाषः शास्त्रोपदेशान्नक्रियते। किंतु दृष्टमेव सुखंतावन्निवृत्तेर्भवति। तथाहि सेव्यमानाविषयाअपि अधिकंगर्द्धमुत्पादयन्त्युदरपूरं भुक्तवतस्तमस्यातिसौहित्यमपिगतवतीभवति। हृदयसमीहा किमिति न शक्नोमिअन्यद्भोक्तुमशक्तया तु न प्रवर्तते। ततोनैषांभोगेन शक्यानिवृत्तिर्न कदाचित्कामोभिलाषः कामानांकाम्यमानानां-स्पृहणीयानामर्थानामुपभोगेन सेवया शाम्यति निवर्तते। भूयोऽधिकतरंवर्धते। हविषा घृतेन कृष्णवर्त्माग्निरिव दुःखरूपश्चाभिलाषोऽनुपभुक्तरसस्यत्वभिलाषानुत्पत्तिस्तत्वप्रसंख्यानमेतत्। उक्तश्च यत्पृथिव्यां व्रीहियवंहिरण्यंपशवस्त्रियः। नालमेकस्य तत्सर्वमिति मत्वा शमंव्रजेत् ॥ ९४ ॥

(२) सर्वज्ञनारायणः। प्रसंगे जातेपि भुक्तभोग्यतया स्वयंनिर्वर्त्यंत इत्यपि नाशंक्यमित्याह नजात्विति। कामइच्छा कामानांभोगानां कृष्णवर्त्मेत्युचितपदन्यासः ॥ ९४ ॥

(३) कुल्लूकः। किमिन्द्रियसंयमेन विषयोपभोगादेरलब्धकामोनिवर्त्स्यतीत्याशङ्क्याह न जात्विति। न कदाचित्कामोऽभिलाषः काम्यन्तइति। कामाविषयास्तेषामुपभोगेन निवर्तते किंतुघृतेनाग्निरिवाधिकाधिकतममेव वर्धते। प्राप्तभोगस्यापि प्रतिदिनंतदधिकभोगवाञ्छादर्शनात्। अतएव विष्णुपुराणे ययातिवाक्यम् यत्पृथिव्यांव्रीहियवंहिरण्यंपशवः स्त्रियः। एकस्यापि न पर्याप्तंतदित्यतितृषंत्यजेत् ॥ तथा पूर्णंवर्षसहस्रंमेविषयासक्तचेतसः। तथाप्यनुदिनंतृष्णायत्तेष्वेव हि जायते ॥ ९४ ॥

(४) राघवानन्दः। ननुभोगे सति स्वयमेवउपरमेयुस्तानि किमुपसंहारेणेत्यतआह। नेति। कामोभिलाषःकामानांकाम्यंतेषामुपभोगःसाक्षात्करणंतेन शान्तिर्दूरे अपि तु वर्धतएवेत्याह। हविषेति। कृष्णवर्त्माग्निः। तथा च विष्णुपुराणे ययातिवाक्यम्। यत्पृथिव्यांव्रीहियवंहिरण्यंपशवः स्त्रियः ॥ एकस्यापि न पर्याप्तंतदित्यतितृषंत्यजेत् ॥ अतितृषं अतितृष्णामित्यर्थः ॥ तथा पूर्णंवर्षसहस्रंमे विषयासक्तचेतसः। तथाप्यनुदिनंतृष्णा ममैतेष्वेव जायते ॥ इत्यादि ॥ ९४ ॥

(५) नन्दनः। तत्पुनर्भोजनेनक्षुधइवविषयोपभोगेन कामस्य निवृत्तिर्नेष्यतइत्यत्राह नजात्विति। कामानांविषयाणां। हविषाआज्येन ॥ ९४ ॥

(६) रामचन्द्रः। काम्यन्तइतिकामाःतेषांकामानांउपभोगेन जातु कामःनशाम्यति ॥ ९४ ॥

यश्चैतान्प्राप्नुयात्सर्वान्यश्चैतान्केवलांस्त्यजेत् ॥ प्रापणात्सर्वकामानांपरित्यागोविशिष्यते ॥ ९५ ॥

(१) मेधातिथिः। पूर्वोक्तहेतुत्वेनोपजीव्यायंनिगम श्लोकः पठितोयदा सेवया वर्धते कामःअतोयएतान्कामान्कामी सर्वान्प्राप्नुयात्सेवेतानेकमण्डलेश्वरेव तरुणोयश्चैनांस्त्यजति केवलानीषदपि न स्पृशति नैष्ठिकएव बालस्तयोर्यः प्रापकोभोक्ता तस्मात्सविशिष्यते। अतिशयेन श्रेष्ठोभवति। यः परित्यजेदिति। एतच्चात्मप्रत्यक्षम् ॥ ९५ ॥

(२) सर्वज्ञनारायणः। केवलान् कृत्स्नान् विशिष्यते विशिष्टफलत्वात् ॥ ९५ ॥

(३) कुल्लूकः। यश्चैतानिति। यएतान्सर्वान्विषयान्प्राप्नुयाद्यश्चैतान्कामानुपेक्षते तयोर्विषयोपेक्षकःश्रेयांस्तस्मा-

त्सर्वकामप्राप्तेस्तदुपेक्षा प्रशंस्या । तथाहि विषयलोलुपस्य तत्साधनाद्युत्पादने कष्टसंभवोविपत्तौ च क्लेशातिशयोन तु विषयविरसस्य ॥ ९५ ॥

। (४) **राघवानन्दः** । कृतभोगादकृतभोगोजनःश्रेष्ठइत्याह यश्चैतानिति । प्राप्नुयात् भुञ्जीत केवलानिन्द्रियसम्बन्धानसर्वकामानांविषयाणांप्रापणात्भोगात् ॥ ९५ ॥

(५) **नन्दनः** । यतएवंततोविषयाणांभोगात्त्यागएव श्रेयानित्याह यच्चैतानिति । यइत्यसाधुः पाठः । एतान्कामान्प्राप्नुयाद्भुञ्जीत । केवलान्कृत्स्नान् । तयोः प्राप्तित्यागयोः प्रापणात्प्राप्तेस्त्यागोविशिष्यतेविषयत्यागेविनाशनिमित्तदुःखस्पर्शाभावात् ॥ ९५ ॥

(६) **रामचन्द्रः** । यःपुरुषःएतान्सर्वान् प्राप्नुयात् यःपुरुषःएतान्कामानकेवलानत्यजेत् सर्वकामानां प्रापणात् प्राप्तिं कामानांसर्वकामनापरित्यागोविशिष्यते ॥ ९५ ॥

न तथैतानि शक्यन्ते संनियंतुमसेवया ॥ विषयेषु प्रजुष्टानि यथाज्ञानेन नित्यशः ॥ ९६ ॥

(१) **मेधातिथिः** । यद्येवमरण्यवासएव तर्हि प्राप्तोनहि तत्र विषयासंनिधीयन्ते । असंनिहिताश्च न सेविष्यन्ते तदर्थमाह न सेवया इन्द्रियाणि नियन्तव्यानीति । अथोच्यते । निःसुखः स्यादिति हि स्मरन्ति । असंनिहिताश्च न सेविष्यन्ते तदर्थमाह नासेवया इन्द्रियाणि नियन्तव्यानीति पूर्वाण्हमध्यंदिनापराण्हानफलान्कुर्याद्यथाशक्तिधर्मार्थकामेभ्यः नच शरीरधारणमसेवया भवति किंतु गर्द्धनिषेधोयमुच्यते । सच गर्द्धः सत्यापि सेवया ज्ञानेन विषयगतदोषज्ञानेन । अस्थिस्थूणास्नायुतमित्यादि शास्त्रोक्तेन स्वसंविदा च विपाकविरसतया किंविपाकफलमेवादिदोषभावनया वैराग्याभ्यासेन क्रमेण स्पृहा निवर्तते । ननु सहसैवत्यक्तुंशक्यते कर्तुंनित्यशः नित्यकालं ज्ञानविशेषणमेतत् । प्रदुष्टानि प्रवृत्तानि दोषत्वात् । प्रदुष्टान्येव प्रवृत्तान्युच्यन्ते । अयमंशस्तत्र तत्र नित्यःअनुपूर्वशः सर्वशः । पूर्वशइति व्यासमनुप्रभृतिभिर्महामुनिभिः प्रयुज्यते । तस्य साधुत्वे यत्नः कर्तव्यः तत्र शस् विधावेकवचनाच्च वीप्सायामिति पठ्यते तत्र वीप्सार्थः कथंचिद्द्योतयितव्यः अन्येतु शसस्तिष्ठत्यर्थस्य किंपिरूपंवर्णयन्ति । क्रियाविशेषणंचैतत् नपुंसकंनित्यस्थितेन ज्ञानेनेत्यर्थः ॥ ९६ ॥

(२) **सर्वज्ञनारायणः** । न चैवमुपभोगमात्रेणेन्द्रियजयमिति ग्राह्यमित्याह न तथेति । एतानीन्द्रियाणि विषयेषु वर्तमानानि पूर्वपूर्वजन्मसंस्कारवशात् प्रदुष्टानि दोषजनकानि ज्ञानेनात्मनः शरीरादिव्यतिरिक्तस्य ज्ञानेन विषयदोषभावनेन च नित्यम् ॥ ९६ ॥

(३) **कुल्लूकः** । इदानीमिन्द्रियसंयमोपायमाह न तथेति । एतानीन्द्रियाणि विषयेषु प्रसक्तानि तथा नासेवया विषयसन्निधिवर्जनरूपया नियन्तुं न शक्यन्तेदुर्निवारत्वात् । यथा सर्वदा विषयाणांक्षयित्वादिदोषज्ञानेन शरीरस्य चास्थिस्थूलमित्यादिवक्ष्यमाणदोषचिन्तनेन तस्माद्विषयदोषज्ञानादिना बहिरिन्द्रियाणि मनश्च नियच्छेत् ॥ ९६ ॥

(४) **राघवानन्दः** । बलादिन्द्रियसंबन्धे कउपायस्तत्राह न तथेति । एतानीन्द्रियाणिअसेवया शुष्कवैराग्येण तत्रहेतुःप्रदुष्टानि प्रकर्षेणबहुकालसेवया प्रसक्तानि ज्ञानेन क्षयिष्णुत्वादिदोषदृष्ट्या तत्वज्ञानेन वा तदुक्तम् । विषयाविनिवर्तन्तेनिराहारस्यदेहिनः । रसवर्जंरसोप्यस्यपरंदृष्ट्वा निवर्ततइति ॥ निराहारस्यइन्द्रियैर्विषयानसेविनः रसोरागः सोपि परंब्रह्मदृष्टवतोनिवर्ततइति गीतार्थः ॥ ९६ ॥

---

(९६) प्रजुष्टानि=प्रदुष्टानि (मेधा०)

(५) **नन्दनः** । तर्हि विषयत्यागएवसंयमोपायोनान्यइत्यत्राह नतथेति ॥ ९६ ॥

(६) **रामचन्द्रः** । कामानां असेवया तानिइंद्रियाणि विषयेषु संनियन्तुं तथा न शक्यन्ते कीदृशानि । प्रदुष्टानि प्रकर्षेण दुष्टानि यथा ज्ञानेन ज्ञानमार्गेण नित्यशः नियन्तुंशक्यन्ते ॥ ९६ ॥

वेदास्त्यागश्च यज्ञाश्च नियमाश्च तपांसि च॥न विप्रदुष्टभावस्य सिद्धिं गच्छन्ति कर्हिचित् ॥ ९७॥

(१) **मेधातिथिः** । अयमत्रविधिरेव । वेदास्तद्विषयमध्ययनजपादित्यागोदानंलक्षणया अथवाऽप्रतिषिद्धस्यापि मधुमांसभक्षणादेर्निवृत्तिः फलदेत्यनेन वर्जनंविप्रदुष्टोभावश्चित्तंयस्य तस्य सिद्धिं न गच्छति फलसाधकानि न भवन्ति । कस्मिंश्चिदपि काले । अतोनुष्ठानकालेनाभिप्रेतादिगतमानसंभवितव्यम । शक्यंतर्हि सर्वेतरविकल्पतिरस्कारेण कर्मणि मनआधेयं अगर्हित कर्मसु विषयचिन्तात्यागोनेन वाक्येन विहितस्तदभावे कर्मनैष्फल्यंस्यात् । एषहि भावदोषोयत्कर्मानुष्ठानेप्रवृत्तस्य तत्परतात्यागेनव्यसनेषु मनोवधानम् ॥ ९७ ॥

(२) **सर्वज्ञनारायणः** । वेदाः अध्ययनानि त्यागाः दानानि नियमाः स्नातकव्रतादीनि तपांसि कृच्छ्रादीनि विप्रदुष्टभावस्य विषयप्रसक्तौ ॥ ९७ ॥

(३) **कुल्लूकः** । यस्मादनियमितंमनोविकारस्य हेतुःस्यात्तआह वेदाइति । वेदाध्ययनदानयज्ञनियमतपांसि भोगादिविषयसेवासंकल्पशीलिनो न कदाचित्फलसिद्धये प्रभवन्ति ॥ ९७ ॥

(४) **राघवानन्दः** । अतएवात्मानात्मविवेकशून्यस्य न केपि शोधकाइत्याह वेदाइति । वेदाअभ्यस्यमानाः त्यागाः संन्यासादानंवानियमः शौचसंतोषादयः तपांसि कृच्छ्रादीनि एतेअनुष्ठीयमानाअपि विप्रदुष्टभावस्य स्त्र्यादिष्वत्यासक्तस्य ॥ ९७ ॥

(५) **नन्दनः** । ज्ञानेन विषयेषु दोषदर्शनेन न केवलब्रह्मचारिणामेवायमिन्द्रियसंयमोदोषावहः किंतु सर्वाश्रमिणामित्यभिप्रायेणाह वेदाइति । वेदाइंत्यनेनब्रह्मचर्याश्रधर्मोलक्ष्यन्तेयज्ञाइति । गार्हस्थ्यधर्माः । त्यागाइतिसंन्यासधर्माः । तपांसीति वानप्रस्थधर्माः । विप्रदुष्टभावस्य कामक्रोधादिदूषितचित्तस्य । भावदोषाणामिन्द्रियासंयमहेतुत्वादिन्द्रियसंयमः कर्तव्यइतिभावः ॥ ९७ ॥

(६) **रामचन्द्रः** । दुष्टभावस्य वेदाः सिद्धिंकर्हिचित् न गच्छन्ति वेदावेदाध्ययनानि । त्यागाःदानानि ॥ ९७ ॥

श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा च योनरः ॥ न हृष्यति ग्लायति वा सविज्ञेयोजितेन्द्रियः ॥ ९८ ॥

(१) **मेधातिथिः** । श्रुत्वावंशगीतादिध्वनिंत्वं बृहस्पतिरित्यादिवचनंश्रुत्वा न त्दृष्यति रूक्ष परुषा क्रोशवाचः श्रुत्वा न ग्लायति न मनोदुःखंभजति ग्लानिः खेदः स्पृष्ट्वाराङ्कवकौशेयादिवस्त्रं अजलोमकुतपश्चसमत्वेनानुभवति । एवं सुवेषतरुणीजननटप्रेक्षासु शत्रुदर्शने च समः बहुघृतंक्षीरषष्टिकान्कोद्रवांश्च समंभोजने देवदारुतैलंकर्पूरादि च तुल्यंजिघ्रतस्तथाकर्तव्यम् । यथा केवलैर्मानसैः सुखदुःखैर्न स्पृश्यते । एवंतेन जितानीन्द्रियाणि भवन्ति नत्वप्रवृत्त्यैवइयत्पर्यंतः संयमःआश्रयणीयः ॥ ९८ ॥

(२) **सर्वज्ञनारायणः** । ग्लायति दुःखितोभवति ॥ ९८ ॥

(३) **कुल्लूकः** । जितेन्द्रियस्यस्वरूपमाह श्रुत्वेति । स्तुतिवाक्यंनिन्दावाक्यंच श्रुत्वासुखस्पर्शंदुकूलादि दुःख-

---

(९८) चयोनरः=शुभाशुभं (ठ)

स्पर्शमेषकम्बलादि स्पृष्ट्वा । सुरूपंकुरूपंच दृष्ट्वा । स्वाद्वस्वादुच भुक्त्वा । सुरभिमसुरभिंच घ्रात्वा । यस्य न हर्षविषादौ सजितेन्द्रियोज्ञातव्यः ॥ ९८ ॥

(४) राघवानन्दः । तर्हि विषयाभोगे मृतिरेव तत्राह श्रुत्वेति । भोगो नमतिबन्धकः किन्त्वासक्तिः तदुक्तम् पश्यन्शृण्वन्स्पृशन्नित्यादीन्द्रियार्थेषुवर्ततइति धारयन्नित्यन्तं भगवता कृष्णेन ॥ ९८ ॥

(५) नन्दनः । इदानीमिन्द्रियसंयमंस्वरूपतोविविनक्ति श्रुत्वेति । श्रुत्वाइष्टमनिष्टंच । एवमुत्तरत्र । हृष्यतिमनसाग्लायति विषीदतीष्टानिष्टविषयसंसर्गे । मनोविकारराहित्यमिन्द्रियसंयमइत्यभिप्रायः ॥ ९८ ॥

(६) रामचन्द्रः । यःनरःविषयान्श्रुत्वा न हृष्यति न ग्लापयति सः जितेन्द्रियः ग्लैहर्षे इत्यस्यधातोरूपम् ॥९८॥

इन्द्रियाणांतुसर्वेषांयद्येकंक्षरतीन्द्रियम् ॥ तेनास्य क्षरति प्रज्ञा दृतेःपादा दिवोदकम् ॥ ९९॥

(१) मेधातिथिः । ननु च ब्रह्मचारिणास्त्रीसंबन्धोयत्नेन वर्ज्यः संस्कृतभिक्षालाभस्तु किमिति निषिध्यते अतआह निर्धारणे षष्ठी एकमेव यदीन्द्रियंक्षरति । स्वातन्त्र्येण स्वविषयेवर्तमानंननिवार्यते । ततोस्यक्षरति प्रज्ञाधैर्यमिन्द्रियान्तरविषयमपि इति श्छागादिचर्मोदकाद्याहरणभाजनंतस्य संवृतेष्वपीतरेषु यद्येकस्मादुदकंपादात्स्रवति सर्वरिच्यते । ज्ञानाभ्याससंभृतंधैर्यंसम्यक्ज्ञानमेव वा विषयगृध्नुतयातद्गतमानसस्य न तत्वतोयुक्तिशास्त्रगम्याअर्थाः सम्यक् प्रतिभासन्ते ॥ ९९ ॥

(२) सर्वज्ञनारायणः । क्षरति विषये सज्यते क्षरति प्रजासर्वाबहिः संबध्यते दृतेर्जलसेकार्थंकृतस्य चर्मभाण्डस्य जलनिर्गमार्थंकृते अनेकसच्छिद्रधारारूपपादवतः एकेनापि पादेन यथासर्वजलसेकोभवतीत्यर्थः ॥ ९९ ॥

(३) कुल्लूकः । एकेन्द्रियासंयमोऽपि निवार्यत इत्याह इन्द्रियाणांत्विति । सर्वेषामिन्द्रियाणांमध्ये यद्येकमपीन्द्रियंविषयप्रवणंभवति ततोऽस्य विषयपरस्येन्द्रियान्तरैरपि तत्त्वज्ञानंक्षरति न व्यवतिष्ठते चर्मनिर्मितोदकपात्रादिवैकेनापि छिद्रेण सर्वस्थानस्थमेवोदकं न व्यवतिष्ठते ॥ ९९ ॥

(४) राघवानन्दः । संयतेन्द्रियस्य सिद्धिहेतुतोक्ता तत्र सर्वेषां अप्रवृत्तावप्येकस्यप्रवृत्तौ कोदोषस्तत्राह । इन्द्रियाणांत्विति । सर्वेषामिन्द्रियाणांमध्ये यत्किंचित्क्षरतिइन्द्रियविषयप्रवणंस्यात् प्रज्ञाधैर्यंतेनैव क्षरति दृतेश्चर्ममयोदकपात्रस्य पादात्छिद्रात्सर्वंउदकंक्रमशोनश्यति तथा च विषयेन्द्रियसंयोगान्मनः क्षुभ्यति नान्यथा । अत्र गीता । इन्द्रियाणांहि चरतांयन्मनोनुविधीयते । तदस्य हरति प्रज्ञांवायुर्नावमिवाम्भसि इति ॥ मनः सहकृतंयदिन्द्रियंचक्षुरादि तद्धरतीति गीतार्थः । एवंप्रसक्तंइन्द्रियमात्रंप्रज्ञांहरतीतिभावः ॥ ९९ ॥

(५) नन्दनः । सर्वेन्द्रियाणांयुगपदेव संयमः कार्यः एकस्यासंयमेतदितरसंयमवैयर्थ्यादित्याह इंद्रियाणामिति । प्रज्ञाक्षरति विषयपरा भवति ॥ ९९ ॥

(६) रामचन्द्रः । सर्वेषांइन्द्रियाणांमध्ये यद्येकं इन्द्रियंक्षरति स्रवति तेन कारणेन अस्य पुंसःप्रज्ञाक्षरति । दृतेःपादादुदकमिव दृतिःचर्मकोशः ॥ ९९ ॥

---

(९९) पादा=पात्रा (अ)

इन्द्रियाणांतुसर्वेषां=इन्द्रियाणांनुचरतां (मेधा०)

तेनास्यक्षरति=ततोस्यक्षरति (मेधा०)

वशेकृत्वेन्द्रियग्रामंसंयम्य च मनस्तथा ॥ सर्वान्संसाधयेदर्थानक्षिण्वन्योगतस्तनुं ॥ १०० ॥

(१) मेधातिथिः । उपसंहरति सत्यपीन्द्रियत्वे मनसः प्राधान्यात्पृथगुपादानंग्रामः संघातः विधेहि कृत्येन्द्रियाणि तथा मनः सर्वानर्थाञ्श्रौतस्मार्तकर्मसाध्यान्संसाधयेन्निष्पादयेत्तनुंशरीरमक्षिण्वन्नपीडयन्योगतः । युक्त्या सहसाकस्यचित्कठिनासनकृष्णाजिनादिप्रावरणपीडा भवति. सुकुमारत्वात्प्रकृतेस्तदर्थमिदमुच्यते । येषांसुशीलितंसुसंस्कृतंभोजनंमृदुशय्यादि नतैः सहसा तत्यक्तव्यमपितु क्रमेण साम्यमानेतव्यंतद्विपरीतंयोगः क्रमेण प्रवृत्तिरुच्यते । तत्र च योगतोवशीकृत्वेति संबन्धः यथा स्थानमेव वा योगतइति योजनीयम् । युक्त्या कुंचितातः शरीरंनाप नयेत् । यद्युचितंशरीरस्य न तद्झटिति निवर्तयेत्तात्पर्थंवा योगस्तृतीयायोगस्तृतीयार्थे तसिः तात्पर्येण शरीरंरक्षेत् ॥ १०० ॥

(२) सर्वज्ञनारायणः । इन्द्रियग्रामंबाह्यंसर्वान्अर्थान्स्वर्गादीनपि योगतोपेक्षितदेवतादि ध्यानतोन चेन्द्रिय संयममात्रात्तनुंदेहमक्षिण्वन्नपीडयन्नपि ॥ १०० ॥

(३) कुल्लूकः । इन्द्रियसंयमस्य सर्वपुरुषार्थहेतुतांदर्शयति वशेकृत्वेति । बहिरिन्द्रियगणमायत्तंकृत्वा मनश्च संयम्य सर्वान्पुरुषार्थान्सम्यक्साधयेत् योगतउपायेन स्वदेहमपीडयन्यः सहजसुखी संस्कृतान्नादिकंभुङ्क्ते सक्रमेण तंत्यजेत् ॥ १०० ॥

(४) राघवानन्दः । प्रकरणार्थनिगमयन्तस्य पुमर्थपर्यवसायितामाह वशीति । अर्थान्धर्मादीन् अक्षिण्वन् अपीडयन्योगतः योगोपायेन अवर्जनीयविषयसेवयेतियावत् ॥ १०० ॥

(५) नन्दनः । इन्द्रियसंयमफलमाह वशइति । योगतोयोगेनसमाधिलक्षणेन । अर्थान्पुरुषार्थान् । संसाधयेत्सम्यक्साधयितुंशक्नुयात् । तनुमक्षिण्वंस्तपोभिःशरीरमपीडयन् ॥ १०० ॥

(६) रामचन्द्रः । इन्द्रियग्रामं वशेकृत्वातथा मनःसंनियम्यसर्वान्अर्थान्साधयेत् । योगतः योगाभ्यासतः तनुं देहंअक्षिण्वन्क्षीणमकुर्वन्इति ॥ १०० ॥

पूर्वांसंध्यांजपंस्तिष्ठेत्सावित्रीमार्कदर्शनात् ॥ पश्चिमांतुसमासीनःसम्यगृक्षविभावनात् ॥ १०१ ॥

(१) मेधातिथिः । संमुखे प्रातः पूर्वासंध्याऽऽदित्यास्तमये पश्चिमा तांतिष्ठेत्जपन्सावित्रीमासनादुत्थायनिवृत्तगतिरेकत्र देशे स्यात् । सावित्रीउक्तैव तत्सवितुर्वरेण्यमिति तस्याप्यनुवादाॐकारादिविधिश्लोके संध्याजपार्थमेतदक्षरमेतां चेति । आऽर्कदर्शनादिति यावद्भगवानादित्योदृष्टोजपस्थानयोरयमेव विनिर्देशः । ननु किमविधिनाऽर्कोदयएव संध्यानिवर्तते । तथाहि नसर्वतमः क्षीणंनापि परिपूर्णः प्रकाशएषा संध्याउक्तंच दिवि प्रकाशोभुवि चान्धकारः कालः ससावित्रइति प्रदिष्टः निरुक्तेप्युक्तमधोभागः सावित्रइति । पशुसमाम्नाये विज्ञायते कस्मात्सामान्यादधस्ताद्रामोधस्तात्कृष्णइति । आदित्योदये च सर्वतस्तमोनिवर्तते । उभयधर्मानिवृत्तौ च संध्यारात्रिधर्मेऽहर्धर्मेच । अत्यन्तसंयोगे चैषा द्वितीया संध्यामिति । तेन यावत्संध्याकालंतिष्ठेदित्युक्तंभवति ततः परस्तात्तंस्थितमेव । केचिदाहुर्नैवेयमत्यन्तसंयोगे द्वितीया किंतर्हि कालश्चाकर्मकाणांकर्मसंज्ञोभवतीति वार्तिककारस्तत्र कर्मणिद्वितीयेत्येव द्वितीया । यत्तु कालाध्वनोरत्यन्तसंयोगइति । तद्यत्र क्रियावाची शब्दोन प्रयुज्यते । क्रोशंकुटिला नदी सर्वरात्रंकल्याणीउभयत्र च सकर्मकोधातुर्मासमधीयतइतिसत्यंतस्य विषयइह पुनः संध्यांतिष्ठेदिति तिष्ठतिरकर्मकअतोविधिनिर्देशः कृत्स्नसंध्याप्राप्त्यर्थंस्थानासनयोः कर्तव्यः आरम्भकालस्त्विवह नोक्तः संध्याशब्देनैव समर्पितत्वात् । यएव हि संध्याकालस्यारम्भः सएव तद्विधेः

श्रोत्रियस्यापि नहिपूर्णमास्यादि कालवद्दीर्घः संध्याकालोयदि विलम्बःस्याद्दुर्लक्षोह्यसावति सूक्ष्मत्वात्कलान्तरयोरिव नामोन्नासावलक्ष्यपौर्वापर्यावधिनिवासोन्हश्च अतिशीघ्रगतिर्भगवान्भास्करस्तस्य यथा निर्भुक्तेराशौ राश्यन्तरसंक्रमणंतु त्रुटिमात्रकालमिच्छन्तिज्यौतिषिकाः। एवंदिवसारम्भावसानयोरप्युदयास्तमयौ प्रागुदयाद्रात्रिरुदितेहअनेन च नास्ति संध्याऽऽदित्योदयेनैव रात्रिविरामात्। अतएवोदयास्तमयसमीपयोरनुष्ठानप्रवृत्तिः स्पष्टे च सूर्ये नक्षत्रेषु च निवृत्तिर्यतोयद्यन्तंकालमुपारते तेनावश्यंमुख्येकाले विधिनिर्वीतितोभवति अतएव चयावान्सावित्रः कालःसेह संध्याभिप्रेता न ज्योतिःशास्त्रगणिता सा चोक्ता पुरस्ताद्यद्येवंयेषामयमेवाग्निहोत्रकालस्तेषांसंध्याविधेरभावः प्रसक्तः। केयंपरिनोदना श्रौतेन स्मार्तस्यबाधोयुक्तएवं गृह्याग्निहोमेन विकल्पितं नैव चात्रविरोधस्तिष्ठतापि शक्यंहोतुमासीनेन च ननु च न केवले स्थानासने संध्ययोर्विहिते किंतु त्रिकजपोपि तच्च सावित्रींजपन्कथंहोममन्त्रमुच्चारयेत्। अस्तु जपस्य बाधः प्रधाने तावत्स्थानासनेन विरुध्येते। गुणलोपे च मुख्यस्येत्यनेन न्यायेन जपस्याङ्गत्वाद्बाधोयुक्तस्तयोश्च प्रधानत्वंसाक्षाद्विधिसंबन्धात्तिष्ठेदासीतवेति च। जपस्य तु गुणत्वंशत्रन्तत्वाज्जपतेर्लक्षणत्वावगमात्। अधिकारसंबन्धश्च स्थानासनयोरेव। नतिष्ठतिनुयः पूर्वांतथातिष्ठन्नैश्चमे नोव्यपोहतीति यत्तु केनचिदुक्तंतिष्ठतिरत्र गुणः प्रधानंजपकर्म ततोहिफलमश्रौष्मेति। तत्रोच्यते नैवायंकामिनोधिकारः कुतःफलश्रवणंयत्तुप्रमाणवादवाक्ये वेदपुण्येन युज्यतइति फलानुवादभ्रमः सतत्रैव निर्णीतस्तस्मात्स्थानासने प्रधाने। अथवाग्निहोत्रिणः सकृत्सावित्रींजपिष्यन्तित्रिरावर्तयिष्यन्तिवा। न तावताग्निहोत्रस्य कालातिपत्तिः अश्नन् सायंविनिर्मुक्तइति नतावताविनिहन्यते। अश्नशब्दः चिरकालवचनस्तावता च कृतः संध्यार्थोभवति। अर्कदर्शनपर्यन्तताह्यङ्गमेवोदितहोमिनांकृतसंध्यानामेवाग्निहोत्रहोमः। गौतमेनतु सज्योतिषाज्योतिषोदर्शनादिति। सूत्रस्यार्थः एतावान्कालः संध्योच्यतेनवाप्यङ्गंतत्रैतावतिकाले नास्त्यावृत्तिः यथा पौर्णमास्यां यजेतेति न कालानुरोधेन। कर्मणआवृत्तिः तथा पूर्वांसंध्यांसनक्षत्रांपश्चिमांसदिवाकरामिति। तदपि काललक्षणंएतावान्कालइहसंध्याशब्देनोच्यते। तत्र सांध्योविधिरनुष्ठेयस्तत्रेयतिसन्ध्याशब्दवाच्ये काले च मुहूर्तमात्रे यदि त्रिचतुरासु कालकलासु स्थानासनजपान्कुर्यात्। संपन्नएव विध्यर्थः न ह्यत्र कृत्स्नकालव्याप्तिः श्रुता मनोरिवसर्वथाग्निहोत्रसंध्याविधीसमानकालावपि शक्यावनुष्ठातुं सदाशब्दोनित्यतामाह। उभयंसंध्याशेषः आसीतआसनमनूर्ध्वतावस्थानमुपविष्टोभवेत्। ऋक्षंनक्षत्रमातद्विभावनात्। आऽर्कदर्शनादिति यआकारःसइहानुषक्तव्यः सम्यक्शब्दोदर्शनविभावनयोर्विशेषणंसम्यग्यदा परिपूर्णमण्डलआदित्योभवति नक्षत्राणि च भान्तिति स्वभासायुक्तानि नादित्यतेजोभिभूतानि ॥ १०१ ॥

(२) **सर्वज्ञनारायणः**। तिष्ठे दूर्ध्वस्तिष्ठेज्जपन्सन्ध्यांपूर्वामत्यन्तसंयोगेन समासीतोपविशेत्। असम्यक्ऋक्षाणांविभावनादर्शनाद्विवेकेन बहूनांप्रकाशनात्। अत्र तिष्ठन्नासीनोजपेदिति प्रत्ययस्य व्यत्ययोबोद्धव्यः। जपस्य प्राधान्यात्। तथाच यजुर्वेदब्राह्मणे अथातः सन्ध्योपासनविधिंव्याख्यास्यामइत्युपक्रम्य पूर्वांगायत्रींजपेदष्टकृत्वइत्यादि। अतएव जपस्य कर्मणि सावित्रीलभ्यते। एतदक्षरमेतांचेत्युक्तत्वाच्च ॥ १०१ ॥

(३) **कुल्लूकः**। पूर्वांसंध्यामिति। पूर्वांसंध्यांपश्चिमामिति च कालाध्वनोरत्यन्तसंयोगेद्वितीया। प्रथमसंध्यांसूर्यदर्शनपर्यन्तंसावित्रींजपस्तिष्ठेदासनादुत्थाय निवृत्तगतिरेकत्र देशे कुर्यात्। पश्चिमांतुसंध्यांसावित्रींजपन्सम्यङ्नक्षत्रदर्शनपर्यन्तमुपविष्टः स्यात्। अत्र च फलवत्त्वाज्जपःप्रधानम्। स्थानासनंत्वंगेफलवत्सन्निधावफलंतदङ्गमितिन्यायात्। संध्ययोर्वेदविद्विप्रोवेदपुण्येन युज्यते। सहस्रकृत्वस्त्वभ्यस्य इति च पूर्वंजपात्फलमुक्तम्। मेधातिथिस्तु स्थानासनयोरेव प्राधान्यमाह। संध्याकालश्च मुहूर्त्तमात्रंतदाह योगी याज्ञवल्क्यः ह्रासवृद्धीतुसततंदिवसानांयथाक्रमम्। सन्ध्या मुहूर्तमात्रं तु ह्रासे वृद्धौ च सा स्मृता ॥ १०१ ॥

(४) **राघवानन्दः** । सन्ध्ययोर्वेदविदित्युक्तं तच्च कियन्तंकालंव्याप्य कर्तव्यमिति प्रकारंलक्षणंचाह पूर्वामिति । सन्ध्यांव्याप्य जपनूऊर्ध्वंतिष्ठन्आसीनोभवेदितिविधिस्तत्रैवावधेरपेक्षणात् । जपे तु सकृत्त्वेव नियम्यते नतु कालः । सहस्रपरमांदेवींशतमध्यांदशावरामित्युक्तेरार्कदर्शनात् संपूर्णार्कदर्शनमभिव्याप्य तद्दर्शनंयावत्सम्यगर्क्षविभावनात्सम्यकृऋक्षंसम्यगृक्षं तस्य विभावनंप्रकाशः तावदध्यासीत उपविश्य जपेदित्यर्थः । ह्रासवृद्धीतु सततंदिवसानांयथाक्रमं । सन्ध्यामुहूर्तमात्रंतु ह्रासे वृद्धौ च संस्थितेति योगियाज्ञवल्क्योक्तंदण्डद्वयंसन्ध्या ॥ १०१ ॥

(५) **नन्दनः** । अथकर्मान्तरमाह पूर्वामिति । आर्क्षविभावनात् आऋक्षविभावनादितिपदच्छेदः । आ नक्षत्रदर्शनात् ॥ १०१ ॥

(६) **रामचन्द्रः** । सन्ध्योपासनविधिमाह । पूर्वांसन्ध्यांसावित्रींजपन्नार्कदर्शनात्सूर्यदर्शनपर्यन्तंतिष्ठेत । पश्चिमांसन्ध्यांसमासीनः आर्क्षंविभावनात् नक्षत्रदर्शनपर्यन्तं गायत्रींजपंस्तिष्ठेत् ॥ १०१ ॥

पूर्वांसन्ध्यांजपंस्तिष्ठन्नैशमेनोव्यपोहति ॥ पश्चिमांतु समासीनोमलंहन्ति दिवाकृतम् ॥ १०२ ॥

(१) **मेधातिथिः** । अयमत्राधिकारउच्यते । एनः प्रतिषिद्धसेवनाज्ञातोदोषस्तंव्यपोहत्यपनुदति । निशिभवंनैशंरात्रौ कृतम् । एवंमलमेनः शब्देनसमानार्थम् । नच सर्वस्य दिवाकृतस्य नैशिकस्य चैतत्प्रायश्चित्तंतथा सति कृच्छ्राद्युपदेशः प्रायश्चित्तविशेषोऽनर्थकःस्यात् । अर्केचेन्मधुविन्देत किमर्थंपर्वतंव्रजेदिति लौकिकात्प्रवादात् । किंतर्हि यदसेवितंकृतमशक्यपरिहारमनाम्नातप्रायश्चित्तविशेषंलघीयएनस्तदपैति यदासुप्तस्य हस्तचारशय्यापरिवर्तनादिनासूक्ष्मप्राणिवधोगुह्याद्यकण्डूकर्षणेनाकस्मात्स्पृशेदिति प्रतिषिद्धम् । कालाश्रवादिना चाशुचित्वमे तत्कालकृताशौचस्यावस्थाने प्रतिषिद्धसेवनादि । एतदभिप्रायमेवेदं सर्वदैवाशुचिर्ज्ञेयः संध्योपासनवर्जितइति । नचानित्यत्वापत्तिरेवंविधस्य दोषस्य सर्वदाभावात् । दिवा च पथि गच्छन्नन्यस्त्रीमुखसंधान संपन्नं तज्जन्यचित्तविकारोन्मीलने कुद्धाश्लीलसंभाषणे तत्संध्याविधी अपनुदतः ॥ १०२ ॥

(२) **सर्वज्ञनारायणः** । जपंस्तिष्ठन् तिष्ठञ्जपन् मलंपापंमलिनीकरणरूपं । एतच्च सायमर्कदर्शनकालं प्रातश्च नक्षत्रदर्शनकालं आरभ्य कार्यंसज्योतिषोदर्शनादिति गोतमोक्तेः ॥ १०२ ॥

(३) **कुल्लूकः** । पूर्वांसंध्यामिति । पूर्वसंध्यायांतिष्ठञ्जपंकुर्वाणोनिशासंचितंपापंनाशयति । पश्चिमसंध्यायांतूपविष्टोजपंकुर्वन्दिवार्जितंपापंनिहन्ति तत्रापि जपात्फलमुक्तम् । एतच्चाज्ञानादिकृतपापविषयम् । अतएव याज्ञवल्क्यः दिवा वा यदि वा रात्रौ यदज्ञानकृतंभवेत् । त्रिकालसन्ध्याकरणात्तत्सर्वंविप्रणश्यति ॥ १०२ ॥

(४) **राघवानन्दः** । खादिरन्यायेनाह नैशमिति । निशाकृतंएनःपापंमलमपि पापंयथा खादिरंपशुंबध्नाति खादिरंवीर्यकामस्य यूपंकुर्वीतेति वचनद्वयेनैकएव खादिरोयूपउभयार्थःएवंसन्ध्यापीति न्यायार्थः ॥ १०२ ॥

(६) **रामचन्द्रः** । पूर्वांसन्ध्यांगायत्रींजपंस्तिष्ठन् निशायांभवंनैशं एनःपापंव्यपोहति नाशयति । सायंसन्ध्यांकुर्वाणःदिवा कृतंपापंमलंहन्ति ॥ १०२ ॥

न तिष्ठति तु यःपूर्वांनोपास्ते यश्च पश्चिमाम् ॥ सशूद्रवद्बहिष्कार्यःसर्वस्माद्द्विजकर्मणः ॥१०३ ॥

---

(१०३) नतिष्ठतितुयःपूर्वां=नानुतिष्ठतियःपूर्वां (क, ग)

(१) **मेधातिथिः** । अनेनाननुष्ठानप्रत्यवायंवदन्नित्यतामेव समर्थयति । यः प्रातः संध्यायां नोर्ध्वआस्ते नच पश्चिमायामुपविष्टोभवति सशूद्रतुल्योवेदितव्यः । सर्वस्माद्द्विजातिकर्मणः आतिथ्यादिसत्कारसंप्रदानादितोबहिष्कार्योऽपनोद्यः । अतः शूद्रसमानतानिरासार्थंनित्यममुष्ठेया संध्या । इदमधिकारवाक्यम् । अत्र च स्थानासनएवोपपत्तेर्जपेयस्य चाधिकारसंबन्धस्तत्प्रधानमन्यत्तत्संबन्धमङ्गम् ॥ १०३ ॥

(२) **सर्वज्ञनारायणः** । न तिष्ठति तिष्ठञ्जपतीत्यर्थः । एवमुपास्तइत्यत्रापि ॥ १०३ ॥

(३) **कुल्लूकः** । न तिष्ठतीति । यःपुनःपूर्वसंध्यांनानुतिष्ठति पश्चिमांतु नोपास्ते तत्तत्कालविहितंजपादि न करोतीत्यर्थः । सशूद्रइव सर्वस्माद्द्विजातिकर्मणोऽतिथिसत्कारादेरपि बाह्यःकार्यः । अनेनैव प्रत्यवायेन संध्योपासनस्य नित्यतोक्ता । नित्यत्वेऽपिसर्वदापेक्षितपापक्षयस्य फलत्वमविरुद्धम् ॥ १०३ ॥

(४) **राघवानन्दः** । सन्ध्याकरणे दोषमाहर्नेति । शूद्रवदिति तदकरणेऽनधिकारितैव तत्पूर्वकत्वात्सर्वकर्मणाम् ॥ १०३ ॥

(५) **नन्दनः** । स्थानासनयोरकरणेप्रत्यवायमाह । नतिष्ठतीति ॥ १०३ ॥

(६) **रामचन्द्रः** । यःपुरुषःपूर्वांपश्चिमांसन्ध्यांनउपास्ते न करोति सःसर्वस्मात्द्विजकर्मणःसकाशाद्द्विजैर्बहिष्कार्यःनिष्काशनीयः ॥ १०३ ॥

अपांसमीपे नियतोनैत्यकं विधिमास्थितः ॥ सावित्रीमप्यधीयीत गत्वारण्यंसमाहितः ॥ १०४ ॥

(१) **मेधातिथिः** । अयमपरः स्वाध्यायविधिः प्रकरणान्तरे श्रुतत्वात्पूर्वस्मात्प्रकरणाद्भिद्यते । बहिर्ग्रामान्निर्जनोदेशअरण्यंतद्गत्वा प्राप्यापांसमीपे नदीवाप्यादिस्थाने तदभावे कमण्डल्वादिभाजनस्थानामपि नियतः शुचिर्यत्नवान्वा समाहितः परित्यक्तचित्तव्याक्षेपः सावित्रीमप्यधीयीत यदि बहुसूक्तानुवाकाध्यायादि कयाचित्कार्यातिपत्त्या नशक्यते । नैत्यकंविधिमास्थितः नित्यएवनैत्यकः नित्योयंविधिरित्येवंस्थितप्रज्ञः ग्रहणार्थश्च स्वाध्यायाध्ययनविधिः प्रकृतिरयंविकारः संस्तदीयाद्धर्मान्गृण्हाति तेन ब्रह्मणः प्रणवंप्राक्कूलानित्यादिधर्मोभवति । अन्येतु विधिर्विधाप्रकारइति कर्तव्यतेत्यादि चक्षते नित्येब्रह्मचारिणावश्यकर्तव्येसाध्यायाध्ययनविधेतिकर्तव्यता तामाश्रितः । अस्य तु विधेस्तदा नित्यत्वंब्रह्मसत्रंहि तत्स्मृतमित्यादिवाक्येभ्योवसातव्यम् । आद्यमेवव्याख्यानंयुक्तरूपंदृश्यते । नहि विधिशब्दः प्रकारवचनतया प्रसिद्धो यदि च नैत्यकशब्देनं ब्रह्मचारिणोविधिरुच्यते । तदा नैत्यकेनास्त्यनध्यायइत्यत्रापि नैत्यकशब्देन तस्यैवाभिधानं स्यात्तश्चानध्यायनिषेधस्तत्रैव न प्रसज्येत ॥ १०४ ॥

(२) **सर्वज्ञनारायणः** । अथब्रह्मयज्ञविधिमाहअपामिति । नियतः शुचिः नैत्यकंविधिं ब्रह्मयज्ञविधिंब्रह्मयज्ञेनयक्ष्यमाणइत्यादिनाश्रुतावुक्तं । आरण्यंग्रामाद्बहिः सावित्रीमपीत्यन्याध्ययनाशक्तावुपाकरणाद्वा पूर्वमगृहीतवेदस्य ब्रह्मचारिणोनुकल्पः । आदिक्रमेण स्वशाखायांनित्यंपाठोमुख्योब्रह्मयज्ञः । समाहितोनन्यचेताः ॥ १०४ ॥

(३) **कुल्लूकः** । अपांसमीपइति । ब्रह्मयज्ञरूपमिदंबहुवेदाध्ययनाशक्तो सावित्रीमात्राध्ययनमपि विधीयते । अरण्यादिनिर्जनदेशंगत्वानद्यादिजलसमीपेनियतेन्द्रियःसमाहितोऽनन्यमनानैत्यकंविधिंब्रह्मयज्ञरूपमास्थितोनुतिष्ठासुः सावित्रीमपि प्रणवव्याहृतित्रययुतांयथोक्तामधीयीत ॥ १०४ ॥

(४) **राघवानन्दः** । तत्र प्रशस्तस्थानमाह अपामिति । नैत्यकंब्रह्मयज्ञरूपंसमाहितोऽनन्यमनाः सावित्रीमपीति अनधीतसूक्तान्तरस्य ब्रह्मयज्ञार्थं । विशिष्टोयमपरोविधिरिति मेधातिथिः ॥ १०४ ॥

(५) **नन्दनः** । प्रथमंब्रह्मयज्ञमाह अपामिति । नियतसमाहितशब्दाभ्यांकर्मज्ञानेन्द्रियसंयमावुक्तौ । नित्यमेवनैमित्तिकं अनेनाहरहः कर्तव्यत्वमुक्तं विधिब्रह्मयज्ञेनवक्ष्यमाणःप्राच्यान्दिशीत्यनुवाकेनोक्तं । अधीयीत स्वाध्यायंनकेवलंस्वाध्यायिकमेवाधीयीत । किन्तुसावित्रीमपि । श्लोकस्यास्यब्रह्मयज्ञविषयत्वम् ॥ १०४ ॥

(६) **रामचन्द्रः** । युग्मं अपामिति । नैत्यकंविधिमास्थितःसन्नपांनिकटे नियतःसावित्रीञ्जपेत् । गत्वारण्यंसमाहितःसन्पुरुषादिरुतःसन्सम्यगधीयीत अध्ययनं कुर्वीत ॥ १०४ ॥

वेदोपकरणे चैव स्वाध्याये चैव नैत्यके ॥ नानुरोधोऽस्त्यनध्याये होममन्त्रेषु चैव हि ॥ १०५ ॥

(१) **मेधातिथिः** । उपकरणमुपकारकंवेदाङ्गंकल्पसूत्रनिरुक्ताद्युच्यते। तस्मिन्पठ्यमानेऽनध्यायेष्वनुरोधआदरोनास्ति । अनध्याये होममन्त्रेषु चैव ह्यनध्यायानादरणीयाअनध्यायेष्वध्येतव्यम । न निरोधइति वा पाठः। निवृत्तिरनध्यायेष्वध्ययनस्य नास्ति । यद्यप्यध्ययनविधिधर्मोनध्यायेष्वनध्ययनं अध्ययनविधिश्च स्वाध्यायविषयः स्वाध्यायश्च वेदोनच वेदशब्दवाच्यान्यङ्गानि तथापि वेदवाक्यमिश्रत्वबुद्धिः स्यादिति स्पष्टार्थमुच्यते । दृष्टान्तोवायंवेदाङ्गेष्विव वेदेष्यनध्यायोनास्ति । होममन्त्रेष्वग्निहोत्रहोमे ये मन्त्राअन्यस्मिन्वासावित्रादिशान्तिहोमे । एतच्च प्रदर्शनार्थम शस्त्रजपप्रैषादिमन्त्राणांकर्माङ्गानांवैदिकंवाक्योच्चारणमात्रधर्मोनध्यायानध्ययनंस्वाध्यायनविधिप्रयुक्तइति मन्यमानोहोमादिमन्त्रेषु चतुर्दश्यादिष्वनुच्चारणंप्रपद्येत यःसन्न्यायसिद्धेनार्थेनानूद्यमानेन प्रतिबोध्यते । स्वाध्यायाध्ययनविधिप्रयुक्तमनध्यायानुक्रमणंन वेदधर्मस्ततोनास्तिकर्माङ्गमन्त्रेष्वनध्यायः । नैत्यके स्वाध्याये पूर्वेण वाक्येन सर्वाश्रमिणांविहिते नित्ये स्वाध्यायविधौ ॥ १०५ ॥

(२) **सर्वज्ञनारायणः** । वेदोपाकरणे व्याकरणाद्यङ्गे नैत्यके स्वाध्याये ब्रह्मयज्ञे होममन्त्रेषु काम्यकर्माङ्गेष्वपि अनध्यायेनध्ययनदिनेनानध्ययनानुरोधः । अन्यत्र भवत्वनध्यायाभावः ॥ १०५ ॥

(३) **कुल्लूकः** । वेदोपकरणइति । वेदोपकरणे वेदाङ्गे शिक्षादौ नैत्यके नित्यानुष्ठेये च स्वाध्याये ब्रह्मयज्ञरूपे होममन्त्रेषु चानध्यायादरोनास्ति ॥ १०५ ॥

(४) **राघवानन्दः** । अहन्यहनीत्युक्तंअष्टकापौर्णमास्यादिष्वित्यादौ कार्यातिरिति चेत्तत्र पर्युदासाधिकरणन्यायेनाह वेदोपकरणइति । वेदोपकरणे शिक्षादिवेदाङ्गे नैत्यके ब्रह्मयज्ञादिरूपे गुरुमुखात्प्रथमाध्ययने वा तएव स्नानकप्रकरणएवानध्याये गणितस्तस्याध्ययनस्य काम्यत्वातअनुरोधअपेक्षाअङ्गादेर्नास्ति तथा च सूत्रम । कामंवेदाङ्गानीति । काममिच्छां तद्वशातवेदाङ्गाध्ययनमिति जैमिनिसूत्रार्थः । यजतिषु । ये यजामहे कुर्यान्नानुयाजेष्विति तत्र यथाअनुयाजवर्जितेषु यागेषुयेयजामहकरणंतद्वदत्रापि अनध्यायेष्वङ्गादिपाठइति न्यायार्थः ॥ १०५ ॥

(५) **नन्दनः** । सावित्रीग्रहणेनज्ञापितंनचात्रब्रह्मयज्ञेग्रहणाध्ययनइवानध्यायकालइत्याहवेदोपकरणइति । वेदोपकरणे वेदाङ्गेतत्प्रतिषेधाभावातहोममन्त्रेषुविधिबलाच्चयथानध्यायानुरोधोनास्ति एवन्नैमित्तिकेपीत्यर्थः ॥ १०५ ॥

(६) **रामचन्द्रः** । वेदोपकरणे उपाकर्मकरणे ॥ १०५ ॥

नैत्यके नास्त्यनध्यायोब्रह्मसत्रंहि तत्स्मृतं ॥ ब्रह्माहुतिहुतंपुण्यमनध्यायवषट्कृतम ॥१०६॥

(१) **मेधातिथिः** । पूर्वविधिशेषोयमर्थवादः । एतेन हेतुना नैत्यकेनास्त्यनध्यायोयतोऽब्रह्मसत्रंतत्स्मृतंसततप्रवृत्तंसत्रंयथा सहस्रसंवत्सरादिसत्रंन कदाचिच्छिद्यतइत्यतः सत्रमेवमिदमपि ब्रह्माध्ययनंनिर्वर्त्यं ब्रह्मसत्रत्वाच्च नकदाचिच्छेत्तव्यम् । विच्छेदेहि सत्रत्वंनस्यात् । सत्रत्वमिदानींरूपकभङ्ग्यायोजयति । ब्रह्माध्ययनमाहुतिहुतमन्यत्रसत्रेसोमाद्या-

हूयते । जुहोतिरनिवृत्तौ वर्तते । अनेकार्थत्वाद्धातूनांब्रह्मशब्देन तद्विषयाध्ययनक्रिया लक्ष्यते । ब्रह्माध्ययनमाहुतिरिवोप मितंध्यायादिभिरितिसमासः । अनध्याये यदध्ययनंतेन वषट्कृतंयथा याज्यान्तअविच्छेदोवषट्कारेण क्रियतएवंचतुर्दश्याद्यनध्यायाध्ययनंवषट्कारस्थानीयम् । वषट्शब्देन वौषट्शब्दोलक्ष्यते तेन कृतंयुक्तंसंस्कृतं साधनं कृतेति समासः॥१०६॥

(२) **सर्वज्ञनारायणः** । स्वाध्यायरूपे तु ब्रह्मयज्ञे कथमेवमध्ययनविरोधित्वादनध्यायस्येत्यतआह नैत्यकइति । ब्रह्मणा वेदेन सत्रं संतन्यमानाक्रियायतेतःक्रियासंतत्यविच्छेदार्थेनानध्यायानुरोधः किंत्वेकांवर्चमेकंवा यजुरेकवासामाहरेदित्यापस्तम्बवचनादनुसंधानमत्राल्पमणीयोनुष्ठेयं एतदर्थमपि चैतद्धोममन्त्रादेः पृथक्कृत्यंपुनरुक्तम् । अत्र चानध्यायानामनुरोधाभिधानात् स्नातकव्रतकरणेध्यापकंप्रति कथितानामनध्यायानामध्ययनकारिणं ब्रह्मचारिणं प्रत्यन्वयोपेक्षितः ।तेन विधिलंघनेनाध्यापकस्याध्ययनप्रवृत्तावन्यध्येत्रा नाध्येतव्यमिति लभ्यते । ब्रह्मसत्रमित्यत्र गुणयोगेन सत्रशब्दस्य प्रवृत्त्यायोगेनतांवक्तुंगवामयनादिसत्रसाम्यमस्याह । ब्रह्माहुतीति । वेदरूपायाआहुतेर्होतव्यस्य हुतंहोमोयत्र तंपुण्यहेतुंस्वाध्यायंयथा च सत्रे वषट्कारो होममन्त्रस्तथात्रापि अनध्यायोनध्ययननिमित्तंमेघनिर्घातशब्दादि वषट्कारस्थानीयम् । यदाहापस्तम्बः ब्रह्मयज्ञोहवाएषयःस्वाध्यायतस्यैते वषट्कारायत्स्तनयतीत्यादि ॥ १०६ ॥

(३) **कुल्लूकः** । नैत्यकइति पूर्वोक्तनैत्यकस्वाध्यायस्यायमनुवादः । नैत्यके जपयज्ञेऽनध्यायोनास्ति यतःसततभवत्वात् । ब्रह्मसत्रंतन्मन्वादिभिःस्मृतंब्रह्मैवाहुतिर्ब्रह्माहुतिर्हविस्तस्याहुतअनध्यायाध्यनमध्ययनरूपमनध्यायवषट्कृतमपि पुण्यमेव भवति ॥ १०६ ॥

(४) **राघवानन्दः** । अर्थवादेनोक्तमर्थंद्रढयति नैत्यकइति । ब्रह्मसत्रंसततभवत्वान्ब्रह्मैवाहुतिस्तस्याहुतंहोमरुपाध्ययनंसोमाहुतिस्थानीयंअनध्यायवषट्कृतेअनध्यायाध्ययनंवषडिति याज्यासमापकवौषट्स्थानीयंतेन कृतंसंस्कृतंब्रह्मसत्रमितिरूपकंपण्यं पुण्यदं । नापोहेर्दाम्रिषु क्रियाइति होमे नास्त्यनध्यायआवश्यकत्वात् । तथा भात्यहिकजपेपीति भावः ॥ १०६ ॥

(५) **नन्दनः** । उक्तमेवार्थंहेतुन्यासेनस्थिरीकरोति नैत्यकइति । नैत्तिकेस्वाध्यायेनास्त्यनध्यायः कुतः ब्रह्मैवाहुति ब्रह्माहुतिः वेदव्याहुतिरितियावत् । सायस्मिनसत्रेहुतातद्ब्रह्माहुतिहुतंअनध्यायकालेएववषट्कृतंयसतदनध्यायवषट्कृतंश्रूयतोहितस्यवाएतस्ययज्ञस्यमेघोहविर्धानमित्यादिअधीयतइत्यध्यायोयाज्यापुरोनुवाक्यादिः । वषट्कृतमववषट्कारः । ताभ्यांरहितमनध्यायवषट्कृतं । ततब्रह्मसत्रंवेदसत्रंसत्रशब्देननैरंतर्येणदीर्घकालानुष्ठेयत्वाभिमेतास्सत्तानैत्यकेनास्त्यनध्यायइत्यर्थः । संवत्सरमपिब्रह्मयज्ञंकुर्वतसर्वपुरुषार्थलाभःयावज्जीवंकुर्वतःकिंपुनरित्यभिप्रायेणाह । यस्स्वाध्यायमिति । स्वाध्यायंब्रह्मयज्ञविषयमब्दमब्दमात्रमप्येषस्वाध्यायः । पयोधर्मशुचिसामान्यात् । मेदःअर्थपुष्टिहेतुत्वसामान्यात् । घृतसाम्यंस्नेहसारुप्यात् । मधुरसःनानारसैक्यात् क्षरति । दुग्धेकेचिदपांसमीपइत्यादिश्लोकचतुष्टयेनगृहीतस्वाध्यायस्यानित्याध्ययनमुक्तमितिव्याचक्षते ॥ १०६ ॥

(६) **रामचन्द्रः** । नित्यस्वाध्यायेअनध्यायःअध्ययनस्यअनुरोधेन भवेत् च पुनः होममन्त्रेषु मन्त्रेचारेषु अनध्यायो न भवेत् नित्यकर्मणिअनध्यायोनास्ति ततःअध्ययनं ब्रह्मसत्रं ब्रह्मयज्ञस्मृतःब्रह्माहुतिहुतंपुण्यंब्रह्मणआहुतिहुतंब्रह्माहुतिहुतंवेदाहुतिहुतमित्यर्थः ब्रह्मणास्रुवेणाहुतिहुतमितिवार्थः अनध्याये वषट्कृतंपुण्यं भवति ॥ १०६ ॥

यःस्वाध्यायमधीतेऽब्दंविधिना नियतःशुचिः ॥ तस्य नित्यंक्षरत्येषपयोदधिघृतंमधु ॥१०७॥

(१) **मेधातिथिः** । प्रकृतविधिशेषोयम् । सच नित्यः समधिगतः नित्येच फलश्रवणमर्थवादोनच विधिविभक्तिर्वि-

यते येनैकस्य तूभयत्वेसंयोग पृथक्त्वमित्यनेन न्यायेनाधिकारान्तरहेतुः प्रयपप्रभृतिः स्यात्। लब्धे च नित्येऽधिकारे रात्रिसत्रन्यायोपि नास्ति येन पयआदीनि निष्फलत्वेन कल्पेरन्। तस्मादर्थवादएवायम्। अधीयानस्य लोकपक्तया प्रतिग्रहादिना गोलाभात्पयः प्रभृतेः प्रक्षरणानुवादस्यालम्बनम्। स्वाध्यायंवेदमधीतेब्दंसंवत्सरंविधिना प्राकूलाभ्यासनेन नियतः संयतेन्द्रियः शुचिः स्नानादिना तस्य पुरुषस्य नित्यंयावज्जीवंक्षरति स्रवति ददाति । एषः स्वाध्यायः पयोदधीति। अन्येतु धर्मार्थकाममोक्षात्पयआदिभिः शब्दैरभिहितान्मन्यन्ते । पयः शुद्धि सामान्याद्धर्मः दधिपुष्टिहेतुत्वादर्थः। स्नेहसामान्याद्घृतंकामः सर्वरसैक्यान्मधुमोक्षः। यावान्कश्चन पुरुषार्थः ससर्वोवेदाध्ययनात्संवत्सरेणैव प्राप्यते किंपुनर्बहुना कालेनार्थवादत्वात्पयआदिशब्दानांकोर्थोयुक्तइति नाभिनिवेष्टव्यम् ॥१०७॥

(२) **सर्वज्ञनारायणः** । यावज्जीवाध्ययनेनियतेप्यब्दमात्रेणैवलभ्यं फलमाहयइति । नियतइन्द्रियप्रत्याहारवान् पयःश्वेतवर्णसारूप्याद्धर्मःतद्भवत्वादर्थोदधि तदुभयप्रभवत्वाद्घृतंकामः मध्विति परमात्मनार्तद्विषयतया ब्रह्मविद्यायांमधुशब्दप्रयोगः। अथातो सर्वांमधुप्रवोचदिति ॥ १०७ ॥

(३) **कुल्लूकः** । यःस्वाध्यायमिति । अब्दमित्यत्यन्तसंयोगे द्वितीया। योवर्षमप्येकंस्वाध्यायमहरहर्विहितान्नियुक्तं नियतेन्द्रियःप्रयतोजपति तस्यैव स्वाध्यायोजपयज्ञः। क्षीरादीनि क्षरति क्षीरादिभिर्देवान्पितॄंश्च प्रीणाति ते च प्रीताःसर्वकामैर्जपयज्ञकारिणस्तर्पयन्तीत्यर्थः । अतएव याज्ञवल्क्यः मधुना पयसा चैव सदेवांस्तर्पयेद्द्विजः। पितॄन्मधुघृताभ्यांच ऋचोधीते हि योऽन्वहमित्युपक्रम्य चतुर्णामिव वेदानांपुराणानांच जपस्य देवपितृतृप्तिफलमुक्त्वा शेषे तेतृप्तास्तर्पयन्त्येनंसर्वकामफलैःशुभैरित्युक्तवान् ॥ १०७ ॥

(४) **राघवानन्दः** । अध्ययनस्य गुणफलमाह । यइति । विधिना प्राकूलानिहत्युक्तेनक्षरन्तिपित्रादीनांतृप्तिमति। तदुक्तंयाज्ञवल्क्येन। मधुना पयसा चैव सदेवांस्तर्पयेद्द्विजः। पितॄन्मधुघृताभ्यांचऋचोधीते तु योन्वहम् ॥ ईदृशः स्वाध्यायः गोदोहनर्विशिष्टापः प्रणयनं यथापशुसाधनंतथायमुक्तफलसाधनमिति अर्थवादोयमिति मेधातिथिः । तन्न-अर्थवादत्वे परपदार्थापत्तिः स्वपदार्थत्यागइति मीमांसामुद्राभङ्गः अन्यथा गोदोहमप्यर्थवादः स्यात् ॥ १०७ ॥

(६) **रामचन्द्रः** । यःपुरुषःअब्दपर्यन्तं स्वाधायंअधीते करोति तस्य नित्यंएषःस्वाध्यायःपयोदधिघृतंमधु क्षरति स्रवति ददातीत्यर्थः। धर्मार्थकाममोक्षाःपयोरूपोधर्मः। दधिरूपोअर्थः घृतरूपःकामः। मधुरूपोमोक्षः ॥ १०७ ॥

अग्नीन्धनंभैक्षचर्यामधःशय्यांगुरोर्हितम् ॥ आसमावर्तनात्कुर्यात्कृतोपनयनोद्विजः ॥ १०८ ॥

मेधातिथिः । सायंप्रातः समिद्भिरग्नेरादीपनमग्नीन्धनम्। अपर्यङ्कारोहणमधः शय्या नतु स्थण्डिलशायित्वमेव। गुरवे हितमुदकुम्भाद्याहरणंशुश्रूषणलक्षणम्। यत्तुतदुपकारकरणंतद्यावज्जीविकम्। एतदाब्रह्मचर्यसमाप्तेर्गुरुकुलनिवृत्तिलक्षणात् स्नानात्कर्तव्यं स्वाध्यायाध्ययनविध्यर्थत्वात्। ब्रह्मचर्यस्य तद्धर्माणांच यावद्ग्रहणमनुवृत्तिस्तन्निवृत्त्या च निवृत्तिः सिद्धैवेति। अग्नीन्धनादीनांपुनर्वचनं तद्व्यतिरिक्तस्यातिक्रान्तस्य धर्मकलापस्योत्तरेषामप्याश्रमिणामनुष्ठानार्थम् । तथाच गौतमः उत्तरेषांचैतदविरोधादिति। अथैवंकल्पान्नभवत्येते यावद्ब्रह्मचर्यंभाविनोन्ये पुनरर्वागपि निवर्तन्तइति स्मृत्यन्तरमात्रदर्शितप्रधानकालानुवर्तिनश्च नियमाहत्येषन्यायः सत्यां गतौ बाधितः स्यात्। गुरवे हितमिति हितयोगे चतुर्थी व्याप्यातद्वक्ष्यति ॥ १०८ ॥

(२) **सर्वज्ञनारायणः** । समिदाधानमिन्धनं अधःशय्या खट्वाद्युपरिशयनत्यागः गुरोर्हितंतत्परिचर्याएतश्चैतेषां-ब्रह्मयज्ञसन्ध्योपासनादिवत् समावर्तनादूर्ध्वमप्यनुष्ठानप्रसंगंवारयितुमुक्तम्। अतएव गौतमः उत्तरेषांचैतदविरोधीति॥१०८॥

(३) **कुल्लूकः** । अग्नीन्धनमिति सायंप्रातःसमिद्धोमंभिक्षासमूहाहरणमखट्वाशयनरूपामधःशय्यां न तुस्थण्डिलशायित्वमेवगुरोरुदककुम्भाद्याहरणरूपंहितंकृतोपनयनोब्रह्मचारी समावर्तनपर्यन्तंकुर्यात् ॥ १०८ ॥

(४) **राघवानन्दः** । ब्रह्मचारिणोऽवश्यकर्तव्यमाह अग्नीन्धनमिति अग्नीन्धनंसायंप्रातः समिद्धोमः अधःशय्यांखट्वाद्यनारूढतांकुर्यात्समावर्तनपर्यन्तमित्यन्वयः ॥ १०८ ॥

(५) **नन्दनः** । अथब्रह्मचारिप्रकरणोक्तानांकेषांचिद्धर्माणामुत्तराश्रमेष्वप्यनुवृत्तिप्रदर्शनार्थंकेषांचिन्नियममाह अग्नीन्धनमिति । अग्नीन्धनादीनांयावत्ब्रह्मचर्यकालभावित्वंप्रधानवशवर्तित्वात् गुणानां सिद्धिं सिद्धेसत्यारम्भोनियमार्थः अग्नीन्धनादिभ्योन्येषांयावज्जीवकालप्रयोगइति । गुरोर्हितंउदकुम्भाहरणादि अन्यस्ययावज्जीवकालत्वात् ॥ १०८ ॥

(६) **रामचन्द्रः** । ब्रह्मचारिधर्मानाह कृतोपनयनोद्विजः समावर्तनपर्यन्तंअग्निं अग्निशुश्रूषांकुर्यात्इन्धनंगुरोः इन्धनानयनं गुरोर्हितंकुर्यात् ॥ १०८ ॥

आचार्यपुत्रःशुश्रूषुर्ज्ञानदोधार्मिकःशुचिः ॥ आप्तःशक्तोऽर्थदःसाधुः स्वोऽध्याप्यादश धर्मतः ॥ १०९ ॥

(१) **मेधातिथिः** । सर्वेषामेव दानानांब्रह्मदानंविशिष्यतइति तत्रकीदृशाय विद्यादातव्याइति पात्रलक्षणार्थः श्लोकः ब्रह्मचारिधर्मप्रसङ्गेनाध्यापनविधिरयमुच्यते । आचार्यस्य पुत्रः शुश्रूषा परिचर्या गृहोपयोगिशक्तितः कर्मकरणं शरीरसंवाहनं च ज्ञानादयःकश्चिद्ग्रन्थआचार्यस्य न विदितःशिष्येण कथंचिच्छिक्षितोऽर्थकामकलाविषयोधर्मविषयो वा विद्याविनिमयेनेदमध्यापनम् । धार्मिकः अग्निहोत्रादिकर्मानुष्ठानप्रधानः शुचिर्मृद्वारिशुद्धअर्थशुद्धश्च । गोबलीवर्दवत्पदत्रयस्य पुनरुक्तंधार्मिकः शुचिः साधुरिति । आप्तसुहृद्बान्धवादिः प्रत्यासन्नः शक्तः ग्रहणधारणसमर्थः स्वःपुत्रः उपनीतश्च पूर्वः अन्योपनीताअप्यध्याप्याः । ननु च धर्मतइत्युच्यते एतैरध्यापितैर्धर्मोभवति अर्थदश्च दृष्टेनोपकरोति तत्र कुतोऽदृष्टकल्पना केनोक्तंकल्पमिति श्रुते का कल्पना साक्षादेवहिश्रुतमध्याप्यादशधर्मतइति । उपाध्यायस्त्वाह धर्मशास्त्रव्यवस्थोच्यते । एतैरध्यापितैर्धर्मातिक्रमोन भवतिन पुनरर्थदअध्यापिते विद्यादानलक्षणे धर्मोभवति ॥ १०९ ॥

(२) **सर्वज्ञनारायणः** । शुश्रूषुः कृतचर्यः । धार्मिकोधर्मानुष्ठानशीलः । शुचिःशुद्धभावः । आप्तोबन्धुः । शक्तोग्रहणधारणादिशक्तिमान् । अर्थदः परिभाषंविना पूर्वधनेन कृतोपकारः । साधुरार्जवोपेतः । स्वोज्ञातिः । धर्मतोधर्मार्थमुद्दिश्यन तु भविष्यदर्थशुश्रूषादिना ॥ १०९ ॥

(३) **कुल्लूकः** । कीदृशःशिष्योऽध्याप्य इत्याहआचार्यपुत्रइति । आचार्यपुत्रःपरिचारकोज्ञानान्तरदाता धर्मविन्मृद्वार्यादिषु शुचिःबान्धवो ग्रहणधारणसमर्थः धनदाताहितेच्छुःज्ञातिः दशैते धर्मेणाध्याप्याः ॥ १०९ ॥

(४) **राघवानन्दः** । विद्यादानपात्राण्याह आचार्यपुत्रइति । ज्ञानदः अथवा विद्यया विद्येत्युक्तत्वातधार्मिकः लाभाद्यनुपजीव्यधर्मार्थंयः पठति शुचिरलुब्धः आप्तोबन्धुः । शक्तांवेदतदर्थविचारणादौअर्थदउत्तरकाले स्वोज्ञातिः ॥ १०९ ॥

(५) **नन्दनः** । इदानींगुरोरध्यापनयोग्यान्प्रसंगादाह आचार्येति । शक्तःग्रहणधारणादौगुरुकार्येषुवा समर्थः । स्वःज्ञातिः धर्म्मतःन्यायतः ॥ १०९ ॥

(६) **रामचन्द्र** । आचार्यपुत्रादि एते । दश धर्मतः स्वःपुत्रादिःस्वाध्याप्याः अध्ययनयोग्याभवन्ति ॥ १०९ ॥

नापृष्टःकस्यचिद्ब्रूयान्न चान्यायेन पृच्छतः॥ जानन्नपि हि मेधावी जडवल्लोकआचरेत्॥ ११०॥

(१) **मेधातिथिः**। अधीयानेनानुपसन्नेन यदि नाशितमपाक्षरंविस्वरंवाऽधीतंतदाऽपृष्टेन न वक्तव्यम्। नाशितं-त्वयैवमेतत्पठितव्यमितिं शिष्यस्य त्वपृच्छतोपि वक्तव्यम्। पृच्छमानोऽपि यद्यन्यायेन पृच्छति तथापि न वक्तव्य-म। प्रश्रयपूर्वकमस्मिन्वस्तुनि मे संदेहस्तदुपदेष्टुमर्हसीति शिष्यधर्मेण प्रश्नोन्यायेन। अन्यथा तु जानन्नपि जडवन्मू-कइव लोके वर्तेताऽऽचरेदज्ञइव तूष्णीमासीत। शास्त्रविषयोयंमपृष्टसंदेहापनयननिषेधः। व्यवहारे तु वक्ष्यति नियुक्तो-वा नियुक्तोवाधर्मज्ञोवक्तुमर्हतीति। अन्येत्वविशेषेणेच्छन्ति॥ ११०॥

(२) **सर्वज्ञनारायणः**। एभ्यस्त्वन्यस्यापृष्टो न ब्रूयात् न चान्याये न परिहासादिना पृच्छतः॥ ११०॥

(३) **कुल्लूकः**। नापृष्टइति यद्यन्येनाल्पाक्षरंविस्वरंचाधीतंतस्य तत्त्वंन वदेत् शिष्यस्यत्वपृच्छतोऽपि वक्तव्यम्। भक्तिश्रद्धादिप्रश्नधर्मोल्लङ्घनमन्यायस्ते न पृच्छतोन ब्रूयात् जानन्नपि हि प्राज्ञोलोके मूकइव व्यवहरेत्॥ ११०॥

(४) **राघवानन्दः**। सार्थवादानिपात्राण्याह नापृष्टइति षड्भिः। अन्यायेन यथाविधिनमस्कारादिरहितेन पृ-च्छतस्तंप्रति न ब्रूयादिति। जानन्नपि तत्र तत्र समर्थोपि लोकेअपात्रे जडवन्मूकवत्स्यात्॥ ११०॥

(५) **नन्दनः**। पुनरत्रकःन्यायइत्यपेक्षायामाह नापृष्टइति। दशानामेतेषांमध्ये कस्यचिदप्रश्ने न्यायवर्जितप्रश्ने-चजानन्नपिजडवत्भवेत्॥ ११०॥

(६) **रामचन्द्रः**। अपृष्टः सन्कस्य चित्तुनब्रूयात् अन्यायेन पृच्छतः कस्य चित् न ब्रूयात् मेधावी जानन्नपि जडवल्लोकआचरेत्॥ ११०॥

अधर्मेण च यःप्राह यश्चाधर्मेण पृच्छति॥ तयोरन्यतरःप्रैति विद्वेषंवाधिगच्छति॥ १११॥

(१) **मेधातिथिः**। अस्य प्रतिषेधस्यातिक्रमे दोषमाह अधर्मेण पृष्टोन्यायपृष्टश्च यः प्रब्रवीति एवमेतद्युक्तमध्येतुमिति यश्च पृच्छतितावुभावपि म्रियेतेअप्राप्तकालौ। अथैकोव्यतिक्रमकारी सएव म्रियते। यद्यन्यायेन पृष्टोन वक्ति तदा प्रष्टैव वाऽथप्रतिवक्ति तदोभावपि। अनेनान्यायप्रश्ने दोषदर्शने न प्रष्टुर्न्याय्यः प्रश्नविधिः। विद्वेषंवा द्वेष्यतांलोके प्राप्नोति॥१११॥

(२) **सर्वज्ञनारायणः**। अधर्मेण यथोक्तस्वाध्यायनविधिविना। प्रैति म्रियते विद्वेषमन्यतरस्यान्यतरोधिग-च्छति॥ १११॥

(३) **कुल्लूकः**। उक्तप्रतिषेधद्वयातिक्रमे दोषमाह अधर्मेणेति। अधर्मेण पृष्टोऽपि योयस्य वदति यश्चान्यायेन यंपृच्छति तयोरन्यतरोव्यतिक्रमकारी म्रियते विद्वेषंवा तेन सह गच्छति॥ १११॥

(४) **राघवानन्दः**। उक्तातिक्रमेऽनर्थमाह अधर्मेणेति। अधर्मेण पृष्टइति शेषः। प्राहअधर्मेण च पृच्छति यःतयो-र्मध्येअन्यतरःव्यतिक्रमकारी प्रैति म्रियते फलाच्च्यवते॥ १११॥

(५) **नन्दनः**। न्यायवर्जितेप्रश्नेप्रवचनेचदोषमाह अधर्मेणेति। प्राह वचनंकरोति प्रैतिम्रियते॥ १११॥

(६) **रामचन्द्रः**। अधर्मेणेतिद्वाभ्यामाह। यःब्रह्मचारीअधर्मेण अनृतेन प्राह यः अधर्मेण पृच्छति तयोर्मध्ये अ-न्यतरः एकः प्रैति मृत्युंएति यदि जीवेत्तु विद्वेषं अधिगच्छति॥ १११॥

---

(११०) लोकआचरेत्=लोकमाचरेत् (न, ल, य, र,)

(१११) वाधि=चाधि (न, ब, ल. भ,)

धर्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा ॥ तत्र विद्या न वक्तव्या शुभंबीजमिवोषरे ॥ ११२ ॥

(१) मेधातिथिः । यदुक्तमध्याप्यादशधर्मतइति तस्यैवायंप्रकारान्तरेण संक्षेपतःप्रतिनिर्देशोनापूर्वार्थाऽभिधानम् । प्रकृतानुवादत्वादर्थशब्दउपकारमात्रलक्षणाऽपरोद्रष्टव्यः विद्याविनिमयेनापि पूर्वमध्ययनस्योक्तत्वात् । तद्विधाऽध्यापनाऽनुरूपामहति महती स्वल्पे स्वल्पेति तत्रविद्या विद्यतेज्ञायते यया सर्वोऽर्थइति साविद्यापाठोऽर्थावबोधश्च । अनुपकारी नाऽध्याप्योन चास्यार्थविवरणंकर्तव्यम् । उषरोभूमिभागउच्यते यस्मिन्नखिलेपिमृत्तिकादोषाद्बीजंन प्ररोहति शुभंश्रेष्ठं व्रीह्यादिकं लाङ्गलादिनोप्यते । एवंविद्यापि क्षेत्रे शुभा महाफला भवति । नचैतन्मन्तव्यम् । अर्थमादाय यदध्यापनंसा भृतिः नहि पणपरिमाणसंभाषणपूर्विका तत्र प्रवृत्तिः यदेयद्ददासि तदेतदध्यापयामीति । एतद्भृतेरूपम् । न पुनरर्थोपकार गन्धमात्रेण । यत्तु न पूर्वंकिंचिद्गुरवे उपकुर्वीतेति नासौ पूर्वोपकारप्रतिषेधः किंतुनास्यतावश्यमाक्रमेन गुर्वर्थोयथा शक्तिसंपाद्यः तच्छेषएव प्रतिषेधोन पृथग्वाच्यः ॥ ११२ ॥

(२) सर्वज्ञनारायणः । धर्मः उक्तेषु दशसु । अर्थःपरिभाषांविना भविष्यदर्थसंभावना । शुश्रूषा परिचर्या । सापि तद्विधाध्ययनस्य यादृशमभ्यर्हितत्वंतदनुरूपा ऊषरे लवणभूमौ ११२ ॥

(३) कुल्लूकः । धर्मार्थाविति यस्मिञ्छिष्येऽध्यापिते धर्मार्थौ न भवतः परिचर्या वा ऽध्ययनानुरूपा तत्र विद्यानार्पणीयासुष्टुव्रीह्यादिबीजमिवोषरे यत्र बीजमुप्तंन प्ररोहति सउषरः । न चार्थग्रहणे भृतकाध्यापकत्वमाशङ्कनीयंयस्येताव न्महंदीयते तदेतावदध्यापयामीति नियमाभावात् ॥ ११२ ॥

(४) राघवानन्दः । किंच धर्मार्थाविति । तद्विधा विद्यादानानुरूपाऊषरेक्षारभूमौ तत्रोप्तंयथानाङ्कुरयति तथा तादृशे धर्मार्थादयोन स्युरिति ॥ ११२ ॥

(५) नन्दनः । तद्विधा गृहविद्यानुरूपा ॥ ११२ ॥

(६) रामचन्द्रः । यत्र ब्रह्मचारिणिधर्मार्थौ न स्यातांधर्मश्चअर्थश्च धर्मार्थौ न भवतः च पुनः तद्विधा शुश्रूषा गुरुयोग्या शुश्रूषा न स्यात् तत्र तस्मिन्ब्रह्मचारिणि विद्या न वक्तव्या ज्ञानं च न वक्तव्यमित्यर्थः । ऊषरे भूमौ शुभंबीजमिव निष्फलं भवतीत्यर्थः ॥ ११२ ॥

विद्ययैव समंकामंमर्तव्यंब्रह्मवादिना ॥ आपद्यपि हि घोरायांनत्वेनामिरिणे वपेत् ॥ ११३ ॥

(१) मेधातिथिः । समंशब्दः सहार्थे । अप्रतिपादितया स्वदेहएवजर्जरिततया युक्तंब्रह्मवादिनोवेदाध्यायिनोमरणंन पुनरपात्रे प्रतिपादनमनेन च ज्ञायते । अध्यापनमध्यधीतवेदेनावश्यंकर्तव्यं न केवलंवृत्त्यर्थम् । नापि वार्यादिदानवत्फल कामस्यैवाधिकारः । तथा च श्रुतिः योह्विविद्यामधीत्यार्थिने न ब्रूयात्सकार्यहा स्यात् श्रेयसोद्वारमपावृणुयादध्यापयेन्महदेतद्यशस्यंवाचोधिकारंकवयोवदन्ति अस्मिन्योगेसर्वमिदंप्रतिष्ठितम् यएवंविदुरमृतास्तेभवन्ति । सकार्यहास्यादित्यनेनानध्यापनेदोषमनुवदन्तीतिश्रुतिरेवावश्यकर्तव्यतांज्ञापयति । इरिणे पूर्वोक्तप्रयोजनत्रयाभावोयत्राऽऽपद्यपि हि घोरायां कष्टायामपि कष्टाआपदुक्तशिष्याभावः । एतच्चावश्यकर्तव्ये सत्युपपद्यतेनित्यत्वे हि मुख्याभावे प्रतिनिधिशिष्योपादाने नाध्यापननिवृत्तिः प्राप्ता । व्रीह्यभाववन्नीवारैरतोस्यामवस्थायामध्यापनाधिकारनिवृत्तिरेव यथोक्तलक्षणातिथ्यभावेऽतिथिपूजानिवृत्तिः वपेदिति लक्षणयाबीजधर्मेणाध्यापनमुच्यते । बीजंकिलक्षेत्रोप्तंबहुफलंभवत्येवंविद्याऽपि । येतु धनाभावनिमित्तामापदमाचक्षते अत्यन्तदुर्गतेनापि नेरिणेवप्तव्येति वरंम्रियता । सर्वतएवात्मानंगोपायेदिति नैषविधिरतिक्रा-

न्तोभवति। सत्यपि तथाविधाध्यापने वृत्त्युपाये तदेतदयुक्तं अर्थदोनैवेरिणं पूर्वोक्तानुवादत्वादिरिणशब्दस्य । यदि वार्थदोपि न भवति कथमापदि तत्र प्रवृत्तिः संभाव्यते या निषिध्यते ॥ ११३ ॥

(२) **सर्वज्ञनारायणः**। ब्रह्मवादिना वेदवादिना घोरायामापदि दुर्भिक्षादौ अर्थकामनया इरिणे ऊषरंविद्यासन्तानानुपालनासमर्थे ॥ ११३ ॥

(३) **कुल्लूकः**। विद्ययेति। विद्ययैव सहवेदाध्यापकेन वरंमर्तव्यं नतु सर्वथाध्यापनयोग्यशिष्याभावेचापात्रायैव तांप्रतिपादयेत्। तथा छान्दोग्यब्राह्मणम् विद्यया सार्धम्रियेत नविद्यामूषरे वपेत् ॥११३ ॥

(४) **राघवानन्दः**। अयोग्येअदानंश्रेयइत्याह विद्ययैवेति । ब्रह्मवादिना वेदानध्यापयितुमिच्छता घोरायांवृत्त्यभावेन मृत्युपर्यवसितायांफललोभात् कस्यचिदूषरेपि शुभबीजारोपणंभ्रमंतन्निरासायाह न त्वेनामिति । इरिणेउक्तोषरेएतांविद्याम्। अयमर्थः कङ्कुबीजादेरल्पतयाअन्यतोनुपकारकत्वंविद्याया इतएव पारायणादिनोपकारकत्वम् ॥ ११३॥

(५) **नन्दनः**। इरिणेऊषरेधर्मार्थशुश्रूषाहीने पुरुषइतियावत्नवपेत् न ब्रूयात् ॥ ११३ ॥

(६) **रामचन्द्रः** । ब्रह्मवादिना कामंअतिशयेन विद्ययैव सर्वविद्यासंयुक्तंमर्तव्यंमरणं कर्तव्यम्। आपद्यपि घोरायांएनांविद्यांइरिणेऊषरेनवपेत् न दद्यात् ॥ ११३ ॥

विद्या ब्राह्मणमेत्याह शेवधिष्टेऽस्मि रक्ष माम्॥असूयकाय मांमादास्तथा स्यांवीर्यवत्तमा॥ ११४॥

(१) **मेधातिथिः**। अयमप्यर्थवादएव । विद्या मूर्तिमती कंचिदुपाध्यायमागत्याह प्रोक्तवतीशेवधिर्निधिस्तवास्मिरक्षमां। का पुनस्तेरक्षा। असूयकाय कुत्साकराय निन्दकाय मांमाऽदाःनिन्दकंमाध्यापय तथा चैवमहंवीर्यवत्तमाऽतिशयेन तव कार्यकरी भवामि। वीर्यकार्यनिवृत्तौ सामर्थ्यातिशयः। शेवधिष्टेस्मीति कुतषत्वंपठितंतच्छान्दसप्रयोगाऽनुकरणम् ॥ ११४ ॥

(२) **सर्वज्ञनारायणः**। विद्याह वै ब्राह्मणमाजगाम गोपाय मांशेवधिष्टेहमस्मि। असूयकायानृजवेयताय नमाब्रूयावीर्यवती तथास्याम्। यमेव विद्याशुचिमप्रमत्तं मेधाविनंब्रह्मचर्योपपन्नम् यस्तेन द्रुह्येत्कतमच्चनाहतस्मै माब्रूयानिधिपाय ब्रह्मन्निति श्रुतिवाक्यद्वयंवाक्यान्तररचनयाप्रबध्यास्मिन्नर्थे प्रमाणमाह विद्येति। शेवधिर्निधिः ॥ ११४ ॥

(३) **कुल्लूकः**। अस्यानुवादमाह विद्याब्राह्मणमिति। विद्याधिष्ठात्री देवता कंचिदध्यापकंब्राह्मणमागत्यैवमवदन तवाहंनिधिरस्मिमांरक्षासूयकादिदोषवते नमांवदेः । तथा सत्यतिशयेन वीर्यवती भूयासम् । तथाच छान्दोग्यब्राह्मणम् विद्या हवै ब्राह्मणमाजगाम तवाहमस्मि त्वंमांपालयानर्हतेमानिने नैव मादागोपायमांश्रेयसी तथाऽहमस्मीति॥११४॥

(४) **राघवानन्दः**। अत्रहेतुर्विद्येति। शेवधिर्निधिःतदसूययाविद्याकुण्ठता स्यात्। अदाने वीर्यवत्तमा वीर्यातिशयवतीअपात्रदाने तु दुरदृष्टजनकतयाअध्ययनोक्तफलाजनिका। आदाने तु तज्जनिकेतिभावः ॥ ११४ ॥

(५) **नन्दनः**। उक्तमेवार्थमर्थवादेनस्थिरीकरोतिविद्येति। शेवधिरित्यादिउत्तरश्लोकश्चविद्यायावचनम्। शेवधिः निधिः। असूयकायअपात्रभूताय। तथा पात्रदत्ता ॥११४ ॥

(६) **रामचन्द्रः**। विद्या ब्राह्मणमित्याह। शेवधिःतेअस्मि शेवधिःनिधिःते तवास्मि यथा शेवधिः रक्षति तथा मांत्वंरक्ष मांअसूयकाय असूयायुक्तायमांमादामादेहीति। तथा वीर्यवती प्रभाववती अहंस्यामिति। निधिर्नाशेवृधिरित्यमरः ॥ ११४ ॥

यमेवतु शुचिंविद्यान्नियतंब्रह्मचारिणम् ॥ तस्मै मांब्रूहि विप्राय निधिपायाप्रमादिने ॥ ११५ ॥

(१) मेधातिथिः । यंशिष्यंशुचिंजानीयान्नियतंसंयतेन्द्रियंयत्न परंब्रह्मचारिणंतस्मैमांब्रूहि योहि निधिंपाति रक्षति यतोसावप्रमादी न प्रमाद्यति न स्खलति । तत्परत्वाच्छक्तामार्थदादीनांसर्वशिष्याणामेतद्गुणसंयोगे देयेत्यस्मादर्थवादाद्गम्यते ॥ ११५ ॥

(२) सर्वज्ञनारायणः । नियतंनिश्चयवन्तम् । ब्रह्मचारिणमच्युतब्रह्मचर्यम् ॥ ११५ ॥

(३) कुल्लूकः । यमिति । यमेव पुनःशिष्यंशुचिंनियतेन्द्रियंब्रह्मचारिणंजानासि तस्मै विद्यारूपनिधिरक्षकाय प्रमादरहिताय मांवद ॥ ११५ ॥

(४) राघवानन्दः । दानपात्रमाह यमिति । यंनियतंउक्तनियमवन्तंतंविद्यात् जानीयात् । निधिपायनिधिंविद्यांपातुंशीलायाप्रमादिनेऽकुत्सिताय ब्रूहि ॥ ११५ ॥

(५) नन्दनः । विद्यात्जानीयात् निधिपायविद्यानिधिपालाय पात्रे प्रदानं रक्षणमत्राभिप्रेतम् । विप्रशब्दोऽत्रक्षत्रियवैश्ययोरप्युपलक्षणार्थः ॥ ११५ ॥

(६) रामचन्द्रः । यंब्रह्मचारिणंशुचिंविद्यात् नियतंतस्मै ब्रह्मचारिणे मांब्रूहि कीदृशाय निधिपाय निधिंपातिइतिनिधिपःतस्मै अप्रमादिने प्रमादशून्याय । प्रमादोऽनवधानताइत्यमरः । यथा निधिंपाति तथा मांयःपाति रक्षति तस्मै ॥ ११५ ॥

ब्रह्म यस्त्वननुज्ञातमधीयानादवाप्नुयात् ॥ सब्रह्मस्तेयसंयुक्तोनरकंप्रतिपद्यते ॥ ११६ ॥

(१) मेधातिथिः । योभ्यासार्थमधीयानस्यान्यंचोद्दिश्यैवंव्याचक्षाणस्य तत्संनिकर्षमन्यआगत्य तद्ब्रह्मापूर्वंगृह्णीयात्संदेहंवापनुदेत्तस्यैषदोषउच्यते । यावदनुज्ञामसौ न दाप्यते यथैते त्वत्सकाशादधीयतएवमप्यहमप्यधीयीयेत्यनुज्ञातुमर्हसीति लब्धानुज्ञांशिक्षेत । अन्यथा तु यद्ब्रह्माध्ययनंनस्तेयमिव सोध्येतानेन ब्रह्मचौर्येण संयुक्तोनरकंमहायातनास्थानंप्राप्नोति । अधीयानादिति पञ्चमी आख्यातोपयोगइति । अपायस्य वा गम्यमानत्वाद्ब्रह्म ह्यध्येतुर्निष्क्रामतीव । ल्यब्लोपेवा कर्मणि । अधीयानंश्रुत्वाऽऽप्नोमीति शिक्ष्यते ॥ ११६ ॥

(२) सर्वज्ञनारायणः । अवाप्नुयात् अभ्यस्येत् ॥ ११६ ॥

(३) कुल्लूकः । ब्रह्मेति । यः पुनरभ्यासार्थमधीयानादन्यंवा कंचिदध्यापयतस्तदनुमतिरहितंवेदंगृण्हाति सवेदस्तेयसंयुक्तोनरकंगच्छति तस्मादेतन्न कर्तव्यम् ॥ ११६ ॥

(४) राघवानन्दः । गुरोरननुज्ञया विद्यानपाह्येत्याह ब्रह्मेति । ब्रह्म वेदंअधीयानादन्यस्मात्तदर्थोच्चरितंनियतस्तब्रह्मंअवाप्नुयात् । स्वीकुर्यात्सब्रह्मस्तेयीति ॥ ११६ ॥

(६) रामचन्द्रः । यःब्रह्मचारीगुरोःअननुज्ञातं अनध्यापितं अधीयानात् ब्रह्मवेदंप्राप्नुयात् सः ब्रह्मस्तेयसंयुक्तः वेदस्तेयसंयुक्तः नरकंप्रतिपद्यते ॥ ११६ ॥

लौकिकंवैदिकंवापि तथाध्यात्मिकमेव च ॥ आददीत यतोज्ञानंतंपूर्वमभिवादयेत् ॥ ११७ ॥

[जन्मप्रभृति यत्किञ्चिच्चेतसा धर्ममाचरेत् ॥ तत्सर्वंविफलंज्ञेयमेकहस्ताभिवादनात् * ॥ १ ॥]

---

* (८)

(१) मेधातिथिः। अतिक्रान्तप्रासङ्गिकम्। अभिवादनविधिरिदानीं प्रक्रम्यते। लोके भवं लौकिकं लोकाचारशिक्षणमथवा गीतवादित्रकलानां ज्ञानं वात्स्यायनविशाखिलकलाविषयग्रन्थज्ञानं वा। वैदिकं विधिनोदितं। वेदवेदाङ्गस्मृतिविषया ऽध्यात्मिकविद्या ऽऽत्मोपनिषद्विद्या ऽऽत्मोपचाराद्वा शरीरस्य वैदिकमेतज्ज्ञानं यतः शिक्षेत तं पूर्वमुपदेष्टारं पुरुषमभिवादयेत्। प्रथमसंगमे यदाशीःप्रयोगार्थं वक्ष्यमाणस्वरूपेण प्रयोगेण शब्देन संमुखीकरणं सोऽभिवादयतेरर्थः। पूर्वमिति प्रथमं तेनासौ संबोध्योन पुनस्तदीयं वचनमपेक्षितव्यं तदा हि प्रत्यभिवादयिताऽभिवादयेदित्यनेनैव सिद्धत्वात्। पूर्वशब्दोऽनर्थक इति चेत्तन्न सति ह्यस्मिन्नयमर्थो लभ्यते धातूपसर्गार्थपर्यालोचनया ह्याभिमुख्येन वदनमात्रं प्रतीयते। अन्येनापि संबोधितस्य भवत्येव। ये तु पूर्वं स्वयोगिगुरुभ्य इति व्याचक्षते तदप्रकृतसंशब्दितमित्युपेक्ष्यम् ॥ ११७ ॥

(२) सर्वज्ञनारायणः। लौकिकमौषधनीत्यादिविषयम्। वैदिकं यज्ञादिकर्मकाण्डविषयम्। आध्यात्मिकमात्मविषयम्। तं पूर्वमभिवादयेदाचार्यादिष्वसत्सु। अत्रापि ज्ञानप्रकर्षाधिक्यापेक्षया प्राथम्यमूह्यम् यथा आद्यापेक्षया द्वितीयस्य तदपेक्षया तृतीयस्य अभिवादनादिरूपम् ॥ ११७ ॥

(३) कुल्लूकः। लौकिकमिति। लौकिकमर्थशास्त्रादिज्ञानं वैदिकं वेदार्थज्ञानमाध्यात्मिकं ब्रह्मज्ञानं यस्मात्तु गृण्हाति तं बहुमान्यमध्ये स्थितं प्रथममभिवादयेत्। लौकिकादिज्ञानदातॄणामेव त्रयाणां समवाये यथोत्तरं मान्यत्वम् ॥ ११७ ॥

(४) राघवानन्दः। नमस्कारस्य विद्याग्रहणे पूर्वाङ्गत्वं प्रागपूर्वेनोक्तं तत्र बहुवक्तव्यत्वादिदानीं तदाह लौकिकमिति समदशभिः। लौकिकं कृषिचित्रादिविषयं स्मार्तं वा वैदिकं अग्निहोत्रादिप्रतिपादकं आध्यात्मिकमात्मानात्मविवेकविषयकज्ञानं तद्धेतुशास्त्रादि ॥ ११७ ॥

(५) नन्दनः। नियमान्तरमाह लौकिकमिति। लौकिकं अर्थशास्त्रादिविषयम्। वैदिकं कर्मविषयम्। आध्यात्मिकमात्मविषयम्। आध्यात्मिकविषयस्य ज्ञानस्य वैदिकत्वेपि पृथगुपादानं गतस्य श्रेयतरत्वप्रतिपत्त्यर्थम्। तस्यापि प्रयोजनं ज्ञानप्रदान सन्निपाते ह्याध्यात्मिकज्ञानप्रदस्य पूर्वाभिवादनीयत्वज्ञापनं पूर्वज्ञानग्रहणं। स्वयोनिगुरुभ्यः आशीर्वचनार्थो नमस्कारोभिवादनं विद्याहीनोपि वृत्तवानभिवाद्यः ॥ ११७ ॥

(६) रामचन्द्रः। यतः सकाशात् लौकिकादिज्ञानं आददीत स्वीकुर्यात् तं ज्ञानोपदेष्टारं पूर्वं अभिवादयेत् ॥ ११७ ॥

सावित्रीमात्रसारोपि वरं विप्रः सुयन्त्रितः ॥ नायन्त्रितस्त्रिवेदोऽपि सर्वाशी सर्वविक्रयी ॥ ११८ ॥

(१) मेधातिथिः। अभिवादनाद्याचारविधेः स्तुतिरियम्। सावित्रीमात्रं सारं प्रधानं यस्य स एवमुच्यते। सावित्रीमात्राध्ययनो वरं श्रेष्ठो विप्रो यदि सुयन्त्रितो भवति शास्त्रनिगृहीतात्मा ऽयन्त्रितस्त्रिवेदोपि बहुशास्त्रविदपि सर्वमश्नाति लोकाचारगर्हितं साक्षादप्रतिषिद्धमपि। एवं सर्वविक्रयी। प्रदर्शनार्थाशनविक्रयवदन्यस्यापि प्रतिषिद्धस्य। एतदुक्तं भवति। यथान्यनियमत्यागो निन्द्यते एवं प्रत्युत्थानादित्यागादपि। अथ कथं वरं विप्र इति यावता वरो विप्र इति भवितव्यम्। केचिदाहुः सामान्योपक्रमस्य विशेषस्याभिधानात्। वरमेतत् किं तद्यत्सुयन्त्रितो विप्र इति। अन्ये त्वाहुरविष्टलिङ्गो वरशब्दो नपुंसकलिङ्गोप्यस्ति ॥ ११८ ॥

(२) सर्वज्ञनारायणः। अनेन वृत्तहीन बहुतरविद्यापेक्षयापि वृत्तवदल्पविद्यास्वीकार्येति प्रसंगादाह। वेदस्यैकां शाखामधीत्य सावित्रीमात्रं सारत्वेनोपादाय तज्जपादि मात्रपरोपि सुयन्त्रितो वृत्तस्थः श्रेयान् न त्रिवेदोपि वेदत्रयाध्ययनजपादिमानपि। अयन्त्रितः सर्वाशी सर्वविक्रयीति ॥ ११८ ॥

(३) कुल्लूकः । सावित्रीति । सावित्रीमात्रवेत्ताऽपि वरंसुयन्त्रितः शास्त्रनियमितोविप्रादिर्मान्यः नायन्त्रितोवेदत्रयवेत्ताऽपि निषिद्धभोजनादिशीलः प्रतिषिद्धविक्रेता च । एतच्च प्रदर्शनमात्रं सुयन्त्रितशब्देन विधिनिषेधनिष्ठत्वस्य विवक्षितत्वात् ॥ ११८ ॥

(४) राघवानन्दः । ननुतथाविधःअवेदविच्चेत्कथंनमस्यस्तत्राह सावित्रीति । सुयन्त्रितःअसत्प्रतिग्रहनिषिद्धरसादिविक्रयपराङ्मुखःअयन्त्रितोभिन्नमर्यादःसर्वाशीसर्वअत्तुंशीलःसर्वविक्रेतुंशीलःसर्वविक्रयी त्रिवेदोवेदत्रयवेत्तापिनाभिवाद्यः प्रकरणात् ॥ ११८ ॥

(५) नन्दनः । ननुविद्यावानपिवृत्तहीनइत्यभिप्रायेणाह सावित्रीति । सुयन्त्रितःअनुल्लङ्घितशास्त्रमार्गः । विप्रः द्विजः ॥ ११८ ॥

(६) रामचन्द्रः । सुयन्त्रितःवशीकृतचित्तः विप्रःसावित्रीमात्रसारोपिवरंउत्कृष्टोभवति । न यन्त्रितःअयन्त्रितः न वशीकृतचित्तःसन्त्रिवेदोपि त्रिवेदाध्यायी तु सर्वाशी सर्वविक्रयीवरंन उत्कृष्टोभवति ॥ ११८ ॥

शय्यासनेऽध्याचरिते श्रेयसा न समाविशेत् ॥ शय्यासनस्थश्चैवैनंप्रत्युत्थायाभिवादयेत् ॥ ११९ ॥

(१) मेधातिथिः । शय्याचासनंचेति जातिरप्राणिनामिति द्वन्द्वैकवद्भावस्तस्मिन्श्रेयसा विद्याद्यधिकेन गुर्वादिना च न समाविशेन्नसहासीत । किंसर्वस्मिन्नेव नेत्याह । अध्याचरितेकल्पिते शय्यात्वेनासनत्वेनच । यत्तुशिलाफलकादिस्तत्र न दोषः । वक्ष्यति च आसीद्गुरुणासार्धमिति तस्यैवायमनुवादः । अन्येव्याचक्षत अध्याचरिते अधिष्ठितइति । न समाविशेत्तत्रोत्तरकालमपि न केवलंसहासनप्रतिषेधः सहि वक्ष्यमाणेनैव सिद्धः । विधौ च संभवति नानुवादोयुक्तः । ततत्र केचिदाचारतोभेदंव्याचक्षते । यद्गुरोरसाधारण्येन शय्यात्वेनासनत्वेन च विज्ञातंतत्र गुरुः शेते । आस्ते च तत्र शिष्यः प्रत्यक्षंपरोक्षंच नोपविशेद्यत्र तु कथंचिदेते क्रिये गुरुणा कृते तत्र गुरोरप्रत्यक्षंप्रतिषेधः । ईदृशमेवाध्याचरितमुच्यते । न स्वस्वामिसंबन्धेन यदधिष्ठानं शय्यासनस्थस्यच यदिश्रेयानागच्छति तदा ततउत्थायाभिवादनंकर्तव्यम् । यत्तु यानासनस्थइति तद्गुरुविषयमवरोहणम् । शय्यासनत्यागएव भूमिष्ठेन कर्तव्य इति तस्यार्थः इदंत्वगुरोःश्रेयसःप्रत्युत्थानमासनस्थस्यैव संभवति ॥ ११९ ॥

(२) सर्वज्ञनारायणः । शय्यासनंयद्गुर्वादिनाध्याचरितंउपभुक्तं तत्र न समाविशेत् नोपवेशनादिकुर्यादित्यर्थः । एतंश्रेयांसंप्रत्युत्थाय तत्संमुखं उत्थाय ॥ ११९ ॥

(३) कुल्लूकः । शय्येति । शय्याचासनंच शय्यासनम् । जातिरप्राणिनामिति द्वन्द्वैकवद्भावः । तस्मिञ्छ्रेयसा विद्याद्यधिकेन गुरुणा चाध्याचरिते साधारण्येन स्वीकृते च तत्कालमपि नासीत । स्वयंच शय्यासनस्थोगुरावागतउत्थायाभिवादनंकुर्यात् ॥ ११९ ॥

(४) राघवानन्दः । किंच शय्येति । श्रेयसा गुरुणाअध्याचरिते स्वीकृते वक्ष्यमाणकटादिचतुष्टयातिरिक्तेन समाविशेन्नाधितिष्ठेत्एनंगुरुंप्रत्युत्थायशय्यादेरित्यर्थः ॥ ११९ ॥

(५) नन्दनः । श्रेयसा गुर्वादिनाआचरितेपरिगृहीतेपरिगृहीतयोःशय्यासनयोरधिउपरिनसमाचरेत् नोपविशेत् नसंविशेच्च ॥ ११९ ॥

---

(११९) ऽध्याचरिते=ऽध्याचरितो (ग, घ, च,) (परंतु क, ख) चिन्हितेषु ते इति दृश्यते ॥

(६) रामचन्द्रः । अभ्याचरितेअधिष्ठिते शय्यायांआसने च श्रेयसा पुरुषेण सह न समाविशेत् नउपविशेत् स्वयंशय्यासनस्थश्चेत् प्रत्युत्थायआसनात् उत्थायएनंश्रानदंअभिवादयेत् ॥ ११९ ॥

ऊर्ध्वंप्राणाह्युत्क्रामन्ति यूनःस्थविरआयति ॥ प्रत्युत्थानाभिवादाभ्यांपुनस्तान्प्रतिपद्यते ॥ १२० ॥

(१) मेधातिथिः । पूर्वस्यार्थवादः । स्थविरे वृद्धवयस्ययत्यागच्छति यूनस्तरुणस्योर्ध्वंप्राणाः जीवितहेतवोऽन्तर्मरुत ऊर्ध्वमास्याद्बहिर्निष्क्रामन्ति अपानवृत्तिपरित्यज्य जीवविच्छेदंचिकीर्षन्ति । प्रत्युत्थाय यदभिवादनंक्रियतेतेन यथा पूर्वंजीवितस्थैर्ये कल्पते प्रतिपद्यते प्रत्युज्जीवति ॥ १२० ॥

(२) सर्वज्ञनारायणः । अप्रत्युत्थानमनायुष्यमित्यर्थः । आयत्यागच्छत्यप्रत्युत्थिते । पुनःशब्दस्तुशब्दार्थे न त्वभ्यावृत्त्यर्थे । प्रतिपद्यते प्राप्नोति । सप्राणएव भवत्यनुत्क्रमणात् ॥१२० ॥

(३) कुल्लूकः । अस्यार्थवादमाह ऊर्ध्वमिति । यस्माद्यूनोऽल्पवयसोवयोविद्यादिना स्थविरआयत्यागच्छति सति प्राणाऊर्ध्वमुत्क्रामन्ति देहाद्बहिर्निर्गन्तुमिच्छन्ति तान्वृद्धस्य प्रत्युत्थानाभिवादाभ्यांपुनःसुस्थान्करोति । तस्माद्वृद्धस्य प्रत्युत्थायाभिवादनंकुर्यात् ॥ १२० ॥

(४) राघवानन्दः । यतोहिस्थविरे गुणाधिकेआयति सतिऊर्ध्वंनिष्क्रामन्तिदेहाद्बहिर्गताश्च भवन्तिप्रत्युत्थानंसमंप्रतिगुरुंप्रत्यभिवादनंताभ्यांतानन्नुत्क्रान्तानपि प्राणान्प्रतिपद्यते । पुनरित्यन्वयः ॥ १२० ॥

(५) नन्दनः । अभिवादनविधेरर्थवादंश्लोकद्वयेनाह ऊर्ध्वमिति । यूनःबालस्यस्थविरेस्वस्माद्वयसागुणेनवाधिकेआयतिआगच्छति ॥ १२० ॥

(६) रामचन्द्रः । पुनःप्राणाःस्थविरे आयतिसतिआगच्छतिसतिऊर्ध्वंहृदयात्तुऊर्ध्वंउत्क्रामन्तिऊर्ध्वंगच्छन्तियःप्रत्युत्थानाभिवादाभ्यांउत्थानंच अभिवादनंच कृत्वा तान् हृदयस्थान् च पुनःप्रतिपद्यते स्वस्थानस्थिताःप्राणाभवन्तीत्यर्थः ॥ १२० ॥

अभिवादनशीलस्य नित्यंवृद्धोपसेविनः ॥ चत्वारि तस्य वर्धन्ते आयुर्विद्या यशोबलम् ॥ १२१ ॥

(१) मेधातिथिः । सर्वानेव प्रति पूर्वाभिभाषिता यथार्हाभिवादनशीलता न पुनरभिवादनशब्दोच्चारणमेव शीलशब्देन प्रयोजनापेक्षाभावउच्यते । नित्यंवृद्धानुपसेवते प्रियवचनादिना यथाशक्त्या ह्युपकारेण चाराधयते तस्य चत्वारिसंप्रवर्धन्ते । आयुर्धर्मोऽमुत्र स्वर्गादिफलपादपः । यशोबले च प्रागुक्ते । अर्थवादोऽप्ययंफलावगमहेतुः ॥ १२१ ॥

(२) सर्वज्ञनारायणः । नित्यंवृद्धोपसेविनोवृद्धानांसमीपे स्थित्वा माननाद्यांतत्सेवांकुर्वतः ॥ १२१ ॥

(३) कुल्लूकः । इतश्च फलमाह अभिवादनशीलस्येति । उत्थाय सर्वदावृद्धाभिवादनशीलस्यवृद्धसेविनश्चायुःप्रज्ञायशोबलानि चत्वारि सम्यक्प्रकर्षेण वर्धन्ते ॥ १२१ ॥

(४) राघवानन्दः । न केवलमेवंअपितुअभीति । प्रज्ञाबुद्धिः । विद्येति क्वचित्पाठः ॥ १२१ ॥

(५) नन्दनः । वृद्धोपसेविनःवृद्धानभिवादनेनसेवमानस्येत्यर्थः ॥ १२१ ॥

(६) रामचन्द्रः । नित्यंवृद्धोपसेविनःतस्यचत्वारिवर्धन्ते । आयुःप्रज्ञायशोबलंकीदृशस्य तस्यअभिवादनशीलस्य ॥ १२१ ॥

---

(१२१) तस्य=सम्यक् (ट, ठ, ल, म, र, व)=नित्यं (थ). विद्या=प्रज्ञा (राघवानन्द.

अभिवादात्परंविप्रोज्यायांसमभिवादयन् ॥ असौ नामाहमस्मीति स्वंनाम परिकीर्तयेत् ॥१२२॥

(१) **मेधातिथिः** । येन शब्देन परः संबोध्यते आशिषंप्रति प्रयोज्यते कुशलमश्नंवा कार्यते सोभिवादः । अस्मादभिवादादभिवादप्रतिपादकाच्छब्दात्परमव्यवहितमपूर्वंशब्दमुच्चारयेत् । असौ नामाहमस्मीत्यसाविति सर्वनाम सर्वविशेषप्रतिपादकमभिमुखीकरणार्थोयमीदृशः शब्दप्रयोगः मया त्वमभिवाद्यसआशीर्वादार्थमभिमुखीक्रियसे ततोऽध्येषणामवगम्य प्रत्यभिवादमाशीर्दानादिकर्तुमारभते । नच सामान्यवाचिना सर्वनाम्ना प्रयोज्यमानेनैतदुक्तंभवतीदंनामधेयेन मयाभिवाद्यसइत्यतोऽध्येषणामनवबुध्य कस्याशिषंप्रयुञ्जाम् ।अपि च स्वनामपरिकीर्तयेदिति श्रुतम् । तत्रासौ देवदत्तनामाहमित्युक्तेनाभिवादनंप्रतिपद्येत । असावित्येतस्य पदस्यानर्थक्यादर्शानवसायः । स्मृत्यन्तरतन्त्रेणापि व्यवहरन्ति च सूत्रकाराः । यथा पाणिनिः कर्मणिद्वितीयादिशब्दैःइहाप्यसाविति स्वंनामातिदिशतेति यज्ञसूत्रेपि परिभाषितम् । यद्येवंस्वंनामेत्यनेनैव सिद्धेऽसौनामेत्यनर्थकम् । नाम शब्दप्रयोगार्थकथंस्वंनामकीर्तयेदिदंनामाहमिति । अनेन स्वरूपेणाहमस्मीति समानार्थत्वाद्विकल्पंमन्यन्ते । अत्र श्लोकएतावदभिवादनवाक्यस्य रूपंसिद्धम् अभिवादये देवदत्तनामाहंभो । उत्तरेण श्लोकेनः भो रित्येतद्विधास्यते । ज्यायांसमिति वचनात्समहीनानामप्यभिवादनमस्ति नत्वयंप्रकारः ज्यायोविषयत्वादस्य ॥ १२२ ॥

(२) **सर्वज्ञनारायणः** अभिवादनं आशीरभिवादनं करिष्यन्तंपादोपसंग्रहतदर्थवाक्योच्चारणाभ्यां प्रयोजनत्वाभिवादादभिवादनव्यापारप्रकाशकादभिवादयइति शब्दात्परंअनन्तरंस्वंनाम कीर्तयेदमुकशर्मनामाहस्मीति । असाविति सविभक्तिकनामनिर्देशादमुकशर्मेत्यपि सविभक्तिकंकार्यम् । ज्यायांसमिति वदन्ज्यायानेवाभिवाद्यइति कथयति । इह प्रत्यभिवादनश्लोके च विप्रपदंद्विजोपलक्षणम् ॥ १२२ ॥

(३) **कुल्लूकः** । संप्रत्यभिवादनविधिमाह अभिवादात्परमिति । वृद्धमभिवादयन्विप्रादिरभिवादात्परमभिवादयइति शब्दोच्चारणानन्तरममुकनामाहमस्मीति स्वंनामपरिकीर्तयेत् । अतोनामशब्दस्यविशेषपरत्वात्स्वनामविशेषोच्चारणानन्तरमभिवादनवाक्ये नामशब्दोऽपि प्रयोज्यइति मेधातिथिगोविन्दराजयोरभिधानमप्रमाणम् । अतएव गोतमः स्वनामप्रोच्याहमभिवादयइत्यभिवदेत् । साङ्ख्यायनोऽप्यसावहंभोइत्यात्मनोनामादिशेदित्युक्तवान् । यदि च नामशब्दश्रवणात्तस्य प्रयोगस्तदाऽकारश्चास्य नाम्नोन्तइत्यभिधानात्प्रत्यभिवादनवाक्येनामशब्दोच्चारणंस्यात् । न च तत्कस्य चित्संमतम् ॥ १२२ ॥

(४) **राघवानन्दः** । अभिवादने पदनियममाह अभीति । येन शब्देन परःसंबोध्यनेआशिषंप्रतिप्रयोज्यते कुशलप्रश्नंवा कार्यते सोभिवादःएतदर्थकान्अभिवादान्अभिवादयेइत्यस्मात्परमसौ देवदत्तनामाहमस्मीति ज्यायांसंअभिवादयन्नमस्कुर्वन्ब्रूयात् । गौतमोप्याह स्वनामप्रयुक्तयाभिवादयेदिति ॥ १२२ ॥

(५) **नन्दनः** । अभिवादनप्रकारमाह अभिवादादिति । ज्यायांसमभिवादयन्विप्रोद्विजः अभिवादान्परंअभिवादयइतिशब्दादुपरिअदःशब्देनतत्तन्नामवानुपादीयते अभिवादयेदेवदत्तोनामाहमस्मीतिब्रूयादित्यर्थः ॥ १२२ ॥

(६) **रामचन्द्रः** । विप्रःज्यायांसंदृष्ट्वाअभिवादात्परंकेवलंअभिवादनात्परंऊर्ध्वंवा पूर्वंअभिवादयेत् असौ नामाहं अस्मिइति परिकीर्तयेत् ॥ १२२ ॥

नामधेयस्य ये केचिदभिवादं न जानते ॥ तान्प्राज्ञोऽहमिति ब्रूयात् स्त्रियःसर्वास्तथैव च॥१२३॥

(१) **मेधातिथिः** । वित्ताद्याधिक्येनाविदुषांपि यथाविध्यभिवाद्यतायां प्राप्तायां तंनिवृत्त्यर्थमिदम् । ये केचिदविद्वांसोनामधेयस्य संस्कृतस्योच्चारितस्याभिवादमभिवादार्थमभिवादितां एतेन वयमित्यवैयाकरणान जानते संस्कृतनाव-

बुध्यन्ते तान्प्राज्ञोनारीश्चाभिवाद्याः। एतेन संस्कृतमुच्यमानंप्रतिपद्यते। तत्र विध्येकदेशस्वनामग्रहणंहित्वाऽभिवादयेह-मित्येतावदेव ब्रूयात्तदपि चेन्नावबुध्यन्ते लौकिकेनापभ्रंशेनाप्यभिवाद्याइत्येवमर्थंप्राज्ञग्रहणम्। तदीयामबोधशक्तिंज्ञात्वो-हितव्योऽभिवादप्रयोगोनोपदेशएवादर्तव्यः। स्त्रियोप्येवमेव। सर्वग्रहणंगुरुपत्नीनांसंस्कृतप्रयोगज्ञानामपि। अन्येतु यउपना-मिकया प्रसिद्धोवनमालीवर्णइति । पितृकृतंयत्तस्यनामतन्न प्रसिद्धंयत्प्रसिद्धं न तन्नामेत्यतोऽसौस्वनामकीर्तयेत्। अन्ये-तु प्रत्यभिवादं न जानतइति वर्णयन्ति। प्रत्यभिवादे शूद्रइति नामान्तेप्लुतोविहितः। तंयेन विदुस्तेष्वहमित्येव वाच्यम्। व्याकरणप्रयोजनोपन्यासप्रसङ्गेन चैतन्महाभाष्यकारेण प्रदर्शितम्। अविद्वांसः प्रत्यभिवादे नाम्नोये न प्लुतिंविदुः। कामंते-षु तु विप्रोष्य स्त्रीष्विवायमहंवदेत्। स्मृत्यन्तरसामर्थ्यादेवायमभिवादशब्दः प्रत्यभिवादे वर्ततइत्याहुः। यदिचैतदेवंन व्याख्यायते तदा नाभिवाद्यः सविदुषेति सर्वेण सर्वमभिवादप्रतिषेधआश्रीयमाणे यमहंवदेदिति स्मृत्यन्तरविरोधः। अस्मिंस्त्वेवंव्याख्याते सप्रतिषेधः स्तुत्यालम्बनोन विधायकएतदर्थानुसारितया नीयते ॥ १२३ ॥

(२) **सर्वज्ञनारायणः**। नामधेयस्याभिवादनवाक्यार्थंसंस्कृतानभिज्ञत्वादिवधर्मशास्त्राज्ञानेन च ये न जान ते प्र-त्यभिवादनत्वाद्यत्वंवक्ष्यति। तत्र नाभिवाद्यइति पादोपसंग्रहनिषेधपरम्। मात्रादिषुत्वहमिति ब्रूयादितिविधानादभिवा-दनवाक्यरूपशब्दमात्रस्यैव तत्सजातीयस्य निवृत्तिः पादोपसंग्रहणनिवृत्तिः ॥ १२३ ॥

(३) **कुल्लूकः**। नामधेयस्येति । नामधेयस्योच्चारितस्य सतोयेकेचिदभिवाद्याः संस्कृतानभिज्ञतयाभिवादनम-भिवादार्थं न जानन्तितान्प्रत्यभिवादनेऽप्यसमर्थत्वात्प्राज्ञइत्यभिवाद्यशक्तिविज्ञोभिवादयिताऽभिवादयेहमित्येवंब्रूयात्। स्त्रियः सर्वास्तथैव ब्रूयात् ॥ १२३ ॥

(४) **राघवानन्दः**। येनमस्यास्तेयदिनामधेयस्योक्ताभिवादस्यअभिवादंअभिवादार्थंनजानतेतान्नंमस्येअह-मित्येवब्रूयान्नाधिकम् ॥ १२३ ॥

(६) **रामचन्द्रः**। तथैव सर्वाःस्त्रियःअहंइति ब्रूयुः ॥ १२३ ॥

भोःशब्दंकीर्तयेदन्ते स्वस्य नाम्नोऽभिवादने॥नाम्नांस्वरूपभावोहि भोभावऋषिभिःस्मृतः॥१२४॥

(१) **मेधातिथिः**। स्वस्य नाम्नोन्ते भोःशब्दंकीर्तयेत्। स्वग्रहणमभिवाद्यमानप्रतिषेधार्थम्। परिशिष्टोर्थवादः। न च नामाक्षराणामेवान्तेऽपितु ततः परेषामहमस्मीति । एषहि तत्रेति करणप्रयोगावधारणार्थमेवमेव प्रयोक्तव्यः। अपि च देवदत्तोभोअहमिति दुःशिष्टे प्रयोगे विलम्बितायां प्रतिपत्तौ सन्मुखीभावः चिरेण स्यात्तत्र कार्यविरोधः। व्यवहितसंब-न्धे कश्चिन्नैवावधानवान्स्यात्। स्वरूपभावः स्वरूपस्य सत्ताऽथवाभिवाद्यनाम्नांस्वरूपे भवति तत्स्थाने भवत्यतस्तन्नामनि-वृत्तिः। भावसाधनः कर्तृसाधनोवा भावशब्दः स्वरूपभावइति समम्यन्तोवा पठितव्यः। भोभावो भोइत्येतस्य यद्भवनंय-त्स्वरूपंतन्नाम्नांस्वरूपम्। यथैव नामगृहीत्वा कस्यचित्संबोधनंक्रियते देवदत्तश्रूयतामित्येवं भोः शब्दोप्यामन्त्रितविभ-क्त्यन्तः संबोधनायैवंऋषिभिः स्मर्यते ॥ १२४ ॥

(२) **सर्वज्ञनारायणः**। अभिवादनवाक्यशेषमाह भोःशब्दमिति। स्वस्य नाम्नःस्वनामवद्वाक्यस्याभिवादये असौनामाहमस्मीत्यस्यान्ते भोःशब्दोनाम्नांत्वीयानां स्वरूपभावः स्वरूपस्य संबोध्यंप्रति प्राप्तिहेतुः भोः शब्देन हि बो-धितोसावस्य नामबुध्यतइत्यर्थः। भूधातुः प्राप्त्यर्थः। भो भावइति पाठे भोःशब्दस्य भावःसत्तेत्यर्थः ॥ १२४ ॥

(३) **कुल्लूकः**। भोःशब्दमिति । अभिवादने यन्नाम प्रयुक्तंतस्यान्ते भोःशब्दंकीर्तयेदभिवाद्यसंबोधनार्थम्।

अतएवाह नाम्नामिति । भोइत्यस्य योभावः सत्ता सोऽभिवाद्यनाम्नांस्वरूपभावऋषिभिः स्मृतस्तस्मादेवमभिवादनवाक्यमभिवादये शुभशर्माहमस्मि भोः ॥ १२४ ॥

(४) **राघवानन्दः**। अभिवादने कर्तव्ये यन्नाम प्रयुक्तंतस्यान्ते भोःशब्दंकीर्तयेदित्यन्वयः। भोःशब्दप्रयोगे हेतुः नाम्नामिति। अभिवाद्यस्य नाम्नांस्वरूपभावे भोभावो भोइत्यनुशिष्टस्तेन भोइत्यवश्यंप्रयुज्यते अभिमुखीकरणाय तथा-असौ नामाहमस्मि भोः। अतएव साङ्कृत्यायनः असावहंभोः इत्यात्मनोनामादिन्नयादिति ॥ १२४ ॥

(५) **नन्दनः**। ततःकिंब्रूयात् भोःशब्दमिति। अभिवादनेअभिवादयेत्यत्रशब्देनस्थितस्येत्यर्थः। देवदत्तोनामाहमस्मीतिप्रयुक्तस्यस्वनाम्नोन्तेभोःशब्दंकीर्तयेत्। अभिवाद्यस्यनाम्नासंबोधयितुंअयुक्तत्वात् भोःशब्देनसंबोधयेत्। पूज्यंहिभोःशब्दोनामधेयवत्संबोधयतीत्युक्तंनामस्वरूपभावोहिभोभावइति। भोभावः भोशब्दसत्तानाम्नःस्वरूपभावः नाम्नःस्वरूपसत्ता। समस्तनामधेयकार्यकारणशब्दोभोःशब्दइत्यर्थः। केचिदिमंश्लोकंनामधेयस्ययेकेचिदित्यस्यश्लोकस्यानन्तरंपठन्तितल्लेखकप्रमादकृतम् * ॥ १२४ ॥

(६) **रामचन्द्रः**। अभिवादनंस्वस्य नाम्नःअन्ते भोःशब्दंकीर्तयेत्। भो भावःनाम्नांस्वरूपभावःऋषिभिःस्मृतःअमुकशर्माहमभिवादयेइत्यर्थः ॥ १२४ ॥

आयुष्मान्भव सौम्येति वाच्यो विप्रोऽभिवादने ॥ अकारश्चास्य नाम्नोऽन्ते वाच्यःपूर्वाक्षरःप्लुतः ॥ १२५॥

(१) **मेधातिथिः**। अभिवादने कृते प्रत्यभिवादः पित्राऽभिवादयिता एवंवाच्य आयुष्मान्भवसौम्येति। इति शब्दः प्रकारे। आयुष्मानेधि दीर्घायुर्भूयाश्चिरञ्जीवेत्येवमादिशब्दपरिग्रहः शिष्टाचारप्रसिद्धोभवति। अकारश्चास्य प्रत्यभिवाद्यस्ययन्नाम तदन्तेयोऽकारः सप्लुतः कर्तव्यः। प्लुतइति त्रिमात्रस्य संज्ञा। अकारग्रहणमिकारादीनामपि प्रदर्शनार्थम्। अजपेक्षमेवचान्तत्वंद्रष्टव्यम् व्यञ्जनान्तस्यापि योन्यः स्वरस्तस्य भवति। पूर्वाक्षरएव प्लुत भाविनोऽकारस्य विशेषणमेतत्। अक्षरमत्रव्यञ्जनं तत्र पूर्वस्मिन्यस्मिन्श्लिष्टः सएवमुच्यते। एतदुक्तंभवति पूर्वएवनाङ्गन्तुरकारः प्लुतःकर्तव्यः किंतर्हि यएव नाम्नि विद्यते सएव प्लावयितव्यः। सर्वचैतदेवंव्याख्यानं भगवत पाणिनेः स्पृशति। सामर्थ्येन शब्दार्थप्रयोगे च मन्वादिभ्योऽधिकतरः प्रामाण्ये भगवान्पाणिनिः। सचप्रत्यभिवादे शूद्रे टेः प्लुतिंस्मरति टिशब्देनयोन्त्योचूतदादिशब्दरूपमुच्यते। विप्रग्रहणमविवक्षितंक्षत्रियादीनामप्येषएवविधिः स्मृत्यन्तरसमाचाराम्नेवमेवस्थितो न चैषांविध्यन्तरमस्ति। अत्रोदाहरणमायुष्मान्देवदत्त व्यञ्जनान्तस्यायुष्मानेधि सोमशर्मन् ॥१२५ ॥

(२) **सर्वज्ञनारायणः**। अभिवादने कृते अभिवादयिता वाच्यइत्यर्थः। अकारइति आयुष्मान्भव सौम्येति। वाक्यान्तेस्याभिवादकस्य नामवाच्यममुकशर्मन्निति। तस्य चान्ते अकारोवाच्यः तस्य च पूर्वाक्षरः पूर्वमक्षरम्। लिङ्गव्यत्ययश्छान्दसः। सप्लुतोवाच्यः। नकारस्य व्यवहितपूर्वत्वेभिव्यञ्जनस्य प्लुतत्वायोगात्। शर्मन्नित्यत्रान्त्योकारएव पूर्वपदेनोक्तइति। तस्यैव प्लुतताएवंक्षत्रियादेः शर्मस्थाने वर्मादिपदम्। पूर्वाक्षरप्लुतइति क्वचित्पाठः। तत्र पूर्वमक्षरंप्लुतमस्येति सुस्थमेव ॥ १२५ ॥

---

* भोः शब्दमितिश्लोकोऽभिवादात्परमित्यस्यानन्तरं नन्दनमते

(३) कुल्लूकः । आयुष्मानिति अभिवादने कृते प्रत्यभिवादयित्राऽभिवादकोविप्रआयुष्मान्भव सौम्येति वाच्यः । अस्य चाभिवादकस्य यन्नाम तस्यान्ते योऽकारादिः स्वरोनाम्नामकारान्तत्वनियमाभावात्सप्लुतः कार्यः । स्वरापेक्षंचेदकारान्तत्वंव्यञ्जनान्तेऽपि नाम्नि संभवति । पूर्वंनामगतमक्षरंसंश्लिष्टंयस्य सपूर्वाक्षरस्तेननागन्तुरपकृष्य चाकारादिःस्वरः प्लुतः कार्यः । एतच्च वाक्यस्यटेः प्लुतउदात्तइत्यस्यानुवृत्तौ प्रत्यभिवादेऽशूद्रइति प्लुतंस्मरन्पाणिनिःस्फुटमुक्तवान् । व्याख्यातंच वृत्तिकृता वामनेन टेरिति किंव्यञ्जनान्तस्यैव टेःप्लुतो यथास्यादिति । तस्मादीदृशंप्रत्यभिवादनवाक्यमायुष्मान्भव सौम्य शुभशर्मन् । एवंक्षत्रियस्य बलवर्मन्एवंवैश्यस्य वसुभूते । प्लुतोराजन्यविशांवेति कात्यायनवचनात् क्षत्रियवैश्ययोःपक्षे प्लुतोन भवति । शूद्रस्य प्लुतोन कार्यःअशूद्रइतिपाणिनिवचनात् । स्त्रियामपि निषेधइति कात्यायनवचनात्स्त्रियामपि प्रत्यभिवादनवाक्ये न प्लुतः । गोविन्दराजस्तु ब्राह्मणस्य नाम्नि शर्मोपपदंनित्यंप्रागभिधाय प्रत्यभिवादनवाक्यआयुष्मन्भव सौम्य भद्रइति निरुपपदोदाहरणसोपपदोदाहरणानभिज्ञत्वमेव निजंज्ञापयति । धरणीधरोऽपि आयुष्मन्भव सौम्येति संबुद्धिविभक्त्यन्तंमनुवचनंपश्यन्नप्यसंबुद्धिप्रथमैकवचनान्तममुकशर्मेऽत्युदाहरन्विचक्षणैरुपेक्षणीयएव ॥ १२५ ॥

(४) राघवानन्दः । विप्रकर्तृकेभिवादने सोभिवादयिता विप्रआयुष्मान्भव सौम्येति वाच्यः प्रत्यभिवादनीयोऽभिवाद्येनेति वाक्यार्थः । आयुष्मानिति चिरंजीवेत्यादेरुपलक्षणम् । अकारश्चेतिअकारादिस्वरःअस्याभिवादकस्य नाम्नोन्तेअमुकशर्मन्नित्यादेरन्ते वर्तमानोयःसप्लुतःप्रत्यभिवादकेन वाच्यः । वाक्यस्य टेःप्लुत उदात्तःइत्यनुवृत्ते प्रत्यभिवादेअशूद्रइति हि सूत्रम् ।अस्यार्थः। वाक्ये वर्तमानष्टिरन्त्यस्वरःप्लुतःस्यात्त्रिमात्रःस्यादुदात्तश्च शूद्रंवर्जयित्वाइति। पूर्वाक्षरश्चनकारस्य पूर्वपूर्वमश्नुतइत्यक्षरः अक्षरंब्रह्मवर्णयोरित्यभिधानविरोधोऽन्यथाअकारादेर्देवभृत्योःपूर्वत्वाभावेपि राहोःशिरोवदुपचारातअन्तत्वंस्वरापेक्षमिति नव्यञ्जनान्तेपि स्यात्तथा च वसिष्ठः । आमन्त्रिते योन्त्यःस्वरःसप्लूयते सन्ध्यक्षरमप्रगृह्यं। अथभावंचापद्यतेपूर्वंनामगतमक्षरंसंश्लिष्टंयस्य सपूर्वाक्षरःतेनागन्तुरपकृष्यवाअकारादिस्वरःप्लुतोन कार्यइति मेधातिथिः । तथा चआयुष्मान्भव सौम्यअमुकशर्मन्निति प्रयोगः । अमुकवर्मन् अमुकभूपते भोराजन्यविशांवेति स्मरणात्क्षत्रियवैश्ययोस्तु वैकल्पिकः । तस्मादत्र विप्रइत्युपलक्षणम् । गोविन्दराजस्तु एवंप्रयुङ्क्ते । अमुकशर्मन्नायुष्मान्भवइति । धरणीधरस्त्वायुष्मान्भव सौम्यामुकशर्मेति । तत्सर्वमनुक्तायुष्मान् भव सौम्येति वाच्योविप्रइत्यानुपूर्व्याविरुद्धम्॥१२५ ॥

(५) नन्दनः । आयुष्मानितिअभिवादनेकृतेसति विप्रोद्विजः वाच्यः ज्यायसा कनीयान् । अस्यकनीयसोनाम्नोन्तेपूर्वाक्षरः प्लुतः अत्राक्षरशब्देनस्वरोविवक्षितः व्यञ्जनस्यप्लुतासंभवात् । यस्मादकारात्पूर्वमक्षरंप्लुतंभवति सपूर्वाक्षरः प्लुतः अकारश्चवाच्यः आयुष्मान्भव सौम्यदेवदत्ताइइतिवाच्यः इतियावत् ॥ १२५ ॥

(६) रामचन्द्रः। अस्य नाम्नःअन्तेअकारःपूर्वाक्षरःप्लुतःवाच्यः । तद्यथा अमुकशर्माहं अमुकनामाहमित्यर्थः १२५

योनवेत्त्यभिवादस्य विप्रःप्रत्यभिवादनम् ॥ नाभिवाद्यःसविदुषा यथा शूद्रस्तथैव सः ॥ १२६ ॥

(१) मेधातिथिः । योन वेत्ति प्रत्यभिवादनमित्येव वाच्यमभिवादस्येत्यतिरिच्यते न संगच्छते नैवमभिवादस्यानुरूपंप्रत्यभिवादनमित्येवंयोजना क्रियते । येन सनामोच्चार्याभिवादनंकृतंतस्य नामान्ते प्लुतिः कर्तव्यायस्त्वहंभोइत्येवमभिवदेन्न तस्य नाम्नोच्चारणंनापि प्लुतिरिति नाभिवाद्यइत्यभिवादनशब्दोच्चारणप्रतिषेधः । यथा विहितमभिवादनंकर्तव्यम् न पुनरहंभोइत्यादि तस्यप्राग्दर्शितत्वात् । यथा शूद्रइति च दृष्टान्तेनैतदेवज्ञायते शूद्रस्यापि वृद्धवयसोभिवाद्यत्वंपूर्वाभिभाष्यत्वमिष्यते । विदुषेति पादपूरणार्थम् ॥ १२६ ॥

(२) **सर्वज्ञनारायणः** । अभिवादनस्य कृतस्य यत्प्रत्यभिवादनंअभिवादनप्रतियोगिवाक्यम् ॥ १२६ ॥

(३) **कुल्लूकः** । योनवेत्तीति । योविप्रोऽभिवादनस्यानुरूपंप्रत्यभिवादनंन जानात्यसावभिवादनविदुषाऽपि स्वनामोच्चारणाद्युक्तविधिना शूद्रइव नाभिवाद्यः । अभिवादयेहमिति शब्दोच्चारणमात्रंतु चरणग्रहणादिशून्यमनिषिद्धंप्रागुक्तत्वात् ॥ १२६ ॥

(४) **राघवानन्दः** । प्रत्यभिवादनाज्ञाने कथमित्यत्राह । यइति । नाभिवाद्यइति यथाशास्त्रंन नमस्यःतत्र हेतुः यथाशूद्रइति । गायत्रीमात्रसारइत्यनेन तादृशांतदज्ञानामपि नमस्यतोक्तेःनिन्दार्थवादमात्रंवा ॥ १२६ ॥

(५) **नन्दनः** । योनवेत्तीति विप्रः द्विजः अभिवादस्यअभिवादवाक्यस्य प्रत्यभिवादनवाक्यं यथाशूद्रइति । निन्दापरमेतत्ननतत्त्वकथनं निषेधशेषत्वावगमात्प्रबहुप्रमाणान्तरविरोधाच्चेति । प्रत्यभिवादनमजानन्प्रतिकिंकर्तव्यमित्यपेक्षायामाह नामधेयस्येति । नामधेयस्यअभिवादनवाक्यस्य अभिवादनं प्रत्यभिवादनवाक्यंअहमितिब्रूयात् नत्वनामेति ॥ १२६ ॥

ब्राह्मणंकुशलंपृच्छेत्क्षत्रबन्धुमनामयम् ॥ वैश्यंक्षेमंसमागम्य शूद्रमारोग्यमेव च ॥ १२७ ॥

(१) **मेधातिथिः** । कृताभिवादनप्रत्यभिवादनयोः सौहार्दे प्रष्टि जिज्ञासाप्रश्ने जातिभेदाश्रयः शब्दनियमोऽयमिष्यते । प्रष्टव्यानांजातिनियमोऽयंन प्रष्टृणाम् । नात्यन्तभिन्नार्थत्वाच्च एतेषांस्वरूपनियमोऽयंविधीयते । आरोग्यानामयशब्दौ समानार्थावेवंक्षेमकुशलशब्दावपि नात्यन्तभिन्नौ । कुशलशब्दोयद्यपि प्रावीण्यवचनस्तथापीहसंयोगिनामर्थानांशरीराणांचानपाये वर्तते । एतेऽवश्यंप्रयोक्तव्या अन्येषामपि यथाप्रतिभंविशेषे जिज्ञासयाऽप्रतिषेधः । तथा महाभारते कस्मिंश्चिदध्यायेदर्शितम् । केचिदिहसमागम्येति लिङ्गान्न गुर्वादिविषयोयंप्रश्नः किंतर्हि सवयसामेव । अभिगमनंहि गुरौ विहितंन यदृच्छया समागमः । अभिगमनेऽपि समागमोस्तीति यत्किंचिदेतत् ॥ १२७ ॥

(२) **सर्वज्ञनारायणः** । अथयोनाभिवाद्यस्त्रिवर्षपूर्वत्वादिगुणरहितः । तत्र दृष्टे यत्कार्यं तदाह ब्राह्मणमिति । ब्राह्मणादीनांस्वस्वजातीये दृष्टे स्वस्व जात्युक्तं तथा स्वस्वावरजातीये तत्तज्जात्युक्तं न चेतदवरजातेरुत्तमंप्रति कुशलंपृच्छेत् । कुशलंकिं भवतीमुकस्येति पृच्छेदित्यर्थः । एवंसर्वत्र केचित्प्रत्यभिवादनाभिधानानन्तरमभिवादनेनैतत्प्रष्टव्यमित्याहुः १२७

(३) **कुल्लूकः** । ब्राह्मणमिति । समागम्य समागमे कृतेऽभिवादकमवरवयस्कंसमानवयस्कमनभिवादकमपि ब्राह्मणंकुशलंक्षत्रियमनामयंवैश्यंक्षेमंशूद्रमारोग्यंपृच्छेत् । अतएवापस्तम्बः कुशलमवरवयसंसमानवयसंवाविप्रंपृच्छेदनामयंक्षत्रियंक्षेमंवैश्यमारोग्यंशूद्रम् । अवरवयसमभिवादकंवयस्यमनभिवादकमपीति मन्वर्थमेवापस्तम्बःस्फुटयतिस्म । गोविन्दराजस्तु प्रकरणात्प्रत्यभिवादकस्यैव कुशलादिप्रश्नमाह तन्नाभिवादकेन सह समागमस्यानुप्राप्तत्वात् समागम्येतिनिष्प्रयोजनानुवादप्रसङ्गात् । अतः कुशलक्षेमशब्दयोरनामयारोग्यपदयोश्च समानार्थत्वाच्छब्दविशेषोच्चारणमेव विवक्षितम् ॥ १२७ ॥

(४) **राघवानन्दः** । तत्रैव प्रासङ्गिकंप्रश्नप्रकारमाह ब्राह्मणमिति । ब्राह्मणादिदर्शनादौ किंचिद्वक्तव्यमिति प्राप्तंतत्रनियमादृष्टार्थशब्दविशेषोच्चारणमर्थपौनरुक्त्येपि ॥ १२७ ॥

(५) **नन्दनः** । अथसमानैरवरैश्चसमागमेवक्तव्यमित्याह ब्राह्मणमिति । समागम्येति ब्राह्मणादिभिः प्रत्येकंसंबध्यते । कुशलंस्वाध्यायादौक्षेमंक्षत्रबन्धुंक्षत्रियमितियावत् । अनामयंशरीरकुटुम्बराष्ट्रेषुसुखं क्षेमंकृष्यादिष्वनाशंआरोग्यंशुश्रूषायांशरीरपाटवम् ॥ १२७ ॥

अवाच्योदीक्षितोनाम्ना यवीयानपि योभवेत्॥भो भवत्पूर्वकंत्वेन मभिभाषेत धर्मवित्॥ १२८॥

(१) **मेधातिथिः**। प्रत्यभिवादनकालअन्यत्र च दीक्षितोज्योतिष्टोमादिषु दीक्षणीयातः प्रभृत्याऽऽवभृथान्नाम्ना न वाच्यस्तस्य यन्नामधेयंतन्नोच्चारयितव्यम्। यवीयान्कनीयानचिरकालजातः। अपिशब्दात्ज्येष्ठस्यादीक्षितस्यापि नामग्रहणनिषेधोऽनुमीयते। तथाच गौतमः नाम गोत्रे गुरोः समानतोनिर्दिशेत्। मानःपूजातत्पूर्वकनाम ग्रहीतव्यंतत्रेश्वरोजनार्दनमिश्रइति। कथंतर्हि दीक्षितेनकार्यार्थंसंभाषः कर्तव्यः भो भवत्पूर्वकंभोः शब्दंपूर्वंप्रयुज्यैनंदीक्षितमभिभाषेत दीक्षितयजमानादिशब्दैर्यौगिकैः। नतु भोः शब्दपूर्वकंनामग्रहणमभ्यनुज्ञायते। भोभवच्छब्दःपूर्वोयस्याभिभाषणस्य तदेवमुक्ते द्वयोश्चैतयोः शब्दयोरेकत्र वाक्ये प्रयोगाभावाद्यवस्थांव्याचक्षते। यदा तेन सह संभाषणंभवति तदाऽऽमन्त्रितविभक्त्यन्तेन भोः शब्देन संबोध्यः। यदा तु तदीयगुणाख्यानंपरोक्षंकरोति तत्रभवता दीक्षितेनैवंकृतं तत्रभवानेवंकरोतीत्येवंप्रयोक्तव्यम्। भवदिति च प्रातिपदिकमात्रमुपात्तंयथा विभक्त्यासंबन्धमुपैतितदन्तंप्रयोक्तव्यम्॥ १२८॥

(२) **सर्वज्ञनारायणः**। कुशलप्रश्नादावपि यावद्दीक्षासमाप्तिस्तावन्नाम दीक्षितस्य न ग्राह्यम्। दीक्षितेत्येव संबोधनम्। तस्य तत्रापि भोःशब्दभवच्छब्दान्यतरपूर्वकमभिभाषेत संबोधयेत्॥ १२८॥

(३) **कुल्लूकः**। अवाच्यइति। प्रत्यभिवादनकालेऽन्यदा च दीक्षणीयातःप्रभृत्यावभृथस्नानात्कनिष्ठोऽपि दीक्षितोनाम्ना न वाच्यः। किंतु भोभवच्छब्दपूर्वकंदीक्षितादिशब्दैरुत्कर्षाभिधायिभिरेव धार्मिकोऽभिभाषेत। भोदीक्षितइदंकुरु भवता यजमानेनइदंक्रियतामिति॥ १२८॥

(४) **राघवानन्दः**। दीक्षितादिषु विशेषमाह। दीक्षितःसोमयागादिषुअभिवादनादिके कार्ये निजनाम्नाऽवाच्यः किन्तुभोःदीक्षित किंकरोति भवान्कुत्र गच्छतीत्यादि॥ १२८॥

(५) **नन्दनः**। दीक्षितः सोमयाजी। भोःशब्दोभवच्छब्दश्चयस्याभिभाषणस्यपूर्वौ तत्भोभवत्पूर्वकम्। सन्निधौ भोःशब्दः यथाभोयजमानेति। असन्निधौभवच्छब्दः यथातत्रभवान्यजमानइति॥ १२८॥

(६) **रामचन्द्रः**। यःयवीयानपि दीक्षितःनाम्नाअवाच्योभवेत् भोअमुकशर्मन्इति भवत्पूर्वकंएतंदीक्षितं धर्मवित् अभिभाषेत॥ १२८॥

परपत्नी तु या स्त्री स्यादसंबन्धा च योनितः॥ तांब्रूयाद्भवती त्येवंसुभगे भगिनीति च॥ १२९॥

(१) **मेधातिथिः**। अर्थप्रयुक्तंसंभाषणंस्त्रियासह यदा भवति तदैवंकर्तव्यम्। यातावत्परस्य पत्नीसाभवति सुभगे अथवा भवति भगिनि। भवच्छब्दोयंस्त्रीप्रत्ययान्तः संबुद्धौ कृतह्रस्वः। भवतीत्यत्रेतिकरणंपदार्थविपर्यासकृत्स्वरूपंपरं बोधयति सुभगे भगिनीत्यत्र प्रकारे। ब्रूयादित्यधिकाराच्छब्दस्वरूपग्रहणंसिद्धम्। आकार्यतायांचमातर्यशस्विनि कनीयसी-चदुहितरायुष्मतीत्येवमादिभिः शब्दैः संभाष्या। पत्नीग्रहणात्कन्यायानैषविधिः। असंबद्धाचयोनितः मातृपक्षपितृपक्षाभ्यां। यां ज्ञातित्वंनागता मातुलदुहित्रादिस्तासामन्यंविधिंवक्ष्यति ज्ञातिसंबन्धियोषितइति। ननु च नैवैतत्सिद्धमस्योत्सर्गस्यान्यत्र चरितार्थत्वात्किमसंबद्धाचेत्यनेन। नात्र पौनरुक्त्योद्भावने यतितव्यंपद्यग्रन्थोऽयम्॥१२९॥

(२) **सर्वज्ञनारायणः**। असंबद्धयोनितः स्वोत्पत्तिस्थानेन मात्रापित्रा च समंब्रूयात्। अभिवादाय तु भगिनी

---

(१२९) भगिनीतिच (ग, ढ, ञ)
——वा (क, ख, घ, च, ज, झ,)

त्यादिभिर्नामभिः। स्वपत्नीव्यवच्छेदस्य गार्हस्थ्यएव संभवादत्र प्रकरणे तद्व्यवच्छेदंकुर्वन् गुर्वभिवन्दनादिविधयः स्नातकादिषु संभविनस्तै रनुष्ठेयाइति ज्ञापयति ॥ १२९ ॥

(३) कुल्लूकः। परपत्नीत्विति। या स्त्री परपत्नीभवति असंबन्धा च योनितइति स्वस्रादिर्नभवतिता मनुपयुक्तसंभाषणकाले भवति सुभगे भगिनीति वा वदेत्। परपत्नीग्रहणात्कन्यायांनैषविधिः । स्वसुःकन्यादेस्त्वायुष्मत्यादिपदैरभिभाषणम् ॥ १२९ ॥

(४) राघवानन्दः। अर्थप्रयुक्तपरस्त्रिया सह संभाषणमाह परेति। योनितोअसंबद्धाउभयलक्षणसंबन्धहीनाः सुभगेइत्यादि ब्रूयादित्यन्वयः। स्त्रीति वक्तव्ये परपत्नीया स्त्रीति स्वस्त्रीव्यतिरेकनिश्चयार्थम् ॥ १२९ ॥

(५) नन्दनः। योनितोसम्बन्धामाता पितृसबन्धरहिता। व्यवस्थितविषयोयंविकल्पः। तांज्यायसींभवतीतिसमानां सुभगेइतियवीयसींभगिनीतिब्रूयात् ॥ १२९ ॥

(६) रामचन्द्रः। या स्त्री परपत्नी स्यात्। तु पुनः। योनितःअसम्बन्धातांयस्याः संबन्धोनास्ति तांस्त्रियंभवति सुभगेइत्येवंवा भगिनीइति वा ब्रूयात् ॥ १२९ ॥

मातुलांश्च पितृव्यांश्च श्वशुरानृत्विजोगुरुन् ॥ असावहमिति ब्रूयात्प्रत्युत्थाय यवीयसः ॥१२०॥

(१) मेधातिथिः। गुरूनिति वचननिर्देशान्नयएवात्र गुरुरुक्तः सएव गृह्यते किंतर्हि गौतमीयइव सामान्यशब्दोवित्तादिज्येष्ठवचनः। तान्यवीयसोभागिनेयादेःस्ववयोपेक्षया हीनवयसः । असावहमिति स्वंनामनिर्दिश्यते। तत्परश्चाहंशब्दोऽभ्य नुज्ञायते। एतच्च प्रत्युत्थायागतानांकर्तव्यम्। अभिवादने भोःशब्दप्रयोगो निषिध्यते। उक्तंच गौतमीये प्रत्युथानमभिवाद्यइति ॥ १२० ॥

(२) सर्वज्ञनारायणः। गुरूनुपाध्यायान्। असावहमित्यत्रासौपदस्थाने स्वनाम प्रत्युत्थाय कीर्तयेत्। यवीयसस्तत्तद्वयःसमुचिताभिवादनेन ॥ १२० ॥

(३) कुल्लूकः। मातुलांश्चेति। मातुलादीनागतान्कनिष्ठानासनादुत्थायासावहमितिवदेन्नाभिवादयेत् । असाविति स्वनामनिर्देशः । भूयिष्ठाःखलु गुरवइत्युपक्रम्य ज्ञानवृद्धतपोवृद्धयोरपि हारीतेन गुरुत्वकीर्तनात्तयोश्च कनिष्ठयोरपि संभवात्तद्विषयोऽयंगुरुशब्दः ॥ १२० ॥

(४) राघवानन्दः। गुरूनिति ज्ञानवृद्धतपोवृद्धयोरुपलक्षणंयविष्ठाःखलु गुरवइत्यादिहारीतवचनात्। असावहमिति स्वनामनिर्देशःयवीयसोपि कनिष्ठान्मातुलादीनित्यर्थः ॥ १२० ॥

(५) नन्दनः। श्वशुरानृत्विजइत्यनेनास्यप्रकरणस्यसर्वाश्रमसाधारणत्वंसूचितम्। गुरून्आचार्यादीन् । असावहमितिब्रूयात्देवदत्तोहमितिब्रूयात् नाभिवादयेत् ॥ १२० ॥

(६) रामचन्द्रः। यवीयसः कनिष्ठःमातुलादीन्प्रत्युत्थायअसौअहंनमस्करोमिइति ब्रूयात् ॥ १२० ॥

मातृष्वसा मातुलानी श्वश्रूरथ पितृष्वसा ॥ संपूज्या गुरुपत्नीवत्समास्ता गुरुभार्यया ॥ १२१ ॥

(१) मेधातिथिः। एताश्च गुरुपत्नीवत्संपूज्याः प्रत्युत्थानाभिवादनासनदानादिभिः। गुरुपत्नीवदित्यनेनैव सिद्धेसमास्ताइति वचनमन्यदभ्याञ्जनादिगुरुपत्नीकार्यंकदाचिदनुजानाति। इतरथा प्रकरणात्संपूज्याइत्यभिवादनविषयमेव स्यात्। पलितवयसश्चस्त्रियः स्पर्यन्ते। कनीयसीनामप्येषएवाभिवादनविधिः ॥ १२१ ॥

(२) **सर्वज्ञनारायणः** । समास्ताइति । तदाक्रोशादिना गुरुभार्याक्रोशादिदोषार्थम् ॥ १३१ ॥

(३) **कुल्लूकः** । मातृष्वसेति । मातृष्वस्रादयोगुरुपत्नीवत्प्रत्युत्थानाभिवादनासनदानादिभिःसंपूज्याः । अभिवादनप्रकरणादभिवादनमेव संपूजनंविज्ञायतइति । समास्ताइत्यवोचत् गुरुभार्यासमानत्वात्प्रत्युत्थानादिकमपि कार्यमित्यर्थः ॥ १३१ ॥

(४) **राघवानन्दः** । संपूज्याःप्रत्युत्थानादिभिःगुरुपत्नीति । गुरुरत्र ब्रह्मदस्तस्य पत्नी तत्र हेतुःसमास्ताइति ॥ १३१ ॥

(५) **नन्दनः** । भ्रातृभार्येतिभ्रातृभार्यासोदरज्येष्ठभ्रातृभार्याउपसंग्राह्या पादौस्पृष्ट्वा नमस्कार्य्या । विप्रोष्यप्रोषितागमनेसतीत्यर्थः । ज्ञातिसम्बन्धयोषितइत्यत्रापिसवर्णशब्दोनुषज्यते ॥ १३१ ॥

(६) **रामचन्द्रः** । गुरुभार्यया सह गुरूणांज्येष्ठानांभार्या गुरुभार्या तया गुरुभार्यया सह । एताःसमास्तामातृष्वस्राद्या नमस्करणीयाभवन्ति गुरुपत्नीवत् विशेषेण संपूज्या भवन्ति ॥ १३१ ॥

भ्रातुर्भार्योपसंग्राह्या सवर्णाहन्यहन्यपि ॥ विप्रोष्यतूपसंग्राह्या ज्ञातिसबन्धियोषितः ॥ १३२ ॥

(१) **मेधातिथिः** । भ्रातुर्ज्येष्ठस्येति द्रष्टव्यम् । उपसंग्राह्या पादयोरभिवाद्या । सवर्णा समानजातीया । क्षत्रियादिस्त्रीणांतु ज्ञातिसंबन्धिधर्मो भ्रातुर्भार्याणामपि । विप्रोष्यज्ञातिसंबन्धियोषितः । विप्रोष्य प्रवासात्प्रत्यागतेन । नहि प्रोषितस्योपसंग्रहणसंभवः । ज्ञातयः पितृपक्षाः पितृव्यादयःसंबन्धिनोमातृपक्षाः श्वशुरादयश्च तेषां ज्येष्ठानांयाः स्त्रियः पूजारूपत्वादुपसंग्रहणस्य । न कनीयांसः पूजामर्हन्ति ॥ १३२ ॥

(२) **सर्वज्ञनारायणः** । भ्रातुर्भार्या ज्येष्ठाउपसंग्राह्याअभिवाद्या । विप्रोष्य प्रवासंकृत्वा । ज्ञातिस्त्रियः सपिण्डस्त्रियः संबन्धिस्त्रियः । एतास्वपिज्येष्ठास्वेवैतत् ॥ १३२ ॥

(३) **कुल्लूकः** । भ्रातुर्भार्येति । भ्रातुःसजातीया भार्या ज्येष्ठा पूजाप्रकरणादुपसंग्राह्या पादयोरभिवाद्या । अहन्यहनि प्रत्यहमेव । अपिरेवार्थे । ज्ञातयःपितृपक्षाःपितृव्यादयः सबन्धिनोमातृपक्षाःश्वशुरादयश्च तेषांपत्न्यः पुनर्विप्रोष्य प्रवासात् प्रत्यागतेनैवाभिवाद्याः न तु प्रत्यहंनियमः ॥ १३२ ॥

(४) **राघवानन्दः** । स्ववर्णाःस्वस्वजातयःविप्रोष्य प्रवासंकृत्वोपसंग्राह्याः । पादयोरिति शेषः । ज्ञातिसंबन्धीति ज्ञातीनांस्वगोत्रजानांसंबन्धिनांमातुलानांच ज्येष्ठानांयोषितः ॥ १३२ ॥

(६) **रामचन्द्रः** । भ्रातुर्भार्याःसवर्णाअहनिअहनिनित्यं उपसङ्ग्राह्याः । तथा ज्ञातिसम्बन्धिन्योयोषितः विप्रोष्य प्रवासादागत्यउपसङ्ग्राह्याः ॥ १३२ ॥

पितुर्भगिन्यांमातुश्च ज्यायस्यांच स्वसर्यपि ॥ मातृवद्वृत्तिमातिष्ठेन्माता ताभ्योगरीयसी ॥ १३३ ॥

(१) **मेधातिथिः** । पितुश्च या भगिनी मातुश्च या भगिनी तस्यां स्वसरि चात्मीयायां ज्येष्ठायांभगिन्यां मातृवद्वृत्तिरतिदिश्यते । ननु च मातृष्वसुः पितृष्वसुश्चायमुक्तएव धर्मोमातृष्वसा मातुलानीत्यत्र । अथोच्यते तत्रगुरुपत्नीवदित्युक्तं इह तु मातृवद्वृत्तिरित्युच्यतइति नैषभेदः तुल्याहि गुरुपत्न्यां मातरि च वृत्तिः । केचिदाहुः माताताभ्योगरीयसीत्येतद्वक्तुमनूद्यते भगिन्योः पितुर्मातुश्च गरीयस्त्वम् । यदा माताज्ञांददाति श्वश्र्वादयश्च तदा मातुराज्ञाक्रियते नतासाम् । न चैतद्वाच्यमेतदपि सिद्धंमातागौरवेणातिरिच्यतइत्यर्थवादत्वात्तस्य । अन्येतु गुरुपत्न्यामातुश्च वृत्तिभेदमन्यन्ते । गुरुपत्न्याः पूजाज्ञाद्याव-

ध्यकम् । मातुस्तु शैशवात्वात्सल्येनान्यथात्वमपि । लालनात्तत्रोभयापदेशान्मातृष्वसुः पितृष्वसुश्च व्यवस्था । शैशवेलालनं-तुल्यमेव स्वस्यांस्वसरि । अतीतशैशवस्य तु गुरुपत्नीवत्संपूज्यत्वमिति । नचानेनैवैतत्सिध्यति असति हि वाक्यद्वये मातृव-द्वृत्तिरित्येतावता प्राकरणिकीअभिवादननिवृत्तिरेव विज्ञायेत ॥ १३३ ॥

(२) सर्वज्ञनारायणः । स्वसरिस्वस्यांमातृवद्वृत्तिर्वर्तनं मातरि यथावृत्तंवर्तनमन्नदानादिना पोषणं आतिष्ठेत् अनुतिष्ठेत् । अत्रपितृमातृस्वसृसाहचर्यात् स्वज्येष्ठश्वशुराभिवादनमपि सिद्धम् । माताताभ्यइति तेन तासामुपकारे क्रियमाणे यदि मातुरनिष्टंस्यात् तदा न कार्यमित्युक्तंभवति ॥ १३३ ॥

(३) कुल्लूकः । पितुर्भगिन्यामिति । पितुर्मातुश्च भगिन्यांज्येष्ठायांचात्मनोभगिन्यांमातृवद्वृत्तिमातिष्ठेत् । माता पुनस्ताभ्योगुरुतमा । ननु मातृष्वसा मातुलानीत्यनेनैव गुरुपत्नीवत्पूज्यत्वमुक्तं किमधिकमनेन बोध्यते । उच्यते इदमेव माता ताभ्योगरीयसीति । तेन पितृष्वस्रानुज्ञायांदत्तायांमात्रा च विरोधे मातुराज्ञाअनुष्ठेयेति । अथवा पूर्वंपितृष्वस्रादे-र्मातृवत्पूज्यत्वमुक्तम् । अनेनतु स्नेहादिवृत्तिरप्यतिदिश्यतइत्यपुनरुक्तिः ॥ १३३ ॥

(४) राघवानन्दः । ज्यायस्यांज्येष्ठायांस्वसरिभगिन्यांएतासांसमवाये तासांकनीयस्यपिमातैव पूर्वंनमस्ये-त्याहमातेत्यादि ॥ १३३ ॥

(५) नन्दनः । पितुश्चमातुश्च । ज्यायस्यांभगिन्यामात्मनोज्यायस्यांस्वसर्यपिचमातृवत्वृत्तिंपादोपसंग्रहणादिकां-आतिष्ठेत् कुर्यात् । आज्ञाकरणादौमाताताभ्योगरीयसी । मातृष्वसामातुलानीत्यादिश्लोकेमातृष्वसृपितृष्वस्रोरुपादानंकनी-योविषयमितिविवेक्तव्यम् ॥ १३३ ॥

(६) रामचन्द्रः । पितुर्भगिन्यां मातुश्च भगिन्यां ज्यायस्यांजेष्ठायांस्वसर्यपि भगिन्यामपि ॥ १३३ ॥

दशाब्दाख्यंपौरसख्यंपञ्चाब्दाख्यंकलाभृताम् ॥ त्र्याब्दपूर्वंश्रोत्रियाणांस्वल्पेनापि स्वयोनिषु ॥ १३४ ॥

(१) मेधातिथिः । अथ पुनः स्नेहवृत्तिरतिदिश्यते उक्तंपूर्वंप्राणाह्युत्क्रामन्ति यूनः स्थविरआयतीति तत्र कियद्भिर्वर्षैः स्थाविर्यंभवति । लोके हि शिरः पालित्ये स्थविरव्यवहारस्तन्निरूपणार्थमिदम् । दशभिर्वर्षैर्जन्मनोऽधिकैरपि पौराणांसख्यमाख्यायते । तेन दशवर्षाधिकोज्येष्ठोभवत्यपि तु मित्रवद्व्यवहर्तव्योयथोक्तंभो भवन्निति वयस्येति । दशभ्यो-वर्षेभ्यऊर्ध्वंज्येष्ठः । आख्यानमाख्यादशाब्दाआख्यायस्य सख्यस्यत्रिपदोबहुव्रीहिः । आख्यानिमित्तत्वाद्वर्षाणांसामाना-धिकरण्यंनैमित्तनिमित्तिनोर्भेदस्याविवक्षितत्वात् । एतावांश्च समासान्तभूतोर्थोयः पूर्वजोदशवर्षाणांयावत्ससखैव भवति । पुरे भवाः पौराःतेषाम् । पुरग्रहणंप्रदर्शनार्थम् । ग्रामवासिनामपि एषएव न्यायः । ये केचिदेकस्मिन्ग्रामे सन्तितान्यः कश्चित्परस्परप्रत्यासत्तिहेतुर्विद्यते ते सखायः । ये तु कलांकांचन बिभ्रति शिल्पगीतवाद्यादिकांतेषांपञ्चवर्षाणि योधिकः ससखा ततऊर्ध्वंज्येष्ठः । त्रयोऽब्दाः पूर्वे यस्य तच्छ्रोत्रियाणांसख्यम् । अल्पेनापि कालेन स्वयोनिष्वेकवंश्येषु कति-चिदहानि योधिकः सज्येष्ठः । कियान्पुनः स्वल्पकालःन तावदब्दःत्र्यब्दपूर्वमिति निर्दिश्याल्पेनेत्युच्यमानस्ततोन्युन; प्र-तीयते । एकवचननिर्देशाच्च न वर्षद्वयंनाप्येकोब्दः स्वल्पेनेति विशेषणानुपपत्तेः । परिच्छिन्नपरिमाणोह्यब्दवाच्योर्थस्त-स्याहोरात्रमात्रेण न्यूनस्य नाब्दत्वमस्ति । तस्मादल्पेनेति कालसामान्यमपेक्षते । संवत्सरादवरश्च तस्य विशेषः । अ-पिशब्दश्चैवशब्दस्यार्थे द्रष्टव्यः । अल्पेनैव कालेन सख्यंबहुना तुज्येष्ठत्वमेव । एतच्च समानगुणानांसमानजातीयानांच

द्रष्टव्यम् । एतेन लौकिकंस्थविरलक्षणंनिवर्तितसापेक्षिकमाश्रितम् । अन्येतुव्याचक्षते नानेन स्थविरत्वंलक्ष्यते किंतर्हि सखित्वमेव यथा श्रुतार्थत्यागेन स्थनिरलक्षणंस्यात् इयता कालेन सखापरतस्तुज्येष्ठइति अयंचश्लोकार्थः एकत्र पुरे- वसन्तिदशवर्षाणि यावत्तानिमित्राणि कलाश्चतुःषष्टिस्तद्विदांसंगत्या पञ्चभिर्वर्षैः स्वयोनिषु स्वल्पेनापि च कालेन सह वसतांमित्रत्वमेव अतश्च न सर्वोवयसा तुल्योवयस्यःकिंतर्हि एतदेव समानवयस्त्वेवैलक्षणम् । युक्तमेतत्किंतूत्तरश्लोको विरुध्यते । तत्रहि जातेः प्राधान्यंनवयसः । यदि चात्रेयता कालेन ज्यैष्ठ्यमुक्तंभवति तदा विजातीयानामप्याशङ्क्य- मानंननिवर्त्यतइति युक्तम् । पूर्वे च व्याख्यातारआद्यमेव व्याख्यानंमन्यन्ते ॥ १३४ ॥

(२) **सर्वज्ञनारायणः** । दशाब्दपर्यन्तमाख्यायते कथ्यते पौराणांसख्यं पौराणांपुरवासिनां अन्योन्यं दशाब्दादू- र्ध्वमेव ज्येष्ठापत्यतायामभिवादनमित्यर्थः । पञ्चाब्दपर्यन्तं कलाभृतां कलागीतादिकारिणां चारणानाम् । त्र्यब्दपूर्वमित्यत्र त्रिवर्षपूर्वः श्रोत्रियोभिवादनमर्हतीति स्मृत्यन्तरात् । अभिवादनंव्यवहितमप्यन्वीयते । त्रिभ्योब्देभ्यःपूर्वमेव जातस्याभि- वाद्यत्वमित्यर्थः । त्र्यब्दपूर्वस्त्र्यब्दपूर्वकालोत्पन्नतया ज्येष्ठस्तद्विषयत्वादभिधानमपि त्र्यब्दपूर्वम् । एवंस्वयोनिषु स्वसमान- योनिषु ज्ञातिबन्धुष्वल्पेनापि कालेन दिनैकपूर्वकत्वेनापि ज्येष्ठतायामभिवादनमित्यर्थः । तदुक्तम् वयस्यः समानेहनि जातइति ॥ १३४ ॥

(३) **कुल्लूकः** । दशाब्दाख्यमिति । दशअब्दाआख्यायस्य तद्दशाब्दाख्यंपौरसख्यम् । अयमर्थः एकपुरवासि- नांवक्ष्यमाणविद्यादिगुणरहितानामेकस्य दशभिरब्दैर्ज्येष्ठत्वे सत्यपि सख्यमाख्यायते । पुरग्रहणंप्रदर्शनार्थम् । तेनैकग्रामा- दिनिवासिनामपिस्यात् । गीतादिकलाभिज्ञानांपञ्चवर्षपर्यन्तंसख्यम् । श्रोत्रियाणांत्र्यब्दपर्यन्तम् । सपिण्डेष्वत्यन्तात्पेनैव कालेन सह सख्यम् । अपिरेवार्थे । सर्वत्रोक्तकालादूर्ध्वंज्येष्ठव्यवहारः ॥ १३४ ॥

(४) **राघवानन्दः** । नमस्कारप्रसङ्गेन मान्यत्वे कारणमाह । दशाब्दाख्यमिति चतुर्भिः । एकपुरवासिनांविद्यागुण- हीनत्वेपि दशाब्दाख्यंवयसा स्थित्या वा दशवर्षाधिक्यंअभ्युत्थानाख्यमान्यत्वे कारणम् । पुरग्रहणंग्रामाद्युपलक्षणम् । तथापञ्चाब्दाख्यंगीतादिकलावतांकलाग्रहणापेक्षया स्वयोनिषु पितृव्यतत्पुत्रादिषु स्वल्पेन वयसा ॥ १३४ ॥

(५) **नन्दनः** । अत्रपौरशब्देनसमानदेशवासिनोलक्ष्यन्ते । सख्यशब्देनाऽलिङ्गनादिकं । पौरैरन्योन्यंसख्यं दशा- ब्दाख्यंकर्तव्यंस्यात्दशभिः शब्दैराख्याव्यपदेशोयस्यतद्दशाब्दाख्यम् । ननुकिमुक्तंभवतीतिचेत्एकपुरवासिनः सवर्णलक्ष्य- माणलक्षणाहितादशवर्षान्तरालजन्मानश्चेत्तैस्समेत्यसख्यमेवकर्तव्यम् । अल्पेनापिस्वयोनिषुस्वल्पेनापिसख्यंस्यात् । ज्ञात- यएकवर्षान्तरालाइतियावत्कलाभृतांशिल्पविद्यावेदिनांपञ्चवर्षान्तरालजन्मनांसख्यमेवकर्तव्यंतैरन्योन्यंसमेत्येत्यर्थः । श्रो त्रियाणांत्र्यब्दपूर्वंसख्यंस्यात् । त्र्यब्दपूर्वंत्र्यब्दनिमित्तम् । श्रोत्रियास्त्रिवर्षान्तरालजन्मानश्चेत् तैश्चापिसमेत्यसख्यमेव- कर्तव्यम् । एवमुक्तंभवति । दशपञ्चस्वेकवर्षाधिक्येपिज्यैष्ठ्यमेवमतिपत्तव्यमिति ॥ १३४ ॥

(६) **रामचन्द्रः** । पौरसख्यंपौराणांएकपुरनिवासिनांविद्यादिगुणरहितानांसख्यंदशाब्दाख्यंदशवार्षिकसख्यंविश्वा- सास्पदंकलाभृतां काव्यनाटकादिज्ञातृणांपञ्चाब्दाख्य पञ्चवार्षिकंसख्यंश्रोत्रियाणांअब्दपूर्वकंसख्यम् । स्वयोनिषु स्वबन्धुषु- अल्पेनापि नमस्कारार्हत्वंसख्यंकार्यं व्यवहरणम् ॥ १३४ ॥

ब्राह्मणंदशवर्षंतु शतवर्षंतु भूमिपं ॥ पितापुत्रौ विजानीयाद्ब्राह्मणस्तु तयोः पिता ॥ १३५॥

(१) **मेधातिथिः** दशवर्षाणि । जातस्य यस्य सभवति दशवर्षः । परिच्छेदकः कालः तस्य परिच्छेद्योब्राह्मणः श्रु- तः । नच तस्योच्चनीचतादिकार्श्याद्विना कालेन परिमातुंशक्यम् । किंतर्हि तदीया काचित्क्रिया सा च जन्मनः प्रभृति नि-

त्यसमवायिनी प्राणधारणलक्षणैव । एवंशतवर्षमिति । पितापुत्रौ तौ द्रष्टव्यौ । तयोः संप्रधार्यमाणयोर्ब्राह्मणः पिता । चिरवृद्धेनापि क्षत्रियेण स्वल्पवयोपि ब्राह्मणः प्रत्युत्थायाभिवाद्यश्चेति प्रकरणार्थः ॥ १३५ ॥

(२) सर्वज्ञनारायणः । अतस्तादृशंब्राह्मणंतादृक् क्षत्रियोभिवादयेदित्यर्थः । एवंक्षत्रियाद्यपेक्षया वैश्यादीनामप्युन्नेयम् । तथा वैश्यस्य च शूद्रस्य च शतवर्षातिरिक्तज्येष्ठतायामपि विप्रापेक्षंपुत्रत्वमित्यर्थादुक्तम् ॥ १३५ ॥

(३) कुल्लूकः । ब्राह्मणमिति । दशवर्षंब्राह्मणंशतवर्षंपुनः क्षत्रियंपितापुत्रौ जानीयात् । तयोर्मध्ये दशवर्षोऽपि ब्राह्मणएव क्षत्रियस्य शतवर्षस्यापि पिता तस्मात्पितृवदसौ तस्य मान्यः ॥ १३५ ॥

(४) राघवानन्दः । पितेति । पितृवन्मानार्हः ॥ १३५ ॥

(५) नन्दनः । वर्णज्यैष्ठ्यवयोज्यैष्ठ्ययोर्वर्णज्यैष्ठ्यंमान्यतानिमित्तमित्याहब्राह्मणमिति । अत्रब्राह्मणक्षत्रियशब्दावुत्कृष्टापकृष्टवर्णोपलक्षणार्थौ । अन्योन्यमपिमान्यतानिमित्तानि ॥ १३५ ॥

(६) रामचन्द्रः । ब्राह्मणंदशवर्षंतु । दशवार्षिकःब्राह्मणः शतवर्षीयक्षत्रियःतस्यक्षत्रियस्य ब्राह्मणःपूज्यः । पितृरूपंब्राह्मणंपुत्ररूपंक्षत्रियंजानीयात् । तयोःक्षत्रियवैश्ययोःब्राह्मणःपिता पितृस्थानीयइत्यर्थः ॥ १३५ ॥

वित्तंबन्धुर्वयःकर्मविद्या भवति पञ्चमी ॥ एतानि मान्यस्थानानि गरीयोयद्यदुत्तरम् ॥ १३६ ॥

(१) मेधातिथिः । उक्तंजातेरुत्कर्षहेतुत्वं हीनजातीयेनोत्तमजातीयः पूज्यः । इदानींसमानजातीयानां य अभिवादनादिपूजाहेतवस्तेषांबलाबलमुच्यते । तत्र वयसः पुनरभिधानं बलाबलार्थम् । वित्तादिसंबन्धोत्र सर्वत्र पूजाहेतुः । वित्तवत्त्वंबन्धुमत्त्वंमानस्थानमित्ययमत्रार्थः । विशिष्टता बन्धुतैव पितृव्यमातुलादिरूपता मानकारणं बन्धुमान्योबहुबन्धुः सपूज्यः वयः प्रकृष्टमितिज्ञेयम् । ईदृशएव चार्थे प्रायेणायंप्रयुज्यते । पित्रा पुत्रोवयःस्थोपि सततंवाच्यएव सइति । यावच्च वयः पूजाहेतुः तदुक्तमेव दशाब्दाख्यमिति । कर्मश्रौतंस्मार्तं तदनुष्ठानपरता विद्या सान्ता सोपकरणवेदार्थज्ञानम् । ननु विद्वान्यजते विद्वान्याजयतीत्यविद्यस्य कर्मानुष्ठानानधिकाराद्विद्यया विना कथंकर्मणांमानहेतुता । नैषदोषः प्रकर्षोत्राभिप्रेतः । अतिशयवती विद्या मानहेतुः । स्वल्पविद्यस्याप्यनुष्ठानोपपत्तिः । योयावज्जानातिसतावत्यधिक्रियते । न विद्यायावाचनिकमधिकारहेतुत्वमपि तु सामर्थ्यलक्षणम् । अविदितकर्म स्वरूपोह्यवैद्यस्तिर्यक्कर्माकाधिक्रियतां शक्यंह्यनेन कतिचित्स्मृतिवाक्यान्युपश्रुत्य जपतपस्यनुष्ठातुम् । अग्निहोत्रादिकर्मणांतु वेदवाक्यावबोधउपकरोति । तत्रापि योयावज्जानाति सतावत्यधिक्रियते । अग्निहोत्रवाक्यानांयोर्थंवेत्ति सतत्राधिक्रियते । ऋत्वन्तरज्ञानंन तत्रोपकारकम् । अथोच्यते वेदः कृत्स्नोधिगन्तव्यइति कृत्स्नवेदविषयोयंविधिरवबोधपर्यन्तस्तत्र कृत्स्नस्य वेदस्यावबोधे कर्तव्ये कुतोयंप्रतिभागावबोधसंभवो येनोच्यते योग्निहोत्रवाक्यस्यार्थंवेत्ति वाक्यान्तरार्थमविद्वानप्यधिक्रियतइति । अत्रोच्यते । एकशाखाध्ययनं तावदवश्यंकर्तव्यं तत्रयेनैकशाखाधीतातस्याश्चार्थोवधृतः सोऽनवधृतशाखान्तरार्थोऽधिक्रियते । ननु च सर्वत्रैकएव शास्त्रार्थोयदिनामपदवर्णानुपूर्वीभेदः शास्त्ररूपत्वंभिन्नं पदार्थन्यायव्युत्पत्त्यावावबोधः न च प्रतिशाखंपदार्थाभिद्यन्ते नापि न्यायस्तत्र येनैव हेतुनैकस्याः शाखायाअर्थोवधार्यते शाखान्तरेप्यसावस्ति न व्युत्पत्त्यन्तरमपेक्षते तत्र यद्येका शाखावगतासर्वाएवा वगताभवन्ति । सत्यम् । यान्येकस्यामग्निहोत्रादीन्युपदिष्टानि तेषांशाखान्तरेऽप्युपदिश्यमानानांमभूद्भेदः । किंतु कस्यांचिच्छाखायांकानि चित्कर्माणि नैवोपदिश्यन्ते यथा बाह्वृचे आश्वलायनके दर्शपूर्णामासौश्येनादिरेषएवाभिचारिकः । अन्येच सोमयाग वाजपेय बृहस्पतिसवादयः तत्र यत्तच्छाखाधीनमग्निहोत्रज्योतिष्टोमादि तत्राधिक्रियते शाखान्तरन्त्वनधीतमश्रुतकथंतद्विदितानि कर्माण्यतच्छाध्यायीवेत्तु । नचैतेसोमयागानित्याः येनाननुष्ठानप्रत्यवायभयात्परिज्ञानाय शाखान्तरमन्विष्यते । आधानंतु यद्यपि

तत्र न पठितंतत्राप्युद्धराहवनीयमित्याहवनीयस्य विधानं लोकात्तदर्थमनवबुध्यमानः कोयमाहवनीयोयस्याधानमिति शाखान्तरमन्विष्यति । ततः शाखान्तरेपठ्यमानमाधानप्रकरणंसर्वंपर्यालोचयति । एवमामावास्येन वा हविषेष्ट्वापौर्णमासेन वेति श्रुत्वा कीदृशमनयोः कर्मणोरूपमिति तथैव शाखान्तरंगवेषयते । एवमन्यदपि यत्काम्यंनित्यंचानुष्ठेयं तस्य यत्किंचिदङ्गजातं तत्र नाम्नातं माध्वर्यवमौद्गात्रंवा तत्परिज्ञाय तथैव शाखान्तराद्भियते । यत्तु शाखान्तराधीतमनुष्ठेयं तस्य न वेदनसंभवः । अनेकशाखाध्यायिनस्तु तदर्थपरस्य सर्वमेतत्प्रत्यक्षमिति । अस्तीदृशींविद्यामन्तरेणापि कर्मानुष्ठानंअथवा ईषद्युत्पत्त्यापि संभवत्यनुष्ठानं यस्य तु निर्मला विद्या व्याख्येयानि विद्यास्थानानि तस्य विद्यामान्यतत्स्थानं गरीयइति द्वयोर्द्वयोःसंप्रधारणेऽयमियसुन्प्रत्ययः । चतुर्दशविद्यास्थानज्ञः पङ्ग्वन्धनिर्धनादिरनधिकृतोपि विद्ययैव पूज्यते । तेषांविरोधे बलाबलमाह गरीयोयद्यदुत्तरम् । एकस्य वित्तमन्यस्य बहुबन्धुता तत्र वित्तवतो बन्धुमान्मान्यः यस्माच्च यत्परंतत्तस्मात्तरंगुरु । यथा बन्धोर्वयः ततः पूर्वस्मादपि वित्तात्तद्गुरुसिद्धम् । अतउपपन्नंश्रुतंतु सर्वेभ्योगरीयस्तन्मूलत्वाद्धर्मस्येति गौतमवचनम् । गरीयइति कथंप्रकर्षप्रत्यत्योयावता नैव पूर्वस्य गुरुत्वम् यदि हि द्वे रूपिणी तत्रोत्तरीयस्य गरीयस्त्वमस्ति तर्हि पूर्वापेक्षया वित्तस्य नास्तीति चेत्समुदाये सामान्येन गुरुत्वेपेक्षिते अपरस्य प्रकर्षविवक्षायांयुज्यतईयसुन् । मानः पूजा तस्य स्थानंकारणम् । मानस्थानानीति वा पाठेन्तर्भूतभावार्थोद्रष्टव्यः मान्यत्वस्थानानि मान्यत्वकारणानि ॥ १३६ ॥

(२) **सर्वज्ञनारायणः** । मान्यस्थानानि यदपेक्षया यत्र वित्ताद्युत्कर्षस्तत्र मान्यताकारणमिति यथाशतवित्तापेक्षया सहस्रवित्तोमान्यः । न तु देहदीर्घत्वादेरिवाधिक्येपि न मान्यत्वनिमित्तता । अर्थेषु पञ्चसु पूर्वापेक्षयाउत्तरोत्तरंगरीयोमाननाहेतुः । बन्धवःज्ञातयः । कर्म यागादिविधावेतदर्थज्ञानम् । एतच्च सवर्णेष्वन्योन्यम् । न तु वर्णापकर्षेषूत्कर्षहेतुत्वमेषाम् ॥ १३६ ॥

(३) **कुल्लूकः** । वित्तंन्यायार्जितंधनं बन्धुः पितृव्यादिः वयोऽधिकवयस्कता कर्म श्रौतंस्मार्तंच विद्या वेदार्थतत्त्वज्ञानं एतानिपञ्च मान्यत्वकारणानि । एषांमध्ये यद्यदुत्तरंतत्तत्पूर्वस्माच्छ्रेष्ठमिति बहुमान्यमेलके बलाबलमुक्तम् ॥ १३६ ॥

(४) **राघवानन्दः** । विजातीयानामुत्कर्षमुक्त्वा सजातीयानांतमाह वित्तमिति । वित्तंधनंन्यायार्जितम् । बन्धुःपितृव्यादिः । कर्मश्रौतंस्मार्तंच । विद्यावेदार्थतत्त्वज्ञानम् । यदुत्तरमिति । तादृशधनवतोबन्धुमान्मान्यःबन्धुमतोवयोधिकस्ततोपिकर्मीततोपिविद्यावानिति । एवंत्रिषु विप्रादिषु भूयांसि गुणवन्तीति बहवोगुणायत्रेत्यर्थः । तेनायमर्थःवित्तबन्धुयुक्तोवयोधिकान्मानार्हः एवंवित्तादित्रययुक्कर्मवतःवित्तादिचतुष्टययुक्तविद्यावतइति ॥ १३६ ॥

(५) **नन्दनः** । तेषांबलाबलंचाहवित्तमिति । बन्धुः कुलम् । कर्मयज्ञदानादि । मान्यस्थानानि मान्यंमानपूजास्थानानि पूजानिमित्तानि । एतेषुयद्यदुत्तरंतत्तत्पूर्वस्मात्पूर्वस्मात्गरीयोमान्यस्थानम् ॥ १३६ ॥

(६) **रामचन्द्रः** । वित्तंवित्तवन्तंतत्वबन्धुंवयःवयसाधिक्यंसुकर्मकर्तारंविद्यापञ्चमीभवति एतानि मान्यस्थानानि पूज्यस्थानानि । यत्यत्उत्तरंगरीयःपूज्यंभवतीत्यर्थः । पञ्चानांवित्तादीनांयत्र पूर्वमप्येकंभवति सउत्तरस्मादपि मान्यःतेन वित्तबन्धुयुक्तोवयोधिकात्मान्यः । एवंवित्त दिगुणत्रययुक्तःकर्मतःवित्तादिचतुष्टययुक्तःविदुषोमान्यः । गुणवतितद्वत् ॥१३६॥

पञ्चानांत्रिषु वर्णेषु भूयांसि गुणवान्ति च ॥ यत्र स्युः सोत्र मानार्हःशूद्रोपि दशमींगतः ॥ १३७॥

(१) **मेधातिथिः** । एकैकगुणसंबन्धे परस्य ज्यायस्त्वमुक्तम् । यत्रेदानींद्वौ पूर्वाविकस्य भवतोऽपरस्यैकः परइति तत्र कथमित्यतआह । पञ्चानामेतेषांमान्यस्थानानांयत्र भूयांसि बहून्यसर्वाणि तत्र परत्वमादर्तव्यम् । एकस्य वित्त-

बन्धू हेऽन्यो वृद्धवयास्तत्रपूर्वे बाधके सत्यपि बहुत्वे यदि न श्रेष्ठानि भवन्ति। एकंचैकस्यात्युत्कृष्टंतदा साम्यं न पुनःपर-बाधकत्वंगरीयः एकापेक्षया चरितार्थत्वात् । यदितु भूयांसि गुणवन्त्यत्युत्कृष्टानि तदा साम्येऽपि संख्यया परेषां-पूर्वाणि परैश्च सम संख्यानि तदा न पूर्वतरतया बाध्यबाधकभावः किंतर्हि सामान्यमेव। ननु च यत्र गुणवन्ति स्युः सोऽत्र मानार्हइत्यभिधानेन समसंख्यस्यापि पूर्वस्यवा बाधकत्वमेव युक्तम् । नैवं तुल्यत्वे गुणानामेतस्य चरितार्थ त्वात्। यथैकोऽपि विद्यावानपरोऽपि तयोर्यस्य गुणवती प्रकृष्टा विद्या सप्रशस्यते। एवं सर्वत्र त्रिषुवर्णेषु ब्राह्मण क्षत्रिय वैश्येषु यद्येते गुणाभूयांसःप्रकृष्टाश्च क्षत्रियस्यापि भवन्ति तदा ही। न गुणेन ब्राह्मणेन जात्युत्कृष्टेनापि क्षत्रियः पूज्यः। एवंक्षत्रियेण वैश्यः। एवंत्रिभिरपि द्विजातिभिः शूद्रोऽपि दशमीमितः दशमी। अन्त्यावस्थोच्यते। अत्यन्तवार्धको-पलक्षणमेतत्। एवंच वित्तबन्धू शूद्रस्य माने हेतूत्रैवर्णिकान्प्रति दशमीग्रहणात्। न कर्मविद्येतुनैव तस्य संभवतोऽनधिका-रात्।भूयांसीत्याधिक्यमात्रंविवक्षितंन बहुत्वसंख्यैव । तेन द्विविषयतापि सिद्धा भवति । नह्ययंसंख्यावाच्येव बहुशब्दइ-त्यत्र प्रमाणमस्ति भूयः शब्दश्चायंन बहुशब्दः। आधिक्ये च तत्रतत्र दृष्टः प्रयोगः। भूयांश्चात्र परिहारोभूयसाऽभ्युदयेन योक्ष्यइति प्रत्ययार्थबहुत्वमपि न विवक्षितम्। जात्याख्यायां ह्येतद्बहुवचनम्। विवक्षायां हि एकस्य गुणवतोमानहे-तुत्वंन स्यात्ततश्चपूर्वाऽवगतिर्बाध्यते। शूद्रोपि दशमीमित्यत्र च केवलस्यैव वयसः प्रकर्षे मानहेतुत्वंब्रुवन्नविवक्षांदर्श-यति। समाचारश्चैवमेव ॥ १२७ ॥

(२) **सर्वज्ञनारायणः**। पञ्चानांमध्ये वित्तादीन्येकैकसजातीयानि ब्राह्मणादिवर्णत्रये यत्र गुणवन्ति भूत्वा भूयां-सि समानार्हः न तु निर्गुणःतद्भूयस्त्वे। यथाप्रतिग्रहार्जितात्पधनादपि न वृद्ध्यार्जितबहुधनःश्रेयानित्येवमन्यत्राप्युन्नेयम्। यथा शूद्रोपि दशमीमवस्थांगतोनवतिवर्षादूर्ध्वंवित्तादिचतुष्टयबाहुल्ये शूद्रान्तराणांद्विजातीयानांच मान्यः। चकारादिव-चनाभावएव चास्य द्विजैर्मान्यता। विद्या तु तस्य न संभवत्येवेति ॥ १३७ ॥

(३) **कुल्लूकः**। त्रिषु वर्णेषु ब्राह्मणादिषु पञ्चानांवित्तादीनांमध्ये यत्र पुरुषे पूर्वमप्यनेकंभवति सएवोत्तरस्मादपि मान्यः। तेन वित्तबन्धुयुक्तोवयोधिकान्मान्यः। एवंवित्तादित्रययुक्तः कर्मवतोमान्यः। वित्तादिचतुष्टययुक्तोविदुषोमान्यः गुणवन्ति चेति प्रकर्षवन्ति तेन द्वयोरेवविद्यादिसत्त्वे प्रकर्षोमानहेतुः। शूद्रोऽपि दशमीमवस्थांनवत्यधिकांगतोद्विजन्मनाम-पि मानार्हः। शतवर्षाणांदशधाविभागे दशम्यवस्था नवत्यधिका भवति ॥ १३७ ॥

(४) **राघवानन्दः**। दशमींगतःनवत्यूर्ध्ववयोगतः ॥ १३७ ॥

(५) **नन्दनः**। पञ्चानांवित्तादीनांमध्येत्रिषु वर्णेषु यस्मिन्भूयांसि वित्तबन्धुवयांसि स्युः यस्मिन्वा गुणवन्ति-गरीयांसि विद्याकर्मवयांसि स्युः सवित्तबन्धुवयोयुक्तोवित्तबन्धुवयोहीनादत्रलोकेमानार्हः । एवंविद्याकर्मवयोयुक्तोविद्या-कर्मवयोहीनाच्छूद्रोऽपिवित्तादिमांश्चतद्वन्मानार्हः सचेद्दशमीमवस्थांगतः। अनेनवयसानवत्याऊर्ध्वंशूद्रस्यवयोज्यैष्ठ्यमिति-सूचितम् ॥ १३७ ॥

(६) **रामचन्द्रः**। वित्तबन्ध्वादीनांपञ्चानांमध्येत्रिषुवर्णेषुगुणवन्ति भूयांसिबहूनि यत्रस्युःतेचमानार्हाभवन्ति। तद्य-थात्रिषुवर्णेषुयदिब्राह्मणाबहवःसन्तितर्हियेगुणिनःभवन्तितेमानार्हा भवन्तीत्यर्थः। बहवःक्षत्रियाःसन्तिचेत्तेषांक्षत्रियाणांम-ध्येयेगुणिनःभवन्तितेमानार्हाभवन्तीत्यर्थः। बहवःवैश्याःसन्तितेषांमध्ये गुणिनःभवन्ति ते मानार्हाभवन्तीत्यर्थः। शूद्रोपिद शमींगतःवृद्धत्वंगतःसन्मानार्हःपूजार्हःस्यादित्यर्थः ॥ १३७ ॥

---

* विद्यादि=वित्तादि (अ)

चक्रिणोदशमीस्थस्य रोगिणो भारिणःस्त्रियाः॥स्नातकस्य च राज्ञश्च पंथादेयोवरस्य च॥ १३८॥

(१) **मेधातिथिः** । अयमन्यः पूजाप्रकारः प्रासङ्गिकउच्यते । चक्री रथिकोगन्त्र्यादियानाधिरूढस्तस्यपन्था देयः। येन भूमिभागेन ग्रामादिदेशान्तरंगम्यते सपद्धतिः पन्थाउच्यते । तत्र यदि पृष्ठतः संमुखतोवा रथिकआगच्छेत्तदा तद्गमनोपरोधिनः पथि प्रदेशात्पदातिरपक्रामेत् । दशमीस्थोऽत्यन्तपरिणतवयाः । रोगीव्याधिनात्यन्तपीडितः । भारी गृहीतव्रीह्यादिगुरुद्रव्यः सोऽपियथोपसर्तुमशक्तोऽनुग्राह्यः स्त्रियाअनपेक्ष्य जातिगुणभर्तृसंबन्धान्स्त्रीत्वमात्रेणैव । राजा च विषयेश्वरोत्राभिप्रेतोन क्षत्रियएव। तथा चोत्तरत्र पार्थिवग्रहणेन निगमने पृथिव्याईश्वरः पार्थिवः। ननु चोपक्रमे राजशब्दश्रवणाद्वाक्यान्तरगतः पार्थिवशब्दस्तत्परएव युक्तः। राजशब्दोहि क्षत्रियजातिवचनोविज्ञातः सतावदनुपजातविरोधित्वादुपक्रमगतोमुख्यार्थोग्राह्यः। बलादिवाक्ये तु तत्सापेक्षक्षत्रियजातिविहितेन धर्मेण पृथिवीपालनाख्येन पार्थिवशब्दस्यप्रयोगसंभवेन जात्यन्तरविषयत्वमयुक्तम् । अत्रोच्यते। मान्यतात्र श्रुता स्नातकोनृपमानभागीति । तत्रक्षत्रियजातीयमात्रान्मान्यत्वंस्नातकस्य सिद्धमेव ब्राह्मणंदशवर्षमिति । तत्र हि भूमिपशब्दः क्षत्रियजातिमात्रोपलक्षणार्थइत्युक्तम् । उपलक्षणत्वाच्च राजजातेः क्षत्रियस्यापि प्रजेश्वरस्यायंधर्मोविज्ञायते। वरोविवाहाय । प्रवृत्तः एतेषांपन्थादेयः त्यागमात्रंच ददातीत्यर्थः। त्यागश्च पथोऽपसरणमतएव चतुर्थी न कृता ॥ १३८॥

(२) **सर्वज्ञनारायणः**। चक्रिणः शाकटिकादेः। दशमीस्थस्य दशमभागायुःशेषस्य । रोगिणोऽत्यन्तार्त्तस्य । भारिणोभारंवहतः । स्नातकस्य विद्याव्रतस्नातस्य । राज्ञोभिषिक्तस्य । वरस्य विवाहार्थंगच्छतः। पन्थादेयोपसृत्य स्वयंगन्तव्यमित्यर्थः । केचिद्वरस्य श्रेष्ठस्यादरेण पन्थादेयइत्यस्यार्थः। तथाच योयदपेक्षया जातिगुणादिनोत्कृष्टस्तस्य वर्त्मदानमिति लभ्यते । अत्र च माननार्थं वर्त्मदानं स्नातकपार्थिववराणांवृद्धादीनांत्वपसाराशक्ततया करुणया तत्रापि । वरापेक्षयानृपतिस्नातकयोर्मान्यता ॥ १३८ ॥

(३) **कुल्लूकः** । अयमपि पूजाप्रकारः प्रसङ्गादुच्यते चक्रिणइति । चक्रयुक्तरथादियानारूढस्य नवत्यधिकवयसोरोगार्त्तस्य भारपीडितस्य स्त्रिया अचिरनिवृत्तसमावर्तनस्य देशाधिपस्य विवाहाय प्रस्थितस्य पन्थास्त्यक्तव्यः। त्यागार्थत्वाच्च ददातेर्न चतुर्थी ॥ १३८ ॥

(४) **राघवानन्दः**। ज्येष्ठवरस्यमान्यत्वकारणप्रसङ्गेनान्यदप्याह चक्रिणइति द्वाभ्याम् । चक्रिणः रथकारारूढस्य। स्नातकस्य तद्व्रतधारिणः । भारिणोभाराक्रान्तस्य । वरस्य कन्यामुद्वोढुंप्रस्थितस्य । एतेभ्यः पन्थादेयइत्यन्वयः ॥ १३८॥

(५) **नन्दनः** । अथमार्गप्रदानार्हानाह चक्रिणइति । चक्रंरथाद्युपलक्षणम् । तेनयोगच्छतिसचक्री । तस्यनिर्गुणस्यापिपन्थादेयः । एवंदशमीस्थस्य वृद्धतरस्य। भारिणोभारवाहस्य। स्नातकस्य गृहस्थस्य ब्राह्मणस्य। वरस्य श्रेष्ठस्य ॥ १३८ ॥

(६) **रामचन्द्रः**। चक्रिणइति। दशमीस्थस्यचक्रिणः वृद्धस्य चक्रिणःतैलिकस्य पन्थादेयः। भारिणःभाराक्रान्तस्य । रोगिणःरोगाक्रान्तस्य स्त्रियाः स्नातकस्यच राज्ञश्च पुनःवरस्यच विद्यास्नातकःव्रतस्नातकोवातस्य। एतेषांपन्थादेयः। वरोविवाहयोग्यः ॥ १३८ ॥

तेषांतु समवेतानां मान्यौ स्नातकपार्थिवौ ॥ राजस्नातकयोश्चैव स्नातकोनृपमानभाक् ॥ १३९॥

(१) **मेधातिथिः**। तेषांतु समवेतानामेकत्र संनिपतितानांमान्यौ स्नातकपार्थिवौ। प्रकृतेन पथोदानेन नृपमान-

भाक्नृपस्य सकाशान्मानंभजते लभते । षष्ठी निर्धारणे । चक्र्यादीनांत्वन्योन्यंविकल्पः सच शक्त्यपेक्षः ॥ १३९ ॥

(२) सर्वज्ञनारायणः । तयोरप्यन्यापेक्षया स्नातकोमान्यइत्याह तेषांत्विति । स्नातकएवेत्यन्वयः । तथाच वर्त्म-दानसामर्थ्ये यस्य योमान्यस्तेन न तस्य वर्त्मदेय मिति लभ्यते ॥ १३९ ॥

(३) कुल्लूकः । तेषामेकत्रमिलितानांदेशाधिपस्नातकौ मान्यौ । राजस्नातकयोरपि स्नातकएवराजापेक्षया मान्यः । अतोराजशब्दोऽत्र पूर्वश्लोके न केवलजातिवचनः क्षत्रियजात्यपेक्षया ब्राह्मणंदशवर्षंत्वित्यनेन ब्राह्मणमात्रस्य मान्य-त्वाभिधानात्स्नातकग्रहणवैयर्थ्यात् ॥ १३९ ॥

(४) राघवानन्दः । तेषांसमवायेत्वाह स्नातकोनृपमानभागिति । राजकर्तृमानभागिति पूर्वंपितापुत्रौ विप्रक्षत्रि-यावित्युक्तौ तेनात्र युगपदुपस्थित्यादिनिमित्तंपूजादि विप्रस्य ॥ १३९ ॥

(५) नन्दनः । समवेतानांमार्गेसंगतानाम् । मान्यौमार्गदानेन । नृपमानभाङ्नृपदत्तमानभाक् ॥ १३९ ॥

(६) रामचन्द्रः । समवेतानांतेषांचक्र्यादीनांस्नातकपार्थिवौमान्यौ भवतः । राजस्नातकयोर्मध्ये नृपस्य मानभा-क्स्नातकःभवत्येव । स्नातकःपूज्यइत्यर्थः ॥ १३९ ॥

उपनीय तु यःशिष्यंवेदमध्यापयेद्द्विजः ॥ सकल्पंसरहस्यंच तमाचार्यंप्रचक्षते ॥ १४० ॥

(१) मेधातिथिः । आचार्यादिशब्दानामेवार्थनिरूपणार्थमिदमारभ्यते । सोपचारोहिलोके एषांप्रयोगोनच शब्दार्थ-संबन्धस्य स्मर्तृभिराचार्यपाणिनिप्रभृतिभिरेतन्निरूपितम् । इयंचाचार्यपदार्थस्मृतिर्व्यवहारमूलान वेदमूला पाणिन्यादिस्मृ-तिवत् । नह्यत्र किंचित्कर्तव्यमुपदिश्यते । अस्य शब्दस्यायमर्थइति सिद्धरूपोऽयमर्थोन साध्यरूपः । उपनीयोपनयनंकृत्वा-योवेदमध्यापयति ग्राहयति सआचार्यः । ग्रहणंचात्राध्येत्रन्तरनिरपेक्षवाक्यानुपूर्वीस्मरणम् । कल्पशब्दः सर्वाङ्गप्रदर्शनार्थः । रहस्यमुपनिषदः । यद्यपि तेऽपि वेदशब्देनैव गृहीतास्तथापि द्वितीयस्तेषांव्यपदेशोस्ति । वेदान्ताइत्यन्तशब्दंसमीपवचनंम-न्यमानोनैते वेदाइति मन्येतास्ततदाशङ्कानिवृत्त्यर्थंरहस्य ग्रहणम् । अन्ये तु रहस्यंवेदार्थंवर्णयन्ति तेन न स्वरूपग्रहणमा-त्रादाचार्यकनिष्पत्तिः अपि तु तद्व्याख्यानसहितात् । तथा चाभिधानकोशेभिहितं विवृणोति च मन्त्रार्थानाचार्यः सोभिधी-यतइति । मन्त्रग्रहणंवेदवाक्योपलक्षणार्थम् । अस्मिंश्च व्याख्यानेऽर्थावबोधोप्याचार्यकरणविधिप्रयुक्तः स्यान्नकेवलंसंपाठ-मात्रम् । ततश्चसर्वेण सर्वस्वाध्यायविधिरनुष्ठापकः स्यात् । अस्तु परप्रयुक्तेप्यनुष्ठानेस्वाध्यायविधेर्ब्रह्मचारिणः स्वार्थसिद्धिः यदा तर्हिकाम्यत्वादाचार्यकरणविधेराचार्योन प्रवर्तते तदा स्वाध्यायविध्यर्थानुष्ठानंनप्राप्नोति । ततश्च न नित्यस्वाध्याय विधिः स्यात् । नच रहस्यशब्दोवेदार्थवचनतया प्रसिद्धस्तस्मात्पूर्वमेव रहस्यग्रहणस्य प्रयोजनंप्राधान्याद्वा पृथगुपादानम् । यत्तु विवृणोति मन्त्रार्थानित्यस्मृतिरेवैषा मन्त्रशब्दस्योपलक्षणत्वे प्रमाणाभावात्तस्मात्पाठाभिप्रायमस्य विधेरप्रयोजकत्वम् । अतोवेदस्वरूपग्रहणे माणवकस्य जात आचार्यकरणविधिनिवृत्तिः ॥ १४० ॥

(२) सर्वज्ञनारायणः । संकल्पमित्येकदेशेन षडङ्गोपलक्षणम् । सरहस्यं अत्यन्तगुह्यतदर्थव्याख्यासहितं न तूप-निषद्भागोरहस्यंवेदपदादेव तल्लाभात् ॥ १४० ॥

(३) कुल्लूकः । आचार्यादिशब्दार्थमाह उपनीयेति । तैः शब्दैरिह शास्त्रे प्रायोव्यवहारात् । योब्राह्मणः शिष्यमुप-नीय कल्परहस्यसहितांवेदशाखांसर्वामध्यापयति तमाचार्यंपूर्वे मुनयो वदन्ति । कल्पोयज्ञविद्या । रहस्यमुपनिषत् । वेदत्वेऽप्युपनिषदांप्राधान्यविवक्षया पृथङ्निर्देशः ॥ १४० ॥

(४) **राघवानन्दः** । आचार्यपुत्रइत्युक्तंतत्र क आचार्यइत्यपेक्षायांतल्लक्षणंउपाध्यायादिसमतियौगिकंसार्थंवा-दंच ब्रूते उपनीयेति अष्टादशभिः । सकल्पंयज्ञविद्यासहितंसरहस्यमुपनिषदुक्तोपासनासहितम् ॥ १४० ॥

(५) **नन्दनः** । अथगुणानांतारतम्यंवक्ष्यंस्तेषांक्रियाविशेषैः संज्ञाविशेषांश्चतुर्भिः श्लोकैराहउपनीयेति । सकल्पं-सकर्मविद्यम् । सरहस्यंसाध्यात्मविद्यम् ॥ १४० ॥

(६) **रामचन्द्रः** । उपनीयेति। सद्विजःउपनीय शिष्यंवेदंअध्यापयेत् । च पुनः । सरहस्यंसकल्पं शिक्षा कल्प-व्याकरणादिसहितं अध्यापयेत् यस्तं आचार्यंप्रचक्षते सरहस्यंतदर्थवाक्यसहितमित्यर्थः ॥ १४० ॥

एकदेशंतु वेदस्य वेदांङ्गान्यपि वा पुनः ॥ योध्यापयति वृत्यर्थमुपाध्यायः सउच्यते ॥१४१॥

(१) **मेधातिथिः** । वेदस्यैकदेशोमन्त्रः ब्राह्मणंवा । वेदवर्जितानि वा केवलान्यङ्गान्येव योध्यापयति तथा सर्व-मपि वेदम् । वृत्त्यर्थजीविकार्थम् नाचार्यकरणविधिवशेन सउपाध्यायोनाचार्यः । अन्येनोपनीतंयः कृत्स्नमपि वेदध्यापय-ति नासावाचार्यः । उपनीयापि यःकृत्स्नंवेदंनाध्यापयति सोऽपि नाचार्यः । यद्येवमेकदेशग्रहणमुपाध्यायलक्षणेकृतमा-चार्यलक्षणउपनयनग्रहणंयस्तर्ह्यनुपनेता कृत्स्नवेदाध्यापकश्च तस्य किंलक्षणंनासावाचार्योनाप्युपाध्यायः ॥ न चापि नामान्तरंतस्य श्रुतम् । उच्यते। अल्पंवा बहुवा यस्य श्रुतस्येत्यनेनगुरुरसावाचार्यान्न्यूनउपाध्यायादप्यधिकः । अपिपुनः शब्दौ पादपूरणार्थौ ॥ १४१ ॥

(२) **सर्वज्ञनारायणः** । एकदेशंवेदस्य वेदाङ्गमात्रं वा धर्मार्थमध्यापयति अपरिभाषितवृत्त्यभिसंधानेन वा कृत्स्न-मपि वेदमध्यापयति स उपाध्यायइत्यर्थः । योध्यापयतीत्यावृत्त्या योज्यम् । तेन सामान्यतोवृत्त्यर्थे वेदाध्यापनंलभ्यते १४१

(३) **कुल्लूकः** । वेदस्यैकदेशंमन्त्रंब्राह्मणंच वेदरहितानि व्याकरणादीन्यङ्गानि योवृत्त्यर्थमध्यापयति स उपा-ध्यायउच्यते ॥ १४१ ॥

(४) **राघवानन्दः** । एकदेशंशाखामात्रंमन्त्रंब्राह्मणंवा । वेदाङ्गानिशिक्षाकल्पोव्याकरणंनिरुक्तंछन्दोज्योतिषमिति । षट्एतानिवृत्त्यर्थंयोध्यापयति सउपाध्यायः ॥ १४१ ॥

(५) **नन्दनः** । एकदेशंमन्त्रमात्रंब्राह्मणमात्रंवा । वृत्त्यर्थंधर्मार्थंजीवनार्थम् ॥ १४१ ॥

(६) **रामचन्द्रः** । मन्त्रब्राह्मणयोःएकदेशः ॥ १४१ ॥

निषेकादीनि कर्माणि यः करोति यथाविधि ॥ संभावयति चान्नेन सविप्रोगुरुरुच्यते ॥ १४२ ॥

(१) **मेधातिथिः** । निषेकग्रहणात्पितुरयंगुरुत्वोपदेशः । निषेकोरेतःसेकः सआदिर्येषांकर्मणाम् । आदिग्रहणात्सर्वे संस्कारागृह्यन्ते । तानि यः करोत्यन्नेन च यःसंभावयति संवर्धयति । चैवेनमिति वा पाठः । अर्थस्तु सएव अन्नेनैव संभा-वनोपपत्तेः । अर्थान्तरनिर्देशः एनंकुमारं । ननुचान्वादेशः नचेह कुमारस्यपूर्वमुपदेशः । नैवंकस्यान्यस्य निषेकादीनिक्रियन्ते तानियत्करोति सामर्थ्यादपि निर्देशोन निर्देशतएव । एवमाभ्यां गुणाभ्यांहीनः केवलजनकत्वेपि नैव भवतिन गुरुः । नचै-वंमन्तव्यमसति गुरुत्वे नासौ मान्यः सर्वप्रथममसावेव मान्यः।तथा च भगवान्व्यासः प्रभुः शरीरप्रभवः प्रियकृत्प्राणदोगुरुः । हितानामुपदेष्टा च प्रत्यक्षंदैवतंपितेति ॥ विप्रग्रहणं प्रदर्शनार्थम् ॥ १४२ ॥

(२) **सर्वज्ञनारायणः** । गर्भाधानादि कर्मउपनयनान्तंकरोत्यन्नेन च पुष्णाति यःसगुरुरिति पितैवोक्तः । तदे-कदेशमात्रकरणे तु पितृत्वमात्रम् ॥ १४२ ॥

(३) कुल्लूकः। निषेकोगर्भाधानम्। तेन पितुरयंगुरुत्वोपदेशः। गर्भाधानादीनि संस्कारकर्माणि पितुरुपदिष्टानि यथाशास्त्रंयःकरोत्यन्नेन च संवर्धयति सविप्रोगुरुरुच्यते ॥ १४२ ॥

(४) राघवानन्दः। गर्भाधानंयोनौ रेतोनिषेकइति। विप्रपदमुपलक्षणंसंस्कारस्य द्विजातिमात्रनियतत्वात्। संभावयति पुष्णाति निषेकातिरिक्तसंस्कारकर्तृत्वेपि पिता गुरुः। तथाच व्यासः प्रभुः शरीरप्रभवःप्रियकृत्प्राणदोगुरुः। हितानामुपदेष्टा च प्रत्यक्षंदैवतंपितेति ॥ प्रभुः कार्याकार्यनियोक्ता शरीरस्य प्रभवउत्पत्तिर्यस्मात्सइत्यर्थः ॥ १४२ ॥

(५) नन्दनः। निषेकादीनि कर्माणि यः करोति नोपनयनाध्यापने। संभावयति पोषयति ॥ १४२ ॥

(६) रामचन्द्रः। गर्भाधानादिनिषेकादीनि कर्माणि यथाविधियः करोतिसगुरुरुच्यते। अन्नेनअन्नप्राशनेन यःअन्नदानेन प्राशयति सउच्यते ॥ १४२ ॥

अग्न्याधेयंपाकयज्ञानग्निष्टोमादिकान्मखान् ॥ यःकरोति वृतोयस्य सतस्य र्त्विगिहोच्यते ॥ १४३ ॥

(१) मेधातिथिः। आहवनीयादीनामग्नीनामुत्पादककर्माग्न्याधेयमुच्यते। वसन्ते ब्राह्मणोग्नीनादधीतेति विहितम्। पाकयज्ञादर्शपूर्णमासादयः। अग्निष्टोमादयोमखाःसोमयागः। मखशब्दः क्रतुपर्यायः। एतानि कर्माणियस्ययः करोति स तस्यर्त्विगित्युच्यते। यस्यतस्येतिशब्दौसंबन्धितांदर्शयतः। यस्यैवैतानिकर्माणिकरोति तस्यैवासावृत्विगुच्यते नान्यस्य। सर्वएतआचार्यादयः सम्बन्धिशब्दाः। वृतः प्रार्थितः शास्त्रीयेण विधिना कृतवरणः। मान्यताप्रसङ्गादृत्विक्संज्ञोपदेशोत्र नहि ब्रह्मचारिधर्मेषु ऋत्विजामवसरः ॥ १४३ ॥

(२) सर्वज्ञनारायणः। पाकयज्ञानपक्वहविःसंपाद्यानहविर्यज्ञान् दर्शपौर्णमासादीन्। एतच्चैकदेशकरणेपि। तथाच प्रयोगमध्येऋत्विगशक्तावनुप्रविष्टस्यापि ऋत्विक्त्वस्यात् अतउक्तंवृतइति ॥ १४३ ॥

(३) कुल्लूकः। आहवनीयाद्यग्न्युत्पादकंकर्माग्न्याधेयमष्टकादीन्पाकयज्ञानग्निष्टोमादीन्यज्ञान्कृतवरणोयस्य करोति सतस्यर्त्विगिह शास्त्रेऽभिधीयते। ब्रह्मचारिधर्मेष्वनुपयुक्तमप्यृत्विग्लक्षणमाचार्यादिवदृत्विजोऽपिमान्यत्वंदर्शयितुंप्रसङ्गादुक्तम् ॥ १४३ ॥

(४) राघवानन्दः। अग्न्याधेयंआहवनीयाद्युत्पादकंकर्म। पाकयज्ञानष्टकादर्शादीनि। मखानित्यग्निष्टोमादेः विशेषणम्। यस्य वृतः वरणंगतः सन्। आचार्यादिऋत्विगन्ताः संबन्धिशब्दास्तेन यस्यैते संबन्धिनस्तस्यैवैतानि कुर्युर्नान्यस्येतिभावः ॥ १४३ ॥

(६) रामचन्द्रः। अग्न्याधेयंअग्निहोत्रपाकयज्ञान्बलिवैश्वदेवादीन्अग्निहोत्रसंज्ञकान्मखान्यस्य वृतःसन्यः करोति सतस्य ऋत्विक्इह गुरुरुच्यते ॥ १४३ ॥

यआवृणोत्यवितथंब्रह्मणा श्रवणावुभौ ॥ समाता सपिता ज्ञेयस्तंन द्रुह्येत्कदाच न ॥ १४४ ॥

(१) मेधातिथिः। आचार्यादिवत्पूज्यइत्यस्मिन्नवधौतल्लक्षणमुच्यते यउभौ श्रवणौ ब्रह्मणावेदाध्यापनेनावृणोति समाता सपिता ज्ञेयः। नेदमध्यापकस्य मातापितृशब्दवाच्यताविधानम्। आचार्यादिशब्दवत्प्रसिद्धार्थौहि पितृमातृशब्दौ जनकः पिता जननी माता उपचारेणाध्यापकस्तुत्यर्थंप्रयुज्येते यथा गौर्वाहीकइति। लोकेहत्यन्तोपकारकौ मातापितरौ प्रथितौ तौ हितंजनयतोभक्तादिनाचपुष्णीतः स्वशरीरानपेक्षमपि पुत्रहिते प्रवर्तेतेअतोमहोपकारकत्वात्ताभ्यामुपाध्यायःस्तूयते। योविद्यायामुपकरोति ससर्वोपकारकेभ्यः श्रेयान्अवितथं क्रियाविशेषणमेतत्। अवितथेन सत्येन ब्रह्मणा-

ऽनक्षरविस्तरवर्णितेन तन्न दुह्येत। अपकारोद्रोहस्तदुपरिअवज्ञानंच कदाचननिष्पन्नमपि ग्रन्थग्रहणेतदुत्तरकालमपिन द्रुह्येत। तथाच निरुक्तकारः अध्यापिताये गुरुन्नाद्रियन्तेविप्रावाचा मनसा कर्मणा वा नाद्रियन्ते अवज्ञांकुर्वन्तियथैव ते शिष्यानगुरोर्भोजनीयाः न भोगाय कल्पन्ते तथैव तान्न भुनक्ति। श्रुतंतत्पाठान्तरमातृणत्तिति । अर्थकर्णौभिनत्ति विध्यतीत्युपमयाध्यापनमेवोच्यते। अविद्धकर्णः किल सस्मृतोनरः श्रुतंन यस्य श्रुतिगोचरंगतमिति। सर्वाध्यापकानामाचार्योपाध्यायगुरूणामयंकृतविद्यस्यापि द्रोहप्रतिषेधः ॥ १४४ ॥

(२) सर्वज्ञनारायणः। अत्रऋत्विगपेक्षयोपाध्यायापेक्षया च वेदोपाध्यायाचार्यौ मान्यतरावित्याह यआतृणत्तीति। यआतृणत्त्यवितथेनकर्णावदुःखं कुर्वन्नमृतंसंप्रयच्छन् तंमन्येत पितरंमातरंच तस्मै न द्रुह्येत्कतमच्च नाहेति श्रुतेरयमर्थोनिबद्धः। आतृणत्ति सूच्या सूत्रेणैव कुसुमंवियया श्रोत्रं संश्लेषयति ॐकारेण सर्ववाक्संतृणत्तीत्यादिश्रुतितृदिधातोरेवमर्थत्वेन प्रसिद्धेः। अवितथममिथ्यात्वेन। ब्रह्मणा वेदेन। समाता पिता मातेव पितेवेत्यर्थः ॥ १४४ ॥

(३) कुल्लूकः। यउभौ कर्णाववितथमिति वर्णस्वरवैगुण्यरहितेन सत्यरूपेण वेदरूपेण वेदेनापूरयति समाता पिता च ज्ञेयः महोपकारकत्वगुणयोगात्। अयमध्यापकोमातापितृशब्दवाच्यस्तन्नामकुर्यात्। कदाचनेति गृहीते वेदे ॥ १४४ ॥

(४) राघवानन्दः। मुख्याचार्यस्य सर्वोत्कृष्टत्वात्तस्य मनसाप्यनिष्टंनाचरणीयमिति औत्सुक्यादाह यइति । अवितथंवर्णस्वरवैगुण्यरहितंब्रह्मणावेदेन श्रवणौ कर्णौआवृणोति सरहस्यादिवेदमध्यापयतीत्यर्थः ॥ १४४ ॥

(५) नन्दनः। तथ्येनवेदेनेत्यर्थः। आवृणोतिविविक्तीकरोति। कदाचनकृतार्थोपीत्यर्थः ॥ १४४ ॥

(६) रामचन्द्रः। ब्रह्मणा वेदेन उभौ श्रवणौ अवितथं सत्यंआवृणोतिआच्छादयतियः गायत्र्युपदेशंसमयेकरोतीत्यर्थःसमातृतुल्योज्ञेयः सपितृतुल्योज्ञेयः। गायत्र्युपदेष्टारंकदा चन नद्रुह्यात् ॥ १४४ ॥

उपाध्यायान्दशाचार्यआचार्याणांशतंपिता॥ सहस्रंतु पितॄन्माता गौरवेणातिरिच्यते॥ १४५॥

(१) मेधातिथिः। स्तुत्यक्रमेण प्रकृष्टपूर्वविधानम्। उपाध्यायाच्छ्रेष्ठआचार्यस्तस्मात्पिता ततोऽपि मातेति दशादिसंख्यानिर्देशः स्तुतिमात्रम्। पूर्वस्मात् पूर्वस्मात्परस्यपरस्यातिशयोविवक्षित अतएव सहस्रंपितुरिति वचनम्। उपाध्यायान्दशातिरिच्यते। दशभ्यउपाध्यायेभ्योऽधिकः। कथंपुनरत्र द्वितीया। अतिरयंकर्मप्रवचनीयः। उपाध्यायानतिक्रम्यातिक्रम्यातिरिच्यते गौरवेण सातिशयेन युज्यते। अथवाऽऽधिक्यमतिरेकः तद्धेतुकेऽभिभवे धातुर्वर्तते। गौरवाधिक्येनोपाध्यायानभिभवति। अतिरिच्यतइति कर्मकर्तरिद्वितीया चाविरुद्धा दुहियाच्योर्बहुलंसकर्मकयोरिति बहुलग्रहणात्। ननु चानन्तरमेव वक्ष्यतिगरीयान्ब्राह्मणःपितेति। इह चाचार्यात्पितुराधिक्यमुच्यते तदितरेतरव्याहतम्। नैषदोषः। इहाचार्योनैरुक्तदर्शनेनाध्यापकः संस्कारमात्रेणाचारोपदेशमात्रेण चाभिप्रेत आचार्यआचारंग्राहयतीति। नचैषनियमः स्वशास्त्रसिद्धाभिरेव संज्ञाभिर्व्यवहारः। गुरुशब्दोह्यत्र पितरि परिभाषितः आचार्ये च तत्रतत्र प्रयुज्यते। तेन स्वल्पोपकारादुपनयनमात्रकरादाचारग्राहकादध्यापनरहितादिदंपितुर्ज्यायस्त्वम्। अस्मिंश्च क्रमे विवक्षिते समवायएतेषांमाता प्रथमंवन्द्या ततः पिता ततआचार्यस्ततउपाध्यायः ॥ १४५ ॥

(२) सर्वज्ञनारायणः। दशोपाध्यायानतिरिच्य तत्तद्दशकापेक्षयाउत्कृष्येत गौरवेण धर्मेण तत्तद्विषये कर्तव्ये

---

(१४५) न्द=द्द (ल, म, व, न)

पितॄन्माता=पितुर्माता (— " ————)

हेतुभूते न दशगुणंपूजादिगौरवंकुर्यादित्यर्थः । अतिरतिक्रमणइति कर्मप्रवचनीयत्वेनोपाध्यायानिति द्वितीया । एवमुत्तरेषु आचार्यशतात्पितोत्कृष्टोयद्युपनेता ब्रह्मणि सहस्रं सहस्रगुणं पितुः सकाशान्मातातिरिच्यते तदपेक्षया बहुदुःखानुभवात् ॥ १४५ ॥

(३) कुल्लूकः । दशोपाध्यायानपेक्ष्याचार्य आचार्यशतमपेक्ष्य पिता सहस्रंपितॄनपेक्ष्य माता गौरवेणातिरिक्ता भवति । अत्रोपनयनपूर्वकसावित्रीमात्राध्यापयिताऽऽचार्योऽभिप्रेतस्तमपेक्ष्य पितुरुत्कर्षः । उत्पादकब्रह्मदात्रोरित्यनेन मुख्याचार्यस्य पितरमपेक्ष्यउत्कर्षंवक्ष्यतीत्यविरोधः ॥ १४५ ॥

(४) राघवानन्दः । अत्र हेतुरुपाध्यायानिति । उपाध्यायान्दशापेक्ष्यदशसूपाध्यायेषुयावत्पूजादितत्सर्वमेकोप्याचार्योर्हतीत्येवमुत्तरत्र ॥ १४५ ॥

(५) नन्दनः । अथगुरूणांतारतम्यमाह उपाध्यायानिति । सहस्रंतु पितुरितिपाठः । गौरवेणगुरुतरोपकारकारणेन ॥ १४५ ॥

(६) रामचन्द्रः । उपाध्यायात्दशगुणः आचार्यःश्रेष्ठःउच्यते आचार्याणांमध्ये शतंशतगुणःश्रेष्ठःपिताभवति । एवं पितुःसहस्रगुणितंमातापूजार्हा गौरवेण श्रेष्ठाउच्यते ॥ १४५ ॥

उत्पादकब्रह्मदात्रोर्गरीयान्ब्रह्मदःपिता ॥ ब्रह्मजन्म हि विप्रस्य प्रेत्य चेह च शाश्वतम् ॥ १४६ ॥

(१) मेधातिथिः । मुख्याचार्यसन्निधौ पितरिच संस्कर्तरिसन्निहिते तत्र क्रमः अतआह । उत्पादकोजनकः ब्रह्मदाताऽध्यापकः तौ द्वावपि पितरौ तयोः पित्रोर्गरीयान्पिता योब्रह्मदः । अतः पित्राचार्यसमवाये आचार्यः प्रथममभिवाद्यः । अत्र हेतुरूपमर्थवादमाह । ब्रह्मजन्म हि ब्रह्मग्रहणार्थंजन्म ब्रह्मजन्म शाकपार्थिवादित्वात्समासः । अस्मिन्समासे उपनयनंब्रह्मजन्म । अथवा ब्रह्मग्रहणमेव जन्म । तद्विप्रस्य शाश्वतं नित्यं प्रेत्योपकारकमिह चोपकारकम् ॥ १४६ ॥

(२) सर्वज्ञनारायणः । केवलोत्पत्तिमात्रकारिणः पितुर्ब्रह्मपिता साविञ्यामुत्पादयिता गरीयान् प्रेत्यमोक्षसाधनपर्यन्तंयोग्यतापादकत्वादिह च सर्वकर्माधिकारापादकत्वात् । शाश्वतंचिरकालस्थायिफलम् क्वचित्ब्रह्मदात्रोरिति पाठः॥१४६॥

(३) कुल्लूकः । जनकाचार्यौ द्वावपि पितरौ जन्मदातृत्वात् तयोराचार्यःपिता गुरुतरःयस्माद्विप्रस्य ब्रह्मग्रहणार्थजन्मोपनयनजन्म संस्काररूपंपरलोकइहलोके च शाश्वतंनित्यं ब्रह्मप्राप्तिफलकत्वात् ॥ १४६ ॥

(४) राघवानन्दः । आचार्याणांउपनयनपूर्वकंसाङ्गवेदाध्यापयितॄणांगर्भाधानादिदृष्टोपकारकतया पित्रोर्गरीयस्त्वेपि दृष्टादृष्टार्थतयाआचार्यएव क्षेम्योगरीयानित्याह उत्पादकेति । गरीयान्ब्रह्मदः पितेत्यत्र हेतुः ब्रह्मजन्मेतिउपनीतस्यैव वेदस्वीकृतिद्वारेह कर्माधिकारिता तद्द्वारा च स्वर्गाद्यवाप्तिः । शश्वद्ब्रह्मावाप्तिहेतुत्वाच्छाश्वतमिति भावः ॥ १४६ ॥

(५) नन्दनः । अथब्रह्मचारिणांपितुरप्याचार्योगरीयानित्याह उत्पादकेति । उत्पादकः जनयिता पिताब्रह्मपिताआचार्यः । तयोर्ब्रह्मदः पितागरीयान् । अत्रहेतुरुत्तरार्धेनोक्तः । ब्रह्मजन्म उपनयनजन्योऽतिशयः । विप्रस्यद्विजस्य । शाश्वतंजन्मान्तरेष्वप्यनुवृत्तम् ॥ १४६ ॥

(६) रामचन्द्रः । उत्पादकश्च ब्रह्मदाता च उत्पादकब्रह्मदातारौ तयोः उत्पादकब्रह्मदात्रोर्मध्ये ब्रह्मदःपिता वेदाध्यापकरूपःगायत्र्युपदेष्टा पिता गरीयान्श्रेष्ठोभवतीत्यर्थः । विप्रस्यब्रह्मजन्म प्रेत्य परलोकेइह च लोके शाश्वतंगायत्र्यु पदेशेन यज्जन्मतत्शाश्वतमित्यर्थः ॥ १४६ ॥

कामान्माता पिता चैनं यदुत्पादयतोमिथः ॥ संभूतितस्य तांविद्याद्यद्योनावभिजायते ॥ १४७ ॥

(१) **मेधातिथिः** । श्लोकद्वयमर्थवादः । मातापितरौ यदेनंदारकमुत्पादयतोजनयतो मिथोरहसि परस्परंतत्कामाद्धेतोर्मन्मथपरवशौ संभूतितस्य तांविद्यात् । तस्य दारकस्य संभवोत्पत्तिर्यद्योनो मातृकुक्षावभिजायतेऽङ्गप्रत्यङ्गानि लभते ।संभवश्च येषांभावानांते तथैव विनश्यन्ति अतः किंतेन संभवेन यस्यानन्तरभाववीविनाशः ॥ १४७ ॥

(२) **सर्वज्ञनारायणः** । कामसिद्धेरपि तत्रोद्देशात् कामादित्युक्तम् । संभूतिजन्ममात्रम् ॥ १४७ ॥

(३) **कुल्लूकः** । मातापितरौ यदेनंबालककामवशेनान्योन्यमुत्पादयतः संभवमात्रंतत्तस्य पश्वादिसाधारणम् । यद्योनौ मातृकुक्षावभिजायतेऽङ्गप्रत्यङ्गानि लभते ॥ १४७ ॥

(४) **राघवानन्दः** । पितुरुत्पादकत्वमन्यथा सिद्धमित्याह कामादिति त्रिभिः । कामान्मन्मथवशात्संभूतिंपश्वादिसाधारणींयद्यतोयोनिषुअभिजायतेअभितःपूर्वंजातोप्युत्तरत्रापि जायते रतिसुखार्थप्रवृत्तयोर्मातापित्रोःदुःखैकहेतुजनिहेतुत्वाद्धिधिक्धिक्तजन्मेत्याशयः ॥ १४७ ॥

(५) **नन्दनः** । मातापितरौ यदेनंद्विजमुत्पादयतस्तन्मिथः कामादन्योन्यरागात्प्रवृत्तंनास्योपकर्तृकिंचिद्विजोयद्योनावभिजायते तस्यद्विजस्यतांसंभूतितदभिजननंविद्यात्विविच्यात् । विविच्यमानासासंभूतिरसत्याजरामरणयुक्तानिर्णीयतइत्यर्थः । उत्तरश्लोकानुगुण्यादेवंव्याख्यातम् ॥ १४७ ॥

(६) **रामचन्द्रः** । यत्योनौअभिजायते तांसंभूतिंविद्यात्यतःयोनौअभिजायते ॥ १४७ ॥

आचार्यस्त्वस्य यांजातिंविधिवद्वेदपारगः।।उत्पादयति सावित्र्या सा सत्या साजरामरा ॥ १४८॥

(१) **मेधातिथिः** । आचार्यात्तुयत्तस्य जन्म तदविनाशि। गृहीते वेदेऽवगते च तदर्थेकर्मानुष्ठानात्स्वर्गापवर्गप्राप्तिरित्यस्य सर्वस्याचार्यमूलत्वात्सश्रेष्ठः । यांजातिमुत्पादयति यंसंस्कारमुपनयनाख्यंद्वितीयंजन्मेतिजन्मसंस्तुतिंनिर्वर्तयति सावित्र्या तदनुवचनेन साजातिः सत्या साऽजरामरा । यद्यप्येते ऽभिन्नार्थाः शब्दास्तथापीहोपनयनाख्यस्य जन्मनोमातृजन्मनः सकाशाद्गुणातिशयविवक्षायां प्रयुक्ताः । नहि जरामृत्यूप्राणिनामिव जातेः संभवंतः । अविनाशित्वंत्वेकेनैव शब्देन शक्यते प्रतिपादयितुम् । नच तत्प्रतिपाद्यते वेदपारगआचार्योयांजातिंविधिवत्सावित्र्या उपयनाङ्गकलापेन सावित्रीशब्दस्य तल्लक्षणत्वात् उत्पादयति सा श्रेयसीति पदयोजना । जातिर्जन्म ॥ १४८ ॥

(२) **सर्वज्ञनारायणः** । यज्जातीयजन्मगौरवेण धर्मेण तत्तद्विषये कर्तव्येन हेतुभूतेन विधिवदुपनयनविधिना सावित्र्या मातृभूतया सासत्या सत्यलोकप्राप्तिहेतुः अजराअजरत्वंदेवत्वं तत्प्राप्तिहेतुत्वात् अमराअमृतत्वस्य मोक्षत्वस्यहेतुः ॥ १४८ ॥

(३) **कुल्लूकः** । आचार्यःपुनर्वेदज्ञोऽस्य माणवकस्य यांजातियज्जन्म विधिवत्सावित्र्येति साङ्गोपनयपूर्वकसावित्र्यनुवचनेनोत्पादयति सा जातिःसत्याऽजराऽमरा ब्रह्मप्राप्तिफलत्वादुपनयनपूर्वकस्य वेदाध्ययनतदर्थज्ञानानुष्ठानैर्निष्कामस्य मोक्षलाभात् ॥ १४८ ॥

(४) **राघवानन्दः** । ब्रह्मजन्मब्रह्मसावित्रीतद्ग्रहणमेव जन्म ब्रह्मग्रहणयोग्यंवा ब्रह्मजन्मनःपुनःप्रायेण न जायतएवेत्याह आचार्यइति । :अस्यमाणवकस्य सावित्र्या सकलरहस्यसावित्र्युपदेशेन सासत्येत्यादिताद्दशस्य समानज-

न्मानुष्ठितकर्मजशुद्ध्याविरक्तस्य मुक्त्युपपत्तेरिति तमेतंवेदानुवचनेन ब्राह्मणा विविदिषन्तितथा परीक्ष्य लोकान्कर्मचितान्ब्राह्मणोनिर्वेदमायांनास्त्यकृतःकृतेन सत्यंज्ञानमनन्तंब्रह्म ब्रह्म वेदब्रह्मैव भवतितदात्मानमेवावेदअहंब्रह्मास्मीति श्रुतेः ॥ १४८ ॥

(५) नन्दनः । आचार्याज्जन्म नैवंविधमित्याहआचार्यस्त्विवति । जातिजन्म । सत्याहितनियता । तस्मात्तुस्थिरमेतत्तगरीयान्ब्रह्मदः पितेति ॥ १४८ ॥

(६) रामचन्द्रः । आचार्यःसाविभ्युपदेशात् तस्यतां जातिंउत्पादयति साजातिःसत्या नित्यासा अजरा जातिः अमराजातिर्भवत्येव ॥ १४८ ॥

अल्पंवा बहु वा यस्य श्रुतस्योपकरोति यः॥ तमपीह गुरुंविद्या च्छ्रुतोपक्रियया तया॥ १४९॥

(१) मेधातिथिः । यउपाध्यायो यस्य माणवकस्योपकरोति श्रुतस्य श्रुतेनेत्यर्थः । अल्पंवा बहुवाक्रियाविशेषणमेतत्।तमपि स्वल्पश्रुतोपकारिणंगुरुंविद्यात्। एवंतु योजना ज्यायसी। यस्य श्रुतस्य सामानाधिकरण्यवेदविषयस्य वेदाङ्गविषयस्य वा शास्त्रान्तरविषयस्य तर्ककलाशास्त्रस्य यदल्पंबहुवा तेनोपकरोतीत्यध्याहारः। श्रुतंच तदुपक्रिया चासौ श्रुतोपक्रिया तया उपकारक्रियया तद्धेतुत्वाच्छ्रुतमुपक्रियेति सामानाधिकरण्यम्। गुरुवृत्तिस्तत्रकर्तव्या तद्यपदेशोवा तत्राचार्यादिशब्दवत्स्मर्यते ॥ १४९ ॥

(२) सर्वज्ञनारायणः । क्वचिद्गुरुराह्वानीयो गुरुरनुगन्तव्यइत्यादौ गुरुपदमध्यापकमात्रवाचि श्रूयते । तदर्थंगुरुसंज्ञायानानार्थतामाह अल्पंवेति । यस्य श्रुतस्य शाब्दज्ञानस्यांशे यउपकरोति । अतिशयमापादयतीत्यर्थः ॥ १४९ ॥

(३) कुल्लूकः । श्रुतस्य श्रुतेनेत्यर्थः । उपाध्यायोयस्य शिष्यस्याल्पंवा बहुवा कृत्वा श्रुतेनोपकरोति तमपीह शास्त्रे तस्य गुरुंजानीयात्। श्रुतमेवोपक्रिया तया श्रुतोपक्रियया ॥ १४९ ॥

(४) राघवानन्दः । वेदार्थोपदेष्टृत्वंगुरुत्वे हेतुर्नतु वयोबाहुल्यादीत्याह सार्थवादंदशभिः । अल्पमितियस्ययंप्रति श्रुतस्य वेदस्य श्रुतेन वेदशास्त्रतर्कव्याकरणकलादिकेन तदर्थेनाल्पमप्युपकरोति यस्तंगुरुंविद्यादित्यर्थः । श्रुतमेवोपक्रियाउपकारस्तया ॥ १४९ ॥

(५) नन्दनः । आचार्यगरीयस्त्वमेवोक्तंप्रकारान्तरेणप्रतिपादयति अल्पंवेति । अल्पविद्याप्रदमपिगुरुंविद्यात्बहुविद्याप्रदंकिंपुनरित्यभिप्रायः ॥ १४९ ॥

(६) रामचन्द्रः । यःयस्य श्रुतस्य अध्ययनस्यअल्पंवा बहु वाउपकरोतिउपकारयेत् तमपिइह गुरुंविद्यात् । तया श्रुतोपक्रियया श्रुतंअध्यापनंतस्यउपकारेणेत्यर्थः ॥ १४९ ॥

ब्राह्मस्य जन्मनः कर्त्ता स्वधर्मस्य च शासिता ॥ बालोपि विप्रो वृद्धस्य पिता भवति धर्मतः ॥ १५० ॥

(१) मेधातिथिः । ब्रह्मग्रहणार्थंजन्म ब्राह्ममुपनयनंतस्य कर्ता स्वधर्मस्य शासिता उपदेष्टा वेदार्थव्याख्यानेन सताबालोपि ब्राह्मणोवृद्धज्येष्ठस्य तर्ककलाशास्त्रस्यन्यायदल्पंवा बहुवा तेन पिता भवति पितृतुल्या तत्रवृत्तिः कर्तव्या ज्येष्ठस्यापि । कथंपुनः कनीयाञ्ज्येष्ठमुपनयते अष्टमे त्युपनयनंयावच्च नाधीतश्रुतवेदस्तावन्नाचार्यकरणविधावधिक्रियते एवंतर्हि नोपनयनमत्र ब्रह्म जन्म किंतर्हि स्वाध्यायग्रहणमेव तस्य कर्ताध्यापयिता । स्वधर्मस्य वेदार्थस्य शासिता

व्याख्याता पिता भवति धर्मतः पितृधर्मास्तत्र कर्तव्याः । धर्मतइति धर्मनिमित्तंतत्र पितृत्वम् । नच ते धर्माध्यापक व्याख्यांशैः पितृसंबन्धिनः सिद्धाःसन्ति । अतोविधीयते ब्राह्मणवत्क्षत्रिये वर्तितव्यमिति ॥ १५० ॥

(२) सर्वज्ञनारायणः । ब्रह्म वेदस्तस्याध्ययनेन यस्तद्विशिष्टस्वरूपलाभः सब्राह्मंजन्म तस्य यःकर्ता । न त्वेते नोपनेतृत्वमिष्टं बालोपीत्यनेन विरोधात् कथायामध्यापयामासेत्यभिधानाच्च । योवास्वधर्मशासिता बालोल्पवयाः । वृद्धस्याधिकवयसः ॥ १५० ॥

(३) कुल्लूकः । ब्रह्मश्रवणार्थंजन्म ब्राह्ममुपनयनयनंस्वधर्मस्य शासिता वेदार्थव्याख्याता तादृशोऽपि बालोवृद्धस्य ज्येष्ठस्य पिता भवति धर्मतइति पितृधर्मास्तस्मिन्ननुष्ठातव्याः ॥ १५० ॥

(४) राघवानन्दः । ब्राह्मणस्य ब्रह्मग्रहणयोग्यस्यउपनयनाभावेन पितृमातृतोजन्मसत्त्वेपि शूद्रादेरिवानधिकारात्धर्मस्य शासितोपदेष्टा च बालोपि पिता स्याद्धर्मतोधर्मशास्त्रप्रामाण्यात् ॥ १५० ॥

(५) नन्दनः । ब्राह्मस्यवैदिकस्यजन्मनः उपनयनस्यकर्तापिता भवति पितृकल्पोभवति गुरुतरोभवतीत्यर्थः ॥ १५० ॥

(६) रामचन्द्रः । ब्राह्मणस्यजन्मनःकर्ता वेदाध्यापकःच पुनःस्वधर्मस्य शासिताउपदेष्टा बालोपि विप्रःवृद्धस्य शिष्यस्य धर्मतःपिता भवति ॥ १५० ॥

अध्यापयामास पितॄन्शिशुरांगिरसः कविः ॥ पुत्रकाइति होवाच ज्ञानेन परिगृह्य तान् ॥१५१ ॥

(१) मेधातिथिः । पूर्वस्य पितृवद्वृत्तिविधेरर्थवादोयंपरकृतिनामा । अङ्गिरसः पुत्रः कविर्नाम शिशुर्बालःपितृतुल्यान्पितृव्यमातुलतत्पुत्रादीनधिकवयसोऽध्यापयाञ्चकाराध्यापितवान् । सचाव्हाननिमित्तेषु तान्पुत्रकाआगच्छतइत्याजुज्ञानेन परिगृह्यतान्स्वीकृत्य शिष्यान्कृत्वा ॥ १५१ ॥

(२) सर्वज्ञनारायणः । पितॄन् अग्निष्वात्तादीन् । कविःकविनामा । ज्ञानेनोपदेशेन । परिगृह्य शिष्यतांनीत्वा ॥ १५१ ॥

(३) कुल्लूकः । प्रकृतानुरूपार्थवादमाह अध्यापयामासेति । अङ्गिरसः पुत्रोबालः कविर्विद्वान्पितृन्गौणान्पितृव्यतत्पुत्रादीनधिकवयसोऽध्यापितवान् । तान्ज्ञानेन परिगृह्य शिष्यान्कृत्वा पुत्रकाइतिआजुहावइति । ह इत्यव्ययंपुरावृत्तसूचनार्थम् ॥ १५१ ॥

(४) राघवानन्दः । अत्रेतिहासमाह अध्यापयामासेति । आङ्गिरसःअङ्गिरसःपुत्रःकविःक्रान्तदर्शी ज्ञानेन तद्धेतुना वेदाध्यापनेन परिगृह्यशिष्यतांनीत्वा ॥ १५१ ॥

(५) नन्दनः । मन्त्रदस्यबालस्यापि पितृत्वमवस्थापयितुमितिहासंश्लोकत्रयेणोदाहरति अध्यापयामासेति । परिगृह्यआहूय ॥ १५१ ॥

(६) रामचन्द्रः । शिशुःआङ्गिरसःकविःपितॄन्अध्यापयामासतान्पितॄन्ज्ञानेन ज्ञानोपदेशेन परिगृह्य स्वीकृत्य हे पुत्रकाइत्युवाच ॥ १५१ ॥

ते तमर्थमपृच्छन्त देवानागतमन्यवः ॥ देवाश्चैतान्समेत्योचुर्न्याय्यंवः शिशुरुक्तवान् ॥ १५२ ॥

(१) मेधातिथिः । ते पित्रादिस्थानीया पुत्रकाइत्याव्हानेनागतमन्यवउत्पन्नक्रोधास्तमर्थंपुत्रशब्दाव्हानदेवान्पृष्ट-

वन्तअनेन बालेन वयमेवमाहूयामहे किमेतद्युक्तंतेदेवाः पृष्टाः सन्तः सर्वे समवायंकृतवन्तः समेत्य ऐकमत्यंस्थापयित्वै-तान्कवेः पितॄनूचुरुक्तवन्तोन्याय्यंयुक्तंवोयुष्मान् शिशुरुक्तवान् ॥ १५२ ॥

(२) **सर्वज्ञनारायणः** । तमर्थंकिमेतदस्य युक्तंन वेति ॥ १५२ ॥

(३) **कुल्लूकः** । ते तमर्थमपृच्छन्तेति तेपितृतुल्याः पुत्रकाइत्युक्ताअनेन जातक्रोधाः पुत्रकशब्दार्थंदेवान्पृष्टवन्तः । देवाश्च पृष्टामिलित्वाएतानवोचन्युष्मानयच्छिशुःपुत्रशब्देनोक्तवानतद्युक्तम् ॥ १५२ ॥

(४) **राघवानन्दः** । ते पितरस्तमर्थंपुत्रकाइति शब्दार्थंआगतमन्यवःपुत्रकाइत्याव्हानेन जातमन्यवोमन्युंप्राप्ताः एतान्पितॄन् ॥ १५२ ॥

(६) **रामचन्द्रः** । ते पितरःआगतमन्यवःदेवान्प्रतिअर्थंपुत्रमित्यस्यार्थंअपृच्छन्त । देवास्तान्समेत्यइतिऊचुःवः-यष्माकंशिशुःउक्तवान्यत्तदपि योग्यमित्यर्थः ॥ १५२ ॥

अज्ञोभवति वै बालः पिता भवति मन्त्रदः ॥ अज्ञंहि बालमित्याहुः पितेत्येव तु मन्त्रद॥१५३॥

(१) **मेधातिथिः** । यस्मान्न च वयसास्वल्पेन बालोभवति किंतर्ह्यज्ञोमूर्खोवृद्धोपि यः । मन्त्रदउपलक्षणम् । मन्त्रान्वेदान्योददात्यध्यापयति विवृणोति च सपिता भवति । वै शब्दआगमान्तरसूचकः । देवानाप्यषआगमः पुराणएव । तथा चैनिह्यसूचकःपरोपदेशआहुरिति । अज्ञंमूर्खंबालमित्याहुरस्मत्पूर्वेपि । पिते ति मन्त्रदम् । इतिकरणंस्वरूपपरतांबोधयति यतः परतः श्रूयते । बालइत्येतेन शब्देनाज्ञमात्रः । अतश्च बालशब्दाद्द्वितीयायाअभावः छान्दोग्ये शैशवब्राह्मणमेतद्वस्तुतः स्मृतिकारेण वर्णितम् ॥ १५३ ॥

(२) **सर्वज्ञनारायणः** । अज्ञंहीतिप्रसिद्धतांभिधानंदार्ढ्यार्थम् ॥ १५३ ॥

(३) **कुल्लूकः** । अज्ञइति । वैशब्दोऽवधारणे अज्ञएव बालोभवति न त्वल्पवयाः । मन्त्रदः पिता भवति । मन्त्रग्रहणंवेदोपलक्षणार्थम् । योवेदमध्यापयति व्याचष्टे सपिता ॥ १५३ ॥

(४) **राघवानन्दः** । न्याय्यत्वेहेतुःअज्ञइत्यादि । बालःसंस्कार्यत्वात्पिता मन्त्रप्रदानेन संस्कारकत्वात् । पितेति नद्वितीया । इतिपरत्वाभावात् ॥ १५३ ॥

(६) **रामचन्द्रः** । अज्ञःशुद्धापशब्दज्ञानरहितः वैअवधारणार्थः बालएव भवति । सएव बालःमन्त्रतःमन्त्रोपदेशात् ज्ञानोपदेशात्पिता भवति तथा हि निश्चयेन अज्ञंबालं आहुः । मन्त्रदउपदेष्टापितेत्येव ज्ञेयमिति ॥ १५३ ॥

न हायनैर्न पलितैर्न वित्तेन न बन्धुभिः ॥ ऋषयश्चक्रिरे धर्मंयोनूचान सनोमहान् ॥ १५४ ॥

(१) **मेधातिथिः** । इयमपराध्यापकप्रशंसा । हायनशब्दः संवत्सरपर्यायः । न बहुभिर्वर्षैः परिणतवयामहान्पूज्योभवति न पलितैः केशश्मश्रुरोमभिः शुक्लैर्न वित्तेन बहुना न बन्धुभिः प्रागुक्तानि मान्यस्थानान्यापद्यन्ते । समुदितैर्न महान्भवति किंतर्हि एकयैव विद्यया । यस्मादृषयश्चक्रिरे ऋषिर्दर्शनान्निःशेषवेदार्थदर्शिनोनिश्चित्येमंधर्मंव्यवस्थापितवन्तः । योनूचानः अनुवचनमध्यापनंकृत्स्नाङ्गस्य वेदस्य सनोस्माकंमहाञ्श्रेष्ठः। करोति व्यवस्थापने वर्तते नाभूतजनने ॥ १५४ ॥

---

(१५४) धर्मं=पूर्वं (ड)

(२) **सर्वज्ञनारायणः** । हायनैर्वर्षैर्बहुभिर्गतैरिति तद्वत्सरकर्तव्यसोमयागादिकमबाहुल्यमुक्तम् । पलितैरिति वयोबाहुल्यम् । अनूचानः साङ्गवेदाध्येता ॥ १५४ ॥

(३) **कुल्लूकः** । अत्रैवहेतुमाह यस्मात्पूर्वेऽपि मुनयो ऽङ्गबालमित्यूचुः मन्त्रदंच पितेत्येवाब्रुवन्नित्याह न हाय-नैरिति । न बहुभिर्वर्षैर्नकेशश्मश्रुलोमभिः शुक्लैर्न बहुना धनेन न पितृव्यत्वादिभिर्बन्धुभावैःसमुदितैरप्येतैर्नमहत्त्वंभवति किंत्वृषयइमंधर्मकृतवन्तः । यःसाङ्गवेदाध्येता सोऽस्माकंमहान्संमतः ॥ १५४ ॥

(४) **राघवानन्दः** । तत्रार्थे ऋष्युक्तिःप्रमाणमित्याह नहायनैरिति । हायनैरब्दैर्वयोबाहुल्येन जराकृतकेशपा-लित्यैकेशधावल्यैर्वाबन्धुभिःपुत्रपौत्राद्यैर्वाएतैर्व्यस्तसमस्ततयावाधिक्ये न महत्त्वंकिंतर्हि यःअनूचानःसाङ्गवेदाध्येता तस्यै-व महत्त्वमित्याह ऋषयइत्यादिना । धर्ममयंधर्मइति निर्णयंस्तुतिमात्रंवा ॥ १५४ ॥

(५) **नन्दनः** । श्रैष्ठ्यकारणंवैदुष्यमित्याह नहेति । हायनैः वयोभिः । पलितैः वार्द्धकैः । बन्धुभिः कुलेन । धर्मश्रैष्ठ्यापादकंन्यायमनूचानः वेदवित् । नः अस्माकम् । ब्राह्मणानांमध्येमहान्विशिष्टः ॥ १५४ ॥

(६) **रामचन्द्रः** । बहुभिःगतहायनैःपलितैःकेशैः न च सच्चरित्रैःन बन्धुभिःश्रेष्ठतांयाति । यःअनूचानःवेदपारगःसः-नःअस्माकंमते महान्श्रेष्ठःइति । धर्मऋषयःचक्रिरेइत्यर्थः ॥ १५४ ॥

विप्राणां ज्ञानतोज्यैष्ठ्यं क्षत्रियाणांतु वीर्यतः॥ वैश्यानांधान्यधनतः शूद्राणामेवजन्मतः॥१५५॥

(१) **मेधातिथिः** । अयमप्यर्थवादएव । यदुक्तंवित्तादिभ्यः समुदितेभ्यःकेवलापि विद्या ज्यायसीति तदेव सम्प्र-श्नमनेन निर्दिश्यते । ब्राह्मणानांज्ञानेन ज्यैष्ठ्यंन वित्तादिभिः क्षत्रियाणांवीर्यतः वीर्यद्रव्यस्य कौशलंदृढप्राणता च वैश्या-नांधान्यधनतः । धान्यस्य पृथगुपादानाद्धनशब्दोहिरण्यादिवचनः ब्राह्मणपरिव्राजकवत् । बहुधनोवैश्यःसज्येष्ठः । आद्या-दित्वात्तृतीयार्थे तसिः । हेतौतृतीया ॥ १५५ ॥

(२) **सर्वज्ञनारायणः** । ज्ञानतोज्ञानाधिक्येन ॥ १५५ ॥

(३) **कुल्लूकः** । ब्राह्मणानांविद्यया क्षत्रियाणांपुनर्वीर्येण वैश्यानांधान्यवस्त्रादिधनेन शूद्राणामेव पूर्वजन्मना श्रेष्ठत्वम् । सर्वत्रतृतीयार्थेतसिः ॥ १५५ ॥

(४) **राघवानन्दः** । विप्राणांज्ञानतोज्यैष्ठ्यमितिवदंस्तत्प्रतियोगितया ऽन्येषामपि तदाह विप्राणामिति । ज्ञानइत्यादिचतुर्ष्वपि तृतीयार्थे तसिः । वीर्यतःशस्त्रकौशलेन केनापि धनविद्यादिमत्त्वेपि शूद्रस्य जन्मनैवेत्यवधार-णार्थः ॥ १५५ ॥

(५) **नन्दनः** । ब्राह्मणानांज्ञानतएवश्रैष्ठ्यंक्षत्रियादीनांतु निमित्तान्तरादित्याह विप्राणामिति । जन्मतः वयस्तः । क्षत्रियादीनामुपन्यासोदृष्टान्तार्थः ॥ १५५ ॥

न तेन वृद्धोभवति येनास्य पलितंशिरः ॥ योवै युवाप्यधीयानस्तंदेवाः स्थविरंविदुः ॥ १५६ ॥

(१) **मेधातिथिः** । न तेन वृद्धउच्यते येनास्य पलितंधवलंशिरः शिरःस्थाःकेशाः । कथंतर्हि योवैयुवापि तरुणो-ऽपि अथ चाधीते तंदेवाः स्थविरंविदुः ब्रुवते देवाः किल सर्वस्य वेदितारइति प्रशंसा ॥ १५६ ॥

(२) **सर्वज्ञनारायणः** । स्थविरंस्थविरपदवाच्यम् । येन वयोबाहुल्यादिना हेतुना ॥ १५६ ॥

(३) **कुल्लूकः** । न तेन वृद्धोभवति येनास्य शुक्लकेशंशिरः किंतु युवाऽपि सन्विद्वांस्तंदेवाः स्थविरंजानन्ति॥१५६॥

(४) **राघवानन्दः** । अत्रार्थेदेवसंमतिमप्याह न तेनेति । शिरसःपालित्यंपक्वकेशतात्वक्शैथिल्यंवा । अधीयानो-अध्ययनोद्यतोपि किमुताधीतवेदः ॥ १५६ ॥

(५) **नन्दनः** । उक्तमर्थंनिगमयति नेति ॥ १५६ ॥

(६) **रामचन्द्रः** । अस्य शिरःयेन वयसा पलितंभवेत्तेनवयसा वृद्धोन भवतीत्यर्थः ॥ १५६ ॥

यथा काष्ठमयोहस्ती यथा चर्ममयोमृगः ॥ यश्च विप्रोनधीयानस्त्रयस्ते नाम बिभ्रति ॥१५७॥

(१) **मेधातिथिः** । इयमध्ययनाध्येतृस्तुतिः । काष्ठमयोदारुणो यः क्रियते क्रकचादिना हस्त्याकृतिः सयथा निष्फलोन हस्तिकार्यराज्ञांशत्रुवधादि करोतिएवंयोब्राह्मणोनाधीते सकाष्ठतुल्योन कचिदधिकारी । चर्ममयोमृगः चर्मविकारोऽन्योऽपि योमृगः सनिष्फलोनाखेटकादिकार्यंकरोति । त्रयएते नाममात्रंबिभ्रति न तस्यार्थम् ॥ १५७ ॥

(२) **सर्वज्ञनारायणः** । काष्ठमयोहस्तीति लेशतोपि तदन्वयाभावः चर्ममये मृगे लेशतोऽन्वयासंभवात् नाममात्रंबिभ्रति । अतोयद्विप्रेकार्यं तदनधीयानेन कुर्यादित्यर्थः ॥ १५७ ॥

(३) **कुल्लूकः** । यथा काष्ठघटितोहस्ती यथा चर्मनिर्मितोमृगः यश्च विप्रोनाधीते त्रयएते नाममात्रंदधति । न तु हस्त्यादिकार्यंशत्रुवधादिकंकर्तुंक्षमन्ते ॥ १५७ ॥

(४) **राघवानन्दः** । अनधीयानस्य दानापात्रत्वंवदंस्तंसदृष्टान्तंनिन्दति यथेति द्वाभ्याम् । काष्ठमयःकृत्रिमः नाम बिभ्रति मृगइत्यादि नामध्रियन्ते न तु ते मृगादयःतत्कार्याकारित्वात् ॥ १५७ ॥

(५) **नन्दनः** । अनधीयाननिन्दामधीयानप्रशंसार्थंप्रसङ्गादाह येथति । नामबिभ्रति नामैव बिभ्रति ब्राह्मणशब्दमेव-बिभ्रति न तस्य प्रवृत्तिनिमित्तमित्यर्थः ॥ १५७ ॥

(६) **रामचन्द्रः** । विप्रःयथा चर्ममयोमृगःतथाअनधीयानःनाम केवलंबिभर्तीत्यर्थः ॥ १५७ ॥

यथा षण्ढोफलः स्त्रीषु यथा गौर्गवि चाफला ॥ यथा चाज्ञे ऽफलंदानं तथा विप्रोनृचो फलः ॥ १५८ ॥

(१) **मेधातिथिः** । षण्ढोनपुंसकउभयव्यञ्जनोऽशक्तः स्त्रीगमनेयथा स्त्रीष्वफलः यथा गौर्गवि स्त्रीगौः स्त्रीगव्यांएवं तथा विप्रोऽनृचोऽनधीयानोऽफलः ॥ १५८ ॥

(२) **सर्वज्ञनारायणः** । षण्ढोनपुंसकं । गौरिति गवीतिच स्त्रीलिंगेपदे । अज्ञेस्थावरादौ अफलंदानं प्रत्युपकाराद्यभावात् । अनृचोअवेदः ऋक्पदंवेदोपलक्षणं अफलोदातुः फलाहेतुः ॥ १५८ ॥

(३) **कुल्लूकः** । यथा नपुंसकंस्त्रीषु निष्फलं यथा चस्त्री गवी गव्यामेव निष्फला यथा चाज्ञे दानफलं तथा ब्राह्मणोऽप्यनधीयानोनिष्फलः श्रौतस्मार्तकर्मानर्हतया तत्फलरहितः ॥ १५८ ॥

(४) **राघवानन्दः** । यथाषण्ढोनपुंसकःदृष्टादृष्टकार्यशून्यःगौःस्त्रीगवान्तरंगवि वत्सोत्पादनयोग्यायांफलमण्डकोशस्तच्छून्योवातथाअनृचःवेदशून्यःदेयद्रव्यादिफलाजनकत्वात् । ब्राह्मस्येत्यादिनवश्लोकाअध्ययनस्तुत्यर्थाः ॥१५८॥

(५) **नन्दनः** । ब्राह्मण्येनावाप्यं फलमनधीयानस्यनसिध्यतीत्याह यथाषण्ढइति । गौरित्यपहृतपुंभावोबलीवर्दोऽभिमेतः । अफलइतिपाठः ॥ १५८ ॥

(६) **रामचन्द्रः** । षण्ढःस्त्रीषु यथाअफलः भवत्येवंयथागविगौःसंयोगे विफला भवति यथाअज्ञेमूर्खेदत्तंदानंअ-फलंभवति निष्फलमित्यर्थःतथा अनृचःविप्रःअफलःभवतिऋच्मात्रमपि नाधीयानइत्यर्थः ॥ १५८ ॥

अहिंसयैव भूतानांकार्यंश्रेयोनुशासनम्॥वाक्चैव मधुरा श्लक्ष्णा प्रयोज्या धर्ममिच्छता॥१५९॥

(१) **मेधातिथिः** । समाष्टश्लोकाःअध्येतृवेदित्रोःप्रशंसार्थाअतिक्रान्ताः । इदानीमश्रद्धस्य शिष्यस्याधीयानस्ये-तस्ततश्चित्तंव्याक्षिप्यते । अध्यापयितुः क्रोधोत्पत्तौ ताडनपरुषभाषणाद्यमत्यर्थंप्राप्तंनिषिध्यते । अहिंसयाअताडनेन भूतानांभार्यापुत्रदासशिष्यसोदर्याणांश्रेयोर्थमनुशासनंकार्यम् । भूतग्रहणान्माशिष्यस्यैव विज्ञायि । दृष्टादृष्टफलावाप्तिःश्रेयः तदर्थमनुशासनमग्रन्थकोवोपदेशः शास्त्राध्यापनव्याख्यानेवा । यथा संभव मतिताडनंक्रोशनंचात्र प्रतिषिध्यते । ईषत्ताडनंत्वभ्यनुज्ञातमेव रज्ज्वा वेणुदलेन वेति । कथंतर्हि मार्गेस्थाप्याः । वाक्चैव मधुरा सान्त्वपूर्विका प्रियया वाचा श्लक्ष्णया नोच्चैरुद्धतेनकाकरुक्षेण स्वरेण प्रियेणापि अधीष्वपुत्रक मा चित्तमन्यत्राबध्धाः श्रद्धया समापय शीघ्रंप्रपाठकंततक्षणंविहरिष्यसिशिशुभिः सवयोभिः । यस्तुन तथा श्रद्धामुपैति तस्योक्तोविधिः वेणुदलेनेति । प्रयो-ज्यावक्तव्याधर्ममिच्छता । एवंसातिशयोध्यापनधर्मोभवति ॥ १५९ ॥

(२) **सर्वज्ञनारायणः** । अहिंसयाताडनाद्यकुर्वतः उपदेशत्वेन मधुरार्थतः श्लक्ष्णामृदुः शब्दतः अतः शिष्योपि । नाकस्मात्ताड्योनाप्रियंवाच्यइत्यर्थः । रज्ज्वा वेणुदलेन वेति त्ववश्यानुशासनीयपुत्रादिविषयम् ॥ १५९ ॥

(३) **कुल्लूकः** । भूतानांशिष्याणांप्रकरणाच्छ्रेयोऽर्थमनुशासनमनतिहिंसया कर्तव्यंरज्ज्वा वेणुदलेन वेत्*यहिंसाया-अभ्यनुज्ञानात् । वाणी मधुरा प्रीतिजननी श्लक्ष्णया नोच्चैरुच्यते सा शिष्यशिक्षायै धर्मबुद्धिमिच्छता प्रयोक्तव्या ॥१५९॥

(४) **राघवानन्दः** । वाङ्मनसयोःशुद्धौ गुरोःशिष्यस्य वेदाध्ययनंसाधु तत्रादौ गुरुं शिक्षयति अहिंस-यैवेति त्रिभिः । भूतानांशिष्याणांप्रकरणात्हिंसात्रोपकोसलवद्बहुकालव्यापि दुःखंउत्तंकादिवद्दक्षिणादानंवाअद्रोहस्यव-क्ष्यमाणत्वात् । श्रेयोनुशासनंश्रेयःपुमर्थचतुष्टयसाधनत्वात्वेदाध्यापनस्य तस्यानुशासनंदानंमधुराप्रीतिजननीअतएव श्लक्ष्णामृद्वीधर्ममिच्छता । अनुद्वेगकरंवाक्यंसत्यंप्रियहितंच यत् । स्वाध्यायाभ्यसनंचैववाङ्मयंतपउच्यते ॥ इतिस्मृतेः । शिष्यानुग्रहोवाधर्मः । तमिच्छता ॥ १५९ ॥

(५) **नन्दनः** । अथब्रह्मचारिणांनियमान्तरमाह अहिंसयेति । श्रेयोऽनुशासनमहिंसया सहैव धर्ममभीप्सताका-र्यमहिंसाश्रेयोऽनुशासनंकुर्यादितियावत् । अथवाहिंसायुक्तंश्रेयोऽनुशासनंनकुर्यादिति ॥ १५९ ॥

(६) **रामचन्द्रः** । भूतानांप्राणिनांअहिंसयैव श्रेयःकार्यइति वा श्रेयोवेदःतस्य वेदस्यानुशासनंधर्ममिच्छता पुंसा वाक्मधुराश्लक्ष्णा प्रयोज्या ॥ १५९ ॥

यस्य वाङ्मनसे शुद्धे सम्यग्गुप्ते च सर्वदा ॥ स वै सर्वमवाप्नोति वेदान्तोपगतंफलम् ॥१६०॥

(१) **मेधातिथिः** । यस्याध्यापयितुरन्यस्य वासंक्षोभहेतौ सति वाङ्मनसी शुद्धे न कालुष्यं गच्छतः सम्यग्गुप्ते चोत्पन्नेपि कालुष्ये न परद्रोहव्यवसायोन च तत्पीडार्थः कर्मारम्भएतत्सम्यग्गोपनंवाङ्मनसयोः । सर्वदा ग्रहणंपुरुषमात्रधर्मार्थं-नाध्यापयितुरेव । अध्यापनकाले सर्वे सर्वमवाप्नोति । वेदान्तावेदसिद्धान्ताः सिद्धशब्दस्यात्यन्तंसिद्धइति सिद्धे शब्दार्थसं बन्धइत्यत्रात्यन्तशब्दस्येव लोपः । वैदिकेषु वाक्येषु यः सिद्धान्तोव्यवस्थितार्थोऽस्य कर्मणइदंफलमित्युपगतअभ्यु-

* वेत्य=वेत्यल्प (अ)

पगतोवेदविद्भिस्तत्फलंसर्वंप्राप्नोति। एवंच वदता वाङ्मनस संयमस्यानेन वाक्येन क्रतुषु पुरुषोभयधर्मतोक्ता भवति। केवलपुरुषधर्मातिक्रमे ह्रसति क्रतुवैगुण्येऽसंयतोपि वाङ्मनसाभ्यांकिमिति कृत्स्नंफलंनप्राप्नोति येनोच्यते संयमी सर्वमाप्नोतीति। अन्ये तु वेदान्तात्रहस्यब्राह्मणान्व्याचक्षते तेषु यदभ्युपगतंफलं नित्यानांकर्मणांनिष्फलानांच यमनियमानांतत्फलंब्रह्मप्राप्तिलक्षणं सर्वमाप्नोति। कथंपुनर्नित्यानि ब्रह्मप्राप्त्यर्थानीति चेदस्ति केषांचिद्दर्शनम्। अथवा वेदस्यान्तोऽध्यांपनसमाप्तिस्ततोयत्फलमाचार्यकरणविधिस्तत्प्राप्नोति। एवंतुव्याख्यानेऽध्यापनविध्यर्थतैव स्यात्॥ १६०॥

(२) **सर्वज्ञनारायणः**। वक्ष्यमाणपूर्वोक्तवाङ्माधुर्यादिस्तुतिः यस्येति। वाक्शुद्धिर्माधुर्यादि। मनः शुद्धिरक्रोधादि। वाचोगुप्तताराक्षा अनृतादिनिवर्तनात् मनसोनिष्टध्यानादिनिवर्तनात्। वेदान्तादुपगतं अधिगतंमोक्षाख्यम्॥१६०॥

(३) **कुल्लूकः**। इदानींपुरुषमात्रस्य फलंधर्मंवाङ्मनःसंयममाह नाध्यापयितुरेव। यस्य वाङ्मनश्चोभयंशुद्धंभवति। वागनृतादिभिरदुष्टा मनश्च रागद्वेषादिभिरदूषितंभवति एते वाङ्मनसी निषिद्धविषयप्रकरणे सर्वदा यस्य पुंसः सुरक्षिते भवतःसवेदान्तेऽवगतंसर्वंफलंसर्वज्ञत्वंसर्वेशानादिरूपंमोक्षलाभादवाप्नोति॥ १६०॥

(४) **राघवानन्दः**। यन्मनसाध्यायति तद्वाचा विलपतीति श्रुतेः तत्कारणस्य मनसोपि शुद्धिःकार्येत्याह। यस्येति यस्य गुरोःसंक्षोभहेतौसति क्रोधरागद्वेषानभिभवत्वंमनसःशुद्धिःवाचःशुद्धिरुक्तागुप्तेअसत्यादितोरक्षिते प्रकर्षेण सर्वात्मकंवेदान्तोपगतंब्रह्म वागिति दृष्टान्ततया वाचइव मनसःशुद्धिःकार्येति भावः॥ १६०॥

(५) **नन्दनः**। वाचः शुद्धिरसत्यादिवर्जनंमनसोरागादिवर्जनम्। सम्यग्गुप्ति स्तत्राप्रमत्तत्वम्। सर्वदाऽऽश्रमान्तरेपिवेदांतोपगतंवेदान्तोवेदाध्ययनसमाप्तिःतेनोपगतंपरिपूर्णवेदाध्ययनोपलभ्यमित्यर्थः॥ १६०॥

(६) **रामचन्द्रः**। यस्य पुंसःवाङ्मनसे शुद्धे भवतः। च पुनः। सम्यक्गुप्ते रक्षिते व्यर्थालापरहितेइत्यर्थः सःवेदान्तोपगतंफलंवेदेउक्तंफलंसर्वमाप्नोति॥ १६०॥

नारुन्तुदःस्यादार्त्तोपि न परद्रोहकर्मधीः॥ ययास्योद्विजते वाचा नालोक्यांतामुदीरयेत्॥ १६१॥

(१) **मेधातिथिः**। अयमपरः पुरुषार्थमात्रधर्मः। अरूंषि मर्माणि तुदति व्यथयतीत्यरुंतुदोमर्मस्पर्शीनीर्वाचोऽत्यन्तोद्वेजनकरीराक्रोशवाचोयोवदति। आर्त्तः पीडितोऽपिपरेण नतादृशमप्रियंभाषेत। तथा परद्रोहः परापकारः तदर्थंकर्म तद्धीश्च न कर्तव्या। अथवा परद्रोहश्चासौ कर्म च तत्र धीः बुद्धिरपि न कर्तव्या। यया वाचा नर्मप्रयुक्तयापि परउद्विजते अथ च तांवाचंनोदीरयेत् वाक्यैकदेशमपि तादृशंनोच्चारयेद्यतएकदेशादर्थप्रकरणादिनार्थान्तरसूचनंप्रतीयते। यतः सावागलोक्यास्वर्गादिलोकप्राप्तिप्रतिबन्धिनी॥ १६१॥

(२) **सर्वज्ञनारायणः**। वाङ्मनसयोः शुद्धतांविवृणोति नारुन्तुदइति। अरुंतुदोदोषरूपव्रणस्य वाचा प्रकाशनेन तोदकः। परद्रोहोहिंसातत्कर्ममनसाध्यायतीति परद्रोहकर्मधीः। दोषप्रकाशकत्वाभावेपि यत् श्रुत्वा परस्योद्वेगो यथावर्षशतान्ते अवश्यंभवतोमृत्यादितथालोक्याम ऽलोकहितां तांवाचंनोदीरयेत्॥ १६१॥

(३) **कुल्लूकः**। अयमपि पुरुषमात्रस्यैव धर्मोनाध्यापकस्य आर्तः पीडितोऽपि नारुंतुदःस्यात्न। मर्मपीडाकरं तत्त्वदूषणमुदाहरेत्। तथा परस्य द्रोहोऽपकारस्तदर्थंकर्मबुद्धिश्चनकर्तव्या। तथा यया वाचास्य परोव्यथते तांमर्मस्पृशमयालोक्यांस्वर्गादिप्राप्तिविरोधिनींन वदेत्॥ १६१॥

(४) राघवानन्दः । तत्रैव हेतुतया व्यतिरेकमाह नारुन्तुदइति । आर्तोरोगादिना शिष्यकृतापराधेन वा न परद्रोहकर्मधीःपरस्य द्रोहःपीडातस्यै यत्कर्मअभिशापादिस्तत्रधीर्मतिर्यस्यसःतथा न स्यात् । अलोक्यांस्वर्गादिलोकानर्हांतांतादृशींनोदीरयेन्नोच्चारयेत् ॥ १६१ ॥

(५) नन्दनः । यतएवमतः नारुन्तुदइति । अरुन्तुदः परमर्मप्रकाशनः अलोक्यांअस्वर्ग्याम् ॥ १६१ ॥

(६) रामचन्द्रः । आर्त्तोऽपि सन्नरुंतुदोनस्यात् । अरुंतुदःस्याद्व्यथकइत्यमरः । परद्रोही नभवेत् । यया वाचाउद्विजतेअलोक्यांलोककर्मरहितां न उदीरयेत् न वदेदिति ॥ १६१ ॥

संमानाद्ब्राह्मणोनित्यमुद्विजेत विषादिव ॥ अमृतस्येव चाकांक्षेदवमानस्य सर्वदा ॥ १६२ ॥

(१) मेधातिथिः । भिक्षमाणस्य ब्रह्मचारिणोगृहे वोपाध्यायस्य जीविकयाऽध्यापयतो यत्र संमानं न स्यान्नतेन चित्तसंक्षोभमाददीतापि तु संमानादेवोद्विजेत पूजयैव दीयमानंन बहु मन्येत । अमृतमिवाकाङ्क्षेदभिलषेदवमानमवज्ञांसर्वदा उत्कण्ठा सामान्यात् । अधीता त्वर्थमाकाङ्क्षेत् । आरोप्य षष्ठी कृता । ननु चानर्चितमभोज्यं सत्यं चित्तसंक्षोभप्रतिषेधार्थमेतत् नतु तादृशस्य भोज्यतोच्यते । संमानावमानयोः समेन भवितव्यंन पुनरवमानंप्रार्थनीयम् । ब्रह्मचारिणस्त्ववमतमपि भिक्षाऽऽदानम् न चायंप्रतिग्रहोयोऽर्चितंप्रतिगृण्हातीत्येतस्य येन विषयः स्यात् ॥ १६२ ॥

(२) सर्वज्ञनारायणः । एतच्च सर्वमत्यन्तावमतेनापि न कार्यमित्याह संमानादिति । अवमानस्यअमृतस्येवाल्पमप्यंशमित्यर्थः ॥ १६२ ॥

(३) कुल्लूकः । ब्राह्मणः संमानाद्विषादिव सर्वदोद्विजेत संमाने प्रीतिंन कुर्यात् । अमृतस्येवसर्वस्माल्लोकादवमानास्याकाङ्क्षेत् । अवमाने परेण कृतेऽपि क्षमवांस्तत्र खेदंन कुर्यात् । मानावमानद्वन्द्वसहिष्णुत्वमनेन विधीयते ॥ १६२ ॥

(४) राघवानन्दः । दैवाद्गुरोर्वाङ्मानसस्खलने शिष्यंशिक्षयति संमानादिति । विषादिवविषवदुद्वेगहेतुत्वाल्लोकावर्जनस्यअमृतंयथाअमरत्वहेतुत्वादाकांक्षितंअवमानोपि श्रेयोहेतुत्वात्तथाअनेन गुरोरत्यागेदोषानध्ययनाद्यनर्थः ॥ १६२ ॥

(५) नन्दनः । सर्वदाआश्रमान्तरेऽपि ॥ १६२ ॥

(६) रामचन्द्रः । सर्वदाआवमानस्य प्राप्तिं आकाङ्क्षेतअमृतस्येव प्राप्तिंयथाआकाङ्क्षन्तितथा ॥ १६२ ॥

सुखंह्यवमतः शेते सुखं च प्रतिबुध्यते॥ सुखं चरति लोकेस्मिन्नवमन्ता विनश्यति ॥१६३॥

(१) मेधातिथिः । पूर्वस्य विधेरर्थवादोयंफलदर्शनार्थः । योऽवमानान्नक्षुभ्यति ससुखंशेते अन्यथा द्वेषेण दह्यमानोन कथंचिन्निद्रांलभते प्रतिबुद्धश्च तच्चिन्तापरोन सुखंविन्दति । उत्थितश्च शयनात्कार्येषु सुखंचरति ॥ १६३ ॥

(२) सर्वज्ञनारायणः । सुखंशेते तत्कृतसंमानज्ञानाहितप्रत्युपकारचिन्ताविधुरत्वाभावात् । नन्वेवंस्वयमपि परस्याभ्युदयातिसंबन्धिना अवमानं कुर्यादित्याह अवमन्तेति ॥ १६३ ॥

(३) कुल्लूकः । अवमानसहिष्णुत्वे हेतुमाह । यस्मादवमाने परेण कृते तत्रखेदमकुर्वाणः सुखंनिद्राति । अन्यथावमानदुःखेनदह्यमानः कथंनिद्रांलभतेकथंचसुखंप्रतिबुध्यते प्रतिबुद्धश्चकथंसुखंकार्येषुचरति । अवमानकर्ता तेन पापेन विनश्यति ॥ १६३ ॥

---

(१६२) सम्मानाद्ब्राह्मणोविद्वानुद्विजेतविषादिव । (मेधा०)

(४) **राघवानन्दः** । दैवादपि तदुत्पत्तौ गुणमेवाह । सुखंह्यवमतइति । अवमतःतिरस्कृतःसंमाननाभावाज्जनना-रहितःअथवाअवमतःखण्डितमानःस्वविवेकबुद्ध्यासुखंशेते निद्रातिअन्यथाअवमानदुःखैर्दह्यमानोननिद्राति अतएव सुखंनप्रतिबुध्यते सम्यगनिद्रितत्वात्सुखंचरति स्वेष्टसाधनेषु प्रवर्ततेअवमतस्त्ववमानासहिष्णुःकिंचित्कर्तुंनक्षमतइत्यनुभवसिद्धम् ॥ १६३ ॥

(५) **नन्दनः** । अत्रहेतुमाह सुखमिति । क्षममाणोऽवमतोदृष्टादृष्टभयाभावात्सुखंशेते । अवमन्ता विनश्यति राजदण्डेन यमदण्डेन वा ॥ १६३ ॥

(६) **रामचन्द्रः** । अवमतःतिरस्कृतःसःब्राह्मणःसुखंशेते । यः अवमन्तातिरस्कारंकर्ता सःपुरुषःविनश्यति ॥१६३॥

अनेन क्रमयोगेन संस्कृतात्मा द्विजःशनैः ॥ गुरौ वसन्सञ्चिनुयाद्ब्रह्माधिगमिकंतपः ॥१६४॥

(१) **मेधातिथिः** । संस्कृतात्मोपनीतोद्विजोऽनेन क्रमयोगेन तपः संचिनुयात् । अध्येष्यमाणइत्यतआरभ्य यद्ब्रह्मचारिणः कर्तव्यमुक्तंतस्य तेनेति प्रत्यवमर्शः । अनेन विधिसंघातेन क्रमयोगेन क्रमेणानुष्ठीयमानेन तपआत्मसंस्कारंनिष्कल्मषत्वलक्षणं यथा तपसा चान्द्रायणादिना निष्कल्मषत्वंभवत्येवमनेनापि वेदग्रहणार्थेन यमनियमसमूहेन अतः संचिनुयात् शनैरत्वरयार्जयेच्च वर्धयेच्च । क्रमः परिपाटीदंकृत्वेदंकर्तव्यमोंऽकारपूर्विकाइत्यादिस्तेनयोगः संबन्धोयस्यानुष्ठानस्येति यावत् । ब्रह्मणः आधिगमिकमधिगमार्थम् । अध्ययनबोधावधिगमः ॥१६४॥

(२) **सर्वज्ञनारायणः** । धर्मानुक्त्वोपसंहरति अनेनेति । क्रमयोगेन क्रमिकेणोद्योगेन यत्नेन संस्कृतात्मा शोधितात्मा शनैरत्वरितः संचिनुयात्वेदाधिगमरूपंतपः ॥ १६४ ॥

(३) **कुल्लूकः** । अनेनक्रमकथितोपायेन जातकर्मादिनोपनयनपर्यन्तेन संस्कृतोद्विजोगुरुकुले वसञ्छनैरत्वरया वेदग्रहणार्थंतपोऽभिहिताभिधास्यमाननियमकलापरूपमनुतिष्ठेत् । विध्यन्तरसिद्धस्याप्ययमनुवादोऽध्ययनाङ्गत्वबोधनाय ॥ १६४ ॥

(४) **राघवानन्दः** । एवंसशिक्षितःशिष्यःकिंकुर्यात्तत्राह अनेनेति । संस्कृतात्मोपनीतःअनेनाव्यवहितोक्तेन क्रमयोगेन तपःसंचिनुयात् द्विजस्त्रैवर्णिकः । तपोब्रह्मचर्यादि ब्रह्माधिगमिकंवेदप्राप्त्युपायम् ॥ १६४ ॥

(५) **नन्दनः** । उक्तानांब्रह्मचारिधर्माणामध्ययनाङ्गतामाह अनेनेति । अनेनोक्तेनब्रह्माधिगमिकंवेदाधिगमिकम् । स्वार्थेतद्धितः । वेदाधिगमस्यतपस्त्ववचनंप्रशंसार्थम् ॥ १६४ ॥

(६) **रामचन्द्रः** । अनेन क्रमयोगेन अनेन प्रकारेण संस्कृतात्माद्विजःगुरौ वसन्तपःसञ्चिनुयात् सङ्ग्रहंकुर्यादित्यर्थः । कीदृशंतपःब्रह्माधिगमिकंब्रह्मणःवेदस्यअधिगमिकंप्राप्तिसाधन मित्यर्थः ॥ १६४ ॥

तपोविशेषैर्विविधैर्व्रतैश्च विधिचोदितैः ॥ वेदःकृत्स्नोधिगन्तव्यःसरहस्योद्विजन्मना ॥ १६५॥

(१) **मेधातिथिः** । तपोविशेषैः कृच्छ्रचान्द्रायणादिभिर्विविधैर्बहुप्रकारैरेकाहारचतुर्थकालाहारादिभिरभिक्षिण्वता शरीरं व्रतैश्चोपनिषदमहानाम्निकादिभिर्विधिनोदितैर्गृह्यस्मृतिष्वाम्नातैरनुष्ठीयमानैर्वेदः कृत्स्नोधिगन्तव्यः । ये तु पूर्वश्लोके तपःशब्दोब्रह्मचारिधर्मे प्रयुक्तइहापि तपोविशेषास्तएवाभिप्रेताइत्याहुर्मन्ते सम्यग्व्रम्यन्ते व्रतशब्देनैव तेषां संगृहीतत्वात् । व्रतमिति हि शास्त्रतोनियमउच्यते । सामान्यशब्दत्वाच्च व्रतशब्दस्य महानाम्निकादीनामपि ग्रहणसिद्धिः । तस्मात्तपांस्युपवा-

---

(१६५) विधिचोदितैः= श्रुतिचोदितैः (र)

सादीन्यभिप्रेतानि । इह केचिद्वेदइत्यत्रैकवचनंविवक्षितंमन्यन्ते । यद्यपि तव्यप्रत्ययनिर्देशाद्विनियोगतोवेदस्य प्राधान्यंसंस्कार्यतया प्रतीयते तथापि विधितोवस्तुतश्चार्थावबोधे गुणभावएव । गुणे चसंख्याविवक्षितेऽर्थावबोधपर्यन्तोह्ययंवेदविषयोमाणवकस्य व्यापारोविधिवृत्तपर्यालोचनयाऽवसीयते । अयंह्यत्र विध्यर्थोधीतेन वेदेनार्थावबोधंकुर्यान्न संस्कार्यत्वमन्यथा निर्वहति । सर्वोहि कार्यान्तरे शेषभूतः संस्क्रियते । वेदस्य च दृष्टमेव कार्यमधीतस्य स्वार्थबोधजनकत्वमन्यथा सक्तू ञ्जुहोतीति वत्प्राधान्यंश्रुतमप्युत्सृज्येत। धातुरप्यत्रबोधार्थएव । अधिगमनंहि ज्ञानमुच्यते । सर्वे गत्यर्थाज्ञानार्थाइति स्मृतम् । स्वरूपग्रहणंच वेदस्य प्रागेव विहितं संहत्य हस्तावध्येयमित्यादिना । तस्यैवार्थग्रहणपर्यन्ततानेन प्रतिपाद्यते । विवक्षामेव मत्वाऽनेकवेदाध्ययनमप्राप्तंप्रतिप्रसविष्यते वेदानधीत्येति । यद्यप्यनेक वेदाध्ययनमस्ति क्वैकत्वविवक्षोपयुज्यते । बाढमुपयुज्यते । एकस्यामेवशाखायामधीतायां स्वाध्यायोध्येतव्यइति विध्यर्थनिवृत्तिः । इच्छा तस्त्वनेकवेदाध्ययनंयदि न विधिचोदितंकउञ्छमप्तोदन्तकलशिकयाऽऽत्मानंक्लेशयिष्यति । अस्त्येवात्रविध्यन्तरं वेदानधीत्येति तच्च फलकामस्य फलं च स्वर्गः । अथास्य विधेर्वाक्यशेषे किंचिदाम्नायते । घृतकुल्यादयोऽन्यद्वा ततस्तदेव भवितुमर्हति ब्रह्मचारिणोहि विधिरर्थावबोधविषयोदृष्टप्रयोजनश्च । अवबोधस्य कर्मानुष्ठानोपयोगादर्थादर्शनाद्विदुषः कर्मण्यधिकारादेकैकवेदाध्ययनमदृष्टायैव अन्यैथकेवेदाध्ययनेनैव स्वाध्यायविधिनिर्वृत्तेरसति धर्माय विधौ वेदानधीत्येत्यादिवचनमनर्थकमेवस्यात् । तत्रोच्यते । कथमयंपक्षः संगच्छेत यावतैकोयंविधिर्वेदोऽधिगन्तव्यइति । सचेत्संस्कारविधित्वाद्दृष्टकर्मानुष्ठानोपयोगाच्च नादृष्टार्थः कल्प्यते तदनेकवेदाध्ययनेऽपि तुल्यम् । तत्रापिह्ययंप्रकारोस्त्येव वैरूप्यंच स्यात् । क्वचिदाधानविधिवदवबोधद्वारेण नित्यकाम्यकर्मसंबन्धः क्वचित्साक्षात्फलार्थतेति । अथ मतंवेदानधीत्येति विध्यन्तरमेतन्न वाचार्यकरणविधिप्रयोज्यतत्फलकामएवात्राधिक्रियतइति तदसत् । नचैतद्विध्यन्तरंप्रकृतस्यैव विधेरसत्यांसंख्याविवक्षायां पञ्चषट्सप्तादिशाखाध्ययनंयावच्छक्तिप्राप्तंत्रयंनियमयति । न चाधीयी तेति विधिरत्र श्रूयते अपितु गृहस्थाश्रममावसेदित्ययमत्रविधिः । यदपि संख्याविवक्षितत्वमुक्तंतदत्यन्तासंबद्धम् । विनियोगतोहिसंख्याविवक्षानोपपादनतः । सच विनियोगः स्वाध्यायार्थमध्ययनमाह नार्थेन गुणभावेन द्वितीयान्ताभ्यामवगतंप्राधान्यमपैति । एवंह्याश्रीयमाणे ग्रहेप्येकत्वंविवक्ष्येतग्रहंसमार्ष्टीति । प्रधानभूतस्यापि ह्वितस्य संमार्गप्रत्यस्त्येव साधनभावोनत्वसौ शब्देनाभिधीयते । तथा ग्रहैर्जुहोतीति होमेपि गुणभावः । तस्मादभिधानविनियोगाभ्यां प्राधान्यंस्वाध्यायस्य । सति च प्राधान्ये नविवक्षितमेकत्वम् । हन्त तर्हि यद्येकेनापि वेदेन गृहीतेन निवर्तेत स्वाध्यायविध्यर्थोवक्तव्यमनेकवेदाध्ययनप्रयोजनम् । तृतीये वक्ष्यामः। ननु यद्यवबोधपर्यन्तोयंविधिस्तदा गृहीतेऽपि स्वरूपतोवेदे यावदर्थावबोधोन जातस्तावदन्तरा मधुमांसादियमनियमानुष्ठानमव्यावृत्तंस्यात् तत्र कोदोषः । शिष्टसमाचारविरोधः । नहि शिष्टाअधीतं वेदे तदर्थमुपशृण्वन्तोपि मधुमांसादिवर्जयन्ति । नैषदोषः । अस्तिहि स्मृत्यन्तरं वेदमधीत्य स्नायादिति । तत्राधीत्येति पाठमात्रमुच्यते । स्नायादिति च स्वकालस्वाध्यायविध्यङ्गयमनियमनिवृत्तिर्लक्ष्यते यथैवमधुमांसे प्रतिषिद्धे एवंस्नानमपि तत्र स्नानमनुज्ञाय मांनसाहचर्यान्मधुमांसादीन्यपि तुल्यप्रकरणत्वादनुजानाति । स्त्रीसंप्रयोगस्तु वचनान्तरेणाविप्लुतब्रह्मचर्यइति प्रतिषिद्धः । तद्यतिक्रमे च न स्वाध्यायविधेरर्थावबोधकाले किंचित्परिहीणम् । नहि तस्यामवस्थायां तदङ्गंसर्वेषांयमनियमानांग्रहणान्तत्वात् । पुरुषार्थस्त्वयंप्रतिषेधः । अतएव कथंचिद्विप्लवेनावकीर्णिप्रायश्चित्तम् । अथव्रतस्थस्य हिरेतः सेकोविकारो नचव्रतस्थश्चान्द्रायणादिनानेनोपपातक प्रायश्चित्तेनाधिक्रियते । किंपुनः स्नायादिति लक्षणत्वे कारणमुच्यते । न तावदिदंस्नानमर्द्धं शरीरक्षालनरूपमदृष्टार्थत्वप्रसङ्गात् ब्रह्मचारिनियमानांचावध्यपेक्षत्वादस्य चावधिसमर्पकत्वेनापेक्षितार्थविधिनोपपत्तेः । न पुनरेवंतेषामवध्यन्तरापे-

क्षा । स्वाध्यायविध्यर्थाहितेऽतस्तन्निवृत्तिरेव तेषामवधिः । तस्य चनिवृत्तिर्विषयनिवृत्त्या । अध्ययनंच तस्य विषयस्तन्निवृत्तिः प्रत्यक्षैव । सत्यं यद्यस्य श्रुतविषयनिष्ठतैव स्यात् । अश्रुतोप्यस्य विषयः फलभूतोर्थाधिगमोपि संस्कारविधित्वान्यथाऽनुपपत्त्या विषयतामापन्नोयतः श्रुताध्ययननिष्ठत्वे विधित्वमेवास्य व्याहन्येत । विधेर्हि स्वार्थानुष्ठापकत्वंरूपम् स्वार्थश्च कार्यकारणेतिकर्तव्यतात्मकः तच्च विध्यर्थव्यतिरेकेण नान्यत्किंचिन्नकार्यकरणंविषयएकपदोपादानोः। अधीयीतेत्यध्ययनादिधात्वर्थावच्छिन्नोभावार्थः यमनियमानुष्ठानमिति कर्तव्यता । न तत्र तावदस्यविधेः स्वार्थानुष्ठापकत्वसंभवः यतोविषयानुष्ठानद्वारिकासर्वाविधीनांस्वार्थानुष्ठानसंपत्तिः । तस्यास्य विषयानुष्ठानंविध्यन्तरवशादेवसिद्धम् । आचार्यस्यहि विधिरस्ति उपनीय शिष्यंवेदमध्यापयेदिति । नचाध्यापनमन्तरेणाध्ययनसिद्धिः । अतआचार्यः स्वविधिसंपत्त्यर्थमध्ययने माणवकंप्रवर्तयति स्वयंच ज्ञात्वानाचार्येणाप्रवर्तितस्यानुष्ठानसंभवः । अतोऽवश्यमाचार्यविधिप्रयुक्तता एषितव्या। तत्प्रयुक्तत्वे सति सिद्धमनुष्ठानमिति न स्वाध्यायाध्ययने माणवकस्याविधिना कश्चिदर्थः । अतः प्रयोक्तृत्वासंभवात्कीदृशी विधिरूपतास्य विधेः स्वरूपनाशे प्रसक्ते सप्रकारोन्विष्यते । यथास्य प्रयोक्तृत्वंलभ्यते तत्रनिश्चितस्तावदयंसंस्कारविधिः । नच निष्फलः संस्कारोऽध्ययने सतियादृशस्यै तादृशस्यार्थबन्धस्य दर्शनात्तस्य च सकलतत्कर्मानुष्ठानोपयोगित्वात् । अतः श्रुताध्ययनविषयसंबद्धावबोधकर्तव्यतातोविधिः प्रतीयते यद्यपि चवस्तुस्वाभाव्येन वाक्यग्रहणसमनन्तरमवबोधोजायते नतु निश्चितरूपोभवति । अतोयेन प्रकारेण निश्चयोभवति तस्मिन्नंशे विधेः प्रयोक्तृत्वनिश्चयविचार्यसंशयादिव्युदासेन भवति । नच विचारोऽन्यतः प्राप्तोनाचायविधेः तस्याध्ययनमात्रेण निवृत्तेः । नापि दृष्टकार्यप्रयुक्तः किंविचारमन्तरेण पुरुषस्य नसिध्येद्यदर्थंप्रवर्तेतयदृच्छया ग्रामादिकामस्येव विचारोऽपि प्राप्तइति चेत् । एवं तर्ह्यनियतत्वात्पुरुषेच्छायाः कश्चिन्नविचारयेत् । यदिविचारयेद्वाध्ययनसमनन्तरमतोस्यांशस्याप्राप्तत्वाद्यावदप्राप्तंविधेर्विषयइत्यस्ति विधेर्व्यापारःतस्मादध्ययनस्यान्यतः प्राप्तत्वात्तत्संबन्धस्यावबोधस्यानिश्चितरूपस्य वस्तुस्वाभाव्येनोत्पत्तेस्तादृशस्य न कचिदर्थवत्त्वात्सत्यपि तस्मिन्संस्कारकत्वान्निर्व्यूढे निश्चितस्यैव फलवत्कर्माऽनुष्ठानोपयोगित्वान्निश्चयस्य विचारसाध्यत्वात्तस्य च नियतकालावश्यकर्तव्यताप्राप्तेस्तन्निवृत्त्यर्थंविचारपर्यवसायी विधिरयमवतिष्ठते । अतोभवत्याकाङ्क्षानियमानांकिंश्रुताध्ययनपर्यवसानावधिरुताक्षिप्तनिश्चितावबोधजननार्थविचारपर्यवसानः । अतोस्यामपेक्षायां वेदमधीत्य स्नायादित्यनेनावधिसमर्पणंक्रियते । तत्र प्रकृतस्यापेक्षायाश्चाविशेषाद्युक्तालक्षणा । ननु किमिदमुच्यतेऽश्रुतोवबोधः यावताधिगन्तव्यइति श्रूयतएव वेदे स्मृतिषु चान्यासु वेदमधीते स्वाध्यायोऽध्येतव्यइति च पठ्यते मानव्याअपि स्मृतेरेतत्स्मृतिमूलत्वादभिन्नार्थतैवा आक्षिप्तावबोधाभिप्रायोयमधिगमोयदि वा स्वरूपग्रहणमेवाधिगमः अवबोधपर्यन्तता तु तेनैव न्यायेन लभ्यते नच विसमञ्जसमेकोयंविधिस्तस्य च विषयांशः कश्चिदाचार्यविधिना प्रयुज्यतेकस्य चिदंशस्य सएव प्रयोजकइति वैरूप्यम् । किमत्रानुपपन्नमर्थभूतस्यैवावगमात् । यत्तूक्तमनेकवेदाध्ययनमदृष्टार्थंयुक्तमिति तस्य षट्त्रिंशदाब्दिकमित्यत्र परिहारंवक्ष्यामः । वेदशब्दो मन्त्रब्राह्मणवाक्यसमुदायात्मिकांशाखामाचष्टे । तदवयवेऽपि वाक्ये वेदशब्दस्य प्रयोगदर्शनात् तदाशङ्कानिवृत्त्यर्थः कृत्स्नशब्दः । यद्यप्येकस्मिन्वाक्येधीते वाक्यान्तरस्यापि वेदशब्दवाच्यत्वादेवनिवृत्तमध्ययनंसंस्कारकर्मत्वाद्ग्रहणवत्तथापिविस्पष्टार्थंकृत्स्नग्रहणम् । अन्येत्वङ्गविषयंकृत्स्नशब्दंवर्णयन्ति । वेदशब्दोह्युक्तपरिमाणस्य वाक्यसमुदायस्य वाचकस्तत्र कश्चन्मात्रेणापि न्यूनेन स्वाध्यायोऽधीतोभवति । तस्मात्कृत्स्नशब्दोङ्गाध्ययनप्राप्त्यर्थः । तथाच स्मृत्यन्तरंब्राह्मणेननिष्कारणोधर्मः षडङ्गोवेदोध्येयइति । ननु योवेदः संकृत्स्नइत्येतदत्र प्रतीयते नचाङ्गानि वेदशब्दवाच्यानि तत्र कुतोङ्गैः साहित्यंयात्वेषा स्मृतिः षडङ्गः वेदोध्येयइति तत्र स्वशब्देनाङ्गान्युपात्तानि । इहतु वेदविशेषणत्वात्कृत्स्नशब्द-

स्यकथमिवाङ्गानि गृह्णीरन् । उच्यते । स्वाध्यायोऽध्येतव्यइति मूलेवैषा स्मृतिः सा चा ववोधपर्यन्ता व्यवस्थापिता अवबोधश्च नान्तरेणाङ्गानि कल्पतइत्यर्थसिद्धमङ्गानामुपादानम् अतोनिगमनिरुक्तव्याकरणमीमांसावेदनमपि विध्याक्षिप्तम् । एवमर्थमङ्गानामुपादानमङ्गीकृत्य कृत्स्नशब्दोद्योतकत्वेन युक्तउपादातुम् । तत्र यथाऽऽरम्भकाणि पुरुषस्य हस्तपादादीन्यगाङ्गान्युच्यन्ते । नैवंवेदस्य निरुक्तादीन्यारम्भकाणि । अथ च भक्त्याङ्गत्वेन वेदस्योच्यन्ते न किल तैर्विना वेदःस्वार्थाय प्रभवत्यतोङ्गानीवाभ्यासोऽत्र । एवमभ्यारोपितवेदत्वेन कृत्स्नशब्दोनोपपद्यते । सरहस्य इति रहस्यमुपनिषदः सत्यपि वेदत्वे प्राधान्यात्पृथगुपादानम् ॥ १६५ ॥

(२) **सर्वज्ञनारायणः** । तपोविशेषैः प्राणायामादिभिर्व्रतैःसावित्र्यादिभिः तत्तच्छाखाभागाध्ययनाङ्गभूतैः वेदएकशाखासूत्रभूतमन्त्रब्राह्मणसमुदायः सकृत्स्नः षडङ्गसहितोऽध्येतव्यइत्यर्थः । सरहस्योनिगूढवेदार्थसहितः ॥ १६५ ॥

(३) **कुल्लूकः** । अध्ययनाङ्गत्वमेव स्पष्टयति तपोविशेषैरिति । तपोविशेषैर्नियमकलापैर्विविधैर्बहुप्रकारैश्च अध्येष्यमाणस्त्वाचान्तइत्यादिनोक्तैः सेवेत । इमांस्तु नियमानित्यादिभिर्वक्ष्यमाणैरपि व्रतैश्चोपनिषन्महानाम्निकादिभिर्विधिदेशितैः स्वगृह्यविहितैःसमग्रवेदोमन्त्रब्राह्मणात्मकः सोपनिषत्कोऽप्यध्येतव्यः । रहस्यमुपनिषदः । प्राधान्यख्यापनाय पृथङ्निर्देशः ॥ १६५ ॥

(४) **राघवानन्दः** । तत्रैव नैतदचीर्णव्रतोधीतेइत्यादिश्रुतिंप्रमाणयति तपइति । तथाहि मुण्डकमधीयानःशिरस्यगारपात्रंबिभर्ति कश्चित्तथा कारीरीमधीयानोभूमिभोजनंकरोति अश्वमेधमधीयानोऽश्वस्य घासं प्रयच्छति । तपोविशेषैर्विधिचोदितैःस्वस्वगृह्योक्तैः । सरहस्यःरहस्यंनामोपासनादि तद्युक्तः ॥१६५॥

(५) **नन्दनः** । अङ्गान्तराण्याह तपइति । व्रतैः प्राजापत्यादिभिः कर्माधिकृत्यप्रवृत्तः शब्दराशिविशेषोवेदः ज्ञानमधिकृत्यतुरहस्यम् कृत्स्नःसाङ्गः अध्येतुरेकवेदाध्ययनेन कृतार्थता स्यादित्येकवचनेनसूचितम् ॥ १६५ ॥

(६) **रामचन्द्रः** । द्विजन्मना सरहस्यःवेदःकृत्स्नः अधिगन्तव्यःतपसःविशेषैर्व्रतैर्विविधैःविविधशास्त्रोदितैः ॥ १६५॥

वेदमेव सदाभ्यस्येत्तपस्तप्स्यन्द्विजोत्तमः ॥ वेदाभ्यासोहि विप्रस्य तपः परमिहोच्यते ॥ १६६॥

(१) **मेधातिथिः** । प्रकृतशेषतया प्राप्तएव ग्रहणार्थोभ्यासोनूद्यते स्तुत्यर्थेन पुनर्विध्यन्तरम् । सदा शब्दोग्रहणकालापेक्षएव । तपःशब्दः शरीरक्लेशजननेष्वाहारनिरोधादिषु वर्तते । इहतु तज्जन्यात्मसंस्कारोवराभिशापादिसामर्थ्यलक्षणयोच्यते । ततस्तपस्तप्स्यंस्तपसाऽर्जयितुमिच्छन्नर्जनाङ्गे संतापे धातुर्वर्तते । कर्मकर्तृत्वस्याविवक्षितत्वात्परस्मैपदम् । हेतुरूपोद्वितीयश्लोकार्थवादः वेदाभ्यासोहि यावत्किंचित्प्रकृष्टंतपः ततः परंश्रेष्ठंवेदाभ्यास स्तत्तुल्यफलतामारोप्य स्तूयते ॥ १६६ ॥

(२) **सर्वज्ञनारायणः** । सदा आश्रमान्तरेपि वेदमेव तपःस्थानेभ्यस्येद्ब्राह्मणः न तु तद्विरोधि तपोपि कुर्यात् । पुनर्विप्रस्येति पदंद्विजोत्तमपदस्योपलक्षणार्थं शङ्कानिवृत्त्यर्थम् ॥ १६६ ॥

(३) **कुल्लूकः** । यत्र नियमानामङ्गत्वमुक्तंतत्कृत्स्नस्वाध्यायाध्ययनमनेन विधत्ते । तपस्तप्स्यंश्चरिष्यन्द्विजोवेदमेव ग्रहणार्थमावर्तयेत् । तस्माद्वेदाभ्यासएव विप्रादेरिहलोके प्रकृष्टंतपोमुनिभिरभिधीयते ॥ १६६ ॥

(४) **राघवानन्दः** । सत्यंवद धर्मंचर स्वाध्यायान्माप्रमदः इत्यादिश्रुतिंब्रह्मचारिप्रकरणगतांप्रमाणयति वेदेति । अभ्यसेच्छब्दतोऽर्थतश्चावर्तयेत् तप्स्यन्तप्तुमिच्छन् तपःस्थाने वेदाध्ययनमेवकुर्यादिति ॥ १६६ ॥

(५) **नन्दनः** । ब्राह्मणस्य वेदजपएवतपोनान्यदितिप्रसङ्गादाहवेदमिति । तपस्तप्स्यंस्तपएवपरमनिःश्रेयसकरमितिपश्यन् । सदाआश्रमान्तरेऽपि । इहवेदेउच्यते । तपोहिस्वाध्यायइतिश्रूयते । हिर्हेतौ ॥ १६६ ॥

आहैव सनखाग्रेभ्यःपरमंतप्यतेतपः॥ यःस्रग्व्यपि द्विजोधीते स्वाध्यायंशक्तितोऽन्वहम्॥१६७॥

(१) **मेधातिथिः** । अयमपरोवाजसनेयकस्वाध्यायविधिर्ब्राह्मणेऽर्थवादानुवादः । आनखाग्रेभ्यएवेति संबन्धः । ह-शब्दऐतिह्यसूचकः । परमशब्दात्तपसः प्रकर्षं प्रतिपन्ने नखाग्रग्रहणंप्रकृष्टस्यापि प्रकर्षमाह । नखाग्राणि निर्जीवानि तान्यपि तपसाऽनेन व्याप्यन्ते । तपोहि कृच्छ्रादिकंनखाग्राणामव्यापकत्वान्ननिःशेषफलप्रदम् । इदंतु तान्यपि व्याप्नोतीति प्रशंसा । तप्यतेतपइति । तपस्तपःसकर्मकस्यैवेति यगात्मनेपदे । यः स्रग्व्यपि । स्रगस्यास्तीति स्रग्वी कृतकुसुमदामा पुरुषउ-च्यते । अनेन च ब्रह्मचारिनियमत्यागंदर्शयति । परित्यज्यापि ब्रह्मचारिधर्मान् यदि शक्तितोयावच्छक्नोति स्वल्पमप्यन्व-हंप्रत्यहंवेदमधीते सोपि प्रकृष्टेन पुरुषार्थेन युज्यते । स्तुतिरियंन पुनर्नियमत्यागेऽध्ययनमुच्यते ॥ १६७ ॥

(२) **सर्वज्ञनारायणः** । हेति प्रसिद्धौ । आङभिविधौ । आनखाग्रेभ्योऽपि नखाग्रैस्तपश्चरतीत्यर्थः । स्रग्व्यपीति अलंकृतोपि रागवानपीत्यर्थः ॥ १६७ ॥

(३) **कुल्लूकः** । स्वाध्यायाध्ययनस्तुतिरियम् । हशब्दः परमशब्दविहितस्यापि प्रकर्षस्य सूचकः सद्विजआ-नखाग्रेभ्यएव चरणनखपर्यन्तंसर्वदेहव्यापकमेव प्रकृष्टतमंतपस्तप्यते । यःस्रग्व्यपि कुसुममालाधार्यपि प्रत्यहंयथाश क्तिस्वाध्यायमधीते । स्रग्व्यपीत्यनेन वेदाभ्ययनाय ब्रह्मचारिनियमत्यागमपिस्तुत्यर्थंदर्शयति । तप्यतइति तपस्तपः-कर्मकस्यैवेति यगात्मनेपदे भवतः ॥ १६७ ॥

(४) **राघवानन्दः** । तत्रैवैतिह्यंप्रमाणयति आहैवेति । छन्दसि व्यवहिताश्चेतिसूत्रादाङानखेनसंबन्धादानखाग्रेभ्यो-देहव्यापि तपः । हशब्दऐतिह्यद्योती । स्रग्वीमाली विषयासक्तोपीति यावत् तपोविधाने स्रग्वीत्याद्यसमञ्जसमतोवेदा-भ्यासेतात्पर्यम् ॥ १६७ ॥

(५) **नन्दनः** । उक्तमेवार्थवादेन स्थिरीकरोति आहैवेति । आहइतिपदच्छेदः । मूर्ध्नआरभ्य पदनखाग्रेभ्यः कृत्स्ने-नशरीरेणेतियावत् ॥ १६७ ॥

(६) **रामचन्द्रः** । समनुः । नखाअग्रामुख्यायेषांते नखाग्राःतेभ्यःनखाग्रेभ्यः ऋषिभ्यआहऋषिस्वाध्यायम-न्वहंशक्तितःअधीतेयःपरमंतपःतप्यते कर्म कर्तरि ॥ १६७ ॥

योनधीत्य द्विजोवेदमन्यत्र कुरुते श्रमम् ॥ सजीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥ १६८ ॥

(१) **मेधातिथिः** । येषांतावत्कल्पशब्दोङ्गपरिग्रहार्थस्तेषामनियतक्रमेऽध्ययने प्राप्ते क्रमोनियम्यते । प्रथमं-वेदोध्येतव्यस्ततोङ्गानि । येषांतु वेदस्यैवार्थं कल्प्याशङ्कानिवृत्त्यर्थंतेषांत्रैविद्यव्रतानन्तरंवेदस्यैव प्राप्तमध्ययनमगृहीतेपि तस्मिन्नध्ययनमभ्यनुज्ञायते । योद्विजोवेदमधीत्यान्यत्र शास्त्रेष्वङ्गेषु तर्कशास्त्रग्रन्थेषु वा श्रममभियोगातिशयंकुरुते सजीवन्ने-व शूद्रत्वमाप्नोति । आशु क्षिप्रम् । सान्वयः पुत्रपौत्रादिसंतत्यासह । श्रमोयत्नातिशयस्तन्निषेधा योगात्तत्समाप्तौ यथावस-रमन्यान्यपि विद्यास्थानानि पठ्यन्ते । शूद्रत्वप्राप्तिवचनंनिन्दातिशयः । द्विजइति वचनादुपनीतस्यायंक्रमनियमः । प्राक्-चोपनयनादङ्गाध्ययनमनिषिद्धं शिक्षाव्याकरणादियद्वेदवाक्यैर्भमिश्रितम् । ननुच स्वाध्यायविधिनाङ्गान्याक्षिप्यन्ते तंच विधिमाचार्यप्रयुक्तोमाणवकोऽनुतिष्ठति प्रागुपनयनादसत्याचार्ये कुतोङ्गाध्ययनसंभवः । नैषदोषः । तस्मादनुशिष्टंपु-त्रंलोक्यमाहुरिति पित्रा यः संस्कर्तव्यः सएनंप्रागुपनयनाद्व्याकरणाद्यध्यापयिष्यति ॥ १६८ ॥

(२) **सर्वज्ञनारायणः** । अनधीत्यानभ्यस्य । अन्यत्र शास्त्रे ॥ १६८ ॥

(३) कुल्लूकः। योद्विजोवेदमनधीत्यान्यत्रार्थशास्त्रादौ श्रमंयत्नातिशयंकरोति सजीवन्नेव पुत्रपौत्रादिसहितः शीघ्रंशूद्रत्वंगच्छति। वेदमनधीत्यापि स्मृतिवेदाङ्गाध्ययने विरोधाभावः। अतएव शङ्खलिखितौ। न वेदमनधीत्यान्यां विद्यामधीयीतान्यत्र वेदाङ्गस्मृतिभ्यः॥ १६८॥

(४) राघवानन्दः। अध्ययनस्यावश्यकत्वेऽर्थवादमाह यइति। अन्यत्र तर्कव्याकरणादौ गुरुमुखादनधीतस्य वेदस्य कर्मानधिकाराच्छूद्रत्वम्। सान्वयःपुत्राद्यन्वितः। मेधातिथिस्तु द्विजस्यादौ शूद्रापरिणयनंउपनीतस्य प्रथमतोव्याकरणाद्यध्ययने शूद्रत्वमिति अर्थावबोधकमस्य वेदाध्ययनमिति श्रुतेः। अयमर्थवादो नित्यकर्माकरणे पर्यवसित:॥ १६८॥

(५) नन्दनः। आर्यपक्षपरोऽपिवदमनेधीत्यविद्यान्तरमभ्यस्यतोब्रह्मचारिणोदोषमाह यइति। अन्यत्र विद्यान्तरे शूद्रतांयाति वेदानध्ययनसामान्यात्द्विजातिशयोयमध्ययनस्तुत्यर्थः॥ १६८॥

मातुरग्रेऽधिजननं द्वितीयंमौञ्जिबन्धने॥ तृतीयंयज्ञदीक्षायां द्विजस्य श्रुतिचोदनात्॥ १६९॥

(१) मेधातिथिः। द्विजातीनांतत्र तत्राधिकारः श्रुतस्तत्राचार्यादिशब्दवत्स्तुतत्त्वात्तदर्थनिरूपणार्थमाह। मातुः सकाशादग्रे आदावधिजननंजन्मपुरुषस्य द्वितीयंमौञ्जीबन्धने उपनयने। ङ्यापोर्बहुर्लमिति ह्रस्वः। तृतीयंज्योतिष्टोमादियज्ञदीक्षायम्। दीक्षापिजन्मत्वेन श्रूयते पुनर्वारंतदत्विजोगर्भंकुर्वन्ति यद्दीक्षयन्तीति। त्रीणि जन्मानि द्विजस्य श्रुतिनोदितानि। नन्वेवंसति त्रिजः प्राप्नोति। अस्तु। द्विजव्यपदेशे तावदुपनयनंनिमित्तं तद्यपदेनिबन्धनश्च श्रौतस्मार्तसामयिकाचारिक कर्माधिकारः। प्रथमतृतीयजन्माभिधानंद्वितीयजन्म स्तुत्यर्थं सर्वजन्म श्रेष्ठंतत। अदीक्षितोहि यज्ञएव नाधिक्रियते अनुपनीतस्तु न क्वचिदेव। अन्येत्वाद्यत्वसामान्यादाधानंयज्ञदीक्षांमन्यन्ते। तस्यापि जन्मसंभवोस्ति अजातएवासौयोऽग्नीन्नाधत्तइति॥ १६९॥

(२) सर्वज्ञनारायणः। मातुः अधिमातर्याधारभूतायां मौञ्जीबन्धने साविन्याः यज्ञदीक्षायांदीक्षातः द्विजस्य द्विजतांप्राप्तस्य तत्तृतीयंजन्म॥ १६९॥

(३) कुल्लूकः। द्विजानांतत्र तत्राधिकारश्रुतेर्द्विजत्वनिरूपणार्थमाह मातुरग्रेइति। मातुः सकाशादादौ पुरुषस्य जन्म द्वितीयंमौञ्जिबन्धनेउपनयने। ङ्यापोःसंज्ञाछंदसोर्बहुर्लमतिह्रस्वः। तृतीयंज्योतिष्टोमादि यज्ञदीक्षायांवेदश्रवणात्। तथा च श्रुतिः पुनर्वायदत्विजोर्यज्ञियंकुर्वन्ति यद्दीक्षयंतीति। प्रथमद्वितीयतृतीयजन्मकथनंचेदंद्वितीयजन्मस्तुत्यर्थं द्विजस्यैव यज्ञदीक्षायामप्यधिकारात्॥ १६९॥

(४) राघवानन्दः। अधीतवेदस्य जन्मद्वयमनुवदन्ज्योतिष्टोमादियज्ञस्यावश्यकत्वंतृतीयजन्मत्वेनाह मातुरिति। मातुरधिजननंजन्ममौञ्जीबन्धने द्वितीयंतन्निमित्तंयावज्जीवमग्निहोत्रंजुहुयादिति श्रुतेः। वसन्तेवसन्ते ज्योतिषा यजेतेति। प्रतिसंवत्सरंसोमइतिस्मृतेश्च। तेषामावश्यकत्वेन दीक्षायाअप्यावश्यकत्वात् पुनर्जायेरन्नृत्विजोगर्भंकुर्वन्तिदीक्षयन्ति इत्यादिश्रुतेर्दीक्षाया जन्मान्तरहेतुत्वश्रवणात्अतएवाह श्रुतिचोदनात्॥ १६९॥

(५) नन्दनः। इदानीमुपनीतस्यैव वेदाध्ययनेऽधिकारोनान्यस्येतिविवक्षन्नुपनयनस्यजननकल्पतांतावदाह मातुरिति। मौञ्जीबन्धनेउपनयने। ह्रस्वोऽत्रवृत्तिभङ्गपरिहारार्थः। प्रथमतृतीययोर्जन्मनोरुपन्यासोदृष्टान्तार्थः॥ १६९॥

(६) रामचन्द्रः। द्विजत्वमाह मातुरिति। मातुःसकाशातग्रेअधिजननंजन्म द्वितीयंजन्म मौञ्जीबन्धने भवति। यज्ञदीक्षायांतृतीयंजन्म द्विजस्य विधिनोदनाद्भवतीत्यर्थः॥ १६९॥

तत्र यद्ब्रह्मजन्मास्य मौञ्जीबन्धनचिन्हितम्॥तत्रास्य माता सावित्रीपितात्वाचार्यउच्यते॥१७०॥

(१) **मेधातिथिः**। तत्रैतेषु द्विजन्मसु सदेतद्ब्रह्मजन्म उपनयनंमौञ्जीबन्धनचिन्हितंमेखलाबन्धनेनोपलक्षितम्। तत्रस्य माता सावित्रीतया ह्यनूक्तया तन्निष्पन्नंभवति। अनेन च सावित्र्यनुवचन मुपनयने प्रधानंदर्शयति। तदर्थंह्यसौ समीपमानीयतेपिताऽऽचार्यः। माताग्निनिवर्त्यंजन्म। अतोरूपकभङ्ग्या तत्राप्याचार्यसावित्र्यौ मातापितरावुक्तौ॥१७०॥

(२) **सर्वज्ञनारायणः**। यद्ब्राह्मणे वेदात्सावित्रीरूपाज्जन्ममौञ्जीबन्धनेनोपनयनकर्मणा चिन्हितमुन्नेयम्॥१७०॥

(३) **कुल्लूकः**। तत्रेति तेषु त्रिषु जन्मसु मध्ये यदेतद्ब्रह्मग्रहणार्थंजन्मउपनयनसंस्काररूपंमेखलाबन्धनोपलक्षितं तत्रास्य माणवकस्य सावित्री माताऽऽचार्यश्चपिता मातृपितृसंपाद्यत्वाज्जन्मनः॥१७०॥

(४) **राघवानन्दः**। ब्रह्मदस्य पितुःजनयितव्ये परत्वापेक्षांपूरयन्मौञ्जीबन्धनदीक्षालक्षणजन्मद्वयकारणत्वादेव पितृतःश्रैष्ठ्यमाह तत्रेति त्रिभिः। तत्रद्वितीये जन्मन्युपनयनाख्ये तृतीये यज्ञजन्मनि दीक्षाप्रसूःऋत्विक्पितेत्युक्तः॥१७०॥

(५) **नन्दनः**। तेषुत्रिषु जन्मसु मध्ये ब्रह्मजन्मोपनयनम्॥१७०॥

(६) **रामचन्द्रः**। यत्र द्विजानांमध्येअस्य द्विजस्य ब्रह्मजन्मब्राह्मणंवेदस्य सकाशातजन्मबन्धनचिन्हितंतत्र जन्मनिअस्य सावित्री माता पिताआचार्यउच्यते॥१७०॥

वेदप्रदानादाचार्यं पितरंपरिचक्षते॥ नह्यस्मिन्युज्यते कर्म किञ्चिदामौञ्जिबन्धनात्॥१७१॥

(१) **मेधातिथिः**। मौञ्जीबन्धनचिन्हितमित्युक्तम्। तत्र रज्वासञ्जनादाचार्यः पितृवन्मान्यः स्यात्तदर्थमुच्यते वेदप्रधानादाचार्यंपितरंपरिचक्षते कृत्स्नवेदाध्यापनान्नोपनयनाङ्गभूतसावित्र्यनुवाचनमात्रादेव। प्रदानंस्वीकारोत्पादनंवेदाक्षरोच्चारणे माणवकस्य। यद्येवंयावन्नाचार्येण पितृत्वंप्राप्तंतावन्न माणवकोद्वितीयंजन्म समश्नुते। अप्राप्तद्विजभावश्च प्रागिवोपनयनात्कामचारः स्यादतआह नह्यस्मिन्प्राङ्मौञ्जीबन्धनादस्य माणवकस्य किंचित्कर्म श्रौतस्मार्तमाचारमतिष्ठंवाऽदृष्टार्थंमयुज्यते न तत्राधिक्रियते। उपनयनसमनन्तरमेव सर्वैर्हि जातिपुरुषधर्मैरधिक्रियते। नन्ववैद्यत्वात्तस्यामवस्थायां कथमधिक्रियतां एतदर्थमेवोक्तंगुरौ शिष्यश्च याज्यश्चेति। आचार्येणासौ शिक्षयितव्यः। तदुक्तं शौचाचारांश्च शिक्षयेत्। यथा च गौतमः उपयनादिनियमइति। आचार्यस्य तु वेदसमापनान्तोव्यापारः॥१७१॥

(२) **सर्वज्ञनारायणः**। पितामातेतिनिरुक्तं तत्कथमाचार्यस्तथेत्यतआह वेदप्रदानादिति। प्रत्यवायनिवर्तनंहि रक्षणं तच्चाचार्येणापि वेदानधिगमजन्यप्रत्यवायरक्षणात् कृतमिति भवत्यसौपितेत्यर्थः। प्रत्यवायमाह न ह्यस्मिन्निति। अस्मिन्बाले॥१७१॥

(३) **कुल्लूकः**। वेदाध्यापनादाचार्यंपितरंमन्वादयोवदन्ति। पितृवन्महोपकारफलात्गौणंपितृत्वम्। महोपकारमेव दर्शयति नह्यस्मिन्निति। यस्मादस्मिन्माणवके प्रागुपनयनात्किंचित्कर्म श्रौतंस्मार्तंच न संबध्यते न तत्राधिक्रियतइत्यर्थः॥१७१॥

(४) **राघवानन्दः**। अस्मिन्ननुपनीते बाले न युज्यतेअदृष्टार्थकर्तृत्वेनेति शेषः॥१७१॥

(५) **नन्दनः**। अथआचार्यस्य पितृत्वे हेतुमाहवेदेति। वेदप्रदानात्सावित्रीप्रदानात्। सर्वेहिवेदाःसावित्री। उपनयनाख्यजन्मप्रदानादितियावत्। उपनयनस्योत्पादनसाधर्म्यकथनंतत्कर्तुराचार्यस्य पितृत्वोपपादनार्थमुत्तरार्धेनोपपादितम्। तत्रायमर्थः। अजातस्य यथा न किंचिदस्ति कर्म कर्मणः शरीरसापेक्षत्वादेवमनुपनीतस्यापि विहितंकर्मनास्ति।

जातस्यतु यथास्तिकर्मैवमुपनीतस्यापिविहितंकर्मास्ति । तेनैवमुपनयनस्योत्पादनसाधर्म्यात्तत्कर्तुराचार्यस्य पितृत्वमुपपन्न-मिति ॥ १७१ ॥

(६) **रामचन्द्रः** । वेदप्रदानात्वेदस्यअध्यापनात् आचार्यंपितरंपितृतुल्यंप्रचक्षते । अस्यद्विजस्य आमौञ्जीबन्धनात्किंचित्कर्म कर्तव्यंन विद्यते विना यज्ञोपवीतंकर्माहीन भवन्तीत्यर्थः ॥ १७१ ॥

नाभिव्याहारयेद्ब्रह्म स्वधानिनयनादृते॥ शूद्रेण हि समस्तावद्यावद्वेदे न जायते ॥ १७२ ॥

(१) **मेधातिथि** । आमौञ्जीबन्धनादित्यनुवर्तते । यदि वा यावद्वेदे न जायतइत्यर्थवादतोऽवधिपरिनिश्चयःब्रह्म वेदस्तन्नोच्चारयेत् । पितुरयमुपदेशः यथामद्यपानादिभ्योरक्षतेत्तथा वेदाक्षरोच्चारणात् । केचित्त्विममेव ब्रह्माभिव्याहार निषेधंप्रागुपनयनाद्याकरणायब्रह्माध्ययने ज्ञापकंवर्णयन्ति । णिजर्थंव्याचक्षते पित्रा न वाचनीयः बाल्या तु कानिचि-दव्यक्तानि वेदवाक्यानि स्वयंपठतोन दोषः । एतत्तुनयुक्तं स्मृत्यन्तरे हिपठ्यते न ब्रह्माभिव्याहरेदिति । अर्थवादे च श्रुतंशूद्रेण हि समस्तावदिति । यथा शूद्रोदुष्यति तद्वदयमपीत्युक्तंभवति । स्वधाशब्देन पितृभ्यः कल्पितमन्नमिहोच्यते । अथवा पित्र्यंकर्म स्वधाशब्देनोच्यते । तन्निनीयते त्यज्यते प्राप्यते येन मन्त्रेण सस्वधानिनयनः । शुन्धन्तांपितरइत्या दिस्तंवर्जयित्वान्यमन्त्रोनोच्चारयितव्यः । अनुपनीतेनोदकदाननवश्राद्धादिपितुः कर्तव्यमित्यस्मादेव प्रतीयते । पार्वणश्रा-द्धादौ त्वग्निमत्त्वाभावादनधिकारः पिण्डान्वाहार्यकंहि तद्वक्ष्यते । तृतीये चैतन्निपुणमुपपादयिष्यामः ॥ १७२ ॥

(२) **सर्वज्ञनारायणः** । धर्मकर्मसाधनंतपः प्रभृतितदेवकुतइत्याह । नाभिव्याहारयेदिति । ब्रह्म वेदम् । स्वधा-शब्देनापोनिनीयन्तेत्रेति स्वधानिनयनंश्राद्धं तत्र मन्त्रोच्चारणमनुपनीतेनापि कार्यमेव ततोन्यविषये वेदोच्चारणंन कारये-दिति । श्राद्धेनवश्राद्धादौ वेदोच्चारणमनुज्ञातम् । एतच्च कर्त्रन्तरासंभवे शूद्रेण हीत्यन्य विषये वेदोच्चारणे तादृशमाय-श्चित्तलाभार्थम् । वेदे सावित्र्याम् ॥ १७२ ॥

(३) **कुल्लूकः** । आमौञ्जीबन्धनादित्यनु वर्तते प्रागुपनयनाद्वेदंनोच्चारयेत । स्वधाशब्देन श्राद्धमुच्यते निनी यते निष्पाद्यते येन मन्त्रजातेन तद्वर्जयित्वा मृतपितृकोनवश्राद्धादौ मन्त्रंनोच्चारयेत् । तद्व्यतिरिक्तंवेदंनोदाहरेत् यस्मा-द्यावद्वेदे न जायते तावदसौ शूद्रेण तुल्यः ॥१७२ ॥

(४) **राघवानन्दः** । किंच वेदग्रहणयोग्यतासंपादकजन्मयावन्न जायते तावन्नाभिव्याहारयेत् नअध्यापयेत् ब्रह्म वेदम् । स्वधाश्राद्धंतन्नीयतेनिष्पाद्यते येन मन्त्रजातेन तद्वर्जयित्वा । तेनानुपनीतस्यपितुरौर्ध्वदेहिकेअस्त्यधिकार-इति । शूद्रेण हि समःवेदंयथाशूद्रंन वाचयति किंतु तूष्णींकर्ताकरोति शूद्रोऽमन्त्रेण गृह्णतइति स्मृतेः एवमस्य तदति-रिक्तवेदावाचकत्वात् ॥ १७२॥

(५) **नन्दनः** । यतएवंतस्मादनुपनीतंतन्नाभिव्याहारयेद्ब्रह्म पिता तत्समोवा । स्वधा निनयनात्स्वधानिनयनमन्त्रवन पितृकर्ममन्त्रादिति यावत् । हि हेतौ । वेदे सावित्र्याम् ॥ १७२ ॥

(६) **रामचन्द्रः** । ब्रह्म वेदं नअभिव्याहरेत् न वेदस्यउच्चारणंकुर्यात् । प्रेतकर्मणःस्वधानिनयनादृतेअकृतोपनयन-

---

(१७२) स्वधानिनयनादृते (ग, च)

——निर्वपनादृते (ख)

स्य द्विजस्य पित्रोर्मरणंभवेत् येनाहित्वधीधारणंकर्तव्यंप्रेतकर्म करणीयम् । यावद्वेदेन जायते वेदस्य सकाशात्जन्म न भवेत्तावतशूद्रसमायोभवेत् ॥ १७२ ॥

कृतोपनयनस्यास्य व्रतादेशनमिष्यते ॥ ब्रह्मणोग्रहणंचैव क्रमेण विधिपूर्वकम् ॥ १७३ ॥

(१) **मेधातिथिः** । उपनीय गुरुः शिष्यमित्यनेन शौचाचाराध्ययनानांक्रमउक्तः । अतश्च तेनैव क्रमेण पठेत् । उपनयनानन्तरमध्ययने प्राप्ते क्रमान्तरार्थमिदमारभ्यते । उपनीतस्य त्रैविद्यादिव्रतंच कर्तव्यम् । ततः स्वाध्यायोध्येतव्यः । कृतोपनयनस्य ब्रह्मचारिणोव्रतादेशनमिष्यते क्रियतेचाचार्यैः । शास्त्रवशेनैव मिष्यते । अतश्च कर्तव्यतैवैषणा प्रतिपाद्यते । ततोब्रह्मणोवेदस्य ग्रहणंक्रमेणानेन विधिपूर्वकमित्यर्थवादः श्लोकपूरणार्थः ॥ १७३ ॥

(२) **सर्वज्ञनारायणः** । व्रतादेशनंमधुमांसभक्षणादिनियमोपदेशः । यद्वा व्रतंयच्च भक्षणादि आदेशनंचान्द्रायणादिप्रायश्चित्तोपदेशइति विभज्य व्याख्येयम् । क्रमेणनत्वन्यभागस्य पूर्वमध्ययनेन ॥ १७३ ॥

(३) **कुल्लूकः** । यस्मादस्य माणवकस्य समिधमाधेहि दिवा मा स्वाप्सीरित्यादि व्रतादेशनंवेदस्याध्ययनंमन्त्रब्राह्मणक्रमेणाध्येष्यमाणस्त्वाचाम्तइत्यादि विधिपूर्वकमुपनीतस्योपदिश्यते तस्मादुपनयनात्पूर्वं न वेदमुदाहरेत् ॥ १७३ ॥

(४) **राघवानन्दः** । संप्रति ब्राह्मणादिब्रह्मचारिणःप्राजापत्युक्तव्रताद्यनुवादेन नियमानाह कृतोपनयनस्येति सप्तदशभिः । व्रतादेशनंत्रैविद्यकादिव्रतोपदेशोगुरुणाकार्यःततोवेदाध्ययनंतनश्चोपनीयगुरुरित्युक्तक्रमोबाध्यतेइति मेधातिथिः । उपनीयेत्यैववेदशब्दोत्र गायत्रीपरइति न क्रमविरोधः ॥ १७३ ॥

(५) **नन्दनः** । उपनयनानन्तरमध्ययनेप्रभिक्रमोविधीयते कृतेति । व्रतादेशनंव्रतानांप्राजापत्यादीनामुपदेशक्रमेण वेदाध्यायिनामाचारेण ॥ १७३ ॥

(६) **रामचन्द्रः** । अस्य द्विजस्य कृतोपनयनस्य व्रतादेशनंव्रताचरणमिष्यते । ब्रह्मणःवेदस्यग्रहणंक्रमेणऋक्यजुःसामक्रमेण विधिपूर्वकंग्राह्यम् ॥ १७३ ॥

यद्यस्य विहितंचर्म यत्सूत्रंया च मेखला ॥ योदण्डो यच्च वसनं तत्तदस्य व्रतेष्वपि॥१७४ ॥

(१) **मेधातिथिः** । गृह्यकारैर्व्रतनामधेयकानि कर्माण्युपदिष्टानि संवत्सरंवेदभागंवाकिंचिज्जिघृक्षतइयंव्रतचर्यायोयवनियमसमूह स्तत्र पूर्वव्रतसबामौ व्रतान्तरारम्भे तुपनयने ये विधयस्तादृशएव व्रतादेशेषु । अथ प्रागुपात्तानांका प्रतिपत्तिः । अप्सु प्रासनम् । ननुच तदुक्तमागुपात्तानां विनष्टानां का प्रतिपत्तिः । विनाशे शास्त्रनोदितंचैषांकार्यमन्योपादानाच्च तेषांनिवृत्तिः । यच्चर्मयस्य ब्रह्मचारिणोविहितंयथा कार्ष्णंब्राह्मणस्य रौरवंक्षत्रियस्येति । एवंदण्डादिष्वपि द्रष्टव्यम् तस्य व्रतेष्वपि कृतत्वात् । व्रतशब्दोव्रतादेशे वर्तते ॥ १७४ ॥

(२) **सर्वज्ञनारायणः** । व्रतेषु चान्द्रायणेषु गार्हस्थ्येपि चान्द्रायणादिव्रतेषु एतत्पञ्चकं स्ववर्णोक्तं ग्राह्यमित्यर्थः । कश्चिद्वेदाध्ययनाद्व्रतेषुसावित्र्यादिष्वविनष्टान्यपिपूर्वाणिजले त्यक्तातज्जातीयान्यन्यान्युपादेयानीत्यस्यार्थमाहुः ॥ १७४ ॥

(३) **कुल्लूकः** । यस्य ब्रह्मचारिणीयानि चर्मसूत्रमेखलादण्डवस्त्राण्युपनयकाले गृह्येण विहितानि गोदानादिव्रतेष्वपि तान्येव नवानि कर्तव्यानि ॥ १७४ ॥

(४) **राघवानन्दः** । व्रतेषु षट्त्रिंशदाब्दिकादिवेदव्रतेषुकाम्येषु वेदग्रहणतात्पर्यन्ते पुवा ॥ १७४ ॥

(५) नन्दनः । अथ कानिचिद्व्रतानि व्रतप्रसङ्गादाह यद्यस्येति । यस्य ब्राह्मणस्य क्षत्रियस्य वैश्यस्य वा यच्चर्म-काण्गरौरवबास्तादि । एतेनयत्सूत्रमित्यादिव्याख्यातम् । पुराणानि चर्मादीनि समुत्सृज्यान्यानि नवानि चर्मादीनि व्रतेषु धार्याणीत्यर्थः ॥ १७४ ॥

(६) रामचन्द्रः । यस्य ब्राह्मणस्य वा क्षत्रियस्य वा वैश्यस्य वा यत्सूत्रंयज्ञोपवीतंच चर्म विहितं या च मेखला स्थिताय:दण्डः यत्तु वसनं तत्तत्तस्येद्विजव्रतेष्वपि ॥ १७४ ॥

सेवेतेमांस्तु नियमान् ब्रह्मचारी गुरौ वसन् ॥ सन्नियम्येन्द्रियग्रामंतपोवृध्यर्थमात्मनः ॥ १७५ ॥

(१) मेधातिथिः । वक्ष्यमाणस्य यमनियमसमूहस्य पृथक्प्रकरणत्वेन श्लोकोयंगौरवख्यापनार्थः । एवंतु यत्पूर्वमुक्तंतदवश्यकर्तव्यमिदंतु ततोगुरुतरमनुष्ठीयमानंमहते फलाय । ब्रह्मचारिग्रहणं प्रकरणान्तरत्वेनातद्धर्माशङ्कयाऽनुसंधानार्थम् । यदि ब्रह्मचारिधर्मएवाऽऽसीन्किंतर्हीदमुच्यते प्रकरणान्तरमिति । पूर्वेभ्यएतेषामतिशयात्समानधर्मत्वादेतावता वैलक्षण्येन प्रकरणान्तरत्वव्यवहारः । परिशिष्टानि पदानि श्लोकपूरणार्थतयानूद्यन्ते । सेवेत अनुतिष्ठेत । इमान्वक्ष्यमाणान् । बुद्धौ संनिहितत्वादिदमानिर्दिश्यन्ते । गुरौ वसन्गुरुसमीपे विद्याध्ययनार्थंवसन् । नियमानाह । संनियम्येन्द्रियग्रामं प्रागुक्तेन मार्गेण तपोवृद्ध्यर्थमभ्यायविध्यनुष्ठानजन्यात्मसंस्कारार्थम् ॥ १७५ ॥

(२) सर्वज्ञनारायणः । इमान्वक्ष्यमाणान् ॥ १७५ ॥

(३) कुल्लूकः । ब्रह्मचारी गुरुसमीपे वसन्निन्द्रियसंयमंकृत्वात्मगतादृष्टवृद्ध्यर्थमिमान्नियमाननुतिष्ठेत् ॥ १७५ ॥

(४) राघवानन्दः । इमान्वक्ष्यमाणान् ॥ १७५ ॥

(५) नन्दनः । इमान्वक्ष्यमाणान् ॥ १७५ ॥

(६) रामचन्द्रः । ब्रह्मचारी गुरौ वसन्गुरोःसमीपे वसन् इमाननियमान्सेवेत कुर्यात् ॥ १७५ ॥

नित्यंस्नात्वा शुचिः कुर्याद्देवर्षिपितृतर्पणम् ॥ देवताभ्यर्चनंचैव समिदाधानमेव च ॥ १७६ ॥

(१) मेधातिथिः । तानीदानींप्रतिज्ञातान्पूर्वेण नियमानाह । प्रत्यहंस्नात्वा शुचिः स्नानेनापनीताशुचिभावोदेवर्षिपितृतर्पणंकुर्यात् । यदि पुनर्न शुचिः तदावश्यंस्नायात् । शुचिग्रहणेन शुद्धिहेतुतयात्रस्नानस्योपदिष्टत्वान्न स्नातकव्रतवत्तदनुष्ठेयम् । अतएव स्मृत्यन्तरे च स्नानंप्रतिषिद्धंसप्रतिषेधोमृदा स्नानस्य प्रसाधनलक्षणस्य । गौतमेनतु स्नानमेवंविहितंदण्डइवाप्सु परिप्लवते । मलापकर्षणंकरनिघर्षणादिना न कर्तव्यम् । अस्यामेध्यादिसंसर्गेण य स्त्वेद जंवस्त्ररेणुसंयोगादिसहजंमलंतदशुचित्वमापादयति तद्धिनियतरूपमेव । तथा च ब्राह्मणं किंनुमलंकिमजिनंकिमुश्मश्रूणि किंतपइति । धर्मसाधनतामेवंविधस्य मलधारणस्य दर्शयति । कथंपुनः स्नानस्य शौचार्थता प्रतीयते । न पुनः स्नातः शुचिश्चोभयविशिष्टोदेवकार्ये विनियुज्यते । स्नातस्याशुचित्वाभावात्कृतशौचाचमनादेः स्नानविधानात्स्नात्वाचाचान्तः पुनराचामेदिति च स्नातस्यापि शुचिरित्येतावता यादृशी शुद्धिस्तस्यां विज्ञायमानायां स्नानमपि सति निमित्ते प्राप्तंपुनरुच्यते । स्मृत्यन्तरंचेदंसत्यशुचित्वे निमित्ते प्रतिषेधार्थम् । तथाच वेदमधीत्य स्नायादिति समाप्ते स्वाध्यायविधौ प्रतिप्रसविष्यति । कुर्याद्देवर्षिपितृतर्पणम् उदकदानंदेवादिभ्योगृहस्थधर्मेषु यदुक्तंतादृशमेव प्रतीयते तर्पणशब्दसाहचर्यात् । यदेवतर्पयत्यद्भिरिति तथादेवताभ्यर्चयतीति गृह्यकारैरुदकसाधनोयंविधिरुक्तः । उदकतर्पणमिति चैतत्संविज्ञायते । तेदेवागृह्यकारैः पठिता अग्निप्रजापतिब्रह्मेत्यादयः । तेषांचतर्पणं न सौहित्योत्पादनं किंतर्हि तदुद्देशेनोदकाञ्जलिप्रक्षेपः । अतोयमुदकद्रव्यकोयागएवोक्तोभवति । नह्यन्यथा देवतात्वंभवति ।

यामसंप्रदानंहितेति स्मर्यते न स्मृतेः कर्त्री । एतावद्धि देवतालक्षणम् । सूक्तभाजोहविर्भाजश्चदेवताः तत्रसूक्तंस्तुत्यतयाभ जन्ते हविः संप्रदानतया । तर्प्यत्वेन चोदकदानसंप्रदानतामेव गुणवृत्त्या वक्ति । गुर्वादिसंप्रदानंगवादिना तदुद्दिश्यमानत्वा-म्येन प्रतीयते । देवताऽपि संप्रदानमतः संप्रदानत्वसाम्यात्तृप्यन्तीत्युच्यते । यदि देवतातृप्त्यर्थमेतत्स्यात्तदा संस्कारकर्मो-दकतर्पणंस्यात् । नच देवतानांसंस्कार्यत्वोपपत्तिः नहि ताः कचिदुपयुक्ताउपयोक्ष्यन्तेवा नवा कृताः करिष्यमाणकार्यस्य संस्कारतोपपत्तिः । ऋषयोयेयस्यार्षेयाः यथा पराशराणांवाशिष्ठशाक्यपाराशर्येति । गृह्यकारैस्तु मन्त्रदृशऋषयस्तर्पणीयत्वे-नोक्ताः मधुच्छन्दोगृत्समदोविश्वामित्रइति । अविशेषाभिधानादृषिशब्दस्योभयेऽपि प्राप्ताः विशेषस्मृतित्वाद्गृह्यस्मृतेस्तएव ग्रहीतुंन्याय्याः । पितरः पूर्वप्रेताः पितृपितामहाः सपिण्डाः समानोदकाश्च । पितॄणांतर्पणंतर्पणमेव । एतच्च श्राद्धविधौ प्रत्य-क्षेण वक्ष्यते । देवताभ्यर्चनं अत्र केचिच्चिरन्तनाविचारयांचक्रुः काएतादेवतानाम यासामिदमभ्यर्चनमुच्यते यदि तावच्चित्रपुस्तकन्यस्तः चतुर्भुजोवज्रहस्तइत्याद्याःप्रतिकृतयइति लौकिकाव्यवहरन्ति अतोगौणस्तत्र देवताव्यवहारः अथ याःसूक्तहविःसंबन्धिन्योवैदिकीभ्यश्चोदनाभ्योमन्त्रवाक्येभ्यश्चावगम्यन्ते शब्दार्थसंबन्धविदश्च स्मरन्ति अग्निः अग्नीषोमौ मित्रावरुणौ इन्द्रोविष्णुरिति यद्येवंतत्क्रियासंबन्धितयैव तेषांदेवतात्वंनार्थसंबन्धितया तत्रापि यस्यैव हविषोया देवता तेन चोदिता तस्यैव सा भवति तथा ह्याग्नेयोऽष्टाकपालइत्याग्नेये देवतापुरोडाशे न सौर्ये चरौ अयंच तेषांनिर्णयः मुख्यासंभवाद्गौणस्यैव ग्रहणं न्याय्यंसमाचाराच्च अतः प्रतिमानामेवैतत्पूजाविधानम् । यच्चात्र तत्त्वंतद्व्रतवद्देवदैवत्यइ-त्यत्र वक्ष्यामः । समिदाधानंसायंप्रातरग्नौ दारुशकलप्रक्षेपणम् ॥ १७६ ॥

(२) सर्वज्ञनारायणः । अवगाहनेन स्नात्वा मार्जनादिना वा शुचिर्भूत्वा । आदिष्टीनोदकं कुर्यादिति तु प्रेततर्प-णपरम् । देवतानामर्चनंपुष्पाद्यैः ॥ १७६ ॥

(३) कुल्लूकः । प्रत्यहंस्नात्वा देवर्षिपितृभ्यउदकदानंप्रतिमादिषु हरिहरादिदेवपूजनंसायंप्रातश्च समिद्धोमंकु-र्यात् । यस्तु गौतमीये स्नाननिषेधोब्रह्मचारिणः ससुखस्नानविषयः । अतएव बौधायनः नाप्सु श्लाघमानःस्नायात् । विष्णु-नात्रकालद्वयमभिषेकाग्निकार्यकरणमप्सु दण्डवन्मज्जनमिति ब्रुवाणेन वारद्वयंस्नानमुपदिष्टम् ॥ १७६ ॥

(४) राघवानन्दः । नित्यंस्नात्वेत्यादिकान् । समिदाधानमग्नाविति शेषः ॥ १७६ ॥

(५) नन्दनः । तानेवनियमानाह नित्यमिति । आश्रमान्तरेऽपि तर्पणार्चनयोः करणार्थंनित्यग्रहणम् । समिदाधा-नस्यपुनर्ग्रहणमादरातिशयार्थम् ॥ १७६ ॥

(६) रामचन्द्रः । समिदाधानंअग्नौआधानंस्थापनंकर्तव्यम् ॥ १७६ ॥

वर्जयेन्मधुमांसंच गन्धंमाल्यंरसान्स्त्रियः॥ शुक्तानि यानि सर्वाणि प्राणिनांचैव हिंसनम्॥१७७॥

(१) मेधातिथिः । मधुसारघम् । माध्वीकस्य तु मद्यत्वात्प्रागप्युपनयनात्प्रतिषेधोनित्यंमद्यंब्राह्मणोवर्जयेदिति । मांसंप्रो-क्षितमपि । गन्धशब्देन सुरभित्वातिशययुक्तानि कर्पूरागरुप्रभृतीनि द्रव्याणि सबन्धिलक्षणया प्रतिषिध्यन्ते । तेषामनुलेपना-द्युपभोगप्रतिषेधः । गन्धस्तुस्वदेशान्निर्गतआगच्छतीत्यशक्योनिषेद्धुंतत्राप्याकस्मिकस्याप्यप्रतीषेधात् । भोगेच्छया त्वगरु-धूपादौ दोषएव । अतउपाध्यायेन चन्दनवृक्षादिच्छेदने नियुक्तस्य तद्गन्धस्याघ्राणे वस्तुस्वभावतउत्पद्यमाने न दोषः । मा-ल्यसाहचर्याच्चेदृशोगन्धः प्रतीयते । यस्तु नेदृशोऽदयोन्मादकरः कुष्ठघृतपूतिदार्वादिगन्धस्तस्य प्रतिषेधः । माल्यंकुसुमग्रथि-

---

(१७७) शुक्तानि= (च, ख, ग, घ, मेधा०)

तम्। रसामधुराम्लादयः। ननु च नीरसस्य भोज्यत्वासंभवात्प्राणवृत्तिरेवनस्यात्। सत्यम् उद्रिक्तरसाः केवलागुडादयोनिषिध्यन्ते। संस्कारकरणे द्रव्यान्तर्गतानामपि प्रतिषेधः। अथचात्यन्तमसंस्कृतस्यान्नस्य उक्तिप्रतिषेधोयम्। यथोक्तम् योहेरिव धनाद्भीतोमिष्टान्नाच्च विषादिव। राक्षसीभ्यव स्त्रीभ्यः सविद्यामधिगच्छतीति। अन्येतु शृङ्गारादीन्मन्यन्ते। नाटकादिप्रेक्षणेन काव्यश्रवणेन वा रसपुष्टिर्न वक्तव्या। अन्येषांतु दर्शनमिक्ष्वामलकादीनांयोन्तर्द्रवरूपोदकवत्सरसस्तस्य निष्पीडितस्य प्रतिषेधोन पुनस्तदन्तर्गतस्य। तच्चैतदयुक्तं नहि रसशब्दोद्रवपर्यायः प्रसिद्धः। यत्र च यस्योचितमुपभोगान्तत्वंतदेव तस्य निषिध्यते। तेन मधुमांसयोर्भोजने प्रतिषेधोन दर्शनस्पर्शनयोः। गन्धमाल्यस्यापि शरीरमण्डनाभिमानतयोपादानंनिषिध्यते नतुकथंचिद्धस्तादिना ग्रहणम्। एवंस्त्रियोमैथुनसंबन्धेन। तदाशङ्कयैव च प्रेक्षणालम्भौनिषेत्स्यति। तथाचगौतमः स्त्रीप्रेक्षणालम्भने मैथुनशङ्कायामिति। शुक्तानि प्रागाम्लरसानि केवलात्परिवासाद्द्रव्यान्तरसंसर्गाद्वाऽम्लतामापन्नानि। तेषांच द्विजातिधर्मत्वादेव सिद्धः प्रतिषेधः पुनर्ग्रहणंगौणशुक्तपरिग्रहणार्थम्। तेन रूक्षपरुषावाचोनिषिद्धाभवन्ति। यदुक्तंगौतमेन शुक्तावाचइति। तदिदंसर्वग्रहणंचास्यैवार्थस्याविष्करणार्थम्। रसशुक्तान्यनूद्य सर्वाणीति विधीयते। ततोगौणपरिग्रहः सिद्धोभवति येत्वेवंव्याचक्षते। शुक्तशब्देन रसप्रतिषेधः सर्वशब्देन मानसानि वचांसि तद्वद्द्रष्टव्याः अर्थप्रतिषिद्धानांप्रतिषेधार्थंसर्वग्रहणंकस्मान्नभवति। तथा सति च दध्यादेःशुक्तीभूतस्य प्रतिषेधः प्राप्नोति। यदितु प्राप्तिमाश्रित्य पुनः प्रतिषेधउक्तार्थोव्याख्यायते तथा सति नकश्चिद्दोषः। प्राणिनां मशकमक्षिकादीनांबाल्याद्धिंसने प्राप्ते यत्नतः परिहारार्थंपुनः प्रतिषेधः। स्वाध्यायविध्यङ्गत्वार्थोवा। न केवलंहिंसायांपुरुषार्थः प्रतिषेधातिक्रमोयावत्स्वाध्यायविध्यर्थातिक्रमोपि। शुक्तादिष्वप्येवंकस्मान्न कल्प्यतइति चेदस्ति तत्र विषयान्तरेसावकाशत्वमेकरूपस्य विषयस्य व्यर्थत्वंसति गत्यन्तरे गरीयः॥ १७७॥

(२) **सर्वज्ञनारायणः**। वर्जयेन्नोपयुञ्जीत। माल्यंपुष्पं। रसाउत्कटरसाः गुणादयः शृङ्गारादयइत्यन्ये। सर्वाणिशुक्तानिदध्यादीन्यपि। शुक्तमिति शुक्तमनम्लं कालवशेन द्रव्यान्तरयोगेन वाऽम्लतांगतम्। न त्वत्र शुक्तवागपि ग्राह्याप्रवृत्तिनिमित्त भेदात्॥ १७७॥

(३) **कुल्लूकः**। क्षौद्रंमांसंच न खादेत्गन्धंच कर्पूरचन्दनकस्तूरिकादिवर्जयेत्। एषांच गन्धानांयथा संभवंभक्षणमनुलेपनंच निषिद्धंमाल्यंच न धारयेत्। उद्रिक्तरसांश्च गुडादीन्न खादेत्। स्त्रियश्च नोपेयात्। यानि स्वभावतोमधुरादिरसानि कालवशेनोदकवासादिनाचाम्लयन्ति तानिशुक्तानि न खादेत्। प्राणिनांहिंसांन कुर्यात्॥ १७७॥

(४) **राघवानन्दः**। मधुसारघम्। रसान् रेतोवृद्धिहेतुदुग्धादीन्स्त्रियःभोगविषयत्वेन। शुक्तानीति स्वरसतोमधुराणि कालवशेनअम्लतांयान्ति यानि तानीति॥ १७७॥

(५) **नन्दनः**। रसान्घृततैलादीन्। कालातिपत्या स्वरसंपरित्यज्य रसान्तरमापन्नानि शुक्तानि॥ १७७॥

(६) **रामचन्द्रः**। मध्वादि वर्जयेत् स्त्रियःभोगार्थंवर्जयेत् सर्वप्राणिनांहिंसनंवर्जयेत्। शुक्तद्रव्यान्तरसंयोगात् अम्लतामापन्नानि निष्ठुरवचनानि वा॥ १७७॥

अभ्यङ्गमञ्जनंचाक्ष्णोरुपानच्छत्रधारणम्॥ कामंक्रोधंच लोभंच नर्तनंगीतवादनम्॥ १७८॥

(१) **मेधातिथिः**। घृततैलादिना स्नेहेन शिरः शरीरम्रक्षणमभ्यङ्गः। अञ्जनंचाक्ष्णोः। अक्षिग्रहणंवृत्तपूरणार्थम्। अनयोश्चापिदेहमण्डनार्थतया प्रतिषेधोनौषधार्थतया गन्धमाल्यादिसाहचर्यात्। उपानहौ चर्मपादुके नकेवलंछत्रधारणंचस्वहस्तेन परहस्तेन वोभयस्यापि निषेधः। कामोमन्मथस्य स्त्रीप्रतिषेधादेव सिद्धः। क्रोधोरोषः। लोभोमोहः। अहंकार

ममकारौ चित्तधर्मावेते। नर्तनंप्राकृतपुरुषाणां हर्षाय गात्रविक्षेपो भरताविद्दष्टाभिनयप्रयोगश्च। गीतंषड्जादिस्वरप्रदर्शनंवादित्रंवीणावंशादिभिः स्वरवच्छन्दकरणंपणवमृदङ्गाद्यभिघातश्च तालानुवृत्त्या ॥ १७८ ॥

(२) सर्वज्ञनारायणः। अभ्यङ्गंतैलादिम्रक्षणम्। स्त्रियइति स्त्रीसंबन्धोनिषिद्धः। कामशब्देन त्वत्र तदभिलाषोनिषिध्यते ॥ १७८ ॥

(३) कुल्लूकः। तैलादिना शिरःसहितदेहमर्दनलक्षणंकज्जलादिभिश्च चक्षुषोरञ्जनंपादुकायाश्छत्रस्य च धारणंकामंमैथुनातिरिक्तविषयाभिलाषातिशयं मैथुनस्य स्त्रियइत्यनेनैवनिषिद्धत्वात् क्रोधलोभनृत्यगीतवी णापणवादिवर्जयेत् ॥ १७८ ॥

(४) राघवानन्दः। अभ्यङ्गंतैलादिनोन्मर्दनम्। कामोधनाभिलाषः ॥ १७८ ॥

(५) नन्दनः। अत्र वर्जयेदित्यनुवर्तते ॥ १७८ ॥

(६) रामचन्द्रः। अभ्यङ्गंतैलादिना अक्ष्णोरञ्जनंकज्जलादिना वर्जयेत्। उपानत्छत्रधारणं कामादि वर्जयेत् ॥ १७८ ॥

द्यूतंच जनवादंच परिवादंतथानृतम् ॥ स्त्रीणांच प्रेक्षणालम्भमुपघातंपरस्य च ॥ १७९ ॥

(१) मेधातिथिः। द्यूतमक्षक्रीडा। समाह्वयः कुक्कुटादिभिः प्रतिषिद्धोद्यूतशब्दस्यसामान्यशब्दत्वात्। जनैर्वादः अकारणेन लौकिकेष्वर्थेषु वाक्कलहः। देशवार्ताद्यन्वेषणंप्रश्नोवा परिवादः। असूयया परदोषकथनमनृतमन्यथा दृष्टमन्यथा च श्रुतं यदन्यथोच्यते। सर्वत्र वर्जयेदित्यनुषङ्गाद्द्वितीया। स्त्रीणांच प्रेक्षणालम्भौ अवयवसंस्थाननिरूपणंप्रेक्षणमिदमस्याः शोभतेइदमिदंनेति आलम्भआलिङ्गनंमैथुनशङ्कायां चैतौ प्रतिषिध्येते बालस्य यथातथम्। परस्योपघातोपकारः कस्यचिदर्थसिद्धौ प्रतिबन्धः कन्यालाभादौ पृच्छयमानेन प्रयोगस्याप्ययोगत्वंनवक्तव्यम्। तूष्णीमासितव्यम नृतप्रतिषेधात् ॥ १७९ ॥

(२) सर्वज्ञनारायणः। जनवादंवार्तादिकथनं स्त्रीणांमातृतुल्याभ्योऽन्यासामकामतोपि प्रेक्षणमालम्भंच उपघातंमनोदुःखकरणम् ॥ १७९ ॥

(३) कुल्लूकः। अक्षक्रीडां जनैःसह निरर्थकवाक्कलहंपरस्य दोषवादंमृषाभिधानंस्त्रीणांच मैथुनेच्छयासानुरागेणप्रेक्षणालिङ्गनंपरस्य चापकारंवर्जयेत् ॥ १७९ ॥

(४) राघवानन्दः। जनवादंनिरर्थकवाक्कलहम्। स्त्रीणामितिइदमस्याःसौकुमार्यमित्यादिसरागेक्षणस्पर्शने। उपघातं अपकारंमनोवचोभिः हिंसानुकार्येनेति भेदः ॥ १७२ ॥

(५) नन्दनः। प्रेक्षणालम्भंरागयुक्ते दर्शनस्पर्शने। उपघातंद्रोहम् ॥ १७९ ॥

(६) रामचन्द्रः। द्यूतादि स्त्रीणांप्रेक्षणं तथाभ्यङ्गं आलिङ्गनं परस्यअन्यस्यअपघातं मनोदुःखकारणं वर्जयेत् ॥ १७९ ॥

एकः शयीत सर्वत्र न रेतःस्कन्दयेत्क्वचित् ॥ कामाद्धि स्कन्दयन्रेतोहिनस्ति व्रतमात्मनः ॥ १८० ॥

(१) मेधातिथिः। एकः शयीतसर्वत्र नरेतः स्कन्दयेत्कचित्। अयोनावपि योनौ स्त्रीप्रतिषेधादेव सिद्धत्वादत्रार्थवादः। कामाद्धिस्कन्दयन् इच्छात्रकामः हस्तव्यापारादिनाऽयोनौ मैथुनेन च रेतः शुक्रंस्कन्दयन्क्षरयन्हिनस्ति नाशयति ब्रह्मचर्यव्रतमात्मनः ॥ १८० ॥

(२) सर्वज्ञनारायणः। एकोन द्वितीयेन सहैकशय्यायाम्। सर्वत्र जनाकीर्णेपि कचिद्भूम्यादावपि न स्कन्दयेत्। कामतः स्कन्दयन् कामतस्तु स्त्रियंदृष्ट्वापि स्कन्दनेन व्रतहानिः। व्रतंहिनस्त्यतःपुनरुपनयनंतस्येत्यर्थः॥ १८०॥

(३) कुल्लूकः। सर्वत्र नीचशय्यादावेकाकी शयनंकुर्यात्। इच्छया न स्वशुक्रंपातयेद्यस्मादिच्छया स्वमेहनाच्छुक्रंपातयन्स्वकीयव्रतंनाशयति व्रतलोपे चावकीर्णिप्रायश्चित्तंकुर्यात॥ १८०॥

(४) राघवानन्दः। न स्कन्दयेत्स्वेच्छया न पातयेत्। कचिदयोनावपि। कामादिति प्रायश्चित्तार्थमनुवादः अवकीर्णी नैर्ऋतगर्दभालम्भनंकुर्यादितिस्मृतेः॥ १८०॥

(५) नन्दनः। सर्वत्र मातृपितृसमीपे। हिहेतौ। व्रतंब्रह्मचर्यम्। हिनस्तिहन्त्येव॥ १८०॥

(६) रामचन्द्रः। एकःशयीत स्त्रिया सह न शयीत रेतः कचित् न स्कंदयेत् न पातयेत्। तद्यथा अयोनौ च वियोनौ च पशुयोनौ तथाविधः॥ १८०॥

स्वमे सिक्त्वा ब्रह्मचारी द्विजःशुक्रमकामतः॥स्नात्वाऽर्कमर्चयित्वा त्रिः पुनर्मामित्यृचंजपेत्॥ १८१॥

(१) मेधातिथिः। कामाद्व्रतलोपोनावकीर्णिप्रायश्चित्तमकामात्त्विदमाह। स्वप्नग्रहणमविवक्षितमकामतइत्येतदेवदेव निमित्तम्। नहि स्वमे कामसंभवः अतोयच्चसुप्तस्यापि कथंचिदनिच्छया स्वमलास्रुगवयववत्प्रक्षरति शुक्रंतत्राप्येतदेव प्रायश्चित्तम्। अकामतोरेतः सिक्त्वेदंप्रायश्चित्तंकुर्यादित्येतत्तृचंजपेत्॥ १८१॥

(२) सर्वज्ञनारायणः। अकामतःस्त्रियमनुध्यायापि सुप्तः सकृद्गन्धपुष्पादिनार्चयित्वा त्रिर्जपेत्। अत्र प्रायश्चित्तोक्तिःप्रसङ्गात्। एतच्चान्येषामपि वनस्थादीनांब्रह्मचर्यनियमप्रवृत्तानाम्॥ १८१॥

(३) कुल्लूकः। ब्रह्मचारी स्वप्नादावनिच्छया रेतःसिक्त्वा कृतस्नानश्चन्दनाद्यनुलेपनपुष्पधूपादिभिः सूर्यमभ्यर्च्यपुनर्मामैत्विन्द्रियमित्येतामृचंवारत्रयंपठेत्। इदमत्र प्रायश्चित्तम्॥ १८१॥

(४) राघवानन्दः। ऋचंपुनर्मामैत्विन्द्रियमित्येताम्॥ १८१॥

(५) नन्दनः। अकामतोहि रेतः स्कन्दने प्रायश्चित्तप्रकरणउक्तमप्यत्रादरातिशयार्थमाह स्वप्नइति॥ १८१॥

(६) रामचन्द्रः। ब्रह्मचारी द्विजःस्वप्ने शुक्रंअकामतःसिक्त्वा शुक्रंपातयेत्चेत्पूर्वंस्नात्वाअर्केअर्घ्यंदत्वा त्रिःत्रिवारंपुनर्मामित्यृचंजपेत्॥ १८१॥

उदकुम्भंसुमनसोगोशकृन्मृत्तिकाकुशान्॥आहरेद्यावदर्थानि भैक्षंचाहरहश्चरेत्॥ १८२॥

(१) मेधातिथिः। यावद्भिरर्थः प्रयोजनमुपाध्यायस्य सिध्यति तावदुदकुम्भादिआहरेत्। प्रदर्शनार्थंचैतत्। अन्यदपिगृहोपयोगि यदगर्हितंकर्म तत्कुर्याद्गर्हितंगुरुव्यतिरेकेणोच्छिष्टापमार्जनादिन कारयितव्यइत्येवमर्थोयंश्लोकःयतः सामान्येन शुश्रूषागुरौ विहिता। यावानर्थएषामिति विग्रहः। भैक्ष्यंचाहरहश्चरेत्सिद्धमन्नमत्यन्तालपयात्राविषयंभैक्षमत्रोच्यते। नैकान्नादि प्रतिषेधेऽन्नशब्दोपादानादन्नंप्रतीयते। समाहृत्य भैक्षंनिवेद्याश्नीयादिति सामाधिकरण्यात्सिद्धान्नप्रतिपत्तिः। शुष्केह्यन्ने भिक्षिते कुतस्तस्याशनम्। समाहृतस्य गुरुगृहे पच्यमानस्य भैक्षमकृतिता स्यान्नभैक्षता। प्रसिद्ध्यापेरशमेव भैक्षमुच्यते। अहरहः ननु भैक्षेण वर्तयेन्नित्यमित्येतस्मादेव सिद्धमहरहश्चरणंसिध्यति। वृत्तिविधानार्थंनित्यग्रहणम्। पर्युषितेनापि घृतादिस्नेहसंयुक्तेन स्याद्वृत्तिस्तदर्थमिदमहरहर्भिक्षित्वाशितव्यम्। न पुनरेकस्मिन्नहनि भिक्षितमपरेद्युः परिवास्य यत्किंचित्स्नेहयुक्तमिति प्रतिप्रसवेन भुञ्जीत॥ १८२॥

(२) **सर्वज्ञनारायणः** । गोशकृद्गोमयम् । यावदर्थानि यावता तद्विनासाध्यसिद्धिः । अहरहर्नदिनद्वयार्थम्॥१८२॥

(३) **कुल्लूकः** । जलकलशपुष्पगोमयमृत्तिकाकुशान्यावदर्थानि यावद्भिः प्रयोजनान्याचार्यस्य तावन्त्याचार्यार्थमाहरेत् । अतएव उदकुम्भमित्यत्रएकत्वमप्यविवक्षितंप्रदर्शनंचैतत् । अन्यदप्याचार्योपयुक्तमुपहरेद्भैक्षंच प्रत्यहमर्जयेत् ॥ १८२ ॥

(४) **राघवानन्दः** । गोशकृत्गोमयम् । यावदर्थानि प्रयोजनोपयुक्तानि नाधिकानीति ॥ १८२ ॥

(५) **नन्दनः** । यावदर्थानि यावत्प्रयोजनानि । अहरहर्भैक्षंचरेत्तनापरेद्युरर्थंपूर्वेद्युः ॥ १८२ ॥

(६) **रामचन्द्रः** । गोशकृत्गवांशकृत्गोमयं यावदर्थंयावत्प्रयोजनंचाहरेत् आनयेत् । अहरहः भैक्ष्यंचरेत् ॥ १८२ ॥

वेदयज्ञैरहीनानांप्रशस्तनांस्वकर्मसु॥ब्रह्मचार्याहरेद्भैक्षंगृहेभ्यःप्रयतोऽन्वहम् ॥ १८३ ॥

(१) **मेधातिथिः** । येभ्योभैक्षमासादयितव्यंतान्वक्ति । वेदयज्ञैश्च यअहीना वेदाध्ययनेन संयुक्ताः यज्ञानांच सत्यधिकारे कर्तारअहीनाऽवर्जितास्तदुपेताइति यावत् । स्वकर्मसु च प्रशस्ताः येषांयज्ञेधिकारोनास्त्यन्यस्मिन्प्रशस्ते कर्मणि तत्पराः । अथ वा स्वकर्मप्रशस्तास्तउच्यन्ते ये स्ववृत्तावेव संतुष्टानवार्द्धुषिकारिवृत्त्युपजीविनस्तेषांगृहेभ्योभैक्षमाहरेद्याचित्वागृह्णीयात्प्रयतः शुचिः । अन्वहमित्यनुवादः ॥ १८३ ॥

(२) **सर्वज्ञनारायणः** । प्रशस्तानांलब्धोत्कर्षाणां स्वकर्मसु ब्रह्मचारिकर्मसु ॥ १८३ ॥

(३) **कुल्लूकः** । वेदयज्ञैश्चात्यक्तानां स्वकर्मसुदक्षाणांगृहेभ्यः प्रत्यहंब्रह्मचारी सिद्धान्नभिक्षासमूहमाहरेत् ॥ १८३ ॥

(४) **राघवानन्दः** । येभ्योभैक्ष्यमाहार्यंतानाह वेदेति । प्रशस्तानांदक्षाणांस्वकर्मसु ॥ १८३ ॥

(५) **नन्दनः** । अथ भैक्षेऽप्यादाननियममाह वेदयज्ञैरिति । प्रयतोवाङ्मनश्चक्षुर्भिः ॥ १८३ ॥

(६) **रामचन्द्रः** । वेदयज्ञैः अहीनानांन हीनानांपूर्णानांस्वकर्मसु स्वस्वकर्मसु प्रसक्तानांगृहेभ्यःअन्वहंप्रत्यहंप्रत्यक्षःसन्ब्रह्मचारी भैक्ष्यंआहरेत् ॥ १८३ ॥

गुरोःकुले न भिक्षेत न ज्ञातिकुलबन्धुषु ॥ अलाभे त्वन्यगेहानांपूर्वंपूर्वंविवर्जयेत् ॥ १८४ ॥

(१) **मेधातिथिः** । सत्यप्येतद्गुणयोगे गुरुगृहे न भिक्षेत । पूर्वकुलंवंशस्ततोगुरोर्ये पितृव्यादयस्तेभ्योऽपि न ग्रहीतव्यम् । ज्ञातयोब्रह्मचारिणः पितृपक्षास्तेषांकुलेबन्धुषु च मातृपक्षेषु मातुलादिषु नैवमभिसं बन्धः कर्तव्योगुरुज्ञात्यादिष्विति यतो-गुरोः कुलइति कुलशब्देनैव तेषांसंगृहीतत्वात् । कुतस्तर्हि भिक्षेत । एतव्द्यतिरेकेणान्यगेहेभ्यअलाभेऽसंभवेऽन्यगेहानां सर्वएवयदि ग्रामोगुरुज्ञातिबन्धुभिर्व्याप्तोभवत्यन्ये नैवसंतो वान्नंनददति । एतेष्वपि गृहेषु भिक्षितव्यमन्याभावेप्रथमंबन्धुं भिक्षेत तदभावे ज्ञातिं तदभावे गुरुकुलम् ॥ १८४ ॥

(२) **सर्वज्ञनारायणः** । गुरोराचार्यस्य पितुःकुलस्य मातरंचेत्यत्रानुज्ञानात् अतएव स्वस्रादिभ्योन्येषामेव बन्धूनांनिवासः ज्ञाति सपिण्डस्तस्य कुले तथा बन्धुषु तदन्यसमानयोनिषु अन्यगेहानांनिषिद्धान्यगृहाणांपूर्वंपूर्वमुक्तेषु त्रिषु ॥ १८४ ॥

(३) **कुल्लूकः** । आचार्यस्य सपिण्डेषु बन्धुषु च मातुलादिषु न भिक्षेत् । तद्गृहव्यतिरिक्तभिक्षायोग्यगृहाभावे चोक्तेभ्यः पूर्वंपूर्वंवर्जयेत् । ततश्च प्रथमंबन्धुंभिक्षेत तत्रालाभे ज्ञातींस्तत्रालाभेगुरोरपिज्ञातीन्भिक्षेत ॥ १८४ ॥

(१८३) प्रशस्तानां=प्रसक्तानां (ठ)

(४) **राघवानन्दः** । भिक्षाहरणे प्रतिषिद्धानाहगुरोरिति । तस्योद्वेगहेतुत्वात्दूरदृष्टाशङ्कयायस्मै देयंततोग्राह्यमिति न्यायविरोधातन्ज्ञातिकुलबन्धुषु स्नेहाद्रसादिदानहेतोःबन्धुषु मातुलादिषु । अलाभेइत्यादेःगुरुत्यागेतात्पर्यम् ॥ १८४ ॥

(५) **नन्दनः** । बन्धुषु मातृष्वसृपितृष्वसृबन्धुषु । अन्यगेहानामलाभेभिक्षाऽलाभेगेहानामलाभेवापूर्वंपूर्वंवर्जयेत् । अयमर्थः अन्यगेहालाभेबन्धुषु भिक्षेत तदलाभेज्ञातिकुले तदलाभे गुरुकुलइति । अत्रपूर्वार्धेन मुख्यकल्पउक्तउत्तरार्धेनापत्कल्पइति विवेकः ॥ १८४ ॥

(६) **रामचन्द्रः** । अन्यगृहाणांअलाभे पूर्वंविवर्जयेत् ॥ १८४ ॥

सर्वंवापि चरेद्ग्रामंपूर्वोक्तानामसंभवे ॥ नियम्य प्रयतोवाचमभिशस्तांस्तु वर्जयेत् ॥ १८५ ॥

(१) **मेधातिथिः** । पूर्वोक्तानांवेदयज्ञैरहीनानामसंभवे सर्वंग्राममनपेक्षवर्णविभागंविचरेत् ग्राम्येजीवनार्थंकेवलमभिशस्तान्कृतपाकत्वेन प्रसिद्धानदृष्टपातकानपि वर्जयित्वा । तथा च गौतमः. सार्ववर्णिकंभैक्षचरणमभिशस्तपतितवर्जम् । नियम्य वाचंभिक्षावाक्यंवर्जयित्वाऽऽभैक्षलाभादन्यां वाचंनोच्चरेत् ॥ १८५ ॥

(२) **सर्वज्ञनारायणः** । पूर्वोक्तानांदेवयज्ञादीनांसंपूर्णभिक्षादातृत्वासंभवे नियम्य वाग्यमपरांतदर्थभाषां प्रयतोऽशुच्याद्यस्पर्शी । अभिशस्तानिति पतितशूद्रयोरप्युपलक्षणम् ॥ १८५ ॥

(३) **कुल्लूकः** । पूर्ववेदयज्ञैरहीनानामित्यनेनोक्तानामसंभवे सर्ववा ग्राममुक्तगुणरहितमपि शुचिर्मौनी भिक्षेत । महापातकाद्यभिशस्तांस्त्यजेत् ॥ १८५ ॥

(४) **राघवानन्दः** । पूर्वोक्तानांवेदयज्ञैरहीनानांअसंभवःस्वरूपतोद्रव्यतश्च । अभिशस्तान्महापातकित्वादिनासंदिग्धान् ॥ १८५ ॥

(५) **नन्दनः** । आपद्यप्यभिशस्तानांप्रतिषेधः कृतः पतितानांदण्डापूपिकया ॥ १८५ ॥

(६) **रामचन्द्रः** । पूर्वोक्तानामसम्भवे सर्वंग्रामंभिक्षार्थंविचरेत् । मौनपूर्वकं वर्जनमाह । अभिशस्तान्पतितान्वर्जयेत् ॥ १८५ ॥

दूरादाहृत्य समिधःसंनिदध्याद्विहायसि ॥ सायंप्रातश्च जुहुयात्ताभिरग्निमतन्द्रितः ॥ १८६ ॥

(१) **मेधातिथिः** । दूरग्रहणमपरिगृहीतदेशोपलक्षणार्थम् । ग्रामात्किलदूरमरण्यं नच तत्र कस्यचित्परिग्रहः । अनुपलक्षणे हि दूरार्थे कियद्दूरमित्यनवस्थितः शास्त्रार्थः स्यात् । आहृत्याऽऽनीय संनिदध्यात्स्थापयेत् । विहायसि गृहस्योपरि नहि निरालम्बनेन्तरिक्षे निधानंसंभवति । ताभिः सायंप्रातर्जुहुयात् । आहरणंतु तात्कालिकमन्यदा वेच्छया विहायसनिधानमदृष्टार्थमित्याहुः । अन्येतु ब्रुवते संप्रत्यानीयमानंवृक्षाद्दारुआर्द्रंभवतीति गृहस्योपरि अन्यस्य वा प्रकारादेस्ततएवाव गन्तव्यम् ॥ १८६ ॥

(२) **सर्वज्ञनारायणः** । दूरात्ग्राम्याशुचिशङ्काशून्याद्देशात् । विहायसि मठादौ ॥ १८६ ॥

(३) **कुल्लूकः** । दूराद्विग्भ्यः परिगृहीतवृक्षेभ्यःसमिधआनीयाकाशे धारणाशक्तःपटलादौ स्थापयेत् । ताभिश्च समिद्भिः सायंप्रातरनले होमंकुर्यात् ॥ १८६ ॥

(४) **राघवानन्दः** । दूराद्वनादेः । विहायसि भूम्यतिरिक्तशुचिदेशे । ताभिःसमिद्भिः ॥ १८६ ॥

(५) नन्दनः । नियमान्तरमाह दूरादिति । दूराद्विप्रकृष्टप्रदेशात् । रजस्वलादिस्पर्शाद्भूमिष्ठजन्तुसंक्रान्तिभ्रमाभुदित्युक्तंसन्निदध्याद्विहायसीति । विहायस्याकाशेसन्निदध्यात्रज्ज्वादिष्ववलम्बयेत् ॥ १८६ ॥

(६) रामचन्द्रः । समिधःदूरातआहृत्यआनीय विहायसिआकाशे गृहादिकेउच्चप्रदेशे मण्डपादौ संनिदध्यात्स्थापयेत् । पुंस्याकाशविहायसीत्यमरः । ताभिःसमिद्भिः अग्निंसायंसंध्याकाले प्रातःप्रातःकाले जुहुयात् ॥ १८६ ॥

अकृत्वा भैक्षचरणमसमिध्य च पावकम् ॥ अनातुरः सप्तरात्रमवकीर्णिव्रतंचरेत् ॥ १८७ ॥

(१) मेधातिथिः । अग्नीन्धनभैक्षचरणे नैरन्तर्येण सप्तरात्रंसमाहृमकृत्वानियम्यविच्छिद्येते कालोनियतस्तुतयोरपि । अनातुरस्याव्याधितस्य व्रतोऽवकीर्णिव्रतंनाम प्रायश्चित्तमेकादशे वक्ष्यमाणस्वरूपंचरेत्कुर्यात् । देषगुरुत्वख्यापनार्थंत्वेतदत्र प्रायश्चित्तमेव । स्मृत्यन्तरे ह्यत्राल्पमन्यत्प्रायश्चित्तमुक्तमाज्यहोमःसविलुर्वारेतस्यास्यामिति । इहापि च लिङ्गं यदि प्रायश्चित्तमिदमभविष्यत्तदा स्त्रीगमनमिवावकीर्णिप्रायश्चित्तप्रकरणे निमित्तत्वेनापठिष्यत् । येतु व्याचक्षते सप्तरात्रमेतदुभयमवश्यकर्तव्यमकरणात्तत्र दोषः कृतसप्तरात्रस्य तु परतोक्रियायां न दोषस्तानि च समाहानि प्राथम्यादुपनयनात्प्रभृतिमृष्यते तदेतदयुक्तं आसमावर्तनात्कुर्यादिति विरोधात् । उपरितनानन्तरश्लोकविरोधाच्च ॥ १८७ ॥

(२) सर्वज्ञनारायणः । भैक्षातिरिक्तान्नोपयोगः । समिदाधानाकरणेनेत्यर्थः । एतच्चउभयोःसमुच्चितयोः सप्तरात्रमकरणे अवकीर्णिव्रतमेकादशे वक्ष्यमाणम् अनातुरइत्यनापद्रुलक्षणम् । आपदितुरोगादावदोषः । अन्यतरातिक्रमेकाहाद्यतिक्रमयोस्तु गौतमोक्तःक्रमादाज्यहोमः समिद्वयहोमश्च ॥ १८७ ॥

(३) कुल्लूकः । भिक्षाहारसायंप्रातःसमिद्धोममरोगीनैरन्तर्येणसप्तरात्रमकृत्वा लुप्तव्रतोभवति । ततश्चावकीर्णिप्रायश्चित्तंकुर्यात् ॥ १८७ ॥

(४) राघवानन्दः । उपदिष्टाकरणे दोषमाहअकृत्वेति । असमिध्यअप्रज्वाल्य होमार्थम् । अवकीर्णिव्रतंनैर्ऋतंगर्दभालम्भनम् ॥ १८७ ॥

(५) नन्दनः । अथभिक्षाकरणाग्निकार्ययोरवश्यकर्तव्यतांतदकरणे प्रायश्चित्तोपदेशेन प्रकाशयति अकृत्वेति । उभयोः समुदितयोरकरणे प्रायश्चित्तमेतत् । चकारेण समुच्चयावगमात् । सप्तरात्रमिति निमित्तयोर्नैमित्तिकस्य च कालोपदेशः स्मृत्यन्तरानुगुण्यात् । तथाच गौतमः अग्नीन्धनभैक्षचरणेसप्तरात्रमकृत्वाऽऽज्यहोमइति । अग्निन्धिकारेबृहस्पतिः अवकीर्णिव्रतंकुर्यात्सप्तरात्रमसंशयमिति ॥ १८७ ॥

(६) रामचन्द्रः । पावकंअसमिध्यअग्निंअनुपास्य भैक्ष्यचरणंअकृत्वाएकस्य गृहे भुक्त्वासप्तरात्रपर्यन्तंअनातुरः सन्सःअवकीर्णी भवेत् । अवकीर्णीक्षतव्रतइत्यमरः । तदा प्रायःपवित्रतार्थंयदुक्तंव्रतंतच्चरेत् ॥ १८७ ॥

भैक्षेण वर्त्तयेन्नित्यंनैकान्नादी भवेद्व्रती ॥ भैक्षेण व्रतिनोवृत्तिरुपवाससमा स्मृता ॥ १८८ ॥

[न भैक्ष्यं परपाकःस्यात् न च भैक्ष्यंप्रतिग्रहः ॥ सोमपान समंभैक्ष्यं तस्माद्भैक्षेणवर्तयेत् ॥ १ ॥

भैक्ष्यस्यागमशुद्धस्य प्रोक्षितस्य हुतस्य च ॥ यांस्तस्य ग्रसते ग्रासांस्ते तस्य क्रतुभिः समाः* ॥ २॥]

* (क, ख, ज, द, ड, ढ, ल,) । (च) चिन्हित पुस्तके इमौ श्लोकौ टीकायांस्तः । परंतु तेषां स्थानं मूलमेवेति भाति ।

(१) मेधातिथि । ननु च भैक्षमहरहश्चरेदिति श्रुतमेवैतत्। एवंहि भैक्षचर्या दृष्टार्था भवति उक्तंच निवेद्य गुरवेऽश्नीयादिति । नच तदशनंभैक्षसंस्कारः येन वृत्त्यर्थः स्यात् । केचिदाहुरनूद्यते नैकान्नादीभवेद्वृतीति वक्तुमेतदप्यसत् भैक्षशब्देनैवैकान्नादनस्य निषेधात्। भिक्षाणांसमूहोभैक्षमुच्यते । ततः कुतएकान्नादनमाप्तिस्तस्यपित्र्येऽप्यनुज्ञानार्थंसर्वमेतदनूद्यते । भैक्षेण वर्तयेदात्मानं भैक्षभोजनेन पालयेत्जीवितस्थितिंकुर्यान्नैकस्य संबन्धिअन्नमद्यान्नैकभिक्षान्नंभुञ्जीत। न पुनरियमाशङ्काकर्तव्यानैकस्वामिकंभुञ्जीत पि तु बहुस्वामिकमविभक्तभ्रातृसंबन्ध्येकस्यान्नमेकंवाऽन्नमेकान्नंतदत्ति भुङ्क्तएकान्नादी । व्रतीब्रह्मचारीप्रकरणादेव लब्धःश्लोक पूरणार्थोव्रतिशब्दोर्थवादः। भैक्षणैव केवलेन व्रतिनोयावृत्तिः शरीरेधारणमुपवासतुल्यफला सा वृत्तिः स्मर्यते ॥ १८८॥

(२) सर्वज्ञनारायणः । वर्तयेत्जीवेत् । नैकान्नादीएकस्यान्नेनैकदिनक्षपणकृतभैक्षेणेति नित्यत्वेपि भैक्षस्य नित्योपवासफलहेतुरित्यर्थः । प्रोषितस्य प्रवासादागतस्य ॥ १८८ ॥

(३) कुल्लूकः । ब्रह्मचारी नैकान्नमद्यात्किंतु बहुगृहाहृतभिक्षासमूहेन प्रत्यहंजीवेत् यस्माद्भिक्षासमूहेन ब्रह्मचारिणोवृत्तिरुपवासतुल्या मुनिभिः स्मृता ॥ १८८ ॥

(४) राघवानन्दः । नैकान्नादीनैकमात्रस्यान्नंगृह्णीयात्। उपवाससमाइति परपाकरुचिर्नस्यादनिन्द्यामन्त्रणाद्दतइति यत्परपक्वान्नाशने पापंतन्न स्यात्संन्यासी ब्रह्मचारी च पक्वान्नस्वामिनात्रभोइत्युक्तेः । स्तुतिरिति मेधातिथिः ॥ १८८ ॥

(५) नन्दनः । एकान्नाशनंप्रतिषेधति भैक्षेणेति ॥ १८८ ॥

(६) रामचन्द्रः । भैक्ष्येणान्येन नित्यंवर्तयेत् व्रती ब्रह्मचारी नैकान्नादी भवेत् । एकस्यान्नंन भक्षयेदिति एकंचान्नंन भक्षयेत्इत्यर्थः । व्रतिनःब्रह्मचारिणःवृत्तिःभैक्षेण भैक्षान्नेन वृत्तिःप्राणधृतिःउपवाससमास्मृता ॥ १८८ ॥

[रामचन्द्रः । न भैक्ष्यमिति । परपाकरुचिर्न स्यात्इति याज्ञवल्क्यः । भैक्षंभिक्षान्नंपरपाकः न स्यात् । भैक्ष्यंभिक्षान्नंप्रतिग्रहोनं भवतिप्रतिग्रहस्तु निषेध्यः आगमशुद्धस्य प्रतिग्रहशुद्धस्य प्रोक्षितस्य हुतस्य च हुतशेषस्य च भैक्षस्य यान्ग्रासान् ग्रसते ते ग्रासाक्रतुभिःसमाभवन्ति ॥ १-२ ॥]

व्रतवद्देवदैवत्ये पित्र्ये कर्मण्यथर्षिवत् ॥ काममभ्यर्थितोऽश्नीयाद्व्रतमस्य न लुप्यते ॥ १८९ ॥

(१) मेधातिथिः । अयमपवादोनिमित्तविशेषे भैक्षवृत्त्युपदेशस्य । देवदैवत्ये देवोद्देशेन ब्राह्मणभोजने क्रियमाणे पित्र्ये च पितॄनुद्दिश्याभ्यर्थितोध्येषितः काममेकान्नमश्नीयात् नतु स्वयंयाचेत । तस्य व्रतवद्व्रतविरुद्धमधुमांसवर्जितमित्यर्थः। व्रतवदृषिवदिति च शब्दद्वयेनैकएवार्थोच्यते न पुनर्ग्रामारण्ययोः कर्मभेदेन व्यवस्था। वृत्तानुरोधात्तु द्विरभिधानम्। ऋषिर्वैखानसस्तदशनाभ्यनुज्ञाने मांसमपि ब्रह्मचारिणोनुज्ञातंस्यात्तस्य हि वैष्णवमप्युपभुञ्जीतेति मांसाशनमप्यस्ति। देवादेवतायस्य तद्देवदेवत्यंतच्चाग्निहोत्रदर्शपूर्णमासादिषु देवेषु कर्मसु ब्राह्मणभोजनमाम्नातम् । आग्रहायण्यादिषुत्वाम्नातं ब्राह्मणान्भोजयित्वा स्वस्त्ययनंवाचयेदिति । तत्रेयमनुज्ञा । अन्येतु समन्यादावादित्यादिदेवोद्देशेन यत्क्रियते ब्राह्मणभोजनंतद्देवदैवत्यंमन्यन्ते तदसत् । नहि भुजेर्दैवतासंबन्धोस्त्ययागसाधनत्वात्तस्य । नतूद्देशमात्रंदेवता । उपाध्यायाय गांददाति गृहंसंमार्ष्टीत्युपाध्याये गृहेपि प्रसङ्गात् । भुजेर्हि प्रत्यक्षोभोक्तासंबन्धःआदित्यस्तु न कारकं नचोद्देश्योग्रहवत् नतदर्थंभोजनम् । द्वितीयाहि भोक्तर्थतांज्ञापयति नादित्यार्थतम् । न चैतत्क्वचिन्नोदितमादित्याद्युद्देशेन ब्राह्मणान्भोजयेदिति । समाचाराद्विधिः कल्प्यतइति चेन्न तस्योपलभ्यमानमूलत्वादस्ति हि मूलंबाह्याःस्मृतयः । तत्रतर्हि ब्राह्मणभोजनेन देवताः प्रीणयेदिति शास्त्रार्थः । न चायमर्थः शक्यः कल्पयितुं नहि देवताप्रीतिप्रधानः शास्त्रार्थः किंतर्हि विध्यर्थप्रधानः। नचालिन्विध्यर्थआदि-

त्यादीनांदेवताभिमतानांविषयद्वारकः संबन्धोनाप्यधिकारद्वारकः। नहि मेदनादिवन्निमित्तंनापि पश्वादिवत्स्वसंबन्धितया काम्यते। अभोग्यरूपत्वात्। अथ तद्गतातुष्टिः काम्यते साप्यात्मसिद्धौप्रमाणान्तरमपेक्षते नच तदस्ति न ह्यादित्यादितुष्टिः प्रत्यक्षादिसिद्धा पश्वादिवद्येन काम्येन परेष्टिविधिनायुज्येत। अथतु मत्स्मभुरिति स्वाभिप्रेतेन फलेन योजयिष्यतीति। एतदपि प्रमाणाभावादुपेक्षणीयम्। नचास्मिन्नर्थेविधिः प्रमाणं सहि ज्ञातस्यानुष्ठातृविशेषणस्य स्वसंबन्धितया पुरुषंनियुङ्क्ते न पुनः काम्यमानस्य सद्भावमवगमयति। प्रमाणान्तरावगतंहि काम्यमनुष्ठातृविशेषणमनुष्ठातृसंबन्धीति विधिः प्रमाणंमिमीते। अथायंयागस्तस्य च भोजनंप्रतिपत्तिर्भवतुयदिशिष्ट समाचारः। भोजनंतावन्न देवतासंबन्धिसाक्षादिति न साध्यम्। यागव्यवहितस्तु संबन्धोन निवार्यते। नचात्र यागबुध्या प्रवर्तते किंतर्हि ब्राह्मणेषु भोजितेषु देवता तुष्यतीति। अत्यतोन देवता भोजनकारकंन कारकविशेषणम्। ततोनविषयोनहि संबन्धः। उद्देश्यत्वमप्यादित्यादीनांनास्ति। भोजने हि सउद्दिश्यते यस्मै भोजनंदीयते तच्च ब्राह्मणेभ्यः। नचोद्देश्यमात्रंदेवता उपाध्यायाय गांददाति ग्रहंसंमार्ष्टीति ग्रहोपाध्याययोरपि प्रसङ्गात्। ननु चपित्र्ये कथंब्राह्मणभोजनं तत्रापिहि न पितरौ देवताःस्युः नच होमस्य पित्र्यदेवतान्तरश्रवणात् आदित्यादिप्रीतेरिव पितृप्रीतेः प्रमाणान्तरासिद्धत्वान्नविधेः संबन्धः साध्यतया। अत्र वदन्ति सिद्धा ह्यत्रापितृप्रीतिरात्मनामविनाशित्वात्पितरः सिद्धास्तेषांचशरीरसंबन्धः क्रियते। कर्माख्येप्राधान्यमुपाध्यायायगांददाति तद्भोजनंह्यत्र प्रधानम्। तस्य हि फलंश्रुतंभो जयन्पुष्कलंफलमाप्नोति। तच्च फलंपितॄणांतस्य तृप्तिः स्यादिति तृप्तिश्च प्रीतिमात्रंनमनुष्याणामिव भुजिक्रियाफलंसौहित्यलक्षणमुत्पद्यते। काचित्पितॄणां प्रीतिः स्वकर्मवशतोयत्र तत्र जातावुत्पन्नानाम्। प्रीतिमात्रवचनोयंधातुः सौहित्यंतु विशेषः सप्रमाणान्तरावसेयः। न चात्रेतच्चोदनीयपुत्रः कर्ताकथंकर्तृगामिफलंन हीमानि कर्माणि वैदिकानि परस्परकर्मादीनीतिन्यायविदोवदन्ति। यतः पितरएवात्राधिकारिणः कर्तारश्च। अपत्योत्पादनेनैव सर्वमेतत्पितृभिः कृतंएवमर्थमेवासावुत्पादितोदृष्टादृष्टमुपकारं करिष्यतीति। ततश्च यथा सर्वस्वारेऽभावादौत्तरकालिकेष्वङ्गेषु ब्राह्मणाः संस्थापयतमे यज्ञमिति प्रैष्यं मृतस्य कर्तृत्वमेवमत्रापि द्रष्टव्यम्। एतावान्विशेषः सूत्राधिकारान्तरप्रयुक्ता जीविकार्थिनोभृतिपरिक्रीताऋत्विजः कर्तारः। इह तु तद्विधिप्रयुक्तएव पुत्रः यथैवापत्यत्तिविधिप्रयुक्तस्य पुत्रार्थेषु पितुः संस्कारेष्वधिकारानुशासनपर्यन्तत्वात्तस्य विधेः एवंपित्रर्थे श्राद्धादौ पुत्रस्य तथैव जीविनः पितुर्वृद्धौतु मातापितरावित्यवश्यंकर्तव्यम्। एवंदृष्टान्तगतिस्तस्यापि। न चायंवैश्वानरवत्काम्योधिकारः वैश्वानरंद्वादशकपालंनिर्वपेत् पुत्रे जाते तस्मिन्जातएतामिष्टिंनिर्वपति पूतएव सतेजस्व्यन्नादइन्द्रियवान्पशुमान्भवतीति। एवमादिपुत्रफलार्थिनोधिकारः पितुर्वैश्वानरे नचूडादिष्विवावश्यकः। इहतु पित्र्यमानिधनात्कार्यमिति यावज्जीविकालात्कर्तुर्वैदिकंफलमित्येतदन्यथा परिक्रियते। यथैव वैश्वानरविशिष्टपुत्रवत्ता लक्षणंपितुरेव फलंनाकर्तृगामिता फलस्य एवमिहापि पुत्रस्यैवतत्फलंया पितुः प्रीतिरुभयथा पितृकर्तृगामिता फलस्य न विरुध्यते। अपत्योत्पादनेनैवैमतादस्य फलस्येष्टत्वात्। पितॄणामपि नाकामितफलावृत्तिः यदि न श्राद्धेन पितरोदेवताः कथंतर्हि पित्र्यमेतत्कर्मेति देवतातद्धितः। अनुद्देश्यत्वसामान्यादिति वदामः। युष्मदुपकारार्थमिदंब्राह्मणभोजनमिति पितरउपदिश्यन्ते। पिण्डपितृयज्ञे तु पितरोदेवताएव नश्राद्धे पितॄणांदेवतात्वंमन्यन्ते। यत्तु ब्राह्मणाभोज्यन्तेतथाग्नौ होमाज्यपुरोडाशादीनांद्रव्यदानस्य। तादर्थ्ये तत्। तथा च ब्राह्मणाःपितृत्वमापद्यन्तअतोऽन्नपरिवेषणकाले पितरएवोद्दिश्यायुष्मभ्य मिदंनममेति। ब्राह्मणा स्त्वाहवनीयस्थानीयाः एतावान्विशेषोयदाहवनीये हविःप्रक्षिप्यते ब्राह्मणानांतु सन्निधाप्यते ते तुस्वयमुपाददतेइति। नच यागोनदेवतार्थः स्वाहाकार स्विष्टकृदादिषु दर्शनात्। अतोयागोपि सन्श्राद्धकर्मपित्र्यर्थंभविष्यति पितॄणांदेवतात्वंफलभावित्वंन निरोत्स्यते। तृतीये किंचिदनुक्तमेव तत्संबद्धंवक्ष्यामः। तस्मान्नादित्यादयोब्राह्मणभोजने। देवताइति स्थितम्।

ननुचाव्यापकमेतदपि लक्षणम् यागउद्देश्यदेवतेत्यन्तरेणापि यागसंबन्धे देवताव्यवहारदर्शनात् । देवतानांच पूजनंदेवतान्यभिगच्छेदिति न यागोनाप्याभिमुख्येन गगनंपादविहारात्मकंदेवताः प्रतिसंभवति । नैषदोषः । यत्र देवताचोदना तत्रैतत्पूजाविधानंभविष्यति वैश्वदेवदेवतात्वमग्निहोत्रादिसंबन्धिनी पुत्रा । ननु चैवमपि नोपपद्यते नहि देवतायाः पूज्यत्वंसंभवति स्वरूपहानिप्रसङ्गात् । पूजाकर्मत्वेपि यागसंप्रदानता स्यात् । उक्तेन क्रियान्तरस्य किंचिद्भवतीति शक्तिर्हि कारकंसाच प्रतिक्रियंविभिद्यते । कार्यावगम्यत्वाच्च तस्यायावत्कार्यंभेदोग्याय्यः । अतोयत्संप्रदानमेव न तस्यकर्मापत्तिः । कथं तर्हि पाचकाय देहि पचेः कर्ता ददातेः संप्रदानम् । शरैःक्षताङ्गः प्रियया कटाक्षैर्निरीक्ष्यमाणोविवशोजगाम । उक्तोत्र परिहारः । शक्तिशक्तिमतोर्भेदस्यौपचारिकत्वात्सिद्धंव्रजति भुक्त्वेति । तस्माद्यदि पूजाविषयमेतन्न देवतालाभः अथदेवताआदित्यादयोन पूजाविधिः । नहि देवतायांसिद्धायामुद्दिश्य पूजाविधीयते न ह्यादित्यादीनांदेवतासामान्यशब्दोगोशब्दवच्छागमेषादीनाम् । अत्रोच्यते । सत्यं नादित्यादयः स्वरूपतोदेवताः संबन्धिशब्दोयंविधितएव नार्थोवगन्तव्योयस्य हविषश्चोद्यते सा तस्य देवतेति सएवाग्निराग्नेयादन्यत्रनदेवतेत्युक्तम् । किंतुन पूजाविधिः पूज्यमानमन्तरेण संभवति । देवताश्च पूज्यत्वेन श्रुतास्तत्र यदि देवतार्थे मुख्येन पूजा संभवति तदा यागएव पूजाविज्ञेया । तस्यचारूपत्वादसति द्रव्यदेवताश्रवणे पूर्वाण्ह कालविध्यर्थोयमनुवादोविज्ञेयः । अतः पूर्वाण्हे दैवतानि कर्तव्यानीत्युक्तंभवति । किमुच्यते । देवता न श्रूयते यावता न साक्षाद्देवताशब्दोस्ति नायंसामान्यवचनोदेवतार्थः यासामन्यत्र देवतात्वंदृष्टंतासामेतत्पूजाविधानम् । तेनाग्निरादित्योरुद्रइन्द्रोविष्णुः सरस्वतीत्येवमादयः पूज्याः । पूजार्थंच धूपदीपमाल्योपहारादीनांनिवेदनम् । तत्राग्नेस्तावत्साक्षात्संबन्धस्तच्चादित्यस्य दूरदेशवर्तित्वाच्छुचावकाशेतदुद्देशेन गन्धादिप्रक्षेपः । इन्द्रादीनांस्वरूपस्याप्रत्यक्षत्वादिन्द्रादिशब्दोद्देशेनैव तथा विधानम् । यद्यपि पूज्यमानप्रधाना पूजा तथापि हि पूज्यमानानांकार्यान्तरशेषाभावेपूजैव कर्तव्यतया विज्ञायते । द्रव्यप्रधानेहि न विधिविषयत्वसंभवः स्तानि द्वैधंगुणप्रधानभूतानि येस्तु द्रव्यंचिकीर्ष्यतइति न्यायात्स्तुतिशास्त्रादिवत् । यथानस्तुतिःस्तुत्यार्थाएवमियमपि पूज्यान पूज्यार्था । स्तौति शंसत्योर्निर्देशानास्तीतिचेत् अत्रोक्तंद्वितीया सक्तुषु दर्शनात् । एवमृदंगांदैवतंप्रदक्षिणानि कुर्वीतेति दक्षिणाचारताविधीयते । दक्षिणेन दैवानि कर्माणि कर्तव्यानि । नहि मृदादितद्देवतायादक्षिणेन मार्गेण स्थानम् प्रतत्वात् । [illegible]च्यते एवंदैवतान्यभिगच्छेदिति । पादविहारव्यापारेण देवतासमीपप्राप्त्यसंभवाद्गमेश्च ज्ञानार्थत्वादभिगमनंस्मर[illegible]विशिष्यते । देवताअभिगच्छेत्कर्मकाले मनसा ध्यायेच्चित्तव्याक्षेपतामाकुलताख्यांपरिहरेदित्यर्थः । तथा चोपलभ्यमानमूलैवेयंस्मृतिर्भवति । यस्यैदेवतायै हविर्गृहीतंस्यात्तांमनसा ध्यायेदिति । ननु चैतदप्युद्देश्यत्वान्यथानुपपत्तेः प्राप्तमेव सत्याक्षेपस्याकुलस्य च संभवाददोषः । एवंदेवस्वंदेवपशवोदेवद्रव्यमित्यादयोव्यवहारास्तादर्थ्येनोपकल्पितेषु पश्वादिषु द्रष्टव्याः । दण्डाधिकारे तु प्रतिकृतिविषयमेवंदेवताव्यवहारमिच्छन्ति । अन्यथा व्यवस्थाभङ्गःस्यात् । कल्पितदेवतारूपाणांप्रतिकृतीनांकल्पितेनैव स्वस्वामिभावेन यत्संबधिदेवब्राह्मणराज्ञांतु द्रव्यंविज्ञेयमुत्तममित्यादिषु देवद्रव्यंनहि देवतानांस्वस्वामिभावोस्ति मुख्यार्थासंभवाद्गौणएवार्थोग्राह्यः । कः पुनरत्र गौणोर्थः कार्यंप्रसाधयेयएवाग्निर्माणवकइत्यादिषु नैवंशुक्लोमाणवके तद्गुणदर्शनात् । सर्वत्र हि साधारणगुणयोगाद्गौणार्थावगतिस्ते च गुणाः प्रत्यक्षाद्यवसेयाः । इह तु देवतार्थस्य कार्यावगम्यत्वात्कार्यतः स्वरूपविशेषानवगमात्कुतः प्रकृतिषु साधारणगुणावसायः । अत्रोच्यते । मन्त्रार्थवादेषु तथाविधरूपश्रवणात्तेषांच गुणवादेन व्याख्यानम् । तन्मूलमपश्यन्तोयथाश्रुतार्थग्राहिणस्ताद्रूप्यमिन्द्रादिषु प्रतिपाद्यमानाः प्रकृतिषु सादृश्यमपश्यन्तीति युक्तैवगौणता । यत्तु श्राद्धएववैश्वदेवब्राह्मणभोजनंदेवदेवत्यमाचक्षते तेषांपित्र्याङ्गत्वात् । तस्य पित्र्यग्रहणेन गृहीतत्वा-

दनर्थकं पुनर्वचनम्। सामान्यशब्दत्वाच्च क्रतोर्विशेषावगतिसाहचर्यादिति वचदि चपित्र्यशब्देन ग्रहणंभवेद्गोबलीवर्द-न्यायोपिसतिविषयभेदेभवति ॥ १८९॥

(२) सर्वज्ञनारायणः । व्रतंमधुमांसाद्यभक्षणनियमस्तद्युक्तमृषिवत् वानप्रस्थवदिति मुन्यन्नाशनम् भिमेवि । देवदैवत्ये विश्वेदेवदेवता यत्र तत्रपित्र्येवाअत्यन्ताभ्यर्थनयोपरुद्धोश्नीयात् अकामानुमतो । कामंअतएवोक्तम्। व्रतमस्य न लुप्यते न प्रत्यावर्तते। प्रत्यवायस्तुस्यादेव तदर्थंप्राणायामादि कुर्यात्। पित्र्यस्य समभिव्याहारेणदैवकर्मप्रतीतिरितरदैवव्यवच्छेदः। अथ पित्र्ये कर्मणीत्यन्वयः। अथेति च पित्र्यकर्मणोदैवापेक्षया विशेषद्योतनार्थम्। तेन दैविकान्नभोजनात् पित्र्यान्नभोजनस्याधिकंपापहेतुता सूच्यते। देवदैवत्यपदसमभिव्याहाराच्च वैश्वदेविकश्राद्धाशनं व्रतलोपएव। एतदपि निरन्तरंसप्तरात्रंक्रियमाणं गौतमोक्तप्रायश्चित्तेनैवशोध्यते ॥ १८९ ॥

(३) कुल्लूकः । पूर्वनिषिद्धस्यैकान्नभोजनस्यायंप्रतिप्रसवः । देवदैवत्येकर्मणि देवतोद्देशेनाभ्यर्थितोब्रह्मचारीव्रतवदिति व्रतविरुद्धमधुमांसादिवर्जितमेकस्याप्यन्नंयथेप्सितंभुञ्जीत। अथपित्रुद्देशेनाभ्यर्थितोभवति तदर्षिर्यतिः सम्यग्दर्शनसंपन्नत्वात्सइव मधुमांसवर्जितमेकस्याप्यन्नंयथेप्सितंभुञ्जीतेतिसएवार्थोवैदग्ध्येनोक्तः।तथापि भैक्षवृत्तिनियमरूपंव्रतमस्य लुप्तं न भवति। याज्ञवल्क्योऽपि श्राद्धेभ्यर्थितस्यैकान्नभोजनमाह ब्रह्मचर्ये स्थितोनैकमन्नमद्यादनापदि । ब्राह्मणः काममश्नीयाच्छ्राद्धेव्रतमपीडयन्निति । विश्वरूपेण तु व्रतमस्य न लुप्यतइति पश्यता ब्रह्मचारिणोमांसभक्षणमनेन मनुवचनेन विधीयतइति व्याख्यातम् ॥ १८९ ॥

(४) राघवानन्दः। देवदैवत्येआग्रयण्यादिषु तत्र ब्राह्मणंभोजयित्वा स्वस्त्ययनंवाचयीतेत्युक्तेरिति मेधातिथिस्तन्न कर्माङ्गत्वात्तस्य किंतुमार्कण्डेयोक्तविष्ण्वादिश्राद्धे तत्र श्राद्धभेदाः नित्यंनैमित्तिकंकाम्यंवृद्धिश्राद्धंसपिण्डनम्। पार्वणंचेति विज्ञेयंगोष्ठ्यांशुद्ध्यर्थमष्टकम् ॥ कर्माङ्गंनवमंप्रोक्तंदैविकंदशमंस्मृतमितिविश्वामित्रोक्तः ॥ नैमित्तिकमेवोद्दिष्टम्। तत्रैकान्नमद्यात्व्रतवन्मधुमांसवर्जमश्नीयात्तथापित्रेऋषिवदर्षे सम्यग्दर्शनसंपन्नत्वेपि मधुमांसयोर्वर्जनात् अथवा ऋषिर्मुनिः संन्यासीति तद्वदास्वादनासक्तऔषधवदशनमाचरेदिति संन्यासप्रकरण श्रुतेः। एवंदैवार्थेभ्यर्थितोव्रतलोपनंन प्राप्नोतीत्याह काममिति। तदुक्तंयाज्ञवल्क्येन ब्रह्मचर्येस्थितोनैकमन्नमद्यादनापदि। ब्राह्मणःकाममश्नीयाच्छ्राद्धंव्रतमपीडयन्निति॥१८९॥

(५) नन्दनः । प्रतिषिद्धमेकान्नाशनंप्रतिप्रस्तौति व्रतइति मधुमांसादिवर्जनमभिप्रेतम्। ऋषिवदित्यल्पवन्याशनम् ॥ १८९ ॥

(६) रामचन्द्रः । देवदैवत्ये कर्मणि विश्वेदेवकर्मणिअभ्यर्थितःसन्निमन्त्रितःसकामंअश्नीयात्भोजनंकुर्यात् । व्रतिवत्ब्रह्मचारीव्रतंपित्र्ये कर्मणिऋषिवत्अश्नीयात्। अस्यब्रह्मचारिणःव्रतंनलुप्यते लोपंनयातीत्यर्थः ॥ १८९ ॥

ब्राह्मणस्यैव कर्मैतदुपदिष्टंमनीषिभिः ॥ राजन्यवैश्ययोस्त्वेवं नैतत्कर्म विधीयते ॥ १९० ॥

(१) मेधातिथिः। यदेतदेकान्नभोजनकर्मादिष्टमेतद्ब्राह्मणस्यैव मनीषिभिर्विद्वद्भिर्वेदादुपलभ्योपदिष्टं क्षत्रियवैश्ययोस्तुनैतदिच्छन्ति न कदाचित्तयोरभैक्षभोजनम्। ननु च श्राद्धभोजने ब्राह्मणानामेवाधिकारोये तत्र भोजनीयाःस्युर्ये च वर्ज्याद्विजोत्तमाःअर्हत्तमाय विप्रायेतिवचनाद्ब्राह्मणस्यैव प्रतिग्रहाधिकारस्तत्र कुतोयंप्रतिषेधोराजन्यवैश्ययोरिति प्रतिप्रसवश्चायंनापूर्वविधेः प्राप्तिसव्यपेक्षाश्च प्रतिषेधाभवन्ति। उच्यते। भुक्तवतांब्राह्मणानामेव शिष्टस्यान्नस्य प्रतिपत्तिराम्नाता ज्ञातिप्रायंप्रकल्पयेदिति । नच तत्र जात्यपेक्षायस्य ज्ञातिः सतेन भोजयितव्यः । नच तत्र क्षत्रियादयः प्रतिगृहीततया संबध्यन्ते अपितु ज्ञातयः। अतोस्याः प्राप्तेः प्रतिषेधः ॥ १९० ॥

(२) सर्वज्ञनारायणः । एतत्कर्मश्राद्धान्नाशनम् । केचित्त्वेतत्पदेनैकान्नाशनमात्रपरामर्शमित्याहुः ॥ १९० ॥

(३) कुल्लूकः । ब्राह्मणक्षत्रियविशांत्रयाणामेव ब्रह्मचारिणां भैक्षाचरणविधानाद्व्रतवदित्यनेन तद्वर्जमेकान्नभोजनमुपदिष्टम् । क्षत्रियवैश्ययोरपि पुनरुक्तेन पर्युदस्यते । तदेकान्नभोजनरूपंकर्म तद्ब्राह्मणस्यैव वेदार्थविद्भिर्विहितम् । क्षत्रियवैश्ययोःपुनर्नचैतत्कर्मेति ब्रूते ॥ १९० ॥

(४) राघवानन्दः । एतत्कर्मनिमन्त्रितभोजनंराजन्यवैश्ययोर्ब्रह्मचारित्वेपि. श्राद्धादिषु मार्श्नीयादित्याहुःराजन्येति ॥ १९० ॥

(५) नन्दनः । ब्रह्मचारिप्रकरणविषयत्वात्क्षत्रियवैश्ययोरयंविधिः प्राप्तः प्रतिषिध्यते ब्राह्मणस्यैवेति । कर्म पूर्वश्लोकोक्तम् ॥ १९० ॥

(६) रामचन्द्रः । एतत्कर्म देवपितृरूपंकर्म नियन्त्रणंब्राह्मणस्यैवमनीषिभिःउपदिष्टम् । एवंराजन्यवैश्ययोर्व्रतिनोः एतद्दैवे कर्मणि पित्र्ये कर्मणिनिमन्त्रणंन विधीयते ॥ १९० ॥

चोदितो गुरुणा नित्यमप्रचोदितएव वा ॥ कुर्यादध्ययने यत्नमाचार्यस्य हितेषु च ॥ १९१॥

(१) मेधातिथिः । नोदितोगुरुणाऽ नियुक्तोऽपिकुर्यादध्ययनेयोगंयत्नम् । ननु चाहूतोधीतइत्युक्तंकथमप्रनोदितस्य योगउच्यते । गृहीतवेदैकदेशस्य परिशेषकगुणार्थमेतदुच्यते, । न तत्राचार्यनियोगोपेक्षितव्यः । एवमाचार्यायहितंयदुदकुम्भाहरणादिश्रान्तसंवाहनादितदप्यनियुक्तेन कर्तव्यम् ॥ १९१ ॥

(२) सर्वज्ञनारायणः । योगमुद्यमम् । यत्नमिति क्वचित्पाठः । अचोदितोपि गृहीतवेदभागाभ्यासंकर्तुंयतएव शक्नोतीति न तत्र गुर्वपेक्षा ॥ १९१ ॥

(३) कुल्लूकः । आचार्येण प्रेरितोनप्रेरितोवात्स्वयमेव प्रत्यहमध्ययने गुरुहितेषु चोद्योगंकुर्यात् ॥ १९१ ॥

(४) राघवानन्दः । किंच चोदितइति । कुर्यात्योगंउपायम् ॥ १९१ ॥

(५) नन्दनः । योगमभ्यासम् ॥ १९१ ॥

शरीरंचैव वाचंच बुद्धीन्द्रियमनांसि च ॥ नियम्य प्राञ्जलिस्तिष्ठेद्वीक्षमाणोगुरोर्मुखम् ॥ १९२॥

(१) मेधातिथिः । कुतश्चिदागतोगुरोर्मुखंवीक्षमाणस्तिष्ठेन्नोपविशेन्नियम्य च शरीरंपादहस्तचालनहसितानि न कुर्यान्नकिंचिद्वदेत् । अनुपयोगिबुद्धीन्द्रियाणि नियच्छेत् । यदाश्चर्यरूपंकिंचिद्रुरुसकाशे नतत्पुनःपुनर्भावयेत् श्रोत्रादीन्यपि । चक्षुर्नियमस्तु गुरुवक्त्रप्रेक्षणादेव सिद्धः । मनश्च नियच्छेच्छालीयाग्विकल्पान्गृहकुशलाद्यारम्भान्मनसा वर्जयेत् । उक्तस्तु संयमेयत्नमिति शक्तिप्रतिषेधार्थः । सप्रतिषेधः गुरुसन्निधौ स्वल्पोपीन्द्रियाणामप्रतिषिद्धेपि विषये प्रसरोन देयः । प्राञ्जलिरूर्ध्वकृतकरकपोलः ॥ १९२ ॥

(२) सर्वज्ञनारायणः । शरीरनियमोवृथा चेष्टा बुद्धीन्द्रियाणिपञ्च मनश्चनियम्य स्वस्वविषयव्याकुलानि कृत्वा गुरुसमीपावस्थाने सर्वदैतद्विधेयं विशेषतःस्वाधायकाले ॥ १९२ ॥

(३) कुल्लूकः । देहवाग्बुद्धीन्द्रियमनांसि नियम्य कृताञ्जलिर्गुरुमुखंपश्यंस्तिष्ठेन्नोपविशेत् ॥ १९२ ॥

(४) राघवानन्दः । किंच शरीरमिति । प्राप्ते गुरौ तथा भूतस्तिष्ठनमुखंनिरीक्षमाणइत्यध्ययनकालइति शेषः॥१९२॥

(५) नन्दनः । बुद्धिरध्यवसायात्मिका मनःसंशयात्मकम् ॥ १९२ ॥

नित्यमुद्धृतपाणिःस्यात्साध्वाचारःसुसंयतः॥आस्यतामिति चोक्तःसन्नासीताभिमुखंगुरोः ॥१९३॥

(१) **मेधातिथिः** । न केवलंसूत्रकात्पाणिरुद्धर्तव्योऽपितुर्वाससोऽपि । नित्यग्रहणंनतिष्ठतएवायंपाग्युद्धारोनाप्यध्ययनवेलायम् । किंतर्हि ततोऽन्यत्रापि । साध्वाचारः साध्वनिन्द्यः आचारोवाग्व्यवहारादिः कार्यः । अश्लीलादिभाषणमसंनिधानेपि गुरोर्नित्यग्रहणान्नकर्तव्यम् । सुसंवृतः वाङ्मनश्चक्षुर्भिः नियतात्मात्वल्पोपि दोषस्तंपरिहरेत् । अनावृतोलोकउच्यते योयया कामी तद्विपरीतः सुसंवृतः । अन्येतु मन्यन्ते वस्त्रेणाच्छादितशरीरोगुरुसंनिधौ भवेत् नोत्तरीयमवतारयेदेवंतिष्ठेत् । यदा तु गुरुणाऽस्यतामित्युक्त एतेन शब्देन भ्रूविक्षेपादिना वाविधेः प्रतिपादनार्थत्वात् प्रतिपादनंच न शब्दव्यापारएव तदाऽऽसीतोपविशेत् । अभिमुखः संमुखः ॥ १९३ ॥

(२) **सर्वज्ञनारायणः** । उद्धृतपाणिः उत्तरीयबहिरुपरिस्थदक्षिणबाहुः साध्वाचारोगुर्वनुगमनादिविशिष्टाचारकारी सुसंयतोचपलचित्तःउक्तोगुरुणा अभिमुखंदर्शनविषये ॥ १९३ ॥

(३) **कुल्लूकः** । सततमुत्तरीयाद्बहिष्कृतदक्षिणबाहुः शोभनाचारोवस्त्रावृतदेहआस्यतामिति गुरुणोक्तः सन्गुरोरभिमुखंयथा भवति तथाऽऽसीत ॥ १९३ ॥

(४) **राघवानन्दः** । किंच नित्यमिति । उद्धृतपाणिःवस्त्रादिभ्योविकासितदक्षिणपाणिःसुसंवृतःवस्त्रावृतदेहःप्रोक्तोगुरुणेति शेषः ॥ १९३ ॥

(५) **नन्दनः** । नित्यमाश्रमान्तरेऽप्युद्धृतपाणिःस्यात् वस्त्रादिभिराच्छादितदक्षिणपाणिःस्यात् ॥ १९३ ॥

(६) **रामचन्द्रः** । नित्यंउद्धृतपाणिःस्यात् पठनसमयेउद्धृतपाणिःस्यात्साध्वाचारःसाधुयथा स्यात्तथाआचारवान्भवेत् । सुसंयतःयतचित्तःसन्व्रतमपीडयन्नित्यर्थः । आस्यतांउपविश्यतामिति गुरुणा चोदितः सन्गुरोरभिमुखंआसीत उपविशेदित्यर्थः ॥ १९३ ॥

हीनान्नवस्त्रवेषःस्यात्सर्वदा गुरुसन्निधौ ॥ उत्तिष्ठेत्प्रथमंचास्य चरमंचैव संविशेत् ॥ १९४ ॥

(१) **मेधातिथिः** । हीनंन्यूनमन्नंभुञ्जीत गुरुसंनिधौ । न्यूनता च परिमाणतः क्वचित्क्वचित्संस्कारतः । यदि संस्कृतमाज्यघटितक्षीरादिव्यञ्जनंभिक्षातोलब्धंस्यात्तदा यदि गुरुणातादृशमन्नंन भुक्तंस्यादेककाले चगुरुणा सह भोजने यदि गुरोस्तादृशमन्नंगृहे न सिद्धंस्यात्तदा तत्तेन नाशितव्यम् । अथ गुरोरपि तादृशमन्नंस्यात्तदा ऽपचयः कर्तव्यः । वस्त्रंयदि गुरोर्जीर्णंस्यात्तदा न कार्पासादिशिष्येण प्रावरीतव्यं । वेषआभरणमण्डनादिः सोपि हीनः । सर्वदा ब्रह्मचर्यात्परोऽपि । अतएव वेषग्रहणम् । नच ब्रह्मचारिणोमण्डनमिष्यते । उत्तिष्ठन्प्रथमंचास्य शय्यायाराम्युपरमे आसनाद्वा उत्थानावसरंबुद्ध्वाप्रथमंपूर्वंगुरोरुत्तिष्ठेत् । चरमंपश्चात्स्वापकाले सुप्ते गुरौ संविशेच्छय्यांसमाश्रयेदासने चोपविशेत् ॥ १९४ ॥

(२) **सर्वज्ञनारायणः** । हीनमपकृष्टंगुरुभोग्यान्नवस्त्रःगुरुवेषेभ्यःस्वस्य वस्त्रादेर्हीनत्वम् । उत्तिष्ठेत्शयनात् । संविशेत्शयीत ॥ १९४ ॥

(३) **कुल्लूकः** । सर्वदा गुरुसमीपे गुर्वपेक्षया स्वल्पकृष्टान्नवस्त्रप्रसाधनोभवेत् । गुरोश्च प्रथमंरात्रिशेषेशयनादुत्तिष्ठेत्प्रदोषे च गुरौ सुप्ते पश्चाच्छयीत ॥ १९४ ॥

(४) **राघवानन्दः** । हीनान्नवस्त्रवेषःअपकृष्टान्नादिर्गुरुतःप्रथमंगुरूत्थानात्पूर्वंचरमंगुरुसंवेशनादुत्तरंसंविशेत्शयीत ॥ १९४ ॥

(५) **नन्दनः** । सर्वदाआश्रमान्तरेऽपिसन्निधावितिविशेषणादसन्निधावदोषः ॥ १९४ ॥

(६) रामचन्द्रः । सर्वदा गुरुसंनिधौ हीनान्नवस्त्रवेषःस्यात्गुरोःस्वरूपात्हीनः अन्नवस्त्रवेषोयस्य सःहीनान्नवस्त्रवेषःअस्य गुरोःप्रबोधनात्पूर्वंउत्तिष्ठेत्चरमंतस्मात्संविशेत् सुप्यात् ॥ १९४ ॥

प्रतिश्रवणसम्भाषे शयानोन समाचरेत् ॥ नासीनोन च भुञ्जानोन तिष्ठन्न पराङ्मुखः ॥ १९५ ॥

(१) मेधातिथिः । प्रतिश्रवणमाहूयमानस्य कार्ये नियुज्यमानस्य गुरुसंबन्धिवचनाकर्णनम् । संभाषा गुरुणा सहोक्तिमत्युक्तिकरणम् । तेप्रतिश्रवणसंभाषे । शयानः स्वेस्रस्तरेनिक्षिप्तगात्रोन समाचरेन्नकुर्यात् । नासीन आसने चोपविष्टः न भुञ्जानः न तिष्ठन्नेकस्मिन्नेव देशेऽविचलन्नूर्ध्वंस्थितः न पुनः पराङ्मुखः यस्यां गुरुर्दृश्यते ततः परावृत्य स्थितोन कुर्यात् ॥ १९५ ॥

(२) सर्वज्ञनारायणः । प्रतिश्रवणमाज्ञास्वीकारः ॥ १९५ ॥

(३) कुल्लूकः । प्रतिश्रवणमाज्ञाङ्गीकरणंसंभाषणंच गुरोःशय्यायांसुप्त आसनोपविष्टोभुञ्जानस्तिष्ठन्विमुखश्च न कुर्यात् ॥ १९५ ॥

(४) राघवानन्दः । प्रतिश्रवणसंभाषेआज्ञाङ्गीकरणसंभाषणे नासीनःपीठादिषु न तिष्ठन्दूरतइतिशेषःन पराङ्मुखः गुरुंपृष्ठतःकृत्वा ॥ १९५ ॥

(५) नन्दनः । प्रतिश्रवणमात्मानंप्रति गुरुणा प्रयुज्यमानस्य वाक्यस्याश्रवणम् । प्रतिसंभाषा गुरुंप्रतिवाक्यम् ॥ १९५ ॥

(६) रामचन्द्रः । शयानःशिष्यःप्रतिश्रयणसमभाषे न समाचरेत्प्रतिश्रयणं च समभाषा च प्रतिश्रयणसमभाषे प्रतिश्रयणंविनयंसंभाषा वचनं न गुरुंसमाचरेत् ॥ १९५ ॥

आसीनस्य स्थितःकुर्यादभिगच्छंस्तु तिष्ठतः ॥ प्रत्युद्गम्य त्वाव्रजतःपश्चाद्धावंस्तु धावतः ॥ १९६ ॥

(१) मेधातिथिः । कथंतर्हि । आसीनोयदाज्ञांददाति तदास्थितआसनादुत्थाय प्रतिश्रवणसंभाषे कुर्यात् । अभिगच्छंस्तु तिष्ठतः तिष्ठन्गुरुर्यदादिशति तदाभिगच्छंस्तदभिमुखः कतिचित्पदानि गत्वाआ व्रजत आगच्छतः प्रत्युद्गम्याभिमुखमेव गत्वा प्रतिराभिमुख्ये धावतोवेगेन गच्छतः पश्चाद्धावन् ॥ १९६ ॥

(२) सर्वज्ञनारायणः । यथा समाचरेत्तदाह आसीनस्येति । अभिगच्छन्संमुखमागच्छन् ॥ १९६ ॥

(३) कुल्लूकः । कथंतर्हिकुर्यात्तदाह आसीनस्येति । आसनोपविष्टस्य गुरोराज्ञांददतः स्वयमासनादुत्थितस्तिष्ठतोगुरोरादिशतस्तदभिमुखंकतिचित्पदानि गत्वा यथा † गुरुरागच्छति * तथाप्यभिमुखंगत्वा यदा तु गुरुर्धावन्नादिशति तदा तस्य पश्चाद्धावन्प्रतिश्रवणसंभाषे कुर्यात् ॥ १९६ ॥

(४) राघवानन्दः । आसीनोयदा जातस्तदा स्थितआसनादुत्थितःअभिगच्छन्कतिचित्पदानि प्रत्युद्गम्यआसनादेरुत्थितःतत्तत्क्रियांकुर्वन्प्रतिश्रवणसंभाषणे कुर्यात्गुरोरित्यन्वयः ॥ १९६ ॥

---

† यथा=यदा (अ)

* तथा=तदा (अ)

(५) नन्दनः । प्रतिश्रवणसंभाषेकर्मकुर्यादित्यपेक्षायामाह आसीनस्येति । कुर्यात्प्रतिश्रवणसंभाषेइत्येव । अभिगच्छंस्तुगच्छतइतिपाठः ॥ १९६ ॥

(६) रामचन्द्रः । आसीनस्य गुरोःस्थितःशिष्यःअभिवादंकुर्यात्तिष्ठतःगुरोःअभिगच्छन्सन्मुखःसन्नमःस्कुर्यात् । आव्रजतःआगच्छतःप्रत्युद्गम्य नमस्कारंकुर्यात् । गुरोर्धावतः पश्चाद्धावेत् ॥ १९६ ॥

पराङ्मुखस्याभिमुखोदूरस्थस्यैत्य चान्तिकम् ॥ प्रणम्य तु शयानस्य निदेशे चैव तिष्ठतः ॥ १९७ ॥

(१) मेधातिथिः । तथा पराङ्मुखस्य गुरोः संमुखोपविष्टः शिष्योयदि गुरुःपरावृत्य कथंचित्स्थितः प्रेष्यति तांदिशंगत्वाऽभिमुखीभूय पूर्वोक्तंकर्तव्यम् । दूरस्थस्य समीपंअन्तिकंएत्याऽऽगत्य प्राप्यासीनस्यापि शयानस्य प्रणम्य प्रह्वीभूत्वा गात्राण्यवनमय्य निदेशे निकटे तिष्ठतोऽपि प्रणम्यैव यत्प्रागुक्तमभिगच्छन्निति ॥ १९७ ॥

(२) सर्वज्ञनारायणः । निदेशोधः स्थानान्नीचे निम्नेदेशे गर्तादौ तिष्ठतः प्रणम्य कुर्यादित्यन्वयः । निदेशो निकटे देशेइत्यन्ये ॥ १९७ ॥

(३) कुल्लूकः । तथा पराङ्मुखस्येति । पराङ्मुखस्य वा दिशतः संमुखस्थोदूरस्थस्य गुरोः समीपमागत्य शयानस्य गुरोःप्रणम्य प्रह्वोभूत्वा निदेशे निकटे ऽवतिष्ठतोगुरोरादिशतः प्रह्वीभूयैव प्रतिश्रवणसंभाषेकुर्यात् ॥ १९७ ॥

(४) राघवानन्दः । किंच पराङिति । पराङ्मुखस्यगुरोःअभिमुखःसन्दूरस्थस्य गुरोरन्तिकमेत्यगत्वा निर्देशेनिकटदेशे तिष्ठतोगुरोःप्रणम्यशयानस्य । गुरोःनिदेशे समीपेप्रतिश्रवणादिकंकुर्यादित्यनुषज्यते । उक्तपदार्थजातमतिशयविनयसूचनार्थम् ॥ १९७ ॥

(५) नन्दनः । प्रणम्य प्रवणोभूत्वा । विदेशे विनते देशे श्वभ्रादौ ॥ १९७ ॥

(६) रामचन्द्रः । पराङ्मुखस्य गुरोःअभिमुखस्तिष्ठेत् । दूरस्थस्य गुरोःअन्तिकंसमीपंएत्यआगत्य तिष्ठेत् । शयानस्य गुरोःपृष्ठतःचरणौप्रणम्य निदेशेचैव तिष्ठति गुरोर्निदेशे तिष्ठेदित्यर्थः ॥ १९७ ॥

नीचंशय्यासनंचास्य सर्वदा गुरुसन्निधौ ॥ गुरोस्तु चक्षुर्विषये न यथेष्टासनोभवेत् ॥ १९८ ॥

(१) मेधातिथिः । नीचमनुन्नतं गुरुशय्याद्यपेक्षया च नीचत्वम् । नित्यग्रहणाद्ब्रह्मचर्यादुत्तरकालमपि गुरोश्च दृष्टिगोचरेनास्थातव्यम् । गुरुः पश्यति तत्र न यथेष्टमासीत पादप्रसारणाद्विनिबन्धादिना । आसनग्रहणंचेष्टामात्रोपलक्षणार्थम् । यथेष्टचेष्टोन भवेत् ॥ १९८ ॥

(२) सर्वज्ञनारायणः । अत्र शय्यानीचत्वाभिधानात् अधःशय्यामिति प्रागुक्तंखट्वाद्यूर्ध्वशय्यानिषेधपरंन तु भूशयनपरम् । यथेष्टासनः पर्यङ्कबन्धादिना केवलंचरणाद्युपपदशुन्यम् ॥ १९८ ॥

(३) कुल्लूकः । गुरुसमीपेचास्य गुरुशय्यासनापेक्षयानीचे एव शय्यासने नित्यं स्याताम् । यत्र च देशे समासीनंगुरुः पश्यति न तत्र यथेष्टचेष्टां चरणप्रसारादिकांकुर्यात् ॥ १९८ ॥

(४) राघवानन्दः । किंच नीचमिति । अस्य शिष्यस्यनीचमित्यादिनिषेधार्थः न यथेष्टासनःकृतपर्यङ्कबन्धः ॥ १९८ ॥

(५) नन्दनः । सर्वदानित्यमुत्तराश्रमेष्वपि ॥ १९८ ॥

(६) रामचन्द्रः । नीचंशय्यासनंनित्यंस्यात् अस्य शिष्यस्य गुरुसन्निधौ ॥१९८॥

नोदाहरेदस्य नाम परोक्षमपि केवलम् ॥ न चैवास्यानुकुर्वीत गतिभाषितचेष्टितम् ॥ १९९ ॥

[परोक्षंसत्कृपापूर्वंप्रत्यक्षंनकथंचन ॥ दुष्टानुचारीच गुरोरिहवामुत्रचेत्यधः ॥ + १ ॥]

(१) मेधातिथिः । नोदाहरेन्नोच्चारयेदस्य गुरोर्नाम केवलमुपाध्यायाचार्यभट्टाद्युपपदरहितंपरोक्षमपि । न चैवास्यानुकुर्वीत सदृशंनकुर्यान्नाट्यकारइव गतिः एवमस्मद्गुरुरपक्रामति भाषितंद्रुतंविलम्बितमध्यमत्वादिचेष्टितंएवंभुंक्तेएव मुष्णीषंबध्नाति एवंपरिवर्ततइत्यादि । उपहासबुद्ध्या यमनुकरणप्रतिषेधः ॥ १९९ ॥

(२) सर्वज्ञनारायणः । नोदाहरेत् परोक्षमपि प्रत्यक्षं तुतद्युक्तमपि नोदाहरेदित्यर्थः । गतिभाषिते चेष्टितंच हस्तचालनादिना नानु कुर्वीत परिहासबुद्ध्या तत्सदृशंगत्यादि न कुर्यात् ॥ १९९ ॥

(३) कुल्लूकः । अस्य गुरोःपरोक्षमप्युपाध्यायाचार्यादिपूजावचनोपपदशून्यंनाम नोच्चारयेत् । न तु गुरोर्गमनभाषितचेष्टितान्यनुकुर्वीत गुरुगमनादिसदृशान्यात्मनोगमनादीन्युपहासबुद्ध्या न कुर्वीत ॥ १९९ ॥

(४) राघवानन्दः । केवलंभगवच्छब्दादिशून्यंनानुकुर्वीतेति अनुकरणंतादृशगत्यादिकरणंचेष्टितंकरचालनादि तत्करणे परिहासादिप्रतीत्या क्रोधादिसंभावना स्यात् ॥ १९९ ॥

(५) नन्दनः । केवलंतत्रभवदादिशब्दरहितम् । चेष्टितंहस्तमुद्रादिकम् ॥ १९९ ॥

(६) रामचन्द्रः । अस्य गुरोःगतिभाषितचेष्टितं नानु कुर्वीत न कुर्यात् ॥ १९९ ॥

गुरोर्यत्र परीवादोनिन्दावापि प्रवर्तते ॥ कर्णौ तत्र पिधातव्यौ गन्तव्यंवा ततोन्यतः ॥ २०० ॥

(१) मेधातिथि । यत्र देशे दुर्जनसंपाते गुरोः परीवादः संभूतदोषानुकथनंनिन्दा अविद्यमानानांदोषाणामभिधानंप्रवर्तते तत्र कर्णौ पिधातव्यावङ्गुल्यादिना संवरीतव्यौ ततः प्रदेशाद्वाऽन्यत्र गन्तव्यम् ॥ २०० ॥

(२) सर्वज्ञनारायणः । परिवादोवास्तवदोषोक्तिः । निन्दा त्व सद्दोषोक्तिः ॥ २०० ॥

(३) कुल्लूकः । विद्यमानदोषस्याभिधानंपरीवादःअविद्यमानदोषाभिधानंनिन्दा । यत्र देशेगुरोःपरी वादोनिन्दाच वर्तते तत्र स्थितेन शिष्येण कर्णौहस्तादिना तिरोधातव्यौ तस्माद्वा देशाद्देशान्तरंगन्तव्यम् ॥ २०० ॥

(४) राघवानन्दः किंच गुरोरिति । परीवादोअविद्यमानदोषाभिधानेपिधातव्यावाच्छादितव्यौ ॥ २०० ॥

(५) नन्दनः । परीवादोबुद्धिपूर्वदोषः । निन्दाव्यक्तादिः ॥ २०० ॥

परीवादात्खरोभवति श्वा वै भवति निन्दकः॥परिभोक्ता कृमिर्भवति कीटोभवति मत्सरी२०१॥

(१) मेधातिथिः । पूर्वप्रतिषेधे शेषोयमर्थवादः । अतएवंव्याख्येयंपरीवादाञ्छ्रुत्वा खरोभवति हेतौल्यपूलोपे वाकर्मणि पञ्चमी। परीवादंश्रुत्वा निन्दकोनिन्दाश्रावीउपचारान्निन्दकउच्यते । तथा संस्कर्ताविघातकः श्रवणनिषेधादेव साक्षात्करणनिषेधसिद्धिपरिभोक्ता योगुरुमुपजीवतिकुमृत्यानुवर्तते । मत्सरीगुरुसमृद्धिमभ्युच्चयन्नसहतेऽन्तर्दह्यते । अनयोरप्राप्तत्वादपूर्वोविधिः । परिवादपरीवादयोर्घञमनुष्ये बहुलमिति दीर्घत्वादीर्घत्वे ॥ २०१ ॥

(२) सर्वज्ञनारायणः । परिवादात्स्वयंक्रियमाणात् । एवमुत्तरेषु । परिभोक्ता उत्तमवस्तूनांलब्धानां तदननुज्ञया भोक्ता । मत्सरी तद्गुणासहिष्णुः । कीटःकृमिरीषदुपचितः ॥ २०१ ॥

+ अयंश्लोकः (च) चिन्हित पुस्तके १९९ श्लोकस्य पूर्वार्द्धात् पश्चादृश्यते ॥

(३) कुल्लूकः । इदानींशिष्यकर्तृकपरीवादकृतफलमाह परीवादादिति । गुरोःपरीवादाच्छिष्योमृतः खरोभवति । गुरोर्निन्दकः कुक्कुरोभवति । परिभोक्ताऽनुचितेन गुरुधनेनोपजीवकः कृमिर्भवति । मत्सरी गुरोरुत्कर्षासहनः कीटोभवति । कीटःकृमिभ्यः किंचित् स्थूलोभवति ॥ २०१ ॥

(४) राघवानन्दः । किंच परिवादादेःशिष्यकर्तृकत्वे प्रत्यवायमाह परिवादादिति । परकृतपरिवादश्रवणे वा परैभोक्ताअनुचितगुरुधनाद्युपजीवी कृमिरपदः । सपदःकीटः । मत्सरी गुरुगुणासहिष्णुः ॥ २०१ ॥

(५) नन्दनः । परिवादी परिवादप्रयोगी । परिभोक्ता गुरोर्भोगादधिकभोगभोगी ॥ २०१ ॥

(६) रामचन्द्रः । गुरोःपरिवादात्खरोगर्दभोभवेत् । श्वाभवति निन्दकःगुरोःपरिभोक्ता गुरुधनोपभोगी कृमिःस्यात् । गुरोर्मत्सरकारी कीटोभवेदिति ॥ २०१ ॥

दूरस्थोनार्चयेदेनंन क्रुद्धोनान्तिके स्त्रियाः ॥ यानासनस्थश्चैवैनमवरुह्याभिवादयेत् ॥२०२॥

(१) मेधातिथिः । अत्र परप्रेषणेन गन्धमाल्यादेरर्पणंप्रतिषिध्यते । स्वयंकृते परेण च कारितेतुल्यंकर्तृत्वंप्रयोजकेपि कर्तृत्वस्मरणादित्येतयाबुद्ध्या प्राप्ते परमुखेनार्चने प्रतिषेधः । अशक्तौ ग्रामान्तरस्थस्य न दोषः ग्रामान्तरंगच्छत्युपाध्यायेभवानभिवादयतांसगत्वा मातुलमभिवादयतइत्यादिव्यवहारदर्शनात् । नक्रुद्धः गुरौ क्रोधासंभवादन्यनिमित्तेपि क्रोधे पूजाकाले तत्त्यागेनायंप्रसादोभिधीयते । क्रुद्धमित्यन्ये पठन्ति । नान्तिके समीपे स्त्रियाः कामिन्याःस्थितंगुर्वाराधनपरत्वाच्छुश्रूषाकलापस्यैन चित्तखेदआशङ्क्यते सनिषिध्यतेअतस्त्रियाइत्येवंव्याख्यातम् । यानंगन्त्र्यादि आसनंपीठिकामश्वादि ततोवरुह्यावतीर्याभिवादयेत् । शय्यासनस्थइत्यत्रासनादुत्थानमुक्तमनेनावरोहणंविधीयते मञ्चाद्यासनादुत्थानमनवरोहतोपि संभवति अवरोहणंतर्हि अनुत्थितस्यचनसंभवत्यतोनेनैव सिद्धेशय्यासनेत्यत्रासनग्रहणमनर्थकम् । नानर्थकंयदि शिष्यः पराङ्मुखः प्रत्यग्देशादागतंगुरुंमन्येत तदासनस्थएव संभ्रमपरावृत्तस्तदभिमुखीभूतउत्तिष्ठेन्नतूत्थायाभिपरावर्तेत तथाह्युत्थानक्रियया संमुखीभवनंव्यवधीयेत ततः कुप्येद्गुरुः । पराङ्मुखस्योत्तिष्ठतोगुरुरेवमपि मन्येत नायंममाभ्युत्थितोनिमित्तान्तरकृतमेवास्याभ्युत्थानंतस्मादर्थवदुभयत्राप्यासनग्रहणम् ॥ २०२ ॥

(२) सर्वज्ञनारायणः । दूरस्थःपरहस्तप्रेषितप्रणामबुद्ध्यादिना नार्चयेत् । क्रुद्धःक्रोधनिषेधाप्रतिसंधाने दैवादुत्पन्नक्रोधः न स्त्रियाः अन्तिके स्त्रिया सहैकान्त आसीनमभिवादनादिना नार्चयेत् । पूर्वयानासनस्थेन प्रत्युत्थानाभिवादनमुक्तम् । विशेषोविधीयत इत्यत्र यानस्थेनैव प्रत्युत्थानमभिवादनं च कार्यमिति प्रसङ्गेन विशेषमाह यानासनस्थइति । ते प्रत्युत्थानाभिवादनेअवरुह्यैव कार्येइत्यत्र विशेषइत्यर्थः ॥ २०२ ॥

(३) कुल्लूकः । दूरस्थः शिष्योऽन्यंनियुज्य माल्यवस्त्रादिना गुरुंनार्चयेत् । स्वयंगमनाशक्तौ त्वदोषः । क्रुद्धः कामिनीसमीपेच स्थितं स्वयमपिनार्चयेत् । यानासनस्थश्च शिष्योयानासनादवतीर्यगुरुमभिवादयेत् । यानासनस्थश्चैवैनंप्रत्युत्थायेत्यनेन यानासनादुत्थानंविहितमनेन तु यानासनत्यागइत्यपुनरुक्तिः ॥ २०२ ॥

(४) राघवानन्दः । एनंगुरुम् । क्रुद्धःस्वयम् । स्त्रिया गुरोः । अवरुह्यभूमौ ॥ २०२ ॥

(५) नन्दनः । दूरस्थोनार्चयेदेनंगन्धमाल्यादिप्रेषणेननार्चयेत्किंतुस्वयमेवार्चयेदित्यर्थः । क्रुद्धोऽन्यस्मै । स्त्रियागुरुपत्न्याअन्तिके रहसि पत्न्यासहितमित्यर्थः ॥ २०२ ॥

(६) रामचन्द्रः । एनंगुरुंदूरस्थःसन्वस्त्रादिनानार्चयेत् । तथा क्रुद्धःसन्न पुजयेदित्यर्थः । तथा स्त्रियाःअन्तिके समीपे नार्चयेत् । यानासनस्थःसन्भूमौअवरुह्यएनंगुरुंअभिवादयेत् ॥ २०२ ॥

प्रतिवातेऽनुवाते च नासीत गुरुणा सह ॥ असंश्रवे चैव गुरोर्न किंचिदपि कीर्तयेत् ॥ २०३ ॥

(१) **मेधातिथिः** । यस्यांदिशि गुरुर्व्यवस्थितस्ततोदेशाद्यदावायुः शिष्यदेशमागच्छति शिष्यदेशाद्गुरुदेशं ते प्रतिवातानुवाते। एकंप्रतिवातमपरमनुवातम्। तदपेक्षया गुरुणा सह नासीत अपितु तिर्यग्वातसेवी गुरोर्भवेत्। अविद्यमानः संश्रवोयत्र तस्मिन्नसंश्रवेन किंचिदपि गुरुगतमन्यगतंवा कीर्तयेत् । यत्र गुरुर्व्यक्तंनशृणोति ओष्ठसंचलनादिनाशिष्यसंम्बन्धिनाजानाति किंचिदयमेतेन संभाषते तन्न कीर्तयेत् ॥ २०३ ॥

(२) **सर्वज्ञनारायणः**। गुरुणा सहासीनोगुरोरभिमुखवातवहनस्थाने नासीतद्रप्सादिनिर्गमसंभवात् । नानुवाते तत्पृष्ठभागगतवातवहनस्थानेएतदुदीरितशब्दस्य तेनाश्रवणात् । एवमन्यत्राप्येतादृशि देशे न किंचिद्वाच्यमित्याह असंश्रवइति। संश्रवस्तदुक्तश्रवणार्हो देशः ॥ २०३ ॥

(३) **कुल्लूकः**। प्रतिगतोभिमुखीभूतः शिष्यस्तदा गुरुदेशाच्छिष्यदेशमागच्छति सप्रतिवातः। यः शिष्यदेशाद्गुरुदेशमागच्छति । सोऽनुवातः। तत्र गुरुणा समंनासीत । तथा ऽविद्यमानःसंश्रवो तस्मिन्नसंश्रवे गुरुर्यत्र न शृणोतीत्यर्थः। तत्रः गुरुगतमन्यगतंवा न किंचित्कथयेत् ॥ २०३ ॥

(४) **राघवानन्दः**। गुरुदेशाच्छिष्यंअनुगच्छन्वायुःप्रतिवातः। अनुवातःशिष्यदेशाद्गुरुमनुगच्छन्। तस्मिन्असंश्रवे यत्रगुरुर्न शृणोतीत्यर्थः ॥ २०३ ॥

(५) **नन्दनः**। प्रतिवातेपुरतोनासीत अनुवातेपृष्टतः । पार्श्ववातयोरप्युपलक्षणमेतत् । यथा स्वशरीरस्पृष्टोवातोनंनस्पृशेत्तथासीतेति। असंश्रवेअश्रवणायोग्ये देशे ॥ २०३ ॥

(६) **रामचन्द्रः**। गुरोःप्रतिवातेअभिमुखे च पुनःअनुवाते गुरुणासहनासीतनउपविशेत्। गुरोःसंश्रवे निकटेचैव किंचिदपि न कीर्तयेत् ॥ २०३ ॥

गोश्वोष्ट्रयानप्रासादस्रस्तरेषु कटेषु च ॥ आसीत गुरुणा सार्धं शिलाफलकनौषु च ॥ २०४ ॥

(१) **मेधातिथिः** । यानशब्दः प्रत्येकमभिसंबध्यते । गोश्वोष्ट्रैर्युक्तंयानंगोश्वोष्ट्रयानम्। दधिघटादिवत्समासे युक्तशब्दस्य लोपः । केवलेषु तु अश्वपृष्ठादिष्वारोहणंनास्ति । यदि स्वतन्त्रोयानशब्दोविज्ञायेत तदा स्यादप्यनुज्ञा। समाचारात्तु कादाचित्कमनुज्ञानंदृश्यते। प्रासादउपरिगृहादीनांया भूमिस्तस्यांगृहादिभूमिवत्सिद्धंसहासनंस्रस्तरः । दर्भादितृणाकीर्णआस्तरः कटःनतुशरवीरणादिकृतः प्रसिद्धः। शिलागिरिशिखरादावन्यत्र वा फलकंदारुमयमासनंपोतवर्तादि। नौर्जलतरणसंप्लवः। तेन पोतादावपि सिद्धंभवति ॥२०४ ॥

(२) **सर्वज्ञनारायणः**। गोश्वोष्ट्रयुक्ते याने रथादौ स्रस्तरे तृणसंचये कटेषु तृणादिनिर्मितेषु बृहदासनेषु फलके-काष्ठपट्टे एतद्धस्त्यादेरपि प्रकीर्णयानस्योपलक्षणम्। अत्रासीतेति वचनमन्यत्र शय्यादौ सहासननिषेधार्थम् ॥ २०४ ॥

(३) **कुल्लूकः** । यानशब्दः प्रत्येकमभिसंबध्यते । बलीवर्दयाने घोटकप्रयुक्तेयानउष्ट्रयुक्तयाने रथकाष्ठादौ-प्रासादोपरिस्रस्तरे कटे च तृणादिनिर्मिते शिलायांफलकेच दारुघटितदीर्घासने नौकायांच गुरुणासहासीत ॥ २०४॥

(४) **राघवानन्दः** । तेषांत्वयासने न प्रश्वसितव्यमितिश्रुतेः पर्युदासमाहगोश्वेति । गवादियुक्तेषु शकटेषु तद्रूपेषु वाप्रासादेदेवभूभुजांगृहे संस्तरे ऊर्णान्तत्वादिकृतेषु कटेषु तृणलतादिनिर्मितेषुफलकंदारुघटितविस्तीर्णासनम् ॥ २०४ ॥

---

(२०४) स्रस्तरेषु-संस्तरेषु (अ)। प्रस्तरेषुच (ज, झ. ढ,)

(५) नन्दनः । प्रतिषिद्धस्य गुरुसहासनस्य प्रत्युद्धारः क्रियते गोश्वेति। गोश्वोष्ट्रैर्युक्तंयानंगोश्वोष्ट्रयानम्। स्रस्तरस्तृणादिसमूहः ॥ २०४ ॥

(६) रामचन्द्रः । स्रस्तरेषु तृणसञ्चयेषु । शिलाफलके शिलामण्डले ॥ २०४ ॥

गुरोर्गुरौ सन्निहिते गुरुवद्वृत्तिमाचरेत् ॥ न चानिसृष्टोगुरुणा स्वान्गुरूनभिवादयेत् ॥ २०५ ॥

(१) मेधातिथिः । उक्ता गुरुवृत्तिरिदानीमन्यत्रातिदिश्यते । अध्ययनधर्मत्वात्सर्वस्यास्यगुरुरत्राचार्योविज्ञेयः । तस्य योगुरुस्तस्मिन्संनिहिते गुरुवद्वर्तितव्यम्। संनिहितइति न तद्गृहगमनमभिवादनायर्थंकर्तव्यम् । गुरुगृहे वसन्गुरुणाऽनिसृष्टोअननुज्ञातः स्वान्गुरून्मातापितृप्रभृतीन्नाभिवादयितुंगच्छेन्नपुनर्गुरुगृहे थितस्य यदि स्वे गुरवआगच्छन्ति तदा तदभिवादने गुर्वज्ञाऽपेक्षितव्या । कुतएतत् मातापित्रोरत्यन्तमान्यत्वात्पितृव्यमातुलादीनामप्यभिवादनप्रवृत्तस्य न कश्चिद्गुरुवृत्तेर्विघ्नः। आराधनार्थएवायंसर्वः प्रयासः । मातापितृगुरुसंनिपाते कः क्रमोभिवादनस्येत्युक्तंसर्वमहतीमाता। पित्राचार्ययोस्तु विकल्पः यतः पितृत्वाध्यारोपेणाचार्यस्य गौरवंविहितमतः पिताश्रेष्ठः यतश्चोक्तंगरीयान्ब्रह्मदः पितेति ततआचार्यः अतोऽयंविकल्पः ॥ २०५ ॥

(२) सर्वज्ञनारायणः । गुरुवत् गुरुतुल्यांवृत्तिम्। अत्र गुरुशब्दोगौरवविषययावदुपाध्यायादिपरः । नचेति। आचार्यगृहे वसन्गुरुणाआचार्येणानिसृष्टोननुज्ञातो नस्वानगुरून्मान्यानुपाध्यायादीन् अभिवादयेत् ॥ २०५ ॥

(३) कुल्लूकः । आचार्यस्याचार्येसन्निहित आचार्यइव तस्मिन्नप्यभिवादनादिकांवृत्तिमनुतिष्ठेत्। तथा गुरुगृहे वसञ्छिष्यआचार्येणानियुक्तो न स्वान्गुरून्मातृपितृव्यादीनभिवादयेत् ॥ २०५ ॥

(४) राघवानन्दः । वृत्तिमभिवादनादि । गुरोः गुरौ गुरोराचार्ये कुर्यात्। गुरुणा ब्रह्मदात्रा । स्वान्गुरून्पित्रादीन् ॥ २०५ ॥

(५) नन्दनः । गुरोराचार्यस्य। अनिसृष्टोननुज्ञातः। स्वान्गुरून्पित्र्यादीन्मातापितृभ्यामन्यत्रपितृव्यादीनित्यन्ये२०५

(६) रामचन्द्रः । गुरुणाअनिसृष्टःअनाज्ञप्तःस्वान्। गुरून्पितृभ्रात्रादीनूनअभिवादयेत् ॥ २०५ ॥

विद्यागुरुष्वेतदेव नित्या वृत्तिःस्वयोनिषु ॥ प्रतिषेधत्सु चाधर्मान्हितंचोपदिशत्स्वपि ॥ २०६ ॥

(१) मेधातिथिः। अयमप्यतिदेशः। आचार्यादन्ये उपाध्यायादयोविद्यागुरवः तेष्वेवमेववर्तितव्यंशरीरंचैवेत्यादिकत्या। स्वयोनिषु ज्येष्ठभ्रातृपितृव्यादिषु। नित्यावृत्तिर्गुरुवृत्तिः। विद्यागुरूणांत्वाचार्यव्यतिरेकेण यावद्विद्याग्रहणम्। अधर्मादकार्यात्परदारगमनादेः प्रतिषेधत्सु वयस्येष्वपि अभ्यन्तरगत्यारूढतयाऽकार्यचिकीर्षन्यःसुहृदादिस्तमाकेशग्रहणान्मित्रमकार्येभ्योनिवर्तयेदिति। तस्मिन्समहीनवयस्केपि गुरुवद्वर्तितव्यम्। हितंचविधिरूपमर्थंथकमुपदिशत्सु अथवा हितस्योपदेष्टारोभिजनाउच्यन्ते ॥ २०६ ॥

(२) सर्वज्ञनारायणः। विद्याग्रहणनिमित्तगुरुष्वेवैतत् अनुमतिप्रतीक्षणम्। स्वयोनिषु तु पितृमातुलादिषु गुरुषु नित्या वृत्तिरनुज्ञांविनाप्यभिवादनादिप्रवृत्तिः। तथा अधर्मेष्वेनसि क्रियमाणे अयमधर्मोन कार्य इदंधर्मसाधनंहितंकार्यमित्यादिपारलौकिकोपदेशकारिष्वप्येतत्। एवमेतदनुमत्यैवाभिवादनादीति व्यवहिताण्वयः ॥ २०६ ॥

(३) कुल्लूकः। । आचार्यव्यतिरिक्ताउपाध्यायाविद्यागुरवः। तेष्वेतदेवेति। सामान्योपक्रमः। किंतदाचार्यइव नित्या सार्वकालिकी वृत्तिर्विधेया। तथा स्वयोनिष्वपि पितृव्यादिषु तद्वृत्तिः। अधर्मान्निषेधत्सु धर्मतत्त्वंचोपदिशत्सु गुरुवद्वर्तितव्यम् ॥ २०६ ॥

(४) राघवानन्दः । अतिदेशार्थमुपदेशमुपसंहरतिविद्येति । विद्यागुरुष्वतिरिक्तेषुस्वयोनिषु पितृव्यादिषु । नित्याःवृत्तिरभ्यासः । प्रतिषेधत्सुअधर्मान्निवर्तकेषु हितंचोपदिशत्सुहितंदृष्टोपकारम् ॥ २०६ ॥

(५) नन्दनः । विद्यागुरुष्वाचार्यव्यतिरिक्तेषु । स्वयोनिषु मातापितृव्यतिरिक्तेषु । उपकारसंनिकर्षविप्रकर्षापेक्षया तेषु तारतम्यंकल्पनीयम् ॥ २०६ ॥

(६) रामचन्द्रः । विद्यागुरुषुएषैव वृत्तिः नित्या कार्या विद्याध्यापकेषुगुरुष्वित्यर्थः । स्वयोनिषु स्वसंबन्धिषुएषैव वृत्तिःकार्या अधर्मात्प्रतिषेधत्सु सत्सुएतदेव वृत्तिः । हितंचोपदिशत्सुअपिएषैववृत्तिःकार्या ॥ २०६ ॥

श्रेयस्सु गुरुवद्वृत्तिंनित्यमेव समाचरेत् ॥ गुरुपुत्रेषु चार्येषु गुरोश्चैव स्वबन्धुषु ॥ २०७ ॥

(१) मेधातिथिः । श्रेयांसआत्मापेक्षया वित्तवयोविद्याद्यतिशययुक्ताः तेषुगुरुवद्वृत्तिंयथासंभवमभिवादनप्रत्युत्थानादि सर्वदैव समाचरेत् । बहवोत्र शब्दागतार्थाः प्रयुज्यन्ते । तेषांवृत्तवशात्प्रयोगोनदुष्यति । श्रेयस्स्वित्येतावद्वक्तव्यंगुरुवदित्याक्षिप्यते वृत्तिमित्यादिग्राममेव तदेतत्सर्वस्मिन्नेवास्मिन्ग्रन्थे स्वयमुत्प्रेक्ष्यम् । गुरुपुत्रे तथाचार्ये । आचार्यग्रहणेनाध्यापकत्वंलक्ष्यते यद्यसन्निहिते गुरौ तत्पुत्रोध्यापयति कतिचिदहानि तदा तस्मिन्गुरुवद्वृत्तिः । पाठान्तरम् गुरुपुत्रेष्वथाचार्ये । आचार्यशब्दोगुणवद्ब्राह्मणजातिवचनः शूद्राचार्यौ चर्मणिव्यायच्छेतेतयोराचार्यवर्णजापयन्तीतिप्रयोगदर्शनात् । नच सर्वस्मिन्गुरुपुत्रेवृत्तिरेषा विधीयते । गुरोश्चैव स्वबन्धुषु स्वग्रहणंगुरुवंश्यार्थं गुरुवंशसंबन्धितैवात्रनिमित्तंन वयोविद्याद्यपेक्ष्यते ॥ २०७ ॥

(२) सर्वज्ञनारायणः । अतिशयविद्यादिप्रकर्षवत्स्वगुरुष्वपि गुरुवद्वृत्तिमभिवादनादि गुरुपुत्रेषु ज्येष्ठेषु आर्येषु अपापेषु । आरात्पापेभ्योगता आर्याः । एतच्च सवर्णाधिकवर्गेष्वेव । गुरोः स्वेषुजातिषु बन्धुषु चैवंवृत्तिः । सयोनिषु चैवंवृत्तिः ॥ २०७ ॥

(३) कुल्लूकः । श्रेयस्सु विद्यातपःसमृद्धेषु । आर्येष्विति गुरुपुत्रविशेषणम् । समानजातिगुरुपुत्रेषु गुरोश्च ज्ञातिष्वपि पितृव्यादिषु सर्वदा गुरुवद्वृत्तिमनुतिष्ठेत् । गुरुपुत्रश्चात्र शिष्याधिकवयाश्च बोद्धव्यः शिष्यबालसमानवयसामनन्तरंशिष्यस्य वक्ष्यमाणत्वात् ॥ २०७ ॥

(४) राघवानन्दः । श्रेयस्सु विद्यातपःसमृद्धेषु । गुरुवन्नमस्कारोत्थानादि ॥ २०७ ॥

(५) नन्दनः । श्रेयस्सुअवदातयोनिविद्याकर्मसु । आर्येषु सद्वृत्तेषु निर्दोषेषु । गुरुपुत्रविशेषणमेतत् । स्वबन्धुषुज्ञातिसंबन्धिषु ॥ २०७ ॥

(६) रामचन्द्रः । श्रेयस्सुज्येष्ठेषुविद्यां प्रकाशयत्सुवा गुरुपुत्रे तथाचार्ये गुरोर्बन्धुषु च एतेषु गुरुवद्वृत्तिंनित्यमेव समाचरेत् ॥ २०७ ॥

बालःसमानजन्मा वा शिष्योवा यज्ञकर्मणि ॥ अध्यापयन्गुरुसुतोगुरुवन्मानमर्हति ॥ २०८ ॥

(१) मेधातिथिः । ये न पठन्ति गुरुपुत्रविशेषणार्थंपूर्वत्राचार्यग्रहणंतेषामध्यापयितरि गुणवति समानजातीयेसर्वगुरुवृत्तिः प्राप्ताऽनेन विशेषेणावस्थाप्यते । अध्यापयन्गुरुसुतोगुरुवन्मानंपूजामर्हति नानाध्यापयन् । ननु च विद्याग्रहणनिमित्तत्वाद्गुरुवृत्तिरध्यापयद्गुरुवद्गुरुपुत्रेऽप्यध्यापयितरि प्राप्तैव शैशवब्राह्मणनिदर्शनात्कनीयसोपि सिद्धेत्यतोबालः समानजन्मवेत्येवमर्थमपि न वक्तव्यम् । सत्यम् । योवेदंवेदैकदेशंवाध्यापयति तस्यानाचार्यस्याप्येषा वृत्तिरुक्ता । अयंतु न ग्राहकः केवलंकतिचिदहान्यहर्भागंवाध्यापयति अतोनाचार्योनोपाध्यायइत्यप्राप्तौ विधिरयम् । अस्मादेव वचना-

दन्यस्य भगमप्रमादे रध्यापकस्य न सर्वा गुरुवृत्तिः कर्तव्येति विज्ञायते। ये च पूर्वत्राचार्यशब्दंपठन्ति तेषामुत्तरार्थमिदमनूद्यते। उत्सादनंचेति वक्ष्यति । शिष्योवा यज्ञकर्मणि यज्ञकर्मग्रहणंप्रदर्शनार्थंकचिदङ्गेवेदैकदेशे मन्त्रभागे कस्मिंश्चिद्ब्राह्मणभागे वा तथापि गुरुवत्पूज्यः यदितु गुरुसुतः । तस्मादनेन प्रकारेण काञ्चिद्विद्यांशिक्षेत तदा तेन तस्मिन्गुवरुद्वर्तितव्यमित्युक्तमेएवमर्थवादत्वादस्यारम्भस्य । येतुव्याचक्षते अध्यापयन्नित्यनेनाध्यापनसामर्थ्यंलक्ष्यते अध्यापनसमर्थश्चेदध्यापयतुमावाध्यापयेत् गृहीतवेदश्चेद्गुरुवद्द्रष्टव्यः तेषांशाब्दमेतद्व्याख्यानंसत्यंभवति । शतालक्षणार्थः तनु क्रियायाः लक्षणहेत्वोः क्रियायाइति। क्रियाचात्र श्रुता। गुरुवन्मानमर्हति ॥ २०८ ॥

(२) **सर्वज्ञनारायणः**। बालोल्पवयाः। समानजन्मा सवयाः । यज्ञकर्मविषयकग्रन्थकल्पोपदर्शनेनाङ्गोपलक्षणम्। तत्राङ्गजाते पुर्वेयद्यप्यस्य गुरुसुतः शिष्यस्तथापि गुरुसुते गुरोः कार्यान्तरादिव्यासक्तौ वेदमध्यापयन् तत्काले गुरुवन्मान्यः। यदितु सोपि एतदधीतवेदएवास्य शिष्योन तदैवम् ॥ २०८ ॥

(३) **कुल्लूकः**। कनिष्ठःसवयावा ज्येष्ठोपि वा शिष्योऽध्यापयन्नध्यापनसमर्थोगृहीतवेदइत्यर्थः । सयज्ञकर्मण्यृत्विगनृत्विग्वा यज्ञदर्शनार्थमागतोगुरुवत्पूजामर्हति ॥ २०८ ॥

(४) **राघवानन्दः**। अध्यापयन्गृहीतवेदत्वेन तत्र समर्थःयज्ञकर्मणि शिष्योपि ब्रह्मचारिणःततोध्येतायज्ञकर्मदर्शनार्थमागतः। द्वितीयोवाशब्दोगुणानादरे। सर्वदानमानार्हःसः ॥ २०८ ॥

(५) **नन्दनः**। यज्ञकर्मणि यज्ञादिषु कार्यान्तरेषु आचार्येयज्ञादिकर्मपरवशे आचार्यस्थानीयोऽध्यापयन्बालोऽवरवयः स्थोवा समानजन्मा समानवयस्थोवा विद्यान्तरेषुशिष्योवा गुरुसुतोगुरुवन्मानमर्हति ॥ २०८ ॥

(६) **रामचन्द्रः**। यज्ञकर्मणि ऋत्विजःबालाःगुरुवत्मानंअर्हन्ति। समानजन्मावाव्रते गुरुवन्मानमर्हति। गुरुसुतः गुरुवन्मानमर्हति। यःअध्यापयन्सःगुरुवन्मानमर्हतीत्यर्थः ॥ २०८ ॥

उत्सादनंच गात्राणांस्नापनोच्छिष्टभोजने ॥ न कुर्याद्गुरुपुत्रस्य पादयोश्चावनेजनम् ॥ २०९ ॥

(१) **मेधातिथिः**। अभ्यक्तस्योद्वर्तनमुत्सादनंन कुर्यात् गुरुपुत्रस्य पादयोश्चावनेजनंप्रक्षालनम्। अस्मादेव प्रतिषेधाद्गुरावेतदनुक्तमपि कर्तव्यतया प्रतीयते। यदा तु गुरुपुत्रएव गुरुः संपद्यते कृत्स्नवेदाध्यापनोपयोगितया तदा स्वनिमित्तंतत्रोच्छिष्टभोजनाद्यस्तितदनेन प्रतिषिध्यते। आतिदेशिकस्यानेन निषेधोनौपदेशिकस्य ॥ २०९ ॥

(२) **सर्वज्ञनारायणः**। उत्सादनमुद्वर्तनम्। गुरुपुत्रस्य पूर्वश्लोकोक्तलक्षणवतः। अवनेजनंक्षालनम्। अर्थादभिवादनमपिनिषिद्धमेव ॥ २०९ ॥

(३) **कुल्लूकः**। आचार्यवदित्यविशेषेण पूजायांप्राप्तायांविशेषमाह । उत्सादनमिति । गात्राणामुत्सादनमुद्वर्त्तनमुच्छिष्टस्य भक्षणंपादयोश्च प्रक्षालनंगुरुपुत्रस्य न कुर्यात् ॥ २०९ ॥

(४) **राघवानन्दः**। पूजाङ्गत्वेन प्राप्तंपरिचष्टेउदिति। उत्सादनं गात्रमलानांत्याजनम्। अवनेजनंपादक्षालनम्। एतेन गुरोरुच्छिष्टंभोज्यम् ॥ २०९ ॥

(५) **नन्दनः**। अथगुणवतिगुरुपुत्रेगुरुवृत्तीनांप्राप्तानामपवादमाह उत्सादनमिति । अनेनैवज्ञापितंगुरोरुत्सादनादीनिकार्याणीति ॥ २०९ ॥

(६) **रामचन्द्रः**। गात्राणांउत्सादनं अङ्गवस्त्रादिना न कुर्यात् स्नापनोच्छिष्टभोजने पादयोःअवनेजनंगुरुपुत्रस्य न कुर्यात् कोर्थः गुरुपुत्रात् एतानि वस्तूनि न कारयेत्। हेत्वर्थेषष्ठीज्ञेया। गुरुपुत्राद्यइति वा पाठः ॥ २०९ ॥

गुरुवत्प्रतिपूज्याःस्युःसवर्णागुरुयोषितः ॥ असवर्णास्तु संपूज्याः प्रत्युत्थानभिवादनैः ॥ २१० ॥

(१) **मेधातिथिः** । गुरुयोषितोगुरुपत्न्यः सवर्णाः समानजातीयाः गुरुवत्प्रतिपूज्याआज्ञाकरणादिना । असवर्णास्तु केवलैः प्रत्युत्थानाभिवादनैः । बहुवचनादाद्यर्थोत्रान्तर्भवति तेन हि प्रियहितादिगत्याद्यननुकरणाद्यप्यतिदिश्यते ॥२१० ॥

(२) **सर्वज्ञनारायणः** । सवर्णाः शिष्यस्य गुरुयोषितआचार्योपाध्यायपितृपितृव्यादिपत्न्यः । अभिवादनमसावहमित्युक्त्वा ॥ २१० ॥

(३) **कुल्लूकः** । सवर्णागुरुपत्न्योगुरुवदाज्ञाकरणादिना पूज्याभवेयुः । असवर्णाः पुनः केवलप्रत्युत्थानाभिवादनैः ॥ २१० ॥

(४) **राघवानन्दः** । किंच गुरुवदिति । सवर्णाःसमानजातीयाः ॥ २१० ॥

(५) **नन्दनः** । गुरौया वृत्तिरुक्ता तथा सवर्णागुरुयोषितः प्रतिपूज्याः । असवर्णास्तु प्रत्युत्थानाभिवादनादिभिः पूज्याः । एतदुक्तंभवति । ब्राह्मणेन क्षत्रियवैश्यशूद्राश्च गुरुपत्न्यः प्रत्युत्थानेन पूज्याः नाभिवादनेन एवंक्षत्रियेणवैश्याशूद्रे वैश्येनशूद्राच । किंच क्षत्रियेणब्राह्मणी वैश्येन क्षत्रियाब्राह्मण्यौच प्रत्युत्थानाभिवादनैः पूज्याइति ॥ २१० ॥

(६) **रामचन्द्रः** । तथा असवर्णायोषितःप्रत्युत्थानाभिवादनैः संपूज्याः ॥ २१० ॥

अभ्यञ्जनंस्नापनंच गात्रोत्सादनमेव च ॥ गुरुपत्न्या न कार्याणि केशानांच प्रसाधनम् ॥ २११॥

(१) **मेधातिथिः** । घृततैलादिनाकेशकायोपदेहनमभ्यञ्जनम् । गात्राणामुत्सादनमुद्वर्तनंकार्यसामान्यात्पादधावनमपि । सर्वथा शरीरस्पर्शसाध्या या काचिदनुवृत्तिः सा सर्वा प्रतिषिध्यते । वक्ष्यति यंहेतुंस्वभावएषनारीणामिति । केशानांच प्रसाधनंविन्यासरचनादिकरणंकुंकुमसिंदूरादिनासीमन्तोत्थापनम् । प्रदर्शनार्थंचैतदुक्तंतेन देहप्रसाधनमपि चन्दनानुलेपनानि निषिध्यन्ते ॥ २११ ॥

(२) **सर्वज्ञनारायणः** । अभ्यञ्जनंस्नेहम्रक्षणम् ॥ २११ ॥

(३) **कुल्लूकः** । तैलादिना देहाभ्यङ्गं स्नापनंगात्राणांचोद्वर्तनंकेशानांच माल्यादिनाप्रसाधनमेतानि गुरुपत्न्या न कर्तव्यानि । केशानामिति प्रदर्शनमात्रार्थम् । देहस्यापि चन्दनादिना प्रसाधनं न कुर्यात् ॥ २११ ॥

(४) **राघवानन्दः** । गुरुवत्तासामभ्यञ्जनादिप्राप्तेे निराकरणमाहअभ्यञ्जनमिति । प्रसाधनंकेशसंस्कारः ॥ २११ ॥

(६) **रामचन्द्रः** । गुरुपत्नी शरीरस्यअभ्यञ्जनतैलाभ्यङ्गादीनि संस्कारादीनि न कुर्यात् ॥ २११ ॥

गुरुपत्नी तु युवतिर्नाभिवाद्येह पादयोः ॥ पूर्णविंशतिवर्षेण गुणदोषौ विजानता ॥ २१२ ॥

(१) **मेधातिथिः** । पूर्णविंशतिवर्षेण तरुणेनेत्यर्थः । बालस्या षोडशाद्वर्षाददोषः। पूर्णानिविंशतिवर्षाणि यस्य सएवमुच्यते । अयंन्यायोयौवनोद्भेदोपलक्षणार्थः । अतएवाह गुणदोषौ विजानता कामजे सुखदुःखे गुणदोषावभिप्रेतौ स्त्रीगतौ च स्वाकृतिदुराकृतिलक्षणौ धैर्यचापले वा । सर्वथाऽतन्त्रांविंशतिसंख्या ॥ २१२ ॥

(२) **सर्वज्ञनारायणः** । पूर्णविंशतिवर्षेणेति यौवनोपलक्षणमिति ज्ञापयितुमुक्तम् । गुणदोषाविति स्त्रीणांस्पर्शनाद्रागोत्पत्तिदोषं व्यवधाने तद्ब्रह्मचर्यादच्युतिगुणंजानता । पादयोरिति निषेधात्पादस्पर्शनमात्रंन कार्यम् भूमावेवत्वभिवादनमिति वक्ष्यति ॥ २१२ ॥

(३) **कुल्लूकः** । युवती गुरुपत्नी पादयोरुपसंगृह्याभिवादनदोषगुणज्ञेन यूना नाभिवाद्या । पूर्णविंशतिवर्षत्वंयौवनप्रदर्शनार्थम् । बालस्य पादयोरभिवादनमनिषिद्धम् । यूनस्तुभूमावभिवादनंवक्ष्यति ॥ २१२ ॥

(४) **राघवानन्दः** । किंच पूर्णविंशतिवर्षेण ब्रह्मचारिणा गुणदोषौ गुणश्च शुश्रूषयादोषश्च स्पर्शनेतौ विजानता गुणबुद्ध्या प्रवर्तमानस्य स्पर्शदर्शनादिना वा गुरुद्रोहेदोषइति भावः ॥ २१२ ॥

(५) **नन्दनः** । पादयोर्नाभिवाद्या ॥ २१२ ॥

(६) **रामचन्द्रः** । गुरुपत्नी युवती पादयोःस्पृष्ट्वा नाभिवाद्या पूर्णविंशतिवर्षेण शिष्येण गुणदोषौ विजानता॥२१२ ॥

स्वभावएषनारीणांनराणामिह दूषणम् ॥ अतोऽर्थान्न प्रमाद्यन्ति प्रमदासु विपश्चितः ॥ २१३ ॥

(१) **मेधातिथिः** । एषा प्रकृतिः स्त्रीणांयन्नराणांधैर्यव्यावर्तसङ्कान्हिस्त्रियः पुरुषान्व्रताच्चावयेयुः। अतोर्थात्त्वस्माद्धेतोर्न प्रमाद्यन्ति दूरतएवस्त्रियः परिहरन्ति । प्रमादः स्पर्शादिकरणंवस्तुस्वभावोयंयत्तरुणीस्पृष्टा कामकृतंचित्तसंक्षोभंजनयति । तत्र चित्तसंक्षोभोऽपि प्रतिषिद्धः तिष्ठतु तावदपरोग्राम्यधर्मसंरम्भः । प्रमदाःस्त्रियः ॥२१३ ॥

(२) **सर्वज्ञनारायणः** । दोषंस्फुटयतिस्वभावइति । स्वभावएषस्त्रीणामनिच्छन्तीनामपि दर्शनेन रागेण दुष्यन्तीति नराणांदूषणंपुरुषेषु दोषापादकत्वंनारीणांस्वभावः । न प्रमाद्यन्ति तदनीक्षणादौ कार्येणाप्रमत्ताभवन्ति ॥ २१३ ॥

(३) **कुल्लूकः** । स्त्रीणामयंस्वभावःयदिह शृंगारचेष्टया व्यामोह्य पुरुषाणांदूषणम् । अतोऽर्थादस्माद्धेतोः पण्डिताःस्त्रीषु न प्रमत्ता भवन्ति ॥ २१३ ॥

(४) **राघवानन्दः** । दूषणंशृङ्गारचेष्टयाव्यामोहनम् यतःअतोर्थादपरिहार्यकार्यवशादपि साक्षान्न प्रमाद्यन्ति स्पर्शालापादिना प्रमत्तान भवन्ति ॥ २१३ ॥

(५) **नन्दनः** । अभ्यञ्जनादिप्रतिषेधकारणंश्लोकद्वयेनाह स्वभावइति । यन्नराणांदूषणंएषनारीणांस्वभावः । अतोऽर्थेएतदर्थम् ॥ २१३ ॥

(६) **रामचन्द्रः** । नारीणां एषः स्वभावःइह दूषणं । अतोर्थात् अतः कारणात् प्रमदासु विपश्चितःन प्रमाद्यन्ति नप्रमादं गच्छन्तीत्यर्थः ॥ २१३॥

अविद्वांसमलंलोके विद्वांसमपि वा पुनः ॥ प्रमदाह्युत्पथंनेतुंकामक्रोधवशानुगम् ॥ २१४ ॥

(१) **मेधातिथिः** । नचैतन्मन्तव्यंनियमितानि येन चिरमिन्द्रियाण्यतिगुरुपातकंगुरुदारेषु दुष्टेन भावेन प्रेक्षणमपीति यएवंवेद तस्य न दोषः पादस्पर्शादाविति । यतएवंविधानपि दोषान्योजानीते यो वा न किंचिज्जानीते तौ स्त्रीविषये समानौ यतोनात्रविद्वत्ता प्रभवति । शक्नुवन्ति स्त्रियः सर्वमुख्यममार्गेलोकशास्त्रविरुद्धंविषयंनेतुंप्रापयितुंकामक्रोधवशानुगंसन्तम् । कामक्रोधाभ्यांयः संबध्यतइत्यर्थः । अवस्थाविशेषोपलक्षणार्थंचैतत् । अत्यन्तबालंअत्यन्तवृद्धंच प्राप्तयोगप्रकर्षणंच वर्जयित्वा येन निरन्वयमुत्थिताः संसारपुरुषधर्मास्तद्व्यतिरेकेण न कश्चित्पुरुषोस्ति य स्त्रीभिर्नाकृष्यते । अयःकान्तेनेवलोहः । न चात्र स्त्रीणांप्रभविष्णुता वस्तुस्वाभाव्यात्तरुणीजनदर्शने पुंसामुन्मथ्यते चित्तंविशेषतोब्रह्मचारिणाम् ॥ २१४ ॥

(२) **सर्वज्ञनारायणः** । अलंसमर्थाः । उत्पथनयने तु अविद्वांसंविद्वांसंतु कामक्रोधवशानुगमेव नान्यम् ॥ २१४॥

(३) **कुल्लूकः** । विद्वानहंजितेन्द्रियइति बुद्ध्या न स्त्रीसन्निधिर्विधेयः । यस्मादविद्वांसंविद्वांसमपि वा पुनःपुरुषंदेहधर्मात्कामक्रोधवशानुयायिनंस्त्रियउत्पथंनेतुंसमर्थाः ॥ २१४ ॥

(४) **राघवानन्दः** । अलंसमर्थाउत्पथंनेतुंप्रमदाइत्यन्वयः । तत्र हेतुःकामक्रोधवशानुगमिति क्रोधेन वशीभूत मिव जनाःकामेन वशीभूतंप्रमदाइति वार्थः । तदुक्तंज्ञानवासिष्ठे । रोगार्त्तिरङ्गना तृष्णा गम्भीरमपि मानवम् । उत्तानतांनयन्त्याशुसूर्यांशवइवाम्बुजमिति ॥ २१४ ॥

(६) **रामचन्द्रः** । अविद्वांसंमूर्खं पुनः विद्वांसमपिप्रमदाउत्पथंनेतुंसमर्था भवन्तीत्यर्थः । कीदृशंपुरुषंकामक्रोधवशानुगं परवशमित्यर्थः ॥ २१४ ॥

मात्रा स्वस्रा दुहित्रा वा न विविक्तासनोभवेत् ॥ बलवानिन्द्रियग्रामोविद्वांसमपि कर्षति ॥ २१५ ॥

(१) **मेधातिथिः** । अतो विविक्तासनः निर्जनेशून्ये गृहादौ नासीत नापि निः शङ्कमङ्गस्पर्शादिति कुर्यात् । अतिचपलोहीन्द्रियसंघातोविद्वांसमपि शास्त्रनिगृहीतात्मानमपि कर्षति हरति परतन्त्रीकरोति ॥ २१५ ॥

(२) **सर्वज्ञनारायणः** । मात्रेत्यादौसहेत्यध्याहार्यम् । विविक्तासनएकान्तआसीनः ॥ २१५ ॥

(३) **कुल्लूकः** । अतआह मात्रेति । मात्रा भगिन्या दुहित्रा निर्जनगृहादौ नासीत । यतोऽतिबलइन्द्रियगणः शास्त्रनियमितात्मानमपि पुरुषं परवशं करोति ॥ २१५ ॥

(४) **राघवानन्दः** । तासांदोषमनुलरन्नाहमात्रेति । विविक्तंविगतान्यजनंतत्रैनाभिर्नासीतेति तत्र हेतुर्बलवानिति । अहोबलवानिन्द्रियग्रामोयतोमातृदुहित्रोरस्मिशब्दत्सरान्तरेपिपुत्रादेर्मैथुनादिसंभावना तत्रान्यासुकाकथेति ॥ २१५ ॥

(५) **नन्दनः** । यतएवंततो याभिः स्त्रीभिरुत्पथंनीतोनिरतिशयदोषयुक्तोभवति तासांसंनिकर्षोवर्जनीयइत्याह मात्रेति । जितेन्द्रियस्यममेमात्रादिभिः विविक्तासनंकिंदूषणंकरिष्यतीतिन मन्तव्यंयेनबलवानिन्द्रियग्रामोविद्वांसमपिकर्षति॥२१५

(६) **रामचन्द्रः** । नविविक्तासनोभवेत् । विविक्तःपूतविजनइत्यर्थः ॥ २१५ ॥

कामंतु गुरुपत्नीनांयुवतीनांयुवा भुवि ॥ विधिवद्वन्दनंकुर्यादसावहमिति ब्रुवन् ॥ २१६ ॥

(१) **मेधातिथिः** । काममित्यरुचिंसूचयति । उत्तरेण चैतत्संबध्यते विप्रोष्यपादग्रहणमिति । भुवि तु पादवन्दनमिष्यतएव युवतीनांयुवा द्वयोर्यूनोरयंविधिः यदिबालोब्रह्मचारी वृद्धा वा गुरुपत्नी तदा पादोपसंग्रहणमविरुद्धम् । असावहमिति प्रागुक्तस्यविधेरनुवादः । विधिवदिति व्यस्तपाणिना ॥ २१६ ॥

(२) **सर्वज्ञनारायणः** । भुवि नपादयोः । विधिवत्पाणिभ्यांव्यस्ताभ्यां तथाचोक्तंसव्येनसव्यइति ॥ २१६ ॥

(३) **कुल्लूकः** । कामंतुगुरुपत्नीनांयुवतीनांत्वयमपि युवा यथोक्तविधिनाभिवादये ऽमुकनामाहंभोरितिब्रुवन्पादग्रहणंविना यथेष्टमभिवादनंकुर्यात् ॥ २१६ ॥

(४) **राघवानन्दः** । एवंचेद्गुरुपत्न्यवन्दनंप्राप्तंतत्राहकाममिति । भुवि तदग्रभूमौ विधिवत्बाहुभ्यांसह जानुभ्यांशिरसा वचसाधियेति विनापादग्रहणमित्यर्थः ॥ २१६ ॥

(५) **नन्दनः** । युवतिषु गुरुपत्नीषु पूजार्थंपादग्रहणं नकुर्वीत कथंतर्हि पूजा कर्तव्येत्याह कामंत्विति । भुविवन्दनंकुर्यान्नपादौस्पृष्ट्वा । असावहंदेवदत्तोहम् । काममितिवचनादकरणेपि नदोषइतिसूचितम् ॥ २१६ ॥

(६) **रामचन्द्रः** । कामंअतिशयेन युवतीनाम् गुरुपत्नीनांयुवतीनां युवासन् भुवि स्पृष्ट्वा विधिवद्वन्दनंकुर्यात् । असौ अहमिति ब्रुवन् ॥ २१६ ॥

---

(१) भोरि=भवति (अ)

विप्रोष्य पादग्रहणमन्वहंचाभिवादनम् ॥ गुरुदारेषु कुर्वीत सतांधर्ममनुस्मरन् ॥ २१७ ॥

(१) मेधातिथिः । प्रवासादेत्य पादयोर्ग्रहणंसव्येन सव्यइति । अन्वहमहन्यहनि । अभिवादनंभूमौ । सतांशिष्टानां-एषधर्मआचारइत्यनुस्मरन् ॥ २१७ ॥

(२) सर्वज्ञनारायणः । अत्र विप्रोष्य प्रवासादेत्य पादग्रहणं तत्पूर्वकमभिवादनम् । अन्वहंत्वभिवादनमात्रं वृद्धानामपि न पादग्रहणम् । गुरुदारेष्वाचार्यादिभार्यासु न तु मातरि । सतांवृत्तमिति । रागोत्पत्त्यसंभावनायामन्येषएव आचारइत्यर्थः ॥ २१७ ॥

(३) कुल्लूकः । प्रवासादागत्य सव्येन सव्यंदक्षिणेन दक्षिणमित्युक्तविधिना पादग्रहणंप्रत्यहंच भूमावभिवादनंच गुरुपत्नीषु युवाकुर्यात् । शिष्टानामयमाचारइति जानन्तु ॥ २१७ ॥

(४) राघवानन्दः । विप्रोष्य प्रवासंकृत्वा । अन्यदाअभिवादनमात्रम् । सतांशिष्टानामयमाचारइतिस्मरन् ॥२१७ ॥

(५) नन्दनः । प्रोषितः प्रत्यागतः । अन्वहंभुव्यभिवादनम् । सतांधर्ममनुस्मरन्एषसतामाचारइत्यर्थः ॥ २१७ ॥

(६) रामचन्द्रः । विप्रोष्य प्रवासादागत्य गुरुपादेषु पादग्रहणंकुर्यात् किंकुर्वन्सतां धर्मंस्मरन् ॥ २१७ ॥

यथा खनन्खनित्रेण नरोवार्यधिगच्छति ॥ तथा गुरुगतांविद्यांशुश्रूषुरधिगच्छति ॥ २१८ ॥

(१) मेधातिथिः । सर्वस्य शुश्रूषाविधेः फलमिदंगुर्वाराधनद्वारेण स्वाध्यायविध्यर्थता । यथा कश्चिन्मनुष्यः खनित्रेण कुद्दालादिना भूमिंखनन्वारिप्राप्नोति नाक्लेशेन एवमयंविद्यांगुरुगतांशुश्रूषुः गुरुसेवापरोधिगच्छति ॥ २१८ ॥

(२) सर्वज्ञनारायणः । यथावारि प्राप्नोति कुद्दालादिना खनन् अक्लेशेन तथा विद्यांशुश्रूषुः क्रमेणाधिगच्छतीति दृष्टान्तार्थः ॥ २१८ ॥

(३) कुल्लूकः । उक्तस्य शुश्रूषाविधेः फलमाह । यथा कश्चिन्मनुष्यः खनित्रेण भूमिंखनञ्जलंप्राप्नोत्येवंगुरुस्थितां-विद्यांगुरुसेवापरः शिष्यः प्राप्नोति ॥ २१८ ॥

(४) राघवानन्दः । गुरुशुश्रूषैव विद्याप्राप्तौ कारणमाहयथेति । खनन्छिद्रार्थंदारयन् । वारिकूपादिजम् ॥ २१८ ॥

(५) नन्दनः । एवंप्रतिपादितांगुरुवृत्तिंफलोपपादनेन निगमयति यथाखनन्निति ॥ २१८ ॥

(६) रामचन्द्रः । वारिजलंयथाअधिगच्छति तथा गुरुगतांविद्यां शुश्रूषुरित्यर्थः । अधिगच्छति ॥ २१८ ॥

मुण्डोवा जटिलोवा स्यादथवा स्याच्छिखाजटः ॥ नैनंग्रामेऽभिनिम्लोचेत्सूर्योनाभ्युदियात् क्वचित् ॥ २१९ ॥

(१) मेधातिथिः । मुण्डः सर्वतः केशवपनंकारयेत् । जटिलोवा जटाः परस्परमत्यन्तमितरेतरसंलग्नकेशाः तद्वाञ्जटिलः । शिखैव वा जटा यस्य जटाकारांशिखांधारयेत् परिशिष्टे मुण्डःतथा च कुर्याद्यथा ग्रामे स्थितस्य सूर्योनाभिनिम्लोचेन्नास्तंगच्छेत् । ग्रामग्रहणंनगरस्यापि प्रदर्शनार्थम् । अस्तमयसमयमरण्ये संभावयेत् । एवंग्रामे नाभ्युदियादुदियोपि सूर्यस्य यथारण्यस्थस्य ब्रह्मचारिणोभवति तथा कुर्यात् । एनंप्रकृतंब्रह्मचारिणम् । अन्येतु ग्रामशब्दंग्राम्येषु धर्मेषु स्वापादिषु वर्तमानंननिम्लोचेदित्येवमर्थंवर्णयन्ति तथा च उत्तरत्र शयानमित्याह ततोयंसंध्ययोः स्वप्नप्रतिषेधो नारण्ये तत्कालावस्थानंबल्मेहि ब्रह्मचारी बिभीयात् गौतमेन तु बहिः संध्यत्वंपरतोगोदानादुक्तंगोदानव्रतंच षोडशवर्षे तदा च ग्रामःशक्नोत्यरण्ये संध्यामुपासितुम् ॥ २१९ ॥

(२) सर्वज्ञनारायणः। मुण्डःमुण्डितसर्वकेशः। जटिलोजटीकृतसर्वकेशः। शिखाजटः शिखामात्रंजटीकृतमन्यन्मुण्डितमित्यर्थः। एवंब्रह्मचारिणं अभिमुखीकृत्यग्रामे न निम्लोचेदस्तमियात् सन्ध्यार्थमरण्यंगतएवास्मिन्नस्तमियादित्यर्थः। एवंनाभ्युदियादित्यपि ॥ २१९ ॥

(३) कुल्लूकः। ब्रह्मचारिणः प्रकारत्रयमाह। मुण्डितमस्तकःशिरःकेशोजटावान्वाशिखैव वा जटा जाता यस्य वापरे शिरःकेशामुण्डिताःतथा वा भवेत्। एनंब्रह्मचारिणंकचिद्ग्रामे निद्राणमुत्तरत्र शयनमिति दर्शनात्सूर्योनाभिनिम्लोचेन्नास्तमियात् ॥ २१९ ॥

(४) राघवानन्दः। किंचान्यतमुण्डइति। मुण्डःकेशरहितमस्तकः यत्र बाणाःसंपतन्ति कुमाराविशिखाइवेत्युक्तेः। जटिलःजटायुक्तः। शिखाजटःशिखामात्रंजटायस्यसइति। शाखाभेदेन नैनमिति। ग्रामइत्युपलक्षणंनगरादेर्वसत्यनुकूलत्वात्। एनंब्रह्मचारिणंशयानमभिलक्षीकृत्य निम्लोचेदस्तंगच्छेत्तथा नोदियादुदयंनासादयेत्सूर्यः ॥ २१९ ॥

(५) नन्दनः। नियमान्तरमाह मुण्डोवेति। ग्रामशब्देनलौकिकंकर्मलक्ष्यते। तत्रसक्तमेनंतत्रसक्तेऽस्मिन्ब्रह्मचारिणि निम्लोचेदस्तमियात्। कचिदाश्रमान्तरेऽपि ॥ २१९ ॥

(६) रामचन्द्रः। युग्यं मुण्डइति। ग्रामे ग्राममध्ये एनंब्रह्मचारिणं अभिलक्ष्यसूर्यःन निम्लोचेत् नास्तंगच्छेदित्यर्थः। क्वचित् न अभ्युदयात् नोत्तिष्ठेत् ॥ २१९ ॥

तंचेदभ्युदियात्सूर्यःशयानंकामचारतः ॥ निम्लोचेद्वाप्यविज्ञानाज्जपन्नुपवसेद्दिनम् ॥ २२०॥

(१) मेधातिथिः। अत्रेदंप्रायश्चित्तंचरेत्। ब्रह्मचारिणंशयानंनिद्रावगतमभ्युदियात्त्वेनोदयेनाभिध्यामदोषंकुर्यात्। प्रातरतिक्रमे दिनंजपोपवासौ रात्रौ तु भोजनं पश्चिमातिक्रमे तु रात्रौ जपोपवासौ प्रातर्भोजनमिति। दिनशब्दः प्रदर्शनार्थः। गौतमवचनंचाप्युदाहरन्ति तिष्ठेदहरभुञ्जानोभ्यस्तमितश्च रात्रिंजपन्सावित्रीमिति तदयुक्तम्। उभयथापि दिवैव प्रायश्चित्तंयुक्तंदिनशब्दस्य प्रदर्शनार्थत्वे प्रमाणाभावात्। नह्यस्य तत्सापेक्षस्य स्वार्थप्रतिपादनं निरपेक्षंचैतत्तस्माद्विकल्पोयुक्तः। तत्र यस्य सर्वांरात्रिंजाग्रतोन व्याधिः प्रवर्तते सरात्रौ जपिष्यति अन्यस्तु दिवैव। जपश्च गौतमवचनात्सावित्र्या एव। नन्वत्र कथंगौतमः प्रमाणीक्रियते। उच्यते सापेक्षमिदंवाक्यंजपेदिति। जपनीयस्यानिर्देशात्सत्यामपेक्षायां श्रुत्यन्तराद्युक्ताविशेषावगतिः। इहतु कालस्य निर्देशोनास्ति कालान्तरंप्रत्यपेक्षेति न गौतमोपेक्षते अथवा संध्यातिक्रमे प्रायश्चिताभिधानात्सावित्रीजपःसिद्धएव। युक्तंच सावित्र्यास्तु परंनास्तीति कामकारतःज्ञात्वैव संध्याकाले यः स्वपित्यज्ञानाच्चिरसुप्तस्य संध्याकालोयंवर्ततइत्यनवबोधोऽविज्ञानम्। एतदुक्तंभवति इच्छया प्रमादकृते चातिक्रमेण तदेव प्रायश्चित्तंयः पुनरभ्युदितानस्तमितसंध्यामतिक्रामति तस्य प्रायश्चित्तमभोजनंनित्यानांकर्मणांसमतिक्रमइति। अथवा यः कामकारेण शास्त्रातिक्रमणंकरोति तस्य तदविज्ञानमेव ॥२२० ॥

(२) सर्वज्ञनारायणः। शयानमित्यकृतसन्ध्यतामुपलक्षयति। कामकारतोज्ञानेनकामनया वा अविज्ञानादकामतश्चेत्यपि तेन ज्ञानतोऽज्ञानतोवा एतदेव प्रायश्चित्तमित्यर्थः। जपन्नित्यप्रानादेशे तु सावित्रीतिसावित्र्येव जप्या। अभ्युदितोदिनमभिनिर्मुक्तोरात्रिमिति विवेकः। अभ्युदितोहरभुञ्जानो अभ्यस्तमितश्चरात्रिं जपन्सावित्रीमिति स्मृतेः ॥ २२० ॥

(३) कुल्लूकः। अत्र प्रायश्चित्तमाह तंचेदिति। तंचेत्कामतोनिद्राणंनिद्रोपवशत्वेन सूर्योऽभ्युदियादस्तमियात्तदा सावित्रींजपन्नुभयत्रापि दिनमुपवसन्रात्रौ भुञ्जीत। अभिनिर्मुक्तस्योत्तरेऽहन्युपवासजपौ। अभिरभागइति कर्मप्रवच-

नीयसंज्ञा। ततःकर्मप्रवचनीययुक्तेद्वितीया । साविन्नीजपंतु गोतमवचनात्। तदाह गोतमः सूर्याभ्युदितोब्रह्मचारी तिष्ठे-दहरभुञ्जानोऽभ्यस्तमितश्च रात्रिंजपन्सावित्रीम्। ननु गोतमवचनात्सूर्याभ्युदितस्यैवदिनाभोजनजपावुक्तौअभ्यस्तमित-स्य तु राज्यभोजनजपौ। नैतत् अपेक्षायांव्याख्यासंदेहे वा मुन्यन्तरविवृतमन्वर्थमन्वयमाह । नतु स्फुटंमन्वर्थंस्मृत्य-न्तरदर्शनादन्यथाकुर्मः। अतएव जपापेक्षायांगोतमवचनात्साविन्नीजपोभ्युपेयएव। नतूभयत्र स्फुटंमनूक्तंदिनोपवासजपाव-पाकुर्मः। तस्मादभ्यस्तमितस्य मानवगोतमीयप्रायश्चित्तविकल्पः ॥ २२० ॥

(४) राघवानन्दः। दैवाद्यद्येवंस्यात्तत्राह। तंचेति। कामकारतोऽनातुरत्वात् इच्छया शयानं जपन्सावित्रीमिति-शेषः। उपवसेद्दिनमिति अभ्युदितेअहरभोजनंरात्रौ भुक्तिः अस्तमिते तु रात्रौ जपःसूर्योदयपर्यंतंसूर्याभ्युदितोब्रह्मचारीतिष्ठे-ददहरभुञ्जानोऽस्तमितश्च रात्रिंजपन्सावित्रीमिति गौतमवचनात् । उपोषणं सज्योतिःपरं नासायमुपवसेदितिविधि-स्मरणात् ॥ २२० ॥

(५) नन्दनः। अवज्ञानाज्ज्ञात्वोपेक्षणात्। एवंवचनादशक्त्यज्ञानादिषुप्रायश्चिताभावः सूचितः ॥ २२० ॥

(६) रामचन्द्रः। तत्राहतमिति। तंब्रह्मचारिणंशयानं कामकारतः इच्छातःसूर्यश्चेदभ्युदियात् उदयेत तंशयानं-सूर्यः निम्लोचेद स्तंगच्छेत् अविज्ञानात् जपन् गायत्रींजपन् दिनंदिवसं उपवसेत् ॥ २२० ॥

सूर्येण ह्यभिनिर्मुक्तःशयानोभ्युदितश्च यः ॥ प्रायश्चित्तमकुर्वाणोयुक्तः स्यान्महतैनसा ॥ २२१॥

(१) मेधातिथिः। पूर्वप्रायश्चित्तविधेरयमर्थवादः । निम्लोचनेनाभिदुष्टः अभिनिम्लुक्तः। एवमभ्युदितः प्राय-श्चित्तंपूर्वोक्तंनकरोति तदा महता पापेन संबध्यते न स्वल्पेन। नरकादिदुःखोपभोगनिमित्तमदृष्टपापमुच्यते ॥ २२१ ॥

(२) सर्वज्ञनारायणः। महतैनसाव्रतवैगुण्यकारिणा ॥ २२१ ॥

(३) कुल्लूकः। अस्य तु प्रायश्चित्तविधेरर्थवाद माह सूर्येणेति। यस्मात्सूर्येणाभिनिर्मुक्तोऽभ्युदितश्च निद्राणः प्राय-श्चित्तमकुर्वन्महता पापेन युक्तोनरकंगच्छति। तस्माद्यथोक्तप्रायश्चित्तंकुर्यात् ॥ २२१ ॥

(४) राघवानन्दः। तदकरणे दोषमाह। सूर्येणेति । हि यतोब्रह्मचारी भूत्वा शयानएव सूर्येणाभिनिर्मुक्तस्त्यक्तः-विहाय सूर्योस्तंगतइति तथासूर्येणोदयतअभितःशयानंउदितःउदयेन व्याप्तः ब्रह्मचारीशयानस्य यस्य सूर्यरश्मिनासंयोग-वियोगौ स्तइति भावः। सचेदुक्तप्रायश्चित्तमकुर्वाणएवंतिष्ठेदेनसा पापेन महतायुक्तःस्यादिति पूर्वपापस्यावश्यफलभा-गिति ॥ २२१ ॥

(५) नन्दनः। अवश्यकर्तव्यतामस्यप्रायश्चित्तस्याह सूर्येणेति ॥ २२१ ॥

(६) रामचन्द्रः । सूर्येण सह शयानःअभिनिर्मुक्तः सूर्यः अस्तंगतःशयानःसन् अभ्युदितःउदितःभवेत्तदाप्राय-श्चित्तंअकुर्वाणः महतैनसा पापेन युक्तःस्यात् ॥ २२१ ॥

आचम्य प्रयतोनित्यमुभे संध्ये समाहितः ॥ शुचौ देशे जपञ्जप्यमुपासीत यथाविधि ॥ २२२ ॥

(१) मेधातिथिः । एवंमहान्दोषोऽभ्युदयनिम्लोचनयोस्तस्मादाचम्य प्रयतस्तत्परः समाहितः परिहृतचित्त-तत्कर्माविक्षेपः शुचौ देशे जपञ्जप्यंप्रणवव्याहृतिसाविञ्याख्यमुपासीत। उभे संध्येसंध्ययोरेवात्रोपास्यत्वमुपासनंच तत्र भावविशेषः। अथवोभे संध्ये प्रत्युपासीत भगवन्तंसवितारंमन्त्रोहितदेवत्योऽतस्तमेवोपासीत। संहृतसकलविकल्पस्तद्गतैक-मना भवेत्। प्रागुक्तस्यविधेः शेषोऽनुवादः उपासनंकेवलंविधेयम्। अन्ये तु शुचौ देशइत्येतद्विध्यर्थोयंश्लोकइत्याहुस्तेषां-पौनरुक्त्यम्। सर्वस्यैव कर्तव्यस्य शुचिना कर्मकर्तव्यमिति विहितमशुचिदेशसंबन्धेच का शुचिता ॥ २२२ ॥

(२) सर्वज्ञनारायणः । प्रयतः शुचिः सन्ध्येउपासीत सेवेत । प्रयतत्वंशुचिदेशवित्यर्थं विहितसन्ध्योपासना नुवादः ॥ २२२ ॥

(३) कुल्लूकः । यस्मादुक्तप्रकारेण संध्यातिक्रमे महत्पापमतः आचम्येति । आचम्य पवित्रोनित्यमनन्यमनाः शुचिदेशे सावित्रींजपन्नुभे सन्ध्ये त्रिधिवदुपासीत ॥ २२२ ॥

(४) राघवानन्दः । यतःशयानस्य महत्पापवत्वे संन्ध्याकरणमेव हेतुरतआह आचम्येति । जप्यंगायत्र्याख्यं-विधिवदुपासीत । तद्देवतामित्यर्थः ॥ २२२ ॥

(५) नन्दनः । अथोक्तमपिसंध्याकृत्यमादरार्थंप्रसङ्गादाह आचम्येति । नित्यमाश्रमान्तरेऽपि । यथाविधिप्रात-स्तिष्ठेत्सायमासीतेति ॥ २२२ ॥

यदि स्त्री यद्यवरजः श्रेयःकिंचित्समाचरेत् ॥ तत्सर्वमाचरेद्युक्तोयत्र वास्य रमेन्मनः ॥ २२३ ॥

(१) मेधातिथिः । यदि स्त्रीआचार्यानी अवरजः कनीयानाचार्यादुपलभ्य श्रेयोकर्मादिना त्रिवर्गसमाचरेत्तत्सर्व-माचरेत् । संभवति हि तयोस्तदाचार्यसंपर्कात्परिज्ञानम् । शूद्रोवाऽऽचारजनक अवरजः सयद्युपदिशेदेवं पायुलिङ्गौमृद्वारिणा प्रक्षाल्येते निपुणौ हस्तौ प्रक्षाल्य विस्मृतस्ते मृद्वारिक्रमः स्त्वदीयआचार्योसकृन्मया पायुप्रक्षालने जलंददता दृष्टपूर्वः मृ-द्भिः शौचंकरोति ततोमृद्भिरित्येवमादिसमाचरेत्समाचाराद्युत्पाद्योपदिशेत् । तथा चाचार्यानी आचमनंशिक्षयेत्तत्सर्वमाचरेद्यु क्तः श्रद्धया न स्त्रीशूद्राचरितमित्यवजानीतः । समाचरेदिति च समाचारपूर्वकउपदेशएवात्राभिप्रेतः । वक्ष्यति च धर्मशौचं-समयानि सर्वतइति । आचार्येणैव कदाचिदादिष्टंभवति ब्राह्मणि आचमय पुत्रस्थानीयमेतंतथा विधिपूर्वंच ब्रूयादस्य मूत्र-पुरीषशुध्यर्थंमृद्वारिणी देये इति तत्र तदीय वचनमनुष्ठेयमेवंमृदोगृहाणएवमद्भिः प्रक्षालयेदिति । अथवा गुरुगृहाल्लोहोपल-जलशुद्ध्यादिः स्त्रीशूद्राभ्यां समाचार्यमाणः प्रमाणीकर्तव्यः एतावदाचारस्य स्त्रीशूद्रसंबन्धिनः प्रामाण्यार्थोयंश्लोकोयु-ज्यते । ननु सर्वस्याचारस्यावेदवित्संबन्धिनः प्रामाण्यंघटते अयुक्तमेतन्नहि स्वल्पोप्याचार अवेदविदांप्रमाणीभवति । अ-थास्ति मूलंवेदवित्संबन्धः एवंतर्हि प्रमाणंशूद्रग्रहणे न । नचैवंविधे विषये स्त्रीशूद्राचारस्य प्रामाण्यमभिप्रेतम् । तथा हि सतिप्रामाण्याभिधानप्रकरणएवावक्ष्यत् । तस्माच्छ्रेयः पदार्थनिरूपणार्थोयमुपोद्घातइति परमार्थः । यद्वाचार्यवचसांप्रामा-ण्यानुवादोयम् । स्त्रीशूद्रावपि ब्रूयातांतदप्यनुष्ठातुंयुक्तं किंपुनराचार्योपदिष्टम् । यत्र चास्यरमेत्परितुष्येन्मन एतदप्यात्मन-स्तुष्टिरित्यत्र व्याख्यातम् । सर्वथा नास्य श्लोकस्यातीव प्रयोजनमस्ति ॥ २२३ ॥

(२) सर्वज्ञनारायणः । अवरजःशूद्रः । श्रेयः साधनं श्रुतिस्मृत्यविरुद्धंयदाचरेत् तत्स्वयंप्रयत्नवानाचरेत् । तथा धर्मसाधनत्वेन पौरुषेयवाक्यादवगते यात्राविरुद्धस्य कर्तुंमनोरतिः ॥ २२३ ॥

(३) कुल्लूकः । यदि स्त्रीशूद्रोवा किंचिच्छ्रेयोऽनुतिष्ठति तत्सर्वंयुक्तोऽनुतिष्ठेत् । यत्र च शास्त्रानिषिद्धे मनोऽस्य तुष्यति तदपि कुर्यात् ॥ २२३ ॥

(४) राघवानन्दः । शास्त्राविरुद्धस्त्रीबालाद्याचरितंदृष्टादृष्टश्रेयःसाधनमप्याचरणीयमित्याह यदीति । अवरजःकनी-यानिति मेधातिथिः । तत्र स्त्रीसमभिव्याहारात् शूद्रःशास्त्राविरुद्धे कर्मणि रमेत्तोषमागच्छेत् ॥ २२३ ॥

(५) नन्दनः । शास्त्राविरुद्धमनुपदिष्टम पिश्रेयोलोकप्रसिद्धमाचरितव्यमित्याह यदिस्त्रीति । अवरजः शूद्रः । यत्र वास्य रमेन्मनः सर्वमाचरितुमशक्तोयत्रास्यमनसीरतिरस्तितदाचरेत् ॥ २२३ ॥

(६) **रामचन्द्रः** । यदि स्त्री श्रेयःधर्मं किंचित्समाचरेत् तद्धर्मसर्वयुक्तःसन् आचरेत् स्वयंयदि । अवरजः लघुः किंचित् श्रेयः धर्मसमाचरेत् तत् आचरेत् यत्रयस्मिन्धर्मे मनः रमेततं धर्मं समाचरेद्वा ॥ २२३ ॥

धर्मार्थावुच्यते श्रेयः कामार्थौ धर्मएव च ॥ अर्थएवेह वा श्रेयस्त्रिवर्गइति तु स्थितिः ॥ २२४ ॥

(१) **मेधातिथिः** । यत्नशस्यंयदाचर्यमाणंदृष्टादृष्टे नोपहन्ति यच्छ्रेयोलोकउच्यते किंपुनस्तदिति सुहृद्भूत्वान्वाचष्टे । नायंवेदमूलोर्थो नाचार्यादिशब्दवत्पदार्थ कथनम् । किंतर्हि श्रेयोर्थी सर्वःपुरुषः प्रवर्तते । तत्रेदमुच्यते । इदंश्रेयः-एतदर्थंयत्नः कर्तव्यः । तत्रमतान्तराणि तावदुपन्यस्यति । केषांचिन्मतं धर्मार्थौश्रेयः । धर्मःशास्त्रविहितौ विधिप्रतिषेधौ । अर्थोगोभूमिहिरण्यादिः । एतदेवश्रेयः एतदधीनत्वात्पुरुषप्रीतेः । अपरंमतं कामार्थाविति । कामस्तावन्मुख्यएव पुरुषार्थः प्रीतिरूपत्वात् । पुरुषप्रीतिर्हि श्रेयः अर्थोपि तत्साधनत्वात् । एवंहि चार्वाकाआहुः कामएवैकः पुरुषार्थस्तस्य साधनमर्थः धर्मोपि यद्यस्ति धर्मएव सर्वेभ्यः श्रेयान्सर्वस्य तन्मूलत्वाच्च । उक्तंच धर्मादर्थश्चकामश्चेति । अर्थतएव वणिजः प्रयोगजीविनः । सिद्धान्तस्तु त्रिवर्गइति तुस्थितिः । अतोधर्माविरोधिनावर्थकामावपि सेवितव्यौ न तद्विरोधिनौ । तथा चगौतमः । न पूर्वाह्णमध्यंदिनापराह्णानफलान्कुर्यात् यथा शक्तिधर्मार्थकामैरिति । त्र्यात्मकोवर्गस्त्रिवर्गः त्रिषु समुदितेष्वयंरूढः ॥ २२४ ॥

(२) **सर्वज्ञनारायणः** । अत्र प्रसंगेन पुरुषार्थनिरूपयति धर्मार्थाविति । धर्मार्थयोरेव प्रयत्नसंभवात् । धर्मस्याप्यर्थद्वारा कामहेतुत्वेनैवोपादेयत्वं । तेन कामस्ततः साक्षात् न हेतुरर्थश्च हेतुरित्यन्ये धर्मस्य सर्वमूलत्वात् धर्मएवेत्यन्ये । इह लोकेर्थएव कामहेतुतया श्रेयानित्यन्ये स्वमतमाह । त्रिवर्गइति । अन्योन्यवादिकथितयुक्तिभिस्त्रयाणांपुरुषार्थां नांवर्गः समूहः श्रेयः मोक्षार्थिनोविरलप्रचारत्वेनात्रमोक्षोनगणितः ॥ २२४ ॥

(३) **कुल्लूकः** । श्रेयएवहि धर्मार्थौ* तद्दर्शयति धर्मार्थाविति । धर्मार्थौ श्रेयोऽभिधीयते कामहेतुत्वादिति केचिदाचार्यामन्यन्ते अन्ये त्वर्थकामौ सुखहेतुत्वाच्छ्रेयोऽभिधीयते । धर्मएवेत्यपरे अर्थकामयोरप्युपायत्वात् । अर्थएवेहलोके श्रेयइत्यन्ये धर्मकामयोरपि साधनत्वात् । संप्रतिस्वमतमाह । धर्मार्थकामात्मकः परस्पराविरुद्धस्त्रिवर्गएव पुरुषार्थतया श्रेयइति विनिश्चयः । एवंच बुभुक्षून्प्रत्युपदेशोन मुमुक्षून्मुमुक्षूणांतु मोक्षएव श्रेयइति षष्ठे वक्ष्यते ॥ २२४ ॥

(४) **राघवानन्दः** । तत्र किंश्रेयइत्यपेक्षायांमतभेदेन पूरयति धर्मेति । स्थितिःशास्त्रमर्यादा मोक्षरूपश्रेयसावेक्ष्यमाणत्वात् । श्रेयःसोपाधिकसुखं तदुपायौधर्मार्थाविति केचित् । कामार्थावित्यपरे कामःशब्दादिविषयोः अर्थोधनमिति तद्द्वयंश्रेयइति केचित् धर्मःपारत्रिकसुखोपायः ऐहिकसुखोपायोऽर्थःश्रेयःस्वमतंतु श्रेयोधर्मार्थकामात्मकस्त्रिवर्गइति ॥ २२४॥

(५) **नन्दनः** । पुनरत्र श्रेयः शब्देनविवक्षितोऽर्थइत्यत्राह धर्मार्थाविति । कैश्चिद्धर्मार्थौश्रेयउच्येते कैश्चित्कामार्थौ कैश्चिधर्मएव कैश्चिदर्थएव । परस्पराविरुद्धस्त्रिवर्गः । स्थितिः सिद्धान्तः । विरोधेतुल्यबलाबलंवक्ष्यति । कामएवश्रेयोधर्मकामौवाश्रेयइतिसंभवतोरपि पक्षयोर्हेयत्वमनुपन्यासादेवसूचितम् ॥ २२४ ॥

(६) **रामचन्द्रः** । धर्मार्थौ श्रेयःउच्यते । कस्यचिन्मते यदा कामार्थौ धर्मएव वा कस्य चिन्मते अर्थ इव इह भवेत् श्रेयः इति त्रिवर्गस्थितिः ॥ २२४ ॥

---

* हिधर्मार्थौ=किम् (अ)

आचार्यश्च पिताचैव माता भ्राता च पूर्वजः ॥ नार्त्तेनाप्यवमन्तव्याब्राह्मणेन विशेषतः ॥२२५॥

(१) मेधातिथिः । अन्योपि न कश्चिदवमन्तव्यः एते पुनर्विशेषतः प्रायश्चित्ताधिक्यमत्रेत्यर्थः । आर्त्तेनतैः पीडितेनाप्यवमानमवज्ञा प्राप्तायाः पूजायाअकरणंन्यक्कारश्चानादराख्यः । ब्राह्मणग्रहणंपूरणार्थम् ॥ २२५ ॥

(२) सर्वज्ञनारायणः आर्तेन तैःपीडितेन ॥ २२५ ॥

(३) कुल्लूकः । आचार्योजनकोजननी च भ्राता च सगर्भोज्येष्ठः पीडितेनाप्यमी नावमाननीयाःविशेषतोब्राह्मणेन यस्मात् ॥ २२५ ॥

(४) राघवानन्दः । आचार्यादीनामनवज्ञाशुश्रूषयोरावश्यकत्वंविदधत्तानब्रह्मदृष्टिरुत्कर्षादितिन्यायेन देवतालोकाप्तिरष्यामहीकर्तुमनुवदति । आचार्यश्चेत्यष्टभिः । आचार्यादिषु ब्रह्मदृष्टिःकार्या तेषामुत्कर्षावास्यैइति न्यायार्थः ॥२२५॥

(५) नन्दनः । अत्रहेतुमाह आचार्यइति । ब्रह्मणोवेदस्य मूर्तिराधाराधेययोरपिनाभावसामान्यात् ॥ २२५ ॥

(६) रामचन्द्रः । एते आचार्यादयःआर्तेनापि पुंसा नावमन्तव्याः न तिरस्कारणीयाः ब्राह्मणेन विशेषतः नावमन्तव्याः ॥ २२५ ॥

आचार्योब्रह्मणोमूर्तिःपितामूर्तिःप्रजापतेः॥ माता पृथिव्यामूर्तिस्तुभ्रातास्वोमूर्तिरात्मनः ॥ २२६ ॥

(१) मेधातिथिः । पूर्वस्यायमर्थवादः । यत्परब्रह्मवेदान्तोपनिषत्प्रसिद्धंतस्याचार्योमूर्तिः शरीरंमूर्तिरिव मूर्तिः प्रजापतेर्हिरण्यगर्भस्य पिता येयंपृथिवीसैव माता भारसहत्वसामान्यात् । भ्राता च स्वः सोदर्यः । आत्मनः क्षेत्रज्ञस्येति प्रशंसा । एते सर्वदेवतारूपाः महत्त्वयुक्ताअवमताघ्नन्ति प्रसादिताअभिप्रेतैः कामैर्योजयन्ति । एवंतत्समाआचार्यादयइति स्तुतिः ॥ २२६ ॥

(२) सर्वज्ञनारायणः । ब्रह्मणः हिरण्यगर्भस्य मूर्तिर्देहान्तरम् । वेदोपदेशकत्वसाम्यात् । प्रजापतेर्मनोःसृष्टिकर्तृत्वसाम्यात् । पृथिव्यामूर्तिः आधारत्वसाम्यात् । भ्राता स्वःसोदरः आत्मनोमूर्तिरेकसृष्टत्वात् ॥ २२६ ॥

(३) कुल्लूकः । आचार्योवेदान्तोदितस्य ब्रह्मणः परमात्मनोमूर्तिः शरीरं पिता हिरण्यगर्भस्य माता च धारणात्पृथिवी मूर्ति भ्राता च स्वः सगर्भः क्षेत्रज्ञस्य तस्माद्देवतारूपाएतानावमन्तव्याः ॥ २२६ ॥

(४) राघवानन्दः । तत्र कःकस्य मूर्तिरित्यपेक्षांपूरयति । आचार्यइति । ब्रह्मणःपरमात्मनोमूर्तिर्मूर्च्छितावयवतयाशरीरंप्रजापतेर्हिरण्यगर्भस्य । अथवा ब्रह्मणोहिरण्यगर्भस्य प्रजापतेर्विराजः । मातुरिवपृथिव्याधारकत्वादात्मनःक्षेत्रज्ञस्य स्वासमार्गेभषु ॥ २२६ ॥

(५) नन्दनः । नियमान्तरमाह आचार्यश्चेति ॥ २२६ ॥

(६) रामचन्द्रः । आचार्यःब्राह्मणःपरमात्मनःमूर्तिर्वावेदस्य मूर्तिर्वा ज्ञेयःप्रजापतेःहिरण्यगर्भस्य परमेष्ठिनःमूर्तिः भ्राता स्वमूर्तिः आत्मनःमूर्तिःज्ञेया ॥ २२६ ॥

यंमातापितरौ क्लेशंसहेते संभवे नृणाम् ॥ न तस्य निष्कृतिःशक्या कर्तुंवर्षशतैरपि ॥ २२७ ॥

(१) मेधातिथिः । भूतार्थानुवादेनेयमपराप्रशंसा । क्लेशंदुःखंमाता च पिता च नृणामपत्यानांसंभवे गर्भात्प्रभृति यावद्दशमाद्वर्षात् । मातुः क्लेशः गर्भधारणंप्रसवः प्राणहरःस्त्रीणां जातस्य च संवरणयोगःक्लेशः ससर्वस्य स्वयंसंवेद्यः

पितुरप्युपनयनात्प्रभृत्यावेदार्थव्याख्यानात् । संभवशब्देनात्र गर्भाधानमुच्यते तद्विनक्लेशावहंकिंतर्हि तदुत्तरकालभाविन्यएताः क्रियास्ताहि क्लेशसाध्याः । न तस्य क्लेशस्य निष्कृतिरानृण्यंप्रत्युपकारसमत्वंशक्यंकर्तुंवर्षशतैर्जन्मभिर्बहुभिः किंपुनरेकेन जन्मना । असंख्यधनदानेन महत्या वापदउद्धरणेन मातापित्रोर्निष्कृतिरिति ॥ २२७ ॥

(२) सर्वज्ञनारायणः । प्रत्युपकारार्थंबुत्थ्यापि मातापित्रोरतिशयेन हितंकार्यमित्याह यमिति । संभवे जन्मनिसति । तत्पोषणादिना निष्कृतिः कृतप्रकृतिः ॥ २२७ ॥

(३) कुल्लूकः । नृणामपत्यानांसंभवे गर्भाधाने सत्यनन्तरंयंक्लेशंमातापितरौ सहेते तस्य वर्षशतैरप्यनेकैरपि जन्मभिरानृण्यंकर्तुमशक्यम् । मातुस्तावत्कुक्षौ धारणदुःखंप्रसववेदनातिशयोजातस्य रक्षणवर्धनकष्टंच पितुरधिकान्येवरक्षासंवर्धनदुःखमुपनयनात्प्रभृतिवेदतदङ्गाध्यापनादि क्लेशातिशयइति सर्वसिद्धंतस्मात् ॥ २२७ ॥

(४) राघवानन्दः । मातापित्रोःक्लेशंस्मारयन्तयोःशुश्रूषादरमाह । यमिति पितुरपिगर्भाधानसंस्कृतिपोषणाद्यैः क्लेशोस्तीति वभावनीयम् । सम्यक्लोक्यतापर्यंत पुत्रमनुशिष्टंलोक्यमिति श्रुतेःनिष्कृतिरानृण्यं ॥ २२७ ॥

(५) नन्दनः । मातापित्रोर्विशेषमाह यंमातेति । संभवेवृद्धौ । नृणांपुत्राणाम् । निष्कृतिः प्रत्युपकारः ॥ २२७ ॥

(६) रामचन्द्रः । सम्भवे उत्पत्तौ ॥ २२७ ॥

तयोर्नित्यंप्रियंकुर्यादाचार्यस्य च सर्वदा ॥ तेष्वेव त्रिषु तुष्टेषु तपःसर्वंसमाप्यते ॥ २२८ ॥

(१) मेधातिथिः । तस्मात्तयोर्मातापित्रोराचार्यस्य च सर्वदा यावज्जीवंयत्प्रियंतेषांतत्कुर्यान्नसकृद्द्विस्त्रिर्वा कृत्वा कृती भवेत् । तेष्वेवाचार्यादिषुत्रिषु पुरुषेषु भक्त्याराधितेषु तपः सर्वंबहून्वर्षगणांश्चान्द्रायणादितपस्तप्त्वा यत्फलंप्राप्यते तत्तत्परितोषादेव लभ्यतइति ॥ २२८ ॥

(२) सर्वज्ञनारायणः । एतत्तुकर्तव्यमित्याह तयोरिति । आचार्यस्य चाध्यापनोपकारनिष्कृत्यर्थम् । चकाराद्भ्रातुरपि ज्येष्ठस्यात्मतुल्यत्वात् । तेषुहि त्रिष्विति । त्रयाणामवश्याराध्यत्वात्तपः सम्यक्समाप्यते तच्छुश्रूषायाएव सर्वातशायिरूपत्वात् ॥ २२८ ॥

(३) कुल्लूकः । तयोर्मातापित्रोः प्रत्यहमाचार्यस्य च सर्वदाप्रीतिमुत्पादयेत् । यस्मात्तेष्वेव त्रिषु प्रीतेषु सर्वंतपश्चान्द्रायणादिकं फलद्वारेण सम्यक्समाप्यते । मात्रादित्रयतुष्ट्यैव सर्वस्य तपसःफलंप्राप्यतइत्यादि ॥ २२८ ॥

(४) राघवानन्दः । आचार्यस्यानन्यशरणत्वे तयोरिव तद्वरणीयतामाह आचार्यस्येति । त्रिषु मातृपित्राचार्येषु । तपःसर्वमिति तपःकृच्छ्रचान्द्रायणादि क्लेशाव योवा शुश्रूषुरिति शेषः तस्य सर्वंतपःसाध्यत्वात् ॥ २२८ ॥

(५) नन्दनः । यतएवंतस्मात्तयोर्नित्यंप्रियंकुर्यादिति । नित्यंयावज्जीवम् । सर्वदाऽऽपद्यपि । हिहेतौ । सर्वंसर्वाश्रमसाध्यम् ॥ २२८ ॥

(६) रामचन्द्रः । तयोः पित्रोः प्रियं नित्यं कुर्यात् । चकारात् ज्येष्ठमातुःच पुनःआचार्यस्य प्रियंसर्वदा । तेष्वेव त्रिषु मातृपित्राचार्येषु त्रिषु तुष्टेषु सत्सु सर्वंपूर्णं । तपःसमाप्यते ॥ २२८ ॥

तेषांत्रयाणांशुश्रूषा परमंतपउच्यते ॥ न तैरभ्यननुज्ञातोधर्ममन्यंसमाचरेत् ॥ २२९ ॥

(१) मेधातिथिः । कथंपुनस्तपः फलमतपसा मात्रादिशुश्रूषया एतच्च सर्वोत्तमंतपोयत्तेषांपादसेवनंतैरननुज्ञातो-

---

(२२९) नतैरभ्यननुज्ञातो=नैतंरनभ्यनुज्ञातो (न, ब, भ, य, र, ल) ।

माणवकः धर्ममन्यंतत्सेव विरोधिनंतीर्थस्नानादिरूपंव्रतोपवासादिव शरीरशोषणया तेषांचित्तखेदकरम्। ज्योतिष्टोमानुष्ठानेप्यनुज्ञा ग्रहीतव्या। यत्तेमनःप्रतिषेधकृतो (?) महारम्भेषु चकर्मसु बहुधनव्ययायाससाध्येषु व्यापृच्छय माताच मतंमत्या भवेयुः (?) नित्यकर्माऽनुष्ठानेत्वाज्ञानोकारिणी ॥ २२९ ॥

(२) **सर्वज्ञनारायणः**। यतस्तच्छुश्रूषया परमंतपस्तेषांशुश्रूषाया असंभवएव तैरनुज्ञातोन्यंधर्मंकुर्यात् ॥ २२९ ॥

(३) **कुल्लूकः** । तेषांमातापित्राचार्याणांपरिचर्या सर्वतपोमयंश्रेष्ठमितएवसर्वतपःफलप्राप्तेर्यद्यन्यमपि धर्मंकथंचित्करोति तदप्येतत्त्रयानुमतिव्यतिरेकेण न कुर्यात् ॥ २२९ ॥

(४) **राघवानन्दः**। अननुज्ञातःप्रतिषिद्धः अप्रतिषिद्धंकृत्वा निवेदयेदिति वक्ष्यति ॥ २२९ ॥

(६) **रामचन्द्रः**। तेषांत्रयाणां आचार्यपितृमातॄणांतैस्त्रिभिःअनभ्यनुज्ञातःअन्यंधर्मं न समाचरेत् ॥ २२९ ॥

तएव हि त्रयोलोकास्तएव त्रयआश्रमाः ॥ तएव हि त्रयोवेदास्तएवोक्तास्त्रयोऽग्नयः ॥ २३० ॥

(१) **मेधातिथिः**। कार्यकारणयोरभेदादेवमुच्यते त्रयाणांलोकानांप्राप्तिहेतुत्वात्तएव त्रयोलोकाउच्यन्ते। तएव च त्रयः प्रथमाद्ब्रह्मचर्यादन्ये त्रयआश्रमाः गार्हस्थ्यादिभिस्त्रिभिराश्रमैर्यत्फलंप्राप्यते तत्तैस्त्रिभिस्तुष्टैःतएव त्रयोवेदावेदत्रयजपतुल्यफलत्वात्। तएव त्रयोऽग्नय अग्निसाध्यकर्मानुष्ठानफलावाप्तेस्तच्छुश्रूषातः। एषापि प्रशंसैव ॥ २३० ॥

(२) **सर्वज्ञनारायणः**। त्रयोलोकाः पृथिव्यंतरिक्षब्रह्मलोकाः आश्रमाः ब्रह्मचर्यगार्हस्थ्यवानप्रस्थाख्याः। तत्पालनतुल्यफलत्वात् तच्छुश्रूषायाः एवंवेदत्वाग्नित्वोपचारस्तदध्ययन तदाधानलभ्यकर्मफलस्यैतच्छुश्रूषयासिद्धेः ॥ २३० ॥

(३) **कुल्लूकः**।। यस्मात्तएवमातापित्राचार्यास्त्रयोलोकालोकत्रयप्राप्तिहेतुत्वात्कारणेकार्योपचारः। तएव ब्रह्मचर्यादिभावत्रयरूपाआश्रमागार्हस्थ्याद्याश्रमत्रयप्रदायकत्वात्। तएव त्रयोवेदावेदत्रयजपफलोपायत्वात्। तएव हित्रयोऽग्नयोऽभिहितास्त्रेतासंपाद्ययज्ञादिफलदातृत्वात् ॥ २३० ॥

(४) **राघवानन्दः**। किंच तएवेति। लोकास्तत्र लोकावाप्तिहेतुत्वात् ॥ २३० ॥

(५) **नन्दनः**। तएवत्रयोलोकाअयंलोकोमाताजन्मभूमित्वसामान्यात्। अन्तरिक्षलोकः पिता सेककर्तृत्वसामान्यात्। स्वर्गलोकआचार्यस्तत्प्राप्त्युपायोपदेशकत्वात्। तएव त्रयआश्रमाः। ब्रह्मचर्याश्रमोमातातत्रहिद्वितीयंजन्म। गार्हस्थ्याश्रमः पिता भोगप्रदत्वसामान्यात्। सन्यासाश्रमआचार्योब्रह्मलोकप्रापकत्वसामान्यात्। वानप्रस्थाश्रमस्यतुसदारत्वपक्षेपूर्वाश्रमसाधर्म्याददारत्वपक्षउत्तराश्रमसाधर्म्याच्चोभयोरन्यतरत्रान्तर्भावः। तएवहित्रयोवेदाः। ऋग्वेदोमाताऋचोहि स्त्रियः ताभ्योहिशरीराण्यजायन्तेऋग्भ्योजातांसर्वशोमूर्तिमाहुरितिश्रुतेः। यजुर्वेदः पिता विधायकत्वसामान्यात्। सामवेदआचार्योब्रह्मयोनित्वसामान्यात्। तथाहि श्रूयतेसामवेदोब्राह्मणानांप्रसूतिरिति ॥ २३० ॥

(६) **रामचन्द्रः**। तएव हिआचार्यादयःत्रयोलोकाःत्रिलोकस्वरूपाःपूज्याइत्यर्थः। एवं अग्रेप्यूह्यम् ॥ २३० ॥

पिता वै गार्हपत्योऽग्निर्माताग्निर्दक्षिणःस्मृतः ॥ गुरुराहवनीयस्तु साग्नित्रेता गरीयसी ॥ २३१ ॥

(१) **मेधातिथिः**। केनचित्सामान्येनायंपित्रादीनांगार्हपत्यादिव्यपदेशः।. साग्नित्रेताआधानाग्नित्रेतायागरीयसी महाफला। त्राणंत्राणार्थमितापामात्रेताइति शब्दव्युत्पत्तिः ॥ २३१ ॥

(२) **सर्वज्ञनारायणः**। अत्र त्रयोग्नयइत्येतत्प्रपञ्चयति पितेति। गार्हपत्यः प्राथमिकत्वात् दक्षिणाग्निः पित्राचार्यापेक्षयाल्पोपयोगात् आहवनीयो बहूपयोगत्वात् सैषाग्नित्रेता अन्यस्यारूतायागरीयसीमान्यतमा ॥ २३१ ॥

(३) **कुल्लूकः** । वैशब्दोऽवधारणे । पितैव गार्हपत्योऽग्निः मातादक्षिणाग्निः आचार्यआहवनीयः सेयमग्नित्रेता श्रेष्ठतरास्तुत्यर्थत्वाच्चास्य न वस्तुविरोधोऽत्रभावनीयः ॥ २३१ ॥

(४) **राघवानन्दः** । अग्नयइत्युक्तंतद्व्यनक्ति पितेति । स्तुतिःनिरग्नि कस्या होत्रफलावाप्त्यर्थंवा । सेयमग्नित्रेतागार्हपत्यादित्रितयंगरीयः एवंपिताऋग्वेदो माता यजुर्वेदः आचार्यःसामवेदः ऋग्वेदोगार्हपत्यः पृथिवी ब्रह्मवेत्यादिश्रुतौऋग्वेदगार्हपत्ययोःसाहचर्यात् । ऋग्वेदगार्हपत्याग्न्योर्दृष्टिःपितरिविधीयते । एवंमातरि यजुर्वेददक्षिणाग्न्योः । आचार्ये सामवेदाहवनीययोः ॥ २३१ ॥

(५) **नन्दनः** । तएवांकास्त्रयोऽग्नयइतियदुक्तंतत्रायंविभागक्रमइत्यत्राह पितावाइति । गार्हपत्योऽग्निः पितास्मिंल्लोके भोगप्रदत्वसामान्यात् तथाहिब्राह्मणं त्वदितंतोकायतनयायपितुंपचेति । दक्षिणोऽग्निर्माताअन्नमेवास्मै श्रद्दधतीतिश्रुतेः । आहवनीयआचार्येऽमुष्मिंल्लोकेभोगप्रदत्वसामान्यात् । तथाहिश्रुतिः अमुष्मिन्नाहवनीयइति ॥ २३१ ॥

(६) **रामचन्द्रः** । पिता गार्हपत्याग्निरूपः । माता दक्षिणाग्निरूपा । गुरुः आहवनीयाग्निरूपः । सोऽग्निः अग्नित्रेता त्रयाणांसमूहःत्रेता । गरीयसी पूज्या ॥ २३१ ॥

त्रिष्वप्रमाद्यन्नेतेषु त्रींल्लोकान्विजयेद्गृही ॥ दीप्यमानःस्ववपुषा देववद्दिवि मोदते ॥ २३२ ॥

(१) **मेधातिथिः** । एतेष्वप्रमाद्यन्नाराधनेऽस्खलन् । तथा च तदाराधनात्त्रींल्लोकाञ्जयेत्स्वीकुर्यादाधिपत्यमाप्नुयात् गृही । गृहस्थावस्थस्य हि पुत्रस्यपित्रादीनांतत्कृतमाराधनमुपयुज्यते । तदा हि तौ वृद्धौ भवतः । दीप्यमानःशोभमानः प्रकाशमानोवा स्वेन वपुषा स्वेनैव तेजसा देववदादित्यवद्दिवि लोके मोदते ॥ २३२ ॥

(२) **सर्वज्ञनारायणः** । अप्रमाद्यन्नप्रमत्तः शुश्रूषमाणः । गृही गृहस्थः । अपीत्यध्याहार्यम ॥ २३२ ॥

(३) **कुल्लूकः** । त्रिष्विति । एतेषु त्रिषु प्रमादमकुर्वन्ब्रह्मचारीतावज्जयत्येव । गृहस्थोऽपि त्रींल्लोकान्विजयते संज्ञापूर्वकस्यात्मनेपदविधेरनित्यत्वान्न विपराभ्यांजेरित्यात्मनेपदम । त्रींल्लोकानविजयेदिति त्रिष्वाधिपत्यंप्राप्नोति तथा स्ववपुषा प्रकाशमानःसूर्यादिदेववद्दिवि हृष्टोभवति ॥ २३२ ॥

(४) **राघवानन्दः** । अप्रमाद्यन्निति च्छेदः । दीप्यमानःपरानद्योतयन्निति स्वर्गे ॥ २३२ ॥

(५) **नन्दनः** । नकेवलंब्रह्मचारिणामयंधर्मः किंतूत्तरषोमपीतिप्रदर्शितं गृहीति ॥ २३२ ॥

(६) **रामचन्द्रः** । त्रिषुएतेषु अप्रमाद्यन सावधानतया तिष्ठन् त्रीन् लोकान् गृही सञ्जयेत ॥ २३२ ॥

इमंलोकंमातृभक्त्या पितृभक्त्या तु मध्यमम् ॥ गुरुशुश्रूषया त्वेवंब्रह्मलोकंसमश्नुते ॥ २३३ ॥

(१) **मेधातिथिः** । अयंलोकः पृथिवी भारसहत्वात्तुल्यामातापृथिव्या । पितृभक्त्या । मध्यमोलोकोन्तरिक्षंप्रजापतिः पितोक्तः मध्यमस्थानश्च प्रजापतिर्नैरुक्तानाम् सहि वर्षकर्मणांप्रजानांपाता वा पालयिता वा । ब्रह्मलोकमादित्यलोकम् आदित्योब्रह्मेत्यादेशः लोकः स्थानविशेषस्तमश्नुते प्राप्नोति । अर्थवादाएते तत्र नाभिनिवेष्टव्यम । नच लोकाधिपत्यकामस्य तदाराधनाधिकारः । नायंकाम्योविधिः । पितृत्वमेवात्र निमित्तमकरणे शास्त्रातिक्रमः ॥ २३३ ॥

(२) **सर्वज्ञनारायणः** । मध्यमं भूलोकादूर्ध्वं ब्रह्मलोकादधः ॥ २३३ ॥

---

(२३२) वि=स (ल, र)

(३) **कुल्लूकः** इमंभूर्लोकंमातृभक्त्या पितृभक्त्या मध्यममन्तरिक्षमाचार्यभक्त्या तु हिरण्यगर्भलोकमेव प्राप्नोति ॥ २३३ ॥

(४) **राघवानन्दः** । त्रीनलोकान्विजयेदित्युक्तंकेन कंजयतीत्यपेक्षायामाह इममिति । इमंभूर्लोकंमध्यमंभुवर्लोकं आचार्योब्रह्मलोकेशइत्युक्तेर्ब्रह्मलोकम ॥ २३३ ॥

(६) **रामचन्द्रः** । इममिति इमंलोकंभूर्लोकं मध्यमं स्वर्लोकं गुरुशुश्रूषया ब्रह्मलोकं एवममुना प्रकारेण त्रीन् लोकानसमश्नुते प्राप्नोति ॥ २३३ ॥

सर्वे तस्यादृताधर्मायस्यैते त्रयआदृताः ॥ अनादृतास्तु यस्यैते सर्वास्तस्याफलाःक्रियाः॥२३४॥

(१) **मेधातिथिः** । आदृताः सत्कृताः । आदृतवचनेन प्रत्युपकारपरत्वंलक्ष्यते योह्यादृतोभवति सपरितुष्टःप्रत्युपकाराय यतते । अथवादृतः परितुष्टउच्यते । धर्मस्य चानन्त्यात्परितोषाऽनुपपत्तेः फलदानोत्सुकत्वंलक्ष्यते । सर्वाणि तस्यकर्माण्याशु फलदायीनि भवन्ति । यस्यैते त्रयआदृताः शुश्रूषया परितुष्टाःएतैस्त्वनाराधितैर्यत्फलकामेर्नकिंचित्क्रियते शुभंकर्म तत्सर्वंनिष्फलम् । सर्वाः क्रियाः सर्वाणि श्रौतस्मार्तानि कर्माणि । अर्थवादोयंपुरुषार्थोह्याराधनविधिस्तदतिक्रमे पुरुषः प्रत्यवयन्महता पापेन कर्मोपार्जितेपीष्टफलभोगे प्रतिबध्यते । अतउच्यते सर्वास्तस्या फलाः क्रियाइति ॥ २३४॥

(२) **सर्वज्ञनारायणः** । सर्वेधर्मा यागाद्याः । आदृताः आदरेण कृताः । अफला अल्पफलाः ॥ २३४ ॥

(३) **कुल्लूकः** । यस्यैते त्रयोमातृपित्राचार्यआदृताः सत्कृतास्तस्य सर्वे धर्माः फलदाभवन्ति । यस्यैते त्रयोऽनादृतास्तस्य सर्वाणि श्रौतस्मार्तकर्माणि निष्फलानि भवन्ति ॥ २३४ ॥

(४) **राघवानन्दः** । पुनरपि त्रयाणांशुश्रूषांस्तुतिनिन्दाभ्यांविधत्ते सर्वइति द्वाभ्यां । आदृता आदरेणवृताःस्युः अफलाःक्रियाःतदा चरितंपुण्यमात्रंनिष्फलमित्यर्थः ॥ २३४ ॥

(६) **रामचन्द्रः** । एतेत्रय आचार्यादयःयस्य पुंसः आदृताः मानार्हा भवन्ति तस्य सर्वे धर्माः आदृताभवन्ति तद्यथा तेन पुंसा सर्वे धर्माआदृता इत्यर्थः । यस्य एते त्रयः अनादृताः भवन्ति तस्य सर्वाःक्रियाःअफलाभवन्ति इत्यर्थः ॥ २३४ ॥

यावत्त्रयस्ते जीवेयुस्तावन्नान्यंसमाचरेत् ॥ तेष्वेव नित्यंशुश्रूषांकुर्यात्प्रियहिते रतः ॥२३५॥

(१) **मेधातिथिः** । उक्तार्थोयंश्लोकः । नान्यंसमाचरेद्दृष्टमदृष्टंवा तदनुज्ञानमन्तरेणेत्युक्तम । तेष्वेव नित्यंशुश्रूषांकुर्यात् । प्रियहिते रतः प्रियंच हितंच तदा यत्प्रीतिकरंतत्प्रियंयत्पालनंतद्धितम ॥ २३५ ॥

(२) **सर्वज्ञनारायणः** । नान्यत् तच्छुश्रूषाविरोध्याचरेत् । हितमप्रियमप्युदर्क शुद्धं ॥ २३५ ॥

(३) **कुल्लूकः** । ते त्रयोयावज्जीवन्ति तावदन्यंधर्मंस्वातंत्र्येण नानुतिष्ठेत् । तदनुज्ञया तु धर्मानुष्ठानंप्राग्विहितमेव किंतु तेष्वेव प्रत्यहंप्रियहितपरः शुश्रूषांतदर्थंप्रीतिसाधनं । प्रियंभेषजपानादिवत् । आयत्यामिष्टसाधनंहितम ॥ २३५ ॥

(४) **राघवानन्दः** । प्रियहिते इहप्रीतिसाधनंप्रियं । आयत्यामिष्टसाधनंहितमिति ॥ २३५ ॥

(५) **नन्दनः** । नित्यं यावज्जीवम ॥२३५ ॥

---

(२३५) नान्यं=नान्यत् (ल, र) । (क, ग, घ, च, ख,) एतेषु पुस्तकेषु नान्यं एवोहिपाठः । परंतु नान्यं गृहीत्वा नान्यंसमाश्रयेत् ईदृशःश्लोकः अपेक्षितः । नान्यंसमाचरेत् इत्थं असंगतं इतिभाति ।

(६) रामचन्द्रः । त्रयः यावज्जीवेयुस्तावदन्यधर्मान्न समाचरेत ॥ २३५ ॥

तेषामनुपरोधेन पारत्र्यंयद्यदाचरेत् ॥ तत्तन्निवेदयेत्तेभ्योमनोवचनकर्मभिः ॥ २३६ ॥

(१) मेधातिथिः । परत्र जन्मान्तरे यस्य फलंभुज्यते तत्पारत्र्यम् । छान्दसंरूपमेतत् । शुश्रूषायाअविरोधेनान्यंयंयंधर्मसमाचरेत्तंतंनिवेदयेत्तेभ्यस्तानज्ञापयेत् । अनुपरोधग्रहणमेवमर्थंकृतम् । यत्तेषांविरोधि तत्तैर्नाज्ञापयितव्यम् । कश्चिदजुप्रकृतिरभ्यर्थ्यमानआत्मपरोऽधर्ममवगणय्यानुजानाति तन्निवृत्त्यर्थमेतत् । मनोवचनकर्मभिर्ननिवेदनमदृष्टार्थमपितु यादृशमनुज्ञानंतादृशमेव कर्मणा दर्शयेत् । अथाचैवंसंबन्धः कर्तव्यः मनोवचनकर्मभिः पारत्र्यंयद्यदाचरेत्तत्तन्निवेदयेत्तेभ्य इति ॥ २३६ ॥

• (२) सर्वज्ञनारायणः । तेषा मनुपरोधेन दुःखाजननेन पारत्र्यंपरलोकार्थंनिवेदयेत् तेभ्यःएतत्फलं तेषामस्त्विति मनसा वचनेन च कर्मणा हस्तोदकादिदानेन निवेदयेत् । यद्वा मनोवचनकर्मभिर्यदाचरेदित्यन्वयः । परसंबन्धस्य तथैव सिद्धेः । न त्वत्र निवेदनं ज्ञापनमात्रम् । यत्किंचिद्धर्मसंयुक्तमाचरामि युधिष्ठिर । मातापित्रोर्गुरोश्चैव तत्सर्वंविसृजाम्यहम् ॥ इतीतिहासे दर्शनात् ॥ २३६ ॥

(३) कुल्लूकः । तेषांशुश्रूषायाअविरोधेन तदनुज्ञातोयद्यन्मनोवचनकर्मभिःपरलोकफलंकर्मानुष्ठितंतन्मयैतदनुष्ठितमिति पश्चात्तेभ्योनिवेदयेत् ॥ २३६ ॥

(४) राघवानन्दः । धर्ममाचरेदित्युक्तं अप्रतिषिद्धःसंसन्यदाचरेत् तन्निवेदयेदेवेत्याह तेषामिति । अनुपरोधेनापीडया पारक्यंपरलोकफलकंमनोवचनकर्मभिरित्युभयत्राचरणे निवेदने च संबध्यते ॥ २३६ ॥

(५) नन्दनः । पारत्र्यं परलोकहितम् ॥ २३६ ॥

(६) रामचन्द्रः । तेषांत्रयाणामनुपरोधेन यत्पारत्र्यंपारलौकिकं धर्म तेभ्यःत्रिभ्यः मनोवाक्कायकर्मभिः निवेदयेत् ॥ २३६ ॥

त्रिष्वेतेष्वितिकृत्यंहि पुरुषस्य समाप्यते ॥ एषधर्मःपरःसाक्षादुपधर्मोऽन्यउच्यते ॥ २३७ ॥

(१) मेधातिथिः । इतिशब्दः समाप्तिवचनः कात्स्न्र्यंगमयति । यत्किंचन पुरुषस्य कर्तव्यंयावान्कश्चन पुरुषार्थः सएतेष्वाराधितेषु समाप्यते परिपूर्णमनुष्ठितोभवति । एषधर्मः परः श्रेष्ठः साक्षात्त्वेन । अन्यश्चाग्निहोत्रादिरूपधर्मः प्रतिहारस्थानीयेन साक्षाद्राजवदिति प्रशंसा । अवमान प्रतिषेधः । प्रियहितकरणंतद्विरोधिनः कर्तव्यस्याननुष्ठानमविरोधिनोऽप्यननुज्ञातस्यच परिशिष्टः श्लोकसंघातोऽर्थवादः ॥ २३७ ॥

(२) सर्वज्ञनारायणः । कृत्यंकृत्यप्रकारः । साक्षादभिलषितफलः । अन्योयज्ञादिस्तेषु जीवत्सुउपधर्मः ॥ २३७ ॥

(३) कुल्लूकः । इतिशब्दःकात्स्न्र्ये । हिशब्दोहेतौ । यस्मादेतेषु त्रिषु शुश्रूषितेषुपुरुषस्य सर्वश्रौतस्मार्तकर्तव्यसंपूर्णमनुष्ठितंभवति । तत्फलावाप्तेस्तस्मादेवश्रेष्ठोधर्मःसाक्षात्सर्वपुरुषार्थसाधनः । अन्यस्त्वग्निहोत्रादि प्रतिनियतस्वर्गादिहेतुरूपधर्मोजघन्यधर्मइति शुश्रूषास्तुतिः ॥ २३७ ॥

(४) राघवानन्दः । एतदाचरणेनैव कृतकृत्योभवतीत्याह त्रिष्विति । अन्यस्तद्भिन्नोयःसउपधर्मोऽन्यधर्मोऽधर्मः पाखण्डधर्मोवा ॥ २३७ ॥

(६) रामचन्द्रः । एतेषु त्रिषु पुरुषस्यइतिकृत्यंहि समाप्यते । अन्यतःउपधर्मः पाषण्डधर्म इत्यर्थः ॥ २३७ ॥

श्रद्दधानःशुभांविद्यामाददीतावरादपि ॥ अन्त्यादपि परंधर्मंस्त्रीरत्नंदुष्कुलादपि ॥ २३८ ॥

(१) मेधातिथिः । श्रद्दधानआस्तिक्योपगृहीतान्तरात्माऽभियुक्तोयः शिष्यः सशुभांविद्यांन्यायशास्त्रादितर्कविद्यामथवा या शोभते केवलंसाविशदकाव्यभरतादिविद्याविभूषिता मन्त्रविद्यावा नधर्मोपयोगिनी तामवरादपि हीनजातीयादप्याददीत शिक्षेत। नन्वत्र शुभा वेदविद्या वेदितव्या आपदि विधिर्भविष्यति अनापदि तु नैवेष्यते। या च शुभा शाश्वती माया कुहकादिवातान क्वचित्। अन्त्यश्चाण्डालस्तस्मादपियः परोधर्मः श्रुतिरस्मृत्यपेक्षया परोन्योलौकिकः। धर्मशब्दोऽव्यवस्थायामपि प्रयुज्यते। एषोत्र धर्मइति यदि चण्डालोपि ब्रूते। अत्रप्रदेशे माचिरंस्थाःमावास्मिन्नम्भसि स्नासीरेषोत्र ग्रामीणानांधर्मोराज्ञाकृतावा मर्यादेति। नचैवंमन्तव्यमुपाध्यायवचनंमया कर्तव्यंधिक्चाण्डालंयोमांनियुङ्क्तइति। न पुनरियंबुद्धिःकर्तव्या परोधर्मोब्रह्मतत्वज्ञानंनहि चण्डालादेस्तत्परिज्ञानसंभवोवेदार्थवित्त्वाभावात्। न चान्यतस्तत्संभवोनहि वृश्चिकमन्त्राक्षरवद्ब्रह्मोपदेशोस्ति। स्त्रीरत्नमिव स्त्रीचासौ रत्नंच तदिति वा उपमितंव्याघ्रादिभिः विशेषणंविशेष्येणेति वा। यदा यत्किंचिदुत्कृष्टंवस्तु तद्रत्नमुच्यते तदाविशेषणमिति। अथतु मरकतपद्मरागादीन्येव रत्नशब्दवाच्यान्युत्कर्षसामान्यादन्यत्र प्रयोगस्तदोपमितमिति। या स्त्रीसंस्थानलावण्यातिशयवती अथ धान्यबहुधनसुतादिशुभलक्षणा सा दुष्कुलाद्धीनक्रियादेरप्यानेया। अत्रब्राह्मणादित्यस्य विधेरयमपवादोऽलाभेनतु प्रदर्शितः ॥ २३८ ॥

(२) सर्वज्ञनारायणः। शुभांवैदिकीं अवरान्बलात् श्रद्दधानो बाल्यादिना तत्राश्रद्धानकार्येत्यर्थः। अन्त्यान् शूद्रादपि परंधर्ममाचरतोधिगम्य गृह्णीयात्। अत्रानेकान्दृष्टान्तान् लोकव्यवहारसिद्धानाह स्त्रीरत्नमित्यादि। लुमोपमार्थमेतत् सर्वं ॥ २३८ ॥

(३) कुल्लूकः। श्रद्धायुक्तःशुभांदृष्टशक्तिंगारुडादिविद्यामवराच्छूद्रादपि गृह्णीयात्। अन्त्यश्चाण्डालस्तस्मादपि जातिस्मरादेर्विहितयोगप्रकर्षात् । दुष्कृतशेषोपभोगार्थमवाप्तचाण्डालजन्मतः परंधर्मंमोक्षोपायमात्मज्ञानमाददीत। तथा ऽज्ञानमेवोपक्रम्य मोक्षधर्मे प्राप्य ज्ञानंब्राह्मणात्क्षत्रियाद्वैश्याच्छूद्रादपि नीचादभीक्ष्णंश्रद्धातव्यं। श्रद्दधानेन नित्यंनश्रद्धिनंप्रति जन्ममृत्युविशेषता। मेधातिथिस्तु श्रुतिस्मृत्यपेक्षयापरोधर्मोलौकिकोधर्मशब्दोऽव्यवस्थायामपि युज्यते। यदि चाण्डालोप्यत्र प्रदेशे माचिरंस्थामाचास्मिन्नंभसि स्नायाइतिवदति तमपि धर्ममनुतिष्ठेत्। प्रागल्भ्याल्लौकिकंवस्तु परंधर्ममिति ब्रुवन्। चित्रंतथापिसर्वत्रश्लाघ्योमेधातिथिःसताम्। स्त्रीरत्नंआत्मापेक्षयानिकृष्टकुलादपि परिणेतुंस्वीकुर्यात् ॥ २३८ ॥

(४) राघवानन्दः। ब्राह्मणगुर्वभावे क्षत्रियादपि वेदोग्राह्यइति वदन्नदाने दोषमाह। श्रद्दधानइति चतुर्भिः। शुभांदृष्टशक्तिंगारुडादिविद्यांधर्मंलौकिकंस्त्रीदौषधात् ॥ २३८ ॥

(५) नन्दनः। विद्याधर्मस्त्रियोविशिष्टाश्चेदविशिष्टादप्युपादानादवश्यंउपादेयाइत्याह श्रद्दधानइति ॥ २३८ ॥

(६) रामचन्द्रः। श्रद्दधानः पुरुषःअधमादपि प्रातिलोम्यादपि परांउत्कृष्टांविद्यांअधीयीत स्वीकुर्यात् परंधर्मं अन्त्यादपि शूद्रादपि गृह्णीयात् ॥ २३८ ॥

विषादप्यमृतंग्राह्यंबालादपि सुभाषितम् ॥ अमित्रादपि सद्वृत्तममेध्यादपि काञ्चनम् ॥ २३९ ॥

(१) मेधातिथिः। पूर्ववद्दमौ चापद्यब्राह्मणादप्यध्येतव्यमित्यस्य विधेः शेषः। अनेन लोकप्रवादोदृष्टंन क्रियते। एवंहि लौकिकाआहुः असतस्तदुपादेयंविशेपि यदमृतंतत्राह्यमेव यथा हंसउदकात्क्षीरंगृण्हाति रसायनेषु केषु चिद्विषंद्रव्ये-

तदभिमत्योक्तम् । बालोपि यत्किंचिदकलात्सुभाषितंमाङ्गलिकंप्रस्थानादौ वक्ति तन्ग्राह्यम् । अमित्रादेरपि सतां यद्वृत्तं-शिष्टाचारः । न द्वेषस्तेनैतदाचरितमितिन्यायात्सिद्धतरोयंदृष्टान्तः । अमेध्याद्पि काञ्चनंसुवर्णमसद्राश्रयात्प्राप्यंतेतथा गृह्यते तद्वद्ब्राह्मणादध्ययनमिति ॥ २३९ ॥

(२) **सर्वज्ञनारायणः** । अमृतममरणहेतुरसायनसाधनं सत्वं । सुभाषितं यात्रादौ शकुनत्वेन । शौचंवृत्तम् ॥ ॥ २३९ ॥

(३) **कुल्लूकः** । विषंयद्यमृतसंयुक्तंभवति तदा विषमपसार्य तस्मादमृतंग्राह्यम् । बालादपि हितवचनंग्राह्यम् । शत्रुतोऽपि सज्जनवृत्तम् । अमेध्यादपि सुवर्णादिकंग्रहीतव्यम् ॥ २३९ ॥

(४) **राघवानन्दः** । किंच विषाद्विषव्यापादमृतमिति दृष्टान्तार्थौविधेयार्थौवा । सुभाषितंमागच्छाग्रेकूपइति हितोपदेशंसद्वृत्तंसुचरितंधर्मंवा ॥ २३९ ॥

(५) **नन्दनः** । एतदेव दृष्टान्तेनोपपादयति विषादिति ॥ २३९ ॥

(६) **रामचन्द्रः** । अमृतंजीवनं अमेध्यात्कांचनम् ॥ २३९ ॥

स्त्रियोरत्नान्यथो विद्या धर्मःशौचंसुभाषितम्॥विविधानि च शिल्पानि समादेयानि सर्वतः२४०

(१) **मेधातिथिः** । रत्नानि मणयः शम्बरपुलिन्दादिभ्योप्युपात्ताः शुद्धास्तद्वद्विद्याद्यपीति । शिल्पानि च विचित्रपत्रच्छेद्यादीन्यदुष्टान्यगर्हितानि चैलनिर्णेजनपटजनकबन्धनादीनि सर्वतोजातिविशेषमनपेक्ष्य समादेयानि स्वीकर्तव्यानि निश्चितातिधैर्यभावैः । विषादप्यमृतमित्येवमादिभिरनेकवाक्याद्वा समानप्रक्रमत्वेन सर्वएतेर्थवादाः ॥ २४० ॥

(२) **सर्वज्ञनारायणः** । अदुष्टानि शिल्पानि लिप्यादीनिं तु शस्त्रनिर्माणादीनि एषपूर्वेषामेव किंचिदधिकोन्त्योपसंहारः ॥ २४० ॥

(३) **कुल्लूकः** । अत्रस्त्र्यादीनामुक्तानामपि दृष्टान्तत्वेनोपादानंयथा स्त्र्यादयोनिकृष्टकुलादिभ्योगृह्यन्ते । तथा न्यान्यपि हितानि चित्रलिखनादीनि सर्वतः प्रतिग्रहीतव्यानि ॥ २४० ॥

(४) **राघवानन्दः** । स्त्र्यादिसमत्वभावशुद्धानि नोपादानतोदुष्टानीत्याहस्त्रियइति । सोमःशौचंददौतासांगन्धर्वाश्चशुभांगिरं । पावकः सर्वमेध्यत्वंमेध्यावैयोषितःसदा इत्युक्तेः ॥ स्त्रीरत्नंसर्वदाशुद्धमेवकूटकार्षापणादिव्यावृत्यर्थमाह अदुष्टानीति तेषामुदर्केप्राप्तप्रकृतित्वेन स्तेयादिरूपत्वात् ॥ २४० ॥

(५) **नन्दनः** । उक्तमेवार्थंपुनः प्रकारान्तरेणस्थिरीकरो तिस्त्रियइति ॥ २४० ॥

अब्राह्मणादध्ययनमापत्काले विधीयते ॥ अनुव्रज्या च शुश्रूषा यावदध्ययनंगुरोः ॥ २४१ ॥

(१) **मेधातिथिः** । अयंतत्रविधिः । आपन्नब्राह्मणाध्यापकभावः । आपदः काल आपत्कालः । आपदित्येव सिद्धेकालग्रहणंवृत्तपूरणार्थम् । पाठांतरमापत्कल्पइति कल्पनंकल्प आपद्येषांकल्पना विधीयते उपदिश्यते । यदाचार्यः प्रारब्धाध्यापनः प्रायश्चित्तेनान्येनवा निमित्तेन शिष्यंहित्वा देशान्तरंव्रजेत् नच ब्राह्मणोन्योध्यापकस्तस्मिन्देशे लभ्यते बालत्वाद्दूरदेशगमनमशक्यंतदा ब्राह्मणः क्षत्रियात्तदभावे वैश्यादध्ययनंप्रकृतत्वात् । वेदः कृत्स्नइति वेदग्रहणंविधीयते ।

(२४०) विविधानि=अदुष्टानि (मे०)

(२४०) विविधानिच शिल्पानि=शिल्पानिचाप्यदुष्टानि (न, ब, भ, य, र, ल)

यद्यप्यत्राब्राह्मणशब्दोब्राह्मणजातेरन्यत्र जातित्रये वर्तमानंपुरुषत्वमाचष्टे तथापि नेहशूद्रस्य ग्रहणं तस्याध्यापनाधिकाराभावात् । सत्यध्ययनेऽध्यापकत्वम् । अथशास्त्रातिक्रमेण शूद्रस्याप्यधीतवेदत्वस्य संभवः क्षत्रियवैश्ययोरध्यापकत्वस्यैव । तदपि न यतोधारणे शरीरभेदस्तस्याम्नातः नचेदंमहत्वान्महदेतदाचार्यकमनुमीयते निन्दितकर्माभ्यासे पतनात्तत्संसर्गाच्च ब्रह्मचारिणाम् किंतु दुष्टतास्यान्निषेधात् तुल्यदोषइति चेदस्त्यत्र विशेषः । यत्र दण्डप्रायश्चित्ते गुरुणी तत्र महादोषता । स्वल्पयोस्तु स्वल्पदोषता । नच क्षत्रियवैश्ययोरध्यापने महती दण्डप्रायश्चित्ते शूद्रस्येव । किंच द्वे निन्दिते कर्मण्यध्ययनमध्यापनंच । क्षत्रियवैश्ययोस्त्वेकमेव । निषिद्धाध्यापनसंसर्गस्त्वनेनैवानुज्ञातोनासौदोषकरः । निषिद्धाध्ययनेन तु शूद्रेण संसर्गे न किंचित्प्रमाणमस्ति । अनुव्रज्या च शुश्रूषा न वन्दनपादप्रक्षालनादि शुश्रूषाप्रतिषेधार्थमनुव्रज्यैव शुश्रूषा नान्येति । यावदध्ययनंयावद्ग्रहणम् ॥ २४१ ॥

(२) **सर्वज्ञनारायणः** । अब्राह्मणात् क्षत्रियाद्वैश्याद्वा आपत्कल्पे आपदः प्रक्रमौ ब्राह्मणाभावे तस्य च यावदध्ययनमनुगमएव शुश्रूषणाभिवादनादि । अतएवंविधेर्ब्राह्मणशिष्यशुश्रूषाद्यङ्गीकाराध्यापनाभ्यां न क्षत्रियवैश्ययोरापदि दोषः । एतच्चोपकुर्वाणस्या नैष्ठिकस्यापि तस्याप्यध्ययनार्थित्वाविशेषात् ॥ २४१ ॥

(३) **कुल्लूकः** । अब्राह्मणादिति । ब्राह्मणादन्योयोद्विजः क्षत्रियस्तदभावे वैश्यो वा तस्मादध्ययनमापत्काले ब्राह्मणाध्यापकासम्भवे ब्रह्मचारिणोविधीयते । अनुव्रज्यादिरूपा गुरोः शुश्रूषा यावदध्ययनंतावत्कार्या । गुरुपादप्रक्षालनोच्छिष्टप्राशनादिरूपा शुश्रूषा प्रशस्ता सा न कार्या । तदर्थमनुव्रज्याचेति विशेषितम् । गुरुत्वमपि यावदध्ययनमेवक्षत्रियस्याह व्यासः । मन्त्रदः क्षत्रियोविप्रैःशुश्रूषानुगमादिना । प्राप्तविद्योब्राह्मणस्तु पुनस्तस्य गुरुःस्मृतः ॥ ब्रह्मचारित्वे नैष्ठिकस्याप्यब्राह्मणादध्ययनंप्रसक्तंप्रतिषेधयति ॥ २४१ ॥

(४) **राघवानन्दः** । अब्राह्मणाद्यधीतवेदस्योत्तरकालंतच्छुश्रूषाद्यभावमाह अब्राह्मणादितिद्वाभ्यां । न ब्राह्मणात्-वैश्यातक्षत्रियाद्वा आपदि इत्युपलक्षणं यतःब्राह्मणेष्वसंभाव्यमानाराजन्याद्वैवानरविद्यागृहीतामूर्धातेव्यपतिष्यद्यन्मानागमिष्यइति तथापंचाग्निविद्याचेत्यस्ति श्रुत्याख्यायिका ॥ २४१ ॥

(५) **नन्दनः** । अब्राह्मणात् क्षत्रियवैश्याभ्यामपि ॥ २४१ ॥

(६) **रामचन्द्रः** । आपत्काले अब्राह्मणात् क्षत्रियादेःसकाशादध्ययनं विधीयते । यावद्गुरोःसमीपेअध्ययनंक्षत्रियादेःगुरोःअनुव्रज्यतावतशुश्रूषाकार्या ॥ २४१ ॥

नाब्राह्मणे गुरौ शिष्योवासमात्यन्तिकंवसेत् ॥ ब्राह्मणे चाननूचाने काङ्क्षन्गतिमनुत्तमाम् ॥ २४२ ॥

(१) **मेधातिथिः** । अब्राह्मणे गुरौ वासोऽध्ययनाय पूर्वेणोक्तोनैष्ठिकस्यापि प्राप्तोविशेषे निषिध्यते । आत्यन्तिकंवासंयावज्जीविकंन वसेन्नकुर्यात् । वासंवसेदिति सामान्यविशेषभावाद्वासंवसेदिति संबन्धः कल्प्यः गुरुविषयोवासस्तंवसेत् । समाप्ताध्ययनोऽन्यत्र गच्छेत् । ननु चाध्ययनमात्रमनुज्ञातमात्यन्तिकस्य वासस्य कुतः प्राप्तिः । नैषदोषः । गुरौ तस्य वासउक्तः अध्यापयिता च गुरुरुक्तः अतोभवत्याशङ्काब्राह्मणे वाननूचाने । अवाशब्दोऽप्यर्थः । ब्राह्मणोपि यद्यनूचानोवृत्ताभिजनसंपन्नोन भवति नच व्याख्यानाध्ययनशीलोऽनुवचनेनैतेपि गुणालक्ष्यन्ते यतोननुवक्तर्यर्थाभावादेवावासः सिद्धः गतिरत्रसुखातिशयप्राप्तिर्विवक्षिता अनुत्तमा यस्याअन्योत्तमानास्ति तांकाङ्क्षन्परमात्मानन्दरूपंमोक्षम् ॥ २४२ ॥

(२) **सर्वज्ञनारायणः** । तथाच क्षत्रियादावपि गुरौ यावज्जीवनिवासप्रसक्तौ इदमाह न ब्राह्मणइति । नात्य-

न्तिकंनैष्ठिकाश्रमोक्तम् । ब्राह्मणेपि साङ्गवेदपाठानध्येतरि न नैष्ठिकवासंवसेत् । किंतुयावदध्ययनं अधीत्य वैश्वानरपरिचर्यया क्षपयेदिति स्मृत्यन्तरात्सिद्धम् ॥ २४२ ॥

(३) कुल्लूकः । आत्यन्तिकंवासंयावज्जीविकंब्रह्मचर्यंक्षत्रियादिके गुरौ ब्राह्मणे साङ्गवेदानध्येतर्यनुत्तमांगतिंमोक्षलक्षणामिच्छञ्छिष्योनावतिष्ठेत ॥ २४२ ॥

(४) राघवानन्दः । अननूचाने सांगवेदानध्येतरि आत्यन्तिकंयावज्जीवं न वसेत् किंतु यावदध्ययनंतावद्वसेत् इत्यन्वयः ॥ २४२ ॥

(५) नन्दनः । आत्यन्तिकंवासंनैष्ठिकंब्रह्मचर्यंवसेत्कुर्यात् ॥ २४२ ॥

(६) रामचन्द्रः । शिष्यःअब्राह्मणे गुरौ आत्यन्तिकं वासंनवसेत् यावज्जीवंनवसेदित्यर्थः । नैष्ठिकंब्रह्मचर्यं न वसेदित्यर्थःनानूचाने उत्तमांगतिंकांक्षन्न वसेदित्यर्थः ॥ २४२ ॥

यदि त्वात्यन्तिकंवासंरोचयेत गुरोःकुले ॥ युक्तःपरिचरेदेनमाशरीरविमोक्षणात् ॥ २४३ ॥

(१) मेधातिथिः । अत्यन्तंभवमात्यन्तिकंवासंगुरोः कुले नैष्ठिकंब्रह्मचर्यंयदि रोचयेत्तदायुक्तस्तत्परः परिचरेदेनंगुरुमाशरीरस्य विमोक्षणात्पाताद्यावच्छरीरंम्रियतइत्यर्थः ॥ २४३ ॥

(२) सर्वज्ञनारायणः । नैष्ठिकस्याधिकंकर्तव्यमाह यदित्विति । यदिआत्यन्तिकंतत्र जन्मनि तत्र गृहवासात्यागेन युक्तः प्रयत्नवान् परिचरेत् शुश्रूषेत् एवंगुरुंब्रह्मचारीआचार्यकुलवासी तृतीयोत्यन्तगतिमिच्छन् आचार्यकुले समासादयेदित्येतत् श्रुतिमूलत्वाच्चास्य नऋणादिस्मृतिभिर्विरोधः ॥ २४३ ॥

(३) कुल्लूकः । यदि तु गुरोः कुले नैष्ठिकब्रह्मचर्यात्मकमात्यन्तिकंवासमिच्छेत्तदा यावज्जीवनमुद्युक्तोगुरुंशुश्रूषयेत् ॥ २४३ ॥

(४) राघवानन्दः । संप्रति नैष्ठिकब्रह्मचारिणोधर्मसार्थवादमाह यदीति द्वाभ्यां । युक्तोजितेन्द्रियः आशरीरविमोक्षणात् ॥ २४३ ॥

(५) नन्दनः । गुरोर्ब्राह्मणस्यानूचानस्य ॥ २४३ ॥

(६) रामचन्द्रः । गुरोःकुले यदिआत्यन्तिकंवासंरोचयेत् एनं गुरुं आशरीरविमोक्षणात् शरीरत्यागपर्यन्तं परिचरेत् ॥ २४३ ॥

आसमाप्तेःशरीरस्य यस्तु शुश्रूषते गुरुम् ॥ सगच्छत्यञ्जसा विप्रोब्रह्मणःसद्म शाश्वतम् ॥ २४४ ॥

(१) मेधातिथिः । नैष्ठिकब्रह्मचर्यस्य फलविधिरयम् । शरीरस्यम् समाप्तिर्जीवितत्यागः । आततः कालाद्यो गुरुंशुश्रूषते परिचरति सगच्छति विप्रोब्रह्मणः सद्मसदनंस्थानंशाश्वतंन पुनः संसारंप्रतिपद्यतइतियावत् । अञ्जसाऽक्लिष्टेन मार्गेण नगत्यन्तरेण तिर्यक्त्वेन मनुष्यादिजन्मना व्यवधीयते । ब्रह्मशब्देन चेति सहादर्शने देवविशेषश्च चतुर्वक्त्रस्तस्य सद्मस्थानविशेषोदिवि विद्यते वेदान्तवादिनांतु ब्रह्म परमात्मा तस्य सद्मस्वरूपमेव तद्भावापत्तिः ॥ २४४ ॥

(२) सर्वज्ञनारायणः । फलमाह आसमाप्तेरिति । अञ्जसाशीघ्रं ब्राह्मणोहिरण्यगर्भस्य शाश्वतमविच्युतम् ॥ २४४ ॥

(३) कुल्लूकः । अस्य फलमाह आसमाप्तेरिति । समाप्तिः शरीरस्यजीवनत्यागः । तत्पर्यन्तंयोगुरुंपरिचरति सतत्त्वतोब्राह्मणः सद्मरूपमविनाशिप्राप्नोति ब्रह्मणि लीयतइत्यर्थः ॥ २४४ ॥

(४) **राघवानन्दः** । शुश्रूषोस्तस्यएवमेवअनूचानंविप्रंसमस्थानंशाश्वतंद्विपरार्धकालस्थायित्वात् । अञ्जसा तत्वतोन स्तुतिमात्रं ब्रह्मचर्येण विन्देदिति श्रुतेः विन्देत्प्राप्नुयात्ब्रह्मलोकमिति शेषः ॥ २४४ ॥

न पूर्वंगुरवे किंचिदुपकुर्वीत धर्मवित् ॥ स्नास्यंस्तु गुरुणाज्ञप्तःशक्त्या गुर्वर्थमाहरेत् ॥ २४५॥

(१) **मेधातिथिः** । नैष्ठिकस्यायंगुरवेऽर्घदानंप्रतिषिध्यते । स्नास्यतोगुर्वर्थविधानात् नच नैष्ठिकस्य स्नानमस्ति प्रकृतश्च। नैष्ठिकएव उपकुर्वाणस्य तु उपनयनात्प्रभृति यावत्स्नानमस्त्येव सति संभवे यथा शक्त्या दानंपूर्वंस्नानाद्गुरवे किंचिदुपकुर्वीत दद्याद्ददात्यर्थे धातुः सोपसर्गोऽतश्च स्वसाध्याचतुर्थी । अथवा क्रियाग्रहणमपि कर्तव्यमिति । ततः संप्रदानत्वंधर्मवित्पदमनुवादः । स्नास्यंस्तु स्नानकाले प्राप्ते गुरुणाआदिष्टममुमर्थमाहरेतितः शक्त्या यावन्तंशक्नोति तावन्तंगुर्वर्थंगुरोरिदंगुर्वर्थंगुरोर्येन प्रयोजनंतमाहरेदुपनयेत् । नन्वयंनैष्ठिकस्य गुर्वर्थकरणप्रतिषेधः । नह्येते द्वे वाक्ये एकेन प्रतिषेधः अपरेण गुर्वर्थविधिः । स्नाने गुर्वर्थोऽवश्यंकर्तव्यमित्ययंविधिः प्रतिषेध उपकारप्रतिषेधे च सर्वशुश्रूषाविधिरनर्थकः स्यात् । नच दानमेवोपकारोयेन धनोपकारएव निषिध्येत नान्यः प्रियहितादिः । अर्थवादत्वेत्वयथार्थता न दोषः । गम्यते चात्रैकवाक्यता ॥ २४५ ॥

(२) **सर्वज्ञनारायणः** । अध्ययनात्प्राक्गुरवे नोपकुर्वीताध्ययनाभिसंबन्धिना न किंचिद्दद्यात् । एतत्नैष्ठिकोपकुर्वाणकयोस्तुल्यम् । अन्यथा भृतकाध्ययनप्राप्तिप्रसंगात् । अत्रप्रसंगादुपकुर्वाणस्य दक्षिणादानकालउक्तः स्नास्यंस्त्विति गुरुणाज्ञप्तःस्नास्यन्शक्तया गुरुवेर्थमाहरेत् ॥ २४५ ॥

(३) **कुल्लूकः** । उपकुर्वाणस्यायंविधिः नैष्ठिकस्य स्नानासंभवात् । गुरुदक्षिणादानंधर्मज्ञोब्रह्मचारी स्नानात्पूर्वं किंचिद्गोवस्त्रादिधनंगुरवेनावश्यंदद्यात् । यदि तु यदृच्छातोलभते तदा गुरवे दद्यादेव अतएव स्नानात्पूर्वं गुरवे दानमाहापस्तम्बः । यदन्यानि द्रव्याणि यथालाभमुपहरति दक्षिणाएवताः सएव ब्रह्मचारिणोयज्ञोनित्यव्रतमिति । स्नास्यन्पुनर्गुरुणादत्ताज्ञोयथाशक्तिधनिनंयाचित्वापि प्रतिग्रहादिनापि गुरवेऽर्थमादत्त्यावश्यंदद्यात् ॥ २४५ ॥

(४) **राघवानन्दः** । स्नास्यन्समावर्तनाख्यस्नानंकरिष्यन् । उपकुर्वाणस्य दक्षिणादानेनैव समाप्तिंब्रुवन् तस्याःकालमाह नेति द्वाभ्यां । नोपकुर्वीत धनेनेति शेषः ॥ २४५ ॥

(५) **नन्दनः** । उपकुर्वाणंप्रत्याह नपूर्वमिति । स्नास्यन्समावर्तिष्यमाणः ॥ २४५ ॥

(६) **रामचन्द्रः** । धर्मवित गुरवे किंचित्पूर्वंन कुर्वीत दक्षिणा न दातव्या गुरुणाज्ञप्तःदत्ताज्ञः स्नास्यन् ब्रह्मचर्यान्तं स्नानंकुर्वन् शक्त्या गुर्वर्थे दक्षिणां दद्यात् ॥ २४५ ॥

क्षेत्रंहिरण्यंगामश्वंछत्रोपानहमासनम् ॥ धान्यंशाकंच वासांसि गुरवे प्रीतिमावहेत् ॥२४६॥

(१) **मेधातिथिः** । उक्तमुद्दिष्टंगुर्वर्थंकुर्यात्तत्र न सर्वंकर्तव्यमित्येवमर्थोयंश्लोकः । यदि गुरुर्विरुद्धमादिशेत् अमुष्य स्त्रियमाहरेति सर्वस्वंवा देहीति तन्न कर्तव्यम् । किंतर्हि क्षेत्रंधान्यानांभवनभूमिः क्षेत्रमुच्यते । हिरण्यंसुवर्णम् वा शब्दो विकल्पार्थोन समुदितानि देयानि । अन्ततः अन्याभावे छत्रोपानहमपि । द्वन्द्वनिर्देशात्साहित्यदानम् । वासांसीति सर्वत्र संख्यानविवक्षिता । प्रीतिमाहरन्निति एतदाहरेदिति पूर्वसंबन्धः । प्रीतिमाहरेदिति वा पाठे अत्रैव क्रियापरिसमाप्तिः ।

---

(२४५) आवहेत्=आहरेत् आहरन्वा (मे०)

(२४६) मासनम्=मन्ततः (मे०)

प्रीतिमावहेदिति वा प्रीतिमुत्पादयेद्धान्याद्याहरेत् । स्वतन्त्रैव वा प्रीतिराहार्यतयोच्यते । ततश्चद्व्योपदेशस्य दर्शनार्थता सिद्धा भवति । अन्यदपि यदेवंविधंप्रीतिजनकंमणिमुक्ताप्रवालहस्त्यश्वगन्त्रीरथादि तदपि देयमिति गम्यते । तथा च गौतमो विद्यान्तेगुरुमर्थं ननिमन्त्र्याहरेद्यदि स्यादात्मीयंशक्त्यागततदा दद्यात्मानेद्यास्नादिनार्जयेत् ॥ २४६ ॥

(२) **सर्वज्ञनारायणः** । तदेवाह । क्षेत्रमिति । अन्ततः पूर्वालाभे प्रीतिंप्रीतिहेतुं धान्यादावप्यन्ततइति यथायोगमनुषञ्जनीयम् ॥ २४६ ॥

(३) **कुल्लूकः** । किंतत्तदाहक्षेत्रमिति । शक्त्या गुर्वर्थमाहरेदित्युक्तत्वात्क्षेत्रहिरण्यादिकंयथासामर्थ्यंविकल्पितंसमुदितंवा गुरवे दत्वा तत्प्रीतिमर्जयेत् । विकल्पपक्षेचांततोऽन्यासंभवे छत्रोपानहमपि दद्यात्द्वन्द्वनिर्देशात् । समुदितदानंप्रदर्शनार्थंचैतत्सम्भवेऽन्यदपि दद्यात् । अतएव लघुहारीतः एकमप्यक्षरंयस्तु गुरुः शिष्ये निवेदयेत् । पृथिव्यांनास्ति तद्द्रव्यंयद्दत्वाचानृणीभवेत् ॥ असंभवेशाकमपिदद्यात् ॥ २४६ ॥

(४) **राघवानन्दः** । अंततःपूर्वेषामशक्तौ धान्याद्युत्तराहरणमित्यर्थः दक्षिणायाअदृष्टार्थत्वंमीमांसास्तबकेरस्थापितम् । अतआह प्रीतिमितिप्रीत्यर्थमित्यर्थः ॥ २४६ ॥

(६) **रामचन्द्रः** । अन्ततः व्रतान्ततः गुरवे प्रीतिंआवहन् छत्रादिकंदद्यात् ॥ २४६ ॥

आचार्ये तु खलु प्रेते गुरुपुत्रे गुणान्विते ॥ गुरुदारे सपिण्डे वा गुरुवद्वृत्तिमाचरेत् ॥ २४७ ॥

(१) **मेधातिथिः** । नैष्ठिकस्यायमुपदेशः । असत्याचार्ये तत्पुत्रे श्रोत्रियत्वादिगुणयुक्ते गुरुपत्न्यामाचार्यान्यां वा सपिण्डे वा गुरोरेव वसेत्तत्र च गुरुवद्वृत्तिमाचरेद्भैक्षनिवेदनादि सर्वंकुर्यात् । दारशब्दोबहुवचनान्तोभार्यावचनोवैयाकरणैः स्मर्यते । स्मृतिकारास्त्वेकवचनान्तमपि प्रयुञ्जते । धर्मप्रयासयत्ने दारे नान्यांकुर्वीतेति ॥ २४७ ॥

(२) **सर्वज्ञनारायणः** । प्रकृतनैष्ठिकधर्ममाह आचार्यइति । गुरुपुत्रे गुणान्विते अनूचाने गुरुसपिण्डे वा तादृशएव गुरुदारेतु गुणान्विते प्रमीतपतिकाधर्मचारिणि गुरुवत्वृत्तिमाचरेत् । तच्छुश्रूषयातद्गृहेवसेत् ॥ २४७ ॥

(३) **कुल्लूकः** । नैष्ठिकस्यायममुपदेशः १ आचार्ये मृते तत्सुते विद्यादिगुणयुक्ते तदभावे गुरुपत्न्यांतदभावे गुरोः सपिण्डे पितृव्यादौ गुरुवच्छुश्रूषामनुतिष्ठेत् ॥ २४७ ॥

(४) **राघवानन्दः** । यस्तु शुश्रूषते गुरुमित्युक्तं तस्यासत्वे कागतिस्तत्राह आचार्येत्विति द्वाभ्यां । गुरुवद्गुरुतुल्यांवृत्तिंसुखादिकां ॥ २४७ ॥

(५) **नन्दनः** । अथनैष्ठिकंप्रत्याह आचार्यइति । सपिण्डे गुरुसपिण्डे ॥ २४७ ॥

(६) **रामचन्द्रः** । खलुइति निश्चयेन आचार्ये प्रेतेमृते सति गुणान्विते गुरुपुत्रे गुरुवत् वृत्तिं आचरेत् । यद्वा गुरुदारे सपिण्डे वा गुरुवद्वृत्तिमाचरेत् ॥ २४७ ॥

एतेष्वविद्यमानेषु स्थानासनविहारवान् ॥ प्रयुञ्जानोऽग्निशुश्रूषांसाधयेद्देहमात्मनः ॥ २४८ ॥

(१) **मेधातिथिः** । अविद्यमानता सर्वेषामभावः यदिवा गुणहीनता । एतेष्वसत्स्वग्निशुश्रूषांप्रयुञ्जीताग्निशरणोपलेपनमग्नीन्धनमाचार्यवत्सन्निधान नियमाद्वृत्तवदहोरात्रासनमेषाऽग्नेः शुश्रूषैतांकुर्वन्देहंसाधयेत् शरीरंक्षपयेद्यथान्धश्चक्षुष्मानुच्यतएवंसाधयेदिति । स्थानासनएवविहारः तद्वान्नकदाचिदासीत एवंविहरेत् । अन्येतु मन्यन्ते स्थानाय स्वस्तिकादिना यदासनंध्यानकाले तत्स्थानासनंविहारोऽन्योभिक्षाचरणादिः ॥ २४८ ॥

(२) **सर्वज्ञनारायणः** । स्थानंऊर्ध्वावस्थानंनियतं । आसनमुपवेशनं नियमेन विहारोभ्रमणमित्येतैस्तपोविशेषग्रहणमभिप्रैति साधयेत्तपःसिद्धिंकुर्यात् ॥ २४८ ॥

(३) **कुल्लूकः** । एतेषु त्रिष्वविद्यमानेषु सततमाचार्यस्यैवाग्नेः समीपे स्नानासनविहारैः सायंप्रातरादौ समिद्धोमादिना चाग्नेः शुश्रूषां कुर्वन्नात्मनोदेहमात्मदेहावच्छिन्नंजीवंब्रह्मप्राप्तियोग्यंसाधयेत् ॥ २४८ ॥

(४) **राघवानन्दः** । स्थानासनविहारवान्अग्नेःगुरोरितिवाशेषः । स्थानासनादिसमीपगमनादिनामहीकुर्यात् । देहंब्रह्मलोकगमनपर्यन्तम् ॥ २४८ ॥

(५) **नन्दनः** । स्थानासनाभ्यांविहारः कालयापनं तदस्यास्तीतिस्थानासनविहारवान् ॥ २४८ ॥

(६) **रामचन्द्रः** । एतेषु गुरुपुत्रेषु अविद्यमानेषु स्थानासनविहारवान्भवेत् तद्यथा गुरौ स्थाने आसने उपविश्य वसेत् अग्निशुश्रूषांगुरोर्वा प्रयुंजानः कुर्यात् आत्मनःस्वस्य देहं साधयेदित्यर्थः ॥ २४८ ॥

एवंचरति योविप्रोब्रह्मचर्यमविप्लुतः ॥ सगच्छत्युत्तमस्थानंन चेहाजायते पुनः ॥ २४९ ॥

इति मनुस्मृतौ द्वितीयोऽध्यायः ॥ २ ॥

(१) **मेधातिथिः** । एवमिति नैष्ठिकवृत्तिप्रत्यवमृशति । एवंयोब्रह्मचर्यंचरत्यविप्लुतः अस्खलः सम्प्राप्नोत्युत्तमंस्थानंधाम परमात्मप्राप्तिलक्षणम् । नचेह पुनर्जायते न संसारमापद्यते ब्रह्मरूपंसंपद्यतइति ॥ २४९ ॥

मान्याकापि मनुस्मृतिस्तदुचिता व्याख्या हि मेधातिथेः सालुप्तैवविधेर्वशात्क्वचिदपि प्राप्यंन यत्पुस्तकम् । क्षोणीन्द्रोमदनः सहारणसुतो देशान्तरादाहृतैर्जीर्णोद्धारमचीकरत्ततइतस्तत्पुस्तकैर्लेखितैः ॥ इतिमनुभाष्येमेधातिथीयेद्वितीयोऽध्यायः ॥ २ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

(२) **सर्वज्ञनारायणः** । एवंनैष्ठिकधर्मेण । विप्रपदंविप्रस्यैव नैष्ठिकधर्मोनान्येषामित्येतदर्थम् । अविप्लुतः अभग्नव्रतः । ब्रह्मलोकंप्रागुक्तं प्राप्योत्तमंस्थानं मोक्षास्पदंगच्छत्यतएव नेह संसारे पुनराजायतइति ॥२४९॥

सर्वज्ञश्रीनारायणकृतौ मन्वर्थविवृतौ ब्रह्मचर्याश्रमविधानंनाम द्वितीयोध्यायः २

(३) **कुल्लूकः** । आसमाप्तेः शरीरस्येत्यनेन यावज्जीवमाचार्यशुश्रूषायामोक्षलक्षणंफलम् । इदानीमाचार्ये मृतेऽप्येवमित्यनेनानन्तरोक्तविधिनाचार्यपुत्रादीनामन्यग्निपर्यन्तानांशुश्रूषकोयोनैष्ठिकब्रह्मचर्यमखण्डितव्रतोऽनुतिष्ठति सउत्तमंस्थानंब्रह्मण्यांतकसलक्षणंप्राप्नोति नचेहसंसारेकर्मवशादुत्पत्तिंलभते ॥ २४९ ॥

इतिमन्वर्थमुक्तावल्यांमनुवृत्तौद्वितीयोऽध्यायः ॥ २ ॥ ॥ ७ ॥ ॥ ७ ॥

(४) **राघवानन्दः** । एतेष्वाचार्यादिषु नैष्ठिकस्य ब्रह्मसद्मप्राप्तिरित्युपसंहरति एवमिति । अविप्लुतब्रह्मचर्यःअप्रच्युतव्रतः । इहेति विशेषणात्मानवान्तरे जायते यदि तत्र श्रवणादिकृत्ततदामुच्यते । तथा च स्मृतिः ब्रह्मणासहते सर्वे संप्राप्ते प्रतिसंचरे । परस्यान्ते कृतात्मानःप्रविशन्ति परंपदमिति । प्रतिसंचरे प्रलये कृतात्मानःकृतसाक्षात्काराः ॥ २४९ ॥

इति श्रीराघवानन्दविरचितायांमन्वर्थचन्द्रिकायांद्वितीयोध्यायः ॥ २॥

(५) **नन्दनः** । अथोपकुर्वाणंप्रत्याह एवमिति । अविप्लुतः अस्कन्नरेतस्कः ॥ २४९ ॥

इतिवीरमल्लप्रियसखेन श्रीनन्दनेन विरचिते मानवव्याख्याने द्वितीयोऽध्यायः ॥ २ ॥ ७ ७ ७

(६) **रामचन्द्रः** । विप्रः अविप्लुतः अस्खलितब्रह्मचर्यः यएवंचरति सउत्तमस्थानं गच्छति पुनः इह न जायते ॥ २४९ ॥

॥ इति मनुस्मृतिभाष्ये द्वितीयोऽध्यायः ॥

॥ श्री ॥

अथ तृतीयाध्यायः

षट्त्रिंशदाब्दिकंचर्यंगुरौ त्रैवेदिकंव्रतम् ॥ तदर्धिकंपादिकंवा ग्रहणान्तिकमेव वा ॥ १ ॥

(१) **मेधातिथिः** । द्विविधोब्रह्मचारी पूर्वत्र प्रतिपादितोनैष्ठिकउपकुर्वाणश्चेति । आसमाप्तेः शरीरस्य यस्तु शुश्रूषते गुरुमित्यनेननैष्ठिकब्रह्मचर्यमुक्तम् । आसमावर्तनादिति पक्षान्तरमपि सूचितम् । तत्र नैष्ठिकस्य नामधेयप्रतिलम्भेनैव निमित्तवताविशेषः सुगमितः । निष्ठांसमाप्तिंगच्छति नैष्ठिकः । श्रुत्यैव कालोविहित आसमाप्तेरिति । उपकुर्वाणस्यानेन क्रमयोगेन तपोविशेषैर्विविधैर्व्रतैश्च विधिचोदितैः वेदः कृत्स्नोऽधिगन्तव्यइति संख्यायाअविवक्षोक्ता । अविवक्षायांचैकद्वित्रिचतुःपञ्चषट्सप्तादिशाखाध्ययनंयथाशक्तिप्राप्तंनियम्यते । त्रैवेदिकंव्रतंचर्यं त्रयाणांवेदानांसमाहारस्त्रिवेदी तद्ग्रहणप्रयोजनंत्रैवेदिकं । ग्रहणक्रिया वृत्तावन्तर्भवति वेदाधिगमस्य प्राग्विहितत्वात् । व्रतंब्रह्मचारिधर्मकलापः । चर्यंचरितव्यम् । कृत्योविधौ । एवमाहरणादीनां ग्रहणान्ततायांप्राप्तायामाह षट्त्रिंशदाब्दिकमिति । गृहीतेऽपि वेदे कालः पूरयितव्यः । यदिस्वाध्यायाध्ययनविध्यर्थोधर्मस्तस्य च स्वाध्यायविधेर्ग्रहणे निर्वृत्तिः किमर्थातर्हिद्वादशवार्षिकी ग्रहणोक्तकालव्रतचर्यानुवृत्तिः । अत्यल्पमिदमुच्यते । दर्शपूर्णमासादिष्वप्याग्नेयादियागेभ्यः पराञ्चि यान्यङ्गानि तत्राप्येतद्वक्तव्यं समस्ताङ्गानुष्ठानएवमत्रारादुपकारकाङ्गयुक्ताद्विशिष्टक्रमकाद्विध्यर्थसंपद्यवगतायांपरिचोदनाशब्दादेवविधिसंबन्धोपगमोयतः । अथ महतोलघीयांसस्तदर्धिकपादिकग्रहणावधयः पक्षाः सन्ति तेषु सत्सुकः खलुमहाप्रयासमतिचिरकालंतावद्द्वादशवार्षिकंव्रतचरणमाद्रियेतेतिचेत्फलभूमार्थिनोह्यभूयस्त्वमनुष्ठास्यन्ति । तदुक्तंप्रयत्नविशेषात्फलविशेषेणभवितव्यमिति । ननु च नार्थाववोधादृते ग्रहणद्वारेण स्वाध्यायाध्ययनस्य किंचिदपरंफलमस्ति । एवंह्याहुः नतस्याध्ययनमात्रंतत्रभवन्तोयाज्ञिकाः फलंसमामनन्तीति । तथा दृष्टोहि तस्यार्थः कर्मावबोधनंनामेति । तस्यनचकश्चिद्विशेषोदृश्यते । यद्येवंग्रहणकालेप्यन्तरेण व्रतधर्मानुष्ठानंग्रहणदर्शनानुष्ठानप्रसङ्गः । कश्चैवमाह अर्थाववोधार्थः स्वाध्यायविधिरिति । स्वाध्यायविधिः स्वार्थएव । नान्यस्यान्यार्थतायांप्रमाणमस्ति । अर्थाववोधोहि ग्रहणे सति वस्तुस्वतोवृत्तउत्पद्यते न विधितः । स्वर्गादिफलार्थिनोऽयंविधिः । एतदपिकथंभविष्यति । कातर्हीयंवाचोयुक्तिः फलविशेषेणेति । एषावाचोयुक्तिः संस्कारविधिस्तावदयंस्वाध्यायप्रधानस्तस्य स्वाध्यायेकर्मण्युत्पन्नत्वात् । संस्कारविधयश्च न साक्षादधिकारमर्हन्ति किंतुसंस्कार्यद्वारेण साधिकारविध्यन्तरमनुप्रविशन्ति । यथाव्रीहिमवहन्तीतिदर्शपूर्णमासाधिकारविषयाग्नेयादियागसाधनभूतपुरोडाशप्रकृतिव्रीहितुषकणविप्रमोचनादिसंस्कारद्वारेण दर्शपूर्णमासापूर्वसंबन्धमनुभवति । अवघातोनतन्निरपेक्षः । सएवकर्तव्यतयाप्रतीयते । एवमिह वेदस्य संस्कार्यत्वमन्यत्राशेषभूतस्य निर्वहति । दृष्टस्वाध्यायाध्ययनानन्तरमर्थाववोधः । अतइदमध्ययनामर्थाववोधपर्यन्तमवघातइवतण्डुलनिष्पत्तिपर्यन्तम् । एतावांस्तुविशेषःप्रकरणेऽधीतत्वादवघातोझटितिलब्धाधिकारविध्यन्तरसंबन्धः । अयंत्वनारभ्याधीतत्वादवबोधपर्यवसायी सकलफलकर्मानुष्ठानोपयोगितयागम्यमानोऽधिकारः । तत्रविध्यर्थनिवृत्तिरेवफलविशेषोऽभिप्रेतः । विधेर्हिपुरुषार्थत्वंव्युत्पन्नावगमंतत्साक्षाद्भवतु वा परम्परया वेतिनविशेषः । गम्यमानाधिकारत्वाच्च स्व-

तन्त्रएवायंविधिः। स्वात्मानमनुष्ठापयति यद्यपि नित्यकामश्रुतिष्वर्थावबोध उपयुज्यते। येत्वर्थावबोधद्वारेण ज्योतिष्टोमादिविध्येककार्यत्वमिच्छन्ति तत्फलस्यैव च प्रयत्नविशेषादतिशयमाहुस्तेषामाचार्यकरणविधिना किमपराद्धंयेन महता यत्ने न तदेककार्यता निषिध्यते । अप्रमाण्यंवेदस्यभवतीतिचेदस्तु नप्रयोजनवशेन युक्तिसामर्थ्यायातोऽर्थोहातुंशक्यते। युक्तिस्तुयुक्त्यन्तरेण बलीयसा बाध्यते। आचार्यकरणविध्येककार्यत्वे त्वस्यविधिरूपतैवहीयते स्वार्थस्याविवक्षितत्वात्। तत्तुल्यंज्योतिष्टोमाद्यनुप्रवेशेपि। यदा तु स्वतन्त्रोऽयंविधिः स्वार्थानुष्ठापकस्तत्समानस्कन्धस्तदास्वयमेवेतिकर्तव्यतया युक्तोऽनुष्ठीयते। तत्र ये विकल्पिताः कल्पालघीयांसोगरीयांसश्च तेषांलघीयसा सिद्धे गरीयसामनुष्ठानंविध्यर्थएव विशेषमावहति यथाधाने एकादेयातिस्रोदेयाद्द्वादशदशवेत्यादि। अनुष्ठिते चास्मिन्विधौ स्वसामर्थ्याच्छ्रुतौवाभवतु प्रतीयमानो वा कल्पोवा प्रमाणभेदोऽयं न संबन्धभेदः सर्वथोभयतः स्पर्शतोन मुच्यामहे यद्यस्य विधिः स्वार्थानुष्ठापकोज्योतिष्टोमाद्युपकारकत्वम्। ननुकिमिदंपूर्वापरविरुद्धंप्रलप्यते प्रागुक्तंनसाक्षात्संस्कारविधयोऽधिकारसंबन्धिनः इदानींतु स्वतन्त्रएवायंविधिः स्वार्थानुष्ठापकइति। अथवा विशेषश्रुतेनान्वयिनानसंबध्यते गम्यमानस्त्वधिकारःसंस्कारविधीनामप्यविरुद्धइतिनायंविशेषोयस्य विधिप्रयुक्तमनुष्ठानमर्थावबोधांशइष्यते । पाठमात्रस्याचार्यविधिप्रयुक्तत्वात्संस्कारविधीनामधिकारसंबन्धोऽभ्युपगतः स्यात्। अथविध्यन्तरोपकारकत्वात्तत्प्रयुक्तमनुष्ठानं तथासत्यधिकृतस्याध्ययनस्यानधीतवेदस्याधिकारः । तदा च शूद्रस्याधिकारोदुर्निवारः । नचाध्ययनानन्तरंवेदार्थश्रवणंप्राप्नोति । यदैव हि यदृच्छया कुतश्चिदधिगतंभवति ज्योतिष्टोमनामकर्मवैदिकंस्वर्गफलमिति तदैव तदितिकर्तव्यतांशिक्षेत्। तत्कालएवच तदुपयोगिनोमन्त्रान्याजमानानधीयीत अत्रकेचिदाश्रयिन्यायेन परिहरन्तियथैव हिस्विष्टकृदादयउभयरूपाः संस्कारार्थकर्मतया एवंस्वाध्यायाध्ययनमप्यभिधानविनियोगानुसारितया क्रियाफलावबोधदर्शनेनचसंस्कारकर्मफलवत्कर्मार्थकर्म। अतःसाधिकारत्वसिद्धिः। कःपुनरधिकारी । उपनीतस्त्रैवर्णिकोमाणवकइतिब्रूमः। ब्रह्मचारिधर्मेषु ह्येतदाम्नायते लिङादयोह्यविनाभूतनियोज्यार्थविध्यर्थप्रतिपादकास्तत्रविशेषाकाङ्क्षायांक्वचिच्छब्दसमर्पितोविशेषोभवति। स्वर्गकामोयावज्जीवमग्निहोत्रंजुहोति । क्वचिदश्रुतोऽप्यन्विताभिधानसामर्थ्यबलेन कल्प्योविश्वजिदादिषु क्वचित्प्रकरणाद्वस्तुसामर्थ्याद्विध्यन्तरपर्यालोचनयापिच प्रतीयते। तदेतदिहसर्वमस्ति। प्रकृतोब्रह्मचारी वस्तुसामर्थ्येन चार्थावबोधउपजायते सचसर्वविधिषूपयुज्यतेविदुषोऽधिकारात्। तदिदमपरे न मृष्यन्ति । संस्कारविधित्वेनैवास्य प्रतीयमानाधिकारता । यतः संस्कारकर्माणि संस्कार्यार्थतयानुष्ठीयन्ते । यदिच संस्कार्ये न दृश्येत विशेषस्ततःसक्तुवत्संस्काररूपता हीयेत । अस्ति चात्रफलवत्कर्मावबोधलक्षणोविशेषः। यत्तु स्विष्टकृदादिवदिति तत्प्रकृतिप्रत्ययविज्ञानागम्यत्वरूपहानितया युक्तोभयरूपता। तस्मात्स्थितंस्वतन्त्रोयंविधिर्माणवकस्येति। अतश्च स्वतएवानुष्ठेयोनावघातादिवद्दर्शपूर्णमासाद्यधिकारनियोगाक्षेपेण एवमनेकवेदाध्ययनमपिद्रष्टव्यम्। तत्रापि ह्येकेन वेदेन निर्वृत्ते विध्यर्थे किमित्यनेकवेदाध्ययनं फलभूम्नातुयुज्यते। फलंचपूर्ववन्नतु वाक्यशेषाधीतंपयोदध्यादि। एवंस्थितएकवेदाध्यायिनःस्वशाखानधीतानांमन्त्राणांकर्मोपयोगिनांकर्मानुष्ठानकालेसामर्थ्यात्तदाक्षिप्तमध्ययनमनुज्ञातंभवति। यद्यप्यधीतवेदस्याधिकारेऽधीतइति। अन्ये तु ब्राह्मणेन निष्कारणोधर्मःषडङ्गोवेदोध्येयइति निष्कारणइत्येतस्याधिकारपदतांमन्यन्ते। निष्कारणः कारणंप्रयोजनमनुद्दिश्यनित्यकर्मवत्कर्तव्यं न ह्यस्याधिकारसमर्पकत्वमन्तरेण विषयद्वारेण क्रियाकारकतद्विशेषणत्वादिनान्वयः संभवति तस्मात्सत्यपिसंस्कारविधित्वे गम्यमानाधिकारत्वंश्रूयमाणाधिकारत्वंवाऽविरुद्धम्। अपरे तु संस्कारविधित्वादनधिकारतामेव ज्यायसींमन्यन्ते । अनुष्ठानविशेषलाभार्थोह्यधिकारउपास्यते। सचेह संस्कार्यविशेषदर्शनादेव सिद्धः। संस्कारविधयः प्रयोजनापेक्षया । क्रियाफलमेवात्रविधिसाध्यं तच्चकर्मस्वर्थग्रहणलक्षणं-

दृश्यतएवाविरुद्धम् । अश्रुते विभागे स्मृत्यन्तराद्विभागावगतिः प्रतिवेदंब्रह्मचर्यंद्वादशाब्दानीति । केपुनरत्र त्रयोवेदाअभिमताः ऋग्वेदोयजुर्वेदःसामवेदइति । अथ किंनाथर्वणोवेदइतियद्येतत् पृथग्वाक्यम् । अथतुग्रहणान्तिकमेवेचेत्येतत्त्वैकंवाक्यंतन्नास्ति गृहीते वेदे व्रतनिवृत्तिः । कएवमाहकिंत्वत्रयथाश्रुतं संस्कार्यत्वनिबर्हणायांअर्थावबोधनिष्ठतयातस्यविधेरनुष्ठानलाभः । अवबोधोहिसकलकर्मानुष्ठानोपयोगीति । आथर्वणश्चाभिचाराद्युपदेशबहुलः । तस्मान्नज्योतिष्टोमादिकर्माणि विधीयन्ते । नापि तेषांकिंचिदङ्गंत्रय्यैवहौत्राध्वर्यवौद्गात्रादिसकलतदङ्गपरिसमाप्तिः । प्रधानोत्पत्तिविधयश्च त्रयाणामेव ज्योतिष्टोमादीनांसंति । ब्रह्मत्वमपि त्रयाणामेव विद्यते । त्रिशब्दश्चसंख्यावचनः । नचसंख्याशब्दाःकंचिद्धर्ममेकमनपेक्ष्यप्रवर्तन्ते । अतोयेषामेवेह कार्योपदेशपरता तएव त्रिशब्देनाभिगदितुंशक्यन्ते । न चाथर्वणस्यतत्कार्यानुप्रवेशः । नतत्र प्रधानविधयोज्योतिष्टोमादीनांनाङ्गविधयः । श्येनादिष्वभिचारयज्ञेषु तएवार्त्विजः सैवान्यापीतिकर्तव्यता । विशेषोऽपियः सोऽपि त्रय्यामेवोपदिष्टः । अतऋग्यजुषाभ्यांसामाभ्यांचैकत्रकर्मणि समावेशाभावात्त्रिवेदीव्यपदेशानुपपत्तेराथर्वणस्येहग्रहणंस्वाध्यायशब्दवाच्यत्वात्त्वध्ययनविधेस्तद्विषयत्वमविरुद्धम् । तदर्धिकंषट्त्रिंशत्संख्याप्रत्यवमृश्यते ततोऽर्धमष्टादशवर्षाणि । अत्रापिविभागकल्पनाषड्वर्षाणि अत्रापि पादिकं पादश्चतुर्भागभागिनी सैव संख्यानववर्षाणिचतुर्थोभागः । प्रतिवेदंत्रीणि । कथंपुनस्त्रिभिर्वर्षैर्वेदः शक्यो ग्रहीतुं असमाप्तग्रहणस्य च व्रतनिवृत्तौ व्रतस्नातकव्यपदेशो भवतिकश्चिन्मेधावितमः । अपर आह न ग्रहणस्वरूपप्रयुक्ताधर्माःकिंतर्हितद्विषयेण विधिनाप्रयुज्यन्ते तत्रापि निवृत्ते ग्रहणे यदि कानिचिदहानि नियमानुपालनमध्ययनकाले क्रियते तावत्सम्पाद्यतएवशास्त्रार्थःभवेत्स्वाध्यायविध्यर्थं तावतैवाङ्गकलापानुष्ठानम् । असमाप्तग्रहणस्य तद्व्रतनिवृत्तौ व्रतस्नातकव्यपदेशः । अतः कालविशेषविधानंयुक्तम् । त्रिभिर्वर्षैः विना न व्रतस्नातकोभवति तद्यद्यपि स्नानंवेदसमाप्ताविति केचित्स्मरन्ति तथापि तदर्थव्रतसमाप्तावपि प्रयोगउपचाराद्युक्तएव । तदयुक्तम् । सत्यपि विधिप्रयुक्तयावदध्ययनभावितैव व्रतानां युक्ता । अध्ययनसंयोगेनहि तानि चोद्यन्ते यावदध्ययनंभवति वचनादेव हित्रिसांवत्सरी व्रतचर्या प्रागपिग्रहणाद्यद्येतत्पृथग्वाक्यम् अथतु ग्रहणान्तिकमेवे त्येकंवाक्यंततो नास्त्यगृहीते वेदे व्रतनिवृत्तिः । एवकारेणैवमेव पक्षमनुमन्यन्ते । यदिनास्त्यगृहीते वेदे तन्निवृत्तिःकथं तर्हि व्रतस्नातकोवेदस्नातकइति भेदेन व्यपदेशः । चतुर्थेवक्ष्यामः । षट्त्रिंशदब्दाःसमाहृताः षट्त्रिंशदब्दंतत्रभवंषाट्त्रिंशदब्दिकम् । एवंत्रैवेदिकम् । तदर्थपरिमाणंतदर्धिकम् । एवं पादिकं ग्रहणान्तिकमितिसर्वत्र अतइनिठनाविति मत्वर्थीयः । नतु यस्ययत्परिमाणंतत्तस्यास्तीति शक्यतेऽपदेष्टुम् ॥ १ ॥

(२) **सर्वज्ञनारायणः** । क्रमप्राप्तंगार्हस्थ्याश्रमधर्मंप्रक्रमते । षट्त्रिंशदाब्दिकमिति । षट्त्रिंशद्वर्षनिर्वर्त्यं वेदत्रयाध्ययनार्थंव्रतंब्रह्मचर्याश्रमनियतधर्मरूपं चर्यंचरणीयम् । नियमेनाधीतंवीर्यवत्तरं भवतीतिश्रुतेः एकदेशस्यापि व्रतेनाध्ययने प्राशस्त्यात् । अशक्तस्य तदर्धिकंअष्टादशाब्दिकंवा नवाब्दिकमिति त्रिःप्रकारं व्रतंस्नानं केवलविद्यास्नानंकर्तुमिच्छतोग्रहणान्तिकम् । अर्थादुभयनिष्पत्तौ विद्याव्रतस्नानसिद्धिरिति स्फुटत्वान्नोक्तम् । आथर्वणिकस्य तु त्रयीनिष्कर्षत्वात् एतद्व्रतेनैवव्रतसिद्धिरिति मन्तव्यम् ॥ १ ॥

(३) **कुल्लूकः** । पूर्वत्रासमाप्तेः शरीरस्येत्यनेन नैष्ठिकब्रह्मचर्यमुक्तम् । नतत्रावध्यपेक्षा आसमावर्तनादित्यनेनचोपकुर्वाणकस्य सावधिब्रह्मचर्यमुक्तम् । अतस्तस्यैवगार्हस्थ्याधिकारः । तत्र कियदवधिविधौ ब्रह्मचर्ये तस्य गार्हस्थ्यमित्यपेक्षायामाह षट्त्रिंशदाब्दिकमिति । त्रयोवेदाऋग्यजुःसामाख्यास्तेषांसमाहारःत्रिवेदी तद्विषयंव्रतंस्वगृह्योक्तनियमसमूहरूपं-

षट्त्रिंशद्वर्षयावद्गुरुकुले चरितव्यं षट्त्रिंशदाब्दिकमितिषट्त्रिंशदब्दशब्दात्कालाठञ्। अभिमपक्षेसमस्याद्श्रुतत्वादिति-न्यायेनप्रतिवेदशाखंद्वादशवर्षाणिव्रतचरणम्। तदर्धिकमष्टादशवर्षाणि तत्रप्रतिवेदशाखंषट्। पादिकंनववर्षाणि तत्रप्रतिवेदशाखंत्रीणि यावताकालेनोक्तावधेरूर्ध्वमधोवा वेदान्गृह्णाति तावत्कालंवाव्रताचरणम्। विषमशिष्टत्वेपिपक्षाणामेकादेयास्तिस्रोदेयाःषड्देयाइतिवन्नियमफलेन्यूनापेक्षोविकल्पः। तथाचश्रुतिः नियमेनाधीतंवीर्यवत्तरंभवतीति। ग्रहणान्तिकपक्षसंदर्शनात्पूर्वोक्तपक्षत्रये ग्रहणादूर्ध्वमपि व्रतानुष्ठानमवगम्यते। अथर्ववेदस्यर्ग्वेदांशत्वेप्यृग्वेदंयजुर्वेदंसामवेदमथर्वाणंचतुर्थमितिछान्दोग्योपनिषदिचतुर्थवेदत्वेनकीर्तनात् अङ्गानि वेदाश्चत्वारइतिविष्णुपुराणादिवाक्येषु च पृथङ्निर्देशाच्चतुर्थवेदत्वेपिप्रायेणाभिचाराद्यर्थत्वात्यज्ञविद्यायामनुपयोगाच्चानिर्देशः। तथाहिऋग्वेदेनैवहौत्रंकुर्वन्यजुर्वेदेनाध्वर्यवंसामवेदेनौद्गात्रंयदेवत्रय्यैविद्यायै सूक्तंतेन ब्रह्मत्वमितिश्रुतेस्त्रयीसंपाद्यत्वंयज्ञानांज्ञायते। अयंचमानवस्त्रैवेदिकव्रतचर्याविधिर्नाथर्ववेदव्रतचर्यानिषेधयति तत्परत्वेवाक्यभेदप्रसङ्गाच्छ्रुत्यन्तरेवेदमात्रेव्रतश्रवणाच्च । यदाहयोगियाज्ञवल्क्यः प्रतिवेदंब्रह्मचर्यंद्वादशाब्दानि पञ्चवा ॥ १ ॥

(४) **राघवानन्दः**। ब्रह्मचर्येणैव निष्ठांसमाप्तिंमरणं गतोनैष्ठिकइति समाख्ययैव गार्हस्थ्यनिवृत्तिःसिद्धा। उपकुर्वाणस्य गार्हस्थ्यं तद्ब्रह्मचर्यस्य कालविकल्पंचाह षट्त्रिंशदितिद्वाभ्यां। वेदार्थानुष्ठाने सएव मुख्याधिकारीति। मानंपूर्ववेदादीत्युक्तमधुना मेयंवक्तव्यमिति मानमेययोःसंगतिः। त्रैवेदिकं त्रयाणांवेदानांसमाहारस्त्रिवेदी तद्ग्रहणप्रयोजनं त्रैवेदिकं व्रतं विशेष्यं। षट्त्रिंशत्संवत्सरैरदृष्टार्थैर्वेदत्रयस्य सर्वशाखाप्रत्ययमेकं कर्मेति न्यायात् शाखात्रयस्याध्ययनमवश्यंभावीति मेधागतवैजात्यात्तदर्धिकमष्टादशवर्षसाध्यं पादिकं नववर्षसाध्यं समस्याद्श्रुतत्वादित्यादिन्यायेनवा प्रतिशाखंस्वतन्त्रमदृष्टार्थंगृहीतेपि वेदे व्रतमिति विशेषणम्। तथाच द्वादशषट्त्रीणि वर्षाणि वेदव्रताचरणं अतएवोक्तम्। तपोविशेषैर्विविधैर्व्रतैश्च विधिचोदितैरिति। दुर्मेधसोनियमव्यावृत्तिमाह ग्रहणान्तिकमेववेति एतद्व्रतजातंनिर्विघ्नताध्ययनसमाप्त्यर्थमिति भट्टपादाः ॥ १ ॥

(५) **नन्दनः**। एवंप्रतिपादितस्य ब्रह्मचर्यस्याध्येतृसामर्थ्यानुरूपान्कालविकल्पानाह षट्त्रिंशदिति। षट्त्रिंशदब्दानांसमाहारः षट्त्रिंशदब्दं तत्रभवंषट्त्रिंशदाब्दिकम्। त्रैवेदिकमितिपदमप्येवम्। कृत्स्नवेदसंग्रहणार्थंत्रिशब्दः। पञ्चपाण्डवाइत्यत्रपञ्चशब्दवत्। मन्त्रत्रैविध्यनिबन्धनंहिवेदानांत्रित्वम्। तेनचतुर्थोऽपिवेदमन्त्रोमन्त्रात्मात्रिशब्देनसंगृह्यते। व्रतंचर्यंचरितव्यम्। तदर्धिकमष्टादशाब्दाः। एवंपादिकंग्रहणान्तिकम् ॥ १ ॥

(६) **रामचन्द्रः**। अतःपरंगृहस्थाश्रममारभते। गुरौ समीपे षट्त्रिंशदाब्दिकं षट्त्रिंशद्वर्षपर्यन्तंकुर्याच्च यत्त्रयाणांवेदानांसमाहारस्त्रिवेदी तद्ग्रहणंप्रयोजनं त्रैवेदिकंव्रतंचरित्रं द्वादशाब्दिकं षट्षट्पर्यन्तंवा व्रतंब्रह्मचर्यंचरेत्। ग्रहणादिमेव वा व्रतंचरेत्। गृहणक्रिया व्रतेन्तर्भवति वेदाधिगमस्य प्राग्विहितत्वात् ॥ १ ॥

वेदानधीत्य वेदौ वा वेदंवापि यथाक्रमम् ॥ अविप्लुतब्रह्मचर्योगृहस्थाश्रममावसेत् ॥ २ ॥

(१) **मेधातिथिः**। त्रैवेदिकमध्ययनमुक्तम्। एकद्विवेदाध्ययनमप्राप्तंविकल्प्यते। वेदशब्दः शाखावचनोव्याख्यातः। तिस्रःशाखाअधीयीत द्वेएकांवैकैकस्माद्वेदान्वेकस्मादेव। त्रयी त्रिविद्येति पठ्यते। अधीत्य गृहीत्वा वेदमुक्तया व्रतचर्यया गृहस्थाश्रममावसेत्। गृहस्थाश्रमस्य स्वरूपंवक्ष्यति उद्वहेतद्विजोभार्यामित्यादि। आवसेदनुतिष्ठेत्। अने-

(२) आवसेत्=आविशेत् (मेधा०)

कार्याधातवः । कृतदारपरिग्रहोरूढ्या गृहस्थउच्यते । गृहशब्दोदारवचनस्तत्रतिष्ठति । आङ्मर्यादायांवर्तते तस्य योविहितपदार्थसमूहोविधिनिषेधात्मकः सआश्रमशब्देनोच्यते यथोपनीतस्य ब्रह्मचर्याश्रम आसमावर्तनात्कृतविवाहस्य गार्हस्थ्यमिति । अविप्लुतमखण्डितंब्रह्मचर्यंस्त्रीसंप्रयोगनिवृत्तिर्यस्य सएवमुच्यते । वाक्यभेदश्चात्रद्रष्टव्यः । आख्यातव्यवहारेणाविप्लुतब्रह्मचर्योभवेद्गृहस्थाश्रमंचप्रतिपद्यते । एकवाक्यतायां कदाचनविप्लवे गार्हस्थ्याधिकारएवहीयेत अथ पुनः पुरुषार्थतया विधानेन तदतिक्रमे प्रायश्चित्तेन युज्यते नत्वधिकारी भवति अधीत्यावसेदिति च पौर्वापर्यमात्रंविवक्षितम् । नाध्ययनसमनंतरभाविता विवाहस्य यत्क्वार्यात्पौर्वापर्यविधानादानन्तर्यंन शब्दार्थः । अतश्चस्वाध्यायाध्ययनविवाहयोरन्तराले व्याकरणादिशास्त्रश्रवणंवेदार्थज्ञानार्थंलभ्यते विद्वानेवहिगार्हस्थ्येऽधिक्रियते । यथानाध्ययनविधौ मूर्खोयद्यपिबाल्यावस्थायांतिर्यक्समानधर्मा स्वमधिकारंप्रतिपत्तुमसमर्थस्तथापि पित्राचार्येण वाऽनुशाप्यते । वस्तुतस्तयोरेवाधिकारोऽपत्यानुशासने पितुरधिकारोऽपत्योत्पत्तिविधौ तावताभिनिर्वर्त्यत्वात् । अनुशासनंच विधिनिषेधाधिकारद्वयप्रतिपादनम् । तत्र यत्प्रतिपाद्यमानोऽपिनावबुध्यते तदन्धइव हस्तग्राहिकया कार्यते । यथाग्निसंस्पर्शकूपादिपाताद्वालोहस्तावष्टम्भोधार्यतएवमदृष्टादपि मद्यपानादेर्यथावानिच्छन्नौषधदानादौ प्रवर्तते एवंशास्त्रीयेष्वपि पदार्थेषु यदा त्वीषद्युत्पन्नस्तदैवंनियुज्यतइदमिदंकर्तुमर्हसीति । एवंसत्यधीतवेदोमाणवकः पित्राचार्येणैवंप्रबोधयितव्योगृहीतवानसिवेदंत्वमिदानींतदर्थजिज्ञासायामधिक्रियसे ततस्तदङ्गानि श्रोतुमर्हसीति । एतावता पितुरपत्योत्पादनाधिकारनिवृत्तिः । तदुक्तं कियतापुनरुत्पादितोभवतियावतास्वयमधिगतकृत्योभवतीति । अतःस्थितमेतत् नाधीत्यैवविवाहोयावद्वेदार्थोनाधिगतः । एवंच पदयोजना कर्तव्या अधीत्याध्ययने निवृत्तेऽप्यविप्लुतब्रह्मचर्यःस्यात् । मामायांच निवृत्तौ पुनर्वचनंनियमान्तराणांमधुमांसवर्जनादीनांनिवृत्तिपरम् । तेन यावदध्ययनंतावत्सर्वे नियमाअनुष्ठातव्याः । समाप्तेत्वध्ययनेऽर्थावबोधकाले स्त्रीनिवृत्तिरेव । ब्रह्मचर्यशब्दोयद्यपिब्रह्मग्रहणार्थंयद्व्रतग्रहणंतत्र व्युत्पाद्यते तथापि स्त्रीनिवृत्तिपरएवास्य तत्रप्रयोगइति दर्शयिष्यामः । यथाक्रमं यएवाध्येतॄणांपाठक्रमः प्रसिद्धस्तेनैव प्रथमंचतुःषष्टिस्ततोब्राह्मणंपितृपितामहाद्यभिजनप्रबन्धोपक्रमंभवति । नह्यीदृशेऽर्थेवक्तारो न कुलेन न शीलेन न क्रमेणेति । एतेनचैतत्प्रतिपादितंभवति याएव पित्रादिभिः शाखाधीतासापि नत्याज्येति ॥ २ ॥

(२) **सर्वज्ञनारायणः** । विद्यास्नानपक्षे शक्त्यपेक्षोविकल्पः । यथाक्रमंवेदत्रयाध्ययनपक्षेऋग्वेदादिक्रमेणैवा त्रेदाध्ययने तु यच्छाखीयसंस्कारैः संस्कृतस्तस्याएवादावध्ययनमित्यर्थः ॥ २ ॥

(३) **कुल्लूकः** । वेदशब्दोऽयंभिन्नवेदशाखापरः । स्वशाखाध्ययनपूर्वकवेदशाखात्रयंद्वयमेकांवा शाखांमन्त्रब्राह्मणक्रमेणाधीत्य । गृहस्थाश्रमंगृहस्थविहितकर्मकलापरूपमनुतिष्ठेत् । कृतदारपरिग्रहोगृहस्थः गृहशब्दस्य दारवचनत्वात् । अविप्लुतब्रह्मचर्यइति पूर्वविहितस्त्रीसंयोगमधुमांसभक्षणवर्जनरूपब्रह्मचर्यानुवादोऽयं प्रकृष्टाध्ययनाङ्गत्वख्यापनार्थः । पुरुषशक्त्यपेक्षश्चायमेकद्वित्रिशाखाध्ययनविकल्पः । यद्यपि व्रतानि वेदाध्ययनंच नित्यवदुपदिशता मनुनोभयस्नातकएव श्रेष्ठत्वादभिहितस्तथापि स्मृत्यन्तरादन्यस्नातकोपि बोद्धव्यः । तदाह हारीतः त्रयःस्नातकाभवन्ति विद्यास्नातकोव्रतस्नातकोविद्याव्रतस्नातकश्चेति । यः समाप्य वेदमसमाप्य व्रतानि समावर्ततेसविद्यास्नातकः । यः समाप्य व्रतान्यसमाप्यवेदंसमावर्तते सव्रतस्नातकः । उभयंसमाप्य समावर्तते यः सविद्याव्रतस्नातकः । याज्ञवल्क्योऽप्याह वेदंव्रतानि वा पारंनीत्वा ह्युभयमेव वेति ॥ २ ॥

(४) **राघवानन्दः** । शाखाम.त्राध्ययनमवश्यंभावीति त्रिंशदधिकैकादशशतशाखानांवेदचतुष्टयपरिमाणत्वात् पु-

कृषायुषम्ब्ध्येप्यध्येतुमशक्यत्वाद्वेदशब्दः शाखापरः । सर्वशाखाप्रत्ययमेकंकर्मेति न्यायात् सर्वशाखाविधित्वंचासिद्धमध्ये-तृभेदतइति भट्टस्वरसात् । अन्यथैकैकस्य संपूर्णवेदाध्ययने पुनरनुवादएव । वेदाध्ययनविधिरध्यापनाङ्गमिति गुरुः । अ-र्थावबोधाङ्गमिति भट्टाः । अक्षरावाप्तिपरमिति वेदान्तिप्रभृतयः । एतन्मतमेवसाधु । योनधीत्येत्यादिनिन्दार्थवादेनाध्यय-नस्य नित्यतावगमात्तत्र ऋग्वेदेन हौत्रं कुर्यात् । यजुर्वेदेनाध्वर्यवम् । सामवेदेनौद्गात्रम् । सदैवतंतथैव विधया सूक्तमप्या-म्नयेवेति स्मृतेः । तेन ब्रह्मत्वमित्यतोवेदत्रयसाध्यत्वात्सर्वकर्मणामतोन प्रवेशोथर्ववेदस्य अतएव वेदोनधीत्येति यथाक्रमं स्वशाखानुक्रमेण । अविप्लुतब्रह्मचर्यः अक्षतब्रह्मचर्यः ॥ २॥

(६) रामचन्द्रः । तद्यथा वेदेति । गृहस्थः अविप्लुतब्रह्मचर्योस्खलितब्रह्मचर्यो गृहस्थाश्रममावसेत् । किंकृत्वा वेदशब्दःशाखावयवेव्याख्यातः । वेदान्वेदौ वा वेदंवा यथाक्रमंशाखाक्रमेणाधीत्य ॥ २ ॥

तंप्रतीतंस्वधर्मेण ब्रह्मदायहरंपितुः ॥ स्रग्विणंतल्पआसीनमर्हयेत्प्रथमंगवा ॥ ३ ॥

(१) मेधातिथिः । तंब्रह्मदायहरंप्रथमंगवार्हयेत् ब्रह्मच दायश्च ते उभे हरति स्वीकरोतीति ब्रह्मदायहरः । दीयतइतिदायोधनंब्रह्मवेदोहरणमधिगमः । गृहीतवेदःपित्रा कृतविभागोगार्हस्थ्यंप्रतिपद्यते निर्धनस्यानधिकारात् । यदितु पिता निर्धनस्तदासांतानिकतया धनमर्जयित्वा विवाहयेत । अन्येतुब्रह्मैवदायोब्रह्मदायइतिपूर्वोक्तविध्यनुवादंमन्यन्ते-पितुरिति । ननुचाचार्यस्य माणवकाध्यापनेऽधिकारउक्तःकिमिदमुच्यतेपितुर्ब्रह्मदायहरमिति । उच्यते यस्य पिता विद्य-ते तस्य सएवाचार्यः । अभावे पितुरशक्तौवान्यस्याधिकारः । आचार्यान्तरोपादानेन पितुरधिकारोनिवर्ततएव स्वयंवा-ध्यापयत्यन्योपादाने न वेति न विशेषः । यदप्याहुर्वरोदक्षिणेत्युपनयने नित्यवद्दक्षिणाम्नानात्परकर्तृकत्वमेवेति तद-सत् । उपनयस्य ह्ययंविधिःवरोदक्षिणेति । उपनेता चपिता वाचार्योवा तौ द्वावपि स्वाधिकारप्रवृत्तौ नान्यन्तरमपेक्षेते आनमनार्थंहिदक्षिणादानम् । नचाधिकारान्तरतः प्रवृत्तस्यानतिरुपयुज्यते । तेनायंदक्षिणाशब्दआनमनार्थाभावादर्थाद्धिर-ण्यदानवददृष्टार्थदानोपलक्षणार्थोविज्ञेयः । पित्रैव चासौ तावता धनेन स्वामी कर्तव्योयेन वरदानमस्य संपद्यते । अ-भायमायहो नानत्यर्थाद्दानादतेदक्षिणाशब्दस्योपपत्तिः । नवा मुख्येसतिलक्षणान्याय्येति । एवंतर्हि यस्यपिता न तत्स्था-नीयोनाचार्यःसयदात्मानमुपनयेत्सत्यकामवत्तद्विषयोदक्षिणाविधिर्भविष्यति । तस्यापि चेषदपेतशैशवस्यात्मसंस्कारा-यास्त्येवाधिकारइतिप्रतिपादितम् । तस्मादुभयथा पितुरधिकारः । स्वयमुपनयमानस्यान्यमाचार्यमुपाददानस्य वा प्रती-तमभिमुखीभूतंगृहाश्रमप्रतिपत्तौ ननु नैष्ठिकंसमामाध्ययनविध्यर्थमपि ग्रामप्रतिपत्तौ । स्रग्विणं यावन्तः केचन गृह्य-कारैर्मधुपर्ककर्मणि धर्माआम्नातास्तेषांप्रदर्शनार्थमेतत् । तल्पआसीनं महार्हपर्यङ्कशयनोपविष्टम् । गवा मधुपर्केण । मधु-पर्केऽसौ विधिः पाक्षिकआम्नानः । अतोगोशब्देन तत्साधनकर्मशेषोलक्ष्यते अर्हयेत् पूजयेत् । अधिकारात्पिताचार्यो-वा । प्रथमंपूर्वविवाहात् । पूजाधिकाराईशयानंप्रतीतंस्वधर्मेणेत्यनुवादः । स्वधर्मेण ब्रह्मदायहरंस्वधर्मेणचार्हयेदितिसं-बन्धे न विशेषः ॥ ३ ॥

(२) सर्वज्ञनारायणः । ब्रह्मवेदं प्रतीतं प्राप्तवन्तं अधिगतवन्तमिति यावत् । दायहरंवित्तहरं पितुःपितृक्रमग्रहणार्हम् । अनैष्ठिकमिति यावत् । प्रथमंयस्य गृहेऽसावुपस्थितः सान्तानिकत्वेनार्थार्थितया सगवार्हयेत् इतिगोशब्दस्तत्सं-हत्चरितमधुपर्कपरः । स्रग्विणं तल्पआसीनमिति । माल्यासनविशेषाभ्यामर्चाभिप्रेता । तल्पे तूलिकादिमति शय्यारूप आसने ॥ ३ ॥

(३) कुल्लूकः । तंब्रह्मचारिधर्मानुष्ठानेन ख्यातम् । दीयतइति दायः ब्रह्मैव दायोब्रह्मदायः तंहरतीति ब्रह्मदायह-

रंपितुः । पितृतोगृहीतवेदमित्यर्थः । पितृतोऽध्ययनंमुख्यमुक्तंपितुरभावआचार्यादेरप्यधीतवेदंमाल्यालङ्कृतमुत्कृष्टशयनोपविष्टंगोसाधनमधुपर्केण पिताऽऽचार्योवा विवाहात्प्रथमंपूजयेत् ॥ ३ ॥

(४) **राघवानन्दः** । तंब्रह्मचारिणं प्रतीतंस्वधर्मानुष्ठानेन ख्यातं । ब्रह्मदायहरंपितुः पितृतोगृहीतवेदम् । अथवा स्वधर्मेणैव ब्रह्म वेदं प्रतीतंप्राप्तवन्तम् । पितुर्दायहरं नैष्ठिकव्यावृत्त्यर्थंपितुर्दायहरमित्युक्तं पितृतोऽध्ययनस्यानावश्यकत्वात् । स्रग्विणंसमलङ्कृतं । तल्पे शय्यायांगवा गोमता मधुपर्केण पिता आचार्योवा अर्हयेत् पूजयेत् ॥ ३ ॥

(५) **नन्दनः** । पितुःसकाशाद्ब्रह्मदायहरं ब्रह्म वेदस्तदर्थंदायोदानंदक्षिणा ' ब्रह्मदायस्तंहरतीतिब्रह्मदायहरंपितुः सकाशाद्गुरुदक्षिणांगृहीत्वागुरवे दत्तवन्तमित्यर्थः । प्रतीतंप्रतिगतंब्रह्मचर्यान्निवृत्तमितियावत् । स्रक्शब्दःसर्वालंकाराणामुपलक्षणम् । गोशब्दोऽश्वादीनाम् । अर्हयेतकन्याप्रदोगृहीवा ॥ ३ ॥

(६) **रामचन्द्रः** । तंप्रथमंपूजयेत् कीदृशंगुरुंस्वधर्मेण ख्यातं । पुनः कीदृशंब्रह्मदायहरंब्रह्मैव वेदएव धनंयस्य तस्य दाय अंशःतस्य हरं हरति स्वीकरोति तं । पुनः कीदृशंस्रग्विणं । पुनः कीदृशं तल्पमासीनमासनस्थम् ॥ ३ ॥

गुरुणानुमतः स्नात्वा समावृत्तो यथाविधि ॥ उद्वहेत द्विजोभार्यांसवर्णांलक्षणान्विताम् ॥ ४ ॥

(१) **मेधातिथिः** । सत्यामपि वेदव्रतसमाप्तौ गुरुणानुज्ञातः स्नायात् । स्नानशब्देन गृह्योक्तसंस्कारविशेषोलक्ष्यते ब्रह्मचारिधर्मावधिः । यथा चात्र लक्षणा तथाप्राग्व्याख्यातम् । तदहरेव गृह्यकारोक्तंकश्चिन्मधुपर्कपूजाविहितसंस्कारंप्राप्य समावृत्तोगुरुकुलात्पितृगृहंप्रत्यागतइत्यनुवादः । उद्वहेतेत्येतद्विधिशेषमेतत्सर्वंप्राप्तमेव । ननु समावर्तनंविवाहाङ्गम् । तेनयः पितृगृहएवाधीतवेदस्तस्यसमावृत्तस्य संभवत्येव विवाहः । केचित्समावर्तनंविवाहाङ्गंस्नानंमन्यन्ते । क्त्वाश्रुत्या भेदप्रतिपत्तिरितिचेदेवंतर्हि समावर्तनं विवाहाङ्गंस्नानसंस्कारंवक्ष्यति सविशेषंहि तत्र स्नानमाम्नातमेव स्नातकेनेत्यादि । अथवायमनियमत्यागाभिप्रायंसमावृत्तिवचनम् । समावृत्तः प्राक्तनीमेवावस्थांनियमरहितांप्रतिपन्नइत्यर्थः । विशेषाभिप्रायंत्वनियमत्यागवचनम् । ब्रह्मचारिणोहि सातिशयायमनियमानतथोत्तरेषाम् । यथाविधीतिस्वधर्मेणेतिवत् । उद्वहेत द्विजोभार्यां उद्वहेतेतिविवाहविधिःसंस्कारकर्मविवाहोभार्यामितिद्वितीयानिर्देशात् । नच प्राग्विवाहाद्भार्या सिद्धास्तियस्याविजाहसंस्कारःक्रियते न चक्षुषइवाञ्जनसंस्कारः । किंतर्हि निवर्त्यते विवाहेन । यथा यूपंछिनत्तीतिछेदनादयः संस्कारायस्य क्रियन्ते सयूपः एवंविवाहेनैव भार्या भवतीति विवाहशब्देन पाणिग्रहणमुच्यते तच्चात्रप्रधानम् । एवंहि स्मरन्तिविवाहंदारकर्म पाणिग्रहणमिति । इहापिवक्ष्यति पाणिग्रहणसंस्कारइति लाजहोमाद्यङ्गम् । तच्चगृह्यादखिलं ज्ञातव्यम् । नोद्वहेत्कपिलांकन्यामितिकन्याग्रहणात्कन्यायाअयंसंस्कारोनस्त्रीमात्रस्य । कन्याशब्दश्चात्रप्रकरणेऽप्रवृत्तपुंसंप्रयोगायांयोषितिवर्ततइतिवक्ष्यामः । सवर्णांसमानजातीयाम् । लक्षणान्विताम् । लक्षणानिअवैधव्यप्रजाधनसूचकानिवर्णरेखातिलकादिचिह्नानि ज्योतिःशास्त्रावगम्यानि तैरन्वितांयुक्तांशुभलक्षणान्वितामित्यर्थः । यद्यप्यनिष्टसूचकमपिलक्षणंभवति किंतु सूचकैरेवशास्त्रैस्तादृशींविवाहयेत् अतःप्रशस्तलक्षणालक्षणवतीद्रष्टव्या । अभिमेतसूचकएव लक्षणशब्दोलोकेप्रयुज्यते । सलक्षणोऽयंपुरुषः सलक्षणा स्त्रीति याशुभलक्षणासैवमुच्यते तत्राधिकारचिन्ता कर्तव्या संस्कारविधित्वादेवाधानवदनुष्ठानलाभात् यथैवह्याधानमाहवनीयादिद्वारेण नित्यकाम्यकर्मोपयोगि तदङ्गाहवनीयादिनिर्वृत्त्यर्थमनुष्ठीयते एवंविवाहोऽपि भार्यानिर्वर्तकत्वेन दृष्टादृष्टपुरुषार्थोपयोगित्वात् । तथाहि खेदात्पुंसः स्त्रीमात्रविषयार्थंप्रवृत्तौप्रसक्तायांकन्यापरदारनिषेधात्स्वदारेषु कामिनः खेदनिवृत्तिःसहधर्मश्चरितव्यःइति तया सह सर्वधर्मेष्वधिकारादृष्टपुरुषार्थसिद्धिस्तदधीना अत्र केचिन्मीमांसन्तेरागिणः । पूर्वोक्तेन प्रकारेण दृष्टसिद्ध्यर्थंविवाहंस्वतः कुर्वन्ति तेषांच कृतविवाहानांसंभवेत्सद्विजातिकर्मविधित्वेन

कर्मानुष्ठानसिद्ध्यर्थोविवाहः । यस्य कथंचित्स्त्रीनिष्ठानिवृत्तान तस्यविवाहः । असति विवाहेकर्मानधिकारादनधिकृतस्य-चाननुष्ठाने दोषाभावात्पुरुषार्थानुष्ठानान्यनुतिष्ठतो नाश्रमिणोप्यवस्थानमविरुद्धम् । तदेतदसत् यथैव कामः पुरुषार्थस्तथैव धर्मोऽपिपुरुषार्थंन्वेप्रयोजकः । सर्वोऽपि पुरुषार्थसिध्यर्थमवर्तते । यदि चैतदेवंस्यात्संवत्सरमनाश्रमीभूत्वेत्यादि नोपपद्येते-ति । निपुणंचैतदाश्रमविकल्पावसरे षष्ठे निर्णेष्यामः ॥ ४ ॥

(२) सर्वज्ञनारायणः । गुरुणेत्यादिना व्रतंतत्कर्तव्यंसंक्षिप्योक्तम् । स्नात्वा व्रतविद्यासमापननिमित्तवैधर्म्य-स्नानं गुरुकुलएव कृत्वा समावृत्तः गुरुगृहात्पितृगृहानागतः । यथाविधि स्वगृह्योक्तहोमादिकर्मपूर्वकं स्नात्वेत्यन्वयः । लक्ष-णमत्रंधव्यादिचिन्हम् ॥ ४ ॥

(३) कुल्लूकः । गुरुणा दत्तानुज्ञः स्वगृह्योक्तविधिना कृतस्नानसमावर्तनःसमानवर्णांशुभलक्षणांकन्यांविवहेत् ॥ ४॥

(४) राघवानन्दः । प्रकृतमुपसंहरति गुरुणेतिद्वाभ्यां । समावृत्तः समावर्तनंमौञ्जीत्यागप्रक्रिया गृह्योक्ता तया युक्तः । द्विजस्त्रैवर्णिकः सवर्णां समानजातिं । लक्षणान्वितां वक्ष्यमाणगुणां दुर्लक्षणहीनांच ॥ ४ ॥

(६) रामचन्द्रः । द्विजः सवर्णां लक्षणान्वितां भार्यामुद्वहेत् । कीदृशोद्विजः समावृत्तो गुरुकुलादागतः किंकृत्वा गुरुणाऽनुमत आश्रमःसन् स्नात्वा ॥ ४ ॥

असपिण्डा च या मातुरसगोत्रा च या पितुः ॥ सा प्रशस्ता द्विजातीनांदारकर्मणि मैथुने ॥ ५ ॥

(१) मेधातिथिः । यादृशी कन्या वोढव्या तामिदानींदर्शयति । मातुर्याऽसपिण्डा पितुश्च याऽसगोत्रा सा दारकर्मणि प्रशस्ता । सपिण्डग्रहणंमातृबन्धूपलक्षणार्थम् । मातुर्हिसापिण्ड्यंस्त्रीणांस्मृत्यन्तरे तृतीयपुरुषावधि । नतुत्रिभ्यऊर्ध्वंमातृब-न्धुभ्योविवाहइष्यते । किंतर्हिपञ्चमादूर्ध्वम् । एवंहि गौतमः पठति । ऊर्ध्वंसप्तमात्पितृबन्धुभ्योमातृबन्धुभ्यःपञ्चमादिति । ते-नयथाश्रुति समन्वयाभावात्सापिण्ड्याभावः स्मृत्यन्तरवशेन मातृसंबन्धितया व्याकरणीयः । तेनैवमुक्तंस्यात् मातुरन्वयजा या न भवति अवधिश्च गौतमीयएव तेन मातामहीमातामहयोर्यान्वयेजातासा पुत्रसंततेर्बान्धवसामीप्यात्पञ्चमीयावन्नविवा-हयितव्या । अतोमातृष्वसृतद्दुहितॄणांप्रमातामह्योसततिजानांच सर्वासांप्रतिषेधोबन्धुत्वाविशेषात् । असगोत्राचयापितुः गोत्रं-वसिष्ठभृगुगर्गादिवंशः स्मर्यते । समानगोत्रावसिष्ठान वसिष्ठैर्विवहन्ते न गर्गागर्गैः । वासिष्ठे तु मातृसगोत्रायाअपि प्रतिषेधः । परिणीय सगोत्रांतु समानप्रवरांतथा । कृत्वा तस्याः समुत्सर्गंद्विजश्चान्द्रायणंचरेत् ॥ मातुलस्य सुतांचैव मातृगोत्रांतथैव च ॥ गौतमेन तु पठ्यते असमानप्रवरैर्विवाहइति । तत्र गोत्रसमत्वे ऽसत्यपि प्रवरभेदश्चेद्युज्यते विवाहः । यतःस्मृत्यन्तरेषु-भयंनिषिध्यतेअसमानार्षगोत्रजामिति । आर्षप्रवरइत्येकोर्थः कथंपुनर्गोत्रभेदे समानार्षेयत्वम् । किमिति नभवतियदि-स्मर्यते श्रुतिस्मृतिप्रमाणकोऽयमर्थोनप्रत्यक्षगोचरोयेन विरोधः स्यात् । पुनरमी प्रवरानाम । अत्यल्पमिदमुच्यतेइदमपिव-क्तव्यंकिंपुनरेतद्ब्राह्मणत्वंनाम तथा कतरदेतद्गोत्रंनाम । यथैवसमाने पुरुषत्वे ब्राह्मणत्वादिविशेषः एवंसमाने ब्राह्मणत्वे वासिष्ठादिगोत्रभेदः प्रतिगोत्रंच समानार्षेयाणि । यस्यैतद्गोत्रंतस्यतैःशब्दैः प्रवराश्रयणंकर्तव्यम् । एवंविवाहनिषेधेऽपि । स्मरन्ति चसूत्रकारागोत्रभेदसंबन्धेनप्रवरान्यस्यैतद्गोत्रंतस्येमेप्रवराइति । गोत्रभेदस्तु तद्गोत्रजैरेवस्मर्यते वयंपराशरावय-मुपमन्यवइति । यद्यपि गोत्रवत्प्रवरानपिस्मरन्तितथापिबहुत्वात्कदाचिद्विस्मरेयुरितिगोत्रमुपलक्षणीकृत्यप्रवरस्मृतिरुपनि-बद्धा । गोत्रंनुस्मरन्ति । नच तस्य किंचिदुपलक्षणमस्ति यएवंरूपस्तस्येदंगोत्रमिति । एतावत्तत्स्मरणम् । यावद्गोत्रसंततिः-समानजातीयत्वम् । एषच गोत्रप्रवरभेदःब्राह्मणराजन्यविशाम् । तथाहि कल्पसूत्रकारः पौरोहित्याद्राजन्यवैश्ययोरिति । यद्यपि गोत्रविशेषव्यपदेशे सति ग्रामप्रतिषेधेनापि प्रवराधिकारे वचनमिदमुपपद्यते किंतु न तेषांगोत्रस्मरणमस्ति । कस्त्व-

---

(५) णिमैथुने=ण्यमैथुनी (मे०)

हि क्षत्रियवैश्ययोर्विवाहेपि बन्धूनामवधेर्नियमः। उच्यते। सर्ववर्णविषयमेतत् ऊर्ध्वंसप्तमातृपितृबंधुभ्यइति। इहाप्यसगोत्राचशब्दादसपिण्डा। तथाचानुवर्त्यमानः सपिण्डशब्दःपूर्ववद्बन्धुसंबन्धोपलक्षणार्थः। तेन पितृष्वसुरन्वयस्त्रीणामन्यासांच प्रपितामहसंततिस्त्रीणामासप्तमात्पुरुषात्प्रतिषेधःसिद्धोभवति। सप्तमपुरुषावधयः सपिण्डाः स्मर्यन्ते। अन्येतुगोत्रवंशमाहुः। नतत्रावध्यपेक्षा यावदेतज्ज्ञायते वयमेकवंशाइति तावदविवाहः। अस्मिन्नपि पक्षे असपिण्डाचेत्यनुवर्तते तेनपूर्ववत्पितृष्वस्रादिदुहितॄणांप्रतिषेधः। अस्मिंस्तु पक्षे समानार्षगोत्राणां प्रतिषेधोदुर्लभः। नहितत्रेतरेतरस्मिन् वयमेकवंश्याइति। उच्यते। ऐतिहासिकेन तद्दर्शनेनसमर्थयन्ते। तत्रहि वर्णयन्ति ऋषिर्वसिष्ठादिराद्योवंशस्य कर्ता तद्गोत्रास्ततःप्रसूताः प्रवराइति तत्पुत्रपौत्रास्तपोविद्याद्यतिशयगुणयोगेन प्रख्याततमाः स्मृत्यन्तरादेषएवनियमः। इदंत्वत्रनिरूप्यं यदेतत्समानप्रवरैरितितत्रनामधेयतस्तावत्समानत्वंनसंख्यातः। नामधेयसमानत्वे च कियत्र सर्वाण्येवसमानानि तत्र प्रतिषेधउतैकस्मिन्नपि समाने तत्र यदि समुदितानांप्रवरत्वं तत्र समानेकस्मिंश्चिद्भिन्नेऽन्यस्मिन्नन्यः समुदायःसंजातइत्यसमानप्रवरत्वाद्प्रतिषेधः। एवंचोपमन्यूनांपराशराणांचरयाद्विवाहःभिन्नंतयोर्गोत्रम्। एकउपमन्यवः अपरेपराशराः पूर्वेण च न्यायेन प्रवरभेदः। उपमन्यूनांवासिष्ठभारद्वाजैकपादिति प्रवराः। पराशराणांवासिष्ठगार्ग्यपाराशर्येति अथैकैकस्य प्रवरत्वमेकस्मिन्नपि समानप्रतिषेधः। तद्यथा माषानभोक्तव्यामिश्राअपि न भुज्यन्ते किंपुनरत्रयुक्तम् एकैकस्यप्रवरत्वम्। तथाहिसामानाधिकरण्यंदृश्यते एकंवृणीते द्वौ वृणीतेत्रीन्वृणीतइति प्रतिपन्नएकः। तत्साम्येप्याहैषामविवाहइति। द्विजातिग्रहणमुपलक्षणार्थम्। शूद्रस्यापि आसप्तमात्पितृतःइत्याद्यस्ति। दारकरणंदारक्रिया दारकर्म तत्र प्रशस्ताप्रशंसयाविहितेत्यर्थः। मैथुनी मिथुनेभवा मैथुनी न मैथुनी अमैथुनी। पितुरिति संबध्यते। पितृबीजादेवोत्पन्ना जातमात्रा। नियोगोविहितस्ततउत्पन्नायानास्ति पूर्वोक्तविशेषणैर्निषेधः। अतःपृथङ्निषिध्यते अमैथुनीतिततोनियोगोत्पन्ना कामतोन विवाह्या मैथुनीत्वात्। अन्येतु अमैथुने इतिपठन्ति। धर्मार्थे दारकर्मणिप्रशस्ता न मैथुने स्तुतिश्चेयंनप्रतिषेधः। ईदृशी योढासा सत्यपि मैथुने धर्मार्थैव भवति॥ ५॥

(२) **सर्वज्ञनारायणः**। समानएकःपिण्डोजनकोयेषांते सपिण्डशब्देनात्र ग्राह्याः। तथाच साक्षात्परंपरया वा योमातृजनकपिण्डोदेहस्ततोयेषांजन्म ते मातुःसपिण्डाइति। मातुःपञ्चमात् परतोर्वाक्षष्ठादिष्वपि विवाहनिषेधप्रसक्तौ स्मृत्यन्तरान्नियमः। यथा याज्ञवल्क्यः। पञ्चमात्सप्तमादूर्ध्वंमातृतःपितृतस्तथेति। अस्यार्थः। मातृतः परस्यामवरस्यांच मातृसहिततत्सपिण्डधारायांपञ्चमादूर्ध्वंपरतः स्त्रियमुद्वहेदिति। एवंच मातुःपूर्वे ये चत्वारउत्तरोत्तरक्रमेण सपिण्डास्तथा तत्सन्तानेप्यर्वाचीनाः प्रत्येकंचत्वारश्चत्वारस्तथा मातृतोर्वागपि चत्वारस्तत्सन्तानभूताश्च प्रत्येकंचत्वारः सपिण्डास्तदन्तर्भूता कन्या न विवाह्येति सिध्यति। एवंपितृतःसप्तमादित्यत्रापि व्याख्येयम्। मनुना ह्यसगोत्रा च यापितुरिति चकारात् असपिण्डाचेत्यनुकृष्टम्। तथा च तत्रापि अवध्यपेक्षायां याज्ञवल्क्यवचनादेव नियमः। तेन यथा मातृसपिण्डेषु पञ्चसङ्ख्यावधेस्तथा पितृसपिण्डेषु सप्तसङ्ख्येति। यत्तु स्मृत्यन्तरे मातृतःपञ्चमींपितृतःसप्तमीमुद्वहेदित्युक्तं तन्मातापितरौ विहाय गणनयेति ग्राह्यम्। एतच्च याज्ञवल्क्यवचनार्थेन मातुःपञ्चमादूर्ध्वंपितुश्चसप्तमादूर्ध्वंविवाह्यत्वंमातृसगोत्रत्वाभावएवेत्यसगोत्रेत्यनेन दर्शितम्। अतएव च सपिण्डपदस्यैकपिण्डप्रभवपरतानतुज्ञातिपरता ज्ञातीनांसगोत्रपदेनैवलाभात् तथाचसपिण्डपदेन मातापित्रोर्येमातुलादयस्तेपिलभ्यन्ते। अत्र च पितृसगोत्रमात्रे विवाहनिषेधार्थमसगोत्रा च या पितुरिति श्रुतितः पित्रासहागोत्रपदस्य पितुरन्वयोदर्शितः। मातृपक्षे तु यद्यप्यसपिण्डाच यामातुरिति चकारेणासगोत्रत्वाकर्षणात्पितृपक्षइव सामान्यतो मातुःसगोत्रमात्रे विवाहनिषेधःप्राप्तस्तथापि स्मृत्यन्तरे। मातुःसगोत्रामप्येक नेच्छन्त्युद्वा-

हकर्मणि । जन्मनाम्नोरविज्ञानउद्वहेदविशङ्कित इत्यभिधानात् ॥ यावदस्मिन्मातृकुलजादेस्तन्नाम्नोस्यां जन्मेति ज्ञायते । तावन्मातृसगोत्राणामविवाह्यत्वम् । तदूर्ध्वंतु न दोषइति । अत्र हि स्मृतिवाक्ये पूर्वार्धेन सामान्यतो मातृसगोत्राया अविवाह्यत्वंमतान्तरमाशङ्क्य जन्मनाम्नोरित्युत्तरार्धेस्वमतमुक्तमिति मातुःकन्यात्वसमये सगोत्रांमातामहसगोत्रामित्यर्थः । दारकर्मणि भार्यासाध्ययज्ञादिकर्मणिनिमित्ते विवाहंकर्तुंमशस्ता । अनिन्दिता तथा मैथुने स्त्रीपुंससाधारणसाध्ये सुरतकर्मण्यपि सैव प्रशस्ताऽनिन्दिता । यद्यप्येतदपि दारकर्मैव तथा पृथक्ग्रहणं विधिलङ्घनेन परदारप्रवृत्तस्यापि मातृसपिण्डादिगमने ऽधिकप्रायश्चित्तार्थं । द्विजातीनामिति तत्रप्राधान्यादुक्तं शूद्रस्यापि तत्परित्यागेनैवोद्वाहः । वरस्य कन्यकायाश्च यस्मात्सन्तानभेदस्तेन सह यत्र न सपिण्डता तत्रैव विवाहर्मिति दर्शयितुं मातापित्रोर्गोत्रसपिण्डवर्णनमिति नैकत्र निवृत्तौ विवोढुमाशङ्केत्येवं दर्शयितुम् ॥ ५ ॥

(३) **कुल्लूकः** । मातुर्या सपिण्डा न भवति । सप्तमपुरुषपर्यन्तंसपिण्डतांवक्ष्यति सपिण्डता तु पुरुषे सप्तमे विनिवर्ततइति । तेन मातामहादिवंशजा जाया न भवतीत्यर्थः । च शब्दान्मातृसगोत्रापि मातृवंशपरंपराजन्मनाम्नोःप्रत्यभिज्ञाने सति न विवाह्या तदितरा तु मातृसगोत्रा विवाह्येति संगृहीतम् । तथा च व्यासः सगोत्रांमातुरप्येके नेच्छन्त्युद्वाहकर्मणि । जन्मनाम्नोरविज्ञानउद्वहेदविशङ्कितः ॥ यत्तु मेधातिथिनावशिष्टनाम्ना मातृसगोत्रानिषेधवचनंलिखितम् । परिणीय सगोत्रांतु समानप्रवरांतथा । तस्यांकृत्वा समुत्सर्गंद्विजश्चान्द्रायणंचरेत् ॥ मातुलस्य सुतांचैव मातृगोत्रांतथैव चेति । तदपि मातृवंशजन्मनामपरिज्ञानविषयमेव । असगोत्रा च यापितुरिति पितुर्या सगोत्रा न भवति चकारात् पितृसपिण्डापि पितृव्यादि[1]सन्ततिभवा या न भवतीत्यर्थः । सा द्विजातीनांदारत्वसंपादके विवाहे प्रशस्ता मैथुनसाध्ये अग्न्याधानकर्मपुत्रोत्पादनादौचेति ॥ ५ ॥

(४) **राघवानन्दः** । किंच असपिण्डेति । असपिण्डा । सपिण्डता तु पुरुषे सप्तमे निवर्ततइति । तेन मातामहकुलजा न स्यात् । चकारान्मातृसगोत्रा च । जन्मनाम्नोर्विज्ञानेत्याज्ञानान्यथा । तथाच । व्यासः । सगोत्रांमातुरप्येके नेच्छन्त्युद्वाहकर्मणि । जन्मनाम्नोरविज्ञानेउद्वहेदविशङ्कितइति । वसिष्ठादिस्मृतिरपि एतदनुरोधेन नेया । ऊरूविजहीतामित्यादिश्रुत्युक्तापत्योत्पादकर्मणि मैथुने मिथुनसाध्येअग्न्याधानादौ च ॥ ५ ॥

(५) **नन्दनः** । सवर्णास्वपि नियममाह असपिण्डेति । सपिण्डतांवक्ष्यतिसाप्तपौरुषीं सपिण्डतातुपुरुषेसप्तमेविनिवर्ततइति । अमैथुनीअक्षतयोनिः ॥ ५ ॥

(६) **रामचन्द्रः** । अथ विवाहार्हामाह पञ्चमादिति युग्मेन । मातृतःमातुःसन्ताने पञ्चमादूर्ध्वंतथापितृतःपितुः सन्ताने सप्तमादूर्ध्वंमातुःसंताने असपिण्डाचशब्दान्मातुरसगोत्रा पितुःसन्ताने असगोत्रा ॥ ५ ॥

महान्त्यपि समृद्धानि गोजाविधनधान्यतः ॥ स्त्रीसम्बन्धे दशैतानि कुलानि परिवर्जयेत् ॥ ६ ॥

(१) **मेधातिथिः** । वक्ष्यमाणस्यप्रतिषेधस्यनिन्दार्थवादोऽयम् । समृद्धिः संपत्तिः । धनंविभवः । महान्त्यपिप्रकृष्टान्यपि । धनविशेषणार्थमाह गोजाविधनधान्यतः तृतीयार्थे तसिः । गोजाविधनेनचधान्येनच धनग्रहणंगोजादीनांविशेषणार्थम् । धनरूपाये गोजादयः कूटसंपन्नताहि धान्यम् । स्त्रीसंबन्धोविवाहः स्त्रीप्राप्त्यर्थसंबन्धः स्त्रीसंबन्धः ॥६॥

(२) **सर्वज्ञनारायणः** । धनंसुवर्णादि । एतेन गुणान्तरवद्भिस्तद्वत्तयापि विवाह्यतेति दर्शनम् ॥ ६ ॥

---

(१) पितृव्यादि=पितृष्वस्रादि (अ)

(३) कुल्लूकः । उत्कृष्टान्यपि गवादिभिः समृद्धान्यपीमानि दशकुलानि विवाहे त्यजेत् ॥ ६ ॥

(४) राघवानन्दः । किंच भार्यामित्यनेन प्राप्तानि कन्योत्पादककुलानि वर्जनीयतयाह महान्तीतिद्वाभ्यां । धान्यतः धान्यादिभिः समृद्धानियुक्तानि । अविशेषः । स्त्रीसंबन्धे स्त्रीकर्मकविवाहे ॥ ६ ॥

(५) नन्दनः । एतानिवक्ष्यमाणानि ॥ ६ ॥

(६) रामचन्द्रः । साद्विजातीनांब्राह्मणक्षत्रियविशांमैथुने दारकर्मणि अग्न्याधानादिधर्मपुत्रार्थं दारकर्मणि च प्रशस्ता सापिण्ड्येन रहिता एकःपिण्डोदेहोयस्याःसासपिण्डा न सपिण्डा असपिण्डा । पञ्चमात्सप्तमादूर्ध्वंसापिण्ड्यं निवर्तत इत्यर्थः । चतुर्थी मुद्वहेत्कन्यां पञ्चमीन तु पञ्चमीं चतुर्थः पञ्चमींनोद्वहेदित्यर्थः । वर्ज्यान्याह महान्तीति गोजाविधनधान्यतःसमृद्धानि महान्त्यपि अग्न्याधान सहितान्यपि स्त्रीसंबन्धे दशैतानि वर्जयेत् ॥ ६ ॥

हीनक्रियंनिष्पुरुषंनिश्छन्दोरोमशार्शसम् ॥ क्षय्यामयाव्यपस्मारिश्वित्रिकुष्ठिकुलानि च ॥ ७ ॥

(१) मेधातिथिः । हीनास्त्यक्ताःक्रियायस्मिन् कुले जातकर्मादयः । संस्कारानक्रियन्ते नित्याश्च पञ्चयज्ञादयः । निष्पुरुष स्त्रीप्रसु यत्र प्रायेण कन्याजायन्ते न पुमांसः । निश्छन्दः वेदाध्ययनवर्जितम् । रोमशार्शसम् द्वन्द्वैकवद्भावेन कुलद्वयंनिर्दिष्टम् बहुदीर्घैर्बाह्वादिषु लोमभिर्युतम् अर्शांसि गुदेन्द्रियगतान्यधिमांसनिबद्धानि तानिहिरोगरूपत्वात्पीडाकराणि । क्षयोराजयक्ष्माव्याधिः । आमयावीमंदाग्निर्यस्यभुक्तमन्नंसम्यग्नजीर्यति । अपस्मारःस्मृतिभ्रंशाद्युपघातकृत् । श्वित्रं शरीरगता च्छेदवती श्वेतता कुष्ठंप्रसिद्धम् । सर्वएते व्याधिविशेषवचनाः शब्दारोमशादारभ्य मत्वर्थीयप्रत्ययान्तानिर्दिष्टाः । पूर्वैर्व्याख्यातृभिर्दृष्टमूलतास्य प्रतिषेधस्य वर्णिता । मातुः कुलेद्विपदोनुहरन्ति । ततोहीनक्रियादीनांया प्रजा साऽपि तच्छीला स्यात् । व्याधयश्चसंक्रामन्ति । एवंहि वैद्यके पठ्यते सर्वेसंक्रामिणोरोगावर्जयित्वा प्रवाहिकाम् ॥ ७ ॥

(२) सर्वज्ञनारायणः । निश्छन्दोनिर्वेदं । आमयोग्निमान्द्यं कुष्ठंमांसादिक्लेदं कायौदुम्बरादि । हीनक्रियंकुलंयत्र प्रायस्तादृशाएव । एवमुत्तरत्र हीनक्रियमित्यादीनि कुलानि पञ्चविग्रहोक्तानि । यथा कुष्ठादिकुलानि पञ्चेत्येवंदशकुलानीति योजनीम् ॥ ७ ॥

(३) कुल्लूकः । तानिकानीत्याह हीनक्रियमिति । जातकर्मादिक्रियारहितंस्त्रीजनकंवेदाध्यापनशून्यंबहुदीर्घरोमान्वितमर्शोनामव्याधियुक्तम् क्षयोराजयक्ष्मामन्दानलापस्मारश्वित्रकुष्ठयुक्तानांच कुलानि वर्जयेदिति पूर्वक्रियासंबन्धः । दृष्टमूलताचास्य प्रतिषेधस्य मातुलवदुत्पन्नाअनुवहन्ते । तेन हीनक्रियादिकुलात्परिणीतायांसंततिरपि तादृशी स्यात् । व्याधय सञ्चारिणइति वैद्यकाःपठन्ति । सर्वेसङ्क्रामिणोरोगावर्जयित्वा प्रवाहिकामिति । अवेदमूला कथमियंप्रमाणमितिचेन्न । दृष्टार्थतयैव प्रामाण्यसंभवात् । तदुक्तं भविष्यपुराणे । सर्वाएतावेदमूलादृष्टार्थाः परिन्दत्य तु । मीमांसाभाष्यकारेणापि स्मृत्यधिकरणेऽभिहितम् येदृष्टार्थास्तेतत्प्रमाणं ये त्वदृष्टार्थास्तेषुवैदिकशब्दानुमानमिति ॥ ७ ॥

(४) राघवानन्दः । हीनक्रियंपित्रादेर्जातकर्मादिराहित्यं यत्र । निष्पुरुषं स्त्रीजननप्रधानं । निश्छन्दोवेदाध्ययनशून्यं । रोमशं बहुदीर्घरोमयुक्तं । अर्शसं अर्शोरोगयुक्तं । क्षयोराजयक्ष्मा कासः तद्युक्तं । आमयावि नित्यमन्दानलयुक्तं । अपस्मारोवायुविशेषस्तद्युक्तं । श्वित्रि श्वेतत्वग्विशेषयुक्तम् ॥ ७ ॥

(५) नन्दनः । हीनक्रियंश्रौतस्मार्ताचारहीनम् । निष्पुरुषंस्त्रीशेषम् । तद्वर्जयेत् । कुतः संतत्यभावानुसारात् । निश्छन्दोनिरध्ययनम् । रोमशंरोमबहुलम् । तद्वर्जयेत् । कुतःनिर्कृतिरूपत्वात् । तथाहिश्रुतिःनिर्कृत्यै विकृतदेहरूपंरोम-

शपशुमालभेत साह्यस्याःस्वातनुरितिअर्शोस्यास्तीत्यर्शसंतद्वर्जयेत् । कुतः व्याधिसंक्रान्तिभयात् एतेन क्षयादीनि व्याख्यातानि । क्षयि क्षयरोगयुक्तं । आमयामहोदरादयः । तद्युक्तमामयावि । कुलानीतिव्यस्तम् । चकारः प्रत्येकंसंबध्यते ॥ ७ ॥

(६) रामचन्द्रः । तानि दश कुलान्याह हीनक्रियमिति जातकर्मादिसंस्कार पञ्चयज्ञरहितं कुलंनिष्पुरुषं निश्छंदोनिर्गतश्छन्दोवेदोयस्मात्तन्निच्छन्दः । रोमशार्शसंअर्शोरोगोवर्ततेयत्रतदर्शसंकुलं । गुह्ये रोमरूपत्वात् रोमसहितं । यत्र क्षय आमयोवा कुलमपस्मारिश्चित्रकुष्ठि एतानि कुलानि वर्जयेत् ॥ ७ ॥

नोद्वहेत्कपिलांकन्यांनाधिकाङ्गींनरोगिणीम् ॥ नालोमिकांनातिलोमां न वाचाटांनपिङ्गलाम् ॥ ८ ॥

(१) मेधातिथिः । पूर्वः कुलाश्रयः प्रतिषेधः । अयंतु स्वरूपाश्रयः । यस्या अग्निवर्णाः कनकवर्णावा केशाः सा कपिला । अधिकाङ्गीषडङ्गुलिः । रोगिणीबहुरोगा दुष्प्रतिकारव्याधिगृहीताच । भूम्नीणिर्मत्वर्थीयोनित्ययोगेवा । अलोमिका अकेशा । लोमानिकेशाअप्युच्यन्ते । बाहुमध्येजङ्घाद्वयेवासर्वलोम्नामभावः । वाचाला स्वल्पएव वक्तव्ये बहुलंपरुषंच भाषते । पिङ्गला अक्षिरोगेण मण्डलाक्षीकपिलपिङ्गलाक्षीवा ॥ ८ ॥

(२) सर्वज्ञनारायणः । न रोगिणींस्वतःक्षयादिव्याधिमतीं । पूर्वंकुले तेषांप्रायिकत्वेन कन्यानांसंभावनामात्रेणाविवाहतोक्ता । अत्र तु तस्यांतन्निश्चयेनेति विशेषः । पिङ्गलाभामरक्तगौरवर्णाम् ॥ ८ ॥

(३) कुल्लूकः । कुलाश्रयंप्रतिषेधमभिधाय कन्यास्वरूपाश्रयप्रतिषेधमाह नोद्वहेदिति । कपिलकेशांनित्यव्याधितामविद्यमानलोमांप्रचुरलोमांबहुपरुषभाषिणीं पिङ्गलाक्षींकन्यांनोपयच्छेत् ॥ ८ ॥

(४) राघवानन्दः । वर्जनार्थं कन्यां विशिनष्टि नेति द्वाभ्यां । कपिलांकपिलकेशां वर्णतोवा । नाधिकाङ्गीं षडङ्गुलादिकां । न्यूनाङ्गींचतुरङ्गुलादिकां । न वाचाटां न बहुभाषिणीं । न पिङ्गलां चक्षुषोः मार्जारचक्षुषीमित्यर्थः ॥ ८ ॥

(५) नन्दनः । कपिलांकेशाक्षिभिःत्वचाचपिङ्गलाम् ॥ ८ ॥ ॥

(६) रामचन्द्रः । कनकंवर्णाः केशायस्याः सातां । कपिलांच कन्यां नोद्वहेत् एतादृश्यःनोद्वाह्याः कपिलादिपिङ्गलान्ताः । वाचाटां परुषभाषिणीम् ॥ ८ ॥

नर्क्षवृक्षनदीनाम्नीं नान्त्यपर्वतनामिकाम् ॥ न पक्ष्यहिप्रेष्यनाम्नीं न च भीषणनामिकाम् ॥ ९ ॥

[नातिस्थूलां नातिकृशां न दीर्घां नातिवामनाम् ॥ वयोऽधिकां नाङ्गहीनां न सेवेत्कलहप्रियाम्+ ॥]

(१) मेधातिथिः । ऋक्षंनक्षत्रंतन्नामिकाआर्द्राज्येष्ठाइत्यादि । वृक्षनाम्नींशिंशपाआमलकीति । नदीगङ्गायमुनातन्नाम्नी । ऋक्षाणि च वृक्षाश्च नद्यश्चेतिद्वन्द्वःतासांनामानीति षष्ठीसमासः । ततोद्वितीयेन नामशब्देनोत्तरपदलोपोसमासः । अन्त्यनामिकाबर्बरीशबरीत्यादि । पर्वताविन्ध्यमलयादयःपूर्ववत्समासात्कप्रत्ययः । पक्षिनाम्नीशुकीसारिका । अहिः सर्पस्तन्नाम्नी व्यालीभुजङ्गी । प्रेष्या दासी चेटी वाली । बिभीषणंनाम भयजनकंडाकिनीराक्षसी ॥ ९ ॥

(२) सर्वज्ञनारायणः । अन्त्यश्चाण्डालादिः तज्जातिनाम्नीं चाण्डालीत्यादिनाम्नीं । पर्वतनामिकांविन्ध्याहिमेत्यादिनाम्नीं । प्रेष्यनाम्नीं दासीत्यादिनाम्नीं । भीषणंनाम चामुण्डेत्यादि ॥ ९ ॥

+ अयं (क, ग, ञ, ल,) चिन्हितेषुमूले । (च) चिन्हितपुस्तके टीकायां वर्तते ।

(३) **कुल्लूकः** । ऋक्षंनक्षत्रंतन्नामिकामार्द्रांरेवतीत्यादिकामेवंतरुनदीम्लेच्छपर्वतपक्षिसर्पदासभयानकनामिकांक-न्यांनोद्वहेत् ॥ ९ ॥

(४) **राघवानन्दः** । नर्क्षवृक्षेति । तारा अश्विनी आमलकी हरीतकी नदीदृषद्वती इत्यादिनाम्नीम् । अन्त्योम्ले-च्छःतेन यवनी म्लेच्छेति । पर्वतनामिकां शिलामयीं । पक्षिर्गरुडा । अहिः पन्नगी । प्रेष्याअमुकदासी । भीषणनामिकां उग्रेत्यादिकाम् । ॥ ९ ॥

(५) **नन्दनः** । ऋक्षनाम्नी आर्द्रेत्यादि । वृक्षनाम्नीशिंशपेत्यादि । नदीनाम्नी गङ्गेत्यादि । अन्त्यनाम्नी मातङ्गी-त्यादि । पर्वतनाम्नी विन्ध्येत्यादि । पक्षिनाम्नी शुकीत्यादि । अहिनाम्नीनागीत्यादि । प्रेष्यनाम्नी दासीत्यादि । भीषणना-म्नी हिडिम्बेत्यादि । अदृष्टार्थोऽयंनिषेधः ॥ ९ ॥

(६) **रामचन्द्रः** । ऋक्षनाम्नीं नक्षत्रनाम्नींन विवाहयेत् । अन्त्यजनाम्नीं पर्वतनाम्नींचनो द्वहेत् । विभीषणना-म्नींभयानकनाम्नींनविवाहयेत् ॥ ९ ॥

अव्यङ्गाङ्गीं सौम्यनाम्नीं हंसवारणगामिनीम् ॥ तनुलोमकेशदशनांमृद्वंगीमुद्वहेत्स्त्रियम् ॥ १० ॥

(१) **मेधातिथिः** । अव्यङ्गान्यङ्गानि यस्या सैवमुच्यते । अव्यङ्गशब्दोऽवैकल्यवचनःप्रवीणोदारादिशब्दवद्यद्यपि व्युत्पाद्यते विकलान्यङ्गानि यस्येति अतश्चाङ्गशब्दस्य द्वितीयस्यावयविनिशक्तत्तौचित्येन संस्थानस्य परिपूर्णता सा-ऽव्यङ्गशब्देनोच्यते । सौम्यंमधुरंनामस्त्रीणांसुखोद्यमत्रदर्शितम् । हंसइववारणइवगच्छति यादृशी हंसानांहस्तिनांच विला-सवती मन्थरागतिर्यस्याः । तनुशब्दोनाल्पवचनः किंतर्ह्यानुपरिभावे वर्ततेतन्वङ्गीसोच्यते नातिस्थूला नातिकृशेति मृदूनि सुस्पर्शाकठिनापरुषाण्यङ्गानि यस्याः सा तामुद्वहेत्स्त्रियंकन्याधिकारात्कन्याम् । यद्येवंनालोमिकामित्यादिप्रतिषेधोऽनर्थको-ऽस्मादेवविधानात्यानैवंरूपा तस्याअविवाह्यता सिद्धा सत्यमेवंएकएवार्थोद्वाभ्यांविधिमुखेन प्रतिषेधमुखेन चोद्यमानस्तु-स्पष्टोबुध्यते । कन्याशब्दश्चात्रप्रकरणादननुभूतसंभोगासु स्त्रीषु प्रवर्तते । तथाचवसिष्ठः अस्पृष्टमैथुनांसदृशींभार्यांविन्देतेति । नचान्येन संस्कृतान्येनपुनः संस्कर्तुंशक्या कृतस्यकरणाभावात् । अतश्चोढायाअप्रवृत्तभर्तृसंयोगायाः कथंचित्स्वैरिणीत्वे भर्तृप्रवासादिनानान्येन विवाहोऽस्तिसत्यपिकन्यात्वे । तथाचेदृशीवसिष्ठोक्तिर्मध्येपठिता । अन्यत्राप्युक्तमनन्यपूर्वांयवी यसींभ्रातृमतींस्त्रियमुद्वहेतेति ॥ १० ॥

(२) **सर्वज्ञनारायणः** । अव्यङ्गाङ्गीं अंङ्गेष्वपि यस्यानव्यङ्गत्वं अङ्गाङ्गेष्वपि नखादिषु यस्यावैकल्यंनास्तीत्यर्थः । तथा विभीषणनामत्वाभावेपि सौम्यशांतंनाम यस्याःसाविवाह्याः । तथा विभीषणनामनिषेधःप्रत्यवायाधिक्यार्थः । तनवःसूक्ष्माः केशाःशिरोरुहाः । अत्र येषु दृष्टविरोधित्वंदोषाणांतेषु सत्स्वपि विवाहे भार्यात्वसिद्धिर्यत्र दृष्ट विरोधा दर्शनं तद्दोषवत्याविवाहे भार्यात्वमेव न सिद्ध्यतीति कश्चित् तनु प्रमाणाभावात् नक्षत्रनामत्वादावपि भार्यात्वासिद्धि प्रसंगेन व्यवहारविरोधाच्चायुक्तम् । केवलंनिषेधादृष्टे विरोधशून्ये दोषेषु परिणेतुः पापोत्पत्तिमात्रमनुमन्तुंयुक्तमिति ॥ १०॥

(३) **कुल्लूकः** । अविकलाङ्गींमधुरसुखोद्यनाम्नींहंसगजरुचिरगमनामनतिस्थूललोमकेशदशनांकोमलाङ्गींकन्यामु-द्वहेत् ॥ १० ॥

(४) **राघवानन्दः** । उद्वहनयोग्यामाह । अव्यङ्गेति । न्यूनाधिककुब्जाद्यङ्गरहितां । सौम्यनाम्नीं शशिनीचन्द्रि-

---

(१०) तनुलोम=तन्वोष्ठ (मेधा०)

केत्यादिनाम्नीं । हंसवारणगामिनीं हंसवत् वारणोहस्ती तद्वद्गमनशीलां । अत्र विधिनिषेधौ अभ्युदयानभ्युदयफलौ ॥ १० ॥

(५) **नन्दनः** । अङ्गशब्दोवयवेशरीरेच ॥ १० ॥

(६) **रामचन्द्रः** । एतादृशींउद्वहेत् । अव्यङ्गाङ्गीं अव्यङ्गमङ्गंयस्याःसा तां । सौम्यनाम्नींसौम्यंनाम यस्याःसा तां अछिन्नाङ्गीमित्यर्थः ॥ १० ॥

यस्यास्तु न भवेद्भ्राता न विज्ञायेत वा पिता ॥ नोपयच्छेत तां प्राज्ञः पुत्रिकाधर्मशङ्कया ॥११॥

(१) **मेधातिथिः** । यस्याभ्रातानास्ति तां न विवहेत्पुत्रिकाधर्मशङ्कया पुत्रिकात्वशङ्कया पुत्रिकाधर्मःकदाचिदस्याः कृतोभवेत्पित्रेत्यनयाशङ्कया । अनेन संदेहेन कथंचेयंशङ्काभवति यदिन विज्ञायेतपितादेशान्तरेप्रोषितोमृतोवा सा च मात्रा पितृसपिण्डैर्वादीयते । प्राप्तकालापि पितर्यसंनिहितएतैरपि दातव्येति स्मर्यते । स्मृतिंचोत्तरतोदर्शयिष्यामः । पितरि तुसंविज्ञायमाने नास्ति पुत्रिकात्वशङ्का सहि स्वयमेवाह कृता वा न कृतावेति । वाशब्दश्चेच्छब्दार्थे द्रष्टव्यः । यदिपिता नविज्ञायेत तदा कन्यका न वोढव्या । अन्येतुस्वतन्त्रमेतत्प्रतिषेधद्वयमाचक्षते । यद्यपि पिता न विज्ञायते अनेनेयंजातेति गूढोत्पन्नायाः प्रतिषेधः । एवंचसंबन्धः यस्याभ्राता नास्ति तांपुत्रिकात्वशङ्कया नोपयच्छेत । नविज्ञायत इत्यत्र पुत्रिकाशङ्कयेत्येतन्न संबध्यते । अस्मिन्प्रकरणे यत्र नास्तिदृष्टगतःप्रतिषेधः यथाअसपिण्डाचेत्यत्रश्लोके । तदतिक्रमे विवाहस्वरूपानिर्वृत्तिरेव । अतः सगोत्रादिविवाहः कृतोऽप्यकृतएवविध्यवगमरूपत्वादाधानवद्विवाहस्य विध्यतिक्रमरूपादवगमात् । यथाधानविधौयत्किंचिदङ्गंनज्ञातं तदभावे नाहवनीयादिनिर्वृत्तिः एवमसगोत्रादिकायान भार्यात्वम् तस्मात्त्याज्यैव कृता तादृशसंस्कारप्रतिरूपिकापि । तत्रभवन्तोवसिष्ठादयः प्रायश्चित्तमपिस्मरन्ति तादृशविवाहे यद्यपि कर्मणएवतदङ्गप्रतिषेधातिक्रमे वैगुण्यंन साक्षात्पुरुषस्य दोषः । तथापि वाचनिकंप्रायश्चित्तम् । अथवा सगोत्रागमनंनिषिद्धम् । तदर्थेव्यापारेप्रवर्तमाने यदुक्तंतत्प्रायश्चित्तंभवेत् । यस्तुहीनक्रियादिप्रतिषेधस्तस्यदृष्टदर्शनमूलत्वान्निर्वर्तनेविवाहः भवत्यसौ भार्या नास्ति तस्यास्त्यागः । एवमर्थएवमहान्त्यपीतिपूर्वस्मात्प्रतिषेधाद्भेदः स्तवनार्थपठितः । एवमेवच शिष्टसमाचारः । कदाचित्कपिलादिरूपामुपयच्छति न सगोत्राम् ॥ ११ ॥

(२) **सर्वज्ञनारायणः** । न भवेन्नोत्पद्येत न विज्ञायेत कुलप्रवृत्तादिना प्रसिद्धिः सन्तत्यन्तराभावेनापरिभाषितपुत्रिकाशङ्कयाआद्यायान विवाहः । द्वितीयस्याअधर्मशङ्कया व्रात्यकन्यादिपरिणयकृतपापशङ्कयेति क्रमादन्वयः । अत्र पितेति विशेषोक्तेर्मातुरविज्ञानेपि न तादृशोदोषइत्युपदर्शितम् ॥ ११ ॥

(३) **कुल्लूकः** । अत्रविधिनिषेधयोरभिधानमनिषिद्धविहितकन्यापरिणयनमभ्युदयार्थमितिदर्शयितुमाह यस्येति । यस्याः पुनर्भ्राता नास्ति तांपुत्रिकाशङ्कया नोद्वहेत् । यदपत्यंभवदस्यास्तन्मम स्यात्स्वधाकरमित्यभिसंधानमात्रादपि पुत्रिका भवति अभिसंधिमात्रात्पुत्रिकेत्येकइति गौतमस्मरणात् । यस्यावाविशेषेण पिता न ज्ञायतेऽनेनेयमुत्पन्नेति तामपि नोद्वहेत्। अत्र च पुत्रिकाधर्मशङ्कयेतिन योजनीयमिति केचित्। गोविन्दराजस्त्वाह भिन्नपितृकयोरप्येकमातृकयोर्भ्रातृत्वप्रसिद्धेः सभ्रातृकत्वेपि यस्याविशेषेणपिता न ज्ञायते तामपि पुत्रिकाशङ्कयैव नोद्वहेदिति । मेधातिथिस्तु एकमेवेमंपक्षमाह । यस्यास्तु भ्राता नास्ति तांपुत्रिकाशङ्कया नोपयच्छेत् पिताचेन्नज्ञायते प्रोषितोमृतोवा वा शब्दश्चेदर्थे पितरि तु विद्यमाने तदीयवाक्यादेव पुत्रिकात्वाभावमवगम्या भ्रातृकापि वोढव्येति । अस्माकंतु विकल्पस्वरसादिदंप्रतिभाति यस्याविशेषेणपिता न ज्ञायते तामभिजारजत्वेनाधर्मशङ्कया नोद्वहेत् । अत्र च पक्षे पुत्रिकाधर्मशङ्कयेति पुत्रिकाचाधर्मश्च

तयोः शङ्का पुत्रिकाधर्मशङ्कातयेति यथासंख्यंयोजनीयम् । अत्र च प्रकरणे सगोत्रापरिणयने सगोत्रांचेदमत्योपयच्छे-न्मातृवदेनांबिभृयादितिपरित्यागश्रवणात्परिणीय सगोत्रांचेति प्रायश्चित्तश्रवणाच्च तत्र तत्समभिव्याहृते च मातृसपिण्डा-परिणयनादौ भार्यात्वमेव न भवति भार्याशब्दस्याहवनीयादिवत्संस्कारवचनत्वात् । येषांपुनर्दृष्टगुणदोषमूलके विधिनिषे-धाभिधाने यथाहीनक्रियमितिन तदतिक्रमे भार्यात्वाभावः । अतएव मनुना महान्त्यपि समृद्धानीत्यादि पृथक्करणंकृतम् एतन्मध्यपतितश्च नर्क्षवृक्षनदीनाम्नीमित्यादिप्रतिषेधोपि न भार्यात्वाभावफलकः किंत्वत्र शास्त्रातिक्रमात्प्रायश्चित्तमा-त्रम् ॥ ११ ॥

(४) **राघवानन्दः** । पुनरयोग्यांतामाह यस्यास्त्विति । न ज्ञायते पिता प्रसिद्धितोऽदृष्टतोवा तत्र हेतुःपुत्रिकेति । पुत्रिकात्वेन मनसानियुक्ताअथवानिःशङ्काप्राज्ञातपितृकत्वेन जारजमद्यपजात्यधर्मशङ्कयेति । पुत्रिका च अधर्मश्च तयोः-शङ्कयावा ॥ ११ ॥

(५) **नन्दनः** । अपुत्रेणपित्रा जनिष्यमाणानांदुहितृपुत्राणांस्वसंतानसंकल्पः पुत्रिकाधर्मः । भ्रातुरभावएवपुत्रिका-धर्मशङ्का भवति सति पुत्रे पुत्रिकाधर्मस्य शास्त्रैरननुमतत्वेनाकिंचित्करत्वात् । ज्ञाते पितरि तु जातापिपुत्रिकाधर्मशङ्का कथंचिन्निवर्तयितुंशक्यते । नपुनरज्ञाते । तेनोक्तंनविज्ञायेत वा पितेति ॥ ११ ॥

(६) **रामचन्द्रः** । यस्याः कन्यायाः भ्राता न भवेत् पितावा न विज्ञायते तांकन्यांप्राज्ञःपुत्रिकाधर्मशङ्कया नोपयच्छेन्नोद्वहेत् ॥ ११ ॥

सवर्णाग्रे द्विजातीनां प्रशस्ता दारकर्मणि ॥ कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशोऽवराः॥१२॥

(१) **मेधातिथिः** । उद्वहेत द्विजोभार्यामिति सत्यपि द्वितीयानिर्देशे भार्यायाः प्रधानत्वे च गुणकर्मत्वे विवाहस्य विवक्षितमेकत्वम् अनुद्देश्यगतत्वात् । यथायूपंछिनत्तीति । यस्यान्यतः स्वरूपमवगतंतस्यान्यत्रकार्यान्तरविधानार्थमनूद्य-मानस्य यथावगतस्वरूपस्यैवानुवादोभवतियथाग्रहंसंमार्ष्टीति । पूर्वावगतिसापेक्षत्वादनुवादस्य । निर्ज्ञातसंख्याकाहिग्रहाद-शएतानध्वर्युः प्रातः सवने ग्रहान्गृण्हातीत्यादिवाक्यैः कार्यंचावगतंग्रहैर्जुहोतीति । अतोवगत्यन्तरापेक्षत्वाद्ग्रहशब्दस्य न विवक्ष्यते संख्या । इहतु भार्यालक्षणोऽर्थोनान्यतः सिद्धोऽस्मादेव वाक्यादवगन्तव्योऽतोयथाश्रुति प्रतीयते प्रातिपदिकार्थ-वत्संख्यापि विवक्षितेति । पञ्चमे चैतद्विस्तरस्तर्केण वक्ष्यते । स्थितायांसंख्याविवक्षायांद्वितीयस्याः कृतेऽपि पाणिग्रहणे न भार्यात्वं यथासत्यावहनीये न द्वितीयआहवनीयः। इष्यते च क्वचिन्निमित्ते भार्यान्तरपरिग्रहस्तदर्थमिदमारभ्यते । एत-देवाभिप्रेत्य गौतमीयेपठितम् प्रजासंपन्नेदारेनान्यांकुर्वीत अन्यतरापायेतु कुर्वीतेति । सवर्णा समानजातीया सातावदग्रे प्र-थमतोऽकृतविजातीयदारपरिग्रहस्य प्रशस्ता । कृते सवर्णाविवाहे यदितस्यांकथंचित्प्रीतिर्नभवतिकृतावपत्यार्थोव्यापारोन निष्पद्यते । तदाकामहेतुकायांप्रवृत्ताविमावक्ष्यमाणाः सवर्णावराः श्रेष्ठाः शास्त्रात्तु ज्ञातव्याः। अंतएकत्वस्य सवर्णनियमस्य चायमपवादः । ननुच सवर्णाविवाहे पारतन्त्र्यंप्रतीयते नसवर्णायाबहुत्वं एकत्वसंख्यातिक्रमस्तावत्प्रतीयते । असवर्णा-भ्यनुज्ञानेनाप्यतिक्रान्तंचेत्कः सवर्णायानिषेधकः । तथा गौतमेनाविशेषेणैव पठितम् अन्यतरापायेतुकुर्वीतेति । उत्तर-श्लोके साचस्वाचेतिसवर्णाविवाहेऽस्ति ॥ १२ ॥

(२) **सर्वज्ञनारायणः** । अग्रे प्रथमं सवर्णैवदारकर्मणि प्रशस्ता श्रेयोहेतुः । नासवर्णा तादृक् श्रेयोर्थित्वाभावेन तु कामतःप्रवृत्तौ क्रमशोयथा पूर्वं इमाःवराः श्रेष्ठाः ॥ १२ ॥

(३) **कुल्लूकः** । ब्राह्मणक्षत्रियवश्यानांप्रथमे विवाहे कर्तव्ये सवर्णा श्रेष्ठा भवति । कामतः पुनर्विवाहे प्रवृत्ताना-मेतावक्ष्यमाणाआनुलोम्येन श्रेष्ठाभवेयुः ॥ १२ ॥

(४) **राघवानन्दः** । त्रैवर्णिकस्य सवर्णावर्णभेदेनोद्वाहस्यानेकत्वात्क्रमाकाङ्क्षायांतमाह सवर्णेति । दारकर्मणिदारसाध्ये अपत्योत्पत्तौ धर्मादौ च । इमाः साचेत्यादिना वक्ष्यमाणास्तिस्रः । अवरानिकृष्टाः अग्रेकृतसवर्णाया-मरुचावाह कामतइति न क्रमवैपरीत्यपरम् ॥ १२ ॥

(५) **नन्दनः** । सवर्णोद्वाहनियमेन प्रतिषिद्धमसवर्णोद्वाहमधिकारिविशेषेण प्रतिजानाति सवर्णेति । क्रमशः अग्रे सवर्णा प्रशस्ता तदन्वनन्तरा तदन्वेकान्तरा तदनुद्व्यन्तरेत्यर्थः । अवराःहीनवर्णाः । इमावक्ष्यमाणाः ॥ १२ ॥

(६) **रामचन्द्रः** । अग्रे प्रथमतः द्विजातीनांसवर्णा दारकर्मणि प्रशस्ता । कामतःप्रवृत्तानांक्रमशः अवराःहीनाः-इमाःवक्ष्यमाणलक्षणाःस्युः ॥१२ ॥

शूद्रैव भार्या शूद्रस्य सा च स्वा च विशः स्मृते॥ते च स्वा चैव राज्ञश्च ताश्च स्वा चाग्रजन्मनः॥१३

(१) **मेधातिथिः** । वर्णभेदेसतिसवर्णानियमोयथैवब्राह्मणस्य क्षत्रियादिस्त्रियोभवन्तिएवंशूद्रस्य जातिन्यूना-रजकतक्षकादिस्त्रियः प्राप्ताः । अतः सवर्णेयमुच्यते । उत्कृष्टजातीयातु पूर्वत्र क्रमग्रहणादप्राप्ता । साचशूद्रास्वाचवैश्या वैश्यस्यतेचवैश्याशूद्रेस्वाचराजन्यस्य एवमग्रजन्मनोब्राह्मणस्यक्रमेण निर्देशे कर्तव्ये शूद्राक्रमेण निर्देशः पूर्वोक्तमेवार्थं-उपोद्बलयतियदुक्तंविकल्पआनुपूर्व्येण नावश्यंसमुच्चयः ॥ १३ ॥

(२) **सर्वज्ञनारायणः** । तदाह शूद्रैवेति । स्वा स्वजातीया ॥ १३ ॥

(३) **कुल्लूकः** । शूद्रस्य शूद्रैव भार्याभवति । नतूत्कृष्टावैश्यादयस्तस्रः । वैश्यस्य च शूद्रा वैश्याच भार्यामन्वादि-भिः स्मृता । क्षत्रियस्य वैश्या शूद्रेक्षत्रियाच । ब्राह्मणस्य क्षत्रिया वैश्या शूद्रा ब्राह्मणी च । वसिष्ठोऽपि शूद्रामप्येके-मन्त्रवर्जमिति द्विजातीनांमन्त्रवर्जितंशूद्राविवाहमाह ॥ १३ ॥

(४) **राघवानन्दः** शूद्रस्यापि तथात्वे रागतः प्राप्ते परिचष्टे । शूद्रैवेति । सा शूद्रा स्वा वैश्या । तेचशूद्रावैश्येच स्वा क्षत्रियाचतिस्रोराज्ञः । ताश्च शूद्रावैश्याक्षत्रियाः स्वाच ब्राह्मणी अग्रजन्मनो ब्राह्मणस्य ॥ १३ ॥

(५) **नन्दनः** । एवकारेण केवलशूद्रभार्यत्वं शूद्रस्यैव नान्यस्येतिसूचितम् । स्वशब्दग्रहणेन सवर्णायामूढायामेवास-वर्णावोढव्येतिमन्त्येकंनिर्देशेननोत्तरा वोढव्येति ॥ १३ ॥

(६) **रामचन्द्रः** । शूद्रस्य शूद्रैव भार्या । विशःवैश्यस्य सा शूद्री स्वा वैश्या स्मृतेउक्ते । राज्ञः क्षत्रिया वैश्या शूद्राच । अग्रजन्मनो ब्राह्मणस्य तास्तिस्रः क्षत्रिया वैश्या शूद्रा च एतास्तिस्रः स्वाच ब्राह्मणी ज्ञेया ॥ १३ ॥

न ब्राह्मणक्षत्रिययोरापद्यपि हि तिष्ठतोः॥ कस्मिंश्चिदपि वृत्तान्ते शूद्रा भार्योपदिश्यते॥ १४ ॥

(१) **मेधातिथिः** । यद्यप्यत्यन्तरूपवती शूद्रा विप्रराजन्यौचवीरप्रकृती दशमीमपि दशामश्नुवीयातांतथापि शूद्रां-नाधिवीयातौ अत्रार्थवादः । कस्मिंश्चिदपिवृत्तान्ते न कचिदितिहासोपाख्यानेऽप्युपदिश्यते वर्ण्यते । आपदि गरीयस्याम-धिकायामापदि पूर्वत्रानुज्ञाताऽनेनप्रतिषिद्धा अतोविकल्पः । ननु च शास्त्रलक्षणयोरेकविषयसंनिपाते षोडशिग्रहणाग्रहणव-द्विकल्पोयुक्तोनतुरागलक्षणायाः प्रवृत्तेर्निषेधेन । नच शूद्रा शास्त्रलक्षणा केवलंरागतस्तत्रप्रवृत्तिरप्रतिषिद्धेति पूर्वशास्त्रस्या-र्थः । निषेधस्तु शास्त्रलक्षणइत्यविवाह्यैव शूद्रा । एतदेवाभिप्रेत्य याज्ञवल्क्येन पठितं यदुच्यतेद्विजातीनांशूद्राद्दारोपसंग्रहः ।

नतन्ममममर्तामिति । अत्रोच्यते । सर्वत्रोपदेशानर्थकतयैवविकल्पआश्रीयते यदिचात्यन्तमेव शूद्राप्रतिषेधः स्यात्तदा क्षत्रियवैश्ये एवमतिप्रसूयेयाताम् । आपद्यभ्यनुज्ञाने प्रतिप्रसवशास्त्रमयंच प्रतिषेधोद्वयमपि व्यर्थंस्यात्सवर्णायानियमेन सिद्धत्वात् । तदिदमनुज्ञातं प्रतिषेधश्चास्त्विरुध्यमाने विकल्पते ननु च विकल्पे कामचारस्तस्य च प्रतिप्रसवतएव सिद्धः प्रतिषेधोवक्तव्योनैव । न यथाकामतःक्षत्रियावैश्ययोर्विवाहएवंशूद्रायाअन्यत्रापदोगरीयःस्यात् । इदंतु प्रतिपत्तुंयुक्तंयत्सवर्णानियमेनासवर्णानिवृत्तेरर्थतःकृतायाः पुनःशूद्रानिवृत्तिरसवर्णानिवृत्तेरनित्यत्वंज्ञापयति । अनित्यत्वेचापदि सवर्णाया अलाभे वा भवति चायमवगमः शूद्रानवोढव्या इतरे तु वोढव्ये ॥ १४ ॥

(२) **सर्वज्ञनारायणः** । अत्र शूद्राविवाहेनकेवलमसवर्णविवाहदोषः । किंतु दोषान्तरमपीत्याह न ब्राह्मणेति । आपद्यपि दुर्भिक्षादौ शूद्राविवाहेन धनलाभान्निस्तारसंभवेपीत्यर्थः । वृत्तान्ते प्रस्तावे यथा भार्यान्तरोद्वाहासंभवेनसंतानविच्छेदस्तदापीत्यर्थः । उपदिश्यते अनुज्ञायते ॥ १४ ॥

(३) **कुल्लूकः** । ब्राह्मणस्यक्षत्रिययोर्गार्हस्थ्यमिच्छतोः सर्वथा सवर्णालाभे कस्मिंश्चिदपिवृत्तान्तइतिहासाख्यानेऽपि शूद्रभार्या नाभिधीयते । पूर्वसवर्णानुक्रमेणानुलोम्येन विवाहाद्यनुज्ञानादयंनिषेधः प्रातिलोम्येन विवाहविषयोबोद्धव्यः । ब्राह्मणक्षत्रियग्रहणंचेदंदोषभूयस्त्वार्थमनन्तरंद्विजातयइतिबहुवचनाद्वैश्यगोचरनिषेधस्यापि वक्ष्यमाणत्वात् ॥ १४ ॥

(४) **राघवानन्दः** । ब्राह्मणादित्रयाणांरागतःशूद्रोद्वाहमनूद्य ब्राह्मणक्षत्रिययोर्निषेधति नेतिद्वाभ्यां। वृत्तान्ते इतिहासादौ ॥ १४ ॥

(५) **नन्दनः** । अथ ब्रह्मक्षत्रियाभ्यांसवर्णायांप्रथममुद्वोढुमशक्यायामसवर्णापिवोढव्या न कदाचिदपि प्रथमंशूद्रेत्याह न ब्राह्मणेति । आपतसवर्णयाअनन्तरायावाप्यलाभः । वृत्तान्तेवृत्तमाचारोधर्मइतियावत् अन्तःनिर्णयः धर्मशास्त्रइत्यर्थः । भार्या नोपदिश्यते भार्यात्वेन नोपदिश्यते । किन्तुकाम्यत्वेनेत्यर्थः ॥ १४ ॥

(६) **रामचन्द्रः** । ब्राह्मणक्षत्रिययोः तिष्ठतोः । आपद्यपि स्ववर्णाया अलाभेपि शूद्रा भार्या नोपदिश्यतइत्यर्थः ॥ १४ ॥

हीनजातिस्त्रियं मोहादुद्वहन्तोद्विजातयः ॥ कुलान्येव नयन्त्याशु ससन्तानानि शूद्रताम् ॥ १५ ॥

(१) **मेधातिथिः** । पूर्वस्य प्रतिषेधस्य शेषोऽयंनिन्दार्थवादः । हीनजातिःशूद्रैव तस्याएवप्रकृतत्वात् । ससंतानानिशूद्रतामितिनिगमनात्तएते द्विजातयः मोहाद्धनलोभजादविवेकात्कामनिमित्तत्वाद्वाकुलानि शूद्रतांगमयन्ति । तस्यांजाताः पुत्राः शूद्राभवन्त्येवंतत्पुत्रपौत्राइति । अतउच्यते ससंतानानीति । संतानोऽपत्योत्पत्तिप्रबन्धःपुत्रपौत्रादिः॥ १५ ॥

(२) **सर्वज्ञनारायणः** । हीनजातिंशूद्रां । कुलानि पित्रादिरूपाणि ससन्तानानि ब्राह्मणीजातस्वपुत्रादीनि वृषलतांनयन्तीति सर्वसाधरणोदोषउक्तः ॥ १५ ॥

(३) **कुल्लूकः** । सवर्णामपि परिणीय हीनजातिंशूद्रांशास्त्राविवेकात्परिणयन्तोब्रह्मक्षत्रियवैश्यास्तत्रोत्पन्नपुत्रपौत्रादिक्रमेण कुलान्येव ससंततिकानि शूद्रतांगमयन्ति अत्र द्विजातयइति बहुवचननिर्देशान्निन्दयावैश्यस्यापिनिषेधः कल्प्यते । ब्राह्मणक्षत्रिययोस्तु पूर्वत्रैवनिषेधकल्पनात्तन्निन्दामात्रार्थतैव ॥ १५ ॥

(४) **राघवानन्दः** । हीनजातिंशूद्रां । तदुत्पन्नपुत्रपौत्रादिना शूद्रतांनयन्तीतिकुल्लूकः । मेधातिथिस्तु सर्वत्रोपदेशानर्थक्याद्विकल्पइति । केचिदिमंनिषेधंक्रमवैपरीत्यमिति व्याचक्षते तन्न वक्ष्यमाणमतभेदेनोपपत्तेः ॥ १५ ॥

(५) नन्दनः । न केवलंब्राह्मणक्षत्रिययोरेवनिषेधःकिन्तुवैश्यस्यापीतिसूचयितुतुमर्थवादमाह हीनेति । हीनजातिसंस्कारहीनोत्पत्तिंशूद्रांद्विजातयोमन्त्रसंस्कारयुक्ताः स्त्रियमुद्वहन्तः मभ्रमभार्यात्वेनोद्वहन्तस्तस्यामुत्पन्नेनापत्येनकुलंसंततिंशूद्रतांजातकर्मादिसंस्कारहीनतामाशुनयन्ति ॥ १५ ॥

(६) रामचन्द्रः । द्विजातयोहीनजातिंस्त्रियंमोहादज्ञानादुद्वहन्तःकुलानि सन्तानानि शूद्रस्वरूपतामाशुशीघ्रंनयन्ति ॥ १५ ॥

शूद्रावेदीपतत्यत्रे रुतथ्यतनयस्य च ॥ शौनकस्य सुतोत्पत्त्या तदपत्यतयाभृगोः ॥ १६ ॥

(१) मेधातिथिः । शूद्रांविन्दति परिणयति शूद्रावेदी सपतति पतितइव । अत्रिरुतथ्यस्य तनयःपुत्रस्तयोरेतन्मतमित्युपस्करः अयंतावदर्धश्लोकः पूर्वप्रतिषेधशेषः । शौनकस्यसुतोत्पत्त्याशास्त्रान्तरमिदम् । अभ्यनुज्ञायशूद्रायामृतावुपगमनंनिषेधतिसुतोत्पत्तिर्मृतौयुग्मासु रात्रिषु भवतिऋतौशूद्रांनगच्छेदित्यर्थः । तदपत्यतयाभृगोः इदमपिस्मृत्यन्तरम् तान्येव शूद्रोत्पन्नान्यपत्यानि यस्य सतदपत्यःतद्भावस्तदपत्यता । भृगोरेतन्मतंऋतावप्युपर्यन्नितरासु जातापत्यउपेयात् । पतितत्ववचनंचात्रनिन्दैव नत्वस्य पतितधर्मता पतितस्योदकमित्यादि । एतच्चवक्ष्यामः ॥ १६ ॥

(२) सर्वज्ञनारायणः । अथ गोत्रविशेषनियतंदोषमाह शूद्रावेदीति । शूद्रावेदी शूद्रापरिणेता अत्रेःसंज्ञकस्य मुनेर्मते सन्तत्यनुत्पत्त्यापि पतति द्विजातिकर्मभ्योहानिःपतनमिति । गौतमोक्तपातित्ययोगी भवति । उतथ्यतनयोगौतमस्तद्गोत्रजस्येति सुतोत्पत्त्येत्यनेन व्यवहितेनान्वितम् । शौनकस्येत्यपि तदपत्यतयेत्यनेनान्वितम् । तेन गौतमगोत्रस्य पुत्रोत्पत्त्या शौनकभृग्वादीनांतु पौत्रोत्पत्त्या शूद्रतुल्यत्वहेतुर्द्विजातिधर्महानिरूपंपातित्यमित्यर्थः । एतच्च तत्तद्गोत्रकर्तॄणांतेन तेन प्रकारेण पूर्वपातित्यस्योत्पन्नत्वात्तैरेव नियमितम् । अएतव भविष्ये शूद्रामारोप्यशय्यांतुपतितोत्रिर्बभूवह । उतथ्यःपुत्रजननात्पतितत्वमवाप्तवान् ॥ पुत्रस्य पुत्रमासाद्य शौनकःशूद्रतांगतः । भृग्वादयोप्येवमेव पतितत्वमवाप्नुयुः ॥ अत्र च भृग्वादयइत्यादिपदादत्रिगौतमव्यतिरिक्तानांसर्वेषांग्रहणं केचिच्चात्रेस्तनयस्येति षष्ठ्यर्थंव्याचक्षते । एवमुत्तरेष्वपि तत्तु व्याख्यानंव्यवस्थितार्थानभिधानेन शूद्रावेदनस्यादोषत्वमापादयन्निषेधविध्यानर्थक्यस्य प्रसंजकतया हेयमेव ॥१६॥

(३) कुल्लूकः । शूद्रांविन्दति परिणयतीति शूद्रावेदी सपतति पतितइव भवतीदमत्रेर्मतमुतथ्यतनयस्य गौतमस्यच । अत्र्यादिग्रहणमादरार्थम् । एतद्ब्राह्मणविषयम् । शूद्रायांसुतोत्पत्त्या पततीति शौनकस्य मतमेतत्क्षत्रियविषयम् । शूद्रातत्सुतोत्पत्त्या पततीति भृगोर्मतमेतद्वैश्यविषयम् । एतस्य महर्षिमतत्रयस्य व्यवस्थासंभवे विसदृशपतनविकल्पायोगात् । मेधातिथिगोविन्दराजयोस्तु मतं शूद्रावेदी पततीति पूर्वोक्तशूद्राविवाहनिषेधविशेषः सुतोत्पत्त्या पततीति दैवाज्जातशूद्रा विवाह ऋतौनोपेयादितिविधानार्थमृतुकालगमने सुतोत्पत्तेः । तदपत्यतयेति तु तान्येव शूद्रोत्पन्नान्यपत्यानि यस्य सतदपत्यस्तस्य भावस्तदपत्यता तया पतति एतेनेदमुक्तंऋतावुपयन्नितरासु जातापत्यउपेयात् ॥१६॥

(४) राघवानन्दः । तदेवमतभेदेनाह शूद्रावेदीति । शूद्रांविन्दते परिणयते इति शूद्रावेदी अत्रेः उतथ्यतनयस्य गौतमस्य च मते विवाहमात्रेण पतति । शौनकस्य तु मते सुतोत्पत्त्या । अतएव दैवाज्जातशूद्राविवाहे ऋतौ नोपेयादिति वचनं संगतं । ततएवर्तुतः शूद्रायांजातमपत्य सामान्यंचास्य अतइदमपि वक्ष्यमाणंसंगच्छते । जनयित्वा सुतंतस्यां ब्राह्मण्यादेवहीयतइति । तदपत्यतया शूद्रापत्यापत्यत्वेनेति भृगोर्मतं । उदितानुदितहोमवत् विप्रराजन्यविशांयथाक्रमं व्यवस्थितसंबन्धइति केचित् । तन्न उत्तरत्र विप्रविषयएव निन्दार्थवादानांदृष्टेः ॥ १६ ॥

(५) नन्दनः । अत्रमतान्तराण्युपन्यस्य स्वमतंसिद्धान्तयति शूद्रावेदीति शूद्रांभार्यात्वेनविन्दतीति शूद्रावेदी तेनप-

ततीत्यत्रेरुतथ्यतनयस्यचमतम् । शूद्रामूढवानप्युतथ्यतनयोगौतमः । शूद्रायांसुतोत्पादनेनपतति न पुनस्तस्याउद्वहनेनेति शौनकस्यमतम् । शूद्रामूढवानपितस्यांसुतोत्पत्तिभयात्तौतांनोपेयादित्यर्थः । तदपत्यतयाभृगोरित्येतत्स्वमतम् कुतः भृगुमुखेनशास्त्रस्यास्यप्रोच्यमानत्वात् । तदपत्यतया तस्यांशूद्रायामेवापत्यंयस्य सतदपत्यः तस्य भावः तदपत्यता । तयापततीतिभृगोर्ममतम् । शूद्रापत्यैश्चकेवलैरिति वक्ष्यति । रामोद्विर्नाभिभाषतइत्युक्तिवदत्रास्मच्छब्दरहितापिस्वमतप्रकाशनपरेयंभृगोरित्युक्तिः ॥ १६ ॥

(६) **रामचन्द्रः** । शूद्रांविन्दति परिणयति शूद्रावेदी पतति पतितइव भवति । चपुनः उतथ्यतनयस्य दीर्घतमसः मते शूद्रावेदीशूद्रायाः परिणेता द्विजः पतति । एतद्ब्राह्मणविषयंअर्धश्लोकःपूर्वप्रतिषेधः । शेषःशौनकशास्त्रान्तरमिति ज्ञायते । शौनकस्यमते सुतोत्पत्त्या पतति शूद्रएव केवलमपत्यम् । यद्वा सएवापत्यंतदपत्यंसएव मुख्यः पुत्रएव तत्क्षत्रियविषयम् । भृगोर्मते तदपत्यतया पौत्रोत्पत्त्या ब्राह्मण्यादिपुत्रस्याभावात्पूर्वोक्तशूद्रस्य विवाहनिषेधशेषः । सुतोत्पत्त्या पतति दैवात्शूद्राविवाहे ऋतौ नोपेयादिति विधानार्थंऋतुकालागमने सुतोत्पत्तिशूद्रेकेवलमपत्यं । एतद्वैश्यविषयम् ॥ १६ ॥

शूद्रांशयनमारोप्य ब्राह्मणोयात्यधोगतिम् ॥ जनयित्वा सुतं तस्यां ब्राह्मण्यादेव हीयते ॥ १७ ॥

(१) **मेधातिथिः** । अर्थवादोऽयम् यदि पुत्रमुत्पादयति तस्यांततोब्राह्मण्यादेव हीयते । अपत्यस्याब्राह्मणत्वमिति निन्दैव । सुतमितिच पुल्लिङ्गनिर्देशात्सुतोत्पत्तेरित्यत्रसमानसंहितत्वेपि पुत्रोत्पत्तिरेवाभिप्रेता तथाचदर्शितंयुग्मारात्रयो वर्ज्याइति ॥ १७ ॥

(२) **सर्वज्ञनारायणः** । प्रसंगादधिविन्नायामपि शूद्रायांमैथुने दोषमाह शूद्रामिति । आरोप्येति कारणेन कार्यंमैथुनमुक्तम् । अधोगतिं नरकं । ब्राह्मण्यात् ब्राह्मणकर्मणः ॥ १७ ॥

(३) **कुल्लूकः** । सवर्णामपरिणीय दैवात्स्नेहाद्वा शूद्रापरिणेतुर्ब्राह्मणस्य शयननिषेधोयंनिन्दया निषेधस्मृत्यनुमानात् शूद्रांगत्वा ब्राह्मणोनरकंगच्छति । जनयित्वा सुतंतस्यामित्यृतुकालगमननिषेधपरम् । ब्राह्मण्यादेव हीयतइति दोषभूयस्त्वार्थम् ॥ १७ ॥

(४) **राघवानन्दः** । तानेवाह शूद्रामिति त्रिभिः ॥ १७ ॥

(५) **नन्दनः** । केवलशूद्रभार्यत्वंतदपत्यत्वंच ब्राह्मणस्यदोषातिशयावहमित्याह शूद्रामिति । शयनमारोप्यकेवलशूद्रामूढ्वेत्यर्थः । तस्यांकेवलशूद्रायाम् ॥ १७ ॥

दैवपित्र्यातिथेयानि तत्प्रधानानि यस्य तु ॥ नाश्नन्ति पितृदेवास्तन्न च स्वर्गं सगच्छति ॥ १८ ॥

(१) **मेधातिथिः** । सार्वकालिकोऽयंनिषेधः । यदि कथंचिच्छूद्रापिव्युह्यतेतद्दैतानि कर्माणि तत्प्रधानानि नकर्तव्यानि । नच तया सह त्रैवर्णिकस्त्रीवद्धर्मेऽधिकारोऽस्तीत्यर्थः । भार्यात्वादधिकारे प्राप्ते निषेधोऽयम् । अतःस्वधर्मे धनंविनियुञ्जानस्य न तदीयानुज्ञोपयुज्यते यथा द्विजातिस्त्रीणाम् । अन्यत्र त्वर्थकामयोः साप्यनतिचरणीयैव प्रेष्यावत्तत्कर्मोपयोगोननिषिध्यते श्राद्धादावववहननादिकार्ये तत्र न दोषः स्यात् । परिवेषणादि न कारयितव्या । तत्रदैवं कर्म दर्शपूर्णमासादि देवतोद्देशेन च ब्राह्मणभोजनंव्रतवदित्यत्रयथाव्याख्यातम् । पित्र्यंश्राद्धोदकतर्पणादि । आतिथेयमतिथेराराधनंभोजनपाद्यादि ननु च सजात्या स्थितयाऽत्यये नास्त्येव प्रतिषेधः । नैव स्थितयेति तत्र श्रूयते । ऋतुमत्यां सवर्णायां

कथंचिद्वाऽसंनिहितायांप्राप्नोति क्षत्रियावैश्यवत्। अपिच नासावधिकारेप्रतिषेधः। किंतर्हि आज्यावेक्षणादौ। पत्न्यावेक्षितमाज्यं भवतीत्यङ्गत्वेनोपादीयते। पत्नीत्यत्र क्रत्वर्थेषु यया कयाचिदुपात्तया सिद्धिरनियमेन प्राप्ता। यथा बह्वीषु सवर्णासु ययाकयाचित्सवर्णया क्रियते एवमसवर्णयापि माकारीत्येवमर्थोऽसौ प्रतिषेधः। प्राधान्यमधिकारित्वात्। नाश्नन्ति पितृदेवास्तमिति कर्मनैष्फल्यमाह। नच स्वर्गंसगच्छति यद्यन्यतिथिरश्नाति तत्फलंस्वर्गादि नभवतीतिस्वर्गग्रहणमतिथिपूजाफलोपलक्षणार्थम्। अनुवादश्चधन्यं यशस्यमित्यादि ॥ १८ ॥

(२) **सर्वज्ञनारायणः**। यदुक्तंकस्मिंश्चिदपि वृत्तान्तइतिदोषकथनेन स्पष्टयितुमाह देवेति। तत्प्रधानानि भार्यान्तराभावात्। न च स्वर्गमित्यातिथेयविषये दोषउक्तः। तत्र नादन्त्यतिथयइत्यभिधानयोगात् ॥ १८ ॥

(३) **कुल्लूकः**। यदि कथंचित्सवर्णानुक्रमेणाक्रमेणवाशूद्रापि परिणीयते तदा भार्यात्वेन प्रसक्तानि तत्कर्तृकानि दैवेत्यनेननिषिध्यन्ते। दैवंहोमादि पित्र्यंश्राद्धादि आतिथेयमतिथिभोजनादि एतानि यस्य शूद्रासम्पाद्यानि तद्धव्यंकव्यंपितृदेवानाश्नन्ति न च तेनातिथ्येन सगृही स्वर्गंयाति। यस्तु तत्कारयेन्मोहात्सजात्यास्थितयान्ययेति सवर्णायांसन्निहितायांनिषेधंवक्ष्यति अयंत्वसन्निहितायामपीत्यपुनरुक्तिः ॥ १८ ॥

(४) **राघवानन्दः**। दैवंहोमादि। पित्र्यंश्राद्धादि। शूद्रास्तत्सुताश्च प्रधानतया येषुतानीति नच स्वर्गं ब्राह्मण्याभावेन स्वर्गसाधनकर्माभावात् ॥ १८ ॥

(५) **नन्दनः**। एतमेवार्थंविशदयतिदैवेति। यस्यद्विजस्यतत्प्रधानानि शूद्राप्रधानानि तस्यतत्प्रदेयंपित्र्यमातिथेयंच देयम्। पितृदेवानादन्तिनाश्नन्ति। आतिथेयस्यापि देवपित्रर्थत्वादुक्तंपितृदेवाइति। ततश्चस्वर्गंनगच्छति। नब्राह्मणक्षत्रिययोरित्यारभ्य यदिदंशूद्राभार्यत्वंनिषिध्यते तत्केवलशूद्राभार्यत्वविषयमितितत्प्रधानानीत्यनेनस्पष्टीकृतम्। नहि त्रैवर्णिकस्य तत्स्त्रीभार्यस्यदैवपित्र्यातिथेयानि शूद्राप्रधानानिभवन्तीतिच ॥ १८ ॥

(६) **रामचन्द्रः**। यस्य पुंसस्तस्यामुख्यतया प्रधानानि कृतानि दैवपित्र्यातिथेयादीन्येतानि पितरोदेवाश्च नादन्ति न भक्षयन्ति च पुनः सोपि पुमान्स्वर्गं न गच्छति ॥ १८ ॥

वृषलीफेनपीतस्य निःश्वासोपहतस्य च ॥ तस्यांचैव प्रसूतस्य निष्कृतिर्न विधीयते ॥ १९ ॥

(१) **मेधातिथिः**। अर्थवादोऽयम्। वृषल्याः फेनोवृषलीफेनोवक्त्रासवः सपीतोयेन पलाण्डुभक्षितादिवत्परनिपातः। पाठान्तरे वृषलीपीतफेनस्यपीतः फेनोयस्येतिविग्रहः वृषल्या पीतफेनः तृतीयेतियोगविभागात्समासः पीतःफेनोवाऽनेनेतिविग्रहेवृषल्याइति षष्ठीसमासः। अर्थस्तुसर्ववृत्तिष्वेकएव। संप्रयुज्यमानयोरधरपरिचुम्बनाद्यवश्यंभावि तेनच सहचारिणा धर्मेण मैथुनसंबन्धोलक्ष्यते। प्रकरणाच्च विवाहप्रतिषेधशेषोऽयं न पृथग्वाक्यम्। तत्त्वोढ्चुम्बनादिवर्जंनियोगधर्मोबहुमतः स्यात्। तस्मादूढ्च्छूद्रांचुम्बनादिपरिफेनेन न किंचिच्छास्त्रार्थमनुतिष्ठति। तस्यांचैवप्रसूतस्य ऋतौतुगच्छतइत्यर्थः। निष्कृतिःशुद्धिर्नास्तिइतिनिन्दातिशयोयम्।

यतःसंभवएवात्रकैश्चित्सप्तमीपञ्चम्योनानुज्ञातेसप्तमीपञ्चमीचैव मातृतः पितृतस्तथेति अन्यैस्तुऊर्ध्वंसप्तमात्पञ्चमाच्च तत्र विकल्पलभ्यमाना पञ्चमी न विवाह्या असंभवे तु न दोषः ॥ १९ ॥

(२) **सर्वज्ञनारायणः**। वृषलीफेनपीतस्य पीतवृषलीमुखफेनस्य। निःश्वासोवृषल्याएव। एतेन प्रधानमैथुनाभावेपि

---

(२) दैवेत्यनेन=दैवादीनि (अ)

प्राप्याङ्गमात्रेण दोषउक्तः । प्रसूतस्योत्पन्नापत्यस्य निष्कृतिर्निस्तारः । पापात् न विधीयते नानुमतोविना प्रायश्चित्तमित्यर्थः ॥ १९ ॥

(३) कुल्लूकः । वृषलीफेनोऽधररसःसपीतोयेन सवृषलीफेनपीतः । वाहिताग्न्यादिष्वित्यनेनसमासः । अनेन शूद्रायाअधररसपानंनिषिध्यते । निःश्वासोपहतस्य चेति तया सहैकशय्यादौ शयननिषेधः तस्यांजातापत्यस्य शुद्धिर्नोपदिश्यतइत्यृतुकालगमननिषेधानुवादः ॥ १९ ॥

(४) राघवानन्दः किंच वृषलीफेनपीतस्य शूद्राधरसुधापायिनः चुम्बनेन भोगकाले । तन्निःश्वासेनोपहतं स्पृष्टंशरीरंयस्य तस्य । प्रसूतस्य स्वयमेवापत्यतया जातस्य । निष्कृतिः शुद्धिः । ऐहिकामुष्मिकयोःकर्मणोर्नाधिकारइति भावः ॥ १९ ॥

(५) नन्दनः । उक्तंनिगमयति वृषलीति । वृषलीफेनपीतस्यपीतवृषलीलालाजलस्य । वृषलीभोगोपलक्षणमेतत् । प्रसूतस्यजातापत्यस्यद्विजस्य । निष्कृतिः प्रायश्चित्तम् । एवकारेणत्रैवर्णिकस्त्रियामप्रसूतस्य शूद्रायामेव प्रसूतस्य प्रायश्चित्ताभावइतिसूचितम् ॥ १९ ॥

(६) रामचन्द्रः । वृषलीफेनपीतस्य रतिसमये शूद्रायाअधरपानस्य च पुनर्निःश्वासोपहतस्य तया सहैकशय्यानिषेधः । तस्यांवृषल्यांप्रसूतस्य जातस्य निष्कृतिर्न विद्यते । सवर्णामपरिणीय दैवाच्छूद्रापरिणेतुर्ब्राह्मणस्य निषेधः । ऋतुकालगमननिषेधानुवादः । आत्मा वै जायते पुत्रइति श्रुतेः ॥ १९ ॥

चतुर्णामपि वर्णानांप्रेत्य चेह हिताहितान् ॥ अष्टाविमान्समासेन स्त्रीविवाहान्निबोधत ॥ २० ॥

(१) मेधातिथिः । वक्ष्यमाणस्य संक्षेपोपन्यासः । हिताश्चाहिताश्च केचिद्धिताः केचिन्न । अष्टाविति संख्यानिर्देशः । समासःसंक्षेपः । स्त्रीसंस्कारार्थाविवाहाः स्त्रीविवाहाः । कःपुनरेवंविवाहोनाम उपायतः प्राप्ताया दारकरणार्थः संस्कारःसेतिकर्तव्यतांङ्गःसप्तर्षिदर्शनपर्यन्तो पाणिग्रहणलक्षणः ॥ २० ॥

(२) सर्वज्ञनारायणः । हिताहितान् हितानहितांश्च । तत्र केचित्सर्वेभ्यो वर्णेभ्योहिताः केचिदहिताः । केचित् कस्मैचिदेव तादृशाइतिवक्ष्यति ॥ २० ॥

(३) कुल्लूकः । चतुर्णामपिवर्णानांब्राह्मणादीनांपरलोकइहलोके च कांश्चिद्धितान्कांश्चिदहितानिमानभिधास्यमानानष्टौ संक्षेपेण भार्याप्राप्तिहेतून्विवाहाञ्छृणुत ॥ २० ॥

(४) राघवानन्दः । विप्रादीनां तानेवोद्वाहानष्टसङ्ख्याकान् ब्राह्मादीनाह चतुर्णामपीति द्वाभ्यां । हिताहितान्स्वर्गनरकसाधनात् स्त्रीविवाहान् स्त्रीकर्मकान् । अनेन स्वयंवरविवाहोनाष्टसु गण्यतइतिभावः ॥ २० ॥

(५) नन्दनः । अथविवाहभेदानाह चतुर्णामिति । यथाविवाहइह प्रेत्य च हितानन्यहितान्विपरीते ॥ २० ॥

(६) रामचन्द्रः । चतुर्णांवर्णानांप्रेत्य इहलोकेचहिताहितानिमांस्त्रीविवाहानष्टौ निबोधत ॥ २० ॥

ब्राह्मोदैवस्तथैवार्षः प्राजापत्यस्तथासुरः ॥ गान्धर्वोराक्षसश्चैव पैशाचश्चाष्टमोधमः ॥ २१ ॥

(१) मेधातिथिः । संख्यायाष्टौव्युद्दिष्टानांनामधेयानीमानि । अधमग्रहणंपैशाचस्यनिन्दार्थम् ॥ २१ ॥

(२) सर्वज्ञनारायणः । येन विवाहेनोत्पन्नया संतत्या ब्रह्मलोकप्राप्तिः सब्राह्मः । एवंदैवोपि ॥ २१ ॥

(३) **कुल्लूकः** । तएते नामतोनिर्दिश्यन्ते । ब्राह्मराक्षसादिसंज्ञाचेयंशास्त्रसंव्यवहारार्था स्तुतिनिन्दाप्रदर्शनार्था-च । ब्रह्मणइवायंब्राह्मः । रक्षसइवायंराक्षसः । नतु ब्रह्मादिदेवतात्वंविवाहानांसंभवति । पैशाचस्याधमत्वाभिधानं-निन्दातिशयार्थम् ॥ २१ ॥

(४) **राघवानन्दः** । तेषांसंज्ञामाह ब्राह्मइत्यादि ॥ २१ ॥

(५) **नन्दनः** । आर्षात्प्राजापत्यस्यश्रैष्ठ्यंफलतोवक्ष्यति । वृत्तभङ्गभयात्क्रमभङ्गः ॥ २१ ॥

(६) **रामचन्द्रः** । ब्राह्मसंज्ञः १ दैवसंज्ञः २ आर्षसंज्ञः ३ प्रजापतिसंज्ञः ४ आसुरसंज्ञः ५ गान्धर्वसंज्ञः ६ राक्ष-ससंज्ञः ७ पैशाचसंज्ञः ८ उक्तेष्वेतेष्वष्टमोऽधमः ॥ २१ ॥

योयस्य धर्म्योवर्णस्य गुणदोषौ च यस्य यौ ॥ तद्वः सर्वंप्रवक्ष्यामि प्रसवे च गुणागुणान् ॥२२॥

(१) **मेधातिथिः** । धर्मादनपेतोधर्म्यःशास्त्रविहितइत्यर्थः । यस्य च विवाहस्य यौगुणदोषौइष्टानिष्टफलहेतुत्वा-द्गुणदोषौ । प्रसवेऽपत्यजन्मनि । गुणागुणाःअगुणोदोषः । वोढुरेव स्वर्गनरकादिलक्षणौ गुणदोषौतत्प्रयोजनमर्थात्स्वर्गा-दिकम् ॥ २२ ॥

(२) **सर्वज्ञनारायणः** । धर्म्याः धर्मादनपेताः । गुणदोषौविवाहमात्रेण प्रसूतिंविनापि तच्च प्रशस्तत्वाप्रशस्तत्वा-भिधानादर्थादभिहितमिति विशेषतोनोक्तम् । प्रसवे सन्ततौ ॥ २२ ॥

(३) **कुल्लूकः** । धर्मादनपेतोधर्म्यः । योविवाहोधर्म्योयस्य विवाहस्ययौगुणदोषाविष्टानिष्टफले तत्तद्विवाहोत्पन्ना-पत्येषु ये गुणागुणास्तत्सर्वंयुष्माकंप्रकर्षेणाभिधास्यामि । वक्ष्यमाणानुकीर्तनमिदंशिष्याणांसुखग्रहणार्थम् ॥ २२ ॥

(४) **राघवानन्दः** । यस्य वर्णस्य विप्रादेर्यो विवाहो यावत्संख्ब्योविहितोयस्मिंश्च योदोषस्तंब्रूते यइति पञ्चभिः । यस्य विवाहस्य प्रसवेतदुदितापत्ये ॥ २२ ॥

(५) **नन्दनः** । योविवाहोयस्य वर्णस्य धर्म्यो यस्यविवाहस्य यौ च गुणदोषौ । प्रसवेपुत्रे ॥ २२ ॥

(६) **रामचन्द्रः** । योयस्य वर्णस्य विवाहो धर्म्योधर्मार्हः यस्य वर्णस्य यौ गुणदोषौ भवतस्तद्युष्माकमृषीणां-संततौ प्रसवे गुणागुणौवक्ष्यामि पुत्रोत्पादनइत्यर्थः ॥ २२ ॥

षडानुपूर्व्याविप्रस्य क्षत्रस्य चतुरोऽवरान् ॥ विट्शूद्रयोस्तु तानेव विद्याद्धर्म्यानराक्षसान् ॥ २३॥

(१) **मेधातिथिः** । गतार्थमपि भूयः प्रतिपत्तये कथयन्ति । षड्विवाहाब्राह्मणस्यानुपूर्व्योद्देशक्रमेण । क्षत्रस्य । क्ष-त्रियवचनः क्षत्रशब्दः । तस्य चतुरोऽवरानुपरितनानासुरगान्धर्वराक्षसपैशाचान्विद्यात् । वैश्यशूद्रयो स्तानेवा रा-क्षसान्राक्षसंवर्जयित्वा ॥ २३ ॥

(२) **सर्वज्ञनारायणः** । गान्धर्वान्ताविप्रस्य षट् धर्म्याधर्मादनपेताः । प्रशस्तत्वांचाश्चत्वारइति वक्ष्यति । अ-वरानन्याश्चतुरः । तत्र पैशाचस्य शूद्रेष्वपि निन्दितत्वात्प्राजापत्यादयश्चत्वारोग्राह्याः । तानेवचतुरस्तेषु तु मध्ये न राक्षसमिति व्युदासात् । त्रयः प्राजापत्यासुरगान्धर्वाःशिष्यन्ते ॥ २३ ॥

(३) **कुल्लूकः** । ब्राह्मणस्य ब्राह्मादिक्रमेण षट् । क्षत्रियस्यावरानुपरितनानासुरादींश्चतुरः । विट्शूद्रयोस्तु तानेव-राक्षसवर्जितानासुरगान्धर्वपैशाचान्धर्मादनपेताञ्जानीयात् ॥ २३ ॥

(४) **राघवानन्दः** । षडिति गान्धर्वपर्यन्तान् । अवरानासुरादिपिशाचान्तान् चतुरःतानेवासुरादीन् राक्षसंवर्जयित्वा तानासुरगन्धर्वपैशाचान् । तेन विट्शूद्रयोस्त्रीन् ॥ २३ ॥

(५) **नन्दनः** । ब्राह्मादीन्षड्विवाहान्विप्रस्यधर्म्यान्विद्यात्अपरान्पाश्चात्यानासुरादीन्क्षत्रियस्यतानेवपाश्चात्यानेव राक्षसवर्जंविट्शूद्रयोः ॥ २३ ॥

(६) **रामचन्द्रः** । विप्रस्य षट्विवाहाआनुपूर्व्येण क्रमेणोक्ताः । क्षत्रस्यावरानासुरादींश्चतुरोविवाहान्विट्शूद्रयोस्तानेव चतुरोऽवरानासुरादीन्धर्म्यान् विद्यात् । न राक्षसान् तद्यथा ब्राह्मः १ दैवः २ आर्षः ३ प्रजापत्यः ४ आसुरः ५ गान्धर्वः ६ षट्विप्रस्य विवाहाः ७ क्षत्रस्य चतुरःआसुरः १ गान्धर्वः २ राक्षसः ३ पैशाचः ४ ॥ २३ ॥

चतुरोब्राह्मणस्याद्यान्प्रशस्तान्कवयोविदुः ॥ राक्षसंक्षत्रियस्यैकमासुरंवैश्यशूद्रयोः ॥ २४ ॥

(१) **मेधातिथिः** । आसुरगान्धर्वयोरयंनिषेधोब्राह्मणस्य पुनर्ब्राह्मादिविधानेन । एवंक्षत्रियस्य राक्षसएवैकोनगान्धर्वासुरौ । आसुरएव वैश्यशूद्रयोः । विहितप्रतिषिद्धानांविकल्पः । ततश्च नित्यवद्विहितभावे विकल्पितेप्रवृत्तिः । यस्य च योविहितःसतद्विवाहाभावमनपेक्ष्य प्रथमत एव यदिविहितप्रतिषिद्धेषुप्रवर्तेत तत्र पुरुषोदुष्येदपत्यंचानाभिप्रेतमुत्पद्येतेतिशास्त्रकारेण दर्शितंप्रसवे च गुणागुणानित्यादिना नतु सपिण्डादिपरिणयनविवाहस्वरूपा निवृत्तिः ॥ २४ ॥

(२) **सर्वज्ञनारायणः** । प्रशस्तानुत्तमसन्ततिहेतुतया । अत्र ब्राह्मणस्य चत्वारइति प्रथमःकल्पः । षडित्यनुकल्पः । एकंक्षत्रियस्य राक्षसएकइति कल्पः । सप्राजापत्याद्याश्चत्वारइत्यनुकल्पः । एवंवैश्यशूद्रयोर्ज्ञेयम् ॥ २४ ॥

(३) **कुल्लूकः** । ब्राह्मणस्य प्रथमंपठितान्ब्राह्मादींश्चतुरः । क्षत्रियस्य राक्षसमेकमेव । वैश्यशूद्रयोरासुरं । एताञ्श्रेष्ठान्ज्ञातारोजानन्ति । अतएव ब्राह्मणादिष्वासुरादीनां पूर्वविहितानामप्यन्यत्राप्युपादानंजघन्यत्वज्ञापनार्थम् । तेन प्रशस्तविवाहासंभवे जघन्यस्यापि परिग्रहइतिदर्शितम् । एवमुत्तरत्रापि विगर्हितपरित्यागोबोद्धव्यः ॥ २४ ॥

(४) **राघवानन्दः** । तत्रैव प्रशस्तानाह चतुर इति । चतुरः प्राजापत्यान्तान् । कवयः क्रान्तदर्शिनः । एकं प्रधानंप्रशस्तम् । एवमासुरंवैश्यशूद्रयोः प्रशस्तमित्यर्थः ॥ २४ ॥

(५) **नन्दनः** । चतुरइति । मतान्तरमिति ॥ २४ ॥

(६) **रामचन्द्रः** । तत्र विशेषमाह चतुरइति । ब्राह्मणस्य चतुरआद्यान्विवाहान्कवयो विदुः । ब्राह्मदैवार्षप्राजापत्यसंज्ञाइति । क्षत्रस्यैकंराक्षससंज्ञं वैश्यशूद्रयोरासुरमेकमिति ॥ २४ ॥

पञ्चानांतु त्रयोधर्म्याद्वावधर्म्यौ स्मृताविह ॥ पैशाचश्चासुरश्चैव न कर्तव्यौ कदाचन ॥ २५ ॥

(१) **मेधातिथिः** । क्षत्रियादिविषयेयंस्मृतिर्नब्राह्मणविषयाराक्षसेविरोधात् । नहि वधभेदने ब्राह्मणः कर्तुमर्हतिअस्याचरणस्यक्षत्रियादिविषयतयोपपत्तेः । पञ्चानांतु विवाहानांप्राजापत्यात्प्रभृति तयोर्विवाहोधर्म्यौ । द्वौ न कर्तव्यौ पैशाचश्चासुरश्चप्राजापत्यः क्षत्रियादीनामप्राप्तोऽपि विधीयते । राक्षसोऽपि वैश्यशूद्रयोः आसुरपैशाचयोःप्रतिषेधः इयमत्रव्यवस्थाब्राह्मणस्यषड्विवाहास्तत्र ब्राह्मःसर्वतः श्रेष्ठस्ततोन्यूनौ दैवप्राजापत्यौ ताभ्यामप्यार्षस्ततोपिगान्धर्वस्ततोप्यासुरः । येषामयंश्लोकोब्राह्मणविषयोपि तेषांराक्षसोपि ब्राह्मणस्य क्षत्रियवृत्ताववस्थितस्य भवति विकर्मस्थस्यापि वधभेदनाभ्यांप्रायश्चित्तीयतोराक्षसोनविवाहइति ते मन्यन्ते । तद्ब्राह्मस्य श्रैष्ठ्यंफलेनैवदर्शितम् । निषेधाभावेन चेतरेषांत्रयाणांन्यूनता फलापचयवचनादेव । आसुरस्य पुनर्वैश्यशूद्रयोर्विधानेनपरिसंख्याब्राह्मणक्षत्रिययोःप्रतीयते । षडितिचविधानम् । अतोविकल्पःसचव्य-

वस्थयाइतरासंभवेन तस्याश्रयणंतुल्यम् । विकल्पोहिव्रीहियववदनेकविवाहविधानेन च समुच्चयासंभवादेवसिद्धः। सति वा संभवेक्रियेत चेत्तथापि धर्मापत्ययोर्न्यूनफलोऽसौ अथ क्षत्रियस्य राक्षसोमुख्यश्चतुर्भिःश्लोकैरविकल्पेन विधानात्। चतुरइत्यनेनासुरगान्धर्वपैशाचाअपिराक्षसंक्षत्रियस्यैकमित्यनेनते प्रतिषिद्धाः । अतोविकल्पितानमुख्याः । प्रकृतापेक्षत्वाच्चराक्षसैकविधिः। प्राजापत्ये नास्ति परिसंख्यानम्। अतः प्राजापत्योऽपि क्षत्रियस्य राक्षसतुल्यः। एववैश्यशूद्रयोरपि प्राजापत्योनित्यवदाम्नातोनप्रतिषिद्धः । आसुरपैशाचौ तु तयोर्विहितप्रतिषिद्धौ । राक्षसोऽप्यराक्षसानित्यनेन प्रतिषिद्धः त्रयोधर्म्या इत्येनेन विहितः। ब्राह्मणस्य पैशाचोनैवास्ति । क्षत्रियादीनांब्राह्मदैवार्षाइतिस्थितम् ॥ २५ ॥

(२) **सर्वज्ञनारायणः**। आपत्कल्पं ब्राह्मणस्याह पञ्चानामिति । क्षत्रस्य चतुरोवरानित्युपक्रान्ताः प्राजापत्यादयः पञ्च तेषामपि मध्ये त्रयोधर्म्याविप्रस्य । अत्र ह्यासुरस्य वैश्यशूद्रयोरेव मुख्यत्वात्। पैशाचस्य च सर्वेषांनिन्दितत्वात् । आपद्यनन्तरंक्षत्रवर्णमुख्यधर्माश्रयणस्य युक्तत्वाद्राक्षसोयुक्तोनासुरपैशाचाविति तात्पर्यम् ॥ २५ ॥

(३) **कुल्लूकः**। इह पैशाचप्रतिषेधादुपरितनानांपञ्चानांप्राजापत्यादीनांग्रहणम् । तेषु मध्ये प्राजापत्यगान्धर्वराक्षसास्त्रयोधर्मादनपेतास्तत्र प्राजापत्यः क्षत्रियादीनामप्राप्तोविधीयते। ब्राह्मणस्य विहितत्वादनूद्यते। गान्धर्वस्य च चतुर्णामेव प्राप्तत्वादनुवादः। राक्षसोपि वैश्यशूद्रयोर्विधीयते । ब्राह्मणस्य क्षत्रियवृत्त्यवस्थितस्याप्यासुरपैशाचौ न कर्तव्यौ। कदाचनेत्यविशेषाच्चतुर्णामेवनिषिध्यते। अत्रयंवर्णंप्रति यस्य विवाहस्य विधिनिषेधौ तस्य तंप्रति विकल्पःसच विहितासंभवे बोद्धव्यः ॥ २५ ॥

(४) **राघवानन्दः**। पञ्चानांप्राजापत्यादीनांमध्ये त्रयोधर्म्याधर्मादनपेताः। प्राजापत्यगान्धर्वराक्षसायथोक्तालाभे विप्रक्षत्रिययोरपि द्वावधर्म्यौ धर्मादपेतौ पैशाचासुरौ न कार्याविति तात्पर्यम्। तत्र क्षत्रियवृत्तिस्थस्य विप्रस्य राक्षसः। आसुरपैशाचौ शूद्रविशोर्विकल्पितौ। ब्राह्मस्तुब्राह्मणस्यैवेति भावः ॥ २५ ॥

(५) **नन्दनः**। मतान्तरमाह पञ्चानामिति । पाश्चात्यानांग्रहणंपैशाचश्चासुरश्चैवेतिलिङ्गात् । पञ्चानांप्राजापत्यादीनांमध्येत्रयः प्राजापत्यगान्धर्वराक्षसाधर्म्याः। पिशाचाश्चासुरश्चैवद्वावधर्म्यौ। ततश्चतौनकर्तव्यौ कथञ्चनआपद्यपिनकर्तव्याविति। अत्र कर्तृविशेषानिर्देशादस्य मतस्य सर्ववर्णसाधारणत्वम् गम्यते। इहकविशुमध्ये ॥ २५ ॥

(६) **रामचन्द्रः**। पञ्चानांविवाहानांमध्ये त्रयोधर्मार्हाः प्राजापत्यासुरगान्धर्वराक्षसपैशाचाः ५ एतेषु पञ्चसु मध्ये त्रयोधर्म्याः। प्राजापत्यासुरगान्धर्वसंज्ञास्त्रयोधर्मार्हाः३ द्वावधर्म्यौराक्षसपैशाचसंज्ञौ। वर्णक्रममाह। प्राजापत्यं क्षत्रियादीनामप्राप्तौ विधीयते ब्राह्मणस्याभिहितत्वादनूद्यते गान्धर्वस्य तु चतुर्णामेव प्राप्तानुवादः । राक्षसोपि वैश्यशूद्रयोर्विधीयते ब्राह्मणस्य तु क्षत्रियवृत्त्यवस्थितस्यासुरपैशाचौ न कर्तव्यौ ॥ २५ ॥

पृथक्पृथग्वा मिश्रौ वा विवाहौ पूर्वचोदितौ॥गान्धर्वोराक्षसश्चैव धर्म्यौ क्षत्रस्य तौ स्मृतौ॥२६॥

(१) **मेधातिथिः**। पृथक्पृथगित्यनुवादः पूर्वेणैव सिद्धत्वात्। मिश्राविति विधीयते निरपेक्षायाइतरेषांगान्धर्वराक्षसयोर्विहितत्वात्। व्रीहियववदप्राप्ते मिश्रणवचनमिदम्। व्रीहिभिर्यजेत यवैर्वेत्येकयागप्रयोगविषयत्वेनेतरेतरानपेक्षद्रव्यविधानाद्विकल्पोनमिश्रीभावः। मिश्रीभावे हि नव्रीहिशास्त्रार्थोऽनुष्ठितः स्यान्नच यवशास्त्रार्थः। एवमिहैकस्यांकन्यायांस्वीकर्तव्यायांयुगपदुपायद्वयमप्राप्तंविधीयते। तस्य विषयोयदा पितृगेहे कन्या तत्रस्थेन कुमारेण कथंचिद्दृष्टिगोचरापन्नेप्रदूतीसंस्तुतेन इतरापि तथैव परवती नच संयोगंलभते तदा वरेणसंविदंकृत्वा नयमामितोयेन केनचिदुपायेनेत्यात्मानंनाययति सच शक्त्यतिशयाद्धत्वा छित्त्वावेत्येवंहरति तदेच्छयान्योन्यसंयोगइत्येतदप्यस्तिगान्धर्वेरूपं हत्वाछित्त्वे-

ति च राक्षसरूपम् । तावेतौ विवाहौ क्षत्रियस्यैव भवतः । धर्म्यौ क्षत्रियस्यतौपूर्वचोदितावित्यनुवादः । अन्येत्वाहुः यः क्षत्रियोबहुविवाहान्कुरुते सकांचिद्गान्धर्वेण विवाहेन परिणयते कांचिद्राक्षसेनेत्येषमिश्रपक्षः अथवा सर्वाएवान्यतरेणेति पृथक्पृथक् अनेनचैतज्ज्ञायते । क्षत्रियस्यानयोरेवानियमेन प्रवृत्तिः प्राजापत्यादीनांतुयएवप्रथमंकृतस्तेनैवान्यापि विवाहा ॥ २६ ॥

(२) **सर्वज्ञनारायणः** । क्षत्रियस्य कल्पानुकल्पावुक्त्वाऽधुनापत्कल्पमाहपृथगिति । पृथगसंकीर्णौ मिश्रौ संकीर्णौ । यथा प्रथमंगान्धर्वेण परिगृह्य तद्बन्धुषुविरोधप्रवृत्तेषु युद्धेन हरणम् । अत्र मिश्रावित्यापत्कल्पः । पृथगितित्वनुकल्पानुवादमात्रमसंकीर्णात्संकीर्णस्य निन्दितत्वप्रदर्शनार्थम् । तेन वर्णान्तराणामप्यसंकीर्णविवाहासंभवे आपदि संकीर्णस्यापि करणमिति दर्शितम् । पैशाचस्य तु कैश्चिदप्यकरणीयस्य विवाहगणमध्ये गणनम् वैश्यशूद्रयोरापदि तस्यापि प्राप्त्यर्थमिति ग्राह्यम् । मातृतः पितृतो वोभयोरेकस्य कूटस्थेन सह सपिण्डतासद्भावे विवाहासंभव एवेत्येतत्प्रदर्शयितुंवा ॥ २६ ॥

(३) **कुल्लूकः** । पृथक्पृथगिति प्राप्तत्वादनूद्यते । मिश्राविति विधीयते । पृथक्पृथग्विमिश्रौ वा पूर्वविहितौ गान्धर्वराक्षसौ क्षत्रस्य धर्मौ मन्वादिभिःस्मृतौ । यदा स्त्रीपुंसयोरन्योन्यानुरागपूर्वकसंवादेन परिणेता युद्धादिना विजित्यतामुद्वहेत्तदा गान्धर्वराक्षसौ मिश्रौ भवतः ॥ २६ ॥

(४) **राघवानन्दः** । राक्षसंक्षत्रियस्येत्युक्तत्वादनुवादोमिश्राविति । वरकन्ययोः पूर्वंपरस्परसंवादे सति परिपन्थिनोविजित्योद्वहनात्तौगान्धर्वराक्षसौ मिश्रौ भवतः । यथारुक्मिण्याविवाहः ॥२६ ॥

(५) **नन्दनः** । पृथक्पृथग्वाकेवलोवागान्धर्वः केवलोवाराक्षसइत्यर्थः । केवलोगान्धर्वोयथा दुष्यन्तशकुन्तलयोः । केवलोराक्षसोयथाविचित्रवीर्याम्बिकयोः । मिश्रोयथा फाल्गुनसुभद्रयोः । पूर्वचोदितौपूर्वैर्विहितौ । अनेनमतान्तरमिदमित्यवगम्यते ॥ २६ ॥

(६) **रामचन्द्रः** । क्षत्रियस्य विवाहमाह पृथगिति । विवाहौ पूर्वनोदितौ कार्यौ पृथक् २ गान्धर्वोवाविवाहः मिश्रौ वा गान्धर्वराक्षसौक्षत्रस्य धर्म्यौ तौस्मृतौ । आसुरोद्रविणादानात् गान्धर्वःसमयान्मिथः । राक्षसोयुद्धहरणात्पैशाचःकन्यकाच्छलादिति याज्ञवल्क्यः ॥ २६ ॥

आच्छाद्य चार्चयित्वा च श्रुतिशीलवते स्वयम्॥आहूय दानं कन्यायाब्राह्मोधर्मः प्रकीर्तितः॥२७॥

(१) **मेधातिथिः** । इदानींस्वरूपमेतेषामाह । आच्छाद्येतिआच्छादनविशेषोऽभिप्रेतः अन्यस्यौचित्येनैव प्राप्तत्वात् । उत्कृष्टेनाच्छादनेन यथादेशंयथासंभवंयथायोग्येन, वाससा परिधाप्य । अर्हयित्वा अनेनालंकरणकटककर्णिकादिना प्रीतिविशेषसत्कारविशेषैरर्चनंकृत्वा । एतेनाच्छादनार्हणेन कन्यायावरस्य चान्यतरसंबन्धे प्रमाणाभावादुभयोपयोगःकार्यः । श्रुतशीलवते अन्येपिस्मृत्यन्तरोक्तावरगुणाद्रष्टव्याः युवा धीमाञ्जनप्रियः यत्नात्परीक्षितःपुंस्त्वइति । स्वयंप्रागयाचितः स्वपुरुषप्रेषणैराहूयान्तिकदेशमानाय्यवरं यद्दानं सब्राह्मोधर्मोविवाहः । अविशेषवचनोऽपि धर्मशब्दः पूर्वापेक्षितत्वादस्यतत्परएवद्रष्टव्यः । अयाचितलाभोऽभ्यर्हणापूर्वकोब्राह्मोविवाह इतिलक्षणार्थः । ननुचेदमयुक्तंस्त्रीस्वीकारार्थोविवाहइति यावद्विवाहपर्यन्तंचैतद्दानम् । नाकृते विवाहे दानार्थनिवृत्तिः । सहि तस्याःप्रतिग्रहकालः । नचासति परिग्रहे दानंपरिसमाप्यते न स्वत्वनिवृत्तिमात्रंदानंपरस्वत्वापत्तिपर्यन्तंहितत् । तथाच वक्ष्यति तेषांतु निष्ठा विज्ञेया विद्वद्भिः सप्तमेपदेइति । एवंविवाहकालएव कन्यादातव्या तथाच गृह्यकारस्तस्मिन्नेव काले ब्राह्मविवाहेकाण्डिकधर्मन्दर्शयति ।

यत्तु प्राग्विवाहाद्दानं तदुपसंवादनवाचनमात्रम् । नहि तस्मिन्क्रियमाणेऽभिमेतकालेऽवश्यंविवाहनिर्वृत्तिः कश्चिन्मागनिरूपिते नदद्यादपिइतरोवा कदाचिन्न प्रतिगृह्णीयात् तस्मात्प्राग्विवाहादुपसंवादः कर्तव्यः । तदा त्वयेयंदेया मया चेयं वोढव्येति यथैवान्तःक्रतुः सोऽपक्रियोऽचोदितत्तित्सिद्धार्थोऽर्थाद्बहिष्क्रियते । येतु मन्यन्ते यथैवगवादेर्द्रव्यस्यादृष्टार्थतया दीयमानस्य मन्त्रपूर्वकेण प्रतिग्रहेण दानमपिनिर्वर्तते तेनैवेदमुक्तं ददातिषुचैवंधर्मेष्विति । एवंचेह प्रतिग्रहमन्त्रस्थानीयोविवाहइति । तथाचउपयमनंविवाहइत्येकोर्थः । उपयमनंच स्वकरणम् । एवंहस्म भगवान्पाणिनिः स्मरति उपाद्यमःस्वकरणइति । अतोविवाहः कन्यास्वीकारार्थः । तदयुक्तम् । स्वीकृतायाविवाहो भार्याकरणार्थः । नानेनकर्मणा प्रतिगृह्णीयादितिविधिरस्ति । नचवैवाहिकामन्त्राप्रतिग्रहप्रकारकाः यथादेवस्यत्वाप्रतिगृह्णामीतिमन्त्राः । यत्तुस्वकरणइति तन्नविरुद्धम् । विवाहस्याप्यस्ति स्वकरणरूपता । दानेन स्वत्वमात्रे प्रतिपन्ने विवाहेन विशिष्टं स्वत्वंक्रियते । नेयंगवादिद्रव्यवत्स्वंयथेष्टविनियोज्यतया अपितुजायात्वेन । विशिष्टएवहि स्वस्वामिभावोजायापतिलक्षणसंबन्धः । तथाचदर्शयिष्यति । मङ्गलार्थं स्वस्त्ययनं·····विवाहेषु प्रदानंस्वाम्यकारणमिति ॥ २७ ॥

(२) **सर्वज्ञनारायणः** । आच्छाद्य वाससाकन्यां । एतेन यथाशक्त्यलंकरणमुपलक्षितम् । अर्चयित्वा वरं मधुपर्केण स्वयमर्हयित्वा महाप्रयुक्तिमात्रेण । शीलमविपरीतचेष्टा । आहूयनतु वराभ्यर्थनया ॥ २७ ॥

(३) **कुल्लूकः** । आच्छादनमात्रस्यैवौचित्यप्राप्तत्वात्सविशेषवाससा कन्या वरावाच्छाद्यालंकारादिनां च पूजयित्वा विद्याचारवन्तमप्रार्थकवरमानीय तस्मै कन्यादानंब्राह्मोविवाहोमन्वादिभिरुक्तः ॥ २७ ॥

(४) **राघवानन्दः** । उक्तविवाहानां लक्षणान्याह आच्छाद्येति । वासोलङ्काराभ्यांकन्यामाच्छाद्य अर्चयित्वा च वरमिति ब्राह्मे च धनादिभिरभिसन्धित्वाद्ब्राह्मः धर्मोधर्मैकहेतुत्वात् एवमुत्तरत्र ॥ २७ ॥

(५) **नन्दनः** । अथब्राह्मादीनांलक्षणान्यष्टभिःश्लोकैराह आच्छाद्येति । आच्छाद्य कन्यांपरिधाप्य भूषणादिभिश्चार्हयित्वा श्रुतशीलवते श्रुतंवेदशास्त्रपरिज्ञानंशीलंतदर्थानुष्ठानंतद्वतेवरायकन्या पित्रा स्वयमेववरमाहूय तस्मै वरायकन्यायायद्दानंसब्राह्मोधर्मः । धर्मसाधनत्वाद्विवाहएवधर्मशब्देनात्रोच्यते । ब्रह्मशब्दोऽत्र धर्मवचनः । धर्मातिशययुक्तत्वाद्ब्राह्मत्वम् ॥ २७ ॥

(६) **रामचन्द्रः** । अष्टानांविवाहानांस्वरूपमाह आच्छाद्येति । वस्त्रैराच्छाद्य परिधाय अर्हयित्वा आभरणाद्यलङ्कृतांकृत्वा श्रुतिशीलवते वराय स्वयमाहूय कन्याया दानंदीयतेसब्राह्मसंज्ञोविवाहोधर्म्यः प्रकीर्तितः । ब्राह्मोविवाह आहूयदीयतेशक्त्यलंकृता । तज्जःपुनात्युभयतः पुरुषानेकविंशतिमिति याज्ञवल्क्यः ॥ उभयतः मातृतः पितृतः ॥ २७ ॥

यज्ञे तु वितते सम्यगृत्विजे कर्म कुर्वते ॥ अलंकृत्य सुतादानंदैवंधर्मंप्रचक्षते ॥ २८ ॥

(१) **मेधातिथिः** । वितते प्रारब्धे तन्त्रे ज्योतिष्टोमादौ यज्ञे तत्कर्मकारिणऋत्विजेऽध्वर्य्वेसुतायादुहितुर्दानम् । अलंकृत्येत्यनुवादःकन्यादानस्यसर्वस्यैवंरूपत्वात् । आच्छाद्यालंकृतांविवाहयेदितिसामान्योऽयंविधिः । ननु गौश्चाश्वश्चाश्वतरश्चेत्याद्यृत्विग्भ्योदक्षिणात्वेनश्रुतम् न क्वचित्कन्यादानंक्रत्वर्थतयाचोदितम् । किमत्र क्रत्वर्थतदानवृत्तेयज्ञऋत्विजेयांददाति सदैवोविवाहः । अस्तिचोपकारगन्धस्तदीयकरणम् । अकर्मोद्देशेनापि दीयमानंतत्कर्मकरणप्रवृत्तस्यजनयत्येवानुमानविशेषम् । एतावतोपकारसंबन्धेनब्राह्माद्दैवोन्यूनः ॥ २८ ॥

(५) **सर्वज्ञनारायणः** । यज्ञे यज्ञमध्ये ऋत्विजे दानंस्वयज्ञस्य सम्यक्क्लृप्त्यभिसंधानेन सुतादानमुभयस्यापि

लक्षणस्य पितापुत्रीमनुक्रमेदित्यादिविधिना ब्राह्मइव दानवाक्यमुच्चार्यम्। एवंदीक्षितोनददातीति दाननिषेधः। एतदन्यदानविषयइति ग्राह्यम् ॥ २८ ॥

(३) कुल्लूकः। ज्योतिष्टोमादियज्ञे प्रारब्धे यथाविध्यृत्विजे कर्मकर्त्रेऽलंकृत्य कन्यादानंदैवंविवाहंमुनयोब्रुवते ॥ २८ ॥

(४) राघवानन्दः। वितते कर्तव्यतया प्रारब्धे। अलङ्कृत्येत्यनुवादः। अलङ्कृतांविवाहयेदिति सामान्योक्तेः। दैवंदेवकर्मसंबन्धित्वात् देवोद्देश्यत्वाद्वा ॥ २८ ॥

(५) नन्दनः। सुतामलंकृत्ययद्दानंतद्दैवंधर्मंविदुः। देवकार्याधिकृतायदानात्तस्यदैवत्वम् ॥ २८ ॥

(६) रामचन्द्रः। विततेविस्तीर्णेयज्ञेऋत्विजे सम्यक्कर्म कुर्वते अलङ्कृत्य सुतादानंकन्यादानंक्रियते तंदैवंदैवसंज्ञंविवाहंधर्म्यंप्रचक्षते ॥ २८ ॥

एकं गोमिथुनं द्वे वा वरादादाय धर्मतः ॥ कन्याप्रदानंविधिवदार्षोधर्मः सउच्यते ॥ २९ ॥

(१) मेधातिथिः। स्त्रीगवीपुङ्गवश्चमिथुनम्। एकं द्वे वा वराद्गृहीत्वा कन्यायादानमार्षोधर्मः। धर्मतइतिधर्मएवायंनात्रविक्रयबुद्धिः कर्तव्या उच्चनीचपणापाकरणाभावादित्यभिप्रायः ॥ २९ ॥

(२) सर्वज्ञनारायणः। गोमिथुनंस्त्रीपुंसौ द्वे वा मिथुने धर्मत आदाय। आर्षोयंधर्मइति बुद्ध्यानतुलोभेनादान वेतनकल्पार्थमेव नतु स्वार्थे। तच्च कुलधर्मबुद्ध्यैवविधिवदितिवाक्यमुच्चार्येत्यर्थः। अलंकरणंतु कन्यायानात्रास्ति तत्र विशेषविधेरेव लाभात् ॥ २९ ॥

(३) कुल्लूकः। स्त्री गवी पुंगौश्च गोमिथुनंतदेकं द्वे वा वराद्धर्मतो धर्मार्थयागादिसिद्धये कन्यायैवादातुं न तु शुल्कबुद्ध्या गृहीत्वा यद्यथाशास्त्रंकन्यादानंसआर्षोविवाहोविधीयते ॥ २९ ॥

(४) राघवानन्दः। आर्षंलक्षयति एकमिति। गोयुगंस्त्रीपुंसौमिथुनंद्वेइति स्त्रीपुंगोचतुष्टयं वराद्वरगृहादादाय कन्यायाः सौन्दर्यादिगुणदोषानपेक्ष्यनियतपणत्वेन गृहीत्वा। पूर्वमृषिभिराचरितत्वादार्षम्। ऋषिगताविति धातोरेवंगतागतिकत्वाद्वा। धर्मएवायंनात्र व्यतिक्रमइति मेधोक्तेः। तत्राल्पंवा बहुवेति विक्रयस्तावदेवत्विति मनूक्तेः ॥ २९ ॥

(५) नन्दनः। धर्मतआदायधर्मार्थमादायनार्थार्थंयत्कन्याप्रदानमार्षोधर्मः विक्रयदोषभयादर्षिभिरनुक्तवेतनैरेव विआदीयते शुश्रूषादिकं शिष्यात् किञ्चिदादीयतेच। आर्षेपिकन्यादीयते। वरात्किञ्चिदादीयतेच। तेनदानादानसामान्येनास्यार्षत्वम् ॥ २९ ॥

(६) रामचन्द्रः। वरादेकंगोमिथुनमादाय स्वीकृत्य द्वे वा गृहीत्वा। धर्मतः धर्मार्थयागादिसिध्यर्थंविधिवत्कन्याप्रदानंक्रियते सआर्षसंज्ञः धर्म्योधर्मार्होविवाहउच्यते। आदायार्षस्तु गोद्वयमिति याज्ञवल्क्यः ॥ २९ ॥

सहोभौ चरतांधर्ममितिवाचानुभाष्य च ॥ कन्याप्रदानमभ्यर्च्य प्राजापत्योविधिः स्मृतः ॥ ३० ॥

(१) मेधातिथिः। सहधर्मोयुवाभ्यांकर्तव्यइतिवचनेनपरिभाषांकृत्वा नियम्ययद्दानंसप्राजापत्यः। धर्मग्रहणमुपलक्षणार्थम्। धर्मेचार्थेच कामेच तुल्ययोगक्षेमतेति मिथोऽस्यपरिभाषावचनस्यार्थः। धर्मशब्दाएवोच्चार्यतेसहधर्मश्चर्यतामिति नतु धर्मार्थकामाः सहेति सतुधर्मशब्दःस्मृत्यन्तरवशादर्थकामयोरुपलक्षणार्थोव्याख्यातः। यथेनांनातिचरसि

धर्मार्थकामेषु तदातुभ्यमियंदीयतइति कृतसंवित्कायाभ्युपगततदर्थायविवाहकाले । यद्यपि तत्रैवंसमुच्चारयितव्यंसहधर्मंचरतामिति अर्थकामयोरभिप्रेतेपिसहत्वेतदप्रकृतत्वादनुच्चारणम् । तथाचगौतमः प्राजापत्ये सहधर्मंचरतामितिमन्त्रः मन्त्रग्रहणेनचैतद्दर्शयत्यधिकृतरूपमेवप्रयोक्तव्यंमन्त्रवत् । नहि महासत्वानामर्थकामविषयेसहितत्वंपरिभाषितुंयुक्तम् गम्यतेतुस्मृत्यन्तरेभ्यः । अनयैव संविदा दोषेणास्य न्यूनता अस्तिह्यत्रदातुर्वरादुपकारलिप्सा । शब्देनैतद्वचनंवाच्यते । नपुनरयंदातुरेव वचननियमः । अनुभाष्येत्यनेनैवसिद्धत्वाद्वाचेत्यनर्थकंस्यात् अनुभाषणेवागिन्द्रियस्य साधनत्वात् । तथाचगृह्यकारः । एतद्वः सत्यमित्युक्त्वा वरंवाचयेदेतन्नः सत्यमिति । अनुशब्दश्चप्राप्तार्थस्यैव वाचा निश्चयमाह ॥ ३० ॥

(२) **सर्वज्ञनारायणः** । उभावेव न तुभार्यान्तरेणापि सहेति । अनुभाष्य नियम्य । अभ्यर्च्य मधुपर्केण । एतच्चैतादृक्परिभाषणेन दृष्टत्वार्थाभिसंधिनिमित्ततया कन्यालंकाररहिततया च ब्राह्मदैवाभ्यांहीनमार्षाच्चोत्कृष्टमन्त्रार्थग्रहणाभावात्कन्यानुकंपामात्रकत्वाच्च परिभाषणस्य । अतएव । आर्षोढाजःसुतइतिफलेन्याधिक्यंवक्ष्यते । दैवे तु यद्यपि यज्ञसिद्ध्यभिसन्धिरस्त्येव । तथापि धर्मसिद्ध्यर्थप्रवृत्तस्यास्य धर्महेतुतयाआर्षप्राजापत्याभ्यामुत्तमत्वम् । प्राजापत्ये कन्यासुखाभिसंधिना परिणयनान्तरनिषेधे तात्पर्यादभिसंधेर्धर्मार्थतैवेति ॥ ३० ॥

(३) **कुल्लूकः** । सहयुवांधर्मंकुरुतमिति सुताप्रदानकाले वचसा पूर्वंनियम्यार्चयित्वा यत्कन्यादानंसप्राजापत्योविवाहः स्मृतः ॥ ३० ॥

(४) **राघवानन्दः** । प्रदानकाले वचसा धर्मंचरतामिति पूर्वंनियम्य अभ्यर्च्य सत्कृत्य गन्धादिना कन्यावराविति शेषः । वस्त्रादेरनावश्यकत्वाद्ब्राह्मादेर्भेदः । प्रजामात्रोद्देश्यत्वात् प्रजापतिदैवत्याद्वा प्राजापत्यः ॥ ३० ॥

(५) **नन्दनः** । उभौयुवांसहधर्मंचरतं । नपृथगितिवाचानुभाष्यअहंगृहस्थाश्रमस्थएवधर्मंचरिष्यामि । नान्याश्रमस्थइति वरंप्रतिश्राव्येत्यर्थः । यदिसहधर्मचरणानुभाषणमात्रमेवात्र विवक्ष्यते । ततोदैवविवाहात्प्राजापत्यस्यन्यूनतावक्ष्यमाणानोपपद्येत । अभ्यर्च्यवरमितिशेषः । यत्कन्याप्रदानं । सप्राजापत्योविधिःविधीयतइतिविधिः विवाहउच्यतेगार्हस्थ्यप्राधान्यं निबन्धनंप्राजापत्यत्वंगार्हस्थ्यप्रधानोहिप्रजापतिः ॥ ३० ॥

(६) **रामचन्द्रः** । उभौ स्त्रीपुरुषौ सहधर्मंचरतइति वाचा । अनुभाष्योक्त्वा अभ्यर्च्यालङ्कृत्य कन्याप्रदानंक्रियते प्राजापत्यविधिःस्मृतः प्राजापत्यसंज्ञःविवाहउक्तः ॥ ३० ॥

ज्ञातिभ्योद्रविणं दत्त्वा कन्यायै चैव शक्तितः ॥ कन्याप्रदानंस्वाच्छन्द्यादासुरोधर्मउच्यते ॥ ३१ ॥

(१) **मेधातिथिः** । ज्ञातिभ्यः कन्यायाएवपित्रादिभ्यः कन्यायैस्त्रीधनंदत्त्वाकन्यायाआप्रदानमानयनंमासुरोविवाहः । स्वाच्छन्द्यात्स्वेच्छातोनशास्त्रतोइत्यर्थाद्विदमाह । तत्रहिशास्त्रंनियामकमस्ति । एकंगोमिथुनमिति । इह तुकन्यायारूपसौभाग्यादिगुणापेक्षंच्छन्दः ॥ ३१ ॥

(२) **सर्वज्ञनारायणः** । शक्तितः नतु एकगोमिथुनादिनियतंद्रविणम् । कन्यायाआप्रदानंआदानं स्वाच्छन्द्यान्नत्वार्षवद्वाक्यादिना विधितः । अत्र ज्ञातिभ्यइति वचनात् माता पित्रन्यज्ञातिभ्योऽर्थदाने नासुरत्वम् । तथा कन्यायैचैवेति समुच्चितंव्युच्चितंवाग्राह्यं तदर्थमेवैवकारः । तेन कन्यायाएव च यद्दत्वा परिणयनंसोप्यासुरइत्यर्थः ॥ ३१ ॥

(३) **कुल्लूकः** । कन्यायाज्ञातिभ्यः पित्रादिभ्यः कन्यायै यथाशक्ति धनंदत्वा कन्यायाआप्रदानमादानंस्वीकारः स्वाच्छन्द्यात्स्वेच्छया न त्वार्षइवशास्त्रीयधनजातिपरिमाणनियमेन सआसुरोविवाहउच्यते ॥ ३१ ॥

(४) **राघवानन्दः** । आसुरंलक्षयति ज्ञातिभ्यइति । ज्ञातिभ्यः कन्यायाःपित्रादिभ्यः द्रविणंधनं । पणसङ्ख्या-

नियममव्यवच्छिनत्तिशक्तितइति । कन्याप्रदानंतत्स्वीकारः स्वाच्छन्द्यात् स्वेषामिच्छया । असुःप्राणस्तं राति रमयति वा असुरं धनं व्ययितव्यत्वेन यस्यास्तीत्यासुरः । धर्मशब्दोत्र विरोधिलक्षणया ॥ ३१ ॥

(५) नन्दनः । कन्यायाज्ञातिभ्यः स्वशक्तितोऽभ्यार्थतवतेवरायस्वाच्छन्द्याल्लोकशास्त्रमर्यादातिलङ्घनेन कन्याप्रदानंसआसुरोऽधर्म्यः । परवित्तापहारस्वाच्छन्द्यनिबन्धनमासुरत्वम् । असुराहिस्वाच्छन्द्येनपरवित्तमपहरन्ति ॥ ३१ ॥

(६) रामचन्द्रः । द्रविणं द्रव्यं ज्ञातिभ्योदत्वा कन्यायै वा दत्वा शक्तितः । एतादृश्याः कन्यायाः प्रदानं स्वछन्दात्स्वेच्छातः आसुरसंज्ञो विवाहः अधर्म उच्यते । आसुरो द्रविणादानादिति याज्ञवल्क्यः ॥ ३१ ॥

इच्छयान्योन्यसंयोगः कन्यायाश्च वरस्य च ॥ गान्धर्वः सतु विज्ञेयोमैथुन्यः कामसंभवः॥३२॥

(१) मेधातिथिः । इच्छयाच वरस्य कुमार्याश्चप्रीत्या परस्परसंयोगएकप्रदेशेसंगमनम् । तस्येयंनिन्दामैथुन्यःकामसंभवः मिथुनप्रयोजनोमैथुनः । तस्मैहितोमैथुन्यः । एषएवार्थोविस्पष्टीकृतः कामसंभवइति । संभवत्यस्मादितिसंभवःकामःसंभवोऽस्येति ॥ ३२ ॥

(२) सर्वज्ञनारायणः । मैथुन्योमैथुनमात्रोद्देशप्रवृत्तः प्रथमंयतः कामसंभवः पश्चात्तु होमादिना भार्यात्वसिद्धौ धर्मार्थतापि तस्य भवति । तथाहि सर्वेष्वेव द्विजातिविवाहेषु होमादिनैव भार्यात्वसिद्धिः । यद्वक्ष्यति पाणिग्रहणिकामन्त्रानियतंदारलक्षणम् । तेषांनिष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदइति ॥ तथाच देवलः । गान्धर्वादि विवाहेषु पुनर्वैवाहिकोविधिः । कर्तव्यस्तु त्रिभिर्वर्णैः समयेनाग्निसाक्षिकइति ॥ तथा शौनकपरिशिष्टेविशेषोऽप्युक्तः । गान्धर्वासुरपैशाचाविवाहाराक्षसश्चयः । पूर्वंपरिणयस्तेषांपश्चाद्धोमोविधीयतइति ॥ ३२ ॥

(३) कुल्लूकः । कन्याया वरस्य चान्योन्यानुरागेण यः परस्परसंयोगआलिङ्गनादिरूपः सगान्धर्वोज्ञातव्यः । संभवत्यस्मादितिसंभवः । यस्मात्कन्यावरयोरभिलाषादसौसंभवत्यतएव मैथुन्योमैथुनाय हितः । सर्वविवाहानामेव मैथुनत्वेन यदस्य मैथुनत्वाभिधानंतत्सत्यपि मैथुने न विरोधइतिप्रदर्शनार्थम् ॥ ३२ ॥

(४) राघवानन्दः । गान्धर्वंलक्षयति । मैथुन्यः मिथुनाय हितः । कामसंभवः तयोः कामइच्छा ततएव भवति । नान्तरीयिका पुत्रोत्पत्तिःगान्धर्वः गन्धर्वैराचरितत्वात् ॥ ३२ ॥

(५) नन्दनः । मिथुनेसाधुर्हितोवामैथुन्यःमैथुनपर्यन्तइत्यर्थः । कामसंभवःभोगसंभवःनार्थलोभादिसंभवः । कन्यायावरस्यचेच्छयान्योन्यसंयोगःसगान्धर्वोविधिःगान्धर्वत्वमस्यविधेः । कामपरत्वनिबन्धनं गंधर्वाहिकामपराः । स्त्री कामावै गन्धर्वाइतिश्रुतेः । स्मरतिच भगवान्वाल्मीकिः तीक्ष्णकामास्तुगन्धर्वाइति ॥ ३२ ॥

(६) रामचन्द्रः । कन्याया वरस्य च द्वयोरिछया अन्योन्यसंयोगःसंभोगः भवेत्सविवाहोगान्धर्वसंज्ञोविज्ञेयः । मैथुन्योमैथुनार्हः कामसंभवः अन्योन्यंकामात्संभवोयस्य सःगान्धर्वःसमयान्मिथ इति योगी ॥ ३२ ॥

हत्वा छित्त्वा च भित्त्वा च क्रोशन्तीं रुदतीं गृहात् ॥प्रसह्य कन्याहरणं राक्षसोविधिरुच्यते॥३३॥

(१) मेधातिथिः । प्रसह्याभिभूय कन्यापक्षाद्बलात्कारेण कन्यायाहरणं राक्षसोविवाहइत्येतावदत्रविवक्षितम् । हत्वेत्याद्यनुवादः प्रसह्यापजिहीर्षतोयदि कश्चित्प्रतिबन्धोवर्तते तदा प्राममेव हननादि हन्तुःशक्त्यतिशयंज्ञात्वास्वात्मभयादुपेक्षेरंस्तदाभवत्येव राक्षसो न वधाद्यवश्यंकर्तव्यम् । हत्वादण्डकाष्ठादिना ताडयित्वा । छित्त्वाखड्गादिप्रहारेणाङ्गानि खण्डशःकृत्वा । भित्वा प्राकारपुरदुर्गादि । क्रोशन्तीं रुदतीं कन्यामनिच्छाम् । अयंगान्धर्वाद्विशेषः । अनाथाऽपन्हियै परित्रायध्वमित्याद्युच्चैः शब्दकरणंक्रोशनम् । रोदनमश्रुकणमोक्षः । उद्विजितायाः स्त्रिया धर्मोयम् ॥ ३३ ॥

(२) सर्वज्ञनारायणः । हत्वा विरोधिनः। छित्वा तेषांबाहुपदादि । भित्वा प्राकारादि । एतत्कन्याबन्धुविरोधस्योपलक्षणम् । क्रोशन्तींरुदन्तीमिति कन्यानिच्छोपलक्षणम् । गृहादिति प्रायिकं । प्रसह्य बलादिति । चोरिकानयनव्युदासः । चौरिकायांतुवधादिकरणेपि पैशाचत्वम् ॥ ३३ ॥

(३) कुल्लूकः । प्रसह्य बलात्कारेण कन्यायाहरणंराक्षसोविवाहइत्येव लक्षणम् । यदा तु हर्तुः शक्त्यतिशयं ज्ञात्वा पित्रादिभिरुपेक्ष्यतेतदानावश्यकंहननादि । यदि कन्यापक्षः प्रतिपक्षतांयाति तदा हननादिकमपि कर्तव्यमित्यर्थप्राप्तमनूद्यते । कन्यापक्षान्विनाश्यतेषामङ्गच्छेदंकृत्वा प्राकारादीन्भित्त्वा हापितर्भ्रातरनाथाहंन्ह्रियइति वदन्तीमश्रूणिमुञ्चन्तींयत्कन्यांगृहादपहरत्यनेन कन्याया अनिच्छोक्ता गान्धर्वाद्विवेकार्थम् ॥ ३३ ॥

(४) राघवानन्दः । राक्षसमाह हत्वेति । प्रसह्य बलात्कारेण कन्याहरणं राक्षसः । रक्षसामयंस्वभावोविधिः प्रकारोवा । हत्वेत्याद्युपलक्षणं तदभावे बलाद्धरणेपि स्यात् । तत्र हत्वेति दण्डपातेन । छित्वेति खड्गेन । भित्वेति शरेण ॥ ३३ ॥

(५) नन्दनः । विवाहनिरोधकान्हत्वाच्छित्त्वा भित्वा च कन्यांप्रसह्य परिभूययद्धरणं सराक्षसोविधिः । हिंसाप्राधान्याद्राक्षसत्वं हिंसाप्रधानाहिराक्षसाः ॥ ३३ ॥

(६) रामचन्द्रः । हत्वा ज्ञातिप्रतिबन्धकान् । छित्वा कपाटादीन् । भित्वा गृहादीनि । क्रोशन्तीं रुदतीं ।गृहात्प्रसह्य कन्याहरणंक्रियते यत्र तत्र राक्षसोविधिरुच्यते राक्षससंज्ञोविवाहउच्यते । राक्षसोयुद्धहरणादिति योगीश्वरः ॥ ३३ ॥

सुप्तां मत्तां प्रमत्तां वा रहोयत्रोपगच्छति ॥ सपापिष्ठोविवाहानां पैशाचःप्रथितोधमः ॥ ३४॥

(१) मेधातिथिः । राक्षसपैशाचयोरनिच्छा तुल्या । राक्षसे । हननं । पैशाचे वञ्चनम् । सुप्तां निद्रयाभिभूताम् । मत्तां क्षीबांमद्यपरवशाम् । प्रमत्तां वातसंक्षोभेण नष्टचेतनाम् । रहोऽप्रकाशमुपगच्छति मैथुन धर्मे प्रवर्तते सपैशाचोविवाहःसर्वविवाहानांपापिष्ठः पापहेतुर्धर्मापत्यंन ततः संपद्यते । इहगान्धर्वराक्षसपैशाचानांप्रकृतविवाहसामानाधिकरण्यात्संयोगहरणोपगमाएवपाणिग्रहणसंस्कारनिरपेक्षाविवाहाइति मन्यन्ते । तेषांब्राह्मादिष्वपि दानविवाहयोः सामानाधिकरण्यात्संस्कारोविनिवर्तते । यथाच न निवर्तते तथादर्शितम् । लक्षणया विवाहप्रयोजनदाने विवाहशब्दः । गान्धर्वे तुभगवता कृष्णद्वैपायनेन दुष्यन्तशकुन्तलासंगमने वर्णितमनग्निकममन्त्रकमिति। तद्दर्शनेन पाणिग्रहणसंस्कारोस्ति वर्जितस्तुपैशाचे। पुनर्विवदन्ते मुख्यंचोपगमनंन च कन्यात्वमपैतिसंस्कारैस्तद्विनिवर्तनात् । अतश्च पाणिग्रहणकामन्त्राः कन्यास्वेवप्रतिष्ठिताः इतिप्रतिषेधस्याप्रवृत्तेरस्त्येवमन्त्रवत्संस्कारसंबन्धः । सचप्रतिषेधः कृतः संस्कारप्रतिषेधार्थः । सा हि मन्त्रैः संस्कृतत्वाद्यपगतकन्याभावे । अतएवभवतु प्रथममुपगमस्ततोऽकन्यादोषोनास्ति । तथाचकानीनः कर्णइतिदर्शनम् । यदितु पुरुषप्रयोगेण कन्यात्वमपेयात्कथमियंवाचोयुक्तिःकन्यायाःपुत्रःकानीनइति । अथत्वसंस्कृता कन्योच्यतेततोयुक्तं कर्णादयोह्यनूढायाः पुत्राइतिमुखेऽभ्युपगमने कन्यायाअपत्योत्पत्तेः संभवः । वर्ण्यते चेतिहासादिषु तथाभूतायाविवाहः । अथमद्यमदादिनानिर्वृत्तेरतिसंबन्धे किमर्थः संस्कारइति । अत्रोच्यते यद्यपिस्त्रीपुंसधर्मोनिवृत्तोऽतिक्रान्तश्चकन्यागमनप्रतिषेधस्तथापि तया सहाधिकारार्थंपुनश्च गमने कन्यागमनंमाभूदितितदर्थसंस्कारकरणम् । कन्यागमनप्रतिषेधातिक्रमसंबन्धेन पुरुषार्थतयाऽपि निष्पद्यते विवाहोऽयं तदयुक्तम् यतोऽयंलोके कन्याशब्दः पुंसाऽसंप्रयुक्तांस्त्रियमाचष्टेनसंस्कारभावसापेक्षाम् । अकृतसंस्काराअपिपुरुषैःक्षतयोनयोनकन्याइति व्यवह्रियन्ते । तासांचवेशश्रितानांगमने न कन्यागमनदोषः ।

---

(३४) पैशाचः प्रथितोधमः=पैशाचश्चाष्टमोधमइति बहुषु पुस्तकेषु पठितम् ।

यद्यपिकुमारीकन्याशब्दौप्रथमवयोवचनाविष्येते तथापि विवाहविधावनुपभुक्तपूर्वामेवस्त्रियमाचक्षते। तथाच कुमारवेशधारिणींनातिप्रकाशप्रवृत्तपुंसंप्रयोगांभार्यात्वेनार्थयमानोन्यैरवबोध्यते नैषाकुमारीनष्टोऽस्याः कौमारोभावः संस्कारपरिलोपश्च स्यात्गर्भाधानंहि मन्त्रवत्कर्तव्यंविष्णुर्योनिंकल्पयत्विति कुमायाश्चाकल्पनमशक्यम्। तत्रायथार्थोमन्त्रप्रयोगः स्यात्। न चानूढायाः पैशाचधर्मेमन्त्रप्रयोगः उढायास्तच्छ्रवणात्। पैशाचवर्जमन्येषु विवाहेषु तत्कल्पयितुंयुक्तमविशेषश्रवणात्। तस्मान्मुख्योपगमपक्षएवमादयोबहवोदोषा प्रामुवन्ति। अतआलिङ्गनोपगूहनपरिचुम्बनादिषूपगमनार्थेषु व्यापारेषु साहचर्यात्तादर्थ्याच्चोपपूर्वोगमिर्द्रष्टव्यः। यत्तु कानीनः पुत्रइति तत्रमुख्यार्थासंभवाल्लक्षणया संस्कारभावप्रतिपत्तिः। यत्तु। संस्कारदर्शनंतत्तु क्वचिदेव। यद्यपि या गर्भिणी संस्क्रियतेज्ञाताऽपि चेति तत्र यएवोपगन्ता सएव संस्कर्ता। नत्वसौ पैशाचोविवाहःपैशाचे हि येनैव समुपभुक्ता यस्माएवदीयते। सएवैनांसंस्करोतीति। गर्भिण्यास्तुसंस्कारोवाचनिकः। एतच्च सर्वंनिपुणतरंपुनर्नवमे वक्ष्यते। अपरेमन्यन्तेसत्यमुख्यमुपगमनममुख्यत्वे तु गमनप्रतिषेधानुपपत्तिरितियदि हि मुख्य मुपगमस्तदा सएव विवाहोऽन्यस्यानन्तरोक्तेनन्यायेनाभावात्। ततश्च नास्ति तस्य प्रतिषेधस्य विषयोयतइच्छया गान्धर्वोहठाद्राक्षसोऽन्यथापैशाचः। नचान्यः प्रकारोऽस्ति येन सर्वविषयप्रतिषेधः स्यात्। अस्ति त्वस्य विषयःयत्र हठाद्रहसिगमनंया वा पितृभ्यांदीयते न चोपसंस्क्रियंते। न चासौ तेषामपिगान्धर्वःकन्येच्छायाअभावात्। अतएव भर्तुरपि नकन्यागामित्वं विषयान्तरस्य संभवात्। तस्मात्क्षतयोन्याःसंस्कारनिषेधाद्ब्राह्मादिवदुपायत्वात्तद्वच्च विवाहशब्दोपपत्तेःप्रकरणसामर्थ्याद्गौणएवोपगमार्थः। एषांचभेदःअप्रार्थितोपनतोभूमिहिरण्यादिवद्ब्राह्मः। ऋत्विक्त्वेन विशेषेण दैवः गोमिथुनेनार्षः। याञ्चयाऽयाञ्चया वा सहोभौ चरतांधर्ममितिवचनव्यवस्थया प्राजापत्यः। शेषाःसुबोधभेदाः। ब्राह्मादीनामिदमर्थेतद्धितः। ब्रह्मादिसम्बंधिताचस्तुत्यारोप्यते। एवंसर्वेषु। पैशाचःपिशाचानामयंयुक्तइतिनिन्दा ॥ ३४ ॥

(२) **सर्वज्ञनारायणः**। सुप्तामित्यादिकन्यानिच्छोपलक्षणम्। मत्तांमद्येन। प्रमत्तां अन्यचित्तांक्रीडादिना। उपगच्छति नयति वा प्रथितः पापिष्ठः पापिष्ठतया प्रसिद्धः। अत्र च पुत्रिकाविधिविवाहोनवमोन्यएव। एष्वनन्तर्भावात्। अत्र तु तदपरिगणनं तत्संवोढुः प्रयोजनाभावात् एकापत्यादौ नियमेन तु दाने द्वितीयाद्यपत्यं वोढुरेव भवति। तदाच तस्य धर्माभिसन्धिकृतत्वसाम्यादार्षत्वमेवेति ॥ ३४ ॥

(३) **कुल्लूकः**। निद्राभिभूतांमद्यमदविह्वलांशीलसंरक्षणेन रहितांविजनदेशे यत्र विवाहेमैथुनधर्मेण प्रवर्तेत सपापहेतुर्विवाहानांमध्ये ऽधमः पैशाचः ख्यातः ॥ ३४ ॥

(४) **राघवानन्दः**। पैशाचमाह सुप्तामिति। मत्तां मद्यमदविह्वलाम्। प्रमत्तां शीलरक्षणे अनवहिताम्। मात्राद्यशिक्षितत्वेन। रहसि विजने देशउपगच्छति मैथुनमाचरति सपापिष्ठः। पापहेतुत्वात्तद्विवाहस्य पैशाचः पिशाचप्रेतस्तदाचरितत्वात् ॥ ३४ ॥

(५) **नन्दनः**। सुप्तांकन्याम्। यत्रयदितियावत्। सपैशाचोविवाहः। सुप्तमत्तप्रमत्तकन्याभोगिनिबन्धनंपिशाचत्वम्। पिशाचाहिसुप्तमत्तप्रमत्तानाविशन्ति ॥ ३४ ॥

(६) **रामचन्द्रः**। पैशाचविवाहमाह सुप्तामिति। यत्र रहःयस्मिन्रहसि एकान्तस्थाने मत्तांमद्यादिना प्रमत्तां वा अनवहितांसुप्तांकन्या मुपगच्छति भोगेन प्राप्नोति विवाहानांमध्ये स पैशाचो विवाहः। पापिष्ठः पापजनकः प्रथितः प्रसिद्धः अष्टमः। पैशाचःकन्यकाच्छलादिति योगीश्वरः ॥ ३४ ॥

अद्भिरेव द्विजाग्र्याणांकन्यादानंविशिष्यते ॥ इतरेषांतु वर्णानामितरेतरकाम्यया ॥ ३५ ॥

(१) **मेधातिथिः** । द्विजाग्र्याणांब्राह्मणानांकन्यादानंकन्यांददतामद्भिरेव दानंशस्यते । ब्राह्मणाय यदा कन्यां ददाति तदाद्भिरेवदद्यात् । कथंपुनरापोदानकरणम् । नहि ताभिर्विनादानमस्ति अद्भिर्वाच्यंनमेपूर्वंभिक्षादानंददातिवै एवं धर्मेष्वितिनियमात् । अथवा अद्भिरेवेत्यवधारणेनार्षासुरप्राजापत्यानपवदति । तत्र हि न केवलाआपः कारणं गोमिथुनादिद्रव्यग्रहणमपिसंविद्यवस्थाच । तेनैतदुक्तंभवति यथागोहिरण्यादिद्रव्यंदीयतेनाकिंचित्परिभाष्यते इयंगौस्त्वयैवंसंवाहनीयेदृशानि तृणान्यपि देयानिएवंकन्यापिदेयानदुहितृस्नेहेन जामाता परिभाषणंकारयितव्यः । नच तस्माद्धनंग्रहीतव्यमिति । क्षत्रियादीनांतुयदिकन्यावरयोः परस्परमभिलाषोभवतितदादानंकर्तव्यंनेतरथाब्राह्मविवाहवत् । अन्ये तु व्याचक्षते धनंवा गृहीत्वाद्भिरेवेत्येषइतरेतरकाम्यार्थः । अस्मिन्पक्षे ब्राह्मणस्य सर्वविषयता ज्ञापिता भवति ॥ ३५ ॥

(२) **सर्वज्ञनारायणः** । प्रदानं स्वाम्यकारकमितिवचनात् क्षत्रियादिभ्योपि दानप्रसक्तौविशेषमाह अद्भिरेवेति । अद्भिर्यत्कन्यादानंतत् द्विजाग्र्याणांविप्राणामेव तेषामेव प्रतिग्रहसंभवात् इतरेषांत्वप्रतिग्राहकत्वात् । कन्याज्ञातिभिः कन्ययावा सहान्योन्येच्छामात्रेणविनापिदानाद्विवाहसिद्धिरित्यर्थः । काम्या कामना एतच्च लक्षणं यथोक्तविध्यर्थनिष्पत्तिमात्रेणेति तु ग्राह्यम् । राक्षसेऽन्योन्येच्छाभावात् ॥ ३५ ॥

(३) **कुल्लूकः** । उदकदानपूर्वकमेव ब्राह्मणानांकन्यादानंप्रशस्तंक्षत्रियादीनांपुनर्विनाप्युदकंपरस्परेच्छया वाङ्मात्रेणापि कन्यादानंभवति । उदकपूर्वकमपीत्यनियमः ॥ ३५ ॥

(४) **राघवानन्दः** । संप्रति तत्तद्दानप्रकारमाह अद्भिरिति । अद्भिरेवेत्यवधारणंनार्षादिव्यावृत्त्यर्थं । न तत्र केवलमापः गवादेरपि प्रवेशात् । विनाप्युदकंवाङ्मात्रेणापि ॥ ३५ ॥

(५) **नन्दनः** । अथकन्याप्रदानमाह अद्भिरिति । इतरेतरकाम्यया परस्परेच्छया । गान्धर्वादिषुनायंविधिः प्रदानाभावात् ॥ ३५ ॥

(६) **रामचन्द्रः** । द्विजाग्र्याणां ब्राह्मणक्षत्रियविशां कन्याप्रदानमद्भिरेव जलैरेव जल पूर्वं प्रशस्यते । इतरेषां वर्णानामनुलोमप्रतिलोमजातीनां इतरेतरकाम्यया परस्परेच्छया कन्याप्रदानम् ॥ ३५ ॥

योयस्यैषांविवाहानां मनुना कीर्तितोगुणः ॥ सर्वंशृणुत तं विप्राः सर्वं कीर्तयतोमम ॥ ३६ ॥

(१) **मेधातिथिः** । यदुक्तंगुणदोषौच यस्ययाविितितत्स्मारयति । बहवोवक्तव्यतया प्रतिज्ञातास्तत्रवक्ष्यमाणैः श्लोकैरयमर्थउच्यतइतिविशेषज्ञानार्थंयुक्तः पुनरुपन्यासः । एषांविवाहानामिति निर्धारणे षष्ठी । एवंविवाहानांयस्य विवाहस्य योगुणः कीर्तितआचार्येण मनुना सर्वंशृणुत तंगुणंविप्राभृगुर्महर्षीनामन्त्रयते । सम्यगवैपरीत्येनानाकुलंकीर्तयतः कथयतः ॥ ३६ ॥

(२) **सर्वज्ञनारायणः** । गुणः पुत्रोत्पत्तिद्वारा ॥ ३६ ॥

(३) **कुल्लूकः** । यद्यपिगुणदोषौ च यस्य याविति गुणाभिधानमपि प्रतिज्ञातमेव तथापि बहूनामर्थानांतत्र वक्तव्यतया प्रतिज्ञातत्वाद्विशेषज्ञापनार्थः पुनरुपन्यासः । एषांविवाहानामिति निर्धारणेषष्ठी एषांमध्ये यस्य विवाहस्य योगुणोमनुना कथितस्तत्सर्वं हे विप्राः मम कथयतः शृणुत ॥ ३६ ॥

(४) **राघवानन्दः** । प्रसवे च गुणागुणानित्युक्तंतद्गुणानाह यइतित्रिभिः । मम मत्तः ॥ ३६ ॥

(५) **नन्दनः** । एषांविवाहानांमध्ये यस्य विवाहस्ययोगुणः फलम् ॥ ३६ ॥

(६) रामचन्द्रः। यस्य वर्णस्य येषां विवाहानांयो गुणः कीर्तितः हेविप्रास्तं सर्वंगुणंमम कीर्तयतः सम्यक् शृणुत ॥ ३६ ॥

दश पूर्वान्परान्वंश्यानात्मानंचैकविंशकम् ॥ ब्राह्मीपुत्रः सुकृतकृन्मोचयत्येनसःपितॄन् ॥ ३७ ॥

(१) मेधातिथिः। पूर्वे वंश्याः पितृपितामहादयः। अपरे पुत्रपौत्रादयः। तान्मोचयत्येनसोनरकादियातनाभ्य-उद्धरति। ब्राह्मेन विवाहेनऊढातस्यांयोजातः पुत्रः ससुकृतकृत्पुण्यकृद्यदि भवति। पितॄन्परलोकगतान् पितृशब्दोऽयंप्रेत-पर्यायः नहि पुत्रादिसंततेरन्यथा पितृव्यपदेशसंभवः। दशशब्दः प्रत्येकमभिसंबध्यते पूर्वापरशब्दाभ्यां एकविंशकमि-तिनिर्देशात्। अर्थवादश्चायम्। तेनागताननुत्पन्नान्कथंमोचयतीति नवाच्यम्। पूर्वेषांत्वपत्यकृतेन शुभेन श्राद्धादिना भ-वत्येव पापान्मोक्षइतिश्राद्धाधिकारे कथयिष्यते। अतोदशापरानेनसोमोचयतीत्येतदुक्तंभवति। दशपुरुषायस्मिन्कुलेऽ-पापाजायन्तइत्यालम्बनम् ॥ ३७ ॥

(२) सर्वज्ञनारायणः। अत्र ब्राह्मीपदेन कन्यायाबुद्धिस्थत्वात्तस्याः पित्रादयःप्रथमसंबन्धितया पूर्वपदेनो-च्यन्ते। अपरपदेन तु पश्चात्संबन्धितया कन्यायाभर्तृश्वशुरादयः। तेन मातामहप्रभृतीन्दशदश च पितृप्रभृतीनात्मा-नंच ब्राह्मीपुत्रः पूर्वजन्मकृतदुर्ब्राह्मणत्वहेतोरेनसस्तारयतीत्यर्थः। यथा देवलः। दातुःप्रतिग्रहीतुश्च पुनात्यासप्तमंकुलमि-ति। याज्ञवल्क्योपि तज्जःपुनात्युभयइत्याह। ब्राह्मी ब्रह्मविवाहोढा। सुकृतकृदिति दुष्कृतकारित्वे तस्यनैतत्फलमस्तीत्य-र्थः त्रिधाच पुत्रः। औरसः पुत्रिकापुत्रः क्षेत्रजइति। तत्र औरसपुत्रमधिकृत्यैतत्फलमुक्तं। पुत्रिकायांततोन्यूनं। ततोपि क्षेत्रजे पुत्रे फलमित्येवमन्यत्राप्युन्नेयम् ॥ ३७ ॥

(३) कुल्लूकः। दशपूर्वान्पित्रादीन्वंश्यान्परान्पुत्रादीन्दशात्मानंचैकविंशकंब्राह्मविवाहोढापुत्रोयदि सुकृतकृद्भवति तदापापान्मोचयति पित्रादीन्नरकादुद्धरति। पुत्रादयश्च तस्य कुले निष्पापाजायन्तइति मोचनार्थस्तेषामनुत्पत्तेः पापध्वं-सस्याशक्यत्वात् ॥ ३७ ॥

(४) राघवानन्दः। वंश्यान् स्ववंशजातान्। परान् पुत्रादीन्। तद्वंश्यानांपापायोगित्वंसूचितम्। सुकृतकृत् श्राद्धादिकर्ता चेन् प्रजातमात्रेणेति ध्वनिः ॥ ३७ ॥

(५) नन्दनः। ब्राह्मी ब्राह्मविवाहोढा ॥ ३७ ॥

(६) रामचन्द्रः। पितृतः दशपूर्वान्वंश्यान्दशापरानेकविंशकमात्मानं ब्राह्मणीपुत्रःब्राह्मविवाहोत्पन्नः पुत्रः सुकृत-कृत् सुकृतं करोतीति सुकृतकृत् सुकृतोत्पादकः सन्पितॄनेनसःपापान्मोचयेत् ॥ ३७ ॥

दैवोढाजः सुतश्चैव सप्त सप्त परावरान् ॥ आर्षोढाजःसुतस्त्रींस्त्रीन् षट् षट् कायोढजः सुतः ॥ ३८ ॥

(१) मेधातिथिः। दैवेन विधिनोढा दैवोढा तस्यांजातोदैवोढाजः। सुतःपुत्रः कः प्रजापतिः सद्देवता यस्यविवाहस्य-सयः संस्कार कर्मणि ग्रहणलक्षणेऽसत्येव देवतासंबन्धे प्रजापतेर्दैवतात्वमध्यारोप्यते भक्त्या। यदपितत्रप्राजापत्ययो-गोस्ति सतुविवाहादिसाधारण्येनकायव्यपदेशे कारणम्। आसुरादिषु च न काचिद्गतिः स्यात्। न ह्यासुरेभ्योविवाहेभ्यो-योगोऽस्ति। कायोढजइतिन्ह्रस्वत्वं ङ्यापोःसंज्ञाछन्दसोर्बहुलमिति। ननुच यद्यन्न्यूनफलंतत्तत्पश्चान्निर्दिष्टंतत्रार्षस्य प्राजापत्यात्पश्चादभिधानंयुक्तम्। अस्त्यत्र कारणंयेनाधिकफलस्य प्राजापत्यस्य। पश्चान्निर्देशः पश्चानांतु त्रयीधर्म्या-इत्यत्र प्राजापत्यस्य ग्रहणमिष्यतेइतरथार्षस्य स्यात् ॥ ३८ ॥

---

(३७) मोचयत्येनसः=मोचयेदेनस इति बहुषु प्राचीन पुस्तकेषु मुद्रितपुस्तकेषुच पठितम्।

(२) सर्वज्ञनारायणः । दैवादिषु तु तादृग्विवाहोढस्त्री जातपुत्रिका पुत्रानादाय फलमुक्तं दैवोढजासुतइत्यादिना दैवविवाहेन याऊढा तस्यांया पुत्रिका जाता तस्याःपुत्रइत्यर्थः । अर्थाच्च तत्राप्यौरसे ततोधिकंफलं क्षेत्रजेत्वल्पमित्यु-न्नेयम् । कायःप्राजापत्यः अत्र च स्मृत्यन्तरेष्वधिकपुरुषपावनोक्तिरभिसन्धिशुद्ध्यादिनोपपाद्या । आसुरादिषु तु विवाहेषु जाताःपितृमात्रस्व पुन्नामनरकतारकहेतवोनान्येषांपावयितारइत्यर्थसिद्धित्वान्नोक्तम् ॥ ३८ ॥

(३) कुल्लूकः । दैवविवाहोढायाः पुत्रः सपरान्पित्रादीन्सप्तावरान्पुत्रादींश्च । आर्षविवाहोढायाः पुत्रस्त्रीन्पित्रादींस्त्रींश्च-पुत्रादीन् । प्राजापत्यविवाहोढायाः पुत्रः षट्पित्रादीन्षट्पुत्रादीन् । आत्मानंचैनसोमोचयतीति पूर्वस्यैव सर्वत्रानुषङ्गः । कायोढजइति । ङ्यापोः संज्ञाछन्दसोर्बहुलमिति ह्रस्वत्वम् । ब्राह्माद्यष्टविवाहोद्देशक्रमानुसारेणमन्त्रफलस्यार्षस्येह बहु-फलप्राजापत्यात्पूर्वाभिधानम् । ब्राह्मादिविवाहोद्देशश्लोकएव कथमयंक्रमइतिचेत्पश्चानांतु त्रयोधर्म्याइत्यत्र प्राजापत्यग्रह-णार्थम् । अन्यथात्वार्षस्यैव ग्रहणंस्यात् ॥ ३८ ॥ ॥

(४) राघवानन्दः । दैवोढाजः दैवविवाहाज्जातः । त्रीनिति । गोशुल्कग्रहणापराधात् । कायोढजः कस्यप्रजापते-रयंविवाहः । कायोढस्तस्माज्जातः प्राजापत्यजइत्यर्थः ॥ ३८ ॥

(५) नन्दनः । कायोढजः प्राजापत्येनोढायाः सुतः । ऱ्हस्वोवृत्तभङ्गपरिहारार्थः ॥ ३८ ॥

(६) रामचन्द्रः । दैवोढाजःसुतः दैवविवाहोत्पन्नःसुतः सप्तावरान् पूर्वांश्चेत्यर्थः । चतुर्दशपुरुषान्पवित्रयतीत्य-र्थः । आर्षोढाजःसुतः आर्षविवाहोत्पन्नःसुतस्त्रीन्पूर्वान्वंश्यांस्त्रीन्परान्वंश्यान्पुनाति । कायोढजःसुतःप्राजापत्यविवा-होत्पन्नःसुतःषट्पूर्वान्वंश्यान्सहात्मनेति योगीश्वरः ॥ ३८ ॥

ब्राह्मादिषु विवाहेषु चतुर्ष्वेवानुपूर्वशः ॥ ब्रह्मवर्चसिनःपुत्राजायन्ते शिष्टसंमताः ॥ ३९ ॥

(१) मेधातिथिः । प्रसवेचगुणागुणानित्युक्तंतदिदमनुपूर्वशआनुपूर्व्येणेत्यस्मिन्नर्थेस्मृतिकारैः प्रयुज्यते । श्रुताध्यय-नविज्ञानसंपत्तिनिमित्तेच पूजाख्याति ब्रह्मवर्चसंतद्वन्तोब्रह्मवर्चसिनः । इन्नन्तोऽयम् । शिष्टानांसंमता अनुमताअगर्ह्या-अद्विष्टाःप्रियाइतियावद्यतश्चामन्यर्थत्वान्मतिबुद्धीत्यस्याविषयत्वेन क्तेनच पूजायामित्येतेन नास्ति समासप्रतिषेधः । सं-बन्धसामान्यविवक्षायांच षष्ठी ॥ ३९ ॥

(२) सर्वज्ञनारायणः । ब्राह्मणस्य चत्वार आद्याः प्रशस्ताउक्तास्तदुपपादयति ब्राह्मादिष्विति । अनुपूर्वशः तत्त-द्विवाहा पकर्षक्रमेणापकृष्यमाणगुणाः ॥ ३९ ॥

(३) कुल्लूकः । प्रसवेचगुणागुणानिति यदुक्तंतदुच्यते । ब्राह्मादिषु चतुर्षु विवाहेषु क्रमावस्थितेषु श्रुताध्ययन-सम्पत्तिकतेजोयुक्ताः पुत्राः शिष्टप्रियाजायन्ते । प्रियार्थत्वाच्च संमतशब्दस्य क्तेन च पूजायामिति न षष्ठीसमासप्रतिषेधः । सम्बन्धसामान्यविषयाषष्ठीयंसमस्यते ॥ ३९ ॥

(४) राघवानन्दः । तेष्वेव गुणान्तरमाहब्राह्मादिष्विति द्वाभ्यां । ब्रह्मवर्चसिनः वेदाध्ययनजवीर्ययुक्ताः ॥ ३९ ॥

(६) रामचन्द्रः । चतुर्षु ब्राह्मादिषु विवाहेषु अनुपूर्वशः ब्राह्म दैवार्षप्राजापत्येषु चतुर्ष्वेव विवाहेषु पुत्रान्ब्रह्मवर्च-सिनो जायन्ते ॥ ३९ ॥

रूपसत्त्वगुणोपेताधनवन्तोयशस्विनः ॥ पर्याप्तभोगाधर्मिष्ठाजीवन्ति च शतंसमाः ॥ ४० ॥

(१) मेधातिथिः । रूपंमनोहराकृतिःसत्वंनाम गुणोद्वादशे वक्ष्यते ताभ्यामुपेतायुक्ताः । आढ्याधनवन्तः ।

श्रुतशौर्यादिगुणयुक्ततया ख्याताःयशस्विनः । पर्याप्तभोगाः स्रगनुलेपनगीतवाद्यादिभिः सुखसाधनैरविकलैर्नित्ययुक्ताः । सुखसाधनैः पूर्वोक्तैरवियोगोभोगः सपर्याप्तोऽक्षतः समप्तोयेषांते पर्याप्तभोगाः । धर्मानुष्ठानतत्पराधर्मिष्ठाः । धर्मशब्दः केषांचिद्गुणवचनः । अतो गुणवचनादित्यातिशायिकः । शतंवर्षाणिजीवन्ति ॥ ४० ॥

(२) सर्वज्ञनारायणः । सत्वगुणाः सात्विकाधर्माज्ञानादयः । पर्याप्तभोगाः माप्तकृत्स्नभोगाः ॥ ४० ॥

(३) कुल्लूकः । रूपंमनोहराकृतिः सत्त्वंद्वादशाध्याये वक्ष्यमाणंगुणादयादयः । तैर्युक्ताधनिनः । ख्यातिमन्तो- यथेप्सितवस्त्रस्रगन्धलेपनादि भोगशालिनोधार्मिकाश्चपुत्रा जायन्तइति पूर्वमनुवर्तते शतंच वर्षाणि जीवन्ति ॥ ४० ॥

(४) राघवानन्दः । सत्वगुणाद्द्वादशाध्याये वक्ष्यमाणाः । रूपंसौन्दर्यं सत्वंबलं वा पर्याप्तभोगाइति भोगिनः । भोग्योपस्थितावपि दुष्कृतिनां न भोगसिद्धिः ॥ ४० ॥

(५) नन्दनः । ब्राह्मादिषु चतुर्षु विवाहेष्वामुष्मिकंफलमत्येकमुक्तम् इदानीमैहिकं च समुदायेफलंश्लोकद्वयेनाह ब्राह्मादिष्विति । सत्त्वगुणोपेताः सात्त्विकाः । पर्याप्तभोगाः पूर्वसुखभोगाः ॥ ४० ॥

(६) रामचन्द्रः । एतादृशाः भवन्ति पर्याप्तभोगधर्मिष्ठाः ॥ ४० ॥

इतरेषु तु शिष्टेषु नृशंसानृतवादिनः ॥ जायन्ते दुर्विवाहेषु ब्रह्मधर्मद्विषः सुताः ॥ ४१ ॥

(१) मेधातिथिः । ब्राह्मादिव्यतिरिक्तेषु गान्धर्वादिविवाहेषु नृशंसमनृतंचवदन्ति नृशंसानृतवादिनः । नृशंसंमातृभगिन्यादावश्लीलाक्रोशवचनम् । अनृतंप्रसिद्धम् । नृशंसंचानृतंचनृशंसानृते तद्वेदितुंशीलमेषामिति शब्दव्युत्पत्तिः । ब्रह्मधर्मोवेदधर्मोवेदार्थस्तं द्विषन्ति निन्दति वा न श्रद्दधते वा । अतएव दुर्विवाहेष्विति निन्दा ॥ ४१ ॥

(२) सर्वज्ञनारायणः । शिष्टेष्वनुशिष्टेषु । अपदिष्टेष्विति यावत् । नृशंसोहिंस्रः ॥ ४१ ॥

(३) कुल्लूकः । ब्राह्मादिभ्यश्चतुर्भ्योऽन्येष्वासुरादिषु चतुर्षु विवाहेषु क्रूरकर्माणोमृषावादिनोवेदद्वेषिणोयागादिधर्मद्वेषिणः पुत्राजायन्ते ॥ ४१ ॥

(४) राघवानन्दः । ब्राह्मदैवतार्षप्राजापत्यभिन्नेषु दोषानाह इतरेष्विति । शिष्टेष्ववशिष्टेषु । नृशंसाः क्रूराः । तत्कर्माणो वा । ब्रह्म वेदः । ब्राह्मणजातिर्वा । धर्मश्चाग्निहोत्रादिस्तद्विषः ॥ ४१ ॥

(५) नन्दनः । इतरेष्ववशिष्टेष्वप्रशस्तेपूपविवाहेषु । नृशंसानृतवादिनःपरुषवादिनः । ब्रह्मद्विषः ब्राह्मणद्विषः । अननुज्ञातविवाहविषये निन्दा । इतरथाहिक्षत्रियादिषुगान्धर्वराक्षसाद्युपशासनानर्थक्यप्रसङ्गः ॥ ४१ ॥

(६) रामचन्द्रः । शिष्टेष्वितरेषु चतुर्षु विवाहेषु नृशंसानृतवादिनः । ब्रह्मधर्मद्विषः । सुताजायन्ते आसुरगान्धर्वराक्षसपैशाचेषु चतुर्ष्विति ॥ ४१ ॥

अनिन्दितैः स्त्रीविवाहैरनिन्द्या भवति प्रजा॥निन्दितैर्निन्दिता नृणांतस्मान्निन्द्यान्विवर्जयेत्॥४२

(१) मेधातिथिः । समासतोविवाहानांफलप्रदर्शनमेतत् । येयस्य विवाहाविहितास्तेऽनिन्दितास्तैरुत्पन्नायाप्रजा पुत्रादिलक्षणा साऽनिन्द्याभवति प्रशस्येत्यर्थः । निन्दितैः प्रतिषिद्धैः । निन्दितागर्हिता । तस्माद्दुःखभागिनीप्रजामाभूदिति-निन्द्यान्विवर्जयेत् ॥ ४२ ॥

(४२) नृणाम्=स्त्रीणाम् (ज, ड)

(२) **सर्वज्ञनारायणः**। यद्वर्णस्य योविवाहोविहितःसोनिन्दितः। निन्दितोन्यः। एवंसवर्णाविहितविवाहे केवलंप्रजानिन्द्याभवति। भार्यात्वंतु सित्ध्यत्येवेति कथितम् ॥ ४२ ॥

(३) **कुल्लूकः**। संक्षेपेणविवाहानांफलकथनमिदम्। अगर्हितैर्भार्याप्राप्तिहेतुभिर्विवाहैरगर्हिता मनुष्याणांसंततिर्भवति। गर्हितैस्तु गर्हिता तस्माद्गर्हितविवाहान्न कुर्यात् ॥ ४२ ॥

(४) **राघवानन्दः**। नगिरागिरेति न्यायेन निन्दितविवाहान्निषेधति अनिन्दितैरिति। ऐरंकृत्वोद्गायतीति विधौ यआत्मानंगिलेदित्याद्यर्थवादस्तथाअनिन्दितविवाहःकार्यइत्यत्र निन्दितविवाहनिषेधोर्थवादः ॥ ४२ ॥

(५) **नन्दनः**। उक्तमेवार्थंसंक्षिप्य दर्शयति अनिन्दितैरिति ॥ ४२ ॥

(६) **रामचन्द्रः**। अनिन्दितैःस्त्रीविवाहैः अनिन्द्या स्तुत्या प्रजा भवति पुत्राभवन्तीत्यर्थः। आसुरादिनिन्दितैर्विवाहैर्निन्दिताप्रजा भवति नृणां तस्मान्निन्द्यान्विवाहान्वर्जयेत् ॥ ४२ ॥

पाणिग्रहणसंस्कारः सवर्णासूपदिश्यते ॥ असवर्णास्वयंज्ञेयोविधिरुद्वाहकर्मणि ॥ ४३ ॥

(१) **मेधातिथिः**। पाणिग्रहणंनाम गृह्यकारोक्तः संस्कारः सवर्णासु समानजातीयासूह्यमानासूपदिश्यते शास्त्रेण विधीयते कर्तव्यतया प्रतिपाद्यते। असवर्णासु यदुद्वाहकर्म तत्रायंवक्ष्यमाणोविधिर्ज्ञेयः ॥ ४३ ॥

२) **सर्वज्ञनारायणः**। सवर्णास्विति सामान्योक्त्या शूद्राणामप्यग्निसाक्षिकममंन्त्रकंपाणिग्रहणमात्रं कर्तव्यत्वेनाभिमतम् ॥ ४३ ॥

(३) **कुल्लूकः**। समानजातीयासु गृह्यमाणासु हस्तग्रहणलक्षणः संस्कारोगृह्यादिशास्त्रेणविधीयते। विजातीयासु पुनरुह्यमानासु विवाहकर्मणि पाणिग्रहणस्थानेऽयमनन्तरश्लोके वक्ष्यमाणोविधिर्ज्ञेयः ॥ ४३ ॥

(४) **राघवानन्दः**। असवर्णासु पाणिग्रहणाभावेन प्रकारान्तरंवक्तुंसवर्णास्वेव गृभ्णामि ते सौभगत्वायेति पाणिग्रहणंविधत्ते पाणीति द्वाभ्यां। अयंवक्ष्यमाणः शरइत्यादिः ॥ ४३ ॥

(५) **नन्दनः**। अथविवाहाङ्गविशेषमाह पाणिग्रहणेति। करेण करस्य ग्रहणंपाणिग्रहणम्। पाणिग्रहणमेवसंस्कारः पाणिग्रहणसंस्कारः। अयंवक्ष्यमाणः ॥ ४३ ॥

(६) **रामचन्द्रः**। पाणीति। सवर्णासु स्त्रीषु पाणिग्रहणसंस्कारउपदेश्यते। तद्यथा ब्राह्मणस्य ब्राह्मण्याः पाणिग्रहणमितिसवर्णास्वित्यर्थः। असवर्णासु स्त्रीषु विवाहेषु ब्राह्मणस्यऽयंविधिरुद्वाहकर्मणि ज्ञेयः ॥ ४३ ॥

शरः क्षत्रियया ग्राह्यः प्रतोदोवैश्यकन्यया ॥ वसनस्य दशाग्राह्या शूद्रयोत्कृष्टवेदने ॥ ४४ ॥

(१) **मेधातिथिः**। ब्राह्मणेनोह्यमानया क्षत्रियया शरोब्राह्मणपाणिपरिगृहीतोग्राह्यः पाणिग्रहणस्थाने शरस्य विधानात्। प्रतोदोबलीवर्दानामायासः क्रियते येन वाह्यमानाः पीडयन्ते हस्तिनामिवाङ्कुशः। वसनस्य वस्त्रस्य दशा ग्राह्या शूद्रयाउत्कृष्टजातीयैर्ब्राह्मणादिवर्णैर्वेदनेविवाहे ॥ ४४ ॥

(२) **सर्वज्ञनारायणः**। क्षत्रियाधृतंशरं वैश्यया च धृतंप्रतोदं पाणिग्रहणमन्त्रैर्वरोगृण्हीयात्। शूद्राविवाहे तु शूद्रा वरस्य वसनाञ्चलममन्त्रिकंगृण्हीयात्। शूद्रामप्येके मन्त्रवर्जमितिस्मृतेः। उत्कृष्टः स्ववर्णोत्कृष्टवर्णः। एतेन क्षत्रियेण वैश्यायाः शूद्रायाश्च वैश्येन च शूद्राविवाहेऽयमेव क्रमइति कथितम् ॥ ४४ ॥

(३) **कुल्लूकः**। क्षत्रियया पाणिग्रहणस्थाने ब्राह्मणविवाहे ब्राह्मणहस्तपरिगृहीतकाण्डैकदेशोग्राह्यः। वैश्यया-

ब्राह्मणक्षत्रियविवाहे ब्राह्मणक्षत्रियावधृतप्रतोदैकदेशोग्राह्यः । शूद्रया पुनर्द्विजातित्रयविवाहे प्रावृतवसनदशाग्राह्या ॥४४॥

(४) राघवानन्दः । शरः पाणिना क्षत्रियया गृहितोयस्तंपाणिस्थानीयंविप्रोगृह्णीयान्न तु विप्रहस्तस्थः शरः । क्षत्रियविषयइतिकन्यापाणिस्थाने शरस्य विधानात् । अन्यथामन्त्रलिङ्गविरोधः । अतः क्षत्रियया शरोब्राह्मण्या पाणिः परिगृहीतोग्राह्यः इतिमेधातिथिःप्रलापः एवंप्रतोदादिषु प्रतोदोबलीवर्दादिचालनसाधनः । उत्कृष्टवेदने द्विजादिकर्तृक विवाहे ॥ ४४ ॥

(५) नन्दनः । वर्णोत्कृष्टस्यवेदनेसवर्णादुत्तरोत्तरस्यवर्णस्यलाभेविवाहइतियावत् ॥ ४४ ॥

(६) रामचन्द्रः । तद्यथा उत्कृष्टवेदने विप्रस्य वेदनेविवाहे क्षत्रिययाशरोग्राह्यः । विप्रस्य वेदने वैश्यया प्रतोदोग्राह्यः । विप्रस्य वेदने शूद्रया वसनस्य वस्त्रस्य दशा ग्राह्या । वेदने त्वग्रजन्मनइति योगीश्वरः । एवंक्षत्रस्य वेदने वैश्ययाप्रतोदोग्राह्यः । पुनरेवंवैश्यस्य वेदने शूद्रया वसनस्य दशा ग्राह्या ॥ ४४ ॥

ऋतुकालाभिगामी स्यात्स्वदारनिरतः सदा ॥ पर्ववर्जं व्रजेच्चैनां तद्व्रतोरतिकाम्यया ॥ ४५ ॥

(१) मेधातिथिः । उक्तोविवाहः तस्मिन्निर्वृत्तेसमुपयाते दारत्वे तदहरेवेच्छयोपगमे प्राप्ते तन्निवृत्त्यर्थमिदमारभ्यते। न विवाहसमनन्तरंतदहरेव गच्छेत् किंतर्हि ऋतुकालंप्रतीक्षेत । गृह्यकारैस्तु अतऊर्ध्वमक्षारलवणाशिनौ ब्रह्मचारिणावधःशायिनौस्यातां त्रिरात्रंद्वादशरात्रं संवत्सरंवेतिपठितम् । तत्र सत्यपिसंवत्सरस्यान्तरापतितऋतौ गमनंनास्ति । एवमल्पात्कालादूर्ध्वं मसत्यृतौ गमनंनास्ति । एवमेते स्मृतीअविरोधिन्यौ भवतः । त्रिरात्रादीनांतुविकल्पः अत्यन्तरागपीडितयोर्गमनं धैर्यवतोस्तुब्रह्मचर्यम् । ऋतुर्नाम स्त्रीणांशोणितदर्शनोपलक्षितः शरीरावस्थाविशेषोगर्भग्रहणसमर्थः कालउच्यते । उपलक्षणत्वाच्च दर्शनस्य निवृत्तेऽस्मिन्वक्ष्यमाणकालानुवर्तीभवत्येव तस्यकालऋतुकालः साहचर्याद्वा कालएवऋतुः । तथाच समानाधिकरणसमासः । ऋतुकालेऽभिगन्तुंव्रतमस्येत्यृतुकालाभिगामी । व्रतेइतिणिनिः यथा स्थण्डिलशायी अश्राद्धभोजीति । स्याद्भवेदित्यर्थः । यद्यप्यस्तिपराविधिविभक्तिस्तथाप्युपगमव्यापारंविदधाति । अभिगामी स्यादभिगच्छेदित्यर्थः। नह्यनुपगच्छन्नभिगामी भवति । कीदृशंपुनरेतद्व्रतंकिमृतावभिगन्तव्यमेवाथर्ताववगन्तव्यमिति । एतदुक्तंभवति किमयंनियमउत परिसंख्येति । ननुच व्रतमिति शास्त्रतोनियमउच्यते तत्रैवचायंणिनिः अतः परिसंख्या कथमाशङ्क्यते उच्यते । परिसंख्यायामपिशास्त्रीयत्वंनियमरूपताच विद्यतइति दर्शयिष्यामः । कस्तर्ह्यनयोर्विशेषः । विधिविशेषोनियमः । अथविधिःकः यःशब्दःकर्तव्यताबोधकःअग्निहोत्रंजुहुयात्स्वर्गकामइति । नह्यग्निहोत्रस्यैतद्वचनमन्तरेणान्यतः कुतश्चित्कर्तव्यतावगमः । नियमःपुनर्यत्रादृष्टसिद्ध्यर्थस्यवचनमन्तरेणपाक्षिकीप्राप्तिःयथासमे यजेतेति । दर्शपौर्णमासादियागविधानाद्देशमात्रमाक्षिप्तम् । नहि कश्चिद्देशमनाश्रित्य यागप्रयोगः संभवति । द्विविधश्च देशः समोविषमश्च । तत्रयदा तावत्समे यजेततदैतद्वचनमनुवादएव । यदात्विच्छायानिरङ्कुशत्वाद्विषमे यियक्षतितदैतद्वचनंसमदेशंविदधदर्थवत् । विहिते समे विषमस्यानाश्रयणमविधानात् । एतत्सामर्थ्यात्तन्निवृत्तिः । विधिनिबन्धनेह्यनुष्ठाने किमित्यविहितंक्रियेततत्करणेहि न यथाचोदितानुष्ठानसिद्धिः । इदंचात्र स्मार्तमुदाहरणम् । प्राङ्मुखोऽन्नानि भुञ्जीत भुञ्जानस्य यदृच्छया यांकांचिद्दिशमाश्रित्य भोजनंप्राप्तंतत्र कदाचित्प्राची कदाचिदितरायाकाचित्प्राप्तौतत्र यदाप्राची न तदेतरा यदेतरा न तदा प्राचीति । तत्राप्राप्तिपक्षे विध्यर्थंवचनंप्राङ्मुखोऽन्नानि भुञ्जीतेति तत्रातिक्रमाच्छास्त्रार्थंजहाति । एवमिह यदृच्छयोपगमनप्राप्तावनुपगमनंपक्षे विधीयमानमुपगमनमनुष्ठीयमानंशास्त्रातिक्रमकारितांजनयेत् । यथाऽन्येशास्त्रविहितार्थाअति-

क्रम्यमाणाःप्रायश्चित्तहेतवोभवन्ति तथानुगमनम् । अथर्तावनृतौ च गमने रागतःप्राप्तेवचनमृतावुपेयादिति । तदेवं-वचनंमृग्यते ऋतावेवोपेयादनृतौ न गच्छेत् । अथपञ्चपञ्चनखाभक्ष्याइति क्षुत्प्रतिघातेनार्थेनशशकादिष्वपि पञ्चनखेषु भक्ष्यता प्रसक्ता तद्व्यतिरिक्तेष्वपिवानरादिषु । नचतत्र पर्यायेणैव प्रवृत्तिः । युगपत्तत्रचान्यत्रच प्रसक्तौ पञ्चपञ्चनखाभक्ष्याइति वचनमितरपरिसंख्यानार्थंपरिसंपद्यते । एवमिहपरिसंख्येति । ननु च परिसंख्यांदोषत्रयवतीमाचक्षते । त्रयोहि तत्रदोषाःप्रादुःष्युः स्वार्थत्यागःपरार्थकल्पनाप्राप्तबाधश्च । पञ्चपञ्चनखाभक्ष्याइति यदान्वयतः पञ्चनखविषयंभक्षणंप्रतीयते तदा तत्त्यक्तंभवतितद्व्यतिरिक्तनिषेधपरत्वाद्वाक्यस्य । अश्रुतश्च निषेधोऽतःपरार्थकल्पना । अर्थित्वाच्च सर्वविषयं भक्षणंयत्प्राप्तंतस्यबाधः । एवमेतेनपरिसंख्यायांत्रयोदोषाः नैतत्सारम् । सत्यर्थित्वेश्रुत्यर्थासंभवे वाक्यस्यानर्थक्यंमाभूदित्येतत्परता नविरुद्धा । विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति । तत्र चान्यत्र च प्राप्तौ । परिसंख्या नखिष्विव ॥ किंपुनरत्रयुक्तंतत्र चान्यत्र च प्राप्तौ परिसंख्यालक्षणस्य विद्यमानत्वात्परिसंख्येति । ऋतावपिगमनंप्राप्तमनृतावपि नतुयदर्तौ तदानृताविति । यथासत्यर्थित्वेभोजनंतत्रनियमोऽश्राद्धम् नपुनराहारत्यागेनश्राद्धमेवभुञ्जानआस्ते । एवमिह सतिखेदे यद्गमनंतत्रनियमोऽनृतौ नगच्छेदित्यवगच्छति । अर्थित्वाच्च गमने प्रसक्ते कालविधानपरतैव युक्ता वाक्यस्य । अन्यथाऽनारब्धोऽर्थउपदिष्टः स्यात् । किंचापत्योत्पत्तिविधेः कृतविवाहस्यानुष्ठेयत्वादृतौ च तत्संभवात्प्राप्तमेवगमनम् । उत्पन्नपुत्रस्यचनद्वितीयपुत्रोत्पादनंवैधम् । अपत्यमुत्पादयेदित्येकत्वविवक्षायांविध्यर्थनिवृत्तेः । नच गमनमेवादृष्टार्थतयाशक्यंविधातुम् संस्कारविधित्वादधिकारग्रहणात्कल्पनायाश्च शक्यत्वादपत्योत्पत्तिविध्याक्षेपादृतौगमनस्य । यदि चात्रर्तावुपेयादितितदनृतुप्रतिषेधार्थम् । तत्रानुवादःपरंपरिसंख्या । तत्रह्यर्थान्तरलक्षणयाप्यर्थवत्ता भवति । एवंकृत्वागौतमीयेनाविप्रतिपत्तिः । एवंतत्रोक्तं ऋतावुपेयात्सर्वत्र वा प्रतिषिद्धवर्जमिति । सर्वत्र वेत्येषविकल्पः कामचारानुज्ञानार्थः । न पुनः सर्वदर्तावनृतौचनियमोपपत्तिः ॥ यदि च पूर्वत्रर्तावुपेयादितिनियमःसर्वत्रवेत्यत्रापि सएवोपेयादित्यनुप्रयुज्यमानशब्दोनियमार्थः प्राप्नोति एकप्रक्रमस्त्वात्तर्हि सएव शब्दः पुनरनुच्चार्यमाणोभिन्नार्थोभवितुंयुक्तः । नचर्तोरन्यत्रनियमार्थतोपपद्यते । तस्मादृतौ गमनवचनमनृतौप्रतिषेधार्थम् । तत्रानुत्पन्नपुत्रस्य विध्यन्तरान्नियमएव । उत्पन्नपुत्रस्तुयथाकामी । अनृतौ प्रतिषिद्धे गमने भार्येच्छया पुनः प्रतिप्रसूयतेपर्ववर्जंव्रजेच्चैनांतद्व्रतइति तदितिभार्यायाः प्रत्यवमर्शः । तच्चित्तग्रहणंव्रतमस्येति तद्व्रतः । रतिकाम्यया विनाप्यपत्यार्थेनोत्पन्नपुत्रऋतावनुत्पन्नपुत्रोवानृतौ सुरतसंभोगेच्छया तद्व्रतएनांव्रजेन्नात्मेच्छयेत्यर्थः । अथवा तच्छब्दोरतिकाम्ययेत्यत्रापेक्ष्यते । स्मृतिशास्त्रत्वादस्य । तद्रतिकाम्यया पर्ववर्जमन्यत्रापि व्रजेत्तत्रैवाकारश्लेषोद्रष्टव्यः । अरतिकाम्ययाआत्मनइतिशेषः । यथातुव्याख्यातंतथा नकिंचिदत्राप्रश्लेषेणापि तच्छब्दस्य समासोपसर्जनस्यासंबन्धेन । पर्वाणि वक्ष्यति । अमावास्यामष्टमींच पौर्णमासींचतुर्दशीमिति । स्वदारेषु निरतः स्यात्तन्मीतिभावनापरः । अथवा स्वदारेष्वेवरमते न परदारान्गमयेदिति परदारप्रतिषेधः । सदा यावज्जीवमेतद्व्रतंपरिपालनीयम् । अतः स्थितमेतत्त्रीणिवाक्यान्यत्र ऋतुकालाभिगामी स्यादित्येतदेकम् अनुत्पन्नपुत्रस्य नियमानुवादरूपंद्वितीयम् भार्याप्रयुक्तस्यपर्ववर्जमृतावनृतौ च न सुरतेच्छया स्वदारनिरतइतितृतीयम् । एषांचपदयोजना ऋतुकालाभिगामीस्यादपत्यार्थम् रतिकाम्ययातुतद्व्रतएनांव्रजेत् स्वदारनिरतश्चस्यात् ॥ ४५ ॥

(९) सर्वज्ञनारायणः । ऋतुकालमात्राभिगमने चेत्यसंपत्तौ स्वदारनिरतइति पक्षान्तरम् । तत्र च पर्ववर्जमिति विशेषउक्तः । तद्व्रतः पर्ववर्जस्वदारगमनमात्रगृहीतव्रतः रतिकाम्यया स्वस्य भोगार्थितया नतु तादृग्धर्मलाभस्तत्रेत्यर्थः ॥ ४५ ॥

(३) कुल्लूकः । ऋतुर्नामशोणितदर्शनोपलक्षितोगर्भधारणयोग्यः स्त्रीणामवस्थाविशेषः । तत्कालाभिगामी स्यादित्ययंनियमविधिः न तु परिसंख्या स्वार्थहानिपरार्थकल्पनाप्राप्तबाधात्मकदोषत्रयदुष्टत्वात् । ऋतुकालेऽपि रागतः पक्षेगमनप्राप्तौ यस्मिन्पक्षे प्राप्तिस्तत्रविधिः समेयजेतेतिवत् । अतएव ऋतावगमनेदोषमाह पराशरः ऋतुस्नातांतु योभार्यांसन्निधौ नोपगच्छति । घोरायांब्रह्महत्यायांपतते नात्र संशयः । अनुत्पन्नपुत्रस्य चायंनियमः । ब्राह्मणोह वै जायमानस्त्रिभिर्ऋणैर्ऋणवा जायते यज्ञेन देवेभ्यः प्रजयापितृभ्यः स्वाध्यायेनार्षिभ्यइत्येतत्प्रत्यक्षश्रुतिमूलत्वेऽस्य संभवति । मूलान्तरकल्पनस्यायुक्तत्वात् । तस्माद्युग्मासु पुत्रार्थी संविशेदार्तवेस्त्रियमिति च वक्ष्यति ततोप्येतच्छ्रुतिमूलत्वमवगम्यते । पुत्रोत्पादनशास्त्रस्य चैकपुत्रोत्पादनेनैव चरितार्थत्वात्कामजानितरान्विदुरिति दर्शनादजातपुत्रस्यैव नियमः । दशास्यांपुत्रानाधेहीति मन्त्रस्तु बहुपुत्रप्रशंसापरः जातपुत्रस्याप्यृतुकालगमननियमोन दशत्वेवावतिष्ठते स्वदारनिरतः सदेति नित्यंस्वदारसंतुष्टः स्यान्नान्यभार्यामुपगच्छेदिति विधानात्परिसंख्यैव वाक्यानर्थक्यात्स्वदारगमनस्य प्रशस्तत्वात् । ऋतावगमने दोषाश्रवणाच्च न नियमविधिः । पर्ववर्जं व्रजेच्चैनामिति । पर्वाण्यमावास्यादीनि वक्ष्यन्ते । तानि वर्जयित्वा भार्या प्रीतिर्व्रतंयस्य सतद्व्रतोऽनृतावप्युपेयात् । अतएव रतिकाम्यया न तु पुत्रोत्पादनशास्त्रबुद्ध्या तस्माद्विधित्रयमिदम् । ऋतावुपेयादेव । अन्यभार्यांनोपगच्छेत् । अनृतावपिभार्याप्रीतये गच्छेदिति । अत्र च गौतमः ऋतावुपेयादनृतौच पर्ववर्जम् । याज्ञवल्क्योऽप्याह । यथाकामी भवेद्वापिस्त्रीणांवरमनुस्मरन् । पर्ववर्जमित्यृतावनृतौचोभयत्रसंबध्यते ॥ ४५ ॥

(४) राघवानन्दः । तस्यैव कृतदारस्य नियमंवदन्नादौ स्त्रीविषयंतमाह । ऋतुकालेति षड्भिः । तद्व्रतः भार्याप्रीतिर्व्रतंयस्य अतएवाह रतिकाम्यया ॥ ४५ ॥

(५) नन्दनः । कृतोद्वाहस्यस्त्रियंप्रति नियममाह ऋतुकालेति । ऋतुर्नामगर्भग्रहणक्षमः स्त्रीणामवस्थाविशेषः । सदेतिसर्वत्रसंबध्यते । तस्यायमर्थः । सदर्तुकालाभिगामी स्यान्नकदाचिदप्यृतुकालंलङ्घयेत् । व्रतेणिनिप्रत्ययः । सदास्वदारनिरतः स्यात्नकदाचित्स्त्र्यन्तरंगच्छेत् । अनृतुकालेऽपिरतिकाम्ययाभोगेच्छया तद्व्रतस्तयाभार्ययाप्रार्थितश्चेत् । पर्ववर्जंसदागच्छेत् । न कदाचिद्व्रतिप्रार्थनांलङ्घयेदिति ॥ ४५ ॥

(६) रामचन्द्रः । सदा स्वदारान्निरतःसन्नृतुकालाभिगामी स्यादिति वचनात्परदारनिषेधः । एनांस्त्रियंपर्ववर्जंव्रजेद्गच्छेत् । ततस्तस्यास्तच्चित्तग्रहणं व्रतमस्येति तद्व्रतः । रतिकाम्यया नित्यंगच्छेदित्यर्थः । यथाकामी भवेद्वापिस्त्रीणांवरमनुस्मरन्निति योगीश्वरः । इन्द्रदत्तवरमित्यर्थः ॥ ४५ ॥

ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोडश स्मृताः ॥ चतुर्भिरितरैः सार्धमहोभिः सद्विगर्हितैः ॥ ४६॥

(१) मेधातिथिः । ऋतुलक्षणार्थश्लोकोऽयम् । वैद्यकादिशास्त्रावगम्योऽयमर्थोन विधिमूलएव । एवंयुग्मासुपुत्राइत्येतावपि श्लोकौ । षोडशरात्रयस्ताः स्त्रीणांमासिमासि । स्वाभाविकऋतुः । प्रमाणान्तरमूलत्वाच्चाश्रुतमपि मासिमासीति गम्यते । स्वभावे भवः स्वाभाविकः स्वस्थप्रकृतीनांयोभवति व्याध्यादिना कस्याश्चित्प्राप्तकालोऽपि निवर्तते घृततिलाद्यौषधोपयोगेन रतिवशेनचाकालेऽपि संवर्तते । अतःस्वाभाविकऋतुस्तारात्रयउच्यन्ते । चतुर्भिरितरैः चत्वार्यहानि यानि सद्भिर्विगर्हितानि प्रतिषिद्धस्त्रीस्पर्शसंभाषणादीनि तानि च प्रथमशोणितदर्शनात्प्रभृतिअहर्ग्रहणंचसर्वाहोरात्रोपलक्षणार्थम् तैःसह ॥ ४६ ॥

---

(१) प्रशस्तत्वात्=प्राप्तत्वात् (अ)

(२) सर्वज्ञनारायणः । स्वाभाविकः स्त्रीत्वभावनियतः कस्याश्चित्त्वाधिक्यमपि व्याध्यादिना शोणिताधिक्येन भवतीत्यर्थः । इतरैरजःकालीनैश्चतुर्भिः सहेति वदन्नवशिष्टान्यहानि द्वादशेति दर्शयति रात्रयइति वचनमुपगमयोग्यद्वादशाहोरात्रेषु रात्रावेव गमनंन दिवेति कथयितुं । अहोभिरिति त्वहोरात्रोपलक्षणम् ॥ ४६ ॥

(३) कुल्लूकः । अत्र रात्र्यहः शब्दावहोरात्रपरौ शोणितदर्शनात्प्रभृतिस्त्रीसंपर्कगमनादौ शिष्टनिन्दितैश्चतुर्भिरन्यैरहोरात्रैः सह षोडशाहोरात्रा मासिमासि स्त्रीणामृतुः स्वभावे भवः स्वाभाविकः । व्याध्यादिनातु न्यूनाधिककालोऽपि भवति ॥ ४६ ॥

(४) राघवानन्दः । ऋतोरवधिमाह ऋतुरिति । स्वाभाविकः औत्सर्गिकः रोगभोगादिना न्यूनाधिकसंभवात् । शोणितोपलक्षितशरीरावस्थाविशेषोगर्भग्रहणसमर्थ ऋतुस्तद्दर्शनात् । सद्भिर्गर्हितैश्चतुर्भिरहोरात्रैः सहअविगर्हिता द्वादशरात्रयइति षोडश । स्वीकृतभार्यस्य तदहस्तस्यांगमनप्रसक्तौ ऋत्ववर्धिकरणंत्रिरात्रादिपालनार्थम् । तथाचाश्वलायनसूत्रम् । अतऊर्ध्वमक्षारालवणाशिनौ स्यातांत्रिरात्रंद्वादशरात्रंसंवत्सरंवेति ॥ ४६ ॥

(५) नन्दनः । कःपुनः स्त्रीणामृतुकालइत्यपेक्षायामाह ऋतुरिति । सद्भिर्गर्हितैरितरैश्चतुर्भिरहोभिः सार्धंगमनेप्रतिषिद्धैः प्रथमैश्चतुर्भिः रात्रैः सहप्रथमाश्चतस्रः पञ्चम्यादयोद्वादशइत्येवंषोडशरात्रयः । षोडशाहोरात्राः । स्वाभाविकोनव्याध्यादिनिमित्तादुत्पन्नः स्त्रीणामृतुर्भवति ॥ ४६ ॥

(६) रामचन्द्रः । तत्रविशेषमाह ऋतुस्त्विति । स्त्रीणांगर्भाधानयोग्यावस्थोपलक्षितः कालऋतुः स्वाभाविकः षोडशरात्रयः स्मृतारजोदर्शनदिवसादारभ्य षोडशाहोरात्रयः सद्भिर्विगर्हितैः चतुर्भिःसार्द्धंइतरैर्द्वादशभिरहोभिःसार्द्धमित्यर्थः॥४६॥

तासामाद्याश्चतस्रस्तु निन्दितैकादशी च या ॥ त्रयोदशी च शेषास्तु प्रशस्ता दशरात्रयः ॥४७॥

(१) मेधातिथिः । तासांरात्रीणांयाआद्याः प्रथमशोणितदर्शनाच्चतस्रस्तानिन्दिताः नतत्रगमनमस्ति । तिसृषु तावत्स्पर्शोऽपि नास्त्यशुचित्वात् । चतुर्थ्यांतु स्नातायावशिष्टवचनात्सत्यपि शुचित्वेरतिसंभोगोनास्ति चतसृणांगर्हितत्ववचनात् । याचैकादशी या च त्रयोदशी साऽपि निन्दिता । एवंप्रतिषिद्धगमने ऋतुदर्शनात्प्रभृत्येकादशीत्रयोदश्यौ गृह्येते। नचन्द्रतिथी । तासामितिनिर्धारणविषयत्वेन रात्रीणांसंबन्धात्समानजातीयश्च निर्धार्यतया प्रतीयते कृष्णा गवांसंपन्नक्षीरेति । षड्रात्रगमनप्रतिषेधोऽयमदृष्टार्थः । शेषाःप्रशस्तादशरात्रयः । षण्णांप्रतिषेधाद्दशसु प्राशस्त्यंसिद्धमेवानूद्यते ॥ ४७ ॥

(२) सर्वज्ञनारायणः । एकादशीत्रयोदशीति षोडशदिनसमुदायापेक्षया । प्रशस्ताअनिन्दिताः ॥ ४७ ॥

(३) कुल्लूकः । तासांपुनः षोडशानांरात्रीणांशोणितदर्शनात्प्रभृत्याद्याश्चतस्रोरात्रय एकादशी त्रयोदशी च रात्रिर्गमनेनिन्दिता । अवशिष्टा दशरात्रयः प्रशस्ता भवेयुः ॥ ४७ ॥

(४) राघवानन्दः । वर्ज्यमाह तासामिति । स्पष्टोऽर्थः ॥ एकादशी तु दशदिनापेक्षया तथात्रयोदशीच दशदिनान्यवशिष्टानि ॥ ४७ ॥

(५) नन्दनः । तासु षोडशसु प्रशस्तारात्रीराह तासामिति । तासांषोडशानांरात्रीणांमध्येआद्याश्चतस्रोरात्रय एकादशीत्रयोदशीचरात्रिर्निन्दिताइति । शेषादशरात्रयप्रशस्ताः ॥४७॥

(६) रामचन्द्रः । तासांषोडशरात्रीणांमध्ये आद्याश्चतस्रःनिन्दितापुनरेकादशरा।त्रिर्निन्दिता एकादशदिवसस्येत्यर्थः । तथा त्रयोदशीरात्रिर्निन्दिता शेषा दशरात्रयः प्रशस्ताउक्ताः ॥ ४७ ॥

युग्मासु पुत्राजायन्ते स्त्रियोऽयुग्मासु रात्रिषु ॥ तस्माद्युग्मासु पुत्रार्थी संविशेदार्तवे स्त्रियम् ॥ ४८ ॥

(१) **मेधातिथिः** । तासु दशसु यायुग्मारात्रयः षष्ठ्यष्टमी दशमीद्वादशीचतुर्दशी षोडशी तासूपगच्छतः पुत्राजायन्ते । युग्मासु पुत्रार्थीसंविशेदार्तवेस्त्रियम् । अयुग्मासु स्त्रियोदुहितरस्तस्मात्पुत्रोत्पत्तिसिध्यर्थंयुग्मासु संविशेद्व्रजेत मैथुनधर्मेणस्त्रियमार्तवे । अनुवादोयम् । अयमपि नियमएवानुत्पन्नपुत्रस्यायुग्मास्वगमनम् ॥ ४८ ॥

(२) **सर्वज्ञनारायणः** । युग्मासु षष्ठ्यादिरात्रिषु पुत्राजायन्ते । संविशेदुपगच्छेत् ॥ ४८ ॥

(३) **कुल्लूकः** । पूर्वोक्तास्वपि दशसु षष्ठ्यष्टम्याद्यासु रात्रिषु गमने पुत्राउत्पद्यन्ते । अयुग्मासुपञ्चमीसप्तम्यादिषु दुहितरः । अतः पुत्रार्थीयुग्मास्वृतुकालेभार्यांगच्छेत् ॥ ४८ ॥

(४) **राघवानन्दः** । तत्रैव मासंगिकंदृष्टंफलमाह युग्मास्विति । स्त्रियोऽयुग्मास्वितिच्छेदः । विशेन्निविष्टमनागच्छेत् । अन्यथाङ्गवैकल्यादिस्यादपत्यस्य ॥ ४८ ॥

(५) **नन्दनः** । प्रशस्तासुरात्रिषु दशसु संवेशनेफलमाह युग्मास्विति । संविशेत्संगच्छेत् ॥ ४८ ॥

(६) **रामचन्द्रः** । दशरात्रीणांमध्ये युग्मासु रात्रिषु गच्छेतःपुत्राजायन्ते । अयुग्मासु रात्रिषु गच्छतःस्त्रियःकन्याभवन्ति । तस्मात्कारणात्पुत्रार्थी आर्तवेकालेयुग्मासु स्त्रियंसंविशेद्गच्छेत रात्रिग्रहणंदिवसप्रतिषेधार्थम् ॥ ४८ ॥

पुमान्पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियाः ॥ समे पुमान्पुंस्त्रियौ वा क्षीणेऽल्पेच विपर्ययः ॥ ४९ ॥

(१) **मेधातिथिः** । शुक्रंवीर्यंपुरुषस्यरेतः स्त्रियाःशोणितम् । उक्तंभगवता वसिष्ठेन । शुक्रशोणितसंभवः पुरुषइति । स्त्रीबीजादधिकेपुम्बीजेऽयुग्मास्वपि पुत्रोजायते युग्मास्वपि स्त्रीबीजस्याधिक्येकन्यैव । अयुग्मास्वपि रात्रिषु पुत्रार्थिनो गमनानुष्ठानार्थमेतत् । यदा परिपुष्टमात्मानंवृष्याहारयोगेनमधिकवीर्यमन्येत स्त्रियाश्च कथंचिदपचयंतदापुत्रार्थीगच्छेदित्युपदिष्टं भवति । आधिक्यंचात्र न परिमाणतः किंतर्हि सारतः । समेऽपुमानमिश्रीकृते पुंस्त्रियौ । अपुमान्पुंसकमिति केचित्साम्यइतिपठन्ति । उभयोःसाम्ये पुमानेव पुंस्त्रियौ वा गर्भधान्यांयदा वायुर्द्रवरूपत्वात्संसृष्टेशुक्रशोणितेसमंविभजतएकत्र भागमन्यत्र तावदेव तदा यमौ जायेते तत्र समेविभागेऽपि स्त्रीबीजाधिक्येस्त्री पुम्बीजाधिक्ये पुमान् । क्षीणे बीजेसारतःविपर्ययोऽग्रहणंगर्भस्यनपुंसकोत्पत्तिर्वा ॥ ४९ ॥

(२) **सर्वज्ञनारायणः** । अत्र व्यभिचारोदृश्यतेतेन तत्र कारणमाह पुमानिति । स्त्रियाः शुक्रे शोणिततांगते । समे ऽपुमान्नपुंसकम् । पुंस्त्रियौ यमौ । एतच्चोभयोरतिवृद्धबहुशुक्रत्वेपि तदपेक्षया पुंसोधिकशुक्रत्वेपुमांसौ । स्त्रियाअधिकशुक्रत्वे स्त्रियावित्यपि ग्राह्यम् । क्षीणेनयोः शुक्रेरोगादिना क्षीणे स्वभावतोवाल्पे विपर्ययोऽपत्यानुपपत्तिः ॥ ४९ ॥

(३) **कुल्लूकः** । पुमानिति । पुंसोबीजेऽधिकेऽयुग्मास्वपि पुत्रोजायते स्त्रीबीजेऽधिकेयुग्मास्वपि दुहितैव । अतोवृष्याहारादिना निजबीजाधिक्यंभार्यायाश्चाहारलाघवादिना बीजाल्पत्वमवगम्य युग्मास्वपि पुत्रार्थिनागन्तव्यमिति दर्शितम् । स्त्रीपुंसयोस्तु बीजसाम्येऽपुमान्नपुंसकंजायते पुंस्त्रियाविति यमौच । निःसारेऽल्पेचोभयोरेवबीजे गर्भस्यासंभवः ॥ ४९ ॥

(४) **राघवानन्दः** । पुमानिति युग्मास्वपि भवत्यधिके रजसिस्त्रीभवेदधिके स्त्रियाइति रजसीतिशेषः । अपुमान्नपुंसकं पुंस्त्रियौ पुमांसौ स्त्रियौ स्त्रिपुमांसौ चेति स्वरसतोदृष्टत्वात् । क्षीणे निःसारे अल्पे च विपर्ययोऽपत्याभावः ॥ ४९ ॥

(५) नन्दनः । समेअपुमानितिपदच्छेदः । अपुमान्नपुंसकः । पुमांश्चस्त्रीचपुंस्त्रियौ । क्षीणेसारतः । अल्पेपरिमाणतः विपर्य्ययः अनुत्पत्तिः । यतएवमतः पुत्रार्थिनातामुपवासयता स्वयंसौहित्ययुक्तेनस्वशुक्राधिक्येयत्नः कार्यइत्यभिप्रायः ॥ ४९ ॥

(६) रामचन्द्रः । पुंसःपुरुषस्याधिके शुक्रे पुमान्पुत्रोभवति । स्त्रियारजोधिके स्त्री कन्या भवति रजःशुक्रसमेपुमान्नपुंसकःषण्डोभवति वा पुंस्त्रियौ भवतः । यमौ कन्यापुत्रौ । पुमानेवरूयाकारः । क्षीणे वा शुक्रे अल्पेवारजसि विपर्ययःगर्भस्यासंभवअनुत्पत्तिः ॥ ४९ ॥

निन्द्यास्वष्टासु चान्यासु स्त्रियोरात्रिषु वर्जयन् ॥ ब्रह्मचार्येव भवति यत्र तत्राश्रमे वसन् ॥ ५० ॥

(१) मेधातिथिः । निन्द्यासु षट्स्वन्यासुचानिन्द्यास्वप्यष्टासु रात्रिषु स्त्रियोवर्जयन्परिहरन्द्वे रात्रीअवशिष्टे यदि गच्छति पर्ववर्जेतदा ब्रह्मचार्येव भवति ब्रह्मचर्यफलंप्राप्नोति । यत्रतत्राश्रमेवसन् अर्थवादोऽयम् । नतुवानप्रस्थाद्याश्रमेषु रात्र्यभ्यनुज्ञा जितेन्द्रियत्वविधानात्सर्वाश्रमेषु गार्हस्थादन्येषु वीप्सायाश्चार्थवादतयाप्युपपत्तेः । एताश्च रात्रयोवर्ज्यान क्रमेणैव किंतर्हि यथेच्छया पर्ववर्जगमनं यथा न भवति तथा रात्रिद्वयमभ्यनुज्ञायते । किंपुनर्ब्रह्मचर्यस्यफलंविशेषाश्रवणात्स्वर्गः । क्वचित्तु श्रूयते । न ब्रह्मचारी भवत्यवैतीति । स्वल्पैरतिक्रमैर्नदुष्यतीति ॥ ५० ॥

(२) सर्वज्ञनारायणः । प्राक् निन्दितत्वेनोक्तासु षट्सु रात्रिषु तथान्यासु प्रशस्ततयोक्तानामपि दशानांमध्येअष्टासु स्त्रियोवर्जयन्नस्मिन्नृतुषोडशकमध्ये रात्रिद्वयमेवोपगच्छन्नित्यर्थः । यत्र तत्रेति वचनात् । गार्हस्थ्यइव सपत्नीकवानप्रस्थेपि ऋतुगमनमस्तीति गम्यते । अन्यथा गार्हस्थ्येपीत्येवावक्ष्यत् ॥ ५० ॥

(३) कुल्लूकः । निन्द्यासुपूर्वोक्तासु षट्सु रात्रिष्वन्यासु च निन्द्यास्वपि यासु कासुचिदष्टासु स्त्रियोवर्जयन्द्वे रात्री अवशिष्टे । पर्ववर्जिते व्रजन्नखण्डितब्रह्मचार्येव भवति । यत्रतत्राश्रमे वसन्नितिवानप्रस्थापेक्षया । तस्य हि भार्ययासहगमनपक्षऋतुगमनंप्रसक्तम् । न च वनस्थभार्यायाऋतुर्नभवतीति वाच्यम् । वनंपश्चाशतोव्रजेदितिवर्षैरेकगुणांभार्यामुद्वहेत्त्रिगुणः पुमानित्यादि शास्त्रपर्यालोचनया तत्संभवात् । मेधातिथिस्तु यत्र तत्राश्रमे वसन्नित्यनुवादमात्रंगृहस्थेतराश्रमत्रयेजितेन्द्रियत्वविधानाद्रात्रिद्वयाभ्यनुज्ञानासंभवादित्याह गोविन्दराजस्तूत्पन्नविनष्टपुत्रस्याश्रमान्तरस्थस्यापीच्छया पुत्रार्थेरात्रिद्वयगमने दोषाभावप्रतिपादनार्थमेतत् । यत्र तत्राश्रमेवसन्नितिवचनात्पुत्रार्थी संविशेदिति च प्रस्तुतत्वात्पुत्रस्य च महोपकारकत्वादित्याह हन्तगोविन्दराजे न विशेषमविवृण्वता । व्यक्तमङ्गीकृतमृतौस्वदारसुरतंयतेः ॥ ५० ॥

(४) राघवानन्दः । निन्दिताएकादशी त्रयोदशी आद्याश्चतस्रइति षट्सु अष्टासु च अनिन्दितासु निशासुएवंरात्रिद्वयमवशिष्यते तयोर्गच्छन्नब्रह्मचार्येव भवतीत्यर्थवादइति मेधातिथिः । गोविन्दराजस्तु ऋतावुपेयादेव अन्यभार्यान व्रजेत् अनृतावपि भार्याप्रीतये व्रजेदिति । पर्ववर्जमित्युभयत्र संबध्यते । अतएव गौतमः । ऋतावुपेयादनृतौ च प्रतिषिद्धवर्जं । याज्ञवल्क्योपि । यथाकामीभवेद्वापि स्त्रीणांवरमनुस्मरन् । सन्तत्यभावेआश्रमान्तरयोः कुटीचकवानप्रस्थयोरपि यत्र तत्राश्रमे वसन्निति स्वरसानतादृशदिनद्वये गमनंयुक्तम् । तद्दिनद्वयमष्टमीं वा चतुर्दशीमित्याद्यपर्वोक्तेरिति पञ्चाशदुत्तरंवनंप्रतिभार्ययासह गमनविधानेन स्त्रियाःपुत्रोत्पादनयोग्यकालत्वात्पुत्रार्थी संविशेदार्तवे स्त्रियमिति साधारण्याच्च यत्तु गृहस्थएवैषांयोनिरिति गौतमसूत्रंव्याख्यातंच हरदत्तेनेत्येषामपत्यंचण्डालइति तदप्राप्तपत्नीविषयम् । स्वपक्ष्यांन दोषोऽन्यथायत्र तत्रेति मनुवचनविरोधः । कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाइति श्रीकृष्णोक्तेः । नाप्यर्थवादोद्रव्यसंस्काराद्

कर्मत्वेव सहति। गृहस्थानांतु। दिनषट्कंमप्रशस्तम्। तदुक्तंयाज्ञवल्क्येन। षोडशर्तुर्निशास्त्रीणां तासु युग्मासु संविशेत्। ब्रह्मचार्येव पर्वाण्याद्याश्चतस्रश्च वर्जयेदिति ॥ ५० ॥

(५) नन्दनः । निन्द्याःप्रथमाश्चतस्रएकादशीत्रयोदशीचतासुअष्टासुचान्यासुस्त्रीजननिमित्तप्रतिनिषिद्धात्वयुग्मासु-पञ्चमीसप्तमीनवमीपञ्चदशीप्रभृतिषुप्रजाफलरहितासुचतसृषुचेत्यर्थः। एकविंशीप्रभृतीनामृतोरकालत्वादष्टात्वित्युक्तम्। यत्र-तत्राश्रमेगृहस्थाश्रमे वसन्नपि। एवमुद्वोढुर्नयमउक्तः ॥ ५० ॥

(६) रामचन्द्रः। निन्द्यात्वन्यासु अयुग्मासु रात्रिषु स्त्रियोवर्जयेदित्यर्थः। अवशिष्टासु गच्छन्ब्रह्मचारी भवति। यत्रतत्राश्रमे वसन्ब्रह्मचार्येवभर्वात भवेदित्यर्थः। अयमर्थवादो न तु वानप्रस्थाद्याश्रमेषु गार्हस्थ्यादन्येषु स्त्रियाग-मनम् ॥ ५० ॥

न कन्यायाः पिता विद्वान्गृह्णीयाच्छुल्कमण्वपि॥गृह्णंश्छुल्कंहि लोभेन स्यान्नरोपत्यविक्रयी५१

(१) मेधातिथिः। आसुरे शुल्कप्रतिषेधोऽयंउत्तरत्र कन्यार्थसंग्रहोपादानात्। विद्वान्ग्रहणदोषज्ञः। कन्यापिता स्व-ल्पमप्यर्थंधनंन गृह्णीयात्। गृह्णानोऽपत्यविक्रयदोषेण युज्यते। कः पुनरेषःशुल्कोनाम आभाषणपूर्ववराद्गृहीतम्। यत्रतू-च्चनीचपणोभवति कन्यागुणापेक्षमूल्यव्यवस्थासक्रयएव। इहतुमहागुणायाअपि कन्यायाः स्वल्पंधनमनाभाषणपूर्ववा ग्रहणम्। नविक्रयस्यैषधर्मइत्यतोविक्रयाध्यारोपेणनिन्द्यते ॥ ५१ ॥

(२) सर्वज्ञनारायणः। लोभेन लोभात्। नत्वार्षधर्मबुद्ध्या ॥ ५१ ॥

(३) कुल्लूकः। कन्यायाः पिता धनग्रहणदोषज्ञोऽल्पमपि धनं कन्यादाननिमित्तकं न गृह्णीयात्। यस्माल्लोभेन-तद्गृह्णन्नपत्यविक्रयीभवति ॥ ५१ ॥

(४) राघवानन्दः। आर्षासुरोद्वाहयोःशुल्कदानमुक्तंतत्स्वमतेन दूषयति नेतित्रिभिः। शुल्कं कन्यामूल्यम्। लोभेन तत्कुर्वन्नपत्यविक्रयी उपपातकी स्यात्। गोवधइत्यपत्यविक्रयस्यउपपातकत्वेनआम्नानात् ॥ ५१ ॥

(५) नन्दनः। अथकन्याप्रदातुर्नियममाह न कन्यायाइति ॥ ५१ ॥

(६) रामचन्द्रः। लोभेन शुल्कंगृण्हन्नरो ऽपत्यविक्रयी स्यात्। अपत्यविक्रयपापभुग्भवतीत्यर्थः ॥ ५१ ॥

स्त्रीधनानि तु ये मोहादुपजीवन्ति बान्धवाः॥नारीयानानि वस्त्रं वा ते पापा यान्त्यधोगतिम्॥५२॥

(१) मेधातिथिः। स्त्रीनिमित्तानिधनानि कन्यादाने वराद्यानि गृह्यन्ते । पूर्वस्यैव शेषः। येबान्धवाः पित्रादयः मोहादुपजीवन्ति यथोक्तंज्ञातिभ्योद्रविणंदत्वेति। सुवर्णरजतादिधनम्। नारीयानानियानमश्वादि वस्त्रंवैतावन्मात्रमपि न जातूपजीवनीयंवासोयानादिकिंपुनर्बहु। उपजीवतांफलमाचष्टे तेतेपापाः शास्त्रप्रतिषिद्धसमाचरणादधोगतिंनरकं यान्ति। अथवा स्त्रीधनानीति नवमे दर्शयिष्यति। तानिये मोहादुपजीवन्तिबान्धवाःपिता तत्पक्षाश्च भर्ता भर्तृपक्षाश्च। एवंयाना-येवंवस्त्रं स्त्रीणाम् बुद्धौसंनिधानाच्छाब्दःसंनिधिः कल्प्यते यथा राजपुरुषः कस्यराज्ञइति ॥ ५२ ॥

(२) सर्वज्ञनारायणः। स्त्रीधनानि स्त्रीदाननिमित्तेन प्राप्तानि धनानि। एवंनारीयानानीत्यत्रापि ॥ ५२ ॥

(३) कुल्लूकः कन्यादाननिमित्तकशुल्कग्रहणनिषेधप्रसङ्गान्नवमाध्यायाभिधेयस्त्रीधनग्रहणनिषेधोयम्। ये बा-

न्धवाः पतिपित्रादयः कलत्रदुहित्रादिधनानि गृह्णन्ति नारीस्त्रीयानान्यश्वादीनि वस्त्रंचेतिप्रदर्शनार्थम् सर्वमेवधनंन ग्राह्यम् तेगृह्णानाः पापकारिणोनरकंगच्छन्ति ॥ ५२ ॥

(४) **राघवानन्दः** । किंच स्त्रीति । स्त्रीधनानीति कैमुत्यन्यायेन प्रासंगिकं । बान्धवाः पतिपुत्रादयः । नारीयानानीतिकन्यायै चैव शक्तितइत्युक्तत्वात् विभवेसतीति शेषः ॥ ५२ ॥

(५) **नन्दनः** । नकेवलंकन्यायाः पितुरेवायंशुल्कग्रहणप्रतिषेधः किन्तु बान्धवानामपीत्याह स्त्रीधनानीति । स्त्रीनिमित्तानि धनानि स्त्रीधनानि कन्यादानलब्धानीति यावत् । नारी शुल्करूपेण गृहीता दासी ॥ ५२ ॥

(६) **रामचन्द्रः** । नार्याः कन्याया यानामिनारीयानानि सुवर्णरजतादिधनं मोहात् सेवन्ते नार्या वस्त्रंवा ते पापा अधोगतिंयान्ति ॥ ५२ ॥

आर्षे गोमिथुनंशुल्कंकेचिदाहुर्मृषैव तत् ॥ अल्पोप्येवंमहान्वापि विक्रयस्तावदेव सः ॥ ५३ ॥

(१) **मेधातिथिः** । स्त्रीगवी च पुंगवश्च गोमिथुनम् । केचिदाहुरेतदादेयमिति मनोस्तु मतंमृषैव तत् मिथ्या नादेयमित्यर्थः । अल्पोऽप्येवम् अल्पसाधनोऽल्पः एवंमहान्भवति तावानेव विक्रयः ॥ ५३ ॥

(२) **सर्वज्ञनारायणः** शुल्कंशुल्कत्वेन पित्रैव ग्राह्यम् । न कन्यया तेन लोभादपितस्य ग्रहणे दोषाभावइति केचिदाहुः । तन्मृषाऽसत्यम् । यावताऽल्पस्यापि मूल्यस्य लोभेन ग्रहणे विक्रयएव स्यान्न च विनालोभंवैधंतद्ग्रहणंसंभवति । विधेरभावादित्यर्थः ॥ ५३ ॥

(३) **कुल्लूकः** । आर्षे विवाहे गोमिथुनंशुल्कंवराद्ग्राह्यमिति केचिदाचार्यावदन्ति तत्पुनरसत्यंयस्मादल्पमूल्यसाध्यत्वादल्पोवा भवतु बहुमूल्यसाध्यत्वान्महान्वा भवतु सतावद्विक्रयो भवत्येव । यत्पुनरेकंगोमिथुनमितिपूर्वमुक्तंतत्परमतमितिगोविन्दराजः तदयुक्तम् । मनुमते लक्षणमार्षस्य न स्यादेव वराद्गोमिथुनग्रहणपूर्वककन्यादानस्यैवार्षविवाहलक्षणत्वात् । मन्वभिमतमन्यदेवार्षलक्षणमेकंगोमिथुनमिति परमतमिति चेत् एकंगोमिथुनंद्वेचेत्येतत्परमतंयदि तदामनुमतेनार्षलक्षणंकिंतदुच्यताम् । अष्टौविवाहान्कथयन्नार्षेद्वासंततेर्गुणान् मनुः किंस्वमतेनार्षलक्षणंवक्तुमक्षमः मेधातिथिस्तु पूर्वापरविरोधोपन्यासनिरासमेव न कृतवान् । तस्मादस्माभिरित्थंव्याख्यायते आर्षेविवाहे गोमिथुनंशुल्कमुक्तोचरूपमिति केचिदाचार्यावदन्ति मनोस्तु मतेनेदं शास्त्रनियमितजातिसंख्याकंग्रहणं न शुल्करूपंशुल्कत्वेमूल्याल्पत्वमहत्त्वेऽनुपयोगिनीविक्रयएव तदास्यात् । किंत्वार्षविवाहसंपत्त्याऽवश्यकर्तव्ययागादिसिद्धये कन्यायै वा दातुंशास्त्रीयंधर्मार्थमेवगृह्यते । अतएवार्षलक्षणश्लोकेवरादादायधर्मतइतिधर्मतोधर्मार्थमिति तस्यार्थः । भोगलोभेन तु धनग्रहणं शुल्करूपमशास्त्रीयम् । अतएव गृण्हञ्छुल्कंहि लोभेनेति निन्दामुक्तवान् । तस्मात्पौर्वापर्यपर्यालोचनादार्षे धर्मार्थंगोमिथुनंग्राह्यं न तु भोगार्थमिति मनुना स्वमतमनुवर्णितम् ॥ ५३ ॥

(४) **राघवानन्दः** । आर्षे गोमिथुनंयच्छुल्कं । अल्पत्वमहत्वयोरप्रयोजकत्वेन तावतैव विक्रयादिति केचिदाचार्याआहुस्तन्मृषैव । आर्षलक्षणे धर्मतइत्युक्तेरिति शास्त्रोक्तं विरुद्धं न भवतीत्यर्थः । मेधातिथिस्तु । पूर्वापरविरुद्धएवेत्याह । अतोगोमिथुनद्वयस्य धर्मार्थतैव । ततोतिरेके विक्रयः । इच्छाविक्रये न्यूनाधिक्यं प्रयोजकं अन्यथोद्वाहानामदृष्टार्थत्वविरोधः । नियमविधौ च दुरदृष्टादृष्टेरिति तदयम् ॥ ५३ ॥

(५) **नन्दनः** । गोमिथुनंशुल्कमाहुरनुजानते तन्मृषा तदयुक्तम् । अल्पोवा महान्वा द्रव्यलोभादादाने शुल्कस्य विक्रयएव तस्मादयुक्तमिति ॥ ५३ ॥

(६) **रामचन्द्रः** । आर्षसंज्ञे विवाहे गोमिथुनशुल्कंकेचिदाहुस्तन्मृषैव मिथ्यैव अल्पोवा शुल्को महान्वा शुल्कस्तावानेव सविक्रयसंज्ञः ॥ ५३ ॥

यासांनाददते शुल्कंज्ञातयोन सविक्रयः ॥ अर्हणंतत्कुमारीणामानृशंस्यंच केवलम् ॥ ५४ ॥

(१) **मेधातिथिः** । किंवराद्धनाधिगमोविक्रयोभवति नेति ब्रूमः । ज्ञातयः कन्यायामधिकृताः स्वार्थमाददते गृह्णन्ति तदा सविक्रयः । अर्हणंकन्यार्थेधनग्रहणं कन्यानांतदर्हणंपूजनंभवति । बहुमानः कन्यानामात्मनि भवति । ईदृश्योवयंयद्धनंदत्वा विवाहामहे । अन्यत्रापि पूज्याभवन्ति सुभगाएताइति । आभरणादि वा तेन धनेन कर्तव्यमतोऽभ्यर्हिताः शोभावत्योभवन्ति । आनृशंस्यमपापत्वंकेवलंन स्वल्पोऽप्यधर्मगन्धोऽस्ति । अतोऽनेनार्थवादेन कन्यार्थेधनग्रहणंविधीयते ॥ ५४ ॥

(२) **सर्वज्ञनारायणः** । यदात्वार्षे कन्यायै गोमिथुनंतथाअनुरागोत्पत्त्यर्थंकन्यायै भूषणादि स्वेच्छया विवाहात्प्रागेव वरोददाति ज्ञातयस्तु वित्तंन गृण्हन्ति तदा ज्ञातीनांविक्रयदोषोनास्ति । यावता कुमारीणांपूजार्थंतद्दानंतथाआनृशंस्यंकरुणारूपंतद्वित्तदानंवरेण स्वेच्छया कृतमतोज्ञातीनांनदोषकरमित्यर्थः । यद्वा यत्राददतेतत्कुमारीणां पूजनमानृशस्यं करुणाप्रवृत्तिजन्यपुण्यहेतुश्चेति व्याख्यातं । आसुरस्तु विवाहः कन्यायाअलंकारस्य विवाहात्पूर्वदाने भवत्येव तल्लक्षणयोगादितिग्राह्यम् ॥ ५४ ॥

(३) **कुल्लूकः** । आर्षे गोमिथुनंशुल्कमित्युक्तम् इदानींकन्यार्थमपि धनस्य दानंन शुल्कमित्याह यासामिति । यासांकन्यानांप्रीत्यावरेणदीयमानंधनं पित्रादयोन गृण्हन्ति किंतु कन्यायै समर्पयन्ति सोऽपि न विक्रयः । यस्मात्कुमारीणांपूजनंतदानृशंस्यमहिंसकत्वंकेवलंतदनुकम्पारूपम् ॥ ५४ ॥

(४) **राघवानन्दः** । तत्रैव व्यतिरेकमाह यासामिति । यच्च कन्यायै चैव शक्तितइत्युक्तं तदपि न शुल्कमित्याह अर्हणमिति । आनृशंस्यं वक्ष्यमाणस्त्री क्रूरत्वनिवृत्त्यर्थम् ॥ ५४ ॥

(५) **नन्दनः** । कन्यायाभूषणाच्छादनार्थंवराद्धनादानंन दोषावहमित्याह यासामिति । यासांकन्यानाम् । आददते उपजीवन्ति । केवलंनिश्चितम् ॥ ५४॥

(६) **रामचन्द्रः** । यासांनारीणां ज्ञातयःशुल्कंनाददते विक्रयसंज्ञो न भवति । आनृशंस्यमपापत्वंकरुणारूपम् ॥ ५४ ॥

पितृभिर्भ्रातृभिश्चैताः पतिभिर्देवरैस्तथा ॥ पूज्याभूषयितव्याश्च बहुकल्याणमीप्सुभिः ॥ ५५ ॥

(१) **मेधातिथिः** । न केवलंवराय दातव्यंकन्याबन्धुभिरपि तु तैरपिदातव्यम् । पितृभिः साहचर्यात्पितृशब्दः पितामहपितृव्यादिषु वर्तते । ततोबहुवचनंव्यक्त्यपेक्षंवा बहुवचनम् । एवंपतिभिः श्वशुरादिभिर्व्यक्त्यपेक्षंवा । देवराः पत्युर्भ्रातरः । पूज्याःपुत्रजन्माद्युत्सवेषु निमन्त्रणपूर्वकमानाश्रयबहुमानमादरेण भोजनादिना पूज्याः । भूषयितव्यावस्त्रायलंकारेणाङ्गलेपनादिभिर्मण्डयितव्याः । अत्रफलं बहुकल्याणमीप्सुभिःकल्याणंकमनीयंपुत्रधनादिसंपदरोगताऽपरिभवइत्यादिबहुशब्दात्सर्वमीप्सुभिराप्तुमिच्छुभिः प्राप्तुकामैः । फलार्थोविधिरयम् ॥ ५५ ॥

(२) **सर्वज्ञनारायणः** । अर्हणस्यकर्तव्यतांप्रपञ्चयति पितृभिरिति । कन्याव्यक्तिभेदापेक्षयाबहुवचनम् । पूज्याः सम्मानादिना ॥ ५५ ॥

(३) कुल्लूकः । नकेवलंविवाहकाले वरेण दत्तं धनं समर्पणीयं किंतु तदुत्तरकालमपि पित्रादिभिरप्येताभोजनादिना पूजयितव्याः वस्त्रालंकारादिना भूषयितव्याश्च बहुधनादिसंपदमामुकामैः ॥ ५५ ॥

(४) राघवानन्दः । प्रसंगात्प्रकारान्तरेण तासामर्हणमाह पितृभिरिति । पूज्याःसत्कर्तव्यावाचा । भूषयितव्या वस्त्रालङ्कारादिभिः । भर्त्रा भार्यापि संतोषिता कल्याणदा भवति । बहुकल्याणमीप्सुभिरपर्याममङ्गलाकाङ्क्षिभिः ॥ ५५ ॥

(५) नन्दनः । उक्तंचैतत्पञ्चभिः श्लोकैः समर्थयति पितृभिरिति ॥ ५५ ॥

(६) रामचन्द्रः । पितृभिरुभयत्र पूज्याः भोजनादिना ॥ ५५ ॥

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ॥ यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ॥५६॥

(१) मेधातिथिः । देवतारमन्ते तुष्यन्ति प्रसीदन्ति । प्रसन्नाश्च स्वामिनएवाभिप्रेतेन फलेन योजयन्ति । यत्र तु न पूज्यन्ते तत्र सर्वाः क्रियाः यागहोमदानाद्यादेवताराधनबुद्ध्या चोपहारादयोयाः क्रियन्तेऽफलास्ताइत्यर्थवादः ॥ ५६ ॥

(२) सर्वज्ञनारायणः । अफलाः मन्दफलाः ॥ ५६ ॥

(३) कुल्लूकः । यत्र कुले पित्रादिभिः स्त्रियः पूज्यन्ते तत्र देवताः प्रसीदन्ति । यत्र पुनरेतानपूज्यन्ते तत्र देवताप्रसादाभावाद्यागादिक्रियाःसर्वा निष्फलाभवन्तीति निन्दार्थवादः ॥ ५६ ॥

(४) राघवानन्दः । तासांपूजनमेवाह यत्रेतिपञ्चभिः । देवतालक्ष्म्यादयः कलहशून्यत्वात् अफलाः क्रियाः । यत्कर्तव्यं तदनयासहेति वचनात् तासांसाहित्यबोधनेन नित्यमपरितोषादश्रद्धाकृतत्वेन फलराहित्यमिति ॥ ५६ ॥

शोचन्ति जामयोयत्र विनश्यत्याशु तत्कुलम् ॥ न शोचन्ति तु यत्रैता वर्धते तद्धि सर्वदा ॥५७॥

(२) सर्वज्ञनारायणः । जामयः कुलस्त्रियः । तत्कुलंकुटुम्बसमुदायः ॥ ५७ ॥

(३) कुल्लूकः । जामिःस्वसृकुलस्त्रियोरित्याभित्याभिधानिकाः । यस्मिन्कुले भगिनी गृहपतिसंवर्धनीयसन्निहितसपिण्डस्त्रियश्च पत्नीदुहितृस्नुषाद्याः परितापादिनादुःखिन्योभवंति तत्कुलंशीघ्रंनिर्धनीभवति दैवराजादिना च पीड्यते । यत्रैतान शोचन्ति तद्धनादिना नित्यंवृद्धिमेति । मेधातिथिगोविन्दराजौ तु न वोढादुहितृस्नुषाद्याजामयइत्याहतुः ॥ ५७ ॥

(४) राघवानन्दः । जामयः भ्रातृपत्नीस्वसृपत्नीदुहितृस्नुषाद्याः सभर्तृकाःपरिभवादिना दुःखिताःशोचन्ति अश्रूणि मुञ्चन्ति । व्यतिरेके गुणमाह नेति तत्कुलम् ॥ ५७ ॥

(५) नन्दनः । जामयःस्वसारः ॥ ५७ ॥

(६) रामचन्द्रः । यत्र यस्मिन्कुलएता जामयोन शोचन्ति तत्कुलं हिनिश्चयेन सर्वदा वर्द्धते ॥ ५७ ॥

जामयोयानि गेहानि शपन्त्यप्रतिपूजिताः ॥ तानि कृत्याहतानीव विनश्यन्ति समन्ततः ॥ ५८॥

(२) सर्वज्ञनारायणः । गेहानि स्थानानि ॥ ५८ ॥

(३) कुल्लूकः । यानि गेहानि भगिनीपत्नीदुहितृस्नुषाद्याअपूजिताःसत्योऽभिशपन्तीदमनिष्टमेषामस्त्विति तान्यभिचारहतानि धनपश्वादिसहितानि नश्यन्ति ॥ ५८ ॥

(४) राघवानन्दः । किंच जामयइतिकृत्याअभिचारास्ताभिर्हतानीव ॥ ५८ ॥

(५) नन्दनः । कृत्याऽभिचारक्रिया ॥ ५८ ॥

तस्मादेताः सदा पूज्याभूषणाच्छादनाशनैः ॥ भूतिकामैर्नरैर्नित्यंसत्कारेषूत्सवेषु च ॥ ५९ ॥

(२) सर्वज्ञनारायणः । उत्सवेषु विवाहादिषु । सत्कारेण वाचिकप्रशंसया । सत्कारेष्विति पाठे इतरेषां संमाने प्रकृतइत्यर्थः ॥ ५९ ॥

(३) कुल्लूकः । यस्मादेवंतस्मात्कारणादेताभूषणाच्छादनाशनैर्नित्यंसत्कारेषु कौमुद्यादिषूत्सवेषूपनयनादिषु समृद्धि-कामैर्नृभिः सदा पूजनीयाः ॥ ५९ ॥

(४) राघवानन्दः । तस्मादेताजामयोभूतिकामैरैश्वर्यकाङ्क्षिभिः । सत्कारेषु बान्धवादीनांपूजासूत्सवेषु विवाहा-दिषु ॥ ५९ ॥

(५) नन्दनः । उक्तमर्थंनिगमयतितस्मादिति । यतएवमतःकन्यायाभूषणार्थंवराद्धनादानमविरुद्धम् ॥ ५९ ॥

(६) रामचन्द्रः । सत्कारेषुत्सवकुलस्त्रीणां उत्सवेषु कौमुद्यादिषु विवाहादिषु ॥ ५९ ॥

सन्तुष्टोभार्यया भर्ता भर्त्रा भार्या तथैव च ॥ यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम् ॥ ६० ॥

(२) सर्वज्ञनारायणः । कुले गृहे ॥ ६० ॥

(३) कुल्लूकः । भार्यया भर्त्राइति हेतौ तृतीया यत्र कुले भार्यया भर्ता प्रीतोभवति स्त्र्यन्तराभिलाषादिकंन करोति भार्याच स्वामिना प्रीता भवति तस्मिन्कुले चिरंश्रेयोभवति । कुलग्रहणान्न केवलंभार्यापतीएवंपुत्रपौत्रादिसंततिः श्रेयो-भागिनी भवति ॥ ६० ॥

(४) राघवानन्दः । संप्रति दम्पत्योःस्नेहमलङ्करोति । संतुष्टइति त्रिभिः । भर्त्रा भार्या संतोषिता यस्मिन् तत्र कुले एतत्तयोःसंतोषरूपम् ॥ ६० ॥

(५) नन्दनः। भूषणाच्छादनादिभिः स्त्रीणांपूज्यत्वे हेत्वन्तरंश्लोकत्रयेणाह संतुष्टइति ॥ ६० ॥

(६) रामचन्द्रः । संतुष्टोभार्ययाभर्ता स्त्र्यन्तराभिलाषी न । हेतौ तृतीया । यस्मिन्कुलएतदानुकूल्यं तत्र तस्मिन्कुले कल्याणंवर्धते ॥ ६० ॥

यदिहि स्त्री न रोचेत पुमांसं न प्रमोदयेत् ॥ अप्रमोदात्पुनः पुंसः प्रजनं न प्रवर्तते ॥ ६१ ॥

[यदाभर्ताच भार्याच परस्परवशानुगौ ॥ तदाधर्मार्थकामानां त्रयाणामपि संगतम्× ॥]

(२) सर्वज्ञनारायणः । नरोचेत पुरुषस्य नाभिलाषं जनयति । प्रजननं संततिः ॥ ६१ ॥

(३) कुल्लूकः । दीप्त्यर्थोत्ररुचिः । यदिस्त्रीवस्त्राभरणादिना शोभाजनकेन दीप्तिमती न स्यात्तदास्वामिनंपुनर्न हर्षये-देव हिशब्दोऽवधारणे अप्रहर्षात्पुनः स्वामिनः प्रजननंगर्भधारणंन संपद्यते ॥ ६१ ॥

(४) राघवानन्दः । स्त्री न रोचेत भर्त्रेइति शेषः । प्रजनः पुत्रः । अरुच्या तस्यामगमनात् ॥ ६१ ॥

(५) नन्दनः । न रोचेत पुंसे ॥ ६१ ॥

(६) रामचन्द्रः । हिनिश्चये स्त्री यदि न रोचेत स्त्री पुमांसंन प्रमोदयेत् पुंसोऽप्रमोदात्प्रजनं जननंनप्रवर्तते ॥ ६१ ॥

× अयं (ट) चिन्हित पुस्तके ।

स्त्रियां तु रोचमानायां सर्वं तद्रोचते कुलम् ॥ तस्यांत्वरोचमानायां सर्वमेव न रोचते ॥६२॥

(२) **सर्वज्ञनारायणः** । रोचमानायांभूषणादिना दीप्यमानायाम् । रोचते शोभते ॥ ६२ ॥

(३) **कुल्लूकः** । स्त्रियांमण्डनादिना कान्तिमत्यांभर्तृस्नेहविषयतया परपुरुषसंपर्कविरहात्तत्कुलंदीप्तंभवति । तस्यांपुनररोचमानायांभर्तृविद्विष्टतया नरान्तरसंपर्कात्सकलमेव कुलंमलिनंभवति ॥ ६२ ॥

(४) **राघवानन्दः** । अत्रार्थवादः स्त्रियामिति । सर्वंप्रजनप्रमोदादि ॥ ६२ ॥

(५) **नन्दनः** । स्त्रियांपुंसे रोचमानायांसर्वंतत्कुलंजगते रोचते । यतएवंतस्मादपि कन्या भूषयितव्या । भूषणार्थंज्ञातिभिर्वराद्धनादानंनदोषावहमितिस्थितम् ॥ ६२ ॥

(६) **रामचन्द्रः** । स्त्रियांरोचमानायांसक्तायां भूषणादिना दीप्यमानायांकुलंरोचते उज्वलं भवति ॥ ६२ ॥

कुविवाहैः क्रियालोपैर्वेदानध्ययनेन च ॥ कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च ॥ ६३ ॥

(२) **सर्वज्ञनारायणः** । कुत्सितैर्विवाहैः स्वर्वर्णनिषिद्धैः क्रियालोपैःकर्तव्यतानाचरणैः । ब्राह्मणानामतिक्रमेणाधिक्षेपादिना एतैर्विनश्यन्ति कुलतांत्यजन्ति ॥ ६३ ॥

(३) **कुल्लूकः** । आसुरादिविवाहैर्यथावर्णनिषिद्धैर्जातकर्मादिक्रियालोपैर्वेदापाठेन ब्राह्मणापूजनेन प्रख्यातकुलान्यपकर्षंगच्छन्ति ॥ ६३ ॥

(४) **राघवानन्दः** । शुल्कदानेन उद्वाहनिन्दनं प्रकृतं तत्रैव प्रासंगिकमाह कुविवाहैरितित्रिभिः । आसुरराक्षसादिविवाहैः । क्रियालोपैश्च क्रिया जातकर्मादि । ब्राह्मणानामतिक्रमेण तिरस्कारादिना । अकुलतां अप्रशस्त कुलताम् ॥ ६३ ॥

(६) **रामचन्द्रः** । त्रिभिः कुविवाहैरासुरादिभिः ॥ ६३ ॥

शिल्पेन व्यवहारेण शूद्रापत्यैश्च केवलैः ॥ गोभिरश्वैश्च यानैश्च कृष्या राजोपसेवया ॥ ६४ ॥

(२) **सर्वज्ञनारायणः** । शिल्पादिभिस्तु कुलान्यकुलतामल्पकुलतांयान्ति । यानिचमन्त्रतोवेदतोहीनान्यल्पवेदाध्येतॄणि । शिल्पेन शिल्पजीवनेन व्यवहारेण ऋणदानादिजीविकया । शूद्रापत्यैः केवलैः कृत्स्नैःसवर्णविवाहेसत्यपि शूद्रापत्यमात्रोत्पत्त्या । गोभिर्गोरूपैरश्वैरश्वरूपैर्यानैः ॥ ६४ ॥

(३) **कुल्लूकः** । चित्रकर्मादिशिल्पेन कलया धनप्रयोगात्मकव्यवहारेण केवलशूद्रापत्येन गवाश्वरथक्रयविक्रयादिना कृषिराजसेवाभ्यांकुलानि विनश्यन्तीत्युत्तरेणसंबन्धः ॥ ६४ ॥

(४) **राघवानन्दः** । शिल्पेन चित्रकर्मादिना । व्यवहारेण क्रयविक्रयऋणादिदानेन । शूद्रापत्यैरितिपूर्वनिषेधानुवादः । स्वपुत्राभावाद्दासदासीपुत्रैर्वा । केवलशब्दप्रयोगात् गोभिरित्यादिभिर्विक्रीतैः अनुपयुक्तैर्वा । कृष्या केवलया । राजोपसेवया सततमिति शेषः ॥ ६४ ॥

(५) **नन्दनः** । प्रशस्तानिन्दिताश्चविवाहाउक्ताः । तेषु निन्द्यान केवलमुद्वोढुरेव दोषावहाः किंतु तत्कुलविनाशहेतवश्चेत्याह कुविवाहैरिति । क्रियालोपादयोदृष्टान्तार्थाः वेदानध्ययनमेषु दुष्टकरमितिप्रसङ्गाच्छ्लोकद्वयेनाह शिल्पेनेति । शिल्पेन छत्रादिनिर्माणेन । व्यवहारेण वाणिज्येन । केवलैःसवर्णकस्त्रीपुत्ररहितैः । यानैर्यानभूतैर्गवामुष्ट्राणांचयानभूतानामारोहणेनेत्यर्थः ॥ ६४ ॥

(६) **रामचन्द्रः** । शिल्पेन व्यवहारेण धनप्रयोगेण शूद्रापत्यैश्च शूद्रायामपत्योत्पादनैः गोभिर्गवांविक्रयणादिभिः ॥ ६४ ॥

अयाज्ययाजनैश्चैव नास्तिक्येन च कर्मणाम्॥कुलान्याशु विनश्यन्ति यानि हीनानि मन्त्रतः६५

(३) **कुल्लूकः** । अयाज्यव्रात्यादियाजनैः कर्मणांश्रौतस्मार्तादीनांनास्तिक्येन शास्त्रीयफलवत्कर्मसु फलाभावबुद्धिर्नास्तिक्यम् वेदाध्ययनशून्यानि कुलानि क्षिप्रमपकर्षंगच्छन्ति । अत्र च विवाहप्रकरणे विवाहनिन्दाप्रसङ्गेन क्रियालोपादयोनिन्दिताः । निन्दया चैतन्न कर्तव्यमिति सर्वत्रनिषेधः कल्प्यते ॥ ६५ ॥

(४) **राघवानन्दः** । नास्तिक्येनाश्रद्धया । कर्मणां श्रौतस्मार्तानां त्यागेन । मन्त्रत आवश्यककर्मोपयुक्तगायत्र्यादि मन्त्रैर्हीनानि ॥ ६५ ॥

(५) **नन्दनः** । कर्मणांनास्तिक्येन पुण्यपापफलाभावनिश्चयेन । एतैः शिल्पादिभिः । कुलानि मन्त्रातोहीनानि चेदकुलतांयान्ति नतुमन्त्रयुक्तानीति ॥ ६५ ॥

(६) **रामचन्द्रः** । यानि कुलानि मन्त्रतो वेदतः । हीनानि ॥ ६५ ॥

मन्त्रतस्तु समृद्धानि कुलान्यल्पधनान्यपि ॥ कुलसंख्यांच गच्छन्ति कर्षन्ति च महद्यशः॥६६॥

(२) **सर्वज्ञनारायणः** । अत्रमन्त्रपाठसमृद्धौ दोषान्तराणामपि मन्दताभवतीत्याह मन्त्रतस्त्विति । कुलसंख्यां कुलगणनांयान्ति कर्षन्ति आकर्षन्ति ॥ ६६ ॥

(३) **कुल्लूकः** । इदानींक्रियालोपादिगतप्रासङ्गिककुलनिन्दानुप्रसक्त्या कुलोत्कर्षमाह मन्त्रेति । यद्यपि धनेन कुलमिति लोकेप्रसिद्धं तथाप्यल्पधनान्यपि कुलानि वेदाध्ययनतदर्थज्ञानानुष्ठानप्रसक्तान्युत्कृष्टकुलगणनायांगण्यन्ते महतींनुख्यातिमर्जयन्ति ॥ ६६ ॥

(४) **राघवानन्दः** । उक्तवैपरीत्ये गुणमाह मन्त्रतस्त्विति । समृद्धानिमन्त्रतदर्थज्ञानादियुक्तानि । कुलसङ्ख्यांमहत्कुलत्वेन सङ्ख्यायन्ते । अनियत्तां कर्षन्तिअर्जयन्ति ॥ ६६ ॥

(५) **नन्दनः** । यतएवंततोमन्त्रसमृद्धावादरः कर्तव्यइत्यभिप्रायेणाह मन्त्रतस्त्विति ॥ ६६ ॥

वैवाहिकेऽग्नौ कुर्वीत गृह्यंकर्म यथाविधि ॥ पञ्चयज्ञविधानं च पक्तिं चान्वाहिकीं गृही ॥६७॥

(१) **मेधातिथिः** । कृतोविवाहोयस्मिन्नग्नौ तत्र कुर्वीत गृह्यंकर्म । अग्निसाध्यमष्टकापार्वणश्राद्धहोमादि गृह्यस्मृतिकारैरुक्तम् । पञ्चयज्ञावक्ष्यमाणास्तेषांविधानमनुष्ठानम् । तस्मिन्नेवाग्नौ यद्यप्यविशेषेण पञ्चयज्ञविधानमित्युक्तंतथापि वैश्वदेवहोमोऽग्निसाध्यः । उदकतर्पणादौ तु न किंचिदग्निना कार्यम् । कथंतर्हि निर्देशोऽग्नौपञ्चयज्ञविधानंकार्यमिति । केचिदाहुरेकापिसप्तमी विषयभेदाद्भिद्यते । तस्मात्पञ्चयज्ञैकदेशेपञ्चयज्ञशब्दः प्रयुक्तः । अथवा पञ्चयज्ञविधानमित्यत्राग्नाविति न संबध्यते । वैश्वदेवहोमस्य पूर्वेणैवाग्न्यधिकरणस्य सिद्धत्वात् । एवंसंबन्धः क्रियते गृही तु पञ्चयज्ञविधानंकुर्यात् अग्नौ तु वैवाहिके गृहधर्मपक्तिंचान्वाहिकीमग्नावित्यपेक्ष्यते । गृहशब्दोदारवचनः गृही तु सत्कृतदारपरिग्रहोभार्याद्वितीयइदमिदंकुर्यादिति । विवाहेचाग्निः कैश्चिद्गृह्यकारैररणिनिर्मन्थनादाधातव्य इत्युक्तम् अपरैर्यतःकुतश्चिद्दीप्यमानमानीयहोतव्यमिति । अनेन तस्मिन्गृह्यमिति वचनेन धारणमग्नेरर्थादुक्तंभवति । अत्र केचिदाहुः शूद्रस्यापि वैवाहिकाग्निधारणमस्ति तस्यापि पाकयज्ञाधिकारात् । न चात्र जातिविशेषउपात्तः केवलंगृहीति श्रुतम् शूद्रोऽपिगृही

तस्यापिदारपरिग्रहस्योक्तत्वात् । एतदेवान्यत्रपठितं कर्म स्मार्तंविवाहाग्नौकुर्वीत प्रत्यहंगृहीति । अत्रोच्यते । गृह्यंकर्म वैवाहिकेग्नाविति श्रुतम् । नच गृह्यंनाम किंचित्कर्मास्ति । तत्र गृह्यस्मृतिकारोक्तंगृह्यमितिलक्षणया मन्तव्यम् । गृह्यकारैश्च त्रैवर्णिकानामेवकर्माम्नातं नशूद्रस्य उक्तानि वैतानिकानि गृह्याणि वक्ष्यामइति । उक्तानुकीर्तनस्यएतदेवप्रयोजनं येषामेव वैतानिकेष्वधिकारस्तेषामेव गृह्येष्विति । न पुनर्यथान्यैर्व्याख्यातं तद्धर्मप्राप्त्यर्थं । तादर्थ्ये हि विवक्षिते तस्याग्निहोत्रेण प्रादुष्करणहोमकालौव्याख्यावाविति नावक्ष्यत् । न च गृहेभवंगृह्यमितियुक्तम् । शालावचनोगृहशब्दो-दारवचनोवा । न तावत्कस्यचित्कर्मणः शालाऽधिकरणत्वेन विशेषतः समाम्नाता यद्गृहमित्यनूद्य गृहिणोविधीयते । यदपि गृहसंस्कारकंवास्तुपरीक्षादि तदपित्रैवर्णिकानामेव नशूद्रस्य अथ दारवचनस्तत्रापि गृहीत्यनेनैवगतत्वान्नकिंचित् । यद्यपि स्मृत्यन्तरं कर्म स्मार्तंविवाहाग्नौ कुर्वीत प्रत्यहंगृही दायकालाहृते वापि श्रौतंवैतानिकाग्निष्विति । अत्रापिकिंचित्स्मार्तमितिविशेषानुपादानादन्यसापेक्षतैव नहि सर्वमग्नौस्मार्तंकर्मसंभवति । न च होमविषयत्वे प्रमाणमस्ति नह्यवश्यमग्न्यधिकरणएव होमः । तस्माद्गृह्यकारोक्तंगृह्यमितिवक्तव्यम् । एते हि स्मृती गृह्यकारविहितंकर्मानुवदतः । तथा च कुतः शूद्रस्याग्निपरिग्रहः । किंच श्रौतंवैतानिकाग्निष्विति अपरंतत्राम्नायतेतत्रअवश्यमयंत्रैवर्णिकविषयएषितव्यः । सएवपूर्वत्र चातुर्वर्ण्यपरउत्तरत्र त्रैवर्णिकपरइत्येकस्य शब्दस्य तात्पर्यभेदोऽभ्युपगतः स्यात् । नचाऽभेदे संभवति भेदोन्याय्यः । अन्वहंभवाऽऽन्वहिकी । प्रतिदिवसंयः पाकोभुक्त्यर्थःसतस्मिन्नेवाग्नौ कर्तव्यः ॥ ६७ ॥

(२) सर्वज्ञनारायणः । वैवाहिके यत्राग्नौ लाजहोमः कृतस्तस्मिन् गार्ह्यगृह्योक्तंविवाहोत्तरकालीनंस्वकीयंकर्म नित्यनैमित्तिकशान्तिकपौष्टिकरूपम् । पञ्चयज्ञविधानं गार्ह्यत्वेपि पृथगुक्तं । प्रवसताऋत्विगादिभिर्गृह्याग्नावेव तत्कर्तव्य-मित्येतदर्थं । पञ्चयज्ञपदंवैश्वदेवमात्रपरम् । पक्तिं स्वान्नपाकं । गृही गृहे निवसन् ॥ ६७ ॥

(३) कुल्लूकः । विवाहप्रकरणमतिक्रान्तम् । इदानींवैवाहिकाग्नौसंपाद्यमहायज्ञविधानंचेतिवक्तव्यतया प्रतिज्ञातं-महायज्ञाद्यनुष्ठानमाह वैवाहिकइति । विवाहेभवोवैवाहिकः । आध्यात्मिकादित्वाट्ठञ् । तस्मिन्नग्नौ गृह्योक्तंकर्म सायंप्रातर्होमाष्टकादि यथाशास्त्रमग्निसंपाद्यंच पञ्चमहायज्ञान्तर्गतवैश्वदेवाद्यनुष्ठानंप्रतिदिनसंपाद्यंच पाकंगृहस्थःकुर्यात् ॥ ६७ ॥

(४) राघवानन्दः । विवाहस्य प्रासंगिकमुक्त्वा यदुद्दिश्य कृतंतदाह वैवाहिकइति । विवाहकालेभवोवैवाहिकः आवसथ्याख्यः तस्मिन् । गृह्यं सायंप्रातर्होमाष्टकापार्वणश्राद्धादिहोमंच । विवाहोत्तरकालीनोभिन्नः श्रौतः जातपुत्रः कृष्णकेशोग्नीनादधीतेति श्रुतेः । पञ्चयज्ञानांतर्पणादीनां यदेकदेशोवैश्वदेवाख्यस्तस्यैवविधानमनुष्ठानाख्यं तदग्नौ कुर्वीत । पक्तिं पाकं । अन्वाहिकीं प्रतिदिननिष्पाद्याम् ॥ ६७ ॥

(५) नन्दनः । अथगृहस्थधर्मः प्रस्तूयते वैवाहिकइति । विवाहोयस्मिन्कृतः सवैवाहिकोऽग्निरौपासनाग्निःगार्ह्यकर्माक्षतहोमपाकयज्ञादिकम् । भूतमनुष्यब्रह्मयज्ञानामग्नौकरणमग्निसमीपे करणम् ॥ ६७ ॥

(६) रामचन्द्रः । अथ वैश्वदेवविधिः । वैवाहिकेऽग्नौ गार्ह्यंगार्ह्यसंज्ञंकर्म यथा विधि कुर्वीत कुर्यात् । पञ्चयज्ञ-विधानंच वैश्वदेवसंज्ञंकुर्यात् पक्तिस्वान्नपाकंगृहधर्मपक्तिं । अन्वाहिकींप्रतिदिवसंगृही कुर्यात् ॥ ६७ ॥

पञ्चसूनागृहस्थस्य चुल्ली पेषण्युपस्करः ॥ कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन् ॥ ६८ ॥

(१) मेधातिथिः । पञ्चयज्ञविधेरधिकारनिर्देशोऽयम् । सूनाइवसूनाः । मांसविक्रयार्थंपशुवधस्थानमापणादयोवा-मांसस्योत्पादकतयानुष्ठीयमानाः पापहेतवएवंचुल्यादयोऽपि पापहेतुत्वादध्यारोपेण सूनासमाः । नहि तेषांशास्त्रप्रतिषेधः

---

(६८) बध्यते=वध्यते (मे०)

साक्षात् नापि सामान्यः कश्चित्प्रतिषेधोऽस्ति। नहि तापघाताय कस्यचिन्न स्पृहास्यात्। न काचित्तत्साध्यक्रिया दृश्यते या वचनान्तरेण निषिद्धा। नचास्मादेव वचनात्प्रतिषेधानुमानंउत्तरेणैकवाक्यतावगमात्। प्रतिषेधपरत्वे वाक्यभेदः स्यात्। किंचैतत्पदार्थस्याध्यामर्थक्रियांपदार्थान्तरेण साधयेत्तस्याःप्राप्तिम्। पञ्चयज्ञानां न च लक्षणान्युक्तानि। येन तत्समानकार्यस्यान्यस्यापि प्रतिषेधउच्यते योवा परकीयमन्नमद्यान्नद्यादावुदकार्थंकुर्यान्नतस्यैते यज्ञाःस्युः। यदि च चुल्ल्यादीनांनिषेधोभिप्रेतः स्यात्तदाप्रतिषेधार्थीयमेवपदमधीयीत किमनुमानेन। त्वशब्दाद्बलीयसी प्रतिपत्तिः। प्रायश्चित्तार्थत्वे त्वेकादशेऽभिधानंन युक्तंनिषेधैरेवाननुष्ठानमेवस्यात्। अपरिहार्यत्वाच्च चुल्ल्यादीनामशक्योनिषेधः। असति चनिषेधे कुतः प्रायश्चित्तम्। तस्मान्न दोषविघातार्थंपञ्चमहायज्ञाः। किंतर्हिनित्यसंबन्धेषु चुल्ल्यादिधारणेऽपि तद्दोषः तन्निष्कृत्यर्थतया नित्यार्थतयानित्यत्वंयज्ञानामाह बध्यते आदिवर्णंवेत्येतद्दन्तोष्ठ्यंपठ्यते। हन्यते दुष्कृतेन शरीरधनादिना नाश्यते। संबध्यते वा पापेन। परतन्त्रीकरणंवा बध्नातेरर्थः। वाहयन् स्वकार्ये व्यापरणंवाहनम् यस्य चुल्ल्यादेर्यदौचित्यप्राप्तंस्वसाध्यंकार्यंतत्ताभिः कुर्वन्वाहयन्नित्युच्यते। चुल्ली पाकस्थानंभ्राष्ट्रादि। पेषणी दृषदुपलोवा। उपस्करोगृहोपयोगिभाण्डंकुण्डकटाहादि। कण्डनी ययाव्रीह्यादि कण्ड्यते। कुम्भोजलाधारः॥ ६८॥

(२) **सर्वज्ञनारायणः**। सूनाः प्राणिघातस्थानानि। चुल्ली पाकेन। माषादिबीजानां प्ररोहशक्तिप्रतिबद्धजीवनत्यागहेतुत्वात्। एवं पेषणी पेषणशिला पेषणेन। उपकिरत्यशुद्धानीति उपस्करोवस्करहेतुः। संमार्जनी भूयिष्ठपिपीलिकादिहिंसाहेतुः। कण्डन्युलूखलं वितुषीकरणात्। उदकुम्भोजलाशयस्थजन्तूनामुद्धरणेन घातनात्। बध्यतेपापेन निबध्यते वाहयन्प्रवर्तयन्॥ ६८॥

(३) **कुल्लूकः**। पशुवधस्थानंसूना। सूना इव सूना हिंसास्थानगुणयोगाच्चुल्ल्यादयःपञ्च गृहस्थस्य हिंसाबीजानि हिंसास्थानानि चुल्ल्युद्वाहनी पेषणी दृषदुपलात्मिकोपस्करोगृहोपकरणकुण्डसंमार्जन्यादिः। कण्डन्युलूखलमुसले। उदकुम्भोजलाधारकलशः याः स्वकार्ये योजयन्पापेनसंबध्यते॥ ६८॥

(४) **राघवानन्दः**। यदुद्दिश्य पञ्चयज्ञास्तन्नामसङ्ख्यामाह पञ्चसूनेति द्वाभ्यां। सूना हिंसा तद्योगाच्चुल्ल्यादयः। तत्रोखा चुल्ली तथा पेषणी सपुत्राशिला। उपस्करः संमार्जन्यादिः। कण्डनी उलूखलमुसलादि। उदकुम्भोजलपूर्णकलशादिः। वाहयन्स्वकार्येणैतायोजयन् बध्यते संबध्यते। प्राणिवधेनेति शेषः। बध्यते जन्तुरिति वा॥ ६८॥

(५) **नन्दनः**। होमाभावात्पञ्चमहायज्ञानामवश्यकर्तव्यत्वे कारणंश्लोकद्वयेनाह पञ्चेति। सूयन्तेऽस्मिन्प्राणिनइति सूना हिंसास्थानमिति यावत्। वाहयन्प्रवर्तयन्बध्यतेपाशेन॥ ६८॥

(६) **रामचन्द्रः**। गृहस्थस्य पञ्चसूनाः प्रत्यहं चुल्लीचुल्लिः पेषणी पिष्टपेषणी कण्डनी मुसलोलूखलस्थानं। उदकुम्भंकुम्भस्थानं। उपस्करः शूर्पादिः। याः सूनावाहयन्प्रवर्तयन्। बध्यते। एतानि वाहयन्विप्रोबध्यतेतुमुहुर्मुहुरितियमः॥ ६८॥

तासां क्रमेण सर्वासां निष्कृत्यर्थं महर्षिभिः॥ पञ्च क्लृप्तामहायज्ञाः प्रत्यहंगृहमेधिनाम्॥ ६९॥

(१) **मेधातिथिः**। तासांचुल्ल्यादीनांसूनानांनिष्कृत्यर्थंतदुत्पन्नदोषनिर्यातनार्थं क्रमेणाधिलेपनंचुल्ल्यास्तक्षणंपेष-

---

(६९) चुल्ल्यादिस्थानानाम्=चुल्ल्यादिसूनानाम् (अ)

ण्याइत्येवमादिक्रमः। महर्षिभिः क्रमाः कर्तव्यतया स्मृताः पञ्चमहायज्ञाः प्रत्यहंगृहमेधिनांगृहस्थानाम्। गृहमेधिशब्दोगृहस्थाश्रमे वर्तते। प्रत्यहमिति। अनुपादानात्कालविशेषस्य यावज्जीवमिति प्रतीयते। अतश्च नित्यत्वसिद्धिः। महायज्ञाइतिकर्मनामधेयमेतत्॥ ६९॥

(२) सर्वज्ञनारायणः। क्रमेण चुल्ल्यादिसूनानामभ्यापनादीनि निष्कृत्यर्थानि॥ ६९॥

(३) कुल्लूकः। तासांचुल्ल्यादिस्थानानांयथाक्रमंनिष्कृत्यर्थमुत्पन्नपापनाशार्थंगृहस्थानांपञ्चमहायज्ञाः प्रतिदिनंमन्वादिभिरनुष्ठेयतया स्मृताः। एवंच निष्कृत्यर्थमित्यभिधानाद्धिंसास्थानत्वेन च कीर्तनात्सूनादोषैर्न लिप्यतइति वक्ष्यमाणत्वात्पञ्चसूनानां पापहेतुकत्वंपञ्चयज्ञानांच तत्पापनाशकत्वमवगम्यते। प्रत्यहमित्यभिधानात्प्रतिदिनंतत्पापक्षयस्यापेक्षितत्वात्सन्ध्यावन्दनादिवन्नित्यत्वमपिनविरुध्यते॥ ६९॥

(४) राघवानन्दः। क्रमेण यथासंख्यं संख्यानतिक्रमेण। निष्कृत्यर्थं तत्तदुत्पन्नपापनाशार्थं। गृहमेधिनां मेधा गृहोत्पन्ना हिंसा तया युक्तानां क्रमाः कर्तव्यतयेति शेषः॥ ६९॥

(५) नन्दनः। तासांसूनानांहिंसानामित्यर्थः॥ ६९॥

(६) रामचन्द्रः। तासांपञ्चसूनानांसर्वासांक्रमेण महर्षिभिर्निष्कृत्यर्थं प्रायश्चित्तार्थंपञ्चयज्ञाःक्रमाः कथिताः गृहमेधिनां प्रत्यहं अहरहः कुर्यादित्यर्थः॥ ६९॥

अध्यापनंब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्॥ होमोदैवोबलिर्भौतोनृयज्ञोऽतिथिपूजनम्॥ ७०॥

(१) मेधातिथिः। एषामयंस्वरूपविधिः। अध्यापनशब्देनाध्ययनमपि गृह्यते येन जपोहुतइत्यत्र वक्ष्यति। नच जपोपिशिष्यानपेक्षते सामान्येन श्रुतंस्वाध्यायेनर्षिभ्यइत्यृणावेदनश्रुतौ। अतउभेअध्यापनाध्ययनेयथासंभवंब्रह्मयज्ञः। तर्पणमन्नाद्येनोदकेनवेति वक्ष्यति। होमोवक्ष्यमाणाभ्योदेवताभ्योग्नौ बलिः शिष्टउलूखलादौच सभौतः। भूतादिदेवतास्येतिभौतः नामधेयमेतत्कर्मविशेषस्य दिवाचारिभ्योभूतेभ्यइति हि तत्र बलिहरणंभूतशब्देनविहितम्। साहचर्यात्सर्वएषकर्मगणीभूतयज्ञशब्देनोच्यते। यथाचातुर्मास्येष्वेकंहविर्वैश्वदेवमामिक्षा कृत्स्नमेव च पर्ववैश्वदेवेन यजेतेति। बलिशब्दोनग्निहोमे वर्तते। देवेज्याबलिरितिस्मरन्ति। अतिथीनांपूजनमाराधनंनृयज्ञः। ननु च स्वाध्यायः कथंयज्ञोनहि तत्र देवताइज्यन्ते नापि श्रूयन्ते। केवलंवेदाक्षराण्यविवक्षितार्थान्युच्चार्यन्ते। उक्तंचाम्नायशब्दाभ्यासेकेचिदाहुरनर्थकानीति। सत्यम्। स्तुत्यां यज्ञशब्दोमहच्छब्दश्च। अतिथिपूजायामितिचोक्तोयज्ञशब्दः। यद्यप्यतिथेर्देवतात्वंसंभवति। तथाप्युत्पत्तौ भोजयेत्पूजयेदितिचश्रुतं नातिथिभ्योयजेतेति। यथापुरुषराजायत्कर्म वाइति। एतेपञ्चयज्ञा न युगपत्प्रयोज्याः एकाधिकारासंबन्धात्पृथगधिकारश्रवणात्। एकाधिकारसंबन्धत्वे त्रिषु चतुर्षु वा कृतेषु न किंचित्कृतंस्याद्यावत्कृत्स्नम्। न च यथाग्नेयाग्नीषोमीयोपांशुयाजानांदर्शपूर्णमासयागानामेकद्यनुष्ठानेनाधिकारसिद्धिर्यथात्रैव वैश्वदेवहोमेस्विष्टकृदन्तानांदेवतानांकस्याश्चिदन्तराये न होमाधिकारनिर्वृत्तिः। एकैकस्यचात्राधिकारः श्रुतः। स्वाध्यायेन नित्ययुक्तःस्यात्। दैवे च नित्ययुक्तः स्यादित्यधिकारपदानुषङ्गेण पृथक्प्रयोगः। आतिथ्येचाधिकारान्तरंश्रुतं धन्यंयशस्यमिति। तत्रचत्वारःस्वाधीनाः। आतिथ्यंतु संनिहितेऽतिथौ। न चातिथिर्निमन्त्रयितव्यः। आतिथ्यभावात्स्वयमुपस्थितोह्यतिथिर्भवतीति वक्ष्यामः। तस्मात्पञ्चानामन्यतमानुष्ठानेइतरेषामननुष्ठानाद्यदिनाम प्रत्यवेयान्नतु कृतमकृतंभवति। अतोऽनग्निकत्वाद्वैश्वदेवेऽनधिकृतस्य स्वाध्यायोदकतर्पणादौ भवत्येवाधिकारः। अग्निपरिग्रहस्य च स्मृत्यन्तरे कालान्तरस्यापि श्रुतत्वान्नावश्यंविवाहएव परिग्रहः। एवंहिस्मृतिः भार्यादिरग्निर्दायादिर्वेति। ननु चाकृतविवाहस्य दायकालमाधानंभविष्यति। भ-

वतिहेतदेवम् यथाऽऽधानविधिः स्वार्थःस्यात् अन्यथर्थंत्वाधानम् अग्निश्च कर्मार्थः कर्माणिच भार्याद्वितीयस्य न केवलस्य श्रुतानि । यद्यपि कैश्चिद्गृह्यकारैः परमेष्ठिप्राणाग्निमाधाय श्राद्धंकुर्यादित्युक्तंभवति तदपि सभार्यस्यैव सएवास्य दायकालः । न चानग्निकस्य श्राद्धंनास्ति अनुपनीतस्यापि ह्येतद्विहितमन्यत्रत्वधानिनयनादिति । न च तस्याधानमस्ति विदुषोऽधिकारादिदानींचाविद्यत्वात् । श्राद्धंतु वचनान्निषादस्थपतिवद्यथाशक्तिकार्यमिति । पितृव्यादिनाग्निपरिग्रहे तु विदुषांसंभवान्नावैद्यस्याधिकारः । अथ श्राद्धप्रकरणएवाग्न्याधानंविहितंतदातदङ्गत्वेनाधायनिष्पन्ने श्राद्धेपरित्यागोभविष्यति । केचित्तु स्मृत्यन्तरमुदाहरन्ति लौकिकेऽप्यग्नौ वैश्वदेवहोमः कर्तव्यः शुष्कान्नैरपरे ॥ ७० ॥

(२) सर्वज्ञनारायणः । अध्ययनस्य ब्रह्मचारिप्रकरणे विहितत्वादध्यापनमपि ब्रह्मयज्ञस्तत्रापि त्वध्ययनस्य संभवादिति दर्शयितुमुक्तम् । तर्पणंपितॄणांजलेनान्नेनवा । होमोदैवोयज्ञः ॥ ७० ॥

(३) कुल्लूकः । अध्यापनशब्देनाध्ययनमपि गृह्यते जपोऽहुतर्मितिवक्ष्यमाणत्वात् । अतोऽध्यापनमध्ययनंच ब्रह्मयज्ञः । अन्नाद्येनोदकेन वेतितर्पणंवक्ष्यति सपितृयज्ञः । अग्नौ होमोवक्ष्यमाणोदेवयज्ञः । भूतबलिर्भूतयज्ञः । अतिथिपूजनंमनुष्ययज्ञः । अध्यापनादिषु यज्ञशब्दोमहच्छब्दश्च स्तुत्यर्थंगौणः ॥ ७० ॥

(४) राघवानन्दः । तानसल्लक्षणान् महायज्ञानाह । अध्यापनं अध्ययनं च लक्षणया वेदाभ्यासस्यैव नित्यत्वात् । होमोगृह्याग्नौ बलिःभूतोद्देशेन उलूखलादौ होमइति मेधातिथिः ॥ ७० ॥

(५) नन्दनः । के पुनस्ते महायज्ञाइत्यपेक्षायामाह अध्यापनमिति । अध्ययनमेवाध्यापनम् । तर्पणंश्राद्धादीनामप्युपलक्षणम् ॥ ७० ॥

(६) रामचन्द्रः । पञ्चयज्ञानाह अध्यापनमिति । अध्यापनं ब्रह्मयज्ञसंज्ञं । तर्पणंजलान्नैः । पितृयज्ञसंज्ञः । होमः अन्वहंदैवः । लोकबलिः भौतयज्ञः । अतिथिपूजनंनृयज्ञसंज्ञः ॥ ७० ॥

पञ्चैतान्योमहायज्ञान्न हापयति शक्तितः ॥ सगृहे ऽपि वसन्नित्यंसूनादोषैर्न लिप्यते ॥ ७१ ॥

(१) मेधातिथिः । नित्यत्वमत्राभिधीयते । अन्यदनूद्यते । विगुणाअप्येते यथाशक्तिकर्तव्याः । एतदपि नित्यत्वात्प्राप्तमेव तस्माद्यथासंभवंशक्तितइति । आद्यादित्वात्तसिः । हापयतीति प्रकृत्यर्थएव णिजर्थस्याविवक्षितत्वात् । अथवा हननंहा संपदादित्वात्क्विप तामापयतीतिण्यदाप्नोतेः कर्तरि क्विप् तदन्तात्प्रातिपदिकाद्धात्वर्थे णिच । न हापयति नत्यजेदित्यर्थः ॥ स्वगृहे वसन्नवश्यभाविनीषु सूनासु न तत्पापेनसंबध्यतइतिप्रशंसा ॥ ७१ ॥

(२) सर्वज्ञनारायणः । नहापयति न त्यजति ॥ ७१ ॥

(३) कुल्लूकः । शक्तितइत्येतद्विधानार्थोयमनुवादः । अनुकल्पेनापि यथासम्भवमेते कर्तव्याः । हापयतीति प्रकृत्यर्थएवच्छान्दसत्वाण्णिच् । जहातीत्यर्थः ॥ ७१ ॥

(४) राघवानन्दः । उक्तानांस्तुतिनिन्दाभ्यांनित्यत्वख्यापनार्थमाह पञ्चैतानिति द्वाभ्यां । न हापयति नत्यजति ॥ ७१ ॥

(५) नन्दनः । उक्तार्थोपसंहारार्थः श्लोकः पञ्चैतानिति । नहापयति न परित्यजति । नित्यंगृहेवसन्नप्यवर्जनीयाः ॥ ७१ ॥

(६) रामचन्द्रः । एतान्पञ्चमहायज्ञान्योगृही न हापयति न त्यजति सःगृहेपि वसन्नित्यंपञ्चसूनादोषैर्न लिप्यते ॥ ७१ ॥

देवतातिथिभृत्यानां पितॄणामात्मनश्च यः ॥ न निर्वपति पञ्चानामुच्छ्वसन्न सजीवति ॥ ७२॥

(१) मेधातिथिः । अननुष्ठाननिन्दया प्रकृतविधिस्तुतिः । केचिच्चतुर्थ्या पठन्ति देवतातिथिभृत्येभ्यः पितृभ्यश्चात्मने तथा । न निर्वपति पञ्चभ्यइति । निर्वापोऽत्र दानंन तादर्थ्योपकल्पनमात्रम् । तत्संबन्धेन प्रधानत्वाच्चतुर्थीयुक्ता । एतेभ्योयः प्रत्यहंन ददात्युच्छ्वसन्नपि प्राणन्नपि श्वासप्रश्वासवानपि न जीवति मृतएव जीवितफलाभावात् । भृत्याश्चात्र वृद्धौतु मातापितराविति श्लोकनिर्दिष्टावेदितव्याः न दासाः कर्मनिमित्तत्वात्तेभ्योदानस्य । अथवा गर्भदासादयोवार्द्धके कर्मस्वशक्ता अपि नियमतोलक्ष्यन्ते । भरणंजीर्णगवादीनामवश्यमिति विभागे वक्ष्यामः उक्तंच गौतमेन भर्तव्यस्तेन क्षीणवृत्तिः । देवताभ्यश्च निर्वापोऽग्नौहोमः स्थण्डिले च बलिहरणंतु वैश्वदेवेभ्योदर्शपूर्णमासदेवताभ्यइतिच वाग्नयेत्वांजुष्टंनिर्वपामीतिसंबन्धादन्यःकोवाऽस्ति निर्वापः । अतोदेवताग्रहणेनगृहीतत्वाद्भृत्यानांपृथगुपादानम् । आत्मग्रहणंदृष्टान्तः यथात्मनीभोजनेन विना नास्ति जीवितंतदर्थमन्नोपयोगोऽवश्यं भावी जीवितस्येष्टविषयत्वात्सर्वतएवात्मानंगोपायेदितिविधेश्च । एवंदेवतादिभ्योपीति ॥ ७२ ॥

(२) सर्वज्ञनारायणः । देवतानांदेवयज्ञेन न निर्वपति न ददाति । भृत्यानांभूतानां । आत्मनोब्रह्मयज्ञेननिर्वपति न ददाति । नात्मानं तत्फल बंधिनंकरोति तस्य स्वाभ्युदयसाधनत्वादिति एवंपञ्चयज्ञाउक्ताः ॥ ७२ ॥

(३) कुल्लूकः । देवताशब्देन भूतानामपि ग्रहणं । तेषामपि बलिहरणे देवतारूपत्वात् । भृत्यावृद्धमातापित्रादयोऽवश्यंसंवर्धनीयाः सर्वतएवात्मानंगोपायेदिति श्रुत्यात्मपोषणमप्यवश्यंकर्तव्यम् । देवतादीनांपञ्चानांयोऽन्नं न ददाति सश्वसन्नपि जीवितकार्याकरणान्न जीवतीति निन्दयावश्यकर्तव्यता बोध्यते ॥ ७२ ॥

(४) राघवानन्दः । भृत्यानां भूतानां बलिं । आत्मनश्चाध्ययनमिति शेषः । न निर्वपति नैतेभ्योददाति । भस्त्रादिवत् श्वसञ्जीवन्नपि न जीवति जीवनोचितकार्याभावात् ॥ ७२ ॥

(५) नन्दनः । अर्थप्राप्ताः पञ्चसूनाअकुर्वन्नपि पञ्चमहायज्ञानामवश्यकर्तव्यत्वे कारणान्तरमाह देवतेति । देवतातिथिभूतानामितिपाठः । आत्माब्रह्मेति पर्यायस्तस्य निर्वापः पृथक्करणंप्रदानंयजनमिति यावत् । आत्मयज्ञोहि ब्रह्मयज्ञः तथाहिब्राह्मणं तस्यवा एतस्य ब्रह्मयज्ञस्य वागेव जुहूर्मनउपभृच्चक्षुर्ध्रुवामेधास्रुवः सत्यमवभृथःस्वर्गलोकउदयनीयइति ॥ ७२ ॥

(६) रामचन्द्रः । देवताशब्देनात्र ग्रहणं भूतानां एतेषांपञ्चानांयो न निर्वपति सउच्छ्वसन्न जीवति मृतकइत्यर्थः ॥ ७२ ॥

अहुतंच हुतंचैव तथा प्रहुतमेव च ॥ ब्राह्म्यंहुतंप्राशितंच पञ्चयज्ञान्प्रचक्षते ॥ ७३ ॥

(१) मेधातिथिः । एतैः शब्दैः कस्यांचिद्वेदशाखायामेतेषांविधानम् । अतः श्रुतिमूलतांपञ्चयज्ञविधानस्य दर्शयितुंतत्प्रसिद्ध्या पुनर्निर्दिशति । यश्चाहुतादिशब्दैरुद्दिश्य तत्प्रकरणेवा कश्चिद्धर्मोविहितइति नोक्तः सोऽपि ग्रहीतव्यइति संज्ञान्तरनिर्देशे द्वितीयंप्रयोजनम् । यथा ब्रह्मयज्ञश्राद्धोद्वाहपरिक्रियेत्यादि ॥ ७३ ॥

(२) सर्वज्ञनारायणः । अहुतेचेत्यादि पञ्चयज्ञानांश्रौतंसंज्ञान्तरम् ॥ ७३ ॥

(३) कुल्लूकः । नामभेदेऽपि वाक्यभेदइति दर्शयितुंपञ्चमहायज्ञानांमुन्यन्तरकृतान्यहुतादीनि संज्ञान्तराण्यभिधेयानि तानि स्वयंव्याचष्टे ॥ ७३ ॥

(४) **राघवानन्दः** । एतानेव शास्त्रान्तरप्रणीतनामभेदेन कीर्तयति अहुतंचेति । संज्ञाभेदेपि न पदार्थभेदइत्याह पञ्चयज्ञानिति ॥ ७३ ॥

(५) **नन्दनः** । शास्त्रान्तरेषु विहितान्यहुतादीनि पञ्चमहायज्ञानामेव नामान्तराणि न कर्मान्तराणामित्यभिप्रायेणाह अहुतमिति ॥ ७३ ॥

(६) **रामचन्द्रः** । द्वाभ्यामाह अहुतमिति । अहुतं प्रहुतं ब्राह्म्यं हुतं प्राशितंच युक्तान्पञ्चयज्ञान्प्रचक्षते ॥ ७३ ॥

जपोऽहुतोहुतोहोमःप्रहुतोभौतिकोबलिः ॥ ब्राह्म्यंहुतंद्विजाग्र्यार्चा प्राशितंपितृतर्पणम् ॥ ७४ ॥

(१) **मेधातिथिः** । योऽयमहुतोनाम यज्ञउक्तःसजपोवेदितव्यः । स्वाध्यायेनार्चयेदृषीनितिश्रवणाद्वेदाध्ययनं जपार्थः । यद्वा मानसे व्यापारे स्मरणम् । उभयत्रापि जपतिःपठ्यते व्यक्तायांवाचि मानसेचेति । अग्नौ होमोहुतम् । भूतबलिः प्रहुतम् । यद्यप्ययंहोमस्तथाप्यग्नौ बाहुल्येन होमानांप्रसिद्धेर्भूतयज्ञोनहोमइत्याशङ्कायांप्रहुतइत्युक्तम् । प्रकर्षेणासौहोमइतिस्तुत्या । द्विजानांब्राह्मणानामर्चाब्राह्मंहुतम् । आतिथ्यकर्मद्विजाग्र्यार्चा ॥ ७४ ॥

(२) **सर्वज्ञनारायणः** । जपोऽहुतोहोमाभावात् । हुतो होमात् प्रहुतःप्रगतहुतःप्रेतिप्रगतार्थे । ब्रह्मणि ब्राह्मणे हुतं ब्राह्मं । प्रकर्षेण विप्रैरश्यतेनेति प्राशितम् ॥ ७४ ॥

(३) **कुल्लूकः** । अहुतशब्देन ब्रह्मयज्ञाख्योजपउच्यते हुतशब्देन देवयज्ञाख्योहोमः । प्रहुतशब्देन भूतयज्ञाख्योभूतबलिः । ब्राह्मयहुतशब्देन मनुष्ययज्ञाख्योब्राह्मणश्रेष्ठस्यार्चा । प्राशितशब्देन पितृयज्ञाख्यंनित्यश्राद्धम् ॥ ७४ ॥

(४) **राघवानन्दः** । एतद्व्यनक्ति जपइति । अहुतइति च्छेदः । योयंपूर्वमहुतमित्युक्तः सजपः स्वाध्यायोवेदितव्य इत्यन्वयः । एवमुत्तरत्र । ब्राह्मं ब्रह्म ब्राह्मणजातिस्तस्येदं तस्यैवातिथित्वात् ब्राह्मं हुतं तच्च द्विजाग्र्यार्चेत्यन्वयः । पितृतर्पणं नित्यश्राद्धस्याप्युपलक्षणम् ॥ ७४ ॥

(५) **नन्दनः** । तेषांतथात्वंदर्शयति जपोऽहुतइति । जपोब्रह्मयज्ञःसोऽहुतसंज्ञः । होमोहुतसंज्ञः । भौतिकोबलिर्भूतयज्ञः । द्विजाग्र्यार्चा मनुष्ययज्ञः सब्रह्महुतसंज्ञः । पितृतर्पणंपितृयज्ञः सप्राशितसंज्ञः ॥ ७४ ॥

(६) **रामचन्द्रः** । गायत्रीजपः अहुतसंज्ञः । हुतंदैवः होमः । भूतबलिःप्रहुतसंज्ञः । विप्रार्चा ब्रह्महुतं । पितृतर्पणं नित्यश्राद्धं प्राशितसंज्ञम् ॥ ७४ ॥

स्वाध्याये नित्ययुक्तः स्याद्दैवे चैवेह कर्मणि ॥ दैवकर्मणि युक्तोहि बिभर्तीदंचराचरम् ॥ ७५ ॥

(१) **मेधातिथिः** । यदुक्तंपञ्चसु महायज्ञेष्वेकैकस्मिन्पृथगधिकारोनसमुदायएकोधिकारइति तदनेन प्रकटीकरोति । यदा दारिद्र्यादिदोषादन्यतोवा कारणात्कथंचिदसंपत्तौ नातिथ्यादिपूजाघटेत ततः स्वाध्याये नियुक्तेन भवितव्यम् । दैवकर्मणि वैश्वदेवदेवताभ्योग्नौहोमोदैवंकर्म । भूतयज्ञपितृयज्ञयोः सत्यपि दैवत्वे प्रकरणादग्नावेव होमोदैवमुच्यते । अत्रअर्थवादमाह । दैवेकर्मणि युक्तःतत्परोबिभर्तिधारयति चराचरंस्थावरंजङ्गमंच सर्वस्य जगतः स्थितेर्हेतुर्भवतीत्यर्थः ॥ ७५ ॥

(२) **सर्वज्ञनारायणः** । पंचयज्ञाशक्तावाह स्वाध्यायइति । दैवे होमेकर्मणि बिभर्ति ॥ ७५ ॥

(३) **कुल्लूकः** । यदि दारिद्र्यादिदोषेणातिथिभोजनादिकंकर्तुं न क्षमते तदाब्रह्मयज्ञे नित्ययुक्तोभवेद्दैवेकर्मण्यग्नौहोमेच । होमस्य स्तुतिमाह । यतोदैवकर्मपरइदंस्थावरजङ्गमंधारयति ॥ ७५ ॥

(४) राघवानन्दः । दारिद्र्यवशात् पञ्चानामशक्तौ द्वयमावश्यकमित्याह स्वाध्यायइति । दैवे होमे देवकर्मणः फलातिशयार्थं तन्स्तौति । देवइति ॥ ७५ ॥

(५) नन्दनः । एतेषु महायज्ञेषु ब्रह्मदेवयज्ञयोरप्रमत्ततरेण भवितव्यमित्याह स्वाध्यायइति । स्वाध्याये ब्रह्मयज्ञे । पञ्चमहायज्ञेषु मध्ये ब्रह्मयज्ञदेवयज्ञयोरवश्यकर्तव्ययोर्द्वयोरपि देवयज्ञविशेषउत्तरार्धेनोक्तः ॥ ७५ ॥

(६) रामचन्द्रः । स्वाध्याये वेदाध्ययने नित्ययुक्तःस्याद्दैवे पञ्चसु यज्ञेषुइह कर्मणि युक्तःस्यात्दैवे कर्मणि युक्तः स्यात् । दैवे कर्मणि युक्तःसन्निदंचराचरंबिभर्ति ॥ ७५ ॥

अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ॥ आदित्याज्जायते वृष्टिर्वृष्टेरन्नंततः प्रजाः ॥ ७६ ॥

(१) मेधातिथिः । कथंपुनरग्न्याहुत्यासर्वस्य जगतः स्थितिर्भवतीत्यतआह । अग्नौ यजमानेन प्रास्ताक्षिप्ता-ऽऽहुतिर्हूयमानंचरुपुरोडाशाद्युच्यते । आदित्यमदृश्येन रूपेण प्राप्नोति । सर्वरसानामाहर्तादित्योऽत आहुतिरसस्यादित्य-प्राप्तिरुच्यते । अतःसरसआदित्यरश्मिमृतुकालेन परिपक्वोवृष्टिरूपेण जायते । ततोऽन्नंव्रीह्यादि ततः प्रजाः सर्वप्राणिनः । एवमग्नौजुह्वत्सर्वजगदनुग्रहे वर्तते यजमानः । पूर्वस्य विधेः शेषोऽय न पुनर्यथाश्रुतार्थनिष्ठः । तत्त्वेहि । वृष्टिकामस्या-धिकारः स्यात् न च तच्छ्रुतस्यप्रकृतशेषतयान्वयसंभवेन कल्पनायाअवसरः ॥ ७६ ॥

(२) सर्वज्ञनारायणः । अग्नौ प्रास्ताहुतिरिति वक्ष्यमाणक्रमेणाग्न्यादित्ययोरन्योन्यतेजः संबन्धादग्निगताहु-त्या आदित्याप्यायनंतस्माच्चाप्यायिताद्वृष्टिः ॥ ७६ ॥

(३) कुल्लूकः । कुतएतदित्याह अग्नाविति । यजमानेनाग्नावाहुतिः सम्यक्क्षिप्तारसाहरणकारित्वादादित्यस्यादि-त्यंप्राप्नोति । सचाहुतिरसआदित्याद्वृष्टिरूपेण जायते । ततोऽन्नं तदुपभोगेन जायन्तेप्रजाः ॥ ७६ ॥

(४) राघवानन्दः । बिभर्तीदमित्युक्तं तदेव कुतस्तत्राह अग्नाविति । अधिकारिणा अग्नौहुताहुतिः सूक्ष्मा-त्मना आदित्यमुपतिष्ठते इत्याहुत्यपूर्वसाध्यंजगदितिभावः ॥ ७६ ॥

(५) नन्दनः । कथंबिभर्तीत्यपेक्षायामाह अग्नाविति । प्रास्ता प्रक्षिप्ता ॥ ७६ ॥

(६) रामचन्द्रः । सम्यगग्नौ प्रास्ताप्रक्षिप्ता आहुतिरादित्यमुपतिष्ठते संतुष्टादादित्यात् वृष्टिर्जायते । वृष्टेरन्नंभवति । ततअन्नादन्नभक्षणात्प्रजाजायन्ते ॥ ७६ ॥

यथा वायुंसमाश्रित्य वर्तन्ते सर्वजन्तवः ॥ तथा गृहस्थमाश्रित्य वर्तन्ते सर्वआश्रमाः ॥ ७७ ॥
[यथानदीनदाःसर्वे समुद्रे यान्ति संस्थितिम् ॥ एवमाश्रमिणःसर्वे गृहस्थे यान्ति संस्थितिम् ॥ †]

(१) मेधातिथिः । अपरेण प्रकारेण महायज्ञानामवश्यकर्तव्यतांदर्शयति । वायुः प्राणस्तमाश्रित्य सर्वे जीवन्ति न ह्यप्राणस्य जीवितमस्ति प्राणधारणमेवजीवनम् । जन्तुशब्दः प्राणिमात्रवचनः । सर्वग्रहणंदेवर्षीणामप्यतिशययुक्तानां-वाय्वायत्तमेव जीवनं एवंगृहस्थः प्राणतुल्यः सर्वाश्रमिणाम् । अतः सर्वोपजीवनीयेन भवितव्यमितिविध्यर्थः । इतरग्र-हणाद्यद्यपि गृहस्थादन्यआश्रमिणः प्रतीयन्ते तथापि न गृहस्थप्रतिषेधार्थमेतत् स्नातकस्य हि विशेषेणातिथ्यादिदानं-विहितम् । तस्मादितरग्रहणंगृहस्थाश्रमतुल्यतार्थम् । नच श्रूयते नात्मनात्मनि वर्तन्ते शरीरकुटुम्बस्थितिंप्राप्नुवन्ति इतरे चतआश्रमाइतराश्रमाइति समासः ॥ ७७ ॥

---

† (८)

(२) **सर्वज्ञनारायणः** । वायुंप्राणमन्नादिपाकविहरणादिहेतुम् ॥ ७७ ॥

(३) **कुल्लूकः** । यथा प्राणाख्यवाय्वाश्रयेण सर्वप्राणिनोजीवन्ति तथा गृहस्थाश्रयेण सर्वाश्रमिणोनिर्वहन्ति॥७७॥

(४) **राघवानन्दः** । यथा वै क्षुधिताबालामातरं पर्युपासते । एवंसर्वाणि भूतानि अग्निहोत्रमुपासतइति श्रुत्या अत्राग्निहोत्रोपलक्षितं गृहस्थाश्रमंप्राकरणिकत्वात्स्तौति यथेति । वायुं प्राणं । तद्दत्तभिक्षोपजीवित्वात् ब्रह्मचारिसंन्यासिनाम् । वानप्रस्थस्याविरक्तस्य पूर्वगृहस्थविद्याद्युपयोगित्वात् विरक्तस्यतु गृहमेधिषु चेत्यादि वक्ष्यमाणरीत्या गृहस्थोपजीवित्वाच्च ॥ ७७ ॥

(५) **नन्दनः** । अधिकारिप्रशंसाद्वारेण पञ्चमहायज्ञानामेव प्रशंसांश्लोकाभ्यामाह यथेति । वर्तन्ते जीवन्ति ॥७७॥

(६) **रामचन्द्रः** । यथासर्वजन्तवः इतरआश्रमा आश्रित्य वर्तन्ते ॥ ७७ ॥

यस्मात्त्रयोऽप्याश्रमिणोज्ञानेनान्नेन चान्वहम् ॥ गृहस्थेनैव धार्यन्ते तस्माज्ज्येष्ठाश्रमोगृही॥७८॥

(१) **मेधातिथिः** । यस्मात्त्रयोऽन्याश्रमिणोज्ञानेन वेदार्थव्याख्यानजन्येनान्नेन च धार्यन्तउपरिक्रियन्तेगृहस्थेन तस्माज्ज्येष्ठःश्रेष्ठआश्रमोगृहम् । गृहीतिपाठे बहुव्रीहिः । गृहमिति पाठेविशेषणसमासोज्येष्ठाश्रमइति । अत्रापि गृहस्थैरेवेत्यौचित्यानुवादोनवानप्रस्थादीनामध्यापनादिप्रतिषेधः । वानप्रस्थस्य तावद्विहितमेतत् तानेवमहायज्ञान्निर्वपेदिति । प्रव्रजितस्य यद्यपि हिंसानुग्रहयोनारम्भइत्यनुग्रहः प्रतिषिद्धस्तथापिवेदार्थव्याख्यानंभिक्षुशास्त्रे विहितम् । ज्ञानवैराग्यभावताभ्यासातिशयविधानाच्च तयोर्नातिप्रयत्नोवेदार्थव्याख्याने । ब्रह्मचारिणस्त्वार्थलोपान्नाध्यापकत्वंभैक्षवृत्त्युपदेशाच्चकुतोऽन्नदानम् । अतोगृहस्थानामेव प्रायेणतत्संभवादेवमुक्तंगृहस्थैरेव ॥ ७८ ॥

(२) **सर्वज्ञनारायणः** । एतदेव व्युत्पादयति यस्मादिति । गृहस्थस्यैवाध्यापनाधिकारात्त्रयोपिज्ञानेन । वनस्थस्यापि भिक्षाभ्रमणोपदेशात् । त्रयोप्यन्नेनच धार्यन्तइत्यर्थः । ज्येष्ठोगुरुतया पोषकतयाच ॥७८ ॥

(३) **कुल्लूकः** । गृहस्थः प्राणतुल्यःसर्वाश्रमिणामित्युक्तंतदेवोपपादयति यस्मादिति । यस्माद्गृहस्थव्यतिरिक्तास्त्रयोप्याश्रमिणोवेदार्थव्याख्यानान्नदानाभ्यांनित्यंगृहस्थैरेवोपक्रियते तस्माज्ज्येष्ठाश्रमोगृहस्थः ज्येष्ठआश्रमोयस्य सतथेति बहुव्रीहिः ॥ ७८ ॥

(४) **राघवानन्दः** । तमेव पुनः श्रेष्ठत्वेन स्तौति यस्मादिति । ज्ञानेन वेदविद्योपादानेन । त्रयोपि ब्रह्मचारिवानप्रस्थसंन्यासिनः । श्रेष्ठइतिज्येष्ठइतिवाऽतिशयोक्तिः सर्वान्नाधिकारार्थाअन्यैषांपरस्परोपकारकता निरस्ता ॥ ७८ ॥

(५) **नन्दनः** । ज्ञानेन ज्ञानप्रदानेनाध्यापनेनेति यावत् । अनेन ज्ञाप्यते गृहस्थारेवानापद्यध्येतव्यमिति ॥ ७८ ॥

(६) **रामचन्द्रः** । अन्नेन ज्ञानेन वेदार्थव्याख्यानेन यस्मात्कारणात्त्रयोप्याश्रमिणः अन्वहंगृहस्थैरेव धार्यन्ते तस्मात्कारणाद्गृही गृहस्थाश्रमो ज्येष्ठाश्रम उच्यते ॥ ७८ ॥

ससंधार्यःप्रयत्नेन स्वर्गमक्षयमिच्छता ॥ सुखंचेहेच्छतानित्यं योऽधार्योदुर्बलेन्द्रियैः ॥ ७९ ॥

(१) **मेधातिथिः** । सगृहाश्रमः । प्रयत्नेन सत्कार्योऽनुष्ठेयोऽक्षयस्वर्गकामेनेह च सुखमिच्छता । अत्यन्तशब्दोनित्यतांगमयति । यआश्रमोऽधार्योशक्यं धारयितुंदुर्बलेन्द्रियैः । एतदुक्तंभवति यतः स्त्रीसंभोगसुसंस्कृतभोजनादि गृहस्थस्यावश्यंभावि ततश्चेन्द्रियाणांविषयसक्तौ दोषेण किमुच्यते । प्रयत्नेन आश्रमान्तरेभ्योधारयितव्यः । अत्रापिमहानिन्द्रि-

(७८ ॥ ज्येष्ठाश्रमोगृही=ज्येष्ठाश्रमोगृहम् (मे० ॥ (७९) चेच्छतानित्यं=चेच्छतात्यन्तं (मे०)

यसंयमः । अनृतौ न गन्तव्यं परदारा न गन्तव्याः शेषान्नं भोक्तव्यं विषयसंनिधाने योनियमः सदुष्करः । स्वर्गमक्षयमिति नानेनसर्वेषांगृहस्थकर्मणांस्वर्गफलतोच्यते केषांचिन्नित्यत्वात्केषांचित्फलान्तरश्रवणात् । येऽप्यश्रुतफलाः स्वर्गफलतया कल्प्यन्ते तेषामपि केवलानामनुवादे न कश्चिद्विशेषणे हेतुः । तस्माद्विहिताभिप्रेतफलानुवादोऽयम् । नचाधिकारान्तरमिदं तेषामेव यावज्जीविकंस्वर्गकामस्येतिच शक्यंवक्तुं सुखंचेहेच्छतेत्यविधेयेन तुल्यत्वावगमात् । नहीहसुखकामेनेतरच्छक्यं कर्मफलतया ज्ञातुंविशेषस्यानिर्देशात् । सर्वा हि प्रीतिर्ग्रामपुत्रादिलाभैर्विशेषैरवच्छिन्नाप्रतीयते । अनवच्छेदेनप्रीतिमात्रं चेत्स्वर्गएव । नच तस्यैहिकत्वम् । तस्माद्दृष्टसुखाभिकामानुवादोऽयम् । अनिकेताह्यन्यआश्रमिणोवृक्षमूलनिकेतनाः परगृहवासिनोदुःखमासते । तस्मादयमनुवादः ॥ ७९ ॥

(२) **सर्वज्ञनारायणः** । अक्षयंचिरभोग्यं । अधार्योधारयितुमशक्यः ॥ ७९ ॥

(३) **कुल्लूकः** । यतएवमतः सगृहस्थाश्रमः स्वर्गसुखमिच्छता अनन्तमिव चिरस्थायित्वादिहलोके च स्त्रीसंभोगत्वाद्न्नादिभोजनसुखंसन्ततमिच्छता प्रयत्नेनानुष्ठेयः । योऽसंयतेन्द्रियैर्धारयितुं न शक्यते ॥ ७९ ॥

(४) **राघवानन्दः** । अतएव गार्हस्थ्याश्रमे यत्न आस्थेयइत्याह सइति । सगार्हस्थ्यधर्मः संधार्योऽनुष्ठेयः । अक्षय्यमिच्छता यत्कर्तव्यं तदनया सहेत्युक्तेः इहच सुखंस्त्र्यधीनमित्यनुभवसिद्धम् । अधार्यइतिच्छेदः । दुर्बलेन्द्रियैः असंयतेन्द्रियैः ॥ ७९ ॥

(५) **नन्दनः** । यत एवंतस्माद्गृहस्थाश्रमएवधार्योनाश्रमान्तराणि पञ्चयज्ञरहितानीत्यभिप्रायेणाह सइति । प्रयत्नेनापद्यपि ॥ ७९ ॥

(६) **रामचन्द्रः** । सगृहस्थाश्रमःप्रयत्नेनाक्षयंस्वर्गमिच्छता संधार्यः अत्यन्तसुखमिहेच्छता संधार्यः यो गृहस्थाश्रमोदुर्बलेन्द्रियैरधार्यः धारयितुं न योग्य इत्यर्थः ॥ ७९ ॥

ऋषयः पितरोदेवाभूतान्यतिथयस्तथा ॥ आशासते कुटुम्बिभ्यस्तेभ्यः कार्यंविजानता ॥ ८० ॥

(१) **मेधातिथिः** । तत्तुल्ययाऽयमप्यनुवादएव । एतेकुटुबिभ्योगृहिभ्यः सकाशादर्थयन्ते । आदित्सतआत्मोपकारलिप्साऽऽशासनमाकाङ्क्षाम् । अतस्तेभ्योदेवादिभ्यःकार्यंकर्तव्यंविहितहोमादि । विजानता शास्त्रस्थितिम् । कुटुम्बंदाराः। प्राकृतपुरुषेणापियामहायासोपनिबद्धा सान युक्ता विफलीकर्तुंकिपुनर्देवतास्तुतिः ॥ ८० ॥

(२) **सर्वज्ञनारायणः** । कुटुम्बिभ्योगृहिभ्यःआशासते । तत्र ऋषयः स्वस्वदृष्टवेदभागस्वाध्यायेनात्मनः सुखोत्पत्तिंकाङ्क्षन्ते । तेभ्यस्तानुद्दिश्य ॥ ८० ॥

(३) **कुल्लूकः** । एते गृहस्थेभ्यःसकाशात्प्रार्थयन्ते अतः शास्त्रज्ञेनतेभ्यः कर्तव्यम् ॥ ८० ॥

(४) **राघवानन्दः** । उक्तानर्थवादपुरःसरंपञ्चयज्ञोपजीवकानाह ऋषयइतित्रिभिः । आशासते वेदाध्ययनश्राद्धादिकमाकांक्षन्ते । कुटुम्बिभ्यः गृहस्थेभ्यः । आशासानेभ्यस्तेभ्योविजानता गृहस्थेन कार्यंकर्तव्यं । यत्तूत्तरश्लोकेवक्ष्यमाणवेदाध्ययनादि ॥ ८० ॥

(५) **नन्दनः** । अथ पञ्चमहायज्ञानामेवावश्यकर्तव्यत्वे कारणान्तरमाह ऋषयइति । विजानता कुटुम्बिना । तेभ्यऋष्यादिभ्यः । कार्यं कर्तव्यमिति ॥ ८० ॥

(६) **रामचन्द्रः** । ऋषयः पितरः देवाः । भूतानि अतिथयः तथा तेभ्यः कुटुम्बिभ्यःगृहिभ्यः । सकाशादाशासते सुखमभिलषन्ति विजानता पुंसा शास्त्रस्थितिं तेभ्यः कार्यं कारणीयमित्यर्थः ॥ ८० ॥

स्वाध्यायेनार्चयेतर्षीन्होमैर्देवान्यथाविधि ॥ पितॄञ्छ्राद्धैश्च नॄनन्नैर्भूतानि बलिकर्मणा ॥ ८१॥

(१) मेधातिथिः। स्वाध्यायमधीयीतेति यएवार्थः। सएव स्वाध्यायेनार्चयेदृषीनिति भवति श्राद्धादरेण पाद्यार्घमाल्यानुलेपनेन। अत्रोच्यते स्तुतिवचनं चेदम् नचोभयोरपि स्वाध्याय ऋषिपूजयोःकरणम्। अग्न्यादिदेवतास्तावकामन्त्राऋषीनभिष्टुवन्ति। तस्मात्प्रशंसामात्रमृषीन्स्वाध्यायेनार्चयेदिति ॥ ८१ ॥

(२) सर्वज्ञनारायणः। भूतानिबलिहोमभागित्वेन देवताभूतानामपिबलिभागितया भूतपदाभिधेयत्वात् बलिकर्मणि देवतोद्देशेनकर्तव्यम् ॥ ८१ ॥

(३) कुल्लूकः। किंतत्तदाह स्वाध्यायेनेति। नानाप्रकारत्वादर्चनस्य स्वाध्यायादेरर्चनार्थत्वमुचितम्। महायज्ञान्तर्गतैः स्वाध्यायादिभिर्ऋषिदेवपित्रतिथिभूतानियथाशास्त्रंपूजयेत् ॥ ८१ ॥

(४) राघवानन्दः। तदेवससंप्रदानकमाहस्वाध्यायेनेति । अर्चयेत्प्रीणयेत्। श्राद्धेनेति तर्पणस्याप्युपलक्षणम्। बलिकर्मणा भूतेभ्योदत्तेनान्नेन ॥ ८१ ॥

(५) नन्दनः। किंकर्तव्यमित्यपेक्षायामाह स्वाध्यायेनेति ॥ ८१ ॥

(६) रामचन्द्रः। श्राद्धेनपितॄन्नॄनन्नै स्तर्पयेत् बलिकर्मणाभूतानि प्रीणयेदित्यर्थः ॥ ८१ ॥

कुर्यादहरहः श्राद्धमन्नाद्येनोदकेन वा ॥ पयोमूलफलैर्वापि पितृभ्यः प्रीतिमावहन् ॥ ८२ ॥

(१) मेधातिथिः। दद्यात्कुर्यात्। अहरहः प्रतिदिवसम्। श्राद्धंनाम्नाधर्मातिदेशः। श्राद्धंनाम पित्र्यंकर्मामावास्यायांविहितम्। तदीयेतिकर्तव्यताश्राद्धमित्यनेन नाम्नाऽतिदिश्यते। अन्नाद्येनेति तिलैर्व्रीहियवैरित्यादेरनुवादोऽयम्। उत्तरत्रविवक्षितार्थउदकेनेति पयःक्षीरम् ॥ ८२ ॥

(२) सर्वज्ञनारायणः। श्राद्धंश्रद्धयापितृकर्म अन्नाद्येन श्रद्धयोत्सृष्टेन तथोदकेनअन्नाद्यवददुष्टेनेति मुख्यकल्पानुकल्पौ। परेत्वनुकल्पाः पयसा जलेन तर्पणकाले दत्तेन संपादनं। तथा अन्नाभावे मूलैः फलैर्वा श्राद्धदत्तैरिति। केचित्तु अन्नाद्याभावे उदकफलमूलक्षीराणामन्यतमेन नित्यश्राद्धंकर्तव्यमित्यस्यार्थमाहुः। पितृभ्यः प्रीति मिति तत्प्रीतिहेतोर्विहितस्यैव मूलस्य फलस्य वाग्रहणार्थम् ॥ ८२ ॥

(३) कुल्लूकः। तत्र पितृयज्ञंतावदाह कुर्यादिति। प्रत्यहंयथासंभवंश्राद्धंकुर्यात्। श्राद्धशब्दोऽयंकर्मविधिवाक्यवर्ती। कौण्डपायिनामयनीयाग्निहोत्रशब्दवद्वक्ष्यमाणपार्वणश्राद्धधर्मातिदेशार्थः । अन्नाद्येनेति तिलैर्व्रीहिभिर्यवैरित्यादेरुपादानम्। पयःक्षीरम् ॥ ८२ ॥

(४) राघवानन्दः। अहरहः श्राद्धं नित्यश्राद्धम्। यदन्नः पुरुषोराजन् तदन्नाः पितृदेवताइति न्यायमाश्रित्याह उदकेनेत्यादि। पयोदुग्धं प्रीतिं श्रद्धामावहन् ॥ ८२ ॥

(५) नन्दनः। पितॄञ्छ्राद्धेनेत्येतत्प्रपञ्चयति कुर्यादिति। अन्नाद्येन मुख्यकल्पउक्तः उदकेनाधमः पयोमूलफलैर्मध्यमइति विवेकः ॥ ८२ ॥

---

(८२) कुर्यादहं=दद्यादहं (मे०)

(६) रामचन्द्रः । अथ नित्यश्राद्धमारभ्यते दद्यादिति । अहरहःश्राद्धं अन्नाद्येन उदकेन च अन्नाभावे पयसा वा मूलफलैर्वापि किंकुर्वन्प्रीतिमावहन् ॥ ८२ ॥

एकमप्याशयेद्विप्रंपित्रर्थे पाञ्चयज्ञिके ॥ नचैवात्राशयेत्कंचिद्वैश्वदेवंप्रति द्विजम् ॥ ८३ ॥

(१) मेधातिथिः । श्राद्धशब्देन विधानात्सर्वस्मिंस्तद्विधाने प्राप्ते कश्चिदितिकर्तव्यताभागोनिवर्त्यते । नचैवात्राशयेत्किंचित् नात्रान्वाहिकेश्राद्धे वैश्वदेवंप्रति विश्वान्देवानुद्दिश्यद्विजभोजनम् । अत्र केचिदाहुः प्राप्ते भोजनआशयेदितिपुनर्वचनमपूर्वत्वमस्य दर्शयति । तेनैतावदेवैतच्छ्राद्धंयत्पितॄनुद्दिश्य ब्राह्मणएकोभोज्यते नत्वदन्या काचिदर्घपात्रादिहोमाद्येतिकर्तव्यताऽस्ति । ब्रह्मचर्यस्वाध्यायनिषेधइत्येवमादि न भवति । एकमप्याशयेद्विप्रम् त्रयाणांनियमादेकैकमुभयत्रेत्यस्या विधित्वादप्राप्तएकोविधीयते । एकमपि भोजयेत्सति संभवे बहूनपि पित्रर्थंपितॄतृप्त्यर्थम् । पाञ्चयज्ञिकंपञ्चयज्ञभवं पाञ्चयज्ञिकं तदन्तर्गतम् । पाञ्चयज्ञिकशब्दः श्राद्धे प्रयुक्तः । पाञ्चयज्ञिकंतर्पणम् । तेन तर्पणभोजनयोः समुच्चयः । अस्यतु विकल्पो भविष्यति यदेव तर्पयत्यद्भिरिति ॥ ८३ ॥

(२) सर्वज्ञनारायणः । एकमपीति पित्राद्येकैकोद्देशेनैकैकंब्राह्मणंभोजयेदिति पार्वणवत्प्राप्तमेव । तावता ब्राह्मणभोजनासंभवेपित्रर्थंपित्राद्यर्थंपाञ्चयज्ञिये पञ्चयज्ञिके संबन्धिश्राद्धेन चैवेति । अत्र नित्यश्राद्धे ब्राह्मणासंभवेपि वैश्वदेवस्थाने द्विजंनाशयेदिति विश्वेषांदेवानांनित्यश्राद्धप्रीणनंनास्तीति दर्शितम् ॥ ८३ ॥

(३) कुल्लूकः । पितृप्रयोजने पञ्चयज्ञान्तर्गत एकमपि ब्राह्मणंभोजयेत् । अपिशब्दात्संभवे बहूनपि । पार्वणधर्मप्रहणाच्चवैश्वदेवब्राह्मणभोजनमप्राप्तमाह न कंचिद्वैश्वदेवार्थंब्राह्मणमत्र भोजयेत् ॥ ८३ ॥

(४) राघवानन्दः । श्राद्धंहि ब्राह्मणभोजनात्मकं तत्र कति ब्राह्मणाभोजनीयाइत्यपेक्षायामाह एकमिति । पाञ्चयज्ञिके पञ्चयज्ञान्तर्गते नित्ये श्राद्धे । आशयेत् भोजयेत् पार्वणधर्मत्वादस्य देवब्राह्मणमसक्तौ निषेधति न चेति ॥ ८३ ॥

(५) नन्दनः । अत्र पितृयज्ञाद्युक्तेषु मध्येवैश्वदेवंप्रति वैश्वदेवहोमः स्यात् । द्विजंकिंचिदप्यन्नंभोजयेत् । अन्यद्धविरुत्पाद्य भोजयेदित्यर्थः ॥ ८३ ॥

(६) रामचन्द्रः । पाञ्चयज्ञिये कर्मणि चैकंविप्रंपितृतृप्त्यर्थमाशयेत् भोजयेत् । अथ वैश्वदेविकंचद्विजंवैश्वदेवं नाशयेन्नभोजयेत् । एकंन भोजयेदित्यर्थः । किंतु युग्मम् ॥ ८३ ॥

वैश्वदेवस्य सिद्धस्य गृह्येग्नौ विधिपूर्वकम् ॥ आभ्यः कुर्याद्देवताभ्यो ब्राह्मणोहोममन्वहम् ॥ ८४ ॥

(१) मेधातिथिः । विश्वेदेवार्थं वैश्वदेवः पाकउच्यते । सर्वार्थोवैश्वदेवेशब्दोऽपि संप्रदानमात्रोपलक्षणार्थः । तेनातिथ्याद्यर्थता युक्ता भवति । सिद्धस्य होममाभ्योवक्ष्यमाणाभ्योदेवताभ्यः कुर्यात् । सिद्धशब्देन देवतोद्देशेन देवस्यत्वेतिमन्त्रवन्निर्वापोन कर्तव्यइति दर्शयति । केवलंसर्वार्थनिष्पन्नपाकेन होमादि कर्तव्यमिति विध्यर्थः । गृह्येवा विधिहोमादिकरणनिर्देशविधिपूर्वकंसमाचारप्राप्तांपरिसमूहनपर्युक्षणादिरूपामितिकर्तव्यतामाह । ब्राह्मणशब्दस्त्रैवर्णिकाधिकारप्रदर्शनार्थः । अन्वहं नित्यमित्यर्थः । देवताग्रहणंस्वाहाकारमात्रार्थम् । षष्ठीनिर्देशादग्नेरिदमिति प्रयोगः स्यात् । देवताशब्देन तु स्वाहाकारेण वा देवेभ्योहविः संप्रदीयतइति याज्यान्तेपुनर्वषट्कारस्य विधानात् । स्मार्तहोमेत्वभावः । स्वाहाकारस्तु सर्वत्र । तस्मिन्नसत्यग्नये स्वाहेतिप्रयोगः ॥ ८४ ॥

---

(८३) पित्रर्थेपाञ्चयाज्ञिके=पित्रर्थंपाञ्चयज्ञिकं (मे०)

(२) सर्वज्ञनारायणः । नित्यश्राद्धमुक्त्वा वैश्वदेवाभिधानादयमेव क्रियाक्रमोमनोरपेक्षितइति लक्ष्यते । वैश्वदेवस्य विश्वदेवयोग्यस्य क्षारलवणादिव्यतिरिक्तस्यान्नस्य । गृह्ये वैवाहिकेऽग्नौसिद्धस्येत्यन्वयः । तत्र होमस्य पूर्वमेव विहितत्वात् ॥ ८४ ॥

(३) कुल्लूकः । विश्वदेवार्थः सर्वदेवतार्थोवैश्वदेवस्तस्य पक्वस्यान्नस्यावसथ्याग्नौ स्वगृह्यावाहितपर्युक्षणादीति कर्तव्यतापूर्वकमाभ्योवक्ष्यमाणदेवताभ्योब्राह्मणः प्रत्यहंहोमंकुर्यात् ब्राह्मणग्रहणंद्विजातिप्रदर्शनार्थं त्रयाणांप्रकृतत्वात् ॥ ॥ ८४ ॥

(४) राघवानन्दः । सम्प्रति वैश्वदेवविधिमाहवैश्वदेवेतिनवभिः । सिद्धस्यपक्वस्य । हविष्यस्येति शेषः । आभ्यो वक्ष्यमाणाभ्यः । ब्राह्मणोद्विजातिः ॥ ८४ ॥

(५) नन्दनः । कथंपुनर्वैश्वदेवः कर्तव्यइत्यपेक्षायामाह वैश्वदेवस्येति । वैश्वदेवस्य सिद्धस्य सर्वदेवार्थपक्वस्यान्नस्य ब्राह्मणः द्विजः ॥ ८४ ॥

(६) रामचन्द्रः । सिद्धस्यान्नस्य वैश्वदेवस्य वैश्वदेवार्थस्य गृह्येऽग्नौ विधिपूर्वकं आभ्यो देवताभ्यः । ब्राह्मणो होमंकुर्यात् ॥ ८४ ॥

अग्नेः सोमस्य चैवादौतयोश्चैव समस्तयोः ॥ विश्वेभ्यश्चैव देवेभ्योधन्वन्तरयएव च ॥ ८५ ॥

(१) मेधातिथिः । आदावित्यनुवादः । पाठक्रमेणैवाग्नेरादौसिद्धत्वात्ते पृथगाहुती । तयोश्च समस्तयोरग्नीषोमाभ्यामितिविश्वेभ्योदेवेभ्यइतिप्रयोगः । एकैवाहुतिर्धन्वन्तरये स्वाहा ॥ ८५ ॥

(२) सर्वज्ञनारायणः । समस्तयोरग्नीषोमयोः । अत्र च सर्वत्र चतुर्थ्यर्थेषष्ठ्यीनिर्देशे तु चतुर्थ्येव कार्या ॥ ८५ ॥

(३) कुल्लूकः । वचनद्वयंस्वाहाकारप्रदानहोमइति कात्यायनस्मरणादादावग्नये स्वाहा सोमाय स्वाहेति निरपेक्षदेवताकंहोमद्वयं कृत्वाग्नीषोमाभ्यांस्वाहेति समस्तदेवताकंहोमंकुर्यात्ततोविश्वेभ्योदेवेभ्योधन्वन्तरये ॥ ८५ ॥

(४) राघवानन्दः । अग्नेरित्यादिषष्ठी चतुर्थ्यर्थे । तयोरग्नीषोमयोः । स्वाहाकारप्रधानोहोमइति कात्यायनोक्तेरयंप्रयोगः । अग्नये स्वाहा एवं सोमायाग्नीषोमाभ्यांविश्वेभ्योदेवेभ्यःधन्वन्तरये ॥ ८५ ॥

(५) नन्दनः । अग्नेरग्नये सोमस्य सोमाय तयो स्समस्तयोरग्नीषोमाभ्यांविश्वेषांदेवानांविश्वेभ्योदेवेभ्यः ॥ ८५ ॥

(६) रामचन्द्रः । आदौ प्रथमतः । अग्नेः सोमस्याहुतिं जुहुयात् । अग्नयेस्वाहा १ सोमायस्वाहा २ अग्नीषोमाभ्यांस्वाहा ३ विश्वेषांचैवदेवानां विश्वेभ्योदेवेभ्यःस्वाहा ४ धन्वन्तरयएव च धन्वन्तरये स्वाहा ५ ॥ ८५ ॥

कुह्वै चैवानुमत्यै च प्रजापतयएव च ॥ सहद्यावापृथिव्योश्च तथा स्विष्टकृतेन्ततः ॥ ८६ ॥

(१) मेधातिथिः । सहद्यावापृथिव्योः द्यावापृथिवीभ्यांस्वाहेति । तथा स्विष्टकृतेऽन्ततः स्विष्टकृदितिगुणपदमग्निश्च गुणीस्मृत्यन्तरेऽग्नये स्विष्टकृतइतिवचनात्सर्वहोमेष्वेव चाम्नानात् । अन्ततइति पाठात्सिद्धे वचनंस्मृत्यन्तरेधिकारमाहुतीनामाम्नानात्सति समुच्चये प्राक्स्विष्टकृतआवापः कर्तव्यइतिदर्शयितुम् । ननु चैकत्वाद्धोमस्य देवताविकल्पोयुक्तः । कुतः पुनरेकत्वंहोमस्य । इयमेव होमानामुत्पत्तिः अग्नेःसोमस्यचेत्यादि । तत्र चोत्पत्तावेव देवताविशेषेणावरुद्धत्वाद्भिन्नाएव होमाः प्रतीयन्ते ॥ ८६ ॥

(२) सर्वज्ञनारायणः । सहएकाहुतिर्द्यावापृथिव्योः । स्विष्टकृतइत्यत्राग्नयइति प्रथमंविशेष्यपदंप्रक्षेप्यम् ॥ ८६ ॥

(३) कुल्लूकः । कुहा अनुमत्यै प्रजापतये द्यावापृथिवीभ्याममये स्विष्टकृतइत्येवंस्वाहाकारान्तान्होमान्कुर्यात् । श्रुत्यन्तरेष्वग्निविशेषणत्वेन स्विष्टकृतोविधानात्केवलंस्विष्टकृन्निर्देशेऽप्यग्निविशेषणत्वेनैव प्रयोगः । पाठादेवान्तत्वे सिद्धे स्विष्टकृतेऽन्ततइत्यभिधानंस्मृत्यन्तरीयहोमसमुच्चयेऽप्यन्तत्वज्ञापनार्थम् ॥ ८६ ॥

(४) राघवानन्दः । कुह्वै अनुमत्यै प्रजापतये द्यावापृथिवीभ्याममये स्विष्टकृते इतिपाठक्रमादेवान्तत्वेप्राप्ते अन्तपदंस्मृत्यन्तरहोमसमुच्चयेनस्विष्टकृतोन्तत्वख्यापनार्थम् । सहेति द्यावापृथिवीभ्यामेकप्रयोगसूचनार्थंबह्वृचेगृह्ये इन्द्राग्नीभ्यामित्यादिप्रयोग दर्शनात् ॥ ८६ ॥

(५) नन्दनः । सह द्यावापृथिव्योः समस्ताभ्यांद्यावापृथिवीभ्याम् ॥ ८६ ॥

(६) रामचन्द्रः । कुह्वै अमायै । स्वाहा ६। पौर्णमास्यैअनुमत्यै स्वाहा ७। प्रजापतयेस्वाहा ८। द्यावापृथिवीभ्यां स्वाहा ९। ततःस्विष्टकृते स्वाहा १०॥ ८६ ॥

एवंसम्यग्घविर्हुत्वा सर्वदिक्षु प्रदक्षिणम् ॥ इन्द्रान्तकाप्पतीन्दुभ्यः सानुगेभ्योबलिंहरेत् ॥ ८७॥

(१) मेधातिथिः । सम्यगनन्यचित्ततया देवताध्यानपरएवमेताभ्योदेवताभ्योऽग्नौ हुत्वा ततः सर्वासु दिक्षुयथासंख्यंप्रदक्षिणं प्रथमं प्राच्यांततोदक्षिणस्यांइत्येषप्रदक्षिणावर्तमिन्द्रःअन्तकः अप्पतिःइन्दुःप्रतिदिवसम् । अपरश्चाह अर्हविभागिन्दुरितियदि नैतेन शब्देन बलिहरणंस्यात्कथमिन्दोर्हविर्भाक्त्वम् बलिहरणंच होमएवेतिव्याख्यातम् । वृत्तभङ्गभयाच्चात्रन शब्दस्य रूप विवक्षेति स्मृत्यन्तरोपात्तैरेव शब्दैरुद्देशः कर्तव्यः । सानुगेभ्यः अनुगाअनुचरास्तत्पुरुषास्तथाचेन्द्रपुरुषेभ्यइत्या दिप्रयोगः ॥ ८७ ॥

(२) सर्वज्ञनारायणः । हविर्हविष्यम् । इन्द्रादीनांचतुर्णामध्येएकैकस्मै प्रदक्षिणं पूर्वाद्येकैकदिशि सानुगेभ्यः ॥ ८७ ॥

(३) कुल्लूकः । एवमुक्तप्रकारेण सम्यगनन्यचित्तोदेवताध्यानपरएव होमान्कृत्वा सर्वासु प्राच्यादिषु दिक्षु प्रदक्षिणमिन्द्रादिभ्यः सपुरुषेभ्योबलिंहरेत् । तथा प्राच्यामिन्द्रायनमः इन्द्रपुरुषेभ्योनमः । दक्षिणस्यां यमाय नमः यमपुरुषेभ्योनमः । पश्चिमायां वरुणाय नमः वरुणपुरुषेभ्योनमः । उत्तरस्यां सोमाय नमः सोमपुरुषेभ्योनमः । यद्यपि शब्दावगम्यत्वाद्देवतात्वस्यान्तकाप्पतीन्दुशब्दैरेवोद्देशोयुक्तस्तथापि बह्वृचानुष्ठानसंवादाद्बह्वृचगृह्ये च यमाय यमपुरुषेभ्यः वरुणायवरुणपुरुषेभ्यः सोमाय सोमपुरुषेभ्यइति प्रतिदिशमिति पाठाद्यथोक्तएव प्रयोगः ॥ ८७ ॥

(४) राघवानन्दः । किंच इन्द्रेति । इन्द्राय इन्द्रपुरुषेभ्यः प्राच्याम् । अन्तकोत्र यमः यमाय यमपुरुषेभ्यइति दक्षिणस्याम् । अप्पतिर्वरुणः । एवं वरुणाय वरुणपुरुषेभ्यइति पश्चिमायाम् । उत्तरस्यां सोमाय सोमपुरुषेभ्यइति पञ्चदशाहुतयः । शूद्रपक्षे नमोन्ताः । नमस्कारेण मन्त्रेण पञ्चयज्ञान्न हापयेदिति स्मरणात् ॥ ८७ ॥

(५) नन्दनः । इन्द्राय सानुगाय स्वाहेति पूर्वस्यांदिशि । अन्तकायसानुगायेतिदक्षिणस्याम् । अप्पतये सानुगायेतिप्रतीच्याम् । इन्दवेसानुगायेत्युत्तरस्यामिति । सर्वदिक्षु प्रदक्षिणक्रमेण बलिंहरेत्कुर्यात् ॥ ८७ ॥

(६) रामचन्द्रः । एवंप्रकारेण सम्यक् हुत्वा बहिर्मण्डलात्बहिरेतन्मण्डलंसर्वदिक्षु प्रदक्षिणंमण्डलंकुर्यात् । इन्द्राय स्वाहा इन्द्रपुरुषाय स्वाहा इतिपूर्वे । अन्तकाय स्वाहा यमपुरुषाय स्वाहा इतिदक्षिणे । अप्पतये वरुणाय स्वाहा वरुणपुरुषाय स्वाहा इतिपश्चिमे । इन्दवे स्वाहा इन्दुपुरुषाय स्वाहा इतिउत्तरे । बलिंहरेतद्द्यात् ॥ ८७ ॥

मरुद्भ्यइति तु द्वारि क्षिपेदप्स्वद्भ्यइत्यपि ॥ वनस्पतिभ्यइत्येवंमुसलोलूखले हरेत् ॥ ८८ ॥

(१) मेधातिथिः । अत्रेतिकरणःस्वरूपविवक्षार्थः । अप्स्वित्यधिकरणम् । अद्भ्यइतिदेवतानिर्देशः । वनस्पतिभ्यइतिमुसलोलूखले । द्वन्द्वैकवद्भावेन विकल्पितमाधारद्वयम् । निर्देशगुणवृत्त्या प्रधानभूततायाआहुतेरावृत्तिर्युक्ता । न च मुसलोलूखलस्यैकीकृतस्याहुतिसंबन्धः शक्यःकर्तुंपृथक्त्वस्य तत्राप्युपलम्भात् । नहिक्षीरोदकवदनयोर्व्यामिश्रणसंभवः । तत्र यद्युलूखले क्रियते न तत्र होमः कृतः । अथोलूखलेन मुसलेन च भागशआहुतिः संभवति नियतपरिमाणत्वात् । द्वन्द्वनिर्देशोऽत्रसंयुक्तयोरन्यतरत्र होमोयुक्तः ॥ ८८ ॥

(२)सर्वज्ञनारायणः । द्वारि गृहद्वारि । अप्स्वपस्थापनस्थाने मुसलोलूखले मुसलउलूखलंनिधाय तत्रेत्यर्थः॥ ८८॥

(३) कुल्लूकः । इतिशब्दःस्वरूपविवक्षार्थः । मरुद्भ्योनमइति द्वारे बलिंदद्याज्जलेऽद्भ्यइति । मुसलोलूखलइति । द्वन्द्वनिर्देशात्सहयुक्तयोरन्यतरत्र वनस्पतिभ्यइति बलिंदद्यात् गुणानुरोधेन प्रधानबलिकर्मावृत्तेरन्याय्यात्वात् ॥ ८८ ॥

(४) राघवानन्दः । मुसलोलूखलइति द्वन्द्वनिर्देशाद्वनस्पतीनामेकंस्थानम् ॥ ८८ ॥

(५) नन्दनः । द्वारि गृहद्वारे । अप्सूदधानीसमीपे । मुसलोलूखले । मुसलोलूखलस्थानइत्यर्थः ॥ ८८ ॥

(६) रामचन्द्रः । द्वारिमण्डलद्वारि मरुद्भ्यःस्वाहाइति । करणंशब्दरूपविवक्षार्थं । अप्सुउदकस्थापनस्थाने अद्भ्यःस्वाहावनस्पतिभ्यःस्वाहा मुसलोलूखलेहरेत् । स्थापयेदितिकेचित् ॥ ८८ ॥

उच्छीर्षके श्रियै कुर्याद्भद्रकाल्यै च पादतः ॥ ब्रह्मवास्तोष्पतिभ्यां तु वास्तुमध्ये बलिंहरेत् ॥ ८९ ॥

(१) मेधातिथिः । उच्छीर्षकंप्रसिद्धदेवताशरणंशीर्षस्थानंतत्र श्रियै बलिंकुर्यात् । पादतः अधोभागे । गृहस्यभद्रकाल्यै । तस्याअपि स्थानंद्वारस्य पूर्वभागे । अन्यउच्छीर्षकंगृहशयनस्य शिरोभागमाहुः पादौचास्याधोभागम् । तेन खट्वादावयंहोमोभूप्रदेशे वा । गृहस्थशयनस्थाने ब्रह्मवास्तोष्पतिभ्यांसत्यपि द्वन्द्वनिर्देशे पृथगेतेआहुतीब्रह्मणेवास्तोष्पतयइति । यत्र तूभयदेवतात्वमग्नीषोमवत्तत्र सहग्रहणंसमस्तग्रहणंवाकरोति । तयोश्चैव समस्तयोः सहद्यावापृथिव्योश्चेतिअप्रसिद्धसाहचर्यात् । वास्तुगृहंतन्मध्ये ॥ ८९ ॥

(२) सर्वज्ञनारायणः । उच्छीर्षके शय्यादेशस्य शिरस्थाने । एवंपादतः । ब्रह्मवास्तोष्पतिभ्यांमिलिताभ्याम् ॥ ८९ ॥

(३) कुल्लूकः वास्तुपुरुषस्य शिरःप्रदेशउत्तरपूर्वस्यांदिशि श्रियैबलिंदद्यात् । तस्यैव पाददेशे दक्षिणपश्चिमायांदिशि भद्रकाल्यै । अन्येतु उच्छीर्षकंगृहस्थशयनस्य शिरः स्थानभूभागंपादतइति तस्यैव चरणभूप्रदेशमाहुः । ब्रह्मणे वास्तोष्पतयइतिगृहमध्ये । द्वन्द्वनिर्देशेपिब्रह्म वास्तोष्पत्योः पृथगेवदेवतात्वम् । यत्र द्वन्द्वे मिलितस्य देवतात्वमपेक्षितंतत्र सहादिशब्दंकरोति यथा सहद्यावापृथव्योश्चेति ॥ ८९ ॥

(४) राघवानन्दः । उच्छीर्षके वास्तुपुरुषस्य शिरःप्रदेशे उत्तरपूर्वस्यांदिशि । पादतइति नैर्ऋत्यां । गृहस्थशयनस्य शिरःपादयोरित्यपरं तत्तुच्छं । शयनस्यानियतत्वात् उत्तरत्रवास्तुश्रवणात् । ब्रह्मणे वास्तोष्पतये च ॥ ८९ ॥

(५) नन्दनः । उच्छीर्षकेशिरउपधानस्थाने । पादतः पादोपधानस्थाने । ब्रह्मवास्तोष्पतिभ्यांब्रह्मणेवास्तोष्पतयइति सहेतिवचनाभावात् । वास्तुमध्ये गृहमध्ये ॥ ८९ ॥

(६) रामचन्द्रः । उच्छीर्षके शय्याप्रदेशमस्तकस्थाने पूर्वे श्रियै स्वाहाकुर्यात् । तु पुनःपादतःपश्चिमतो

भद्रकाल्यै जुहुयात् । ब्रह्मवास्तोष्पतिभ्यां ब्रह्मजज्ञानमिति वास्तोष्पतेरिति द्वाभ्यांवास्तुमण्डलमध्ये स्वाहाबलिंहरेद्द्यात् ॥ ८९ ॥

विश्वेभ्यश्चैव देवेभ्योबलिमाकाशउत्क्षिपेत् ॥ दिवाचरेभ्योभूतेभ्योनक्तंचारिभ्यएव च ॥ ९० ॥

(१) **मेधातिथिः** । चशब्दादेकैवेयमाहुतिः । विश्वेभ्यांदेवेभ्यइतिगृहाकाशे गृहान्निष्क्रम्य वा । दिवादिवाचारिभ्योनक्तंनक्तंचारिभ्यः । भूतेभ्यइत्यनुषज्यते । केचिदेतेआहुती सायंप्रातर्विभागेनाहुर्दिवाचारिभ्यइतितदयुक्तम् । सायमममन्त्रहोमंवक्ष्यति । एतेन मन्त्रप्रतिषेधेन शब्दोद्देश्यता माभून्मानसस्तूद्देशः केननिवार्यते । नच तेन विना होमासिद्धिः । एतदेव तु वक्तव्यंकुतोऽयंविभागावगमोगृह्यकारैरेवेतिचेदस्तु ॥ ९० ॥

(२) **सर्वज्ञनारायणः** । विश्वेषांदेवानांभूमावेव । दिवाचारिभ्योदिवा नक्तंचारिभ्योनक्तं बलिमाकाशमुत्क्षिपेदित्यन्वयः ॥ ९० ॥

(३) **कुल्लूकः** । विश्वेभ्यश्चैव देवेभ्यइति शब्दादेकेयमाहुतिः । विश्वेभ्योदेवेभ्योनमइति गृहाकाशेबलिंदद्यात् । दिवाचरेभ्योभूतेभ्यइति दिवा नक्तंचारिभ्यइति नक्तम् । बह्वृचगृह्यदर्शनादियंव्यवस्था ॥ ९० ॥

(४) **राघवानन्दः** । आकाशे अन्तरिक्षे । क्षिपेदूर्ध्वंक्षिपेत् ॥ ९० ॥

(५) **नन्दनः** । दिवाचरेभ्योदिवा नक्तंचारिभ्योनक्तम् ॥ ९० ॥

(६) **रामचन्द्रः** । विश्वेभ्योदेवेभ्यआकाशऊर्ध्वंबलिंक्षिपेत् । तथादिवाचरादीनामूर्ध्वंबलिंक्षिपेत् ॥ ९० ॥

पृष्ठवास्तुनि कुर्वीत बलिंसर्वात्मभूतये ॥ पितृभ्योबलिशेषंतु सर्वंदक्षिणतोहरेत् ॥ ९१ ॥

(१) **मेधातिथिः** । पूर्वयोराहुत्योःशेषोऽयम् । आधारविधानार्थमाद्योऽर्धश्लोकः आवासकस्योपरिय आवासस्तत्पृष्ठवास्तु एकशालायाअप्युपरिभागः । तत्रबलिंकुर्वीत दिवाचारिभ्योनक्तंचारिभ्यश्च । सर्वान्न भूतये तादर्थ्येचतुर्थी न संप्रदाने होमाद्यश्रुतत्वाद्बलिशब्दस्य पूर्वशेषत्वादाधारापेक्षत्वाच्च पूर्वयोराहुत्योः । नक्वचिदपि वैश्वदेवे सर्वान्नभूतिर्देवतात्वेन स्मृत्यन्तरेश्रुतातस्मादयमस्यार्थः । सर्वेषामन्नानांभूत्यर्थमेतच्चकर्तव्यमेतस्मिन्बलिहरणे कृते सर्वाण्यन्नानि भवन्ति । अवयवप्रसिद्ध्यात्वर्थावगमउपपद्यमाने समुदायार्थकल्पनमयुक्तम् । देवतापेक्षया वा दृष्टः कश्चिदर्थः कल्पयितव्यः । बलिशेषं शेषग्रहणात्पात्रे समुद्धृत्य ततोहोमः कर्तव्यः । नतुस्थालीस्थादेव बलिदानानि ग्रहीतव्यानि । दक्षिणतः दक्षिणस्यांदिशि तदभिमुखइतियावत् । सर्वं यावन्मन्त्रगृहीतम् ॥ ९१ ॥

(२) **सर्वज्ञनारायणः** । सर्वानुभूतिरुपश्रुतिस्तस्यै पृष्ठेवास्तुनि गृहवास्तुपृष्ठभागे । सर्वान्नभूतय इति क्वचित्पाठस्तत्र तत्पदवाच्यैव देवता ॥ ९१ ॥

(३) **कुल्लूकः** । गृहस्योपरियद्गृहंतत्पृष्ठवास्तुबलिंदातुः पृष्ठदेशे भूभागे वा तत्र सर्वात्मभूतये नमइत्येवबलिंदद्यात् । उक्तबलिदानावशिष्टंसर्वमन्नंदक्षिणस्यांदिशि दक्षिणामुखःस्वधापितृभ्यइति बलिंहरेत् । प्राचीनावीतिना चायंबलिर्देयः स्वधापितृभ्यइति प्राचीनावीतीशेषंदक्षिणामुखोनिनयेदिति बह्वृचगृह्यवचनात् ॥ ९१ ॥

(४) **राघवानन्दः** । पृष्ठवास्तुनि वायव्यकोणे सएव वास्तोःपृष्ठदेशः । गृहस्योपरि यदुच्चंतस्मिन्निति केचित् ।

---

(९१) बलिंसर्वात्मभूतये=बलिंसर्वान्नभूतये (ज, झ, ढ मेधा०)

सर्वात्मभूतयेस्वाहेति शेषंसर्वमन्नंपितृभ्यःस्वधेति प्राचीनावीती हरेत् दद्यात्। शेषंदक्षिणानिनयेदिति बह्वृचगृह्योक्तेः। तथैव दिशि दक्षिणस्याम् ॥ ९१ ॥

(५) नन्दनः। पृष्ठवास्तुनि बहिर्वास्त्विवत्यर्थः। सर्वात्मभूतये सर्वभूततृप्त्यर्थम् ॥ ९१ ॥

(६) रामचन्द्रः। पृष्ठे गृहपृष्ठेभागे। तादर्थ्येचतुर्थी न संप्रदाने। सर्वान्नभूतयेऐश्वर्याय बलिंकुर्वीत। बलिशेषंपितृभ्यःसर्वंदक्षिणतोहरेत् कुर्यात् ॥ ९१ ॥

शुनांच पतितानांच श्वपचां पापरोगिणाम् ॥ वायसानांकृमीणांच शनकैर्निर्वपेद्भुवि ॥ ९२॥

(१) मेधातिथिः। अन्नंपात्रे समुद्धृत्य। श्वादीनामुपकाराय भुवि निःक्षिपेत्। पापरोगिणः कुष्ठिक्षय्यामयाव्यादयः। वयांसि पक्षिणः। शनकैर्भूम्युत्थितरजसायथा नसंसृज्यते। भूग्रहणंन पात्रप्रतिषेधाय किंतर्हि श्वपचपतितकुष्ठिभ्योन हस्ते दातव्यम्। उपकारविधानंचेदम्। अतएव षष्ठ्याऽयंश्लोकः। पठ्यते न चतुर्थ्यन्तेन पक्षिणांतादृग्देशे विधातव्यंयत्राबिभ्यतः श्वादयः खादन्ति। कृमीणामितितादृशे यत्र तेषांसंभवः ॥ ९२ ॥

(२) सर्वज्ञनारायणः। एतच्चवैश्वदेवार्थोद्धृतादन्नादन्येन तच्छेषस्य सर्वस्य पितृभ्यःप्रतिपादितत्वात्। तत्कालेच श्वादीनामन्नार्थिनामागमनएवशनैर्भुविदानम्। पतिताः पातकिनः प्रायश्चित्तीयभैक्षाचरणकर्तारः। श्वपचामिति चाण्डालादिसंकरजात्युपलक्षणम् ॥ पापरोगिणः कुष्ठ्यादयः। कृमीणां पिपीलिकादीनां शनकैर्यथानोपघातोभवेत् ॥ ९२ ॥

(३) कुल्लूकः। अन्यदन्नंपात्रेसमुद्धृत्य श्वपतितादिभ्यः शनकैर्यथा रजसा नसंगृह्यते तथा भुवि दद्यात्। पापरोगीकुष्ठीक्षयरोगीवा ॥ ९२ ॥

(४) राघवानन्दः। अन्नान्तरमादाय पापरोगिणां कुष्ठक्षयादियुक्तानां। निर्वपेत् दद्यात्। ग्रन्थान्तरस्वरसाच्चतुर्दशबलीनामेव नित्यत्वम् ॥ ९२ ॥

(५) नन्दनः। शुनांश्वभ्यः। एवमुत्तरत्रापि। शनकैरशिथिलमित्यर्थः ॥ ९२ ॥

(६) रामचन्द्रः। श्वादीनांशनकैर्भुवि निक्षिपेत् ॥ ९२ ॥

एवं यः सर्वभूतानि ब्राह्मणोनित्यमर्चति ॥ सगच्छति परंस्थानंतेजोमूर्तिपथर्जुना ॥ ९३ ॥

(१) मेधातिथिः। पूर्वस्योपसंहारः। सर्वग्रहणादन्येषामपिमृगकुक्कुटमार्जारादीनांग्रामेसंभवतामन्नेनोपकर्तव्यम्। अर्चतिरनुग्रहे न पूजायां श्वादीनां तदसंभवात्। अवज्ञानप्रतिषेधार्थंचैव मुपात्तंनानुगृण्हातीति पठितम्। परंस्थानंधाम ब्रह्मप्राप्तिः। पथर्जुना न संसारयोनीर्बह्वीर्भ्राम्यति। किंपुनरेतत्फलविधानं नेतिब्रूमः। नित्योऽयंविधिरित्युक्तम्। नित्येचफलश्रवणमर्थवादः। नह्यत्रविधिःश्रूयते। गच्छतीतिवर्तमानापदेशोऽयम्। तेजोमूर्तिः केवलंतजःशरीरः न पाञ्चभौतिकंशरीरमभिसंबध्यते बोधस्वभावएव भवति निष्कल्मषता वानेन लक्ष्यते शुद्धप्रकृतिर्भवतीत्यर्थः। भूतानुकम्पनंचेदम्। असति शास्त्रातिक्रमे पापसंबन्धस्याभावाच्छुद्धता युक्ता। इतरथा पापस्य मलरूपत्वान्न तेजोमूर्तिः। असति च पापे परंधामश्रेष्ठमदुःखरूपंप्राप्नोतीत्येवंयुक्तमेव ॥ ९३ ॥

(२) सर्वज्ञनारायणः। परस्थानं ब्रह्मलोकं। तेजोमूर्तिर्हिरण्यगर्भदेहः। ऋजुना पथा अर्चिरादिमार्गेण ॥ ९३ ॥

(३) कुल्लूकः। एवमुक्तप्रकारेण यः सर्वभूतान्यन्नदानादिना नित्यंपूजयति सपरंस्थानंब्रह्मात्मकंतेजोमूर्तिप्रका-

---

(९३) तजो मूर्ति=तेजोमूर्तिः (मे०)

शमवक्रेण वर्त्मनार्चिरादिमार्गेण प्राप्नोति ब्रह्मणि लीयते इत्यर्थः । ज्ञानकर्मभ्यांमोक्षप्राप्तेः । तेजोमूर्तिरिरिति सविसर्गपाठे प्रकृष्टब्रह्मबोधस्वभावोभूत्वेतिव्याख्या ॥ ९३ ॥

(४) **राघवानन्दः** । सार्थवादंबलिमुपसंहरति एवमिति । परंभुवर्लोकात् ऋजुना अवक्रेण । उत्तरमार्गेणेति केचित् । तन्न विद्याकर्मसाध्यत्वात्तस्य । किंतुधूममार्गेणात्र संवत्सराप्रवेशादृजुत्वंस्तुतिः । अथयइमे ग्रामे इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवन्ति । तथाकर्मणां पितृलोके न तत्र दक्षिणायनिनो विद्वांसस्तपस्विनइत्यादि श्रुतेर्विरोधः । ब्राह्मणइत्युपलक्षणमन्येषाम् । यद्वा ब्राह्मणो ब्रह्मबुभूषुःनित्यकर्मणा शुद्धिद्वारा चातुर्वर्ण्यमोक्षहेतुत्वात् । तथाऋजुनेति भूतार्थवादः ॥ ९३ ॥

(५) **नन्दनः** । बलिहरणफलमाह एवमिति । ब्राह्मणःद्विजः ॥ ९३ ॥

(६) **रामचन्द्रः** । एवंयो ब्राह्मणःसर्वभूतानि नित्यमर्चयति पूजयति सतेजोमूर्तिःसन् ऋजुना यथा अर्चिरादिमार्गेण परंस्थानंधाम गच्छति ॥ ९३ ॥

कृत्वैतद्बलिकर्मैवमतिथिंपूर्वमाशयेत् ॥ भिक्षांच भिक्षवे दद्याद्विधिवद्ब्रह्मचारिणे ॥ ९४ ॥

(१) **मेधातिथिः** । अतिथिलक्षणंवक्ष्यति । तमभ्यागतंसन्तंपूर्वमाशयेद्भोजयेत् । सर्वभोक्तृभ्योगृहसंनिहितेभ्यःभिक्षांभिक्षवे च याचमानाय दद्यात् । भिक्षाशब्देन स्वल्पपरिमाणमन्नदानमुच्यते । उक्तंहि प्रसृतिर्भिक्षा अन्तःपुरप्रसिद्धंचैतत् । ब्रह्मचारिणे विधिवत् अन्यस्माअपि पाखण्डादिरूपाय भिक्षवेनविधिवद्दातव्या । ब्रह्मचारिणे तु विधिवत्स्वस्तिवाचनपूर्वभिक्षादानमित्येषविधिः अथवा भिक्षुः परिव्राड्ब्रह्मचारी प्रथमाश्रमी चशब्दश्चास्थाने वृत्तानुरोधात् ब्रह्मचारिणेचेति पठितव्यम् । एवंतु वानप्रस्थाय न दानंस्यात् । तस्माद्भिक्षइतिभिक्षुस्तस्यैवविशेषणंब्रह्मचारिग्रहणम् । तेन त्रिभ्योऽप्याश्रमिभ्योभिक्षादानंनियमतोऽनुज्ञातंभवति । पाखण्डादीनांतु पतितादिवत्सर्वग्रहणेन भिक्षोपकारोयथाशक्तिविहितएव ॥ ९४ ॥

(२) **सर्वज्ञनारायणः** । पूर्वमात्मनः । भिक्षवेयतये ॥ ९४ ॥

(३) **कुल्लूकः** । एवमुक्तप्रकारेणै तद्बलिकर्म कृत्वा गृहभोक्तृभ्यः पूर्वमतिथिंभोजयेत् । भिक्षवे परिव्राजे ब्रह्मचारिणे प्रथमाश्रमिणे च विधिवत्स्वस्तिवाच्यभिक्षादानमप्पूर्व्वमिति गौतमाद्युक्तविधिना भिक्षांदद्यात् । ग्रासप्रमाणा च भिक्षा भवति ग्रासमात्रा भवेद्भिक्षेति शातातपवचनात् । सम्भवेत्वधिकमपि देयम् ॥ ९४ ॥

(४) **राघवानन्दः** । अधुना बलिमनुवदन् नृयज्ञविधेः कालमाह कृत्वेति । पूर्वंस्वभोजनात् ब्रह्मचारी गृही वानप्रस्थोभिक्षुरिति स्मरणात् भिक्षुः सन्यासी तस्मै ब्रह्मचारिणे च विधिवत् ग्रासमात्राभवेद्भिक्षेति शातातपोक्तेस्तत्परिमाणदानस्यावश्यकत्वात् ॥ ९४ ॥

(५) **नन्दनः** । अथ मनुष्ययज्ञंप्रपञ्चयति कृत्वैतदिति । विधिवत्स्वस्तिवाचयित्वेत्यर्थः ॥ ९४ ॥

यत्पुण्यफलमाप्नोति गांदत्वा विधिवद्गुरोः ॥ तत्पुण्यफलमाप्नोति भिक्षांदत्वा द्विजोगृही ॥ ९५ ॥

(१) **मेधातिथिः** । नित्यंभक्तदानमर्थिने शक्तितोदातव्यम् । इदंत्वधिकारान्तरम् । यद्गुरवे गांदत्वा फलमाप्नोति तद्भिक्षांदत्वा गोव्रतस्याविशिष्टमिति । स्मृत्यन्तरे सर्वफलता पापप्रमोचनार्थताऽपि गोदानस्य श्रुता यावतामल्पोपकाराणां

---

(९५) वद्गुरो=वदगोः (नंदनः)

महोपकारैः फलसाम्यमुच्यते तेषांलोकवत्परिमाणतः फलविशेषोऽवगन्तव्यःप्राप्यतेतदेवफलम् । नतुचिरकालमावाभ्यो-ह्ययंन्यायः । पणलभ्यंहि तत्प्राज्ञः क्रीणाति दशभिः पणैरितिसमानफलत्वेमहाप्रयासानर्थक्यंप्राप्नोति । अगुर्यथाविधी-तिकेचित्पठन्ति । तत्रनअल्पवचनोद्रष्टव्योऽल्पगुरिति पुण्यंधर्मस्तस्यफलम् ॥ ९५ ॥

(२) सर्वज्ञनारायणः । पुण्यरूपफलंपुण्यफलं ॥ ९५ ॥

(३) कुल्लूकः । गुरवे गांदत्वा विधिवत्स्वर्णशृङ्गिकादिविधानेन यत्फलंप्राप्नोति तद्गृहस्थोविधिना भिक्षादानात्प्रा-प्नोति ॥ ९५ ॥

(४) राघवानन्दः । भिक्षादाने अतिशयफलमाह यदिति । द्विजइति त्रैवर्णिकः । तेषां पक्वान्नस्य ग्राह्यत्वात् ।९५

(५) नन्दनः । अगोः गोहीनाय ॥ ९५ ॥

भिक्षामप्युदपात्रंवा सत्कृत्य विधिपूर्वकम् ॥ वेदतत्त्वार्थविदुषे ब्राह्मणायोपपादयेत् ॥९६॥

(१) मेधातिथिः । अथविधिवदित्युक्तंसोऽयंविधिरुच्यते । अप्रकृतस्योदपात्रस्यश्रवणंसर्वदानॄणांन भिक्षादान-स्यैवेतिदर्शयितुम् । सत्कृत्य पूजयित्वा । विधिः पूर्वोयस्य दानस्य तद्विधिपूर्वकम् । पूर्वशब्दः कारणवचनः । शास्त्रनि-मित्तकमेतदित्यर्थः । इतिकर्तव्यतावाविधिःसापूर्वंकर्तव्या । वेदस्यतत्त्वार्थः पारमार्थिकोनिःसंशयोऽर्थस्तंवेत्ति तस्मै ब्रा-ह्मणायोपपादयेद्दद्यात् । ब्राह्मणायेतिजातिनियमः । विदुषइतिगुणनियमः । तेन यत्किंचिद्दातव्यंतद्ब्राह्मणाय तस्मै च वेदार्थविदे पूजापूर्वकमित्यर्थः ॥ ९६ ॥

(२) सर्वज्ञनारायणः । वेदस्य तत्वार्थोवास्तवार्थोब्रह्म तद्विदुषे ॥ ९६ ॥

(३) कुल्लूकः । प्रचुरान्नाभावे ग्रासप्रमाणांभिक्षामपिव्यञ्जनादिना सत्कृत्य तदभावे जलपूर्णपात्रमपि फलपुष्पा-दिना सत्कृत्य तत्त्वतोवेदतदर्थज्ञानवते ब्राह्मणाय स्वस्तिवाच्येत्यादिविधिपूर्वकंदद्यात् ॥ ९६ ॥

(४) राघवानन्दः । विशिष्टपात्रे तस्यावश्यकत्वमाह भिक्षामिति । सत्कृत्य पञ्चग्रासाभावे ग्रासमात्रमपि व्यञ्जनैः संस्कृत्य देयम् । तदभावे उदकमात्रंवा फलादिभिः सत्कृत्य वेदतत्वार्थविदुषे वेदस्य तत्वार्थोबाधाप्रतियोगि ब्रह्म तद्विदे । तदुक्तम् । एकोपि ब्रह्मविद्भुङ्क्ते जगत्तर्पयतेखिलम् । तस्माद्ब्रह्मविदे देयंयदस्ति वसु किंचनेति ॥ ९६ ॥

(५) नन्दनः । अनुकल्पमाह भिक्षामिति ॥ ९६ ॥

(६) रामचन्द्रः । उपपादयेत् अयाचितंदद्यात् ॥ ९६ ॥

नश्यन्ति हव्यकव्यानि नराणामविजानताम् ॥ भस्मीभूतेषु विप्रेषु मोहाद्दत्तानि दातृभिः॥९७॥

(१) मेधातिथिः । पूर्वेण यादृशे देयंतत्पात्रमुक्तम् । अनेनापात्रे ददतः प्रतिषेधः । नश्यन्ति निष्फलानि भव-न्ति हव्यानि देवतोद्देशेन यानि ब्राह्मणभोजनादीनि क्रियन्ते । पित्र्यकर्माङ्गभूतान्यन्यानि कव्यानि श्राद्धानि भस्मभूतेषु-भस्मतांप्राप्ताभस्मभूता । उपमाने वा भूतशब्दः भस्मानीव यथाकाष्ठभूतइति । किंपुनर्भस्मनासाम्यंयथा तन्नकचिदुपयु-ज्यतेऽवकररूपमपोह्यमेवमीदृशोब्राह्मणः क्रियाभ्योऽपोहितव्यइति तात्पर्यार्थः । नराणामविजानतांनश्यन्तीतिसंबन्धः । मोहाद्दत्तानि दातृभिः । अविजानतांमोहादितिचानुवादः । यच्छास्त्रेणापोहितंतन्मोहादेव क्रियते ॥ ९७ ॥

(९७) भस्मीभूते=भस्मभूते (मे०)

(२) सर्वज्ञनारायणः। हव्यं देवार्थमन्नं कव्यं पित्रर्थं। अविजानतां पात्रगुणदोषौ। भस्मभूतेषु प्रकाशगुणशक्तिशून्येषु। मोहात् भ्रमात् ॥ ९७ ॥

(३) कुल्लूकः। मोहाद्यत्पात्रानभिज्ञतया देवपित्रुद्देशेनान्नानि वेदाध्ययनतदर्थज्ञानानुष्ठानतेजःशून्यतया भस्मरूपेष्विव पात्रेषु दत्तानि दातृभिर्निष्फलानि भवन्ति ॥ ९७ ॥

(४) राघवानन्दः। विद्वत्प्रशंसार्थमन्यनिन्दामाह नश्यन्तीति। फलमदत्वा नश्यन्ति। अविजानतां पात्रमिति शेषः। भस्मीभूतेषु वेदतदर्थज्ञानशून्यतया तादृशफलाजनकत्वान्निन्दामात्रम्। अतादृशेष्वपिदेयम् अन्यथा अन्नस्य क्षुधितंपात्रमिति वचनविरोधः ॥ ९७ ॥

(५) नन्दनः। अविजानतांदातॄणांहव्यकव्यानि नश्यन्ति। भस्मीभूतेषु निस्तेजस्केषु ॥ ९७ ॥

(६) रामचन्द्रः। अविजानतांमूर्खाणांनराणां मोहात् दातृभिर्दानशीलैर्दत्तानि भस्मीभूतेषु विप्रेषु वेदाध्ययनतदर्थज्ञानरहितेषु भस्मतुल्येषु विप्रेषु दत्तानि हव्यकव्यानि विनश्यन्ति ॥ ९७ ॥

विद्यातपःसमृद्धेषु हुतंविप्रमुखाग्निषु ॥ निस्तारयति दुर्गाच्च महतश्चैव किल्बिषात् ॥ ९८ ॥

[अनर्हते यद्ददाति न ददाति यदर्हते ॥ अर्हानर्हापरिज्ञानाद्धनी धर्मान्नहीयते * ॥ १ ॥

काले न्यायागतंपात्रे विधिवत्प्रतिपादितम् ॥ ददाति परमंसौख्यमिहलोके परत्र च ॥ २ ॥

प्रतिग्रहेण शुद्धेन शस्त्रेण क्रयविक्रयात्॥ यथाक्रमंद्विजातीनांधनंन्यायादुपागतम् ॥३॥ ऽऽ]

(१) मेधातिथिः। कीदृशाः पुनरभस्मभूतास्तानाह। विद्यातपोभ्यांसमृद्धास्तद्व्यतिरिक्ता भस्मभूताः। समृद्धिरतिशयिनी संपत्तिः। बहुविद्यया महता च तपसा युक्ताएवमुच्यन्ते। समुदायसंबन्धिनी अपि विद्यातपसी संबन्धिसंबन्धादवयवभूतमुखैः सामानाधिकरण्यंप्रतिपद्येते। विप्राणांमुखान्यग्नयइत्यत्र व्याघ्रादेराकृतिगणत्वात्समासः। यथाग्नौहुतंफलवद्भस्मनिहुतंनिष्फलमेवमीदृशंभोजनंब्राह्मणमुखनिक्षिप्तंहुतमिति भोजनमेव स्तुत्योच्यते। यागहोमादि महाफलतयाप्रसिद्धम्। अतः प्रख्याततमगुणेनाप्रख्यातमुपमीयते। निस्तारयतिदुर्गात् दुर्गंव्याधिशत्रुराजपीडादि ततोनिस्तारयति रक्षति न तेन संस्पृश्यते। महतश्च पापात्परलोकेऽपि नरकादिगतेस्त्रायते। न केवलमाभ्युदयिककर्मैवैकपात्रविषयम्। प्रायश्चित्तार्थमपितद्गुणायैव दातव्यम् ॥ ९८ ॥

(२) सर्वज्ञनारायणः। विप्रेषु मुखानिविप्रमुख्यानितद्रूपेष्वग्निषु मुखशब्दोयंमुख्यार्थेपि पठ्यते। वक्त्रार्थत्वंतुतपःसमृद्धेष्वित्ययोगाद्धेयं। दुर्गात् इहलौकिकदुःखहेतोःपापात्। महतःकिल्बिषात् पारलौकिकदुःखहेतोः ॥ ९८ ॥

(३) कुल्लूकः। विद्यातपस्तेजःसंपन्नविप्राणांमुखानि होमाधिकरणत्वेनाग्नितया निरूपितानि हव्यकव्यादिप्रक्षिप्तमिहलोके दुस्तराद्व्याधिशत्रुराजपीडादिभयान्महतश्च पापादमुत्र नरकात्त्रायते ॥ ९८ ॥

(४) राघवानन्दः। तस्माद्विद्वत्सुदेयमिति निगमयति विद्येति विप्राणांमुखान्येवाहवनीयाद्यग्नयः। तेषु विप्रमुखाग्निषु परंपरया विद्यादियुक्तेषु हुतंतदुद्दिश्य दत्तमन्नादि तारयतीत्यन्वयः। दुर्गादापद्गणात् महतः। अन्नादे भ्रूणहा मार्ष्टीति वक्ष्यमाणत्वात् ॥ ९८ ॥

---

* धनी धर्मान्न=बलाद्धर्माच्च (ल) (ऽऽ) (क, ल)

(६) **रामचन्द्रः** । विप्रस्य मुखमेवाग्निस्तेषु विप्रमुखाग्निषु । कीदृशेषु मुखेषु विद्यातपोभिःसमृद्धेषु ॥ ९८ ॥

संप्राप्ताय त्वतिथये प्रदद्यादासनोदके ॥ अन्नंचैव यथाशक्ति सत्कृत्य विधिपूर्वकम् ॥ ९९ ॥

(१) **मेधातिथिः** । संप्राप्ताय स्वयमुपस्थिताय नतुनिमन्त्रिताय । नहिनिमन्त्रितोतिथिर्भवति । प्राप्तिदेशंच वक्ष्यति । भार्यायत्राग्नयोऽपिवेति । आसनोदके दद्यात् पादधावनोपयोगिप्रथममुदकंततआसनंभोजनंच । यथा शक्तिसंस्कृत्येत्यन्नविशेषणम् । सविशेषमन्नंसंस्कृत्य दद्याद्भोजयेत् । विधिपूर्वकं विधिः पूर्वोयस्मिन्दाने तदेव मुच्यते । विधिः शास्त्रंतत्पूर्वंनिमित्तंप्रमाणमित्यर्थः ॥ ९९ ॥

(२) **सर्वज्ञनारायणः** । उदकं पादप्रक्षालनार्थं । विधिपूर्वकं आपस्तम्बोक्तातिथ्यधर्मेण । तत्र ह्यग्निरिव ज्वलन्नतिथिरभ्यागच्छतीत्यादिना व्रीहियवान्यतरनिर्वापपाकादिरूपमातिथ्यमुक्तम् ॥ ९९ ॥

(३) **कुल्लूकः** । स्वयमागतायत्वतिथये आसनंपादप्रक्षालनाद्युदकंयथासम्भवंव्यञ्जनादिभिःसत्कृतंचान्नमासनावसथावित्यादिवक्ष्यमाणविधिपूर्वकंदद्यात् ॥ ९९ ॥

(४) **राघवानन्दः** । आतिथ्यस्य नित्यत्वमनुवदंस्तदकरणे प्रत्यवायमाह संप्राप्तायेति । संप्राप्ताय गृहमागताय ॥ ९९ ॥

(५) **नन्दनः** । अतिथिपूजाप्रकारमाह संप्राप्तायेति ॥ ९९ ॥

शिलानप्युञ्छतोनित्यंपञ्चाग्नीनपि जुह्वतः ॥ सर्वंसुकृतमादत्ते ब्राह्मणोनर्चितोवसन् ॥ १०० ॥

(१) **मेधातिथिः** । अत्यन्तदरिद्रस्याप्यतिथिपूजाव्यतिक्रमोन युक्तः । शिलान्केदारलवनशेषानुञ्छतउच्चिन्वतः- एतच्चवृत्तिसंकोचोपलक्षणार्थम् । पञ्चाग्नीनपि जुह्वतः अनेनशास्त्रानुष्ठानसंपन्नोऽत्यन्तदरिद्रश्च यद्यतिथिमागतंन पूजयत्यन्नदानादिना तदातदनुष्ठानंसवृत्तिसंयमोनिष्फलतामेति । ततश्चसर्वंसुकृतंपुण्यमादत्तेअतिथिर्गृण्हाति निष्फलीकुरुते । अनर्चितोवसन् तस्मादर्चयेदितिविध्यर्थः । वसन्नितिलिङ्गात्सायमागतेविधिरयम् । पञ्चाग्नयस्त्रेता गृह्यःसभ्यश्च । अथ कोऽयंसभ्योनामाग्निः । एवंह्याहुः ग्रामान्तरे प्रोषितस्य यत्र लौकिकपाकः क्रियते महासाधनस्य बहुवेश्मह्यु योगृहागारादेव शीतापनोदार्थंविन्हियते ससभ्यः । होमस्तर्हि तत्र कः यावता तस्मिन्गृह्यानोतिनियमः । अस्मादेव वचनात् वैश्वदेवहोमः प्रोषितस्य लौकिकेऽप्यस्तीति मन्यन्ते । व्रीहियवैः शुष्कधान्यैर्यत्रलेलिहानं सुसमिद्धंपश्येत्तत्राभिजुहुयादितिस्मृतिवचनमुदाहरन्ति । इहभवन्तस्त्वाहुः उपनिषत्सु पञ्चाग्निविद्योक्ता तत्र तेषांकल्पिताग्निरूपाणितद्रूपेण यदुपासनंयच्चवेदनंसहोमइति कल्प्यते सा हि सर्वश्रौतेभ्यः कर्मभ्योऽतिशयफलेप्यते एवंहि तत्राम्नायते स्तेनोहिरण्यस्य सुरांपिबंश्चगुरोस्तल्पमावसनब्रह्महाच तेपतन्ति चत्वारः संसर्गीच । पञ्चानामपि यत्फलं तदतिथावाराधितेऽविमुखीकृते नश्यतीतिप्रशंसातिशयेनावश्यकर्तव्यतांदर्शयति । यद्यपि प्रातराशेप्यतिथिभोजननियमः सायंतु तद्व्यतिक्रमेप्रायश्चित्ताधिक्यम् । यथाशक्तीतिपूर्वश्लोकेऽन्नविषयं येमन्यन्ते तएवमाहुर्यथाशक्त्यतिथयःपूजयितव्याएकोद्वौ बहवइति ॥ १०० ॥

(२) **सर्वज्ञनारायणः** । शिलान्सस्यमञ्जरीरुञ्छत आकृष्यगृण्हतइतिहि वृत्तिसंकोचेन तपश्चर्योक्ता । अतिथित्वेनागतोऽनर्चितोवसन्नन्यत्रापि ॥ १०० ॥

---

(९९) सत्कृत्य=संस्कृत्य (मे०) (१००) वसन्=व्रजन् (क, भ, ब,)

(३) कुल्लूकः । लूनकेदारशेषधान्यानि शिलस्तानपि उञ्छन्वतोवृत्तिसंयमान्वितस्य त्रेतावसथ्यःसभ्यश्चेतिपञ्चाग्न-यःसभ्योनामाग्निःशीतापनोदाद्यर्थंयस्तत्र प्रणीयते पञ्चस्वग्निषु होमंकुर्वाणस्य सर्ववृत्तिसंकोचोनपञ्चाग्निहोमार्जितपुण्यमन-र्चितोऽतिथिर्वसन्गृह्णाति । अनया च निन्दयातिथ्यनर्चनस्यनित्यतागम्यते ॥ १०० ॥

(४) राघवानन्दः । तत्रैवार्थवादमाह शिलामिति । केदारे अवशिष्टधान्यं शिला तान्युञ्छतः आधानं कुर्वतः । सभ्यावसथ्याहवनीयगार्हपत्यदक्षिणाग्निसंज्ञकान् पञ्चाग्नीन् जुह्वतस्तस्यसुकृतंयदुत्पन्नं तत्सर्वमादत्ते आत्मसात्करोति अनर्चितो वक्ष्यमाणतृणाद्यैरपि ॥ १०० ॥

(५) नन्दनः । अतिथिपूजामकुर्वतोनिन्दामाह शिलानपीति । व्रीहिकणिशानि शिलास्तानुञ्छत उपाददतः शि-लेन जीवतइत्यर्थः । अनेनैवं ज्ञायते शिलवृत्तित्वंपञ्चाग्नित्वंचप्रशस्ततरमिति ॥ १०० ॥

(६) रामचन्द्रः । शिलांशिलावृत्तिं उञ्छतःकुर्वतः । नित्यंपञ्चाग्नीन्जुह्वतःबलिवैश्वदेवादीन्कुर्वतः एतादृशस्य गृहे-अनर्चितःविप्रःरात्रौ वसन्सर्वंसुकृतं आदत्ते स्वीकुर्यात् ॥ १०० ॥

तृणानि भूमिरुदकंवाक्चतुर्थी च सूनृता ॥ एतान्यपि सतांगेहे नोच्छिद्यन्ते कदाचन ॥ १०१॥

(१) मेधातिथिः । यदि दारिद्र्यात्सायमन्नदानंन घटते तदा नैवंमन्तव्यंप्रधानमतिथेर्भोजनंतच्चमेनास्तीतिकिमनेन मद्गृहेप्रविष्टेनेति । यतोऽशक्तस्यतृणादिदानेनाप्यतिथिपूजाविधिः समुच्यते । अथवानायंविधिर्भोजनएवपर्यवस्यति । किंतर्हि निवसतः शयनादि दातव्यम् । तृणग्रहणंसंस्तरोपलक्षणार्थम् । भूमिरासनशयनविहारस्थानम् । सूनृतवाक्-प्रियहितवचनंकथाप्रस्तावादि वा । एतान्यप्यन्नाभावे सतामागतस्यातिथेर्नोच्छिद्यन्ते किंतु दीयन्ते सर्वकालम् ॥ १०१ ॥

(२) सर्वज्ञनारायणः । तृणानि शयनार्थानि भूमिस्तदास्तरणार्था । सूनृता प्रिया वाक् । नोच्छिद्यन्ते ननदीयन्ते ॥ १०१ ॥

(३) कुल्लूकः । अन्नासंभवे पुनस्तृणविश्रामभूमिपादप्रक्षालनाद्यर्थजलप्रियवचनान्यपि धार्मिकगृहेष्वतिथ्यर्थंन कदाचिदुच्छिद्यन्ते । अवश्यंदेयानीति विधीयते । तृणग्रहणंशयनीयोपलक्षणार्थम् ॥ १०१ ॥

(४) राघवानन्दः । अन्नदानाशक्तौ प्रतिनिधितया प्रकारान्तरमाह तृणानीति । सूनृतेतिविशेषणादन्नसंपत्तौ मिथ्या विनयोन कार्यः । नोच्छिद्यन्ते प्रायशोगृहे नविनाभावीनीत्यर्थः ॥ १०१ ॥

(५) नन्दनः । मुख्यकल्पाभावेऽतिथिरनुकल्पेनाप्यर्चनीयइत्यभिप्रायेणाह तृणानीति । तृणान्यासनाभावे भू-मिः शयनाभावे । उदकंपादाभ्यञ्जनाभावे । सूनृता कल्याणी वागन्नाभावे ॥ १०१ ॥

एकरात्रंतु निवसन्नतिथिर्ब्राह्मणः स्मृतः ॥ अनित्यंहि स्थितोयस्मात्तस्मादतिथिरुच्यते ॥ १०२॥

(१) मेधातिथिः । नातिप्रसिद्धोलोकेतिथिशब्दार्थइति तदर्थलक्षणमाह । एकरात्रंवसतःपरगृहेऽतिथित्वम् । तच्च ब्राह्मणस्य नजात्यन्तरेद्वितीयेन्हि पूजाविधौ कामचारोऽभ्युदयविशेषार्थिनस्तदधिकारोननैयमिकः । तथाचापस्तम्बः एकरात्रिंवासयेत्पार्थिवांल्लोकानभिजयतिद्वितीयामान्तरिक्षांस्तृतीयांदिव्यानितिफलकामस्य द्वितीयादिरात्रिष्वधिकारंदर्श-यति । अत्रैव निर्वचनंदार्ढ्यार्थमाह । अनित्यंहि स्थितिःतिष्ठतेरतिपूर्वस्यायंशब्दः । औणादिकेःकथंचिद्व्युत्पत्तिः ॥ १०२ ॥

---

* चोन=च (अ)

(२) **सर्वज्ञनारायणः**। तद्ग्रामे द्वितीयदिनवासे तस्य नातिथित्वमित्यर्थः । अनित्यंस्थितइत्यत्रार्थेऽतिथि-पदंनिपात्यतइत्यर्थः ॥ १०२ ॥

(३) **कुल्लूकः**। अप्रसिद्धत्वादतिथिलक्षणमाह एकेति। एकरात्रमेव परगृहे निवसन्ब्राह्मणोतिथिर्भवति। अनि-त्यावस्थानान्नविद्यते द्वितीयातिथिरस्येतिअतिथिरुच्यते ॥ १०२ ॥

(४) **राघवानन्दः**। उक्तातिथेर्लक्षणमाह एकरात्रमिति । एकरात्रिमभिव्याप्य वसन्ब्राह्मणएवातिथिः वासाय-न विद्यते द्वितीया तिथिर्यस्येति सोऽतिथिः। सर्वत्र ब्राह्मणपदग्रहणात् क्षत्रियादयो नातिथयः ॥ १०२ ॥

(५) **नन्दनः** । कालतोऽतिथिनियममाह एकेति । एकरात्रंवसन्नपि ब्राह्मणश्चेदतिथिर्न क्षत्रियादिः। अत्रहेतु-मतिथिशब्दनिर्वचनेनाह । अनित्यशब्दादकारमिकारंतकारंचादायस्थितशब्दात्थकारमिकारंचादायसन्निवेश्यातिथिरित्यु-च्यते ॥ १०२ ॥

नैकग्रामीणमतिथिंविप्रंसांगतिकंतथा ॥ उपस्थितंगृहे विद्याद्भार्या यत्राग्नयोऽपि वा॥ १०३॥

(१) **मेधातिथिः**। एकस्मिन्ग्रामे योवसतिवैश्वदेवकालोपस्थितोनातिथिः सांगतिकःसहाध्यायी। सख्युरन्यस्त-स्यह्युत्तरत्र विधिर्भविष्यति वैश्यशूद्रौसखाचेति। योऽपि सर्वेण संगच्छते विचित्रपरिहासकथादिभिः सांगतिकशब्देनयुक्तः प्रतिषेद्धुंप्रागदृष्टपूर्वोऽपि नच गृहस्थस्य प्रोषितस्यास्य सर्वलक्षणलक्षितोऽप्यतिथिः। किंतर्हिउपस्थितंगृहे विद्यात् यत्र-स्यानित्यंस्थानम्। यदुच्यते प्रोषितस्यापि भार्यायत्राग्नयश्च। तत्रासंनिहितस्यापि गृहस्थस्य भवत्येवातिथिः। अतो-यथासंविधायाग्निहोत्रदर्शपूर्णमासादिषु प्रवसति तद्वदतिथयेऽपिसंविधातव्यम । वाशब्दात्त्वेवंप्रतीयते भार्याग्निभिःसह यदा प्रवासस्तदाभवत्येव ग्रामान्तरस्थस्याप्यतिथिः । असंनिहितस्यापि गृहे भार्याग्निषु सत्सु ततश्च यदि भार्यया सह प्रवसेदग्नयश्च गृहएवभवेयुस्तदा नातिथिपूजानियमइति । वाशब्दउपस्थितंगृहेविद्यादित्येतदपेक्षया न परस्परापेक्षया-भार्यामाग्नीनाम् ॥ १०३ ॥

(२) **सर्वज्ञनारायणः**। एकग्रामीणमेकग्रामे चिरनिवासिनम्। सांगतिकं संगतिः संबन्धः तत्पुरस्कारेणागत-म्। तथा यत्र यस्य प्रवासिनोपि भार्या अग्नयोवा सह गच्छन्ति तदन्यतमं स्वे गृहउपस्थितमागतमप्यतिथिं न विद्या न्नातिथिधर्मेणार्चयेत्। अग्नयोपिवेति वचनादभार्यस्याप्यग्नयः संभवन्तीति गम्यते। श्रूयते च श्रुतावपत्नीकोप्यग्निहो-त्रमाहरेदिति ॥ १०३ ॥

(३) **कुल्लूकः**। एकग्रामनिवासिनंलोकेषु विचित्रपरिहासकथादिभिःसंगत्या वृत्त्यर्थिनंभार्याग्नियुक्तोगृहे वैश्वदेव-कालोपस्थितमपि नातिथिंविद्यात्। एतेन भार्याग्निरहितस्य प्रवासिनोनातिथित्वमिति बोधितम् ॥ १०३ ॥

(४) **राघवानन्दः** । तत्रैव व्यतिरेकमाह नैकेति। विप्रमप्येकग्रामवासिनं । सांगतिकं विचित्रविद्येतिहा-सकथाभिः संगत्या प्रत्यर्थिनं । भार्याग्नियुक्ते गृहेउपस्थितमतिथिंविद्यात्। अतएव भार्याग्निविरहितस्य नातिथ्यका-र्यतावश्यकेति गतिस्थानकल्पोवा तेन भार्यायाःसत्वमावश्यकम् ॥ १०३ ॥

---

१ युक्तो=युक्त (अ)

२ मिति=रि (अ)

(५) **नन्दनः** । देशतोऽतिथिनियममाह नैकेति । अतिथिलक्षणयुक्तमप्येकग्रामवासिनंतथासांगतिकंसंगतेन चरन्तं क्वचिदतिथित्वेन संगतपूर्वमितियावत्तंनातिथिंविद्यात् । यत्र स्वकीयेपरकीयेवा गृहे भार्याग्नयोऽपि सन्ति तत्रोपस्थितमतिथिंविद्यात् नान्यंविप्रोषिताग्निभार्यस्याभ्याशमागतम् ॥ १०३ ॥

(६) **रामचन्द्रः** । एकग्रामीणंविप्रंगृहउपस्थितंवैश्वदेवसमये प्राप्तमतिथिं न विद्यात्तथा सांगतिकंसहाध्यायीच चित्रकथाभिःसहसंगच्छते तमतिथिं न विद्यात् । गृहमागतमपीत्यर्थः यत्र भार्या वाऽग्नयोऽपिवा वर्तन्ते तत्रागतम् ॥ १०३ ॥

उपासते ये गृहस्थाः परपाकमबुद्धयः ॥ तेन ते प्रेत्य पशुतांव्रजन्त्यन्नादिदायिनाम् ॥ १०४ ॥

[परपाकान्नपुष्टस्य सततंगृहमेधिनः ॥ दत्तमिष्टंतपोऽधीतंयस्यान्नंतस्य तद्भवेत् ॥ १ ॥] ऽऽ

(१) **मेधातिथिः** । उपासनंतदभ्यासः । योब्राह्मणोऽनयैव बुद्ध्या तत्रतत्रोपतिष्ठेत यथातिथिरवश्यंभोजनंलभेत तस्येयंनिन्दा । यस्तच्छीलः परस्यसंबन्धिनंपाकमन्नमुपास्ते न तु कदाचित्तेन कर्मणा प्रेत्य पशुतांबलीवर्दादिजातिंव्रजति प्राप्नोति । अन्नादिदायिनस्तद्गृहे दन्तितांगर्दभतामश्वतांवाप्राप्नोति । गृहस्थस्यैषदोषोत्पन्नस्थालीपाकस्य ॥ १०४ ॥

(२) **सर्वज्ञनारायणः** । उपासते आमन्त्रणं विनाऽतिथिधर्मेण ॥ १०४ ॥

(३) **कुल्लूकः** । अतिथिप्रकरणादातिथ्यलोभेन ये गृहस्थाःग्रामान्तराणिगत्वा परान्नंसेवन्ते ते निषिद्धपरान्नदोषानभिज्ञाः । तेन परान्नभोजनेन जन्मान्तरेअन्नादिदायिनांपशुतांव्रजन्ति । तस्मादिदं न कुर्यादिति निषेधःकल्प्यते॥१०४

(४) **राघवानन्दः** । गृहस्थोभूत्वा आतिथ्यलोभेनातिथिर्न स्यादित्याह उपासतइति । उपासनं तात्पर्येण प्रवृत्तिः । अबुद्धयः पशुत्वप्राप्तिमविद्वांसः । दातारः श्लाघ्याइत्याह पशुतामित्यादि । तेनातिथ्यलोभमात्रेण ॥ १०४ ॥

(५) **नन्दनः** । इदानीमतिथिप्रसङ्गाद्गृहस्थानामतिथिरूपेण परपाकभोजनप्रतिषेधार्थंनिन्दार्थवादमाह उपासतइति । उपासते परपाकंपरेषांपक्वान्नम् । तेन परपाकोपासनेन । तस्मात्परपाकभोजनप्रसक्तिर्न कार्येति ॥ १०४ ॥

(६) **रामचन्द्रः** । उपासते तेन कारणेन अन्नाद्यदातॄणां ते प्रेत्य पशुतांगर्दभतांव्रजन्ति ॥ १०४ ॥

[परपाकेति । इष्टंयागादि दत्तंदानं अधीतंवेदाध्ययनं । एतजन्यपुण्यंयस्यान्नंभक्षयति]

अप्रणोद्योतिथिः सायं सूर्योढोगृहमेधिना ॥ काले प्राप्तस्त्वकाले वा नास्यानश्नन्गृहे वसेत् ॥ १०५ ॥

(१) **मेधातिथिः** । सायंकालोऽस्तमयादिप्रदोषांतस्तस्यांवेलायामतिथिरागतोऽप्रणोद्यःअप्रत्याख्येयोभोजनशयनासनादिभिःप्रतिपूज्यः । केन गृहमेधिना मेधोयज्ञः गृहमेधोमहायज्ञानामियमाख्या तत्राधिकारी गृहमेधी गृहस्थइति यावत् । सूर्योढइत्यर्थवादः । सूर्येणोढः प्रापितः दैवोपनीतत्वादवश्यंपूजार्हकाले द्वितीयेवैश्वदेवकालेवा सायंभोजने निवृत्तेऽपि नास्य गृहस्थस्यानश्नन्गृहे वसेत् । यदि शेषमस्तितन्निवेदनीयं न चेद्वि पाकः कर्तव्यः ॥ १०५ ॥

(२) **सर्वज्ञनारायणः** । अप्रणोद्योऽनिराकार्यः । सूर्येणोढोयद्देहमधिष्ठाय सूर्यश्चरति ससूर्योढः । सच सायंआगच्छति सभवति । अतएव श्रुतावेषहवै सएकातिथिरित्येकशब्देन सूर्यपराम्रष्टस्यैकातिथित्वं तस्योक्का तस्मादाहुर्न

(ऽऽ) अ, ख, ञ, ट, ड, ढ, ल) रामचन्द्रेणव्याख्यातश्च

सायमतिथिमपनुधेत्युपसंहृतं। तत्काले अतिथिबाहुल्याभावादेकातिथित्वम्। गृहधर्मएव मेधोयज्ञोस्येति गृहमेधी गृहस्थः। काले वैश्वदेवान्ते ॥ १०५ ॥

(३) **कुल्लूकः**। सूर्येऽस्तमिते गृहस्थेनातिथिर्न प्रत्याख्येयः। सूर्येणोढः प्रापितोरात्रौ स्वगृहगमनाशक्तेः। द्वितीयवैश्वदेवकाले प्राप्तोऽकाले वा सायंभोजने निवृत्तेऽपि नास्य गृहेऽतिथिरनश्नन्वसेदवश्यमस्मै भोजनंदेयम्। प्रत्याख्यानेप्रायश्चित्तगौरवार्थोऽयमारम्भः। अतएव विष्णुपुराणे दिवा तिथौ तु विमुखे गते यत्पातकंनृप। तदेवाष्टगुणंप्रोक्तंसूर्योढे विमुखे गते। गोविन्दराजस्तुप्रतिषिद्धातिथिप्रतिप्रसवार्थत्वमस्याह ॥ १०५ ॥

(४) **राघवानन्दः**। अतिथिमनुवदंस्तस्यापरिहार्यकालमाह अप्रणोद्यइति। अप्रणोद्यः अप्रत्याख्येयः। यतः सूर्योढः। अस्तंगच्छता सूर्येण प्रापितः। अतोविप्रकृष्टस्वगृहे गमनाशक्तोनानदन्वसेदित्याह कालेति। अकाले सायंभोजननिवृत्तौ। कालइवाकालेपि नानदन्वसेदिति वा ॥ १०५ ॥

(५) **नन्दनः**। सायन्तनातिथिर्विशेषेण नोपेक्षणीयइत्याह अप्रणोद्यइति। सूर्योढः सूर्येण प्रापितोऽस्तंगच्छतासूर्येण देशान्तरगमनाशक्तिमापाद्य प्रापितइत्यर्थः। गृहमेधाः पञ्चमहायज्ञास्तद्वान्गृहमेधी तेन। अप्रणोद्योऽप्रेषणीयः। काले वैश्वदेवानन्तरकाले। अकाले। वैश्वदेवात्पूर्वस्मिन्काले स्वभोजनादुत्तरस्मिंश्च काले ॥१०५॥

(६) **रामचन्द्रः**। कीदृशोतिथिः। सूर्योढः देहमधिष्ठायसूर्यश्चरति ससूर्योढः। सूर्येणानीतइत्यर्थः। गृहमेधिना गृहस्थेन गृहमेधोमहायज्ञःतेन गृहस्थेन कालेद्वितीयवैश्वदेवकाले प्राप्तः। अकाले वा सायंभोजनाभावे प्राप्तः। अनश्नन्नसन्नस्य गृहस्थस्य गृहे न वसेत् ॥ १०५ ॥

न वै स्वयंतदश्नीयादतिथियन्न भोजयेत् ॥ धन्यं यशस्यमायुष्यंस्वर्ग्यंवातिथिपूजनम् ॥१०६॥

(१) **मेधातिथिः**। सूपघृतदधिशर्करादियदुत्कृष्टमन्नंतत्स्वयंनाश्नीयादतिथौसंनिहितेयावत्तस्मैनदत्तम्। यत्तुयवागूरसकटुकादितदनिच्छते नदेयम्। तादृशमदत्तमश्नतोन दोषः। सर्वथा न संस्कृतमन्नंस्वयंभोक्तव्यं कदन्नमतिथिर्न भोजनीयइत्येवंपरमेतत्। धनाय हितंधनस्य निमित्तंचेतिधन्यम्। एवंयशस्यादयः शब्दाः। अर्थवादोऽयंनित्यत्वादतिथिभोजनस्य सति संनिधानेऽतिथेः पूर्वशेषत्वाच्च। स्तुतित्वेनान्वये संभवति नाधिकरणान्तरकल्पना युक्ता ॥ १०६ ॥

(२) **सर्वज्ञनारायणः**। धन्यंधनहेतुः ॥ १०६ ॥

(३) **कुल्लूकः**। यद्घृतदध्याद्युत्कृष्टमतिथिर्न प्रत्याचष्टेतत्तस्मा अदत्वा न स्वयंभोक्तव्यम्। धनाय हितं धनस्य निमित्तंवा धन्यम्। एवंयशस्यादयोऽपि शब्दाः। अतिथिभोजनफलकथनमिदम्। न चानावश्यकतापत्तिः। सर्वसुकृतमादत्तइत्यादिदोषश्रवणात् ॥ १०६ ॥

(४) **राघवानन्दः**। आतिथ्यस्य फलवादमनुवदंस्तत्कर्तुर्नियमंसार्थवादमाह नेति। तन्मधुरादि। धन्यं धनाय हितं। एवमुत्तरत्र धन्यादि चतुष्टयस्य महाफलत्वेनाव्याजेनातिथ्यंकार्यमिति भावः ॥ १०६ ॥

(५) **नन्दनः**। नियमान्तरमाह वाइति। अतिथिपूजनंस्वभोज्येन कृतम् ॥ १०६ ॥

---

(१०६) वा=चा (अ)

पूजनम्=भोजनम् (ल, ब, न, भ, र)

(६) रामचन्द्रः । तदैश्वर्ये स्वयंनाश्नीयात् । ततःकियदन्नमतिथिंन भोजयेत् । आतिथिभोजनस्य फलमाह । अतिथिभोजनं यशस्यं आयुष्यं स्वर्ग्यं भवति ॥ १०६ ॥

आसनावसथौ शय्यामनुव्रज्यामुपासनम् ॥ उत्तमेषूत्तमंकुर्याद्धीने हीनं समे समम् ॥ १०७ ॥

(१) मेधातिथिः । बहुष्वतिथिषुयुगपदुपस्थितेष्वितरेतरंसमहीनज्यायस्त्वासनादिप्रकल्पनंगुणापेक्षंन विशेषेण । आसनंबृस्यादि । आवसथंविश्रामभूमिः । शय्याखट्वादि । अनुव्रज्या गच्छतोऽनुगमनम् । उपासनंतत्समीपे कथाप्रस्तावेन संनिधानम् एतदुत्तमेषूत्तमम् । दूरमनुव्रज्यतउत्तमःनातिदूरंमध्यमः कतिचिदित्पदानि हीनः ॥ १०७ ॥

(२) सर्वज्ञनारायणः । उपासनं तत्समीपउपवेशनम् । हीनेति मन्दगुणे । समे नात्युत्कृष्टापकृष्टगुणे समंनात्युत्कृष्टापकृष्टम् ॥ १०७ ॥

(३) कुल्लूकः । आसनंपीठंचर्म वा । आवसथोविश्रामस्थानम् । शय्या खट्वादि । अनुव्रज्या गच्छतोऽनुगमनम् । उपासना परिचर्या । एतत्सर्वंबहुष्वतिथिषु युगपदुपस्थितेष्वितरेतरापेक्षयोत्कृष्टापकृष्टमध्यमंकुर्यात् । न पुनः सर्वेषांसमम् ॥ १०७ ॥

(४) राघवानन्दः । तत्रैव प्रकारभेदमाह आसनेति । आवसथोत्र गृहं । आतिथ्यस्य ब्राह्मणेष्वेव नियमनात् गुणादिनोत्तमादि नियमः ॥ १०७ ॥

(५) नन्दनः । अतिथीनांतारतम्येन पूजातारतम्यंकर्तव्यमित्याह आसनेति । उत्तमेऽतिथावुत्तमंहीनत्वंत्वापेक्षया ॥ १०७ ॥

(६) रामचन्द्रः । अतिथिसेवामाह आसनेति। आसनावसथौ आसनंचआवसथंगृहंच शय्यांच पुनरनुव्रजनं । एतदतिथेः उपासनंपूजनंकुर्यात् । हीनेहीनंकुर्यात् । समे समंकुर्यात ॥ १०७ ॥

वैश्वदेवे तु निर्वृत्ते यद्यन्योऽतिथिराव्रजेत् ॥ तस्याप्यन्नंयथाशक्ति प्रदद्यान्न बलिं हरेत् ॥ १०८ ॥

(१) मेधातिथिः । सर्वार्थमन्नंवैश्वदेवशब्देनोच्यते । तस्मिन्निष्पन्ने भुक्तवत्सु सर्वेषु निःशेषितेऽन्ने यद्यन्योऽतिथिरागच्छेत्तस्मैदद्यात्पुनःपक्वान्नंनतुतस्मात्पाकबलिं हरेत् । अग्नावपि होमोनेष्यते न केवलं बलिहरणम् यतः सायंप्रातःपाकेहोमोबलिहरणम् । नचान्तरालिके । तथाचवक्ष्यति सायंत्वन्नस्येति । एवंच यद्यप्यसकृदह्नः पचेत्तथापि न प्रतिपाकंवैश्वदेवमावर्तेत । यथाशक्ति संस्कारविशेषेणेतरथा वा ॥ १०८ ॥

(२) सर्वज्ञनारायणः । वैश्वदेवे होममात्रे । अन्योद्वितीयोपि । अन्नंबल्यर्थोपक्रममपिन बलिंहरेदन्नान्तराभावे एतेन मनुष्ययज्ञस्य भूतयज्ञापेक्षयाऽभ्यर्हिततोक्ता ॥ १०८ ॥

(३) कुल्लूकः । अन्यशब्दनिर्देशाददतिथिभोजनपर्यन्तंवैश्वदेवे कृते यद्यपरो तिथिरागच्छेत्तदा तदर्थंपुनः पाकंकृत्वा तस्यान्नंदद्यात् । बलिहरणंततोनात्रकुर्यात् । बलिनिषेधादन्नसंस्काराभावोवैश्वदेवस्यावगम्यते । अन्नसंस्कारपक्षे कथमसंस्कृतान्नभोजनमनुजानीयात् ॥ १०८ ॥

(४) राघवानन्दः । अकालइत्युक्तंतत्र कथंतन्नोपवासस्तत्राह वैश्वदेवेत्विति । वैश्वदेवपूर्वकंदम्पत्योर्भोजने निवृत्तेइति ज्ञेयम् । अन्यथा तदन्नेनातिथिभोजने स्वार्थएव पाकःस्यादतएव स्वपाकसंस्कारार्थोवैश्वदेवोनात्ममात्रसंस्कारार्थः । यथाशक्ति पक्का ॥ १०८ ॥

(५) **नन्दनः** । वैश्वदेवे निर्वृत्ते सिद्धेऽग्नौ यस्मिन्नन्नैवैश्वदेवहोमादिकंकृतं तस्मिन्निःशेषंभुक्तइत्यर्थः । अन्नंपुनःसाधितम् । पुनः साधितस्यान्नस्य संस्कारार्थं नबलिंहरेत् ॥ १०८ ॥

(६) **रामचन्द्रः** । पाकंकृत्वान्नंदद्यात् । पुनर्बलिंहरेत् । वैश्वदेवं न कुर्यात् ॥ १०८ ॥

न भोजनार्थं स्वे विप्रः कुलगोत्रे निवेदयेत् ॥ भोजनार्थंहि ते शंसन्वान्ताशीत्युच्यते बुधैः ॥ १०९ ॥

(१) **मेधातिथिः** । प्रासङ्गिकोऽतिथेरयमुपदेशः । भोजनार्थ्येतत्कुलीनोऽमुष्य पुत्रोऽस्मीतिननिवेदयेन्नकथयेत् । स्वे कुलगोत्रे आत्मीयंकुलंपितृपितामहाद्यभिजनोगोत्रंगर्गभार्गवादिनामधेयंवा । गोत्रस्खलितंनामान्तरविवक्षायांयन्नामान्तरमुदाह्रियते तदुच्यते । अध्ययनमपि स्मृत्यन्तरप्रतिषिद्धंतदपि न निवेद्यम् । अस्यार्थवादः भोजनार्थंभोजनं लिप्से प्रख्यातकुलजातित्वादित्यनेनार्थेन हेतुना कुलगोत्रेशंसन्वान्ताशी वान्तमुद्गीर्णमश्नातिनिगिरतीत्येवमुच्यते बुधैः ॥ १०९ ॥

(२) **सर्वज्ञनारायणः** । कुलंतद्विशिष्टदेशस्थानोत्पन्नत्वं । भोजनार्थइति पुनरभिधानं धनार्थमभिधाने दोषाभावज्ञापनार्थम् वान्ताशी वान्ताशन प्रायश्चित्तार्हत्वात् ॥ १०९ ॥

(३) **कुल्लूकः** । भोजनलाभार्थंब्राह्मणः स्वकुलगोत्रे न निवेदयेत् । यस्माद्भोजनार्थंतेकथयन्नुद्गीर्णाशीति पण्डितैः कथ्यते ॥ १०९ ॥

(४) **राघवानन्दः** । आतिथ्यभोक्तुर्नियममाह नेति । स्वे स्वकीये । तत्कृतौ निन्दामाह भोजनार्थमिति । ते कुलगोत्रे निवेदयित्वा वान्तभक्षणतुल्यपापीस्यादिति भावः ॥ १०९ ॥

(५) **नन्दनः** । अतिथिंप्रत्याह नभोजनार्थमिति । विप्रोऽतिथिभूतः । वान्ताशी सहि कुलगोत्रे । उद्गीर्णान्नमश्नाति ॥ १०९ ॥

(६) **रामचन्द्रः** । विप्रःस्वे स्वकीये कुलगोत्रे भोजनार्थंवा स्वप्रशंसांन निवेदयेत् । ते कुलगोत्रे भोजनार्थंप्रशंसन्बुधैर्वान्ताशीत्युच्यते ॥ १०९ ॥

न ब्राह्मणस्य त्वतिथिर्गृहे राजन्यउच्यते ॥ वैश्यशूद्रौ सखा चैव ज्ञातयोगुरुरेव च ॥ ११० ॥

(१) **मेधातिथिः** । क्षत्रियोब्राह्मणस्याध्वनीनोऽपि प्रथमभोजनकालउपस्थितोऽपि नातिथिः । अतोन तस्मै नियमतोदेयम् । एवंवैश्यशूद्राभ्यामपि । सखिज्ञातीआत्मसमे नातिथी । गुरुः प्रभुवदुपचर्यः निवेद्य वचनात्क्रियत्युक्तम् ॥ ११० ॥

(२) **सर्वज्ञनारायणः** । ब्राह्मणस्यनातिथिः । सवर्णानांतु भवन्त्येव सखामित्रं । ज्ञातयः संबंधिनः । गुरुः पिता ॥ ११० ॥

(३) **कुल्लूकः** । ब्राह्मणस्य क्षत्रियादयोऽतिथयोन भवन्ति । क्षत्रियादीनांब्राह्मणस्योत्कृष्टजातित्वान्मित्रज्ञातीनामात्मसंबन्धाद्गुरोःप्रभुत्वात् । अनेनैव न्यायेन क्षत्रियस्योत्कृष्टोब्राह्मणः सजातीयश्च क्षत्रियोऽतिथिःस्यान्नापकृष्टौ वैश्यशूद्रौ । एवंवैश्यस्यापि द्विजातयोऽतिथयोन शूद्रः ॥ ११० ॥

(४) **राघवानन्दः** । अतिथिर्ब्राह्मणइत्युक्तं तद्यतिरेकं प्रासङ्गिकमनुवदति नब्राह्मणस्येति । गृहइति विशेषणादरण्ये सर्वे अतिथयः अनन्यशरणत्वात् ॥ ११० ॥

(५) नन्दनः । इदानीमतिथ्यपवादमाह नब्राह्मणस्येति । तुशब्दोऽत्रावधारणार्थः । ब्राह्मणस्यैवातिथयोराजन्यवैश्यशूद्राः । क्षत्रियादीनांतु वर्णोत्कृष्टाः सवर्णश्चातिथयोभवन्त्येव । सखाचातिथिर्ज्ञातयोगुरुश्च ॥ ११० ॥

(६) रामचन्द्रः । ब्राह्मणस्य गृहे राजन्योऽतिथिर्नोच्यते च पुनर्वैश्यशूद्रौ सखा च गुरुरपि एते अतिथयो-न ॥ ११० ॥

यदि त्वतिथिधर्मेण क्षत्रियोगृहमाव्रजेत् ॥ भुक्तवत्सुच विप्रेषु कामंतमपि भोजयेत् ॥ १११ ॥

(१) मेधातिथिः । तत्रातिथेर्धर्मःक्षीणपथ्योदनत्वंपरग्रामवासोभोजनकालोपस्थानम् । तादृशेन रूपेण यदि क्षत्रियोगृहमागतोभवति तदा तमपि भोजयेत् । भोजनवचनादन्या परिचर्या निवर्तते । प्रियहितवचनंत्वविशेषेण गृहाभ्यागतस्यविहितम् । अयंच तस्य भोजनकालः भुक्तवत्सु विप्रेषु ब्राह्मणेष्वतिथिषु वा गृहसंनिहितेषु प्रथमंभोजिषु ततःसभोजयितव्यः । काममिति नियमाभावमाह । काम्योऽयंविधिर्न नित्यइत्यर्थः । कामश्चानिर्दिष्टः विशेषफलेषु स्वर्गः । यदिवा-धन्यंयशस्यमित्याद्यत्र संबन्धनीयम् ॥ १११ ॥

(२) सर्वज्ञनारायणः । अतिथिधर्मेण वैश्वदेवान्ते । काममिच्छया न त्ववश्यम् ॥ १११ ॥

(३) कुल्लूकः । यदि ग्रामान्तरागतत्वादतिथिकालोपस्थितत्वादतिथिधर्मेण क्षत्रियोविप्रगृहमागच्छेत्तदा विप्रगृहोपस्थितविप्रेषु कृतभोजनेषु स्थितेष्विच्छातस्तमपि भोजयेत् ॥ १११ ॥

(४) राघवानन्दः । तद्धर्मेण क्षत्रियाद्युपस्थितौ का गतिस्तेषु संभवप्रकारमाह यदीतित्रिभिः । अतिथिधर्मेणेति युक्तार्थे तृतीया । एकरात्रमित्यादिविशेषणविशिष्टः । कामं यथेष्टम् ॥ १११ ॥

(५) नन्दनः । राजन्यादिष्वतिथिधर्मेणागतेषु कर्तव्यंश्लोकद्वयेनाह यदित्विति । अतिथिधर्मोऽदृष्टपूर्वत्वम् । ।ममितिवचनादनावश्यकता सूचिता ॥ १११ ॥

(६) रामचन्द्रः । अतिथित्वेनातिथिलक्षणधर्मेण यदा क्षत्रियःक्षीणवृत्तिःपरग्रामवासः गृहआव्रजेदागच्छेत् । विप्रेषु भुक्तवत्सु कामंतंक्षत्रियमपि पश्चाद्भोजयेत ॥ १११ ॥

वैश्यशूद्रावपि प्राप्तौ कुटुम्बेतिथिधर्मिणौ ॥ भोजयेत्सह भृत्यैस्तावानृशंस्यंप्रयोजयन् ॥ ११२ ॥

(१) मेधातिथिः । अतिथेर्धर्मोतिथिधर्मः । सययोरस्ति तावतिथिधर्मिणौ । अतिथिधर्मश्च प्राग्व्याख्यातः । कुटुम्बंगृहंतत्र प्राप्तावागतौ वैश्यशूद्रावपि भोजयेत् । क्षत्रियवत्तयोस्तु भोजनकालःक्षत्रियकालात्परेण यतआह भोजयेत्सहभृत्यैस्तौ । भृत्याअत्र दासाउच्यन्ते । तेषांच भोजनकालोभुक्तवत्स्वतिथिज्ञातिबान्धवेषु सर्वेष्ववर्वाग्दम्पतिभ्याम् । सहशब्दएककालतामात्रलक्षणार्थः । आनृशंस्यंकारुण्यमनुकम्पांप्रयोजयन्प्रमाणीकुर्वन्नाश्रयन्नितियावत् । अनेन पूज्यतांवारयति अनुग्राह्योह्यनुकम्प्योन पूज्यः । अनुकम्प्येषु यदि च शक्यतेऽनुग्रहःकर्तुंततः क्रियतेऽभ्युदयार्थिना नत्वकरणादतिथेरतिक्रमः । एतदुक्तंभवति यादृशोऽतिथिभोजनादुत्कृष्टोधर्मोऽनुकम्पानुग्रहान्न तादृशस्ततोनिकृष्टः ॥ ११२ ॥

(२) सर्वज्ञनारायणः । कुटुम्बे कुटुम्बवतिगृहे न तु प्रवासे । भृत्यैर्भृत्यद्वारा भोजयेत् सह तुल्योपचारौ । क्षत्रियेत्वधिकोपचारार्थंपृथगुक्तिः । आनृशंस्यमहिंस्रतां । करुणांप्रयोजनं चातिथ्यतिक्रमदोषभयात् ॥ ११२ ॥

---

(१११) भुक्तवत्सुच=भुक्तवत्सूक्त (अ)

(३) **कुल्लूकः** । यदि वैश्यशूद्रावपि ब्राह्मणस्य कुटुम्बे गृहे ग्रामाद्ग्रामान्तरादागतत्वादतिथिधर्मशालिनौ तदा तावपि क्षत्रियभोजनकालात्परतोदम्पतीभोजनात्पूर्वंदासभोजनकालेऽनुकम्पामाश्रयन्भोजयेत् ॥ ११२ ॥

(४) **राघवानन्दः** । कुटुम्बे गृहे । आनृशंस्यं दीयतामिति कार्पण्यं प्रकटयन् ॥ ११२ ॥

(५) **नन्दनः** । कुटुम्बेभार्यायाम् । सहभृत्यैःस्वभृत्यैःसह भोजनकालइत्यर्थः । आनृशंस्यंप्रकल्पयन् अनृशंस्यार्थ मनुकम्पार्थमितियावत् ॥ ११२ ॥

(६) **रामचन्द्रः** । अपि निश्चयेन वैश्यशूद्रौ चेत्प्राप्तौ कुटुम्बे गृहे अतिथिधर्मिणौ तौ वैश्यशूद्रौ भोजनकाले स्वभृत्यैःसह भोजयेत् ॥ ११२ ॥

इतरानपि सख्यादीन्संप्रीत्या गृहमागतान् ॥ प्रकृत्यान्नंयथाशक्ति भोजयेत्सह भार्यया ॥ ११३ ॥

(१) **मेधातिथिः** । सखामित्रंसआदिर्येषाम् । आदिशब्दः प्रकारे ज्ञातिबन्धुसंगतसहाध्यायिप्रभृतीन्गृह्णातिगुरुवर्जम् संप्रीत्यागतान् अतिथेर्धर्मस्य प्रकृतत्वान्निषेधार्थंसंप्रीतिग्रहणम् । तान्भोजयेत् । प्रकृत्य प्रकर्षेणान्नंकृत्वासंस्कृत्य । यथाशक्तीतिउपलक्षणार्थःशक्तिशब्दः । यावतीशक्तिर्यादृशंचयोऽर्हति तमुद्दिश्य तादृशएवसंस्कारः कर्तव्यः । भार्यया सह योभोक्तृभोजनकालःसएव भार्यायाअपि पृथक्तस्याभोजनकालस्याभावात् । एवंह्युक्तम्अवशिष्टंतुदम्पतीइति । महाभारते पत्युरूर्ध्वंभार्यायाभोजनंदर्शितंद्रौपदीसत्यभामासंवादे द्रौपद्या स्त्रीधर्मान्कथयन्त्योक्तं सर्वेषु पतिषु भुक्तवत्सु शेषान्नमश्नामि । पतिशेषान्नभोजनंस्त्रीणांधर्मः । तस्मान्न भार्याभोजनकाले सख्यादीनांभोजनंविधीयते । नाप्येकपात्राशनंसहार्थः किंतर्हि नैकाकिनस्तेभोजयितव्याः अपितु भार्याऽपि तत्र भुञ्जीत । ततश्चावशिष्टंतुदम्पतीतितदत्र बाध्यते । यदि कश्चिदभ्यर्हितः प्रतीक्षकःस्यादन्योवा न भुञ्जीत तदाभार्यातद्देशेभुञ्जीत । एवंसौहार्दंप्रकाशितंभविष्यति ॥ ११३ ॥

(२) **सर्वज्ञनारायणः** । सख्यादीन्पूर्वोक्तांत्सत्कृत्य संस्कृत्य भार्यया परिवेषणकर्त्र्या ॥ ११३ ॥

(३) **कुल्लूकः** । उक्तभोजनकाले क्षत्रियादिव्यतिरिक्तान्सखिसहाध्यायिप्रभृतीन्संप्रीत्या गृहमागतान् नत्वतिथिभावेन तस्य प्रतिषेधात् यथाशक्ति प्रकृष्टमन्नंकृत्वा भार्याया भोजनकाले भोजयेत् । गृहस्थस्यापि सएव भोजनकालः अवशिष्टंतुदम्पतीति वक्ष्यमाणत्वात् । आत्मनासहेति वक्तव्ये वचनवैचित्रीयमाचार्यस्य गुरोस्तु भोजनकालानभिधानंप्रभुत्वेन स्वाधीनकालत्वात् ॥ ११३ ॥

(४) **राघवानन्दः** । किंच गृहदारादिषु भुक्तवत्सु प्रकृत्य संपाद्य अन्नं अत्रसहभार्ययेति भार्याभोजनंप्रतिपत्तिकर्म ॥ ११३ ॥

(५) **नन्दनः** । प्रकृत्य तत्प्राधान्यं प्रकाश्येति यावत् । सहभार्ययाभार्यासहितः स्वयंभोजयेत् । नान्यंनियुञ्जीत ॥ ११३ ॥

(६) **रामचन्द्रः** । इतरानप्यागतान्सख्यादीन्भोजयेत् । तस्मात्प्रकृत्यान्नंप्रकर्षेणान्नंकृत्वा भार्यया सह सहेतिसमानोपचारे सहशब्दः । तैःसह स्वयंभार्ययासह दम्पत्योःशेषभोजनम् ॥ ११३ ॥

सुवासिनीः कुमारीश्च रोगिणोगर्भिणीः स्त्रियः॥अतिथिभ्योग्रएवैतान्भोजयेदविचारयन् ॥११४॥

---

(११४) कुमारीश्च=कुमारांश्च (ज, झ, ढ,)　　(११४) भ्योग्रएवैन्तन्=भ्योन्वगेवैतान् (मे०)

(१) **मेधातिथिः** । सुवासिन्योवध्वोनवोढास्त्रियःस्नुषादुहितरश्च । अन्येतु जीवच्छ्वशुराजीवत्पितृकाश्च प्रसूताअपि सुवासिन्यउच्यन्तेइत्याहुः । अतिथिभ्योन्वगेवैतानन्नुगतानेव भोजयेत्प्रारब्धभोजनेष्वेवातिथिषु तत्समकालंभोजयेत् । अन्येन्वग्रइतिपठन्ति अविचारयन् कथमतिथिष्वभोजितेषु बालाभुञ्जतइत्येवंविचिकित्सा न कर्तव्या ॥ ११४ ॥

(२) **सर्वज्ञनारायणः** । स्ववासिनी दत्ता वा स्त्री पितृगृहस्थास्वेषु ज्ञातिषु वसतीति । कुमाराः पञ्चवर्षन्यूनाः । अन्वगग्रे । याज्ञवल्क्ये बालादीन्भोजयित्वातिथिभोजनोक्तेः । क्वचिदग्रइत्येव पाठः ॥ ११४ ॥

(३) **कुल्लूकः** । सुवासिन्योनवोढाः स्त्रियः स्नुषादुहितरश्चताः कुमारीर्गर्भिणीश्चातिथिभ्योग्रे पूर्वमेवातिथिभ्योभोजयेत् कथमतिथिष्वभोजितेषु भोजनमेषामिति विचारमकुर्वन् । मेधातिथिस्त्वन्वगेवेति पठित्वानुगतानेवैतान्भोजयेदतिथिसमकालमिति व्याख्यायान्येतुअग्रइति पठन्तीत्युक्तवान् ॥ ११४ ॥

(४) **राघवानन्दः** । न वै स्वयं तदश्नीयादित्यत्रातिथिभोजनपूर्वप्राप्तं तत्र प्रतिप्रसवमाह सुवासिनीमिति । सुवासिनीं नवोढांस्नुषां तादृशींदुहितरंवा । तदर्थमतिथौ प्रश्नोपि नास्तीत्याह अविचारयन्निति ॥ ११४ ॥

(५) **नन्दनः** । सख्यादिभ्यः पूर्वभोजनीयानाह सुवासिनीरिति । सुवासिनीः स्वसृः ॥ ११४ ॥

(६) **रामचन्द्रः** । स्ववासिन्यादीनेतानतिथ्यादिभ्योग्रएवाविचारयन्भोजयेत् ॥ ११४ ॥

अदत्वा तु यएतेभ्यः पूर्वंभुङ्क्तेऽविचक्षणः ॥ सभुञ्जानोन जानाति श्वगृध्रैर्जग्धिमात्मनः॥ ११५॥

(१) **मेधातिथिः** । एतेभ्योतिथ्यादिभ्योभृत्यपर्यन्तेभ्योयोभोजनमदत्वा पूर्वप्रथममविचक्षणः शास्त्रार्थमजानानोभुङ्क्तेस्श्वगृध्रैरद्यते प्रेतः । तांजग्धिमात्मनस्तैः खादनंन जानाति । एवंहिसमन्यतेमूढमतिरत्राहमेवभुञ्जे एवंतु न बुध्यते यदिदंश्मशानगतस्वशरीरस्य श्वगृध्रैरदनम् । तत्फलत्वादेवमुच्यते ॥ ११५ ॥

(२) **सर्वज्ञनारायणः** । एतेभ्यः स्ववासिन्यादिभ्योतिथिभ्यश्च । श्वगृध्रैर्जग्धिभक्षणं । एतद्दोषकृतंपरलोके ॥ ११५ ॥

(३) **कुल्लूकः** । एतेभ्योऽतिथ्यादिभृत्यपर्यन्तेभ्योऽन्नमदत्वा व्यतिक्रमभोजनदोषमजानन्यःपूर्वंभुङ्क्ते । समरणानन्तरंश्वगृध्रैरात्मनोभक्षणंन जानाति । व्यतिक्रमस्येदंफलमिति वचनवैदग्ध्येनोक्तम् ॥ ११५ ॥

( ) **राघवानन्दः** । उक्तवैपरीत्ये निग्रहंचाह अदत्वेति । अदत्वा अदापयित्वा भुङ्क्ते । अविचक्षणइतिच्छेदः । जग्धि भोजनं । सइत्यतिथिविशेषणं तस्यैव प्रथमंभोजनस्य प्राप्तेः ॥ ११५ ॥

(५) **नन्दनः** । एतेभ्योऽतिथिसखिसुवासिन्यादिभ्यः । अविचक्षणइतिपदसन्धिःजग्धिंभक्षणम् । भुञ्जानोभोजनादित्यर्थः ॥ ११५ ॥

(६) **रामचन्द्रः** । एतेभ्योऽतिथिभ्यअदत्वा पूर्वयः भुङ्क्ते भुञ्जानःसन्नात्मनःशरीरंप्रेततःश्वगृध्रैर्जग्धिंभोजनंन जानाति । अविचक्षणः स्वार्थमजानानः ॥ ११५ ॥

भुक्तवत्स्वथ विप्रेषु स्वेषु भृत्येषु चैव हि ॥ भुञ्जीयातां ततः पश्चादवशिष्टंतु दम्पती॥११६॥

(१) **मेधातिथिः** । विप्राअतिथयः स्वाजात्यादयः । तेषु कृतभोजनेषु तदवशिष्टंदम्पती जायापती अश्नीयाताम । पश्चात्कदाचित्तेभ्यः कल्पयित्वा शिष्टव्यपदेशे सत्यादौ भोजनंस्यात्तदर्थमुक्तंपश्चादिति । दम्पत्योर्भोजनकालविधानार्थमर्धश्लोकोऽनुवादः ॥ ११६ ॥

(२) **सर्वज्ञनारायणः** । विप्रेष्वतिथिषु । स्वेषु ज्ञात्यादिषु स्वसंबन्धिषु । भृत्येषु पोष्येषु ॥ ११६ ॥

(३) **कुल्लूकः** । विप्रेष्वतिथिषु स्वेषु ज्ञातिषु भृत्येषु दासादिषु कृतभोजनेषु ततोऽन्नादवशिष्टं भार्यापती पश्चादश्नीयाताम् ॥ ११६ ॥

(४) **राघवानन्दः** । भोजनस्य रागतः प्राप्तत्वात् तत्कालविधिमाश्रित्य दम्पत्योस्तद्विशेषमाह भुक्तवत्स्विति । विप्रेषु अतिथिपर्यन्तेषु । स्वेषु ज्ञातिषु । भृत्येषु गर्भदासादिष्विति मेधातिथिः । नात्रोच्छिष्टाशङ्केत्याह पश्चादिति ॥ ११६ ॥

(५) **नन्दनः** । अथदम्पत्योर्भोजनकालमाह भुक्तवत्स्विति । स्वेषु गर्भदासादिषु भृत्येषु वैतनिकेषु ॥ ११६॥

देवानृषीन्मनुष्यांश्च पितॄन्गृह्याश्च देवताः ॥ पूजयित्वा ततः पश्चाद्गृहस्थः शेषभुग्भवेत् ॥ ११७॥

(१) **मेधातिथिः** । अनुवादमात्रमिदंपूर्वस्य पञ्चयज्ञानुष्ठानविधेर्गृहस्थभोजनकालस्य च अन्येत्वर्थान्तरविधानमपि वर्णयन्ति । पूर्वत्र जायापत्योरेककालमवशिष्टंभोजनंविहितम् । अनेन स्त्रिया अपोह्य पुंसएव विधीयते । ततश्च पूर्वंभृत्येभ्यः प्राक्पत्युर्भार्या भुञ्जीत । एवंच कृत्वा भोजयेत् । एतदप्युपपन्नंभविष्यति इतरथा तैः सह भार्या न भुञ्जीतेत्यर्थकल्पनायांतथाश्रुतपदान्वयभङ्गःस्यात् । यत्तु महाभारते दर्शनंतद्दर्शनमेव विधानं विकल्पयिष्यते तदयुक्तमनुवादत्वादस्य नच गृहस्थइत्येकवचनविरोधः सहाधिकाराज्जायापत्योः तत्र च सहार्थस्य प्राधान्यान्नद्विवचनापत्तिः यथा ब्राह्मणोऽग्नीनादधीतेति सत्यपि भार्यया सहाधिकारे नैकवचनंविरुध्यते । तत्कस्यहेतोः एकोहि तत्रप्रधानमपरोगुणभूतः नच गुणः संख्यामुपजनयितुंशक्नोति अतः प्रधानस्यैकसंख्यत्वात्सत्यपि पत्यर्थानुप्रवेशएकवचनमेवयुक्तम् । एकएवगृहस्थशब्दः पत्न्यांवर्तते । सच सह विवक्षायाम् । साचै कबुद्धिविषयत्वेन प्रधानयोर्गुणयो र्वा । तस्मान्नपत्न्याः प्राक्पुंसोभोजनम् । अतःस्थितमनुवादोयंप्रतिपत्तिदार्ढ्याय । येऽपिगृह्याश्च देवताः पूजयेदित्यर्थवादवचनंदेवतापदमन्त्रा पूजयेदितिसंबन्धाद्गौणमेवार्चाविधित्वंसमर्थयन्ते नहि मुख्यस्य देवतार्थस्य पूज्यत्वसंभवोयजिस्तुतिसम्बन्धेनैव देवतात्वस्य मुख्यत्वात् तथाच गृह्याइत्याह गृहे भवागृह्यास्ताश्च प्रतिकृतयएव नहि यागसंप्रदानभूतानांगृहसंबन्धितासिद्धिः तेषामपि देवतार्थोगौणोन पूजार्थः । कुतएतद्गृहस्थस्य यायष्टव्यास्तागृह्याइत्युपपद्यते ॥ ११७ ॥

(२) **सर्वज्ञनारायणः** । गृह्यादेवताः भूतानि ॥ ११७ ॥

(३) **कुल्लूकः** । गृह्याश्चदेवताइत्यनेन भूतयज्ञउक्तः पञ्चयज्ञानुष्ठानस्यावशिष्टंतुदम्पतीत्यनेन शेषभोजनस्य च विहितत्वात् । वक्ष्यमाणदोषकथनार्थोयमनुवादः । अथवा देवानित्यनेनैव भूतयज्ञस्यापिसंग्रहः । गृहे भवागृह्यादेवताः पूजयित्वेति वासुदेवादिप्रतिकृतिपूजाविधानार्थत्वमस्य ॥ ११७ ॥

(४) **राघवानन्दः** । एतदेव सार्थवादं प्रमाणयति देवानिति द्वाभ्यां । गृहे भवागृह्यादेवाः श्रीवास्तुदेवादयः भूतानि वा । एतेन वास्तुभूतबलिरुक्तः ॥ ११७ ॥

(५) **नन्दनः** । गृहस्थेन यज्ञशिष्टाशनंभोक्तव्यमित्याह । देवानृषीनिति ॥ ११७ ॥

(६) **रामचन्द्रः** । गृह्याश्चदेवताःपूर्वंगृहस्थएवदेवादीन्पूजयित्वा गृहस्थःपश्चाच्छेषभुग्भवति ॥ ११७ ॥

अघंसकेवलंभुङ्क्ते यः पचत्यात्मकारणात् ॥ यज्ञशिष्टाशनंह्येतत्सतामन्नंविधीयते ॥ ११८ ॥

[यद्यदिष्टतमंलोके यच्चास्य दयितंगृहे ॥ तत्तद्गुणवते देयं तदेवाक्षयमिच्छता ॥१॥]

(१) **मेधातिथिः** । पापंकेवलंसभुङ्क्तेहृदये निधत्ते गृह्णाति नान्नस्य मात्रामपि यःपचेत्पाकंकारयेद्वात्मकारणादात्मा-

नमुद्दिश्य क्षुधितोऽहमिदंवामह्यंरोचतइति तदेवपच्यताम् । तस्मादनातुरेण नात्मार्थमन्नंमृषापचनीयम् । आतुरस्य तु शरीरधारणंयेनोपायेन भवति विध्यन्तरेणातिक्रमेणापि तस्याश्रयणं युक्तम् सर्वतएवात्मानंगोपायेदितिवचनात् एवं केचिद- स्यार्थमाहुः एतदयुक्तंस्मृतिविरोधात् ॥ ११८ ॥

[(१) **मेधातिथिः** । एवंह्याह । दयितमिष्टंस्पृहणीयम् । यदि च न पच्येत कुतस्तादृशस्य दानसंभवस्तस्मादयमस्यार्थः। तदुद्देशस्तावन्नित्यस्य पाकस्य नैव विद्यते सुहृत्स्वजनादिष्वागतेषु तदुद्देशः। अन्यथात्वनुद्दिष्टविशेषपाकअतिथ्यादिभ्योदानंविधीयते । तेनैतदुक्तंभवति यएतेभ्योऽदत्त्वा भुङ्क्ते तस्यायंदोषः । अथवा सर्वस्मिन्नतिथ्यादिभिर्भुक्तेनात्मार्थंपुनः पाकः कर्तव्यः । तथाच वसिष्ठः शेषंदम्पती भुञ्जीयाताम् सर्वोपयोगे न पुनः पाकः । यज्ञशिष्टाशनंपूर्वस्य शेषभोजनस्य प्रशंसैव । यज्ञोज्योतिष्टोमादिः । शिष्टमुपयुक्तशेषंतस्यचैतद्दर्शनम् । तत्तुल्यफलंयत्सतांशास्त्रानुष्ठानपराणांगृहस्थानामतिथ्यादिभुक्तशिष्टंविधीयते ॥ १ ॥]

(२) **सर्वज्ञनारायणः** । अघंपापहेतुं । आत्मकारणादात्ममात्रकारणात् । एतदन्नं सतां यज्ञशिष्टाशनं पञ्चमहायज्ञावशिष्टत्वेनाशनीयं विधीयते वेदे ॥ ११८ ॥

(३) **कुल्लूकः** । यस्त्वात्मार्थमेवान्नंपक्त्वाभुङ्क्ते देवादिभ्योन ददाति सपापहेतुत्वात्पापमेव केवलं भुङ्क्तेनान्नम् । तथाच श्रुतिः । केवलाघोभवति केवलादीति यस्माद्यदेव पाकयज्ञावशिष्टमशनमन्नमन्यत् एतदेव साधूनामन्नमुपदिश्यते इति ॥ ११८ ॥

(४) **राघवानन्दः** । आत्मकारणात् स्वभोगहेतोः इज्यतेअयमिति देवातिथ्यादिर्यज्ञः । सतां साधूनां । अन्नंअदनीयं विधीयते अन्नस्य रागविषयत्वेपि एवंप्रकारकं विधेर्विषयः ॥ ११८ ॥

(५) **नन्दनः** । अयज्ञशिष्टाशनंदोषाशनमशास्त्रविहितत्वादित्याह अघमिति । यज्ञशिष्टंपञ्चमहायज्ञशिष्टम् ॥११८॥

(६) **रामचन्द्रः** । यःपचत्यात्मकारणात्सकेवलमघंभुङ्क्ते । यज्ञशिष्टाशनंपाकयज्ञज्योतिष्टोमादिशिष्टान्नं सतामेतदन्नं अशनाय योग्यंविधीयते ॥ ११८ ॥

राजर्त्विक्स्नातकगुरून्प्रियश्वशुरमातुलान् ॥ अर्हयेन्मधुपर्केण परिसंवत्सरात्पुनः ॥ ११९ ॥

(१) **मेधातिथिः** । अतिथिपूजाप्रसङ्गेनान्येषामपि केषांचित्पूज्यानांगृहागतानांपूजाविशेषोविधीयते । राजाऽभिषिक्तोन क्षत्रियमात्रम् अतिमहतीह्येषापूजा न तांसर्वः क्षत्रियोऽर्हतिनहि स्नातकगुरुभ्यांतस्यसहोपदेशोयुक्तः । पूजासाम्यं- गुरुणा न तस्ययुक्तंलिङ्गदर्शनाच्च । तद्यथैवान्यां मनुष्यराजआगतइत्यातिथ्येष्टिब्राह्मणंगोवधोमधुपर्कविधावुक्तोगोघ्नोऽतिथिरितिपुरुषराजविषयंदर्शयति । तेन क्षत्रियेऽक्षत्रिये वा जनपदेश्वरे पूजेयं प्रयोक्तव्या । शूद्रे तुं नास्ति । मन्त्रवत्त्वम् । ननु च शूद्रस्य मन्त्रोच्चारणंनिषिद्धं न पुनः शूद्रसंप्रदानके कर्मणि ब्राह्मणादीनाम् । नैषदोषः । अर्घाणामपिभूतेभ्यस्त्वे- त्यादिमन्त्रोच्चारणमस्ति । ननु च महाभारते शूद्रकर्तृकमपिमधुपर्ककर्म श्रूयते तदर्हमासनंचैवयथावत्प्रत्यवेदयत् । मधुपर्कंचगांचैवतस्मैभगवते भगवतेत्ययम् भगवते वासुदेवाय विदुरइति तत्साधने दधनि भक्त्या मधुपर्कशब्दः प्रयुक्तः । तादर्थ्यात्तच्छब्दोभवति । आयुष्यमिति राजशब्दस्तावज्जानपदेश्वरवचनोन क्षत्रियमात्रे वर्तते । प्रियोजामातेत्याहुः । स्नातकोविद्याव्रताभ्यामुभाभ्यां अन्यथार्त्विगुरवः । सर्वेस्नातकाएव । आश्रमान्तरस्थानांभैक्षचर्या विहिता नत्वतिथिधर्मेणभो-

---

(११९) परिसंवत्सरात्=परिसंवत्सरान् (मे०) = परिसंवत्सरागतान् (नं०)

जनम्। अथवाऽचिरनिर्वृत्तवेदाध्ययनः स्नातकोगृह्यते। एतानर्हयेत्पूजयेत्। मधुपर्कशब्दः कर्मनामधेयम्। गृह्यान्तस्य स्वरूपावगमः। परिसंवत्सरानितिराजादिपूज्यविशेषणम् परिगतोऽतिक्रान्तः। संवत्सरोयेषांतान्। यदिसंवत्सरेऽतीतआगच्छन्ति तदामधुपर्कार्हाअर्वाक्केचिदेवंव्याचक्षते। यदिसंवत्सरादर्वागागच्छन्ति। तदातीतेऽपि संवत्सरे प्रथमपूजायाः। पुनर्लभतेपूजाम्। अन्येत्वाहुः। सांवत्सरिकी तेषांपूजा नयावदागमनम्। अस्मिन्पक्षेऽर्वागागमनंन पूजाप्रतिबन्धकम्। पाठान्तरंपरिसंवत्सरादिति। यावदेवसंवत्सरंतावत्परिसंवत्सरात्ततऊर्ध्वंपुनः पूज्याइत्यर्थः॥ ११९॥

(२) **सर्वज्ञनारायणः**। राजा स्वदेशनृपतिः क्षत्रियः स्नातकोविद्याव्रतस्नातकः गुरुराचार्यः उपाध्यायोवा प्रियोमित्रं। परिसंवत्सरात्संवत्सरंविहायातिवाह्य संवत्सरादूर्ध्वंस्वगृहागमने पुनर्मधुपर्केणार्हयेत्। संवत्सरमध्ये तु नावृत्त्यामधुपर्कः॥ ११९॥

(३) **कुल्लूकः**। अतिथिपूजाप्रसङ्गेन राजादीनामपि गृहागतानांपूजाविशेषमाह राजेति। राज्याभिषिक्तः क्षत्रियोराजा। ऋत्विग्यज्ञेयेन यस्यार्त्विज्यंकृतम्। स्नातकोविद्याव्रताभ्याम्। प्रियोजामाता। राजादीनेतान्गृहागतान्स्म गृह्योक्तेन मधुपर्काख्येन कर्मणा पूजयेत्। परिसंवत्सरादितिसंवत्सरंवर्जयित्वा तदूर्ध्वंगृहागतान्पुनर्मधुपर्केण पूजयेत्। पञ्चम्यपाङ्परिभिरिति सूत्रेण वर्जनार्थपरियोगेनेयंपञ्चमी। अतएवैतत्सूत्रव्याख्याने जयादित्येनोक्तं अपेन साहचर्यात्परेर्वर्जनार्थस्य ग्रहणमिति। मेधातिथिस्तु परिसंवत्सरानिति पठित्वा परिगतोनिष्क्रान्तः संवत्सरोयेषांतान्पूजयेदिति व्याख्यातवान्। उभयत्रापि पाठे संवत्सरमध्यागमनेन मधुपर्कार्हता॥ ११९॥

(४) **राघवानन्दः**। गृहागतानां पूजाप्रकारं कथयंस्तत्कालविशेषमाह राजेति। स्नातकोनवोढापतिः। प्रियोजामाता। परिवत्सरान्मधुपर्केण पूजयेदित्यन्वयः। तदभ्यन्तरे मधुपर्केण नार्हणम्॥ ११९॥

(५) **नन्दनः**। अथमधुपर्कार्हानाह राजर्त्विगिति। स्नातको गृहस्थः। प्रियः सखा। परिगतःसंवत्सरोयेषांतेपरिसंवत्सराः परिसंवत्सराश्चतआगताश्चेतिपरिसंवत्सरागताः॥ ११९॥

(६) **रामचन्द्रः**। प्रियःजामाता स्नातकोविद्यास्नातकः व्रतस्नातकोवा तान्प्रति संवत्सरात्पुनःपुनर्मधुपर्केणार्हयेत्। संवत्सरमध्यागमने नमधुपर्कार्हा भवन्तीत्यर्थः। परिसंवत्सरेनिपाठे परिशब्दोवर्जनार्थइति॥ ११९॥

राजा च श्रोत्रियश्चैव यज्ञकर्मण्युपस्थितौ॥ मधुपर्केण संपूज्यौ न त्वयज्ञइतिस्थितिः॥ १२०॥

(१) **मेधातिथिः**। यज्ञनिमित्तेऽर्वागपि संवत्सरात्प्राप्त्यर्थोयमिति केचित् अन्ये तु पूर्वस्यैवराजश्रोत्रिययोरुपसंहारमाहुः। अनुपसंहारे हि नत्वयज्ञइतिनोपपद्यते। अत्र श्रोत्रियोयः स्नातकः प्रागुक्तो यदिवाऋत्विगेव तस्य हि यज्ञकर्मणिप्रारिप्स्यमानेगोर्मधुपर्कदानंविहितम्। यद्यप्यसकृत्संवत्सरस्य सोमेन यजेत कृतार्घ्याएवैनंयाजयेयुः एवंक्रमभूलैषा स्मृतिर्भविष्यति। इतरथा कल्प्येतमूलम्। अन्ये तु सर्वानृत्विगादीञ्छ्रोत्रियशब्देन दृष्टान्मन्यन्ते। तथा चाविशेषेण गौतमेन पठितम् ऋत्विक्श्वशुरपितृमातुलानामुपस्थाने मधुपर्कइत्युक्त्वायज्ञविवाहयोरर्वागिति पठितवान्। अतश्च सर्वेषामेवार्घ्याणांयज्ञे निमित्तेऽर्वागपि संवत्सरादर्घार्हता स्यात्। न त्वयज्ञइतिच प्रतिषेधोऽर्वाक्संवत्सरान्नोर्ध्वमित्येवंनेयः इह द्वितीये पादेऽनेकधापाठप्रतिपत्तिः। केचित्पठन्ति। तते यज्ञउपस्थिताविति तेषामयमर्थः तते प्रारब्धे यज्ञे यदि प्राप्तौ भवतो निमन्त्र्यानीतौ तदेयंमधुपर्कक्रियातयोर्नपुनः प्रारभ्यमाणे एषपक्षः कैश्चिद्दूष्यते दीक्षितस्य सर्वदानप्रतिषेधान्मधुपर्कदानमनुज्ञायमानंतद्विरुद्धंस्यात् नच शक्यंवक्तुं दानमेतन्नभवत्यर्हयेदिनोदनात्। पूजैषा विधीयते। यतोस्तिमधुपर्केदधिदानंमांसभोजनादिदानंच। अथोच्यते स्वयमेवतत्परकीयंभुज्यतइति एवंसति स्तेयदोषः स्याद्वचनान्ने-

तिचेदस्त्येव तर्हिददात्यर्थः चोदितंचददिति मधुपर्कंचदद्यादिति तस्माद्विरुद्धंदीक्षितोनददात्यनेन स्याद्विरोधोयदि यज्ञशब्दः सोमयागेष्वेव वर्तते। दर्शपूर्णमासादयोपि यागास्तद्विषयोयंविधिर्भविष्यति नैतद्युक्तम्। एवंसति समाचारविरोधः। नहि शिष्टाः सोमयागेभ्योऽन्यत्र क्वचिदर्घ्यायमधुपर्कमाहरन्ति। आचारोवेदादरः। अतोऽयमेवपाठोयुक्तः यज्ञकर्मण्युपस्थितइति। प्रारभ्यमाणयज्ञआगतंशिष्टामधुपर्केणपूयजन्ति न प्रवृत्तयज्ञाः। अतश्चैतदपि न विचारयामः। सामान्यतः। प्राप्तस्य दानस्य भवतु निवृत्तिर्न पुनस्तद्विषयतयैव श्रुतस्य। यज्ञश्चासौकर्मचतद्यज्ञकर्म तस्मिन्नुपस्थिते प्राप्ते ॥ १२० ॥

(२) **सर्वज्ञनारायणः**। अत्र राजान्यदेशनृपतिः क्षत्रियएव श्रोत्रियोविद्यामात्रस्नातः। एतौ संवत्सरादूर्ध्वमपि यज्ञकर्मण्येवोपस्थितौ मधुपर्कार्हौ न त्वेवमेवेति स्थितिर्नियमः॥ १२० ॥

(३) **कुल्लूकः**। राजस्नातकयोःपूजासंकोचार्थमाह राजेति। राजस्नातकौ संवत्सरादूर्ध्वमपि यज्ञकर्मण्येव प्राप्तौ मधुपर्केण पूजनीयौ नतु यज्ञव्यतिरेकेण जामात्रादयस्तुसंवत्सरादूर्ध्वं यज्ञंविनापि मधुपर्कार्हाःसंवत्सरमध्ये तु सर्वेषां यज्ञविवाहयोरेव मधुपर्कः। तदाह गौतमः ऋत्विगाचार्यश्वशुरपितृव्यमातुलादीनामुपस्थाने मधुपर्कः। संवत्सरे। पुनर्यज्ञविवाहयोरर्वाग्राज्ञः श्रोत्रियस्यच ॥ १२० ॥

(४) **राघवानन्दः**। तेष्वेव विशेषमाह राजाचेति। अनयोर्यज्ञकर्मण्यागमनेसंवत्सरेपि मधुपर्कः। तथा च गौतमः ऋत्विगाचार्यश्वशुरमातुलादीनामुपस्थाने मधुपर्कःसंवत्सरे पुनर्यज्ञविवाहयोरर्वाक्राज्ञः श्रोत्रियस्य चेति। अर्वाक् संवत्सरात्। श्रोत्रियोत्र पूर्वोक्तःस्नातकः॥ १२० ॥

(५) **नन्दनः**। स्थितिः सिद्धान्तः॥ १२० ॥

(६) **रामचन्द्रः**। च पुनः राजा ग्रामादागतःसन् श्रोत्रियः यज्ञकर्मणि दर्शपौर्णमासस्यापि वा संवत्सरादूर्ध्वमुपस्थितौ प्राप्तौ मधुपर्केण संपूज्यो भवतः। अयज्ञकाले अनिमन्त्रितौ नपूज्यौ। इति स्थितिर्मर्यादा॥ १२० ॥

सायंत्वन्नस्य सिद्धस्य पत्न्यमन्त्रंबलिंहरेत्॥ वैश्वदेवंहि नामैतत्सायंप्रातर्विधीयते॥ १२१॥

(१) **मेधातिथिः**। उक्तःप्रथमः इदानींद्वितीयः पाकउच्यते। सायंदिनान्तः प्रदोषस्तत्र सिद्धस्यान्नस्य सर्वः पाकयज्ञियोविधिरावर्तनीयोब्रह्मयज्ञपितृयज्ञवर्जम्। ननु च बलिंहरेदित्येतावच्छ्रुतम्। बलिहरणंच प्रसिद्ध्या भूतयज्ञएव तत्र कुतोऽग्नौ होमोऽतिथ्यादिदानंच। अथ वैश्वदेवंहि नामैतदिति वैश्वदेवशब्दः सर्वार्थतांप्रतिपादयति विश्वेषांदेवानामिदंविधीयते सायंप्रातर्यादृशंप्रातस्तादृशमेवसायमेतदर्थमेव प्रातःशब्दः अन्यथाप्रातर्विहितमेव किमनेनसायंप्रातर्विधीयते। एवंतर्हि ब्रह्मयज्ञपितृयज्ञावपिकर्तव्यौ। उच्यते अन्नस्य सिद्धस्येतिवचनाद्यदन्नसाध्यंतदेवकर्तव्यम् नत्वध्ययनसाध्योब्रह्मयज्ञोनाप्युदकसाध्यंतर्पणम्। एवंच संबन्धः क्रियते सिद्धस्यान्नस्य बलिंहरेत्। एतद्वैश्वदेवाख्यंकर्मान्नस्य सिद्धस्योभयोः कालयोर्विधीयते। अन्नशब्दाद्वैश्वदेवशब्दाच्चैवंव्याख्यायते। अमन्त्रंमन्त्रशब्देन देवतोद्देशशब्दवान् स्वाहाकारान्तोऽग्नये स्वाहेत्येवमादि निषिध्यते। न ह्यन्ये मन्त्रावैश्वदेवेविनियुक्तास्तेषु मन्त्रत्वंप्रशंसयोच्यते। ननु स्वाध्याये पठितानांमन्त्रत्वमस्ति स्वाध्यायैकदेशःकश्चिदृग्यजुः सामात्मकोवेदाध्यायिभिर्मन्त्रइति व्यवह्रियते व्यवहारतश्चपदार्थावगमनंयैः शब्दैर्बलिहरणादि क्रियते ते कुत्रचित्पठ्यन्ते केवलमग्न्यादिभ्योदेवेभ्योहोमंकुर्यादितिश्रुतेः स्वाहाकारेण वा वषट्कारेण वादेवेभ्योहविः संप्रदीयतइति वाक्यान्तरेण सर्वहोमेषु स्वाहाकारोविहितोयाज्यान्ते वषट्कारोनियमितोयाज्यायांवषट्करोतीति।

स्वाहाकारशब्दयोगे चतुर्थी स्मर्यते अतोयागोदेवतायाउद्देश्यत्वात् उद्देश्यत्वंच देवतायाः शब्दावगम्यरूपत्वात् शब्देनैवकेचित्वादियंघटना क्रियतेअग्नयेस्वाहेत्यादि यद्येवंतेषांनिषेधः कथंतर्हि यागनिर्वृत्तिः नहि तुभ्यमिदं न मदीयमिति यावदुद्देशोनकृतस्तावद्यागस्वरूपनिर्वृत्तिः । नहि त्यागः केवलोयागउद्देशशून्यः। सत्यम् शब्देनिषिद्धेमनसोद्देशंदेवतायाः पत्नीकरिष्यति यथाशूद्रोनमस्कारमुच्चारयिष्यति । नमस्कारेणमन्त्रास्नातः शूद्रस्यमंत्रइतिनमस्कारोऽनुज्ञातोस्यनदेवतापदम् । नच देवतायाविनियोगसिद्धिरित्युक्तम् । इहभवन्तस्त्वाहुः स्वाहाकारोनमस्कारेण मन्त्राम्नातः शूद्रस्य देवतापदंत्वनिषिद्धम् । अथ सायंवैश्वदेवहोमे कः कर्ता उक्तंपत्न्येव संनिधानाद्बलिहरणवदमन्त्रकंकरिष्यतीति ॥ १२१ ॥

(२) **सर्वज्ञनारायणः** । अत्र वैश्वदेवहोमेपत्न्याकृते नक्तंचरेभ्यइतिवैकल्पिकबलौ दत्ते दैवसिकबल्यन्तरस्थाने पत्न्याअमन्त्रकैकबलिदानमुक्तम् । वैश्वदेवंहीति । वैश्वदेवं विश्वेदेवाः सर्वे देवाइन्द्रादयोविश्वेदेवान्तास्तेभ्यःकार्यं बलिकर्म सायंप्रातर्विधीयते न तु ब्रह्मयज्ञपितृयज्ञयोरिवास्यापि दिवैव क्रियाऽतःसायं पत्न्यैव नक्तंचरव्यतिरिक्तभूतयज्ञस्थाने देवतामनसोद्दिश्य कार्यमेतदित्यर्थः ॥ १२१ ॥

(३) **कुल्लूकः** । दिनान्तेसिद्धस्यान्नस्यपत्न्यमन्त्रंबलिहरणंकुर्यात् । इन्द्राय नमइति मन्त्रपाठवर्जम् । मानसस्तुदेवतोद्देशोन निषिध्यते । यतएतद्वैश्वदेवंनामान्नसाध्यंहोमबलिदानातिथिभोजनात्मकंतत्सायंप्रातर्गृहस्थस्योपदिश्यते ॥ १२१ ॥

(४) **राघवानन्दः** । वैश्वदेवस्य सिद्धस्येत्यत्र बलिकर्मत्वावच्छेदेऽधिकारित्वेन प्राप्तंपतिंपर्युदस्यति सायमिति । तथाच देवतामनसैवोद्दिश्येत्याह पत्न्यमन्त्रमिति । सायंबलिर्मास्त्विति चेन्नेत्याह । वैश्वदेवइति ॥ १२१ ॥

(६) **रामचन्द्रः** । सिद्धस्यान्नस्य सायंसंध्याकाले पत्नी अमन्त्रवद्बलिंहरेद्दद्यात् । बलिहरणंभूतयज्ञः । विश्वेषांदेवानामिदंकर्म वैश्वदेवंनामैतत्सायंकाले प्रातःकालेपिविधीयते । इति नित्यश्राद्धम् ॥ १२१ ॥

पितृयज्ञंतु निर्वर्त्य विप्रश्चेन्दुक्षयेऽग्निमान्॥पिण्डान्वाहार्यकंश्राद्धंकुर्यान्मासानुमासिकम्॥१२२॥

(१) **मेधातिथिः** । वैश्वदेविकाद्वैकल्पिकाच्छ्राद्धान्नित्यमिदंश्राद्धान्तरमुच्यते । तस्यायंकालनिर्देशः । चन्द्रक्षयेऽमावास्यायां तत्रापि नयस्यांकस्यांचन वेलायां किंतर्हि पितृयज्ञंनिर्वर्त्य श्रुतोयः पिण्डपितृयज्ञस्तंकृत्वा । एवंच यस्तस्यकालः सएवास्यापि लभ्यते । तदुक्तममावास्यायामपराह्णे पिण्डपितृयज्ञइति अनाहिताग्नेरप्यौपासनयोगोऽस्त्येव । तथाचाह एवमनाहिताग्निर्नित्ये अर्पयित्वेत्यादि अग्निमान् वैवाहिकेनाग्निना तद्दायादायकालाहृतेन वा विप्रग्रहणमविवक्षितम् । क्षत्रियवैश्ययोरपीष्यते । एवंस्मृत्यन्तरेषु इदंविशेषेणोक्तंपिण्डान्वाहार्यकमिति ३ नामधेयमिदमस्य श्राद्धस्य पिण्डानामनुपश्चादाह्रियतेऽनुष्ठीयते । तत्पिण्डान्वाहार्यकंभवति । मासश्चानुमासश्च तयोर्भवंमासानुमासिकम् । मासानुमासशब्दसमुदायोमासगतांवीप्सामाचष्टे । मासि मासि कर्तव्यमित्युक्तंभवति । अतश्च नित्यतासिद्धिः । यद्यप्यनुमासशब्दाद्वीप्सावगतिर्भवति मासशब्दोऽतिरिच्यते तथापि पद्यग्रन्थेगौरवंनाद्रियते । श्राद्धमित्येतदपिनामैव । कुर्यादिति विधिः ॥ १२२ ॥

(२) **सर्वज्ञनारायणः** । पितृयज्ञंपिण्डपितृयज्ञं अग्निमान् । स्मार्तेन श्रौतेन वा । पिण्डेभ्योलिपिकांमात्रा मन्वाहृत्य ब्राह्मणाअत्र श्राद्धे भोज्यन्तइति पिण्डान्वाहार्यकं मासानुमासात्तु कर्तव्यात्पिण्डपितृयज्ञादनुमासिकं मासि मासि कार्यंपितृकृत्यंमासानुमासिकमितिप्रसंगाद्व्यवहारानुगुणंनामद्वयमुक्तम् । विप्रइति क्षत्रियवैश्यकार्यस्य पिण्डपितृयज्ञात्प्रागपि क-

रणे न दोषइत्येतदर्थम्। अतएव उत्तरश्लोके तदामिषेणेति आमिषनियमोक्तिरपि क्षत्रियवैश्यविषयैव। अतएव हि श्लोकान्तरप्रयत्नोविप्रपदस्य तत्रान्वयोमाभूदिति। अतएव च पुलस्त्यः मुन्यन्नंब्राह्मणस्योक्तंमांसंक्षत्रियवैश्ययोरित्याह ॥१२२॥

(३) **कुल्लूकः**। श्राद्धकल्पंच शाश्वतमित्यनुक्रमणिकायांप्रतिज्ञातंश्राद्धकल्पमुपक्रमते पितृयज्ञमिति। साग्निरमावास्यायांपिण्डपितृयज्ञाख्यंकर्मकृत्वा श्राद्धंकुर्यात्। पितृयज्ञपिण्डानामनु पश्चादाह्रियतइति। पिण्डान्वाहार्यकंश्राद्धंमासानुमासिकंमासश्चानुमासश्चतयोर्भवंप्रतिमासंकर्तव्यमित्यर्थः। अनेनास्य नित्यत्वमुक्तम्। विप्रग्रहणंद्विजातिपरं। त्रयाणांप्रकृतत्वात् ॥ १२२ ॥

(४) **राघवानन्दः**। श्राद्धकल्पंच शाश्वतमित्युक्तम्। तत्र साग्निकस्य कृत्यान्तरमाह पितृयज्ञंत्विति। पितृयज्ञं सायान्हे पिण्डपितृयज्ञैश्चरन्तीति श्रुत्युक्तंकर्म। चन्द्रक्षये चन्द्रारम्भककलानांक्षयाक्रान्तान्त्यकलायाममावास्यायां निर्वर्त्य कृत्वा। सर्वश्राद्धप्रकृतिपार्वणश्राद्धस्य पिण्डपितृयज्ञानन्तरभावित्वंनाम्ना प्रथयति पिण्डान्वाहार्यकमिति। पिण्डं पिण्डपितृयज्ञं तदनु आहार्यं कर्तव्यता यस्य तत्। मासानुमासिकं मासंमासंप्रति साध्यम् ॥ १२२ ॥

(५) **नन्दनः**। एवमहरहः कर्तव्यत्वेन पञ्चमहायज्ञाउक्ताः। इदानींप्रतिमासममावास्यायांकर्तव्यस्य मासिकाख्यस्य श्राद्धस्य विधिमुपदिदिक्षन्नाहिताग्नेस्तत्र विशेषंतावदाह पितृयज्ञमिति। अग्निमानाहिताग्निः। विप्रोद्विजः। चन्द्रक्षयेऽमावास्यायाम्। पितृयज्ञं श्रौतंपितृपिण्डपितृयज्ञंनिर्वर्त्य। पिण्डान्वाहार्यकम्। पितृयज्ञदत्तानांपिण्डानामनुपश्चादाहार्यंप्रयोज्यम् आहार्यमेवाहार्यकम्। मासानुमासिकम्। प्रतिमासिकंकुर्यात् ॥ १२२ ॥

(६) **रामचन्द्रः**। अथ श्राद्धप्रकरणम्। अग्निमान् विप्रःचन्द्रक्षये अमायां पितृयज्ञपिण्डान्निर्वर्त्य समाप्य मासानुमासिकं पिण्डान्वाहार्यकंत्वपिण्डानां पश्चात् आह्रीयतेऽनुष्ठीयते तत्पिण्डान्वाहार्यकं श्राद्धंकुर्यात्। मासानुमासिकंच ॥१२२॥

पितॄणांमासिकंश्राद्धमन्वाहार्यंविदुर्बुधाः ॥ तच्चामिषेण कर्तव्यंप्रशस्तेन प्रयत्नतः ॥ १२३ ॥

[ननिर्वपतियःश्राद्धंप्रमीतपितृकोद्विजः ॥ इन्दुक्षये मासि मासि प्रायश्चित्ती भवेत्तु सः §]

(१) **मेधातिथिः**। अन्वाहार्यंदर्शपौर्णमासयोः श्रौतयोर्दक्षिणर्त्विजाम्। यदेतन्मासिकंश्राद्धममावास्यायामेतत्पितॄणामन्वाहार्यम्। यथान्वाहार्येणर्त्विजः प्रीयन्ते तद्वत्पितरः श्राद्धेन। एतेन पित्रर्थतांश्राद्धस्याह। यथाग्न्यादिदेवताशौंदर्शादियाग एवंन श्राद्धे पितरः किंतर्हि तदुपकारार्थमेवश्राद्धम्। तथाच पितॄणामितिषष्ठी। केवले हि देवतात्वे चतुर्थ्याविरहायोगः। पक्षे पाठान्तरमर्थान्तरंच पिण्डानांमासिकमिति। अन्वाहार्यंविदुर्बुधाः अनेनापि पितृयज्ञवदस्यकर्तव्यतोच्यते। नत्विदमङ्गम्। तदेतदामिषेण मांसेन कर्तव्यम्। प्रशस्तेनाप्रतिषिद्धेन विशेषविहितेन वा द्वौ मासौ मत्स्यमांसेनेति यद्वक्ष्यति। अयंच मुख्यः कल्पः तदभावे दधिघृतपयोऽपूपादि विधायिष्यते। मांसंचव्यञ्जनंभक्तादिभोज्यस्य। न पुनरेतदेव केवलंभोज्यं येनवक्ष्यति गुणांश्चसूपशाकाद्यांस्तथायावन्तश्चैव यैश्चान्नैरिति। किंपुनःश्राद्धेहोमब्राह्मणभोजनपिण्डनिर्वपणादीनि कर्माणि सर्वाण्येव समप्रधानानि श्राद्धशब्दवाच्यान्युत किंचिदङ्गमत्र किंचित्प्रधानम्। उच्यते श्राद्धं भोजयेच्छ्राद्धंभुक्तमनेनेति सामानाधिकरण्याद्ब्राह्मणभोजनंमुख्यंप्रतोयते ॥ १२३ ॥

(२) **सर्वज्ञनारायणः**। पिण्डानामिति। पिण्डपितृयज्ञियपिण्डानामनुपश्चादाहार्यंयच्छ्राद्धंतन्मासिकम्। मासि

---

(१२३) प्रयत्नः=समन्ततःइति केषुचित्पुस्तकेषु। (१२३) पितॄणां=पिण्डानां (नं)

§ (ख,) रामचन्द्रेण व्याख्यातः

मासि कर्तव्यत्वान्मासिकसञ्ज्ञमपि विदुः। प्रशस्तेन श्राद्धयोग्येन। एवं च श्राद्धान्तरेषु नामिषनियमइति दर्शितम् ॥१२३॥

(३) **कुल्लूकः**। इदानींनामनिर्वचनेनोक्तमेव पितृयज्ञानन्तर्यद्रढयति पितॄणामिति। इदंमासिकंप्रतिमासभवंश्राद्धंयस्मात्पितृयज्ञपिण्डानामनुपश्चादाह्रियते तेन पिण्डान्वाहार्यकमिदंपण्डिताजानन्ति। ततोयुक्तंपितृयज्ञानन्तर्यमस्य। तच्चामिषेण वक्ष्यमाणमांसेन प्रशस्तेन मनोहरेण पूतिगन्धादिरहितेन प्रयत्नतःकर्तव्यम्। पिण्डानांमासिकंश्राद्धमितिवा पाठःपिण्डानांपितृयज्ञपिण्डानाम्। शेषंतुल्यम् ॥ १२३ ॥

(४) **राघवानन्दः**। अत्रादौ वक्ष्यमाणपिण्डकल्पस्तदनु विप्रभोजनकल्पः इदंत्वग्निमतोजीवत्पितृकस्यापि तेन स्वकंपितर माशयेदिति वक्ष्यमाणंसंगच्छते। पार्वणे तु विप्रभोजनानन्तरंपिण्डकल्पउच्छिष्टसंनिधौ चैतत्परस्तात्पिण्डमिष्यतइति। मेधातिथिस्तएतदेवानुवदन् तत्र कर्तव्यंविधत्ते पितॄणामिति। प्रशस्तेन पाठीनरोहितावाद्यावित्यादिवक्ष्यमाणेन ॥ १२३ ॥

(५) **नन्दनः**। मासिकाख्यस्य श्राद्धस्यैवाऽयंप्रयोगविधिर्नान्यस्येत्याह पिण्डानामिति। मासिकमेवश्राद्धंपिण्डानामन्वाहार्यंपश्चात्प्रयोज्यंविदुर्बुधानापरम्। तस्यद्रव्यविशेषउत्तरार्धेनोक्तः। आमिषेण मांसेन। प्रशस्तेन भक्ष्यतयाविहितेन ॥ १२३ ॥

(६) **रामचन्द्रः**। पितॄणांपितृपक्षपिण्डानांमासिकं श्राद्धं बुधाः अन्वाहार्यसंज्ञंविदुः। अन्वाहार्यंपितृयज्ञपिण्डानामनुपश्चादाह्रियते तत्पिण्डान्वाहार्यकं। तत्श्राद्धंप्रशस्तेनामिषेणाप्रतिषेधेनकर्तव्यं। द्वौ मासौ मत्स्यमांसेनेति वचनात्॥१२३

[**रामचन्द्रः**। नेति। प्रमीतपितृःमातृकोयःश्राद्धं न निर्वपति न करोति। मासिमासि इन्दुक्षये अमायां स प्रायश्चित्ती भवेत् ॥ १ ॥]

तत्र ये भोजनीयाः स्युर्ये च वर्ज्याद्विजोत्तमाः ॥ यावन्तश्चैव यैश्चान्नैस्तान्प्रवक्ष्याम्यशेषतः ॥ १२४ ॥

(१) **मेधातिथिः**। तथाचाहतत्र तस्मिञ्छ्राद्धे ये द्विजोत्तमा ब्राह्मणाभोजनीया ये च परिहर्तव्या यावन्तोयत्संख्याकाद्वौ दैवइत्यादि यैश्चान्नैस्तिलैर्व्रीहियवैरित्यादि तदेतत्सर्वमिदानींवक्ष्यामि तच्छृणुत। एतदत्र प्राधान्येन संपाद्यम् एतेन विना श्राद्धंन कृतंभवति। अन्यच्चयच्चाङ्गजातमारादुपकारकंसंनिपत्योपकारकंवा तस्मिन्नसंपन्ने श्राद्धंन कृतंभवति। सगुणंतन्नस्यात्। अतएतेषांप्राधान्यख्यापनार्थंपुनरुपन्यासः ॥ १२४ ॥

(२) **सर्वज्ञनारायणः**। द्विजसत्तमाइति भृगुणा मुनीनांसंबोधनम्। प्रयत्नतइति क्वचित्पाठः। द्विजोत्तमाः। द्विजेषूत्तमवर्णाब्राह्मणाइति यावत् ॥ १२४ ॥

(३) **कुल्लूकः**। तस्मिञ्छ्राद्धे ये भोजनीया ये च त्याज्या यत्संख्याकायैश्चान्नैस्तत्सर्वंप्रवक्ष्यामि ॥ १२४ ॥

(४) **राघवानन्दः**। एकमप्याशयेद्विप्रमित्यत्रैकत्वविशिष्टब्राह्मणमात्रंप्राप्तं। श्राद्धविशेषे तन्मत्याचक्षाणः प्रतिजानीते तत्रेति। तत्र पिण्डपितृयज्ञे पार्वणश्राद्धे च। ये यत्स्वरूपाः। यावन्तः सङ्ख्ययायैर्मुन्यन्नाद्यैरित्यर्थः ॥ १२४॥

(६) **रामचन्द्रः**। तत्र श्राद्धे ये भोजनीया भोजनार्हाः स्युः यावन्तोयत्सङ्ख्याकाब्राह्मणाः यैरन्नैःसंस्कार्यास्तानशेषतःप्रवक्ष्यामि ॥ १२४ ॥

द्वौ दैवे पितृकार्ये त्रीनेकैकमुभयत्र वा ॥ भोजयेत्सुसमृद्धोऽपि न प्रसज्जेत विस्तरे ॥ १२५ ॥

(१) **मेधातिथिः**। यद्यपि प्रतिज्ञातस्य वस्तुनस्तेनैव क्रमेण विशेषकथनंयुक्तं तथापीह स्वल्पवक्तव्य-

त्वाद्भोजनीयाइतिप्राप्तंपरित्यज्यसंख्यानिर्देशोऽने न क्रियते। देवानुद्दिश्य द्वौब्राह्मणौ भोजयेत्। पितृणांकृत्ये त्रीनु-भयत्र वा दैवएकंपित्र्येचैकं यद्यपिपित्र्यइत्यत्रपितुरिदमितिपितृशब्देन देवताचोदना तथापि पितृपितामहप्रपितामहा उद्देश्याः। तत्रैकैकस्यैकैकं भोजयेत्। नत्वेवैकं सर्वेभ्यः पृथक्पृथग्देवतात्वात्। उक्तंच गृह्यकारेण नत्वेवैकंसर्वेषांपिण्डैर्व्या-ख्यातमिति। यथैकः पिण्डः सर्वेभ्योननिरूप्यते तथैव ब्राह्मणोऽपिनभोज्यतइत्यर्थः। इहापिवक्ष्यति। निमन्त्रयेत्र्यवरा-निति। भोजनार्थमेव तन्निमन्त्रणंनादृष्टार्थम्। अतश्च पितृकृत्ये त्रींस्त्रीनितिद्रष्टव्यम्। तथाचाह नचावरान्भोजयेदिति एवंच कृत्वैकैकमपिविद्वांसमित्येतदप्येवमेवद्रष्टव्यमेकैकस्यैकैकमिति। अपिच नैवात्रैकैकमुभयत्रेत्येतद्विधीयते। वि-स्तरप्रतिषेधार्थोऽयमनुवादः। यथा विषंभक्षय माचास्य गृहे भुङ्क्थेति यथेवंद्वौदैवइत्येषोऽपि विधिर्नस्यादस्याप्यन्यार्थतयो-पपत्तेः। अथायंविधिरप्राप्तत्वादेकैकमित्येषोऽपि कस्मान्नभवति। अत्राह माभूद्द्वयोरेकोऽपि विधिः। कुतस्तर्हि संख्या-वगमोनिमन्त्रयेत त्र्यवरानिति। ननु तत्रदैवग्रहणंनास्ति स्मृत्यन्तरात्तर्हि संख्यावगमः अयुजोवायथोत्साहमितियुग्मान्दै-वइति। यदि वायंसंख्याविधिः स्याद्विस्तरप्राप्त्यभावात्प्रतिषेधोऽनर्थकः। तस्माद्यावद्भिर्ब्राह्मणैर्भोजितैर्विस्तरे येदोषा-स्ते न भवन्ति। अत्राह माभूद्द्वयोरेकोपि तावन्तोभोजनीयाः। पित्र्येऽयुग्माः दैवेतुद्वावेव अतिसमृद्धोऽप्यत्यर्थमाढ्योऽपि। न प्रवर्तेत विस्तरे। नचायमदृष्टार्थोविस्तरप्रतिषेधः॥ १२५॥

(२) सर्वज्ञनारायणः। त्रीन्पित्रादित्रयार्थंक्रमात्एकैकमिति पित्रादित्रयोद्देशेनैकः वैश्वदेवार्थंचैकमिति। एवंयदा त्रयःपित्रर्थं तदा वैश्वदेवेऽपि द्वावेवेति नियतम्। विस्तरे स्मृत्यन्तरोक्ते एकैकार्थेत्रयस्त्रयइत्यादौ॥ १२५॥

(३) कुल्लूकः। अत्र यद्यप्युद्देशक्रमेण ये भोजनीयाइति वक्तुमुचितंतथाप्यल्पवक्तव्यत्वाद्ब्राह्मणसंख्यामाह द्वा-विति। देवश्राद्धे द्वौ ब्राह्मणौ पितृपितामहप्रपितामहानांत्रीन्ब्राह्मणानथवा दैवएकंपित्रादित्रिके चैकंब्राह्मणंभोजयेत्। उक्ता-तिरिक्तभोजनसमर्थोऽपि नाधिकभोजनेषु प्रवर्तेत। मेधातिथिस्त्वाह। पितृकृत्ये त्रीनिति पितुस्त्रीन्ब्राह्मणान्पितामहस्य त्रीन्ब्राह्मणान्प्रपितामहस्य त्रीन्ब्राह्मणान्भोजयेत्। एकैकमुभयत्रेति दैवएकंपित्रादित्रयस्य चैकैकम्। नत्वैकंपित्रादि-त्रयस्य नत्वेवैकंसर्वेषांपिण्डैर्व्याख्यातमित्याश्वलायनगृह्यविरोधात्। यथैकः पिण्डः पित्रादित्रयस्य न निरूप्यते तथैको-ब्राह्मणो न भोजयितव्यइत्यर्थः। तस्मान्नपित्रादित्रयस्यैकब्राह्मणभोजनं तदसत्। गृह्यकारेणैव नत्वेवैकं सर्वेषांपिण्डै-र्व्याख्यातमिति पठित्वा काममनाद्येइत्यभिहितम्। अस्यार्थः बहुपित्रादिदेवताकश्राद्धानामाद्यंसपिण्डीकरणमभिमतंतद्य-तिरिक्तश्राद्धे काममेकः पित्रादीनांब्राह्मणइत्यर्थः। अथवाऽनाद्येऽदनीयद्रव्याभावएकोऽहि भोजयितव्यः। उभयत्रापि व्याख्याने पार्वणादौ पित्रादित्रयस्यैकब्राह्मणभोजनं गृह्यकृतैवोक्तम्। वसिष्ठोपि यद्येकंभोजयेच्छ्राद्धे दैवतन्त्रंकथंभवे-त्। अन्नंपात्रे समुद्धृत्य सर्वस्य प्रकृतस्यचदेवतायतने कृत्वायथाविधि प्रवर्तयेत्। प्रास्येदन्नंतदग्नौवादद्याद्वाब्रह्मचारिण-इति। सर्वेभ्यएकब्राह्मणभोजनमाह। तस्माद्यथोक्तैवव्याख्या प्रथमे वावशब्दइत्यनेन विस्तारइति प्राप्ते छन्दःसमान-त्वात्स्मृतीनांसर्वे विधयश्छन्दसिविकल्पन्ते इति विस्तरइतिरूपम्॥ १२५॥

(४) राघवानन्दः। प्रतिज्ञांव्याकरोति द्वाविति। पितृकृत्ये पित्रुद्देश्यककृत्ये। त्रीन् पितृपितामहप्रपितामहान्। प्रत्येकंतान्प्रतित्रींस्त्रीनिति मेधातिथिः। तेन नव। अथवा पितृकृत्यावच्छेदे त्रीन्। तदुक्तम्। यथैकःपिण्डः सर्वेभ्योन निरूप्यते। तथैवैकब्राह्मणोपि न भोजनीयः। मातामहानामप्येवं श्राद्धंकुर्याद्विचक्षणइत्युक्तेः। एवंमातामहपक्षे दैवे पि-

---

* भोजनीया=योजनीया (अ)

ध्ये च श्रद्धया पितृुद्देशेन द्रव्यत्यागंब्राह्मणस्वीकारपर्यन्तंश्राद्धं । अन्यत्र भाक्तमतःआमावासिकश्राद्धं सर्वश्राद्धप्रकृतिः बहुद्रव्यसंपत्तिमानपि बहुब्राह्मणादि न कुर्यादित्याह । नेति ॥ १२५ ॥

(५) नन्दनः । यावन्तइत्येतद्विवृणोति द्वौदैवइति । विस्तरेसंख्याभूयस्त्वे ॥ १२५ ॥

(६) रामचन्द्रः । ब्राह्मणसङ्ख्यामाह द्वाविति दैवे विश्वेदेवनिमित्तंद्वौ विप्रौ पितृकृत्ये त्रीन् पित्रादिस्थाने त्रयस्त्रयः विप्राज्ञेयाः । एकैकंमुभयत्र वा पितॄणां एकमेकंवा । विश्वेषांदेवानांवा एकंएकंब्राह्मणंभोजयेत् । विस्तरे नम्रसज्येतये च द्विजावर्ज्यास्युर्वर्जयेत्तान् उक्तान्भोजयेद्विप्रदोषास्ते न भवन्ति ॥ १२५ ॥

सत्क्रियांदेशकालौ च शौचंब्राह्मणसंपदः ॥ पञ्चैतान्विस्तरोहन्ति तस्मान्नेहेत विस्तरम् ॥ १२६॥

(१) मेधातिथिः । किंतर्हि एतान्दोषानापादयति । विस्तारोनेष्यते । यदि तु शक्यन्ते सत्क्रियादयउपपादयितुंतदा यथोत्साहंसत्क्रियाऽन्नसंस्कारविशेषः । देशोदक्षिणप्रवणादिरवकाशेषुचोक्षेष्वितिवक्ष्यमाणः । कालः अपराह्णो मध्यान्हाच्चलिते सूर्यइति । शौचमात्मब्राह्मणप्रेष्यगतम् । ब्राह्मणानांसंपत् गुणवद्ब्राह्मणलाभः । एतेगुणाअव यंसंपाद्याः । तेच विस्तरेण नश्यन्ति । विस्तारोवैगुण्यम् । ब्राह्मण बहुत्वे चासौ प्रसज्जति । तस्मान्नेहेत न कुर्यात् ॥ १२६ ॥

(२) सर्वज्ञनारायणः । सत्क्रियांपूजांब्राह्मणानां देशःशुचिः । कालोऽमावास्यादिः । शौचंदातृग्रहीत्रोः । ब्राह्मणसंपदंब्राह्मणगुणान् । तदुपवेशमानादेशप्राप्तेस्तावद्ब्राह्मणार्चानुरोधेन कालप्राप्तेःश्राद्धासंभवाद्देशकालौ हन्तीत्युक्तं । तस्मान्नेहेतेऽतिवदत्सत्क्रियादिसंभवे बहुत्वंप्रशस्तमितिदर्शयति । अतएव नवावरान्भोजयेदिति गौतमः ॥ १२६ ॥

(३) कुल्लूकः । सत्क्रियांब्राह्मणस्य पूजांदेशंदक्षिणप्रवणत्वादिवक्ष्यमाणंकालमपराह्णंशौचंश्राद्धकर्तृभोक्तृब्राह्मणप्रैष्यगतंगुणवद्ब्राह्मणालाभंच ब्राह्मणविस्तारोनाशयति । तस्माद्ब्राह्मणविस्तारंन कुर्यादिति सत्क्रियादिविरोधतोब्राह्मणविस्तारनिषेधात्सत्क्रियादिसंभवे पित्रादेरेकैकस्यापि ब्राह्मणत्रयाभ्यनुज्ञानम् । अतएव गौतमः नचावरान्भोजयेदयुजोवायथोत्साहम् । बह्वृचगृह्यकारोऽपि अथातः पार्वणश्राद्धे काम्य आभ्युदयिकएकोद्दिष्टे ब्राह्मणानित्युपक्रम्य एकैकमेकैकस्य द्वौ द्वौ त्रींस्त्रीन्वा वृद्धौ फलभूयस्त्वमित्याह द्वौद्वावित्याभ्युदयिकश्राद्धविषयंस्मृत्यन्तरेषु तथाविधानादत्राप्याभ्युदयिकमित्युपक्रमाच्च ॥ १२६ ॥

(४) राघवानन्दः । तत्रैव निन्दार्थवादमाह सत्क्रियामिति । सत्क्रियां ब्राह्मणपूजां । देशं दक्षिणप्रवणादि । कालं अपराण्हादि । शौचं तत्कर्तृभोक्त्रोः स्नानादि । ब्राह्मणसंपत् गुणवद्विप्रलाभः । एतान्पञ्च विस्तरः उक्तानांबाहुल्यं हन्तीति योजना ॥ १२६ ॥

(६) रामचन्द्रः । सत्क्रियाअन्नसंस्कारविशेषः। देशोदक्षिणाप्रवणं । कालःकुतुपादिः। शौचंआत्मब्राह्मणगतं । यद्वा मृत्तिकागोमयभस्मादिगृहोपस्करशुद्धिः । ब्राह्मणसंपदंब्राह्मणसमूहं । श्राद्धे विस्तरोबाहुल्यं एतांसत्क्रियादिपञ्च हन्ति नाशयति तस्य विस्तरंनेहेत न कुर्यात् । विस्तरंब्राह्मणानांबाहुल्यम् ॥ १२६॥

प्रथिता प्रेतकृत्यैषा पित्र्यंनाम विधुक्षये ॥ तस्मिन्युक्तस्यैति नित्यंप्रेतकृत्यैव लौकिकी ॥ १२७॥

(१) मेधातिथिः । न यथा दैवानि कर्माण्यदेवतार्थान्येवंपित्र्यंनामतत्कर्मैतत् । विधुक्षये तस्मिनयुक्तस्यैतिनित्यंप्रेतकृत्यैवलौकिकी न यथा दैवानि कर्माणि किंतर्हि प्रथिता ख्याता वेदविदाम् । प्रेतकृत्या प्रेतोपक्रिया । विधुक्षये विधुश्चन्द्रस्तस्यक्षये । अमावास्यातिथिक्षयइतिपाठान्तरम् । विधुक्षयइति तु पाठोनिर्दुष्टः । एवंहि तत्र योजनम् । पित्र्यंनामवि-

(१२७) प्रेतकृत्यैव=प्रेतकृत्योहि (नं०)

धिचोदितंकर्म क्षये गृहेतस्मिन् कर्मणि । पित्र्येयुक्तस्य तत्परस्य नित्यंकर्तुरुपतिष्ठते । प्रेतकृत्यैव तस्यापि प्रेतस्य कृत्योपकारः श्राद्धादि पुत्रैः क्रियते । पुत्रपौत्रादिसंतत्यविच्छेदः श्राद्धफलमनेन प्रकारेण प्रतिपद्यते । न च तत्फलकामस्याधिकारोनित्यत्वस्य प्रतिपादितत्वात् । अन्ये त्वधिकारान्तरमिदं संतत्यविच्छेदकामस्येच्छन्ति । लौकिकीयंकर्तव्यतास्मार्तेत्यर्थः ॥ १२७ ॥

(२) सर्वज्ञनारायणः । एषा या प्रेतमुद्दिश्य क्रिया प्रेतक्रिया क्षये चन्द्रस्यविधोःविहिता कार्यत्वेनपित्र्यंनाम पितृसंज्ञया प्रसिद्धं तस्मिन्युक्तस्यैव पुंसोनित्यमिह कर्मभूमौ लौकिकी विशिष्टलोकप्राप्तिनिमित्तप्रेतकृत्यानित्यश्राद्धरूपाएतिआगच्छति तदधिकारे सति तत्कर्तुरेवनित्यश्राद्धेऽधिकारोनान्यस्येत्यर्थः । क्वचित्प्रेतकृत्यैव लौकिकीऽति पाठः । तत्र तस्मिन्युक्तस्यैवेत्यन्वयः । केचिदत्र श्राद्धउद्युक्तस्य लौकिकी प्रेतकृत्या परायांति निवर्ततेतदकरणेऽपि प्रत्यवायाभावइत्यस्यार्थमाहुः ॥ १२७ ॥

(३) कुल्लूकः । यदेतत्पित्र्यंकर्म श्राद्धरूपंप्रथममियंप्रख्याताप्रेतकृत्यापित्रुपकारार्था क्रिया । प्रकर्षेणइतःप्रेतःपितृलोकस्थएवोच्यते । विधुक्षयेऽमावास्यायांतस्मिन्पित्र्येकर्मणि युक्तस्येतत्परस्य लौकिकी स्मार्तिकी प्रेतकृत्या पित्रुपकारार्थाक्रिया गुणवत्पुत्रपौत्रधनादिफलप्रबन्धरूपेण कर्तारमुपतिष्ठते तस्मादिदंकर्तव्यम् । गोविन्दराजेन तु विधिःक्षयइति पठितंव्याख्यातंच । योऽयंनामविधिःपित्र्यंकर्मेति । क्षये चन्द्रक्षये गृहे वातदसांप्रदायिकम् । मेधातिथिप्रभृतिभिर्गोविन्दराजादपि वृद्धतरैरनभ्युपेतत्वात्क्षयइति संबन्धक्लेशाच्च ॥ १२७ ॥

(४) राघवानन्दः । श्राद्धस्य संज्ञान्तरंकुर्वंस्तत्कर्तुरानृण्यमाह प्रथितेति । प्रथिता प्रख्याता प्रेतकृत्या पित्रुपकारार्था क्रिया । विधुक्षये अमावास्यायां लौकिकी स्मार्ता । तस्मिन्युक्तस्य श्रद्दधानस्य नित्यं पुत्रपौत्रादिफलप्रबन्धेन श्रद्दधानं कर्तारंप्रत्येतीत्यर्थः ॥ १२७ ॥

(५) नन्दनः । विस्तरवर्जने कारणान्तरमप्यस्तीत्यभिप्रायेणाह प्रथितेति । विधुक्षये चन्द्रक्षये । यत्पित्र्यंनामकर्मक्रियते साह्येषाप्रेतकृत्येति प्रथिता लोके प्रसिद्धा । प्रेताःपितृपितामहादयस्तदर्थाक्रिया प्रेतकृत्या प्रेतनिःश्रेयसकरीक्रियेतियावत् । लौकिकी लोकविदितासैषाप्रेतकृत्या । तस्मिन्विस्तरेसति । युक्तस्य सावधानस्य श्रद्दधानस्येति यावत् । इह विधुक्षये नित्यंप्रतिमासमेत्यागच्छति कर्तव्यत्वेनोपतिष्ठते हियस्मात् । किमुक्तंभवति अमावास्यायांश्राद्धंप्रेततृप्तिहेतुरिति प्रसिद्धम् । तच्च यदाकदाचिन्नक्रियते किंतु प्रतिमासमनतिपातनीयमेव प्रतिमासंविस्तरेणप्रसक्तिरतिप्रसक्तिंकदाचिदापादयेत् । तस्माद्विस्तरेण नप्रसज्जेतेति ॥ १२७ ॥

(६) रामचन्द्रः । एषा प्रेतकृतिः पितृक्रियाकर्म विधुक्षयेअमायांप्रथिता प्रसिद्धा तस्मिन्नन्वाहार्यके पित्र्ये कर्मणि नित्यंयुक्तस्य पुंसःइष्टश्राद्धे कर्मणि लौकिकक्रिया प्रेतकृत्या मृतस्यसत्कारःश्राद्धंपुत्रादिभिर्दत्ताकृतकृत्यतामेति प्राप्नोति । प्रेतकृत्यैषेति वा पाठः ॥ १२७ ॥

श्रोत्रियायैव देयानि हव्यकव्यानि दातृभिः॥ अर्हत्तमाय विप्राय तस्मै दत्तं महाफलम्॥१२८॥

(१) मेधातिथिः । श्रोत्रियःछांदसः कृत्स्नमंत्रब्राह्मणिकांशाखांअधीतेयस्तस्मैहव्यानिश्राद्धांगभोजनानिविश्वान्देवानुद्दिश्ययानिविहितानितानिदेयानि । कव्यानिपितृभ्यउद्दिश्ययानिभोजनानि । अर्हत्तमायअर्हतापूज्यतायोग्यताच । महाकुलीनःपूज्यतेमहाकुलेजातोविद्यावृत्तसंपन्नश्चतस्मैदत्तंश्राद्धादन्यदपिमहाफलं । एवंचाश्रोत्रियायदानंनिष्फलं । अश्रोत्रियायअभिजनविद्यादिगुणरहितायस्वल्पफलमर्हत्तमायमहाफलं ॥ १२८ ॥

(२) सर्वज्ञनारायणः । हव्यं वैश्वदेविकमन्नं । कव्यं पित्र्यं । अर्हत्तमाय वृत्तसंपन्नादपि पूज्याय श्रोत्रियाय ॥ १२८ ॥

(३) कुल्लूकः । छन्दोमात्राध्यायी श्रोत्रियस्तस्मैदैवपित्र्यान्नानि यत्नतोदेयानि । अर्हत्तमायश्रुताचाराभिजनादिभिः पूज्यतमाय तस्मै दत्तमहाफलंभवति ॥ १२८ ॥

(४) राघवानन्दः । ⋯वन्तइत्युक्त्वा ये भोजनीया इत्युक्तं तानाह श्रोत्रियायेति । वेदाध्यायी श्रोत्रियः । हव्यं होमउत्तराप्रतिपत्तिर्यस्य तदुपलक्षितं देवदेयं । कव्यं कवेःपुत्राहविष्मन्तःश्राद्धदेवास्तदुपलक्षितं पितृदेयं । श्रोत्रियएव श्रुताचारादिसंपन्नोर्हत्तमः ॥ १२८ ॥

(५) नन्दनः । येभोजनीया स्युर्येवर्ज्याइतियदुक्तंतच्छ्लोकद्वयेन विवृणोति श्रोत्रियायेति । तत्र हव्यग्रहणंप्रासङ्गिकं श्राद्धाङ्गवैश्वदेवविषयंवा । अर्हत्तमायपूज्यतमाय ॥ १२८ ॥

एकैकमपि विद्वांसं दैवे पित्र्ये च भोजयेत् ॥ पुष्कलंफलमाप्नोति नामंत्रज्ञान्बहूनपि ॥ १२९ ॥

(१) मेधातिथिः । यदुक्तमर्हत्तमायेतितद्दर्शयति । विद्वांसमेकमपिभोजयेत् । पुष्कलंफलमाप्नोति । विद्वत्ताचव्याख्याता । वेदार्थवेदनंयतआह नामंत्रज्ञान्बहूनपि मंत्रग्रहणंवेदोपलक्षणार्थं असंभवेपंचानांवेदविदुषामेकैकमपिविद्वांसंभोजयेदितिविध्यर्थः । पुष्कलंपुष्टंविपुलं ॥ १२९ ॥

(२) सर्वज्ञनारायणः । विद्वांसंवेदज्ञम् ॥ १२९ ॥

(३) कुल्लूकः । दैवपित्र्ययोरेकैकमपि वेदतत्त्वविदंब्राह्मणंभोजयेत् । तदापि विशिष्टंश्राद्धफलंप्राप्नोति नत्वविदुषोबहूनपि एवंच फलश्रवणाद्ब्राह्मणभोजनमेवप्रधानंपिण्डदानादिकंत्वङ्गमितिगोविन्दराजः । वयंतुपित्रुद्देशेनद्रव्यत्यागंब्राह्मणस्वीकारपर्यन्तं श्राद्धशब्दवाच्यप्रधानंब्रूमः । तदेव मनुना पिण्डान्वाहार्यकंश्राद्धंकुर्यादिति विहितं । आपस्तम्बेनतु मन्वर्थस्यैव व्याख्यातत्वात् । तदाहआपस्तम्बः तथैतन्मनुःश्राद्धशब्दंकर्मप्रोवाच प्रजानिःश्रेयसार्थंतत्र पितरोदेवता ब्राह्मणस्त्वाहवनीयार्थे मासिमास्यपरपक्षस्यापराह्णः श्रेयानिति । श्राद्धशब्दं श्राद्धमिति शब्दोवाचकोयस्यतत्तथा ब्राह्मणस्त्वाहवनीयार्थेआहवनीयवत्त्यक्तद्रव्यप्रतिपत्तिस्थानत्वात्पितरोदेवताइति नियतपितृदेवताकत्वाच्च श्राद्धस्य । देवताश्राद्धादौश्राद्धशब्दस्तु तद्धर्मप्राप्त्यर्थोगौणः कौण्डपायिनामयनइवाग्निहोत्रशब्दः । पुष्कलंफलंप्राप्नोति इति तु पुष्टतरफलार्थिनोगुणफलविधिः । सभोजनस्याङ्गत्वेऽपि तदाश्रयोनविरु⋯ः आपस्तम्बोप्यधाच्छ्राद्धंकर्मैतत्पितृदैवतम् । मन्वर्थकथयंस्तस्मान्नेदंब्राह्मणभोजनम् ॥ १२९ ॥

(४) राघवानन्दः । एवंविधानामसंपत्तावेकोपि महाफलदइत्याह एकैकमिति । विद्वांसं गायत्र्यर्थविदमित्युक्तं । विदुषअलाभे प्रतितिक्तं व्यावर्तयति नत्वेकैकमिति भावः । अमन्त्रज्ञानविदुषः ॥ १२९ ॥

(६) रामचन्द्रः । बहूनपि । अमन्त्रज्ञान् वेदाध्ययनरहितानित्यर्थः ॥ १२९ ॥

दूरादेव परीक्षेत ब्राह्मणंवेदपारगम् ॥ तीर्थं तद्धव्यकव्यानां प्रदाने सोतिथिः स्मृतः ॥ १३० ॥

(१) मेधातिथिः । नवेदपारगइत्येवभोजयितव्यः । किंतर्हिदूरात्परीक्षेत निपुणतोमातापितृवंशद्वयपरिशुद्धिज्ञानं यथोक्तं येमातृतः पितृतश्चदशपुरुषं समनुष्ठितविद्यातपोभ्यांपुण्यैश्चकर्मभिः येषामुभयतो ब्राह्मण्यंनिर्णयेयुरित्येषादूरात्परीक्षा । तथातत्त्वतोध्ययनविज्ञानकर्मानुष्ठानवेदनंच । वेदस्यपारगः समाप्तिगःवेदपारगः नवेदसंहितांब्राह्मणमात्रंवापठन्नर्हो-

भवति । अस्मादेवदर्शनात्श्रोत्रियशब्देन वेदैकदेशमप्यधीयानउच्यतइतिगम्यते । तीर्थंतद्धव्यकव्यानांतीर्थमिवतीर्थं येनोदकंग्रहीतुमवतरंतितत्तीर्थं तेनयथामार्गेणोदकार्थिनोगच्छंतउदकंलभंते एवंतादृशेनब्राह्मणेनहव्यकव्यानिपितॄन्गच्छंतीतिप्रशंसा । अन्यस्मिन्नपि इष्टापूर्तदानेनब्राह्मणोयथातिथिर्यथातिथयेत्वयमुपस्थितायनिर्विचिकित्संदीयते दत्तंमहाफलं । एवमीदृशायब्राह्मणायहव्यकव्येनिर्विचिकित्संदातव्ये महाफलेभवतः ॥ १३० ॥

(२) **सर्वज्ञनारायणः** । दूराद्दूरग्रामस्थमपि परीक्षेतानुसंदध्यात् । तीर्थमवतरणवर्त्म सोतिथिःस्मृतइति प्रसंगादवेदज्ञस्य वैश्वदेवान्तागतस्यापि अतिथित्वाभावउक्तः । यत्तुनपृच्छेद्गोत्रचरणमिति स्मृत्यन्तरउक्तम् तत्साक्षात्प्रश्ननिषेधार्थं । नतुप्रकारान्तरेणापि तदज्ञाननिषेधे तात्पर्यम् ॥ १३० ॥

(३) **कुल्लूकः** । दूरादेव पितृपितामहाद्यभिजनशुद्धिनिरूपणेन कृत्स्नशाखाध्यायिनंब्राह्मणंपरीक्षेत । यस्मात्तथाविधोब्राह्मणोहव्यादीनांतीर्थंपात्रंप्रदाने । सोतिथिरेवंमहाफलप्राप्तिहेतुत्वात् ॥ १३० ॥

(४) **राघवानन्दः** । छन्दोमात्राध्यायी पितृपितामहतः संभावित दोषोन ग्राह्यइत्याह । दूरादितिपरीक्षेत परीक्षणं दोषाभावोपलक्षिताचारादेरीक्षणम् । तीर्थं पात्रं तत्र हव्यंचतुरवत्तंजुहोतीति । कव्यं कविर्नाम पितॄणां जनकस्तस्मै । अर्हति कविरुपलक्षणं । मरीच्यादीनाम् । तस्यैव कार्यान्तरार्थं । धर्मान्तरमाह सइति प्रदाने श्राद्धस्येति शेषःएतेनातिथ्यर्चाफलमप्यसूचि ॥ १३० ॥

(५) **नन्दनः** । यतएवंतस्माद्विद्वानेवान्वेक्ष्यइत्याह दूरादिति । दूरादेव पात्रपरिग्रहकालात्पूर्वमेवविद्यादिभिः परीक्षेतेत्यर्थः । तीर्थंउत्तमपात्रम् । सोऽतिथिरतिथितुल्यः भोजनस्य पात्रंह्यतिथिः । तेनायमपिभोजनस्यपात्रमित्यर्थः । अथवाऽतिथिशब्देन कालोलक्ष्यते । यस्यतिथिर्नविद्यते सोऽतिथिः । तस्यार्हत्तमस्य पात्रस्य हव्यकव्यप्रदानकालः प्रतिपालयितव्योनास्तीत्यर्थः । तथाचमहाभारते श्राद्धस्य ब्राह्मणः कालइति ॥ १३० ॥

(६) **रामचन्द्रः** । दूरादेव ब्राह्मणं वेदपारगंपरीक्षेत पितृपितामहपूर्वकं । देवलः पुरुषत्रयविख्यातंश्राद्धे विप्रंनियोजयेत् । कीदृशं ब्राह्मणं तस्य श्राद्धस्य संबन्धीनि हव्यकव्यानि तेषां तद्धव्यानांप्रदानेतीर्थम् । तीर्थमुदकावतरणमार्गः । यथातीर्थेनोदकंप्राप्यते तथा तादृशैर्ब्राह्मणैर्हव्यकव्यानि पितॄन्गच्छन्तीति प्रशंसा । स ब्राह्मणअतिथिः स्मृतः अतिथितुल्यः ॥ १३० ॥

सहस्रं हि सहस्राणामनृचां यत्र भुंजते ॥ एकस्तान्मन्त्रवित्प्रीतः सर्वानर्हति धर्मतः ॥१३१॥

(१) **मेधातिथिः** । अनृचांअनृगर्थविदांउपलक्षणंऋचोयतोनृचानांमाम्निरेवनास्तिश्रोत्रियायैवेतिनियमात् । समासांतःछांदसत्वान्नकृतःवृत्तानुरोधाच्चएवंहिपठंति । अपिमार्षंमर्षंकुर्यान्नतुछंदोविचालयेदिति । अथवाअनृचाइतिप्रथमाबहुवचनं । अनृचाःसहस्रंयथाभुञ्जतइतिसंबन्धः । यथासहस्रंगावइति । एकःप्रीतस्तर्पितोभोजितोमन्त्रविद्वेदार्थवित्सर्वांस्तान्अनृचानर्हति स्वीकरोति । तैरभेदमापद्यते अभेदेच यत्तेषुसहस्रेषुभोजितेषुफलंतदेकस्मिन्नवाप्य पतेइत्यवगतिरुत्पद्यते । निन्देयमविदुषोविद्वद्भिभ्यर्था नपुनःसहस्रसंख्यातानामेकस्यचसमफलत्वमुच्यते । विदुषांविधानादविदुषांमाम्निरेवनास्ति अथाप्यसतिविदुषिश्रोत्रियायैवेत्यनेनपाक्षिकीअविदुषोपिमाम्निराशंक्यते तथापिविस्तरस्यप्रतिषेधोमाभूदित्यतोयथाश्रुतार्थसंभवः ॥ १३१ ॥

---

(१) रेव=रिव (अ)

(१३१) सहस्रंहि=सहस्राणि (ब, र)

(२) सर्वज्ञनारायणः । आनृचाममन्त्राणांयत्र येषु हव्यकव्येषु तान् तानि हव्यकव्यानि लिङ्गव्यत्ययश्छान्दसः । भुक्तोनियुक्तः । धर्मत औचित्येन ॥ १३१ ॥

(३) कुल्लूकः । यत्र श्राद्धेब्राह्मणानामवेदविदांदशलक्षाणिभुञ्जते तत्रैकोवेदविद्भोजनेन परितुष्टोधर्मतोधर्मोत्पादनेन तान्सर्वानर्हति स्वीकर्तुंयोग्योभवति । तद्भोजनजन्यंफलंजनयतीत्यर्थः । छान्दसत्वादेकवचनम् । अथवा बहुवचनानां-स्थाने सहस्रमिति मनोरभिमतम् । गोविन्दराजस्त्वाह सहस्रंगच्छन्तुभूतानीति वेदे ॥ १३१ ॥

(४) राघवानन्दः । श्राद्धे वेदपारगं विदधत्फलतः अनृचांदशलक्षतस्तस्याधिक्यमाह सहस्रमिति । अर्हति दशलक्ष ब्राह्मणभोजनजन्यफलदइत्यर्थः । धर्मतः अदृष्टबलतः प्रीतःश्राद्धेन तुष्टः ॥ १३१ ॥

(५) नन्दनः । इदानीमविद्वद्विदुषोर्वैषम्यमुक्तार्थवादस्थापनमाह सहस्राणीति । यत्र हव्यकव्यदानकर्मणि । अनृचाममन्त्रविदाम् । सहस्राणांसहस्राणिभुञ्जते । मन्त्रविद्वेदार्थवित् । भुङ्क्तेचेतिविपरिणामः । तत्रतान्भुक्तवतः सर्वानृचः समन्त्रविद्धर्मतोऽर्हति । तस्य तेषाञ्चभोजनं फलतस्तुल्यमित्यर्थः । पात्रे खलु दात्रात्वमलंमृज्यते तच्च शुद्धे तस्मिंल्लक्ष्यते प्रमार्ष्टुंनत्वशुद्धइति १३१ ॥

(६) रामचन्द्रः । अनृचांअनृचपाठानां यत्सहस्रेषु भोजितेषु फलंतदेकस्मिन्नवाप्यते ॥ १३१ ॥

ज्ञानोत्कृष्टाय देयानि कव्यानि च हवींषि च ॥ न हि हस्तावसृग्दिग्धौ रुधिरेणैव शुध्यतः ॥ १३२

(१) मेधातिथिः । ज्ञानेनविद्ययाउत्कृष्टा अधिकाःतेभ्योदेयानि कव्यानि । तैर्यदर्थंश्राद्धमारब्धंसंदीमान् तत्प्रायः पिण्डान्यमपुरुषैराश्यते । अयमसौ हस्तरुधिरदिग्धोपमार्थःरुधिरदिग्धौरुधिरेणोपमृज्यमानावधिकतरंरज्येते । ननिर्मलौभ-वतः । एवमविद्वान्ब्राह्मणःभोज्यमानःपितॄनधोनयतितरां पाठान्तरंप्रेत्येति भोक्तुरेवप्रेत्यता । नाविदुषादेवपित्र्ययोर्भोक्त-व्यम् ॥ १३२ ॥

(२) सर्वज्ञनारायणः । नहिश्राद्धाकरणजन्यप्रत्यवायित्वमवेदज्ञतामत्यवाययुक्तविप्रभोजनेन शुध्यतीत्यर्थः १३२

(३) कुल्लूकः । विद्ययोत्कृष्टेभ्योहव्यानि कव्यानि च देयानि न मूर्खेभ्यः । अर्थान्तरन्यासोनामालङ्कारः । नहि रक्ताक्तौ हस्तौ रक्तेनैव विशुद्धौ भवतः किंतु विमलजलेन एवंमूर्खभोजनेन जनितंदोषं न मूर्खएवभोजितोपहन्ति किं-तु विद्वान् ॥ १३२ ॥

(४) राघवानन्दः । अनृचांफलराहित्यंदृष्टान्तेन वदन्वेदज्ञमनुवदति ज्ञानेति । ज्ञानंवेदार्थज्ञानमुत्कृष्टंयस्य तस्मै । कव्यानि पितृदेयानि हवींषि देवदेयानि असृग्दिग्धौ रुधिरलिप्तौ रुधिरेण न शुध्यतएवमज्ञोऽफलदइति भावः ॥ १३२ ॥

(५) नन्दनः । दृष्टान्तेन सूचयन्नाह ज्ञानेति ॥ १३२ ॥

(६) रामचन्द्रः । ज्ञानोत्कृष्टाय विप्राय कव्यानि पितॄणांदेयानि हवींषिदेवानां देयानि । असृग्दिग्धौअसृक्स्पृष्टौ हस्तौ रुधिरेण नैव शुध्यतः । रुधिरेणैव प्रक्षालितंन शुध्यतीत्यर्थः ॥ १३२ ॥

यावतोग्रसते ग्रासान्हव्यकव्येष्वमन्त्रवित् ॥ तावतोग्रसते प्रेत्य दीप्तशूलर्ष्ट्ययोगुडान् ॥ १३३ ॥

---

(१३३) दीप्तशूलर्ष्ट्ययोगुडान्=दीप्ताञ्छूलर्ष्ट्ययोगुडान् (क, ख, च, ज, झ, ट)

=दीप्तान्स्थूलानयोगुडान् (ख, ग, ञ)

(१) **मेधातिथिः** । सत्यपिप्रकरणेवाक्याद्भोक्तुरयंदोषानुवादः । तथाचोक्तं तस्मादविद्वान्बिभियात् यस्मात्तस्मात्प्रतिग्रहादिति । शूलर्ष्टयोआयुधविशेषेअयोलगुडःआयसःपिण्डः व्यासदर्शनात्तुभोजयितुरयंदोषोनभोक्तुः नपितॄणांनतावन्मृतानामन्यकृतेनप्रतिषेधातिक्रमेणदोषसंबन्धोयुक्तः कृताभ्यागमादिदोषापत्तेः यदिहिपुत्रेणतादृशोब्राह्मणोभोजितःकोपराधोमृतानांननुचोपकारोपिपुत्रकृतःपितॄणांअनेनन्यायेननप्राप्नोति । नप्राप्नुयाद्यदितादर्थ्येनश्राद्धादिनोदितंस्यात् । इहतुनास्तिचोदना पितुरुपकारकामेनैवकर्तव्यंस्यात् श्येनवत् । यत्तुतावतोग्रसतेप्रेतइतितद्भोजयितृसंबन्धेप्युपपद्यते । यस्यब्राह्मणईदृशःश्राद्धंभुङ्क्तेसइदंफलमाप्नोतिइतियुक्तःसंबन्धः । प्राकरणिकश्चायंअविद्वद्भोजनप्रतिषेधस्तदतिक्रमणेकर्मवैगुण्यंतद्वैगुण्येचश्राद्धाधिकारान्निवृत्तिरेवदोषः । पितॄणांश्राद्धोपकाराल्लाभःततोपिविभ्यतिक्रमेपुत्रस्ययुक्तःप्रत्यवायः किंतर्हितद्भगवतोव्यासस्यवचनं । ग्रसतेयावतःपिंडान्यस्यवैहविषोविदः । ग्रसतेतावतःशूलान्गत्वावैवस्वतक्षयं ॥ १३३ ॥

(२) **सर्वज्ञनारायणः** । एतेनामन्त्रज्ञस्य भोक्तुरपि प्रत्यवायितोक्ता । ऋष्टिः खड्गः अयोगुडोलोहगुडकः ॥ १३३ ॥

(३) **कुल्लूकः** । अविद्वन्निन्दया विद्वद्दानमेवोक्तंवक्रोक्त्यास्तौति यावतइति । यत्सङ्ख्याकान्ग्रासान्हव्यकव्येष्ववेदविद्भुङ्क्ते तत्सङ्ख्याकानेव प्रकृतश्राद्धकर्ता ज्वलितशूलर्ष्ट्याख्यायुधलोहपिण्डान्ग्रसते । श्राद्धकर्तुरेवेदमविद्वद्दानफलकथनम् । तथाच व्यासः । ग्रसते यावतः पिण्डान् यस्यवै हविषोऽनृचः । ग्रसते तावतः शूलान्गत्वा वैवस्वतक्षयम् ॥ १३३ ॥

(४) **राघवानन्दः** । न केवल मेवं प्रत्यवायोपि स्यादित्याह यावतइति । यावतोयावत्सङ्ख्याकान् पिण्डाकारान् ग्रासान् । अमन्त्रविदवेदाध्यायी भुङ्क्ते तावतः शूलर्ष्टयोगुडान् शूलाकारा ऋष्टिरस्त्रं तया युक्तान् लोहमयान् गुडान् गुडपिण्डाकारान् ग्रासान् तावतः तावत्सङ्ख्याकान् प्रेत्य श्राद्धकर्तेति शेषः । तथा व्यासः ग्रसते यावतः पिण्डान् यस्य वै हविषोऽनृचः । ग्रसते तावतः शूलान् गत्वा वैवस्वतक्षयमिति ॥ यत्तदोर्नित्यसंबन्धात् ॥ १३३ ॥

(५) **नन्दनः** । न केवलंभोजयितैव भोजने ज्ञानहीनो वर्जनीयःकिन्तुज्ञानहीनेनापिस्वयमेव सुतरांभोजनंवर्जनीयमित्याह । यावतइति । दीप्तानग्निमयान । अयोगुडानगुडोह्निमुखंफलंशराग्रम् ॥ १३३ ॥

(६) **रामचन्द्रः** । अमन्त्रविद्विप्रःवेदाध्ययनरहितः । हव्यकव्येषु यावतःपिण्डान्ग्रसते ग्रासान् यावतोग्रसते । तावतःदीप्तान्स्थूलान् अयोगुडान् अयोलगुडान्ग्रसते । यस्य ब्राह्मणईदृशः श्राद्धोभुङ्क्ते सइदंफलंप्राप्नोतीतिवा । अविद्वान्भोजने प्रतिषिद्धः ॥ १३३ ॥

ज्ञाननिष्ठाद्विजाः केचित्तपोनिष्ठास्तथापरे ॥ तपःस्वाध्यायनिष्ठाश्च कर्मनिष्ठास्तथापरे ॥ १३४ ॥

(१) **मेधातिथिः** । सर्वगुणेभ्योविद्यांप्रशंसितुंगुणविभागकथनप्रशंसाचविदुषेदानार्था । ज्ञानेविद्यायांनिष्ठा । प्रकर्षोयेषांतेज्ञाननिष्ठाः ज्ञानाधिकारिणः गमकत्वाद्व्यधिकरणानामपिबहुव्रीहिःभृशमभ्यस्तवेदार्थास्तत्पराएवमुच्यन्ते । एवंसर्वत्रनिष्ठान्तेषुद्रष्टव्यं । तपश्चस्वाध्यायश्चेतिद्वन्द्वगर्भोबहुव्रीहिः तपांसिचान्द्रायणादीनिस्वाध्यायोवेदाध्ययनं कर्माण्यग्निहोत्रादीनि । सर्वएतेगुणाःसर्वेषुसमुच्चिताइतिद्रष्टव्याः । नहिएकगुणःसद्भावइतरगुणहीनस्यपात्रतामापादयति किंतुकस्यचित्कोपिप्रकर्षउच्यते । यथाचनिष्ठाशब्दःसमाप्तिवचनःप्रकर्षंलक्षयति तस्मिन्निष्ठस्तत्परउच्यते सर्वगुणसद्भावेपियदितत्रप्रकर्षोस्त्येवगुणाःमध्यमाःतथाचभवत्यैवपात्रंअप्रकृष्टेत्वेकस्मिन्सर्वगुणसद्भावेपिनपात्रतांलभंते । समुच्चयश्चव्याख्यायते तेनज्ञानरहितस्यकर्मानुष्ठानसद्भावइत्युक्तंद्वितीये । अन्यैस्तुज्ञाननिष्ठपरिव्राजकोव्याख्यायते । तस्यहिआत्मज्ञानाभ्यासः कर्मन्यासेनविशेषतोविहितः तपोनिष्ठोवानप्रस्थःसहितापक्षइत्याख्यायते । ग्रीष्मेपञ्चतपास्तुस्यादिति । तपःस्वाध्यायनि-

ष्ठाःब्रह्मचारिणःकर्मनिष्ठागृहस्थाःअतश्चनाश्रमिणोनिषिध्यन्ते । तथाचपौराणिकाः चातुराश्रम्यबाह्येभ्यःश्राद्धंनैवप्रयोजयेत् ॥ १३४ ॥

(२) सर्वज्ञनारायणः । ज्ञानमात्मज्ञानं तन्निष्ठा यतयः । तपश्चान्द्रायणादि तन्निष्ठा वनस्थाः । तपोगुरुशुश्रूषादि स्वाध्यायोवेदाध्ययनं तन्निष्ठाब्रह्मचारिणः । कर्म यज्ञादि तन्निष्ठा गृहस्थाः । अत्राश्रमिवाचि यतयइतिपदत्यागेन ज्ञाननिष्ठादिपदेन तदभिधानमाश्रमान्तरवर्तिनां ज्ञाननिष्ठत्वादिगुणवतांप्राप्त्यर्थम् । एतेन वानप्रस्थानांश्राद्धभोजनं गम्यते ॥ १३४ ॥

(३) कुल्लूकः । केचिदात्मज्ञानपराब्राह्मणाभवन्ति । अन्ये प्राजापत्यादितपः प्रधानाः । अपरे तपोध्ययननिरताः । इतरे यागादिपराः ॥ १३४ ॥

(४) राघवानन्दः । ज्ञानोत्कृष्टाय देयानि कव्यानि च हवींषि चेत्युक्तम् । तत्रैव व्यवस्थितविषयार्थंतत्पात्राण्यनुवदन्व्यवस्थितिमाह ज्ञाननिष्ठाइतिद्वाभ्यां । ज्ञानमध्यात्मं तपश्चान्द्रायणादि स्वाध्यायोवेदाभ्यासः । कर्माग्निहोत्रादि तन्निष्ठास्तदेकशरणाः ॥ १३४ ॥

(५) नन्दनः । हव्यकव्ययोः पात्रविशेषे नियमंवक्तुंपात्रवैविध्यंतावदाह ज्ञानेति । ज्ञाननिष्ठाःअध्यात्मज्ञानिनः । तपोनिष्ठाःकृच्छ्रचान्द्रायणादिप्रधानाः । स्वाध्यायज्ञाननिष्ठा मन्त्रब्राह्मणार्थविदः कर्मनिष्ठायाज्ञिकाः ॥ १३४ ॥

(६) रामचन्द्रः । द्वाभ्यामाह ज्ञाननिष्ठाःइति । ज्ञाननिष्ठाः संन्यासिनः । तपोनिष्ठाः वानप्रस्थाः । तपःस्वाध्यायनिष्ठा ब्रह्मचारिणः । कर्मनिष्ठाः गृहस्थाः ॥ १३४ ॥

ज्ञाननिष्ठेषु कव्यानि प्रतिष्ठाप्यानि यत्नतः ॥ हव्यानि तु यथान्यायंसर्वेष्वेव चतुर्ष्वपि॥१३५॥

(१) मेधातिथिः । गुणविभागेप्रयोजनमाह । कव्यानिपितॄनुद्दिश्ययद्दीयतेतत्कव्यं । तानिज्ञाननिष्ठेषुप्रतिष्ठाप्यानिप्रदेयानीत्यर्थः । यत्नवचनात्तदभावेचतुर्ष्वपिहव्यवत् पित्र्ये ज्ञाननिष्ठाः पात्रतमाः । उक्तंहिपात्राणामपितत्पात्रंइति । अन्नदानमविशेषेणचतुर्भ्योपिइति श्लोकार्थः । न्यायः शास्त्रीयोविधिः ॥ १३५ ॥

(२) सर्वज्ञनारायणः । किंतुवन्याहारेणैव तत्कर्तव्यमिति यत्नतइत्यसंभवेऽपीत्यर्थः ॥ १३५ ॥

(३) कुल्लूकः । ततः किमतआह ज्ञानेति । ज्ञानप्रधानेभ्योपिप्यर्थान्नानि यत्नाद्दातव्यानि । देवान्नानि पुनर्न्यायावधृतार्थशास्त्रानुसारेण चतुर्भ्योऽपि ॥ १३५ ॥

(४) राघवानन्दः । प्रतिष्ठाप्यानि देयानि । यथान्यायं पूर्वपूर्वालाभे उत्तरोत्तरस्य प्राप्ततेति ॥ १३५ ॥

(६) रामचन्द्रः । ज्ञाननिष्ठेषु ज्ञाननिष्ठादिषु सर्वेषु चतुर्षु यत्नतः कव्यानि हव्यानिच यथान्यायंयथाक्रमंप्रतिष्ठाप्यानि देयानीत्यर्थः ॥ १३५ ॥

अश्रोत्रियः पिता यस्य पुत्रः स्याद्वेदपारगः॥अश्रोत्रियोवा पुत्रः स्यात्पिता स्याद्वेदपारगः॥१३६॥

(१) मेधातिथिः । संशयोपन्यासार्थः श्लोकः ॥ १३६ ॥

(२) सर्वज्ञनारायणः । अश्रोत्रियोऽनधीतवेदः ॥ १३६ ॥

(३) कुल्लूकः । योऽश्रोत्रियपितृकः स्वयंचश्रोत्रियः यः श्रोत्रियपितृकः स्वयंवाऽश्रोत्रियः ॥ १३६ ॥

(४) राघवानन्दः । तत्रैव प्रासङ्गिकंविशेषमाह अश्रोत्रियइतिद्वाभ्यां । वेदपारगः शाखाध्यायी ॥ १३६ ॥

(५) नन्दनः । एवंतावद्गुणवान्पात्रमित्युक्तम् इदानींगुणवतोनिर्गुणपितृकाद्गुणोऽपिगुणवत्पितृकःपात्रमित्यर्थाधिकश्लोकेनाह अश्रोत्रियइति । पुत्रोऽश्रोत्रियस्य ॥ १३६ ॥

(६) रामचन्द्रः । यस्य पिताअश्रोत्रियः मूर्खःस्यात् पुत्रःवेदपारगःस्यात् । यद्वा पुत्रअश्रोत्रियः पिता वेदपारगः स्यात् । अनयोस्तयोर्मध्ये यस्य श्रोत्रियःपिता स्याद्वेदपारगः स्यात् । तस्यपुत्रंज्यायांसंपूज्यंजानीयादित्यर्थः आत्मा वै जायते पुत्रइति श्रुतेः । इतरः पुत्रोवेदपारगोमन्त्रपूजनार्थंसत्कारमर्हति ॥ १३६ ॥ १३७ ॥

ज्यायांसमनयोर्विद्याद्यस्य स्याच्छ्रोत्रियः पिता ॥ मन्त्रसंपूजनार्थंतु सत्कारमितरोऽर्हति ॥१३७॥

(१) मेधातिथिः । यस्यपिताअपाठः स्वयंतुवेदपारगः सांगवेदाध्यायी । इतरस्यतुपितावेदपारगः स्वयंतुमूर्खः । तयोः कः श्रेयानितिसंशयंकृत्वासिद्धान्तमाह । अनयोः स्वयंश्रोत्रियपितृमूर्खः स्वयंमूर्खःपितृश्रोत्रिययोः स्वयंमूर्खःपितृश्रोत्रियंज्यायांसंप्रशस्यंश्राद्धेयोग्यंजानीयात् । यस्तस्यश्रोत्रियः पिताइतरोमन्त्रपूजनार्थंनब्राह्मणबुद्ध्याकिंतुमन्त्रास्तेनयेधीतास्तेतत्रपूज्यंते नमन्त्राणांश्राद्धेपूजाविहिता तस्मान्नासौभोजयितव्यः । श्लोकद्वयेनसंशयसिद्धान्तरूपोपन्यासेनार्थवादभंग्या पितृश्रोत्रियत्वंच श्राद्धभोजनेकारणमित्येतदुच्यते नकेवलमात्मश्रोत्रियत्वं नतुस्वयंअनधीयानस्यपितृश्रोत्रियत्वेनभोज्यताविधियते तदुक्तंदूरादेवपरीक्षेतेति । अत्राध्ययनपरीक्षापुरुषद्वयविषयानेन नियम्यते । जातिगुणपरीक्षातुततोधिकपुरुषविषयापि । यथाअतस्तस्यैवविशेषाभिधानार्थत्वादपौनरुक्त्यं ॥ १३७ ॥

(२) सर्वज्ञनारायणः । मन्त्रसंमानना वेदपूजासत्कारं पूजामात्रम् हव्यकव्यानि श्रोत्रियायैव देयानीत्युक्तत्वात् पितृश्रोत्रियत्वंश्रुतिमात्रपरं ॥ १३७ ॥

(३) कुल्लूकः । तयोः कः श्रेष्ठइत्युपन्यस्य विशेषमाह ज्यायांसमिति । अनयोः पूर्वश्लोकनिर्दिष्टयोर्मध्ये श्रोत्रियपुत्रंस्वयमश्रोत्रियमपि ज्येष्ठंजानीयात् । पितृविद्यादरपरमिदम् । यःपुनरश्रोत्रियस्य पुत्रःस्वयंच श्रोत्रियः सतदधीतवेदपूजनार्थंपूजामर्हति वेदएवतद्द्वारेण पूज्यतइति पुत्रविद्यादरपरमिदम् । तस्माद्वचनभङ्ग्या श्रोत्रियपुत्रः स्वयंच श्रोत्रियः श्राद्धे भोजयितव्यइत्युक्तम् । नतु श्रोत्रियपुत्रस्य स्वयमश्रोत्रियस्यैवाभ्यनुज्ञानंश्रोत्रियायैव देयानीति विरोधात् । एवंच दूरादेव परीक्षेतेति विद्याव्यतिरिक्ताचारादिपरीक्षार्थत्वेनावतिष्ठते ॥ १३७ ॥

(४) राघवानन्दः । अनयोरश्रोत्रियश्रोत्रियपुत्रयोः । मन्त्रोवेदस्तस्य संपूजनमेव अश्रोत्रियपुत्रपूजा । अतः श्रोत्रियपुत्रस्यैव पात्रता । एतस्यैव विशिष्टसंस्कारवत्वादित्यर्थः ॥ १३७ ॥

(५) नन्दनः । श्रोत्रियपुत्रंज्यायांसंविद्यात् । पात्रतायामिदंनपूज्यतायामित्युत्तरार्धेनोक्तम् । इतरोऽश्रोत्रियः॥१३७॥

नश्राद्धे भोजयेन्मित्रंधनैः कार्योऽस्य सङ्ग्रहः॥नारिंन मित्रंयंविद्यात्तंश्राद्धे भोजयेद्द्विजम्॥१३८॥

(१) मेधातिथिः । सत्यामेवश्रोत्रियत्वादिपूर्वगुणसंपदि मैत्र्यादिनिमित्तेन प्रतिषेधोयं । मित्रंसमानसुखदुःखआत्मनिर्विशेषं नश्राद्धेभोजयेत् । धनैरन्यैरस्यमित्रस्यस्वीकारोमैत्रीकरणं । अविच्छेदोवा मैत्र्यंउपकारइतियावत् । नकेवलंनमित्रंभोजयेत् । यावदरिंशत्रुमपि । नारिंनमित्रंयंविद्याद्यनरागेनद्वेषेनचान्यःकश्चित्संबंधोयत्रप्रीतिनिमित्ताकार्यार्थताशंक्यते अरिमित्रयोःप्रदर्शनार्थत्वात्तथासंबंधाशंकयैवमातामहादयोऽनुकल्पपक्षोक्ताः । शत्रावपिमैत्रीकरणार्थंदानसंभवायनापदिमैत्रीकरणमितिसंग्रहः । अरिग्रहणंनकर्तव्यंविस्पष्टार्थंभविष्यति ॥ १३८ ॥

(२) सर्वज्ञनारायणः । मित्रमिति सौजन्यरूपमैत्रसिद्ध्यर्थमित्यर्थः । नारिमित्यनेनवैरिणोश्राद्धभोजनीयतानिषिद्धा नमित्रमितिमैत्रीनिमित्तकत्वाभावोन्यमिसाक्षिककृतवैधमैत्री कर्मणोमित्रस्य ॥ १३८ ॥

(३) कुल्लूकः । श्राद्धे न मित्रंभोजयेत् । धनान्तरैरस्य मैत्री संपादनीया न शत्रुं न च मित्रं यज्जानीयात्तंब्राह्मणंश्राद्धे भोजयेत् ॥ १३८ ॥

(४) राघवानन्दः । तत्प्रतियोगिनं निवेदयन्नाह नेति । अस्य मित्रस्यधनैः श्राद्धद्रव्यव्यतिरिक्तैः संग्रहोमित्रतासंपादनम् । व्यतिरेकमुक्त्वान्वयमाह यमिति द्विजं विप्रं ब्राह्मणाश्राहवनीयार्थइत्युक्तेः ॥ १३८ ॥

(५) नन्दनः । धनैःकार्योऽस्यसंग्रहः । धनैरेततसंग्रहणीयंमित्रंन श्राद्धेन । एवंवचनादसंग्रहीतार्थस्य गुणवत्तामात्रहेतुकस्य मित्रभोजनस्यानुज्ञानमर्थात्सिद्धम् ॥ १३८ ॥

(६) रामचन्द्रः । वर्ज्यानाह नेति । मित्रंश्राद्धे न भोजयेत् । यस्यधनैःसंग्रहः कार्यः वार्द्धुषिकः तस्य श्राद्धेऽधिकारोनास्ति । अरिंशत्रुंमित्रंवार्यंविद्यात्तंद्विजंश्राद्धे न भोजयेत् ॥ १३८ ॥

यस्य मित्रप्रधानानि श्राद्धानि च हवींषि च॥तस्य प्रेत्य फलंनास्ति श्राद्धेषु च हविःषु च॥१३९॥

(१) मेधातिथिः । पूर्वस्यप्रतिषेधस्यार्थवादोयं । मित्रशब्दोयंभावप्रधानः । मित्रप्रधानानिमैत्रीप्रधानानितेनोभयोरपिमित्रयोऽशेषः देवतोद्देशेनदानमदृष्टार्थंवा केवलयोर्ब्राह्मणयोर्भोजनंहवींषिइतिलक्ष्यते । प्रेत्यफलंनास्ति ननुचासमानकर्तृत्वात्कार्यानुत्पत्तिःप्रायेणकर्तापुरुषःश्राद्धकृत्तायानत्रप्रोपहिताया:फलंकेचिदाहुः प्रेत्येतिशब्दान्तरंपरलोकवचनंनियतसंज्ञं । अथप्रायेणापिफलंकर्तृतस्यफलंप्रेत्यप्रकर्षेणनिकटं आप्तापिनभवति न भोग्यतांयाति ॥ १३९ ॥

(२) सर्वज्ञनारायणः । मित्रप्रधानानि सन्त्युद्देशप्रवृत्तानि । हवींषि यज्ञाः ॥ १३९ ॥

(३) कुल्लूकः । मित्रशब्दोऽयंभावप्रधानः । यस्य मैत्री प्रधानानि हव्यकव्यानि तस्य पारलौकिकंफलं नभवतीति फलाभावकथनपरमिदम् । प्रेत्येति परलोकइत्यर्थे शब्दान्तरमव्ययमिदं नतु क्त्वान्तम् । तेनासमानकर्तृकत्वे कथंक्त्वेति नाशङ्कनीयम् ॥ १३९ ॥

(४) राघवानन्दः । मित्रभोजने निन्दामाह यस्येति । हवींषि देवतायै देयानि ननु श्राद्धस्य फलमेव नास्ति कथंतदभावोक्तिरिति चेत् । आयुःप्रजांधनंविद्यांस्वर्गंमोक्षंसुखानि च । प्रयच्छन्ति तथा राज्यं प्रीतानृणां पितामहाइति ॥ याज्ञवल्क्योक्तेरायुरादिकंफलमस्तीत्यर्थः ॥ १३९ ॥

(५) नन्दनः । नकेवलंश्राद्धएवमित्रंवर्जनीयंकिंतुदेवेऽपीत्याह यस्येति । मित्रप्रधानानि मैत्रफलप्रधानानि । गुणवत्ताप्रधानानि । हवींषि दैवानिकर्माणि ॥ १३९ ॥

(६) रामचन्द्रः । यस्य पुंसः श्राद्धानि मित्रप्रधानानि तस्य पुंसःप्रेत्य श्राद्धेषु हवनीयेषु च फलंनास्ति ॥ १३९ ॥

यः संगतानि कुरुते मोहाच्छ्राद्धेन मानवः॥ सस्वर्गाच्च्यवते लोकाच्छ्राद्धमित्रोद्विजाधमः॥१४०॥

(१) मेधातिथिः । संगतानि मित्रभावाद्यःकुरुते श्राद्धेनमोहात् श्राद्धार्थमजानतः सस्वर्गाच्च्यवते नमामीतिस्वर्गमित्यर्थः । असंबन्धसामान्यात्च्यवतइत्युच्यते यथाप्राप्तःस्वर्गतश्च्युतःस्वर्गेणनसबध्यतेएवमयमपि । अनेनचश्राद्धफलाप्राप्तिरेवकथ्यते सर्वशेषताहितथाभवति । श्राद्धमित्रःश्राद्धंमित्रमस्येतिमित्रलाभहेतुत्वात् । श्राद्धमेवमित्रमतोबहुव्रीहिः द्विजा-

---

(१४०) द्विषुमानवः (क, ख, ग, च)

नामधमः द्विजग्रहणंप्रदर्शनार्थं शूद्रेणापिनमित्राणिभोजनीयानि। ननुचाब्राह्मण्यादेवशूद्रस्य मित्रत्वमाप्तिर्नास्ति केनैषापरिभाषाकृता। शूद्रस्यब्राह्मणैर्मित्रैर्नभवितव्यं। समान जातीयानामेवमित्रव्यवहारोनोत्तमजातीयानांहीनजातीयैःसहेतिचेत्। एतदपिन एवंह्याह श्वेतकेतुर्हवाआरुणेयः। अस्तिमेपञ्चालेषुक्षत्रियोमित्रमिति किंचसंबन्धोपलक्षणार्थंचमित्रप्रतिषेधोव्याख्यातः। भवंतिचशूद्रस्यब्राह्मणाअर्थसंबन्धिनः पारशवस्यज्ञातयोपि ॥ १४० ॥

(२) **सर्वज्ञनारायणः**। श्राद्धमित्रः श्राद्धोत्पादित मैत्रः ॥ १४० ॥

(३) **कुल्लूकः**। स्वर्गफलंश्राद्धस्यदर्शयितुंपूर्वोक्तफलाभावमेव विशेषेण कथयति यइति। योमनुष्यः संगतानि मित्रभावंशास्त्रानभिज्ञया। श्राद्धेन कुरुते श्राद्धमेवमित्रलाभहेतुत्वान्मित्रंयस्य संश्राद्धमित्रोद्विजापसदः। सस्वर्गलोकाच्च्यवते तं न प्राप्नोतीत्यर्थः। श्राद्धस्यापि स्वर्गफलत्वमाह याज्ञवल्क्यः। आयुः प्रजांधनंविद्यांस्वर्गंमोक्षंसुखानिच। प्रयच्छन्ति तथा राज्यंप्रीतानृणांपितामहाः ॥ १४० ॥

(४) **राघवानन्दः**। न केवलंफलं नाप्नोति प्रत्युतानर्थंचर्छेदित्याह यइति। संगतानि मित्रभावं कुरुते संपादयति। श्राद्धेन श्राद्धीयद्रव्येणैव मित्राणांलाभोयस्य सश्राद्धमित्रः। द्विजाधमश्चातुर्वर्ण्यः ॥ १४० ॥

(५) **नन्दनः**। मित्रस्य हव्येषु परिग्रहोदोषवत्तरइत्याह यइति। संगतानि संश्लेषान्। स्वर्गाद्धर्मान्तरार्जितादपि ॥ १४० ॥

(६) **रामचन्द्रः**। यःमानवःश्राद्धेन मोहात्संगतानि मित्रभावंगतानि कुरुते सः स्वर्गलोकाच्च्यवते। श्राद्धे मित्रंयस्य सःश्राद्धमित्रःसद्विजाधमः ॥ १४० ॥

संभोजनी साभिहिता पैशाची दक्षिणा द्विजैः।इहैवास्ते तु सा लोके गौरन्धेवैकवेश्मनि॥१४१॥

(१) **मेधातिथिः**। संशब्दः सहार्थेवर्तते सहभुज्यतेययासासंभोजनी मैत्र्याहिसहभोजनंप्रवर्तते। गोष्ठीभोजनंवासंभोजनमिष्यते। पिशाचानामयंधर्मोयत्श्राद्धेमित्रसङ्ग्रहः। रथ्याः पुरुषाः पिशाचाः सादक्षिणाइहैवलोकेआस्ते नामुत्रफलंदातुंसमर्था गौर्यथान्धैकस्मिन्नेवगृहेतिष्ठति। एवमियंदक्षिणाइहैवास्ते मित्रजनार्थैवभवति। नपितृभ्यउपकारार्थायप्रभवति दानंदक्षिणा ॥ १४१ ॥

(२) **सर्वज्ञनारायणः**। संभोजनीयसंगत्यर्थभोजनसंबन्धिनी दक्षिणा दानं। पैशाची· पिशाचगामिनी। इहैव न पितृलोकंयाति ॥ १४१ ॥

(३ **कुल्लूकः**। सा दक्षिणा दानक्रिया संभोजनी सह भुज्यते यया सा संभोजनी गोष्ठी बहुपुरुषभोजनात्मिका। पिशाचधर्मत्वात्पैशाची मन्वादिभिरुक्ता। सा च मैत्रीप्रयोजनकत्वान्नपरलोकफलेहलोक एवास्ते यथाऽन्धा गौरेकस्मिन्नेव गृहे तिष्ठति न गृहान्तरगमनक्षमा ॥ १४१ ॥

(४) **राघवानन्दः**। न प्रसज्जेत विस्तर इत्युक्तस्तत्रैव परिषदि दत्तमदत्तमिति श्रुतिमाश्रित्याह संभोजनीति। सह बहुभिर्भोज्यतया सा संभोजनी। पिशाचानांबहुभिः सहभोजनस्य प्रसिद्धत्वादस्यापि तथात्वमित्याह। पैशाची दक्षिणा दक्षिणाप्रवणादिसाध्यतया श्राद्धक्रिया श्राद्धस्य प्रकृतत्वात् इह लोके स्थितौ दृष्टान्तः। गौरन्धेति एषा यथा एकवेश्मन्येवावस्थिता गृहान्तरं न याति तद्वत्पारलौकिकं फलमददती इहैव यशोर्थे तिष्ठतीति भावः ॥ १४१ ॥

(५) **नन्दनः**। सादक्षिणा तन्मित्रश्राद्धम्। सम्भोजनीसम्भोजनरूपा। बहूनामेकत्र भोजनंसंभोजनम्। पैशाची-

पिशाचैरुपभोग्येतिद्विजैरभिहिता । इहैवास्ते इहलोकेमित्रमेव सासंगृह्णाति नामुत्र पितॄन् । अन्यत्र गमनाशक्तौ दृष्टान्त-उक्तः गौरन्धेवैकवेश्मनीति ॥ १४१ ॥

(६) **रामचन्द्रः** । सह भुज्यते यया सा संभोजनी मित्रद्विजे पैशाची दक्षिणाअभिहिताउक्ता । पिशाचानुपतिष्ठतीत्यर्थः । केवलंएकवेश्मनिअन्धागौरिव सा दक्षिणा भोजनी दक्षिणा इहलोकेअत्रार्थेआस्ते । परत्र पितृभ्योनोपतिष्ठतइत्यर्थः । पिशाचानामयंधर्मोयःश्राद्धेमित्रसंग्रहः ॥ १४१ ॥

यथेरिणे बीजमुप्त्वा न वप्ता लभते फलम् ॥ तथाऽनृचे हविर्दत्वा न दाता लभते फलम् ॥१४२॥

(१) **मेधातिथिः** । ईरिणंऊषरं । यस्मिन्क्षेत्रेभूमिदोषात्बीजमुप्तंनचोद्गच्छति तदिरिणं यत्रवप्तानकर्षकोलभतेफलम् । एवमनृचे वेदाध्ययनरहिते हविर्दैवंपित्र्यंचदत्वानलभतेफलं । अनृचइतिसमन्यतंऋचोवेदोपलक्षणार्थम् ॥ १४२ ॥

(२) **सर्वज्ञनारायणः** । इरिणऊषरे हविर्दैवंपित्र्यंवा ॥ १४२ ॥

(३) **कुल्लूकः** । ईरिणमूषरदेशोयत्र बीजमुप्तं प्ररोहति तत्र यथा बीजमुप्त्वा कर्षकोन फलंप्राप्नोत्येवमविदुषे श्राद्धदानफलंदाताम प्राप्नोतीति ॥ १४२ ॥

(४) **राघवानन्दः** । अविदुषे दानं न देयमिति सदृष्टान्तमाह यथेति । ईरिणेऊषरे देशे वप्ता क्षेत्रे बीजक्षेप्ता अनृचे वेदशून्ये हविरितिकव्यस्याप्युपलक्षणम् ॥ १४२ ॥

(५) **नन्दनः** । इदानींहव्येषु मित्रश्रोत्रिययोरश्रोत्रियोवर्जनीयोनमित्रमित्याह यथेरिणइति ॥ १४२ ॥

(६) **रामचन्द्रः** । यथेरिणऊषरेउप्त्वाफलंबीजंन लभते तथा अनृचेअनधीयानाय हविर्दत्वा दाता फलंन लभते ॥ १४२ ॥

दातॄन्प्रतिग्रहीतॄंश्च कुरुते फलभागिनः ॥ विदुषे दक्षिणांदत्वा विधिवत्प्रेत्य चेह च ॥१४३ ॥

(१) **मेधातिथिः** । विदुषेयादक्षिणादीयते सादातॄन्फलभागिनःकुरुते इति युक्तं प्रतिग्रहीतारस्तुकतरत्फलंभुञ्जते यदितावददृष्टंतदयुक्तंअनोदितत्वात्प्रतिग्रहस्यदृष्टफललाभेनप्रवृत्तेः । अथदृष्टंतदविदुषोपिदृश्यते । सत्यंप्रशंसैषाईदृशमेतद्विदुषेदानंयत्प्रतिग्रहीताप्यदृष्टफलभाग्भवेत् । सत्यपिदृष्टे । किंपुनर्दातेतिप्रेत्यस्वर्गइहकीर्तिर्यथाशास्त्रमनुतिष्ठतीति जनैःसाधुवादीयते विधिवदित्यनुवादोददातिचैवधर्म्येष्विति ॥ १४३ ॥

(२) **सर्वज्ञनारायणः** । दातॄन्प्रेत्य फलभागिनः । इह प्रतिग्रहीतॄन् । अनृचांतु इह भोगसंभावेपि प्रत्यवायोदर्कत्वात्फलंसदप्यसदेवेति तात्पर्यम् ॥ १४३ ॥

(३) **कुल्लूकः** । वेदतत्त्वविदे यथाशास्त्रंदत्तमैहिकामुष्मिकफलभागिनोदातॄन्करोति । ऐहिकंफलंयथाशास्त्रानुष्ठानेन लोकेख्यातिरूपमानुषङ्गिकमिति मेधातिथिगोविन्दराजौ । वयंत्वायुरादिकमेवैहिकफलंब्रूमः । आयुः प्रजांधनंविद्यामित्यादैहिकामुष्मिकादिफलत्वेनापि श्राद्धस्य याज्ञवल्क्यादिभिरुक्तत्वात् । प्रतिग्रहीतॄंश्च श्राद्धलब्धधनानुष्ठितयागादिफलेन परलोके सफलान्कुरुते अन्यायार्जितधनानुष्ठितयागादेरफलप्रदत्वात् । इह लोके न्यायार्जितधनारब्धकृष्यादिफलातिशयलाभात्सफलान्कुरुते ॥ १४३ ॥

(४) **राघवानन्दः** । विदुषेतु देयमित्याह दातॄनिति । विदुषे वेदार्थविदे दक्षिणाश्राद्धेदीयमाना दातॄन् श्राद्धकर्तॄन् प्रतिग्रहीतॄन् श्राद्धादेश्यान् । उक्तफलेन फलभागिनःकुरुतइत्यन्वयः । वाक्यार्थानुरोधेन पदार्थत्यागस्योचितत्वात् दक्षिणाशब्देन श्राद्धान्नभोजनं । दृष्टफलत्वादिति भावः ॥ १४३ ॥

(५) नन्दनः । यतएवं तस्मान्मित्रायापि विदुषेहव्यानिदातव्यानि नकदाचिदप्यविदुषइत्याह दानुमिति । तस्मान्मित्रेभ्योऽश्रोत्रियोवर्जनीयइत्यभिप्रायः ॥ १४३ ॥

(६) रामचन्द्रः । विधिवद्विदुषे दत्ता दक्षिणा प्रेत्य परलोके इह चेहलोके दातृन्प्रतिग्रहीतृंश्च फलभागिनः कुरुते ॥ १४३ ॥

कामंश्राद्धेऽर्चयेन्मित्रंनाभिरूपमपि त्वरिं॥ द्विषता हि हविर्भुक्तंभवति प्रेत्य निष्फलम् ॥१४४॥

(२) सर्वज्ञनारायणः । मित्रंसोपकारं इहैव लाभसंभवात् अकामानुमतोकामं तेनाप्यासंभवेपिमित्रस्य कथचिदनुज्ञोक्ता । अभिरूपमुक्ताभिमतरूपशालिनम् ॥ १४४ ॥

(३) कुल्लूकः । वरंविद्वद्ब्राह्मणाभावे गुणवान्मित्रंभोजयेन्नतु विद्वांसमपि शत्रुं । यतःशत्रुणा श्राद्धंभुक्तंपरलोके निष्फलंभवति । यथोक्तपात्रासंभवे मित्रप्रतिप्रसवार्थमिदम् ॥ १४४ ॥

(४) राघवानन्दः । पात्रान्तरालाभे प्रतिप्रसवमाह काममिति । अभिरूपंगुणवन्तम् । रिपोः पात्रत्वाभावेहेतुः । द्विषतेति । अरिणा भुक्तंन केवलंनिष्फलं अपित्वयशस्करमित्याह हीति मित्रभोजने यशोवक्ष्यते ॥ १४४ ॥

(५) नन्दनः । श्राद्धेऽप्यरिमित्रयोरररिवर्जनीयतरइत्याह काममिति । अभिरूपंविद्वांसम् । हविःशब्दोऽयंसामर्थ्यात्कव्यवचनः ॥ १४४ ॥

(६) रामचन्द्रः । कामंऐच्छिकं श्राद्धे मित्रमर्चयेत् । अपिनिश्चयेन अभिरूपंयोग्यंगुणसंपन्नमरिंशत्रुंनार्चयेत् हिनिश्चयेन । द्विषता शत्रुणा भुक्तंहविः दातुःप्रेत्य निष्फलंभवति ॥ १४४ ॥

यत्नेन भोजयेच्छ्राद्धे बह्वृचंवेदपारगम् ॥ शाखान्तगमथाध्वर्युंछन्दोगंतु समाप्तिकम् ॥ १४५ ॥

(१) मेधातिथिः । वेदपारगशाखांतगसमाप्तिकाः शब्दाएकार्थाः । समन्त्रब्राह्मणिकायाः कृत्स्नायाः शाखायाअध्येतृनाचक्षते । नमन्त्रसहितायामपिब्राह्मणस्य । तदेकदेशस्यचवेदैकशाखाध्यायिनोपि श्रोत्रियाउच्यन्ते । अतस्तन्निवृत्यर्थमुक्तं । श्रोत्रियायदेयमिति । श्रोत्रियश्चवेदाध्यायीवेदशब्दश्चसमन्त्रब्राह्मणिकांशाखामाचष्टे । तदेकदेशमपि याकृत्स्नशाखातत्रध्यायीकथंगृह्येतेत्येवमर्थमिदं । ननुचाश्रमिणोभोजयितव्याइत्युक्तंतत्रानधीतसकलस्वाध्यायानांनैवागार्हस्थ्याश्रमसंभवः। एवंह्युक्तं वेदःकृत्स्नोधिगंतव्यइति ब्रह्मचारिणस्तर्हिप्रक्रांतवेदाध्ययनस्य असमाप्तिगस्यापिस्यात् वेदपारगशाखांतगसमाप्तिकशब्दैरेकार्थैःकात्स्न्र्यंसर्वैरेवप्रतिपाद्यते । एकेनैवसिद्धेवृत्तानुरोधान्नानारूपैकार्थानेकशब्दोच्चारणं । वेदानांपारंगच्छति । शाखाअंतःसमाप्तिरस्यास्तीतिसमाप्तिकः । अध्वर्युर्यजुर्वेदशाखाध्यायीनायमृत्विग्विशेषवचनोध्वर्युशब्दःआध्वर्यवःप्रवचनमुच्यते तदध्ययनसंबन्धात् पुरुषोध्वर्युः छन्दोगःसामवेदाध्यायीस्मृत्यन्तरेत्रिसाहस्रविद्यःसमाप्तिकउक्तस्तत्रसहस्रशब्दः सहस्रगतिसंबंधात् सामवेदे वर्तते तस्याइमाः साहस्र्यस्तिस्रःसाहस्र्यःविद्यायस्यत्रिसाहस्रः ताण्डवमौक्तिक्यंसामगानमिति सहस्रवर्त्मनःसामवेदस्यतस्यतिस्रोविधाःदाशतयीचतुःषष्टिर्ब्राह्मणंचबाह्वृच्यं अन्येत्त्वाथर्वणिकनिषेधार्थमिमंश्लोकंमन्यंते कार्त्स्न्यात्तुविवक्षायामेतदेवावक्ष्यत् अधीतवेदशाखांयःकृत्स्नांतंभोजयेद्द्विजमिति । ननुचाथर्वणिकनिषेधेप्येतत्समानं तत्रापिशक्यमेवंवक्तुंतन्निषेधप्रायेणनभोज्यआथर्वणिकइत्येवमेवावक्ष्यत् । स्वशब्देननिषेधप्रतिपत्तिर्लाघवंचनैतदेवंकिमन्यविधानेनान्यनिषेधोवगम्यते स्वशब्देनवानिषेधोविचित्राद्धर्मोपदेशस्यकृतिर्मनोः ॥ १४५ ॥

(१४५) समाप्तिकम्=समाप्तिगम् (नं०)

(२) सर्वज्ञनारायणः । वेदपारगमेकवेदसंबन्धिपूर्णैकशाखाध्यायिनम् । शाखान्तगमित्यस्याप्ययमर्थः । अध्वर्युं यजुर्वेदिनं समाप्तिकं शाखापारगं । समाप्तिगमिति क्वचित्पाठः ॥ १४५ ॥

(३) कुल्लूकः । श्रोत्रियायैवदेयानीत्यनेनछन्दोमात्राध्यायिनि श्रोत्रियशब्दप्रयोगात्तदाश्रयणमावश्यकमुक्तम् । इदानींत्वधिकफलार्थंमन्त्रब्राह्मणात्मककृत्स्नशाखाध्यायिनिश्रोत्रियेदानमाह यत्नेनेति । ऋग्वेदिनंमन्त्रब्राह्मणात्मकशाखाध्यायिनंयत्नतोभोजयेत् तथाविधमेवयजुर्वेदिनम् । वेदस्यपारंगच्छतीतिवेदपारगः । शाखायाअन्तंगच्छतीति शाखान्तगः । समाप्तिरस्यास्तीति समाप्तिकः । सर्वैरेव शब्दैर्मन्त्रब्राह्मणात्मककृत्स्नशाखाध्येताऽभिहितः ॥ १४५ ॥

(४) राघवानन्दः । श्राद्धभोक्तृषु नियममाह यत्नेनेति । बह्वृचं ऋग्वेदमन्त्राध्यायिनं । शाखातिगं शाखाध्यायिनं तमेवअध्वर्युं यजुर्वेदिनं । सामगं छन्दोगं समाप्तिगं मन्त्रब्राह्मणोपनिषदन्तगं अथर्ववेदविनिवृत्त्यर्थविशेषणानि इति केचित् ॥ १४५ ॥

(५) नन्दनः । पूर्वंश्रोत्रियाएवंपात्रमित्युक्तम् इदानींतेषुविशेषमाह यत्नेनेति । वेदपारगं एकस्याऋग्वेदशाखायाःपारगम् । एतेनशाखान्तगंसमाप्तिगमितिपदद्वयमिह व्याख्यातम् । अध्वर्युर्यजुर्वेदाध्यायी ॥ १४५ ॥

(६) रामचन्द्रः । बह्वृचंऋग्वेदाध्यायिनं वेदपारगं यत्नेन भोजयेत् । शाखान्तगंस्वशाखापारगंवा । अथाध्वर्युंयजुर्वेदाध्यापकंवा । छन्दोगंसामशाखाध्यायिनंवा । समाप्तिगंस्वशाखापारगमित्यर्थः ॥ १४५ ॥

एषामन्यतमोयस्य भुञ्जीत श्राद्धमर्चितः ॥ पितॄणांतस्य तृप्तिः स्याच्छाश्वती साप्तपौरुषी ॥ १४६ ॥

(१) मेधातिथिः । कश्चिन्मन्येतपितृकृत्येत्रीनित्युक्तम् । पूर्वश्लोकेचनानाशाखाध्यायिनउपात्ताः । तत्रसब्रह्मचारिणोनास्तिप्राप्तिरिति तदाशङ्काविवृत्त्यर्थंइदमेषांत्रयाणांत्रैविद्यानामन्यतमोभोजनीयः । एतदुक्तंभवति । समानशाखाध्यायिनोनानाशाखाध्यायिनोवाभोजनीयाः । अर्चितः पूजितः प्रार्थितअर्घादिनासाप्तपौरुषीअनुशतिकादेराकृतिगणत्वादुभयपदवृद्धिः । कालमहत्वोपलक्षणार्थंचैतत् दीर्घंकालंपितॄणांतृप्तिर्भवति । यावत्सप्तपुरुषाआगामिनः पुत्रपौत्रादयोजाताजनिष्यन्तेवा तावत्तथाविधब्राह्मणदानात्पितरस्तृप्यन्ति । शाश्वतीनान्तराविच्छिद्यपुनरुद्भवति । किंपुनः सर्वदास्थितैव ॥ १४६ ॥

(२) सर्वज्ञनारायणः । शाश्वती चिरस्थायिनी साप्तपौरुषी पिण्डतत्तल्लेपभागितया सप्तमपुरुषपर्यन्तगामिनी ॥ १४६ ॥

(३) कुल्लूकः । तद्भोजनेऽधिकंफलमाह एषामिति । एषांसंपूर्णशाखाध्यायिनांबह्वृचादीनामध्यादन्यतमोयस्यसम्यक्पूजितः । सच्छ्राद्धेभुङ्क्तेतस्यपुत्रादिसप्तपुरुषाणांशाश्वऽत्यविच्छिन्नापितॄणांतृप्तिः स्यात् । साप्तपौरुषीत्यनुशतिकादित्वादुभयपदवृद्धिः तस्यचाकृतिगणत्वात् ॥ १४६ ॥

(४) राघवानन्दः । एतत्त्रयाणांभोजने पितृतृप्तिविशेषमाह एषामिति । अर्चितःश्राद्धादौशाश्वतं अनवच्छिन्नंशतायुर्वै पुरुषइति श्रुतेः । काललक्षणासप्तशतवर्षपर्यन्ता साप्तपौरुषीत्येवंसर्वत्र । आगामिसप्तपुरुषपर्यन्तेति मेधातिथिः ॥ १४६ ॥

(५) नन्दनः । एषांबह्वृचादीनाम् । साप्तपौरुषी शाश्वती तृप्तिः स्यात् सप्तपुरुषाणांसदातनी तृप्तिःस्यादित्यर्थः । सप्तपुरुषायमेनोक्ताः त्रयः पूर्वेपराश्चैव ह्यात्मा तत्रैव सप्तमः । तेसप्तपुरुषाः सर्वेतदन्नमुपभुञ्जतइति ॥ १४६ ॥

(६) रामचन्द्रः । यस्य श्राद्धएषांश्रोत्रियाणामन्यतमोभुञ्जीत तस्य पितॄणांशाश्वतीतृप्तिःस्यात् । साप्तपौरुषी सप्तपुरुषपर्यन्तेत्यर्थः ॥ १४६ ॥

एषवै प्रथमः कल्पः प्रदाने हव्यकव्ययोः ॥ अनुकल्पस्त्वयंज्ञेयः सदा सद्भिरनुष्ठितः ॥ १४७ ॥

(१) मेधातिथिः । पितृयज्ञमित्यारभ्याविंशतिमात्राश्लोकाअतिक्रान्तास्तत्रैवनार्थोभिहितअमावास्यायांश्राद्धंकर्तव्यं । श्रोत्रियोविद्वान्साधुचरणः मत्याख्याताभिजनश्रोत्रियापत्यंअसंबन्धीभोजनीयः परिशिष्टंसर्वमर्थवादार्थं । एषोनन्तरोक्तः प्रथमोमुख्यः कल्पोविधिः श्राद्धेयदसंबन्धिनेदीयते । अयंतुवक्ष्यमाणोनुकल्पोज्ञेयः । मुख्याभावेयोनुष्ठीयते प्रतिनिधिन्यायेन सोनुकल्पउच्यते । सदेत्यादिस्तुत्यर्थः ॥ १४७ ॥

(२) सर्वज्ञनारायणः । प्रथमः कल्पोमुख्यःपक्षः ॥ १४७ ॥

(३) कुल्लूकः । हव्यकव्ययोरुभयोरेव प्रदाने यदसंबन्धिश्रोत्रियादिभ्योदीयतइत्ययंमुख्यः कल्पउक्तः । अयंतु मुख्याभावे वक्ष्यमाणोऽनुकल्पोज्ञातव्यः सर्वदा साधुभिरनुष्ठितः ॥ १४७ ॥

(४) राघवानन्दः । कल्पान्तरंवदन्नुक्तमनुवदति एषइति । प्रथमोमुख्यः । अनुकल्पएषामभावप्रयुक्तः प्रतिनिधिः ॥ १४७ ॥

(५) नन्दनः । एषइत्युक्तस्यपरामर्शः अयमिति वक्ष्यमाणस्य । अनुकल्पोऽपि प्रशस्तएवेत्युक्तम् । यः सदा सद्भिरनुष्ठितइति ॥ १४७ ॥

(६) रामचन्द्रः । हव्यकव्ययोःप्रदाने एषःप्रथमःकल्पःउक्तः । अयंअनुकल्पो वक्ष्यमाणलक्षणः । सदा सद्भिरनुष्ठितः ॥ १४७ ॥

मातामहंमातुलंच स्वस्रीयं श्वशुरं गुरुम् ॥ दौहित्रं विट्पतिं बन्धुमृत्विग्याज्यौ च भोजयेत् ॥ १४८ ॥

(१) मेधातिथिः । स्वस्रीयोभगिन्याःपुत्रो विट्पतिर्जामाता प्रजावचनत्वात्विट्शब्दस्य । अतिथिरन्यःसहिसर्वविशांपतिः गृहाभ्यागतोलोकेविट्शब्देनोच्यते । बन्धुःशालसगोत्रादिः ॥ १४८ ॥

(२) सर्वज्ञनारायणः । गुरुमाचार्यं । विट्पतिं जामातरं । बन्धुं मातुलपुत्रादिम् ॥ १४८ ॥

(३) कुल्लूकः । स्वस्रीयोभागिनेयः । गुरुर्विद्यागुरुराचार्यादिः । विड्दुहिता तस्याः पतिर्विट्पतिर्जामाता । बन्धुर्मातृष्वसृपितृष्वसृपुत्रादिः । एतान्मातामहादीन्दशमुख्यश्रोत्रियाद्यसंभवे भोजयेत् ॥ १४८ ॥

(४) राघवानन्दः तमेवाह मातामहमिति स्वस्रीयं भागिनेयं । दौहित्रं दुहितुरपत्यं । विट्पतिंजामातरं । बन्धुं मातृष्वसुःपुत्रादिकम् ॥ १४८ ॥

(५) नन्दनः । विशः प्रजायाः पतिरितिविट्पतिर्जामाता ॥ १४८ ॥

(६) रामचन्द्रः । यमातामहादयःप्रसिद्धाः विट्पतिं पितृगृहे कन्या तस्याःपतिंविट्पतिं भगिनीपतिमित्यर्थः । ऋत्विक्प्रसिद्धः । याज्यःशिष्यः बन्धुःशालसगोत्रादिः । एतान्भोजयेत् ॥ १४८ ॥

न ब्राह्मणं परीक्षेत दैवे कर्मणि धर्मवित् ॥ पित्र्ये कर्मणि तु प्राप्ते परीक्षेत प्रयत्नतः ॥ १४९ ॥

[तेषामन्ये पङ्क्तिदूष्यास्तथान्ये पङ्क्तिपावनाः ॥ अपाङ्क्तेयान्प्रवक्ष्यामि कव्यानर्हान्द्विजाधमान् ॥ १ ॥*]

* (क) (ख) चिन्हितपुस्तकयोर्दृष्टोरामचन्द्रेण व्याख्यातश्च ।

(१) मेधातिथिः। नायंदैवेकर्मणिब्राह्मणपरीक्षाप्रतिषेधः किंतर्हि काणश्वित्राद्यर्थकाणादिभ्यनुज्ञानार्थः। पित्र्येकर्मणिश्राद्धकालेप्राप्तेपरीक्षांयत्नेनकुर्यात्। नदैवेकदाचिद्वक्ष्यमाणानपिभोजयेत्। येचाभ्यनुज्ञायन्ते तान्दर्शयिष्यामः। अथेतुवक्ष्यमाणस्यप्रतिषेधप्रकरणस्ययत्नतोवर्जनार्थं काणादिवर्जनार्थं उपक्रममात्रंश्लोको नतुकाणादीनांदैवेभ्यनुज्ञानार्थः ॥ १४९ ॥

(२) सर्वज्ञनारायणः। न परीक्षेत दोषगुणौ सूक्ष्मेक्षिकया नावश्यमन्वेष्यौ। दैवे वैश्वदेविके तत्रापि स्तेनवृत्तित्वादिकंवक्ष्यमाणमवश्यंपरीक्ष्यं। हव्यकव्ययोरित्यभिधानात् ॥ १४९ ॥

(३) कुल्लूकः। धर्मज्ञोदैवश्राद्धे भोजनार्थं न ब्राह्मणंयत्नतःपरीक्षेत लोकप्रसिद्धिमात्रेणासौ साधुतया भोजयितव्यः। पित्र्ये पुनः कर्मण्युपस्थिते पितृपितामहाद्यभिजनपरीक्षाकर्तव्येति प्रयत्नतः शब्दस्यार्थः ॥ १४९ ॥

(४) राघवानन्दः। पैत्रे ब्राह्मणपरीक्षामनुवदन्दैवे तदभावमाह नेति। दैवेदेवपक्षे देवतादेये श्राद्धे वा ॥ १४९ ॥

(५) नन्दनः। प्रयत्नतइति दैवेऽप्यवकृष्ययोजनीयम्। दैवे कर्मणि प्रयत्नतोनपरीक्षेत अनेन किंचित्परीक्षणम्* प्रतिषिद्धमित्यवगन्तव्यम् ॥ १४९ ॥

(६) रामचन्द्रः। पितृकर्मणि प्राप्ते ब्राह्मणान्प्रयत्नतःपरीक्षेत ॥ १४९ ॥

[रामचन्द्रः। यथेति। ये पङ्क्तिसन्दूष्याःपङ्क्तिसन्दूषणकर्तारः ॥ १ ॥]

ये स्तेनपतितक्लीबाये च नास्तिकवृत्तयः॥ तान्हव्यकव्ययोर्विप्राननर्हान्मनुरब्रवीत् ॥ १५० ॥

(१) मेधातिथिः। स्तेनःचौरः पतितःपञ्चानांमहापातकानांअन्यतमस्यकर्ता। क्लीबोनपुंसकः उभयव्यञ्जनोगतरेताः षंडश्च। नास्तिकालोकायतिकादयः नास्तिदत्तंनास्तिहुतंनास्तिपरलोकइतियेषांस्थतप्रज्ञास्तेषांवृत्तिराचारः। अश्रद्दधानानास्तिकवृत्तिर्येषांतेनास्तिकवृत्तयः उत्तरपदलोपीसमासः नास्तिकाइत्येवसिद्धेवृत्तिद्वयसमाश्रयणंश्लोकपूरणार्थं। अथवा नास्तिकोवृत्तिर्जीवनंयेषांतएवमुच्यन्ते तान्हव्यकव्ययोर्दैवेपित्र्येचअनर्हान्मनुरब्रवीत्। मनुप्रतिषेधादरार्थं मनुग्रहणम् सर्वधर्माणांमनुनोक्तत्वात् ॥ १५० ॥

(२) सर्वज्ञनारायणः। स्तेनाअल्पस्तेयवृत्तयः। पतितास्त्यक्तस्ववर्णधर्मतया पतिततुल्याः। क्लीबाःषण्ढाः। नास्तिकवृत्तयोनास्तिकर्मफलमित्यभिमानिनः ॥ १५० ॥

(३) कुल्लूकः। स्तेनश्चौरः। सच सुवर्णचोरादन्यःतस्य पतितशब्देनैव ग्रहणात्। पतितोमहापातकी। क्लीबोनपुंसकः। नास्तिकवृत्तिर्नास्ति परलोकइत्येवंवृत्तिः प्रवर्तनंयस्य। एतान्दैवपितृकृत्ययोरुभयोरेवायोग्यान्मनुरब्रवीदिति। मनुग्रहणंनिषेधादरार्थं। सर्वधर्माणामेव मनुनोक्तत्वात् ॥ १५० ॥

(४) राघवानन्दः। परीक्षामाह यइति समदशभिः। स्तेनाश्चौराः। पतिताः पातित्यहेतवोवक्ष्यन्ते क्लीबानपुंसकाः। कृत्रिमाकृत्रिमभेदेन द्विधा नास्तिकवृत्तयः। नास्ति कं परलोकसुखं इति वृत्तिर्वाङ्मानसयोर्येषांते हव्यकव्ययोरिति विषयसप्तमी। अनर्हान् नपात्रभूतान्। हव्यं देवदेयं कव्यं पितृदेयमित्युक्तम् ॥ १५० ॥

(५) नन्दनः। स्तेनाअत्र। स्वर्णादन्यस्य द्रव्यस्यापहर्तारः। क्लीबाः षण्ढाः। स्वयमास्तिकाअपि नास्तिकेभ्योवृत्तिर्जीवनंयेषामिति तथोक्ताअश्रद्दधानावा ॥ १५० ॥

(६) रामचन्द्रः। हव्यकव्ययोःये स्तेनादयस्ताननर्हान्मनुरब्रवीत्। स्तेनाःसुवर्णव्यतिरिक्तचौराः ॥ १५० ॥

---

* प्रयत्नतः=परीक्षा (अ)

जटिलंचानधीयानंदुर्बलंकितवंतथा ॥ याजयन्ति च ये पूगांस्तांश्च श्राद्धे न भोजयेत् ॥ १५१॥

(१) मेधातिथिः । जटिलोब्रह्मचारीतस्यहयंकेशविशेषः पाक्षिकविहितोमुण्डोवाजटिलोवास्यादिति उपलक्षणं-जटाब्रह्मचारिणस्ततोमुण्डोपिप्रतिषिध्यते । तस्यचानधीयानस्यप्राप्तिरेवनास्ति प्रक्रान्ताध्ययनः । अनधीतवेदः अगृहीतवेदश्चेत्प्राप्नुयात् । ननुचवेदपारगइतिवचनात्कुतः प्रक्रान्ताध्ययनस्यप्राप्तिः । एवंतर्हिअधीतवेदोप्यस्वीकृतवेदोनधीयानोभिप्रेतः । व्रतस्थमित्यनेनवादोहितत्रैवात्रतत्रनाध्ययनमितिकश्चिन्मन्येतदर्थमिदंअनधीयानस्य प्रतिषेधाद्विदुषस्तस्याधिकारोस्तीत्यवगम्यते । दुर्बलः स्खलितः लोहितकेशोवा विकेशेन्द्रियोवा तस्यचहि निर्वचनंकुर्वन्ति दूर्वाशाद्वलेनाप्यलंतस्यावासोभवतीति सहिदूर्वयैवप्राप्रियते लज्जयाचवाससानाभावे तावन्मात्रेणापिदधातिशेफं । कितवोद्यूतकारः । याजयंतिचयेपूगान् संघान् व्रात्यस्तोमादिभिर्व्रात्यानांहि संहितानां यागोविधिप्रतिषिद्धंचतद्याजनं व्रात्यानांयाजनेकृत्वेतिक्रमशः प्रत्येकमपिबहून्याजयति बहुकृत्वआर्त्विज्यंकरोति सोपिनभोज्यः । तथाचवसिष्ठः यश्चापिबहुयाज्यः स्यात्यश्चोपनयतेबहूनिति । केचिदाहुः श्राद्धग्रहणात्पित्र्यएवैषांप्रतिषेधो नतुदैवे तदयुक्तं तदपिश्राद्धांगमेवाश्राद्धशब्देनयुक्तंवक्तुं ॥ १५१ ॥

(२) सर्वज्ञनारायणः । जटिलंब्रह्मचारिणं । मन्त्रमनधीयानमध्ययनाद्विरतं । दुर्बलोदुश्चर्मा शिपिविष्टइति यावत् । कितवोद्यूतरसिकः । पूगान्समूहान् याजयन्तीत्यनेन याजकाविवक्षिताः । तत्र ह्यनेके यजमानाभवन्ति सत्रे तु यजमानत्वादृत्विजामदोषः ॥ १५१ ॥

(३) कुल्लूकः । जटिलोब्रह्मचारी । मुण्डोवा जटिलोवास्यादित्युक्तब्रह्मचार्युपलक्षणत्वाजटिलत्वस्यमुण्डोऽपि निषिध्यते । अनधीयानंवेदाध्ययनरहितंयस्योपनयनमात्रंकृतं न वेदादेशः । तेनास्वीकृतवेदस्यापि ब्रह्मचारिणोवेदाध्ययनकर्तुरभ्यनुज्ञानार्थोऽयंनिषेधः । अतः श्रोत्रियायैव देयानीति ब्रह्मचारीतरविषयम् । दुर्बलोदुश्चर्मा । मेधातिथिस्तु दुर्बालमिति पठित्वा स्खलतिर्लोहितकेशोवा दुश्चर्मावेत्यर्थत्रयमुक्तवान् । कितवोद्युतकृत् पूगयाजकाबहुयाजकाः । पूगः क्रमुकवृन्दयोरित्याभिधानिकाः । अतएव वसिष्ठः । यश्चापि बहुयाज्यः स्याद्यश्चोपनयते बहूनिति । तान्श्राद्धेन भोजयेदिति न दैवेनिषेधः । यत्रोभयत्रनिषेधोमनोरभिमतः तत्र हव्यकव्यग्रहणमुभयत्रेति वा करोति ॥ १५१ ॥

(४) राघवानन्दः । जटिलं ब्रह्मचारिणं अनधीयानं वेदाध्ययनरहितं । दुर्बलं दुश्चर्माणं दुर्वालं कपिलकेशमिति मेधातिथिः । कितवंद्यूतरतं । पूगान्बहून् श्रेणीर्वा ॥ १५१ ॥

(५) नन्दनः । जटिलंब्रह्मचारिणम् । तस्य विशेषणमनधीयानमिति । दुर्वालंदुश्चर्माणम् । कितवंद्यूतकारकम् । पूगान् गणान् श्राद्धेनिषेधाद्दैवेऽनुज्ञानमर्थात्सिद्धम् ॥ १५१ ॥

(६) रामचन्द्रः । जटिलो ब्रह्मचारी । सभोजने प्रतिषिध्यते । दुर्बलंदुःखेन बलिनमिति । दुर्वर्णमिति पाठे दुर्वर्णंदुश्चर्माणमित्यर्थः । पूगाःश्रेणयः । एतान्श्राद्धे न भोजयेत् ॥ १५१ ॥

चिकित्सकान्देवलकान्मांसविक्रयिणस्तथा॥विपणेन च जीवन्तोवर्ज्याः स्युर्हव्यकव्ययोः॥१५२॥

(१) मेधातिथिः । भिषजः चिकित्सकाः देवलकाः प्रतिमापरिचारकाः । आजीवनसंबन्धेनैतौप्रतिषिध्येते धर्मार्थत्वेतुचिकित्सकदेवलकत्वयोरदोषः । मांसविक्रयिणः सौनिकाः द्वितीयान्तपाठेपूर्वश्लोकादाख्यातानुषङ्गः । विपणेनजीवन्तः प्रतिषिद्धेनपणेन । दशमाध्यायेवक्ष्यन्ते तेनजीवन्ति तेवर्ज्या उभयत्र मांसविक्रयिणस्तुधर्मार्थमपि निषिध्यन्ते । यस्यकेनचिन्मांसमुपहृतं । अन्यस्यनतेनार्थः । उपहृतमांसस्यघृतेनहोमोपयोगिनासमांसंघृतेनविनिर्मिमीते भवत्यसौ

(१५१) दुर्बलं= दुर्बालं (नं०)

धमार्थौविनिमयोविक्रयशब्दवाच्यता विनिमयस्यापिभवतीत्यतईदशाधमार्थमांसविक्रयिणोपिप्रतिषिध्यन्ते ॥ १५२ ॥

(२) **सर्वज्ञनारायणः** । चिकित्सकान्भिषग्वृत्तीन् । देवलकान्धनार्थंदेवार्चकान् । विपणेन पण्यवीथ्यां विक्रयप्रसारणेन जीवन्तः ॥ १५२ ॥

(३) **कुल्लूकः** । चिकित्सकोभिषक् । देवलः प्रतिमापरिचारकः । वर्तनार्थत्वेनैतत्कर्मकुर्वतोऽयंनिषेधो नतु धर्मार्थम् देवकोशोपभोजी च नाम्ना देवलकोभवेदिति देवलवचनात् । मांसविक्रयिणः सकृदपि । सद्यःपतति मांसेनेतिलिङ्गात् । विपणेनेति । विपणोवणिज्या तया जीवन्तः । हव्यकव्ययोरित्यभिधानाद्दैवे पित्र्ये चैते त्याज्याः ॥ १५२ ॥

(४) **राघवानन्दः** । देवलकाः देवकोशोपजीवीच नाम्नादेवलकोभवेदिति देवलवचननिर्णीताः । मांसविक्रयिणः सकृदपि सद्यःपतति मांसेनेति वचनात् । विपणेन वाणिज्येन । वर्ज्याःपात्रत्वेनेतिशेषः ॥ १५२ ॥

(५) **नन्दनः** । देवकोशोपजीवीतु नाम्नादेवलकोभवेदिति स्मृत्यन्तरवचनम् । मांसविक्रयादन्येनापिजीविनो वर्ज्याः प्रतिषिद्धाः । क्षीरादिद्रव्यं तद्विक्रयोविपणस्तेनजीवन्तः ॥ १५२ ॥

(६) **रामचन्द्रः** । चिकित्सकादयोहव्यकव्ययोःप्रदाने वर्ज्याःस्युः । धर्मार्थे तु चिकित्सकदेवलयोर्दोषाभावः । विपणेन जीवन्तः निन्द्यपण्येन जीवन्तः ॥ १५२ ॥

प्रेष्योग्रामस्य राज्ञश्च कुनखी श्यावदन्तकः॥प्रतिरोद्धा गुरोश्चैव त्यक्ताग्निर्वार्धुषिस्तथा ॥१५३॥

(१) **मेधातिथिः** । प्रेष्यआज्ञाकरः ग्रामेणयोयत्रकुत्रचित्कार्येणप्रेष्यते एवंराजप्रेष्यः । कुनखीश्यावदन्तकः । प्रतिरोद्धागुरोर्वाक्व्यवहारेऽन्यत्रचयोगुरोः प्रतिबन्धेप्रातिकूल्येचवर्तते । त्यक्ताग्निस्त्रेतावसथ्ययोरन्यतरस्यापि । वार्धुषिःसत्यन्यस्मिन्जीविकोपायेवृद्धिजीविकः । वृद्धिस्तुयोक्ताधान्यानांवार्धुषित्वंतदुच्यतइति यत्स्मरणंतत्स्वपरिक्रियायामेव । वैयाकरणाहि वृद्धिजीविनो धान्यादन्यत्रवार्धुषिशब्दंस्मरन्ति तेच शब्दार्थस्मरणे प्रमाणान्तराभियोगवशात् ॥ १५३ ॥

(२) **सर्वज्ञनारायणः** । प्रेष्योधनार्थमादिष्टकारी । श्यावदन्तकःकपिशवर्णदन्तः । प्रतिरोद्धा विरोधी । त्यक्ताग्निस्त्यक्ताहितत्रेताग्निः । वार्धुषिर्वृद्धिजीवी ॥ १५३ ॥

(३) **कुल्लूकः** । भृतिग्रहणपूर्वकंग्रामाणांराज्ञश्चाज्ञाकारी । कुत्सितनखकृष्णदन्तगुरुप्रतिकूलाचरणशीलत्यक्तश्रौतस्मार्ताग्निकलोपजीविनश्चहव्यकव्ययोर्वर्ज्याइति पूर्वस्यैवानानुषङ्गउत्तरत्रच ॥ १५३ ॥

(४) **राघवानन्दः** । प्रेष्यइति । ग्रामस्य राज्ञोवा । श्यावदन्तकः श्यामाः स्वतएवैकद्वित्रादन्तायस्य सः । प्रतिरोद्धागुरोः प्रतिकूलाचरणः । त्यक्ताग्निः विधितः स्वीकृताग्निः अविधितस्त्यक्ता । वार्धुषिर्वृद्धिमात्रोपजीवी ॥ १५३ ॥

(५) **नन्दनः** । पूर्वजन्मनि स्वर्णचोरत्वात्कुनखिनः प्रतिषेधः । सुरापानाच्छ्यावदन्तस्य प्रतिषेधः । प्रतिरोद्धा प्रतिकूलकः । समर्घं पण्यमादाय महार्घंयः प्रयच्छति । सवैवार्द्धुषिकोनामयश्चवृद्ध्या प्रयोजयेत् ॥ यश्चनिन्द्यतरंजीवन्प्रशंसत्यात्मनोगुणान् । सचवार्द्धुषिकोनाम ब्रह्मवादिषुगर्हितइति यमवचनम् ॥ वर्जनीयाइतिवक्ष्यति ॥ १५३ ॥

(६) **रामचन्द्रः** । वर्ज्यानाह प्रेष्यइति । ग्रामस्य प्रेष्यःप्रेषकःराज्ञः । गुरोःप्रतिरोद्धा गुरोःप्रतिकूलः । त्यक्ताग्निःअग्नित्यागी त्रेतावसथ्ययोः त्यागी । वृध्योपजीवी वार्धुषिः । वृध्याजीवी तु वार्धुषिरित्यमरः ॥ १५३ ॥

यक्ष्मी च पशुपालश्च परिवेत्ता निराकृतिः॥ ब्रह्मद्विट् परिवित्तिश्च गणाभ्यन्तरएव च ॥१५४॥

(१) **मेधातिथिः** । यक्ष्मीव्याधितःराजयक्ष्मगृहीतइत्यन्ये । पशुपालःयष्टिहस्तस्तद्वृत्तिजीवनः । निराकृतिःसत्यधिकारेमहायज्ञानुष्ठानरहितः । अयत्वेप्यनुपजीव्यः । अनद्धानिराकृतिरुच्यते । एवंहिशतपथे योनदेवानर्चतिनपितॄन्न-

मनुष्यानिति। यैस्तुपठ्यते अस्वाध्यायश्रुतधर्मैर्निराकृतिरुदाहृतइति नतेशब्दार्थसंबन्धविदस्ततस्तस्येहाप्राप्तिरेवश्रोत्रियनि-यमात्। निराकर्तादेवादीनांनिराकृतिरितिधात्वर्थानुगमोस्ति। धर्मधर्मिणोश्चाभेदविवक्षायांकिंनापिप्रयोगउपपन्नइतिपूर्वोयं-धातुरपर्वजेनवर्तते। निराकृताअपवर्जिताउच्यन्ते। भोजनान्निराकृताअधिकारान्निराकृताइति। अवर्जनंचाकृतिः। सानि-र्गतास्मोदितिनिराकृतिः। संस्थानंचाकृतिस्तथाचकुत्सायांनिर्दिष्टव्योदुराकृतिर्निषिध्यते। आहचावायूपवयःशीलसंपन्नोवा-कुसंपन्नोवाङ्गी पटुवागिन्द्रियश्चबहुजिव्होनभोज्याः। रूपसंपन्नमनोहरावयवसंपन्नयुवभ्योदानं प्रथमंप्रतिवयसइत्येकइति-संज्ञाशब्दोवायंकिन्नंतः। ब्रह्मद्विट्ब्राह्मणानांवेदस्यवाद्वेष्टा ब्रह्मशब्दस्योभयार्थवाचित्वात् ब्रह्मज्ञोब्राह्मणःस्मृतइति। गणः-सङ्घःसहैकयाक्रिययाजीवन्ति ये ते गणशब्दवाच्यास्तदन्तर्गताश्चानुर्विद्यब्राह्मणाः परिवेतृपरिवित्तीवक्ष्यमाणलक्षणौ ॥ १५४ ॥

(२) सर्वज्ञनारायणः। पशुपालोवृत्त्यर्थं। निराकृतिरस्वाध्यायः। ब्रह्मब्राह्मणस्तद्विट्। गणाभ्यन्तरोगणानांनेता-ग्रामणीरितियावत्। गणानामाधिपत्येन देशान्तरप्रापयितार्थलोभेनेतिवा ॥ १५४ ॥

(३) कुल्लूकः। यक्ष्मी क्षयरोगी। पशुपालोवृत्त्यर्थतया च्छागमेषादिपोषकः। परिवेतृपरिवित्ती वक्ष्यमाणलक्षणौ। निराकृतिः पञ्चमहायज्ञानुष्ठानरहितः। तथाच च्छन्दोगपरिशिष्टं। निराकर्ताऽमरादीनांसविज्ञेयोनिराकृतिः। ब्रह्मद्विड्ब्रा-ह्मणादीनांद्वेष्टा। गणाभ्यन्तरोगणार्थोपसृष्टसंबन्धि*धनाद्युपजीवी ॥ १५४ ॥

(४) राघवानन्दः। यक्ष्मी कासविशेषयुक्तः। पशुपालस्तदेकजीवी। परिवित्तिः वक्ष्यते। निराकृतिः पञ्चयज्ञानु-ष्ठानहीनः। ब्रह्मद्विट् वेदविप्रयोर्द्वेष्टा। गणाभ्यन्तरः गणार्थोत्सृष्टधनाद्युपजीवी ॥ १५४ ॥

(५ नन्दनः। यक्ष्मी क्षयरोगीतस्य पूर्वजन्मनिब्रह्महत्वात्प्रतिषेधः। वृत्त्यर्थंयः पशून्पालयतिसपशुपालः। परिवेत्ता-रंवक्ष्यति। अधीत्यविस्मृतेवेदेभवेद्विप्रोनिराकृतिरितिदेवलः॥ आधाय योऽग्निमालस्याद्देवादीन्नैभिरिष्टवान्। निराकर्ताम-रादीनांसविज्ञेयो निराकृतिरिति कात्यायनः॥ ब्रह्मद्विट् ब्राह्मणद्वेषी परिवित्तिंवक्ष्यति गणाभ्यन्तरोगणप्रधानोगणस्यने-तेतियावत् ॥ १५४ ॥

(६) रामचन्द्रः। यक्ष्मरोगी। परिवेत्ता ज्येष्ठेअकृतदारे सति कनीयान्दारानग्नीन्गृण्हाति सपरिवेत्ता। ज्येष्ठस्तु परिवित्तिः। निराकृतिः महायज्ञानुष्ठानरहितः देवादीनांनिराकर्ताच। ब्रह्मद्विट्ब्राह्मणानां वेदस्य वा द्वेष्टा वेदविस्मरणशी-लोवा। गणाभ्यन्तरःगणवाहः। क्रियया जीवन्ति एते गणशब्दवाच्याः। तदभ्यन्तरगताः ॥ १५४ ॥

कुशीलवोऽवकीर्णी च वृषलीपतिरेव च ॥ पौनर्भवश्च काणश्च यस्य चोपपतिर्गृहे ॥ १५५ ॥

(१) मेधातिथिः। चारणनटनर्तकगायनादयः कुशीलवाः। अवकीर्णीविप्लुतब्रह्मचर्योवृषलीशूद्रातस्याः पतिः अप्रत्यक्षन्यायंचमन्यन्ते। वृषल्याएवचयः यस्यद्विजातिभार्यानास्ति कुतएतत्प्रकरणान्तरेविगर्हिताचारसंग्रहंश्रूयते एता-न्विगर्हिताचारानितिशूद्राविवाहश्चसर्वेषामनुज्ञातत्वात् नगर्हितः सचकृतसजातीयापरिणयनस्यानुज्ञातः। अतोसत्यांसजा-तीयायांवृषल्याभर्त्ताप्रतिषिध्यते। तत्रपौनर्भवः पुनर्भूः। पुनरूढांवक्ष्यति नवमेध्याये पत्यावापरित्यक्तेति। काणएकेना-क्ष्णाविकलः। यस्यचउपपतिर्जायाजारोवस्थितायांभार्यायामस्तिउपेक्षयानिन्द्यते। तदुक्तं अन्नादेभ्रूणहामार्ष्टिपत्यौभार्या-पचारिणीति ॥ १५५ ॥

---

* संबन्धि= मठ (अ)

(२) **सर्वज्ञनारायणः** । कुशीलवोनटवृत्तिः । अवकीर्णीव्रतमध्ये स्खलितब्रह्मचर्यः । पुनर्भूपुत्रःपौनर्भवः । गृहे-भार्यायाम् ॥ १५५ ॥

(३) **कुल्लूकः** । कुशीलवोनर्तनवृत्तिः । अवकीर्णी स्त्रीसंपर्काद्विप्लुतब्रह्मचर्यः प्रथमाश्रमी यतिश्च । वृषलीपतिः सवर्णामपरिणीयकृतशूद्राविवाहः । पौनर्भवः पुनर्भूपुत्रोवक्ष्यमाणः । उपपतिर्यस्य जायाजारोगृहेस्ति ॥ १५५ ॥

(४) **राघवानन्दः** । कुशीलवोनर्तकवृत्तिः । अवकीर्णी स्त्रीसंपर्कादुपप्लुतब्रह्मचर्यः । वृषलीपतिः सवर्णामपरिणीय कृतशूद्राविवाहः । पौनर्भवः पुनर्भूपुत्रः । यस्योपपतिः स्वजायाजारः । गृहइत्यनेननान्यत्र तथा दूषणमितिभावः ॥१५५॥

(५) **नन्दनः** । कुशीलवोगायकः । गूढलिङ्ग्यवकोर्णीस्याद्यश्च भग्नव्रतस्तथेतिदेवलः ॥ वृषलीपतिः अनूढत्रैवर्णिक-स्त्रीकः केवलशूद्रापतिः । काणस्य पूर्वजन्मनि परनेत्रोत्पाटकत्वात्प्रतिषेधः । परदाराभिसंयोगात्पुरुषोजारउच्यते । सएवो-पपतिर्ज्ञेयोयः सदासंवसेद्गृह इतिदेवलः ॥ १५५॥

(६) **रामचन्द्रः** । कुशीलवो नटनर्तकः । अवकीर्णी क्षतव्रतः । पौनर्भवः पुनर्भ्वाञ्जातः । परपूर्वापतिः पुनर्भूः । काणःएकाक्षी । यस्य गृहे चोपपतिः जारः । एते वर्ज्याः ॥ १५५ ॥

भृतकाध्यापकोयश्च भृतकाध्यापितस्तथा॥ शूद्रशिष्योगुरुश्चैव वाग्दुष्टः कुण्डगोलकौ ॥ १५६॥

(१) **मेधातिथिः** । भृतकाध्यापकः भृतकः सन्योस्थितो ध्यापकः भृतकइतियदीयद्ददासिवेदमध्यापयामीति यः प्रवर्तते पणेन सभृतकाध्यापकः । एषाहिभृतिः प्रसिद्धा कायवाहादिषुयस्त्वियताधनेनेयदध्यापयामीतिननिश्चित्यवचनव्यव-स्थयापूर्वमध्यापयति लभतेचाध्यापनार्थं नासौभृतकाध्यापकः । अनिरूपितपरिमाणपूर्वैचार्थवादेविहितमध्यापनं । एवं-भृतकाध्यापितः योव्युत्पन्नाबुद्धिःसत्यकामवत्स्वयंभृतिंदत्वाधीतेसएवमुच्यते यस्तुपित्रादिनाभृतिंदत्वा उपाध्यायन्तराभा-वेध्याप्यते । नतस्यविगर्हिताचारत्वं बालोहिपित्राप्रतिषिद्धेभ्योनिवर्तनीयः । एतदुक्तंगुरौशिष्यश्चयाज्यश्चेति । शूद्रस्यशि-ष्योव्याकरणादिविद्यासुगुरुश्चशूद्रस्यैव । उपसर्जनीभूतस्यापिसंबन्धस्मृतिशास्त्रत्वात्गर्हिताचारत्वस्यसर्वशेषत्वात्गुरुत्वंच-गर्हितंनान्यत् । वाचादुष्टः परुषानृतभाषी । अभिशस्तइत्यन्ये कुण्डगोलकौ ॥ १५६ ॥

(२) **सर्वज्ञनारायणः** । भृतकोभृत्यापरिक्रीतः । सएवाध्यापकोयस्य सभृतकाध्यापकः । एवमध्यापितोपि । गुरुश्चैव शूद्रस्येत्यनुषङ्गः । वाग्दुष्टः परुषवादी । १५६ ॥

(३) **कुल्लूकः** । भृतिर्वेतनं तद्ग्राही भृतकःसन्योध्यापकः सतथाएवंभृतकाध्यापितः । शूद्रशिष्योव्याकरणादौ गुरुश्च तस्यैव । वाग्दुष्टःपरुषभाषीअभिशस्तइत्यन्ये । कुण्डगोलकौ वक्ष्यमाणौ ॥ १५६ ॥

(४) **राघवानन्दः** । भृतकाध्यापकः भृतिंगृहीत्वैव योध्यापयति सभृतकाध्यापकः । भृतेन शिष्यपुष्टेनगुरुणा योध्यापितः सभृतकाध्यापितः । कःकुत्सितार्थे शूद्रशिष्यः शूद्रस्य शिष्यः । गुरुः शूद्रस्येति शेषः । वाग्दुष्टः परुषभाषी । कुण्डगोलकौ वक्ष्यमाणौ ॥ १५६ ॥

(५) **नन्दनः** । भृतकः भृतिभुक् । अत्र देवलः भृतकाध्यापितोयश्चभृतकाध्यापकश्चयः । तावुभौ पतितौ ज्ञेयौ-स्वाध्यायक्रयविक्रयादिति ॥ गुरुः शूद्रगुरुः । कुण्डगोलकौवक्ष्यति ॥ १५६ ॥

(६) **रामचन्द्रः** । भृतकाध्यापकः वेतनादानेन योऽध्यापयते सः । यःभृतकाध्यापितः अध्येता । शूद्रःशिष्योय-स्य सःवाएतादृशोगुरुः । कुण्डगोलकौ । पत्यौजीवति कुण्डस्तु मृते भर्तरि गोलकः ॥ १५६ ॥

अकारणपरित्यक्ता मातापित्रोर्गुरोस्तथा ॥ ब्राह्मैर्यौनैश्च सम्बन्धैः संयोगं पतितैर्गतः ॥१५७॥

(१) **मेधातिथिः** । असतिकारणेयःपरित्यजतिमातरंपितरंआचार्यंच । गुरुशब्दःसामान्यशब्दत्वादुपाध्यायेपिवर्तते। यत्तुतथासतिपितापितृग्रहणंनकर्तव्यंस्यात्गुरुत्वादेवसिद्धेरतआचार्यएवेहगुरुरितिव्याचक्षते तदयुक्तं । असतिमातापितृग्रहणेगुरुशब्दःपितर्येवकृत्रिमाकृत्रिमन्यायेनप्रवर्तते । पृथगुपादानेतुशास्त्रान्तरवदाचार्यश्रेष्ठोगुरूणामितिसामान्यशब्दतासिद्धा भवति । परित्यागकारणंचत्यजेत् पितरंराजघातकमित्यादि मातापित्रोःपरित्यागस्तत्पादसेवायाःशुश्रूषादेःअकरणं तदाराधनंअतत्परत्वं गुरोरेवमेव । अध्यापनसमर्थेध्यापयितरिचतत्त्यागेनान्यत्राध्ययनं पतितैःसंयोगंगतःसंबन्धंकृतवान्ब्राह्मैर्याजनाध्यापनादिभिर्यौनैःकन्यादानादिभिः । ननुचपतितत्वादेवासौवर्ज्यः । केचिदाहुः संवत्सरेणपततिपतितेनसहाचरन् । नार्वागयंप्रतिषेधः । अथकेयंवाचोयुक्तिः संयोगंगतइति । नात्रसंबन्धशब्दोवैशेषिकादिप्रसिध्यासंयोगादिवचनः किंतर्हिक्रियैवात्रसंबन्धहेतुत्वात्संबन्धशब्देनोच्यते याजनादिलक्षणेसंयोगशब्दश्चसंबन्धमात्रमुपलक्षयति ॥ १५७ ॥

(२) **सर्वज्ञनारायणः** । अकारणात्पातित्यंविना । गुरोराचार्यस्य ब्राह्मैरध्ययनाध्यापनैः । यौनैर्योनिसम्बन्धैर्वैवाहिकैः । पतितैः सावित्रीपतितैः व्रात्यैः ॥ १५७ ॥

(३) **कुल्लूकः** । मातुःपितुर्गुरूणांच परित्यागकारणंविना त्यक्ता शुश्रूषादेरकर्ता । पतितैश्चाध्ययनकन्यादानादिभिःसंबन्धैःसंपर्कंगतः । पतितत्वादेवास्य निषेधइति चेन्न संवत्सरात्प्रागिदंभविष्यति संवत्सरेण पततीति वक्ष्यमाणत्वात् ॥ १५७ ॥

(४) **राघवानन्दः** । अकारणंपतितादिप्रयोजकजात्यन्तरादीन्विनागुर्वादीनांपरित्यक्तासंयोगंपतितैर्गतः संयोगं विद्याग्रहणकन्याग्रहणरूपं । तदुत्तरत्र संवत्सरेण पतितइतिस्वयमेव वक्ष्यमाणत्वात्पूर्वपतितापेक्षया अन्यः भाविपातित्ययुक्तः । अतोनपुनरुक्तिः ॥ १५७ ॥

(६) **रामचन्द्रः** । ब्राह्मैःसंबन्धैः संयोगंगतः । वेदाध्ययनसंबन्धैः संयोगंगतः । तथा यौनैर्विवाहसंबन्धैः संयोगंगतः ॥ १५७ ॥

अगारदाही गरदः कुण्डाशी सोमविक्रयी ॥ समुद्रयायी बन्दी च तैलिकः कूटकारकः ॥१५८॥

(१) **मेधातिथिः** अगारस्यगृहस्यदग्ध्वागरंददातीति दर्शनार्थंचगरग्रहणंविषादीनामपि । कुण्डस्यअन्नमश्नाति एवं गोलकस्य प्रदर्शनार्थत्वात् कुण्डस्य । सोमंविक्रीणीतेओषधिः सोमस्तंयोविक्रीणीतेयागार्थमौषधार्थंवा । अन्येतुसोमसाधनान्ज्योतिष्टोमादियागानाहुः । तेषांचविक्रयोयद्यपिनसंभवतिअमूर्तत्वात् । क्रियायास्तथाप्यविदुषामेवंविधस्याचारस्यदर्शनादयंप्रतिषेधः । दृश्यन्तेह्यविद्वांसएवंवदन्तोयन्मयासुकृतंकृतंतत्तेस्त्विति शपथेनविहितं सुकृतेनसाधितान्स्वैरिति तथाचयांचरात्री मजायेथायांचप्रेतासि तदुभयमन्तरेणेष्टापूर्तेतेलोकंसुकृतमायुःप्रजांवृञ्जियंयदिमेद्रुह्युरिति । यथैवशपथाएवंदानविक्रयादावपि वाचायः करोतिसवर्ज्यते। अकार्यतादृशानांशपथदानविक्रयादीनांचाक्रियमाणानामनुमीयते । समुद्रउदधिस्तंयोयाति । बन्दीस्तुतिपाठकः । तैलिकःतिलादीनांपेष्टा । कूटकारकःसाक्ष्येष्वनृतवादी ॥१५८॥

(२) **सर्वज्ञनारायणः** । गरदोविषदोविप्रव्यतिरिक्तानाम् । कुण्डाशीकुण्डंषष्टिःपलानि तावत्परिमाणतण्डुलान्नभोजी । समुद्रयायी नौकया समुद्रसंचारी । बन्दीस्तुतिपाठकः । तैलिकः तिलयन्त्रप्रवर्तकः । कूटंछद्मतत्कारकः ॥ १५८ ॥

---

(१५८) समुद्रयायी= शूद्रयाजी (ख)

(३) कुल्लूकः । गृहदाहकःमरणहेतुद्रव्यस्यदाता । कुण्डस्य वक्ष्यमाणस्ययोन्नमश्नाति प्रदर्शनार्थत्वात्कुण्डस्य गोलकस्यापि ग्रहणम् । अतएवदेवलः । अमृते जारजःकुण्डो मृते भर्तरि गोलकः । यस्तयोरन्नमश्नाति सकुण्डाशीति कथ्यते ॥ सोमलताविक्रेता । समुद्रं योवहित्रादिना द्वीपान्तरंगच्छति । बन्दी स्तुतिपाठकः । तैलार्थंतिलादिबीजानांपेष्टा । साक्षिवादे कूटस्य मृषावादस्य कर्ता ॥ १५८ ॥

(४) राघवानन्दः । अगारदाही अगारोगृहं । कुण्डाशी कुण्डस्यान्नभोजी बह्वाशीवा । भीमः कुण्डाशीति स्मरणात् । सोमविक्रयी सोमोत्र लताविशेषः । समुद्रयायी वहित्रादिना द्वीपान्तरगन्ता । बन्दी स्तुतिवृत्तिः । तैलिकः तैलार्थे तिलादीनांपेष्टा । कूटकारकः कूटसाक्षी भूम्यर्थमिथ्याभाषी ॥ १५८ ॥

(५) नन्दनः । अगारदाही सज्ञेयः प्रेतंदग्ध्वा धनेनयः । सचाप्यगारदाहीस्याद्विद्वेषाद्वेश्मदाहकः ॥ अमृते जारजः कुण्डो मृते भर्तरि गोलकः । यस्तयोरन्नमश्नाति सकुण्डाशीति कीर्त्यत इतिदेवलः ॥ कूटकारकः तुलामानलेखादिषुवञ्चनाकरः ॥ १५८ ॥

(६) रामचन्द्रः । कुण्डाशी यस्त्रिपलतण्डुलान्नभोक्ता । बन्दी कारागृहस्थितः स्तुतिपाठकोवा अनृतपाठकः । तलिकःतैलविक्रयी । कूटकारकः । अगारदाही गृहदाहकारी । सोमलताविक्रयी शूद्रयाजी शूद्रंयोयाजयति ॥ १५८ ॥

पित्रा विवदमानश्च कितवोमद्यपस्तथा ॥ पापरोग्यभिशस्तश्च दाम्भिकोरसविक्रयी ॥ १५९ ॥

(१) मेधातिथिः । पित्रायोविवदतेपरुषंभाषते । राजकुलेव्यवहरतीतिपूर्वपक्षोत्तरपक्षभंग्याभागादिनिमित्तं । तथाचगौतमः । पित्राकामेनविरक्तानिति । प्रतिरोद्धागुरोरित्यनेनैतत्कथंपुनरुक्तमुच्यते । अन्यःप्रतिरोधःअन्यश्चविवादःयत्किंचित्गुरोरभिप्रेतंवस्तुकथमिदंसिध्येदितितत्रसंबन्धकथनंप्रतिरोधःन्याय्येपिवस्तुनितदिच्छाप्रतिघातः । प्रतिरोधृत्वं प्रतिरोद्धेति । तत्रपाठान्तरम् । आभिमुख्येनहिंसिताहस्तादिनागुरोःप्रीतिरोद्धाचपेटादिदानेनअन्यस्मिन्पक्षेस्थितमन्यत्वंविवादस्य । कितवोद्यूतस्यकारयितासभिकःयस्तुलयंदेवितासप्रागेवनिषिद्धः । केकरमन्येपठन्ति । केकरोमद्यपइतिसचवलितप्रेक्षीअध्यर्धदृष्टिःकातरमन्येसचशुकपक्षतारकः । मद्यपःसुरायाअन्यस्यारिष्टादेर्मद्यस्यपातासुरापः । पतितत्वेनैवनिरस्तः पापरोगीकुष्ठी सहिलोकेऽत्यन्तनिन्द्यःपापरोगीत्यभिधातुंयुक्तः । अस्मादेवचप्रतिषेधात्यक्ष्मीत्यत्रनसर्वोव्याधिर्गृहीतोगृह्यते । कस्तर्हिक्षयीयदिहिसर्वोगृह्येततेनैवसिद्धत्वात्पापरोगीतिनाकरिष्यत्अभिशस्तःपातकोपपातकयोःकर्तेतिलोकेप्रसिद्धः । असत्यपिकर्तृकत्वनिश्चये । दाम्भिकःछद्मनाधर्मंवदतिलोकपङ्क्त्यर्थंनकर्तव्यमितिकृत्वाकरोति रसविक्रयीविषस्यविक्रेता । तस्यह्येतदभिधानं । उपांशुर्विधिरसदः सत्रीत्यादि विषदोरसदउच्यते ॥ १५९ ॥

(२) सर्वज्ञनारायणः । पित्रा धनार्थंविवदमानः । कितवः वृत्त्युद्देशविनाद्यूतकारी । केकरइति क्वचित्पाठे वक्रदृष्टिरित्यर्थः । मद्यं द्राक्षादिमद्यं । पापरोगः कुष्ठभगन्दरादिनिन्दितरोगः । अभिशस्तोवचनीयेन युक्तः । दाम्भिकोदम्भेन कर्मचारी । रसागुडादयः एतेनाविक्रय्यमुपलक्षितम् ॥ १५९ ॥

(३) कुल्लूकः । पित्रा सह शास्त्रार्थे लौकिके वा वस्तुनि निरर्थंयोविवदते । कितवोयः स्वयंदेवितुमनभिज्ञः स्वार्थंपरान्देवयति न स्वयंदेविता तस्योक्तत्वात् । न च सभिकः तस्य द्यूतवृत्तिपदेनाभिधास्यमानत्वात् । केकरइति पाठे तिर्यग्दृष्टिः । सुराव्यतिरिक्तमद्यपाता । कुष्ठी । अनिर्णीतेऽपि तस्मिन्महापातकादौजाताभिशापः । छद्मनाऽधर्मकारी । रसविक्रेता ॥ १५९ ॥

---

(१५९) कितवः—केकरः (च)

(४) राघवानन्दः। पित्राविवदमानस्तद्विवादे शास्त्रीये लौकिके वा रतः। कितवोयःस्वार्थेन परान्देवयते । यः सुरातिरिक्तपायी मद्यपः सुरापस्य पतितत्वात् विप्रप्रकरणात्। पापरोगी कुष्ठादियुक्तः । अभिशस्तः आशङ्कितमहापातकः। दाम्भिकोत्र छद्मना धर्माचरणंयस्य। रसविक्रयी रसोगोरसादिः ॥ १५९ ॥

(५) नन्दनः। अयंकितवोवञ्चकः । केचित्पुनरुक्तिभयात्। केकरोमद्यपस्तथैति पठन्ति केकरः आकेकरनारनेत्रः। तस्यक्रूरनेत्रत्वात्प्रतिषेधः । मद्यपोमदकरद्रव्याणांतालासवादीनांपाता। सुरापस्तु पतितप्रतिषेधेनोक्तः। मधुमेहभगन्दरादयः पापरोगस्थाः। दाम्भिको धर्मध्वजः। रसविक्रयी विषविक्रयी ॥ १५९ ॥

(६) रामचन्द्रः। पापरोगी दीर्घरोगी। अभिशस्तः कलङ्कीत्यर्थः ॥ १५९ ॥

धनुःशराणां कर्ता च यश्चाग्रेदिधिषूपतिः ॥ मित्रध्रुग्द्यूतवृत्तिश्च पुत्राचार्यस्तथैव च ॥ १६० ॥

(१) मेधातिथिः। धनुः शरांश्चयः शिल्पीवकरोतियश्चाग्रेदिधिषूपतिः। दिधिषूशब्दःकाकाक्षिवदुभयेनसंबध्यते। स्मृतिशास्त्रत्वाचेदृशःसंबन्धोलभ्यते। लेखालोष्ठादयोपिस्मृत्यर्थसंकल्पतोभवन्तिचार्थकाराः। अतएतन्नवाच्यंकथमेकशब्दः समासान्तर्गतोद्वाभ्यांभिन्नप्रस्थानाभ्यांअभिसंबध्येतइति। गौतमेनहिद्वयंप्रतिषिद्धं इहापिसंबन्धभेदेलिङ्गं। द्विपदः समासोनह्यग्रेदिधिषूपतिर्नामकश्चिदस्ति एतौचवक्ष्यमाणलक्षणौ मित्रध्रुक्मित्रंयोद्रुह्यतिर्मित्रस्ययः कार्योपघातेवर्तते। द्यूतज्ञःद्यूतवृत्तिर्जीविकायस्य। ननुकितवोमद्यपइत्यत्रोक्तमेव नावश्यंद्यूतवृत्तिरेवद्यूतस्यप्रयोजकः । किंतर्हियःस्वयंदेवितुंनजानाति। गुरुभयाद्वा न दीव्यति व्यसनीतु देवैःशमनयान्यंदेवयति तदर्थोद्वितीयःकितवशब्दःअथवानृतस्त्रीकद्यूतसभास्थाणवोद्यूतवृत्तयः। पुत्रआचार्योध्यापकोयस्यामुख्यमाचार्यत्वंनपुत्रेसंभवति ॥ १६० ॥

(२) सर्वज्ञनारायणः। द्यूतवृत्तिर्जीविकार्थंद्यूतकृत्। पुत्रएव यस्याचार्योधर्मोपदेष्टा सपुत्राचार्यः ॥ १६० ॥

(३) कुल्लूकः। धनूंषिशरांश्चयः करोति। ज्येष्ठायांसोदरभगिन्यामनूढायांया कनिष्ठा विवाहेन दीयते साग्रेदिधिषूस्तस्याःपतिः। तथाचलौगाक्षिः*। ज्येष्ठायांयद्यनूढायांकन्यायामुह्यतेऽनुजा। सा चाग्रेदिधिषूर्ज्ञेया पूर्वातु दिधिषूः स्मृता ॥ गोविन्दराजस्तु भ्रातुर्मृतस्य भार्यायामित्यनेनाग्रे दिधिषूपतिरेव वृत्तिवशादग्रेपदलोपेन दिधिषूपतिरिति मनुना वक्ष्यते सद्ग्रहणार्थमित्याह। मित्रध्रुग्योमित्रस्यापकारे वर्तते। द्यूतवृत्तिःसभिकः । पुत्रेणाध्यापितःपिता मुख्येन पुत्राचार्यत्वासंभवात् ॥ १६० ॥

(४) राघवानन्दः। धनुःशराणां धनुषःशराणांच। अग्रे दिधिषूपतिः दिधिषूर्लक्ष्यते तस्याः पतिः। द्यूतमुपजीव्यं यस्य सद्यूतवृत्तिः। केकरइति पाठेतिर्यक्दृष्टिः। पुत्राचार्यः पुत्रेणाध्यापितः ॥ १६० ॥

(५) नन्दनः। ज्येष्ठायांस्यादनूढायामूढाग्रेदिधिषूःस्मृता। द्यूतेनजीवनंयस्यसःद्यूतवृत्तिः ॥ १६० ॥

(६) रामचन्द्रः। धनुःशराणां कर्ता चकाराद्विक्रयी च। य अग्रेदिधिषूपतिः पुनर्भूःपतिः। द्विस्तस्याः दिधिषू पतिरित्यमरः। पुत्र आचार्योयस्य सपुत्राचार्यः ॥ १६० ॥

भ्रामरी गण्डमाली च श्वित्र्यथो पिशुनस्तथा ॥ उन्मत्तोऽन्धश्च वर्ज्याः स्युर्वेदनिन्दकएव च ॥ १६१ ॥

(१) मेधातिथिः। व्याधिविशेषवचनाएते भ्रामरी अपस्मारी। गण्डमालीकपोलेकण्ठेपिमालाकाराजायन्ते। श्वित्रीश्वेतकुष्ठः। पिशुनःपरमर्मप्रकाशकःकर्णेजपः। उन्मत्तःअनवस्थितचित्तोधातुःसंक्षोभेणपिशाचगृहीतः। यत्किंचनवादीयत्किं-

* लौगाक्षिः इति क्वचित्पुस्तके (१६१) वृक्षरोपकः=वृक्षारोहकः (नं)

चित्रकारी। अन्धःचक्षुर्विकलः। वेदनिन्दकःननुचब्रह्मद्विट्शब्देनैवब्रह्मशब्दस्यानर्थकत्वात्वेदनिन्दकोगृहीतएव। नैवमन्यनिन्दाअन्येद्विषःचित्तधर्मोद्वेषःतदुपर्यशीतिशब्देनकुत्सनंनिन्दा ॥ १६१ ॥

(२) **सर्वज्ञनारायणः**। भ्रामरी अपस्मारी। गण्डमालाव्याधिभेदः ॥ १६१ ॥

(३) **कुल्लूकः** । अपस्मारी । गण्डमालाख्यव्याध्युपेतः। श्वेतकुष्ठयुक्तः । दुर्जनः। उन्मादवान्। अचक्षुः। वेदनिन्दाकरः ॥ १६१ ॥

(४) **राघवानन्दः**। भ्रामरी अपस्मारी । गण्डमालीगले गण्डयुतः। श्वित्री श्वेतकुष्ठयुक्तः। पिशुनः प्रच्छन्नदोषाख्यायी। वेदनिन्दकः धिक्शब्दादिवादेन वेदकुत्सकः ॥ १६१ ॥

(५) **नन्दनः**। भ्रामरी अपस्मारी। गण्डमाली उपचितउद्धूतोमांसपिण्डोगण्डशब्देनोच्यते। तस्य मालेव लम्बमानत्वान्मालात्वम् तद्वान्गण्डमाली ॥ १६१ ॥

(६) **रामचन्द्रः**। भ्रामरी अपस्मारी गण्डमाला कपोलकण्ठेपिटकमालाकारा जायते ॥ १६१ ॥

हस्तिगोश्वोष्ट्रदमकोनक्षत्रैर्यश्च जीवति ॥ पक्षिणां पोषकोयश्च युद्धाचार्यस्तथैव च ॥ १६२ ॥

(१) **मेधातिथिः**। हस्त्यादीनांनेतादमकः। गर्तांशिक्षयितानक्षत्रैर्यश्चजीवति नक्षत्रशब्देनज्योतिःशास्त्रंलक्ष्यतेतेनजीवतिज्योतिषिकः। पक्षिणांश्येनादीनामाखेटार्थेपोषयिता। युद्धाचार्योधनुर्वेदोपदेशकः ॥ १६२ ॥

(२) **सर्वज्ञनारायणः**। हस्त्यादीनांदमकस्तद्दमनेन जीवनः। नक्षत्रैर्ज्योतिषवृत्या। युद्धाचार्यः शस्त्रनियुद्धाद्युपायोपदेष्टा ॥ १६२ ॥

(३) **कुल्लूकः**। हस्तिगवाश्वोष्ट्राणांविनेता। नक्षत्रशब्देन ज्योतिःशास्त्रमुपलक्ष्यते तेन योवर्तते। पक्षिणांपञ्जरसंजातानांक्रीडाद्यर्थेपोषिता। युद्धार्थमायुधविद्योपदेशकः ॥ १६२ ॥

(४) **राघवानन्दः**। वृत्यर्थेहस्त्यादीनांदमनकः शिक्षकः । नक्षत्रैर्ज्योतिःशास्त्रैरेव। पक्षिणां पञ्जरस्थानांक्रीडार्थे विक्रयार्थेवा पोषकः। युद्धाचार्यः युद्धार्थमायुधविद्योपदेशकः तद्वारा विप्रवधादिसंभवात् ॥ १६२ ॥

(५) **नन्दनः**। दमकः शिक्षकः। पक्षिणः पोषयति सपक्षिणांपोषकः ॥ १६२ ॥

(६) **रामचन्द्रः**। हस्तिगोश्वोष्ट्रादीन् दमयतीति दमकः ॥ १६२ ॥

स्रोतसांभेदकोयश्च तेषांचावरणे रतः ॥ गृहसंवेशकोदूतो वृक्षारोपक एव च ॥ १६३ ॥

(१) **मेधातिथिः**। स्रोतांसिउदकागमाः तेषांभेदकः सेतुंभित्वादेशान्तरेव्रीह्यादिसेकार्थंनयति। तेषांचस्रोतसामावरणेरतः आवरणआच्छादनंयतः प्रदेशादुदकमुद्भवतितन् स्थगयति। गृहाणांसंनिवेशोपदेशकः वास्तुविद्याजीवी स्थपतिः सूत्रधारादिः। नत्वात्मनोगृहाणांसन्निवेशयिता । दूतोराज्ञाप्रेष्योदासवद्विनियोज्यः दूतस्तुसन्धिविग्रहादावेवप्रेष्यते। वृक्षानूरोपयतिमूल्यनं धर्मार्थेतुनदोषः। अविगर्हिताचारत्वाद्विहितंवृक्षारोपणंदशाम्रवापीनरकंनयाति ॥ १६३ ॥

(२) **सर्वज्ञनारायणः**। स्रोतसांभेदकः स्रोतोनिरोधकः। सेतुभेदकत् देशिकइतिपाठे जलशिरायाःश्रोतसउपदेष्टेत्यर्थः। तेषांस्रोतसांप्रवर्तमानानां। गृहसंवेशको वृत्त्यर्थंगृहनिर्माता। दूतोदूत्यवृत्तिः। वृक्षारोपकोवृत्त्यर्थम् ॥ १६३ ॥

(३) **कुल्लूकः**। प्रवहज्जलानांसेतुभेदादिना देशान्तरनेता। तेषामेवावरणकर्ता निजगतिप्रतिबन्धकः। गृहसन्निवेशो-

---

(१६३) वृक्षारोपकः=वृक्षारोहकः (नं०)

पदेशकोवास्तुविद्योपजीवी । दूतोराजग्रामप्रेष्यव्यतिरिक्तोऽपि । वृक्षरोपयिता वेतनग्रहणेन । न तु धर्मार्थी पञ्चाम्ररोपी नरकंनयातीति विधानात् ॥ १६३ ॥

(४) राघवानन्दः । स्रोतसां नद्यादीनांविमार्गप्रापयिता । आवरणेरतः निजगति प्रतिबन्धकश्च । गृहसंवेशकोवास्तुविद्योपजीवी । दूतोराजैकनियतप्रेष्यः । वृक्षारोपकःभृतिमादाय न तु धर्मार्थं पञ्चाम्रवापी नरकं न पश्येदित्युक्तेः॥१६३॥

(५) नन्दनः । स्रोतसांभेदकः स्रोतसांभञ्जकः । तेषामावरणेरतः प्रजोपयोगार्हमार्गगमननिरोधतत्परः । स्रोतसांदर्शकस्तथेतिवा पठन्ति । स्रोतसांजलोद्भवस्थानानामुपदेष्टा । गृहसंनिवेशकोवृत्त्यर्थं गृहाणांनिर्माता । वृक्षारोहको वृक्षाणामारोढा ॥ १६३ ॥

(६) रामचन्द्रः । तेषांवा आचरणे रतः । गृहसंवेशकः । वृक्षानारोपयति मूल्येन वृक्षारोपकः ॥ १६३ ॥

श्वक्रीडी श्येनजीवी च कन्यादूषकएव च ॥ हिंस्रोवृषलवृत्तिश्च गणानांचैव याजकः॥१६४॥

(१) मेधातिथिः । श्वभिःक्रीडतिश्वक्रीडी क्रीडार्थंशुनोबिभर्तिश्येनैर्जीवतिक्रयविक्रयादिना प्रागुक्तपक्षिणांपोषकः पञ्जरादिसंस्थितानांधारयिता । कन्यामकन्यांयःकरोति सकन्यादूषकः । हिंस्रः स्वभावक्रूरःवधरतः । वृषलवृत्तिः शूद्रेभ्यः सेवादिनायोजीवति । वृषलपुत्रइतिपाठान्तरंकेवलाएववृषलाःपुत्रायस्यशूद्रापत्यैश्चकेवलैरितिगर्हिताचारः । गणानांदेवानांच याजकः गणयागाः प्रसिद्धाः ॥ १६४ ॥

(२) सर्वज्ञनारायणः । श्वक्रीडी श्वभिः क्रीडन् । कन्यादूषकः कन्यायाअङ्गुल्यादिनाऽकन्यात्वापादकः । वृषलएव पुत्रोस्य सतु वृषलपुत्रः । गणानामनेकेषांक्रमेण ॥ १६४ ॥

(३) कुल्लूकः । क्रीडार्थंशुनःपोषयति श्येनैर्जीवति क्रयविक्रयादिना । कन्याभिगन्ता । हिंसारतः । शूद्रोपक्रमवृत्तिः । वृषलपुत्रइति पाठान्तरम् । वृषला एव केवलाः पुत्रायस्येत्यर्थः । विनायकादि गण यागकृत् ॥ १६४ ॥

(४) राघवानन्दः । श्वक्रीडी क्रीडार्थंशुनःपोष्टा । श्येनजीवी श्येनेनान्यपक्षिणोघातयित्वा व्यवहारी । पक्षिपोषकस्य निन्दितत्वेपि अधिकदूषणार्थंवा । कन्यादूषकः । अङ्गुल्यादिना योनिविदारकः अथवा तस्याःपरिवादीकुमारीगन्तुरुपपातकित्वोक्तेर्दण्डप्रायश्चित्तापाङ्क्त्यादिभेदेनकुमार्यादूषकाणांपुनरुक्ताद्यभावोऽध्येयः । वृषलवृत्तिः वृषलावक्रमवृत्तिः वृषलोपजीवी वा वृषलपुत्रइति पाठान्तरं वृषलाएव केवलाः पुत्राः पुत्रस्थानीया वायस्य सतथा । गणानां विनायकानां बहुयाजकस्योक्तत्वात् । बहूनामुपनेता वा यश्चोपनयते बहूनिति निन्दितत्वात् ॥ १६४ ॥

(५) नन्दनः । श्वभिः क्रीडतीतिश्वक्रीडी । वृषलएव पुत्रोयस्य सवृषलपुत्रः । गणानाञ्चैवयाजकः नानाजातीयाअनियतवृत्तयः संहतागणास्तेषांयाजकोयाजयिता ॥ १६४ ॥

(६) रामचन्द्रः । वृषलपुत्रः । निर्धर्मोवृषलोज्ञेयस्तत्सुतोवृषलात्मजः ॥ च पुनःगणानांयाजकएवंविनायकादिगणयाजकः सर्वेषांयाजकोवा ॥ १६४ ॥

आचारहीनः क्लीबश्च नित्यंयाचनकस्तथा॥कृषिजीवी श्लीपदी च सद्भिर्निन्दितएव च॥१६५॥

(१) मेधातिथिः । आचारो गृहाभ्यागतानांपूजादिप्रयुक्तोलौकिकसमाचारः तेनवर्जितः । क्लीबोऽल्पसत्वः भग्नोत्साहः कर्तव्येषु । याचनकः सदैवयोयाचतेयश्चापरानुद्वेजयति । वस्तुस्वभावोयंयाच्ययाच्यमानोद्वेजनं । नद्यादिभ्योयुः

---

(१६४) वृषलवृत्तिः=वृषलपुत्रः (नं)

स्वार्थेकः। कृषिजीवीत्स्वयंकृतयाकृष्याजीवति सतिचोपायान्तरे अत्स्वयंकृतयापि। श्लीपदी एकःपादोमहान्यस्य। सद्भिर्निन्दितः दुर्भगः विनापिदोषेणसतांद्वेष्यः॥ ६५॥

(२) सर्वज्ञनारायणः। क्लीबोधर्मौद्यमशून्यः। नित्यंयाचनको याचकः। सद्भिर्विनिन्दितोऽकारणेपि॥ १६५॥

(३) कुल्लूकः। गुर्वतिथिप्रत्युत्थानाद्याचारवर्जितः। क्लीबोधर्मकृत्यादौ निरुत्साहः नपुंसकस्योक्तत्वात्। नित्यंयाचनेन परोद्वेजकः। स्वयंकृतया कृष्या योजीवति वृत्त्यन्तरेपि वा संभवत्यस्वयंकृतयापि। श्लीपदीव्याधिनास्थूलचरणः। केनापिनिमित्तेन साधूनांनिन्दाविषयः॥ १६५॥

(४) राघवानन्द। क्लीबोधर्माद्यनुत्साही नपुंसकस्योक्तत्वात्। नित्यंयाचनकः ध्वस्तनादिषु सत्स्वपि। कृषिजीवी स्वयंकृतकृष्या जीवति। श्लीपदी व्याधिकृतस्थूलपदः। अशिष्टोयमितिनिन्दितः॥ १६५॥

(५) नन्दनः। क्लीबउपहतशुक्रः पुरुषः॥ १६५॥

(६) रामचन्द्रः। क्लीबःधर्मोत्साहरहितः। कृषिजीवी कृषिकृत्। श्लीपदीपदे महती यस्य सहि। सद्भिर्निन्दितोदुर्भगः॥ १६५॥

औरभ्रिकोमाहिषिकः परपूर्वापतिस्तथा॥ प्रेतनिर्यातकश्चैव वर्जनीयाः प्रयत्नतः॥१६६॥

(१) मेधातिथिः। उरभ्रामेषास्तैश्चरतिक्रयविक्रयादिनाव्यवहरति तद्धनप्रधानोवाएवंमाहिषिकः। परःपूर्वोयस्याः तस्याःपतिःभर्ता। याअन्यस्मैदत्ता अन्येनवाऊढा तांपुनः यःसंस्करोति पुनर्भवतिभर्त्तापौनर्भवोनरोभर्त्तासावितिशास्त्रेण। प्रेतान्योनिर्यापयतिवहति एते यत्नतोवर्जनीयाः॥ १६६॥

(२) सर्वज्ञनारायणः। औरभ्रिकोमेषपोषकः। माहिषिकोमहिषपोषकः। परपूर्वाप्रागन्यस्मैदत्ता तस्याः पतिः परिणेता। प्रेतनिर्यातकोवृत्त्यर्थं प्रेतवाहः॥ १६६॥

(३) कुल्लूकः। मेषमहिषजीवनः। परपूर्वापुनर्भूस्तस्याःपतिः। प्रेतनिर्हारकोधनग्रहणेन न तु धर्मार्थं। एतद्वैपरमंतपोयत्प्रेतमरण्यहरन्तीति अवश्यश्रु*त्या विहितत्वात्॥ १६६॥

(४) राघवानन्दः। औरभ्रिकोमेषजीवी। माहिषिकोपि तथा। परपूर्वा पुनर्भूः तस्याःपतिः अस्याःपुत्रःपौनर्भवउक्तः। प्रेतनिर्यातकः धनग्रहणेन मृतनिर्हारकः॥ १६६॥

(५) नन्दनः। उरभ्रामेषास्तैर्योजीवति सऔरभ्रिकः। एतेन माहिषिकोव्याख्यातः। प्रेतनिर्यातकोवृत्त्यर्थंशवनिर्हारकः। प्रयत्नतः आपद्यपि॥ १६६॥

(६) रामचन्द्रः। औरभ्रिक मेषपालकः महिषपालकोवा। परपूर्वापतिः परपूर्वापुनर्भूस्तस्याः पतिः। प्रेतनिर्यातकःप्रेतंलोभेन निर्यातयतिप्रेतवाहकइत्यर्थः॥ १६६॥

एतान्विगर्हिताचारानपाङ्क्तेयान्द्विजाधमान्॥ द्विजातिप्रवरोविद्वानुभयत्र विवर्जयेत्॥ १६७॥

(१) मेधातिथिः। विगर्हितोनिन्दितः आचारःकर्मानुष्ठानमेषामिति। काणादयःपूर्वदोषलिङ्गेन स्तेनादयोनुभूयमानदोषाःप्रत्यक्षादिना। उभयत्रदैवे पित्र्येचवर्जयेत् परिहरेत्। अपाङ्क्तेयाः पङ्क्तिंनार्हन्ति। भवार्थेढक्कर्तव्यः। अनर्ह-

---

(१६६) औरभ्रिको=औरभ्रिकः (ख, ग, घ, च)

* हरन्तीतिअवश्यश्रुत्या=हरन्तीतिश्रुत्या (अ)

त्वमेवपङ्क्ताव भवनंप्रतीयते । अन्यैर्ब्राह्मणैःसह भोजननार्हन्ति । अतएवपङ्क्तिदूषकाउच्यन्ते तैःसहोपविष्टाअन्येपिदूषिताभवन्ति ॥ १६७ ॥

(२) सर्वज्ञनारायणः । एतानन्यांश्च विगर्हिताचारान् । अपाङ्क्तेयानितियेषांपङ्क्तावपि न भोक्तव्यमित्यर्थः उभयत्र दैवे पित्र्ये च ॥ १६७ ॥

(३) कुल्लूकः । एतान्स्तेनादीन्निन्दिताचारान्काणादींश्चपूर्वजन्मार्जितनिन्दितकर्मशेषलब्धकाणादिभावान्साधुभिः सहैकत्रभोजनाद्यनर्हान्ब्राह्मणापसदान्ब्राह्मणश्रेष्ठः शास्त्रज्ञोदैवेपित्र्ये च त्यजेत् ॥ १६७ ॥

(४) राघवानन्दः । उपसंहरतिएतानिति । उभयत्र दैवे पित्र्ये च । प्रवरःद्विजातिश्रेष्ठोविप्रः ॥ १६७ ॥

(५) नन्दनः । द्विजातिप्रवरविद्वच्छब्दौवर्जयितृप्रशंसापरौ । उभयत्रदैवपित्र्योः ॥ १६७ ॥

(६) रामचन्द्रः । उभयत्रदैवे पित्र्ये हव्यकव्यादिषुअपीतिनिश्चये ॥ १६७ ॥

ब्राह्मणस्त्वनधीयानस्तृणाग्निरिव शाम्यति ॥ तस्मै हव्यं न दातव्यं नहि भस्मनि हूयते ॥ १६८॥

(१) मेधातिथिः । यथैतेस्तेनादयःपङ्क्तिदूषकाः एवमनधीयानस्तत्तुल्यदोषइत्येवमर्थंपुनर्वचनं । अन्येतुव्याचक्षते अधीयानानांकाणादीनामसतिवर्तमानेविगर्हिताचारत्वेदैवेकदाचित्प्राप्त्यर्थमनधीयानोब्राह्मणोवर्ज्यः । यस्तुअधीतेतस्मैहव्यंकिमितिनदीयतेएवमर्थमेवात्रहव्यग्रहणं । अनधीयानःकेवलोवर्ज्योयेचदृश्यमानगर्हिताचारा अतस्तेउभयत्रप्रतिषिद्धास्तेदैवेपित्र्येचवर्ज्याः । अन्येतुपित्र्यएव तथाचवसिष्ठः । अथचेन्मंत्रविद्युक्तःशारीरैःपङ्क्तिदूषणैः । अदूष्यंतंयमःप्राहपङ्क्तिपावनएवसइति ॥ तृणाग्निरिवशाम्यतीति । तृणाग्निर्यथानशक्नोतिहवींषिपक्तुंहुतमात्रेणहविषाशाम्यति तद्वत् । नचयस्मिन्नग्नौहुतंनभस्मीभवतिनतत्रहोमात्फलं । एवंहिश्रूयते असमिद्धेनहोतव्यमग्निर्वैसर्वादेवताइति । एवमनधीयानोब्राह्मणस्तृणाग्नितुल्यः एतदेवाह नहिभस्मनिहूयतइति यथातृणाग्निः प्रायोभस्मीभवतिनतत्रहूयते एवंतादृशोब्राह्मणोनभोज्यते ॥ १६८ ॥

(२) सर्वज्ञनारायणः । तृणाग्नि रिवेत्यल्पफलहेतुतोक्ता । भस्मनितृणाग्निभस्मनि ॥ १६८ ॥

(३) कुल्लूकः । तृणाग्निर्यथा न हविर्दहनसमर्थोहविषि प्रक्षिप्ते शाम्यति निष्फलस्तत्र होमः एवंवेदाग्निशून्योब्राह्मणस्तृणाग्निसमस्तस्मै देवोद्देशेन त्यक्तंहविर्न दातव्यं यतोभस्मनि न हूयते । श्रोत्रियायैव देयानीत्यनेनैवानधीयानस्यापि प्रतिषेधसिद्धौ स्तेनादिवत्पङ्क्तिदूषकत्वज्ञापनार्थंपुनर्वचनम् । अन्येतु दैवे अनधीयानएव वर्जनीयः । अधीयानस्तु काणादिरपि शारीरदोषयुक्तोग्राह्यइति एतदर्थंपुनर्वचनम् । अतएव वसिष्ठः । अथ चेन्मन्त्रविद्युक्तः शारीरैः पङ्क्तिदूषणैः । अदूष्यंतंयमः प्राह पङ्क्तिपावनएवसः ॥ शारीरैः काणत्वादिभिर्न तुस्वयमुत्पाद्यैस्तेनत्वादिभिः ॥ १६८ ॥

(४) राघवानन्दः । दैवे तु ब्राह्मणपरीक्षाभावेपि वेदविद्यापेक्षितेत्याह ब्राह्मणइति । अनधीयानोवेदरहितः । शाम्यति वेदतेजोरहितत्वात् । हव्यं कव्योपलक्षणम् ॥ १६८ ॥

(५) नन्दनः । उभयत्र श्रोत्रियत्वमादरणीयमित्याह ब्राह्मणइति । हव्यमिति कव्यस्याप्युपलक्षणम् ॥ १६८ ॥

(६) रामचन्द्रः । तृणस्याग्निर्यथा शाम्यति तथा ऽनधीयानो द्विजःशाम्यति । तस्मै द्विजायान्नं दातव्यं । नहि भस्मनि हूयते तृणाग्निर्यथाहविर्दग्धुं न शक्नोति हुतमात्रेण शाम्यति तथाअस्मिन्नग्नौ हुतन भस्मीभवति । वेदाध्ययनरहितोभस्मतुल्योद्विजोभवतीत्यर्थः ॥ १६८ ॥

---

* वेदाग्नि=वेदाध्ययन (अ)

अपाङ्क्तदाने योदातुर्भवत्यूर्ध्वंफलोदयः ॥ दैवे हविषि पित्र्ये वा तत्प्रवक्ष्याम्यशेषतः ॥ १६९ ॥

(१) मेधातिथिः । अस्यप्रतिषेधविधेःफलमाह । पङ्क्त्यामर्हन्तीतिपङ्क्त्याः नपङ्क्त्याःअपङ्क्त्याःदण्डादिदर्शनाद्रूपसिद्धिः तेभ्योदानेयःफलोदयःफलोत्पत्तिर्भवति । दातुस्तंसर्वमिदानींब्रवीम्यवहिताभवथेति ॥ १६९ ॥

(२) सर्वज्ञनारायणः । अपाङ्क्तदानेअपाङ्क्तेभ्योदानेकृते ॥ १६९ ॥

(३) कुल्लूकः । पङ्क्तिभोजनानर्हब्राह्मणाय दैवे हविषि पित्र्ये वा दत्ते दातुर्योदानादूर्ध्वंफलोदयस्तमशेषमभिधास्यामि ॥ १६९ ॥

(४) राघवानन्दः । प्रतिज्ञान्तरंप्रतिजानीते अपाङ्क्त्येति । अपाङ्क्त्याः विप्रभोजनपङ्क्तौ प्रवेशानर्हाः । ऊर्ध्वंपरलोके । फलोदयोविरुद्धफलप्राप्तिः ॥ १६९ ॥

(६) रामचन्द्रः । अपाङ्क्तदाने अपाङ्क्तेयानांपुंसांदाने दातुर्यः फलोदय ऊर्ध्वंपरलोक भवेत्तदशेषतःफलंवक्ष्यामि दैवे पित्र्ये वा कर्मणि ॥ १६९ ॥

अव्रतैर्यद्द्विजैर्भुक्तं परिवेत्रादिभिस्तथा ॥ अपाङ्क्तेयैर्यदन्यैश्च तद्वैरक्षांसि भुञ्जते ॥ १७० ॥

(१) मेधातिथिः । अवृताःअसंयताः शास्त्राचारवर्जिताः । परिवेतृप्रभृतयोयद्यपिशास्त्रबाह्यास्तथापिभेदेनस्मरणाग्रेदोनगुरुत्वार्थंवाकथ्यन्ते । अन्येचापाङ्क्तेयाः काणश्लीपदादयः तैर्यदन्नंभुक्तंश्राद्धे भवतितद्रक्षांसिदेवद्विषोभुञ्जते । नपितरःप्रेताःअतोनिष्फलंतच्छ्राद्धंभवतीत्युक्तंभवति । रक्षोग्रहणमर्थवादः ॥ १७० ॥

(२) सर्वज्ञनारायणः । अव्रतैरकृतस्नातकादिव्रतैःअन्यैरपाङ्क्तेयैः । स्मृत्यन्तरोक्तैः ॥ १७० ॥

(३) कुल्लूकः । वेदग्रहणार्थव्रतरहितैस्तथा परिवेत्त्रादिभिरन्यैश्चापाङ्क्तेयैः स्तेनादिभिर्यद्धव्यंभुक्तंतद्रक्षांसि भुञ्जते । निष्फलंतच्छ्राद्धंभवतीत्यर्थः ॥ १७० ॥

(४) राघवानन्दः । तदेवाह । अव्रतैः वेदार्थव्रतरहितैः । अपाङ्क्तेयैः परिवेत्त्रादिभिः । यदन्यैस्तत्सदृशैः काणाद्यैः । तस्मात्पाङ्क्तेयारक्षोघ्नाइति भावः । अतएव वसिष्ठः । अथचेन्मन्त्रविद्युक्तःशारीरैःपङ्क्तिदूषणैः । अदूष्यस्तंयमःप्राहपङ्क्तिपावनएवसइति ॥ १७० ॥

(५) नन्दनः । रक्षांसि भुञ्जते न देवानापिपितरः । तेन तन्निष्फलमित्यभिप्रायः ॥ १७० ॥

(६) रामचन्द्रः । अन्यैरपाङ्क्तेयैः ॥ १७० ॥

दाराग्निहोत्रसंयोगंकुरुते योऽग्रजे स्थिते ॥ परिवेत्ता सविज्ञेयः परिवित्तिस्तु पूर्वजः ॥ १७१ ॥

(१) मेधातिथिः । अग्रेआदौजातःअग्रजःसोदर्योभ्रातोच्यते । एवंहिपठ्यते ॥ पितृव्यपुत्रान्सापत्नान्परनारीसुतांस्तथा । दाराग्निहोत्रसंयोगेनदोषःपरिवेदनेइति । अत्रसोदर्योग्रजःतस्मिन्स्थितेकृतदाराग्निसंयोगेतिष्ठति प्रकृतत्यापारनिवृत्तौप्रयुक्तःअग्निहोत्रशब्दःकर्मशब्दोपि तदर्थस्याधानेवर्ततेस्मृत्यन्तरेविशेषःपठ्यते । उन्मत्तःकिल्बिषीकुष्ठीपतितः क्लीबएवच । राजयक्ष्मामयावीचनयोग्यः स्यात्प्रतीक्षितुं ॥ एतदप्यनधिकारोपलक्षणार्थं । अतश्चपङ्क्तावपिगृह्येते कालविशेषोधिकोव्यपेक्षते । तथाचस्मृतिः । अष्टौवर्षाण्युदीक्षेतषडित्येकइति एषाचवर्षसंख्यायदाकर्नीयान्प्राप्तविवाहकालइतः

---

(१६९) अपाङ्क्तदाने=अपाङ्क्तेयप्रदाने (ख)
=अपाङ्क्त्यदाने (क, ग, घ, ब, भ, र, ल)

प्रभृतिपृष्ट्याविवाहकालश्चस्वाध्यायविधिनिवृत्तिः । ननुचप्रोषिताधिकारेतत्पठितं भर्तरिप्रोषितेयःस्त्रीणांप्रवासकालस्तमुपक्रम्यभ्रातरीत्यादिपठितं । सत्यंवाक्यान्तरेप्रोषितशब्दस्यप्रत्यक्षःसंबन्धोवगतःवाक्यान्तरेतुसंबन्धेप्रमाणंवक्तव्यं नचतदस्ति यथात्वरितेनाधिकारइति नचात्रतच्छब्दोस्ति । नचतदपेक्षयाविनैवतस्यवाक्यस्यापरिपूर्णत्वंवसिष्ठेनचाविशेषेणाग्निशब्देनस्मार्तस्याप्यग्नेर्ग्रहणंकृतं । केचित्पितर्यप्यकृताधानेविधिमिच्छन्ति । अग्रजशब्दस्ययौगिकत्वात् पिताप्यग्रजोभवतीति । यद्यप्येवमन्योपियोग्रजस्तत्राप्येवंप्राप्नोति । नचायमग्रजानुजव्यवहारः पितापुत्रयोर्विद्यते । स्मृत्यन्तरेतुपठ्यते । भ्रातरिचैवंज्यायसीति । परिवित्तिः पूर्वजोज्येष्ठः ॥ १७१ ॥

(२) सर्वज्ञनारायणः । परिवेत्रादिपदानि व्याचष्टे दाराग्निहोत्रेति । दाराग्निहोत्रयोरन्यतरस्य संयोगं संबन्धम् । स्थिते अकृते अग्निहोत्रपदं लक्षणयात्रेताग्निपरम् । आधाने च ज्येष्ठानुमतिंविना कृतेपरिवेतृता नतदनुमत्या ॥ १७१ ॥

(३) कुल्लूकः । अप्रसिद्धत्वात्परिवेत्रादिलक्षणमाह दारेति । अग्निहोत्रशब्दोऽयमग्निहोत्राद्याधानपरःयःसहोदरे ज्येष्ठे भ्रातर्यनूढेऽनग्निके च दारपरिग्रहंश्रौतस्मार्ताग्निहरणंच कुरुते सपरिवेत्ता ज्येष्ठश्च परिवित्तिर्भवति ॥ १७१ ॥

(४) राघवानन्दः । परिवेतृपरिवित्त्योर्लक्षणमाह दारेति। परिवेत्ता परि ज्येष्ठंत्यक्त्वा आदौ वेत्ता कन्याग्न्योर्लब्धा । यः पूर्वजोज्येष्ठः सपरिवित्तिः ॥ १७१ ॥

(५) नन्दनः । अथ परिवेत्तादिशब्दानामपाङ्क्त्यानुक्रमेणोद्दिष्टानांलोकविषयतांपरिजिहीर्षुस्तेषामर्थमाह । दारेति ॥ १७१ ॥

(६) रामचन्द्रः । यःअग्रजे स्थिते सति दाराग्निहोत्रंकुरुते स्वीकुर्यात्सपरिवेत्ता विज्ञेयः । पूर्वजो ज्येष्ठःपरिवित्तिसंज्ञोभवति ॥ १७१ ॥

परिवित्तिः परीवेत्ता यया च परिविद्यते ॥ सर्वे ते नरकं यान्ति दातृयाजकपञ्चमाः ॥ १७२ ॥

(१) मेधातिथिः । प्रसंगात्परिवेदनसंबन्धिनामन्येषामपिदोषदर्शनद्वारेणनिषेधंकरोति । निषेधपरिवर्जितःपरिभूतोवा वेदनेनपरिवित्तिः परिवर्ज्यश्रेष्ठंकरोतिवेदनंपरिवेत्ता । ययाकन्ययापरिविद्यते सर्वेतेनरकंयान्ति । दातायाजकश्चयेषांनरकगामिनांपञ्चमोदाताकन्यायाप्रकृतत्वात्पित्रादिः । याजकोविवाहेयः करोतिहोमं योवातत्रोपदेष्टा अथवातेषामेव परिवेतृपरिवित्तितत्कन्यादातॄणां ज्योतिष्टोमादीनामपि यज्ञानामृत्विक्तस्माज्ज्येष्ठेन तथा कर्तव्यं यथास्यकनीयसो भ्रातुर्विवाहे विघ्नकर्तृत्वंनभवति । कनीयसापिकालप्रतीक्षाद्वादशाष्टवर्षादिविषयाकर्तव्या । कन्ययापितादृशायन्मांदातुंनदेयं । दातृयाजकौपञ्चमौयेषामितिद्वन्द्वगर्भोबहुव्रीहिः ॥ १७२ ॥

(२) सर्वज्ञनारायणः । यया कन्यया दाता कन्यायाः याजकस्तत्र ब्रह्मत्वेनार्त्विज्यकारी दातृसहितो याजकः पञ्चमोयेषांते दातृयाजकपञ्चमाः । याजकोऽत्रपरिवेत्तुर्दर्शपूर्णमासयागेष्वृत्विगित्येके ॥ १७२ ॥

(३) कुल्लूकः । प्रसङ्गात्परिवेदनसंबन्धिनांपञ्चानामप्यनिष्टफलमाह परीति । परिवित्तिःपरिवेत्ता च यया च कन्यया परिवेदनंक्रियते कन्याप्रदाता याजकश्च तद्विवाहहोमकर्ता सपञ्चमोयेषांते सर्वे नरकंव्रजन्ति ॥ १७२ ॥

(४) राघवानन्दः । तत्रैव प्रासंगिकंदोषमाह परिवित्तिरिति । यया स्त्रिया । परिवेदनं विवाहः ॥ १७२ ॥

(५) नन्दनः । परिवेदनसम्बन्धिनोऽपि वर्जनीयाइत्यभिप्रायेणाह परिवित्तिरिति । दातृसहितोयाजकः पञ्चमोयेषांतेदातृयाजकपञ्चमाः ॥ १७२ ॥

(६) **रामचन्द्रः** । परिवित्तिःलघुपरिवेत्ता यया स्त्रिया सह परिविद्यते । याजकोविवाहकर्ताआचार्यःपञ्चमः । ते सर्वे नरकंयान्ति गच्छन्तीत्यर्थः ॥ १७२॥

भ्रातुर्मृतस्य भार्यायां योऽनुरज्येत कामतः॥धर्मेणापि नियुक्तायां सज्ञेयोदिधिषूपतिः ॥ १७३ ॥

(१) **मेधातिथिः** । नियोगधर्मेणप्रवृत्तोभ्रातुर्मृतस्यतद्भार्यायांगमने योनुरागतःप्रीतिभावात्कामतःनियोगधर्मातिक्रमेण सकृत्सकृद्दतावित्येवं विधिं हित्वा इच्छानुरागंगाढालिङ्गनपरिचुम्बनादिकुर्यादसकृद्वाप्रवर्तेत चेतसाविक्रियेत कामिनीप्रेमदृष्टिबन्धवचनादिलिङ्गेनानुरागित्वेन विभावितोदिधिषूपतिर्वेद्यः । अग्रेदिधिषूपलक्षणंतु स्मृत्यन्तरात्ज्ञेयं । जीवत्यग्रे दिधिषूपतिरिति केचित्तु नैवायंसमाम्नायेश्लोकोस्तीत्याहुः अपरिपूर्णलिङ्गंब्रुवते । द्वयस्यलक्षणेकर्तव्ये न पूर्वकारिणामेकस्योपपद्यते । स्मृत्यन्तरे चैतदुभयंलक्ष्यते । परपूर्वापतिंधीरावदन्तिदिधिषूपतिं । यस्त्वग्रेदिधिषूर्विप्रःसैवयस्यकुटुम्बिनी ॥ नत्विहसम्भवति परपूर्वापतेःपृथगेवनिषिद्धत्वात् । तस्मादन्योदिधिषूपतिः ॥ १७३ ॥

(२) **सर्वज्ञनारायणः** । धर्मेण प्रथमंनियुक्तायांपश्चाद्योऽनुरज्येत अपिशब्दाद्रागमात्रेणाऽपि दिधिषूपतिरग्रेदिधिषूपतिः । एवंच तस्या अपि स्त्रिया दिधिषूरग्रेदिधिषूर्वेतिनामोक्तंभवति ॥ १७३ ॥

(३) **कुल्लूकः** । मृतस्य भ्रातुर्वक्ष्यमाणनियोगधर्मेणापि नियुक्तायांभार्यायांसकृत्सकृद्दतावृतावित्यादिविधिंहित्वा कामेनानुरागंभावयेदाश्लेषचुम्बनादि कुर्यादसकृद्वा प्रवर्तेत सदिधिषूपतिर्ज्ञातव्यः । अतः श्राद्धनिषिद्धपात्रमध्यपाठादस्यापि हव्यकव्यपात्रयोर्निषेधः कल्पनीयः ॥ १७३ ॥

(४) **राघवानन्दः** । दिधिषूपतिरित्युक्तस्य लक्षणमाह भ्रातुरिति । अनुरज्येत स्तनालिङ्गनादिना । नियुक्तायां पुत्रार्थमपि । ज्येष्ठायांयद्यनूढायांकन्या योद्वाहते नुजा । सा चाग्रेदिधिषूर्ज्ञेया पूर्वा तु दिधिषूः स्मृतेति ॥ तयोःपतिर्वा । गोविन्दराजस्तु वृत्तवशादग्रे पदलोपादयमेवाग्रे दिधिषूपतिरिति ॥ १७३ ॥

(५) **नन्दनः** । अनिर्दिष्टस्य दिधिषूपतिशब्दस्यार्थकथनेन दिधिषूपतेरप्यपाङ्क्तेयत्वंगम्यते ॥ १७३ ॥

(६) **रामचन्द्रः** । मृतस्य भ्रातुर्भार्यायांकामतोयोनुरज्येतअनुरक्तोभवेत् । धर्मेणापि नियुक्तायामाज्ञप्तायां सदिधिषूपतिर्ज्ञेयः । यथा व्यासधृतराष्ट्रपाण्डुजनकत्वात् परपूर्वापतिंधीरावदन्तिदिधिषूपतिरिति ज्ञेयः ॥ १७३ ॥

परदारेषु जायेते द्वौ सुतौ कुण्डगोलकौ ॥ पत्यौ जीवति कुण्डःस्यान्मृते भर्तरि गोलकः॥१७४॥

[उत्पन्नयो रधर्मेण हव्यकव्ये च नैत्यके ॥ यस्तयोरन्नमश्नाति सकुण्डाशी द्विजः स्मृतः ॥१॥§]

(१) **मेधातिथिः** । पत्यौजीवतितद्गृहेस्थितायांतद्भार्यायांगूढोत्पन्नःभङ्ग्या उपपतित्वेनवा पत्युःक्षमयाजायते सोन्यजातः कुण्डउच्यते । मृतेतुगोलकः । एतावनियुक्तासुतावितिकेचित् । तदयुक्तं । तयोरब्राह्मण्यादेवाप्राप्तिस्तस्मान्नियोगोत्पन्नौकुण्डगोलकौ कथंपुनरनियुक्तासुतयोरब्राह्मण्यमितरयोस्तुब्राह्मण्यं जातिलक्षणेपत्नीग्रहणात् । संबन्धिशब्दश्चपत्नीशब्दोभर्तृशब्दवत् । यज्ञसंयोगेनपत्नीशब्दोव्युत्पाद्यते नचान्यदीययाभार्ययासहान्यस्ययज्ञाधिकारः यद्येवंनियोगोत्पन्नयोरपि समानन्यायत्वान्नैवंब्राह्मण्यं दशमएतन्निर्णेष्यामः । माभूद्वानियुक्तानियुक्तासुतयोःकस्यचिदपिब्राह्मण्यं । ननूक्तमस-

---

§ (ञ) चिन्हितपुस्तके ।

तिब्राह्मण्येप्रास्यभावात्प्रतिषेधानुपपत्तिः । पतितेप्रतिषेधादेवएतद्भविष्यति द्विजातिकर्मभ्योहानिःपतनं द्विजातिकर्मत्वेस-तिश्राद्धभोजनस्य कुतःपतितेप्राप्तिराम्नायतेचप्रतिषेधोयेस्तेनपतिताइति ॥ १७४ ॥

(३) कुल्लूकः । परदारेषु कुण्डगोलकाख्यौ द्वौ सुतावुत्पद्येते । तत्र जीवत्पतिकायामुत्पन्नः कुण्डोमृतपतिकायां-च गोलकः ॥ १७४ ॥

(४) राघवानन्दः । कुण्डगोलकौ लक्षयति परदारेष्विति । परजातत्वेन व्यक्तः गर्भः कुण्डः । अनियुक्तयोःस्त्रि-योः अयमेव गूढोत्पन्नइति वा ॥ १७४ ॥

(५) नन्दनः । सवर्णोत्पन्नाविमेसंज्ञे ॥ १७४ ॥

तौ तु जातौ परक्षेत्रे प्राणिनौ प्रेत्य चेह च॥दत्तानि हव्यकव्यानि नाशयेते प्रदायिनाम्॥१७५॥

(१) मेधातिथिः । जात्याख्यायामितिबहुवचनंप्राणिनइति ब्राह्मण्यादिव्यपदेशमवजानतेप्राणिनइत्येवंव्यपदेशा-न्तरमर्हन्ति अतस्ते नाशयन्ति हव्यकव्यानि निष्फलीकुर्वन्ति प्रदायिनांदातॄणांपरिवेत्रादीनांलोकेनातिप्रसिद्धत्वात् शब्दे-श्चास्यस्मृतत्वाद्यवस्थार्थलक्षणप्रणयनम् ॥ १७५ ॥

(२) सर्वज्ञनारायणः । द्वौसुतौ.जीविनौप्रेत्य परलोके भोग्यानि हव्यकव्यानिहव्यकव्यफलानि नाशयेते । इह लोके भोग्यानि शान्त्यादिफलानि । यद्यपियाज्ञवल्क्येन सवर्णेभ्यः सवर्णासु जायन्ते हि सजातइत्युक्ता विन्नात्वेष-विधिः स्मृतइति विवाहितसवर्णस्त्रीजातानामेव सजातितोक्ता । तथापि कुण्डगोलकयोरविन्नस्त्रीजनितत्वेऽपि ब्राह्मण-ब्राह्मणीजन्मनोरेतयो; श्राद्धपात्रतानिषेधाद्ब्राह्मण्यंगम्यतइत्येके नेत्यपरे ॥ १७५ ॥

(३) कुल्लूकः । तेपरभार्यायांजाताःकुण्डाद्यादृष्टानुपयोगात्प्राणिनइति व्यपदिष्टाः । प्राणिनौ ब्राह्मणत्वेपि तत्कार्या-भावात्प्रेत्य फलाभावात्परलोके चानुषङ्गिककीर्त्यादिफलाभावाद्दत्तानि हव्यकव्यानि प्रेत्य फलाभावादिह कीर्तेरभा-वान्नाशयेते नाशयतः । प्रदायिभिर्दत्तानि हव्यकव्यानि निष्फलानिकुर्वन्ति ॥ १७५ ॥

(४) राघवानन्दः । अनयोः प्रासङ्गिकंदोषमाह तेत्विति । अत्र बहुत्वपूरणार्थंदिधिषूपतेः पुत्रस्य ग्रहणं । द्विव-चनपाठस्तु क्वचित्ताविति ॥ १७५ ॥

(६) रामचन्द्रः । तौ तु कुण्डगोलकौ परक्षेत्रे जातौ प्राणिनाविहलोके प्रेत्यपरलोके प्रदायिनांदातॄणांदत्तानि हव्यकव्यानि नाशयेते ॥ १७५ ॥

अपाङ्क्त्योयावतः पाङ्क्त्यान् भुञ्जानाननुपश्यति॥तावतांन फलंतत्र दाता प्राप्नोति बालिशः॥१७६॥

(१) मेधातिथिः । पङ्क्तिमर्हतीतिपङ्क्त्यः सद्भिरेकत्रासनभोजनाद्यर्हतापङ्क्त्यानां तदभावादपङ्क्त्योयावतः पङ्क्त्या न्विद्वत्तपस्विश्रोत्रियान्भुञ्जानाननुपश्यति तावतां नतत्रपितॄनृप्त्याख्यंफलंभवति । अतस्तेनादयः श्राद्धंकुर्वतातनः प्रदेशादप-सारणीयाः बालिशोमूर्खः ॥ १७६ ॥

(२) सर्वज्ञनारायणः । अपाङ्क्त्योन्धादिभ्योऽन्यस्तेषु संख्याविशेषस्योक्तत्वात् ॥ १७६ ॥

(३) कुल्लूकः । सद्भिःसहैकपङ्क्त्याभोजनानर्हः स्तेनादिर्यत्संख्यान्भोजनार्हान्पश्यति तावत्संख्यानांभोजनस्य फलंतत्र श्राद्धे दाता न प्राप्नोति बालिशोऽज्ञः । अतस्तेनादिर्यथा न पश्यति तथाकर्तव्यम् ॥ १७६ ॥

(४) राघवानन्दः । अपाङ्क्त्यैरित्युक्तं तत्र केऽपाङ्क्त्याः कियत्फलंनाशयन्तीत्यपेक्षायामाह अपाङ्क्त्यइति त्रिभिः । बालिश; पङ्क्त्यामपाङ्क्त्यप्रवेशात् ॥ १७६ ॥

(६) रामचन्द्रः । अपाङ्क्त्यद्विजःयावतःसंख्याकान्पाङ्क्त्यान्भुञ्जानाननुपश्यति दाता तत्र तावतांतावत्संख्याकानां-भुञ्जतांफलंन प्राप्नोति बालिशोमूर्खः ॥ १७६ ॥

वीक्ष्यान्धोनवतेः काणः षष्टेः श्वित्री शतस्य तु॥ पापरोगी सहस्रस्य दातुर्नाशयते फलम्॥१७७॥

(१) मेधातिथिः । ननुचान्धस्यकुतोदर्शनंतदुच्यतेवीक्ष्यान्धोनवतेरिति सत्यं तत्प्रदेशसंनिधानमनेनलक्ष्यते । यावान्देशश्चक्षुष्मतोदृष्टिगोचरस्तावतोदेशादनावृतादन्धो विवासनीयः । काणःषष्टेर्नात्रायमर्थोऽतऊर्ध्वंभोज्याइति केवलंसङ्ख्यापचयेन दोषलाघवंप्रायश्चित्तविशेषार्थंज्ञाप्यते । श्वित्रीकुष्ठीभण्यते । पापरोगीप्रसिद्धः ॥ १७७ ॥

(२) सर्वज्ञनारायणः । अन्धोनवते र्ब्राह्मणानां तत्पङ्क्तिस्थितानाम् । चतुर्थ्यर्थे षष्ठी तेभ्योदानस्ययत्फलंदातुस्तन्नाशयति । काणादयस्तु षष्टिप्रभृतीन्वीक्ष्यतद्दानफलंदातुर्नाशयन्ति वीक्ष्येति वीक्षणार्हदेशस्थत्वमुपलक्षितम् । अतएवान्धोऽपि वीक्ष्येत्यस्यान्वयोन विरुद्धइति केचित् । एवंसंस्पृशतीत्यत्रापि संस्पर्शयोग्यदेशस्थितता लक्ष्यते भोजनसमये संस्पर्शाभावात् । अन्यदापि स्पर्शस्यानियतत्वान्नियतदोषत्वानुपपत्तेः ॥ १७७ ॥

(३) कुल्लूकः । अन्धस्य वीक्षणासंभवाद्वीक्षणयोग्यदेशसन्निहितोऽसौ पाङ्क्त्यानांनवतेर्भोजनफलंनाशयति एवंकाणःषष्टेः श्वेतकुष्ठी शतस्य पापरोगी रोगराजोपहतः सहस्रस्य इत्यन्धादिसन्निधिनिरासार्थंवचनंगुरुलघुसंख्याभिधानंचेहसंख्योपचये दोषगौरवंतत्र च प्रायश्चित्तगौरवमिति दर्शयितुम् ॥ १७७ ॥

(४) राघवानन्दः । कथंनाशयतीत्यपेक्षायामाह वीक्ष्येति । वीक्षणयोग्यदेशसन्निहितोसौ नवतेः पाङ्क्त्यानामपि भोजनजं फलंदातुः प्राप्तियोग्यमन्धोनाशयतीत्येवमुत्तरत्र ॥ १७७ ॥

(५) नन्दनः । न केवलमपाङ्क्त्योदानएव वर्जनीयः किंतुभुञ्जानानांदर्शनेऽपीत्याह अपाङ्क्त्यइति । तत्र भोजने । भोजयितुरपरीक्षणदोषेणबालिशत्वम् । वीक्ष्यअन्येन वीक्ष्यमाणइत्यर्थः नवतेर्भुञ्जानानांदातुर्दानफलम् ॥ १७७ ॥

(६) रामचन्द्रः । तत्र हि वीक्ष्येति । अन्धोदर्शनयोग्यस्थलेन वीक्ष्य दृष्ट्वा भुञ्जतांनवतिसङ्ख्याकानांद्विजानांफलंनाशयेत् । काणः वीक्ष्य दृष्ट्वा भुञ्जतांद्विजानांषष्टिसङ्ख्याकानांफलंनाशयते । श्वित्री कुष्ठी भुञ्जतांशतसङ्ख्याकानांद्विजानांफलंनाशयते । पापरोगी वीक्ष्य भुञ्जतांद्विजानांसहस्रसङ्ख्याकानांफलंनाशयते ॥ १७७ ॥

यावतः संस्पृशेदङ्गैर्ब्राह्मणाञ्छूद्रयाजकः॥ तावतांन भवेद्दातुः फलं दानस्य पौर्तिकम्॥ १७८॥

(१) मेधातिथिः । यावतोब्राह्मणान्स्पृशत्यङ्गैः पङ्क्तिगतः अत्राप्यङ्गस्यस्पर्शनंनविवक्षितं किंतर्हिपूर्ववत्देशसंनिधिः । पौर्तिकंफलं पूर्तेभवंपौर्तिकं बहिर्वेदिदानाद्यत्फलंतत्पौर्तिकम् ॥ १७८ ॥

(२) सर्वज्ञनारायणः । तावतस्तावद्भ्योदानस्य फलं पौर्तिकमित्यैष्टिकस्याप्युपलक्षणम् । शूद्रयाजकस्य श्राद्धासनसोमयाजनकन्यादानमतीवनिरस्तमिति ॥ १७८ ॥

(३) कुल्लूकः । शूद्रस्य यज्ञादावृत्विग्यावत्संख्यान्ब्राह्मणान्स्पृशत्यासनेषूपक्लृप्तेष्वित्यासनभेदस्य वक्ष्यमाणत्वान्मुख्यस्पर्शासंभवे यावतांश्राद्धभोजिनांपङ्क्तावुपविशति तावतांसंबन्धिपौर्तिकंफलंश्राद्धीयंद तुर्न भवति । तावतांपौर्तिकंफलंबहिर्वेदिदानाच्च यत्फलंतन्न भवतीति मेधातिथिगोविन्दराजौ । अतस्तयैव निन्दया निषिद्धगणापठितस्यापिशूद्रयाजकस्यभोजननिषेधःकल्प्यते ॥ १७८ ॥

(४) राघवानन्दः । किंच यावतइति । श्राद्धभोजनकाले परस्परंस्पर्शाभावात् शूद्रयाजकस्य पङ्क्तौ प्रवेशाभावपरंशूद्रयाजकस्पर्शयोग्यदेशपरंवा । पौर्तिकं श्राद्धीयम् ॥ १७८ ॥

(५) नन्दनः । ब्राह्मणानपङ्क्तिस्थान् । पूर्तंश्राद्धादि तत्र भवंपौर्तिकम् ॥ १७८ ॥

(६) रामचन्द्रः । शूद्रयाजकोशूद्रयज्ञकर्ता यावतोब्राह्मणानङ्गैःसंस्पृशति। तावतांदातुर्दानस्य फलंन भवेत् ॥१७८॥

वेदविद्यापि विप्रोऽस्य लोभात्कृत्वा प्रतिग्रहम्॥ विनाशंव्रजति क्षिप्रमामपात्रमिवाम्भसि॥ १७९॥

(१) मेधातिथिः । प्रसङ्गाच्छूद्रयाजकस्यापतिग्राह्यतानेनकथ्यते । वेदविदपियदितस्यशूद्रयाजकस्यसंबन्धिनोद्रव्यस्यप्रतिग्रहंकरोति । लोभादित्यनुवादः । सोपिविनाशंव्रजति । अभिलषितेनार्थेनवियुज्यते धनपुत्रपशुशरीरादिना किंपुनरवेदवित् । वेदविदःकिलप्रतिग्रहेनातीवदोषइतिवक्ष्यति । आमपात्रमपक्वंशरावादिभाजनं । अम्भसिजलेक्षिप्तम् ॥१७९॥

(२) सर्वज्ञनारायणः । वेदविद्यापीतिप्रसङ्गादुक्तम् । वेदविदपि किमुतान्यः । अस्य शूद्रयाजकस्य । केचिदस्येति शूद्रस्य परामर्शइत्याहुः । तदसमञ्जसम् । शूद्रस्य तत्राधिकाराभावप्रयोगात्पौनरुक्त्यंस्यात् । तस्मात्तद्याजकस्येत्यस्येति पदम् । आमपात्रमामंमृत्पात्रम् ॥ १७९ ॥

(३) कुल्लूकः । प्रसङ्गाच्च शूद्रयाजकप्रतिग्रहंनिषेधयति । लाघवार्थमन्यत्र निषेधकरणे शूद्रयाजकशब्दोच्चारणंकर्तव्यंस्यात् वेदेति । वेदज्ञोऽपि ब्राह्मणः शूद्रयाजकस्य लोभात्प्रतिग्रहंकृत्वा शीघ्रंशरीरादिना विनाशंगच्छति । सुतरामवेदवित् अपक्वमृन्मयशरावादिकमिवोदके ॥ १७९ ॥

(४) राघवानन्दः । प्रासङ्गिकंशूद्रयाजकप्रतिग्रहंनिषेधति वेदविदिति कैमुत्यर्थः । आमपात्रमपक्वघटादि ॥१७९ ॥

(५) नन्दनः । नकेवलंशूद्रयाजकः प्रदाने वर्जनीयःकिंतु प्रतिग्रहेऽपीति प्रसङ्गादाह वेदेति ॥ १७९ ॥

(६) रामचन्द्रः । अस्य शूद्रयाजकस्य वेदविद्विप्रः लोभात्प्रतिग्रहंकृत्वा सःवेदविद्विप्रःक्षिप्रंविनाशंव्रजति अम्भसि जले आमपात्रमिवेत्यर्थः ॥ १७९ ॥

सोमविक्रयिणे विष्ठा भिषजे पूयशोणितं॥ नष्टंदेवलके दत्तमप्रतिष्ठंतु वार्धुषौ ॥ १८० ॥

(१) मेधातिथिः । तस्यांजातौजायते यत्रविष्ठात्वभोजनंभवत्येवंभिषजेनष्टंनिष्फलंउद्वेगकरंवा । नष्टंहिद्रव्यंउद्वेगंजनयति । अविद्यमानाप्रतिष्ठास्थितिर्यस्यतदप्रतिष्ठं नानारूपैःशब्दैरेवंविधस्यदानस्यनैष्फल्यंकर्तुश्चदोषसंबन्धःप्रतिपाद्यते नष्टमप्रतिष्ठमितिनानयोरर्थाभेदशङ्काकार्या कार्यविभेदात् ॥ १८० ॥

(२) सर्वज्ञनारायणः । सोमविक्रयिणे यद्दत्तं तद्विष्ठावद्देवैः पितृभिश्च त्यज्यतइत्यर्थः । एवमुत्तरेषु । अप्रतिष्ठं देवादिसमीपानवस्थायि वार्धुषौ वार्धुषये । नष्टं देवादिभिरदृश्यम् ॥ १८० ॥

(३) कुल्लूकः । सोमविक्रयिणेयद्दत्तंतद्दातुर्भोजनार्थंविष्ठा संपद्यते । जन्मान्तरे विष्ठाभोजिनांजातौ जायतइत्यर्थः । इतरेएवंपूयशोणितेपि व्याख्येयम् । नष्टंनाशभागितया निष्फलंविवक्षितम् । अप्रतिष्ठमनाश्रयतया निष्फलमेव॥१८०॥

(४) राघवानन्दः । सोमविक्रयादिना भुक्तश्राद्धीयस्य विरुद्धफलं वाचनिकमाह सोमविक्रयिणइति त्रिभिः । दातुरुपक्रमात्तस्यैव जन्मान्तरे भोजनार्थंविष्ठाद्युपस्थापकम् । सोमविक्रय्यादिभ्योदत्तमन्नादि अप्रतिष्ठंउक्तवक्ष्यमाण कालास्थायि । देवलके वार्धुषिकइत्यत्रचतुर्थ्यर्थेसप्तमी ॥ १८० ॥

(५) नन्दनः । प्रकृतमेवानुसरति सोमेति । अप्रतिष्ठमविद्यमानं भवति ॥ १८० ॥

(६) रामचन्द्रः । सोमविक्रयिणे द्विजाय दत्तंपूयशोणितंभवति । देवलके द्विजे दत्तंनष्टंभवति । वार्धुषिर्वृध्योपजीवीतस्मिन्दत्तमप्रतिष्ठंभवति । नोपतिष्ठेत् ॥ १८० ॥

यत्तु वाणिजके दत्तंनेह नामुत्र तद्भवेत् ॥ भस्मनीव हुतं हव्यं तथा पौनर्भवे द्विजे ॥ १८१ ॥

(१) **मेधातिथिः** । अयमपिपूर्ववत्व्याख्येयः । वाणिजकस्यभोजनंनिषिद्धं । नतद्देशसंनिधिः । नहियथापूर्वत्र-वीक्ष्येतिदृष्टिगोचरेदेशेलक्षणयासंनिधिस्तद्वदिहतादृशंकिंचिन्निबन्धनमस्ति । पौनर्भवोनवमेवक्ष्यते ॥ १८१ ॥

(२) **सर्वज्ञनारायणः** । नेह तद्भवेत् कीर्त्यादिहेतुरपि ॥ १८१ ॥

(३) **कुल्लूकः** । वाणिजकाय यद्दत्तंश्राद्धे तन्नेहानुषङ्गिककीर्त्यादिफलाय नापि पारलौकिकफलाय भवति । पुनर्भूपुत्राय यद्दत्तंतद्भस्महुतहविःसमंनिष्फलमित्यर्थः ॥ १८१ ॥

(४) **राघवानन्दः** । वणिक्पौनर्भवयोरपि न देयमित्याह यत्त्विति । नेह निन्दास्पदत्वाद्यशोपि नेतिभावः । एते-षु न देयमिति तात्पर्यार्थः ॥ १८१

(५) **नन्दनः** । वाणिजके वणिग्वृत्तौ ॥ १८१ ॥

(६) **रामचन्द्रः** । वाणिजके वणिक्वृत्तिस्थिते द्विजे यत्तुदत्तं इहलोके अमुत्रपरलोके तन्नभवेत् नफलतीत्यर्थः । पुनर्भुवःसकाशाद्भवति पौनर्भवस्तस्मिन्द्विजे दत्तंहुतं कारितंहव्यंभस्मनीव भवति । हुतंहव्यंभस्मनि यथा निष्फलंभवति तथा ॥ १८१ ॥

इतरेषु त्वपाङ्क्त्येषु यथोद्दिष्टेष्वसाधुषु ॥ मेदोसृङ्मांसमज्जास्थि वदन्त्यन्नंमनीषिणः ॥ १८२ ॥

(१) **मेधातिथिः** । यस्मिन्नपाङ्क्त्यदानफलप्रदर्शनप्रकरणेपठिताःअन्धादयस्तेभ्योन्येस्तेनादयःप्रतिकाण्डोद्दिष्टास्तेषु यथोद्दिष्टेषुभोजितेषुदातुरिमान्युपतिष्ठन्ते । मेदोसृङ्मांसादीनितादृशजातौ जायते यत्रैतदाहारोभवति कृमिक्रव्यात्गृध्रादिजा-तावितिमनीषिणोवेदविदोवदन्ति । सर्वस्यायमर्थः अपाङ्क्तेषुभोजितेषुश्राद्धाधिकारोनकृतोभवत्यकरणेचविध्यतिक्रमदोषो-ऽवश्यंभावी नित्यत्वादस्यविधेः ॥ १८२ ॥

(२) **सर्वज्ञनारायणः** । यथोद्दिष्टेष्वसाधुषु तत्तत्स्थानोक्तेष्वपाङ्क्त्यव्यतिरिक्तेष्वपि निन्दितकर्मसुदत्तम । अन्न-मित्युपलक्षण मन्यस्यापि ॥ १८२ ॥

(३) **कुल्लूकः** । इतरेभ्योविशेषेणानुक्तफलेभ्यःपङ्क्तिभोजनानर्हेभ्यःस्तेनादिभ्योयथाकीर्तितेभ्योयद्दत्तमन्नंतद्दातुर्भो-जनार्थंमेदोरुधिरमांसमज्जास्थिभवतीति पण्डितावदन्ति । अत्रापि जन्मान्तरे मेदशोणितादिभुजांजातिषु जायन्त-इत्यर्थः ॥ १८२ ॥

(४) **राघवानन्दः** । मेदोवसा । अस्थिगोरसः । मज्जांनाश्नीयादिति श्रुतेः ॥ १८२ ॥

(५) **नन्दनः** । अत्रापि दत्तमित्यनुषज्यते ॥ १८२ ॥

(६) **रामचन्द्रः** । इतरेष्वनुलोमप्रतिलोमजेषु दत्तंहव्यंकव्यमन्नंमेदोरूपंभवति । अपाङ्क्तेष्व सृङ्मांसरूपं भवति । यथोद्दिष्टेषु वर्जितेषु यद्दत्तंतन्मज्जारूपंभवति । असाधुषु यद्दत्तंतदस्थिवद्भवति । एवंमनीषिणोवदन्ति मेदोसृङ्मांसादीनिति । तादृशजातौजायते यत्रैतदाहारोभवति ॥ १८२ ॥

अपाङ्क्त्योपहता पङ्क्तिः पाव्यते यैर्द्विजोत्तमैः ॥ तान्निबोधत कार्त्स्न्येन द्विजाग्र्यान्प ङ्क्तिपावनान् ॥ १८३ ॥

(१) **मेधातिथिः** । अपाङ्क्त्यैः पूर्वोक्तैःउपहतादूषितापङ्क्तिः परिषद्यैर्ब्राह्मणैःपाव्यते निर्दोषाक्रियते । तान्वक्ष्यमाणे-

श्लोकैः शृणुत कार्त्स्न्येन निःशेषेणब्रवीमि। अर्थवादरूपाण्यन्यानिपदानि। यथैवैकत्रभुञ्जानोदुष्टोदूषयति। अदुष्टाःपङ्क्तिपावनागुणातिशयादन्येषामपिदोषानपनुदन्तीत्यस्यार्थः। नचानेनापाङ्क्त्यानांभोजनमनुज्ञाप्यते। किंतर्हिपङ्क्तिपावनोऽवश्यमन्वेषितव्यः। तस्मिन्नलब्धेयत्नयत्नेनअतिनिपुणतःपरीक्षितास्त्रिपुरुषंयावत्। तथापिनचेदुपलभ्यमानदोषास्तथापिभोजयितव्याइत्येवमर्थःपङ्क्तिपावनोपदेशः ॥ १८३ ॥

(२) सर्वज्ञनारायणः। अपाङ्क्त्योपहता अज्ञायमानदोषाऽपाङ्क्त्योपहता द्विजोत्तमैर्ब्राह्मणैः द्विजाग्र्यान्विप्रमुख्यान्पङ्क्तिपावनसंज्ञान् ॥ १८३ ॥

(३) कुल्लूकः। एकपङ्क्त्युपविष्टस्तेनादिदूषिता पङ्क्तिर्यैर्ब्राह्मणैः पवित्रीक्रियते। तान्पवित्रीकारकान्ब्राह्मणानशेषेण शृणुत। निषधादेकपङ्क्तिभोजनासंभवेऽपि स्तेनादीनांरहस्यकृताज्ञातदोषविषयत्वेन साधकताऽस्य वचनस्य ॥ १८३ ॥

(४) राघवानन्दः। उक्तदोषेषुप्रायश्चित्तं पङ्क्तिपावनाएवेति प्रतिजानीते अपाङ्क्तेति। यैः पाव्यतेतान् अतएव समाख्यापङ्क्तिपावनानिति। तान्निबोधतेत्यन्वयः ॥ १८३ ॥

(५) नन्दनः। अपाङ्क्त्योपहता अज्ञानादापद्विषयाद्वापरिगृहीतेनापाङ्क्त्येनोपहता ॥ १८३ ॥

(६) रामचन्द्रः। अपाङ्क्त्यैर्द्विजैरुपहतादूषिता पङ्क्तिर्यैर्द्विजैः पाव्यते निर्दोषीक्रियते तान्द्विजाग्र्यान्पङ्क्तिपावनान्कार्त्स्न्येन निबोधत ॥ १८३ ॥

अग्र्याः सर्वेषु वेदेषु सर्वप्रवचनेषु च ॥ श्रोत्रियान्वयजाश्चैव विज्ञेयाः पङ्क्तिपावनाः ॥ १८४ ॥

(१) मेधातिथिः। अग्र्याःउत्तमाःसर्वसंशयप्रभेदननिपुणाः। स्वीकृतवेदाः। सर्वेषुचप्रवचनेषुअग्र्याः। इत्येवंप्रोच्यते व्याख्यायते यैर्वेदार्थप्रवचनान्यङ्गानिषडङ्गोवेदोयैरभ्यस्तोऽभ्यस्यतेवा श्रोत्रियान्वयेजाताःपितृपितामहादयोयेषांतादृशाएव। ननुवेदशाएवभोज्यतयाविहितास्तत्रकोतिशयोनेदानींपङ्क्तिपावनत्वमुच्यते। किंचिद्विद्वद्भ्योदानं सतिश्रोत्रियत्वेविहितं। नचेहविद्वत्तोपात्ता। नचतयापङ्क्तिपावनत्वोपपत्तिः। गुणविशेषापेक्षंहिपङ्क्तिपावनत्वं नगुणापचयेयुक्तम्। तस्माद्विद्वदभावे केवलश्रोत्रियायदानार्थमेतत्। असतिविदुषिश्रोत्रियाय दानंमुख्यमेव नगौणमित्युक्तंभवति नबहुवचनंव्यक्त्यपेक्षं। चकारः समुच्चये ॥ १८४ ॥

(२) सर्वज्ञनारायणः। अग्र्याः मुख्याः अध्यापकानां मध्ये सर्वेषु वेदेषु नयत्र क्वचिदेकस्मिन्वेदइत्यर्थः। एवं सर्वप्रवचनेषु। सर्ववेदार्थनिर्वचनेषु श्रोत्रियान्वयजावेदाध्येतृकुलजाः ॥ १८४ ॥

(३) कुल्लूकः। सर्वेषु वेदेषु चतुर्ष्वपिअग्र्याःश्रेष्ठाःसम्यग्गृहीतवेदाःब्राह्मणाःपङ्क्तिपावनाः। अतएव यमः। पङ्क्तिपावनगणनायांचतुर्वेदविदेचैवेति पठितवान्। तथा प्रकर्षेणैवउच्यते वेदार्थएभिरिति प्रवचनान्यङ्गानि तेष्वप्यग्र्याःषडङ्गविदस्तेच चतुर्वेदिनोपि पङ्क्तिपावनाः। न्यायांवच्च षडङ्गविदिति पङ्क्तिपावनमध्ये यमेन पृथक्पठितत्वात्। तथा छन्दसांशुद्धदशपुरुषइत्युशनोवचनाद्दशपुरुषपर्यन्तमविच्छिन्नवेदसंप्रदायवंशजाःपङ्क्तिपावनाः १८४ ॥

(४) राघवानन्दः। पङ्क्तिपावनान्लक्षयति अग्र्याइति त्रिभिः। अग्र्याः सर्वसंशयव्युदासेन वेदाध्यायिनः। सर्वप्रवचनेष्विति प्रवचनंनाम वेदार्थव्याख्यानं षडङ्गानि तत्रापि कुशलाःतथा श्रोत्रियान्वयजाः छन्दसाशुद्धदशपुरुषपर्यन्तान्वयजाः ॥ १८४ ॥

(५) नन्दनः। पुर्वेषांपात्रत्वमुक्तम्। इदानींपङ्क्तिपावनत्वमित्यपुनरुक्तिः ॥ १८४ ॥

(६) रामचन्द्रः । पङ्क्तिपावनानाह अग्र्यादिति । सर्वेषु वेदेषुऋग्वेदादिषु अस्खलिताध्ययनक्षमाअग्र्याः । च पुनःसर्वप्रवचनेषु षडङ्गाध्यापनेषु शिक्षाकल्पोव्याकरणंनिरुक्तिश्छन्दोज्योतिरिति षडङ्गानि एषांअध्यापनेषु अर्थनिर्वचनेष्वितिपाठः । वेदार्थविचारज्ञेषु अग्र्यामुख्याज्ञेयाःच पुनःश्रोत्रियान्वयजाः श्रोत्रियाणामन्वये वंशे जाताः । एते पङ्क्तिपावनाज्ञेयाः ॥ १८४ ॥

त्रिणाचिकेतःपञ्चाग्निस्त्रिसुपर्णःषडङ्गवित् ॥ ब्रह्मदेयात्मसन्तानोज्येष्ठसामगएव च ॥ १८५ ॥

(१) मेधातिथिः । त्रिणाचिकेताख्योवेदभागोध्वर्यूणां । पीतोदका जग्धतृणा इत्यादिस्तदध्ययनसंबन्धात्पुरुषोत्रत्रिणाचिकेतउच्यते । अन्येचत्रिणाचिकेतमधीयानानयेनाधीतंनाचिकेतचरितंसत्रिणाचिकेतः । अत्रापिलक्षणयैवपुरुषउच्यतेनचैवंमन्तव्यंतावन्मात्रेणपङ्क्तिपावनत्वं किंतर्हिसतिश्रोत्रियत्वादिगुणयोगेऽधिकोयंगुणोद्रष्टव्यःपङ्क्तिपावनहेतुतया । पञ्चाग्निविद्यानामाथर्ववेदस्योपनिषद्याम्नायते । स्तेनोहिरण्यस्येत्यादिर्यस्याःफलंतदध्ययनसंबन्धात्पुरुषोपिपञ्चाग्निःपूर्ववत् । अन्येतुपञ्चाग्नयोयत्रत्रयस्त्रेताग्नयःसभ्यावसथ्यौचद्वौ पञ्चाग्निस्तत्रसभ्योनामयोमहासाधनस्यशीतापनोदार्थमेवबहुषुदेशेषुव्यवह्रियते । त्रिसुपर्णोमन्त्रस्तैत्तिरीयकेबाह्वृच्ये च येब्राह्मणास्त्रिसुपर्णंपठन्तीत्यादिः । षडङ्गंवेदस्तंवेत्तीतिषडङ्गवित् । ब्राह्मधर्मेणआहूयदानेनयादत्तातस्याऽनुसन्तानस्ततोजातः ।ज्येष्ठसामगश्चज्येष्ठदोहानिआरण्यकेसामानि तानिगायति सएवमुच्यते । अत्रापिसामगानेनतद्व्रतचरणेनवापुरुषइत्युच्यते ॥ १८५ ॥

(२) सर्वज्ञनारायणः । उशन्हवै वाजश्रवसः सर्ववेदसंददावित्यादिः योऽनुवाकः कठश्रुतौ पठ्यमानः नचिकेतोर्नाम्नोमुनिपुत्रस्य प्रश्नत्रयविषये प्रोच्यतइति व्युत्पत्त्या त्रिणाचिकेतस्तत्पाठतदर्थज्ञानाभ्यांब्राह्मणोपि त्रिणाचिकेतः। पञ्चाग्निरुपनिषत्पठ्यमानपञ्चाग्निविद्यावित् । केचित्तु तैत्तिरीयशाखोक्तगार्हपत्यदक्षिणाग्न्याहवनीयसभ्यावसथ्यरूपश्रौताग्निपञ्चकवान्पञ्चाग्निरित्याहुः । त्रिसुपर्णः तैत्तिरीयशाखापठितस्य ब्रह्ममेतुमामित्यादेः येब्राह्मणास्त्रिसुपर्णंपठन्ति तेसोमंप्राप्नुवन्ति आसहस्रात्पङ्क्तिंपुनन्तीत्यन्तस्यानुवाकत्रयस्यार्थतोग्रन्थतश्चाध्येता । षडङ्गवित् शिक्षाकल्पादिवेदाङ्गषट्कस्यार्थवित् । ब्रह्मदेया ब्राह्मविवाहेन दत्तातस्याअनुसन्तानस्तत्सन्ततिः । अनुपदं ब्रह्मदेयैव यत्परंपरायां भार्येत्येतदर्थम् । ज्येष्ठसामगो ज्येष्ठसाम्नः सततगाता ॥ १८५ ॥

(३) कुल्लूकः। त्रिणाचिकेतःअध्वर्युवेदभागःतद्व्रतंच तद्योगात्पुरुषोपि त्रिणाचिकेतः।पञ्चाग्निरग्निहोत्री। तथाच हारीतः। पवनःपावनस्त्रेता यस्य पञ्चाग्नयोगृहे।सायंप्रातःप्रदीप्यन्ते सविप्रःपङ्क्तिपावनः॥ पवनआवसथ्याग्निः पावनःसभ्योग्निः शीतापनोदाद्यर्थंबहुषुदेशेष्वपिविधीयते । त्रिसुपर्णोबह्वृचांवेदभागः तद्व्रतंच तद्योगात्पुरुषोपि त्रिसुपर्णः । षडङ्गानि शिक्षादीनि योव्याचष्टे सषडङ्गवित् सर्वप्रवचनेन षडङ्गाध्येनोक्तः । ब्रह्मदेया ब्राह्मविवाहोढा तस्याआत्मसन्तानःपुत्रः । ज्येष्ठसामानि आरण्यके गीयन्ते तेषांगाता एते षड्विज्ञेयाःपङ्क्तिपावनाइत्युत्तरश्लोकेन संबन्धः ॥ १८५ ॥

(४) राघवानन्दः । ब्रह्मपुराणे आचिकेतीति योविश्वंतृणवत्सर्वनिःस्पृहः । त्रिणाचकेतःसगृही रागद्वेषविमत्सरइति ॥ अथवा त्रिणाचिकेतःत्रिणाचिकेतोवेदभागःतद्योगात्तत्वैव नाम्ना भवितायमग्निरिति नाचिकेतसंप्रत्युक्तेः । सोग्निश्चितोयेन सवा त्रिणाचिकेतः । पञ्चाग्निःपचनःपावनस्त्रेता यस्य पञ्चाग्नयोगृहे । सायंप्रातः प्रदीप्यन्तेसविप्रःपङ्क्तिपावनइति हारीतोक्तेः ॥ तत्र पचनोग्निरावसथ्याख्यः । पावनः सभ्यः । त्रेता गार्हपत्योदक्षिणाग्निराहवनीयश्चेति । पञ्चाग्निरसौवावलोकीगौतमाग्निरित्यादिपञ्चाग्निविद्याविदितिमेधातिथिः । त्रिसुपर्णः पितरःसमपूर्वेचयज्वानोभूरिदक्षिणाः । यस्येदंशोमा-

तृतंशस्त्रिसुपर्णीत सःस्मृतइति ॥ बह्वृचांवेदभागविद्वा । षडङ्गवित् शिक्षादीनांवेत्ता । ब्रह्मदेयात्मसन्तानोब्रह्मविवाहोढात्मजः । ज्येष्ठ सामगः आरण्यकेगीयमानज्येष्ठसामगाता । आज्यदोहानि गायतियःसज्येष्ठसामगइति मेधातिथिः ॥ १८५ ॥

(५) **नन्दनः** । उशन्ह वै वाजश्रवसः सर्ववेदसन्ददावित्यादिभिस्त्रिभिरनुवाकैर्विहितानांनाचिकेतःसंज्ञानामग्नीनांचेता वेदिता वा त्रिणाचिकेतः । पञ्चाग्निर्गार्हपत्याद्यग्नित्रयस्य सभ्यावसथ्ययोश्चाधाता । ब्रह्ममेतुमामित्यादयस्त्रयोनुवाकाः प्रत्येकंत्रिसुपर्णसंज्ञाः तांस्त्रीनेकंवा योऽधीते सत्रिसुपर्णः । ब्रह्मदेयात्मसन्तानोब्रह्मविवाहोढायाःसुतः । ज्येष्ठसामेतितलवकाराणांप्रसिद्धिः । उदुत्यंचित्रमित्येतयोर्गीतं तद्गायी ज्येष्ठसामगः ॥ १८५ ॥

(६) **रामचन्द्रः** । त्रिणाचिकेतः यजुर्वेदैकदेशे तद्व्रताचरणेन तदध्यायी त्रिणाचिकेतः । तैत्तिरीयशाखायांप्रसिद्धः । पञ्चाग्निः सभ्यावसथ्यौ दक्षिणाग्नयस्त्रयोयस्य सन्ति स पञ्चाग्निः । त्रिसुपर्णोगरुत्मानिति श्रुतिः त्रिसुपर्णानुवाकत्रयस्याध्येता तदुपासनाभिज्ञश्च । तैत्तिरीयशाखायांषडङ्गवेत्ता । षडङ्गोवेदउच्यत इत्यमरः । ब्रह्मदेयात्मसन्तानः ब्रह्म विदउत्पन्नः च पुनःज्येष्ठसामगः सामविशेषः तद्व्रताचरणेन यस्तदधीते सःज्येष्ठसामगउच्यते ॥ १८५ ॥

वेदार्थवित्प्रवक्ता च ब्रह्मचारी सहस्रदः ॥ शतायुश्चैव विज्ञेयाब्राह्मणाःपङ्क्तिपावनाः ॥ १८६ ॥

(१) **मेधातिथिः** । वेदस्यार्थंजानाति ननुचषडङ्गविदुक्तएव । अङ्गैर्विनास्वयमप्यूहतिप्रज्ञया यःसइहवेदार्थविदभिप्रेतःअथवातस्यैवायमनुवादः । पुनःपुनःक्रियते तावदर्थ ज्ञानेनविनासत्यप्यन्यगुणयोगेश्राद्धानर्हाः । प्रवक्ताव्याख्याता वेदार्थस्यैव । ब्रह्मचारी । सहस्रदः । अविशेषाद्दानेगवांसहस्रंयोदत्तवान् इदंचयुक्तं सहस्रशब्दस्यबहुनामत्वात् बहुयोददाति उदारोवेत्यर्थः । नहिगवांसंख्येयत्वेप्रमाणमस्ति । वेदेप्युक्तं गावोवैयज्ञस्यमातरइति । अविशेषनोदनायां गावःप्रतीयन्ते । शतायुर्वृद्धवयाः । सहिपरिपक्वकषायतया पावनत्वमश्नुते शतमायुरस्येतिशतायुः । केभ्योदानंप्रथमंपितृभ्यइत्येकइति । एवमर्थमेवचब्रह्मचारिग्रहणमिहव्याचक्षते । सहिपूर्वत्रयाभवति ॥ १८६ ॥

(२) **सर्वज्ञनारायणः** । वेदार्थवित् प्रागुक्तेभ्योन्यस्यापि वेदस्यैकदेशस्यार्थवित् प्रवक्ता तदर्थव्याख्याता । सहस्रं गोसहस्रं तस्य दाता । शतायुः पूर्णशतवर्षः ॥ १८६ ॥

(३) **कुल्लूकः** । अनधीत्यापिवेदाङ्गानिगुरूपदेशाधिगतवेदार्थः । प्रवक्तावेदार्थस्यैव । ब्रह्मचारीप्रथमाश्रमी । सहस्रदइतिदेयविशेषानुपादानेपिगावोवैयज्ञस्यमातरइत्यादिविशेषप्रवृत्तश्रुतिदर्शनात् गोसहस्रदाता बहुप्रदोवा । शतायुःशतवर्षवयाः । श्रोत्रियायैव देयानीति नियमात्सति श्रोत्रियत्वे उक्तगुणयोगात्पङ्क्तिपावनत्वम् ॥ १८६ ॥

(४) **राघवानन्दः** । वेदार्थवित् अङ्गाध्ययनंविना गुरूपदेशतइति केचित् । वस्तुतस्तु उपक्रमादिषड्भिर्लिङ्गैर्वेदार्थज्ञाता ब्रह्मवित् । एकोपि ब्रह्मविद्भुङ्क्ते जगत्तर्पयतेखिलम् । तस्माद्ब्रह्मविदे देयंयदरित वसु किंचनेत्युक्तत्वात् ॥ प्रवक्ता वेदार्थस्य । सहस्रदः गोसहस्रदाता शतायुः विप्रत्वे सति शतवर्षजीवी ॥ १८६ ॥

(५) **नन्दनः** । प्रवक्ताऽध्यापकः । ब्रह्मचार्यृतुकालाभिगामी । निन्द्यास्वष्टासु चान्यासु स्त्रियोरात्रिषुवर्जयन् ब्रह्मचार्येवभवतीत्युक्तत्वात् । ऊर्ध्वरेता ऋतुकालगामीतत्त्वविच्च पङ्क्तिपावनाइतिस्मृत्यन्तरम् । सहस्रदः सहस्रस्यब्राह्मणानांभोजनदाता सहस्रसुवर्णानां वा ॥ १८६ ॥

(६) **रामचन्द्रः** । वेदार्थवित् । च पुनःप्रवक्तावेदशास्त्रार्थवक्ता । ब्रह्मचारी प्रसिद्धः । सहस्रदःगोसहस्रदः । सहस्राणामन्नदोवा । च पुनः शतायुरेव चिरंजीवीत्यर्थः । एते पङ्क्तिपावनाविज्ञेयाः ॥ १८६ ॥

पूर्वेद्युरपरेद्युर्वा श्राद्धकर्मण्युपस्थिते ॥ निमन्त्रयेत त्र्यवरान्सम्यग्विप्रान्यथोदितान् ॥ १८७ ॥

(१) **मेधातिथिः** । उक्तायादृशाब्राह्मणाभोजनीया इदानीमन्येतिकर्तव्यतोच्यते । पूर्वेद्युर्यदहःश्राद्धंकर्तव्यममायां-त्रयोदश्यांवा ततःपूर्वस्मिन्नहनिचतुर्दश्यांद्वादश्यांवाश्वःश्राद्धेकर्तव्ये ब्राह्मणान्निमन्त्रयेत् । अपरेद्युस्तदहरेववा । विकल्प-श्चावधिनियमापेक्षः यःशक्नोतिनियमान्पालयितुंसपूर्वेद्युःअशक्तस्तदहरेवअधिकनियमानुपालनाच्चमहाफलं निमन्त्रणेक-र्तव्येअध्येषणपूर्वकंव्यापारणमभ्युपगमनंवा । त्रयोऽवरायेषांतेत्र्यवराः । यद्यत्यन्तन्यूनास्तदात्रयः । शक्तौत्वयुजोयथो-त्साहमित्युक्तं । अवशिष्टःपदसंघातःश्लोकपूरणार्थः । उपस्थितेप्राप्ते यथोदितान्यथोक्तान् ॥ १८७ ॥

(२) **सर्वज्ञनारायणः** । अपरेद्युरपरस्मिन्नहनि पूर्वेद्युरनिमन्त्रणे निश्चितपूर्वदिनब्रह्मचर्यस्य निमन्त्रणं एकोदैवए-कःपित्र्यएकोमातामहस्थानइति पक्षस्त्रिपक्षः सोवरोनूचानोयेषांते त्र्यवराः अशक्तावयं कल्पः । शक्तौ त्वतोधिकाग्राह्या-इत्यर्थः । सम्यक्विधिना ॥ १८७ ॥

(३) **कुल्लूकः** । श्राद्धकर्मणि प्राप्ते श्राद्धाहात्पूर्वदिने तदसंभवे श्राद्धदिनएवोक्तलक्षणान्ब्राह्मणान्सम्यगतिस-त्कृत्यनिमन्त्रयेत् । त्रयोवरान्यूनायेषांते त्र्यवराः न तु तानेव एकैकभोजनस्याप्युक्तत्वात् ॥ १८७ ॥

(४) **राघवानन्दः** । श्राद्धप्रकारत्वान्निमन्त्रितस्य नियमान्वक्तुंनिमन्त्रणाद्यकालमाह पूर्वेद्युरिति । पूर्वेद्युः श्राद्ध-दिनात्पूर्वदिनेअपरेद्युः श्राद्धदिने । त्र्यवरान् त्रयोअवरानिकृष्टायत्र तान् । न तु तानेव एकैकमपीत्युक्तेः । यथोदितान-ग्र्याइत्यादिनोक्तान् ॥ १८७ ॥

(५) **नन्दनः** । अथ पात्रत्वेन परिगृहीतानांनिमन्त्रणकालमाह पूर्वेद्युरिति । पूर्वेद्युः श्राद्धदिनात्पूर्वस्मिन्नहनि अप-रेद्युः श्राद्धदिने ॥ १८७ ॥

(६) । **रामचन्द्रः** । श्राद्धे कर्मणि उपस्थितेसति प्राप्तेसति पूर्वेद्युःरात्रौ वा अपरेद्युस्तद्दिने वा यथोदितांस्त्र्यवरान् त्रयोवरान्यूनाएषांत्र्यवरा एतान् निमन्त्रयेत् ॥ १८७ ॥

निमन्त्रितोद्विजः पित्र्ये नियतात्मा भवेत्सदा॥न च छन्दांस्यधीयीत यस्य श्राद्धं च तद्भवेत्॥१८८॥

(१) **मेधातिथिः** । पित्र्येश्राद्धेनिमन्त्रितोनियतात्माभवेत् । संयतात्मा ब्रह्मचर्यपरिरक्षन् अन्यांश्चयमनियमाना-तिष्ठेत् । स्नातकव्रतादीन्पुरुषव्रतानांनृत्यगीतादिप्रतिषेधानांकर्माङ्गताविधीयते । तथाकर्तव्यं श्राद्धकृता यथासौब्राह्मण-निमन्त्रणात् प्रभृतिसंयतेन्द्रियोभवति अन्यथाश्राद्धंदुष्येत नचछन्दांसिवेदान्नाधीयीतनचवेदाक्षरोच्चारणमध्ययनंनिषिध्य-ते । जपस्तुसन्ध्योपासनादावप्रतिषिद्धः । यस्यतत्कर्तव्यंश्राद्धंभवेत् । पित्र्येश्राद्धेनिमन्त्रितवन्नियतात्माभवेत् । संयता-त्माचसोपिनियतात्माभवेदितिपदयोजना । अतोभोक्तुः कर्तुश्चनिमन्त्रणात्प्रभृतितुल्योनियमोनध्ययनंच ॥१८८ ॥

(२) **सर्वज्ञनारायणः** । पित्र्यइत्युपलक्षणं दैवेपि । नियतात्मा क्रोधकामाशुचित्वशून्यः । छन्दांसि वेदान् । यस्य कर्तुः श्राद्धकार्यं ॥ १८८ ॥

(३) **कुल्लूकः** । श्राद्धे निमन्त्रितोब्राह्मणोनिमन्त्रणादारभ्य श्राद्धाहोरात्रंयावन्मैथुननिवृत्तिसंयमनियमवान्स्यात् अवश्यकर्तव्यजपादिवर्जंवेदाध्ययनंच न कुर्यात् श्राद्धकर्तापि तथैव स्यात् ॥ १८८॥

(४) **राघवानन्दः** । नियममाह निमन्त्रितइति चतुर्भिः । नियतात्मा मैथुनादिनिवृत्तिमान् । अक्रोधनैःशौचपरैः

सततंब्रह्मचारिभिः । भवितव्यंभवद्भिश्च मया च श्राद्धकारिणेति मन्त्रलिङ्गात्श्राद्धकर्तापि तथा स्यात् । तदहरध्ययनफलंश्राद्धोद्देश्यगामीत्याह यस्येति ॥ १८८ ॥

(५) नन्दनः । नियतात्मा नियतेन्द्रियः । यःश्राद्धेनिमन्त्रितोभवेद्यःश्राद्धंकरोति सचनियतात्मा भवेत् नचाधीयीत च्छन्दांसि ॥ १८८ ॥

(६) रामचन्द्रः । पित्र्ये कर्मणि निमन्त्रितःसदा द्विजोनियतात्मा भवेत् । च पुनश्छन्दांसि नाधीयीत । च पुनः यस्य गृहे श्राद्धंसतद्व्रताचरणोभवेत् । जितेन्द्रिय अध्ययनरहितः ॥ १८८ ॥

निमन्त्रितान् हि पितरउपतिष्ठन्ति तान् द्विजान् ॥ वायुवच्चानुगच्छन्ति तथासीनानुपासते॥१८९॥

मेधातिथिः । निमन्त्रितेन नियतात्मनाभवितव्यमित्यस्यविधेरर्थवादोयं । यस्मान्निमंत्रितान् ब्राह्मणान् अदृश्येनरूपेणपितरउपतिष्ठन्ति तच्छरीरमनुप्रविशन्ति । यथाभूतग्रहाविष्टवायवोऽनुगच्छन्ति । यथावायुप्रमाणःपुरुषोगच्छत्यनुगच्छति तंगच्छन्तंप्राणोजहाति । एवंपितरोवायुभूताभवन्ति । तथासीनान्ब्राह्मणानुपासते । गच्छत्स्वनुगच्छन्ति उपविष्टेषूपविशन्ति निमन्त्रिताद्विजा पितृरूपाभवन्तीत्यर्थः । तस्मान्नस्वतन्त्रैर्निमन्त्रितैर्भवितव्यम् ॥ १८९ ॥

(२) सर्वज्ञनारायणः । निमन्त्रितान् । हीत्युक्तविधिशेषः । उपतिष्ठन्ति तिष्ठत्सु तत्समीपे तिष्ठन्ति । अनुगच्छन्ति निमन्त्रितेन साकम् ॥ १८९ ॥

(३) कुल्लूकः । पूर्वनियमविधेरयमनुवादः यस्मात्तान्ब्राह्मणान्निमन्त्रितानदृश्यरूपेण पितरोधितिष्ठन्ति । प्राणवायुवद्गच्छतोऽनुगच्छन्ति तथोपविष्टेषु तेषु समीपउपविशन्ति । तस्मान्नियताभवेयुः ॥ १८९ ॥

(४) राघवानन्दः । अनुगच्छन्ति निमन्त्रितान्द्विजान् आसीनांस्तानउपासते समीपेतिष्ठन्ति ॥ १८९ ॥

(५) नन्दनः । निमन्त्रितानांनियतात्मत्वानध्ययनयोः कारणमाह,निमन्त्रितानिति । वायुभूता वायुवद्व्यापिनोनिमन्त्रितान्ब्राह्मणान्पितरउपतिष्ठन्ति तेषांसमीपे तिष्ठन्ति गच्छतोऽनुगच्छन्ति तथासीनानुपासते । यत्कर्मनिमन्त्रिताः कुर्वन्ति तत्पितरोऽपि कुर्वन्ति तस्मादनियतात्मत्वमध्ययनायासित्वंचवर्जनीयमित्यभिप्रायः ॥ १८९ ॥

(६) रामचन्द्रः । वायुभूताःपितरः द्विजाननुगच्छन्ति ॥ १८९ ॥

केतितस्तु यथान्यायंहव्यकव्ये द्विजोत्तमः ॥कथंचिदप्यतिक्रामन् पापः सूकरतांव्रजेत् ॥१९०॥

(१) मेधातिथिः केतितउपनिमन्त्रितः । हव्येकव्येदैवेपित्र्येच । अङ्गीकृत्यनिमन्त्रण मभ्युपगम्यश्राद्धभोजनं । यदिकथंचिदतिक्रामतिभोजनकाले नसंविधीयते ब्रह्मचर्यंचनरक्षति तदासूकरतांगच्छति । सब्राह्मणःकथंचित्कामाद्विस्मृत्यवा । यथान्यायमितिवृत्तपूरणं । अन्येत्वाहुः प्रार्थ्यमानस्यानभ्युपगमएवातिक्रमः । तथाचश्राद्धकल्पेउक्तं । अनिन्दितेनामन्त्रितोनातिक्रामेदिति तच्चायुक्तं । लिप्सयाप्रवृत्तिःश्राद्धे नपुनःशास्त्रतः । तत्रसत्यांलिप्सायांयदिनाङ्गीकरोति तदाकोदोषः । १९० ॥

(२) सर्वज्ञनारायणः । केतितोनिमन्त्रितः । कथंचिदन्यनिमन्त्रणादिनापि अतिक्रामन् तस्य गृहेनश्नन् ॥ १९० ॥

(३) कुल्लूकः । हव्यकव्ये यथाशास्त्रंनिमन्त्रितोब्राह्मणःस्वीकृत्य केनापि प्रकारेण भोजनमकुर्वाणः तेन पापेन जन्मान्तरे सूकरोभवति ॥ १९० ॥

(४) राघवानन्दः । अतआह केतितइति । केतितोनिमन्त्रितः। अतिक्रामन् मैथुनादिनिषिद्धाचरणेन निमन्त्रणंस्वीकृत्य परित्यजन्वेति केतितइत्युपलक्षणंनिमन्त्रयितुः । केतनंकारयित्वातुयोतिपातयतेद्विजः । ब्रह्महत्यामवाप्नोति

शूद्रयोनौ च जायते ॥ एतस्मिन्नेनसि प्राप्ते नियतंशंसितव्रतः। यतिचान्द्रायणंचीर्त्वा ततःपापात्प्रमुच्यतइति यमोक्तेः ॥ १९० ॥

(५) नन्दनः केतितोनिमन्त्रितः । कथंचिद्धेतुनाऽहेतुनेत्यर्थः । हव्यकव्येऽतिक्रामञ्छ्राद्धपरित्यागंकुर्वन्नित्यर्थः ॥ १९० ॥

(६) रामचन्द्रः । निमन्त्रितोद्विजःकथंचिदपि विषयानतिक्रामन्विषयैराक्रान्तःस पापःशूकरतांव्रजेत् ॥ १९० ॥

आमन्त्रितस्तु यः श्राद्धे वृषल्या सह मोदते ॥ दातुर्यद्दुष्कृतं किंचित्तत्सर्वंप्रतिपद्यते ॥१९१॥

(१) मेधातिथिः । वृषलीशब्दःस्त्रीमात्रोपलक्षणार्थः सामान्येनब्रह्मचर्यस्यविधानात्। अतोब्राह्मण्यपिवृषल्येव । वृषस्यन्तीचाल्यतिभर्तारमितियौगिकत्वंदर्शयति अतोयमर्थः । भोजनमङ्गीकृत्य तदाहर्षात्स्त्रियासहमोदते रमते तया-सह सुरतसंभोगेच्छयासंलापालिङ्गनाद्यपियोजनयति तस्यायंदोषः । दातुःश्राद्धस्यकर्तुः यद्दुष्कृतंपापंकिंचित्तत्सर्वंतस्मिन्सङ्क्रामति । अदृष्टफलयोगमात्रमनेननिर्दिश्यते । अन्यथायत्रदातापुण्यकृत्तत्रनकश्चिद्दोषःस्यात् । मोदनंहर्षोत्पत्तिः तेन-संलापालिङ्गनाद्यपिनकर्तव्यम् ॥ १९१ ॥

(२) सर्वज्ञनारायणः। वृषल्या शूद्रया मोदतेरत्यनुगुणं चुम्बनादिकर्माणि कुरुते । ब्राह्मण्यातु सह न तादृशो-दोषइति तात्पर्यम्। दातुर्यावद्दुष्कृतं तावत् नतु तदेवान्यकृतस्यान्यत्राप्रतिसंक्रमात् ॥ १९१ ॥

(३ कुल्लूकः। नियतात्मा भवेत्सदेत्यनेन मैथुननिषेधे कृतेपि वृषलीगमनस्याधिकदोषज्ञापनायाह आमन्त्रित-स्त्विति। वृषली शूद्रा तत्रमूढत्वात्श्राद्धेनिमन्त्रितःसन्योवृषल्यासार्धंस्त्रीपुंसधर्मेण सुरतादिना रमते सदातुर्यत्पापंतत्प्राप्नोति पापोत्पत्तिमात्रंविवक्षितम्। अन्यथा दातरिअपापे पापंन जायते। नचेदंदातुःप्रायश्चित्ततया विहितंयेनासौ पापान्मुच्यते। मेधातिथिगोविन्दराजौ तु सामान्येन ब्रह्मचर्यस्य विधानात्वृषस्यन्ती चपलयतिभर्तारमिति योगाश्रयणेन श्राद्धभोक्तुरूढा ब्राह्मण्यपि वृषल्यभिमतात्रेत्याहतुः ॥ १९१ ॥

(४) राघवानन्दः। किंच आमन्त्रितइति वृषस्यन्तीभर्तारंवृषली ब्राह्मण्यपीति ॥ १९१ ॥

(५) नन्दनः। वृषल्या स्वभार्यया शूद्रया वृषलीगमनमुत्तरासामप्युपलक्षणम् ॥ १९१ ॥

(६) रामचन्द्रः। द्विजः श्राद्धे आमन्त्रितःसन्वृषल्या सह रात्रौ मोदते दातुःश्राद्धकर्तुःयद्दुष्कृतंपापंतत्सर्वंप्रतिपद्यते ॥ १९१ ॥

अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः ॥ न्यस्तशस्त्रामहाभागाः पितरः पूर्वदेवताः ॥ १९२ ॥

(१) मेधातिथिः। अक्रोधनाःक्रोधवर्जिताः शौचपराः शौचंशुद्धतामृद्वारिभ्यां प्रायश्चित्तेनान्तःशुध्यावा। सततंशुद्धेर्विशेषणं। तेननिष्ठीवनादावाचमनादितत्क्षणमेवकर्तव्यं। ब्रह्मचारिणःस्त्रीसंभोगंपरिहरति। न्यस्तशस्त्राःन्यस्तंत्यक्तंशस्त्रंयैः शस्त्रग्रहणंदण्डपारुष्योपलक्षणार्थं महाभागाःऔदार्यधनित्वादिगुणयोगोमहाभागता। यत्एवंविधंपितॄणांरूपंब्राह्मणानाविशन्ति अतस्तैस्तद्रूपधारिभिर्भवितव्यमित्यर्थवादेनायमर्थोविधीयते । पूर्वपूर्वदेवताःपितरोनाम कल्पान्तरे तेप्येते देवता-एवेतिस्तुतिः। पूर्वकालंपितॄणामर्चनीयत्वात्पूर्वग्रहणम् ॥ १९२ ॥

(२) सर्वज्ञनारायणः। अक्रोधनाइत्यादिना यादृशाःपितरस्तादृशैर्ब्राह्मणैर्दात्रा च भवितव्यमिति दर्शितम्। पूर्व-देवताः देवताभ्योपि पूर्वभूताः ॥ १९२ ॥

---

१ मूढत्वात्=ऊढत्वात् (अ)

(३) कुल्लूकः । क्रोधरहिताबहिःशौचंमृद्वारिभ्यामंन्तःशौचरागद्वेषादित्यागस्तद्युक्ताःसर्वदास्त्रीसंयोगादिशून्याः त्यक्तयुद्धाःदयाद्यष्टगुणयोगोमहाभागता तद्वन्तःअनादिदेवतारूपाः पितरस्तस्मात्क्रोधादिरहितेन भोक्त्राकर्त्रा च भवितव्यम् ॥ १९२ ॥

(४) राघवानन्दः । पितृणांविशिष्टजन्मख्यापनार्थंतान्विशिषन्नुपचारनियमेन सहोत्पत्तिंप्रतिजानीते । अक्रोधनाइति द्वाभ्यां । शौचपराः शुद्धमानसाः । न्यस्तशस्त्राः त्यक्तयुद्धाः । महानन्योभागोयेषांते । पूर्वदेवतादेवतानांपूर्वतनाः ॥ १९२ ॥

(५) नन्दनः । पितरोनाम केचिद्देवताविशेषा न प्रेताः पितृपितामहादयइत्याह अक्रोधनाइति । न्यस्तशस्त्रास्त्यक्तहिंसाः । महाभागाः महात्मानः । पूर्वदेवताः देवताभ्यःपूर्वे ॥ १९२ ॥

(६) रामचन्द्रः । पितृणांस्वरूपमाह अक्रोधनाइति । अक्रोधनादयः पितरःपूर्वदेवताः ॥ १९२ ॥

यस्मादुत्पत्तिरेतेषां सर्वेषामप्यशेषतः ॥ ये च यैरुपचर्याः स्युर्नियमैस्तान्निबोधत ॥ १९३ ॥

(१) मेधातिथिः । यएतेषांपितॄणामुत्पत्तिर्येचपितरोयैरुपचर्याब्राह्मणेनसोमपाः क्षत्रियेणहविष्मन्तः इत्यादितत्सर्वमप्यशेषतइदानीमुच्यमानंनिबोधत बुध्यध्वं । नियमैरित्यनुवादः । पूर्वमेवविहितत्वान्नियतात्माभवेदिति । बहुवचनंबहुत्वान्नियमानाम् ॥ १९३ ॥

(२) सर्वज्ञनारायणः । यस्माद्येभ्यउत्पत्तिः । यैः साध्यादिभिः । यैश्च नियमैरुपचर्याः ॥ १९३ ॥

(३) कुल्लूकः । एषांसर्वेषांपितृणांयस्मादुत्पत्तिर्ये च पितरोयैर्ब्राह्मणादिभिर्यैर्नियमैःशास्त्रोक्तकर्मभिरुपचरणीयाभवेयुःतान्साकल्येन शृणुत ॥ १९३ ॥

(४) राघवानन्दः । ये यत्प्रभावाये यत्स्वरूपाः सोमसदइत्याद्यायैः साध्यादिभिरर्च्यायैरजतपात्रमुन्यन्नकालशाकाद्यैर्नियमैःदेवपूर्वत्वव्रतचर्यादिभिर्वा उपचर्याः पूज्याःस्युस्तान्निबोधतेत्यन्वयः ॥ १९३ ॥

(५) नन्दनः । ये पितरोयैर्यज्ञविशेषैर्यैः नियमैः करणैः उपचर्याः पूज्यास्तान्नियमविशेषान्पितॄंश्च निबोधत ॥१९३॥

(६) रामचन्द्रः । यस्मात्कारणादेतेषांसर्वेषांपितृणामुत्पत्तिः । अशेषतो निबोधत । च पुनः ये पितरो यैर्देवादिभिर्नियमैरुपचर्याःसेव्याःस्युस्तान्निबोधत ॥ १९३ ॥

मनोर्हैरण्यगर्भस्य ये मरीच्यादयः सुताः ॥ तेषामृषीणां सर्वेषां पुत्राः पितृगणाः स्मृताः ॥१९४॥

मेधातिथिः । हिरण्यगर्भःप्रजापतिः तस्यपुत्रोहैरण्यगर्भोमनुः । तथाचोक्तंप्रथमाध्याये । एवंसर्वंससृष्ट्वेदंमांचेति । तस्यमनोर्येमरीच्यादयःपुत्राः अत्र्यङ्गिरसावित्यादयस्तेषामृषीणांयेपुत्रास्तएतेपितृगणाः । ननुचपित्रादयःसर्वस्यात्मीयपितरः एवंहिचोदितःपित्रेपितामहायप्रपितामहायपिण्डान्निर्वपेत् । तथाअतऊर्ध्वंपुत्रास्त्रिभ्योदद्युरिति । तत्रकिमिदमुच्यते ऋषीणांपुत्राःपितरः सोमपानामविप्राणामितिनचवचनविकल्पःशक्यःप्रतिपत्तुं सोमपेभ्योदद्यात्पितृपितामहेभ्योवेति । यतउत्पत्तौपुत्रेणकर्तव्यमितिश्रूयते । संबन्धिशब्दश्चपुत्रशब्दः । तथापितायस्यतुवृत्तःस्यादिति । तस्माद्वक्तव्योस्यप्रकरणस्यार्थउच्यते । स्तुतिरियंपूर्वविधिशेषभूता । नात्रतेषांसंप्रदानताश्रुता । ननुचोपचर्याइतिविधिरस्ति । नायंचरतिः सामान्यक्रियारूपोविधिविषयोभवितुमर्हति । उपचारोनामकर्मश्चिद्दानयागादिवद्भेदेनप्रतीयते । प्रायेणान्वयंकरोति । यत्संनिहितक्रियापरतयाप्रयुज्यते संन्निहितंचश्राद्धं तत्रवसिष्ठसंप्रदानकंविहितंनशक्यंपुनर्विधातुं विधेयत्वेनसन्निधिरस्ति । असंनि-

हितस्यनश्वरनिर्वाचकः योपिल्लोकेगुरवउपचर्याइतिप्रयोगस्तत्रापिशुश्रूषालक्षणार्थः पादधावनादिःप्रतीयते सोपियथोदितानांपितृणांनसंभवति प्रकृत्यैकवाक्यतयावार्थवच्चोपपत्तेर्नार्थान्तरकल्पनापिसंभवति । यदिचसोमपादयोयथावर्णंश्राद्धेदेवतात्वेनाभिप्रेताःस्युस्ततोभिजनवर्णनमनुपयोगिस्तावकत्वेतुसर्वमुत्पद्यते । यःकश्चित्पितृद्वेषात्पित्र्येकर्मण्युपहतबुद्धिरनादरवान्स्यात्तस्यप्रवृत्त्यर्थमिदमारभ्यते । मैवंमंस्थाःमृतमनुष्यरूपाःपितरोयेननतर्पिताःश्राद्धेकंदोषंकरिष्यन्ति । तर्पितावाकंगुणमिति । यतएतेमहाप्रभावाःसर्वस्यजगतःप्रभुर्हिरण्यगर्भस्तस्यपुत्रोमनुः तस्यैतेपौत्राअतएवऋषीणांचेत्युच्यते । नमनोर्येकेचिदन्येपुत्राः किंतर्हिऋषयस्तेचप्रथितप्रभावा ऋषयश्चप्रथितप्रभावामरीच्यादयः तेषांपुत्राःपितरोबहुविधाश्चप्रतिपत्तारोयएतादृशेभ्योर्थवादवाक्येभ्यःप्रवर्तन्तेतराम् । येचव्याचक्षते । सोमपादिदृष्टिः पितृषुकर्तव्येति तेप्रमाणाभावादुपेक्षणीयाः नहियथादित्येब्रह्मदृष्टिः समुद्दिश्यते एवमिहतादृशंकिंचनास्ति । येप्याहुः गृहीत्वागोत्रनामनीपितृभ्योदद्यादिति तच्चैतद्गोत्रंसोमपाःइत्यादिवर्णभेदेन । तदप्ययुक्तं । नामनिर्देशोयंनगोत्रनिर्देशः सोमपानामितिश्रवणात् गोत्रनामधेयत्वेतिनामशब्दउत्पद्यतएवेतिचेत् । एवंतर्हिगोत्रनिर्देशोवैयधिकरण्यंस्यात् । पितृणांसोमपागोत्रमिति नतुपितरः सोमपाइति । अथाभेदोपचारेणगोत्रसन्तानव्यपदेशोदृष्टइत्युच्यते । यथाबभ्रुर्मन्दुरिति । अत्रोच्यते । इदमिहनिरूप्यंकिमेतद्गोत्रंनामआदिपुरुषःसंज्ञाकारी विद्यावित्तशौर्यौदार्यादिगुणयोगेनख्याततमो येनकुलंव्यपदिश्यते पुत्रिकानुलिङ्गाइति एवंतर्हिसर्वेषामेवब्राह्मणादीनामवान्तरगोत्रभेदाःसन्तीतिस्मरन्तिच । यादृशंपुरुषंतत्सन्तानजाःपुरुषावयममुष्यकुलेजाताइत्यैतत्त्वेनैवव्यपदेशोयुक्तः । नहिसोमपावयमितिकश्चिद्गोत्रत्वेनसोमपान्स्मरतियथाभृगुर्गर्गगालवान्ब्राह्मणानांचतैरेवगोत्रव्यपदेशोयुक्तः । तानिहिमुख्यानिगोत्राणिरूढिरूपेणतत्रगोत्रशब्दःप्रवर्तते । नहितेषांगोत्रत्वेएतल्लक्षणमस्ति । आदिपुरुषःसंज्ञाकारीगोत्रमिति अनादित्वादेतद्गोत्राणांब्राह्मणादिजातिवत् । नहिपराशरजन्मतऊर्ध्वंपाराशरव्यपदेशः । केषांचिद्ब्राह्मणानामेवंसतिआदिमत्तावेदस्यप्रसज्यते । नित्यत्वादत्रव्यपदेशस्योदकतर्पणादौतदेवगोत्रंश्रयितव्यं येतुसंज्ञाकारिणतेननित्याःइदानींतनानित्याइत्येवंभवत्यनित्यानांसोमपानामुपादानंवैदिकेकर्मणियुक्तं । अतोब्राह्मणैर्यथागोत्रंगार्ग्यायगर्गगोत्रायवास्वधाइदंवोनमोस्त्वित्ति एवमादिशब्देनोद्देशंकृत्वा ततोनामोच्चार्यदानादिकर्तव्यं । क्षत्रियादीनांनैतादृशोगोत्रव्यवहारोविद्यते । नहियथाब्राह्मणोगोत्रंनियतंस्मरति एवंक्षत्रियादयः तस्मात्तेषांलौकिकमेवगोत्रंआदिपुरुषः संज्ञाकारीख्याततमइति । अतस्तेनगोत्रेणश्राद्धादौव्यपदिश्यन्ते । आदिमत्त्वापिनामधेयेनैव नतुतेषांक्षत्रियाणांहविर्भुगित्यादिगोत्रतयाश्राद्धादौव्यपदेशमर्हन्ति । येप्याहुरज्ञातपित्रादिनामकास्तेषामेतैःशब्दैःश्राद्धादिबोधनेसोमपानाह्वयामिसोमपेभ्यःस्वधेतिएतदपिनसम्यक् उक्ताहिनामान्यविद्वांस्ततःपितामहप्रपितामहेतियथाचार्थवादतयानप्रकृतशेषत्वेनार्थवत्तालभ्येततएवकल्पाआश्रियेरन् नत्वेकवाक्यतयान्वयेसंभवति वाक्यभेदकल्पनेनार्थोन्याय्यः ॥ १९४ ॥

(२) **सर्वज्ञनारायणः** । मनोर्विराजस्तथा तस्यैव मनोर्ये मरीच्यादयः सुतास्तेषांऋषीणांच पुत्राः पितृगणाः पितृशब्दवाच्याः सङ्घाः ॥ १९४ ॥

(३) **कुल्लूकः** । हिरण्यगर्भापत्यस्य मनोर्ये मरीच्यादयःपुत्राःपूर्वमुक्ताःमरीचिरभ्यङ्गिरसावित्यादिना तेषामृषीणांसर्वेषांसोमपादयःपितृगणाःपुत्रामन्वादिभिःस्मृताः ॥ १९४ ॥

(४) **राघवानन्दः** । तत्रादौ विशिष्टादुत्पत्तिप्रकारमाह मनोरिति ॥ हिरण्यगर्भापत्यस्य मनोः । पितृगणाः सोमसदादयः । अहंप्रजाःसिसृक्षुस्त्वित्यत्रोक्तामरीच्यादयऋषयः ॥ १९४ ॥

(५) नन्दनः । हैरण्यगर्भस्यहिरण्यगर्भगोत्रापत्यस्य । ऋषीणांपुत्राइति प्राचुर्याभिप्रायमेतत् । तेन विराट्सुताइत्यनेन न विरोधः ॥ १९४ ॥

(६) रामचन्द्रः । हिरण्यगर्भःप्रजापतिस्तस्य पुत्रो हैरण्यगर्भोमनुस्तस्य पुत्राये मरीच्यादयऋषयस्तेषांमरीच्यादीनामृषीणांपुत्राःपितृगणाःस्मृताउक्ताः ॥ १९४ ॥

विराट्सुताः सोमसदः साध्यानां पितरः स्मृताः ॥ अग्निष्वात्ताश्च देवानां मारीचालोकविश्रुताः ॥ १९५ ॥

(१) मेधातिथिः । श्राद्धार्थवादाअमीश्लोकाः अशेषेणैकवाक्यत्वात् नहिसाध्यानांपितरः श्राद्धसंप्रदानंशिष्यन्ते। देवतात्वात्साध्यानांचदेवनानांकर्मस्वधिकारोन नियोज्यत्वाभावात् । नहिदेवतानियोक्तुंशक्यते देवतात्वहानिप्रसंगात् अधिकारेसतिप्रतिपत्तव्यंकर्तृत्वं । कर्तृत्वेचकुतः संप्रदानभावः नचान्यद्देवतारूपं । विराजःसुताः विराट्सुताः सोमसदोनामतेसाध्यानांपितरः ईदृशमेवपित्र्यंकर्मावश्यंकर्तव्यं । यत्साध्याःसर्वेदेवाः कृतकरणीयाःअपि पितॄनर्चयन्ति । अग्नौपक्वंचरुपुरोडाशादिकंअदन्त्यतः अग्निष्वात्तदेवतानामिन्द्राग्न्यादीनांपितरः मरीचेर्जातामारीचाः लोकविश्रुताः प्रसिद्धाः ॥१९५॥

(२) सर्वज्ञनारायणः । अत्र सोमसदोमनोर्विराजः पुत्राः साध्यैः श्राद्धे पूज्याः । इतरे तु वक्ष्यमाणामनुपुत्रपुत्राः ॥ १९५ ॥

(३) कुल्लूकः । विराट्सुताःसोमसदोनाम साध्यानांपितरःअग्निष्वात्तामरीचेःपुत्रालोकविख्यातादेवानांपितरः ॥१९५

(४) राघवानन्दः । तत्र के किंनामानः के कस्माज्जाताः केषांच के पितरः कैर्वा केअर्च्याइत्यपेक्षायामाह विराडितिपञ्चभिः । विराट्सुताइति जन्मसोमसदइति नामानि साध्यानांपितरइतितेषामाराध्याःएवमग्निष्वात्तानामतः मरीचेरपत्यानि जन्मतः देवानांपितरः आराध्याइति शेषः ॥ १९५ ॥

(५) नन्दनः । प्रसूतौ विशेषंश्लोकत्रयेणाह विराट्सुताइति । हैरण्यगर्भस्यमनोःपिता विराट् । साध्यानांपितरः साध्यैर्यष्टव्याः पितरः ॥ १९५ ॥

(६) रामचन्द्रः । विराट्सुताःसोमपुत्राःसोमलोकनिवासिनः । साध्यानांपूर्वकल्पाधिकारिणांदेवानांपितरःस्मृताः । मरीच्योत्पन्नःमारीच्यः । अग्निष्वात्तसंज्ञाःपितरः । लोकविश्रुताःप्रसिद्धाः ॥ १९५ ॥

दैत्यदानवयक्षाणांगन्धर्वोरगरक्षसाम् ॥ सुपर्णकिन्नराणां च स्मृतार्बर्हिषदोत्रिजाः ॥ १९६ ॥

(१) मेधातिथिः । सर्वएतेदैत्यादयः शास्त्रानधिकृताःअर्थवादार्थं संकीर्त्यन्ते तेषांचस्वरूपमितिहासप्रसिद्धं । सुपर्णापक्षिविशेषाः किंनराअश्वमुखास्तिर्यञ्चः एवंविधमेतत्पित्र्यंकर्म । यद्दैत्यदानवरक्षांसियज्ञविध्वंसकराण्यपिनातिवर्तन्ते तथा तिर्यञ्चोप्यसंज्ञास्मृतिकाः । अत्रेर्जाताबर्हिषदोनाम ॥ १९६ ॥

(२) सर्वज्ञनारायणः । अत्रिजाअत्रिपुत्राः ॥ १९६ ॥

(३) कुल्लूकः । दैत्यादीनांप्रथमाध्यायोदितभेदानामत्रिपुत्राबर्हिषदोनाम पितरः स्मृताः ॥ १९६ ॥

(४) राघवानन्दः । एवंदैत्याद्यष्टानां । बर्हिषदः मनोः पुत्राः ॥ १९६ ॥

(६) रामचन्द्रः । अत्रिजाबर्हिषदसंज्ञाःपितरो दैत्यादीनांपूज्याःस्मृताः ॥ १९६ ॥

सोमपानाम विप्राणां क्षत्रियाणां हविर्भुजः॥वैश्यानामाज्यपानाम शूद्राणां तु सुकालिनः॥१९७॥

।(१) **मेधातिथिः** । उक्तार्थः प्रागेवायंश्लोकः सोमंपिबन्तिज्योतिष्टोमादिदेवतास्त्विन्द्रादयः हविर्भुजश्चरुपुरोडाशादिदेवताआज्यपाआघारावाज्यभागप्रयाजादिदेवताः सुकालिनः । कालयंति अपवर्जयन्तिकर्मेतिसुकालिनः । कर्मापवर्गहोमदेवताअयाश्चाग्नेस्यनभिशस्तीश्चेत्यादिविहिताः ॥ १९७ ॥

(२) **सर्वज्ञनारायणः** । विप्राणांपितरइत्यन्वयः ॥ १९७ ॥

(३) **कुल्लूकः** । सोमेति । ब्राह्मणप्रभृतीनांचतुर्णांवर्णानांसोमपाप्रभृतयश्चत्वारः पितरः स्मृताः ॥ १९७ ॥

(४) **राघवानन्दः** । सोमपाः नामतः विप्राणां पितरः आराध्याः । हविर्भुजनामानःक्षत्रियाणांपितरः आराध्या-इतिशेषः । तथा वैश्यानां पितरआज्यपाः नामतः । वसिष्ठपुत्राःशूद्राणांपितरइति संक्षेपः ॥ १९७ ॥

(६) **रामचन्द्रः** । सोमपानाम पितरःलोकेविप्राणांपूज्याःस्मृताः । हविर्भुजसंज्ञाःपितरःक्षत्रियाणांपूज्याःस्मृताः । आज्यपानाम पितरोवैश्यानांसुकालिनसंज्ञाःशूद्राणांपूज्याःस्मृताः ॥ १९७ ॥

सोमपास्तु कवेः पुत्राहविष्मन्तोङ्गिरःसुताः॥ पुलस्त्यस्याज्यपाः पुत्रावसिष्ठस्य सुकालिनः॥१९८॥

(१) **मेधातिथिः** । हविर्भुजएवहविष्मन्तः । कविर्भृगुःकाव्यंवदन्त्युशनसमितिस्मरन्ति भार्गवंचयथैतादेवताऋषीणां पुत्राएवंत्वदीयाश्चापिपितरोदेवतारूपाएवेतिमावमंस्थाः ॥ १९८ ॥

(२) **सर्वज्ञनारायणः** । हविष्मन्तोहविर्भुजः । कवेर्भृगोः ॥ १९८ ॥

(३) **कुल्लूकः** । कवेर्भृगोः सोमपाः पुत्राहविर्भुजएव हविष्मन्तः । अङ्गिरसःपुत्राः आज्यपाःपुलस्त्यसुताः । सुकालिनोवसिष्ठसुताः ॥ १९८ ॥

(४) **राघवानन्दः** । सोमपादिचतुर्णांजनकानाह सोमेति । हविष्मन्तोहविर्भुजः ॥ १९८ ॥

(५) **नन्दनः** । सोमपादयः केषांपुत्राइत्यपेक्षायामाह सोमपास्त्विति । कवेर्भृगोः । हविष्मन्तइतिहविर्भुजांनामान्तरम् ॥ १९८ ॥

(६) **रामचन्द्रः** । सोमपानाम कवेर्भृगोःपुत्राः । हविष्मन्तसंज्ञाःपितरअङ्गिरःसुताः । पुलहस्य पुत्राआज्यपानामसंज्ञाःपितरः । वसिष्ठस्य पुत्राःकालिनसंज्ञाःपितरोभवन्ति ॥ १९८ ॥

अग्निदग्धानग्निदग्धान्काव्यान्बर्हिषदस्तथा ॥ अग्निष्वात्तांश्च सौम्यांश्च विप्राणामेव निर्दिशेत् ॥ १९९ ॥

[अग्निष्वात्ताहुतैस्तृप्ताः सोमपास्तुतिभिस्तथा ॥ पिण्डैर्बर्हिषदः प्रीताः प्रेतसुद्विजभोजने॥१॥*]

(१) **मेधातिथिः** । अनग्निदग्धःसोमःनह्यग्निनातस्यपाकोस्ति तेनयादेवताइज्यन्तेताअप्यनग्निदग्धाः सम्बन्धास्तद्गुणत-उच्यन्ते । एवमग्निदग्धानिचरुपुरोडाशादीनिहवींषि अग्निनापच्यन्ते । तैर्यादेवताइज्यन्तेताअग्निदग्धाः पूर्ववदेवमभिसंबन्धः क्रियते येअग्निदग्धाउच्यन्ते तानग्निदग्धान्निर्दिशेत् । येअनग्निदग्धास्तान्सोमपानेवनिर्दिशेत् । एवंकाव्यान्बर्हिषदइतिकवेः-

(१९८) पुलस्त्यस्य=पुलहस्य (मेधा०)

(१९९) बर्हिषदस्तथा=बर्हिषदोत्रिजान् (मेधा०)

पुत्राःकाव्यास्तेचसोमपास्तुकवेःपुत्राइत्युक्ताबर्हिषदोऽत्रिजा उक्ताः। मायमेवकारोयथादेशंद्रष्टव्यः तथाह्ययमर्थःस्यात् ।विप्राणामेवेतिपितरोनक्षत्रियादीनां। तच्चप्रागुक्तेनविरुध्यते नचैतेवर्णभेदेनपितृत्वेनोक्ताः। येनतस्मादाच्छिद्यब्राह्मणादिसंबन्धिनःपितृत्वेनोक्ता येनतेषामुच्यन्ते तस्मादपकृष्यएवकारोग्निष्वात्तास्तेचसोम्यानेवनिर्दिशेदित्येवंसंबन्धनीयः । विप्रग्रहणमनुवादत्वात्क्षत्रियादिप्रदर्शनार्थं । एवंनामानश्चैतेपितरोवेदेश्रूयन्ते । अग्निष्वात्ताःपितरोयेग्निदग्धायेअनग्निदग्धाइतितान्मन्त्रानुदात्तत्यविवृणोति । अथचैवंसंबन्धःक्रियते यएतैःशब्दैःपितरउच्यन्ते तान्विप्राणामेवनिर्दिशेत् स्वपितॄन् । नचशब्दभेदेनार्थभेदशङ्काकर्तव्याविप्रग्रहणमधिकार्युपलक्षणार्थंप्राधान्यात् प्रधानेनह्युपलक्षणंभवति राजागच्छतीति ॥ १९९ ॥

(२) **सर्वज्ञनारायणः**। अग्निदग्धादीनपि विप्राणामेव पितॄन्निर्दिशेत् । अत्र काव्यपदंदृष्टान्तोपदर्शकम् । यथा कवेर्भृगोःपुत्राविप्राणांतथाबर्हिषदोगन्धर्वादिपितरस्तथा सोम्याः सोमसदः साध्यपितरोअग्निष्वात्ताश्च देवपितरोन्येचाग्निदग्धाऽनग्निदग्धवत् काव्यनामानस्त्रयःपितरोनिर्दिष्टसंबन्धिनोविप्राणामेवार्चनीयाः। न तु क्षत्रियादीनामिति । सदृशानांवर्णान्तराणामेव कारणव्यवच्छेदोन तु गन्धर्वादीनांयेषांचात्राग्निदग्धादीनां त्रयाणांजनकानोक्तास्ते मरीच्यत्रिभृग्वङ्गिरः पुलस्त्यवसिष्ठव्यतिरिक्तानांपुलहादीनांमनुसुतानां पुत्राइति ग्राह्यम् । अत्र सोमपाइति सोमपानकारिणइत्युच्यन्ते ते च ऊमावैपितरःप्रातः सवनऊर्वामाध्यन्दिने काव्यास्तृतीयसवनइति श्रुतावुक्ताः सोमसदः। सोम्याइति स्तुतेभ्योन्येपि सोमयागे शस्त्रमध्यशंसनीयपित्र्यमिवोभयभागिनः। एवंबर्हिषदोदर्शादीष्टिषुतत्तद्भागवन्तः । एवमन्येष्वपि निरुक्तिः पुराणादिदर्शनेनोन्नेया ॥ १९९ ॥

(३) **कुल्लूकः** । अग्निदग्धानग्निदग्धकाव्यबर्हिषदग्निष्वात्तसौम्याख्यान्परान्पितॄन्विप्राणामेव जानीयात् ॥ १९९ ॥

(४) **राघवानन्दः**। तत्रैव विशेषान्तरमाह अग्निदग्धेति । कविपुत्रानग्निदग्धादीन अपरान्बर्हिषदः। अग्निष्वात्ताः। सोमपाः पितरोविप्राणामेवजानीयात् सोमपानामेव नामभेदाअग्निदग्धेत्यादीनीतिमेधातिथिः ॥ १९९ ॥

(५) **नन्दनः** नकेवलंसोमपाएव ब्राह्मणैर्यष्टव्याः । किंतु सर्वेऽपिते । सोमसदादयइत्याह अग्नीति । अग्निदग्धाइत्यादीनि समानांपितृगणानांनामान्तराणि । तत्र काव्याइति सोमपानामुपादानंतेषांकविपुत्रत्वात् । बर्हिषदोऽग्निष्वात्ताश्च स्वनाम्नैवोपात्ताः ॥ १९९ ॥

(६) **रामचन्द्रः** । अनग्निदग्धान्काव्यान्काव्यनाम्नःपितॄन्बर्हिषदसंज्ञान्अग्निष्वात्तसंज्ञान्सौम्यान्सोमसंज्ञान्एतान्पितृगणान्विप्राणामेव निर्दिशेत् ॥ १९९ ॥

यएते तु गणामुख्याः पितॄणां परिकीर्तिताः ॥ तेषामपीह विज्ञेयं पुत्रपौत्रमनन्तकम् ॥२००॥

(१) **मेधातिथिः**। एतेतुमुख्यागणाःसोमपादयःपितॄणां तेषामपिपुत्रपौत्राःअनन्ताविद्यन्ते तेपिपितरएव । अस्मान्नियमवचनादेतद्गम्यते । नसोमपादयउद्देश्या यदिहितेषामपिपुत्रपौत्राःपितरस्तेह्युद्देश्यास्युर्नचतेषांकिंचिन्नामधेयमाम्नातं तस्मादर्थवादतैवावसीयते । गवाश्वप्रभृतित्वात्पुत्रपौत्रमित्येकवद्भावः। अनन्तकमपरिमितं स्वार्थेकः ॥ २०० ॥

(२) **सर्वज्ञनारायणः**। तेषांपुत्रपौत्रमनन्तकंतस्य च स्वस्वपित्रर्थकाएवार्चकाः ॥ २०० ॥

(३) **कुल्लूकः**। यएते प्रधानभूताःपितृगणाउक्तास्तेषामपीह जगति पितरएव पुत्रपौत्राअनन्ताविज्ञेयाः । पुत्रपौत्रमिति गवाश्वप्रभृतीनिचेत्येकवद्भावः। एतच्छ्लोकसूचिताएव वरोवरेण्यइत्यादयोऽन्येऽपि पितृगणामार्कण्डेयादिपुराणादिषु श्रूयन्ते ॥ २०० ॥

(४) **राघवानन्दः**। पूर्वदेवताइत्युक्तंतत्तुसाधुवादमात्रमित्याह यइतिद्वाभ्यां ॥ २०० ॥

(५) नन्दनः । इदानींतेषांपितृत्वमुपपादयति यएतेत्विति । इहजगति अनन्तकमपर्यन्तं सर्वमित्यर्थः । यत्प्राणिजातंतत्तेषांपितृगणानांपुत्रपौत्रिकंविज्ञेयम् । तेनोपपन्नंतेषांपितृत्वमित्यभिप्रायः ॥ २०० ॥

ऋषिभ्यः पितरोजाताः पितृभ्योदेवमानवाः ॥ देवेभ्यस्तु जगत्सर्वं चरं स्थाण्वनुपूर्वशः ॥२०१॥

(१) मेधातिथिः । नपित्र्यंकर्मदैवात्कर्मणोन्यूनंद्रष्टव्यं अपितुतदेवप्रधानतमं । यतोजन्मज्येष्ठाः पितरोदेवानां । तथाहि ऋषिभ्यःपितरउत्पन्नाः पितृभ्योदेवाइत्येषःसृष्टिकमः । देवेभ्योन्यत्सर्वं जगत्चरं जंगमंस्थाणुस्थावरं अनुपूर्वशः प्रथमेध्यायेउक्तःक्रमः । अतिक्रान्तोर्थवादसंपातः ॥ २०१ ॥

(२) सर्वज्ञनारायणः । चरं जङ्गमम् । स्थाणु स्थावरम् ॥ २०१ ॥

(३) कुल्लूकः । ऋषिभ्योमरीच्यादिभ्यउक्तक्रमेण पितरोजाताः पितृभ्योदेवमानवाजाताः देवेभ्यश्च जङ्गमस्थावरंजगत्क्रमेण जातं तस्मात्सोमपादिप्रभवत्वात्स्वपितृपितामहप्रपितामहानामेषांश्राद्धे पूजनीयाः । सोमपादयोऽपि पूजिताः सन्तःश्राद्धफलदानाय कल्पन्तइति प्रकृतश्च पित्रादिश्राद्धस्तुत्यर्थोयंसोमपादिपितृगणोपन्यासः । अथवाऽऽवाहनकाले निजपित्रादयोब्राह्मणादिभिः सोमपादिरूपेण ध्येयाएवंव्यवस्थाज्ञानमनुष्ठानपरता च स्यात् ॥ २०१ ॥

(४) राघवानन्दः । ऋषिभ्योहिरण्यगर्भमरीच्यत्रिकव्याङ्गिरः पुलस्त्यवसिष्ठेभ्यः । पितरः सोमसत्प्रभृतयः । स्थाणुस्थावरम् ॥ २०१ ॥

(५) नन्दनः । एतदेव विशदयतिऋषिभ्यइति । ऋषिभ्योमरीच्यादिभ्यः । ननु प्रेताःपितृपितामहादयः श्राद्धैस्तर्प्यन्तइतिलोकशास्त्रप्रसिद्धम् । अत्र सोमपाइत्युक्तम् तस्माद्विरुद्धमिदम् । न विरुद्धमिदम् यथा ब्राह्मणतृप्त्या पितृतृप्तिरेवंपितृतृप्त्याप्रेतपितृपितामहादितृप्त्युपपत्तेरिति ॥ २०१ ॥

राजतैर्भाजनैरेषामथो वा राजतान्वितैः ॥ वार्यपि श्रद्धया दत्तमक्षयायोपकल्पते ॥२०२॥

(१) मेधातिथिः । राजतानिचभाजनानि रूप्यमयानिपात्राणि तदभावेरजतान्वितैःदारुमयानिताम्रमयानि सौवर्णेनवारौप्येणैकदेशयुक्तानिकर्तव्यानि । एतच्चपात्रंदेयं घृतमध्वादिव्यञ्जनसोहित्याक्षिप्तंपात्रं तत्रेयंरूप्यमयताविधीयते पात्रेयच्चपिण्डनिर्वपणादितद्धस्ताभ्यामेवकर्तव्यं । यदप्युदकनिनयनंपिण्डेष्ववनेजनादिच तदपिहस्ताभ्यामेवाऽपसव्येन हस्तेनेतिवचनात् । तत्रूदकतर्पणमान्वहिकं तदपिहस्तेनापसव्येनसव्येनवाकर्तव्यं । इदंहिश्राद्धप्रकरणेपठितं तंनाप्राकरणिकस्यकर्मणोंगमप्यनारभ्याधीतम् । तत्रैववचनमस्ति भवतुवादस्यादर्ष्टयेवृष्टयेब्राह्मणानिति । तथाकश्चिन्मधुररसप्रियोऽपरोक्षाररसप्रियस्तत्रभक्ष्यंभोज्यंचविविधंपानानिसुरभीणिचेति बहुषुपानकेषुसत्सुयथायथानुरोधेन । वार्यपि । अपिशब्दः पात्रप्रशंसांसूचयति । तिष्ठतुवातत्संस्कृतभोजनदानं वारिमात्रमपियदिरूप्यपात्रेणदीयते तद्रूप्यगुणसंबन्धादक्षयंभवति अक्षयायोपलक्ष्यते । अक्षयतृप्तिहेतुर्भवतीत्यर्थः । श्रद्धयेति सर्वदानेषुविहितत्वादनुवादः ॥ २०२ ॥

(२) सर्वज्ञनारायणः । रजतान्वितैः रजतलेपरञ्जितैः । अक्षय्यमक्षीणता ॥ २०२ ॥

(३) कुल्लूकः । एषांपितृणांरूप्यमयपात्रैरूप्ययुक्तैर्वा ताम्रादिपात्रैर्जलमपि श्रद्धया दत्तमक्षयसुखहेतुःसंपद्यते । किंपुनःप्रशस्तपायसादीति ॥ २०२ ॥

---

(२०१) पितृभ्योदेवमानवाः=पितृभ्योदेवदानवाः (क, ख, ग, घ, च, ज, झ, अ, ट ठ, ड, ढ, त, थ, मेधा०)

(४) **राघवानन्दः** । उपचारैरित्युक्तंतत्रार्थवादमाह राजतैरिति । रजतान्वितैः रजतयुक्तैः पात्रान्तरैः ॥ २०२ ॥

(५) **नन्दनः** । राजतान्वितैः राजतमिश्रैः ॥ २०२ ॥

(६) **रामचन्द्रः** । पितॄणांपात्राण्याह राजतैरिति । एषांपितॄणांराजतैरजतैर्भाजनैः पात्रैः रजतान्वितैर्वा । क्रियाः कार्याःकर्तव्याः । श्राद्धसमयेदत्तं वारि अक्षय्यायानन्त्यायोपकल्पते उपतिष्ठतइत्यर्थः ॥ २०२ ॥

देवकार्याद्द्विजातीनां पितृकार्यं विशिष्यते ॥ दैवंहि पितृकार्यस्य पूर्वमाप्यायनंस्मृतम् ॥२०३॥

(१) **मेधातिथिः** । देवानुद्दिश्ययत्क्रियतेतद्दैवंकार्यंततःपितृकार्यंविशिष्यते विशेषेणकर्तव्यमुपदिश्यते । अनेनपित्र्यस्यप्राधान्यमाह । दैवंतत्राङ्गंकर्मेत्युक्तंभवति । अङ्गकर्मतामेवस्पष्टयति । दैवंहियद्ब्राह्मणभोजनं । तत्पितृकार्यस्याप्यायनं वृद्धिकरं नस्वतःप्रधानं पित्र्यस्यैवपोषकम् ॥ २०३ ॥

(२) **सर्वज्ञनारायणः** । देवकार्याद्वैश्वदेविककर्मणः । द्विजातीनां विशिष्यते तैर्यज्ञादिभिर्देवताप्यायनसंभवात् । शूद्राणांतु श्राद्धे दैवमपि तद्वदभ्यर्हितं । प्रकारान्तरेण तदाप्यायनस्य तेष्वसंभवात् । पितृकार्यस्याप्यायनं तस्य संवर्धनकारितया पूर्वमङ्गत्वेन स्मृतमतोदैवात्पित्र्यभागएव शौचविप्रगुणाद्यनुसंधानाधिक्यंविधेयमित्यर्थः ॥ २०३ ॥

(३) **कुल्लूकः** । देवानुद्दिश्य यत्क्रियते तद्दैवकार्यम् । ततःपितृकार्यंद्विजातीनांविशेषेण कर्तव्यमुपदिश्यते । अनेन पितृश्राद्धस्य प्राधान्यंदैवंतत्राङ्गमित्याह । एतदेव स्पष्टयति । यतोदैवंकर्म पितृकृत्यस्य पूर्वंसदाप्यायनंपरिपूरकंस्मृतम् ॥ २०३ ॥

(४) **राघवानन्दः** । तत्रपितृकार्यस्य प्रासङ्गिकस्यअङ्गित्वमनुवदन्दैवस्य तत्प्रति पूर्वोत्तराङ्गत्वंनियमयन्नाह देवकार्यादिति । दैवं देवसंबन्धि । आप्यायनं पर्युक्षणादि ॥ २०३ ॥

(५) **नन्दनः** । अथ पित्र्यस्याङ्गत्वेन दैवंविधित्सन्दैवात्पित्र्यस्य वैशिष्ट्यमाह देवेति । आप्यायनंप्राबल्यकरणम् । हि हेतौ ॥ २०३ ॥

(६) **रामचन्द्रः** । वीरसिंहप्रकाशे अर्घपात्राण्याह बाष्कलः । सौवर्णरौप्यताम्राणांतदभावेथ तर्पणं । अष्टाङ्गुलं भवेत्पात्रंपितॄणांरजतंशुभं । दशाङ्गुलंतु देवानांसौवर्णंताम्रमेव च ॥ २०३ ॥

तेषामारक्षभूतन्तु पूर्वं दैवं नियोजयेत् ॥ रक्षांसि हि विलुम्पन्ति श्राद्धमारक्षवर्जितम् ॥ २०४ ॥

(१) **मेधातिथिः** । रक्षैवआरक्षंतत्प्रायंआरक्षभूतं आरक्षार्थमित्युक्तंभवति । उपमायांवाभूतशब्दः यदातुरक्षार्थंअतःपूर्वंदैवंब्राह्मणंनियोजयेत् निमन्त्रयेतआसनेचोपवेशयेत् । अपरोर्थवादः रक्षांसिअदृश्यानिकानिचित्सत्वानि इतिहासे । क्रियाविप्रलुम्पन्ति आच्छिन्दन्ति पितृभ्यःश्राद्धं । केपुनर्देवाउद्देश्यागृह्येतावद्विश्वान्देवानहवामहइतिमन्त्रस्यविनियोगाद्विश्वेदेवाःप्रतीयन्ते । पुराणेत्युक्तं विश्वेदेवाइति श्रुतिरिति ॥ २०४ ॥

(२) **सर्वज्ञनारायणः** । तेषांपितॄणामारक्षः । समन्ततोरक्षाहेतुः ॥ २०४ ॥

(३) **कुल्लूकः** । आरक्षोरक्षातेषांपितॄणांरक्षाभूतंदैवंविश्वेदेवब्राह्मणंपूर्वंनिमन्त्रयेत् यस्माद्रक्षावर्जितंश्राद्धंराक्षसाआच्छिन्दन्ति ॥ २०४ ॥

---

(२०३) श्रुतम्=स्मृतम् (मेधा०) ।

(२०४) रक्षांसिहिविलुम्पन्ति= रक्षांसिविप्रलुम्पन्ति (क, ख, ग, घ, च)

(४) राघवानन्दः । एतत्पूर्वकरणे दृष्टफलमाह । तेषामिति आरक्षंदेवकृतं तद्वर्जितंश्राद्धंरक्षांसिलुम्पन्ति । भ्य-स्तत्रासत्त्वात्स्वरक्षणेऽप्यसमर्थत्वात् ॥ २०४ ॥

(५) नन्दनः । यतएवंदैवंपूर्वंकुर्यादित्याह तेषामिति । तेषांपितॄणाम् । हिहेतौ । आरक्षभूतं रक्षाकरम् ॥ २०४ ॥

(६) रामचन्द्रः । तेषांपितॄणां दैवपूर्वमारक्षभूतंसर्वत्र रक्षायुक्तंश्राद्धंयोजयेत् । रक्षैव रक्षस्तमाक्षंश्राद्धंनियोजयेत् आरक्षवर्जितंदेववर्जितं श्राद्धं रक्षांसि विप्रलुम्पन्ति अपहताअसुरारक्षांसीति मन्त्रेण तिलयवान्गृहीत्वा रक्षांकुर्यात्॥२०४॥

दैवाद्यन्तंतदीहेत पित्राद्यन्तंन तद्भवेत् ॥ पित्राद्यन्तंत्वीहमानः क्षिप्रं नश्यति सान्वयः ॥ २०५॥

(१) मेधातिथिः । आदिश्च अन्तश्च आद्यन्तौ देवौआद्यन्तावस्येति दैवाद्यन्तम् दैवेनकर्मणाआदिरुपक्रमःश्राद्ध-स्यकर्तव्यः । अतश्चनिमन्त्रणंदेवानांपूर्वंकर्तव्यं अंतःसमाप्तिः । विसर्जितेषुपित्र्येषुब्राह्मणेषुपश्चाद्देवानांविसर्जनंकर्तव्यं । गन्धादिदानेपिदैवोपक्रमतांमन्यन्ते । नतुतेषांपदार्थानांदैवेनोपक्रमसमाप्तीसंभवतःआवृत्तिप्रसङ्गात् प्रयोगधर्मश्चायंदैवाद्य-न्तता । दैवपूर्वंकर्तव्यं यतएषपदार्थधर्मः पदार्थानांतुगन्धमाल्यादीनांदैवोपक्रमतामावृत्तिकेनैवक्रमेणसिध्यति । निमन्त्रणं-तावद्दैवपूर्वंकर्तव्यं । यतएवप्रथमंपदार्थआरब्धस्ततएवान्येषामारंभोयुक्तः पदार्थःपदार्थान्तरारम्भंनियच्छति । यतस्तदुक्तं प्रकृत्याकृतकालानांगुणानांतदुपक्रमादिति पदार्थधर्मः । तच्छ्राद्धकर्माहेतत्कुर्यात् परिशिष्टोर्थवादः । पित्राद्यतंनतद्भवेत् । दैवाद्यन्तत्वस्यविहितत्वात् नपित्राद्यन्तप्रतिषेधोऽर्थवादतयालौकिकवाक्यवन्नेयः । लोकेहिकिंचिद्विधायतद्विपरीतमप्राप्त-मपि निषेधति । क्रियाहिद्रव्यंविनयति नाद्रव्यमिति । क्षिप्रंनश्यतिसान्वयः संतानाफलप्रदर्शनरूपोयंनिन्दार्थवादः । अतश्च-सर्वपरिवेषणादिदैवपूर्वकं यस्त्वंन्तराभक्ष्याद्युपनयनं पिपासतांचपानादिदानं तद्यस्यैवेच्छाप्रथममुपजातातस्माएवोपनेतव्यंअ-नर्थिनस्तदनुरोधेनोपनीयमानेप्रधानविधिबाधःस्याद्धर्षयेत्ब्राह्मणानिति तथाकश्चिन्मधुररसप्रियोपरोम्लरससात्म्यस्तत्रभ-क्ष्यंभोज्यंचविविधंपानानिसुरभीणिचेति बहुषुपानकेषुसत्सुयद्यन्यानुरोधेनअन्यत्ररससात्म्यमापादयेत्ततोव्याधिरस्यजनि-तःस्यात् ॥ तस्मादुपक्रमःसमानोदेवादिः ॥ २०५ ॥

(२) सर्वज्ञनारायणः । देवतानामादौ निमन्त्रणं तथावत्सर्वपदार्थेषु दैवपूर्वेषु दैवादिता । दैवान्तता तु पितॄन्विसृ-ज्य देवानांविसर्जनात् । ईहमानश्चेष्टमानः । नश्यति रक्षोभिःश्राद्धविघातेन पितृशापात् ॥ २०५॥

(३) कुल्लूकः । यतएवमतस्तच्छ्राद्धंदैवाद्यन्तंदैवे कर्मणिआद्यन्तावारम्भावसाने यस्य तत्तथा एतेनेदमुक्तं । निम-न्त्रणादिसर्वंदैवपूर्वंविसर्जनं तुदेवानांशेषे । अतएव देवलः । यत्तत्र क्रियते कर्म पैतृके ब्राह्मणान्प्रति । तत्सर्वंतत्र कर्त-व्यंवैश्वदेविकपूर्वकम् । न तु तच्छ्राद्धंपित्रुपक्रमावसानम् पित्राद्यन्तंतदनुतिष्ठन्ससन्तानःशीघ्रंविनश्यति ॥ २०५ ॥

(४) राघवानन्दः । तत्पित्र्यंईहेत कुर्यात् तु तदैवं पित्र्याद्यन्तम् । क्षिप्रं प्रणश्यतीति भूतार्थवादः ॥ २०५ ॥

(५) नन्दनः । न केवलंश्राद्धस्यदैवमादौकार्यंकिन्त्वन्तेऽपीत्याह । दैवेति । ततःश्राद्धम् । ईहेत कुर्वीत ॥ २०५॥

(६) रामचन्द्रः । तच्छ्राद्धंदैवाद्यन्तमीहेत कुर्यात् । तद्यथादैवादिपूर्वंदेवानां आव्हानंविश्वेदेवाआगच्छन्त्विति वा-चयेत् ।अन्ते श्राद्धान्ते उपतिष्ठन्तु पितरः सव्येन विश्वेदेवैःसहेति एवंदैवाद्यन्तंतच्छ्राद्धंपित्राद्यन्तं न भवेत्नकुर्यात्॥२०५॥

शुचिं देशं विविक्तं च गोमयेनोपलेपयेत् ॥ दक्षिणाप्रवणंचैव प्रयत्नेनोपपादयेत् ॥ २०६ ॥

(१) मेधातिथिः । शुचिर्मलास्थिकपालकाद्यनुपहतः । विविक्तोविस्तीर्णोबहुभिर्जनैरनाकीर्णः दक्षिणाप्रवणो दक्षिणस्यांदिश्यवनतस्तादृशंदेशंयत्नेनसंपादयेत् । स्वभावतश्चेत्तादृशोनलभ्यते तथाकर्तव्यं यथाल्पव्यापारेणसंपाद्यते । तंचगोशकृतोपलेपयेत् । मृदादयोनिवर्तन्ते । गोमयेनोपलेपनियमात् ॥ २०६ ॥

(२) सर्वज्ञनारायणः । विविक्तमेकान्तम् । उपलेपयेत् मृद्गोमयादिना दक्षिणाप्रवणमुपपादयेत् संपादयेत् ॥२०६॥

(३) कुल्लूकः । अस्थ्यङ्गाराद्यनुपहतंदेशंनिर्जनंच गोमयेनोपलेपयेत् । दक्षिणादिगवनतंच प्रयत्नतःसंपादयेत् ॥ २०६ ॥

(४) राघवानन्दः । देशनियमंसार्थवादमाह शुचीति द्वाभ्यां । दक्षिणाप्रवणंदक्षिणनिम्नताम् ॥ २०६ ॥

(५) नन्दनः । अथ श्राद्धस्य देशमाह शुचिमिति । विविक्तं विजनम् ॥ २०६ ॥

(६) रामचन्द्रः । भूमिशुद्धिमाह शुचिमिति तत्रगोमयादिना लिप्ते दक्षिणाप्रवणे दक्षिणतोऽवनते निम्नप्रदेशे आव्हानंकार्यम् ॥ २०६ ॥

अवकाशेषु चोक्षेषु नदीतीरेषु चैव हि ॥ विविक्तेषु च तुष्यन्ति दत्तेन पितरः सदा ॥२०७॥

(१) मेधातिथिः । अवकाशोदेशःचोक्षाः स्वभावशुचयोमनःप्रसादजनकाअरण्यादयः । जलतीराणि सरित्समीपपुलिनादीनि विविक्तेषुविजनेषु तीर्थेषुच । विध्यन्तरमिदमतश्चगोमयोपलेपनमितिनियमोनास्ति । उपपादयेदितिवचनात् । यत्रसंपाद्यंशुचित्वंतत्रासौनियमःस्वभावतःशुचिषुदृष्टमद्भिर्निर्णिक्तमित्येतावतैवयोग्यता । एतेषुदेशेषुदत्तेनकृतेनश्राद्धेनातितुष्टाःपितरोभवन्तीति ॥ २०७ ॥

(२) सर्वज्ञनारायणः । अवकाशेषु स्तम्भाद्यसंकीर्णदेशेषु चोक्षेषु शुद्धेषु ॥ २०७ ॥

(३) कुल्लूकः । चोक्षाःस्वभावशुचयोऽरण्यादिप्रदेशास्तेषु नद्यादितीरेषु तथानिर्जनप्रदेशेषु दत्तेन श्राद्धादिना सर्वदापितरस्तुष्यन्ति ॥ २०७ ॥

(४) राघवानन्दः । अवकाशेषु स्वभावेन जनता वर्जितेषु चोक्षेषु मनोहरेषु तथान्यत्राहचोक्षःशुचौ तथा दक्षइति ॥ २०७ ॥

(५) नन्दनः । चोक्षेषु रमणीयेषु ॥ २०७ ॥

(६) रामचन्द्रः । अवकाशेषु असंकीर्णस्थानेषु उक्षेषुउच्चस्थानेषु विविक्तेषु विजनेषु अरण्यादिषु जलतीरेषुएतादृशेषु ते पिण्डेन पितरः सदा तुष्यन्ति सन्तुष्टाभवन्तीत्यर्थः ॥ २०७ ॥

आसनेषूपक्लृप्तेषु बर्हिष्मत्सु पृथक् पृथक् ॥ उपस्पृष्टोदकान्सम्यग्विप्रांस्तानुपवेशयेत् ॥२०८ ॥

(१) मेधातिथिः । उपक्लृप्तेषुकल्पितेषुविन्यस्तेषुपृथक्पृथक् । विभागेनैवमासनंदीर्घधौतफलकादिसर्वेभ्योदद्यात् परस्परंयथानस्पृशन्ति । तथोपवेशनीयाइति । पृथग्ग्रहणं । बर्हिष्मत्सु दर्भविष्टरास्तीर्णेषु उपस्पृष्टोदकान्स्नातान्कृताचमनविधींश्च तान्पूर्वनिमन्त्रितानुपवेशयेत् ॥ २०८ ॥

(२) सर्वज्ञनारायणः । बर्हिष्मत्सु कुशवत्सु उपस्पृष्टोदकान् स्नातान् ॥ २०८ ॥

(३) कुल्लूकः । तत्र च देशेआसनेषु पृथक्पृथक्विन्यस्तेषु सकुशेषु प्रागामन्त्रितब्राह्मणान्सम्यक्कृतस्नानाचमनानुपवेशयेत् अत्र देवब्राह्मणासने कुशद्वयंपित्र्यासनेषु च प्रत्येकंदक्षिणाग्रएकः कुशोदेयः । तदाह देवलः । ये चात्र विश्वेदेवानांविप्राःपूर्वनिमन्त्रिताः । प्राङ्मुखान्यासनान्येषांद्विदर्भोपहतानि च ॥ दक्षिणामुखयुक्तानि पितॄणामासनानि च । दक्षिणाग्रैकदर्भाणि प्रोक्षितानि तिलोदकैः ॥ दक्षिणामुखयुक्तानि दक्षिणाग्राणि अयंकाण्डमूलापेक्षया ॥ २०८ ॥

---

(२०७) नदी= जल (ब, य, र, ल) * काण्ड=कुश (अ)

(४) राघवानन्दः । एवं वर्णक्रमइव वेदक्रमोप्यपेक्षणीयइति ज्ञापयन् ऋग्वेदिनमधिकृत्य श्राद्धानुष्ठानमाह । आसनेष्विति त्रिंशता श्लोकैः । उपकॢप्तेषु विन्यस्तेषु बर्हिष्मत्सुकुशयुक्तेषु पृथक्पृथगितिनैकासनंकुर्यादिति । देवे कुशद्वयं पित्र्ये एकैकंदेयमिति । तथाच देवलः । ये चात्रविश्वेदेवानां विप्राः पूर्वनिमन्त्रिताः । प्राङ्मुखान्यासनान्येषांद्विदर्भोपहितानि च ॥ दक्षिणामुखयुक्तानि पितॄणामासनानिच । दक्षिणाग्रैकदर्भाणि प्रोक्षितानि तिलोदकैः ॥ इति पित्रादिषट्पात्रेषु षडेव ब्राह्मणाइत्यर्थात् । उपस्पृष्टोदकान् सम्यक्कृताचमनान् ॥ २०८ ॥

(५) नन्दनः । इदंपित्रइदंपितामहायेति पृथक्पृथक् । बर्हिष्मत्सु दर्भवत्सु । उपस्पृष्टोदकान् स्नातान् । सम्यक्सोपचारम् ॥ २०८ ॥

(६) रामचन्द्रः । उपक्लृप्तेषुरचितेषुआसनेषुबर्हिष्मत्सु सकुशेषु पृथक्पृथगुपस्पृष्टोदकान्कृताचमनान्निमन्त्रितान्विप्रानुपवेशयेत् ॥ २०८ ॥

उपवेश्य तु तान्विप्रानासनेष्वजुगुप्सितान् ॥ गन्धमाल्यैः सुरभिभिरर्चयेद्देवपूर्वकम् ॥२०९॥

(१) मेधातिथिः । उपवेशनानन्तरंगन्धमाल्यैरर्चयेत् । गन्धान्कुङ्कुमकर्पूरादीन्दद्यात् । माल्यानिकुसुमस्रजः । सुरभिग्रहणं । माल्यविशेषणं । निर्गन्धानिपुष्पाणिनदद्यात् । गन्धेष्वपियुक्तंविशेषणं सन्तिगन्धाअसुरभयस्तन्निवृत्त्यर्थं । अथवासुरभिभिर्धूपैः स्वतन्त्रंसुरभिग्रहणं । देवेभ्योब्राह्मणेभ्यः पूर्वंदत्वा ततःपितृदेभ्योदातव्यं । इदंतुदेवपूर्वग्रहणं प्राग्भोजनप्रवृत्तेःपदार्थानांतदादिनियमार्थं प्रवृत्तभोजनानांतुपानव्यञ्जनादिषुननियमइत्येवमर्थमाहुः । अन्यथाकोर्थःपुनरभिधानेस्यात् । अजुगुप्सितान् अनिन्दितान् विप्रान् अनुवादोयं तादृशानामेवविधानं । अथवासत्यपिभूतप्रत्ययनिर्देशेप्रकृत्यर्थकर्तव्यतानिषेधएवायं उपविष्टान्नजुगुप्सेत ननिन्देतेत्युक्तंभवति । प्रत्ययार्थमात्रत्यागोवरं नसर्वपदार्थत्यागइतिमन्यन्ते । अनुवादेहिकृत्स्नमेवपदमनर्थकम् ॥ २०९ ॥

(२) सर्वज्ञनारायणः । गन्धमाल्यैरिति बहुवचनंधूपदीपाच्छादनप्राप्त्यर्थं गन्धमाल्यादिभिरित्यर्थः ॥ २०९ ॥

(३) कुल्लूकः । तान्विप्रानामन्त्रितानासनेषूपवेश्य कुङ्कुमादिगन्धमाल्यधूपादिभिः स्पृहणीयगन्धैर्देवपूर्वकमर्चयेत् २०९ ॥

(४) राघवानन्दः । अजुगुप्सितान्उक्तनिन्दारहितान् ॥ २०९ ॥

(५) नन्दनः । अजुगुप्सितानिन्दितवेषान् ॥ २०९ ॥

(६) रामचन्द्रः । देवपूर्वकंविश्वेदेवानुपूर्वकं तान्विप्रानर्चयेत् ॥ २०९ ॥

तेषामुदकमानीय सपवित्रांस्तिलानपि ॥ अग्नौकुर्यादनुज्ञातो ब्राह्मणोब्राह्मणैःसह ॥ २१०॥

(१) मेधातिथिः । अनुलिप्तेषुस्रग्विषु सुरभिधूपाघ्रातेषु अर्घोदकमुपनेतव्यं । तेनहितेप्रार्थिताअनुजानीरन् । ततश्चाग्नौकरवाणिकरिष्ये । इतिचेत्येवमादीनिप्रश्नवाक्यानिलभ्यन्ते । अनुज्ञावाक्यमपि तेनैवसहपवित्रांस्तिलानपि पवित्रशब्दोदर्भेषुवर्तते तेषांब्राह्मणानामुदकमानीयदत्वा तैरनुज्ञातोऽग्नौहोमंकुर्यात् । ब्राह्मणैरनुज्ञातःकुर्यादितिसंबन्धः । सहसर्वेयुगपदनुज्ञांदद्युः । अनुज्ञापनवाक्यमपिसामर्थ्यप्राप्तं । सर्वंचैतत्साधुभिःशब्दैःकर्तव्यं । प्रदर्शितंचैतद्गृह्यकारैरग्नौकरवाणिकरिष्यइतिचानुज्ञापयेदोंकुर्वित्येवंब्रूयुः ॥ २१० ॥

(२) सर्वज्ञनारायणः । तेषांयद्रव्याविदानात्प्रागर्ध्यदत्तंतच्छेषंजलं । तिलांस्तत्रत्यान् । पवित्राणि च कुशान्द्विदलान्यानिचैकत्र स्थाने कृत्वा संस्रवान्समवनीय न्युब्जंपात्रंकृत्वेत्यर्थः । ब्राह्मणैश्च सह सहितैरनुतज्ञातः ॥ २१० ॥

(३) कुल्लूकः । तेषांब्राह्मणानामर्घोदकपवित्रतिलान्संमिश्रान्कृत्वा तैर्ब्राह्मणैः सहानुज्ञातोऽग्नौ वक्ष्यमाणंहोमंकुर्यात् । अनुज्ञासामर्थ्याच्च प्रार्थनापि पूर्वंकर्त्तव्या । सा च स्वगृह्यानुसारेण करवाणि करिष्यइत्यादिका । अनुज्ञापि ओमित्येवंरूपा कुरुष्वेति वा ॥ २१० ॥

(४) राघवानन्दः । आनीय दत्वा उदकं अर्घ्यार्थंपवित्रंस्यात्कुशद्वयं तद्युक्तांस्तिलान् । ब्राह्मणैः कुरुष्वेत्यनुज्ञातः ॥ २१० ॥

(५) नन्दनः । उदकंशुद्धोदकम् । आनीय दत्त्वा तिलोदकंचानीय । ब्राह्मणोद्विजः । सहाम्यनुज्ञातोऽग्नौ कुर्याज्जुहुयात् ॥ २१० ॥

(६) रामचन्द्रः । अग्नौकरणंद्वाभ्यामाह तेषामिति । तेषांपितृणांअर्घ्ये विमाणांसमीपे उदकं शिष्टोदकंआनीय सपवित्रान् पवित्रसहितान् तिलानादाय ब्राह्मणानपीच्छेत् ॥ २१० ॥

अग्नेः सोमयमाभ्यांच कृत्वाप्यायनमादितः ॥ हविर्दानेन विधिवत्पश्चात्संतर्पयेत्पितॄन् ॥ २११॥

(१) मेधातिथिः । यदग्नौकर्तव्यं तदुच्यते । अग्नेःचतुर्थ्यर्थेषष्ठी अग्निरेकादेवता । सोमयमाभ्यामितिद्वन्द्वस्यदेवतात्वं अग्नीषोमवत् । अनयोर्देवतयोरादितआप्यायनं हविर्दानेनकृत्वा पश्चात्सन्तर्पयेत्पितॄन् । पिण्डनिर्वपणंब्राह्मणभोजनंचकुर्यादित्यर्थः । गृह्येत्वन्यादेवताःयेषांगृह्यंनास्तितेषामिदंदेवतावचनं । आप्यायनंपोषणंहविषादेवतापुष्यन्तीत्यर्थवादः ॥ २११ ॥

(२) सर्वज्ञनारायणः । अग्नेः अग्नये कव्यवाहनाय सोमाय पितृमते यमायाङ्गिरस्वतइति तिलआहुतयः । हविर्दानेन होमरूपेण कृत्वाऽप्यायनमित्यन्वयः ॥ २११ ॥

(३) कुल्लूकः । अग्नेः सोमयमयोश्च विधिवत्पर्युक्षणादिपूर्वंहविर्दानेन प्रीणनमादौ कृत्वा पश्चादन्नादिना पितॄंस्तर्पयेत् । सोमयमयोः द्वन्द्वनिर्देशेपि पृथगेव देवतात्वं सहादिशब्दप्रयोगाभावात् । यत्र साहित्यंविवक्षितंतत्र सहादिशब्दंकरोतीत्युक्तंप्राक् ॥ २११ ॥

(४) राघवानन्दः । आदितः आदौ । सोमयमाभ्यामिति द्वन्द्वेनैवदेवतात्वं अग्नीषोमवत् । हविर्दानेन । पर्युक्षणादिना ॥ २११ ॥

(५) नन्दनः । आप्यायनंतृप्तिहोममितियावत् । हविर्दानेनान्नहोमेन ॥ २११ ॥

(६) रामचन्द्रः । अग्नये कव्यवाहनाय स्वाहा सोमाय पितृमते स्वाहा सोमयमाभ्यांएवमादितःप्रथमतःआप्यायनंकृत्वा । तत्राह । मार्कण्डेयः । आहिताग्निस्तु जुहुयाद्दक्षिणाग्नौ समाहितः । अनाहिताग्निस्त्वौपासने अग्न्यभावेआवसथ्याग्न्यभावे द्विजेऽप्सुवा ततःपश्चात् अग्नौकरणानन्तरंपितॄन्पितृपितामहप्रपितामहस्थानेषु उपविष्टान्द्विजान् हविर्दानेनहविष्यान्नदानेन विधिवत्संतर्पयेत् । भोजयेदित्यर्थः । पवित्रलक्षणमाह । अनन्तर्गर्भकंसाग्रंकौशंद्विदलमेव च । प्रादेशमात्रंविज्ञेयंपवित्रंयत्र कुत्र चित् ॥ २११ ॥ २१२ ॥

अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेत् ॥ योह्यग्निः सद्विजोविप्रैर्मन्त्रदर्शिभिरुच्यते ॥ २१२॥

(१) मेधातिथिः । स्मार्तस्यवैवाहिकस्यदायादेर्वाअग्नेरभावेविधिरयमुच्यते । लौकिकस्यतु पितृयज्ञनिषेधात्भावाभाववचिन्त्यौ नपैतृयज्ञियोहोमोलौकिकेग्नावितित्वक्ष्यति । कथंपुनस्तस्याग्नेरभावः प्रोषितस्याग्निनाविनाद्रव्यब्राह्मणदेशसंपत्तौच श्राद्धकालउक्तोनामावास्यैव । तत्रप्रोषितेनसपङ्क्तिपावनः प्राप्तोद्रव्यंवाकालशाकादितत्रायंविधिरुच्यते । ननुचप्रोषितस्यकथंश्राद्धाधिकारः यदितावद्भार्याप्रवसतीअग्निनापितत्रैवसन्निधातव्यं । यतोनोभाभ्यामग्नेर्विरहइष्यते । भार्ययायजमानेनच । एवंहिश्रूयते नाग्निरन्तरितव्यः प्रवसतामिति । अथकेवलएवगृहस्थः प्रवसेत्तदाभवेदग्न्यभावः किन्तुमध्यकत्वादेतस्यसहाधिकारस्यभार्यायामसंनिहितायां तदिच्छायाअभावात् । कथंसाधारणस्यश्राद्धेविनियोगः । साधारणेहिद्रव्येअन्यतरानिच्छायांत्यागएवनसंवर्तते । अथोच्यते तीर्थेष्वपिश्राद्धकरणमनेनन्यायेनप्राप्नोति । तत्रेमानिवचनानिविरुध्यन्ते । पुष्करेष्वक्षयंश्राद्धंतपश्चैवमहाफलं । महोदधौप्रभासेचतद्वदेवविनिर्दिशेत् ॥ इतिनैषदोषः । भार्ययासहतीर्थयात्रांगच्छतः साग्निकस्योपपत्स्यन्ते । इहतुभार्ययासहप्रवासस्तदानास्त्यग्नेरभावः । अथकेवलस्यतदाभार्येच्छायाअपरिज्ञानादनधिकारा उच्यन्ते । प्रवसन्भार्यामनुज्ञापयति धर्मायविनियोगंद्रव्यस्यकरिष्यामीति तत्प्राप्तानुज्ञोधिकरिष्यते । प्राक्चोपनयादसत्यग्निपरिग्रहेविधिरयंभविष्यति । अस्तिचानुपनीतस्यश्राद्धाधिकारः स्वधानिनयनादितिदर्शितं । स्नातस्यचप्राग्विवाहात् पितृमरणादावग्न्यभावः । ननुचपरमेष्ठिमरणेग्निपरिग्रहः काठकेपठ्यते । कृतदारस्यासौद्रष्टव्योन स्नातकमात्रस्य द्वौहिकालौ स्मार्तकस्याग्नेर्विहितौ भार्याविवाहे । तत्रयेनविवाहकालेनपरिगृहीतोग्निः पित्राविभक्तत्वात् । ज्येष्ठेनवासहवसता । भ्रातॄणामविभक्ता ग्मेकोधर्मः प्रवर्ततइति । अनेनतस्यासौद्वितीयःकालः । दायकालान्तेवापीति । एषएवदायकालोयदापिताम्रियतेतदपेक्षमेवैतत् । शुचिर्भूतःपितृभ्योदद्यात् । आहृत्योहाग्निमानीयप्रतिजागृयादिति । नचेदग्न्याधानंश्राद्धाङ्गं तदासतितदर्वाग्यस्योत्पत्तिःश्राद्धंवावर्तते । नचाप्यत्यागोस्त्येषऔपसदोग्निस्तस्मिन्पाकयज्ञइतिपठ्यते । नचपाकयज्ञेप्यभार्यस्याधिकारः । पत्न्यवेक्षितमाज्यंभवति । व्रतंचपत्न्युपेयादितिदर्शपूर्णमासयोःश्रूयते । नचयदापत्नीतदैतद्व्रतोपायनाज्यावेक्षणेपत्नीकर्तृकेभविष्यतइतिशक्यमवकल्पयितुं नित्यवदाम्नानात् । तत्रौपसदोग्निरित्येषविधिर्होतव्यःप्राप्नोति ननुचनपितृमरणमेवदायकालः । एवंहिपठ्यते । सपिण्डीकरणंकृत्वाविभजेरन् ततःसुताइतिविभागस्यायंकालो नदायस्याविभागेपिनायंनियमोयतोधर्मात्पृथक्क्रियेते पठ्यते । तस्याश्चधर्मत्वंविभक्तानांपृथक्पृथक्श्राद्धकरणेनातिथ्यादिपूजयाच । ततश्चनवश्राद्धंसहदद्युरित्यादीनिवाक्यानिसमाप्तविद्याविषयाणि । ईषद्विप्रोरागोद्रेकात्स्वदारनियमातिक्रमिषर्मितिकृतविवाहः प्रक्रान्तवेदार्थप्रवणस्तस्यसंवत्सरमात्रेणविद्यासमाप्ताविदमुच्यते सपिण्डीकरणंकृत्वाविभजेरन्निति । तदामृतभार्यस्यपुनर्दारांश्चिकीर्षतआदारप्राप्तेर्भवत्यग्नेरभावः । सर्वथापत्न्यासहयष्टव्यमित्यस्तित्ववचनेसति नाकृतविवाहस्याग्निपरिग्रहः । एवंस्थितेग्नेरभावे आहुतीर्ब्राह्मणस्यहस्तेप्रक्षिपेत् । कस्यब्राह्मणस्ययएवनिमन्त्रितास्तेषामन्यतमस्य दैवउपवेशितस्यान्यस्यवानिमन्त्रितस्यार्थवादोयोह्यग्निरिदतिमन्त्रशितः संमतश्चेदर्थविद्भिः ॥ २१२ ॥

(२) सर्वज्ञनारायणः । अग्न्यभावऔपासनाभावे पाणावग्नितीर्थे हस्तमध्यस्थउपपादयेदाहुतीःसंपादयेत् ॥२१२॥

(३) कुल्लूकः । अग्न्यभावे पुनर्ब्राह्मणहस्तएवोक्ताहुतित्रयंदद्यात् । यस्माद्यएवाग्निः सएव ब्राह्मणइति वेदविद्भिर्ब्राह्मणैरुक्तः । अग्न्यभावश्चानुपनीतस्य संभवति । उपनीतस्य समावृत्तस्य च पाणिग्रहणात्पूर्वं मृतभार्यस्य वा ॥ २१२ ॥

(४) राघवानन्दः । पाणावेवाहुतित्रयंदद्यात् । पाण्यास्योहिद्विजःस्मृतइत्युक्तिमाश्रित्याह यइति ॥ २१२ ॥

(५) नन्दनः । उपपादयेद्दद्यात् । एषवाअग्निर्वैश्वानरोयद्ब्राह्मणइतिमन्त्रदर्शिभिरुच्यते ॥ २१२ ॥

अक्रोधनान्सुप्रसादान्वदन्त्येतान् पुरातनान् ॥ लोकस्याप्यायने युक्तान् श्राद्धदेवान् द्विजोत्तमान् ॥ २१३ ॥

(१) **मेधातिथिः** । अयमर्थवादएव । ब्राह्मणानांदेवतारूपत्वंसंपादयति अग्निर्देवतातत्रहुतंतन्मुखेनदेवताअश्नन्तिब्राह्मणोप्येवंरूपतद्धस्तेपिक्षिप्तंदेवताअश्नन्त्येव किंपुनर्देवतानांरूपंयेनब्राह्मणोपिदेवतारूपउच्यते । अतआह अक्रोधनानिति वेदंब्रुवते तदर्थंदर्शयति यएवंस्वभावाब्राह्मणास्तेआज्याहुतीप्रक्षेपमन्ये । अन्येत्वाहुः पूर्वंत्राक्रोधनाइत्यादिनापितॄनुद्दिश्यनिमन्त्रितानांस्तुत्यानामक्रोधनादिधर्मोविहितः । अनेनदेवनिमन्त्रितानामितिविशेषः तथाचाहश्राद्धदेवानिति । पुरातनामुनयएवंवदन्ति द्वितीयान्तोवापठितव्यः । पुरातनानेतान्देवान्त्साध्यदेवानत्रिन्कल्पेसमुत्पन्नान्लोकस्याप्यायनेयुक्तानएवंश्राद्धंभुञ्जते तत्रनैवंमन्तव्यं । इष्टसुखार्थिनोलोभात्स्वार्थंप्रवर्तन्तेतत्रकिमित्येषांपूजाक्रियते । यतआप्याययन्तिलोकं । पृथिवीमन्तरिक्षंदिवंचातोनैषामवज्ञाकर्तव्या ॥ २१३ ॥

(२) **सर्वज्ञनारायणः** । अक्रोधनत्वादिगुणवत्वे सत्ये ते श्राद्धे देवताभवन्तीत्यर्थः । सुप्रसादानल्पायासेन प्रसाद्यान् पुरातनान् सर्वेभ्योग्रजान् । यज्ञादिना लोकाप्यायने युक्तान् । श्राद्धदेवान् श्राद्धसंबन्धिनोन्नस्य पितॄन्प्रति नेतॄन् अतोऽग्निर्यथाहव्यंवहति तथा ब्राह्मणाअपीत्यर्थः । गत्यर्थाद्दीव्यतेर्ण्यन्तात् देव शब्दव्युत्पत्तिरत्र ॥ २१३ ॥

(३) **कुल्लूकः** । क्रोधशून्यान्सुप्रसादान्प्रसन्नमुखान्प्रवाहानादितया पुरातनान् अग्नौ प्रास्ताहुतिरिति न्यायेन लोकवृद्धयउद्युक्तान्श्राद्धपात्रभूतान्मन्वादयोवदन्ति । तस्माद्देवतुल्यत्वाच्छ्राद्धब्राह्मणस्य तद्धस्तेदातव्यमिति पूर्वविध्यनुवादः ॥ २१३ ॥

(४) **राघवानन्दः** । पुरातनान् चिरन्तनान् प्रवाहानादितया पुरापूर्वंतन्यते दीयते येभ्यस्तान्वा । आप्यायने दातारोवोभिवर्धन्तामित्याद्याशिषा । श्राद्धदेवान् श्राद्धोद्देश्यपात्रभूतान् ॥ २१३ ॥

(५) **नन्दनः** । यस्मिन्हूयते सोऽग्निरेव न केवलंब्राह्मणः किंतु येभ्यो हूयते ते पितरोऽपि ब्राह्मणाइत्याह अक्रोधनाइति । श्राद्धदेवान्पितॄन् । द्विजोत्तमान् पुरातनान्वदन्ति । तेन च ब्राह्मणस्य पाणावेवोपपादनंयुक्तमित्यभिप्रायः ॥ २१३ ॥

(६) **रामचन्द्रः** । एतादृशान्पुरातनान्पितृरूपान्द्विजोत्तमान् श्राद्धदेवान्श्राद्धमापकान् । एवंवदन्ति ॥ १२३॥

अपसव्यमग्नौ कृत्वा सर्वमावृत्त्य विक्रमम् ॥ अपसव्येन हस्तेन निर्वपेदुदकं भुवि ॥ २१४ ॥

(१) **मेधातिथिः** । अग्नौयत्कर्तव्यंअग्नयेस्वधानमइतिआहुतिप्रक्षेपलक्षणंकार्यं तदपसव्यं । दक्षिणेनहस्तेनकर्तव्यं न सव्येन नोभाभ्यां उभयोर्हस्तयोर्मुक्तमितिनिषेधात् हस्तद्वयसंयोगेनकर्तव्यताशङ्कायामपसव्येनेत्युक्तमितिकेचित् । इदंत्वयुक्तं याअग्नावाहुतयोहूयन्ते । तासांचयाऽवृत्परिक्रमस्तस्यापसव्यताविधियते । दक्षिणासंस्थाआहुतीःकुर्यात् नोदक्संस्थाः । यथादेवे दर्व्यावा हविर्भिस्तुकारयितव्यं नोदीच्यां किंतर्हिदक्षिणाभिमुखंयथोदकंपित्र्येणतीर्थेनकार्यते । सर्वग्रहणादन्यदपि परिवेषणाद्यपसव्यमेवकर्तव्यमपसव्येनहस्तेनोदकंनिर्वपेत् । शनैरितिवापाठः । अत्रार्थः अन्यथाराजतैर्भाजनैरित्यनेनराजतभाजनप्रापयेसव्यहस्तविधिः । आवृत्तिरावृत् ॥ २१४ ॥

---

(२१४) सर्वमावृत्यविक्रमम्=सर्वमावृत्परिक्रमम् (क, ख, ग, घ, च, ज, झ, ञ, ठ, ड, ढ, त, थ, ब, भ, य, र, ल, मेधा०) ।

(२) **सर्वज्ञनारायणः** । अपसव्यं प्राचीनावीतेन एतच्चाग्न्यादीनांदेवताभूतत्वाद्यज्ञोपवीतमग्नौ प्राचीनावीतविधानम् । आवृत्परिक्रमंकर्मक्रमं अपसव्येन पितृतीर्थेन उदकंपिण्डदानस्थाने ॥ २१४ ॥

(३) **कुल्लूकः** । अग्नौ पर्युक्षणाद्यन्नमुक्तं अग्नौकरणहोमानुष्ठानक्रममपसव्यंदक्षिणसंस्थंकृत्वा ततोपसव्येन दक्षिणहस्तेन पिण्डाधारभूतायां भुव्युदकंक्षिपेत् ॥ २१४ ॥

(४) **राघवानन्दः** । अग्नौ पर्युक्षणाद्यन्नयुक्तमग्नौकरणहोमानुष्ठानक्रमं सर्वमावृत्परिक्रमं परिपाटीक्रमं । अपसव्यंदक्षिणसंस्थंतत्कृत्वाअपसव्येन दक्षिणहस्तेन भुवि पिण्डाधारभूतायाम् । उदकं निर्वपेत् निःक्षिपेत् ॥ २१४ ॥

(५) **नन्दनः** । पितृकार्ये हस्तमुद्रायालक्षणमाह अपसव्यमिति । हस्ताभिमुखंदक्षिणहस्ततलमपसव्यम् ॥ ११४ ॥

(६) **रामचन्द्रः** । अग्नौ अपसव्यंकृत्वा यज्ञोपवीतंप्राचीनावीतं कृत्वा सर्वमावृत्परिक्रमंदक्षिणंपरिक्रम्यअपसव्येन हस्तेन भुवि उदकंनिर्वपेत् । वामहस्तंतु सव्यंस्यादपसव्यंतु दक्षिणम् ॥ २१४ ॥

त्रींस्तु तस्माद्धविःशेषात्पिण्डान्कृत्वा समाहितः ॥ औदकेनैव विधिना निर्वपेद्दक्षिणामुखः ॥ २१५ ॥

(१) **मेधातिथिः** । यत्तद्धोमार्थंपात्रेगृहीतमन्नं तस्माद्धुतशिष्टात् त्रीन् पिण्डान् कृत्वा दक्षिणस्यांदिशिमुखंकृत्वानिर्वपेत् । दर्भेषुपितॄनुद्दिश्यप्रक्षिपेत् । संहतंद्रव्यंपिण्डशब्देनोच्यते । तेनविशदमन्नंनदातव्यं । औदकेन औदकोविधिर्यःसमनन्तरमेवोक्तः अपसव्येनेत्यादि । अत्रेदंसंदिह्यते किंयत्तदन्नंब्राह्मणभोजनार्थंसाधितं ततोप्युद्धृत्यहविःसंस्कारःकर्तव्यः । ततःपृथक्चरुसाधनायइति । किंपरिमाणंचतद्धविरिति ; नह्यत्रचतुरोमुष्टीनित्यादिपरिमाणसंभवःविचारितमेतत् विशेषाश्रवणात् । कामचारःपरिमाणं यावताअर्थसिद्धिर्भवति । औदकविध्यतिदेशाच्चहस्तेनापसव्येनपिण्डनिर्वपणंनराजतैःपात्रैः । समाहितग्रहणंवृत्तपूरणंवृत्तपूरणार्थम् ॥ २१५ ॥

(२) **सर्वज्ञनारायणः** । हविःशेषात् हुतशेषादुद्धरणपात्रस्थादन्नस्थालीस्थाच्च औदकेन विधिना यथोदकं पितृतीर्थेन नीतं तथेत्यर्थः । अत्रचउदकनिनयनंभूमौ कृत्वा तदुपरि कुशानास्तीर्य तेषु दर्भेषु पिण्डदानमिति ग्राह्यम् । तेषु दर्भेष्विति वक्ष्यमाणत्वात् ॥ २१५ ॥

(३) **कुल्लूकः** । तस्मादग्न्यादिहोमादुद्धृतादन्नादुद्धृतावशिष्टान्त्रीन्पिडान्कृत्वा औदकेनैव विधिना दक्षिणहस्तेन समाहितोऽनन्यमनादक्षिणमुखस्तेषु दर्भेष्वितिवक्ष्यमाणत्वाद्दर्भेषु दद्यात् ॥ २१५ ॥

(४) **राघवानन्दः** । तस्मादग्नौकृताद्धविःशेषात्त्रीन्पिण्डान् कृत्वा समाहितोनन्यमनाः । औदकेनैव विधिना दक्षिणहस्तेन ॥ २१५ ॥

(५) **नन्दनः** । हविःशेषादन्नात् । औदकेनैवविधिना अपसव्येन हस्तेनेत्यर्थः ॥ २१५ ॥

(६) **रामचन्द्रः** । तस्मातहविःशेषादन्नात्समाहितःसन्पितृपिण्डान्कृत्वा दक्षिणामुखःसः औदकेन विधिनाअपसव्येन जलदानविधिना अपसव्येन पितृतीर्थेननिर्वपेत्दद्यात् । हविष्याण्याह । तद्यथा । व्रीहिशालियवगोधूममुद्गमाषमुन्यन्नकालशाकंएलाशुण्ठिमरीचिहिङ्गुशर्कराकर्पूरसैन्धवंसामभरंनालिकेरएकदाबदरगव्यपयोदधिघृतपायसप्रभृतिस्मृत्यन्तरप्रसिद्धं वेदितव्यम् ॥ २१५ ॥

न्युप्य पिण्डांस्ततस्तांस्तु प्रयतोविधिपूर्वकम् ॥ तेषु दर्भेषु तं हस्तं निमृज्याल्लेपभागिनाम् ॥२१६॥

(१) **मेधातिथिः** । न्युप्यदत्वा दर्भेषुतान्पिण्डान्तंहस्तंनिमृज्याद्दर्भेषूतेषुयेष्वेवपिण्डनिर्वपणंकृतं स्मृत्यन्तरदर्शनात् दर्भमूलेषुमार्जनम् । अपरेचनहस्तसंलग्नस्यान्नस्योदकस्यवादर्भेषुसंश्लेषणं यदिनांकिंचिदपिहस्तेसंश्लिष्येत्तथापिहस्तंदर्भेषुनिमृज्यादेव । नह्येतत्प्रतिपत्तिकर्मैव । येनासतिवचनमप्रयोजनेनक्रियते । नेहश्रूयते हस्तलग्नंनिमृज्यते किंतर्हिहस्तमेव । ननुचलेपभागिनामितिश्रूयते तत्रासतिलेपेनप्राप्नोति अतःकिमुच्यतेयदिनांकिंचिदपिहस्तेसंश्लिष्येत्तथापिकर्तव्यमिति । उच्यतेसाक्षात्मूर्तमन्नंकदाचिन्नश्लिष्यति पिण्डेष्वनुवर्त्यमानेषुअन्नरसऊष्मावसंपर्कात्हस्तेसएवलेपउच्यते । लेपभागिनामितिषष्ठी । निमार्जनस्यतत्संबन्धितामाह । नचलेपभागिनःप्रत्यक्षदश्याःसन्तियेषांस्वस्वाम्यादिसंबन्धोलेपस्यक्रियेत । तस्माल्लेपभागिनामयंभागोस्त्वितिमनसाध्यायेत् । शब्देनवोद्दिशेत् अन्येतुप्रपितामहात्पूर्वेयेपितरस्तान्लेपभागिनआहुः । अस्मिन्दर्शनेप्रपितामहपित्रेप्रपितामहपितामहायेत्यादिभिःशब्दैरुद्देशःकर्तव्योऽसतितन्नामवेदने । हस्तमित्येकवचननिर्देशादेकेनापसव्येनहस्तेनपिण्डनिर्वपणंदर्शयति । प्रयतइत्याद्यनुवादीविहितत्वात् । विधिपूर्वकमितिशास्त्रान्तरदृष्टंविधिंपरिगृण्हाति । गन्धमाल्यधूपाच्छादनसिद्धोपहारैःपिंडंनिर्वपेदितिशङ्खः । यस्त्विहविधिःश्रुतःसस्वमतेनैवोक्तइतिविधिपूर्वकमित्येतदनर्थकं तस्माच्छास्त्रान्तरविध्युपसंहारार्थंविधिपूर्वकमितिवचनम् ॥ २१६ ॥

(२) **सर्वज्ञनारायणः** । लेपभागिनां लेपभागिनोवृद्धप्रपितामहादीनुद्दिश्येत्यर्थः ॥ २१६ ॥

(३) **कुल्लूकः** । विधिपूर्वकंस्वगृह्योक्तविधिना दर्भेषु तान्पिडान्दत्वा दर्भमूलेषु करावघर्षणमिति विष्णुवचनाच्च तेषु दर्भेषु मूलदेशे हस्तंनिर्लेपंकुर्यात्प्रपितामहपित्रादीनांत्रयाणांलेपभुजांतृप्तये ॥ २१६ ॥

(४) **राघवानन्दः** । न्युप्य दत्वा । विधिपूर्वकंस्वगृह्योक्तेन विधानेन । लेपभागिनांपित्रादित्रयाणां तृप्तये । दर्भमूलेषु करघर्षणमिति विष्णुवचनाद्धस्तंनिमृज्यात् ॥ २१६ ॥

(५) **नन्दनः** । तेषु दर्भेषु येषु पिण्डान्युप्ताः अनेनैव ज्ञाप्यते दर्भेषूदकनिनयनंपिण्डनिवपनंच कार्यमिति । लेपभागिनांपितामहात्परेषांत्रयाणाम् ॥ २१६ ॥

(६) **रामचन्द्रः** । न्युप्यनितरां उप्यस्थापयित्वातान् । ततःस्थापनानन्तरंहस्तंनिर्मृज्यादङ्गुल्यादिना प्रक्षालयेत् । लेपभागिनां तेषु दर्भेषु दर्भमूलेषु तत्प्रक्षालयान्नंदद्यात् । चतुर्थाल्लेपभागिनइतिवचनात् ॥ २१६ ॥

आचम्योदक्परावृत्य त्रिरायम्य शनैरसून् ॥ षड्ऋतूंश्च नमस्कुर्यात्पितॄनेव च मन्त्रवित् ॥२१७॥

(१) **मेधातिथिः** । दर्भेषुपिण्डानदत्वोदीचींदिशंपरावर्तेत । सव्येनमार्गेण स्मृत्यन्तरेहिसव्यावृदुदक्परावृत्येतिपठ्यते । उत्तराभिमुखःस्थित्वाआचामेत् । आचम्यत्रीन्प्राणायामान्कुर्यात् । असून्प्राणानायम्य सन्निरुध्यइत्येव । गायत्रींशिरसाइत्यादिविधिर्नास्ति । शनैर्यथानातिपीडाभवति तथाचाह । यथावाक्यंप्राणानासिकातदभिमुखएवसकृन्नमस्कुर्यात् । वसन्तायनमइत्यादिपितॄंश्चनमस्कुर्यात् । मन्त्रवत्नमोवःपितरइत्यादिनामन्त्रेण । पितॄणांनमस्कारःपिण्डाभिमुखेनकर्तव्यः । अभिपर्यावृत्येतिहिस्मृत्यन्तरम् ॥ २१७ ॥

(२) **सर्वज्ञनारायणः** । उदयुदङ्मुखः परावृत्त्यावृत्त्य त्रिस्तूष्णींप्राणानायम्य । नमोवः पितरोरसायेत्यादिमन्त्रेण रसादिसंज्ञान् वर्षादीनृतून्नमस्कुर्यात् पितनेवेति नमोवःपितरोरसायेत्यादौ पितॄणामप्युद्दिष्टत्वात्तेऽपि नमस्कार्या इत्युक्तम् ॥ २१७ ॥

(३) **कुल्लूकः** । अनन्तरमुपस्पृश्योदङ्मुखोभूत्वा यथाशक्ति प्राणायामत्रयंकृत्वा वसन्तायनमस्तुभ्यमित्यादिना

षड्ऋतून्नमस्कुर्यात्पितृंश्च नमोवःपितरइत्यादिमन्त्रमुक्तमद्भिःपर्यावृत्त्येति गृह्यदर्शनाद्दक्षिणामुखोनमस्कुर्यात् ॥ २१७॥

(४) राघवानन्दः । उदक्परावृत्य उदङ्मुखोभूत्वा । त्रिराचम्य असून् प्राणान् प्राणायामत्रयंकृत्वा । षड्ऋतून् मन्त्रवित् । वसन्तेति मन्त्रेणपितॄन् नमोवइति मन्त्रेण ॥ २१७ ॥

(५) नन्दनः । असूनायम्य प्राणायामंकृत्वा । मन्त्रवत् नमोवःपितरइत्यादिमन्त्रयुक्तम् । पितॄनेव पित्रात्मकानेव ॥ २१७ ॥

(६) रामचन्द्रः । ततोदर्भेषुपिण्डंदत्वा उदक्परावृत्यउदगुदीचींदिशंपरावर्तेत । तत्प्रदक्षिणावृत्योदङ्मुखःस्थित्वा आचम्यासूनप्राणान् शनैःत्रिरायम्य प्राणानायम्य त्रिःप्राणायामान्कृत्वा षड्ऋतून्नमस्कृत्य मन्त्रविद्ब्राह्मणःकर्ता पितॄन्पितृब्राह्मणान्नमस्कुर्यात् । नमोवःपितरइति ॥२१७ ॥

उदकंनिनयेच्छेषंशनैः पिण्डान्तिके पुनः ॥ अवजिघ्रेच्च तान्पिण्डान्यथान्युप्तान्समाहितः ॥२१८॥

(१) मेधातिथिः । यतएवपात्रादुदकेनप्राक्पिण्डदानाद्दर्भेषूदकनिनयनंकृतं ततएवपुनर्निनयनं पिण्डान्तिकेपिण्डसमीपेकर्तव्यमिति । शेषग्रहणंप्रतिप्रत्यर्थं तस्योदकस्य । तथाहि शेषशब्दउपपन्नोभवति । अतश्चकथंचित्तस्याभावेनास्तिपुनर्निनयनं । गृह्येतुनित्यंनिनयनमित्युक्तं । अवजिघ्रेच्चतान् पिण्डान् अवघ्राणंगन्धोपलब्धिः । गृह्येतु चरोःप्राणभक्षणंभक्षयेदित्युक्तम् । यथान्युप्तान्नियतक्रमेणनिरुप्तान् पित्रेपितामहायप्रपितामहायेति । समाहितइतिश्लोकपूरणम् ॥२१८ ॥

(२) सर्वज्ञनारायणः । शेषंपूर्वनिनीतोदकशेषंतद्वत्पिण्डान्तिकेदर्भेषु स्थानत्रये पुनर्निनयेत् । एवंब्राह्मणभोजनात्प्राक्पिण्डनिर्वपणमुक्तम् । अत्र पक्षे होमपिण्डदाने प्रधाने विप्रभोजनेनतुशेषप्रतिपत्तिः । यदात्रवक्ष्यमाणक्रमेण भोजनानन्तरंपिण्डदानं तदाहोमब्राह्मणभोजनयोः प्राधान्यं । पिण्डदानंतु शेष प्रतिपत्तिरिति ॥ २१८ ॥

(३) कुल्लूकः । पिण्डदानात्पूर्वंपिण्डाधारदेशदत्तोदकशेषमुदकपात्रस्थंप्रतिपिण्डसमीपे देशे क्रमेण पुनरुत्सृजेत् । तांश्च पिण्डान्यथान्युप्तान्येनैव क्रमेण दत्तांस्तेनैव क्रमेणावजिघ्रेत्समाहितोऽनन्यमनाः ॥ २१८ ॥

(४) राघवानन्दः । शेषं पिण्डभूमिक्षिप्तावशेषं । निनयेद्दद्यात् यथान्युप्तान् येन क्रमेण दत्तान् ॥ २१८ ॥

(५) नन्दनः । शनैरत्वरया । यथान्युप्तान्निवपनानुक्रमेणेत्यर्थः ॥ २१८ ॥

(६) रामचन्द्रः । पुनः पिण्डान्तिके पिण्डसमीपे उदकंशनैःनिर्वपेत् दद्यात् । अक्षयोदकमिति उपतिष्ठतां यथान्युप्तान्दत्तान्पिण्डान् समाहितःसन् उत्थाप्यावजिघ्रेत् ॥ २१८ ॥

पिण्डेभ्यस्त्वल्पिकांमात्रांसमादायानुपूर्वशः ॥ तानेव विप्रानासीनान्विधिवत्पूर्वमाशयेत् ॥२१९॥

(१) मेधातिथिः । अत्यन्ताल्पिकामात्राअवयवो भागस्तमेवयोब्राह्मणोयंपितरमुद्दिश्य उपवेशितः तदीयात्पिण्डात्किंचिन्मात्रंसएवाशयितव्यः । अनुपूर्वशइत्युक्तार्थं इहतच्छब्दात्प्रकृतपरामर्शकादद्रव्यभावइत्यत्र न प्रकृतवचनैरेवापूर्वमन्यत्स्मादददनीयात् ॥ २१९ ॥

(२) सर्वज्ञनारायणः । अत्राद्यपक्षे कर्तव्यान्तरमाह पिण्डेभ्यइति । पिण्डेभ्यःसकाशात् मात्रामवयवं अनुपूर्वशः पित्रादिक्रमात् । तानेव पित्र्यान्नतु वैश्वदेविकान् विधिवदाचमनादिपूर्वकं । पूर्वंभोजनात् म्रियमाणे जीवति पूर्वेषां ततः पूर्वेषांत्रयाणां एतच्च सुतस्य साग्नित्वेपिण्डपितृयज्ञस्य तदनन्तरंच पार्वणस्यावश्यकंकर्तव्यत्वात् । तस्यपितरि जीवति क्रियाप्रकारउक्तः ॥ २१९ ॥

(३) कुल्लूकः। अल्पिकेत्यन्नाल्पमात्राअवयवभागाः पिण्डेषूत्पन्नानल्पभागान्पिण्डक्रमेणैव गृहीत्वा तैनैव पित्रादिब्राह्मणान्भोजनकाले भोजनात्पूर्वं भोजयेत्। विधिवत्पिण्डानुष्ठानवत्पितरमुद्दिश्य यः पिण्डोदत्तस्तदवयवं पितृब्राह्मणं भोजयेत्। एवंपितामहप्रपितामहपिण्डयोरपि ॥ २१९ ॥

(४) राघवानन्दः। किंच पिण्डेभ्यस्तेभ्यः। अल्पिकांमात्रां किंचित्। आशयेत् भोजयेत् ॥ २१९ ॥

(५) नन्दनः। मात्रामंशान् ॥ २१९ ॥

(६) रामचन्द्रः। पिण्डेभ्यः पिण्डसकाशेभ्योल्पिकांमात्रामन्नंसमादाय यथानुपूर्वशः तानेवाभ्यर्चितानेव विप्रान् विधिवत्पूर्वमाशयेत्। भोजयेत् इत्यर्थः ॥ २१९ ॥

ध्रियमाणे तु पितरि पूर्वेषामेव निर्वपेत् ॥ विप्रवद्वापि तंश्राद्धे स्वकंपितरमाशयेत् ॥ २२० ॥

(१) मेधातिथिः। उक्तंपितृभ्यःपिण्डान्निर्वपेदिति कएतेपितरोनामअनेकार्थोहिपितृशब्दोजनयितरिवर्तते जनकः पितेतिसंबन्धिशब्दोदृश्यते। पूर्वप्रमीताःपित्रादयोन्येचसंबन्धिनःप्रेताःपितरउच्यन्ते । तथाच नमोवः पितरइत्यादिमन्त्राबहुवचनान्ताः समर्थनिगदाभवन्ति । अतएवस्त्रीश्राद्धेनोह्यन्ते । नमस्तेमातर्नमस्तेपितामहीत्यादिनक्रियते। अतएकोद्दिष्टेसंख्योहःक्रियते नप्रातिपदिकोहः। तथाचसूत्रकारः। एकवन्मन्त्रानूहेतेत्यादि। नमस्तेपितरित्येवमूहः क्रियते। योभ्रातुःपितामहादेर्वाएकोद्दिष्टंकरोति सचैवमूहति । नमस्तेपितामह नमस्तेपितृव्येत्यादि। पितृव्यादीनामनपत्यानांश्राद्धंविहितं। योयतआददीत सतस्मैदद्यादितिदेवताविशेषवचनोप्यस्तिपितृशब्दः । कूटस्थनित्यार्थेवर्तते निरुक्तकारोहिदैवतमध्यस्थानपितॄन्समामनति । मरुतःरुद्राक्षभृतःपितरइति । एवमनेकार्थेपितृशब्देविशेषावधारणार्थमाह ध्रियमाणेजीवति पितरिसति पूर्वेषांपितामहप्रपितामहतत्पितॄणांनिर्वपेत्त्रयाणां बहुवचननिर्देशात्। तथाचगृह्ये येभ्यःपितादद्यात्तेभ्यः पुत्रोदद्यात्पितापुत्रौचेदाहिताग्नीस्यातामिति। ननुच न चतुर्थंपिण्डोगच्छतीत्याहुः सत्यंनैवात्रचतुर्थः पिण्डोदीयते। पक्षान्तरमाह विप्रवद्वायथाब्राह्मणनिमन्त्रणापूर्वकंब्रह्मचारिणोनियमवंतश्चपूज्यन्तेतथैवजीवत्पितृकेणपिताभोजनीयःश्राद्धे श्राद्धार्थमन्नंश्राद्धं। अत्रचपितृत्वमेवभोज्यत्वेकारणं नजातिगुणावपेक्ष्यौ। एवंह्याहुः पितृप्रीत्यर्थंश्राद्धं। तत्रमृतस्यप्रीतौकर्तव्यायांकोजीवतिपितरिभावोयेनासौनभोज्येत् । स्वकमित्यनुवादः संबन्धिशब्दत्वादेर्वासद्धेः। भोजनमत्रपितृभ्योहितंपिण्डनिर्वपणंतुदर्भेषुपितॄणांकर्तव्यमेतन्नइतिविरोधात्। यदिहिपात्रस्थानीयादर्भास्तदाजीवतःपितुःस्वाम्योत्पत्तौअल्पिकांमात्रामाशयेदितिनयुज्यते। जीवतोहिस्वमिच्छाविनियोज्यं नच तस्मिन्पिण्डेञ्जनादिदानमुपपद्यते अर्धजरतीयप्रसङ्गात्। नह्यप्राञ्जनादिसंस्कृतेन पितुःकिंचित्प्रयोजनमस्ति तस्मादहष्टार्थमञ्जनादिदानं । अञ्जनादिरहितंतु कदाचिदात्मनःपितुःपरस्यवा भोजनयोग्यंभवतीत्येवमर्धजरतीयं । तस्मादस्मिन्पक्षेपिण्डनिर्वपणंद्वयोः पितामहप्रपितामहयोः। गृह्यकारास्तुस्मरन्ति जीवत्पितृकस्यनपिण्डपितृयज्ञोनश्राद्धंकितर्हिअनारम्भएवतस्यकर्मणोहोमान्तता वा ॥ २२० ॥

(४) सर्वज्ञनारायणः। विप्रवदिति। अत्र पक्षे पितृस्थाने पितृपितरमुपवेश्येतरयोरर्थे द्वौ विप्रावुपवेशयेत्। तयोरेव पितर्यपि सर्वमर्घ्यादि विदध्यादित्यर्थः ॥ २२० ॥

(३) कुल्लूकः। ध्रियमाणे जीवति पितरि मृतानांपितामहादित्रयाणांश्राद्धंकर्तव्यम्। अथवा पितृविप्रस्थाने तमेव स्वपितरंभोजयेत्। पितामहप्रपितामहयोश्च ब्राह्मणौ भोजयेत्पिण्डद्वयंच दद्यात् ॥ २२० ॥

(४) राघवानन्दः। ध्रियमाणे जीवति। पूर्वेषां वृद्धप्रपितामहस्य पितामहप्रपितामहयोःब्राह्मणद्वयंचकुर्यात्। पितृस्थाने स्वकंपितरमित्यन्वयः ॥ २२० ॥

(५) नन्दनः । जीवति पितरि पिण्डनिवापः कथंकर्तव्यइत्यपेक्षायामाह । भ्रियमाणइति भ्रियमाणे जीवति । पितृशब्दः पितामहप्रपितामहयोरप्युपलक्षणम् । पूर्वेषामेव येभ्यःपितादद्यात्तेषामेवेत्यर्थः । निर्वपेत्पिण्डान् । कल्पान्तरमुत्तरार्धेनोक्तम् । विप्रवन्निमन्त्रितविप्रवत् ॥ २२० ॥

(६) रामचन्द्रः जीवत्पितृकं प्रत्याह भ्रियमाणइति । पितरि भ्रियमाणे जीवति सति पूर्वेषां पितृणां पिण्डान्निर्वपेत् दद्यात् । आभ्युदयिकश्राद्धे तंस्वकंपितरंविप्रवद्भोजयेद्वा । येभ्यएवपिता दद्यात्तेभ्योदद्यात्स्वयं सुतइति न्यायात् २२०

पिता यस्य निवृत्तः स्याज्जीवेच्चापि पितामहः ॥ पितुः सनाम सङ्कीर्त्य कीर्तयेत्प्रपितामहम् ॥ २२१ ॥

(१) मेधातिथिः । पितुर्नामसंकीर्तनेन तदीयावाहनपिण्डदानब्राह्मणभोजनानिलक्ष्यन्ते । कीर्तयेत्प्रपितामहं । जीवतेपितामहायनदद्यात् । किंतर्हिततःपूर्वाभ्यांपितुःपितृभ्योनिपृणीयादिति स्मरन्ति ॥ २२१ ॥

(२) सर्वज्ञनारायणः । निवृत्तोमृतः । जीवेद्वापीति वाशब्दश्चार्थे कीर्तयेत् । प्रपितामहंप्रपितामहनाम कीर्तयेत् । नामकीर्तनेन श्राद्धंप्रवर्तयेदित्युक्तंभवति ॥ २२१ ॥

(३) कुल्लूकः । नामकीर्तनमत्रश्राद्धोपलक्षणार्थं । पितृजीवनापेक्षोयंवाशब्दः । यस्य पुनः पिता मृतःस्यात्पितामहे जीवति सपितृप्रपितामहयोः श्राद्धंकुर्यात् । गोविन्दराजस्तु । यस्य पितृप्रपितामहौमृतौ स्यातांसपित्रेपिण्डंनिधाय पितामहात्परंद्वाभ्यांदद्यादिति विष्णुवचनात् प्रपितामहतत्पितृभ्यांदद्यादिति व्याख्यातवान् ॥ २२१ ॥

(४) राघवानन्दः । यस्यपिता वृत्तोमृतः पितामहश्चजीवति सपितृप्रपितामहयोःश्राद्धंकुर्यात् ॥ २२१ ॥

(५) नन्दनः । वृत्तोमृतः ॥ २२१ ॥

(६) रामचन्द्रः । यस्य पिता वृत्तः स्यात् मृतः स्यात् । पितामहोजीवेद्वा ॥ २२१ ॥

पितामहोवा तच्छ्राद्धंभुञ्जीतेत्यब्रवीन्मनुः ॥ कामंवा समनुज्ञातः स्वयमेव समाचरेत् ॥ २२२॥

(१) मेधातिथिः । यथाजीवत्पिताभोज्यते तद्वत्पितामहोपिअनुज्ञांपितामहात्प्राप्यसमाचरेत् । स्वयं च परतोद्वयोर्दद्यात् प्रपितामहायएकस्माएववा एषकामंस्वयमित्यनयोरर्थः ॥ २२२ ॥

(२) सर्वज्ञनारायणः । जीवत्पितुःपितृभोजनवत् । तच्छ्राद्धं पितामहश्राद्धार्थमन्नादि । कामंवेति पितामहानुज्ञया स्वयंपौत्रःसमाचरेत् त्रिपुरुषंश्राद्धमाचरेत् । तेन पितुःप्रपितामहवृद्धप्रपितामहयोश्च श्राद्धंकुर्यादिति लभ्यते ॥ २२२ ॥

(३) कुल्लूकः । यथा जीवत्पिता भोज्यस्तथा पितामहोपि पितामहब्राह्मणस्थाने भोज्यः । पितृप्रपितामहयोश्च ब्राह्मणभोजनंपिण्डदानंच कुर्यात् । यथा वा जीवता पितामहेन त्वमेव यथारुचिकुर्विति दत्तानुज्ञः स्वरुच्या पितामहंवा भोजयेत् । पितृप्रपितामहयोर्वा श्राद्धद्वयंकुर्यादिति विष्णुवचनात्पितृप्रपितामहवृद्धप्रपितामहानांश्राद्धत्रयंकुर्यात् ॥ २२२ ॥

(४) राघवानन्दः । श्राद्धंपितामहोद्देश्यकं । पितामहएवभुञ्जीत । समनुज्ञातः पितामहेन दत्तानुज्ञः स्वयंवृद्धप्रपितामहान्तानांदद्यात् । यस्य पितृप्रपितामहौ मृतौ सपित्रेपिण्डंनिधाय पितामहात्परंद्वाभ्यांदद्यादिति विष्णुवचनात् प्रपितामहतत्पितृभ्यांदद्यात् ॥ २२२ ॥

---

(२२२) समनुज्ञातः=तदनुज्ञातः (ल, ब,)

(५) नन्दनः । पितुः पितामहस्य वा भोजनपक्षेद्वयोरेव पिण्डदानंपिण्डदानस्थाने भोजनविधानात् । पितुःस्वनामसंकीर्त्यकीर्तयेत्प्रपितामहमित्यस्मिन्पक्षे तु प्रपितामहपित्रेपिण्डंदद्यात् कुतः त्रिषुपिण्डः प्रवर्ततइतिनियमात् । पक्षान्तरमुत्तरार्धेनोक्तम् । तदनुज्ञातः पितामहानुज्ञातः । युक्तसमाचरणंचात्र पितामहस्यापि पिण्डदानंसमस्तपिण्डविलोपोवा कुतः पक्षान्तरस्यासंभवात् ॥ २२२ ॥

(६) रामचन्द्रः । तत्श्राद्धे पितामहोवा भुञ्जीत इति मनुरब्रवीत् । वापक्षान्तरे । तदनुज्ञातः पितृपितामहाभ्यामनुज्ञातः कामंस्वयमेव समाचरेत् ॥ २२२ ॥

तेषांदत्वा तु हस्तेषु सपवित्रं तिलोदकम् ॥ तत्पिण्डाग्रंप्रयच्छेत स्वधैषामस्त्विति ब्रुवन् ॥ २२३ ॥

(१) मेधातिथिः । यदुक्तंपिण्डेभ्यःस्वल्पिकांमात्रामाशयेदितितस्यायंकालविधिर्देशविधिश्च । अपदेशात्पिण्डस्यमात्राआदातव्या । दर्भाग्तिलोदकंचदत्वा तदनन्तरंपिण्डभागंप्रयच्छेत्स्वधैषामितिब्रुवन् । एषामपिसर्वनाम्नाविशेषनामानिगृह्यन्ते एवंचसंबन्धःक्रियते येषांयानिनामानितान्युच्चार्यस्वधास्त्वितिब्रूयादतःस्वधाशब्दयोगे चतुर्थ्यानिर्देशःकर्तव्यः स्वधादेवदत्तायास्तु स्वधायज्ञदत्तायास्त्विति । एवंव्याख्यायमानेशास्त्रान्तरविरोधोनभवति ॥ २२३ ॥

(२) सर्वज्ञनारायणः । प्रकृतंकर्मक्रममाह तेषांदत्वेति । सपवित्रं सकुशंतिलोदकंदत्वेति पिण्डदानइव तदवयवप्रतिपादनाद्धपाणाववनेजनंविहितम् । पिण्डाग्रं पिण्डेभ्योल्पमात्रा । एषामिति संक्षिप्योक्तम् । पितुःपितामहस्येत्यादितु पृथगेव कार्यम् । वचनाच्च स्वधायोगेपि षष्ठी २२३ ॥

(३) कुल्लूकः । पिण्डेभ्यस्त्वल्पिकांमात्रामिति यदुक्तंतस्यायंकालविधिः प्रदेय*विधिश्च तेषांब्राह्मणानांहस्तेषु सदर्भतिलोदकंदत्वा तदिति पूर्वनिर्दिष्टंपिण्डाग्रंपित्रे स्वधास्त्वित्येवमादि ब्रुवन्पित्रादिब्राह्मणेभ्यस्त्रिभ्यःक्रमेण दद्यात् ॥ २२३ ॥

(४) राघवानन्दः । पिण्डेभ्यःस्वल्पिकांमात्रामिति यदुक्तंतस्य कालविधिस्तत्पिण्डाग्रमिति । स्वधैषां पित्रेस्वधास्तु । पितामहाय स्वधास्त्वित्यादि ॥ २२३ ॥

(५) नन्दनः । विधिवदाशयेदित्युक्तम् कः पुनरस्यविधिरित्याह तेषामिति । तेषाम् एतेषांपितृणाम् ॥ २२३ ॥

(६) रामचन्द्रः । तेषां ब्राह्मणानां हस्तेषु सपवित्रंतिलोदकंदत्वा पिण्डाग्रंपिण्डशेषं एषांपितृणांस्वधास्त्विति ब्रुवन्प्रक्षिपेत् दद्यात् ॥ २२३ ॥

पाणिभ्यां तूपसंगृह्य स्वयमन्नस्य वर्द्धितम् ॥ विप्रान्तिके पितॄन्ध्यायन्शनकैरुपनिक्षिपेत् ॥ २२४ ॥

(१) मेधातिथिः । उभाभ्यांहस्ताभ्यांस्वयंगृहीत्वाअन्नस्यवर्धितंअन्नेनपूर्णंभाजनं विप्रान्तिकेरसवत्यगारादीनां यत्रब्राह्मणाभोज्यन्ते तस्मिन्देशेउपनिक्षिपेत् । ब्राह्मणानांसमीपेस्थापयेत् । अन्येतुव्याचक्षते वर्धितंपरिवर्तुलमन्नमुच्यते ताद्दृप्रान्तिकेपितॄन् ध्यायन् तुभ्यमिदमिति ध्यात्वानिक्षिपेद्यथाविकिरं तदयुक्तं उपनीयसर्वंपरिवेषयेदितिवक्ष्यति अतःपरिवेषणार्थंप्रदेशान्तरादानीय तस्योपनिक्षेपोयम् ॥ २४ ॥

(२) सर्वज्ञनारायणः । वर्धितं पात्रान्तरे कृत्वा पत्न्यादिभिरानीतम् । विप्रान्तिके तत्पात्रसमीपे उपरि निक्षिपेत्स्थापयेत् ॥ २२४ ॥

---

* प्रदेय-प्रदेश (अ)

(३) कुल्लूकः। अन्नस्येति तृतीयार्थेषष्ठी। वर्धितंपूर्णपिठरादिपात्रंस्वयंपाणिभ्यांगृहीत्वा पितॄंश्च चिन्तयन्नूरसवत्यगारादानीय ब्राह्मणानांसमीपे परिवेषणार्थमत्वरया स्थापयेत् ॥ २२४ ॥

(४) राघवानन्दः। किंच पाणिभ्यामिति। अन्नस्य च वर्धितं अन्नपूर्णपात्रंपिठरादि। पाकगृहादानीय परिवेषणार्थेस्थापयेत् ॥ २२४ ॥

(५) नन्दनः। अथपरिवेषणप्रकारमाह पाणिभ्यामिति। वर्धितंराशीकृतम्। शनकैरत्वरया ॥ २२४ ॥

(६) रामचन्द्रः। स्वयं अन्नस्य वर्धितं। अन्नपूर्णं भाजनं स्वयंपाणिभ्यामुपसंगृह्य विप्रान्तिके समीपे पितॄन् ध्यायन् शनकैरुपनिक्षिपेत् स्थापयेत्। यथाऽविकृतम् ॥ २२४ ॥

उभयोर्हस्तयोर्मुक्तंयदन्नमुपनीयते ॥ तद्विप्रलुम्पन्त्यसुराः सहसा दुष्टचेतसः ॥ २२५ ॥

(१) मेधातिथिः। द्वाभ्यांहस्ताभ्यामन्नमुपनेतव्यंपरिवेष्टव्यं नचैकेनेति। परिवेषणमुपनयनमेव। ततस्तत्राप्ययमेवधर्मः पूर्वोक्तःतस्यार्थवादः। उभाभ्यांहस्ताभ्यां मुक्तंवर्जितमपरिगृहीतं यदन्नमुपनीयते परिवेषणार्थं तद्विप्रलुम्पन्ति विनाशयंत्यसुराः। सहसाबलेनदुष्टचेतसःपापात्मानःअसुरादेवद्विषः। उभयोरित्यधिकरणेसप्तमी। मुक्तमाकृष्टमस्थितं भवन्तिचप्रतिषेधोपसन्धानेपिकारकविभक्तयः। ग्रामानागच्छत्यासनेनोपविशति त्रिरात्रमुपवसति वसेरर्थस्येति ॥ २२५ ॥

(२) सर्वज्ञनारायणः। उभयोर्हस्तयोरुभाभ्यांहस्ताभ्यां। तस्मान्नैकेन पाणिनोपनेयमित्यर्थः ॥ २२५ ॥

(३) कुल्लूकः। अधिकरणसप्तमीयं। उभयोः करयोर्मुक्तमस्थितंयदन्नंब्राह्मणान्तिकमानीयते तदसुरादुष्टबुद्धयआच्छिन्दन्ति। तस्मान्नैकहस्तेनानीय परिवेष्टव्यम् ॥ २२५ ॥

(४) राघवानन्दः। तत्परिवेषणंनैकहस्तेनेत्याह उभयोरिति। हस्तयोर्मुक्तं हस्ताभ्यांवियुक्तं एकेन हस्तेन दीयमानम् विलुम्पन्ति हरन्ति ॥ २२५ ॥

(५) नन्दनः। यतएवंतस्मादेकहस्तेनान्नंनोपनेयमिति ॥ २२५ ॥

(६) रामचन्द्रः। उभयोर्द्वाभ्यांहस्ताभ्यांमुक्तं वर्जितमपरिगृहीतं यदन्नमुपनीयते परिवेषणान्तं तदन्नमसुरा विप्रलुम्पन्ति सहसा दुष्टचेतसः ॥ २२५ ॥

गुणांश्च सूपशाकाद्यान् पयोदधिघृतंमधु ॥ विन्यसेत्प्रयतः पूर्वं भूमावेव समाहितः ॥ २२६ ॥

(१) मेधातिथिः। गुणाव्यञ्जनानि एषामेतत्प्रदर्शनार्थमुत्तरःप्रपञ्चः। सूपशाकाद्यान् विन्यसेद्भूमावेवोपयच्छेत न दारुमयेफलकादौ ॥ २२६ ॥

(२) सर्वज्ञनारायणः। गुणान् व्यञ्जनानि। सूपशब्दः शाकेतरव्यञ्जनपरोत्र ॥ २२६ ॥

(३) कुल्लूकः। गुणान्व्यञ्जनानि अन्नापेक्षयाऽप्राधान्याद्गुणयुक्तान् वा। सूपशाकाद्यान्प्रयतः शुचिः समाहितोऽनन्यमनाः सम्यग्यथा न विशीर्यन्ति तथा भूमावेव स्वपात्रस्थाने स्थापयेन्न दारुफलकादौ ॥ २२६ ॥

(४) राघवानन्दः। किंचउपकरणानि पात्रान्तरे शनैर्भूमावेव देयानीत्याह गुणांश्चेतित्रिभिः। अन्नेरुचिसाधनंगुणानुपकरणादीनि कालशाकमांसादीनि ॥ २२६ ॥

(५) नन्दनः। गुणान्व्यञ्जनानि ॥ २२६ ॥

---

(२२६) पूर्वं=सम्यक् (अ)

(६) **रामचन्द्रः**। गुणान्व्यञ्जनानि च पुनः शाकादीन् दारुमयफलकादौ भूमावेव समाहितः सन्विन्यसेत् स्थापयेत्। भूमौ स्थापयित्वा परिवेषयेदित्यर्थः ॥ २२६ ॥

भक्ष्यंभोज्यंच विविधं मूलानि च फलानि च। हृद्यानि चैव मांसानि पानानि सुरभीणि च॥२२७॥

(१) **मेधातिथिः**। धानाशष्कुल्यादयोभक्ष्याः खरविशदमभ्यवहरणीयंहि भक्ष्यमित्युच्यते । भोज्यं घृतपूपादि ॥ २२७ ॥

(२) **सर्वज्ञनारायणः**। भक्ष्यंलड्डुकादि। भोज्यमोदनादि। पानानि पेयानि ॥ २२७ ॥

(३) **कुल्लूकः**। भक्ष्यंखरविशदमभ्यवहरणीयंमोदकादि । भोज्यंपायसादि। नानाप्रकारफलमूलानि हृदयस्य प्रियाणि मांसानि पानानि सुगन्धीनि भूमावेव विन्यसेदिति पूर्वेण संबन्धः ॥ २२७ ॥

(४) **राघवानन्दः**। भक्ष्यं धानाशष्कुल्यादि भोज्यंघृतपूपादि। हृद्यानि मनोज्ञानि दृष्ट्या। सुरभीणि सुगन्धीनि ॥ २२७ ॥

(५) **नन्दनः**। भक्ष्यादीन्येतानि स्वातन्त्र्येण भोज्यानि नोपदंशत्वेन ॥ २२७ ॥

(६) **रामचन्द्रः**। हृद्यानि प्रियाणि पानानि सुरभीणि कर्पूरादिसंयुतानि ॥ २२७ ॥

उपनीय तु तत्सर्वंशनकैः सुसमाहितः॥ परिवेषयेत प्रयतोगुणान्सर्वान्प्रचोदयन्॥ २२८ ॥

(१) **मेधातिथिः**। उपनीयविप्रान्तिके सर्वमेतड्ढौकयित्वा ततःपरिवेषयेत् । भुज्यधिकरणोपादानमावर्जनं। भुञ्जानस्यपरिवेषणं यद्यप्यन्तिकदेशआपेक्षिकः तथापितेषामन्तिकेनिधातव्यं। यथाभुञ्जानानामुच्छेषणेननसंसृज्यते। गुणान्भक्ष्यभोज्यादेर्द्रव्यस्य येगुणाअम्लत्वादयस्तान्प्रणोदयमानइदमम्लमिदंमधुरमिदंखाण्डवमित्येवमावेदिते तेषांयद्रोचते तत्तद्द्यादितिवक्ष्यमाणेनसंबन्धः। शनकैरित्याद्यनुवादः श्लोकपूरणार्थः ॥ २२८ ॥

(२) **सर्वज्ञनारायणः**। उपनीयैकत्र समीपेवस्थाप्य परिवेषयेत् भोजनपात्रे दद्यात्। गुणान्व्यञ्जनानि प्रचोदयन्। भोक्तुंद्विजान्प्रेरयन्॥ २२८ ॥

(३) **कुल्लूकः**। एतत्सर्वमन्नादिकंब्राह्मणसमीपमानीय प्रयतःशुचिःअनन्यमनाः क्रमेण परिवेषयेत् इदंमधुरमिदमम्लमित्येवंमाधुर्यादिगुणान्कथयन्॥ २२८ ॥

(४) **राघवानन्दः**। प्रचोदयन् इदंमधुरमिदंकीदृगिति ख्यापयन् प्रयतोऽप्रमत्तः ॥ २२८ ॥

(५) **नन्दनः**। प्रचोदयन्भुञ्जानेषु सूपशाकादीन्गुणान् प्रेरयन्प्रयच्छन्निति यावत्। परिवेषयेत् भोजयेत्॥ २२८ ॥

(६) **रामचन्द्रः**। तत्सर्वं भक्ष्यंभोज्यं उपनीयआनीय समाहितःसन्परिवेषयेत्। प्रयतः सर्वान्ब्राह्मणान् गुणान्व्यञ्जनानि द्रव्यस्ययें गुणाअल्पत्वादयस्तान्वचनेन प्रणोदयन्प्रेरयन्॥ २२८ ॥

नास्रमापातयेज्जातु न कुप्येन्नानृतं वदेत्॥ न पादेन स्पृशेदन्नं न चैतदवधूनयेत्॥२२९॥

(१) **मेधातिथिः**। अस्रंअश्रुरोदनं तन्नपातयेन्नकुर्यात्। प्रायेणप्रेतश्राद्धादाविष्टवियोगजेन दुःखानुस्मरणेनाश्रुपातोजायते तस्यनिषेधः। आनन्दाश्रुणस्त्वकस्मात्पततो न दोषः। नजातुकदाचिदप्यश्रुविमोचनंकुर्यात्। नकुप्येत्क्रोधंनगृण्हीयात्। अनृतवदनस्य पुरुषार्थतयानिषिद्धस्य कर्मार्थोयंप्रतिषेधः। नपादेनस्पृशेदन्नमुच्छिष्टमनुच्छिष्टंच। नचैतदन्नमवधूनयेदवकम्पयेत्। हस्तादिनोत्क्षिप्यपुनर्नविक्षिपेत् । अन्येतुव्याचक्षते वाससाधूल्याद्यपनयनार्थं यदवधूननं न तदन्नस्योपरिकर्तव्यम्॥ २२९ ॥

(२) **सर्वज्ञनारायणः** । नास्रमापातयेदित्यादयोभोक्तुर्नियमाः । अस्रमश्रु । नचैतदवधूनयेत् पात्रस्थंहस्तेनोद्धृत्य तत्र न पुनःपुनः क्षिपेत् ॥ २२९ ॥

(३) **कुल्लूकः** । रोदनक्रोधमृषाभाषणानि न कुर्यात् । पादेन चान्नं न स्पृशेत् । न चोत्क्षिप्योत्क्षिप्यान्नंपात्रे क्षिपेत् । पुरुषार्थतया प्रतिषिद्धयोरपि क्रोधानृतयोः श्राद्धाङ्गत्वज्ञापनार्थोयंनिषेधः ॥ २२९ ॥

(४) **राघवानन्दः** । किंचैतत्पञ्चकंन कुर्यादित्याह नेति । तदन्नं । अवधूनयेत् । उत्क्षिप्योत्क्षिप्य न स्थापयेत् ॥ २२९ ॥

(५) **नन्दनः** । पित्रादिस्मरणेन नास्रमापातयेत् । परिवेषयिताऽन्नंनात्र धूनयेन्नावजानीयान्नावकिरेद्वा ॥ २२९ ॥

(६) **रामचन्द्रः** । श्राद्धकर्ता जातुकदाचित् अश्रुनपातयेत् रोदनं नकुर्यात् । तथा न कुप्येन्न क्रोधंकुर्यात् अनृतंन वदेत् अन्नंपादेन नस्पृशेत् । एवमन्नंनावधूनयेत् तत्र हस्तंवा न कम्पयेत् ॥ २२९ ॥

अस्रंगमयति प्रेतान्कोपोरीननृतंशुनः ॥ पादस्पर्शस्तु रक्षांसि दुष्कृतीनवधूननम् ॥ २३० ॥

(१) **मेधातिथिः** । अस्यार्थवादः अश्रुविमोचनंक्रियमाणंप्रेतान्गमयति प्रापयति श्राद्धं । नपितॄणामुपकारकंभवति प्रेताश्चात्रपिशाचवद्भूतविशेषाविवक्षिताः नत्वसपिण्डीकृताःसम्प्रतिमृताः । रक्षांसिभूतप्रेतवत्अवगन्तव्यानि । अरयः प्रसिद्धाः तथादुष्कृतीन्दुष्कृताचरणान्पातकिनः ॥ २३० ॥

(२) **सर्वज्ञनारायणः** । प्रेतान्पिशाचान् । अरीन्यजमानस्य मृतानृशत्रून् । दुष्कृतीन्दुष्टाकृतीन्नारकिणः ॥ २३० ॥

(३) **कुल्लूकः** । अश्रुक्रियमाणंप्रेतान्भूतवेषान्श्राद्धान्नानि प्रापयति न पितॄणामुपकारकंभवति । क्रोधः शत्रून् । मृषावादः कुक्कुरान् । पादस्पर्शोन्नस्य राक्षसान् । अवधूननंपापकारिणः । तस्मान्न रोदनादि कुर्यात् ॥ २३० ॥

(४) **राघवानन्दः** । न चाश्वित्युक्तं तत्करणेदोषमाह अस्रमिति । अस्रंचक्षुर्जलं क्रियमाणमिति शेषः । गमयति श्राद्धीयद्रव्यं प्रेतादिभ्यःप्रापयति । एवमुत्तरत्र । अरीन् शत्रून् दुष्कृतीन्नरकस्थलोकान् । श्राद्धीयद्रव्यंपितॄणामनुपकारकमितिवार्थः । तस्माद्धर्षाश्रूणि न कुर्यादिति भावः ॥ २३० ॥

(५) **नन्दनः** । अस्रंबाष्पः । तदन्नंप्रेतान्पिशाचान्गमयति न पितॄन् ॥ २३० ॥

(६) **रामचन्द्रः** । तत्र दोषमाह गमयतीति । अश्रु प्रेतान्प्रत्यन्नंगमयति प्रापयति कोपोरीन्प्रत्यन्नंगमयति प्रापयति । अवधूननंतिरस्करणंवाअवधूननं वस्त्रव्यञ्जनेन वा अवधूननंदुष्कृतीन्प्रति गमयति प्रापयति ॥ २३० ॥

यद्यद्रोचेत विप्रेभ्यस्तत्तद्दद्यादमत्सरः ॥ ब्रह्मोद्याश्च कथाः कुर्यात्पितॄणामेतदीप्सितम् ॥ २३१ ॥

(१) **मेधातिथिः** । यद्यदन्नंव्यञ्जनंपानंचाभिलषेयुस्तत्तदमत्सरः अलुब्धोदद्यात् मत्सरइतिलोभनाम । रोचेत प्रीतिंजनयेत् । ब्रह्मोद्याब्रह्मणिवेदे याउद्यन्ते कथ्यन्ते ताब्रह्मोद्या देवासुरयुद्धं वृत्रवधःसरमादूत्यमित्याद्याः अथवा कःस्विदेकाकीचरतीत्यादि । ब्रह्मोद्यंचकथाइतिवापाठः तत्प्रधानमन्त्रार्थनिरूपणाद्याःकथःसंलापालौकिकैः शब्दैः पितॄणामेतदीप्सितमभिलषितमित्यर्थवादः ॥ २३१ ॥

(१) **सर्वज्ञनारायणः** । अमत्सरोऽक्रोधः । ब्रह्मोद्या । आध्यात्मिकीः कथादातैव कुर्यात ॥ २३१ ॥

(४) राघवानन्दः । तत्रैव प्रशस्तान्याह त्रीणीति । अत्र श्राद्धे अत्वरा विशेषतःकर्तुम् ॥ २३५ ॥

(५) नन्दनः । कर्तव्यान्तरमाह व्रतस्थमिति । व्रतस्थंब्रह्मचारिणम् । नायंत्रिणाचिकेतादीनामिव दौहित्रस्य भोजने विधिः किंतु श्राद्धाङ्गत्वेन कुतः पात्रनियमप्रकरणे दौहित्रस्यानुकल्पत्ववचनादुत्तरयोर्विध्योः श्राद्धाङ्गत्वावगमाच्च । कुतपंदर्भम् ॥ २३५ ॥

(६) रामचन्द्रः । कुतुपः कुतुपकालोवा । दौहित्रःखड्गपात्रः दौहित्रोवा । दौहित्रमितिपाठः । दौहित्रंतोषयेत् त्रीण्यत्र श्राद्धे प्रशंसन्ति । शौचंमृद्वारिणा । अक्रोधनं । अत्वरामशीघ्रं त्वराराहित्यमित्यर्थः ॥ २३५ ॥

अत्युष्णंसर्वमन्नंस्यांद्भुञ्जीरंस्ते च वाग्यताः ॥ न च द्विजातयोब्रूयुर्दात्रा पृष्टाहविर्गुणान् ॥२३६॥

(१) मेधातिथिः । उष्णमेवात्युष्णंअतिगतउष्णमिति प्रपतितपर्णःप्रपर्णइति यथासर्वमन्नंगुणाश्च । यस्यौष्ण्यस्यभोजनमुचितं तत्रैवेदमुष्णताविधानं नतुदध्योदनादियत्तदुष्णंअप्रीतिकरंव्याधिजनकंच । तत्रहर्षयेद्ब्राह्मणानितिविरुध्येत । उष्णभोजनविधानाच्च न सकृत्सर्वमन्नंपरिवेष्टव्यं । तथाहिबहुभोजिनःशीतंभवेदन्नं तस्माद्भुक्तेपुनर्दद्यान्नचभुञ्जानेभ्यउच्छिष्टदानत्वात् दानमयुक्तमितिवाच्यं । भोजनविधिरेवंरूपएव । आतृप्तेर्भोजयितुर्व्यापारोनह्यत्रौदनादिप्रतिग्राह्यतयासंबध्यते । अतएवनतत्रप्रतिग्रहमन्त्रओदनादिषुप्रयुज्यते । वाग्यताः वाक् यता नियमितायैः छान्दसःपरनिपातः वाचावायताःसाधनंकृतेतिसमासः । कर्तृवचनश्चतदायतशब्दः व्यापारनिषेधोनियमनं वाचश्चव्यापारः शब्दोच्चारणं तत्प्रतिषेधःक्रियते व्यक्ताव्यक्तशब्दोच्चारणंनकर्तव्यं हविषोगुणानचवक्तव्याः । इष्टैःसद्भिर्भुञ्जानैर्दात्रेनविवक्षितमितिरमरन्ति । ननुवाङ्नियमादेवैतत्सिद्धंसत्यमपि भयादिनापि नकर्तव्यंब्रूविः प्रतिपादनेवर्त्तते । ब्रूयुरिति नशब्दोच्चारणमेव ॥ २३६ ॥

(२) सर्वज्ञनारायणः । अत्युष्णमभिमतोश्णं हविषोगुणान मिष्टत्वादीन् दात्रादृष्टाअपि ॥ २३६ ॥

(३) कुल्लूकः । उष्णमेवात्युष्णं यस्योष्णस्यान्नादेर्भोजनमुचितंतदुष्णंदद्यात् न तु फलाद्यपि अतएव शङ्खः । उष्णमन्नंद्विजातिभ्यःश्रद्धया विनिवेदयेत् अन्यत्र फलमूलेभ्यःपानकेभ्यश्च पण्डितः ॥ संयतवाचश्च ब्राह्मणाअश्नीयुः । किमिदंस्वाद्वस्वाद्वेति दात्राऽन्नादिगुणान्पृष्टावक्त्राद्यभिनयेनापि न ब्रूयुः । वाग्यतस्यात्रैव विधानात् ॥ २३६ ॥

(४) राघवानन्दः । किंच अत्युष्णमिति । सर्वमन्नमुपकरणंचेति न ब्रूयुः । अभिनयेनापि न ज्ञापयेयुः वाग्यताइति मौनस्य प्राप्तत्वात् ॥ २३६ ॥

(६) रामचन्द्रः । अत्युष्णं कोष्णं सर्वमन्नंस्यात् । वाग्यताः भुञ्जीरन् दात्रा पृष्टान्हविर्गुणान् हविष्यान्नस्य गुणान् द्विजातयो न ब्रूयुः ॥ २३६ ॥

यावदुष्णंभवत्यन्नंयावदश्नन्ति वाग्यताः ॥ पितरस्तावदश्नन्ति यावन्नोक्ताहविर्गुणाः ॥ २३७ ॥

(१) मेधातिथिः । पूर्वस्यविधेरर्थवादोयं । ऊष्माऔष्ण्यम् ॥ २३७ ॥

(२) सर्वज्ञनारायणः । अस्यप्रपंचः । यावदुष्णेति । यावदुष्णमन्नमित्यर्थः ॥ २३७ ॥

(३) कुल्लूकः । यावदन्नेउष्णता भवति यावच्च मौनिनोभुञ्जते यावच्च हविर्गुणानोच्यन्ते तावत्पितरोऽश्नन्तीति पूर्वोक्तस्यैवार्थस्य प्रशंसा ॥ २३७ ॥

(४) राघवानन्दः । उत्कृष्टोत्कृष्टहविर्गुणानभिधानयोरर्थवादमाह यावदिति । नोक्ताःश्राद्धंभुञ्जानैः ॥ २३७ ॥

(६) रामचन्द्रः । अन्नेयावदूष्माभवति यावद्वाग्यता अश्नन्ति तावत्पितरोश्नन्ति यावत्हविर्गुणानोक्ताः ॥ २३७ ॥

यद्वेष्टितशिराभुङ्क्ते यद्भुङ्क्ते दक्षिणामुखः ॥ सोपानत्कश्च यद्भुङ्क्ते तद्वै रक्षांसि भुञ्जते ॥ २३८ ॥

(१) **मेधातिथिः** । वेष्टितमुष्णीषादिना । उदीच्याहि शाटकैःशिरोवेष्टयन्ति । यत्तुव्याचक्षते चूडाकारैरपिकेशैर्वेष्टितशिराभवतीति नतेयुक्तिवादिनः । केशास्तेवेष्ट्यन्तेनशिरोनचकेशाएवशिरः शिरस्थाहिते नहितत्रवेष्टनव्यवहारोलोके । दक्षिणाभिमुखस्यदोषवचनात् स्वल्पेप्रदेशेदक्षिणेतरदिगभिमुखस्यापि भोजनमनुजानाति । अतउदङ्मुखानांविधानेकुतोदक्षिणस्याःप्राप्तिः प्राक्पित्रादेस्तुननिषेधः । उपानहौचर्ममय्यौपादत्राणं अन्येतुचर्मपादुकेउपानहाविति व्याचक्षते । रक्षांसिभुञ्जते नपितरइतिनिन्दा ॥ २३८ ॥

(२) **सर्वज्ञनारायणः** । वेष्टितशिराः सोष्णीषः ॥ २३८ ॥

(३) **कुल्लूकः** । वस्त्रादिवेष्टितशिरायदन्नंभुङ्क्ते तथा दक्षिणामुखः सपादुकश्च तद्राक्षसाभुञ्जते । न पितरस्तस्मादेवंरूपंन कर्त्तव्यम् ॥ २३८ ॥

(४) **राघवानन्दः** । अथेदानीं भोजनकाले वर्ज्यं प्रदर्शयंस्तत्करणे दोषमाह यदिति । वेष्टितशिराः वस्त्रादिना उपानत्काष्ठपादुका यस्य दक्षिणामुख इति स्वनियमवशात् यद्भुङ्क्ते तादृशेन पात्रमिति भावः ॥ २३८ ॥

(६) **रामचन्द्रः** । द्वाभ्यामाह यद्वेष्टितशिराइति । वेष्टितशिराःचूडाकारैः केशैर्वेष्टितशिराभवति । चर्मपादुके उपानहादिसामीप्ये निषिद्धम् ॥ २३८ ॥

चाण्डालश्च वराहश्च कुक्कुटः श्वा तथैव च ॥ रजस्वला च षण्ढश्च नेक्षेरन्नश्नतो द्विजान् ॥ २३९ ॥

(१) **मेधातिथिः** । वराहःशूकरःसचग्राम्यःश्वसंनिधानतोनेक्षेरन्नितियद्यपिश्रुतम् । तथापितत्प्रदेशसन्निधिमेवशिष्टानानुमन्यन्ते तथाचघ्राणेनशूकरइत्यादिक्रियान्तरमर्थवादेनश्रूयते । नचानीक्षमाणस्यघ्राणंसंभवति । सन्निहितानांतु स्वरूपानुवादोयं । सूकरोविजिघ्रति । कुक्कुटःपक्षानुद्धुनोति । तस्मात्परिश्रितेदद्यादिति विधिप्रयोजनमेतद्दोषाभावेऽपरिश्रितेपिदद्यात् । षण्ढोनपुंसकम् ॥ २३९ ॥

(२) **सर्वज्ञनारायणः** । वराहोग्राम्यः षण्ढःक्लीबः ॥ २३९ ॥

(३) **कुल्लूकः** । चाण्डालग्राम्यसूकरकुक्कुटकुक्कुरोदक्यानपुंसकायथाब्राह्मणान्भोजनकाले न पश्येयुस्तथा कार्यम् २३९

(४) **राघवानन्दः** । श्राद्धभोजिनंप्रति चण्डालादिदर्शनं निषेधति चण्डालश्चेति । वराहः सूकरः । रजस्वलारजोरक्तं योनिमिश्रितं तद्वती । षण्ढः नपुंसकः । अश्नतोभुञ्जानान् ॥ २३९ ॥

(६) **रामचन्द्रः** । अश्नतोद्विजान् चाण्डालादयोनेक्षेरन्नपश्येयुः ॥ २३९ ॥

होमे प्रदाने भोज्ये च यदेभिरभिवीक्ष्यते ॥ दैवे कर्मणि पित्र्ये वा तद्गच्छत्ययथातथम् ॥ २४० ॥

(१) **मेधातिथिः** । होमे अग्निहोत्रादौ शान्त्यादिहोमेवा । प्रदाने गोहिरण्यादिद्रव्यविषये । अभ्युदयार्थेभोज्ये ब्राह्मणायत्रधर्मायभोज्यन्ते । दैवे हविषि दर्शपौर्णमासादौ । पित्र्येश्राद्धे यदभिवीक्ष्यते क्रियमाणमात्रंकर्म तद्गच्छत्ययथातथं । यदर्थंक्रियतेतद्विपरीतभावयति । यद्यपिश्राद्धप्रकरणंतथापिवाक्यादन्यत्रापिहोमादावयंप्रतिषेधः ॥ २४० ॥

(२) **सर्वज्ञनारायणः** । प्रदाने सुवर्णादिदाने । दैवे हविषि पित्र्ये च हविषि । यदभिवीक्ष्यते अयथातथंयेभ्योदत्तंतेभ्योन्यत्र गच्छति ॥ २४० ॥

---

(२४०) कर्मणि—हविषि (न, ब, भ, य, र, ल)

(३) कुल्लूकः । यस्मात् होमेऽग्निहोत्रादौ प्रदाने गोहिरण्यादौ भोज्ये स्वाभ्युदयार्थंब्राह्मणभोजने दैवे हविषि दर्शपौर्णमासादौ पित्र्ये श्राद्धादौ यदेभिर्वीक्ष्यते क्रियमाणंकर्मतदयथैक्रियते तन्न साधयति ॥ २४० ॥

(४) राघवानन्दः । तत्रैव प्रासङ्गिकंक्षिपन्नर्थवादमाह होमइति । प्रदाने ब्राह्मणोद्देश्यकान्नदाने भोज्ये स्वयंकृते एभिश्चण्डालादिर्षङ्भिः । हविषिदैवे पित्र्ये श्राद्धादौ यथादत्तं तदनुरूपं फलतीति यथातथं तद्भिन्नमयथातथं । विफलम् ॥ २४० ॥

(५) नन्दनः । अयथातथं व्यर्थम् ॥ २४० ॥

(६) रामचन्द्रः । होमे शान्त्यादिहोमे । गोहिरण्यादिप्रदाने भोज्येअभ्युदयार्थभोजने होमंदानंभोज्यंयदेभिः चण्डालादिभि र्वीक्ष्यते । दैवे वैश्वदेवे हविषि दर्शपूर्णमासादौ पित्र्ये कर्मणिवाअयथातथा गच्छति वृथागच्छतीत्यर्थः ॥ २४० ॥

घ्राणेन सूकरोहन्ति पक्षवातेन कुक्कुटः ॥ श्वा तु दृष्टिनिपातेन स्पर्शेनावरवर्णजः ॥ २४१ ॥

(१) मेधातिथिः । पक्षकृतेनवायुना कुक्कुटोहन्ति व्याख्यानमेतत् । तावतिदेशेनिवारणीयमेषांसंनिधानं यावतिस्थिताःपश्यन्ति । अवरवर्णजश्चाण्डालः जडप्रकृतित्वात् । स्पर्शादयश्च प्रकृतक्रियापरानव्यवक्षितत्वरूपाइतिव्याख्यातं । अतोवधमेतच्चण्डालस्यसामान्यतःस्पर्शप्रतिषेधादसत्यांप्राप्तौप्रतिषेधानर्थक्यम् । अतःशूद्रोवरवर्णजस्तस्यचद्विजातिश्राद्धस्पर्शनिषेधोनात्मीयेइतिविवक्षितेपिनान्नपानादिस्पर्शदोषोयमुच्यते किंतर्हियोदेशःपरिगृहीतोनदीपुलिनादिरपरिश्रितस्तस्यस्पर्शे तस्यहिवाम्वादित्यादिना शुद्धिरुक्ता । अतःसत्यांप्राप्तौ युक्तःप्रतिषेधः ॥ २४१ ॥

(२) सर्वज्ञनारायणः । घ्राणेन तदन्नगन्धोपलब्ध्या । पक्षवातेन तद्देशमुक्तेन । दृष्टिनिपातेन कर्तुर्द्विजानांवाशूद्रस्पर्शेन अपक्वानामपि श्राद्धद्रव्याणाम् । अवरवर्णजःशूद्रः ॥ २४१ ॥

(३) कुल्लूकः । सूकरस्तदन्नादेर्गन्धंघ्रात्वा कर्मनिष्फलंकरोति । तस्मादन्नघ्राणयोग्यदेशान्निरसनीयः । कुक्कुटः पक्षवातेन सोपि पक्षपवनयोग्यदेशादपगमनीयः । श्वा दर्शनेन शुनोन्नादिदर्शनंनिषिद्धमतिदोषभूयस्त्वज्ञापनार्थंपुनरभिहितम् । अथवा दृष्टिनिपातेनेति श्राद्धकर्तृभोक्तृणांदृष्टिनिपातविषयत्वेन अवरवर्णःशूद्रस्तस्माज्जातोऽवरवर्णजः शूद्रएव असावन्नादिस्पर्शेन द्विजातिश्राद्धंनिष्फलयतिऽऽ ॥ २४१ ॥

(४) राघवानन्दः । कोवा केन किंफलंविफलयतीत्याकांक्षायामाह घ्राणेति । घ्राणेनेति त्रयं देशलक्षकं तेन तावत्तद्देशात्तानपसारयेत् । अवरवर्णजश्चण्डालः । ब्राह्मण्यामवरवर्णात् शूद्रात्जातः पूर्वोक्तपरिशेषाच्च ॥ २४१ ॥

(५) नन्दनः । अवरवर्णः शूद्रः । तेन ब्राह्मण्यांजातइत्यवरवर्णजश्चण्डालः ॥ २४१ ॥

(६) रामचन्द्रः । श्राद्धदूषकान्याह घ्राणेनेति द्वाभ्यम् । शूकरः हव्यंकव्यंचघ्राणेन हन्ति नाशयति । अवरवर्णजः शूद्रःस्पर्शेन दूषयति । द्विजातिश्राद्धविषये ॥ २४१ ॥

खञ्जोवा यदि वा काणोदातुः प्रेष्योपि वा भवेत्॥हीनातिरिक्तगात्रोवा तमप्यपनयेत्पुनः॥२४२॥

(ऽऽ) (नात्मीयमावश्यकत्वात्) (अ) चिन्हितपुस्तके अधिकंवर्तते ।

(२४२) खञ्जः=षण्ढः (ग, म, भ)

(१) मेधातिथिः । प्रेष्योभृतकः । अपिशब्दादन्योपियदृच्छयासंनिहितोबान्धवादिरपनेयस्तस्मात्प्रदेशादपसारयेत् । खंजोगतिविकलःअजङ्गमादिहीनातिरिक्तगात्रः षण्डःकुणिखण्डीकश्लीपद्यादिः ॥ २४२ ॥

(२) सर्वज्ञनारायणः । पूर्वश्लोके च श्ववराहकुक्कुटानांदृष्टिपातादिभिरपिदूषकत्वमुक्तं प्रेष्योपि श्राद्धार्थप्रेषणकार्यपि । हीनातिरिक्तगात्रश्चक्षुःपादाभ्यामन्यत्रापि ॥ २४२ ॥

(३) कुल्लूकः । यदि गतिविकलः काणोवा दातुर्दासःशूद्रस्तस्यैव प्रेष्यत्वविधानात् अपिशब्दादन्योपि शूद्रोन्यूनाधिकाङ्गुल्यादिर्वा स्यात्तदा तमपि ततः श्राद्धदेशादपसारयेत् ॥ २४२ ॥

(४) राघवानन्दः । किंच खञ्जइति । प्रेष्यो विप्रोपि खञ्जादिपश्वानांरजस्वलाषण्ढयोश्च स्पर्शदृष्टिसाधारणो दोषोऽतः श्राद्धस्थलादङ्गहीनादीन्निःसारयेदिति भावः । अपिशब्दादन्योपिशूद्रः ॥ २४२ ॥

(५) नन्दनः । खञ्जोविकलपादः । दातुः श्राद्धकर्तुः । हीनगात्रो वामनः अतिरिक्तगात्रोऽत्यन्तदीर्घगात्रः । अवयवोवागात्रम् । ततः श्राद्धक्रियास्थानात् ॥ २४२ ॥

(६) रामचन्द्रः । दातुःप्रेष्योवा हीनगात्रः अतिरिक्तगात्रःगात्राधिकोवा तमपि पुरुषंततः श्राद्धादपनयेत् दूरीकुर्यादित्यर्थः । खञ्जतीति खञ्जः । काणोनेत्रविकलः ॥ २४२ ॥

ब्राह्मणं भिक्षुकं वापि भोजनार्थमुपस्थितम् ॥ ब्राह्मणैरभ्यनुज्ञातः शक्तितः प्रतिपूजयेत् ॥२४३॥

(१) मेधातिथिः । अतिथित्वेनागतंब्राह्मणंभिक्षुकंभिक्षार्थिनंब्राह्मणमपिभोजनप्रवृत्तैर्ब्राह्मणैरनुज्ञातः शक्त्यापूजयेत् । भोजनेनभिक्षादानेनवायुक्तार्थतयार्चयेत् यतःसपाकस्तदहस्तदर्थएव ॥ २४३ ॥

(२) सर्वज्ञनारायणः । ब्राह्मणं गृहिणं । भिक्षुकं यतिं व्रतिनंवा । अन्नार्थमुपस्थितम् ॥ २४३ ॥

(३) कुल्लूकः । ब्राह्मणमतिथिरूपंअन्यंवा भक्षणशीलंभोजनार्थंतत्कालोपस्थितंश्राद्धपात्रब्राह्मणैरनुज्ञातोयथाशक्त्यन्नभोजनेन भिक्षादानेन चार्हयेत् ॥ २४३ ॥

(४) राघवानन्दः । प्रासङ्गिकमाह ब्राह्मणमिति । भिक्षुकं संन्यासिनं । ब्राह्मणैः श्राद्धनिमन्त्रितैः ॥ २४३ ॥

(५) नन्दनः । ब्राह्मणैः श्राद्धभोक्तृभिः ॥ २४३ ॥

(६) रामचन्द्रः । श्राद्धकाले ब्राह्मणंवा गृहस्थंवा भिक्षुकंवा भोजनार्थमुपस्थितं तैःनिमन्त्रितैर्द्विजैरनुज्ञातःसन् शक्तितः पूजयेत्भोजयेत् ॥ २४३ ॥

सार्ववर्णिकमन्नाद्यंसन्नीयाप्लाव्य वारिणा ॥ समुत्सृजेद्भुक्तवतामग्रतोविकिरन् भुवि ॥ २४४ ॥

(१) मेधातिथिः । वर्णशब्दःप्रकारेद्रष्टव्यः । सर्वप्रकारैर्व्यञ्जनैरुपेतमन्नाद्यं । सन्नीयएकीकृत्य वारिणाआप्लाव्य भुक्तवतांनृमानांनृमात्स्वइतिवचनानन्तरंअग्रतःसमुत्सृजेत् विकिरेत् नैकस्मिन्नेवदेशे किंतर्हिविशीर्णंभुवि । नपात्रेषु भूमावपिनशुद्धायांकिंतर्हिवक्ष्यति दर्भेषुविकिरइति सर्वान्नर्वाविकिरंकुर्यादितिशङ्खः । असंस्कृतप्रमीतानांत्यागिनांकुलयोषितां । उच्छिष्टंभागधेयंस्याद्दर्भेषुविकिरश्चयः ॥ नास्यकार्योग्निसंस्कारइत्यत्रिवर्षाअसंस्कृतास्तेषांप्रमीतानां पात्रस्थंउच्छिष्टंदर्भेषुविकिरश्चतेषांभागधेयम् । भागधेयशब्देनोच्येते। नहितेषांश्राद्धोपकारोनास्ति त्यागिनांगुर्वादीनांअथवाकुलयोषितांकु-

---

(२४४) विकिरन्=विचरन् (मेधा०)

ल्स्त्रीणामदृष्टदोषाणांभार्याणांत्यक्तारः स्वतन्त्राः अन्येतुकुलयोषितामित्यस्मिन्ननूढाःकन्याःकुलयोषितइतिव्याचक्षते । अत-उच्छिष्टंतेभ्यउद्देष्टव्यं । नचवाच्यमपवित्रमुच्छिष्टंकथंभागधेयेनकल्पतामिति वचनान्नास्त्यपवित्रता सोमोच्छिष्टवत्॥२४४॥

(२) **सर्वज्ञनारायणः** । सार्ववर्णिकंसर्वव्यञ्जनसहितं । वर्णोव्यञ्जनं । अन्नमोदनमाद्यंफलादि सन्नीयैकीकृत्य विकिरन्विक्षिपंकुर्वन् समुत्सृजेत् भुव्यास्तीर्णकुशाग्रांदर्भेषु विकिरश्चयइत्युत्तरत्र दर्शनात् ॥ २४४ ॥

(३) **कुल्लूकः** । वर्णशब्दः प्रकारवाची । सर्वप्रकारकमन्नादिकंव्यञ्जनादिभिरेकीकृत्योदकेनाप्लावयित्वा कृत-भोजनानांब्राह्मणानांपुरतोभूमौ दर्भेषु विकिरश्च यइति वक्ष्यमाणत्वाद्दर्भोपरि निक्षिपेत्त्यजेत् ॥ २४४ ॥

(४) **राघवानन्दः** । श्राद्धस्योत्तराङ्गमाह सार्ववर्णिकमिति त्रिभिः । वर्णशब्दःप्रकारे तेनाघ्र्यादिसर्वप्रकारमन्न-मिति । सन्नीयव्यञ्जनादिभिरुपकृत्य विकिरन् बहुदेशव्यापि यथास्यात्तथोत्सृजेत् ॥ २४४ ॥

(५) **नन्दनः** । अथभुक्तवत्सुब्राह्मणेषु कर्तव्यमाह सार्वेति । संनीय व्यञ्जनैःसंयोज्य । सार्ववर्णिकंसर्ववर्णविहित-मअन्नोत्सर्गस्येदंप्रयोजनमुक्तम् । सर्ववर्णहितार्थमुत्सृजेदित्यर्थः ॥ २४४ ॥

(६) **रामचन्द्रः** । अन्नाद्यंवस्तु सार्ववर्णिकं सर्वव्यञ्जनसहितंवारिणा आप्लाव्यमोक्ष्य सन्नीय मिश्रयित्वा भुक्तव-तामग्रतो भुवि विकिरान्नंसमुत्सृजेत् एकस्मिन्देशे विकिरान्भुवि न पात्रेषु ॥ ४४ ॥

असंस्कृतप्रमीतानां त्यागिनां कुलयोषिताम् ॥ उच्छिष्टंभागधेयंस्याद्दर्भेषु विकिरश्च यः॥२४५॥

(२) **सर्वज्ञनारायणः** । त्यागिनां प्राणत्यागिनामविधिना कुलयोषितामपत्यादिशून्यानां । उच्छिष्टं विप्रैर्भाण्डेषु त्यक्तंभागधेयं भागः ॥ २४५ ॥

(३) **कुल्लूकः** । नास्य कार्योऽग्निसंस्कारइति निषेधात्संस्कारानर्हबालानांतथा कुलस्त्रीणामदृष्टदोषाणांये त्यक्तार-स्तेषांपात्रस्थमुच्छिष्टंदर्भेषु च योविकिरः सभागःस्यात् । अन्ये तु त्यागिनामिति गुर्वादित्यागिनांकुलयोषितामिति स्वात-न्त्र्येण तु कुलयोषितामनूढकन्यानामिति व्याचक्षते । गोविन्दराजस्तु त्यागिनांकुलयोषितामिति सामान्योपक्रमादिदंविशे-षाभिधानं संस्कृतंभक्षाइतिवत्ततःस्वकुलंत्यक्त्वा गतानांकुलस्त्रीणामित्याह ॥ २४५ ॥

(४) **राघवानन्दः** । तदुद्देश्यानाह असंस्कृतेति । असंस्कृतप्रमीतानां मृतत्वेन संस्काररहितानां अत्रिवर्षाणां निरपराधंगुर्वादित्यागिनां । एतेनैषांसंस्काराभावोध्वनितः । कुलयोषितां अनूढकन्यकानां कुलटानामिति गोविन्दराजः। उच्छिष्टंपात्रस्थं भागधेयंभागः । विकिरोविक्षिप्तान्नानि तान्यपि भागस्तेषामिति ॥ २४५ ॥

(५) **नन्दनः** । असंस्कृतप्रमीतानामनुपनीतमृतानाम् । त्यागिनांसन्यासिनाम् । भागधेयंभागः । दर्भेषु विकिरे-श्चयत्तद्भागधेयंस्यात् । यतएवंतस्मात्किञ्चिदुच्छेषयेद्दर्भेषुविकिरेदिति ॥ २४५ ॥

(६) **रामचन्द्रः** । त्रिवर्षन्यूनानामसंस्कृतादीनां उच्छिष्टंभागधेयस्यात् यःदर्भेषु विकिरः भागधेयंस्यात् । अ-स्मिन्दग्धाश्च येऽन्नादाये सदायाःकुले मम । भूमौ दत्तेन तृप्यन्तु तृप्तायान्तु परांगतिम् ॥ त्यागिनांअविधिना प्राणत्यागिनां स्वकुलत्यक्तानांवा योविकिर एतादृशानांपुंसांभागधेयंस्यात् । च पुनरुच्छिष्टंभागधेयंस्यात् । कुलयोषितांपत्यादिरहितानां संबन्धे षष्ठी । दर्भेषु विकिरःभागधेयंस्यात् ॥ २४५ ॥

उच्छेषणं भूमिगतमजिह्मस्याशठस्य च ॥ दासवर्गस्य तत्पित्र्ये भागधेयं प्रचक्षते ॥ २४६ ॥

(१) **मेधातिथिः** । पात्रस्थस्यपूर्वेणप्रतिपत्तिरुक्ता । भूमौनिपतितस्योच्छिष्टस्यदासवर्गार्थतानेनकथ्यते ।

अजिह्मोकुटिलः । अशठःअनलसः । तादृशस्यदासवर्गस्य सभागः तस्मात् प्रभूतंदातव्यं येनभूमौभुञ्जानस्यपततीति॥२४६॥

(२) सर्वज्ञनारायणः । यत्तूच्छिष्टंतैरेवभूमौत्यक्तंतत्राह उच्छेषणमिति । जिह्मोऽलसः । शठोवक्रगतिः ॥ २४६ ॥

(३) कुल्लूकः । उच्छिष्टंयद्भूमिगतंतद्दाससमूहस्यावक्रस्यानलसस्याकुटिलस्य च पित्र्येश्राद्धकर्मणि भागधेयंमन्वादयोवदन्ति ॥ २४६ ॥

(४) राघवानन्दः । भूमिगतस्य प्रतिपत्तिमाह । उच्छेषणमिति । उच्छेषणं उच्छिष्टं अजिह्मस्याकुटिलस्येति विशेषणात् कुटिलस्य न किंचित् । दासवर्गस्य गर्भदासादिसमूहस्य पित्र्ये श्राद्धकर्मणि प्रचक्षते वदन्ति मन्वादयः ॥ २४६ ॥

(५) नन्दनः । उच्छेषणंयदितिशेषः । अजिह्मस्यर्जोः । अशठस्यानृशंसस्य । यतएवंतस्मात्किञ्चिदुच्छिष्टं भूमिगतंकुर्यादिति ॥ २४६ ॥

(६) रामचन्द्रः । उच्छेषणमुच्छिष्टं सारशेषंभूमिगतमन्नंदासवर्गस्य । पित्र्ये पितृकार्ये तंतु भागधेयं प्रचक्षते । कीदृशस्य दासवर्गस्य अजिह्मस्य च पुनरशठस्य अनलसस्य ॥ २४६ ॥

आसपिण्डक्रियाकर्म द्विजातेः संस्थितस्य तु ॥ अदैवं भोजयेच्छ्राद्धं पिण्डमेकंतु निर्वपेत् ॥ २४७ ॥

(१) मेधातिथिः । संस्थितस्यद्विजातेरसपिण्डक्रियाकर्म प्रथममृतस्यासहपिण्डकरणाख्यंकर्मकर्तव्यं । सहपिण्डदानंपूर्वाभ्यांनकर्तव्यं कथंतर्हिकर्तव्यं पिण्डमेकंचनिर्वपेदिति । चशब्दएवशब्दस्यार्थे तस्माएवप्रेतायैकंपिण्डंनिर्वपेत् । ब्राह्मणोहितस्माएवभोजयितव्यः । स्मृत्यन्तरेअन्यापीतिकर्तव्यता वैशेषीस्मर्यते । आवाहनाग्नौकरणरहितमिति । अग्नौकरणशब्देनचात्राग्नौकरिष्यइत्यनुज्ञापनंप्रतिषिध्यते न पुनर्होमः । तथाहिगृह्ये प्रेतश्राद्धमेवाधिकृत्यहोमआम्नायते । यस्मिंश्चकालेकर्मकर्तव्यं यावन्तंचकालंस्मृत्यन्तरादन्वेष्टव्यं । आद्यमेकादशेऽहनि । मृताहेपिचकर्तव्यं प्रतिमासंतुवत्सरं । प्रतिसंवत्सरंचैवश्राद्धंवैमासिकार्थवदिति । तथाचकाठके । एवंसांवत्सरिकमिति एकादशग्रहणंचाशौचनिवृत्त्युपलक्षणार्थं । यतः शुचिर्भूतः पितृभ्योदद्यादितिश्रूयते । संवत्सरान्तेहिसपिण्डीकरणंगृह्यकाराःस्मरन्ति । एतच्चश्राद्धमेकोद्दिष्टंतदङ्गभूतंचनिर्वपणं । यत्तुश्रौतेपितृभ्योदद्यादितिवचनात् । पितृपितामहायप्रपितामहायचेति अकृतेसपिण्डीकरणेनेहदानंयुक्तं नहिस्मृत्या श्रुतिर्बाधितुंशक्यतइति ॥ २४७ ॥

(२) सर्वज्ञनारायणः । अत्रान्तरेएकोद्दिष्टश्राद्धेविशेषमाह असपिण्डेति । असपिण्डक्रियाकर्मकृतसपिण्डीकरणक्रियायांदशायांश्राद्धकर्मद्विजातेः संस्थितस्यानुष्ठेयं तत्र चादैवं वैश्वदेवहीनं विप्रमेकं भोजयेत् । इतराङ्गानुष्ठानक्रमः कालश्च स्मृत्यन्तरसिद्धोग्राह्यः ॥ २४७ ॥

(३) कुल्लूकः । मर्यादायामाङ् नाभिविधौ सपिण्डीकरणश्राद्धपर्यन्तमचिरमृतस्य द्विजातेश्च वैश्वदेवब्राह्मणभोजनरहितंश्राद्धार्थमन्नंब्राह्मणंभोजयेदेकंच पिण्डंदद्यात् । अस्य च श्राद्धस्यानुष्ठानं एकोद्दिष्टंदैवहीनमेकार्घैकपवित्रकम् । आवाहनाग्नौकरणरहितंह्यपसव्यवदिति याज्ञवल्क्यादिस्मृतिष्ववगन्तव्यम् ॥ २४७ ॥

---

(२४७) आसपिण्ड=असपिण्ड (क, ख, ग, च)

५४

(४) राघवानन्दः । एकोद्दिष्टस्य पार्वणविकृतितया सर्वधर्मप्राप्तौ यथागृह्यमेधीये दर्शविकृतावपि आज्यभागौ यजेतेति तयोरेवानुष्ठानं नान्यस्येति वचनात् तन्न्यायेनाह आसपिण्डेतिद्वाभ्यां। सपिण्डीकरणपर्यन्तम् मर्यादायामाङ् । संस्थितस्यासन्नमृतस्य एकंपिण्डं एकब्राह्मणभोजनंदैवहीनं एकार्घ्यैकपवित्रं आवाहनाग्नौकरणरहितं स्मृत्यन्तरादवगन्तव्यम् । तच्च यावज्जीवं । मृतेहनि तु कर्तव्यं प्रतिमासं तुवत्सरं । प्रतिसंवत्सरे चैव माद्यमेकादशेहनीति स्मृतेः ॥ २४७ ॥

(५) नन्दनः । असपिण्डीकृतपितृकस्य श्राद्धे विशेषमाह आसपिण्डेति । आसपिण्डक्रियाकर्मआसपिण्डक्रियायामनुष्ठानंसपिण्डीकरणात्प्राक्कर्तव्यं श्राद्धकर्मेति यावत् । उच्यतइतिशेषः ॥ २४७ ॥

(६) रामचन्द्रः । संस्थितस्य मृतस्य द्विजाते असपिण्डक्रिया सपिण्डकरणव्यतिरिक्तं कर्म । अदैवंवैश्वदेवरहितंश्राद्धंभोजयेत् च पुनः एकं पिण्डंनिर्वपेत् । एकोद्दिष्टमित्यर्थः ॥ २४७ ॥

सहपिण्डक्रियायां तु कृतायामस्य धर्मतः ॥ अनयैवावृता कार्यं पिण्डनिर्वपणं सुतैः ॥ २४८ ॥

(१) मेधातिथिः । यदातुसपिण्डीकरणंकृतंभवति तदाअनयैवावृतापार्वणश्राद्धविधिनात्रिभ्योदद्यात् आवृदितिकर्तव्यता नसपिण्डीकरणश्राद्धंदैवपूर्वंनियोजयेत् । पितॄनावाहयेत् । अत्रपुनःप्रेतं पितरश्चात्र प्राक्सपिण्डीकृताः पितृवर्गमनुप्रवेशिताःपितामहादयउच्यन्ते । तानाशयेत् । तत्रपुनःशब्दस्तेष्वेवब्राह्मणेषु प्रेतआवाहयितव्यः । तत्रहिसर्वैस्तैःसहसंसर्गस्तस्यसंसृजनायचतत्कर्म । यदपिविष्णुनापठितं । प्रेतायब्राह्मणान्भोजयेत् प्रेतपित्रे प्रेतपितामहाय प्रेतप्रपितामहायेति । अत्रापिनैवंश्रूयते पृथक्भोजयेदिति । तत्रयथाबहुदैवत्यंहविर्बह्वीर्देवताउद्दिश्यसकृदेकंहूयते एवंब्राह्मणोपिविद्वानुद्दिश्यभोज्येतेति नाकिंचिदनुपपन्नं । तथाहिसहवचनगृहीतंभवति पित्र्येचनयुग्माभोजिताभवन्ति । यथाएकैकमुभयत्रवेति येषांविधिस्तत्रतेएकःसर्वोद्देशेनभोज्यते । एवमेतद्द्रष्टव्यं । नन्वेवंसतिपितृकृत्ये त्रीनिति सर्वदेवसहोद्देशःप्राप्नोति एकैकस्मिन्ब्राह्मणेसर्वउद्दिश्येरन्नतत्रापिनपृथक्ग्रहणमस्ति कथंनास्ति गृह्येह्यपिपठ्यते नत्वेवैकं सर्वेषांपिण्डैर्व्याख्यातं । किंच प्रेतपात्रंपितृपात्रेषुसेचयेदर्घार्थमित्याह तत्रकृतासन्नपात्राभावेप्रेतपात्रोदकस्यकुतःपात्रादर्घदानं यदितावत्संमीलितास्तदयुक्तं पितामहादेस्तत्कल्पितंनपितुर्नचान्यार्थकल्पितादित्यन्यार्थतायुक्ता । अथकृत्वार्घदानंपश्चात्संनयनंकुर्यात् । तदाकृत्वार्घदानंतदर्थसन्नयनस्यत्वतंत्रार्घार्थमसेचयेदितिविरुध्येतवचनं । उक्तेनात्रप्रकारेण नकश्चनविरोधः । अथकोयंप्रेतोनाम प्रपितामहायपिण्डःसपिण्डीकारणादूर्ध्वंनदीयते यतस्तेष्वेवानुप्रविष्टः । तथाचस्मृतिः । यःसपिण्डीकृतंप्रेतंपृथक्पिण्डेनयोजयेत् । विधिघ्नस्तेनभवतिपितृहाचोपजायते ॥ इति पृथगेवहितस्मैनिरूप्यते । नत्वेकःसर्वेभ्यइति । मन्त्राश्चएतमेवार्थमभिवदन्तियेसमानाइत्यादयः । अत्रोच्यते । नायंप्रेतशब्दोयतःक्रियायोगेनवर्तते । रूढिरियंमृतःप्रेतइदानींप्रेतउच्यते नहिदूरमध्वानंगतःप्रेतउच्यते । अस्तिचक्रियायोगः अविशेषेणपूर्वप्रेतइदानींप्रेतेच । तथाचश्रुतिः । प्रयन्नेवास्माल्लोकाद्येसमानाइति । अचिरमरणेप्रेतप्रयोगंदर्शयति । प्रेतायान्नंदिनत्रयमितिसद्यःसंस्थितमधिकृत्य । यत्तुपृथक्पिण्डेनेति अस्यायमर्थः सपिण्डीकरणादूर्ध्वमेकोद्दिष्टंनकर्तव्यं यदायदाश्राद्धंतदातदात्रिभ्यःमृताहनिपितृभ्यस्त्रिभ्यएवकर्तव्यं नैकस्माएवपित्रे तथाअनयैवावृताकार्यमितिपार्वणश्राद्धेकर्तव्यतावातिदिश्यते ननुचानयैवेतिप्रकृतपरामर्शाःप्रतीयन्ते सन्निहितवचनत्वात्सर्वनाम्नां सन्निहितश्चैकोद्दिष्टविधिः । नैवं यदिहिकृतेपिसपिण्डीकरणे एकस्मै-

---

(२४८) सहपिण्डक्रियायान्तु=सपिण्डस्यक्रियायान्तु (च)

वक्रियेत तदाभेदनिर्देशएवनोपपद्यते तुशब्दश्चप्रकृतायामितिकर्तव्यतायांभेदंसूचयति । असपिण्डक्रियायामेषविधिः सहपिण्डक्रियायां पुनःकृतायां नायंमन्तव्यइति । अतोऽव्यवहिताऽपिबुद्धिस्थत्वात्पार्वणतातिदिश्यते । किंचकृतेस-पिण्डीकरणे यदेकोद्दिष्टंस्यात्कर्तव्यं तदात्रिभ्योनमितिअमावास्यायामितिकेचित् । कोविशेषस्तत्रापिसहपिण्डक्रिया-मित्येवमर्थःकिंनास्ति। नचमानवशास्त्रे कालान्तरमृताहे प्रतिसंवत्सरंचेत्यादि प्रतीतं येनतद्विषयमेतद्याख्यायते अतो-विशेषात्सर्वत्रैकोद्दिष्टानिप्राप्नुवन्ति । तत्रमहाभारतवचनंविरुध्येत। तीर्थानिप्रकृत्योक्तं । श्राद्धेनतर्पयामासस्वैपूर्वपिता-महानिति । यदपिस्मृत्यन्तरंप्रतिसंवत्सरंचैवश्राद्धंवैमासिकार्थवत् । तत्रापिमासिकशब्देनामावास्यमेवश्राद्धमुच्यते सर्व-श्राद्धानांतस्यप्रकृतित्वात् । तत्रहिधर्माःसमाम्नाताः । नतुप्रतिमासंनुसंवत्सरमिति । एतन्मासिकशब्देनाभिधातुंयुक्तं नहि-तस्यविशिष्टाःकेचिद्धर्माःसमाम्नाता यैर्भिद्येत। एकोद्दिष्टंत्वाद्यमेकादशे क्षत्रियस्यत्रयोदशे इत्याद्यत्रापिविद्यते। अतो-नैकोद्दिष्टंमासिकशब्देनाभिधातुंयुक्तं । मासकालसंबन्धाद्धितन्मासिकमुच्यते । नचतस्यमासेनैवसंबन्धः। कालान्तरेणा-पिसंबन्धस्यदर्शितत्वात्। शुचिर्भूतःपितृभ्योदद्यादितिमासादूर्ध्वमपिकरणान्मासेचाकरणान्नात्रमासिकशब्देनतस्याभिधानं। अमावास्यायास्तत्रामौमासिकशब्दश्रवणात्पिण्डानांमासिकश्राद्धमिति नियतत्वात्कालान्तरसंयोगस्याभावाद्धर्मवत्त्वाच्च युक्तस्तदीयधर्मातिदेशःआमश्राद्धमपि पार्वणप्रकृतिकमेव तत्प्रकृतित्वेचत्रिभ्योदानेप्राप्ते एकोद्दिष्टताविधीयते। यदपि याज्ञ-वल्क्यवचनं। मृताहनितुकर्तव्यंप्रतिमासंतुवत्सरं। प्रतिसंवत्सरंचैवमाद्यमेकादशेऽहनि ॥ तत्राप्येवमेतादृशीतिकर्तव्यताउ-च्यते। तत्रापिह्यमावास्यमेवप्रकृतत्वेनावगतं अतोनमासकालयोगेपिएकोद्दिष्टेतदीयधर्मातिदेशोअन्यत्रयुक्तः । भिक्षुको-भिक्षुकाद्याचते सोपियतोन्यस्यविकारः। किंच एकमेवश्राद्धंतस्मान्नमासिकमेवश्राद्धं तस्मान्नमासिकशब्दस्यैकोद्दिष्ट-विशेषविषयतायांप्रमाणमस्ति । याज्ञवल्क्येप्येवमिति । यद्यनन्तरावमर्शःतदासपिण्डीकरणेतिकर्तव्यतातिदेशःप्राप्नोति । तदनन्तरंह्येतदुक्तं । एतत्सपिण्डीकरणमितिपठित्वार्वाक्सपिण्डीकरणादितिच ततोनन्तरमुक्तंमृताहनीत्यादितस्मात्सन्नि-धानमकारणीकृत्यधर्मवत्त्वेनामावास्यस्यैवमितिनिर्देशः । मन्त्राश्चात्मत्पक्षमेवसुतरामवद्योतयन्ति । संसृज्यध्वं पूर्वैः पितृभिःसहेति पूर्वैःपितृभिःसहवर्तमानाउच्यन्ते । संसृज्यध्वमितिबहुवचनंपूजायां। तथाचनिरुक्तकारः। एताउत्या-उषसइति। एतास्ताउषासइत्येकस्याएवपूजनार्थेबहुवचनमिति । अथसंसृज्यध्वमितियेषुपिण्डेषुनिक्षिप्यन्ते तउच्यन्ते-यश्चनिक्षिप्यतेबहुवचनेनपूर्ववत्पूर्वैभिःपितृभिरिति। एवंचपूर्वैरित्येवमेवबहुवचनंप्रायोगिकंभविष्यति। इतरथासंसृज्यध्व-मितिनिर्निक्षिप्यमाणपिण्डाभिधानेउभयत्रबहुवचनमयथार्थकल्प्यमितितदेतदपिनाकिंचिद्यतएकैकेनपिण्डेनपिण्डांशःसंसृज्यते चतुर्थपिण्डमुत्सृज्य त्रेधंकृत्वा पिण्डेषुनिदध्यादिति अतोनैवात्रयुगपदधिकरणवचनतास्ति येनबहुवचनमवकल्पेत। एकै-काभिधानेनकृतआन्वयिकंसंसृज्यध्वमितिबहुवचनं परोक्षाभिधानंनकल्प्यते। पूर्वैभिरितिनिर्निक्षिप्यमाणपिण्डवचनात्त्वनए-भिरितिनिर्देशोयुक्तस्यात्। नचायंमन्त्रोविधायकोयेनतदर्थनिर्णयेप्रयतामहेअभिधायकोयं अभिधानंचगुणविनियोगतोवि-नियोगश्चसंसर्जनंनप्रकाशयति। संख्यात्रनविनियुक्ता नप्रकाशाप्रा संभवमात्रेणान्वीयते तस्मान्नमन्त्रात्पूर्वप्रतिपत्तिः। ये-प्याहुश्चतुर्थःशब्दः पूर्वतरउपपद्यते पिताहिप्रथमः तदपेक्षयाप्रपितामहात्पूर्वश्चतुर्थइति। एतदपिचसम्यक्पूर्वेषांपिण्डान्निधाय चतुर्णांपूर्णश्चतुर्थःप्रेतपिण्डएवभवति। पित्रुपक्रमंचेदंश्राद्धंनप्रेतोपक्रमं। एवंमुच्यतेपितॄनावाहयेत्पुनःप्रेतंननिर्दिशेदितियथा-यप्रेतायप्रथमःपिण्डस्ततस्तत्पित्रेइत्यादिक्रमः। तस्यापिकृतोयन्नियमः। यएवासौचतुर्थस्तस्यैवेदंत्रैधंकरणंपिण्डेषुनिधानंवि-धीयते। एतावद्धितद्वाच्यंचतुर्थपिण्डमुत्सृजेत्त्रेधंकृत्वेति। तत्रानन्तर्यादुत्सृजतिनासंबन्धश्चतुर्थपिण्डमित्यनयोःप्रतीयते त्रैधं-कृत्वेत्यत्रतुकस्येदंत्रैधंकरणमित्यपेक्षायां सन्निहितःपिण्डःसंबध्यते।तावतैवनिराकांक्षीकृतेवाक्येचतुर्थमित्यस्यसंबन्धेनाकि-

चित्यमाणमस्ति। तत्रयस्यकस्यविभागेप्राप्तेस्मृत्यन्तरान्निर्णयः। निरूप्यचतुरःपिण्डान्पिण्डदःप्रतिनामतः। येसमानाइति-द्वाभ्यामाद्यंतुविभजेत्त्रिधेति॥ आद्यत्वंदानाभिप्रायेण नपुनरादिपुरुषसंबन्धात्। तथाहिप्रपितामहादिःस्यात्पितामहात्पूर्वःपि-तामहोपिपितुःपूर्वइत्यनवस्थानादप्रतिपत्तिः। दातुंनियतक्रमतोव्यवस्थितमादित्वं। एवंच चतुर्थमितिपदेनविशिष्टेपिण्डेक्रि-यात्रयेपिस्मृत्यन्तरवशाद्दानक्रमेणैवाद्यस्यविभागोयुक्तः। अतोयदुक्तंकाठके। पूर्वमेतस्येष्टोविभागःक्रियतइतिकासावस्ये-ष्टता। यच्चोक्तं। अतएवतस्मैअदानंयतएववासावन्तर्भावितः तत्रांकिंचिद्वचनान्नदीयते। नचतुर्थपिण्डोगच्छतीति तथात्रि-षुपिण्डःप्रवर्तते। इतियत्त्वयंत्वकृतःपाठः। पुनःप्रेतंननिर्दिशेदिति व्याख्यातंच। अन्तर्भाविते पूर्वप्रेतेपुनर्दानंनिषेधति नै-वायपाठोस्ति प्रतिषेधार्थयोनपठ्यते समुच्चयार्थोयश्चकारःपठ्यते। सत्यपिवातत्रपठिचसपिण्डीकृतमित्यत्रपृथक्पिण्डप्रति-षेधस्ययागतिरुक्तासैवात्रवेदितव्या। यानितु वाक्यानि। सपिण्डीकरणादूर्ध्वंप्रतिसंवत्सरंसुतः। एकोद्दिष्टंतुकुर्वीतपित्रोरन्य-त्रपार्वणं॥ पार्वणमित्यादीनि यद्यनंतानिवाक्यानिसन्ति तदाकिममावास्यायांनामघोषणिकया। नचैतानिवाक्यानिशिष्टप-रिगृहीतासुप्रसिद्धासुस्मृतिषुकासुचिदुपलभ्यन्ते तत्स्मान्नकिंचिद्विशेषेलिङ्गमस्ति येनपूर्वप्रेतपिण्डानिधीयतइतिप्रतिपद्येमहि। तस्मात्समाचारोनत्याज्यः। अयमेवपक्षोयुक्तियुक्तइतिदर्शितः। तस्मान्मतभेदेनापच्छेदतःपूर्वप्रेतनिधानपक्षोपन्यासःकेषां-चित्। असपिण्डक्रियाकर्म द्विजातेःसंस्थितस्य॥ अदैवंभोजयेच्छ्राद्धंपिण्डमेकंच निर्वपेत्॥ सपिण्डीकरणंमृते पितरि जी-वति पितामहे पाक्षिकंज्ञेयम्। यदा न जीवन्तमतिक्रम्य ददातीत्येवंनाश्रीयते। यदा तु सएषाप्रतास्यादिति पक्षस्तदा पितामहमतिक्रम्य पूर्वः संसर्जनीयः। एवन्तुपुत्रस्यापि मृतस्यपित्रा विकल्पेनैव कर्तव्यमेवमनपत्यभार्यामरणे जीवन्मा-तृकस्यैषएव विधिः प्रमतानामितरे कुर्वीरंस्ताश्च तेषामिति सुतैरपत्यैरित्यर्थः। यद्यपि सुतग्रहणंतत्स्थानापन्नानांमन्ये-षामपि ग्रहणं। यदि स्वशब्देन नास्ति निषेधः॥ २४८॥

(२) सर्वज्ञनारायणः। धर्मतोधर्मैरङ्गैःसह अनयावृता पार्वणप्रयोगेण सुतैरौरसक्षेत्रजपुत्रिकापुत्रैः॥ २४८॥

(३) कुल्लूकः। अस्येति यस्येदमेकोद्दिष्टंविहितंतस्य धर्मतःस्वगृह्यादिविधिना सपिण्डीकरणश्राद्धे कृते अनयैवावृ-ताउक्तामावास्याश्राद्धेतिकर्तव्यतया पिण्डनिर्वपणंपार्वणविधिना श्राद्धंपुत्रैःसर्वत्रमृताहादौ कर्तव्यम्। नन्वनयैवावृताइ-त्यनेन प्रकृतमेकोद्दिष्टमेव हि किमिति न परामृश्यते। उच्यते। तर्हि सपिण्डीकरणात्पूर्वमेकोद्दिष्टं सपिण्डीकरणे कृते पुनः अनयैवावृताइति भेदनिर्देशोनस्यात् ततोमावास्येतिकर्तव्यतैव प्रतीयते॥ २४८॥

(४) राघवानन्दः। तस्यैव विशेषमाहसहेति। धर्मतःस्वगृह्यविधिना सहपिण्डक्रियायांकृतायामिति। सातुगन्धो-दकतिलैर्विमिश्रंकुर्यात् पात्रचतुष्टयं अर्घ्यार्थंपितृपात्रेषु प्रेतपात्रंप्रसेचयेत्। ये समानाइति द्वाभ्यां। शेषंपूर्ववदाचरेत्। एतत् सपिण्डीकरणमिति याज्ञवल्क्यः। अनयैकोद्दिष्ट इत्यादिकया आवृता परिपाट्या। तदुक्तम्। सपिण्डीकरणादूर्ध्वं-प्रतिसंवत्सरंपुनः। एकोद्दिष्टंतु कुर्वीत पित्रोरन्यत्र पार्वणमिति॥ पार्वणे तु पार्वणपरिपाटीति॥ २४८॥

(५) नन्दनः। सहपिण्डक्रियायां सपिण्डीकरणे। आवृता क्रियया। अनयोक्तेन मासिश्राद्धप्रयोगेणेत्यर्थः॥२४८॥

(६) रामचन्द्रः। सहपिण्डक्रियायांकृतायांतु अस्य द्विजस्य धर्मतः अनयैव पार्वणरूपयाआवृता परिपाट्या सुतैरौरसादिभिःपिण्डनिर्वपणंकार्यम्॥ २४८॥

श्राद्धं भुक्त्वा यउच्छिष्टं वृषलाय प्रयच्छति॥ समूढोनरकं याति कालसूत्रमवाक्शिराः॥२४९॥

(१) मेधातिथिः। यद्यपि श्राद्धभुजोदोषग्रहणंतथापि कर्तुरयमुपदेशः। तेन तथाकर्तव्यंयथा न प्रयच्छति ऋ-त्विग्वृषवत्। वृषलःशूद्रः। अवाक्शिराऊर्ध्वपादः। प्रकृतएव सपिण्डीकरणमाविष्ठामीति श्राद्धग्रहणम्॥ २४९॥

(२) सर्वज्ञनारायणः । श्राद्धभुकेत्यादिश्लोकद्वयं सर्व श्राद्धसङ्गतेर्निषेधविधिः । उच्छिष्टं पात्रस्थम् ॥ २४९॥

(३) कुल्लूकः । आश्रितशूद्रायउच्छिष्टदानमसक्तावयंनिषेधः । श्राद्धभोजनोच्छिष्टंयःशूद्राय ददाति समूर्खः कालसूत्रंनाम नरकमधोमुखंगच्छति ॥ २४९ ॥

(४) राघवानन्दः । श्राद्धभुजउत्तरकालीननियममाह श्राद्धमिति । सश्राद्धभोक्ता । अवाक्शिराअधोमुखः॥२४९॥

(५) नन्दनः । अथभुक्तवतांवर्जनीयंश्लोकद्वयेनाह ॥ २४९ ॥

(६) रामचन्द्रः । यःश्राद्धंभुक्त्वा वृषलाय शूद्रायोच्छिष्टंप्रयच्छति सकालसूत्रंनरकम् अवाक्शिराअधोमुखःसन्याति ॥ २४९ ॥

श्राद्धभुग्वृषलीतल्पं तदहर्योधिगच्छति ॥ तस्याः पुरीषे तंमासं पितरस्तस्य शेरते ॥ २५० ॥

(१) मेधातिथिः । वृषली स्त्रीमात्रोपलक्षणार्थमेतदित्याहुः निरुक्तंकुर्वन्ति वृषस्यन्ती चलयति भर्तारमितिवृषली । सा च ब्राह्मणी अन्यावा सर्वानिषिध्यते । तथा च स्मृत्यन्तरं तदहर्ब्रह्मचारी स्यान्नियतइति । तल्पशब्देन मैथुनयोगोभण्यते । न शयनारोहणप्रतिषेधएव । अहर्ग्रहणमहोरात्रलक्षणापरम् । रात्रावपि निषेधः स्यात् । पुरीषइति निन्दार्थवादोनिवृत्त्यर्थः । पितरस्तस्य श्राद्धभुजः । अयमपि पूर्ववद्वचनीयः । इदन्तु युक्तं यदुभयोर्नियमइति । नैमित्तिकोयंभोक्तृधर्मः । श्राद्धभोजने निमित्ते विधीयते । प्रकरणार्थश्च कर्माङ्गोपि ॥ २५० ॥

(२) सर्वज्ञनारायणः । वृषलीतल्पं शूद्रयाधिष्ठितांशय्यांतदहस्तदहोरात्रे ॥ २५० ॥

(३) कुल्लूकः । वृषलीशब्दोत्र स्त्रीपरइत्याहुः । निरुक्तंचकुर्वन्ति । वृषस्यन्ती चपलयति भर्त्तारमिति वृषली । ब्राह्मणस्य परिणीता ब्राह्मण्यपि वृषलीति । श्राद्धंभुक्त्वा तदहोरात्रेयः स्त्रीसंप्रयोगंकरोतितस्य पितरस्तस्याः पुरीषे मासं शेरतइति निवृत्त्यर्था निन्दा ॥ २५० ॥

(४) राघवानन्दः । वृषलीतिपदंस्त्रीमात्रपरं । वृषस्यन्ती या पतिंभर्तारमिति व्युत्पत्तेः । तंमासमिति कालकर्मासादनमासाख्यं तस्यावृषल्याः पुरीषेपितरः तस्य श्राद्धभोक्तुरिति शेषः ॥२५०॥

(६) रामचन्द्रः । तस्याः पुरीषे च वृषल्यापुरीषे । तंमासं तस्य श्राद्धभोक्तुःपितरःशेरते ॥ २५० ॥

पृष्ट्वा स्वदितमित्येवं तृप्तानाचामयेत्ततः ॥ आचान्तांश्चानुजानीयादभितोरम्यतामिति ॥ २५१॥

(१) मेधातिथिः । आचमनिकमन्नपानंदत्वा प्रष्टव्याः । स्वदितमित्यनेन शब्देन स्मृत्यन्तराच्चान्नंपरिगृह्य प्रश्नोयंकर्तव्यः । भवतिहि कस्यचिदयंस्वभावोयद्यसंनिहितमन्नंसत्यपि तदभिलाषे यन्त्रणयात्रंमृग्यते । संनिहितंगृण्हाति । ज्ञात्वा च तृप्ताः स्वदितमित्यनेन शब्देन बृंहणीयाः । वक्ष्यति च पित्र्ये स्वदितमिति ॥ २५१ ॥

(२) सर्वज्ञनारायणः । पृष्ट्वास्वदितमित्याद्येकोद्दिष्टविषयं विशेषाभिधानम् तृप्तास्थेति । स्मृत्यन्तरप्रसिद्धश्राद्धान्तरीयप्रश्नस्थानेस्वदितमिति प्रश्नः । विसर्जनेचाभिरम्यतामिति । अभितइति छन्दोनुरोधात् ॥ २५१ ॥

(३) कुल्लूकः । तृप्तान्ब्राह्मणान्बुध्वा स्वदितमिति पृष्ट्वा तेषामाचमनंकारयेत् । कृताचमनांश्च भो इति संबोध्य अभिरम्यतामिति ब्रूयादभितइतिपाठेभितउभयतइह वा स्वगृहे वास्यतामित्यर्थः ॥ २५१ ॥

(४) राघवानन्दः । प्रकृतंश्राद्धसमापनाङ्गमाह पृष्ट्वेतिद्वाभ्यां । तृप्तान् भूरिभोजनेन । स्वदितमिति पृष्ट्वानुजानीया-

---

(२५१) अभित इतिपाठान्तरम् ॥

दित्यन्वयः। तैरपि सुस्वदितमित्यभिधेयम्। अभिरम्यतां यत्र कापिसुखेनास्यतांभोः ब्राह्मणाः पात्रभोजिनः इत्यनुजानीयादनुज्ञांदद्यात्॥ २५१॥

(५) नन्दनः। स्वदतेऽपि भवद्भ्योभोज्यजातमिदमितिपृष्ट्वा। अभितोरम्यतामस्मिन्स्थानआस्यतांसुखमिति॥२५१॥

(६) रामचन्द्रः। तृप्तास्थइति पृच्छति तृप्तास्मइति तंब्रूयुः। स्वदितमिति पृच्छति सुस्वदितमितिब्रूयुः। ततआचामयेत् आचान्तांस्ताननुजानीयात् अनुज्ञांदद्यात्। अभिरम्यतांस्वेच्छया। अभिरतास्मइति॥ २५१॥

स्वधास्त्वित्येव तं ब्रूयुर्ब्राह्मणास्तदनन्तरम्॥ स्वधाकारः परा ह्याशीः सर्वेषु पितृकर्मसु॥२५२॥

(१) मेधातिथिः। भुक्तवद्भिर्गृहगमनाभ्यनुज्ञातैरनन्तरंस्वधेति वाच्यं। स्वधाकारः स्वधाशब्दोच्चारणम्। प्रकृष्टाआशीः पितृकार्येषु सर्वेषु पक्वान्नापक्वान्नश्राद्धेषु॥ २५२॥

(२) सर्वज्ञनारायणः। तत्रस्वधास्त्विति तैः प्रतिवक्तव्यम्। स्वधाकारः स्वधोच्चारणं पराह्याशीः पितृणामिष्टार्थोक्तिः। अत्रसर्वेष्वित्यभिधानात्। एतत्स्मृतिविहितं पार्वणेऽप्येतदेव तृप्तिप्रश्नादि कार्यमित्येके॥ २५२॥

(३) कुल्लूकः। अनुज्ञानानन्तरंब्राह्मणाः श्राद्धकर्तारंस्वधास्तुइति ब्रूयुः। यस्मात्सर्वेषुश्राद्धतर्पणादिपितृकर्मसु स्वधाशब्दोच्चारणंप्रकृष्टाआशीः॥ २५२॥

(४) राघवानन्दः। किंच स्वधेति तं श्राद्धकर्तारं ब्राह्मणाः स्वधेतिब्रूयुः। किमिति स्वधेति ब्रूयुस्तत्राह स्वधाकारइति। स्वधोच्चारणं प्रकृष्टाशीर्यतः॥ २५२॥

(६) रामचन्द्रः। ते स्वधाइति ब्रूयुः। स्वधोच्यतां अस्तु स्वधा। स्वधाकारः पितृकर्मसु परा ह्याशीः॥ २५२॥

ततोभुक्तवतां तेषामन्नशेषं निवेदयेत्॥ यथा ब्रूयुस्तथा कुर्यादनुज्ञातस्ततोद्विजैः॥ २५३॥

(१) मेधातिथिः। भुक्तमन्नंतेभ्योनिवेदयितव्यं। प्रष्टव्यास्तेदमस्तीति यथा ब्रूयुस्तथा कुर्यादनुज्ञातोऽननुज्ञातेन नान्यत्र विनियोक्तव्यम्॥ २५३॥

(२) सर्वज्ञनारायणः। ततोभुक्तवतामित्यादि प्रकृतपार्वणविषयम्॥ २५३॥

(३) कुल्लूकः। स्वधाशब्दोच्चारणानन्तरंकृतभोजनानांब्राह्मणानांशेषमन्नमप्यस्तीत्यवशिष्टमन्नंनिवेदयेत् तैर्ब्राह्मणैरिदमनेनान्नेन क्रियतामित्यनुज्ञातोयथा ते ब्रूयुस्तथान्नशेषविनियोगंकुर्यात्॥ २५३॥

(४) राघवानन्दः। तेषांचाज्ञापालनीयेत्याह ततइति। तैः श्राद्धभोजिभिः। इष्टेभ्योविनियुज्यतामित्यनुज्ञातः॥ २५३॥

(६) रामचन्द्रः। ततः तेषां भुक्तवतामन्नशेषंनिवेदयेत्। तैर्द्विजैर्यदनुज्ञातं यथा ब्रूयुस्तथा कुर्यात् तद्यथा अन्नशेषः किंक्रियतां तदाज्ञायथा इष्टैः सह भुज्यतां इति॥ २५३॥

पित्र्ये स्वदितमित्येव वाच्यं गोष्ठे तु सुश्रुतम्॥ संपन्नमित्यभ्युदये दैवे रुचितमित्यपि॥२५४॥

(१) मेधातिथिः। अन्येनापि तत्कालोचितोपस्थितेनैवमेभिः शब्दैः मोदयितव्यः। अन्यस्त्वाह। अनुज्ञापनमेतैः शब्दैर्भोजनादिप्रवृत्तैः कर्तव्यम्। गोष्ठेगोषुतिष्ठन्तीष्वेकत्रदेशे सुश्रितमिति वाच्यम्। अस्त्विति सर्वत्र प्रतीयते। दैवेरुचिरंरोचितमिति वा॥ २५४॥

(२) सर्वज्ञनारायणः। पित्र्ये एकोद्दिष्टे पार्वणेऽपिवा। स्वदतइति क्वचित्पाठः। तत्प्रागुक्तेन स्वदितमित्यनेन विकल्पितंज्ञेयं। गोष्ठे गोमङ्गलार्थं। गोष्ठे ब्रह्मणभोजने तृप्तेषु विप्रेषु सुश्रुतमिति वाच्यम्। सुश्रुतमिति शोभनं श्रवणं। गवा-

मस्त्वितितस्यार्थः। सुश्रितमिति क्वचित्पाठः। अभ्युदयेविवाहादौविप्रभोजने। दैवेवैश्वदेविकेरोचितमिति। रुचितमितिकचित्पाठः ॥ २५४ ॥

(३) कुल्लूकः। इदानींप्रसंगाच्छ्राद्धान्तरेषु विशेषविधिमाह पित्र्यइति। पित्र्ये निरपेक्षपितृमातृदेवताकएकोद्दिष्टश्राद्धे तृप्तिप्रश्नार्थंस्वदितमिति वाच्यम्। तथा च गोभिलसाङ्ख्यायनौ। स्वदितमिति तृप्तिप्रश्नः। मेधातिथिगोविन्दराजौ तु श्राद्धकालागतेनान्येनापि स्वदितमित्येव कर्तव्यमिति व्याचक्षतुः। श्राद्धे स्वदितमित्येतद्वाच्यमन्येन केनचित्। नानुरुद्धमिदंविहद्वदैर्नश्रद्धधीमहि॥ गोष्ठे गोष्ठिश्राद्धे सुश्रुतमिति वाच्यम्। गोष्ठ्यांशुत्थ्यर्थमष्टममिति द्वादशविधश्राद्धगणनायां गोष्ठीश्राद्धमपिविश्वामित्रेण पठितम्। अभ्युदये वृद्धिश्राद्धेसंपन्नमिति वाच्यम्। दैवे देवतोद्देशेन श्राद्धे रुचितमिति वचनीयम्। दैवश्राद्धंतु भविष्यपुराणोक्तम्। देवानुद्दिश्य यच्छ्राद्धंतत्तु दैविकमुच्यते। हविष्येण विशिष्टेन सप्तम्यादिषु यत्नतः॥ २५४ ॥

(४) राघवानन्दः। स्वदितमित्यादेः पदस्य व्यवस्थित्यर्थमाह पित्र्यइति। पित्र्ये पार्वणे तस्यैव प्रकृतत्वात्। गोष्ठे विश्वामित्रपठितगणकृतश्राद्धे गोष्ठ्यांयत्क्रियते श्राद्धंगोष्ठीश्राद्धंतदुच्यते। तस्य सत्रस्येव फलं प्रत्येकगामि गणस्याचेतनत्वेन गणिनिष्ठत्वात्फलस्य। अभ्युदये वृद्धिश्राद्धे दैवे॥ देवानुद्दिश्ययच्छ्राद्धंतत्तुदैविकमुच्यते। हविष्येण विशिष्टेन सप्तम्यादिषु यद्भवेदिति॥ भविष्योक्तं। गोमयशुद्धिवत्स्वदितमित्यादौ वाचनिकंतेन न कवितादर इति॥ २५४ ॥

(५) नन्दनः। स्वदितइति पृष्ट्वाऽऽचामयेदित्युक्तम्। अयमेव प्रश्नादिर्युक्तइत्युपपादयति। पित्र्यइति॥ २५४ ॥

(६) रामचन्द्रः। पित्र्ये एकोद्दिष्टे स्वदितमित्येवंवाच्यं गोष्ठेषु सुश्रुतंअन्नादि अधिकं शुद्धिसंपन्नंवा अभ्युदये दैवे रोचितं यथा रोचितम्॥ २५४ ॥

अपराह्णस्तथा दर्भावास्तुसंपादनं तिलाः॥ सृष्टिर्मृष्टिर्द्विजाश्चाग्र्याः श्राद्धकर्मसु सम्पदः॥२५५॥

(१) मेधातिथिः। अपराह्णेश्राद्धंकर्तव्यंश्राद्धकर्मसुसंपदःसंपादयितव्याः। अग्र्यानि वस्तूनि। अविशेषविधानेत्यपराह्णेअतः सर्वश्राद्धेषु। एवंहि स्मृत्यन्तरं। पूर्वाह्णे दैविकंकार्यमपराह्णेतुपैतृकं। एकोद्दिष्टंतुमध्याह्नेप्रातर्वृद्धिनिमित्तकमिति॥ वास्तु वेश्म तथासंपादनं यन्मार्जनंसुधादिनाभित्तीनां। गोमयेनभूमेरुपलेपनं। दक्षिणाप्रवणताच सृष्टिर्विसर्गः अकार्पण्येनान्नव्यञ्जनदानं मृष्टिर्मार्जनं। अन्नसंस्कारविशेषः। अन्येतुव्याचक्षते संपदेषाविभवशक्तिर्मन्त्रैवैतैर्विनाअकरणम् ॥ २५५ ॥

(२) सर्वज्ञनारायणः। अपराह्णोन्होद्विभागस्य द्वितीयोभागः। वास्तुसंपादनं दक्षिणाप्रवणत्वादिना। सृष्टिः स्वादुबहुतरान्नोत्पादनं। मृष्टिरन्नादीनांशुद्धत्वं। संपदः फलोत्कर्षहेतवः॥ २५५॥

(३) कुल्लूकः। अमावास्याश्राद्धस्य प्रकृतत्वात्तद्विषयोयमपराह्णकालः। प्रातर्वृद्धिनिमित्तकमित्यादिना वृद्धिश्राद्धादौ स्मृत्यन्तरे प्रातःकालादिविधानात्। विष्टराद्यर्थादर्भाः। गोमयादिना श्राद्धदेशसंशोधनम्। तिलाश्च विकिरणाद्यर्थाः। सृष्टिरकार्पण्येनान्नादिविसर्गः। मृष्टिरन्नादेश्च संस्कारविशेषः। पङ्क्तिपावनादयश्च ब्राह्मणाः। एताःश्राद्धेसंपत्तयइत्यभिधानादङ्गान्तरापेक्षंप्रकृष्टत्वमेषांबोधितम्॥ २५५ ॥

(४) राघवानन्दः। पार्वणस्य कालंविदधदुक्तपोक्षादिधर्मांत्स्मारयति अपराह्णइति। पूर्वाह्णोवै देवानामपराह्णः

---

(२५५) मृष्टिः=तुष्टिः (ल)

पितॄणां । तथा प्रातर्हि मातृकंश्राद्धंपूर्वाह्णे दैविकंस्मृतं । एकोद्दिष्टंतु मध्याह्ने सायाह्ने पार्वणंस्मृतम् ॥ इत्यादि श्रवणात् मातृकमन्वष्टकाश्राद्धं वास्तुसंपादनं । गोमयादिना स्थललेपनं । सृष्टिरकार्पण्येनान्नादेस्त्यागः । मृष्टिरन्नादेः संस्कारः । अग्र्याः पङ्क्तिपावनाः । संपदः साधनानि ॥ २५५ ॥

(५) **नन्दनः** । अथश्राद्धसम्पदोऽपि प्रसङ्गादाह अपेति । वास्तुसम्पादनंरमणीयप्रदेशस्वीकारः । सृष्टिःसर्जनम् दानमित्यर्थः । मृष्टिः शुद्धिः ॥ २५५ ॥

(६) **रामचन्द्रः** । श्राद्धकर्मसु संपदआह अपराह्णइति । अपराह्णः । तथा दर्भाः । वास्तुसंपादनं गोमयेनोपलेपनं दक्षिणाप्रवणं । तिलाः सृष्टिर्विसर्गः अकार्पण्येनान्नव्यञ्जनदानं । मृष्टिःपात्राणां शुद्धिः । अग्र्याःद्विजाः ब्राह्मणाः सर्ववेदेषु श्रेष्ठाः ॥ २५५ ॥

दर्भाः पवित्रं पूर्वाह्णोहविष्याणि च सर्वशः ॥ पवित्रं यच्च पूर्वोक्तं विज्ञेयाहव्यसंपदः ॥ २५६ ॥

(१) **मेधातिथिः** । दर्भाःप्रसिद्धाः । पवित्रमन्त्राः । हविर्विहितानि योग्यानि हविष्याण्युत्तरश्लोके तानि वक्ष्यन्ते । पवित्रंपावनंशुच्याचारता यच्चोक्तंपूर्वोक्तंवावास्तुसंपादनं सृष्टिर्मृष्टिर्ब्राह्मणाश्च श्रेष्ठाः श्रुतशीलसंपन्नाःहव्यसपदः हव्यंदेवतोद्देशेन यागादि ब्राह्मणभोजनंच । हव्यशब्दःकर्मदैविकमुपलक्षयति ॥ २५६ ॥

(२) **सर्वज्ञनारायणः** । पवित्रं पावनान्तरं यवजलादि । पूर्वाह्णोन्होद्विभागस्य प्रथमभागः । हविष्याणि मुन्यन्नादीनि । यच्च पूर्वोक्तं पित्र्यकर्मण्युक्तं । पवित्रं पावनं । मृष्टिर्द्विजाग्र्याश्च । हव्यं वैश्वदेविकं कर्मलक्षणया । एवंच श्राद्धे दैवकर्मणोनुरोधार्थं कुतपे प्रारम्भः । पित्र्यस्य च प्रधानत्वात् । अपराह्णेनुष्ठानसमाप्तिरितिगम्यते । तदादायैवच श्राद्धेकुतप प्रशंसा । तत्रापि पितृयज्ञंतुनिर्वर्त्येत्यभिधानादपराह्णप्राप्तौ श्राद्धप्रयोगमध्यएव प्रधानकर्मणः प्राक्पिण्डपितृयज्ञा नुष्ठानम् ॥ २५६ ॥

(३) **कुल्लूकः** । पवित्रंमन्त्राः पूर्वाह्णः कालः हविष्याणि मुन्यन्नादीनि सर्वाणि च यच्च पवित्रंपावनंवास्तुसंपादनादि पूर्वमुक्तम् । एताश्च देवार्थस्य कर्मणः सम्पदः । हव्यशब्दोदैवकर्मोपलक्षणार्थः ॥ २५६ ॥

(४) **राघवानन्दः** । तत्प्रतियोगितया दैवंकालंविदधत्पूर्वधर्मान् विधत्ते दर्भाइति । उदगयने पूर्वपक्षे प्रागावर्तनादन्हः कालंविद्यादिति गोभिलसूत्रात् । पवित्रंमन्त्रं । पुनःपवित्रपदं अविगीतब्राह्मणविषयम् ॥ २५६ ॥

(५) **नन्दनः** । हव्यसम्पदोऽपि प्रसङ्गादाह दर्भाइति । शक्तितः पवित्राणि सूक्तानि जप्यानि । पूर्वोक्तंपवित्रदेशादयः ॥ २५६ ॥

(६) **रामचन्द्रः** । पवित्रंमन्त्राः यच्च पवित्रंपूर्वोक्तं सृष्ट्यादिद्रव्यसंपदः हव्यकव्यकर्मणिसंपदः एताउक्ताःदर्भादयः ॥ २५६ ॥

मुन्यन्नानि पयः सोमोमांसं यच्चानुपस्कृतम् ॥ अक्षारलवणं चैव प्रकृत्या हविरुच्यते ॥ २५७ ॥

(१) **मेधातिथिः** । मुनिर्वानप्रस्थस्तस्यान्नानिआरण्यानि नीवारादीनि । एतच्चप्रदर्शनं ग्राम्याणामपि व्रीह्यादीनां । तथार्वाचीने श्लोके सर्वग्रहणं । उत्तरत्रच । हविर्यच्चिररात्रायेतिप्रक्रम्यतिलैर्व्रीहियवैर्माषैरिति ग्राम्याणामप्यनुक्रमणं । पयः क्षीरं तद्विकाराअपि दध्यादयोगृह्यन्ते स्मृतिसमाचाराभ्यां । सोमओषधिविशेषः । अनुपस्कृतमधिकृतमप्रतिषिद्धम् । सूना मांसाद्यनुपस्कृतम् । अक्षारलवणम् । अत्रसंदिह्यते । किंद्वन्द्वगर्भेहि वृत्तिद्वयमाश्रयणीयम् । प्रतिपदंच मञःसंबन्धोभेद-

स्तद्गुरुभवति प्रकृत्या हविरनाश्रितविशेषेण तद्धविर्ज्ञेयं हविष्येण वर्तते । हविष्यात्मातराशाद्गुरुस्त्यादि सामान्यचोद-नासु तद्धविष्यं ज्ञेयम् ॥ २५७ ॥

(२) सर्वज्ञनारायणः । मुन्यन्नान्यकृष्टपच्यानि श्यामाकनीवारादीनि । पयइति सविकारग्रहणात् दुग्धदधिघृता-नांग्रहणम् । सोमःसोमलता अनुपस्कृतं मरीचादिना स्वादान्तरमप्रापितम् । अक्षारलवणं बिडादेः क्षारादन्यल्लवणं सामुद्रं सैन्धवंवा । प्रकृत्या स्वभावेन स्थितं । वस्त्वन्तरामिश्रितं । सर्वमेतद्धविर्हव्यम् ॥ २५७ ॥

(३) कुल्लूकः । मुनेर्वानप्रस्थस्यान्नानि नीवारादीनि । पयःक्षीरं । सोमलतारसः । अनुपस्कृतमविकृतंपूतिगन्धा-दिरहितंमांसम् । अक्षारलवणमकृत्रिमलवणंसैन्धवादि एतत्स्वभावतोहविर्मन्वादिभिरभिधीयते ॥ २५७॥

(४) राघवानन्दः । हविष्याणीत्युक्तं व्याचष्टे मुन्यन्नानीति । नीवारादीनि । गव्यंपयः । सोमः सोमलतारसः । मांसंवार्ध्रीणसादेः । अनुपस्कृतमविकृतं पूतिगन्धादिरहितमिति यावत् । प्रकृत्या स्वभावतः अनुक्ते विशेषे ॥ २५७ ॥

(५) नन्दनः । अनुपस्कृतं लौकिकसंस्कारसंस्कृतम् । प्रकृत्या हविःस्वभावरसेन युक्तंहविरुच्यते विद्वद्भिः ॥ २५७ ॥

(६) रामचन्द्रः । पयः क्षीरं सोमलतारसः मांसं अनुपस्कृतमप्रतिषिद्धं हविष्यादिसंस्कृतं अक्षारलवणं सैन्धवादि एते प्रकृत्या स्वभावेन हविर्हविष्यान्नमुच्यन्ते ॥ २५७ ॥

विसृज्य ब्राह्मणांस्तांस्तु नियतोवाग्यतः शुचिः ॥ दक्षिणां दिशमाकांक्षन्याचेतेमान्वरान्पितॄन् ॥ २५८ ॥

(१) मेधातिथिः । प्रासङ्गिकः पूर्वश्लोकः । इदानींप्रकृतशेषमेवाह विसृज्यानुज्ञाय यथा सुखविहारे ब्राह्मणां-स्तान्प्रभुक्तवतः । अनन्तरंदक्षिणांदिशमीक्षमाणइमान्वरानभिलषितार्थान्पितॄन्प्रार्थयेत् स्वपितॄन्ध्यायेत युष्मासु प्रसन्नेष्वि-दंनःसंपाद्यतामित्येवंयाचितव्यम् ॥ २५८ ॥

(२) सर्वज्ञनारायणः । प्रयतोनन्यमनाः । आकांक्षन् साभिलाषंपश्यन् । इमान्वक्ष्यमाणान् । वरानभीष्टार्थान् । पितॄन्याचेत ॥ २५८ ॥

(३) कुल्लूकः । तान्ब्राह्मणान्विसृज्यानन्यमनाःमौनी पवित्रोदक्षिणांदिशंवीक्षमाणएतान्वक्ष्यमाणानभिलषिता-नर्थान्पितॄन्प्रार्थयेत् ॥ २५८ ॥

(४) राघवानन्दः । श्राद्धस्योत्तराङ्गमाशीरिति स्थापयन् तत्क्रममाह विसृज्येति । नियतोऽनन्यमनाः । आका-ङ्क्षन्नवलोकयन् । इमान् दातारादिपञ्चकान् पितॄन्प्रति ॥ २५८ ॥

(५) नन्दनः । आकाङ्क्षणमाभिमुख्यम् । इमान्वक्ष्यमाणान् ॥ २५८ ॥

(६) रामचन्द्रः । विसृज्यतान्ब्राह्मणान् नियतःशुचिःवाग्यतःसन्दक्षिणांदिशं आकांक्षन्साभिलाषंपश्यन्पितॄनि-मान्वरान्प्रमाणलक्षणान्याचेत ॥ २५८ ॥

दातारोनोभिवर्द्धन्तां वेदाः सन्ततिरेव च ॥ श्रद्धा च नोमाव्यगमद्बहुधेयं च नोस्त्विति ॥ २५९ ॥
[अन्नंचनोबहुभवेदतिथींश्च लभेमहि ॥ याचितारश्च नः सन्तु माचयाचिष्म कंचन ॥१॥ *
श्राद्धभुक् पुनरश्नाति तदहर्योद्विजाधमः॥ प्रयाति शूकरीं योनिं कृमिर्वा नात्र संशयः ॥२॥ ऽऽ]

(१) मेधातिथिः । केपुनस्तेवरायाचितव्याइत्यत आह मन्त्रवदयंश्लोकः पठितव्यः ॥ २५९ ॥

(२) सर्वज्ञनारायणः । देयंबहु भवतु दानप्रधानाःस्यामेत्यर्थः ॥ २५९ ॥

(३) कुल्लूकः । अस्मत्कुले दातारःपुरुषावर्द्धन्ताम् । वेदाश्चाध्ययनाध्यापनतदर्थबोधतदर्थयागाद्यनुष्ठानैर्वृद्धिमाप्नुवन्तुपुत्रपौत्रादिकंच वर्द्धताम् । वेदार्थश्रद्धाचास्मत्कुले न व्यपैतु । दातव्यंच धनादिकंबहु भवतु ॥ २५९ ॥

(४) राघवानन्दः । नः अस्मत्कुले वेदाः स्वाध्यायेनानवच्छिन्ना भवन्तु । सन्ततिः पुत्रपौत्रादिः वर्धतामित्यनुषङ्गःकिंच श्रद्धा माव्यगमत् माऽपैतु ॥ २५९ ॥

[राघवानन्दः । किंच अन्नमिति नः अस्मान्प्रति याचितारोयाचकाः सन्तु आयान्तु । माचयाचिष्मकंचन न कंचनप्रति याचनांनामकुर्मः ॥१॥]

(६) रामचन्द्रः । अस्माकं दातारः अभिवर्द्धन्तां वेदावर्द्धन्ताम् सन्ततिरेवच पुनः सन्तत्यःवर्द्धन्तां नः अस्माकं श्राद्ध मा व्यगमत् अस्माकं बहुदेयम् अस्तु इति ॥ २५९ ॥

[रामचन्द्रः । अन्नमिति । कंचन मास्म याचिष्मकंचन न याचेमइत्यर्थः ॥१॥]

एवं निर्वपणं कृत्वा पिण्डांस्तांस्तदनन्तरम् ॥ गां विप्रमजमग्निं वा प्राशयेदप्सु वा क्षिपेत् ॥२६०॥

(१) मेधातिथिः । तदनन्तरं वरयाचनानन्तरं पिण्डान्पितृभ्योनिरुप्तान्गवादीन्प्राशयेत् । अग्नौ प्रक्षेपएव । प्राशनमापयेदितिपाठान्तरम् ॥ २६० ॥

(२) सर्वज्ञनारायणः । एवं पूर्वोक्तविधिना वरान्याचित्वातदनन्तरंप्रार्थनानन्तरं पिण्डानांनिर्वपणंकृत्वा तान्पिण्डान्गवाद्यन्यतरमाशयेदप्सु वा निक्षिपेदिति वैशिष्टकालिकंपिण्डनिर्वपणंप्रतिपत्तिविशेषसहितंदर्शितम् । विप्रंश्राद्धिभ्योन्यम् ॥ २६० ॥

(३) कुल्लूकः । एवमुक्तप्रकारेण पिण्डानांप्रदानंकृत्वा प्रकृतवरयाचनानन्तरंतान्पिण्डान्गांब्राह्मणंछागंवा भोजजयेत् । अग्नौ जले वा क्षिपेत् ॥ २६० ॥

(४) राघवानन्दः । प्रकृतंश्राद्धमुपसंहरन्पिण्डस्योत्तरप्रतिपत्तिस्थानान्याह एवमिति । अजं छागं अग्निं गार्हपत्यादिम् ॥ २६० ॥

(५) नन्दनः । एवमिति पिण्डनिर्वपणप्रकारस्य पूर्वोक्तस्यपरामर्शः । पूर्वोक्तेन प्रयोगेण ब्राह्मणभोजनानन्तरंपिण्डनिर्वापणंकृत्वेत्यर्थः ॥ २६० ॥

(६) रामचन्द्रः । एवंपिण्डनिर्वपणंकृत्वा तदनन्तरंतान्पिण्डान् गांप्राशयेद्भक्षणं कारयेत् । विप्रंवा अजंवा प्राशयेत् अग्निंवाअग्निमध्येवा प्रक्षिपेत् । अप्सु वा क्षिपेत् ॥ २६० ॥

---

* (क, ख, ग, ज, झ, ञ, ण)
ऽऽ (ग) चिन्हितपुस्तके ।

पिण्डनिर्वपणं केचित्पुरस्तादेव कुर्वते ॥ वयोभिः खादयन्त्यन्ये प्रक्षिपन्त्यनलेऽप्सु वा ॥ २६१॥

(१) **मेधातिथिः** । ब्राह्मणभोजनात्पुरस्तात्केचित्कुर्वन्ति वयोभिःखादयन्त्यन्येऽधिकेयंपूर्वस्मात्प्रतिपत्तिः । अनलोऽप्सुः । पूर्वोक्तमेवानुदितं । उच्छिष्टसन्निधौचैतत्पुरस्तात्पिण्डदानमिष्यते ॥ २६१ ॥

(२) **सर्वज्ञनारायणः** । नन्वेवंभोजनात् प्राक्पिण्डनिर्वपणंपूर्वोक्तंविरुध्यत इत्यतआह पिण्डनिर्वपणमिति । ये पुरस्तात् ब्राह्मणभोजनात् कुर्वते ते वयोभिरित्यादिप्रतिपत्तित्रयस्यान्यतरंकुर्वन्ति ॥ २६१ ॥

(३) **कुल्लूकः** । पिण्डप्रदानंकेचिदाचार्याःब्राह्मणभोजनानन्तरंकुर्वते । अन्ये पक्षिभिःपिण्डान्खादयन्ति । इयंच पक्षिभोजनरूपा प्रतिपत्तिरग्न्युदकप्रक्षेपयोर्वैकल्पिकीति दर्शयितुमुक्तयोरप्यभिधानम् ॥ २६१ ॥

(४) **राघवानन्दः** । पार्वणविषये स्वमते पिण्डदानमादाविति स्पष्टयन्मतान्तरमाह केचिदिति । परस्ताद्विप्रभोजनानन्तरं । तस्य मतभेदेन प्रतिपत्तिस्थानान्याह वयोभिरित्यधिकंप्रतिपत्तिस्थलम् । मेधातिथिस्तु । पुरस्तादिति पठित्वा व्याख्याति भोजनात्पुरस्तात्कृते ब्राह्मणभोजने हविःकुर्वन्तीति उच्छिष्टसंनिधावेतत्पिण्डदानमिष्यतइति हेतुंचष्टे अतोवयोभिः खादयन्ति केचिदिति संबन्धःसाधीयान् । प्रक्षेपेविकल्पोन तु पिण्डदानइति सुष्ठूक्तम् ॥ २६१ ॥

(५) **नन्दनः** । पक्षान्तरमाह पिण्डेति । पुरस्तादेव कुर्वते न पश्चादिति । प्रतिपत्तावपिपिण्डानांप्रकारान्तरमुत्तरार्धेनोक्तम् ॥ २६१ ॥

(६) **रामचन्द्रः** । केचित् पिण्डनिर्वपणं पुरस्तादेव कुर्वते वयोभिः पक्षिभिः खादयन्ति । अन्ये अनलेवा प्रक्षिपन्ति ॥ २६१ ॥

पतिव्रता धर्मपत्नी पितृपूजनतत्परा ॥ मध्यमं तु ततः पिण्डमद्यात्सम्यक्सुतार्थिनी ॥२६२॥

(१) **मेधातिथिः** । आद्यन्तयोःपिण्डयोरेषाप्रतिपत्तिः । मध्यमन्तुततस्तेषांपिण्डानांयोमध्यमः तंधर्मपत्नीपुत्रार्थिनी अद्यात् । या न कामार्थामूढा पतिरेव मया परिचरणीयोमनसापि व्यभिचारो न कर्तव्यइति यस्यानियमः सा पतिव्रता । पितृभक्तिःपितृपूजने श्राद्धादिकर्मणितत्परा श्रद्धावती प्रयत्नेनतदाराधनादौ प्रवर्तते । सम्यगद्यादाचमनादिविधिना नियमेन च ॥ २६२ ॥

(२) **सर्वज्ञनारायणः** । धर्मपत्नी सवर्णा सम्यक् मन्त्रवत् यदि सुतार्थिनीतदाऽद्यात् ॥ २६२ ॥

(३) **कुल्लूकः** । धर्मार्थकामेषु मनोवाक्कायकर्मभिःपतिरेव मया परिचरणीयइति व्रतंयस्याःसा पतिव्रता । धर्मपत्नी सवर्णा प्रथमोढा श्राद्धक्रियाणांश्रद्धाशालिनी पुत्रार्थिनी तेषांपिण्डानांमध्यमंपितामहपिण्डंभक्षयेत् । सम्यगाधत्त पितरोगर्भमित्यादिगृह्योक्तमन्त्रेण ॥२६२ ॥

(४) **राघवानन्दः** । गोदोहन्यायेन पिण्डमाश्रित्य दृष्टफलंकिंचिद्विधत्ते पतिव्रतेतिद्वाभ्यां । पतिव्रता धर्मार्थकामेषु मनोवाक्कायकर्मभिः पतिरेव परिचरणीयइति व्रतंयस्याः सा मध्यमंपितामहपिण्डं । सम्यगितिसम्यक् । आधत्तपितरोगर्भमित्यादिमन्त्रोपलक्षणार्थम् ॥ २६२ ॥

(६) **रामचन्द्रः** । पतिव्रता धर्मपत्नी मध्यमं पिण्डंसुतार्थिनी अद्यात् । सम्यक् मन्त्रवत् ॥ २६२ ॥

आयुष्मन्तंसुतं सूते यशोमेधासमन्वितम् ॥ धनवन्तं प्रजावन्तं सात्विकं धार्मिकं तथा ॥ २६३॥

(१) मेधातिथिः । भक्षयित्वातु तंपिण्डंसुतंपुत्रंसूतेजनयति । मेधाग्रहणशक्तता तयासमन्वितंयुक्तम् । सत्वंनाम गुणःसाङ्ख्येषु प्रसिद्धः । धैर्योत्साहादियोन्यस्तद्युक्तम् ॥ २६३ ॥

(२) सर्वज्ञनारायणः । सात्विकं सत्वगुणसंपन्नम् ॥ २६३ ॥

(३) कुल्लूकः । तेन पिण्डभक्षणेन दीर्घायुषंकीर्तिधारणात्मकबुद्धियुक्तंधनपुत्रादिसन्ततिधर्मानुष्ठानसत्वाख्यगुणान्वितंपुत्रंजनयति ॥ २६३ ॥

(४) राघवानन्दः । सात्विकमिति धार्मिकत्वेपि कामनानिवृत्त्यर्थंसात्विकधर्मरतंवा ॥ २६३ ॥

(६) रामचन्द्रः । आयुर्यशोमेधासमन्वितं । एतादृशं सुतंसूते ॥ २६३ ॥

प्रक्षाल्य हस्तावाचम्य ज्ञातिप्रायं प्रकल्पयेत् ॥ ज्ञातिभ्यः सत्कृतं दत्वा बान्धवानपि भोजयेत् ॥ २६४ ॥

(१) मेधातिथिः । पिण्डेषु प्रतिपादितेषु तौहस्तौ प्रक्षालयेत् । ततःआचमनविधिंकुर्यात् । ज्ञातिभ्योदद्यात् । तेभ्यः सत्कृतंदत्वाबान्धवेभ्योपि दद्यात् । ज्ञातीन् प्रैति गच्छति प्राप्नोतीति ज्ञातिप्रायं कुर्यात् । ज्ञातयः सगोत्रामातृश्वशुरपक्षाबान्धवाः । अत्रचोच्यते यदुक्तंयथाब्रूयुस्तथाकुर्यादितियदितैरुक्तंगृहानस्मदीयानेतदन्नंप्राप्यतामिति तदा वैश्वदेवहोमादीनां कागतिः । पाकान्तरंकर्तव्यम् अथवाऽदृष्टार्थमेवान्नशेषनिवेदनंनित्यवदाम्नायते । शेषमन्नमित्युक्तेऽअदृष्टेभ्य इतिब्रूयुरितिपाक्षिकंचैतत्स्याद्यदितेगृह्णीयुः ॥ २६४ ॥

(२) सर्वज्ञनारायणः । ज्ञातिप्रायं ज्ञातिभिः सपिण्डैर्बहुभिर्भुक्तमन्नंयथा भवति तथा प्रकल्पयेत् कुर्यात् । बान्धवान्मातुलादीन् संबन्धिनः ॥ २६४ ॥

(३) कुल्लूकः । तदनु हस्तौ प्रक्षाल्य ज्ञातिप्रायमन्नंकुर्यात् । ज्ञातीन्प्रैति गच्छतीति ज्ञातिप्रायम् । कर्मण्यण् । ज्ञातीन्भोजयेदित्यर्थः । तेभ्यः पूजापूर्वकमन्नंदत्वा मातृपक्षानपि सार्हणंभोजयेत् ॥ २६४ ॥

(४) राघवानन्दः । शूद्रादिव्यावृत्त्यर्थमुक्तमुष्टेःपात्रमाह प्रक्षाल्येति । ज्ञातिप्रायं ज्ञातीन् प्रैति प्रीणाति गच्छतीति वाज्ञातिभ्योदेयमिति । राक्षसंतद्भवेच्छ्राद्धंदशयत्रन भुञ्जतइति स्मृतेः । बान्धवान् मातृपक्षान् ॥ २६४ ॥

(५) नन्दनः । पिण्डप्रतिपत्त्यनन्तरंकर्तव्यमाह प्रक्षाल्येति । ज्ञातिप्रायंज्ञातिबाहुल्यम् । प्रकल्पयेदापादयेत् ज्ञातीन्संघातयेदित्यर्थः । ज्ञातिबान्धवान् सम्बन्ध्यादीन् ॥ २६४ ॥

(६) रामचन्द्रः । ज्ञातिभ्यःभोज्यं सत्कृतं प्रकल्पयेत् । ज्ञातिंप्रैति गच्छति प्राप्नोतीति प्रायंकुर्वीत तत्ज्ञातिभ्योदद्यात् । ज्ञातिभ्योदत्वा पश्चाद्बान्धवानपि पूजयेत् ॥ २६४ ॥

उच्छेषणं तु तत्तिष्ठेद्यावद्विप्राविसर्जिताः ॥ ततोगृहबलिं कुर्यादिति धर्मोव्यवस्थितः ॥ २६५ ॥

(१) मेधातिथिः । भुञ्जानानांयत्किञ्चिदुच्यधिकरणपात्रसंलग्नंभूमिपतितंच तत्रतस्माद्देशादवमार्ष्टव्यं यावद्ब्राह्मणानिष्क्रान्ताः । ततोगृहबलिंनिष्पन्नेश्राद्धकर्मण्यनन्तरंवैश्वदेवहोमान्वाहिकातिथ्यादिभोजनंकर्तव्यम् । बलिशब्दस्य प्रदर्शनार्थत्वात् । अन्येतु भूतस्य यज्ञएवबलिशब्देन प्रसिद्धतरस्ततश्चाग्नौ होमोनप्राग्विरुध्यतइत्याहुः । नचैतद्वाच्यं पित्र्ये कर्मणिप्रारब्धेकथंकर्मान्तरस्यतदन्तः करणम् । यथैवपूर्वेद्युर्निमन्त्रितेषुब्राह्मणेषुसायंप्रातर्होमकरणंग्रहकल्पेश्राद्धस्यवि-

श्चमेवं वैश्वदेवहोमोप्यौपसदाग्निकः तेन भूतयज्ञात्पराञ्चः पदार्था उत्कृष्यन्ते नार्वाञ्चः अत्रोच्यते यदि प्रागयौ वैश्वदेवहोमः क्रियते ततः श्राद्धानन्तरं बलिहरणं तथासति देवयज्ञभूतयज्ञौव्यवधीयेतां । ततश्च क्रमोपरोधो नच वैश्वदेवस्य कालबाधः क्रियते । पितृश्राद्धकालहानेः । तस्मात्सर्वमहायज्ञानुष्ठानंश्राद्धादौत्तरकालिकम् ॥ २६५ ॥

(२) सर्वज्ञनारायणः । विसर्जितास्तत्र यावत्तिष्ठन्तीति तिष्ठेदित्येतस्य वचनपरिणामेनानुषङ्गः । गृहबलिमिति वैश्वदेवस्याप्युपलक्षणम् ॥ २६५ ॥

(३) कुल्लूकः । तद्ब्राह्मणोच्छिष्टंतावत्कालंतिष्ठेद्यावद्ब्राह्मणानांविसर्जनं ब्राह्मणेषु तु निर्गतेषु मार्ष्टव्यमित्यर्थः । ततः संपन्ने श्राद्धकर्मणि वैश्वदेवबलिहोमकर्मनित्यश्राद्धातिथिभोजनानि कर्तव्यानि बलिशब्दस्य प्रदर्शनार्थत्वात् । अतएव मत्स्यपुराणे । निवृत्त्यप्रतिपत्त्यर्थंपर्युक्ष्याग्निंच मन्त्रवित् ॥ वैश्वदेवमकुर्वीत नैत्यकंविधिमेवचेति ॥ २६५ ॥

(४) राघवानन्दः । उच्छिष्टस्थितिकालविशेषंविदधद्वैश्वदेवादेः श्राद्धोत्तरत्वमाह उच्छेषणमिति । तथाचमात्स्यम् । निर्वर्त्यप्रतिपत्त्यर्थंपर्युक्ष्याग्निसमन्त्रवित् । वैश्वदेवंप्रकुर्वीत नैत्यकंबलिकर्म चेति ॥ अतोमेधातिथिः तस्मात्सर्वमहायज्ञानुष्ठानंश्राद्धादुत्तरकालिकमिति । उच्छेषणं ब्राह्मणोच्छिष्टम् ॥ २६५ ॥

(५) नन्दनः । गृहबलिंवैश्वदेवहोमभूतबल्यात्मकम् ॥ २६५ ॥

(६) रामचन्द्रः । तावदुच्छेषणमुच्छिष्टंतिष्ठेत् यावद्विप्राविवर्जिताः । विसर्जयेदित्यर्थः ॥ २६५ ॥

हविर्यच्चिररात्राय यच्चानन्त्याय कल्प्यते ॥ पितृभ्योविधिवद्दत्तं तत्प्रवक्ष्याम्यशेषतः ॥ १६६ ॥

(१) मेधातिथिः । चिरराात्रशब्दोदीर्घकालवचनः । यच्चानन्त्यायकेनचिद्वचनेनैवैतदुभयंब्रवीमोतिप्रणिधानार्थमुच्यते कल्पते प्रेतइत्यध्याहार्यम् ॥ २६६॥

(२) सर्वज्ञनारायणः । चिररात्राय मासादिद्वादशवर्षपर्यन्तानेककालतृप्तये । आनन्त्यायानन्ताय कालाय तदूर्ध्वमपितृप्तये ॥ २६६ ॥

(३) कुल्लूकः । यैश्चान्नैरिति पूर्वमुक्तमपि व्यवधानादबुद्धिस्थंशिष्यसुखप्रतिपत्तये पुनर्वक्तव्यतया प्रतिजानीते हविरिति । चिररात्रायपदमव्ययं चिरकालवाचि । अतएव चिरायचिररात्रायचिरस्यायाश्चिरार्थकाइत्याभिधानिकाः । यच्चहविःपितृभ्योयथाविधिदत्तंचिरकालतृप्तये अनन्ततृप्तये च संपद्यते । तन्निःशेषेणाभिधास्यामि ॥ २६६ ॥

(४) राघवानन्दः । खादिरन्यायेन श्राद्धाङ्गद्रव्यं विदधत्फलं प्रतिजानीते हविरिति । चिररात्रिव्याप्यातीव सुखायेति वाक्यार्थः ॥ २६६ ॥

(५) नन्दनः । चिररात्रायेति कालदैर्घ्यम् । आनन्त्यायेति हविषोऽक्षय्यत्वम् ॥ २६६ ॥

(६) रामचन्द्रः । यत्तद्धविः चिररात्राय बहुकालपर्यन्ताय तदानन्त्याय कल्पते भवति पितृभ्यो यद्विधिवद्दत्तं तदशेषतः प्रवक्ष्यामि ॥ २६६ ॥

तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेन वा ॥ दत्तेन मासं तृप्यन्ति विधिवत्पितरोनृणाम् ॥ २६७ ॥

(१) मेधातिथिः । तिलादिग्रहणंनेतरधान्यपरिसंख्यानार्थमपितूक्तानांफलविशेषप्रदर्शनार्थम् । एतैर्विविधदत्तैरपिमासंप्रीयन्ते । विधिवत्पितरोनृणामित्याद्यनुवादपदानि वृत्तपूरणार्थानि ॥ २६७ ॥

(२) सर्वज्ञनारायणः । मूलफलेन स्मृत्यन्तरे श्राद्धीयत्वेनोक्तेन ॥ २६७ ॥

(३) कुल्लूकः । तिलधान्ययवमाषजलमूलफलानामन्यतमेन यथाशास्त्रंश्रद्धयादत्तेन मनुष्याणांमासंपितरस्तृप्यन्ति। कृष्णामाषास्तिलाश्चैव श्रेष्ठाः स्युर्यवशालयइति ॥ वायुपुराणवचनान्माषैरिति कृष्णमाषाबोद्धव्याः ॥ २६७ ॥

(४) राघवानन्दः । तदेवाह तिलैरितिनवभिः तिलमाषयोः कृष्णत्वंविवक्षितम् । कृष्णामाषास्तिलाश्चैव श्रेष्ठाःस्युर्यवशालयइति वराहपुराणोक्तेः ॥ अद्भिः नवोदकैः । विधिवद्दत्तै रित्यन्वयः । मासमित्यादि कालकर्म ॥ २६७ ॥

(५) नन्दनः । दत्तेन श्राद्धेनेतिशेषः ॥ २६७ ॥

द्वौ मासौ मत्स्यमांसेन त्रीन्मासान् हारिणेन तु ॥ औरभ्रेणाथ चतुरः शाकुनेनाथ पञ्च वै ॥२६८॥

(१) मेधातिथिः । उरभ्रामेषाः । शाकुनयआरण्याः कुक्कुटाद्याः । मत्स्याः पाठीनाद्याः ॥ २६८ ॥

(२) सर्वज्ञनारायणः । मत्स्यः पाठीनादिः । उरभ्रोमेषः । शाकुनेन भक्ष्यपक्षिमांसेन ॥ २६८ ॥

(३) कुल्लूकः । पाठीनादिमत्स्यानांमांसेन द्वौ मासौ पितरःप्रीयन्तइति पूर्वेण संबन्धः। त्रीन्मासान्हारिणेन मांसेन । चतुरोमेषमांसेन पञ्चद्विजातिभक्ष्यपक्षिमांसेन ॥ २६८ ॥

(४) राघवानन्दः । मत्स्यमांसेन पाठीनादिमत्स्यानांमांसेन मांसपदं शल्ककण्टकदग्धादिव्यावृत्त्यर्थं । हारिणेन हरिणमांसेन औरभ्रेण मेषमांसेन शाकुनेन निषिद्धेतरपक्षिमांसेन इह श्राद्धे दत्तेनेत्यन्वयः ॥ २६८ ॥

(५) नन्दनः । हारिणेन हरिणमांसेन । हरिणः कृष्णमृगः । औरभ्रेणोरभ्रमांसेन उरभ्रोमेषः ॥ २६८ ॥

(६) रामचन्द्रः । औरभ्रेण मांसेन मेषस्य मांसेन चतुरोमासान् तृप्तिर्भवति ॥ २६८ ॥

षण्मासांश्छागमांसेन पार्षतेन च सप्त वै ॥ अष्टावेणस्य मांसेन रौरवेण नवैव तु ॥ २६९ ॥

[अष्टावैणेयमांसेन पार्षतेनाथ सप्त वै ॥ अष्टावैणेयमांसेनरौरवेणनवैवतु ॥ १ ॥] (मेधा०)

(१) मेधातिथिः । रुरुपृषतैणामृगजातिविशेषवचनाः । रौरवेणं पार्षतेन । ऐणेयेतिविकारेतद्धितः ॥ २६९ ॥

(२) सर्वज्ञनारायणः । पृषतोबिन्दुमान्मृगः । एणोहरिणभेदः । रुरुर्मृगभेदः ॥ २६९ ॥

(३) कुल्लूकः । षण्मासाञ्छागमांसेन । प्रियन्तेपृषतश्चित्रमृगस्तन्मांसेन सप्त । एणमांसेनाष्टौ । रुरुमांसेननव । एणरुरूहरिणजातिविशेषौ ॥ २६९ ॥

(४) राघवानन्दः । पार्षतेन चित्रमृगमांसेन एणोरुरुश्च मृगजातिविशेषौ ॥ २६९ ॥

(५) नन्दनः । रुरुःकृष्णसारः ॥ २६९ ॥

(६) रामचन्द्रः । पार्षतेन चित्रकेन मृगेण पृषत्संज्ञस्य मृगस्य मांसेन एणसंज्ञस्य मांसेन । रौरवेण रुरोर्मांसेन२६९

दशमासांस्तु तृप्यन्ति वराहमहिषामिषैः ॥ शशकूर्मयोस्तु मांसेन मासानेकादशैव तु ॥ २७० ॥

(१) मेधातिथिः । वराहश्चारण्यसूकरः ॥ २७० ॥

(२) सर्वज्ञनारायणः । कूर्मः कच्छपः ॥ २७० ॥

(३) कुल्लूकः । दशेति । दशमासानारण्यसूकरमहिषमांसैस्तृप्यन्ति । एकादशशशकच्छपमांसेन ॥ २७० ॥

(५) नन्दनः । वराहमहिषौ वन्यौ ॥ २७० ॥

संवत्सरे तु गव्येन पयसा पायसेन च ॥ वार्ध्रीणसस्य मांसेन तृप्तिर्द्वादशवार्षिकी ॥ २७१ ॥

[त्रिपिबं त्विन्द्रिय क्षीणमजापूर्वानुगामिनम्।।तंवैवार्ध्रीणसंविद्यात् वृद्धं शुक्लमजापतिम्॥१॥]*

(१) मेधातिथिः । श्रुतानुमितयोः श्रुतसंबन्धस्य बलीयस्त्वाद्गव्येन पयसेति संबन्धोनमांसेन प्राकरणिकेन । अन्येतु चशब्दंसमुच्चयार्थीयं पठित्वा व्याख्यानयन्ति मांसेन गव्येन पयसापायसेन वा । पयोविकारःपायसंदध्यादि पयःसंस्कृतओदनःप्रसिद्धः वार्ध्रीणसोजरच्छागः । एवंहिनिगमेषुपठ्यते त्रिपिबंत्विन्द्रियक्षीणंश्वेतंवृद्धमजापतिं । वार्ध्रीणसंतुतंप्राहुर्याज्ञिकाःपितृकर्मणि ॥ पिबतोयस्य त्रीणिजलंस्पृशन्ति कर्णौजिव्हाच सत्रिभिःपिबतीति त्रिपिबः । यत्तुशब्देन गोमांसभक्षणेप्रायश्चित्तमाम्नातंतन्मधुपर्काष्टकाश्राद्धेभ्योन्यत्रज्ञेयम् ॥ २७१ ॥

(२) सर्वज्ञनारायणः । गव्येन गोसंबन्धिना पयसा न समांसेन गोपयसा सिद्धेनौदनेन । वार्ध्रीणसोनिगमउक्तः । कृष्णग्रीवोरक्तशिराः श्वेतपक्षोविहङ्गमः ॥ २७१ ॥

(३) कुल्लूकः । वर्षंपुनर्गोभवक्षीरेण तत्साधितोदनेन च तुष्यन्ति । तत्रैव पायसशब्दप्रसिद्धेः । वार्ध्रीणसस्य मांसेनद्वादशवर्षपर्यन्तंपितृतृप्तिर्भवति । वार्ध्रीणसश्च निगमे व्याख्यातः । त्रिपिबंत्विन्द्रियक्षीणंश्वेतंवृद्धमजापतिम् । वार्ध्रीणसंतु तंप्राहुर्याज्ञिकाःपितृकर्मणि॥ नद्यादौ पयःपिबतोयस्यत्रीणि जलंस्पृशन्ति कर्णौ जिह्वा च त्रिभिःपिबतीति त्रिपिबः२७१

(४) राघवानन्दः । गव्येन मांसेन पयसा गोदुग्धेन तत्साध्येनौदनेन वार्ध्रीणसेनेति । त्रिपिबंत्विन्द्रियक्षीणं श्वेतंवृद्धमजापतिं । वार्ध्रीणसंतु तंप्राहुर्याज्ञिकायज्ञकर्मणीति ॥ जिव्हया कर्णाभ्यामपः पिबतीतित्रिपिबः लम्बकर्णवृद्धछागोवार्ध्रीणसइति स्मृतः ॥ २७१ ॥

(५) नन्दनः । वार्ध्रीणसोमहान्खड्गमृगः ॥ २७१ ॥

(६) रामचन्द्रः । वार्ध्रीणसस्य वृषस्य छागस्य पक्षिविशेषस्य मांसेन द्वादश वार्षिकी तृप्तिःस्यात् ॥ २७१ ॥

कालशाकंमहाशल्काःखड्गलोहामिषंमधु ॥ आनन्त्यायैव कल्प्यन्ते मुन्यन्नानि च सर्वशः॥२७२॥

(१) मेधातिथिः । कालशाकंविशिष्टशाकंप्रसिद्धम् । कृष्णेवास्तुकभेदेवा यथा महाशल्काउच्यन्ते । अन्येतु मत्स्यान्सशल्कानाहुः । खड्गोगण्डकः लोहःकृष्णश्छागः सर्वरक्तश्च । तथापुराणं । कृष्णश्छागस्तथारक्तआनन्त्यायैवकल्पते । लोहशब्दोलक्षणयुक्ते छागे वर्तते । अयः कृष्णंताम्रंलोहितउभयत्रापिलोहशब्दःप्रयुज्यते । यद्यपि चैषवर्णोमेषादिष्वपि संभवति तथापि स्मृत्यन्तरप्रसिध्याच्छागएवंगृह्यतइति व्याचक्षते । अन्येतु शकुनिर्लोहितपृष्ठः नामैकदेशेनदेवदत्तोदत्तइतिवत्प्रतिपद्येतेत्याहुः । समाचारश्चोभयत्राप्यन्वेष्यः मधुमाक्षिकं सर्वत्रात्रमीत्यतिशयोत्पत्तिर्विवक्षिता नतु यथाश्रुतएव कालः तथाहि द्वादशवर्षाण्यकरणंस्यात्तत्रविरुध्येत । पिष्यमानिधनात्कार्यमिति ॥ २७२ ॥

(२) सर्वज्ञनारायणः । सर्वशः सर्वाणि ॥ २७२ ॥

(३) कुल्लूकः । कालशाकाख्यंशाकंमहाशल्काःसशल्काइति मेधातिथिः । मत्स्यविशेषाइति युज्यन्ते महाशल्कलिनोमत्स्याइति वचनात् । खड्गोगण्डकः लोहोलोहितवर्णः छागएवछागेनसर्वलोहेनानन्त्यमिति पैठीनसिवचनात्तयोरामिषंमधुमाक्षिकं मुन्यन्नानि नीवारादीनि आरण्यानि सर्वाणि एतान्यनन्ततृप्तये संपद्यन्ते ॥२७२ ॥

---

* (ल) । (ब) चिन्हितपुस्तकेसएवश्लोकःटीकायां दृश्यते

(४) **राघवानन्दः** । महाशल्काः । महाशल्किनो मत्स्याइति यमवचनात् ज्ञेयाइति केचित् शल्यकाइति मेधातिथिः । खड्गोगण्डइति ख्यातः । लोहोलोहितच्छागः । सर्वलोहेनानन्त्यमिति पैठीनसिवचनात् ॥ २७२ ॥

(५) **नन्दनः** । कालशाकः कृष्णनिम्बः । महाशल्कोमत्स्यविशेषः ॥ २७२ ॥

(६) **रामचन्द्रः** । चेवकःनिश्चुकश्चैव कालशाकःप्रकीर्तितः । महाशल्यंमत्स्यखण्डंखड्गमांसं लोहामिषंरक्तच्छागभवंवालोहशब्दोरक्तवर्णनः ॥ २७२ ॥

यत्किञ्चिन्मधुनामिश्रं प्रदद्यात्तु त्रयोदशीम् ॥ तदप्यक्षयमेव स्याद्वर्षासु च मघासु च ॥ २७३॥

(१) **मेधातिथिः** । यत्किंचिदन्नंमधुनासंयुक्तम् । त्रयोदश्यांवर्षासुचमघासुचाधिकमिति । तदाचतदक्षयमेव ऋतुनक्षत्रतिथीनांचसमुच्चयः । आपस्तम्बवचनात्तुवर्षासुत्रयोदश्यष्टमीदशमीष्वपि । मघासुचान्तरेणाविवक्षा । एवंहस्माहमघासुचाधिकमिति ॥ २७३ ॥

(२) **सर्वज्ञनारायणः** । यत्किंचित्पायसादन्यदपि चतुर्मासऋतुव्यवस्थया । वर्षासु मघासु मघानक्षत्रे त्रयोदशीं त्रयोदश्यामितिसमुच्चिते तात्पर्यं । चकारद्वयस्यान्योन्यंसमुच्चयार्थत्वात् ॥ २७३ ॥

(३) **कुल्लूकः** । ऋतुनक्षत्रतिथीनामयंसमुच्चयः । यत्किंचिद्रियप्रसिद्ध । मधुसंयुक्तंवर्षाकाले मघात्रयोदश्यांदीयते तदप्यक्षयमेव भवति । त्रयोदश्याअधिकरणत्वेपोप्सितत्वविवक्षया प्राप्येत्यध्याहाराद्वा द्वितीया ॥ २७३ ॥

(४) **राघवानन्दः** । द्रव्यानुवादेन कालंविधत्ते यदितिद्वाभ्यां । संदिग्धेषु वाक्यशेषादितिन्यायेनाऽन्नंद्रव्यंघृतमिति यावत् अपि न इत्यादिवाक्यशेषबलाज्जर्तिलन्यायाच्च त्रयोदशीविधिः अन्यथा वाक्यभेदात् वर्षास्वित्यादेरतद्गुणत्वं न च वैपरीत्यं तिथेरेव प्राधान्यात् । अरुणन्यायाद्वा विशिष्टविधिः । वर्षावच्छिन्नमघानक्षत्राद्यन्वयादविरुद्धसाधनानांसमुच्चयएव युक्तः । अतएव मेधातिथिः । प्रकृतांत्रयोदशीं वर्षादि गुणयुक्तामधिकृत्योच्यते इति बहुवचनंप्रात्याब्दिकसूचनार्थमनपेक्षत्वात् यथापयसाग्निहोत्रंजुहोतीति पयोहोमपरे वाक्येजर्तिलयवाग्वाजुहोतीत्याद्यर्थवादः एवं त्रयोदशीश्राद्धप्रशंसापरमन्यत्सर्वमितिन्यायार्थः ॥ २७३ ॥

(५) **नन्दनः** । सर्वस्मिन्नपिकालेभवत्यक्षयम् । वर्षासु भाद्रपदेमासे मघासु माघमासे । अनयोर्मासयोर्यत्किंचिद्बहुलत्रयोदश्यांदत्तंतदप्यक्षयम् ॥ २७३ ॥

अपि नः सकुले जायाद्योनोदद्यात्त्रयोदशीं ॥ पायसंमधुसर्पिर्भ्यां प्राक्छाये कुञ्जरस्य च ॥ २७४ ॥

(१) **मेधातिथिः** । प्रकृतांत्रयोदशींवर्षादिगुणयुक्तामधिकृत्येदमुच्यते । एवंपितरआशासते । अस्माकंकुलेभूयात्सतादृशोजायतांउत्कृष्टगुणःयःप्रागुक्तायांत्रयोदश्यामलभ्यंदद्यात्पायसंमधुसर्पिःसंयुक्तं । तथाकुञ्जरस्यहस्तिनः प्राक्छायेप्राच्यांदिशिगतायांछायायां अपराह्णेतरे कालइत्यर्थः शेषेऽहनिहस्तिनोदीर्घाप्राचीच्छायाभवति । प्राक्छायांइतिवापाठः । छायायांहिब्राह्मणाभोज्यन्ते । अपिमंकर्मतुयदल्पत्वाच्छायायांनसंभवति तद्देशान्तरे । तत्समीपेकर्तव्यम् । असत्वात्सतिसंभवेतत्सर्वांगोपेतंप्रधानंहस्तिच्छायायामेव । यत्तुव्याचक्षते राहूपरागोहस्तिच्छायोच्यतेहस्तीवैभूत्वास्वर्भानुरासुरिरादित्यंतमसाविध्यदिति । तदयुक्तं तत्रहिगौणोहस्तिशब्दप्रयोगः स्मृत्यन्तरेच पृथगेव हस्तिच्छाया ग्रहोपरागादाम्नाता हस्तिछाया ग्रहणंचन्द्रसूर्ययोरिति ॥ २७४ ॥

---

(२७४) अपिनःसकुलेजायात्=अपिनःसकुलेभूयात् (ज, झ, अ, ट, ठ, ड)

(२) सर्वज्ञनारायणः। अपिन इति पितृगाथानुकीर्तनम् । पायसे फलबाहुल्यार्थं । त्रयोदशी त्रयोदश्यांवर्षासु मघासु मघानक्षत्रेचेत्यपि। तथाकुञ्जरस्य हस्तिनः प्राक्छाये प्राग्गामिन्यां छायायां अपराण्हे गजस्य छायायामित्यर्थः ॥ २७४ ॥

(३) कुल्लूकः। वर्षासु मघायुक्तत्रयोदशी पूर्वोक्ता विवक्षिता। तत्रापि प्रौष्ठपद्यामतीतायांमघायुक्तांत्रयोदशीम्। प्राप्य श्राद्धंहि कर्तव्यंमधुना पायसेनच ॥ इति शङ्खवचनात्। भाद्रकृष्णत्रयोदशी पूर्वत्रेह च गृह्यते। पितरःकिलैवमाशासते-अपि नामतथाविधःकश्चिदस्माकंकुले भूयात्। योऽस्मभ्यंप्रकृतायांत्रयोदश्यांतथातिथ्यन्तरेऽपिहस्तिनः पूर्वांदिशंगतायां-छायायांमधुघृतसंयुक्तंपायसंदद्यात्। न तु त्रयोदशीहस्तिच्छाययोःसमुच्चयः । यथाह विष्णुः। अपि जायेत सोऽस्माकं-कुले कश्चिन्नरोत्तमः। प्रावृट्कालेसिते पक्षे त्रयोदश्यांसमाहितः ॥ मधुप्लुतेन यःश्राद्धंपायसेन समाचरेत्। कार्तिकंसकलं-वापि प्राक्छायेकुञ्जरस्य च ॥ २७४ ॥

(४) राघवानन्दः। किंच अपीति पितर आशासते अपि संभाव्यते। सोस्माकं कुले जायाद्योनोऽस्मभ्यं दद्यादिति अपि जायेत सोस्माकं कुले कश्चिन्नरोत्तमः। प्रावृट्कालेसिते पक्षे त्रयोदश्यां समाहितः॥ मधूत्कृष्टेन यःश्राद्धं पायसेन समाचरेदिति विष्णूक्तेः ॥ प्राक्छाये कुञ्जरस्येति विध्यन्तरं प्रागिति निर्देशात्। कुञ्जरस्यैव छाया विवक्षिता नतु योगविशेषः। कर्णव्यजनवीजितमिति वाक्यान्तराच्चेति। अपराण्हे तस्य प्राच्यां छाया स्यात् ॥ २७४ ॥

(५) नन्दनः। अयंश्लोकः पितृगीतः ॥ २७४ ॥

(६) रामचन्द्रः। पितरऊचुः नःअस्माकंकुले शंभूयात्। त्रयोदशींत्रयोदश्यांनःअस्माकंमधुसंमिश्रंकिंचिद्दद्यात्। पायसंमधुसर्पिर्भ्यांमिश्रंकुञ्जरस्यप्राक्छाये आशासते। अस्माकंकुले भूयादिति वदन्ति। दद्यात्प्राक्पूर्वस्यांदिशि गतायां-छायायांअपराण्हे । तत्र श्रीपतिराह। कृष्णे पक्षे त्रयोदश्यांमघासिन्धुकरेरविः । यदा तदा गजछायाश्राद्धंपुण्यैरवा-प्यते ॥ २७४ ॥

यद्यद्ददाति विधिवत्सम्यक्श्रद्धासमन्वितः॥ तत्तत्पितॄणां भवति परत्रानन्तमक्षयम् ॥ २७५ ॥

(१) मेधातिथिः। यद्यदितिवीप्सायां अप्रतिषिद्धं सर्वमन्नमनुजानाति विधिवत्सम्यक्शब्दावनुवादः श्रद्धासमन्वितइत्येतदत्रविधीयते। श्रद्धयादातव्यं तथादत्तमनन्तमक्षयंभवति पितॄणांपरलोके। अनन्तमितिवा कालावधिनिषेधः। अक्षयमितिमात्रयाव्ययाभावमाह । सर्वकालंभवतिप्रभूतंच ॥ २७५ ॥

(२) सर्वज्ञनारायणः। यद्यद्धेमवस्त्राद्यपि ददाति मघात्रयोदश्यामेव। विधिवत् सम्यग्विधिना आनन्त्यमतिकालस्थायि अक्षयमनल्पतांगतम् ॥ २७५ ॥

(३) कुल्लूकः। यद्यदितिवीप्सायाम्। सर्वमन्नमप्रतिषिद्धंयथाशास्त्रंसम्यग्रूपश्रद्धायुक्तःपितृभ्योददाति तदनन्तकं-सर्वकालमक्षयमनपचितंपरलोके पितॄणामये भवति। अतस्तत्फलार्थिना श्रद्धया देयमिति विधीयते ॥ २७५ ॥

(४) राघवानन्दः। श्राद्धाच्च प्रत्ययविशेषोपि श्राद्धाङ्गमित्याह यदिति। श्रद्धा हि पितरः सन्ति अस्ति च तेषां श्राद्धेन तृप्तिरितिज्ञानं तयान्वितस्तद्युक्तः आनन्त्यंनानाप्रकारं अक्षयमविनाशि कल्पस्थायीति यावत् ॥ २७५ ॥

(६) रामचन्द्रः। यद्यत् विधिवत्पितॄणांददाति तत्तत्पितॄणां आनन्त्यमक्षयंभवति ॥ २७५ ॥

कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीम् ॥ श्राद्धे प्रशस्तास्तिथयोयथैतान तथेतराः ॥ २७६॥

(१) **मेधातिथिः** । दशम्यादीनांवचनात्फलातिशयोत्पत्तिःअन्यास्वपितु सत्यांश्रद्धायांकर्तव्यंचतुर्दश्यांतुनिषेधएव ॥ २७६ ॥

(२) **सर्वज्ञनारायणः** । अमावास्याश्राद्धमवश्यंपितृतृप्तिबाहुल्यार्थतायां तुकृष्णपक्षे दिनान्तरेऽपि कार्यं तत्रापि दशम्यादिदिनचतुष्टयमधिकफलमित्यर्थः । चतुर्दशीवर्जनमशस्त्रहतानां । यथाचेति विशिष्यतइति वचनात् । अपरपक्षेऽपराण्हेचा संभवे पूर्वपक्षे पूर्वाण्हे च कार्यमिति लभ्यते ॥ २७६ ॥

(३) **कुल्लूकः** । कृष्णपक्षे दशमीमारभ्यचतुर्दशींत्यक्त्वा श्राद्धे यथा तिथयः श्रेष्ठामहाफलान तथैतदन्याः प्रतिपदादयः ॥ २७६ ॥

(४) **राघवानन्दः** । श्राद्धस्य प्रशस्तान्तिथीनाह कृष्णपक्षइति । एकांचतुर्दशीं वर्जयित्वा अमान्ताः पञ्चेतराः प्रतिपदादिनवम्यन्तानव प्रशस्ताःतास्वपि श्राद्धंकार्यं । तदुक्तं याज्ञवल्क्येन । कन्यांकन्यावेदिनश्च पशून्मुख्यान्सुतानपि । द्यूतंकृषिंच वाणिज्यंद्विशफैकशफांस्तथा ॥ ब्रह्मवर्चस्विनः पुत्रान् स्वर्णरूप्येसकुप्यके । ज्ञातिश्रैष्ठ्यंसर्वकामा नाप्नोति श्राद्धदः सदा ॥ प्रतिपत्प्रभृतिष्वेकांवर्जयित्वाचतुर्दशीं । शस्त्रेणतु हताये वै तेभ्यस्तत्र प्रदीयते इति ॥ २७६ ॥

(५) **नन्दनः** । अनेन पूर्वपक्षपूर्वाह्णयोरपि श्राद्धंकर्तव्यमिति सूचितम् ॥ २७६ ॥

(६) **रामचन्द्रः** । श्राद्धे प्रशस्तास्तिथयएताः । तथैतरान ॥ २७६ ॥

युक्षु कुर्वन्दिनर्क्षेषु सर्वान्कामान्समश्नुते ॥ अयुक्षु तु पितॄन्सर्वान्प्रजां प्राप्नोति पुष्कलाम्॥२७७॥

(१) **मेधातिथिः** । युञ्जिदिनानिद्वितीयाचतुर्थ्यादीनि । ऋक्षंनक्षत्रं तानिभरण्यादीनियुञ्जिभवन्ति । प्रतिपत्तृतीयापञ्चमीसप्तमीनवम्यास्तिथयोऽयुजउच्यन्ते द्वितीयाचतुर्थीषष्ठ्यष्टमीदशम्योयुजः एवमेकादश्ययुक्प्रभृतौद्रष्टव्यंनक्षत्रेष्वपि । सर्वान्कामान् तेचकामाइतिहासपुराणयोर्भेदेनोपात्ताः पुष्कलांप्रजां । धनविद्याबलपुरुषैःपुष्टापुष्कला ॥ २७७ ॥

(२) **सर्वज्ञनारायणः** । युक्षु युग्मेषु दिनेषु तिथिषु द्वितीयाचतुर्थ्यादिषु ऋक्षेषु युक्षुरोहिण्यार्द्रादिषु अयुक्षु प्रतिपदादिषु कृत्तिकादिषुच ॥ २७७ ॥

(३) **कुल्लूकः** । दिनशब्दोऽत्र तिथिपरः । युक्षुयुग्मासु तिथिषु द्वितीयाचतुर्थ्यादिषु युग्मनक्षत्रेषु भरणीरोहिण्यादिषु श्राद्धंकुर्वन्सर्वाभिलषितान्प्राप्नोति । अयुग्मासु तिथिषु प्रतिपत्तृतीयाप्रभृतिष्वयुग्मेषु च नक्षत्रेष्वश्विनीकृत्तिकादिषु श्राद्धेन पितॄन्पूजयन्पुत्रादिसन्ततिंलभते पुष्कलांधनविद्यापरिपुष्टाम् ॥ २७७ ॥

(४) **राघवानन्दः** । तत्रैव युग्मायुग्म भेदेन फलमाह युक्ष्विति । युक्षु युग्मेषु दिनपदंतिथिपरंतेन द्वितीयाचतुर्थ्यादयः । नक्षत्राणि भरणीरोहिण्यादीनि युग्मानि तेष्वित्यर्थः । पुष्कलां प्रशस्तांसर्वान्कामानिति पूर्वधृतयाज्ञवल्क्यवचनात्ज्ञेयम् ॥ २७७ ॥

(५) **नन्दनः** । युक्षु युग्मेषु । दिनशब्देन सूर्यवारादीनांग्रहणम् । ऋक्षशब्देन च कृत्तिकादीनाम् । कुर्वञ्श्राद्धमितिशेषः ॥ २७७ ॥

---

(२७७) सर्वान्=अर्चन् (ज, झ, ञ, ढ)

(६) रामचन्द्रः । युक्षु युग्मासुद्वितीयादितिथिषु दिनर्क्षेषु भरण्यादिषु यःश्राद्धंकुर्वन्सःसर्वान्कामान् अश्नुते प्राप्नोति । अयुक्षुअयुग्मासु प्रतिपदाश्विन्यादिषु नक्षत्रेषु यःपितॄनर्चयन्सपुष्कलांबह्वीःप्रजांसन्ततिंप्राप्नोति ॥ २७७ ॥

यथाचैवापरः पक्षः पूर्वपक्षाद्विशिष्यते ॥ तथा श्राद्धस्य पूर्वाह्णादपराह्णोविशिष्यते ॥ २७८ ॥

(१) मेधातिथिः । पूर्वपक्षःशुक्लपक्षः अपरःकृष्णपक्षः चैत्रसिताद्यामासाइति । यथा श्राद्धस्यशुक्लपक्षात् कृष्णपक्षोविशिष्यते प्रकृष्टफलदोभवति । तथापूर्वाण्हादपराण्होविशेषवचनात् । पूर्वाण्हेपिकदाचित्कर्तव्यमेवेतिप्रतीयते । ननुचप्रसिद्धेनदृष्टान्तेन भवितव्यं । नचापरपक्षस्यपूर्वपक्षाच्छ्राद्धंप्रतिविशेषउक्तः । केचिदाहुः कृष्णपक्षेदशम्यादावित्येतस्मात्प्रतीयते । एवंतुब्रूमः वचनानित्वपूर्वत्वादित्यनेनन्यायेनाप्रसिद्धस्यदृष्टान्ततास्तीति विधिरपिदृष्टान्तवचनादेवशक्योवगन्तुम् ॥ २७८ ॥

(३) कुल्लूकः । चैत्रसिताद्यामासाइति ज्योतिःशास्त्रविधानाच्छुक्लपक्षोपक्रमत्वान्मासानामपरःपक्षःकृष्णपक्षःसयथा शुक्लपक्षाच्छ्राद्धस्य संबन्धी विशिष्टफलदोभवति एवंपूर्वार्धदिवसादुत्तरार्धदिवसःप्रकृष्टफलोविशिष्यतइति वचनात्पूर्वाह्णेपि श्राद्धकर्तव्यतांबोधयति । ननु शुक्लपक्षादनुक्तोत्कर्षस्यापरपक्षस्य कथंदृष्टान्तता प्रसिद्धोहि दृष्टान्तोभवति । उच्यते । कृष्णपक्षे दशम्यादावित्यत्रैव विशिष्टविधावुत्कर्षाभिधानात् ॥ २७८ ॥

(४) राघवानन्दः । कृष्णपक्षइत्युक्तं तत्रैवार्थवादमाह यथेति । अपरपक्षइति दृष्टान्तार्थं । पूर्वपक्षात् शुक्लपक्षात् ॥ २७८ ॥

(६) रामचन्द्रः । पूर्वपक्षात्शुक्लपक्षात् यथाऽपरपक्षो विशिष्यते तथा श्राद्धस्य पूर्वाह्णकालादपराह्णकालोविशिष्यते । अपराह्णःपितॄणामिति श्रुतेः । आषाढ्याःपञ्चमःपक्षःआषाढीमवधिंकृत्वा परःपक्षःकृष्णपक्षस्यआश्विनस्य ॥ २७८ ॥

प्राचीनावीतिना सम्यगपसव्यमतन्द्रिणा ॥ पित्र्यमानिधनात्कार्यं विधिवद्दर्भपाणिना ॥२७९॥

(१) मेधातिथिः । यत्किंचित्पित्र्यं तत्रकर्मण्ययंविधिः । पदार्थाःप्राग्व्याख्याताः । अतन्द्रिणाअनलसेन श्रद्दधानेनेतियावत् । आनिधनादामरणाद्यावज्जीविकोयं विधिरित्यर्थः । दर्भपाणिना । तदुक्तं दर्भाःपवित्रमिति तत्रग्रथितशीर्षकंदर्भमयंपवित्रमुच्यते ॥ २७९ ॥

(२) सर्वज्ञनारायणः । अपसव्यमप्रादक्षिण्येन तेन पित्रादिविप्राणांप्रागपवर्गोपवेशनमप्रदक्षिणकर्मकरणार्थमित्यादिलभ्यते । आनिधनादासमाप्तेः । पित्र्यंप्राचीनावीत्यादिना कार्यं । न तु तन्मध्यपतितं दैवमपि विधिवदन्यूनानधिकाङ्गम् ॥ २७९ ॥

(३) कुल्लूकः । दक्षिणसंस्थितयज्ञोपवीतेनानलसेन दर्भहस्तेनापसव्यंपितृतीर्थेन यथाशास्त्रंसर्वंपितृसंबन्धिकर्मानिधनादासमाप्तेः कर्तव्यम् । आनिधनाद्यावज्जीवमिति मेधातिथिगोविन्दराजौ ॥ २७९ ॥

(४) राघवानन्दः । श्राद्धाङ्गतया कार्यान्तरंविधत्ते प्राचीनावीतीति । अपसव्यं पितृतीर्थंतर्जन्यङ्गुष्ठयोर्मध्यं । अतन्द्रिणा अनलसेन । आनिधनादासमाप्तेर्विधिवद्यथाशास्त्रं ॥ २७९ ॥

(५) नन्दनः । नियमान्तराण्याह प्राचीति । आनिधनादासमाप्तेः ॥ २७९ ॥

(२७७।८) [राघवानन्दमते यथाचैवेत्यनन्तरं युक्ष्वितिश्लोकः]

रात्रौ श्राद्धं न कुर्वीत राक्षसी कीर्तिता हि सा ॥ संध्ययोरुभयोश्चैव सूर्ये चैवाचिरोदिते॥२८०।

[कुर्वन् प्रतिपदि श्राद्धंस्वरूपां लभते प्रजाम् ॥ कन्यकाश्च द्वितीयायां तृतीयायांतु वार्जिनः ॥ १॥

पशून् क्षुद्रांश्चतुर्थ्यांतु पञ्चम्यां शोभनान्सुतान् ॥ षष्ठ्यांद्यूतमवाप्नोति सप्तम्यांलभते कृषिम् ॥२॥

अष्टम्यामपिवाणिज्यंलभते श्राद्धदोनरः ॥ नवम्यां वै चैकशफान् दशम्यां द्वि ꣳꣳ खुरान्बहून् ॥३॥

एकादश्यांतथा रौप्यंब्रह्मवर्चस्विनः सुतान् ॥ द्वादश्यांजातरूपंच रजतं कुप्यमेव च ॥ ४ ॥

ज्ञातिश्रैष्ठ्यंत्रयोदश्यां चतुर्दश्यांतु कुप्रजाः ॥ प्रीयन्ते पितरश्चास्य ये च शस्त्रहता रणे ॥ ५ ॥ §

पक्षाद्यादिषु निर्दिष्टा न्विपुला न्मनसः प्रियान् ॥ श्राद्धदः पञ्चदश्यांच सर्वान्कामान्समश्नुते॥६॥]

(१) मेधातिथिः । ननुचापराण्हविधानात्कुतोरात्र्यादिषुप्राप्तिः । अथमतंविशेषवचनेनान्यत्राप्यस्तीतिज्ञापितं। सत्यं । पूर्वाण्हादपराण्होविशिष्यतइति यदपेक्षंविशेषवचनं तत्रैवास्तीतिसामान्यज्ञानं प्रवर्तते तेनपूर्वाण्हएवकदाचित्तस्यान्यउत्तरकालइतिकेचिदाहुः । ग्रहणंचन्द्रसूर्ययोरिति चन्द्रग्रहादिषुरात्र्यादावपिप्राप्तस्तन्निषेधार्थं । अतश्चसन्ध्यायांचन्द्रसूर्ययोरुपरागेणरात्रौचन्द्रग्रहणेप्रतिषेधाविधानाद्विकल्पः । अन्येत्वाहुः मध्यान्हकालः पूर्वाह्णापराह्णाभ्यामन्यस्तत्राप्येतेनप्रतिषेधेन कर्तव्यमितिज्ञाप्यते । सूर्येचैवपूर्वाह्णकालत्वात्प्रथमोदिते सूर्येप्रतिषेधः । राक्षसीत्यर्थवादः ॥ २८० ॥

(२) सर्वज्ञनारायणः । रात्रौ श्राद्धमितिनिषेधात्पार्वणादेर्नित्यस्यापराह्णेऽसंभवे पूर्वाण्हेऽपि करणमनुमतम् । अतएवापराह्णोविशिष्यतइत्युक्तम् । एवंच दिवा नित्यश्राद्धस्यदैवादकरणे लोपएवेति दर्शितम् । सूर्येचिरोदिते सङ्गवाख्यषण्मुहूर्तमध्ये ॥ २८० ॥

(३) कुल्लूकः । रात्रौ श्राद्धं न कर्तव्यम् यस्माच्छ्राद्धविनाशनगुणयोगाद्राक्षसी मन्वादिभिरसौ कथिता । सन्ध्ययोश्च न कुर्यादादित्येचाचिरोदिते । अचिरोदितादित्यकालश्चापेक्षायांत्रिमुहूर्तःप्रातःकालोप्राह्यः । यथोक्तंविष्णुपुराणे । रेखाप्रभृत्यथादित्ये त्रिमुहूर्त्तंगतेरवौ । प्रातस्ततःस्मृतःकालोभागःसोह्नस्तु पञ्चमः ॥ अपराह्णस्य श्राद्धाङ्गतया विधानातकथमयमप्रसक्तप्रतिषेधइति चेत् । नायंप्रतिषेधः । सहि रागप्राप्तस्य वा स्यात्विधिप्राप्तस्य वा नाद्यः । नात्ररागतोनित्यस्य दर्शश्राद्धस्य प्राप्तत्वातविधिप्राप्तस्य निषेधे षोडशिग्रहणाग्रहणवद्विकल्पःस्यात् तस्मात्पर्युदासोयम् रात्र्यादिपर्युदस्तेतरकाले श्राद्धंकुर्यात अनुयाजेतरयजतिषु ये यजामहइति मन्त्रवत् । अपराह्णविधिश्च प्राशस्त्यार्थः। अतएवोक्तम् । यथा श्राद्धस्य पूर्वाह्णादपराह्णोविशिष्यतइति ॥ २८० ॥

(४) राघवानन्दः । श्राद्धस्यसंपदः स्युरित्युक्तंतस्य प्राशस्त्यंद्योतयन् पर्युदासन्यायेन रात्र्यादिचतुष्टयातिरिक्तकाले कुर्यादनुयाजव्यतिरिक्तयजतिवत् यजतिषुयेयजामहं करोति नानुयाजेषु इत्यादिवदित्याह रात्राविति । अचिरोदिते प्रथमोदिते । अपराण्हे विशिष्यतइति प्राशस्त्यस्मृतेः । षष्टिदण्डात्मिकायांतिथौ प्राप्तायां निषेधःसार्थकइतिभावः ॥ २८० ॥

+ वाजिनः=बन्दिनः (ढ) पुस्तके । अन्येषु वाजिन इत्येव ।

ꣳꣳ द्विखुरान्=द्विशफान् (ढ) पुस्तके । अन्येषु द्विखरान् इत्येव ।

§ (क, ख, ग, ढ)

(६) रामचन्द्रः । सूर्ये अचिरोदिते प्रथमोदिते संङ्गवे काले वा ॥ २८० ॥

[रामचन्द्रः । शाकलः युवानस्तु म्रियन्ते त्वकामोद्रेकेणवै द्विजाः । तेषांश्राद्धंचतुर्दश्यांनान्येषांतु कदाचन । अस्यार्थःअन्येषांज्वरादिना मृतानांचतुर्दश्यांश्राद्धंन कार्यं किंतु तन्निधा । वाष्कलः । कामाग्निना च दह्यन्ते ये युवानःकदाचन । तेषांहिपितॄपिण्डश्च भूतायामपि निर्वपेत् । स्त्रीणामप्येवमेकंस्यात्कामासक्तागतासवः । तासांश्राद्धंहि भूतायांमसृत्या मरणंयदि ॥ ५ ॥]

[रामचन्द्रः । पक्षेति । पक्षाद्यादिषु पक्षादिःआदिर्यासांताःपक्षाद्यादयः तासु पक्षाद्यादिषु प्रतिपदाद्यासु पञ्चदश्यां अमायां श्राद्धदःसर्वान्कामानवाप्नोति ॥ ६ ॥]

अनेन विधिना श्राद्धंत्रिरब्दस्येह निर्वपेत् ॥ हेमन्तग्रीष्मवर्षासु पाञ्चयज्ञिकमन्वहम् ॥२८१॥

(१) मेधातिथिः । पूर्वोक्तेनविधिनाइतिकर्तव्यताकलापेन पूर्वेद्युर्निमन्त्रणादिभिः संवत्सरस्यत्रिः श्राद्धंकुर्वीत । केषुमासेष्वित्यतआह हेमन्तग्रीष्मवर्षासु मासानुमासिकमित्यस्यत्रिः संवत्सरविधिर्वैकल्पिकः । पाञ्चयाज्ञिकः पञ्चमहायज्ञमध्येयःपठितःसोन्वहंकर्तव्यः । अस्यचप्राचीनावीत्यपसव्योदङ्मुखब्राह्मणभोजनमित्येतावत्येवेतिकर्तव्यता । एवमर्थमेव पुनरुपन्यासः । एवंत्रिः संवत्सरविधिरनाहिताग्नेरित्येवंपूर्वेव्याचक्षते प्रमाणंतुतएवविदंति ॥ २८१ ॥

(२) सर्वज्ञनारायणः । त्रिरितित्रिरपीत्यर्थः । एतच्च प्रतिमासमसंभवे । संभवेतु प्रतिमासमेव मासिमासि पितृभ्यः क्रियतइतिश्रुतेः । हेमन्तग्रीष्मवर्षास्विति चतुर्मासर्तुपक्षमाश्रित्योक्तम् । एवंच मत्स्यपुराणे । अनेन विधिना श्राद्धंत्रिरब्दस्येह निर्वपेत् । कन्याकुम्भवृषस्थेऽर्के कृष्णपक्षेषु सर्वदेत्युक्तत्वात् ॥ त्रिःकरणेएतेष्वेव मासेष्वमास्यायां तत्करणमितिलभ्यते । त्रिसंवत्सरविधिरनाहिताग्नेरित्येवंपूर्वे व्याचक्षते प्रमाणंतु तएव विदन्तीति । अग्निविरहिणामेवेत्यपरे । पाञ्चयज्ञिकं पञ्चमहायज्ञपतितं तदन्वहमेव कार्यमशक्तावुदकादिनापि इहेति हेमन्तादिषु त्रिःसंवत्सरविधिःपूर्वैःकल्पितः । पाञ्चयज्ञिकोनित्यइति ॥ २८१ ॥

(३) कुल्लूकः । कुर्यान्मासानुमासिकमिति प्रतिमासंश्राद्धंविहितंतदसंभवे विधिरयंचतुर्भिर्मासैर्ऋतुरेकः एकस्त्वृतुःसंवत्सरइतीमंपक्षमाश्रित्योच्यते । अनेनोक्तविधानेन संवत्सरमध्ये त्रीन्वारान्हेमन्तग्रीष्मवर्षासु श्राद्धंकर्त्तव्यम् । तच्च समयाचारात्कुंभवृषकन्यास्थेऽर्केपञ्चमहायज्ञान्तर्गतंचएकमप्याशयेद्विप्रमित्यनेन विहितंप्रत्यहंतुकुर्यादिति पूर्वोक्तदार्ढ्यार्थम् ॥ २८१ ॥

(४) राघवानन्दः । कुर्यान्मासानुमासिकमिति प्रतिमासं प्रत्यब्दंच प्राप्तंश्राद्धमशक्तौ संकुचति अनेनेति । अब्दस्य हेमन्तादित्रिष्ववश्यं कुर्यादिति त्रिषु संवत्सरमाश्रित्यैतत् पाञ्चयज्ञिकं एकमप्याशयेद्विप्रमित्यादि विहितं पञ्चयज्ञान्तर्गतंश्राद्धं । अन्वहंप्रतिदिनं निर्वपेदित्यन्वयः ॥ २८१ ॥

(५) नन्दनः । इहामावास्यायांत्रिरवश्यंनिर्वपेत् न न्यूनम् ॥ २८१॥

(६) रामचन्द्रः । अब्दस्य मध्ये त्रिवारंहेमन्तग्रीष्मवर्षासु श्राद्धंनिर्वपेत् । पञ्चयज्ञीयंश्राद्धं अन्वहंप्रत्यहं कुर्यात् । अयनेसंवत्सरस्य विधिरनाहिताग्नेः ॥ २८१ ॥

न पैतृयज्ञियोहोमोलौकिकेऽग्नौ विधीयते ॥ न दर्शेन विना श्राद्धमाहिताग्नेर्द्विजन्मनः ॥ २८२ ॥

(१) मेधातिथिः । पितृयज्ञाङ्गभूतोहोमःपैतृयज्ञिकःसलौकिकेस्मार्तेग्नौनविधीयते । शास्त्रेणकर्तव्यतयानचोद्यते । तत्साग्निःसंवत्सरस्यानाहिताग्निनाकर्तव्यं । यद्यपित्रिःकृतमपिभवत्येवकृतंलौकिकेग्नौ । तथापिसंवत्सरापेक्षया अकृतमे

बतद्भवति । प्रस्थभोजनोह्निन्यूनेभुक्तेऽभुक्तइत्यर्थवादतया पूर्वशेषमिदंपूर्वेव्याचक्षते । इदंत्वयुक्तं । यदिलौकिकोग्निर्विवाहादावपरिगृहीतस्तस्मिन्श्राद्धाङ्गभूतोहोमोनकर्तव्यइत्युच्यते होमप्रतिषेधेनचतद्व्यतिरिक्तमन्यत्कर्मकर्तव्यमित्युक्तंभवति। इतरथापरिगृहीताऽन्यपिपार्वणश्राद्धाङ्गत्वेनविधानादनग्निकस्यश्राद्धानधिकारएवस्यात् । यथान्धस्याऽज्याऽवेक्षणाशक्तयानदर्शपौर्णमासयोरधिकारः । अस्मिंस्तुस्मार्तसाग्निकस्यहोमवत्श्राद्धमनग्निकस्य तद्वर्जितमपिज्ञापितंभवति । तथाचान्यभावइत्यस्यायमेवविषयः । येपिव्याचक्षते पिण्डपितृयज्ञःपितृयज्ञोभिप्रेतः तत्रयोहोमःसलौकिकेस्मार्तेऽग्नौनास्ति तेपिनयुक्तमाहुः। अस्त्वेवमनाहिताग्नेर्नित्यत्वेश्रपयित्वाजुहुयादित्यादि । नदर्शेनविनाश्राद्धंग्रहोपरागादावाहिताग्नेःप्रतिषेधइत्याहुः । एतत्तुसमाचारविरुद्धं । अन्येतुपठन्तिनविनादर्शइत्यस्यानाहिताग्निनामासानुमासिकंकर्तव्यं।नास्यत्रिःसंवत्सरविधिः । नैवायंपाठोस्तीत्यन्ये । कस्तर्ह्यस्यार्थः । दार्शात्श्राद्धादन्यदाहिताग्नेर्मघाश्राद्धादि ननियमेन भवतीतिदार्शमेवतस्यनियतं । अनाहिताग्नेस्तुहेमन्तादिविहितान्यपिनियतानीति॥ २८२ ॥

(२) सर्वज्ञनारायणः । निरग्नीनांविशिनष्ट्यपिच नपितृयज्ञिकइति । पितृयज्ञश्राद्धसंबन्धि होमोलौकिके याग्न्ये न किंतु वैवाहिकएव । तदभावे ब्राह्मणकरादौ । आहिताग्नेर्यच्छ्राद्धमाहिताग्निकर्तृकंतन्न दर्शेनविनाऽस्ति । अतोदशम्यादिष्वपि यत्करणमुक्तंतदनाहितत्रेताग्निमपेक्ष्यश्राद्धं पार्वणंप्रकृतत्वात् । प्रतिसांवत्सरिकादित्वन्यदपि कार्यमेव ॥ २८२ ॥

(३) कुल्लूकः । अग्नेःसोमयमाभ्यांचेत्यनेन विहितपितृयज्ञाङ्गभूतोहोमोन लौकिके श्रौतस्मार्तव्यतिरिक्ताग्नौ शास्त्रेण विधीयते । तस्मान्न लौकिकाग्नावग्नौकरणहोमःकर्तव्यः । निरग्निना तु अग्न्यभावे तु विप्रस्य पाणावित्यभिधानाद्विप्रपाण्यादौ करणीयः । आहिताग्नेर्द्विजस्य नामावास्याव्यतिरेकेण कृष्णपक्षे दशम्यादौ श्राद्धंविधीयते । मृताहश्राद्धंतु नियतत्वात्कृष्णपक्षेऽपि तिथ्यन्तरे न निषिध्यते ॥ २८२ ॥

(४) राघवानन्दः । तत्र विशेषान्तरमाह नेति । लौकिके विवाहादौ । अपरिगृहीते श्राद्धाङ्गहोमोनकर्तव्यइति निषेधादन्यत्कर्तव्यमिति मेधातिथिः । स्मार्ताग्नौ आवसथ्याख्ये श्रौते च कर्तव्यः अग्नीशानयमाभ्यांस्वाहेत्यादिकोहोमः न दर्शेनेति आहिताग्नेः अमावासिकैकोद्दिष्टद्वयमितिभावः ॥ २८२ ॥

(५) नन्दनः । अथ पिण्ड्येषु गृह्याग्नौ होमः कार्योन लौकिकाग्नावित्याह नेति । अत्र पितृयज्ञशब्देन मासिकश्राद्धमुच्यते । अधिकाराल्लौकिकाग्नौ न विधीयते । किंतु गृह्याग्नावेव विधीयतइत्यर्थः । केचित्तु पितृयज्ञशब्दस्य पिण्डपितृयज्ञएव निरूढत्वात्तस्यैव लौकिकाग्नौ निषेधइतिमन्यन्ते । अनाहिताग्नेरयंमासि श्राद्धकल्पः न पुनराहिताग्ने रपीत्युक्तम् उत्तरार्द्धेन । आहिताग्नेः पितृयज्ञंतुनिर्वर्त्येत्यादिना श्लोकद्वयेनोक्तएव मासिकश्राद्धकल्पः कर्तव्यः नाधिकइत्यर्थः ॥ २८२ ॥

(६) रामचन्द्रः । लौकिकाग्नौ अस्मार्तेग्नौ पैतृयाज्ञियःअग्नौकरणहोमःविधीयते आहिताग्नेरग्निहोत्रिणःद्विजन्मनःदर्शेन विनाश्राद्धंन । दर्शेचाधिकारोनान्यतिथौ ॥ २८२ ॥

यदेव तर्पयत्यद्भिः पितॄन्स्नात्वा द्विजोत्तमः ॥ तेनैव कृत्स्नमाप्नोति पितृयज्ञक्रियाफलम् ॥ २८३॥

(१) मेधातिथिः । पाञ्चयाज्ञिकंयच्छ्राद्धं अहरहरित्युक्तं तस्यवैकल्पिकत्वमनेनोच्यते । उदकतर्पणंयत्क्रियतेस्नात्वातेनैवपितृयज्ञक्रियाफलंमाप्नोति । यदुक्तमेकमप्याशयेदितितस्यनास्तिनियमेनकर्तव्यता उदकतर्पणमवश्यंकर्तव्यम् ॥ २८३ ॥

(२) **सर्वज्ञनारायणः** । अब्दस्य त्रिरपिपार्वणश्राद्धकरणेऽशक्तस्यानुकल्पमाह यदेवेति । पितृयज्ञः पार्वणाख्यः ॥ २८३ ॥

(३) **कुल्लूकः** । पाञ्चयज्ञिकश्राद्धासंभवे विधिरयम् । यत्र स्नानानन्तरमुदकतर्पणंद्विजः करोति तेनैव सर्वनित्यश्राद्धफलंप्राप्नोति । द्विजोत्तमपदंद्विजपरम् ॥ २८३ ॥

(४) **राघवानन्दः** । सर्वाशक्तौ तर्पणस्य सर्वार्थकत्वमावश्यकत्वंच गृहमेधीये आज्यभागौ यजतीतिवदित्याह यदेवेति । मेधातिथिस्तूदकतर्पणं नित्यश्राद्धस्य वैकल्पिकमित्याह ॥ २८३ ॥

(५) **नन्दनः** । अथ ब्राह्मणभोजनात्मकमपि श्राद्धमाहिताग्निनावश्यंकार्यं तत्फलस्यान्यतः सिद्धत्वादित्याह यदेति । तेनाहिताग्नेः कल्पनीया व्यवस्था । पिण्डपितृयज्ञेन वापितृपूजाब्राह्मणभोजनान्तेन विधिनावेति ॥ २८३ ॥

वसून्वदन्ति तु पितॄन् रुद्रांश्चैव पितामहान् ॥ प्रपितामहांस्तथादित्यान् श्रुतिरेषासनातनी ॥२८४॥

(१) **मेधातिथिः** । पितृद्वेषादप्रवर्तमानस्यप्रवृत्त्यर्थमिदं । त्रिस्थानावस्थायादेवताःपितरोपियएवपिण्डभाजः अतोदेवतात्वेनैतेद्रष्टव्याः श्रुतिरेषाश्रूयते एतद्वेदेतु अतःपुरातनीनित्यत्वाद्वेदस्य ॥ २८४ ॥

(२) **सर्वज्ञनारायणः** । पित्रादीनांनरकादिषु स्थितौ श्राद्धफलदायित्वासंभवात् कथंकाम्यश्राद्धीयफलसिद्धिरित्याशंक्याह वसून्वदन्तीति । पुरातनो इदानीमपक्रम्यमाना एतेन स्वपित्रादीनुद्दिश्यापि कृतंश्राद्धंवस्वादीनपि देवांस्तर्पयति तेच तृप्ताःफलंददतीत्युक्तम् ॥ २८४ ॥

(३ **कुल्लूकः** । यस्मात्पित्रादयोवस्वादयइति । एषामनादिभूताश्रुतिरस्तिअतःपितॄनवस्वाख्यदेवान्पितामहान्रुद्रान्प्रपितामहानादित्यान्मन्वादयोवदन्ति ततश्च सिद्धबोधनवैयर्थ्याच्छ्राद्धे पित्रादयोवस्वादिरूपेण ध्येयाइति विधिःकल्प्यते । अतएव पैठीनसिः । यएवंविद्वान्पितॄन्यजते वसवोरुद्राआदित्याश्चास्य प्रीताभवन्ति । मेधातिथिगोविन्दराजौतु ।पितृद्वेषान्नास्तिक्याद्वायःपितृकर्मणि न प्रवर्तते तंप्रत्येतत्प्रवर्तनार्थंदेवतात्वाध्यारोपेण पितॄणांस्तुतिवचनम् ॥ २८४ ॥

(६) **राघवानन्दः** । तर्पणेनैव सर्वमाप्नोतीत्यस्यार्थवादः वसूनिति । पित्रादित्रयतर्पणेन वसुरुद्रादित्यास्तर्पिताभवन्तीतिभावः ॥ २८४ ॥

(५) **नन्दनः** । अथ पित्रादिषु देवताविशेषात्मकत्वप्रतिपत्तिश्राद्धफलातिशयमाह वसूनिति ॥ २८४ ॥

(६) **रामचन्द्रः** । पितृपितामहप्रपितामहान् वसुरुद्रादित्यस्वरूपान् वदन्ति । एषाश्रुतिः सनातनी । तद्यथा हे पितःवसुरूप हे पितामह रुद्ररूप हेप्रपितामह आदित्यरूप ॥ २८४ ॥

विघसाशी भवेन्नित्यं नित्यंवामृतभोजनः ॥ विघसोभुक्तशेषं तु यज्ञशेषं तथामृतम् ॥ २८५ ॥

(१) **मेधातिथिः** । आद्येनश्लोकपादेनातिथ्यादिभुक्तशिष्टस्यान्नस्ययद्भोजनंविहितंतदनूद्यते माङ्गल्यकतयामङ्गलावसथानिशास्त्राणिप्रथन्ते । पित्र्यादैवंकर्मशस्ततरं । यज्ञशेषं । अनेनज्योतिष्टोमादिहविःशेषस्यभोजनंविघसस्यतुल्यतयोच्यते । उत्तरेणार्धश्लोकेनसौहार्दमेव । तस्यवेदार्थव्याख्यानं । कस्यांचिच्छाखायामाभ्यांशब्दाभ्यांविधानदृष्टमतोव्यामोहंनिवर्तयति । विघसमश्नातीतिविघसाशी । अमृतंभोजनमस्येत्यमृतभोजनः । भृत्यशेषं भृत्यभुक्तशिष्टमितिद्रष्टव्यं । भुक्तशेषमितिपाठसामर्थ्याददतिथ्यादिभुक्तमितिद्रष्टव्यं । अन्यत्तु प्रकृतत्वाच्छ्राद्धभुक्तशेषमितिद्रष्टव्यं । तथाचस्मृत्यन्तरं भुञ्जीतपितृसेवितमिति । श्राद्धाङ्गंचैतद्भोजनंकेचिदाहुः । अन्येतु पुरुषार्थोभोजननियमोयमित्याहुः । वसून्वदन्तीत्यनेनैवश्राद्धप्रकरणस्यापवृत्तत्वात् । यज्ञशेषं यज्ञोपयुक्तद्रव्यशेषमितिद्रष्टव्यम् ॥ २८५ ॥

(२) सर्वज्ञनारायणः । भुक्तशेषमतिथ्यादिभुक्तशेषं । यज्ञशेषंवैश्वदेवाख्ययज्ञशिष्टम् ॥ २८५ ॥

(३) कुल्लूकः । सर्वदा विघसभोजनःस्यात्सर्वदा चामृतभोजनोभवेत् । विघसामृतपदयोरप्रसिद्धत्वादर्थंव्याकुरुते । विप्रादिभुक्तशेषंविघसउच्यते । दर्शपौर्णमासादियज्ञशिष्टंपुरोडाशाद्यमृतम् सामान्याभिधानेपि प्रकृतत्वाच्छ्राद्धे विप्रभुक्तशेषभोजनार्थोयंविधिः । अतएव भुञ्जीतातिथिसंयुक्तःसर्वंपितृनिषेवितमिति स्मृत्यन्तरम् । अतिथ्यादिविशेषभोजनंत्ववशिष्टंतु दम्पतीइत्यनेनैव विहितं तस्यैव यज्ञशेषतुल्यत्वापादनेन स्तुत्यर्थंपुनर्वचनमिति तु गोविन्दराजव्याख्यानमनुष्ठानविशेषानर्हमप्राकरणिकंच ॥ २८५ ॥

(४) राघवानन्दः । देवानतिथींश्च पूजयित्वैव भोक्तव्यमिति नियमयति विघसाशीति । विघसामृतयोर्लक्षणमाहविघसंत्विति । भुक्तशेषमतिथ्यादिभुक्तावशिष्टं । गृहस्थःशेषभुग्भवेदित्युक्तेः ॥ २८५ ॥

(५) नन्दनः । उक्तेन प्रकारेण देवतातिथिभृत्यशेषंगृहस्थेन भोक्तव्यमित्याह विघसाशीति । यज्ञशेषंपञ्चमहायज्ञशेषम् ॥ २८५ ॥

(६) रामचन्द्रः । विघसंभुक्तशेषंश्राद्धभुक्तावशेषं पञ्चयज्ञशेषं अमृतंभवतीत्यर्थः ॥ २८५ ॥

एतद्वोऽभिहितंसर्वंविधानंपाञ्चयज्ञिकम् ॥ द्विजातिमुख्यवृत्तीनांविधानंश्रूयतामिति ॥ २८६ ॥

इति मानवे धर्मशास्त्रे भृगुप्रोक्तायांसंहितायांतृतीयोऽध्यायः ॥ ॥ ३ ॥ ॥ ७ ॥

(१) मेधातिथिः । पूर्वंह्यव्यवहितस्यपाञ्चयज्ञिकमिति महायज्ञविधेरुपसंहारोमाङ्गलिकतयैवउत्तरेणश्लोकार्धेनवक्ष्यमाणाध्यायार्थैकदेशोपन्यासोपगतेचोक्तप्रयोजनानि । द्विजातिमुख्याब्राह्मणास्तेषांवृत्तयोजीविकाः कर्माणि द्विजातीनांवामुख्यवृत्तयइति । उत्तरत्रैवदर्शयिष्यामइतिप्रसिद्धम् ॥ २८६ ॥ मान्याकापिमनुस्मृतिस्तदुचिताव्याख्याहिमेधातिथेः सालुप्तैवविधेर्वशात्क्वचिदपिप्राप्यंनयत्पुस्तकम् ॥क्षोणीन्द्रोमदनःसहारणसुतोदेशान्तरादाहृतैर्जीर्णोद्धारमचीकरत्तइतस्तत्पुस्तकैर्लेखितैः ॥ १ ॥ शुभंभवतु ॥ इतिश्रीभट्टवीरस्वामिसूनोर्भट्टमेधातिथिस्वामिनःकृतौमनुभाष्येतृतीयोध्यायःसमाप्तः ॥३॥

(२) सर्वज्ञनारायणः । पाञ्चयज्ञिकं तत्र प्रसंगात्पार्वणस्य चेत्यपिद्रष्टव्यम् । द्विजाति मुख्याः ब्राह्मणाः । तेषांयावृत्तयो जीवनोपायास्तेषांविधानम् ॥ २८६ ॥ श्रीनारायणसर्वज्ञवृत्तिसंदर्शितान्वयाः । मनुस्मृतिगिरांचार्थमधिगच्छन्तुसूरयः । इति सर्वज्ञश्रीनारायणकृतौ मन्वर्थविवृतौ विवाहश्राद्धाधिकारोनाम तृतीयोध्यायः ॥ ३ ॥ ॥ ७ ॥

(३) कुल्लूकः । इदंपञ्चयज्ञभवमनुष्ठानंसर्वंयुष्माकमुक्तम् पार्वणश्राद्धव्यवहितैरपि पञ्चयज्ञैरुपसंहारस्तेषामभ्यर्हितत्वज्ञापनार्थः मङ्गलार्थंइति तु मेधातिथिगोविन्दराजौ । इदानींद्विजानांमुख्योब्राह्मणस्तस्य वृत्तीनामृतादीनामनुष्ठानंश्रूयतामिति वक्ष्यमाणाध्यायैकदेशोपन्यासः ॥ २८६ ॥ ॥ इति वारेन्द्रनन्दनवासीयभट्टदिवाकरात्मजश्रीकुल्लूकभट्टविरचितायांमन्वर्थमुक्तावल्यांतृतीयोऽध्यायः ॥ ३ ॥ ॥ ७ ॥ ॥ ७ ॥

(४) राघवानन्दः । वृत्तमुपसंहरन्वर्तिष्यमाणंप्रतिजानीते एतदिति । द्विजातिषु मुख्याब्राह्मणश्रेष्ठास्तेषांवृत्तयो जीविकास्तासामनुष्ठानम् ॥ २८६ ॥ ॥ इति मनुस्मृतौ तृतीयोध्यायः ॥ ३ ॥ ॥ ७ ॥ ॥ ७ ॥

(५) नन्दनः । द्विजातिमुख्याः ब्राह्मणास्तेषांवृत्तयोर्थप्राप्त्युपायाः । इतिशब्दोवाक्यसमाप्तौ ॥ २८६ ॥ ॥ इतिमानवव्याख्याने तृतीयोऽध्यायः ॥ ३ ॥ ॥ ७ ॥ ॥ ७ ॥

(६) रामचन्द्रः । यत्तदिति । द्विजातीनांब्राह्मणक्षत्रियविशां एतेषांपृथक् पृथक् मुख्यवृत्तीनांविधानंलक्षणंश्रूयतामिति ॥ २८६ ॥ ॥ श्राद्धप्रकरणंतृतीयम् ॥ ३ ॥ ॥ ७ ॥ ॥ ७ ॥

॥ श्री ॥

॥श्रीगणेशायनमः॥

॥ अथ चतुर्थाध्यायप्रारम्भः ॥

चतुर्थमायुषोभागमुषित्वाद्यं गुरौ द्विजः ॥ द्वितीयमायुषोभागं कृतदारोगृहे वसेत् ॥ १ ॥

(१) मेधातिथिः । संक्षेपेणातिक्रान्तस्याध्यायद्वयस्यार्थकथयन्त्यनुस्मरणाय । गार्हस्थ्यधर्मस्यायंवृत्तिविधिरिति-द्वितीयंश्लोकप्रयोजनं । अनियतपरिमाणत्वादायुषश्चतुर्थभागव्यवस्थाविधानमाश्रमिणामनुपपन्नमतःश्लोकोयंविहिताश्रमकालानुवादार्थः। यद्यपिच शतायुर्वैपुरुषइत्येतदपेक्षया कथंचिदुपपद्येतापि तथापि स्वप्रकरणे ग्रहणान्तिकमिति अवध्यन्तरस्य ब्रह्मचर्यविहितत्वात् । गृहस्थस्तु यदापश्येदिति गार्हस्थ्येपि कालान्तरप्रतिपत्तेरनुवादतैवानुमीयते । चतुर्थमाद्यमायुषोभागं जन्मापेक्षमाद्यत्वंगुरौ उषित्वा ब्रह्मचर्यंकृत्वा ततोद्वितीयं चतुर्थमायुषोभागं कृतविवाहो गृहे-वसेत् । गृहस्थाश्रममनुतिष्ठेत् । तत्रवसेत् ॥ १ ॥

(२) सर्वज्ञनारायणः । ॐ नमोमहागणपतये नमः । चतुर्थमायुषोभागमिति । यावदायुःपुंसस्तस्य चतुर्थभागः आद्योयावत्समाप्यते तावदित्यर्थः। एतच्च षट्त्रिंशदाब्दिकायुक्तपक्षैः सह वैकल्पिकम् । गुराविति । ब्रह्मचर्याश्रमइत्यर्थः । द्वितीयं आद्यचतुर्थभागानन्तरचतुर्थभागम् ॥ १ ॥

(३) कुल्लूकः । श्राद्धकल्पानन्तरंवृत्तीनांरक्षणंचैवेति वृत्तिषु व्यक्ततया प्रतिज्ञातासु वृत्त्यधीनत्वाद्गार्हस्थ्यस्यानन्तरंवक्तव्यासु ब्रह्मचर्यपूर्वकमेव गार्हस्थ्यंतत्रैव वक्ष्यमाणावृत्तयइति दर्शयितुंब्रह्मचर्यकालंगार्हस्थ्यकालं चात्र वदति । चतुर्थमिति । चतुर्थमायुषोभागमाद्यमित्युक्तं*ब्रह्मचर्यकालोपलक्षणार्थम् । अनियतपरिमाणत्वादायुषश्चतुर्थभागस्य दुर्ज्ञानत्वात् न च शतायुर्वैपुरुषइतिश्रुतेः पञ्चविंशतिवर्षपरत्वम् । षट्त्रिंशदाब्दिकंब्रह्मचर्यमित्यादिविरोधात् । आश्रमसमुच्चयपक्षमाश्रितोब्राह्मणउक्तब्रह्मचर्यकालंजन्मापेक्ष्याद्यंयथाशक्ति गुरुकुले स्थित्वा द्वितीयमायुषश्चतुर्थभागंगृहस्थाश्रममनुतिष्ठेत् । गृहस्थस्तुयदापश्येदित्यनियतत्वाद्द्वितीयमायुषोभागमित्यपिगार्हस्थ्यकालमेव ॥ १ ॥

(४) राघवानन्दः । चतुर्थभागं पञ्चविंशतिवत्सरान् शतायुर्वै पुरुषइति श्रुतेः । ब्रह्मचर्यमुषित्वा समाप्येति ब्रह्मचर्यंसमाप्य गृहीभवेत्गृहीभूत्वा वनीभवेदिति श्रुतेः तत्र शाब्दीसङ्गतिः ॥ १ ॥

(५) नन्दनः । एवंपञ्चमहायज्ञविधानमुक्तम् । इदानींपूर्वाध्यायान्ते प्रतिज्ञातंगृहस्थस्य ब्राह्मणस्य वृत्त्युपायंविवक्षंस्तस्यगार्हस्थ्यस्य कालंतावत्वयसा विभजन्नाह चतुर्थमिति । आयुषोवर्षशतपरिमाणस्याद्यश्चतुर्भागउपनयनात्प्राक्सप्तवर्षाणि पश्चादष्टादश इत्येवंपञ्चविंशतिवर्षकंपूर्वोक्तेषु षट्त्रिंशदाब्दिकादिषु कल्पेष्वाश्रमसमुच्चयानुष्ठाने समीचीनस्तदधि-

---

* भागमाद्यमित्युक्तं=भागमित्युक्त (अ)

काराख्योऽयंकल्पः सामर्थ्याद्गम्यते। नह्यनुपनीतस्य गुरुकुलवासोभवति। गुरावुषित्वा द्वितीयमायुषश्चतुर्थभागंकृतदारो-गृहे वसेत्। ब्रह्मचर्यकालस्य पुनरुपन्यासोगार्हस्थ्यस्य कालविवक्षार्थः॥ १॥

(६) **रामचन्द्रः**। अथ गृहस्थधर्मानाह। आयुषः आद्यं चतुर्भागं पञ्चविंशति वर्षपर्यन्तं गुरौ गुरुसमीपे उषित्वा वासं कृत्वा वेदाध्ययनं कृत्वा। आयुषो द्वितीयभागं प्राप्य कृतदारःसन् वसेत्॥ १॥

अद्रोहेणैव भूतानामल्पद्रोहेण वा पुनः॥ या वृत्तिस्तां समास्थाय विप्रोजीवेदनापदि॥२॥

(१) **मेधातिथिः**। देहिदेहीति याच्यमानस्य यःपरस्यचित्तविकारः खेदात्मकोजायते सद्रोहोभिमेतो नपुनर्हिंसैव तस्यःसर्वसामान्येनैवप्रतिषेधात्। अल्पद्रोहेणेति। याञ्चयाविना यदिनवर्त्यते तदास्वल्पं याचितव्यं एषोल्पद्रोहो-यावृत्तिर्जीवनोपायः कृषिसेवादि। यस्यांवृत्तौ परस्यपीडा नभवति साआश्रयितव्या। सामान्योपदेशोयं समास्थाय आश्रित्यजीवेत्। आपदि दशमेविधिर्भविष्यति। अस्माच्चोपदेशाद्वक्ष्यमाणाभ्यइत्यादिवृत्तिर्भवतीतिगम्यते। अन्यथा-वक्ष्यमाणविशेषनिष्ठत्वसामान्यैरस्योपदेशस्यानर्थक्यमेवस्यात्। तेनच याजनाध्यापने कुसीदंअमृतादिमध्येअपठितम-पिलभ्यते। अल्पीयसी याउञ्छवृत्तिर्गृहीताअसौह्यल्पद्रोहः। तथाचगौतमः कृषिवाणिज्येवास्वयंकृतेकुसीदंच। जीवन मात्रोयंविधिर्धनसंचयस्तुवक्ष्यमाणैरेवनियतैःकर्मभिः॥ २॥

(२) **सर्वज्ञनारायणः**। अद्रोहेण दुःखानुत्पादनेन अल्पद्रोहेण अद्रोहेण वृत्यसंभवे जीवेदनापदीत्यापदि बहुद्रोहामपि वृत्तिंकुर्यादित्यर्थः॥ २॥

(३) **कुल्लूकः**। परस्यापीडाशिलोञ्छायाचितादिरद्रोहः। ईषत्पीडायाचितादिरल्पद्रोहः। नतुहिंसैवद्रोहस्तस्यानि-षिद्धत्वात्। अद्रोहेण तदसंभवेऽल्पद्रोहेण यावृत्तिर्जीवनोपायस्तदाश्रयणेन भार्यादिभृत्यपञ्चयज्ञानुष्ठानयुक्तोब्राह्मणो न तु क्षत्रियादिरनापदि जीवेत्। आपदि दशमे विधिर्भविष्यति। अयंच सामान्योपदेशोयाजनाध्यापनविशुद्धप्रतिग्रहादिसङ्ग्र-हार्थः। वक्ष्यमाणर्तादिविशेषमात्रनिष्ठत्वे संकुचितत्वरसत्वहानिरनधिकारार्थत्वंयाजनादेर्वृत्तिप्रकरणानिवेशश्च स्यात्तया-पि जीवेत्॥ २॥

(४) **राघवानन्दः**। तद्धर्मानाह अद्रोहेण शिलोञ्छाभ्यां। अल्पद्रोहेण अल्पयाचितेन देहिदेहीतियाचने चित्त-क्षोभोद्रोहः। अनापदि सुभिक्षादौ॥ २॥

(५) **नन्दनः** वृत्त्युपायेषु वक्ष्यमाणेषु नियमंश्लोकद्वयेनाह अद्रोहेणेति। विहितयाऽपि वृत्त्या हिंसारहितया जी-वेत्तदशक्तौहिंसाबाहुल्यरहितया वेति॥ २॥

(६) **रामचन्द्रः**। भूतानां अद्रोहेणैव दुःखानुत्पादनेन या वृत्तिस्तांवृत्तिसमास्थाय अनापदि जीवेत् विप्रः अल्पद्रोहेण स्वल्पं याचितव्यं अल्पद्रोहेण या वृत्तिर्वा॥ २॥

यात्रामात्रप्रसिद्ध्यर्थं स्वैः कर्मभिरगर्हितैः॥ अक्लेशेन शरीरस्य कुर्वीत धनसंचयम्॥ ३॥

(१) **मेधातिथिः**। पूर्वेणान्वाहिकजीवनविधावुपायउक्तोनेनधनसञ्चयेनियमउपदिश्यते। स्वैःकर्मभिः धनसंचयं-कुर्यात्। तानिचकर्माण्युत्तरत्रवक्ष्यन्ते। संचयप्रयोजनमाह। यात्रामात्रप्रसिध्यर्थं नभोगायधनसंचयक्लेशः कर्तव्यः। किंतर्हियात्रामात्रप्रसिध्यर्थं। आत्मकुटुंबस्थितिर्यात्रातत्परिमाणंयात्रामात्रं तस्यप्रसिद्धिर्निष्पत्तिः तदर्थंस्तत्प्रयोजनं नि-त्यकर्मनिवृत्तिरात्मस्थितावेवान्तर्भूतानिनह्यकुर्वतआत्मस्थितिः। आहच ननिर्वपतिपञ्चानामुच्छ्वसन्नसजीवति। अथवास-

त्यपिशास्त्रीयत्वेयत्रलोकेगर्हितं तद्वर्ज्यमेव । यथानरस्य महाकुलीनस्य भुक्तविभवस्य निकृष्टकुलात्पामश्रीकात्समान-जातीयादपि प्रतिग्रहादिना केनचिदुपायेन जीवनम् अक्लेशेनशरीरस्य सेवावाणिज्येमहाक्लेशे दूराध्वगमनादिना तादृशे नकर्तव्ये संचयो राशीकृतपरिरक्षणम् ॥ ३ ॥

(२) **सर्वज्ञनारायणः** । प्राणयात्रा प्राणधारणंस्वैःप्रतिग्रहादिभिरगर्हितैरसत्प्रतिग्रहादिरहितैः । अक्लेशेनायासा-नुत्पादनेन शरीरस्य स्वदेहस्य धनस्य संचयंसंग्रहम् ॥ ३ ॥

(३) **कुल्लूकः** । यात्रा प्राणस्थितिः । शास्त्रीयकुटुंबसंवर्धननित्यकर्मानुष्ठानपूर्वकप्राणस्थितिमात्रार्थं न भोगार्थं स्वसंबन्धितया शास्त्रविहितार्जनरूपैः कर्मभिर्ऋतादिवक्ष्यमाणैः कायक्लेशंविनाऽर्थसंग्रहंकुर्यात् ॥ ३ ॥

(४) **राघवानन्दः** । स्वकुटुम्बवर्धननित्यकर्मानुष्ठानपुरःसरंप्राणस्थितिर्यात्रा तत्परिमाणं तावत्पर्यन्तमात्रं तस्याः प्रसिद्ध्यर्थं नतु भोगार्थम् न निर्वपति पञ्चानामुच्छ्वसन्नसजीवतीत्युक्तेः । पञ्चानामपि योभर्ता न सप्रकृतिमानुषइ-त्युक्तेः ॥ ३ ॥

(५) **नन्दनः** । लौकिकवैदिकानामवश्यकर्तव्यानांकर्मणांनिर्वृत्तिर्यात्रा तावन्मात्रलाभार्थेन ततोधिकम् । परपीडा-वदात्मपीडाप्यविहिता वर्जनीयेति ज्ञापितमक्लेशेनशरीरस्येति ॥ ३ ॥

(६) **रामचन्द्रः** । अगर्हितैः स्वैः कर्मभिः । शरीरस्याक्लेशेन धनसंचयं धनसंग्रहं कुर्वीत । प्राणयात्रा प्राण-धारणमात्रं यथा भवे त्तथा कुर्यात् ॥ ३ ॥

ऋतामृताभ्यां जीवेत्तु मृतेन प्रमृतेन वा ॥ सत्यानृताभ्यामपि वा न श्ववृत्त्या कदाचन ॥ ४ ॥

(१) **मेधातिथिः** । तानिकर्माणि नामतस्तावदाह । नाम्नैवकेषांचित् स्थितिःप्रतीयते प्रयोजनंवाप्रशस्ताभावेनिन्दि-तेषुप्रवृत्तिः । तत्र मृतप्रमृते अत्यन्तनिन्दिते । ततोपि सत्यानृतं यतआह तेनैववापि जीव्यतइति । अपिशब्दोऽरुचिस्त-वनार्थः । नामतोनिर्दिश्यस्वरूपतोव्याचष्टे ॥ ४ ॥

(२) **सर्वज्ञनारायणः** । ऋतामृताभ्यामित्यृतेनामृतेन वेत्यर्थः । सत्यानृताभ्यांतद्द्वयोपलक्षितेन वाणिज्येने-त्यर्थः ॥ ४ ॥

(३) **कुल्लूकः** । कैः कर्मभिरित्यत्राह ऋतामृताभ्यामिति । अनापदीत्यनुवर्तते । ऋतादिभिरनापदि जीवेत् । से-वया त्वनापदि कदापि न वर्तेत ॥ ४ ॥

(४) **राघवानन्दः** । अद्रोहाल्पद्रोहौ नाम्नैव स्पष्टयन्नगर्हितानि कर्माणि स्वयंव्याचष्टे ऋतेति ॥ ४ ॥

(५) **नन्दनः** । अथ वृत्त्युपायान्नियमयति ऋतेति । पूर्वपूर्वालाभे परःपरआस्थेयइति ॥ ४ ॥

(६) **रामचन्द्रः** । द्वाभ्यामाह ऋतेति । ऋतामृताभ्यां वा जीवेत् अमृतवृत्त्यावा मृतेन वृत्त्या वा प्रमृतवृत्त्या वा सत्यानृताभ्यांवा श्ववृत्त्या कथंचन नजीवेत् ॥ ४ ॥

ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम् ॥ मृतं तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतम् ॥ ५ ॥

(१) **मेधातिथिः** । उञ्छश्च शिलश्च उञ्छशिलं तदृतंज्ञेयं । सत्यव्रततुल्यं क्षेत्राल्लूनस्यव्रीह्यादेर्गृहं खलंवा नीयमानस्य यःपुलाकःपतितःस्वामिनोऽनपेक्षितस्तस्योच्चयनमुञ्छस्तदृतम् । नतत्रेयंबुद्धिराधेया । परकीयमेतन्नगृण्हामी-ति । एवंच स्वत्वात्परिभ्रष्टस्यलूनस्यालूनस्यवानेकप्ररोहवतोग्रहणंशिलः अमृतंस्यादयाचितं । अत्यन्तप्रीतिकरत्वात् । घृतमिवयाचितं भैक्षितमिति । याचितमित्येवसिद्धे भैक्षशब्देन सामूहिकतद्धितान्तेन बहवोयाचितव्याइत्युच्यते । नैकः-

कदर्थनीयस्तदुक्तमल्पद्रोहेणेति प्रायेणच भैक्षशब्दस्य भैक्ष्यस्यात्मविशुद्ध्यर्थमित्येवमादौसिद्धान्नविषयेप्रयोगसिद्धेःसामान्यविषयार्थंयाचितशब्दोपादानं। तेन नेदंसिद्धान्नभिक्षणमेव। अभिमतः पराग्निपक्केन वैश्वदेवादिविरोधात्। नचेदंभोजनार्थमेवभिक्षणं किंतर्हि स्थित्यर्थं स्थितिश्चनभोजनमात्रसाध्या गृहस्थस्य किंतर्हि यत्किंचिद्गृहोपयोगि अतएवोदकपरिधानाद्यपिभिक्षितव्यं। गृहोपकरणंच स्थाल्यपिधानादि। ब्रह्मचारिणस्तु भोजनकाले विधिनापाकासंभवान्नियमतःसिद्धान्नविषयंभैक्ष्यंप्रतीयते। भिक्षाशब्दश्चायंभिक्ष्यमाणद्रव्यगतंपरिमाणमप्याचष्टे। भिक्षामात्रंनददाति याचितः। प्रसृतिमात्रं भिक्षेति तेनगोहिरण्यादिभिक्षणं नप्रमृतशब्देनाभ्यनुज्ञायते। प्रतिग्रहाद्यर्थायाञ्चेति। ननुभैक्षग्रहणमपि प्रतिग्रहएव। नैवंग्रहणमात्रंप्रतिग्रहः। विशिष्टएवस्वीकारे प्रतिपूर्वोगृण्हातिर्वर्तते। तेन नस्वीकारमात्रे प्रतिग्रहसमर्थोपि प्रतिग्रहप्रत्यवरइति। अदृष्टबुध्यादीयमानं मन्त्रपूर्वंगृण्हतःप्रतिग्रहोभवति। नचभैक्षे देवस्यत्वादिमन्त्रोच्चारणमस्ति। नच प्रीत्यादिना दानग्रहणेन च तत्र प्रतिग्रहव्यवहारः। अतः प्रतिग्रहादर्थान्तरमेवेदमृतामृतशब्दाभिधेयं। अतश्च नात्रयाच्यमानस्य अयाच्यमानस्यवा महासत्वतया उपकारान्तरापेक्षा जायते येनवा ददतोजात्याद्यपेक्षा युक्तिमतामप्रतिग्राह्यस्यैव करुणया च प्रदीयमानंगृण्हतो न प्रतिग्रहः। ननुच करुणया दानमदृष्टायैव नेतिब्रूमः नचतत्रदानधर्मःकिंतर्हि करुणाभ्यासात्परोपकाराद्वा। तत्रयथाहितोपदेशादावनुग्राह्यस्य यथाविधिर्जात्यादिनापेक्षते। तद्वत्करुणयादाने। तथाच शिष्टानैवंविधेदाने वेदंतत्वार्थविदुषे ब्राह्मणायेत्येतदनुरुध्यन्ते। अतएवाब्राह्मणाअपि दैन्यमापन्नाः परेणदत्तं गृण्हानानब्राह्मणवृत्तंप्रतिग्रहमाश्रिताभवन्ति। स्थितमेतत्। प्रतिग्रहे यद्यपि याचितायाचितपूर्वकत्वंविद्यते। तथापि नतेनैवामृतामृतशब्दार्थः। विषयान्तरस्यदर्शितत्वात्। याजनाध्यापनयोरप्येतद्रूपमस्ति। कश्चिद्याजित्वायाजकत्वंलभते। कश्चित्प्रार्थ्यते। एवमध्यापनेयोज्यं। अतोयावताकाचिद्वृत्तिर्याञ्चायासादैन्यावहत्वात्मरणमिवेति मृतशब्देनाभिधीयते। कर्षणंतुमरणादपिपापीयः। लाङ्गलाकर्षणंहि भारवाहत्वं तच्चखलजनपदकर्म॥ ५॥

(२) सर्वज्ञनारायणः। उञ्छोवा शिलोवा उञ्छशिलं तत्रोञ्छोरथ्यादिपतितैकैकबीजग्रहणं। शिलंसस्यमञ्जरी तदुपलक्षितंशिलंक्षेत्रभूपरित्यक्तैकैकसस्यमञ्जरीग्रहणं। उभयमृतंसत्यलोकप्राप्तिहेतुत्वात्। अयाचितंयाञ्चांविनाऽन्यतोलब्धं। अमृतमन्याहिंसनात्। याचितस्य भैक्षमिति नामान्तरं तन्मृतंपरदुःखोत्पादनेन हिंसाहेतुत्वात्। कृषिःप्रमृतंप्रकर्षेण प्राणिनांमारकत्वात्। सत्यानृतं एकदेशमिथ्याभिधाननियमात्। अत्र याजनाध्यापनप्रतिग्रहैर्लाभोपि याचितोऽयाचितोवा भवतीति मृतामृतयोरेवान्तर्भूतत्वान्नपृथगुक्तः। तथात्र द्विजातिमुख्यवृत्तीनामित्युपक्रम्य कृषिवाणिज्ययोरभिधानान्नानयोरापदि वर्णान्तरावृत्तितया ब्राह्मणैरनुष्ठानं किंतुस्ववृत्तितयैव। तथाच क्षत्रियवृत्त्यपेक्षयानानयोरुत्कृष्टत्वम्। कुसीदपाशुपाल्ये तु वैश्यवृत्तितया क्षत्रवृत्तेरप्यपकृष्टइति ग्राह्यम्। क्वचित्तत्रापि शब्दात्कुसीदमपि ग्राह्यमतएव गौतमः। कृषिवाणिज्ये वा स्वयंकृते कुसीदंवेति ब्राह्मणमधिकृत्याह। सूत्रेविभागपूर्ववृत्तिद्वयासंभवेत्यन्तापदि कुसीदाश्रयणमित्येतदर्थमित्याहुः॥ ५॥

(३) कुल्लूकः। अप्रसिद्धत्वादृतादीनि व्याचष्टे ऋतमिति। अबाधितरथ्यानेषु पथि वा क्षेत्रेषु वाऽप्रतिहतावकाशेषु यत्रयत्रौषधयोविद्यन्ते तत्रतत्राङ्गुलिभ्यामेकैकंकणंसमुच्चयित्वेतिबौधायनदर्शनादेकैकधान्यादिगुडकोच्चयनमुञ्छः। मञ्जर्यात्मकानेकधान्योच्चयनंशिलः उञ्छश्चशिलश्चेत्येकवद्भावः। तत्सत्यसमानफलत्वादृतमित्युच्यते। अयाचितोपस्थितममृतमिव सुखहेतुत्वादमृतम्। प्रार्थितंपुनर्भैक्षंभिक्षासमूहरूपंमरणसमपीडाजननान्मृतं। एतच्चसाग्नेर्गृहस्थस्य भैक्षमपक्वतण्डुलादिरूपंन तु सिद्धान्नंपराग्निपक्केन स्वाग्नौ होमाभावात्। कर्षणंच भूमिगतप्रचुरप्राणिमरणनिमित्तत्वादहुदुःखफलकंप्रकर्षेणमृतमिवप्रमृतम्॥ ५॥

(४) **राघवानन्दः**। ऋतादीनामप्रसिद्धत्वात्कथंज्ञेयंतत्राह ऋतेति द्वाभ्यां। आपणादेर्धान्यादीनामेकैकशोग्रहणमुञ्छं शिलं लूनक्षेत्रादेरनेकधान्यादिकमञ्जर्याग्रहणमितिद्वयं ऋतंचसूनृतावाणीत्युक्तेस्तद्वदनुद्वेजकत्वात्तद्वयम। अमृतं अयाचितस्यामृतवदयत्नोपरिस्थित्या तृप्तिहेतुत्वात्। भैक्ष्यं देहिदेहीति चित्तभेत्तृत्वान्मृतम्॥ ५॥

(५) **नन्दनः**। ऋतादीनांस्वरूपंश्लोकद्वयेन व्याचष्टे ऋतमिति। उञ्छश्चशीलश्चोञ्छशिलम्। उञ्छोधान्यशआदानम्। कणिशाद्यर्जनंशिलमितिस्मृत्यन्तरम्॥ ५॥

(६) **रामचन्द्रः**। एतद्वृत्तीनांलक्षणमाह। ऋतमिति। ऋतसंज्ञम्॥ ५॥

सत्यानृतं तु वाणिज्यं तेन चैवापि जीव्यते॥ सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेत्॥ ६॥

(१) **मेधातिथिः**। नैवंमतव्यं सत्यानृतोभयरूपता शास्त्रेण वाणिज्येभ्यनुज्ञायेतइति किंतर्हि वस्तुस्वभाववादोयं लोभग्रहणमेवानृतंजीव्यतइतिवचनाद्वाणिज्याजीवनायैव नधनसंचयाय सेवाश्ववृत्तिर्यथाहिश्वाप्रेर्यते। कृच्छ्रेणचलभते तथा च सेवकः सेवाप्रेष्यत्वं यत्रकुत्रचित्कर्मणि प्रेष्यते उचितेनुचितेवा ससेवकः। अतउत्कृष्टेनायुधकर्मादिना येराजानमुपसर्पन्ति तेनश्ववृत्तयः॥ ६॥

(२) **सर्वज्ञनारायणः**। श्ववृत्तिः शुनइव वृत्तिः तांपरिवर्जयेत्। प्राणरक्षामात्रस्यान्यतः संभवे तदभावे तु तामपि-ब्राह्मणः कुर्यादित्येतदर्थं ब्राह्मणवृत्तेर्मध्येभिधानम्। अत्र चोत्तरोत्तरापेक्षया पूर्वापूर्वा वृत्तिःश्रेष्ठेति वक्ष्यति॥ ६॥

(३) **कुल्लूकः**। प्रायेण सत्यानृतव्यवहारसाध्यत्वात्सत्यानृतंवाणिज्यम्। नतुवाणिज्ये शास्त्रेण सत्यानृताभ्यनुज्ञानं तेनचैवापिजीव्यत इतिच शब्देन वाणिज्यसमशिष्टत्वात्कुसीदमपिगृह्यते। पूर्वश्लोकोक्तार्कृषिरेतच्छ्लोकेच वाणिज्यकुसीदे-अनापदीत्यनुवृत्तेरस्वयंकृतान्येतानि बोद्धव्यानि। यथाहगौतमः। कृषिवाणिज्ये स्वयंचाकृतेकुसीदंच सेवा तु दीनदृष्टिसंदर्शनस्वामितर्जननीचक्रियादिधर्मयोगाच्छुनइव वृत्तिरतःश्ववृत्तिरुक्ता। तस्मात्तांप्रकृतौ ब्राह्मणस्त्यजेत्॥ ६॥

(४) **राघवानन्दः**। सत्यानृतं सत्यं स्वीयंद्रव्यं परकीयमनृतं तदात्मकत्वाद्वाणिज्यस्य। सेवा श्ववृत्तिः उन्निद्रादिसप्तगुणः सारमेयस्तद्वृत्तिः दुःखात्मिकामनुष्यसेवेत्यनुभवसिद्धम्। आपदनापद्भेदेन ऋतादिव्यवस्था॥ ६॥

(५) **नन्दनः**। उञ्छशिलादीनामृतादिसंज्ञाव्यवहारोवृत्तीनांतत्तत्संज्ञानुरूपगुणदोषतारतम्यप्रतिपत्त्यर्थः॥ ६॥

(६) **रामचन्द्रः**। सत्यानृतं सत्यंच अनृतंच सत्यानृतं वाणिज्यं श्ववृत्तिःसेवा कष्टेन युद्धादिना आख्याता तस्मात्तांसेवांपरिवर्जयेत्॥ ६॥

कुसूलधान्यकोवा स्यात्कुम्भीधान्यकएव वा॥ त्र्यहैहिकोवापि भवेदश्वस्तनिकएव वा॥ ७॥

[सद्यः प्रक्षालिको वा स्यात् माससञ्चयिकोपि वा॥ षण्मासनिचयोवापि समानिचय एववा॥ १॥+

(१) **मेधातिथिः**। उक्तआत्मकुटुम्बस्थित्यै धनसंचयः कार्योनभोगायक्लेशआश्रयणीयः। तत्तु किमन्वहमर्जनीयं उतैकदैवचिरकालपर्याप्तमितिनोक्तं। तत्रकालविलंबार्थमिदमारभ्यते कुसूलेधान्यमस्येतिगमकत्वाद्व्यधिकरणोबहुव्रीहिः।

---

(७) कुसूलधान्यको= कुसूलधान्यिको (मे०)

(+) (ट)

पाठान्तरं कुशूलधान्यकइति। कुसूलपरिमितंधान्यं कुसूलधान्यं तदस्यास्तीति मत्वर्थायइकशब्दः धान्याधिकरणमिष्टकादिकृतंकुसूलः कोष्ठइतिचोच्यते । तेनचात्रापरिमाणंलक्ष्यते। तत्रयावन्मातितावत्संचेतव्यम् । न पुनराधारनियमोऽस्ति। कुसूलेचमहापरिग्रहणस्यापिबहुभृत्यबन्धुदारदासपुत्रगवाश्वादिमतोऽपियावता सांवत्सरीस्थितिर्भवति । तावदनुज्ञायते। यतोवक्ष्यति। यस्यत्रैवार्षिकंभक्तमिति धान्यग्रहणमप्यविवक्षितम्। सुवर्णरूप्याद्यपि तावत्याः स्थितेः पर्याप्तमर्जयतोनदोषः। सर्वथाधिकंततोनार्जनीयमितिवाक्यार्थः । कुम्भीउष्ट्रिका । षण्मासिकोनिचयएतेनप्रतिपाद्यतइतिस्मरन्ति। श्यहमैहिकमस्येतिश्यहैहिकःकुटुम्बस्य नित्यकर्मार्थंच भक्तचयंकरोति यः सत्र्यहैहिकः श्वोभवंश्वस्तनंभक्तंतदस्यास्तीतिपूर्ववत्। मत्वर्थीयंकृत्वा नञ् समासः कर्तव्यः सद्यस्तात्कालिकोभवेत्तदहरार्जितंव्ययीकर्तव्यम् ॥ ७ ॥

(२) **सर्वज्ञनारायणः**। तत्र ऋतामृतेषु तत्तद्वृत्त्याश्रितातिरिक्तफलार्थिनांसंचयनियममाह कुशूलेति। कुशूलधान्योवर्षषण्मासत्रिमासमासानामन्यतरकालतः कुटुम्बभोजनपर्याप्तधान्यवान्कुशूलधान्यवान्। कुम्भीधान्यःषडहःपर्याप्तधान्यवान्कुम्भस्थधान्यवान्। त्र्यहार्थमीहा चेष्टा यस्य सत्र्यहैहिकः। श्वस्तनजीवनपर्याप्ता यस्य वृत्तिर्न भवति सोऽश्वस्तनिकः। एकदिनमात्रपर्याप्तधान्यवान्॥ ७ ॥

(३) **कुल्लूकः**। कुसूलोव्रीह्यगारंस्यादित्याभिधानिकाः । इष्टकादिनिर्मितागारधान्यसंचयोभवेत्। अत्रकालविशेषापेक्षायां यस्यत्रैवार्षिकंभक्तंपर्याप्तंभृत्यवृत्तये। अधिकंवापि विद्येत ससोमंपातुमर्हतीति॥ मनूक्तएवकालोग्राह्यः। तेन नित्यनैमित्तिकधर्मकृत्यपोष्यवर्गसहितस्य गृहिणोयावता धान्यादिधनेन वर्षत्रयंसमधिकंवा निर्वाहोभवति तावद्धनः कुसूलधान्यकउच्यते। वर्षनिर्वाहोचितधान्यादिधनः कुम्भीधान्यः। प्राक्सौमिकीः क्रियाः कुर्याद्यस्यान्नंवार्षिकंभवेदिति याज्ञवल्क्येन गृहस्थस्य वार्षिकसंचयाभ्यनुज्ञानात् । मनुरपि यदा वानप्रस्थस्यैवसमानिचयएववेत्यनेनसमानिचयंवक्ष्यति। तदपेक्षयाबहुपोष्यवर्गस्य गृहिणः समुचितः संवत्सरसंचयः। मेधातिथिस्तु यावता धान्यादिधनेन बहुभृत्यदारादिमतस्त्रिसंवत्सरस्थितिर्भवति तावत्सुवर्णादिधनवानपि कुसूलधान्यइत्यभिधाय कुम्भीउष्ट्रिकाषाण्मासिकधान्यादिनिचयः कुम्भीधान्यकइति व्याख्यातवान् । गोविन्दराजस्तुकुसूलधान्यकइत्येतद्व्याचक्ष्यकोष्ठप्रमाणधान्यसंचयोवास्याद्द्वादशाहमात्रपर्याप्तधनःकुम्भीधान्यकइत्येतद्व्याचष्टे। उष्ट्रिकाप्रमाणधान्यादिसंचयोवाषडहमात्रपर्याप्तधनः । द्वादशाहंकुसूलेन वृत्तिःकुम्भ्या दिनानि षट्। इमाममूलांगोविन्दराजोक्तिनानुरुन्ध्महे। ईहा चेष्टा तस्यांभवमैहिकंत्र्यहपर्याप्तमैहिकंधनंयस्य सत्र्यहैहिकः तथावास्यात् । दिनत्रयनिर्वाहोचितधनमित्यर्थः। श्वोभवंश्वस्तनंभक्तंतदस्यातीति मत्वर्थीयमिकंकृत्वा नञ्समासः तथावाभवेत्॥ ७ ॥

(४) **राघवानन्दः**। तेष्वेव यदि कुटुम्बाद्यर्थं संचयी स्यात्तत्कथं तत्राह कुसूलेति। कुसूलोव्रीह्यागारंस्यादित्यभिधानादिष्टकादिनिर्मितागारम्। कुम्भीधान्यकः कुम्भी उष्ट्रिका तया परिमितं धान्यंयस्य सः। षाण्मासिकधान्यसंचयइति मेधातिथिः भार्यासहितमात्रत्वेन द्विजस्य वानप्रस्थस्य समानिचयएव वेति वक्ष्यमाणत्वात्समानिचयेपि न दोषइति। त्र्यहैहिकइतिईहा चेष्टा तया पर्याप्तंयत्तदैहिकं तादृशदिनत्रयं व्याप्य भोज्यंयस्येत्यर्थः। त्र्यहैहिकींकुटुम्बार्थमीहांकरोति यःसत्र्यहैहिक इति मेधातिथिः। श्वस्तनंपरदिनभोज्यं तेनापि न जीवती त्यश्वस्तनिकः । द्वादशदिनभोज्यं कुसूलं षट्दिनभोज्यंकुम्भीति गोविन्दः ॥ ७ ॥

(५) **नन्दनः**। एवंतावद्वृत्तेरुपायानियमिताः। इदानीमुपेयमपि नियमयति कुसूलेति। कुसूलात्किंचिन्न्यूना धानी

कुम्भीति कल्पनीयम्। द्वयोरह्नोरैहिकमिह भोग्यंवस्तु यस्यास्तिसत्र्यहैहिकः। श्वोभोग्यंवस्तु श्वस्तनंतद्वान् श्वस्तनिकः॥ ७॥

(६) **रामचन्द्रः** । कुशूलं मृत्तिकाकोष्ठकं कुम्भी उष्ट्रिका। कुशूलधान्यकोवा स्यात्। कुम्भीधान्योवा स्यात्। स्वकुटुम्बपोषणे द्वादशाहमात्रपर्याप्तान्नः कुशब्दो धान्याधिकरणं शूलः कोष्ठः कुशूलधान्यः। स्वकुटुम्बपोषणे पर्याप्तान्नोवर्षपर्यन्तं सकुम्भीधान्यः उष्ट्रिका प्रमाणसञ्चयपरःत्र्यहपर्याप्तान्नमस्यास्तीति त्र्यहैहिकःश्वोभवंधान्यादि श्वस्तनं न विद्यते श्वस्तनंयस्यासौ अश्वस्तनिकएववा भवेत्॥ ७॥

चतुर्णामपि चैतेषां द्विजानां गृहमेधिनाम्॥ ज्यायान्परः परोज्ञेयोधर्मतोलोकजित्तमः॥ ८॥

(१) **मेधातिथिः** । अस्यविकल्पस्यव्यवस्थामाह। योयःस्वल्पकालसंचयःसतधर्मेर्ज्यायानधिकः। धर्माधिक्याच्चफलाधिक्यंभवति। लोकजित्तमः। लोकाञ्जयत्याधिपत्येनावतिष्ठते। भोग्यतया स्वीकरोति। प्रकर्षविवक्षायांतमः। अविशेषोपादानाल्लोकः स्वर्गः प्रतीयते। तेनेयमत्रव्यवस्थामहापरिग्रहोयोबह्वपत्योऽप्राप्तपुत्रोऽसंविभक्तपुत्रःअकृतकन्याविवाहश्चसकुसूलधान्यकः। यस्तु परिणतवयाःप्राप्तपुत्रःकृतकरणःसयावच्छममेति तावदितरान्कल्पानाश्रयेत्॥ ८॥

(२) **सर्वज्ञनारायणः** । चतुर्णामपीत्यपिशब्देन पूर्वोक्तानांषण्णां वृत्तीनामपि मध्ये संकुचितांवृत्तिमपेक्ष्य संकुचिता ज्यायसीति परशब्दोत्र संकोचलब्धोत्कर्षवृत्तिपरः। तेनात्र चतुष्के परःपरः षट्सु तत्पूर्वइतिग्राह्यम्॥ ८॥

(३) **कुल्लूकः** । एषांचतुर्णामपि कुसूलधान्यकादीनां ब्राह्मणानांगृहस्थानांमध्ये योयःशेषे पठितःसश्रेष्ठोज्ञातव्यः। यतोऽसौ वृत्तिसंकोचधर्मेण स्वर्गादिलोकजित्तमोभवति॥ ८॥

(४) **राघवानन्दः** । अत्र ऋतादयः षडुपायाः तेन जीवन्नित्युक्तत्वात् कुसूलादयश्चत्वारउपायास्तेष्वेव श्रेष्ठत्वनिर्धारणमाह चतुर्णामिति। कुसूलादिचतुष्टयसंचयिनामेषांकुटुम्बाल्पबहुत्वाद्यपेक्षया कुसूलधान्यकादीनामर्थवादः श्रेयानित्वादि॥ ८॥

(५) **नन्दनः** । चतुर्णांकुसूलधान्यादीनाम्॥ ८॥

(६) **रामचन्द्रः** । तेषांचतुर्णां कुशूलधान्यकादीनांमध्ये परःपरः ज्यायान् उत्कृष्टः ज्ञेयः॥ ८॥

षट्कर्मैकोभवत्येषां त्रिभिरन्यः प्रवर्तते॥ द्वाभ्यामेकश्चतुर्थस्तु ब्रह्मसत्रेण जीवति॥ ९॥

(१) **मेधातिथिः** । एषांकुशूलधान्यकादीनांगृहस्थानामेकःषट्कर्मा भवति। योमहापरिग्रहःप्रागुक्तस्तस्यषड्वृत्तिकर्माणि भवन्ति। कानिपुनस्तानिउञ्छशिलायाचितयाचितलाभकृषिवाणिज्याध्यापनयाजनप्रतिग्रहाःयाचितायाचितग्रहणादन्तर्भवन्ति। बहुकुटुम्बकोनित्यकर्मसंपत्त्यर्थंच सर्वावृत्तीःसमुच्चिताःकुर्यात्। कृषिवाणिज्येअपि येऽप्यध्यापनमध्ययनमित्यादीनि प्रथमाध्यायपठितानि षट्कर्माणि व्याचक्षते तेषांप्रकरणविरोधोनिष्प्रयोजनंवाऽध्ययनादीनामुपादानमन्यत्रैवतेषांविहितत्वात्। अन्योद्वितीयःकुम्भीधान्यस्त्रिभिःप्रवर्तते। सोऽनर्थकोयावद्वर्ततेतावत्प्रवर्ततइति वर्तनंचस्थितिसंपत्तिः प्रकृतानांचयानिकानिचित्कृचित्कृषिवाणिज्ये विहायप्रशस्ततरोहि पूर्वस्मात्कुम्भीधान्यकोयतोवक्ष्यति सावृत्तिःसद्भिर्गर्हिता। गोरक्षकान्वाणिजिकानिति। यदप्युक्तंगौतमेनकृषिवाणिज्ये वाऽस्वयंकृतेकुसीदंचेत्यनापद्येव तत्राप्यस्वयंकरणपक्षेदोषोऽस्त्येव लघीयांस्तुभविष्यति। द्वाभ्यामेकः अत्रापि याचितलाभंवर्जयित्वा त्रयाणांयथासंभवं द्वे गृह्णीते अयाचितमपितावद्गृह्यते यावत्त्र्यहपर्याप्तम्। चतुर्थस्तु ब्रह्मसत्रेण जीवति। ब्रह्मसत्रंशिलोञ्छयोरन्यतरावृत्तिः। सततभवत्वात्सत्रमिवनतदहःपरिसमापनीयावृत्तिरतः सत्रमित्युच्यतेअहरहर्नित्यमनुष्ठानात्। ब्रह्मशब्दोब्राह्मणपर्यायस्तेषामिदंसत्रम्।

अस्माद्ब्रह्मशब्दात्पूर्वोऽयंवृत्तिप्रपञ्चोब्राह्मणविषयएव विज्ञेयः। क्षत्रियादीनांतु तत्रवक्ष्यति। कथंपुनःशिलोञ्छवृत्त्याजीवनं-संभवति यावता शरद्ग्रीष्मयोरेव क्षेत्रे खले वा शिलपुलाकपातसंभवः। अथोच्यते ग्रीष्मेभ्योग्रैष्माणि शारदानि शारदेभ्यो ऽर्जयिष्यतीति षण्मासिकवृत्तिरेवस्यान्नाश्वस्तनिकः। अथान्यथापिसंभवतियावतस्तावतोव्रीह्यादेः कथंचित्पतितस्यो-पादानम्। सत्यम् न तद्भोजनायपर्याप्तम्। संचिन्वानोयदा पर्याप्तंप्राप्स्यतिचेदशिष्यतिपञ्चाहाद्यसंभवात् तथा च महाभार-ते शिलोञ्छवृत्तिः पक्षान्ताशनोवर्ण्यते। सोऽयमस्यामवस्थायांगृहस्थस्तापसः संवृत्तइतिचेत्। किंत्वेवमप्यश्वस्तनिकत्वंविरु ध्यते। यथोपपादस्थितिकस्तदा स्यान्नाश्वस्तनिकः। अश्वस्तनिकोह्युच्यतेअहन्यहन्यर्जयतियात्रिकंतदहरेव च व्ययी-करोति। नद्वितीयेऽन्हि स्थापयति। यदि च न प्रत्यहंशिलोञ्छवृत्तेर्भोजनंनिवर्तते। कुतोऽश्वस्तनिकोभवेत्। कथंच तथावि धस्यजीवनंपुत्रदारभरणंच। अतएव केचित्त्रिभिरन्यः प्रवर्ततइत्यतआरभ्यान्यथा व्याचक्षते। त्रिभिर्याजनाध्यापनप्रतिग्रहैः द्वाभ्यांप्रतिग्रहःप्रत्यवरइतिप्रतिग्रहव्युदासेनयाजनाध्यापनेप्रतिगृह्येतेब्रह्मसत्रमध्यापनंतद्धिवृत्तयेपर्याप्तम् यत्तुवर्तयंश्चशिलो-ञ्छाभ्यामितिसचतुष्टयव्यतिरिक्तोऽन्यएव। अत्रोच्यते। यःशिलपरिमाणान्दशद्वादशान्यवान्व्रीहीन्वाबहुभ्यआदत्ते याव-देकाहयात्रिकंसशिलवृत्तिः। यस्त्वेकैकंयात्रार्थमाहरति। सउञ्छवृत्तिः स्मृत्यन्तरेऽयंज्यायान्वरवृत्तिरुक्तः। अतश्च सार्व-कालिकमप्युपपद्यते। न च वैश्वदेवादिक्रियाविरोधस्तत्र पुत्रदाराणामभरणभेदश्चयाचितभैक्षादत्यन्ताल्पग्रहणात्॥ ९॥

(२) सर्वज्ञनारायणः। पूर्वंहि ऋतामृतमृताख्यंवृत्तित्रयमनापदि। अन्यत्तु त्रयमापदीति दर्शितम्। यत्तु सेवारूपं नृपे भैक्ष्यमापत्तौ जीवनानि त्विति याज्ञवल्क्येनोक्तं तत्सिद्धान्नभैक्ष्यविषयम्। तेषु कुशूलधान्यादिचतुष्टयमध्यएकः कुशूलधान्यः। षट्कर्मा याजनाध्यापनप्रतिग्रहाहि मृतामृतभेदेन द्विविधाःसन्तःषट्भवन्ति तैःसमुदितैर्वर्तते। अन्यः कुम्भी-धान्यः। त्रिभिरमृतभेदभूतैः याजनादिभिस्त्रिभिः। अन्यस्त्र्यहैहिकोद्वाभ्यांशिलोञ्छाभ्यां। चतुर्थोऽश्वस्तनवृत्तिः ब्रह्मसत्रेण ब्रह्मलोकप्राप्तिहेतुना सत्रंयागस्तत्तुल्यफलतया सत्रेणोञ्छग्रहणेन जीवति॥ ९॥

(३) कुल्लूकः। एषांगृहस्थानांमध्ये कश्चिद्गृहस्थोयोबहुपोष्यवर्गःसप्रकृतैर्ऋतायाचितभैक्षकृषिवाणिज्यैःपञ्चभिस्ते-न चैवेत्यनेनैव च शब्दसमुच्चितेन कुसीदेनेत्येवंषड्भिः कर्मभिः षट्कर्मा भवति षड्भिरेतैर्जीवति। कृषिवाणिज्यकुसीदान्ये-तान्यत्वयंकतानिगौतमोक्तानीत्युक्तम्। अन्यःपुनस्ततोऽल्पपरिकरः। त्रिभिर्याजनाध्यापनप्रतिग्रहैरद्रोहेणेत्येतच्छ्लोकसंगृही-हीतैःप्रवर्त्तते। प्रशब्दोऽनर्थकोवर्त्ततइत्यर्थः। अपरःपुनःप्रतिग्रहःप्रत्यवरइति वक्ष्यमाणत्वात्तत्परित्यागेन द्वाभ्यांयाज-नाध्यापनाभ्यांप्रवर्त्तते। उक्तत्रयापेक्षयाचतुर्थः पुनर्ब्रह्मसत्रेणाध्यापनेन जीवति। मेधातिथिस्तु। एषांकुसूलधान्यका-दीनांमध्यादेकः कुसूलधान्यकःप्रकृतैरुञ्छशिलायाचितकृषिवाणिज्यैःषट्कर्माभवति षड्भिर्जीवति अन्योद्वितीयःकुम्भीधा-न्यकः कृषिवाणिज्ययोर्निन्दितत्वात्तत्त्यागउञ्छशिलयाचितायाचितानांमध्यादिच्छातस्त्रिभिर्वर्त्तेत। एकस्त्र्यहैहिकोयाचि-तलाभंविहायोञ्छोशिलायाचितानांमध्यादिच्छया द्वाभ्यांवर्त्तेत। चतुर्थःपुनरश्वस्तनिकोब्रह्मसत्रेण जीवति। ब्रह्मसत्रंशि-लोञ्छयोरन्यतरा वृत्तिः। ब्रह्मणोब्राह्मणस्य सततभवत्वात्सत्रमित्याह॥ ९॥

(४) राघवानन्दः। एषांकुसूलधान्यकादीनांमध्ये बहुपरिकरः कुसूलधान्यकः षडुञ्छादिकर्मास्यादित्याह षट्-कर्मैकइति। कुम्भीधान्यकस्तु मध्यमपरिकरः कृषिवाणिज्ये याच्ञांविहायान्यैस्त्रिभिर्जीवेत् श्रेष्ठत्वात्। त्र्यहैहिकोद्वाभ्यां शिलोञ्छाभ्यां श्रेष्ठतरत्वात्। अश्वस्तनिकस्त्वयाचितेनैकेन श्रेष्ठतमत्वात्। ऋतामृताभ्यांजीवेदिति जीविकोपक्रमाद्वृत्तय-स्तु शिलोञ्छाभ्यामित्युपसंहाराच्चेति जीविकालिङ्गात्प्रकरणाच्चेतिकेचित्। परेत्वाहुःषडिति यजनयाजनाध्ययनाध्यापनदा-नप्रतिग्रहाःषडस्यसन्तीति षट्कर्मेति कर्मशब्दप्रयोगात्। त्रिभिर्याजनाध्यापनप्रतिग्रहैः। द्वाभ्यां याजनाध्यापनाभ्यां।

प्रतिग्रहप्रसङ्गेन दोषप्रच्छन्त्यसंशयइति प्रतिग्रहस्य निन्दितत्वाच्चतुर्थोऽध्यापनशीलः साङ्गस्य कृतकृत्यतेति वक्ष्यमाणत्वादिति। चतुर्थस्त्वध्यापनरतः एतेषु प्रकृष्टः ब्रह्मवेदस्तदेव सत्रं स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यमिति श्रुतेः। सत्रवदावश्यकत्वबहुकालव्यापित्वाभ्यांसएवस्तूयते ॥ ९ ॥

(५) **नन्दनः**। एवंतावदुपेयपरिमाणतश्चातुर्विध्यंगृहमेधिनामुक्तम् इदानीमुपायपरिमाणतोऽप्याह षडिति। एषांचतुर्णांमध्यएकः षट्कर्मा भवति। षड्भिर्ब्राह्मणनियतैर्याजनाध्यापनप्रतिग्रहैस्त्रैवर्णिकनियतैः प्रमृतसत्यानृतकुसीदैश्चार्थसञ्चये प्रवृत्तइत्यर्थः। त्रिभिर्याजनाध्यापनप्रतिग्रहैः। द्वाभ्यांयाजनाध्यापनाभ्याम्। प्रतिग्रहः प्रत्यवरइति निन्दितत्वात्प्रतिग्रहोवर्जनीयइत्यर्थः। ब्रह्मसत्रेणाध्यापनेन चतुर्थोजीवति। तस्यषट्कर्माद्यपेक्षयाचतुर्थशब्देन ग्रहणम् नतु पूर्वश्लोकेनिर्दिष्टस्याश्वस्तनिकस्य ॥ ९ ॥

(६) **रामचन्द्रः**। वर्णानांवृत्तिमाह। एषांकुशूलधान्यकादीनांमध्ये एकः ब्राह्मणः षट्कर्मा उञ्छशिलायाचित याचितकर्षण-वाणिज्य सेवावृत्तिभिर्भवेत्। प्रतिग्रहादीनिवा षट्कर्माणि क्षत्रियस्त्रिभिरध्ययनदानयजनादिभिः। वैश्यः द्वाभ्यांवृत्तिभ्यांगोरक्षावाणिज्याभ्यां जीवेत्। चतुर्थः शूद्रः स्वस्य ब्रह्मसत्रेण ब्राह्मणानांवा त्रैवर्णिकानांवा सेवारूपवृत्त्या जीवति। शूद्रस्तु द्विजसेवया इति योगी। षट्कर्माणीज्याध्ययनंदानं याजन मध्यापनं प्रतिग्रहश्चेति ॥ ९ ॥

वर्तयंश्च शिलोञ्छाभ्यामग्निहोत्रपरायणः॥ इष्टीः पार्वायनान्तीयाः केवलानिर्वपेत्सदा ॥१०॥

(१) **मेधातिथिः**। पर्वचायनान्तश्च तयोर्भवाः पार्वायनान्तीयाः। स्वार्थिकमणंकृत्वावृद्धाच्छः कर्तव्यः। पर्वेष्टिर्दर्शपूर्णमासौ अयनांतेचयज्ञआग्रयणाख्यः। केवलग्रहणात्काम्याइष्टयोनिषिध्यन्ते। वैश्वदेवहोमबलिहरणेऽपि तस्यनान्वहंभवतः। नहि तस्य सर्वदा तावद्धनंभवति। अतः केवलग्रहान्महायज्ञनिवृत्तिः। ननुचाग्निहोत्रमपि तत्तस्य नैव भवति। तदपिद्रव्यसाध्यमेव। पक्षहोमान्होष्यति। भार्याभरणंकथमितिचेत्सापितांवृत्तिमाश्रयिष्यति। यदाचभार्याव्रतमेतद्धारयितुमशक्तातदाभर्तुरपिनास्त्यधिकारः। अथचान्द्रायणादिषुप्रवृत्तस्यकथंभार्यायाजीवनमितिचेदचोद्यमेतद्विद्यमानत्वात्। अतिथ्यादिशिष्टमशिष्यतइतितु वैश्वदेवहोमाभावात्। विद्यमानेऽपि स्त्रीधने नभोजनंयुक्तमुभयोर्विघसाशित्वविधानात्। अतस्त्रीधनेनवैश्वदेवंकरिष्यति धर्मकार्येनुज्ञानात्स्त्रीधनग्रहणस्य। नैवम् अस्यामवस्थायामग्निहोत्रमात्रंधर्मोनवैश्वदेवहोमः भवतुवा। यस्यास्तर्हि धनंनास्ति कथंजीवतु तस्मादस्यासमर्था भार्या नासौ शिलोञ्छवृत्तावधिक्रियते। वर्तयन्नात्मानंजीवयन् ॥ १० ॥

(२) **सर्वज्ञनारायणः**। इष्टीःकेवलाइष्टीरेव दर्शपूर्णमासयोःपर्वणोरन्ते समीपे प्रतिपदि कार्येपर्वान्ते येइष्टी दर्शपूर्णमासाख्ये तथाऽयनान्ताया अयनान्तकार्या आग्रयणेष्टयः। अन्तशब्दोऽत्र सामीप्यार्थः। आग्रयणेष्टिर्हि यवैरुत्तरायणे श्यामाकैर्व्रीहिभिश्च दक्षिणायने क्रियतइत्ययनान्तीयाभवन्ति एताएव कुर्यान्नतु चातुर्मास्यपशुसोमादि। अत्राऽग्निहोत्रपरायणइति निर्वपेत्सदेति वचनात्। त्रेताग्निमतएव शिलोञ्छयोरधिकारोगम्यते शिलानप्युञ्छतइत्यत्र तूभयाभिधानंवृत्तिसंकोचधर्मान्तरसंभवयोरुपदर्शनार्थम् ॥ १० ॥

(३) **कुल्लूकः**। शिलोञ्छाभ्यांजीवन्धनसाध्यकर्मान्तरानुष्ठानासामर्थ्यादग्निहोत्रनिष्ठएवस्यात। पार्वायनान्तीयाश्च इष्टीः केवलाअनुतिष्ठेत्। पर्वच अयनंच पर्वायने तयोरन्तस्तत्र भवादर्शपौर्णमासाग्रयणात्मिकाः ॥ १० ॥

(४) राघवानन्दः । प्रकृतमाह वर्तयन्निति चतुर्भिः । पार्वायनान्तीयाः पर्वणोः दर्शपूर्णमासयोर्भवाः तथा अयनान्ते भवाश्चइष्टीः केवलाः पशुसोमादिवर्जिताः ॥ १० ॥

(५) नन्दनः । अथ शिलोञ्छवृत्तेराहिताग्नेर्नियममाह वर्तयंस्त्विति । शिलोञ्छेन चोभाभ्यांवर्तयन् जीवन्नग्निहोत्रपरायणः सदासायंप्रातरग्निहोत्रंजुहुयात् पर्वचायनंच पर्वायने तयोरन्तः पर्वायनान्तः तत्रभवाः पार्वायनान्तीयाः दर्शपूर्णमासाग्रयणलक्षणाः केवलाफलरहिता इष्टीर्निर्वपेत्कुर्यान्नततोऽधिकंश्रौतंकर्म कुर्यात् । तावन्मात्रसिद्धये द्रव्यमर्जयितव्यंनाधिकमित्यभिप्रायः ॥ १० ॥

(६) रामचन्द्रः । शिलोञ्छाभ्यांवर्तयन् शाल्यादिक्षेत्रे नियते पशुयाग प्रतिपदिष्टी रित्यर्थः ॥ १०॥

न लोकवृत्तंवर्तेत वृत्तिहेतोः कथंचन ॥ अजिह्मामशठां शुद्धां जीवेद्ब्राह्मणजीविकाम् ॥ ११ ॥

मेधातिथिः । लोकवृत्तंनामोच्यते येन प्राकृतजनोऽल्पसत्त्वोवर्तते दम्भेनासत्प्रियाख्यानेन च त्वंविष्णुस्त्वंब्रह्माजयजीवेति तथाविचित्रपरिहासकथाभिः । वृत्तिहेतोर्जीविकार्थतया न कर्तव्यमेतत् । यस्तुनर्मशीलस्तस्य न दोषः । अजिह्माम् यस्यान्यच्च हृदयेऽन्यच्च बहिः सजिह्मउच्यते द्वेषमत्सरात्मा दर्शयत्यप्रियंवदताम् । अशठाम् । अग्निहोत्रकर्मानुष्ठानंलोकावर्जनेनप्रतिग्रहादिलाभार्थनशास्त्रार्थश्रद्दधानतयाकुर्यात्सशठः । आत्मधर्मत्वेपि जैह्म्यशाठ्ययोर्जीविकाप्यभेदोपचाराद्व्यपदिश्यते अजिह्मामशठांशुद्धामिति । शुद्धिर्वृत्त्यन्तरेणामिश्रीकरणंपूर्वदोषद्वयेनचएकपदलभ्योऽप्ययमर्थोवृत्तानुरोधाद्गोबलीवर्दवद्द्बहुपदैः प्रतिपाद्यते । अथ कथंब्राह्मणजीविकांजीवेदितिद्वितीया यावताजीवतिरकर्मकः । कथंचैकस्यैवधातोरेकत्रद्विप्रयोगः नहिभवति गमनंगच्छेदिति । साध्यसाधनभावउच्यते । सामान्यविशेषभावात्साध्यसाधनभावोनविरुद्धः यथाश्वपोषंपुष्टइति । अनुष्ठानाद्वेवर्तनार्थेजीवतिर्वर्तते । तेनसकर्मकत्वमितिन दोषः । जीवेज्जीवनार्थमनुतिष्ठेत् ॥ ११ ॥

(२) सर्वज्ञनारायणः । लोकवृत्तंवृत्त्यर्थितया प्रायशोयदाचरति स्वगुणानुख्यापनानुरूपवेषधारणादिकंलोकस्तन्न वर्तेत न वर्तयेत् । अजिह्मामवक्राशयतयालभ्यां । अशठांपरवञ्चनरहितां शुद्धांपतितादिसंबन्धशून्यां ब्राह्मणजीविकांन क्षत्रियवैश्यजीविकाम् ॥ ११ ॥

(३) कुल्लूकः । लोकवृत्तमसत्प्रियाख्यानंविचित्रपरिहासकथादिकंजीविकार्थं न कुर्यात् । अजिह्मांमृषात्मगुणार्थाभिधानादिपापरहिताम् । अशठांदम्भादिव्याजशून्याम् । शुद्धांवैश्यादिवृत्तेरसंकीर्णांब्राह्मणजीविकामनुतिष्ठेत् । अनेकार्थत्वाद्धातूनामनुष्ठानार्थोयंजीवतिरिति सकर्मकता ॥ ११ ॥

(४) राघवानन्दः । किंच न लोकेति । लोकवृत्तं मिथ्यालापादि । अजिह्मां दम्भव्याजादिशून्यां । अशठां अवैश्यादिवृत्तिम् ॥ ११ ॥

(५) नन्दनः । अज्ञोजनोलोकस्तस्यवृत्तंजैह्म्यशाठ्यान्वितं । तन्नवर्तेत न कुर्यात् । कथञ्चन आपद्यपि । अजिह्मामृजुम् । अशठामनृशंसां अतएवशुद्धांब्राह्मणजीविकांब्राह्मणस्यविहितां वृत्तिंजीवेत्कुर्यात् ॥ ११ ॥

(६) रामचन्द्रः । लोकवृत्तं न वर्तेत लोकानुकरणं न वर्तेत अजिह्मांअवक्राशयां अशठां परवञ्चनरहितां पतितादिसंबन्धशून्यां । एतादृशींजीविकां ब्राह्मणःजीवेत् ॥ ११ ॥

संतोषं परमास्थाय सुखार्थी संयतोभवेत् ॥ संतोषमूलं हिसुखं दुःखमूलं विपर्ययः ॥ १२ ॥

(१) मेधातिथिः । ऐहिकाश्वस्तनवृत्तिदार्ढ्यार्थं प्रसंख्यानमिदमाह । सन्तोषआश्रयितव्यो नबहूनामुपजीव्यः-

स्यामिति । याञ्चादिक्लेशआस्थेयःसुखार्थीसंयतोभवेत् । संयमोयात्रिकाद्धनादधिकेनाभिलाषः । सन्तोषोमनस्विनांसुखमूलं दुःखस्यमूलंविपर्ययः । असन्तोषो महद्भिर्दुषांदैन्यंअभिलषितेवस्तुन्यसंपत्तिस्तस्मात्सन्तोषमाश्रयेत् ॥ १२ ॥

(२) सर्वज्ञनारायणः । संयतोऽसद्वृत्तिनिवृत्तः । सुखं संतोषोमूलंयस्य सतथा दुःखस्यमूलं विपर्ययोऽसंतोषः । शिलोञ्छादावसंतुष्टस्य तद्वृत्तित्यागसंभवादत्र वृत्तिनियमनिर्वाहहेतुः संतोषः कार्यतया दर्शितः ॥ १२ ॥

(३) कुल्लूकः । यथा संभवभृत्यात्मप्राणधारणावश्यकपञ्चयज्ञाद्यनुष्ठानमात्रोचितधनानधिकास्पृहा संतोषः तमतिशयितमालम्ब्य प्रचुरधनार्जने संयमंकुर्यात् । यतःसंतोषहेतुकमिति सुखंपरत्र चाप्यस्य विहितानुष्ठानात्स्वर्गादिसुखम् । विपर्ययस्त्वसंतोषोदुःखमूलंबहुधनार्जनप्रयासेन प्रचुरदुःखादसंपत्तौ विपत्तौ च क्लेशात् ॥ १२ ॥

(४) राघवानन्दः । दुःखमूलं दुःखस्य मूलं । विपर्ययोऽसंतोषः ॥ १२ ॥

(५) नन्दनः । संकुचितवृत्तित्वं सुखहेतुरित्यभिप्रायेणाह संतोषमिति । एतावताऽलमिति बुद्धिःसंतोषः । संयतः भोगविस्तारप्रसङ्गोपरतः । संतोषमूलमितिबहुव्रीहिः । दुःखमूलमिति तत्पुरुषः । विपर्ययोऽसंतोषः ॥ १२ ॥

(६) रामचन्द्रः । ऐहिका श्वस्तनदार्ढ्यार्थप्रसङ्ख्यानमिदमाह संतोषेति । विपर्ययः असंतोषः दुःखमूलः॥ १२॥

अतोऽन्यतमया वृत्त्या जीवंस्तु स्नातकोद्विजः॥ स्वर्ग्यायुष्ययशस्यानि व्रतानीमानि धारयेत् ॥ १३ ॥

(१) मेधातिथिः । वृत्तिविषयोविधिर्वृत्तिशब्देनोक्तः । तेनान्यतमयेति तदपेक्षमेकजीवितं अन्यतमेन निवृत्तिविधानात् । अतोवृत्तिसमुच्चयजीवनः । पितृधनंप्राप्तवतश्च व्रताधिकारोनयुज्यते । अन्यथा एकवृत्तिजीवनएवस्यात् । व्रतानीमानि मानसःसङ्कल्पोव्रतमुच्यते । शास्त्रविहितमिदंमयाकर्तव्यमिदंवानकर्तव्यमित्येवंस्वर्गायुष्ययशस्यानि व्रतधारणफलानि केचिदाहुः । अतश्चैतत्फलार्थिनीव्रतेष्वधिकारस्तदयुक्तं अनित्यत्वमेवंसतिप्रसज्येत तत्रोत्तरश्लोकेनित्यग्रहणंबाध्यते । श्रुतौचैषांनित्यताज्ञापिता यावत् हि न सा युक्ता भवतीति । नचस्वर्गादीनांकाम्यत्वे नान्वये नाधिकृतविशेषणत्वं प्रतिपद्येरन् ॥ १३ ॥

(२) सर्वज्ञनारायणः । वृत्त्येत्यत्रैकत्वंविवक्षितं । तेन ऋतामृतादिवृत्तिषु यदायांपरिगृह्णाति तदा तयैव जीवेदिति निदर्शितम् । प्रतिग्रहाध्यापनयाजनानि तु तेन रूपेणात्र न निर्दिष्टानीति तेषांसांकर्येऽप्यदोषः । व्रतानि नियमान् । इमानि वक्ष्यमाणानि ॥ १३ ॥

(३) कुल्लूकः । अबहुभृत्यैकवृत्त्या निर्वाहसंभवे सत्यन्यतमयेति विधीयते बहुभृत्यस्यान्नसंभवे षट्कर्मैकोभवत्येषामिति विहितत्वात् । अथवैकवाक्यतावगमाद्व्रतविधायकत्वाच्चान्यतमया वृत्त्येत्यनुवादकत्वादेकत्वमविवक्षितम् । उक्तवृत्तीनामन्यतमया वृत्त्या जीवन् स्नातकोब्राह्मणइमानि वक्ष्यमाणानि यथासंभवंस्वर्गायुर्यशसांहितानि व्रतानि कुर्यात् । इदंमयाकर्तव्यमिदंनकर्तव्यमित्येवंविधिसंकल्पविशेषाद्व्रतम् ॥ १३ ॥

(४) राघवानन्दः । अन्यतमया शिलादीनांमध्येएकया । स्नातको नवोढापतिः वोढुकामोवा । इमानि वक्ष्यमाणानि । स्वर्गाय हितं स्वर्ग्यम् । एवमायुष्यादि ॥ १३ ॥

(५) नन्दनः । उक्तमुपसंहृत्यार्थान्तरंप्रस्तौति अतइति । अतआसांवृत्तीनांमध्ये । इमानिवक्ष्यमाणानि ॥ १३ ॥

(६) रामचन्द्रः । अन्यतमया वृत्त्या इयं मयाकर्तव्येति एकया वृत्त्या द्विजः जीवेत् । तथा एतानि व्रतानि नियमान् धारयेत् वक्ष्यमाणलक्षणानि ॥ १३ ॥

वेदोदितं स्वकं कर्म नित्यं कुर्यादतन्द्रितः॥ तद्धि कुर्वन् यथाशक्ति प्राप्नोति परमां गतिम् ॥१४॥

(१) मेधातिथिः । वेदमूलत्वात्स्मृतीनांवेदोदितमितिश्रूयते । स्वकंकर्मवक्ष्यमाणोव्रतसमूहः । विहितत्वात्स्वकमित्युच्यते । नित्यंकुर्यात् । यावज्जीवंअतन्द्रितोऽनलसः एतद्व्रतधारणंकुर्वन्यथाशक्ति अनेनसत्यांशक्तौ यथासंभवमनुष्ठानमाह तदुक्तंमनसावातत्समयमाचारमनुपालयन् । परमांगतिं ब्रह्मत्वप्राप्तिरूपाम् ॥ १४ ॥

(२) सर्वज्ञनारायणः । स्वकंस्वाश्रमवर्णोक्तं । कुर्याद्यथाशक्ति ॥ १४ ॥

(३) कुल्लूकः । वेदोक्तंस्मार्तमपि वेदमूलत्वाद्वेदोक्तमेव । स्वकंस्वाश्रमोक्तंयावज्जीवमतन्द्रितोऽनलसःकुर्यात् । हि हेतौ । यस्मात्तत्कुर्वन्यथासामर्थ्यंपरमांगतिंमोक्षलक्षणांप्राप्नोति । नित्यकर्मानुष्ठानात्पापक्षये सतिनिष्पापान्तःकरणेन ब्रह्मसाक्षात्कारान्मोक्षावाप्तेः । तदुक्तंमोक्षधर्मे । ज्ञानमुत्पद्यते पुंसांक्षयात्पापस्य कर्मणः । तत्रादर्शतलप्रख्ये पश्यत्यात्मानमात्मनि ॥ आत्मन्यन्तःकरणे ॥ १४ ॥

(४) राघवानन्दः । किंच वेदेति । वेदोदितं स्वशाखोक्तं स्मार्तंच । परमांगतिं सत्वशुद्धिद्वारा ॥१४ ॥

(५) नन्दनः । व्रतविधेर्वक्ष्यमाणस्यवैदिकत्वंवक्ष्यमाणफलंचाह । वेदेति । वेदोदितंवेदमूलतया स्मृत्युदितम्॥१४॥

(६) रामचन्द्रः । वेदोदितं स्वकंकर्म स्वाश्रमोचितं कर्म कुर्यात् ॥ १४ ॥

नेहेतार्थान्प्रसङ्गेन न विरुद्धेन कर्मणा ॥ न विद्यमानेष्वर्थेषु नार्त्यामपि यतस्ततः ॥ १५ ॥

(१) मेधातिथिः । प्रसज्येतयत्रपुरुषः सहिप्रसङ्गोभिप्रेतोगीतवादित्रादिस्तत्रहिरागिणः सज्जतीव अतोगीतवादित्रादिभिरर्थान्धनानिनेहेत नार्जयेत् । विरुद्धंकर्मप्रतिषिद्धंशास्त्रेण अकुलोचितच नर्चपत्राद्यागतेषुधनेषु कल्प्यमानेषु स्थितिसमर्थेषु अन्यानिनेच्छेत् । नार्त्यांआपद्यपि यतस्ततःप्रसह्यसत्प्रतिग्रहेणप्रवर्तितव्यमेकस्यापद्यप्यनुज्ञास्यति ॥ १५ ॥

(२) सर्वज्ञनारायणः । प्रसङ्गेन प्रकृष्टप्रसङ्गेनात्यन्ततत्परतया नेहेतोद्यमेन न साधयेत् । अर्थान् धनानि विरुद्धेन धर्मविरुद्धेन कल्पमानेषु सत्सु आर्त्यामापदि यतस्ततःपतितादेः ॥ १५ ॥

(३) कुल्लूकः । प्रसज्यते यत्र पुरुषःसप्रसंगोगीतवादित्रादिःतेनार्थान्नार्जयेत् नापि शास्त्रनिषिद्धेन कर्मणाऽयाज्ययाजनादिना च । नच विद्यमानेषु धनेषु न चाप्यविद्यमानेष्वपि प्रकारान्तरसंभवे यतस्ततःपतितादिभ्योऽपि ॥ १५॥

(४) राघवानन्दः । किंच नेति । प्रसङ्गोत्र गीतनृत्यादिः प्रसज्यतेऽत्रेति व्युत्पत्त्या । न कल्पमानेषु धनेषु विद्यमानेषु विरुद्धेन कर्मणा नेहेत अविद्यमानेष्वपि प्रकारान्तरसंभवे वा । आर्तौ अन्नकष्टादौ वा यतस्ततः पतितादिभ्यो न गृह्णीयात् ॥ १५ ॥

(५) नन्दनः । प्रसङ्गेनातिप्रवृत्त्या । विरुद्धेन कर्मणा निषिद्धेन नृत्यगीतादिना । नकल्प्यमानेष्वर्थेषुवृत्तिहेतौसत्सुपायान्तरंनाश्रयेदित्यर्थः । आर्त्यामपिआपद्यपि । यतस्ततः पुरुषादप्रतिग्राह्यात् ॥ १५ ॥

(६) रामचन्द्रः । प्रसङ्गेन अतिप्रसङ्गेन । अर्थान्नेहेत नेच्छेत् । विरुद्धेन कर्मणा अयाज्ययाजनादिना ।

---

(१५) नविद्यमानेष्वर्थेषुनार्त्यामपियतस्ततः=नकल्प्यमानेष्वर्थेषुनात्स्यादपियतस्ततः ॥ (क, ख, द, म, ब, भ, य, र, ल)

अर्थान्नेहेत अन्यमपि अर्थं नेहेत इतस्ततः अविहिताचारात् पतितात् नेहेत कल्प्यमानेषु विद्यमानेषु अर्थेषु नेहेत ॥ १५ ॥

इन्द्रियार्थेषु सर्वेषु न प्रसज्येत कामतः॥ अतिप्रसक्तिं चैतेषां मनसा सन्निवर्त्तयेत्॥ १६ ॥

(१) **मेधातिथिः** । इन्द्रियाणामर्थाविषयारूपरसादयः एतेषुनप्रसज्येत सक्तिमत्यंतासेवांकुर्यात् । मनोहरायुवतयः वंशगीतंस्वादवद्रसः कर्पूरादिगन्धः रागवत्स्पर्शः एतेविषयास्तान्नात्यन्तंसेवेत । कामतः कामप्रधानतया सर्वेषु अयाचितोपमं तेष्वपि नित्यसेवी स्यात् । अतिप्रसक्तिश्चैषांनिवृत्त्युपायोनेनकथ्यते । नहिवस्तुप्रसक्तिर्निवर्तितुं शक्या मनसातुप्रतिपक्षभावनयानिवर्त्य आदौतावद्दुरुपपादकत्वं उपस्थितेष्वपि भुक्तपूर्वेषु क्षणविरसता स्वभावश्च विनाशित्वं शास्त्रनिषेधाच्च सक्तस्यनरकापातइत्येवमादिचिन्तयेत् । यथोक्तंनतथैतानिशक्यंतइति ॥ १६ ॥

(२) **सर्वज्ञनारायणः** । प्रसज्येत सातिशयेन प्रवर्तेत न कामतोधर्मतस्त्वृतुगमनादौ प्रवर्तेतैव अतिप्रसक्तिनियन्तुमशक्यांप्रवृत्तिम् ॥ १६ ॥

(३) **कुल्लूकः** । इन्द्रियाणामर्थारूपरसगन्धस्पर्शादयस्तेषु निषिद्धेष्वपि स्वदारसुरतादिषु न प्रसज्येत । नातिप्रसक्तिमत्यन्तसेवनात्मिकांकुर्यात् । कामतउपभोगार्थम् । अतिप्रसक्तिनिवृत्त्युपायमाह । अतिप्रसक्तिंचैतेषामिति । विषयाणामस्थिरत्वस्वर्गापवर्गात्मकश्रेयोविरोधित्वादिभावनया मनसा सम्यङ्निवर्त्तयेत् ॥ १६ ॥

(४) **राघवानन्दः** । किंच इन्द्रियार्थेष्विति । शब्दाद्यानन्दान्तेषु सर्वेषु दशसु नात्यासक्तिंकुर्यात् ॥ १६ ॥

(५) **नन्दनः** । स्वदारविषयेष्वप्यतिप्रसक्तिंसंनिवर्तयेत् ॥ १६ ॥

(६) **रामचन्द्रः** । इन्द्रियार्थेषु शब्दादिषु एतेषां इन्द्रियाणांप्रसक्तिंसन्निवर्तयेत् ॥ १६ ॥

सर्वान्परित्यजेदर्थान् स्वाध्यायस्य विरोधिनः॥ यथातथा यापयंस्तु सा ह्यस्य कृतकृत्यता॥ १७॥

(१) **मेधातिथिः** । येवेदाभ्यासविरोधिनोर्थास्तेसर्वेत्यक्तव्याः । राजामात्यगृहोपस्थानादयः येप्यनया लोकयात्रया सक्तस्य कृषिकुसीदाद्यधिकलाभाभवन्ति तेनचपोषयिष्यते । तदाकुटुम्बविभवतश्चदासीदासंबहुभविष्यतीतिसाह्यस्य स्नातकस्यकृतकृत्यताकृतार्थता । यंनित्यस्वाध्यायीयथाकथंचित्कुटुम्बकंजीवयतीति ॥ १७ ॥

(२) **सर्वज्ञनारायणः** । यापयन् क्षपयन् स्वाध्यायंकुर्यादिति शेषः । सास्वाध्यायक्रिया कृतान्यन्यानि कृत्यान्यनुभवन्तीति कृतकृत्यता ॥ १७ ॥

(३) **कुल्लूकः** । वेदार्थविरोधिनोऽर्थानत्यन्तेश्वरगृहोपसर्पणकृषिलोकयात्रादयस्तान्सर्वान्परित्यजेत् । कथंतर्हि भृत्यात्मपोषणमित्याशङ्क्याह । यथा तथा केनाप्युपायेन स्वाध्यायाविरोधिना भृत्यात्मानौ जीवयन् यस्मात्सास्य स्नातकस्य कृतकृत्यताकृतार्थता यन्नित्यंस्वाध्यायपरता ॥ १७ ॥

(४) **राघवानन्दः** । किंच सर्वानिति । शिलादीन्याजनादींश्च अध्यापयंस्स्वाध्यायविरोधिनस्त्यजेदित्यन्वयः। यथा तथा येन तेन जीवनंसाधयन्वेदाध्ययनंकुर्यात् । सावेदाध्ययनस्ययाकाचिज्जीविका कृतकृत्यताकृतंसमापितमावश्यकंयया॥ १७ ॥

---

(१६) संनिवर्तयेत्-संनिवेशयेत् (मेधा०)

(५) नन्दनः । कस्मात्पुनरेतदेवमुच्यतइत्यतआह सर्वानिति । यथातथा यापयन्यथाकथञ्चित्प्राणयात्रांकुर्वन् । अस्यपुरुषस्यसा हि कृतकृत्यता । यन्नित्यस्वाध्यायत्वम् ॥ १७ ॥

(६) रामचन्द्रः । स्वाध्यायविरोधिनः वेदाध्ययनविरोधिनः । यथा तथा आपदि अध्यापयन ॥ १७ ॥

वयसः कर्मणोऽर्थस्य श्रुतस्याभिजनस्य च ॥ वेषवाग्बुद्धिसारूप्यमाचरन्विचरेदिह ॥ १८ ॥

(१) मेधातिथिः । वयसइतिसारूप्यापेक्षाषष्ठी वेषवाक्बुद्धीतिसमाहारेद्वन्द्वः । सारूप्यमितिस्वार्थेष्यञ्तेनायमर्थोभवति । वयंआद्युचितावेषादयःकर्तव्याः । सारूप्यमौचित्यमन्यस्याकृत्यादेःसादृश्यासंभवात् । वेषःकेशाभरणादिविन्यासः । तत्रप्रथमेवयसिशिखण्डकः । यौवनेकौन्तलादिधारणं । वार्धकेजटामुण्डनादि वयोनुरूपावाक् । एवंबुद्धिस्त्रिवर्गानुष्ठानधारणं प्रथमंनीयते केवलंधर्मप्रधानकर्मानुरूपोवेषः अर्थानुरूपतः । तेनहिभवितव्यंकुलानुरूपेण दशनरागधम्मिल्लादि उद्धतमपि नउद्धत्यमावहति । तदुक्तं अस्यलोकव्यवहारोविषयइति । एतदुक्तंभवति । नायंविध्यर्थः अपरैर्निश्चितार्थत्वात् । लोकव्यवहारमूलस्त्वयमनुवादः । एवंवर्तमानोलोकवृत्तानुवर्तीभवति । नलोकद्वेष्यतामेति ॥१८ ॥

(२) सर्वज्ञनारायणः । वयसोबाल्यादेः । कर्मणोयागादेः । अर्थस्य धनस्य । श्रुतस्य शास्त्रज्ञानस्य । अभिजनस्य कुलस्य । वेषः सारूप्यतत्प्रकर्षनिकर्षोचितवेषधारणं । वाक्सारूप्यंतदनुरूपभाषणं । बुद्धिसारूप्यं तदनुरूपआत्मन्युत्कर्षप्रत्ययः । विचरेच्चेष्टेत इहलोके वयः कर्माद्यननुरूपं वेषादि न कार्यमित्यत्र तात्पर्यम् ॥ १८ ॥

(३) कुल्लूकः । वयसः क्रियायाधनस्य श्रुतस्य कुलस्यानुरूपेण वेषवाग्बुद्धीराचरँल्लोके प्रवर्तेत । यथा यौवने स्रग्गन्धलेपनादिधारणंत्रिवर्गानुसारीवाग्बुद्धिश्च एवंकर्मादिष्वप्युन्नेयम् ॥ १८ ॥

(४) राघवानन्दः । वेषवाग्बुद्धीति समाहारैकवचनम् । वयआदेःस्वानुरूप्यं वयआद्युचितावेषादयः कर्तव्याः । तेन यौवनादिमान्कामी धर्मीच । तथासत्कर्मा विनीतः । धनीदानशीलः । विद्वान् सदुपदेष्टा । कुलीनः सलज्ज इत्यादि । वयसइत्यादिपञ्चकस्य कामाद्यूह्यम् । अथवा वयोबाल्यादि । कर्म क्रिया । अर्थःधनं । श्रुतं विद्या । अभिजनः कुलं । तदनुरूपंव्यवहारमात्रं न विधिः तेन बाल्ये शिखण्डकं यौवने कुन्तलादि वार्धके जटादि तथा कलभाषणं परिहासः सदुपदेशःबुद्धेरचाञ्चल्यं बुद्धिपरिपाकश्चेति ॥ १८॥

(५) नन्दनः । वेषवाग्बुद्धिसारूप्यंवेषवयःप्रभृतीनामानुरूप्यम् ॥ १८ ॥

(६) रामचन्द्रः । यथाविषयं कर्मआचरन् विचरेत्श्रुतस्य शास्त्रस्य यथा अभिजनस्य च यथा कौलीनस्य विषयं यथा वेषवाक् बुद्धिसारूप्यं आचरन् विचरेत् ॥ १८ ॥

बुद्धिवृद्धिकराण्याशु धन्यानि च हितानि च ॥ नित्यंशास्त्राण्यवेक्षेत निगमांश्चैव वैदिकान्॥१९॥

(१) मेधातिथिः । बुद्धिवृद्धिकराणीतिहासपुराणानितर्कशास्त्राणिबार्हस्पत्योशनसादीनि हितानिउपकारकाणिदृष्टार्थानिवैद्यकज्योतिषादीनि अर्थशास्त्रस्यपृथगुपदेशात् । वैदिकानिगमावेदार्थज्ञानहेतवोनिगमनिरुक्तव्याकरणमीमांसारूढिग्रहणेत्वदृष्टार्थतास्यात् ॥ १९ ॥

(२) सर्वज्ञनारायणः । धन्यानि धनकारणानि हितानि दुःखनिवर्तकानि शास्त्राणि विद्यास्थानानि निगमान्व्याख्यानानि निगम्यतेएभिरर्थइति व्युत्पत्त्या । वैदिकान्वेदस्य सम्बन्धिनः ॥ १९ ॥

(३) कुल्लूकः । वेदाविरुद्धानि शीघ्रंबुद्धिवृद्धिजनकानि व्याकरणमीमांसास्मृतिपुराणन्यायादीनि शास्त्राणि तथा

धन्यानि धनाय हितान्यर्थशास्त्राणि बार्हस्पत्यौशनसादीनि तथाहितानि दृष्टोपकारकाणि वैद्यकज्योतिषादीनि तथा पर्यायकथनेन वेदार्थावबोधकान्निगमाख्यांश्च ग्रन्थान्नित्यंपर्यालोचयेत् ॥ १९ ॥

(४) राघवानन्दः । किंच बुद्धीति त्रिवर्गेषु बुद्धिवृद्धिकराणि नीतिशास्त्राणि । धन्यानि धनोपायान् । निगमान् पुराणादीन् निगमनिघण्टुव्याकरणादींश्च । वैदिकान्वेदार्थबोधानुकूलान् ॥ १९ ॥

(५) नन्दनः । शास्त्राणि धर्मशास्त्रादीनि । शास्त्रापेक्षणप्रयोजनत्वेनोक्तानिबुद्धिवृद्धिकराणीत्यादीनि । निगम्यन्ते निश्चीयन्त एभिर्वेदार्थाइतिनिगमावेदाङ्गानि ॥ १९ ॥

(६) रामचन्द्रः । नित्यंशास्त्राणि अवेक्षेत कीदृशानि शास्त्राणि धन्यानि दुःखनिवर्तकानि विचारयेत् च पुनः वैदिकान् निगमान् व्याख्यानानि ॥ १९ ॥

यथायथा हि पुरुषः शास्त्रं समधिगच्छति ॥ तथातथा विजानाति विज्ञानं चास्य रोचते ॥२०॥

[शास्त्रस्य पारंगत्वा तु भूयोभूयस्तदभ्यसेत् ॥ तच्छास्त्रंशबलंकुर्यान्न चाधीत्य त्यजेत्पुनः ॥१॥ [1]]

(१) मेधातिथिः । समधिगमो विनिवेशः । अभ्यासइति यावद्विजानाति विशेषेणजानाति । प्रत्यक्षंचैतदभ्यस्यमानेग्रन्थेपियद्विद्यतइति । तदाविज्ञानंचास्यरोचते । उज्वलंभवतीत्यर्थः । पूर्वस्याःस्मृतेर्मूलकथनमेतत् । रुचेरनभिलाषार्थत्वाद्रुच्यर्थानामितिसंप्रदानत्वाभावः ॥ २० ॥

(२) सर्वज्ञनारायणः । विजानाति विविच्य जानाति यानि तु प्रागेव विज्ञातानि तेषु विज्ञानं विवेकज्ञानमस्य रोचते दीप्यते स्वोत्कर्षप्रकाशकं भवति ॥ २० ॥

(३) कुल्लूकः । यस्माद्यथा पुरुषः शास्त्रंसम्यगभ्यस्यति तथा तथा विशेषेण जानाति शास्त्रान्तरविषयमपि च. स्यविज्ञानंरोचतउज्वलंभवति । दीप्त्यर्थत्वाद्रुचेरभिलाषार्थत्वाभावाद्रुच्यर्थानांप्रीयमाणइति न संप्रदानसंज्ञा ॥ २० ॥

(४) राघवानन्दः । रोचते उज्वलंस्यात् ब्रह्मपक्षपातिनः ॥ २० ॥

(५) नन्दनः । शास्त्रावेक्षणस्य प्रयोजनान्तरमप्याह । यथेति । विजानाति विशिष्टज्ञानयुक्तोभवति । अस्य रोचते अलं स्वदते ॥ २० ॥

(६) रामचन्द्रः । विज्ञानं विवेकज्ञानम् ॥ २० ॥

ऋषियज्ञं देवयज्ञं भूतयज्ञं च सर्वदा ॥ नृयज्ञं पितृयज्ञं च यथाशक्ति न हापयेत् ॥ २१ ॥

(१) मेधातिथिः । तृतीयाध्यायेविहितानांमहायज्ञानामनुवादोविशेषाभिधानार्थः । सचविशेषउत्तरत्रवक्ष्यते अनीहमानाइति । अन्येतुमन्यन्ते । व्रताधिकारेपुनर्वचनंनियमसिध्यर्थं । तेनेदृशःसङ्कल्पःकर्तव्यो यावद्गार्हस्थ्यंमयामहायज्ञानहापयितव्याः । नत्वियमाशंकाकर्तव्याद्विर्वचनंद्विर्विधानार्थं । नह्यत्रविधिःश्रूयते । केवलंनहापयेदित्युच्यते । नित्यत्वात्स्वहानिःप्राप्तैव अतो विहितप्रत्यभिज्ञानतःकश्चित्कर्मभेदहेतुरस्ति । यथाशक्तिप्रकान्नेनप्रासेनवामूलफलैर्वा ॥ २१ ॥

(२) सर्वज्ञनारायणः । ऋषियज्ञंब्रह्मयज्ञम् । एषांवेदोदितत्वेन प्राप्तावपि पुनर्वचनमवतारणार्थं । तथोत्तरश्लोकैः प्रकारान्तरेणापि तत्संपादनकथनार्थम् ॥ २१ ॥

---

[1] (अ)

(३) कुल्लूकः। स्वाध्यायादीन्पञ्चयज्ञान्यथाशक्ति न त्यजेत्। तृतीयाध्यायविहितानामपि पञ्चयज्ञानामिह निर्देशउत्तरत्र विशेषविधानार्थः स्नातकव्रतत्वबोधनार्थश्च ॥ २१ ॥

(४) राघवानन्दः। वेदाध्ययनहोमबल्यतिथिपितर्पणानि ऋषियज्ञादिपदवाच्यानि तृतीयाध्यायोक्तानि। पुनर्वचनमेतेषामादरार्थं। न हापयेत् न त्यजेत् ॥ २१ ॥

(५) नन्दनः। उक्तानपि महायज्ञान्पुनरादरातिशयार्थमाह ऋषीति। ऋषियज्ञंब्रह्मयज्ञम् ॥ २१ ॥

(६) रामचन्द्रः। ऋषियज्ञं वेदाध्ययनम्। देवयज्ञं होमं। भूतयज्ञं भूतेभ्योबलिं। नृयज्ञं अतिथिसत्कारं। पितृयज्ञं श्राद्धं। यथाशक्ति नहापयेत् ॥ २१ ॥

एतानेके महायज्ञान्यज्ञशास्त्रविदोजनाः ॥ अनीहमानाः सततमिन्द्रियेष्वेव जुह्वति ॥ २२ ॥

(१) मेधातिथिः। एतान्महायज्ञान् एके यज्ञशास्त्रविदोगृहस्थाइन्द्रियेष्वेवजुह्वति। संपादयन्ति। कतमेपुनस्ते-अनीहमाना ये न चेच्छन्तिधनं त्यक्तगृहव्यापारादेहसान्यासिकादयः। शिलोञ्छवृत्तेरप्येवंविधिमिच्छन्ति पङ्ग्वादीनांच। तेषांहिदारकरणंवक्ष्यति। यदर्थितातुदारैःस्यादिति। नचैतेषांपञ्चयज्ञाधिकारः। अद्रव्यत्वाद्भरणमात्रंतेलभन्ते। नाधिकं कर्मानुष्ठानार्थमपि। जुहोतिःकरोत्यर्थनिर्वर्त्यतां लक्षयति। नहिक्रियाविशेषोयागः क्रियाविशेषस्यहोमस्यकर्मतांप्रतिपद्येत। नहिभवतिपचतिपाकमिति भवतितुपाकंकरोतियागंकरोतीति सामान्यविषयाकांक्षास्तुक्रियाद्रव्यकर्माणिसाधनीकुर्वन्ति। इच्छतिभोक्तुं शक्नोतिभोक्तुं जानातिभोक्तुं दृष्टश्चविशेषःसामान्यलक्षणार्थः। अयंगौःपदाद्रष्टव्यइति। एवंचहोमंकेचिदिन्द्रियेषु तत्सङ्गममेवव्याचक्षते अपरेषांप्राणसंवादोपनिषदियद्भक्तंप्रथममागच्छेतद्धोमीयंसायं प्रथमाहुतिंजुहुयात्प्राणायस्वाहेत्यादिना। अन्येतु यएवोत्तरश्लोकेउपासनाविधिरुक्तःसएवायंहोमः। तथाचतयोरेकवाक्यताप्रयीयते। ननुचोत्तरत्रवाचिप्राणानेन्द्रियं नैषदोषः। आध्यात्मिकत्वोपलक्षणार्थमिन्द्रियग्रहणं। बाह्यसाधनसाध्यतानास्तीत्येतदत्रविवक्षितं ॥ २२ ॥

(२) सर्वज्ञनारायणः। यज्ञशास्त्रविदइति प्रशस्तमहायज्ञेभ्यः एषामुत्कर्षकथनार्थम्। अनीहमाना अचेष्टमानाः। इन्द्रियेष्विति पञ्चानांबुद्धीन्द्रियाणां विषयेभ्यः प्रत्याहारान्कुर्वन्तोविषयाणामिन्द्रियेषु प्रवेशनात्पञ्चमहायज्ञान्संपादयन्तीत्यर्थः ॥ २२ ॥

(३) कुल्लूकः। कइति एके गृहस्थाबाह्यान्तरयज्ञानुष्ठानशास्त्रज्ञाएतान्पञ्चमहायज्ञान्ब्रह्मज्ञानप्रकर्षाद्बहिरचेष्टमानापञ्चसु बुद्धीन्द्रियेष्वेवंपञ्चरूपज्ञानादिसंयमंकुर्वन्तःसंपादयन्ति। यज्ञानांहोमत्वानुपपत्तेः संपादनार्थोजुहोतिः ॥ २२ ॥

(४) राघवानन्दः। एतान्महायज्ञान्वैश्वदेवादिपञ्चयज्ञान् इन्द्रियव्यापाररूपत्वादेव तेषांतान्येवेन्द्रियेषु जुह्वति। कथंभूताः अनीहमानाः बाह्येन्द्रियव्यापाररहिताः। एके मुख्याः। शब्दादीन्विषयानन्यइन्द्रियाग्निषु जुह्वतीत्युक्तेः। इन्द्रियप्रासाण्येतानि नात्मग्राह्याणीति कृत्वा तिष्ठन्तीत्यर्थः। इन्द्रियाणीन्द्रियार्थेषु वर्तन्तइत्युक्तेश्च ॥ २२ ॥

(५) नन्दनः। अथाकर्मकृतामात्मरतीनामपि यज्ञाः कर्तव्याभवन्ति। किंपुनरन्येषामित्यभिप्रायेण श्लोकत्रयमारभ्यते एतानिति। यज्ञशास्त्रविदःशास्त्रेषु यजमानावश्यकर्तव्यत्वंविदन्तः। अनीहमाना अकर्मकृतः। एतान्महायज्ञानिन्द्रियेष्वेवसततंयावज्जीवंजुह्वतिकुर्वन्ति इन्द्रियाण्यग्नीन्परिकल्प्य तैराहृतान्विषयान्हविष्ट्वेन कल्पयन्तीत्यर्थः ॥ २२ ॥

(६) रामचन्द्रः। एतान् महायज्ञान्। एके जनाः अनीहमानाः योगिनः। सततं इन्द्रियेषु जुह्वति ॥ २२ ॥

वाच्येके जुह्वति प्राणं प्राणे वाचं च सर्वदा ॥ वाचि प्राणे च पश्यन्तोयज्ञनिर्वृत्तिमक्षयाम् ॥२३॥

(१) **मेधातिथिः** । यदायं पुरुषउच्छ्वसिति तदैवमनेनध्यातव्यं । वाचंप्राणेजुहोमीति। भाषणेनचवाचिप्राणं-जुहोति। एतावतैवपञ्चयज्ञानिर्वृत्ताभवन्ति । यदिनित्याः फलायतेनवक्तव्याः आत्मयज्ञाश्चात्राधिक्रियन्ते विहितो-ह्ययमर्थः । पञ्चाग्न्युपासनासु उपनिषत्सु कौषीतकी ब्राह्मणेविस्तरेण । अक्षयंफलतःअपुनरावृत्तिफलत्वात् ॥ २३ ॥

(२) **सर्वज्ञनारायणः** । एकेतु प्राणायामंस्वाध्यायंच कुर्वन्तस्तान्संपादयंन्तीत्याह वाच्येकइति । वाचि प्राणंजु-ह्वतीतिस्वाध्यायोदर्शितः। स्वाध्यायकाले प्राणवृत्तेर्वाचि विलयात् । प्राणे वाचमिति प्राणायामः । तत्रवाग्वृत्तेः प्राणे विल-यात् तथा तैत्तिरीयोपनिषत् । तद्यत्रैतदधीते वा भाषतेवावाचि तदा प्राणोभवतीति तथाच अथ यत्तूष्णींवा भवति स्वपिति वा प्राणे तदा वाग्भवतीति तथाएतद्धस्मवै तद्विद्वांस आहुर्ऋषयः कावयेषाकिमर्थावयमध्येष्यामहे किमर्थावयंवैवक्ष्या-महे वाचिहि प्राणंजुहुमः प्राणे वाचमिति । अध्येष्यामहे यज्ञसंबन्धिशस्त्रस्तोत्रपाठानकरिष्यामइत्यर्थः । तथा कौषीतकि-ब्रह्मणम् । यावद्वै पुरुषःप्राणिति न तदाभाषते वाचंतदा प्राणे जुहोति यदा भाषते न तदा प्राणिति प्राणंतदा वाचि जुहोति तएते अनन्ते आहुती जाग्रत्स्वपंश्चजुहोत्यथवा अन्याआहुतयोऽन्तवत्यस्ताः कर्ममय्योहि भवन्ति एवंहस्मवैसन्तःपूर्वेवि-द्वांसोग्निहोत्रंजुहवाञ्चक्रुरिति । वाचि प्राणे चान्योन्यं होमाभ्यांपञ्चयज्ञनिवृत्तिपश्यन्तः । अक्षयामनाशिफलाम् ॥ २३ ॥

(३) **कुल्लूकः** । एके गृहस्थाब्रह्मविदोवाचि प्राणवायौ च यज्ञनिर्वृत्तिमक्षयफलांजानन्तः सततंवाचि प्राणंच जुह्व-ति। वाचंच प्राणे। भाषमाणेन चवाचि प्राणंजुहोतीति । अभाषमाणेनोच्छ्वसता प्राणे वाचंजुहोमीति व्याख्यातव्यमित्यनेन विधीयते । यथाकौषीतकिरहस्यब्राह्मणम् यावद्वैपुरुषोभाषते न तावत्प्राणितुंशक्नोति प्राणंतदा वाचि जुहोति यावद्धि पुरुषःप्राणिति न तावद्भाषितुंशक्नोति वाचंतदा प्राणे जुहोति एतेऽनन्तेअमृते आहुती जाग्रत्स्वपंश्चसततंजुहोति । अथवा-ऽन्याआहुतयोऽनन्तरन्यस्ताः कर्ममय्योहि भवन्त्येवंहि तस्यैतत्पूर्वे विद्वांसोऽग्निहोत्रंजुहवांचक्रुरिति ॥ २३ ॥

(४) **राघवानन्दः** वाचि वाक्कारणे अपाने प्राणं वाचं तत्कारणमपानं प्राणे । अपाने जुह्वतिप्राणंप्राणेपानं तथापर-इत्युक्तेः । तयोर्निरोधमेन पापक्षयलक्षणसर्वकर्मफलनिर्वृत्तेः । अथवा हवनप्रकारमाह वाचीति । तथाच कौषीतकी श्रुतिः। अथातः सायंप्रातर्दर्शनमांतरमग्निहोत्रमितिव्याचक्षते यावद्वै पुरुषोभासते न तावत्प्राणितुं शक्नोति प्राणंतदा वाचि जुहो-ति यावद्वै पुरुषः प्राणिति न तावद्भाषितुंशक्नोति वाचंतदा प्राणे जुहोति एतेअमृतेअनन्ते वाहुतीजाग्रत्स्वपंश्चसत-तंजुहोति अथवा अन्या आहुतयोंतवत्यस्ताः कर्ममय्यइति । अक्षयमपुनरावृत्तिफलत्वात् ॥२३ ॥

(५) **नन्दनः** । लोके खलु वाक्प्राणयोरेकतरस्मिन्प्रवृत्ते निलीनमन्यतरं पश्यामः । तत्रप्रवृत्तमग्निनिलीनंहविः क-ल्पयन्तीत्यर्थः । प्रवृत्तस्याग्नित्वकल्पनं निलीनस्य हविष्ट्वकल्पनंच हविष्यग्निःप्रवर्ततेऽग्नौहविर्लीयतइति । अत्रकौषीतकि-ब्राह्मणं यावद्वैपुरुषोभाषते। नतावत्प्राणितुंशक्नोति । प्राणंतदा वाचि जुहोति । यावद्वै पुरुषः प्राणितिनतावद्भाषितुंशक्नो-ति । वाचंतदा प्राणे जुहोति । एतेअनन्तेअमृते जाग्रत्स्वपंश्चसततंजुहोतीति । उत्तरार्धेन कारणमुच्यते । वाचि प्राणे च मन्त्रे चेष्टायांच । यज्ञनिर्वृत्तिं यज्ञानांनिष्पत्तिम् । अक्षयामक्षयफलाम् । ये श्रौतस्मार्तायज्ञाः प्रसिद्धास्ते खल्वपिवाक्प्राणा-निर्वर्त्याइतिने पश्यन्तीत्यर्थः । तथाच मन्त्रवर्णः वाचिस्वाहांवातेधास्वाहेति ॥ २३ ॥

(६) **रामचन्द्रः** । वाच्येके स्वाध्यायसमये प्राणं प्राणवायुं । प्राणे प्राणायामसमये वाचंवागिन्द्रियं भाषमाणे

जुह्वति । नववर्षाणि प्राणं जुहोमीति । एतावतैव पञ्चयज्ञानिर्वृत्ता भवन्ति । पञ्चाग्न्युपासना गौणी । च पुनः वाचि प्राणे यज्ञनिर्वृत्तिसामर्थ्यं अक्षयां सदा पश्यन्तः ॥ २३ ॥

ज्ञानेनैवापरे विप्रायजन्त्येतैर्मखैः सदा ॥ ज्ञानमूलां क्रियामेषां पश्यन्तोज्ञानचक्षुषा ॥ २४ ॥

(१) **मेधातिथिः** । तैर्मखैःप्रकृतैर्महायज्ञैर्यजन्ते तद्विषयमधिकारंनिष्पादयन्ति अतोर्थभेदाद्यजन्ते यज्ञैरितिसाध्यसाधकभावोपपत्तिः । यथाग्निष्टोमयाजीति कथंपुनर्ज्ञानेनयागनिर्वृत्तिर्देवतोद्देशेन द्रव्यत्यागात्मकोयागोनचज्ञानमेवंरूपं । उच्यते यजन्तइति यागकार्यनिवृत्तिरत्राभिप्रेता । यदिज्ञानात्कार्यनिवृत्तिः किमर्थंतर्हिकर्मणामनुष्ठानं नह्यविषयकर्मानुष्ठानसंभवः । अथेयंबुद्धिर्यउचैनमेवंवेदेति । ज्ञानस्यापिफलसाधनत्वेनआश्रयणात् । कृतंकर्मानुष्ठानेनेति तदसत् अन्यशेषतया तस्यार्थवादत्वात् । अत्रोच्यते उक्तमलाभिरनीहमाना आत्मज्ञानेऽधिक्रियन्ते तएवज्ञानिनोप्रभितानकर्मानुष्ठानवेदिनः तेषविदसंन्यासिकतयागृहे अवतिष्ठमानानां महायज्ञानांभावनेयमुच्यते । द्रव्यसाध्यानांच महायज्ञानांआत्मज्ञानसंपादनमेवमुच्यते । स्वाध्यायोदकतर्पणयोस्तु कर्मसाध्यतामेवषष्ठेवक्ष्यति । अत्रकारणरूपमर्थवादमाह । ज्ञानमूलात् ज्ञानंमूलंयस्याःक्रियायाःसर्वस्यकर्मानुष्ठानस्यज्ञानंमूलं नह्यविद्वान्किंचिदनुष्ठातुंशक्नोति तदुक्तंविद्वान्याजयेदिति । पश्यन्तोज्ञानचक्षुषा । ज्ञानंचक्षुरिव यथाचक्षुषारूपंगृह्यते एवंज्ञानातज्ज्ञायते नततज्ज्ञानंवेदएवाभिप्रेतः ॥ २४ ॥

(२) **सर्वज्ञनारायणः** । ज्ञानेन धारणाध्यानसमाधानान्यतमेन ज्ञानमूलांज्ञानकारणिकांज्ञानचक्षुषावेदार्थज्ञानमयेन चक्षुषा पश्यन्तः ॥ २४ ॥

(३) **कुल्लूकः** । अपरे विप्राब्रह्मनिष्ठाः सर्वथा ब्रह्मज्ञानेनैवैतैर्मखैर्यजन्ति एतांश्च यज्ञाननुतिष्ठन्ति । कथमेतदित्याह । ज्ञानंब्रह्म सत्यंज्ञानमनन्तेत्यादिश्रुतिषु प्रसिद्धं ज्ञानमूलामेषांज्ञानानांक्रियामुत्पत्तिजानन्तःज्ञायतेऽनेनेतिज्ञानंचक्षुरिव चक्षुः ज्ञानचक्षुषोपनिषदासर्वंखल्विदंब्रह्म तज्जलानित्यादिकयापञ्चयज्ञानपि ब्रह्मोत्पत्तिकाले ब्रह्मात्मकान्ध्यायन्तःसंपादयन्तिपञ्चयज्ञफलमश्नुवतइत्यर्थः । श्लोकत्रयेण ब्रह्मनिष्ठानांवेदसंन्यासिनांगृहस्थानाममीविधयः ॥ २४ ॥

(४) **राघवानन्दः** । सविषयाणीन्द्रियाणि नात्मातिरिक्तानीति विज्ञानेन । द्रव्यसाध्यानांमहायज्ञानांसंपादनमात्मनि । सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे । आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपित इत्युक्तेः । मखैः पञ्चयज्ञैः । ज्ञानयज्ञं प्रशंसति ज्ञानमूलामिति । श्रेयान्द्रव्यमयाद्यज्ञात्ज्ञानयज्ञः परंतपेत्युक्तेः ॥ एषामिन्द्रियाणां क्रिया व्यापारः ज्ञानंचैतन्यंमूलंप्रकृतिर्हेतुर्यस्याः अचेतनानांचेतनाधिष्ठानमृते प्रवृत्त्यनुपपत्तेरिति । ज्ञायतेनेनेति ज्ञानं वेदनंतेन नाविद्वानधिक्रियतेज्ञानचक्षुषा । सर्वे मखावेदसाध्याइति मेधातिथिः ॥ २४ ॥

(५) **नन्दनः** । ज्ञानेन संकल्पमयेन । सदा यावज्जीवम् । उत्तरार्धेन कारणमुच्यते । याक्रिया यज्ञात्मिकाऽनुमीयते तस्याज्ञानमेव मूलम् । ज्ञानाभावेऽननुष्ठानप्रसङ्गादिति । ज्ञानचक्षुषा बुद्ध्यापश्यन्तीत्यर्थः ॥ २४ ॥

(६) **रामचन्द्रः** । ज्ञानेनैवापरे विप्राः तैःमखैःपञ्चमहा यज्ञैः यजन्ते । एषांयोगिनां । ज्ञानमूलां क्रियांज्ञानचक्षुषा पश्यन्तः ज्ञानं मूलं यस्याःक्रियायाःसर्वस्य कर्मानुष्ठानस्य ॥ २४ ॥

अग्निहोत्रं च जुहुयादाद्यन्ते द्युनिशोः सदा ॥ दर्शेन चार्धमासान्ते पौर्णमासेन चैव हि ॥ २५ ॥

(१) **मेधातिथिः** । अग्निहोत्रादयःशब्दाः श्रुतौगृह्यस्मृतिषुचकर्मविशेषवचनतयाप्रसिद्धाःसेतिकर्तव्यताकाःतत्रविहिताःतेषामयमनुवादोनत्वत्रापूर्वविधिः रूपवचनात् केवलंहोमविषयाकर्तव्यताश्रुता । नद्रव्यं नदेवता । अग्निहोत्रादिना-

मधेयंच विशेषाकांक्षंअतःशास्त्रान्तरावगतविशेषवचनतैवप्रतीयते । यद्येवं तत एवकर्तव्यतावगमादनर्थकमिदं वेदसंन्यासिकानां अकुतोपासनानां संवादनार्थं । यथैव वाच्येकेजुव्हतिप्राणंज्ञानेनैवेतिचपञ्चमहायज्ञाःसंपाद्यन्ते । तद्वदेतदपीति कश्चायमुपालम्भः किमर्थंपुनर्वचनमिति । सर्वश्रुतीनांस्मृतीनांच यदेकदेशेभिहितं तस्यैवान्यत्रपुनर्वचनस्यचोद्यस्यापत्तेः । उक्तश्चसामान्यतःपरिहारः प्रतिपत्तिभेदान्नपौनरुक्त्यमिति । यथाप्रतिपत्तिभेदादिन्द्रियभेदोनैकेनचक्षुषा सर्वेंद्रष्टुंशक्नुवन्ति बहूनीन्द्रियाणि प्रयोजनवन्ति । एवंशाखाभेदःस्मृतिभेदश्च । अथोच्यते कस्मात्पाद्वचनमिति एषोपिनदोषः प्रतिशाखमितिकर्तव्यतायाभेदः कस्याभिधानंक्रियतां । सर्वाभिधानेगौरवंएकतराभिधाने अन्यतरपरित्यागः तदपिचोद्यमेव । उक्तंचानुवादोयं नविधिः । विधौहिचोद्यमेतत्स्यात् अन्यत्रविहितं किमर्थंपुनर्विधानमिति । आद्यन्तेद्युनिशोर्नात्रयथासंख्यं किंतर्हि दिवआदौनिशायाश्चादौ एवंदिवोन्तेनिशायाश्चान्तइति । सायंप्रातःकालावेतेन परिगृह्येते तत्रोदितहोमिनांअहरादौअनुदितहोमिनांनिशान्ते । द्विशब्दोदिवसपर्यायः । सदायावज्जीवं सायंप्रातर्होमःकर्तव्यः । दर्शेन यजेतेत्यत्राध्याहर्तव्यं दर्शेनयजेत् । नहितत्रोत्पत्तौजुहुयादित्यस्ति किंतर्हिदर्शेनयजेतेति तदनुवादश्चायंअतएवाध्याहारःक्रियते । अतएवअविशेषश्रमणेपि अर्धमासान्तइति कृष्णपक्षान्तेदर्शः । शुक्लान्तेपौर्णमासः । तथाचश्रुतिः । दर्शेचदर्शेनयजेत् पूर्णमास्यांपूर्णमासेनयजेतेति ॥ २५ ॥

(२) **सर्वज्ञनारायणः** । आद्यन्तेद्युनिशोर्दिवसस्यादावन्ते च तथा रात्रेरादावन्तेचेत्यर्थः । तथाचोद्धरणादिहोमान्तप्रयोगेणोभयोर्दिनरात्रयोराद्यन्तव्याप्तिरित्युदितहोममादाय कालोदर्शितः ॥ २५ ॥

(३) **कुल्लूकः** । उदितहोमपक्षे दिनस्यादौ निशायाश्चादौ अनुदितहोमपक्षे दिनस्यान्ते निशायाश्चान्ते यद्वोदितहोमपक्षे दिनस्यादौ दिनान्तेच अनुदितहोमपक्षे निशादौ निशान्तेचाग्निहोत्रंकुर्यात् कृष्णपक्षार्धमासान्ते दर्शाख्येन कर्मणा शुक्लपक्षार्धेच पौर्णमासाख्येन यजेत् ॥ २५ ॥

(४) **राघवानन्दः** । प्रासङ्गिकमुक्त्वा प्रकृतमनुसरति अग्नीति । आद्यन्ते सन्ध्याद्वयेद्युनिशोर्दिवसस्यादौ दिनस्यान्तेउदितहोमिनामाश्वलायनादीनाम् । निशायाआदौ निशायाअन्ते च साङ्ख्यायनादीनामनुदितहोमिनाम् । दर्शेनार्धमासान्तेअमायां पौर्णमास्यांपौर्णमासेनदर्शपूर्णमासाभ्यांयजेतेतिश्रुतेः ॥ २५ ॥

(५) **नन्दनः** । अथाहिताग्नेरसंकुचितवृत्तेर्वृत्तान्याह अग्निहोत्रमिति । द्युनिशोःअहोरात्रयोः । आद्यन्ते सायंप्रातश्च । सदा विहितकालानतिक्रमेणअर्धमासान्ते पक्षयोरन्तेपर्वणोरितियावत् । अत्रयजेतेत्यध्याहार्यम् ॥ २५ ॥

(६) **रामचन्द्रः** । द्युनिशोः आद्यन्ते प्रातःसायंकाले । अग्निहोत्रं जुहुयात् ॥ दर्शेन दर्शसंज्ञेन कालेन । मासान्ते अमायां । पौर्णिमास्येन कालेन ॥ २५ ॥

सस्यान्ते नवसस्येष्ट्या तथर्त्वन्ते द्विजोऽध्वरैः ॥ पशुना त्वयनस्यादौ समान्ते सौमिकैर्मखैः ॥ २६ ॥

(१) **मेधातिथिः** । सस्यशब्दोव्रीह्यादिधान्यवचनः । तस्यान्तःक्षयः । पूर्वसस्येषुक्षीणेषुनवसस्येष्ट्यायजेत आग्रयणेनेत्यर्थः । नचात्रपूर्वसस्यक्षयआग्रयणनिमित्तं । नापिनवसस्यागमः. किंतर्हि अकृताग्रयणस्य नवान्नाशनंप्रतिषिद्धं येनाहनानिष्ट्वानवान्नमद्यादिवि अतोनवसस्यभक्षणमाग्रयणेनेत्यर्थः । तेनयजेतेतिव्याचक्षते । आर्लिस्तुपक्षेपूर्वसस्याभावात् । नवसस्यस्यभावादन्यतोवा असत्यांचाशिशिक्षायांननियमतआग्रयणंप्राप्नोति । अथेदंसस्यांतइतिनवोत्पत्त्युपलक्ष-

---

(२६) पशुनात्वयनस्यादौ=पशुना ह्ययनान्ते तु (मेधा०)

णं तदानिष्ट्वाभक्षणंमाप्नोति । तस्माद्द्वेएतेवाक्ये । नानिष्ट्वाश्नीयादित्येकं सस्यान्तइतिद्वितीयं सस्यान्तग्रहणेनचसस्योत्पत्तिरेवाभिप्रेतानियतत्वात्तस्यानिमित्तस्योपपत्तिः । क्षयस्त्वनियतोधनिनांहित्रैवार्षिकान्यपिधान्यान्यत्रप्रवर्तन्ते । अतएवसूत्रकारः सस्यंनाश्नीयादग्निहोत्रमहुत्वेति । तथायदावर्षस्यतृप्तस्यादथाग्रयणेनयजेतेति । तथेदमपरंशरदिनवान्नमितिकालविशेषविधायकं तत्रयस्यपूर्वसस्यक्षयोनास्ति सशरदमाद्रियते । इतरस्तुन । एवमुभयोरर्थवत्ताचभवति इतरथाएवमेवाचक्षते । नवसस्योत्पत्तौनवसस्येष्ट्यायजेतेति । यतस्त्वाह । नानिष्ट्वानवसस्येष्ट्यानचान्नमश्नीयादिति । तेनउत्पन्नेष्वपिनवसस्येषु विद्यमानस्यअस्तिशरत्प्रतिपालनं । नवसस्योत्पत्तिनिमित्तत्वाच्चअसत्यामपिनवान्नाशनेच्छायांनियमतः । आग्रयणंऋत्वन्ते ऋतुः संवत्सरइतिदर्शनेनचातुर्मास्यानामेतत्करणमुच्यते । अध्वरशब्देन तान्येवाभिप्रेतानि । अयनयोरादीअनायनान्ते तेचेद्द्वेअयने दक्षिणमुत्तरंच तत्रपशुयागःकर्तव्योद्विःसंवत्सरस्य । सूत्रकारस्त्वाह । षण्मास्यःसांवत्सरोवेति । समान्ते समाशब्दःसंवत्सरपर्यायस्तस्यचान्तःसमाप्तिःशिशिरे । नचतत्रेदंसौमिकयागविधानं किंतर्हिगतेतस्मिन्वसन्तआगते । तथाचश्रुतिः वसन्तेवसन्तेज्योतिषायजेतेति । एतावंतिनित्यानिकर्माणि तानियथाकथंचिद्देदसन्यासिकेनापि सपाद्यानीतिसर्वस्यतात्पर्यम् ॥ २६ ॥

(२) सर्वज्ञनारायणः । सस्यान्ते व्रीहियवश्यामाकसस्यसमीपकाले शरदादौ नवसस्येष्ट्याग्रयणेष्ट्याऋत्वन्ते शीतोष्णवर्षत्वन्ते अध्वरैःचातुर्मास्यैः । अयनयोरादावार्दिदिनयोः अपरान्तइति क्वचित्पाठः । समान्ते वर्षसमाप्त्यनन्तरंवसन्तेशिशिरान्तत्वाद्वर्षस्य ॥ २६ ॥

(३) कुल्लूकः । पूर्वार्जितधान्यादिसस्ये समाप्ते शरदि नवानामितिसूत्रकारवचनादसमाप्तेपि पूर्वसस्ये नवसस्योत्पत्तावाग्रयणेन यजेत । सस्यक्षयस्यानियतत्वाद्धनिनांबहुहायनजीवनोचितधान्यसंभवाच्च सस्यान्तग्रहणाच्चनवसस्योत्पत्तिरेवाभिप्रेतानियतत्वात्तस्याःप्रत्यब्दंनिमित्तत्वोत्पत्तेः । ऋतुसंवत्सरइत्येतन्मताश्रयणेन चत्वारश्चत्वारोमासाऋतवस्तदन्तेऽध्वरैश्चातुर्मासाख्यैर्यागैर्यजेतअयनयोरुत्तरदक्षिणयोरादौपशुनायजेतपशुबन्धाख्यंयागमनुतिष्ठेत् ज्योतिःशास्त्रे चैत्रशुक्लप्रतिपदादिवर्षगणनाच्छिशिरेण समाप्ते वर्षे वसन्ते सोमरससाध्यैरग्निष्टोमादियागैर्यजेत ॥ २६ ॥

(४) राघवानन्दः । किंच सस्यान्तइति । नवसस्येष्टिरिति असमाप्तेपि पूर्वसस्ये नवोत्पत्तौआग्रयणेनयजेत । ऋत्वन्तेऋतोरन्तेअध्वरैश्चातुर्मास्याख्यैर्वैश्वदेववरुणप्रघाससाकमेधशुनासीरसंज्ञैर्यागैः । पशुना पशुबन्धेन यागेन । सौमिकैः सोमरससाध्यैर्ज्योतिष्टोमाख्यैः ॥ २६ ॥

(५) नन्दनः । सस्यान्ते सस्यानां श्यामाकादीनामन्ते पाककाले नवसस्येष्ट्याआग्रयणेन । अध्वरैः सोमचातुर्मास्यैः । पशुना निरूढपशुबन्धेन । समान्तेसंवत्सरान्ते । सौमिकैःसोमवद्भिः । अत्रापियजेतेतिशेषः ॥ २६ ॥

(६) रामचन्द्रः । सस्यान्ते सस्यच्छेदेसस्यादौसस्योत्पत्तौ अध्वरैश्चातुर्मास्यैः । अन्ते चातुर्मास्यान्ते उदगयने दक्षिणायनस्यान्ते पशुनापशुयागः कर्तव्यः । समान्ते संवत्सरान्ते सौमिकैर्मखैः सोमयागसंज्ञैः । यस्मिन्यज्ञे सोमपानंक्रियते सः ॥ २६ ॥

नानिष्ट्वा नवसस्येष्ट्या पशुना चाग्निमान्द्विजः ॥ नवान्नमद्यान्मांसं वा दीर्घमायुर्जिजीविषुः ॥ २७ ॥

(१) मेधातिथिः । अग्निमानाहिताग्निरत्राभिप्रेतोव्रताधिकारात् तस्यहोमस्ययाजुर्वैदिकंव्रतं । नानिष्ट्वापशुना-

मांसंसमश्नीयान्नाग्रयणेननवान्नमिति । नियमानुपालनेफलमाह । दीर्घमायुर्जिजीविषुः । आयुःशब्देनप्रबन्धवत्यः प्राणापानवृत्तयउच्यन्ते । द्वितीयाचसत्यपिजीवतेरकर्मकत्वेपिइषिक्रियापेक्षयासन्नन्तोपिधातुरिच्छायांवर्तते यद्यपिदर्शनइषेः कर्मप्रकृत्यर्थोनबाह्यमिच्छावेक्ष्यमाणंप्रतिगुणभूताप्रकृतिप्रत्ययौप्रत्ययार्थंसहब्रूवतइति सन्नंतादन्यत्रापि । अभिन्नपिदर्शने-आयुःशब्देनकालोलक्षयिष्यते । दीर्घकालंजीवनमिच्छन् । तत्रकालभावावध्वतव्या कर्मसंज्ञाह्यकर्मणामितिकर्मत्वं । एषचाहिताग्नेःपशुबन्धेनियमः आग्रयणेपि । गृह्याग्निमतोपि गृह्यस्मृतिषुनियमतआग्रयणंविहितं । यच्चेदंशरदिनवान्नमितितत् व्रीहिश्यामाकयोर्नयवानां । नवसस्यमात्रेणसस्येष्टियागोनचमाषमुद्गादिना यतइदंशास्त्रान्तरसापेक्षंनत्ततोविधायकमित्युक्तं । शास्त्रान्तरेषुचव्रीहिश्यामाकयवैराग्रयणेष्टिर्विहिता । किंत्वन्यदपिसस्यंनाशितव्यमकृतायामाग्रयणेष्टौ । यदुक्तमविशेषेणसस्यंनाश्नीयादिति तन्निषेधेह्यभिप्रेते इयदेवावक्ष्यदाग्रयणंव्रीहिश्यामाकयवानांनाश्नीयादग्निहोत्रमहुत्वेति । एवंसूत्रकारेणपठितं । आग्रयणंव्रीहिश्यामाकयवानांसस्यंनाश्नीयादग्निहोत्रमहुत्वेति । अतोयंसस्यशब्दोनप्रतिनियतविषयएव ॥ २७ ॥

(२) **सर्वज्ञनारायणः** । नानिष्ट्वेति एतेन एवश्यामाकव्रीहिभक्षणाभावे आग्रयणस्य मांसभक्षणे च पशुयागस्याकरणेपि न दोषइतिदर्शितं । तद्भक्षणनिमित्तकत्वोपदर्शनात् ॥ २७ ॥

(३) **कुल्लूकः** । आहिताग्निर्द्विजोदीर्घमायुर्जीवितुमिच्छन्नाग्रयणमकृत्वा नवान्नंन भक्षयेत् । न च पशुयागमकृत्वा मांसमश्नीयात् ॥ २७ ॥

(४) **राघवानन्दः** । नवसस्येष्टिपशुबन्धयोरर्थवादेन तयोरावश्यकत्वमाह नेतिद्वाभ्यां । नवान्नं मांसंच नाद्यात् ॥ २७ ॥

(५) **नन्दनः** । आग्रयणपशुबन्धयोरवश्यकर्तव्यतांप्रसङ्गादाह नानिष्ट्वेति । अग्निमानाहिताग्निः ॥ २७ ॥

(६) **रामचन्द्रः** । नादिष्टेति नवसस्ये सति अग्निमान् द्विजः पशुना पशुयागेनानिष्ट्वापशून् अकृत्वा नवान्नंनाद्यात् तथा मांसंनाद्यात् दीर्घमायुर्जिजीविषुः अकृत्वा नाद्यात् ॥ २७ ॥

नवेनानर्चितास्य पशुहव्येन चाग्नयः ॥ प्राणानेवात्तुमिच्छन्ति नवान्नामिषगर्धिनः ॥ २८ ॥

(१) **मेधातिथिः** । नित्यतामेवसमर्थयते । अकरणदोषदर्शनं नवेनसस्येनअनर्चिताअकृतहोमाअग्नयोस्याहिताग्नेः प्राणानेवात्तुमिच्छन्ति । भक्षयितुंगर्धिनःगर्धअभिलाषातिशयः तदस्यास्तीतिमत्वर्थीयइति ॥ २८ ॥

(२) **सर्वज्ञनारायणः** । नवेन चान्नेनअस्याआग्रयणपशुयागावकृत्वा नवान्नमांसभक्षिणः पशुहव्येन पशुरूपहविषागर्धोभिलाषः ॥ २८ ॥

(३) **कुल्लूकः** । दोषंकथयन्ननित्यतामनयोराह । यस्मान्नवेन पशुवदामेनानर्चिताअकृतयागाअग्नयोनवान्नमांसाभिलाषिणोऽस्याहिताग्नेःप्राणानेवाग्निहोत्रिणःखादितुमिच्छन्ति । गर्धोऽभिलाषातिशयः । गृधेर्घञन्तस्यरूपम् । सोऽस्यास्तीतिगर्धी । मत्वर्थीयइनिः ॥ २८ ॥

(४) **राघवानन्दः** । नवेन नवसस्येष्ट्या नार्चिताः नवान्नामिषगर्द्धिनोग्नयः । अत्तुमिच्छन्तीत्यर्थः ॥ २८ ॥

(५) **नन्दनः** । अथयजमानस्य दोषमाह नवेनेति ॥ २८ ॥

आसनाशनशय्याभिरद्भिर्मूलफलेन वा ॥ नास्य कश्चिद्वसेद्गेहे शक्तितोऽनर्चितोऽतिथिः ॥ २९ ॥

(१) **मेधातिथिः** । उक्तमिदमुत्तरार्थमनूद्यते । नकश्चिदतिथिरनर्चितोगृहेवसेत् । सर्वोतिथिरर्चितोगृहेवसनीयः । शक्तितएकोद्वौबहवोयावन्तःशक्यन्तेर्चयितुं सर्वेआसनादिभिरर्चनीयाः । अर्चापूर्वकमेतदेभ्योवसतांप्रकल्पनाय नतुसर्वेणसर्वमासनाशनशय्यानांसत्वनिवृत्तिरुच्यते । भक्तयूषमांसान्नाज्याशनासंभवेपृथगुपादानातमूलफलंदातव्यम् ॥ २९ ॥

(२) **सर्वज्ञनारायणः** । अशनमशनीयम् ॥ २९ ॥

(३) **कुल्लूकः** । यथाशक्त्यासनभोजनादिभिरनार्चितोऽतिथिरस्य गृहस्थस्य गृहे नवसेत् । अनेन शक्तितोऽतिथिं पूजयेदित्युक्तमप्युत्तरार्धमनूद्यते ॥ २९ ॥

(४) **राघवानन्दः** । उक्तापि अतिथेः पूजाआवश्यकत्वात्पुनरपितामाह आसनेति । यथाशक्त्या । आसनभोजनशय्यादिभिरनर्चितः अतिथिः अस्यगृहस्थस्य गृहेनवसेत् । अनेन शक्तितोतिथिमर्चयेदितितूक्तमपि उत्तरार्धेनानूद्यते ॥ २९ ॥

(५) **नन्दनः** । उक्तमप्यातिथ्यमादरातिशयार्थमाह आसनेति ॥ २९ ॥

(६) **रामचन्द्रः** । आसनादिभिरनर्चितः । अतिथिः कस्य चिद्गेहे न वसेत् ॥ २९ ॥

पाषण्डिनोविकर्मस्थान्बैडालव्रतिकाञ्छठान् ॥ हैतुकान्बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत् ॥ ३० ॥

(१) **मेधातिथिः** । अत्रवसेदितिलिङ्गात्सायमातिथ्यप्रतिषेधोयंपाखण्ड्यादीनामित्याहुः । तदयुक्तंअर्चनीयतात्रनिवार्यते । नतुसर्वेणसर्वभक्तावदानमेवोच्यते । दिवापिभुञ्जानानांकतिचित्क्षणावासउपपद्यतएव अतोनलिङ्गंसायंकालस्यवसेदिति । तत्रपाखण्डिनोबाह्यलिङ्गिनोरक्तपटनग्नचरकादयः । विकर्मस्थाअत्रानापदियेवर्णान्तरवृत्त्याजीवन्तियथाब्राह्मणःक्षत्रवृत्त्याक्षत्रियोवैश्यवृत्त्येत्यादि बैडालव्रतिका दाम्भिका येचलोकावर्जनार्थं अग्निहोत्राद्यनुतिष्ठन्ति । इतिगृहादिलिप्सामहइति । नशास्त्रचोदितत्वेन स्वधर्मतया शठायेषामन्यत्हृदयेन्यद्वाचिउपकारंकस्यचित्प्रतिज्ञाय कर्तव्यतया अवधीरयन्ति नकुर्वन्ति हैतुकानास्तिका नास्तिपरलोको नास्तिदत्तंनास्तिहुतं इत्येवंस्थितप्रज्ञाः बकवृत्तयःदाम्भिकाएवईषद्भेदभिन्नाः भेदःपरस्परंदर्शयिष्यते । वाङ्मात्रेणापितिष्ठतुतावदासनादिदानं पूजापूर्वकं स्वागतमास्यतामत्रेत्येवमाद्यपिनवक्तव्याः । अन्नदानं श्वपचादिवदिष्यते तथाचभगवान्कृष्णद्वैपायनोन्नदानमेवाधिकृत्यस्मरतिस्म । नपृच्छेजन्मनश्रुतमिति । नात्रपात्रगवेषणाकर्तव्येत्यर्थः ॥ ३० ॥

(२) **सर्वज्ञनारायणः** । पाषण्डिनोबौद्धादीन् । पाषण्डदर्शनान्तःपातिनः । विकर्मस्थाना श्रमस्थानप्याश्रमधर्महीनान् । शठान्वक्रहृदयान् । हैतुकानाश्रमिणोपि हेतुमात्रेण वेदविरुद्धेन परलोकसाधनोन्नायकान् नार्चयेत् । क्षुधितेभ्यस्त्वन्नंशक्तौ दद्यादेव ॥ ३० ॥

(३) **कुल्लूकः** । पाषण्डिनोवेदबाह्यव्रतलिङ्गधारिणः शाक्यभिक्षुकक्षपणकादयः । विकर्मस्थाः प्रतिषिद्धवृत्तिजीविनः । बैडालव्रतिकबकवृत्तीवक्ष्यमाणलक्षणौ । शठावेदेष्वश्रद्दधानाः । हैतुकावेदविरोधितर्कव्यवहारिणः । एतानतिथिकालोपस्थितान् वाङ्मात्रेणापि न पूजयेत् । पूजारहितेऽन्नदानमात्रंतु शक्तितोऽपचमानेभ्यइत्यनुज्ञातमेव ॥ ३० ॥

(४) **राघवानन्दः**। आतिथ्यादिलक्षणमुक्तं एतेषु विशेष्वपि आतिथ्यंनास्तीत्याह पाषण्डिनइति। वेदबाह्यव्रतलिङ्ग-धारिणःपाषण्डिनः। ते चभिक्षुक्षपणकादयः। प्रतिषिद्धवृत्तिजीविनः विकर्मस्थाः। वेदार्थेष्वश्रद्दधानाः। शठाःप्रसिद्धाः। अत्रैव करिष्यमाणलक्षणाबैडालव्रतिकादयस्त्रयः। हैतुकोवेदविरुद्धतर्की ॥ ३० ॥

(५) **नन्दनः**। अवैदिकाः पाषण्डिनः। विकर्मस्थानिन्दिताचाराः । बैडालव्रतिकान्बकवृत्तींश्चवक्ष्यति । हैतुकाः वेदशास्त्रविरुद्धतर्कशास्त्रपराः ॥ ३० ॥

(६) **रामचन्द्रः**। पाषण्डादीन् वाङ्मात्रेणापि नार्चयेत् । युक्तिबलेन सर्वत्र संशयकरोहैतुकः तान्। बकवत् वृत्तिर्वर्तनंयस्य सः ॥ ३० ॥

वेदविद्याव्रतस्नाताञ्छ्रोत्रियान्गृहमेधिनः ॥ पूजयेद्धव्यकव्येन विपरीतांश्च वर्जयेत् ॥ ३१ ॥

(१) **मेधातिथिः**। वेदश्च विद्याच व्रतानिच तैःस्नातास्तत्रपरिसमाप्तिंगताः विविधास्नातकागृह्यन्ते। तत्रवेदस्नातकाअधीतवेदाः विद्यास्नातकाविद्यार्थजिज्ञासितवन्तः। विद्यासन्निधानाद्वेदविषयैवगृह्यते। तस्याएववस्तुतोविद्यात्वं। व्रतानिषट्त्रिंशदाब्दिकमित्यादीनि। सत्यामपिवेदतदर्थजिज्ञासासमाप्तौ नतावत्येवस्नानं किंतर्हिषट्त्रिंशदब्दादिकालःपूरयितव्यः इतिपक्षोप्यस्ति। अन्येतु येनधीत्यैववेदंवर्षत्रयातस्नान्ति तेव्रतस्नातकाइत्याचक्षते । अनधीतवेदस्यकुतःस्नानमित्यपेक्षायां ननुचश्रोत्रियग्रहणंकिमर्थं स्नातकत्वेनैवसिद्धत्वात्। अतिशयार्थंतेनवेदाभ्यासरतागृह्यन्ते। श्रोत्रियागृहमेधिनोगृहस्थानानेनभिक्षुतापसब्रह्मचारिणामपूजनीयत्वमुच्यते। किंतर्हिभैक्ष्यभोजित्वात्तेषांनातिथित्वसंभवः। ब्रह्मचारिणोगुरुगृहात्तापसस्यचवनान्नान्यत्रवासः प्रव्रजितस्यापिभैक्षार्थीग्राममियादिति नग्रामेवासः । अतोन्येषामाश्रमिणांगृहादन्यत्रवासात्कथंचित्सम्भवेपिप्रायिकमेतद्गृहमेधिनइति । हव्येनकव्येनदैवकर्मणिशान्त्यादौ पित्र्येवाश्राद्धे तएवपूज्याः विपरीताः अस्नातकाःवर्ज्याःपूर्वोक्तदोषाभावेपि ॥ ३१ ॥

(२) **सर्वज्ञनारायणः**। वेदविद्यायांप्राप्तायां व्रते च कृतेऽनन्तरंस्नातांस्समावृत्तान्तांस्तदनन्तरमेव स्वगृहमागतान्पूजयेत्। तथा गृहे वसतोपि श्रोत्रियान्वेदविदो हव्यकव्येन हव्यकव्यसंबन्धिकर्मणा विपरीतान्विद्याव्रतंविना स्नातान् गृहिणश्चाश्रोत्रियान् ॥ ३१ ॥

(३) **कुल्लूकः**। वेदविद्याव्रतस्नातानिति विद्यास्नातकव्रतस्नातकोभयस्नातकास्त्रयोऽपि गृह्यन्ते यथाह हारीतः। यः समाप्य वेदानसमाप्यव्रतानि समावर्तते सविद्यास्नातकः। यः समाप्य व्रतान्यसमाप्य वेदान्समावर्तते सव्रतस्नातकः। उभयंसमाप्य यः समावर्तते सविद्याव्रतस्नातकः। यद्यपि स्नातकधर्मत्वेनैव स्नातकमात्रप्राप्तिस्तथापि श्रोत्रियत्वंविवक्षितम् तान्स्नातकाञ्छ्रोत्रियान्हव्यकव्येन पूजयेद्विपरीतान्पुनर्वर्जयेत् ॥ ३१ ॥

(४) **राघवानन्दः**। एतांस्त्वर्चयेदेवेत्याह वेदेति। वेदः स्वशाखा। विद्या तर्कव्याकरणादि । व्रतं षट्त्रिंशद्वर्षादिब्रह्मचर्यं तेषु स्नातान् पारगान्। विपरीतान् पाखण्डादीन् ॥ ३१ ॥

शक्तितोऽपचमानेभ्योदातव्यंगृहमेधिना ॥ संविभागश्च भूतेभ्यः कर्तव्योऽनुपरोधतः ॥ ३२ ॥

(१) **मेधातिथिः**। अपचमानाब्रह्मचारिपरिव्राजकाइत्याहुः। तदुक्तं भृतायनित्यवद्दानंविहितमेव। भिक्षांचभिक्षवेदद्यादिति। तस्माद्येदरिद्राभैक्षजीवनाश्चपाखण्ड्यादयःतेभ्यःशक्तितोदातव्यं । यावद्धयःशक्यते यावच्चपच्यते पचिक्रियाविरहनिमित्तत्वाच्चसिद्धान्नदानमेवेदं। संविभागश्चअन्येनापिधनेनपरिधानौषधाद्युपयोगिना संविभागःकर्तव्यः।

कश्चिदंशोदातव्यः सर्वभूतेभ्यः। भूतशब्दोयंचेतनात्मकंजगदाचष्टे। यथागायत्रीवाइदंसर्वभूतमिति। अचेतनानांचेतनवदुपकारार्थतया संविभागानुपपत्तेः चेतनावत्स्वेवावतिष्ठते। अतश्चप्ररोहधर्मकाश्चेतनावन्तइतिदर्शने वृक्षादीनामपिजलसेकाद्यर्थोधनसंविभागःकर्तव्यः। बह्वर्थोयंभूतशब्दः। कश्चित्प्राधान्येवर्तते भूतमियंब्राह्मण्यस्मिन्गृहे। क्वचित्पैशाचवचनोभूतोपसृष्टइति। क्वचिद्विपरीतेर्थेवर्तते भूतमाहेति। क्वचिदतिक्रान्तकालवचनोभूतोधात्वर्थइति। क्वचिद्देवताविशेषेभूतेभ्योबलिरिति। क्वचिच्चेतनावन्मात्रवचनोनहिंस्याद्भूतानीति। क्वचित्प्राप्तिवचनोमहद्भूतश्चन्द्रमाइति। क्वचिदुपमायांवर्तते यथाकाव्यभूतइति। क्वचिदुत्पत्तिवचनो यथादेवदत्तस्यपुत्रोभूतइति। इहतुयःपदार्थस्तद्याख्यानं भूतेभ्यइति तादर्थ्येचतुर्थी। अनुपरोधतः आत्मकुटुम्बपीडायथानभवति तत्पर्याप्तंस्थापयित्वा अधिकेनसंविभागःकर्तव्यः। तदुक्तं भृत्यानामनुपरोधेनेति ॥ ३२ ॥

(२) **सर्वज्ञनारायणः**। अपचमानेभ्योब्रह्मचार्यादिभ्यः प्राण्यन्तरेभ्यः एवेत्यर्थः। षष्ठ्यर्थे चतुर्थी। अनुपरोधतःकुटुम्बोपरोधंविना ॥ ३२ ॥

(३) **कुल्लूकः**। अपचमानाब्रह्मचारिपरिव्राजकाः पाषण्डादयः। ब्रह्मचारिपरिव्राजकानामुक्तमप्यन्नदानंपचमानापेक्षयातिशयार्थं स्नातकव्रतत्वार्थंच पुनरुच्यते। मेधातिथिगोविन्दराजौतु भिक्षां च भिक्षवेदद्याद्विधिवद्ब्रह्मचारिणइति ब्रह्मचारिपरिव्राजकयोरुक्तत्वात्पाषण्ड्यादिविषयत्वमेवास्य वचनस्येत्यूचतुः। स्वकुटुम्बानुरोधेन वृक्षादिपर्यन्तप्राणिभ्योऽपि जलादिनापि विभागः कर्तव्यः ॥ ३२ ॥

(४) **राघवानन्दः**। सन्यास्यादिभ्यः स्वाऽपीडयैव दातव्यमित्याह शक्तितइति। सन्यासिब्रह्मचारिविरक्तवानप्रस्थेभ्योऽपचमानेभ्यः। यतिश्च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ। तयोरन्नमदत्वा तु भुक्त्वा चान्द्रायणंचरेदित्युक्तेः॥ जलादिना संतोषः संविभागःभूतानामनुपरोधतः अपीडया ॥ ३२ ॥

(५) **नन्दनः**। अपचमानेभ्योब्रह्मचारिसंन्यासिभ्यः भूतानांश्वचाण्डालादीनामनुपरोधतः स्वकुटुम्बाविरोधेन॥३२॥

(६) **रामचन्द्रः**। अयाचमानेभ्यःब्रह्मचारिसन्यासिभ्यःभूतेभ्यः प्राणिभ्यःशक्तितोयावान्सद्धान्नादितत्संविभागस्तावत्कर्तव्यः। अनुपरोधतः कुटुम्बस्य पीडा यथा न भवेत् गृहमेधिना तथा दातव्यम् ॥ ३२ ॥

राजतोधनमन्विच्छेत्संसीदन्स्नातकः क्षुधा॥याज्यान्तेवासिनोर्वापि न त्वन्यतइति स्थितिः॥३३॥

(१) **मेधातिथिः**। राजग्रहणमाढ्यवर्णोपलक्षणार्थम्। तथाचवक्ष्यति। सीदद्भिः। कुप्यमिच्छद्भिर्धनंवापृथिवीपतिः। याच्यस्यादिति। तेनराजशब्दःक्षत्रियजातौमुख्यः तथापिशास्त्रान्तरपर्यालोचनया जनपदेश्वरवचनइतिगम्यते। जनपदेश्वराहिबहुधनाभवन्तितेनैतदुक्तंभवतियेत्यन्तसम्पन्नागोजाविधनधान्यैस्तेभ्यःप्रतिग्रहीतव्यम्। तथासत्यद्रोहेणेत्येतदादृतंभवति आढ्याहिददतोनातीवपीड्यन्ते। स्वल्पधनेभ्यस्तुपरिगृह्णतो दोषःस्यात्। मुख्यार्थवृत्तौचराजशब्देब्राह्मणादिभ्यःप्रतिग्रहःप्रतिषिध्यते। तत्रसर्वस्मृतिविरोधःस्यात्। स्मृत्यन्तरेहिपठ्यते। आददीतप्रशस्तद्विजातिभ्यःशुश्रूषोःशूद्रादपक्वान्नमितिप्रतिषेधेपि नराज्ञःप्रतीगृह्णीयादितिराजशब्दोजनपदेश्वरवचनएव। किंचनक्षत्रियस्यतत्रप्रतिषेधः अराजन्यप्रसूतितइतिवचनात्। अतएवनक्षत्रियजातीयात्तत्रतन्निषेधस्तथासत्यराजन्यप्रसूतितइतिनवक्तव्यंस्यात्। नह्यराजन्यप्रसूतितःक्षत्रियाभवन्ति। तेनेयमत्रव्यवस्था क्षत्रियाद्राज्ञोयथाशास्त्रवर्तिनःप्रतिग्रहःकर्तव्यः। अन्यस्मात्पुनर्नरकैकविंशत्यायोगः। याज्यान्तेवासिनोःधनापेक्षाषष्ठी। तसंतोवापठितव्यः क्रियानिमित्तत्वादेतयोःशब्दयोर्याजनाध्यापनाभ्यांजीवेदित्युक्तंभवति। अन्येत्वाहुरन्येषांउपपातकप्राप्तिश्चौर्यादीनांचोपायानांनिषिद्धत्वात्। ईश्वरमाराध्यजीवेत्प्रीतिदायेन

स्वस्तिवाचनकेनवा नचायंसेवकः सावृत्तिर्निषिद्धा । एवंकृतोपकारादयाजयन्नपियाज्यादाददीत वृत्तेपिसंबन्धेकृत्योवर्ततइति संसीदन्निति । पित्रादिधनेसति नकर्तव्यं । तदुक्तं नकल्पमानेष्वर्थेषुतस्यैवायमनुवादः । नचायमापद्धर्मः नह्यवसादआपत्किंतर्हिअर्जितधनाभावः । आपत्तुविहितोपायाभावोधनक्षयश्च । सत्यपिधान्यधनवत्वेअन्नपरिक्षयेदुर्भिक्षादावातिथ्यसन्निहितान्नता । नक्षुत्पीडितस्यापत् । अक्षुधितस्यापिधनाभावादवसादइत्येषएतयोर्विशेषः । नत्वन्यतःस्वल्पधनादनुपकार्यान्नगृह्णीयात् ॥ ३३ ॥

(२) **सर्वज्ञनारायणः** । अन्विच्छेदनुगम्येच्छेत् । स्नातकोगृहस्थः । एतेनात्यन्ताभ्यर्थनया धनार्जनमेभ्यस्त्रिभ्यएवेत्यर्थः ॥ ३३ ॥

(३) **कुल्लूकः** । न राज्ञः प्रतिगृह्णीयादराजन्यप्रसूतितइतिनिषेधाद्राजशब्दोऽत्र क्षत्रियनृपतिपरः । स्नातकःक्षुधाऽवसीदन्द्विजातिप्रतिग्रहस्य संभवेऽपि यथाशास्त्रवर्तिनः क्षत्रियाद्राज्ञोयाज्यशिष्याभ्यांवा प्रथमंधनमभिलषेत् । राज्ञोमहाधनत्वेन पीडाविरहात् । याज्यशिष्ययोश्च कृतोपकारतया प्रत्युपकारप्रवणत्वात् । तदसंभवे त्वन्यस्मादपि द्विजाद्धनमाददीत । तदभावे तु सर्वतःप्रतिगृण्हीयादित्यापद्धर्मंवक्ष्यति । एवंचानापदि प्रथमंक्षत्रियनृपयाज्यशिष्येभ्यःप्रतिग्रहनियमार्थंवचनम् । अतएवाह न त्वन्यतइति । स्थितिःशास्त्रमर्यादा । न च संसीदन्नित्यभिधानादापद्धर्मविषयत्वमस्यवाच्यम् अव्यभिचारादनापत्प्रकरणात् । संसीदन्नित्यस्य चोपात्तधनाभावपरत्वात् । नच धनाभावमात्रमापत् किंतु तस्मिन्सति विहितोपायासंभवात् । अन्यथा सद्यःप्रक्षालकोऽप्यापद्वृत्तिःस्यात् । यदि चापद्विषयत्वमस्य भवेत्तदा नत्वन्यतइत्यनेन सर्वतःप्रतिगृह्णीयादिति विरुध्येत । यच्चापत्प्रकरणे सीदद्भिःकुप्यमिच्छद्भिर्धनंवा पृथिवीपतिः । याच्यःस्यादित्युक्तं तच्छूद्रनृपविषयमेवंराजादिप्रतिग्रहासंभवे ॥ ३३ ॥

(४) **राघवानन्दः** । स्नातकस्य धनोपायानाह राजतइति । अन्तेवासिनः शिष्याः अन्यतःशूद्रादेः ॥ ३३ ॥

(५) **नन्दनः** । राजतोऽभिजाताच्छास्त्रानुसारिणोगुणवतोराज्ञः क्षुधा संसीदन्स्नातकोन्नमन्विच्छेत्प्रतिगृह्णीयात् । याज्यान्तेवासिभ्यामन्यतः प्रतिग्राह्यात् ॥ ३३ ॥

(६) **रामचन्द्रः** । स्नातकः वेदस्नातकः विद्यास्नातकः व्रतस्नातकोवा । क्षुधा संसीदन् राजतः कृताभिषेकान् राज्ञः अन्विच्छेत् धनं इच्छेत् प्रतिग्रहंकुर्यात क्षत्रियस्य प्रतिषेधः याज्यः यस्य यज्ञंकारितवान् तस्मात् । अन्तेवासी शिष्यस्तस्मात् । अन्यतःसकाशात् धनंनेच्छेत् ॥ ३३ ॥

न सीदेत्स्नातकोविप्रः क्षुधा शक्तः कथंचन ॥ न जीर्णमलवद्वासाभवेच्च विभवे सति ॥ ३४ ॥

(१) **मेधातिथिः** । यदिनकुतश्चिद्धनार्थाद्व्यापाराद्याहन्येत तथापिनतदैवापद्धर्मानाश्रयेत् । किंतर्हिपुनरुत्पद्यते । तदुक्तमामृत्योःश्रियमन्विच्छेदिति । अतश्चयदिकथंचितकृषतोवर्षाद्यभावेनसस्यनाशोभवेन्नेयतात्यागेनसहसैवपरपिण्डोपजीवनायाश्चापरेणभवितव्यं सत्यांयुक्तौजीर्णेमलिनेचवाससी धनविभवेसतिनेष्यते ॥ ३४ ॥

(२) **सर्वज्ञनारायणः** । क्षुधा न सीदेत् । शक्तोर्जनसमर्थः । जीर्णंत्रुटितम् ॥ ३४ ॥

(३) **कुल्लूकः** । विद्यादियोगात्प्रतिग्रहशक्तोऽपि स्नातकोब्राह्मणउक्तराजप्रतिग्रहादिलाभे सति न क्षुधावसन्नोभवेत् । नच धनेसंभवति जीर्णेमलिने च वाससी बिभृयात् ॥ ३४ ॥

---

(३४) क्षुधाशक्तः=क्षुधासक्तः (मेधा०)

(४) राघवानन्दः । तेन नातीव कष्टेन वर्तितव्यमित्याह नसीदेदिति । क्षुधासक्तः तादृशस्य धर्मे अविश्वासमसक्तात् । विभवे सति अजीर्णशुक्लाम्बरःस्यात् ॥ ३४ ॥

(५) नन्दनः । नसीदेद्विभवे सति शक्तोभोजनसमर्थोलोभात्क्षुधा नावसीदेत् मृष्टमश्नीयादेव ॥ ३४ ॥

(६) रामचन्द्रः । स्नातकोविप्रः क्षुधा न सीदेत् । कीदृशोविप्रः शक्तःविद्यया परिपूर्णः ॥ ३४ ॥

क्लृप्तकेशनखश्मश्रुर्दान्तः शुक्लाम्बरः शुचिः ॥ स्वाध्याये चैव युक्तः स्यान्नित्यमात्महितेषु च ॥ ३५ ॥

(१) मेधातिथिः । कल्पनंछेदनंदन्तवाससइत्येतदपेक्षंचैतत्कल्पनंनियमतः । अतएवशुचिरित्याह । दीर्घकेशस्यहि स्नानादिषुक्लेशसाध्यत्वात् । अलसःस्यात्तथाशुचित्वप्रसङ्गः । यदितुकेशादिप्रसृतोऽपिस्नानपरःस्यान्नैवधारणंदुष्येत् । दान्तःदर्पवर्जितः । शुचिःअर्थेषुश्रुतिनिमित्तैर्मृद्वार्याचमनादिभिश्च । वेदाध्ययनेर्चानित्याभियुक्तः । उक्तोप्ययमर्थआदरार्थःपुनःपुनरुच्यते । आत्महितानिव्याधेःप्रतीकारादिनाअजीर्णातिवेलगुरुविदाहिभोजनवर्जनादीनि ॥ ३५ ॥

(२) सर्वज्ञनारायणः । कृत्तं कर्तर्यादिकर्तनेन ह्रस्वतांनीतं तेन स्नातकस्य क्षुरेण मुण्डनमवैधमित्युक्तम् । अतएवापस्तम्बः । न समावृत्तावपेरन्नन्यत्र विहारादिति । विहारश्चेताग्निविहारसंपाद्योदर्शादिः उपलक्षणंचैतत् । पितृमरणादेरिति । केशाशिरोरुहाः । दान्तस्तपःक्लेशसहिष्णुः नित्यंयुक्तोनित्योद्युक्तः । आत्महितेष्वाहारलाघवादिषु ॥ ३५ ॥

(३) कुल्लूकः । कल्पनंछेदनंलूनकेशनखश्मश्रुस्तपःक्लेशसहोदान्तः शुक्लवासाबाह्याभ्यन्तरशौचसंपन्नोवेदाभ्यासयुक्तऔषधोपयोगादिना चात्महितपरःस्यात् ॥ ३५ ॥

(४) राघवानन्दः । अस्य सार्थवादानि व्रतान्याह आध्यायपरिसमाप्तेः क्लृप्तेत्यादिना । क्लृप्ताश्छिन्नाःशिखांवर्जयित्वा केशादयोयस्य सः । आत्महितेषु औषधादिषु ॥ ३५ ॥

(६) रामचन्द्रः । क्लृप्ताः कृत्ताः केशानखानि श्मश्रूणि यस्य सः क्लृप्तकेशनखश्मश्रुः तथा योगीश्वरः नीचकेशश्मश्रुनखः शुचिरिति । शुचिरन्तर्बहिश्च आत्महितेषु लघ्वाहारादिषु ॥ ३५ ॥

वैणवीं धारयेद्यष्टिं सोदकं च कमण्डलुम् ॥ यज्ञोपवीतं वेदं च शुभे रौक्मे च कुण्डले ॥ ३६ ॥

(१) मेधातिथिः । यज्ञोपवीतकुण्डलयोर्धारणं शरीरसंयोगः । अस्यपर्यालिन्नङ्गेसमुचितःसन्निवेशःसतत्रैवविनियोजनीयः । यथाकुण्डलंकर्णयोरुपवीतंकायइतिकर्णाभरणस्यकुण्डलाख्यत्वात् । कण्ठसक्तस्यसूत्रस्यदक्षिणबाहूद्धारणेनोपवीतत्वात् । दृष्टप्रयोजनत्वाच्चयष्ट्यादिनासर्वदाङ्गसङ्गः । तथाहियष्टिधारणंश्रान्तस्यावलंबनार्थंसंमुखागतघातकगवादिनिवारणार्थंच । उद्धृतोदकेनशौचस्यविहितत्वात् । आचारापेक्षयाकमण्डलुर्नियम्यते । सचतुल्यकार्यत्वात् कलशादीन्निवर्तयति नकुण्डलकटकादीन् । अतश्चपुरीषनिमित्तस्योदकशोध्याशुचित्वापनोदार्थं सोदकत्वंकमण्डलोः उक्तंच । मुहूर्तमपिशक्तिविषयंनाशुचिस्तिष्ठेदिति । शक्तिविषयइति । यदिपूर्वगृहीतमुदकमुपयुक्तमन्यथाप्राप्तमशुचित्वंनिमित्तंच श्लेष्मनिष्ठीवनाद्युत्पन्नं तत्रोदकालाभादशुचित्वस्थानेनदोषः । तथाचमूत्रपुरीषविस्रंसनेस्नानंवक्ष्यति । विनाद्भिरप्सुतर्पेतशारीरंसंनिषेव्यतु । सचैलोबहिराप्लुत्येति शुचिश्चस्मृत्यन्तरे प्रतिपदमाम्नातः । एवंहस्माह भगवान्वसिष्ठः अप्सुपाणौचकाष्ठेचकथितःपावकःशुचिः । तस्मादुदकपाणिभ्यांपरिमृज्यकमण्डलुं ॥ पर्यग्निकरणंहोमंमनुराहप्रजापतिः । कृत्वाचावश्यकार्याणिआचामेच्छौचवित्तमः ॥ बौधायनेनोक्तं । अथकमण्डलुंधार्यमित्युपक्रम्य । तंस्माच्छौचंततःकृत्वापरिमृज्यकमण्डलुं । पर्यग्निकरणंह्यतयद्वेस्तुपरिमार्जनं ॥ तथा कमण्डलुंपरिहरेत्पूर्वावस्थोप्यशौचतः । नचैनंकुत्सयेद्विद्वान्नशङ्केन्नचदूषयेत् ॥ आकार-

विशेषनिमित्तश्चायंशब्दोनजातिमाद्रियते । अतोमृन्मयस्यसौवर्णस्यराजतस्यवाएषैवशुद्धिर्नप्रकृतिजातिसंबन्धिनी । मूत्रादिस्पर्शेतुप्रकृतिजातिशुद्धिरवधेया हस्तमार्जनंतूच्छिष्टपुरुषसंस्पर्शाद्यशुचित्वात् । तथाचगौतमः क्वचिच्छौचार्थसंनिधायेत्याह । अतइहापिसंनिधानमेवाभिप्रेतं नत्वात्मनाग्रहणं वेदोदर्भमुष्टिस्तस्यचप्राणोपस्पर्शनंदर्भैरित्यादिप्रयोजनं । अतश्चादृष्टार्थानांसार्वकालिकशरीरसंबन्धोदृष्टार्थानांतु संनिधिर्नित्यंप्रयोजनंवस्तुग्रहणमिति । शुभेदर्शनीयेआकारतःताप्छेदकषैश्चसुवर्णशुध्या ॥ ३६ ॥

(२) **सर्वज्ञनारायणः** । यष्टिंदण्डं । सोदकं नरिक्तं । यज्ञोपवीतमित्येकत्वमविवक्षितं । स्नातकंप्रति यज्ञोपवीते द्वे यष्टिरिति विधानात् । वेदमैष्टिकवेदप्रतिकृतिकुशमयींयष्टिरस्थां । शुभे निर्मले ॥ ३६ ॥

(३) **कुल्लूकः** । वेणुदण्डमुदकसहितंच कमण्डलुम् । यज्ञोपवीतंकुशमुष्टिंशोभनेचसौवर्णकुण्डले धारयेत् ॥ ३६ ॥

(४) **राघवानन्दः** । किंच वैणवीमिति । वैणवीमित्यादिपञ्चकंयथायोगंदृष्टादृष्टार्थं । कमण्डलुं काष्ठभवंजलपात्रं । वेदोत्र कुशमुष्टिः वेदंकृत्वा वेदिंकरोतीतिश्रुतेः । रुक्मं सुवर्णं शुभे दर्शनीये ॥ ३६ ॥

(५) **नन्दनः** । वेदंदर्भपुञ्जम् ॥ ३६ ॥

(६) **रामचन्द्रः** । यज्ञोपवीतंधारयेत् वेदं दर्भमुष्टिं धारयेत च पुनः शुभेरौक्मे कुण्डले धारयेत् ॥ ३६ ॥

नेक्षेतोद्यन्तमादित्यं नास्तंयान्तंकदाचन ॥ नोपसृष्टं न वारिस्थं न मध्यंनभसोगतम् ॥ ३७ ॥

(१) **मेधातिथिः** । उपसृष्टोग्रहोपरक्तः । उदकेप्रतिबिम्बितोवारिस्थः । नभःअन्तरिक्षंतस्यमध्यगतंपश्येन्नमध्यान्हकाले ॥ ३७ ॥

(२) **सर्वज्ञनारायणः** । उपसृष्टंराहुणा गृहीतं । स्नानार्थे तद्दर्शने तुसङ्कन्न दोषः दृष्ट्वा स्नायादितिविधानात् । वारिस्थंजलप्रतिबिम्बितं मध्यगतंमध्यान्हकाले ॥ ३७ ॥

(३) **कुल्लूकः** । उद्यन्तमस्तंयन्तंच सूर्यबिम्बंसंपूर्णंनेक्षेत । उपसृष्टंग्रहोपरक्तम् वक्रा*द्युपसर्गयुक्तंच वारिस्थंजलप्रतिबिम्बितम् नभोमध्यगतंमध्यंदिनसमये ॥ ३७ ॥

(४) **राघवानन्दः** । किंच नेति । आदित्येक्षणमुदयादिपञ्चस्थलेषु समावर्तनपर्यन्तंनकार्यमिति संकल्पंब्रह्मचारीकुर्यादित्यर्थः । अथब्रह्मचारिणोव्रतमिति कल्पसूत्रकारेण धृतत्वात् । पर्युदासविधिरेवायंअतएव दर्शादग्नीषोमीयमन्त्रस्येवस्नातकप्रकरणात्उत्कर्षइति । उपसृष्टंराहुणा न मध्यंनभसोगतं अभिजिदाख्यम् । स्नातकस्य निषेधमात्रं तेषु दर्शनेमुख्यब्रह्मचारिणोव्रतच्युति रिति भेदः । भास्करालोकनाश्लीलेति ब्रह्मचारिप्रकरणे याज्ञवल्क्योक्तेः ॥ ३७ ॥

(५) **नन्दनः** । उपस्पृष्टंराहुग्रस्तम् ॥ ३७ ॥

(६) **रामचन्द्रः** । उदयमानं आदित्यं नेक्षेत नपश्येत् । उपसृष्टं राहुग्रस्तं वारिस्थंच पुनः नभसो मध्ये गतं आदित्यं नेक्षेत ॥ ३७ ॥

न लङ्घयेद्वत्सतन्त्रीम् न प्रधावेच्च वर्षति ॥ न चोदके निरीक्षेत स्वंरूपमिति धारणा ॥ ३८ ॥

(१) **मेधातिथिः** । वत्सबन्धनार्थारज्जुर्वत्सतन्त्री वत्सपङ्क्तिर्वा तांनलङ्घयेन्नापक्रामेत् । तथाचगौतमः । नोपरिवत्सतन्त्रींगच्छेत् । स्वरूपंशरीरसंस्थानं स्वग्रहणात्परस्यरूपप्रेक्षणं नपर्युदस्यते । इतिधारणा । एषनिश्चयःशास्त्रेषु ॥ ३८ ॥

* वक्रा=रम्भा (अ)

(२) सर्वज्ञनारायणः । वत्सतन्त्रीं गोवत्सबन्धनदाम वर्षति त्वोपरि मेघे । धारणानिश्चयः ॥ ३८ ॥

(३) कुल्लूकः । वत्सबन्धनरज्जुं न लङ्घयेत वर्षति मेघे न धावेत् नच स्वदेहप्रतिबिम्बंजले निरीक्षेतेतिशास्त्रे निश्चयः ॥ ३८ ॥

(४) राघवानन्दः । वत्सतन्त्रीं तद्बन्धनरज्जुं । स्वरूपंस्वदेहम् ॥ ३८ ॥

(६) रामचन्द्रः । वत्सतन्त्रीं वत्सबन्धनरज्जुं न लङ्घयेत् च पुनः वर्षति सति न प्रधावेत् । च पुनः उदके स्वरूपंप्रतिबिम्बं न निरीक्षेत । इति धारणा मर्यादा ॥ ३८ ॥

मृदं गां दैवतं विप्रं घृतं मधु चतुष्पथम् ॥ प्रदक्षिणानि कुर्वीत प्रज्ञातांश्च वनस्पतीन् ॥ ३९ ॥

(१) मेधातिथिः । प्रस्थितस्याभिमुखागतान्मृदादीन्प्रत्ययविधिः । मृदादयोयेनदक्षिणोहस्तःतेनकर्तव्याः । उद्धृताचमृद्देवंकर्तव्या । एवंहिशास्त्रान्तरं प्रस्थानाधिकारेपठति । प्रदक्षिणमावर्तेतिदैवतंपटादिलिखितं अर्चा । गौतमस्तु देवतायतनानि समदक्षिणमनुवर्तेतेनिपठति । लोकप्रसिध्याचतुर्भुजमार्तण्डागारादिदेवतायतनंविज्ञेयं । यज्ञगृहाणिचेतिवक्ष्यति । मधुघृतमहावर्यानसारघमङ्गल्यमध्यपाठाच । प्रज्ञातावनस्पतयोमहाप्रमाणाःप्रसिद्धा वनस्पतयोमहावृक्षाःप्रमाणतःपुष्पफलातिशयतोवाप्रसिद्धा उदुम्बरादयः । ऊर्ध्वाउदुम्बरइत्यर्थवादः । येतुगुणाधिकान्प्रज्ञातानाचक्षते तेनिर्मूलप्रसिद्धिमात्रप्रमाणकाउपेक्षणीयाः ॥ ३९ ॥

(२) सर्वज्ञनारायणः । मृदमुद्धृत्य स्थापितां दैवतंदेवतार्चनं । प्रदक्षिणानि कुर्वीत तान् दक्षिणपार्श्वे कृत्वा गच्छेत् । प्रज्ञातानप्रसिद्धान् । ग्रामादिषु प्रधानवृक्षान् ॥ ३९ ॥

(३) कुल्लूकः । प्रस्थितःसन् संमुखावस्थितानुद्धृतमृत्तिकागोपाषाणादिदेवताब्राह्मणघृतक्षौद्रचतुष्पथमहाप्रमाणज्ञातवृक्षान्दक्षिणहस्तमार्गेण कुर्यात् । प्रदक्षिणानीति नपुंसकमनपुंसकेनैकवचास्यान्यतरस्यामितिनपुंसकत्वम् ॥ ३९ ॥

(४) राघवानन्दः । मृदं पुञ्जीकृत्य स्थापिताम् । दैवतं ग्रामाध्यक्षादेवतां । प्रज्ञातान् प्रमाणसिद्धान् प्रदक्षिणानि कुर्वीत पथि प्रस्थितइति शेषः ॥ ३९ ॥

(५) नन्दनः । मृदंपरेणानीयमानां मृत्कूटंवा । दैवतंदेवताप्रतिमाम् । प्रज्ञातान्प्रसिद्धान् ॥ ३९ ॥

(६) रामचन्द्रः । मृदङ्गादीनि प्रदक्षिणानिकुर्वीत कुर्यात् ॥ ३९ ॥

नोपगच्छेत्प्रमत्तोऽपि स्त्रियमार्तवदर्शने ॥ समानशयने चैव न शयीत तया सह ॥ ४० ॥

(१) मेधातिथिः । प्रमत्तःकामशरैःपीडितोपि । आर्तवंस्त्रीलिङ्गशोणितं मासिमासिप्रसिद्धं तद्दर्शने न गच्छेत् । एकस्यांचशय्यायां तयासहनशयीतस्पर्शप्रतिषेधादेवतत्सिद्धमितिचेन्नायंप्रतिषेधः । व्रतमिदंप्रायश्चित्तभेदश्च ॥ ४० ॥

(२) सर्वज्ञनारायणः । प्रमत्तोतिकामार्तोपि ॥ ४० ॥

(३) कुल्लूकः । प्रमत्तःकामार्तोऽपि रजोदर्शने निषिद्धस्पर्शदिनत्रये स्त्रियंनोपगच्छेत् । स्पर्शनिषेधेनैव तासामाद्याश्चतस्रइतिनिषेधसिद्धौ प्रायश्चित्तगौरवार्थंस्नातकव्रतत्वार्थंच पुनरारम्भः । न चागच्छन्नपि तया सहैकशय्यायांसुप्यात् ॥ ४० ॥

(४) राघवानन्दः । उदक्यागमनंहि लोकक्षयविनाशकमित्याह नोपगच्छेदिति । स्त्रीभिर्गमनेच्छाभावेपि न शयीत स्पर्शाशङ्कया । पात्रेचोदकांतितिस्रोरात्रीर्व्रतंचरेत्अञ्जलिना वापिबेदिति श्रुतेः । अञ्जलिनोदकसंबन्धादिति ॥ ४० ॥

(५) नन्दनः । प्रमत्तः प्रकर्षेण कामपीडितः ॥ ४० ॥

(६) रामचन्द्रः । प्रमत्तोपि आर्तवदर्शने ऋतुमतींस्त्रियंनोपगच्छेत् तयाऋतुमत्या सह समानशयने एकशय्यायांन शयीत ॥ ४० ॥

रजसाभिप्लुतां नारीं नरस्य ह्युपगच्छतः ॥ प्रज्ञा तेजोबलं चक्षुरायुश्चैव प्रहीयते ॥ ४१ ॥

(१) मेधातिथिः । रजःपूर्वोक्तमार्तवं अभिप्लुतांतेनसंबद्धां । पूर्वस्यार्थवादः ॥ ४१ ॥

(२) सर्वज्ञनारायणः । तेजोब्रह्मवर्चसम् ॥ ४१ ॥

(३) कुल्लूकः । यस्माद्रजस्वलांस्त्रियंपुरुषस्योपगच्छतः प्रज्ञावीर्यबलचक्षुरायूंषि नश्यन्ति तस्मात्तांनोपगच्छेत् ॥४१॥

(४) राघवानन्दः । यस्मात्तेजोवेदजंप्रहीयते ॥ ४१ ॥

(६) रामचन्द्रः । रजसाभिप्लुतां नारीं ऋतुमतीं । तेजःप्रज्ञादि प्रहीयते ॥ ४१ ॥

तां विवर्जयतस्तस्य रजसा समभिप्लुताम् ॥ प्रज्ञा तेजोबलं चक्षुरायुश्चैव प्रवर्धते ॥ ४२ ॥

(१) मेधातिथिः । वृद्धिवचनंस्तुतिरेव ॥ ४२ ॥

(२) सर्वज्ञनारायणः । तांविवर्जयतइति मांसाद्यभक्षणइव निवृत्तिरत्रापि फलवतीति दर्शितम् ॥ ४२ ॥

(३) कुल्लूकः । तांतु रजस्वलामगच्छतस्तस्य प्रज्ञादयोवर्धन्ते तस्मात्तांनोपेयात् ॥ ४२ ॥

(४) राघवानन्दः । श्रुतेरपि निषेधे तात्पर्यंतदकुर्वतः प्रजावृत्त्यद्यादर्शनात् । रजसा ऋतुकालजयोनिरक्तेनआप्लुतां युक्ताम् ॥ ४२ ॥

(६) रामचन्द्रः । तां रजसाभिप्लुतां वर्जयतस्तस्य प्रज्ञादिकंवर्धते ॥ ४२ ॥

नाश्नीयाद्भार्यया सार्धं नैनामीक्षेत चाश्नतीम् ॥ क्षुवतीं जृम्भमाणां वा न चासीनां यथासुखम् ॥ ४३ ॥

(१) मेधातिथिः । नित्यमास्यंशुचिस्त्रीणामितिशुचित्ववचनंस्त्रीशूद्रोच्छिष्टमितिचप्रतिषेधद्वयमपिविषयविभागेनव्यवस्थितं । तत्रशुचित्ववचनं स्त्रियश्चरतिसंसर्गइतिस्मृत्यन्तरदर्शनेनरतिस्त्रीविषयंविज्ञायते । अतःप्रतिषेधोपिपरिशेष्यादरतिस्त्रीषु मातृभगिन्यादिषुद्रष्टव्यः । यतोरतिर्नेहप्रीतिमात्रंकिंतर्हिमन्मथनिमित्तोभावविशेषइतिशृङ्गारपूर्वकोभिलाषादिरूपः । अतस्तद्युक्तासुशुचित्वं विपरीतासुप्रतिषेधः । रतिनिमित्तार्थतयाभार्ययासहभोजनेप्राप्तेवचनमिदमारभ्यते । नाश्नीयाद्भार्ययासार्धमिति । अथसंसर्गग्रहणेनवृषस्यतोसंप्रयोगविशेषःकथ्यते । तदानींपरिचुम्बनदिवशुचित्वमितिनास्तिभार्ययासहभोजनप्राप्तिः । तत्रेदंपुनर्वचनंव्रतज्ञापनार्थम् । ततश्चयावज्जीविकःसंकल्पःकर्तव्योयथाभार्ययासहभोजनंनभवति । एतच्चसहभोजनमेकाधिकरणमेककालदेशं नञर्थविषयतयाचोद्यतइतिगत्वोच्छिष्टप्रतिषेधगतार्थशङ्केति । सपुनरयमीदृशःसहार्थविशेषःप्रमाणान्तरतःस्मृत्यन्तरमाचारादेरशेषशब्दार्थोह्यन्यापेक्षितमात्रं । तथाचेतरानपि सख्यादीन्भोजयेत्सहभार्ययेति । नात्रैकाधिकरणताभुजेरवगम्यते । किंतर्हिभार्ययासमानदेशताभोक्तुःसमानकालतावा अन्येत्वन्यदुच्छिष्टमितिव्याचक्षते भुक्तोज्झितमुच्छिष्टमेकस्यांतुपत्न्यांएकस्मिन्कार्येसहभोजनं । एवंतुव्याख्यायमानेशूद्रेणसहभोजनंप्रतिषिद्धंस्यात् । प्रतिषिद्धिश्चत्यक्ताभवेत् । अस्यसंस्पर्शादुच्छिष्टव्यवहारःसहभोजनेनापितेष्वस्ति । केचित्तुसमानदेशकालमे-

---

(४२) प्रज्ञातेजोबलंचक्षु=प्रज्ञालक्ष्मीर्यशश्चक्षु (ञ, ट, ठ, य)

वभोजनमप्रतिषिद्धं दृष्टार्थत्वादुपदेशस्येति । पुंसांस्वभावभेदात्कश्चिद्बहुभोजिन्यानतुष्येत् अन्यःस्वल्पभोजिन्यामपिविश्रं-भयतीतिछद्मनावर्तते । ममपुरतःस्वल्पमश्नातिइति । तथासदृशाएवमन्येपिनियमाः । नैनामीक्षेतचाश्नतींपश्यतांहिभुञ्जाना-विवृतास्यतयारूपविकारेणभर्त्रेनरोचेत । क्षवथुःशिरस्थेनवायुनापूर्यमाणायानासिकायाःशब्दस्तत्रापिवक्त्रवैकृत्यात्प्रीति-र्नस्यात् । जृम्भमाणास्येनविलम्बितंवायोरुच्छ्वसनसङ्गप्रत्यङ्गप्रसारणंवातदप्येवमेवयथासुखंचासीनाअनवग्रथितकेशीभमौ-निपतितगात्रीवा ॥ ४३ ॥

(२) सर्वज्ञनारायणः । सार्धमेकपात्रे क्षुवतींक्षुतंकुर्वतीं आसीनांयथासुखंदेहसंवरणादिशून्याम् ॥ ४३ ॥

(३) कुल्लूकः । भार्यया सहैकपात्रे नाश्नीयात् । एनांच भुञ्जानांक्षुतंजृम्भांच कुर्वतींयथासुखंनिर्यन्त्रणप्रदेशाव-स्थितांच नेक्षेत ॥ ४३ ॥

(४) राघवानन्दः । स्वभार्याविषयेपि नाश्नीयादित्यादि नवकंनिषेधति नेतिद्वाभ्यां । क्षुवतीं क्षुतंकुर्वतीम् । रहस्य-देशेआसीनाम् ॥ ४३ ॥

(६) रामचन्द्रः । भार्यया सार्धं नाश्नीयात् स्त्रियंअश्नन्तीम् भोजनंकुर्वतीं नेक्षेत क्षुतंकुर्वतीं यथासुखंआसीनांने-क्षेत ॥ ४३ ॥

नाञ्जयतीं स्वके नेत्रे न चाभ्यक्तामनावृताम् ॥ न पश्येत्प्रसवन्तीं च तेजस्कामो द्विजोत्तमः ॥ ४४॥

[उपेत्य स्नातकोविद्वान्नेक्षेन्नग्नां परस्त्रियम् । सरहस्यंच संवादं परस्त्रीषु विवर्जयेत् ॥ १॥ ‡]

(१) मेधातिथिः । परस्याञ्जयन्तींशोभतएवअनावृतांअपावृतवसनांअवगुण्ठितामेवहि विशेषेणस्पृहयंतींनिर्वसना-ङ्गीं निपुणतरंवक्ष्यमाणांनं सर्वतःसर्वासुसंस्थानाभवतीति निरम्बरावेक्षणीया । तेजस्कामःतेजःवर्णोज्वलताउत्साहप्रयो-गश्च ॥ ४४ ॥

(२) सर्वज्ञनारायणः । तैलाद्यभ्यक्तामनावृतांन पश्येदावृतायांत्वदोषः । प्रस्रवन्तींपुत्रंपाययन्तीम् ॥ ४४ ॥

(३) कुल्लूकः । तथा स्वनेत्रयोरञ्जनंकुर्वतींतैलाद्यभ्यक्तांअनावृतांस्तनावरणरहितांनतु नग्नाम् । नग्नांनेक्षेत च स्त्रि-यमितिवक्ष्यमाणत्वात् । अपत्यंच प्रसवन्तींब्राह्मणो न निरीक्षेत ॥ ४४ ॥

(४)राघवानन्दः । अभ्यक्तांतैलादिना अनावृतां अदर्शनीयदेशान्मुक्तवस्त्रां । निषेधस्य दृष्टंफलं एतेषु वैरूप्यदर्श-नेन वैराग्यसंभावनयानिवृत्तिः ॥ ४४ ॥

(६) रामचन्द्रः । नेति तेजस्कामो द्विजः अञ्जयन्तींस्वके नेत्रे नेक्षेत । अभ्यक्तां तैलाभ्यक्तां अनावृतां वस्त्रैः प्रस्रवन्तीं पुत्रंस्तनंपाययन्तीं नेक्षेत ॥ ४४ ॥

[रामचन्द्रः । उपेत्येति उपेत्य स्नातकः विद्वान्नग्नां परस्त्रियं नेक्षेत ॥]

नान्नमद्यादेकवासा न नग्नः स्नानमाचरेत् ॥ न मूत्रं पथि कुर्वीत न भस्मनि न गोव्रजे ॥ ४५ ॥

(१) मेधातिथिः । सत्यपियज्ञोपवीतेनित्यानुगतत्वात्तस्यअनाच्छादकत्वादुपनयनविधेर्देनोपदेशात् एकवासाअ-न्योन्यच्छादकाद्द्वितीयंवासोभोजनकालेस्यात् । नमूत्रंमूत्रग्रहणमत्रोत्सर्गस्योपलक्षणार्थं । पथिरथ्यायांगोव्रजे । येनयत्रवागा-वश्चरितुंव्रजन्ति ॥ ४५ ॥

---

‡ (क, ख, ण, त)

(२) सर्वज्ञनारायणः । एकवासानग्नोवा नान्नमद्यान्न च स्नायादित्यर्थः । नमूत्रमितिविष्ठाविसर्गस्यापि निषेधः न्यायसामान्यात् । एवंमेहतइत्यत्रापि ॥ ४५ ॥

(३) कुल्लूकः । एकवस्त्रोनान्नंभुञ्जीत । उपस्थाच्छादनवासोरहितोन स्नायात् । मूत्रग्रहणमधःकायमलविसर्गोपलक्षणार्थम् । तेन मूत्रपुरीषे वर्त्मनि भस्मनि गोष्ठे च न कुर्यात् ॥ ४५ ॥

(४) राघवानन्दः । किंच नेति । मूत्रपदं पुरीषस्याप्युपलक्षणं अमेध्यत्वाविशेषात् ॥ ४५ ॥

(६) रामचन्द्रः । एकवासा अन्नं नाद्यात् नभक्षयेत् ॥ ४५ ॥

न फालकृष्टे न जले न चित्यां न च पर्वते ॥ न जीर्णदेवायतने न वल्मीके कदाचन ॥ ४६ ॥

(१) मेधातिथिः । चित्यां अग्न्यर्थइष्टकाकूटेपर्वतग्रहणं अरण्योद्यानोपलक्षणार्थं तथाहिविशेषप्रतिषेधोभविष्यति । पर्वतमस्तकइतिसामान्येनचइतिप्रतिषेधः । पर्वतवासिनाममेहनप्रसङ्गः । वल्मीकः कृमिकृतोमृत्तिकासञ्चयः ॥ ४६ ॥

(२) सर्वज्ञनारायणः । नपर्वतेपर्वतोपत्यकायां न जीर्णदेवायतनइति जीर्णे शीर्णप्राकारादौ तथा देवतायतने-चेत्यर्थः ॥ ४६ ॥

(३) कुल्लूकः । तथा फालकृष्टे क्षेत्रादावुदकेऽग्न्यर्थकृतेष्टकाचये पर्वते चिरंतनदेवतागारे कृमिकृतमृत्तिकाचये च विण्मूत्रोत्सर्गन कदाचन कुर्यात् ॥ ४६ ॥

(४) राघवानन्दः । चित्यां अग्निदग्धेष्टकाचये श्मशाननिषेधेन शवदाहचितेर्निषेधात् । वल्मीकस्य सदासत्वेनकदाचनेत्युक्तम् ॥ ४६ ॥

(६) रामचन्द्रः । फालकृष्टे हलोत्कृष्टे क्षेत्रेमूत्रपुरीषे न कुर्यात् ॥ ४६ ॥

न ससत्वेषु गर्तेषु न गच्छन्नापि च स्थितः ॥ न नदीतीरमासाद्य न च पर्वतमस्तके ॥ ४७ ॥

(१) मेधातिथिः । नगच्छन्नापिसंस्थितः । गच्छतस्तिष्ठतश्चप्रतिषेधादासीनस्याभ्यनुज्ञानं । नचासनेनद्यास्तीरेनदीजलेनसंसर्गशङ्कायत्रभवति तथासन्नपर्वतस्यमस्तकशृङ्गम् ॥ ४७ ॥

(२) सर्वज्ञनारायणः । स्थितउत्थितः । आसाद्याप्यन्तासन्नंकृत्वा पर्वतमस्तके अधित्यकायां । अफालकृष्टइत्यादिश्लोकद्वयं कैश्चिन्नलिखितम ॥४७ ॥

(३) कुल्लूकः । तथा सप्राणिषुबिलेषु न व्रजन्न चोत्थितोन नदीतटमाश्रित्य नापि पर्वतशृङ्गे मूत्रपुरीषे कुर्यात् पर्वतनिषेधादेव तच्छृङ्गनिषेधे सिद्धे पुनःपर्वतशृङ्गनिषेधस्तदितरपर्वते विकल्पार्थः तत्रेच्छाविकल्पस्यान्यथापि प्राप्तौ सामान्यनिषेधवैयर्थ्याद्व्यवस्थितोऽत्र विकल्पःअत्यन्तार्तस्य पर्वते न दोषः ॥ ४७ ॥

(४) राघवानन्दः । न ससत्वेषु प्राणियुक्तेषु । स्थितः । ऊर्ध्वमिति शेषः । पर्वतवासिनांतत्त्यागासंभवेन पर्वतमस्तकग्रहणमत्यन्तनिषेधार्थम् ॥ ४७ ॥

(६) रामचन्द्रः । द्वाभ्यामाह नेति ससत्वेषु सजीवेषु गर्तेषु विण्मूत्रस्य विसर्जनं न कुर्यात् ॥ ४७ ॥

वाय्वग्निविप्रमादित्यमपः पश्यंस्तथैव गाः ॥ न कदाचन कुर्वीत विण्मूत्रस्य विसर्जनम् ॥ ४८ ॥

(१) मेधातिथिः । संमुखीनत्वाद्वाय्वादीनामङ्गविप्रेक्षितेनापिनमूत्रयम्पश्येत् । वायोश्चारूपत्वाद्दर्शनंतत्प्रेरितवर्णलो-

---

(४६) कदाचन=नशाद्वले (ड, ढ,)

ष्टादिभ्रमणादवसेयं । वाक्यचक्रेत्वयंप्रतिषेधोविप्रयुक्तः । सर्वतोहिवायुर्वाति ॥ ४८ ॥

(२) **सर्वज्ञनारायणः** । वाय्वग्निविप्रमित्यादिना तत्संमुखतयाऽवश्यकर्मनिषेधः । वायुंपश्यन्प्रत्यक्षीकुर्वन् संमुखागच्छद्वातत्स्थानइत्यर्थः ॥ ४८ ॥

(३) **कुल्लूकः** । वायुमग्निंब्राह्मणंसूर्यंजलंगांच पश्यन्न कदापि मूत्रपुरीषोत्सर्गंकुर्यात् । वायोररूपत्वेनदर्शनासंभवे वात्या प्रेरिततृणकाष्ठादिनिषेधोऽयम् ॥ ४८ ॥

(४) **राघवानन्दः** । वाय्वादिगवान्तानष्टप्रश्यन्न मेहेतेत्यन्वयः ॥ ४८ ॥

तिरस्कृत्योच्चरेत्काष्ठलोष्ठपत्रतृणादिना ॥ नियम्य प्रयतोवाचं संवीताङ्गोऽवगुण्ठितः ॥ ४९ ॥

(१) **मेधातिथिः** । अस्यार्थवादः । तिरस्कृत्यांतर्धायकाष्ठादितदुपरिमूत्रयेत् । आवरणंतिरस्कारः काष्ठादिभिर्भूमिं छादयित्वोच्चरेत् । तृतीयान्तपाठस्तदास्पष्टपरः काष्ठैःपत्रेणतृणेनवाभ्युच्चरेत् । मूत्रंपुरीषंचोत्सृजेत् । नियमोविधानं । प्रयतः-अनुच्छिष्टःसंवीताङ्गःआच्छादितशरीरःअवगुण्ठितःशिरःप्रावृत्य । अन्यत्रोक्तं कर्णस्थब्रह्मसूत्रेतिमूत्रोच्चारमुत्सर्गंत्यागम ॥ ४९ ॥

(२) **सर्वज्ञनारायणः** । तिरस्कृत्य भूम्याच्छादनंकृत्वा नियम्यवाचं मौनी प्रयतःशुचिःसंवीताङ्गोवस्त्रावृताङ्गः । अवगुण्ठितः प्रच्छादितशिराः ॥ ४९ ॥

(३) **कुल्लूकः** । अन्तर्धाय काष्ठादिना भूमिमवागनुच्छिष्टःप्रच्छादिताङ्गोऽवगुण्ठितशिरामूत्रपुरीषोत्सर्गंकुर्यात । शुष्कैस्तृणैर्वा काष्ठैर्वा पर्णैर्वेणुदलेन वा । मृन्मयैर्भाजनैर्वापि अन्तर्द्धाय वसुंधरामितिवायुपुराणवचनात् । शुष्काणि काष्ठपत्रतृणानि ज्ञेयानि ॥ ४९ ॥

(४) **राघवानन्दः** । विण्मूत्रयोस्त्यागस्यरागतः प्राप्तिमनूद्य तत्रेतिकर्तव्यतामाह । तिरस्कृत्येतित्रिभिः तिरस्कृत्य काष्ठादिभिरन्तधार्य । संविताङ्गसंवृतकरचरणः । अवगुण्ठितोवस्त्राद्याच्छादितः ॥ ४९ ॥

(५) **नन्दनः** । तिरःशब्देनात्र तिरोधानसाधनंविवक्षितम् । काष्ठंतिरस्कृत्यकाष्ठंभूमेस्तिरोधानसाधनंकृत्वेत्यर्थः । उच्चारः पुरीषोत्सर्जनं । मूत्रस्याप्युपलक्षणमेतत् ॥ ४९ ॥

(६) **रामचन्द्रः** । पुरीषोत्सर्गमाह तिरस्कृत्येति । काष्ठंवा पत्रं लोष्टं तृणानि वा तिरस्कृत्य प्रसार्य उच्चरेत् पुरीषंकुर्यात् वाचंनियम्य संप्रवीताङ्गः अवगुण्ठिताङ्गः शिरोवेष्टनंकुर्यात् ॥ ४९ ॥

मूत्रोच्चारसमुत्सर्गंदिवा कुर्यादुदङ्मुखः ॥ दक्षिणाभिमुखोरात्रौ सन्ध्ययोश्च यथा दिवा ॥ ५० ॥

(२) **सर्वज्ञनारायणः** । अतःसन्ध्ययोश्च यथादिवेतिचतुर्थपादस्थाने स्वस्थोऽनाशायचेतसइतिक्वचित्पाठः । चेतसोबुद्धेरनाशाय ॥ ५० ॥

(३) **कुल्लूकः** । मूत्रपुरीषोत्सर्गमहनि सन्ध्ययोश्चोत्तराभिमुखोरात्रौ चेद्दक्षिणामुखःकुर्यात् । धरणीधरस्तु स्वस्थोऽनाशाय चेतसइति चतुर्थपादंपठित्वा चेतसोबुद्धेरनाशायेतिव्याख्यातवान् । परंपरीयमाम्नायंहित्वा विद्वद्भिरादृतम् । पाठान्तरंव्यरचयन्मुधेह धरणीधरः ॥ ५० ॥

(४) **राघवानन्दः** । उत्सर्गमलत्यागः ॥ ५० ॥

(५) **नन्दनः** । अनेन दिङ्नियमेन सूर्यादिज्योतिषामाभिमुख्यमलिन्कर्मणि निवार्यते ॥ ५० ॥

(६) **रामचन्द्रः** । सन्ध्ययोर्यथा दिवा उदङ्मुखः कुर्यात् ॥ ५० ॥

छायायामन्धकारे वा रात्रावहनि वा द्विजः ॥ यथासुखमुखः कुर्यात्प्राणबाधाभयेषु च ॥ ५१ ॥

(१) **मेधातिथिः** । छायाकुड्यकपाटादिभिः । सूर्यरश्मीनामावरणं । अन्धकारःमेघधूमिकास्वर्भानुरात्रिभूतोज्योतिरन्तरायोयथासुखमुखमस्येति यथाहि प्राङ्मुखंभवति तस्यामेवोच्चरेत् । यत्रदिग्भागोनज्ञायते अन्धकारेतत्रायंविधिः प्राणाबाधःप्राणपूजा भयंचौरादिकृतं केचिदिमंश्लोकमस्मिन्नध्याये नाधीयते ॥ ५१ ॥

(२) **सर्वज्ञनारायणः** । छायायांगृहमेघादिछायायांअन्धकारे महान्धकारे प्राणाबाधे तदकरणे व्याध्युत्पत्तौ मुखनियमस्य वासंभवे एवंभये चौरादिभये एषु चतुर्षु रात्रावहनि च न मुखनियमोस्तीत्यर्थः ॥ ५१ ॥

(३) **कुल्लूकः** । रात्रौ छायायामन्धकारे वाऽहनि च्छायायांनीहाराद्यन्धकारेवा दिग्विशेषाज्ञाने सति चौरव्याघ्रादिकृतप्राणविनाशभयेषु च यथेप्सितमुखोमूत्रपुरीषे कुर्यात् ॥ ५१ ॥

(४) **राघवानन्दः** । छायायां छायोपजीववृक्षस्य । प्राणबाधे व्याघ्रादिकृतभये ॥ ५१ ॥

(५) **नन्दनः** । यतइदमाह च्छायायामिति । छायायांमूत्रपुरीषयोः कर्मवर्जयेदिति स्मृत्यन्तरेदर्शनात् । छायाशब्देन वर्जनीयोदुर्दिनपर्वतादिना महता व्यवधाने सूर्यस्य दिवातिरोभावोविवक्षितः । अन्धकारशब्देन रात्रौ ज्योतिषाम् । कुर्यान्मूत्रोच्चारसमुत्सर्गमित्येव ॥ ५१ ॥

(६) **रामचन्द्रः** । छायायां गृहमेध्यादिछायायां प्राणबाधभयेषु च यथासुखंकुर्यात् ॥ ५१ ॥

प्रत्यग्निंप्रतिसूर्यंच प्रतिसोमोदकद्विजान् ॥ प्रतिगांप्रतिवातंच प्रज्ञा नश्यति मेहतः ॥ ५२ ॥

(१) **मेधातिथिः** । अस्यार्थवादः । ननुचोदङ्मुखस्यमेहनविधानात्पूर्वस्यामुदयाच्चसूर्यस्यकुतस्तदाभिमुख्यंभवेद्येनप्रतिसूर्यंनिषिध्यते । अर्थवादोयं । नान्तरिक्षेनदिवीतिवत् । अथवोदगयनेऽदीचींदिशमाक्रमेत् । स्यात्संभवः प्रकृतविषयोवाप्रतिषेधः । प्रतिसन्ध्यमितिपठन्ति तदयुक्तं सन्ध्ययोश्चयथादिवेत्यनुज्ञानाद्वेगधारणस्यात्यन्तनिषिद्धत्वात् । तस्मात्प्रतिवातमितिपठितव्यं । पूर्वशेषोयंमेहतःशत्रंतस्तसन्तोवामेहतःपुरुषस्यमेहनाद्वा ॥ ५२ ॥

(२) **सर्वज्ञनारायणः** । प्रत्यग्नीत्यादिना अग्न्यादीन्पृष्ठभागे कृत्वा मेहनंनिषिद्धम् प्रत्यग्निअग्निप्रातिकूल्येन एवमुत्तरेषु । द्विजोब्राह्मणः । प्रतिगु गांपृष्ठे कृत्वा । क्वचित्प्रतिसन्ध्यमितिपाठः । तत्र सन्ध्योदये पूर्वतोस्तमये पश्चिमे भवतीतिव्यवस्थयाव्याख्या ॥ ५२ ॥

(३) **कुल्लूकः** । वाय्वग्निविप्रमित्यनेन मेहतोऽग्न्यादीनांदर्शनंनिषिद्धम् । अनेन त्वपश्यतोऽपि संमुखीनत्वंनिषिध्यते । अग्निसूर्यचन्द्रजलब्राह्मणगोवाताभिमुखंमूत्रपुरीषे कुर्वतः प्रज्ञा नश्यति तस्मादेतन्नकर्तव्यम् । प्रतिवातमित्यस्य स्थाने प्रतिसंध्यमित्यन्ये पठन्ति ॥ ५२ ॥

(४) **राघवानन्दः** । वाय्वग्निविप्रेत्युक्तंवाय्वादिदर्शननिषेधानुवादेन तत्करणे दोषमाह प्रत्यग्निमिति । प्रतिरत्र लक्षणे । वातं तृणादिसहितं वात्यारूपं तस्यैव दृष्टियोग्यत्वात् एतानभिमुखंकृत्वा मेहतोमूत्रपुरीषे समुत्सृजतः प्रज्ञानश्यतीत्यन्वयः । सोमोत्र लता ॥ ५२ ॥

(५) **नन्दनः** । एतदेव व्यतिरेकेणोपपादयति प्रत्यग्निमिति । अग्न्यादीनामाभिमुख्ये कथितोदोषोनतेषांतिरोभावइत्यभिप्रायः । मेहनमुच्चारस्याप्युपलक्षणम् ॥ ५२ ॥

(६) **रामचन्द्रः** । प्रतिगुं गोः अभिमुखं । प्रतिवातं वायोरभिमुखं । मेहतः मूत्रादि कुर्वतः । प्रज्ञा बुद्धिर्नश्यति॥५२॥

नाग्निमुखेनोपधमेन्नग्नांनेक्षेत च स्त्रियम् ॥ नामेध्यंप्रक्षिपेदग्नौ न च पादा प्रतापयेत् ॥ ५३ ॥

(१) **मेधातिथिः** । धवित्रादिनाग्निर्ध्मातव्यः । नग्नांनेक्षेतस्त्रियम् अन्यत्रमैथुनादितिस्मृत्यन्तरं । नामेध्यंमेध्यो-यज्ञस्तदर्थमेध्यं अमेध्यंयदयज्ञीयं पलाण्डुमूत्रपुरीषादि तन्नाग्नौक्षिपेत् । उत्क्षिप्यसाक्षादग्नौनतापयेत् अवच्छायतापयि-त्वात्स्वेदाद्यर्थमग्नितापनमदोषः ॥ ५३ ॥

(२) **सर्वज्ञनारायणः** । मुख्येन नलिकाद्यनन्तरितेन । ननग्नांस्त्रियमीक्षेतान्यत्र मैथुनादितिगृह्यम् । अमेध्यंमलल्शु-नादि ॥ ५३ ॥

(३) **कुल्लूकः** । नाग्निर्मुखेन ध्मातव्यः किंतर्हि व्यजनादिना । न नग्नांस्त्रियमीक्षेत मैथुनादन्यत्रेतिसांख्यायनदर्श-नान्मैथुनव्यतिरेकेण नग्नांस्त्रियंन पश्येत् । अमेध्यंमूत्रपुरीषादिकंनाग्नौ क्षिपेत् । नच पादौ प्रतापयेत् । प्रशब्दादग्नौ पादावु-त्क्षिप्य साक्षान्न प्रतापयेत् । वस्त्रादितापस्वेदेऽविरोधः ॥ ५३ ॥

(४) **राघवानन्दः** । प्रत्यग्निमितिप्रसंगेनाग्निविषये नियमान्तराण्याह नाग्निमितिद्वाभ्यां । व्यजनादिनाध्मातव्योलौ-किकाग्निः वैदिकाग्निस्तु मुखेनैवेत्यर्थः । स्त्रियमिति । तत्रापि मैथुनादन्यत्रेतिसाङ्ख्यायनगृह्यदर्शनात्तदतिरिक्तकाले ॥५३ ॥

(५) **नन्दनः** । अग्निर्लौकिकाग्निश्चौनाग्निचोपधमेत् । मुखाद्ध्येषोऽभिजायतइतिवचनात् । स्त्रियंस्वभार्यांपरभार्यांच । अमेध्यमशुद्धंवस्तु ॥ ५३ ॥

(६) **रामचन्द्रः** । अथाग्निविधिमाह नाग्निमिति । मुखेन नलिकाद्यृते अग्निं न धमेत् अग्नौ पादौ न प्रतापयेत् ॥ ५३ ॥

अधस्तान्नोपदध्याच्च न चैनमभिलङ्घयेत् ॥ न चैनंपादतः कुर्यान्न प्राणाबाधमाचरेत् ॥ ५४ ॥

(१) **मेधातिथिः** । खट्वास्थः अधस्तावद्वह्निधानींनकुर्यात् । उपधानंस्थानं अवलङ्घनमुत्प्लुत्यगमनं । पादतः-अप्लुतस्यपादौयेनकुर्यात्प्राणाबाधंप्राणपीडाकरमतिश्रमवेगागमनादिनाचरेत् ॥ ५४ ॥

(२) **सर्वज्ञनारायणः** । अधस्तात्स्वारूढखट्वादेः नोपदध्यादग्निं अवलङ्घयेदधःकृत्वा लङ्घयेत् । प्राणाबाधंरोगादि हेतुमत्यन्तायासादि ॥ ५४ ॥

(३) **कुल्लूकः** । खट्वादिभ्योऽधस्तादङ्गारशकल्यादिकंन कुर्यात् । न चाग्निमुत्प्लुत्य गच्छेत् । नच सुप्तःपाददेशेऽग्निं-स्थापयेत् नच प्राणपीडाकरंकर्म कुर्यात् ॥ ५४ ॥

(४) **राघवानन्दः** । अधः खट्वादेः नोपदध्यान्न स्थापयेत् । पादतः पाददेशे । प्राणाबाधं प्राणिहिंसां न कुर्यात् । न हिंस्यात्सर्वाभूतान्यन्यत्रतीर्थेभ्यइति श्रुतेः अग्निसाध्यंप्राणिवधंवा प्रकरणात् ॥ ५४ ॥

(५) **नन्दनः** । पादतः पादप्रसारणापदेशेन । न प्राणाबाधमाचरेदात्मनः परस्य च पीडांनकुर्यात् ॥ ५४ ॥

(६) **रामचन्द्रः** । अधस्तान्नोपदध्यात् पृष्ठस्याधस्तान्नाग्निंदध्यात् । एनं अग्निं न लङ्घयेत् । अग्निं पादतः पा-दस्याधस्तान्न कुर्यात् न प्राणबाधमाचरेत् रोगादिहेतुभूतप्राणबाधं नाचरेत् ॥ ५४ ॥

नाश्नीयात्संधिवेलायां न गच्छेन्नापि संविशेत् ॥ न चैव प्रलिखेद्भूमिं नात्मनोपहरेत्स्रजम् ॥५५॥

(१) **मेधातिथिः** । सन्ध्याकालः सन्धिवेला संवेशनंस्वापः स्वाध्यायंनिषेत्स्यति स्मृत्यन्तरेस्त्रीसंबन्धोपिप्रतिषि-

द्धः। चत्वार्येवतुकर्माणिसन्ध्याकालेतुवर्जयेत्। आहारंमैथुनंनिद्रांतथासंपाठमेवच॥ नचैवप्रलिखेत्प्रकर्षेणलेखनंविदारणं-भूमेर्निषिध्यते। नतुवर्तिकादिनाक्षरविन्यासः नात्मनोपहरेत्स्रजं ग्रथितानिपुष्पाणिस्रक् तां स्वयंकण्ठेशिरसिवा प्रधृतां म्लानतयागुरुत्वेनवात्मनोनव्यपनयेत्। अर्थादन्येनापनयेदित्युक्तंभवति। सर्वएवायंसन्ध्यायांविधिरितिकेचित्॥ ५५॥

(२) सर्वज्ञनारायणः। सन्धिःसन्ध्या। गच्छेदध्वानं। संविशेत् शयीत सन्ध्यायां। प्रलिखेदुत्किरेत् नान्यदपि अपहरेत्अपनयेत् आत्मनःशिरस्तःस्रजम्॥ ५५॥

(३) कुल्लूकः। सन्ध्याकाले भोजनंग्रामान्तरगमनंनिद्रांच न कुर्यात्। नच रेखादिना भूमिमुल्लिखेत्। नच मालां-धृतांस्वयमेवापनयेत् अर्थादन्येनापनयेदित्युक्तम्॥ ५५॥

(४) राघवानन्दः। भोजनादिनिषिद्धकालमाह। सन्धिवेलायां त्रिसन्ध्यादौ न गच्छेत् स्त्रियमपि नसंविशेन्नस्वपे-न्नोपहरेत् स्वयमितिशेषः॥ ५५॥

(५) नन्दनः। नात्मनोपहरेत्स्रजमात्मार्थेस्रजंमालांस्वयंनहरेत्॥ ५५॥

(६) रामचन्द्रः। सन्धिवेलायां सन्ध्यायां नाश्नीयात्। न भोजनं कुर्यात् सन्ध्यायां न गच्छेत् संध्यायांन सं-विशेत्। भूमिं पादनखेन नालिखेत्। आत्मनाशिरसः स्रजंनोपहरेत्॥ ५५॥

नाप्सु मूत्रं पुरीषंवा ष्ठीवनं वा समुत्सृजेत्॥ अमेध्यलिप्तमन्यद्वा लोहितं वा विषाणि वा॥५६॥

(१) मेधातिथिः। लोहितंरुधिरं विषाणीतिबहुवचनं कृत्रिमाकृत्रिमभेदेनस्थावरजङ्गमभेदेनरागादिप्रकारभेदेन वा॥ ५६॥

(२) सर्वज्ञनारायणः। अमेध्यैर्विष्ठादिभिर्लिप्तं काष्ठादि अन्यद्वालशुनादि। लोहितपदंमलान्तरलक्षणम्। विषा-णि परैर्जलस्योदपानार्थम्॥ ५६॥

(३) कुल्लूकः। मूत्रंपुरीषंश्लेष्माणंमूत्राद्यमेध्यलिप्तवस्त्रमन्यद्वा भुक्तोच्छिष्टाद्यमेध्यंरुधिरंविषाणि च कृत्रिमाकृत्रिम-भेदभिन्नानि न जले प्रक्षिपेत्॥ ५६॥

(४) राघवानन्दः। आपो वै सर्वादेवताइतिश्रुतेस्तामाश्रित्याप्सुमूत्रादिसमर्कनकार्यमित्याह नेति। निष्ठीवनं मुखरसं श्लेष्माणंवा अमेध्यलिप्तं वस्त्रादि अन्यत् भुक्तोच्छिष्टादि॥ ५६॥

(६) रामचन्द्रः। अप्सु जलमध्ये मूत्रादिकंन समुत्सृजेत्। अमेध्यंविष्ठादिलिप्तंलोहितं रुधिरं विषाणि वा अप्सु नक्षिपेत॥ ५६॥

नैकः सुप्याच्छून्यगेहे श्रेयांसं न प्रबोधयेत्॥ नोदक्ययाभिभाषेत यज्ञं गच्छेन्न चावृतः॥ ५७॥

[एकः स्वादु न भुञ्जीत स्वार्थमेकोन चिन्तयेत्॥ एकोन गच्छेदध्वानं नैकः सुप्तेषु जागृयात्॥१॥]+

(१) मेधातिथिः। शून्यंगृहंयत्रनकश्चित्प्रतिवसति। नश्रेयांसंकनीयान्वृत्तादिभिर्ज्येष्ठमिदंतेयुक्तमिदमयुक्तमितिहेतु-पदेशादिना नप्रबाधयेत्। उदक्यारजस्वलातयासहसंभाषणंनकुर्यात्। यज्ञंगच्छेन्नचावृतः यज्ञभूमिमनिमन्त्रितोनगच्छेद्द-र्शनायतुकाममितिगौतमः। अतोयज्ञभोजनादिप्रतिषेधोऽयमवृतस्य॥ ५७॥

+ (ट, ड, ढ)

(२) **सर्वज्ञनारायणः** । श्रेयांसंव्रतोज्येष्ठंनिद्राणंन बोधयेत् । शयानमितिकचित्पाठः । तत्र यंकंचिन्निद्राणमित्यर्थः । अव्रतोयजमानेनानामन्त्रितः प्रसर्पकदक्षिणादिलोभेन न गच्छेत् अत्र धर्मदर्शनाय तु कामंगच्छेदिति गौतमः ॥५७॥

(३) **कुल्लूकः** । उत्सन्नजनवासगेहे नैकः शयीत वित्तविद्यादिभिरधिकंच सुप्तंन प्रबोधयेत् । रजस्वलया संभाषणंन कुर्यात् । यज्ञंचाकृतवरणोऽनृत्विङ्न गच्छेत् दर्शनायेच्छयागच्छेत् । दर्शनार्थेकाममितिगौतमवचनात् ॥ ५७ ॥

(४) **राघवानन्दः** । दुर्भिषज्यंहास्मैभवतियमेषनप्रतिपद्यतइतिश्रुतेः यमिति यमिन्द्रियदेशंनप्रतिपद्यत आत्मातद्दुश्चिकित्संभवतीतिश्रुतेरर्थोतः शयानंन प्रबोधयेत् मलवद्वाससा नसंवदेदिति श्रुतिमाश्रित्याह नोदक्ययेति उदक्यया रजस्वलया ऋत्विक् सन् अवृतो ऽनाहूतः अध्वरंनगच्छेत् ॥ ५७ ॥

(५) **नन्दनः** । श्रेयांसंपूज्यंसुप्तमनापदि न प्रबोधयेत् । न यज्ञमप्रयतोव्रजेत् आर्त्विज्यमकरिष्यन्नवृतोयज्ञशालां न गच्छेत् ॥ ५७ ॥

(६) **रामचन्द्रः** । शयानं श्रेयांसं श्रेष्ठं वयोधिकं न प्रबोधयेत् उदक्यया रजस्वलया नाभिभाषेत । आवृतः बहुवस्त्राणि परिधाय यज्ञंन गच्छेत् ॥ ५७ ॥

अग्न्यगारे गवां गोष्ठे ब्राह्मणानां च सन्निधौ ॥ स्वाध्याये भोजने चैव दक्षिणं पाणिमुद्धरेत् ॥५८॥

(१) **मेधातिथिः** । गोष्ठशब्दोयंनिवासवचनः समासमतिरूपकालः शब्दान्तरंब्राह्मणानामितिबहुवचनंविवक्षितं । पाणिग्रहणं बाहूपलक्षणार्थं । भोजनेआत्मकर्तृके ॥ ५८ ॥

(२) **सर्वज्ञनारायणः** । गवांगोष्ठइति गोष्ठपदस्य समुदायमात्रार्थतामभिप्रेत्य गवामितिविशेषणम् । उद्धरेत् उत्तरीयाद्बहिः पाणिहस्तं कुर्यात् ॥ ५८ ॥

(३) **कुल्लूकः** । अग्निगृहे गवांनिवासे ब्राह्मणानांगवांसमीपे स्वाध्यायभोजनकालयोश्च दक्षिणपाणिंसबाहुंवाससउद्धरेद्बहिष्कुर्यात् ॥ ५८ ॥

(४) **राघवानन्दः** । किंचाग्नीति । अग्न्यागारादिपञ्चसुपाणिमुद्धरेत् वस्त्रादेर्बहिष्कुर्यात् ॥ ५८ ॥

(५) **नन्दनः** । दक्षिणंबाहुमुद्धरेद्यज्ञोपवीती स्यादित्यर्थः । दक्षिणंबाहुमुद्धरतेवधत्ते सव्यमिति यज्ञोपवीतमिति हि श्रूयते ॥ ५८ ॥

(६) **रामचन्द्रः** । अग्न्यागारादिस्थाने दक्षिणपाणिं उत्तरीयाद्बहिः उद्धरेत् ॥ ५८ ॥

न वारयेद्गां धयन्तीं न चाचक्षीत कस्यचित् ॥ न दिवीन्द्रायुधं दृष्ट्वा कस्यचिद्दर्शयेद्बुधः ॥ ५९ ॥

(१) **मेधातिथिः** । गामात्मीयांपरकीयांवापिबन्तीमपःपयोवानवारयेत् । नचान्यस्मैकथयेत् । प्राग्दोहकालादयंविधिः । दोहकालेतुप्रस्रवणंविहितं । स्त्रीलिङ्गनिर्देशात् पुंवत्सनिवारणेनंनिषेधः । इन्द्रायुधंशक्रधनुर्विज्ञानच्छायेतियाकाश्मीरेषुकथ्यते । दिवीत्यनुवादः । केचित्तुपर्वतादिस्थस्यदर्शनेनदोषइत्याहुस्तदर्थंदिवीति ॥ ५९ ॥

(२) **सर्वज्ञनारायणः** । गां धयन्तीं जलंपिबन्तीम् ॥ ५९ ॥

(३) **कुल्लूकः** । गांजलंक्षीरंवा पिबन्तींन निवारयेत् दोहनार्थवारणादन्यत्र निषेधः । नापि परकीयक्षीरादि पिबन्तींतस्य कथयेत् । न चेन्द्रधनुराकाशे दृष्ट्वा निषिद्धदर्शनदोषज्ञः कस्यचिद्दर्शयेत् ॥ ५९ ॥

(४) **राघवानन्दः** । किंच नेति । धयन्तीं वत्संपाययन्तीं नाचक्षीत न कथयेत् । इन्द्रायुधं शक्रधनुः दिवीति व्यर्थम् ॥ ५९ ॥

(५) **नन्दनः** । धयन्तींपिबन्तींजलंस्तन्यंच दिवीतिविशेषणाज्जले न दोषइतिसूचितम् ॥ ५९ ॥

(६) **रामचन्द्रः** । धयन्तींपिबन्तींगां न निवारयेत् न चाचक्षीत न प्रकथयेत् ॥ ५९ ॥

नाधार्मिके वसेद्ग्रामे न व्याधिबहुले भृशम् ॥ नैकः प्रपद्येताध्वानं न चिरं पर्वते वसेत् ॥ ६० ॥

(१) **मेधातिथिः** । अधार्मिकाः पातकोपपातकिनोयत्रबाहुल्येन वसन्ति सग्रामस्तत्संबन्धादधार्मिकइत्युच्यते तत्रनवसेत् । ग्रामग्रहणंनिवासदेशोपलक्षणार्थं । तेननगरेपिप्रतिषेधः । व्याधिबहुलोऽनूपोदेशो व्याधिबहुलेजाङ्गलदेशे नवसेत् । यत्रदैवदोषाद्व्याधयः प्रवृत्तास्तंदेशंत्यजेत् । एकः असहायोनाध्वानंप्रपद्येत ॥ ६० ॥

(२) **सर्वज्ञनारायणः** । अधार्मिके धर्मविरोधिनि कलिङ्गादिदेशमध्ये । प्रपद्येत संचरेत् ॥ ६० ॥

(३) **कुल्लूकः** । अधार्मिकइत्यनेन यत्राधार्मिकावसन्ति न तत्र वासोयुक्तः । यत्रवा निन्दितदुश्चिकित्सितव्याधिपीडिताबहवोजनास्तत्र भृशमत्यर्थंवासोन युक्तः । पन्थानमेकः कदापि न गच्छेत् पर्वतेच दीर्घकालं नवसेत् ॥ ६० ॥

(४) **राघवानन्दः** । नजनमियान्नान्तमियादिति श्रुतिमाश्रित्याह नाधार्मिकइतिद्वाभ्यां । ग्रामइति वसतियोग्यपरं कार्यवशाद्व्याधिबहुले भृशं बहुकालम् ॥ ६० ॥

(६) **रामचन्द्रः** । अधार्मिके देशेअङ्गवङ्गादिदेशे न वसेत् ॥ ६० ॥

न शूद्रराज्ये निवसेन्नाधार्मिकजनावृते ॥ न पाषण्डिगणाक्रान्ते नोपसृष्टेन्त्यजैर्नृभिः ॥ ६१ ॥

(१) **मेधातिथिः** । नृपतिजनपदैश्वर्यंराज्यं । योजनपदः शूद्रवशवर्तीतत्रनवसेत । मन्त्रिसेनापतिदण्डकारिकाद्याः समप्रकृतयोराज्यं यत्रसर्वाःशूद्रजातीयाः तत्रनिवासनिषेधोयं । ननुचनाधार्मिकेवसेदित्यनेनैवतत्सिद्धमधार्मिकजनावृतइति नैषदोषःपूर्वप्रतिषेधोयत्रतेनिवसन्ति । अयंपुनरन्यत्रापिनिवसतोन्यत्रसन्निहितायदिभवन्तितथापितत्रप्रदेशेनवसितव्यं । तथाचावृतग्रहणमत्रयःप्रदेशएतैरावृतोनतत्रस्थातव्यं । एवंपाखण्डिजनैर्यआक्रान्तोदेशः यद्यप्यधार्मिकास्तेवेदबाह्यत्वात्तथापितेषांधर्मबुद्धिरितिभेदेननिर्देशः । अन्त्यैरुपसृष्टेसंबद्धे अथवा उपतप्तउपसृष्टेयथावाहीकाम्लेच्छैः ॥ ६१ ॥

(२) **सर्वज्ञनारायणः** । अधार्मिकजनैःपतितादिभिरावृते । उपसृष्टेसंमिश्रिते ॥ ६१ ॥

(३) **कुल्लूकः** । यत्र देशे शूद्रोराजा तत्र न वसेत् । अधार्मिकजनैश्च बाह्यतः परिवृते ग्रामादौ न वसेदित्यपुनरुक्तिः । पाषण्डिभिश्च वेदबाह्यलिङ्गधारिभिर्वशीकृते चाण्डालादिभिश्चान्त्यजैरुपद्रुते न वसेत् ॥ ६१ ॥

(४) **राघवानन्दः** । अधार्मिकाश्चण्डालाद्यास्तैर्बाह्याभ्यन्तरतः सर्वदावृते । पाखण्डाअवैदिकव्रतस्थास्तैराक्रान्ते-तत्रधर्मस्यकर्तुमशक्यत्वात् । उपसृष्टमन्तरान्तरा प्रवेशोऽन्त्यजकृतोयत्र तस्मिन् न जनमधार्मिकमियात् नान्तंतैराक्रान्तं देशंच नेयान्नगच्छेदिति श्रुतेरर्थः ॥ ६१ ॥

(५) **नन्दनः** । क्षत्रियराज्येऽपिनाधार्मिकजनावृते । उपसृष्टे आवासिते उपद्रुते वा ॥ ६१ ॥

(६) **रामचन्द्रः** । पाषण्डिजनैराक्रान्ते आकीर्णे न वसेत् । अन्त्यजैर्नृभिः सह उपसृष्टे मिलिते न वसेत् ॥ ६१ ॥

न भुञ्जीतोद्धृतस्नेहं नातिसौहित्यमाचरेत् ॥ नातिप्रगे नातिसायं न सायं प्रातराशितः ॥ ६२ ॥

(१) **मेधातिथिः** । उपनीतःस्नेहोयस्यसनाशितव्यः पिण्याकयूषमांसानितस्यक्रतुपर्युषितानांपयोविकाराणांप्रतिम-

---

(६२) नसायंप्रातराशितः=नातिमध्यंदिनेस्थिते (ख)

सवंकरिष्यति । तक्रकिलाटाद्यपेक्षयैवबहुवचनं साक्षाद्विकारोहिदध्येव । तस्मात्प्रसवेभिप्रेतेदधिग्रहणमेवाकरिष्यत् । तेना-विधानार्थः नहिदध्नः पर्युषितत्वमस्तिततस्मादुदश्वित्तक्रकिलाटादिकानांपयोविकाराणांनायंप्रतिषेधः। नातिसौहित्यंतृप्तिनकुर्यात् । तत्रकुक्षेर्भागः । एकोह्यन्नस्यअपरोहिद्रुतस्योदकादेः अपरोदोषसंचरणार्थइत्येवंभोक्तव्यमितिननतत्कार्यं । अतिप्रगे-प्राण्हेप्रथमोदितएवसूर्येनभुञ्जीत । प्रहरेअतीतेकुशानांपूर्वाह्णइतरेषांमध्यान्हे । नातिसायं अस्तमयसमयेभुञ्जीत । नसायं-भुञ्जन्प्रातराशितस्तृप्तस्तस्मात्साकांक्षमशितव्यंकालद्वयेपि । तदुक्तं सायंप्रातर्मनुष्याणामशनंदेवनिर्मितमिति । यदितुप्राता-स्तृप्तःस्यात्सायंनभुञ्जीत अथवैवंव्याख्यायते नसायंप्रातराशितःस्यात्उभयोरन्नकालयोर्नतृप्येत् । तथाचयाज्ञवल्क्यः सायमीषद्भोजनमाह ॥ ६२ ॥

(२) सर्वज्ञनारायणः । उद्धृतस्नेहंपिण्याकादि तक्रेतु वचनाददोषः । अतिसौहित्यमत्यशनं । नातिप्रगेनातिप्रातः सङ्गवे नातिसायमस्तमयानन्तरं । यदि प्रातराशितोभुक्तवांस्तदा नासायं सायमेव भुञ्जीत ॥ ६२ ॥

(३) कुल्लूकः । उद्धृतस्नेहंपिण्याकादि न भुञ्जीत । अतितृप्तिवारद्वयेऽपि न कुर्यात् । जठरंपूरयेदर्धमन्नैर्भागंजलेन च । वायोः संचरणार्थंतु चतुर्थमवशेषयेदित्यादिविष्णुपुराणवचनात् । सूर्योदयकाले सूर्यास्तमये भोजनंन कुर्यात् । प्रात-राशितोऽतितृप्तःसायंन भुञ्जीत ॥ ६२ ॥

(४) राघवानन्दः । भोजनस्यापि रागप्राप्तत्वेन तदाश्रित्य तद्विशेषंनिषेधति न भुञ्जीतेति । उद्धृतस्नेहं तिल पिण्याकादि । सौहित्य सुहितताममतीवस्निग्धताम् । जठरंपूरयेदर्धमन्नैर्भागंजलेनतु । वायोःसंचरणार्थाय चतुर्थमवशेषयेदि तिपुराणोक्तेः । प्रगे प्रातः प्रातराशितः अतितृप्तः सायंन भुञ्जीत ॥ ६२ ॥

(५) नन्दनः । उद्धृतस्नेहंपिण्याकादि । अतिसौहित्यमत्यन्तसंपन्नभोजनम् । अतिप्रगेऽपररात्रे । अतिसायंअर्ध-रात्रे । नसायंप्रातराशितोरात्रावन्हि वा द्विर्न भुञ्जीतेत्यर्थः ॥ ६२ ॥

(६) रामचन्द्रः । उद्धृतस्नेहंउद्धृतसारंन भुञ्जीत । अतिसौहित्यं अत्यशनं नाचरेत् । अतिप्रगे सङ्गवे न भुञ्जीत नातिसायं नक्षत्रदर्शनपर्यन्तं न भुञ्जीत । प्रातर्भुक्तानसायं भुञ्जीत । सायंकालादनन्तरं भुञ्जीतेत्यर्थः ॥ ६२ ॥

न कुर्वीत वृथाचेष्टां न वार्यञ्जलिना पिबेत् ॥ नोत्सङ्गे भक्षयेद्भक्ष्यान्न जातु स्यात्कुतू-हली ॥ ६३ ॥

(१) मेधातिथिः । वृथाचेष्टादृष्टादृष्टयोर्व्यापारयोरनुपकारः । यथाइतरदेशादिवार्तापरत्वं । संहतौपाणीअञ्जलिः ते-नोदकंनपिबेत् । वारिग्रहणातक्षीरादीनामप्रतिषेधः । न उत्सङ्गेभक्ष्याधानाशष्कुल्यादयस्तानुत्सङ्गेऊर्वोरुपरिनभक्षयेत् । भक्ष्यग्रहणात्फलानामपिप्रतिषेधः । सक्तोदनादेस्तुनिरुपसेचनीयस्यानदनीयत्वादुत्सङ्गेप्राप्तिरेवनास्ति । कुतूहलं अस-तिप्रयोजनेकिमेतत्स्यादितिनिश्चयेअत्यर्थमुत्कलिका नजातु कदाचित् ॥ ६३ ॥

(२) सर्वज्ञनारायणः । वृथाचेष्टांवृथाटनादि । उत्सङ्गेउत्सङ्गस्थान् । कुतूहली सर्वत्राश्चर्य प्रत्ययवान् ॥ ६३ ॥

(३) कुल्लूकः । दृष्टादृष्टार्थशून्यंव्यापारंन कुर्यात् । अञ्जलिना च जलंन पिबेत् ऊर्वोरुपरि विन्यस्य मोदकादीन्न भक्षयेत् । असति प्रयोजने किमेतदितिजिज्ञासा कुतूहलं तन्नकदाचित् कुर्यात् ॥ ६३ ॥

(४) राघवानन्दः । किंच नेति । वृथा दृष्टादृष्टादिशून्यां सरटदन्तान्वेषणादिवद्राजादिजिज्ञासया कुतूहली न स्यात् । उत्सङ्गे क्रोडे स्थापयित्वेति ॥ ६३ ॥

(५) नन्दनः । उत्सङ्गे निधायेतिशेषः । ६३ ॥

(६) **रामचन्द्रः** । वृथाचेष्टादृष्टादृष्टयोःव्यापारयोरनुपकारः न कुर्वीत । जातु कदाचिदपि कुतूहली परिहासी न भवेत् ॥ ६३ ॥

न नृत्येदथवा गायेन्न वादित्राणि वादयेत् ॥ नास्फोटयेन्न च क्ष्वेडेन्न च रक्तोविरावयेत् ॥ ६४॥

(१) **मेधातिथिः** । नर्तनंगात्रविक्षेपविशेषःलोकप्रसिद्धएव गायनंषड्जादिस्वरतःशब्दस्यकरणं । लौकिकस्यचायंप्रतिषेधोनवैदिकस्य विहितत्वात् । वादित्राणिवीणावंशमृदङ्गादीनितेषांस्वयंकर्तृकंवादनंप्रतिषिध्यते । वादकैस्तुवाद्यमानानामयंप्रतिषेधोन । नह्यण्यन्तादयंणिजन्तइतिप्रमाणमस्ति । आस्फोटनंकरमर्दास्फोटनादिपाणिनाभूमौबहुनिर्घातःसशब्दःक्ष्वेडेति । अव्यक्तंदन्तैःशब्दकरणं क्ष्वेडनिकेतिप्रसिद्धा । वल्गनं अन्योरागीपरितुष्टोनविरोधयेत् । विरोधंनकुर्यात् । पीडिते ननिषेधःघञन्ताण्णिचकर्तव्यः ॥ ६४॥

(२) **सर्वज्ञनारायणः** । आस्फोटयेदंसताडनेन शब्दंकुर्यात् । क्ष्वेडेत् सिंहनादंन कुर्यात् । रक्तोरागोद्रेकात् विरावयेत् विकृतंशब्दंकुर्यात् । स्वार्थेणिच् । रक्तोपि रागयेदिति क्वचित्पाठः । तत्र स्वयंयत्र रक्तस्तत्रान्यमपि रागिणंन कुर्यादित्यर्थः ॥ ६४ ॥

(३) **कुल्लूकः** । अशास्त्रीयाणि नृत्यगीतवाद्यानि नाचरेत् । पाणिना बाहौ ध्वनिरूपमास्फोटनंन कुर्यात् अव्यक्तदन्तशब्दात्मकंक्ष्वेडनंन कुर्यात् । नच सानुरागोरासभादिरावंकुर्यात् ॥ ६४ ॥

(४) **राघवानन्दः** । किंच शास्त्राप्रतिपादितानि नृत्यादीनि नाचरेदित्याह ननृत्येदिति । पाणिना बाहुपर्वणि स्फोटनं क्ष्वेडनंअव्यक्तदन्तशब्दात्मकं विषादिभिर्वाक्रीडातन्न कुर्यादित्यर्थः । विरावोत्र रासभादिशब्दस्तंनकुर्यादित्यर्थः॥६४॥

(५) **नन्दनः** । स्फोटोऽङ्गुलिपर्वभङ्गजातः शब्दः । क्ष्वेडोऽङ्गुल्यास्यसंयोगजातः । संरक्तोपिकामपरवशोऽपि मैथुनादिषु नरावयेन्न कपोतकूजितादिशब्दंकुर्यात् ॥ ६४ ॥

(६) **रामचन्द्रः** । च पुनः न क्ष्वेडेत् अव्यक्त शब्दकरणंन क्रीडेत् । च पुनः रक्तः स्त्रिया सह विकृतशब्दंन रावयेत् ॥ ६४ ॥

न पादौ धावयेत्कांस्ये कदाचिदपि भाजने ॥ न भिन्नभाण्डे भुञ्जीत न भावप्रतिदूषिते ॥ ६५॥

(१) **मेधातिथिः**। कांस्येभाजनेपादौनप्रक्षालयेत् । भिन्नभाण्डेएकदेशभिन्नेपि सर्वभिन्नेष्वर्थतएवप्रतिषेधः। पत्रपुटकादीनांतुभिन्नभाण्डाव्यवहारात्छिद्रितानामपिनदोषः । भावः अन्तर्हृदयाभिप्रायः यत्रमनोनपरितुष्यति । शब्दद्विष्टेवाएतदृहादौतत्रापिनैवंभावप्रसादोभवति ॥ ६५ ॥

(२) **सर्वज्ञनारायणः** । कांस्ये कांस्यमये पात्रे भिन्नेभाण्डे कांस्ये मार्तिके दारवे वा । भावतोदूषिते दुष्टत्वशङ्कास्पदे ॥ ६५ ॥

(३) **कुल्लूकः** । कांस्यपात्रे कदाचित्पादौ न प्रक्षालयेत् ताम्ररजतसुवर्णानांभिन्नमभिन्नंवेति न दोषइति पैठीनसिवचनादेतद्व्यतिरिक्तभिन्नभाण्डे न भोजनंकुर्यात् । यत्र मनोविचिकित्सति तद्भावदुष्टं न तत्र भुञ्जीत ॥६५॥

(४) **राघवानन्दः** । धावयेत्प्रक्षालयेत् भाजनेभोजनपात्रइति स्वतन्त्रंवा । ताम्ररजतसुवर्णानांभिन्नमभिन्नंवेति न दोषइतिपैठीनसिवचनात्तदतिरिक्तपरंभिन्नभाण्डइति । यत्र मनोविचिकित्सति तद्भावदुष्टं तत्रापिनाद्यात् ॥ ६५ ॥

---

(६४) विरावयेत्=विरोधयेत् (मे०)

(५) **नन्दनः**। भावप्रतिदूषितेअन्द्यये भाण्डे ॥ ६५ ॥

(६) **रामचन्द्रः**। भिन्नभाण्डे स्फुटितकांस्यभाजने न भुञ्जीत। भावप्रतिदूषिते भाण्डे न भुञ्जीत ॥ ६५ ॥

उपानहौ च वासश्च धृतमन्यैर्न धारयेत् ॥ उपवीतमलङ्कारं स्रजं करकमेव च ॥६६॥

(१) **मेधातिथिः**। पित्रादिभ्योऽन्यैर्धृतंनधारयेत्। निर्णिज्याशक्ताविति गौतमः। करकःकमण्डलुस्तस्यपित्रादिधृतस्यापिधारणंसमाचारविरुद्धंसंबन्धिरूपोसाविष्यते। यस्यैवसंबन्धितस्यैवशुचिर्नान्यस्य। अलङ्कारोदन्तवलयादिःकरकादिभिरल्पार्थैःसाहचर्यात्। मणिमुक्तादेस्तुननिषेधइतिकेचित् ॥ ६६ ॥

(२) **सर्वज्ञनारायणः**। करकंमृत्कमण्डलुं। धृतंपरिगृहीतम् ॥ ६६ ॥

(३) **कुल्लूकः**। उपानद्वस्त्रयज्ञोपवीतालङ्कारपुष्पमालाकमण्डलून्परोपभुक्तान्न धारयेत् ॥ ६६ ॥

(४) **राघवानन्दः**। किंचोपेति। करकं कमण्डलुं जायापत्यंकमण्डलुरिति स्मृतेः। उपवीतादिषट्कमन्यैः धृतमुपभुक्तं न धारयेदित्यर्थः ॥ ६६ ॥

(५) **नन्दनः**। करकंकमण्डलुम् ॥ ६६ ॥

(६) **रामचन्द्रः**। च पुनः करकमेव अन्यस्य जलपात्रंन धारयेत् ॥ ६६ ॥

नाविनीतैर्व्रजेद्धुर्यैर्न च क्षुद्व्याधिपीडितैः ॥ न भिन्नशृङ्गाक्षिखुरैर्न वालधिविरूपितैः ॥ ६७ ॥

(१) **मेधातिथिः**। अविनीताअदान्तागावोश्वाश्वतरादयः। धुर्याधुरंवहन्तियुज्यन्ते। गन्त्र्यादेरुपलक्षणंच ग्रहणं-अनियुक्तैरपिधुरिकेवलैरदान्तैः। अविनीताअदान्ताः गमनंनेष्यते। भिन्नंभग्नंशृङ्गंअनडुहः तस्यैवशृङ्गसंभवोनाश्वादेर्वालधिः पुच्छस्तेनविरूपिताः छिन्नपुच्छादयः तादृशेनननयायात्। आरोहणमेवस्मृत्यन्तरेप्रसिद्धम् ॥ ६७ ॥

(२) **सर्वज्ञनारायणः**। धुर्यैःशकटादिवाहकैः। गवादिभिरविनीतैःरदान्तैः क्षुत्पीडितैर्व्याधिपीडितैश्च वालधिभिः-पुच्छैः विरूपितैश्छेदादिना ॥ ६७ ॥

(३) **कुल्लूकः**। अश्वगजादिभिर्वाहनैरदमितैःक्षुधा व्याधिना च पीडितैर्भिन्नशृङ्गाक्षिखुरैश्छिन्नवालधिभिश्च न यायात् ॥ ६७ ॥

(४) **राघवानन्दः**। किंचान्यत्। धुर्यैरश्वादिभिरदमितैर्नगच्छेत्। वालधिविरूपितैः वालधिः पुच्छं तच्छून्यैः॥६७॥

(५) **नन्दनः**। धुर्यैर्बलीवर्दादिभिस्तद्युक्तैर्वा यानैः क्षुद्व्याधिपीडितैः क्षुत्पीडितैर्व्याधिपीडितैर्वा। वालधिविरूपितैश्छिन्नवालधिभिरित्यर्थः ॥ ६७ ॥

(६) **रामचन्द्रः**। अविनीतैः धुर्यैः अश्वैर्वा वृषैर्वा न व्रजेत्। च पुनः क्षुद्व्याधिपीडितैः न व्रजेत् ॥ ६७ ॥

विनीतैस्तु व्रजेन्नित्यमाशुगैर्लक्षणान्वितैः ॥ वर्णरूपोपसंपन्नैः प्रतोदेनातुदन्भृशम् ॥ ६८ ॥

(१) **मेधातिथिः**। दृश्यमानाअपिकेचिद्विनयंनसंगृण्हन्ति तदर्थमाह विनीतैरिति। सशिक्षितैराशुगैः क्षिप्रगामिभिर्लक्षणान्वितैः प्रशस्तावर्तादियुक्तैर्नशून्यमस्तकादिभिर्वर्णरूपयुक्तैः शोभनेनवर्णेनकर्णशोभादिनारूपेणसंस्थानविशेषेण शोभनत्वंचलक्षणविद्यातोज्ञातव्यं। भृशमक्षिपन् अपीडयन् पुनःपुनःप्रतोदेनअङ्कुशादिनाअत्यन्तंउद्वेश्यमाणाविघटयन्ति ॥ ६८ ॥

(२) **सर्वज्ञनारायणः** । वर्णो-वादिशास्त्रेकथितः शुक्लादिः । एवंरूपमाकारभेदः । भृशमतिशयेनातुदन्नव्यथ-यन् ॥ ६८ ॥

(३) **कुल्लूकः** । दमितैः शीघ्रगामिभिः शुभसूचकलक्षणोपेतैः शोभनवर्णैर्मनोज्ञाकृतिभिःप्रतोदेनात्यर्थमपीडयन्ग-च्छेत ॥ ६८ ॥

(४) **राघवानन्दः** । योग्यानाह विनीतैरिति । लक्षणान्वितैः लक्षणानि वाहगुणाः । शीघ्रगैः । प्रतोदेन सूक्ष्मलो-हाग्रदण्डेन तुदन् व्यथयन् ॥ ६८ ॥

(६) **रामचन्द्रः** । प्रतोदेन प्रतुदन् आशुगैः । शीघ्रगैरित्यर्थः ॥ ६८ ॥

बालातपः प्रेतधूमोवर्ज्यं भिन्नं तथासनम् ॥ न च्छिन्द्यान्नखलोमानि दन्तैर्नोत्पाटयेन्नखान् ॥६९॥

[श्रीकामोवर्जये न्नित्यं मृन्मये चैव भोजनम् ॥[1]]

(१) **मेधातिथिः** । प्रथमोदितेसवितरिमुहूर्तत्रयंबालातपव्यपदेशः । प्रेतधूमोदह्यमानस्यशवस्ययः । आसनंछिन्नं-छिद्रितंभग्नं एतद्वर्ज्यं । नखानिरोमाणिचनच्छिन्द्यात्स्वयंव्यसनेन अतिप्रवृद्धानिनुनापितेनकारयेत । दन्तैश्चनखान्नोत्पाटये-त्प्रवृद्धानपि । अन्येत्वेवमभिसंबध्नन्ति । नछिन्द्यान्नखरोमाणिदन्तैरिति । नखांश्चदन्तेनापिनपातयेत् । नखभङ्गेयोजनासु-हिकामिन्योनानानखान्धारयन्ति ॥ ६९ ॥

(२) **सर्वज्ञनारायणः** । बालातपः सद्यस्कालातपः । शरदि पुनःसंधुक्षणादादित्यस्य बाल्यं तदातपोबालातपइत्य न्ये । न छिन्द्यात्स्वयम ॥ ६९ ॥

(३) **कुल्लूकः** । प्रथमोदितादित्यतापोबालातपःसच मुहूर्तत्रयंयावदितिमेधातिथिः कन्यार्कातपइत्यन्ये । प्रेतधू-मोदह्यमानशवधूमः । भग्नासनंच एतानि वर्जनीयानि । नखानि च रोमाणि च प्रवृद्धानि न छिन्द्याद्दन्तैश्च नखान्नोत्पा-टयेत ॥ ६९ ॥

(४) **राघवानन्दः** । किंचैतान्वर्जयेदित्याह बालेति । बाला कन्याराशिः तत्रत्यातपः । शरद्रौद्रंनगृह्णीयादिति स्मृतेः । मुहूर्तत्रयव्यापिप्रातःकालीनसूर्यातपोवा बालातपः वर्ज्यइत्यनुषङ्गः । न च्छिन्द्यात्स्वयमितिशेषः ॥ ६९ ॥

(५) **नन्दनः** । नछिन्द्याद्वपनकालादन्यत्र ॥ ६९ ॥

(६) **रामचन्द्रः** । नखरोमाणि दन्तैर्न छिन्द्यात ॥ ६९ ॥

न मृल्लोष्ठं च मृद्नीयान्न च्छिन्द्यात्करजैस्तृणम ॥ न कर्म निष्फलं कुर्यान्नायत्यामसुखोदयम॥७०॥

(१) **मेधातिथिः** । विमर्दनंखण्डशःकरणं लोष्टस्यमृत्संबन्धिनःकेचित्तुमृदोलोष्टस्यसुधादिसंबन्धिनोपिमृदश्चमर्दनं । उत्क्षिप्योत्क्षिप्यपातनं हस्तेनसंहननं वा एतच्चमर्दनंयत्किंचनकारितयाप्राप्तंनिषिध्यते । ननुशौचाद्यर्थेप्रयोजनेनिष्फलग्रह-णंत्पुरस्तादपकर्षात् । तेनैवसिद्धेप्रायश्चित्तविशेषार्थःपुनरारम्भः । करजानखाः नकर्म । ननुचनकुर्वीतवृथाचेष्टामित्यनेनैव-निष्फलंकर्म । अत्राहुः । चेष्टाभौतिकोव्यापारः । इहतुसामान्यस्यपर्युदासः । तेनमनोराज्यादिकल्पाःपरिहरणीयाः ।

---

[1] (ख, ग) चिन्हितपुस्तकद्वये श्लोकमध्ये अयंपाठोदृश्यते । व्यवहारेपिदृष्टआचारः ॥

आयतिरागामीकालः। यस्मात्कर्मणागामिनिकालेऽसुखंदुःखमुत्पद्यते। यथाऽजीर्णभोजनंकुटुम्बभृतिमचिन्तयित्वामहतोधनस्यव्ययश्चतंनकुर्यात् ॥ ७० ॥

(२) सर्वज्ञनारायणः। मृदंकर्दमादि लोष्टंच मृल्लोष्टं। करजैर्नखैः। कर्मफलवत्तयाश्रुतं कारीषादि निष्फलंफलसंकल्पशून्यंन कुर्यात्। वृथाचेष्टा तु प्रागेव निषिद्धा। आयत्यामुत्तरकालेऽसुखोदयं दृष्टतोपि ॥ ७० ॥

(३) कुल्लूकः। नाकारणंमृल्लोष्टंमृद्नीयात्तृणानि च न छिन्द्यादितिआपस्तम्बवचनान्निष्प्रयोजनंमृल्लोष्टमर्दनं नखैश्च तृणच्छेदनंन कुर्यात्। ननु न कुर्वीत वृथाचेष्टामित्यनेनैवास्यापि प्रतिषेधसिद्धौ दोषभूयस्त्वंप्रायश्चित्तगौरवंच दर्शयितुंविशेषेण निषेधः। अतएवात्रानन्तरंलोष्टमर्दीतिनिर्न्दिक्ष्यति। दृष्टादृष्टफलशून्यंच कर्म न कुर्यात्। ननु न कुर्वीत वृथाचेष्टामित्यनेन पुनरुक्तिः। उच्यतेदेहव्यापारश्चेष्टा सवृथाचेष्टाशब्देन निषिद्धः अनेन तु निष्फलंमनोग्राह्यादिसंकल्पात्मकंकर्ममानसंनिषिध्यते। यच्चायत्यामागामिकाले कर्मासुखावहम्। यथाऽजीर्णे भोजनादि तदपि न कुर्यात् ॥ ७० ॥

(४) राघवानन्दः। वृथा लोष्टमर्दी नस्यादित्याह नेति। करजैर्नखैः। कर्म निष्फलं मानासिद्धं न कुर्वीत। आयत्यांउत्तरकालेऽसुखोदयं सुखफलशून्यं प्रारम्भेकर्ममात्रस्य दुःखफलत्वात् ॥ ७० ॥

(५) नन्दनः। मृद्नीयाद्धस्तेन। निष्फलमितिनिश्चितम्। आयत्यांकालान्तरे। असुखोदयमितिनिश्चितंचकर्म न कुर्यात् ॥ ७० ॥

(६) रामचन्द्रः। आयत्यांउत्तरकाले यदसुखंकर्म तन्न कुर्यात् ॥ ७० ॥

लोष्टमर्दी तृणच्छेदी नखखादी च योनरः ॥ सविनाशं व्रजत्याशु सूचकोऽशुचिरेव च ॥ ७१ ॥

(१) मेधातिथिः। अत्रार्थवादः अस्मादेवकेवलाल्लोष्टग्रहणात् पूर्वोक्तमृल्लोष्टमितिषष्ठीसमासोविज्ञायते उभयप्राधान्येहिमृद्ग्रहणं लोष्टइवअत्राकरिष्यतातस्यैवहस्तेनसुमर्दत्वात्प्राप्तःपर्युदासः। सुधायास्तुकाठिन्याद्यत्नसाध्यंमर्दनंतत्रैवासतिप्रयोजनेप्राप्तंमृल्लोष्टमर्दनंतुहस्तेनपुरुषाणांस्वभावतः केषांचित्प्राप्नोति तस्यपर्युदासः। तृणछेदीप्रकृतोदन्तैर्नखान्खादति सूचकः पिशुनःकर्णेजपः यःपरस्यदोषानसतःसतोवापरोक्षंख्याख्यापयति। अशुचिरुक्तार्थः। विनाशमाशुव्रजति। नयथान्यानिवैदिकान्यनियतकालानिफलानि एवमेतत्। किंतर्हिइहैवजन्मनिअचिराद्धनादिनावियोगोविनाशः ॥ ७१ ॥

(२) सर्वज्ञनारायणः। लोष्टमर्दनादेः प्राङ्निषिद्धस्य दृष्टदोषान्सिद्धफलतामाह लोष्टमर्दीति। नखखादीदन्तैर्नखोत्पाटकः। बहुदुःखकारी सूचकः परापकारहेतुवाक्यप्रयोक्ता। अशुचिर्बाह्याभ्यन्तरशौचशून्यः ॥ ७१ ॥

(३) कुल्लूकः। लोष्टमर्दयितातृणच्छेत्ता नखखादिता च योमनुष्यःतथा सूचकःखलोयःपरस्य दोषानसतःसतोवा ख्यापयति बाह्याभ्यन्तरशौचरहितः शीघ्रमेते देहधनादिना विनश्यन्ति ॥ ७१ ॥

(४) राघवानन्दः। लोष्टमर्दादीननूद्य दृष्टफलमाह लोष्टमर्दीति। सूचकः खलः ॥ ७१ ॥

(५) नन्दनः। सूचकः पिशुनः ॥ ७१ ॥

(६) रामचन्द्रः। सूचकः परापकारहेतुवाक्यप्रयोक्ता ॥ ७१ ॥

न विगृह्य कथां कुर्याद्बहिर्माल्यं न धारयेत् ॥ गवां च यानं पृष्ठेन सर्वथैव विगर्हितम् ॥ ७२ ॥

(१) मेधातिथिः। अभिनिवेशेनपणबन्धादिनायल्लौकिकेषुशास्त्रेषुवार्थेष्वितरेतरंजल्पनमहोपुरुषिकायासाविगृह्यकथा। बहिर्माल्यंवाससोबहिःकण्ठस्थांस्रजंवाससाच्छादयेत्। तथाचसमाचारः। अपरेबहिरित्यनोवृतादर्शउच्यते। तत्रनगररथ्या-

दौनप्रकटमाल्योभ्राम्येदित्याहुः। अथवाबहिर्गन्धंबहिर्माल्यंयस्यगन्धोनातिसंवेद्यते। एवंस्मृत्यन्तरं। नागन्धांस्रजंधारये-दन्यत्रहिरण्मय्याइति। गवांचपृष्ठेयानपर्याणंविनासाक्षाद्वारोहणंप्रतिषिध्यते। सर्वथेतिपर्याणादान्तरायेपिगन्त्र्यादियुक्तेऽपृष्ठयानत्वादप्रतिषेधः॥ ७२॥

(२) सर्वज्ञनारायणः। विगृह्यनैवदेयमिति परकथामाच्छिद्य। बहिर्माल्यंशिखावेष्टनेन। गवांपृष्ठेन सर्वथातिगर्हितं रथादियोजनेन तु गोभिर्यानंगर्हितमात्रंनत्वत्यन्तम॥ ७२॥

(३) कुल्लूकः। नचाभिनिवेशेन कथांशास्त्रीयेष्वर्थेषु लौकिकेषु वा कुर्यात्। केशकलापाद्बहिर्माल्यंन धारयेत्। गवांच पृष्ठेनयानसर्वथेतिप्रवेण्यादिव्यवधानेनाप्यधर्मावहम्। पृष्ठेनेत्यभिधानादाकृष्टशकटादिना न दोषः॥ ७२॥

(४) राघवानन्दः। विगृह्य विग्रहंकृत्वापरकथांप्रच्छाद्यच। बहिर्माल्यंकेशकलापाद्बहिर्मालाहिपुष्पम्। गवांपृष्ठेन केवलेनेत्यन्वयः॥ ७२॥

(५) नन्दनः। विगृह्य कथांविरोधपूर्वकवाक्यम्। गवांपृष्ठेन यानं गोपृष्ठमारुह्य यानम्॥ ७२॥

(६) रामचन्द्रः। विगृह्य प्राणबन्धादिवालौकिकेषु शास्त्रेषु कथांन कुर्यात् विध्यन्ते गवांपृष्ठे वृषभानांपृष्ठे सर्वपुण्यानांविनाशात् गवारोहणंप्रविगर्हितं। तथैवबहिर्माल्यंन धारयेत्॥ ७२॥

अद्वारेण च नातीयाद्ग्रामं वा वेश्म वा वृतम्॥ रात्रौ च वृक्षमूलानि दूरतः परिवर्जयेत्॥ ७३॥

(१) मेधातिथिः। आवृतस्यवाटपरिक्षेपादिना ग्रामस्यअद्वारप्रवेशप्रतिषेधः। अनावृतस्यतुद्वारवतोपियथाकामम्॥ ७३॥

(२) सर्वज्ञनारायणः। अद्वारेण सर्वसाधारणद्वारव्यतिरेकेण गुप्तद्वारादिना नातीयान्न प्रविशेच्च। वृतंसंवृतंलयंन हरेतहस्तेन॥ ७३॥

(३) कुल्लूकः। प्राकाराद्यावृतंगृहंच द्वारव्यतिरिक्तप्रदेशेन प्राकारादिलङ्घनंकृत्वा न विशेत्। रात्रौ च वृक्षमूलावस्थानंदूरतस्त्यजेत्॥ ७३॥

(४) राघवानन्दः। नातीयात् न गच्छेत् प्राकाराद्युल्लङ्घनेन॥ ७३॥

(६) रामचन्द्रः। ग्रामंवा वेश्म वा वृतंवेष्टितंअद्वारेण नातीयात् नविशेदित्यर्थः॥ ७३॥

नाक्षैः क्रीडेत्कदाचित्तु स्वयं नोपानहौ हरेत्॥ शयनस्थोन भुञ्जीत न पाणिस्थं न चासने॥ ७४॥

(१) मेधातिथिः। अन्तरेणापिग्लहंपरिहासेननाक्षैर्दीव्येदिति। कदाचिद्ग्रहणंशलाकादीनामपिदर्शनार्थं। तेनसर्वस्य द्यूतस्यप्रतिषेधः। स्वयंचर्मपादत्राणमुपानहौ तेआत्मनाहरतेनदण्डादिनावागृहीत्वा देशान्तरंनानयेत्। आत्मीययोश्चायंप्रतिषेधः। स्वयमितिप्रकृतत्वात्तेनगुर्वादिसंबन्धिन्योरनिषेधः। शयनेखट्वादौ उपविश्यनभुञ्जीत पाणौचकवलंस्थापयित्वा भाजनाद्यनन्तरितेनआसने अन्नंस्थापयित्वाआनन्तर्याद्भोज्यस्यप्रतिनिर्देशेनभोक्तुः॥ ७४॥

(२) सर्वज्ञनारायणः। न पाणिस्थं वामपाणिस्थं पाणिनिहितभाण्डादिस्थितंच। आसने पीठादौ स्थितम॥ ७४॥

(३) कुल्लूकः। ग्लहंविनाकदाचिदपि परिहासेनापि नाक्षादिभिः क्रीडयेत्। स्वयमित्यभिधानादात्मोपानहौ पादव्यतिरिक्तेन हस्तादिना देशान्तरंन नयेत्। शय्याद्यवस्थितश्च न भुञ्जीत। हस्ते च प्रभूतमन्नंकृत्वा क्रमेण न खादयेत्। आसने भोजनपात्रंनिधाय न भुञ्जीत॥ ७४॥

(४) राघवानन्दः । कदाचिदिति ब्राह्मणादेर्द्यूतंप्रतिपदादावपि प्रसक्तिवारणार्थम । ग्लहंविनाप्यक्षैर्न क्रीडेतेतिमेधातिथिः । नउपानहावितिद्वित्वंविवक्षितम । आसने स्थापितमपि ॥ ७४ ॥

(५) नन्दनः । पाणिस्थमन्नं पाण्यन्तरेण न भुञ्जीत ॥ ७४ ॥

(६) रामचन्द्रः । नाक्षैःक्रीडेत । अक्षग्रहणं शलाकादिना विभवे सति क्रीडेदिति । स्वयंउपानहौ न हरेत । हस्तेन नानयेदित्यर्थः । दण्डादिना आनयेत ॥ ७४ ॥

सर्वं च तिलसंबद्धं नाद्यादस्तमिते रवौ ॥ न च नग्नः शयीतेह न चोच्छिष्टः क्वचिद्व्रजेत् ॥ ७५ ॥

(१) मेधातिथिः । अस्तमितेआदित्ये प्रतिर्लक्षणेकर्मप्रवचनीयत्वातद्वितीया । नचोच्छिष्टः ननुचब्रह्मचर्यधर्मेष्वेवप्रतिषिद्धं । पुरुषधर्मताचतस्यज्ञापिता नतादर्थ्यमेव सत्यं व्रतरूपताज्ञापनार्थउपदेशोयं । तेनयावज्जीविकःसङ्कल्पःकर्तव्यः ॥ ७५ ॥

(२) सर्वज्ञनारायणः । तिलसंबद्धंतिलप्रकृतिकं तैलाद्यपि अस्तमयं प्रति तदनन्तरं उच्छिष्टो मूत्रादिकरणेनाशनेनवा न शयीतेत्यर्थः ॥ ७५ ॥

(३) कुल्लूकः । यत्किंचित्तिलसंमिश्रंकृसरमोदकादि तदस्तमितेऽर्के नाद्यात । उपरस्थाच्छादनवासोरहितोनेहलोकेसुप्यात । उच्छिष्टस्तु नान्यतोगच्छेत ॥ ७५ ॥

(४) राघवानन्दः । तिलसंबद्धं कृसरमोदकादि । अस्तमितेऽस्तंगते सवितरि इह भूमावपि न संविशेत न शयीत उच्छिष्टः कृतभोजनोनाचान्तः ॥ ७५ ॥

(६) रामचन्द्रः । सर्वंतिलसंबद्धंअस्तमितेसति व्रती नाद्यात न भक्षयेत ॥ ७५ ॥

आर्द्रपादस्तु भुञ्जीत नार्द्रपादस्तु संविशेत् ॥ आर्द्रपादस्तु भुञ्जानो दीर्घमायुरवाप्नुयात् ॥ ७६ ॥

(१) मेधातिथिः । आदिकर्मणिविधिमिमंसमाचरेत । आर्द्रपादोभोजनमाचरेत । नत्वातृप्तेःपादौसिचन्नासीत संविशेत शयनेगात्राणिनावक्षिपेत । संवेशनंशयनेगात्रसंयोजनं । अस्यफलमाह दीर्घमायुरिति । नायमायुष्कामस्यविधिः । किंतर्हिपूर्ववन्नित्यः । आयुरनुवादस्त्वर्थवादएव ॥ ७६ ॥

(२) सर्वज्ञनारायणः । संविशेत शयीत ॥ ७६ ॥

(३) कुल्लूकः । जलार्द्रपादोभोजनमाचरेत । नार्द्रपादःसुप्यात । यस्मादार्द्रपादोभुञ्जानःशतायुर्भवति ॥ ७६ ॥

(४) राघवानन्दः । दृष्टार्थेविधिनिषेधावाह आर्द्रेति । न संविशेन्न शयीत ॥ ७६ ॥

(६) रामचन्द्रः । आर्द्रपादस्तु भुञ्जीत भोजनंकुर्यात । आर्द्रपादः कदाचन न शयीत शयनं न कुर्यात । पश्चाद्र्द्रभोजनंचरेत ॥ ७६ ॥

अचक्षुर्विषयं दुर्गं न प्रपद्येत कर्हिचित् ॥ न विण्मूत्रमुदीक्षेत न बाहुभ्यां नदीं तरेत् ॥ ७७ ॥

(१) मेधातिथिः । दुर्गंदुर्गारोहंपर्वतादितरुगुल्मलतागहनंचारण्यंतन्नप्रपद्येत । नाक्रामेन्नगच्छेदचक्षुर्विषय सर्पचौरादेरन्तर्हितस्य भावाशङ्कया । चक्षुर्ग्रहणमागमादेरपिप्रमाणस्यलक्षणं । नविण्मूत्रंउदीक्षणंवर्णादिनानिरूपणंच चिरकालप्रेक्षणानिभवन्तिइति । अतएवतन्नकर्तव्यं दैवात्कचिद्दृश्यमाने नदोषः । नदीबाहुतरणंचस्वस्थस्यनिषिध्यते । नवृकभये ॥ ७७ ॥

(२) सर्वज्ञनारायणः । दुर्गंदुर्गत्वेन श्रुतमचक्षुर्विषयंत्वयमदृष्टंन मपयेत न गच्छेत् । विण्मूत्रंपरकीयं बाहुभ्यांनदीमितिविवक्षितं बाहुना जलान्तरेपितरणस्य दृष्टविरोधित्वात् ॥ ७७ ॥

(३) कुल्लूकः । तरुगुल्मलतागहनत्वेनाचक्षुर्गोचरमरण्यादिदेशंदुर्गंनाक्रमेत् सर्पचौरादेरन्तर्हितस्य संभवात् । पुरीषंमूत्रंच न निरीक्षेत् । बाहुभ्यांच नदीं न तरेत् ॥ ७७ ॥

(४) राघवानन्दः । दुर्गं तृणाद्याच्छिन्नंकूपतडागादि अतएवाहाचक्षुर्विषयं । विण्मूत्रं स्वकीयं तत्पर्यालोचनबुद्ध्या नेक्षेत ॥ ७७ ॥

(६) रामचन्द्रः । अचक्षुर्विषयं देशं दुर्गंवा दुर्गारोहणं न मपयेत ॥ ७७ ॥

अधितिष्ठेन्न केशांस्तु न भस्मास्थिकपालिकाः ॥ न कार्पासास्थि न तुषान्दीर्घमायुर्जिजीविषुः ॥ ७८ ॥

(१) मेधातिथिः । कपालिकाःभग्नस्यशकलानिदीर्घमायुः व्याख्यातात्द्वितीया ॥ ७८ ॥

(२) सर्वज्ञनारायणः । कपालिकाघटाद्यंशः । कार्पासस्यास्थिबीजम् ॥ ७८ ॥

(३) कुल्लूकः । दीर्घमायुर्जीवितुमिच्छुःकेशादीन्नाधिरोहेत् । भग्नमृण्मयभाजनशकलानिकपालिकाः ॥ ७८ ॥

(४) राघवानन्दः । कपालिकाभग्नघटादेः । कार्पासास्थि तद्बीजंनाधितिष्ठेत् तेषु अधिशीङ्स्थासांकर्मेति समभ्यर्थे द्वितीया ॥ ७८ ॥

(५) नन्दनः । अधितिष्ठेत्पदा । कपालिका भिन्नमृद्भाण्डशकलान् ॥ ७८ ॥

(६) रामचन्द्रः । केशमध्ये दीर्घमायुर्जिजीविषुःर्नाधितिष्ठेदित्यपि ज्ञेयम् ॥ ७८ ॥

न संवसेच्च पतितैर्न चाण्डालैर्न पुल्कसैः ॥ न मूर्खैर्नावलिप्तैश्च नान्त्यैर्नान्त्यावसायिभिः ॥ ७९ ॥

[न कृतघ्नैरनुद्युक्तैर्न महापातकान्वितैः । न दस्युभिर्नाशुचिभिर्नामित्रैश्च कदाचन १]

(१) मेधातिथिः । ननुच नाधार्मिकजनावृतेनोपसृष्टेन्त्यजैरितिचोक्तमेवैतत् । नेतिब्रूमः तत्रनिवासःप्रतिषिद्धः इहतुसंवासः । यत्रग्रामेतेवसन्तिनतत्रवस्तव्यं गृहस्थित्येति । तत्रोक्तंसंवासस्तुतैःसहसंव्यवहारोदानग्रहणादिभिर्मैत्रीकरणं-तद्गृहसमीपेचवासोपि एकतःछायोपजीवनमित्यादि । आवृतग्रहणाच्चतत्रबाहुल्यंगम्यते । यस्मिन्ग्रामेभूयांसस्तेतथासमीपेपिनवस्तव्यमितितस्यार्थइहत्वबाहुल्येपि समीपवासादिप्रतिषिध्यतइत्येषविवेकः । पुल्कसानिषादाःशूद्रायांजाताअन्त्यामेदप्रभृतयोम्लेच्छाअन्त्यावसायीति निषादस्त्रियांचण्डालाज्जातोवक्ष्यते । निषादस्त्रीचण्डालादित्यादि । अवलिप्तामदोद्धताः धनादिनागर्विताः ॥ ७९ ॥

(२) सर्वज्ञनारायणः । संवसेदेकगृहे अवलिप्तैर्गर्वितैः । अन्त्यैः कैवर्ताद्यैः । अन्त्यावसायिभिः सूतमागधाद्यैः ॥ ७९ ॥

(३) कुल्लूकः । पतितादिभिर्ग्रामान्तरवासिभिरपि सह न संवसेत् । एकतरुच्छायादौ न समीपे वसेत् । अतोनाधार्मिके वसेद्ग्रामइत्यतोभेदः । निषादाच्छूद्रायांजातःपुल्कसः । वक्ष्यतिच । जातोनिषादाच्छूद्रायांजात्याभवतिपुल्कसइति । अवलिप्ताधनादिमदगर्विताः । अन्त्याअन्त्यजारजकादयः । अन्त्यावसायिनोनिषादस्त्रियांचाण्डालाज्जाताः वक्ष्यति च निषादस्त्री तु चाण्डालात्पुत्रमन्त्यावसायिनम् ॥ ७९ ॥

१ (ट)

(४) राघवानन्दः। ग्रामवासनिषेधस्योक्तत्वादेकसभैकवृक्षच्छायादौ न वसेदित्यर्थः। पुल्कसैः निषादाच्छूद्रायां-जातैः। अवलिप्तैः। धनादिगर्वितैः। अन्त्यैरजकादिभिः। अन्त्यावसायिभिः निषाद्यांचण्डालाज्जातैः सह वार्ताकलहादि-संभावनयाअधर्मोत्पत्तेरितिभावः॥ ७९॥

(५) नन्दनः। पुल्कसःशूद्रेण क्षत्रियायांजातः। अन्त्यादर्शनस्पर्शनायोग्याः प्रतिलोमजाः। अन्त्यावसायिनः श्वपाकादयः॥ ७९॥

(६) रामचन्द्रः। पतितैः सह न संविशेत्। चाण्डालैः ब्राह्मण्यांशूद्राज्जाताः चाण्डालास्तैः सह न संविशेत् अन्त्यैः कैवर्तादिभिः। अन्त्यावसायिभिः सूतमागधादिभिः। एतैर्जातिभेदैः सह न संवसेत् अन्त्यभेदाः। रजकश्चर्मकारश्च नटोबुरुडएवच। कैवर्तमेदभिल्लाश्चसप्तैतेअन्त्यजाःस्मृताः। अस्यार्थः। बुरुडःशूर्पकारः इति जातिसंज्ञा॥ ७९॥

न शूद्राय मतिंदद्यान्नोच्छिष्टं न हविष्कृतम॥ न चास्योपदिशेद्धर्मं न चास्य व्रतमादिशेत्॥८०॥

[अन्तरा ब्राह्मणं कृत्वा प्रायश्चित्तं समादिशेत्॥]+

(१) मेधातिथिः। शूद्रस्यदृष्टादृष्टविषये हिताहितोपदेशोन कर्तव्यः। शूद्रस्यमन्त्रित्वंन कर्तव्यमितियावत्। वृत्त्यर्थश्चायंनिषेधः। सौहार्दादिनातुनदोषः। भवन्ति हि शूद्राः कुलमित्राणि मैत्र्याचावश्यंहितमुपदिश्यते। अनुज्ञाता च सर्ववर्णे ब्राह्मणस्य मैत्री मैत्रोब्राह्मणउच्यते। ये तु व्याचक्षतेऽपृच्छतोनब्रूयादित्युपन्यस्य युक्तंशास्त्रान्तरसिद्धत्वात्। नापृष्टः कस्यचिद्ब्रूयादिति तदयुक्तम्। तत्र हि स्वाध्यायविषयंस्वरवर्णगतमन्यत्वमसंगतंवाकुर्वतोविनाशितंत्वयेत्यादावपृष्टेन नवक्तव्यम्। यथाचामी नाध्याप्याइत्यस्मिन्प्रसङ्गइदमुक्तंनापृष्टोब्रूयादिति। अशिष्यस्यापृच्छतोविस्वरंव्यक्षरंवापठतोनकिंचिद्वक्तव्यमिति तस्यार्थः। नोच्छिष्टमिति उच्छिशब्दोऽयंभुजिनिमित्तेऽप्राशस्त्येवर्ततेकृतमूत्रपुरीषोप्यनाचान्तउच्छिष्टउच्यते। यथा वक्ष्यामोन स्पृशेत्पाणिनोच्छिष्टः। बाहुल्येनोच्छिष्टप्रयोगोभुजिसंबन्धेनभुञ्जानस्य ह्यन्तरास्यसंस्पर्शेन बहिरन्तःस्थितस्योच्छिष्टत्वंभवति। तथा च श्मश्रूणि गतान्यास्यमितिश्मश्रुभ्योन्यदास्यानुप्रविष्टमुच्छिष्टंकरोतीति ज्ञापयति। अतश्च भोक्तुर्भुज्यमानस्य पात्रादेरधिकरणस्यचोच्छिष्टव्यवहारः। क्वचिच्चायंउपयुक्तेतरवचनोऽपि। हविरुच्छिष्टंदक्षिणेति। तत्र समाचारात्पात्रगृहीतमुच्छिष्टपुरुषसंबन्धमीषद्भुक्तमुच्छिष्टमुच्यते। यदपि विशदमोदनादिपात्रस्थमस्पृष्टमपि भोक्त्रा तदपिसंबन्धात्समाचारतःपरिह्रियते। तन्नोच्छिष्टमपिदातव्यम्। नोच्छिष्टमितिविधिप्रतिषेधावेकविषयाववृताप्तशूद्रव्यवस्थया हविःशेषभेदेन वा विकल्पेते। अथवास्थालीस्थमतिथ्यादिभुक्तशिष्टंतन्न शूद्रायदातव्यम्। तत्रोच्यते। जीर्णवसनसाहचर्याच्चैतदेवप्रतिपत्तुंयुक्तम्। उपयुक्तेतरवचनत्वाच्चशिषेरुपसर्गस्य तदर्थानुगुण्येन वर्तनाद्धविरुच्छिष्टंदक्षिणेतिवत्प्रयोगोप्यविरुद्धएव। तयोःस्मृत्योरविरोधोभविष्यति। यद्यपि स्वल्पाऽऽचमनार्हाःप्रायोऽत्र वचने दृश्यन्ते। यत्तु वैश्यवच्छौचकल्पश्चेतितद्दासशूद्रविषयम्॥ भुक्तोज्झितमेव प्रतीयतइति दर्शयिष्यामः। नहविष्कृतम् हविषे कृतंहविरर्थंकल्पितंबहुवचनःसमासस्तादर्थ्येनोपकल्पितप्रतिषेधात्। दण्डापूपिकया यत्र हविर्गन्धोऽस्ति तत्सर्वंप्रतिषिध्यते। तेन हविरर्थितया संकल्पितस्य हविषः प्रवृत्तस्य हविःशेषस्याभुक्तोज्झितस्य हविषः प्रतिषेधः सिद्धोभवेत्। तथाच कृतमिति करोतिः क्रियासामान्यवचनःप्रयुक्तःहविरर्थंयत्कृतंसंकल्पितंवचनंतेनोच्छिष्टस्यापि यावत्प्राकृतेन संकल्पेन हविष्कृतव्यपदेशोन यथावत्सर्वावस्थस्य प्रतिषेधोविज्ञायते। अन्यैस्तु-

+ (अ)

हविर्मिश्रंहविष्कृतमितिव्याख्यातम्। संसृष्टप्रतिषेधाच्च केवलस्यापि प्रतिषेधः। विप्रसंसृष्टप्रतिषेधेविप्रस्येवेत्युक्तम्। कथं-पुनःसंसृष्टप्रतिषेधे केवलप्रतिषेधः। केवलप्रतिषेधेनाप्रधानः कदाचित्संसृष्टप्रतिषेधः शक्यतेवक्तुम्। यत्र संसृष्टावपि पृथक्त्वेन प्रतिभासेते यत्र वा चक्षुषः प्रतिभासमाने रूपे रसादिना तत्प्रयोगोभवति तत्रापि भवत्येव तदाश्रयोव्यवहारः। यथासुरादिसंपृक्तासु सुपक्वपिण्डीष्वन्तर्हितेऽपि सुरादिरूपे रसे तत्प्रत्ययादस्त्येवसुरापानप्रायश्चित्तम्। ननु चैवमप्यद्रव-रूपत्वात्पिण्डीभिरेकतापन्नायाः सुरापानपानोपपत्तिः। नैषदोषः। प्रायिकेणौचित्यानुवादेनपानमुपादीयते। अभ्यवहा-रएवतुनिषिध्यते। यथाचभक्ष्याभक्ष्यप्रकरणमेतत्। भक्षणंचाभ्यवहारमात्रंतस्यविशेषाःपानखादनचर्वणादयः। गन्धस्य पुनरनाश्रयस्याप्युपलब्धेर्नततोद्रव्यसद्भावावगमः दूरस्थेऽपि कर्पुरादौ गन्धउपलभ्यते। सूक्ष्मद्रव्यावयवावगमकल्पनायां द्रव्यस्य परिमाणावयवःस्यात्। यत्रतु संसृष्टयोरेकीभावोनचान्यस्तत्प्रत्ययोन नतत्रकेवलाश्रयौविधिप्रतिषेधौप्रवर्तितुमर्हतः। यथाक्षीरंपातव्यमितिसंमिश्रितयोः क्षीरोदकयोःपीतयोर्नक्षीरंभवतिनोदकं द्रव्यान्तरत्वात्। अन्यद्धि तत्र रूपमन्यश्च रसो-संस्थानादितत्प्रत्ययहेतुरस्तीतिद्रव्यान्तरंतत्। यद्येवंमद्योदके सहपीते यदि भवेतांतदा मद्यपानप्रायश्चित्तंन प्राप्नोति। द्रव्या न्तरत्वात्। नैषदोषःअभिभवतिरसान्तराणिमद्यंतिक्तरसवत्। ततोरसप्रत्यभिज्ञानाद्भवत्येवतत्प्रायश्चित्तम्। यत्र तु बहूदकं-स्वल्पंमद्यादि तत्र संसर्गप्रायश्चित्तमपि निपुणमेकादशेनिरूपयिष्यामः। तस्मात्केवलाश्रयःप्रतिषेध आस्कन्देदपिसंसर्गम् यथामाषानभोक्तव्याइतिमिश्राअपि न युज्यन्ते। संसर्गाश्रयस्तु केनहेतुनाऽसंसृष्टेवर्तेत। गङ्गायमुनयोः संगमाज्जलमानये-त्युक्ते न केवलायागङ्गायाआनयति न यमुनायाः। समाचारएवेतिचेत्समाचारएवोदाहर्तव्यः। न चास्योपदिशेद्धर्मम्। ननु च न शूद्रायेत्यविशेषेणदृष्टादृष्टविषयमतिदानप्रतिषेधाद्धर्मोपदेशनिषेधोऽपिसिद्धएव। सत्यम् पुनर्वचनंशेषार्थम्। ततः प्राय-श्चित्तोपदेशोऽनुज्ञातोभवति। शरणागतंपरित्यज्येत्यत्रचैतद्दर्शयिष्यामः। अन्येतुपार्वणश्राद्धपाकयज्ञादिष्वितिकर्तव्यतांन-शिक्षयेत् पाचकत्वादिरूपेणेत्याहुः। अत्र चोदयन्ति यदि धर्मोपदेशः शूद्रस्य निषिध्यते कुतस्तर्हि धर्मवित्त्वम्। अ-विदुषश्च नानुष्ठानसंभवस्ततःशूद्रानुष्ठातृकधर्मशास्त्रानर्थक्यम्। अचोद्यमेतत्। अतिक्रान्तनिषेधस्यलिप्सयाब्राह्मणस्य-चोपदेष्टृत्वसंभवात्। नहि ब्रह्महत्या सर्वस्वदानचोदनाप्रतिग्रहंप्रयुङ्क्ते संभवति लिप्सा प्रयोक्त्री नचास्तिवचनंप्रब्रूयादित-रेभ्यश्चेति वृत्त्युपायप्राप्तौअतएवंप्रकृतं सर्वेषांब्राह्मणोविद्याद्वृत्त्युपायान्यथाविधि। प्रब्रूयादितरेभ्यश्चेति। यस्त्वाश्रित-शूद्रस्तस्यावश्यमुपदेशःकर्तव्यः। अविदुषा विधिप्रतिषेधाधिकृतक्रमात्संवासोनिषिद्धः नमूर्खैर्नावलिप्तैश्चेति। यत्तु व्याचक्षते धर्मशास्त्रोपदेशस्तदर्थव्याख्यानंवानेननिषिध्यते शास्त्रद्वयेन न चास्योपदिशेदिति एकेन शास्त्राध्ययनपरेणा-र्थव्याख्यानम्। अग्रन्थकस्तूपदेशोन केनचिन्निषिद्धः तेषामेवंवदतांतस्यशास्त्रविचारइतिसिद्धत्वात्पुनरुक्तम्। इदंतु बह्वयुक्तंव्याकरणादौ धर्मावबोधार्थशास्त्रेधर्मशब्दः। तद्धि न धर्मशास्त्रमतीन्द्रियार्थमितिप्रतिषेधानुपदेशाद्भवतितुधर्मशा-स्त्रावबोधार्थम्। शक्नोति हि वैयाकरणः पदार्थानुसारेणन गहनंवाक्यार्थमुन्नेतुम्। धर्मशास्त्रत्वाच्च तस्य शास्त्रद्वयने-नागतत्वात्पृथगुच्यते। युक्तमेतत् यदि कश्चिन्न ब्रूयात्प्रधानेऽनधिकृतस्य कुतोङ्गेषु प्राप्तिरिति। वेदस्मृतिशास्त्रेच प्रधा-ने न चतत्र शूद्रस्याधिकारः। नचास्यव्रतमादिशेत् व्रतशब्देन कृच्छ्राण्युच्यन्ते एतैर्व्रतैरितिप्रयोगदर्शनात्। तान्यभ्युदय-कामस्यनोपदिशेत्। प्रायश्चित्तार्थतयान्विष्यतएवोपदेशः। स्नातकव्रतानांप्राप्तिरेवनास्ति अस्नातकत्वात्। एवंसावित्र्यादी-नामप्यध्ययनाभावादध्ययनंचोपनयनाभावादुपनयनंचतद्विधौ जातित्रयश्रवणात्॥ ८०॥

(२) सर्वज्ञनारायणः। मतिदण्डनीतिशास्त्रादिविषयां। उच्छिष्टंभाण्डत्यक्तं। अहविष्कृतंयतआकृष्यहुतं-हविस्तंपुरोडाशादिहविःशेषं। धर्मंधर्मसाधनंव्रतंप्रायश्चितम्॥ ८०॥

(३) कुल्लूकः । शूद्राय मतिंदृष्टार्थोपदेशनं दद्यात् धर्मोपदेशस्य पृथङ्निर्देशात् । अदासशूद्रायोच्छिष्टंन दद्यात् दासगोचरतयोच्छिष्टमन्नंदातव्यमितिवक्ष्यमाणत्वाददोषः । द्विजोच्छिष्टंचभोजनमितिभोक्तुर्विधिर्दातुरुच्छिष्टदाननिषेधेपि यथासंभवलब्धविषयः । हविष्कृतमिति यस्यैकदेशोहुतःसहविःशेषोन दातव्यः । धर्मोपदेशोन शूद्रस्य कर्तव्यः व्रतंचास्य प्रायश्चित्तरूपंसाक्षान्नोपदिशेत् किंतु ब्राह्मणंमध्ये कृत्वा तदुपदेशव्यवधानात् । यथाहाङ्गिराः तथा शूद्रंसमासाद्य सदाधर्मपुरःसरम् । अन्तरा ब्राह्मणंकृत्वा प्रायश्चित्तंसमादिशेत् ॥ प्रायश्चित्तमितिसकलधर्मोपदेशस्योपलक्षणार्थम् ॥ ८० ॥

(४) राघवानन्दः । मतिं दृष्टार्थबुद्धिं । हविष्कृतं हुतावशिष्टं । व्रतं प्रायश्चित्तं । एतद्ब्राह्मणमन्तरावधिकृत्वोपदिशेत् । श्रावयेच्चतुरोवर्णान् कृत्वा ब्राह्मणमग्रतइत्युक्तेः । अन्यथातेषांधर्माद्यननुष्ठानापत्तिः । अस्य शूद्रस्यसाक्षादिति शेषः ॥ ८० ॥

(५) नन्दनः । मतिंपरेणाविज्ञातमुपायम् । भोजनपात्रस्थमुच्छिष्टमन्नंनतुस्थाल्यादिस्थितम् । हविष्कृतंहविष्ट्वेन कल्पितमृत्विग्भिर्भक्षितशिष्टंपुरोडाशादिकम् । धर्मंश्रौतस्मार्तादिकम् । व्रतंस्नातकव्रतादि न मतिंदद्यादित्येव सिद्धेधर्मनोपदिशेदितिपुनर्निषेधोदोषातिशयप्रकाशनार्थः ॥ ८० ॥

(६) रामचन्द्रः । शूद्राय मतिं सन्मतिं नीतिशास्त्रादि विषयां न दद्यात् । उच्छिष्टं अतिथेःभुक्तोच्छिष्टं हविष्कृतं देवनिमित्तं पुरोडाशादि शूद्राय न । च पुनः अस्य शूद्रस्य व्रतं प्रायश्चित्तमापदि ॥ ८० ॥

योह्यस्य धर्ममाचष्टे यश्चैवादिशति व्रतम् ॥ सोऽसंवृतं नाम तमः सह तेनैव मज्जति ॥ ८१ ॥

(१) मेधातिथिः । पूर्वस्य प्रतिषेधस्यनिन्दार्थवादः । तेनैवसहेति । उभयोर्दोषमाह । शृण्वतःश्रावयतश्चमज्जत्यवगाहते तत्प्राप्नोतीति यावत् ॥ ८१ ॥

(२) सर्वज्ञनारायणः । तमोनरकंसह तेनैव गच्छति यदि शूद्रोपि पापान्तरेण तल्लोकगामी । अन्यथा तूपदेष्टैव याति ॥ ८१ ॥

(३) कुल्लूकः । यस्माद्योऽस्य शूद्रस्य धर्मंब्रूते यश्च प्रायश्चित्तमुपदिशति सतेन शूद्रेणैव सहासंवृताख्यंतमोगहनंनरकंप्रविशति । पञ्चसु पूर्वोक्तेषु द्वयोर्दोषकथनंप्रायश्चित्तगौरवार्थम् ॥ ८१ ॥

(४) राघवानन्दः । विपक्षे दण्डमाह यइति । असंवृतंनामतमोनरकंतेन शूद्रेण सह मज्जत्येवेत्यन्वयः ॥ ८१ ॥

(५) नन्दनः । अत्र निन्दार्थवादमाह यइति । अस्य शूद्रस्य । तेन शूद्रेण ॥ ८१ ॥

(६) रामचन्द्रः । यः अस्य शूद्रस्य धर्मंसमाचष्टे यःव्रतंदिशति सअसंवृतंनाम तमः नरकं तेनैव सहमज्जति॥८१॥

न संहताभ्यां पाणिभ्यां कण्डूयेदात्मनः शिरः ॥ न स्पृशेच्चैतदुच्छिष्टोन च स्नायाद्विना ततः ॥८२॥

(१) मेधातिथिः । संहताभ्यांसंश्लिष्टाभ्यामितरेतरसंसृष्टाभ्यांयुगपद्वाभ्यांप्रतिषेधः । पाणिभ्यामितिबाहू संहतौ निषेधति । आत्मनइति न परस्य । अतश्चान्येन संहताभ्यांकण्डूयतोनदोषः । शिरोग्रहणात्पृष्ठादावदोषः । न स्पृशेच्चैवशिरोहस्तेनात्मनोऽन्यहस्तेन वाऽवयवेनेतिकेचित् । तत्र पाणिभ्यामितिप्रकृतत्वात् । न च स्नायाच्छिरसा विना । नित्यनैमित्तकयोः स्नानयोरयंविधिः । ननु क्लिन्नस्य लौकिकेस्नानेकुतएतत् । स्नानविधिनैकवाक्यत्वात् । विहितस्नानापेक्षा प्रत्यासत्त्या युक्तिमतिलोके तुविधेरभावादप्राप्तिः । स्नातिश्चायंसर्वाङ्गसंबन्धिनिसलिलगोमूत्रादिप्रक्षालने वर्तते शिरोवर्जिते च तत्र चण्डालादिस्पर्शनेशिरोवर्जितमपियदृच्छाप्रसक्तंनिवार्यते । न च स्नायाद्विना ततः अस्ति च लौकिकमर्धशिरस्कमपिस्नानंयेनशिरःस्नानं शिरःस्नातस्तुतैलेनेति ॥ ८२ ॥

(२) **सर्वज्ञनारायणः** । संहताभ्यांसंयुक्ताभ्यां एतच्छिरः । ततःशिरसोविना शिरोवर्जितांगैर्न स्नायादित्यर्थः । अशिरस्कंभवेत्स्नानंस्नानाशक्तौ तु कर्मिणामित्यन्यत्रोक्तं ॥ तेनायंसशिरःस्नानशक्तविषयोनिषेधः ॥ ८२ ॥

(३) **कुल्लूकः** । संश्लिष्टाभ्यांपाणिभ्यांन कण्डूयेदात्मनःशिरः । उच्छिष्टःस्वशिरोन स्पृशेत् । शिरसा विनोन्मज्जनव्यतिरेकेण नित्यनैमित्तिकस्नाने न कुर्यात् दृष्टार्थे शिरोव्यतिरिक्तगात्रप्रक्षालने न दोषः । स्नानशक्तस्य चायंनिषेधः अशक्तस्यतु । अशिरस्कंभवेत्स्नानंस्नानाशक्तौ तु कर्मिणामिति जाबालिना विहितमेव ॥ ८२ ॥

(४) **राघवानन्दः** । किंचनेति एतच्छिरः । ततः शिरसःशिरोवर्जं न स्नायात् शक्तस्यायंनिषेधः । न त्वशक्तस्य । अशिरस्कंभवेत्स्नानंस्नानाशक्तौतु कर्मिणां । आर्द्रेण वाससा वापिदैहिकंमार्जनंविदुरिति याज्ञवल्क्योक्तेः ॥ ८२ ॥

(५) **नन्दनः** । आत्मग्रहणात्परस्याप्रतिषेधः शिरोग्रहणादवयवान्तराणाम् । एतच्छिरः । असंहताभ्यामप्युच्छिष्टेन स्पृशेत् । ततःशिरसोविनान च स स्नायात् । नित्यनैमित्तिकयोःकर्मणोरदृष्टार्थस्नानविषयमेतत् ॥ ८२ ॥

(६) **रामचन्द्रः** । उच्छिष्टः सन् एतत् शिरः न स्पृशेदित्यर्थः ॥ ८२ ॥

केशग्रहान्प्रहारांश्च शिरस्येतान्विवर्जयेत् ॥ शिरःस्नातश्च तैलेन नाङ्गंकिंचिदपि स्पृशेत् ॥ ८३ ॥

(१) **मेधातिथिः** । आत्मनःपरस्यवेत्यविशेषेणकेचिदिच्छन्ति । अन्येत्वात्मनइतिप्रकृतमभिसंबध्नन्ति । क्रोधनिमित्तश्चायंप्रतिषेधः । सुरतसंभोगे तु कामिन्याः केशग्रहः सननिषिध्यते । शिरःस्नानंक्षालितमनेनेतिराजदन्तादेराकृतिगणत्वात्परनिपातः । शिरःस्नातइतिबाहुलकेनसमासः । नाङ्गमात्मीयम् ॥ ८३ ॥

(२) **सर्वज्ञनारायणः** । केशग्रहान्परेण स्वशिरःकेशग्रहणप्रहारान् शिरसि स्वयमपि शिरःस्नातःसन्स्वाङ्गमन्यदपि तैलेन न स्पृशेत् । न म्रक्षयेत् । एतच्च तद्दिवसएव न रात्राविति शिष्टाचारात् ॥ ८३ ॥

(३) **कुल्लूकः** । कोपेन केशग्रहप्रहारौ शिरसि वर्जयेत् । कोपनिमित्तत्वाच्चात्मनःपरस्य च प्रतिषेधः । अतएव सुरतसमये कामिनीकेशग्रहस्यानिषेधः । सशिरस्कस्नातश्चतैलेन न किंचिदप्यङ्गंस्पृशेत् । अथवा तैलेनेति काकाक्षिवदुभयत्र संबध्यते तैलेन शिरःस्नातःतैलेन पुनःकिंचिदप्यङ्गंन स्पृशेत् अतोरात्रौ शिष्टानामतैलशिरःस्नातानांतैलेन पादाभ्यङ्गसमाचरणमविरुद्धम् ॥ ८३ ॥

(४) **राघवानन्दः** । केशग्रहानितिशिरस्येवकेशपदमुत्कटधम्मिल्लपरं क्रुद्धःसन्निति शेषः। अतःसुरतसमयेकामिनीकेशप्रदेशग्रहे न दोषः । शिरःस्नातस्तुशिरसितैलंदत्वा नान्येष्वङ्गेषुतद्दद्यादिति केचित् । वस्तुतस्तु कृतशिरस्नानस्तैलाभ्यक्तो न स्यात् । तैलस्नाने स्नानशब्दस्य भाक्तत्वात् । युगपत्सर्वाङ्गीणजलसंबन्धस्य तत्वात्स्पर्शनस्य करणापेक्षत्वाच्च । दाक्षिणात्यानांमातुलकन्यापरिणयवत् रात्रौ गौडीयानांपादाभ्यङ्गोदेशाचारः ॥ ८३ ॥

(५) **नन्दनः** । शिरःस्नातः कृतकेशवापनः ॥ ८३ ॥

न राज्ञः प्रतिगृह्णीयादराजन्यप्रसूतितः ॥ सूनाचक्रध्वजवतां वेशेनैव च जीवताम् ॥ ८४ ॥

(१) **मेधातिथिः** । उक्तंराजतोधनमन्विच्छेदिति । राजशब्दश्चायंक्षत्रियजातावक्षत्रियेऽपिजनपदेश्वरे दृष्टप्रयोगो ब्राह्मणानांराज्यमिति । तत्र प्रतिग्रहविधौ तन्निषेधेचजनपदेश्वरवचनोगृह्यतेयेनाह अराजन्यप्रसूतितइति । जनपदेश्वर्यंहि सर्ववर्णसंभवि लिप्सया । अतोविशेष्यते । राजन्यात्क्षत्रियाद्यस्यप्रसूतिरुत्पत्तिर्नास्ति । तस्माद्ब्राह्मोजनपदेश्वरान्न

गृह्णीयात् । क्षत्रियादपि लुब्धादुच्छास्त्रवर्तिनोवक्ष्यमाणेन प्रतिषेधेन । सूनापशुमारणसंज्ञकपूर्वकेणमांसक्रयेणयोजीवतिससूनावान् । खटिकइतिलोके प्रसिद्धः । ध्वजी मद्यपण्यस्तत्क्रयविक्रयजीवी । वेशःपण्यवृत्तिस्तयायोजीवतिस्त्रीवापुमान्वा ॥ ८४ ॥

(२) सर्वज्ञनारायणः । राज्ञोजनपदपालकस्य अराजन्यप्रसूतेर्विप्रादेः । सूनेतिदशमहाप्राणिवधस्थानंसूना तत्प्रवर्तकःसूनावान् तिलनिष्पीडकश्चक्रवान् शौण्डिकःसुराध्वजवत्तया ध्वजवान् वेशनाह्लोपस्कारेण जीवन्वेश्याजनः । एषामपि न ग्राह्यमापद्यपि ॥ ८४ ॥

(३) कुल्लूकः । राजन्यशब्दःक्षत्रियवचनः । अक्षत्रियप्रसूतस्य राज्ञोधनंनप्रतिगृह्णीयात् राजतोधनमन्विच्छेदित्युक्तंतस्यायंविशेषउक्तः । सूनाचक्रध्वजवतामिति सूनावतांचक्रवतांध्वजवतांच । सूना प्राणिवधस्थानंतद्यस्यास्तीति ससूनावान्पशुमाणरपूर्वकमांसविक्रयजीवी । चक्रवान्बीजवधविक्रयजीवी तैलिकः । ध्वजवान्मद्यविक्रयजीवी शौण्डिकः । वेशःपण्यस्त्रियाभृतिस्तयायोजीवति स्त्रीपुमान्वा सवेशवान् । एतेषांच न प्रतिगृह्णीयात ॥ ८४ ॥

(४) राघवानन्दः । राजतोधनमन्विच्छेदिति सीदत्कुटुम्बस्य राजप्रतिग्रहस्योक्तत्वात् प्रजापालनकर्तरिअतज्जातौ राजपदंभाक्तमिति मीमांसास्तबके स्थापितं अतोतज्जातेःप्रतिग्रहोनिषिद्धइतिसार्थवादमाहनेतिअर्धभिः । सूना स्वयंनिहत्य मांसविक्रयः । चक्रंतिलादिपेषणं । ध्वजोमद्यंएतद्वतां । वेशः संभोगार्थस्त्रीपुंसयोर्भृतिः ॥ ८४ ॥

(५) नन्दनः । राजतोधनमन्विच्छेदिति यदुक्तंतत्र नियममाह नेति । राज्ञोऽपत्यंराजन्यः क्षत्रियइतियावत् । तस्मात्प्रसूतिर्यस्यसराजन्यप्रसूतिः । अराजन्यप्रसूतितोऽराजन्यप्रसूतेः । षष्ठ्यर्थेतसिर्द्रष्टव्यः । तस्यद्रव्यंनप्रतिगृह्णीयात् । सूनाचक्रध्वजवताम् सूना हिंसातद्वान्सूनावान् चक्रंतैलयन्त्रं तद्वांश्चक्रवान् । सुरायाउत्पादकःसुराध्वजस्तद्वान्ध्वजवान् सुराकारीत्यर्थः । वेशोवेश्याकर्म ॥ ८४ ॥

(६) रामचन्द्रः । अराजन्यप्रसूतितः न राजवंशोद्भवः तस्य अक्षत्रवंशप्रसूतितः राज्ञः सकाशात् प्रतिग्रहं न गृह्णीयात् । सूनी हिंसकः । चक्री तैलिकः । ध्वजी मद्यकर्ता । एतेषां वेशंनेवजीवतांप्रतिग्रहं न च गृह्णीयात ॥ ८४ ॥

दशसूनासमं चक्रं दशचक्रसमोध्वजः ॥ दशध्वजसमोवेशो दशवेशसमोनृपः ॥ ८५॥

(१) मेधातिथिः । उत्तरस्योत्तरस्य दोषगुरुत्वज्ञापनार्थमेतत् । आपद्युपायोवक्ष्यते ॥ ८५ ॥

(२) सर्वज्ञनारायणः । दशसूनासमं तावत्पापयुक्तं । सूनादिपदानि तद्वल्लक्षकानि वेश्यानु स्वपदेनैवोपात्ता तत्रापि वेशइति पठन्ति । नृपोऽराजन्यप्रसूतिस्तत्प्रक्रमात् । एवंराजेत्यत्रापि ॥ ८५ ॥

(३) कुल्लूकः । गोविन्दराजस्तु दशवेश्यासमोनृपइतिपठति । मेधातिथिप्रभृतयःप्राञ्चोदशवेशसमोनृपइतिपठन्ति । सूनादिशब्दैस्तद्वानुपलक्ष्यते । दशसूनावत्सु यावान्दोषस्तावानेकस्मिंश्चक्रवति तैलिके । यावान्दशसु तैलिकेषु दोषःतावानेकध्वजवति शौण्डिके । यावान्दशसु ध्वजवत्सु दोषस्तावानेकत्र वेशवति । यावान्दशसु वेशवत्सु दोषस्तावानेकत्र राजनि उत्तरोत्तरनिन्दाचेयंपूर्वदातृसंभवे सत्युत्तरवर्जनार्थमपेक्षया योज्यते ॥ ८५ ॥

(४) राघवनन्दः । एतेषांसौनिकादिचतुर्णामपि प्रतिग्रहोन कार्यः दोषवत्त्वेप्येतेषांनाराजन्यनृपतुल्यतेत्याह दशेति । सूनायादोषप्रायश्चित्तार्थंसंकरीकरणंखरोष्ट्रमृगेभाणामित्युक्तं । तद्दशगुणश्चक्रिणि तद्दशगुणःशौण्डिके तद्दशगुणोवेश्यायां ।

---

(८५) दशध्वजसमोवेशोदशवेशसमोनृपः=दशध्वजसमा वेश्यादश वेश्यासमोनृपः (ज, झ, ट, ठ, ड, ढ)

तद्दशगुणोनृपइति आपदिपूर्वपूर्वालाभउत्तरोत्तरस्य धनंग्राह्यमितितात्पर्यं उत्तरोत्तरस्य दोषाधिक्यात् । गोविन्दराजस्तु दशवेश्यासमइति पठति ॥ ८५ ॥

(५) नन्दनः । एतेषांतारतम्यमाह दशेति । नृपः अराजन्यप्रसूतिरिति विभक्तिपरिणमय्यानुषज्यते । राजनिन्दार्थोदशसूनादीनामुपन्यासइतिकेचित् ॥ ८५ ॥

(६) रामचन्द्रः । चक्री तैलिकः दशसूनासमः ॥ ८५ ॥

दशसूनासहस्राणि योवाहयति सौनिकः ॥ तेन तुल्यः स्मृतोराजा घोरस्तस्य प्रतिग्रहः ॥ ८६ ॥

(१) मेधातिथिः । सूनया चरति सौनिकः । वाहयति स्वार्थसाधने व्यापारयति । घोरः भीषणोयंनरकादिहेतुत्वात् अवयुत्यवादेनराजप्रतिग्रहेनिन्दा ॥ ८६ ॥

(२) सर्वज्ञनारायणः । दशसूनासहस्राणीत्युक्तार्थसङ्क्षेपः ॥ ८६ ॥

(३) कुल्लूकः । सूनया चरतीति सौनिकः एवंसंकलनया यःसौनिकोदशसहस्राणि स्वार्थे व्यापादयति तेन तुल्योराजा मन्वादिभिःस्मृतः । तस्मात्तस्य प्रतिग्रहोनरकहेतुत्वाद्भयानकः क्षत्रियस्यापि च ॥ ८६ ॥

(४) राघवानन्दः । सूनया चरति सौनिकः एवंसंकलनया यानि सूनादशसहस्राणि वाहयति स्वार्थेव्यापारयति यःससौनिकः तेन तुल्योराजा अराजन्यस्तस्य प्रतिग्रहोघोरोभीषणः ॥ ८६ ॥

(५) नन्दनः । वाहयति प्रवर्तयति राजाअराजन्यप्रसूतिरित्येव ॥ ८६ ॥

(६) रामचन्द्रः । दशेति । दश सूनासहस्राणि यः वाहयति तेन तुल्यःस्मृतोराजा सौनिकः । सूना प्राणिहिंसा अराजन्यप्रसूतितः राज्ञः प्रतिग्रहोघोरः ॥ ८६ ॥

योराज्ञः प्रतिगृह्णाति लुब्धस्योच्छास्त्रवर्तिनः ॥ सपर्यायेण यातीमान्नरकानेकविंशतिम् ॥ ८७ ॥

(१) मेधातिथिः । लुब्धआदानशीलः सामन्तकादिभ्यः श्रुतशीलंचविज्ञायेत्यादि । उच्छास्त्रवर्तीशास्त्रमतिक्रम्य व्यवहरति । असद्दण्डपरस्त्रीहरणादिना पर्यायेणैकत्र फलमनुभूयान्यत्र गच्छति । नरकशब्दोनिरतिशयदुःखवचनः । केवलदुःखश्रवणार्थापत्त्या वादेशविशेषवचनः । एकविंशतिसंख्याऽर्थवादः ॥ ८७ ॥

(२) सर्वज्ञनारायणः । राज्ञोराजन्यजातीयस्यापि लुब्धस्यवा शास्त्रविरुद्धाचरणशीलस्यवा योगृण्हाति तस्य वक्ष्यमाणोदोषः । पर्यायेण क्रमेण ॥ ८७ ॥

(३) कुल्लूकः । योराज्ञःकृपणस्य शास्त्रोल्लङ्घनेन प्रवर्त्तमानस्य प्रतिग्रहंकरोति सक्रमेणैतान्वक्ष्यमाणैकविंशतिनरकान्गच्छति ॥ ८७ ॥

(४) राघवानन्दः । उक्तंदूषणमाह योराज्ञइत्यनुवादमात्रं घोरनरकसंबन्धाय । लुब्धस्य परधनगर्धिनः कृपणस्यवा । एकविंशतिनरकलक्षणंमार्कण्डेयपुराणोक्तंज्ञेयम् । याति भोगाय गच्छतीत्यर्थः ॥ ८७ ॥

(५) नन्दनः । राजन्यप्रसूतेरपि लुब्धस्योच्छास्त्रवर्तिनोधनप्रतिग्रहे दोषमाह यइति । इमान्वक्ष्यमाणान् ॥ ८७ ॥

(६) रामचन्द्रः । एतादृशस्य राज्ञः यः प्रतिग्रहंगृह्णाति सः पर्यायेण क्रमेणइमान् एकविंशतिनरकान् याति॥८७॥

तामिस्रमन्धतामिस्रंमहारौरवरौरवौ ॥ नरकं कालसूत्रंच महानरकमेव च ॥ ८८ ॥

(२) सर्वज्ञनारायणः । नरकमितिकालसूत्रविशेषणम् ॥ ८८ ॥

(३) कुल्लूकः । पूर्वश्लोके सामान्यतोनरकानिमानेकविंशतिमित्युक्तमिदानींतानेव नामतोनिर्दिशति तामिस्रमिति त्रिभिः । एतेषांनरकाणांस्वरूपंमार्कण्डेयपुराणादिषु विस्तरेणोक्तंतत्रैवावगन्तव्यम् ॥ ८८ ॥ ८९ ॥ ९० ॥

(५) नन्दनः । नरकानाह तामिस्रमिति ॥ ८८ ॥

(६) रामचन्द्रः । नरकाणांनामान्याह तामिस्रमितित्रिभिः ॥ ८८ ॥

संजीवनं महावीचिं तपनं संप्रतापनम् ॥ संहातं च सकाकोलं कुड्मलं प्रतिमूर्तिकम् ॥ ८९ ॥

लोहशङ्कुं मृजीषं च पन्थानं शाल्मलींनदीम् ॥ असिपत्रवनं चैव लोहदारकमेव च ॥ ९० ॥

(२) सर्वज्ञनारायणः । पन्थानंसदा वर्त्मवहनेनश्रमहेतुं नदींवैतरणीं । लोहचारकं यत्र तप्तलोहोपरिगम्यते । तामिस्रादयोन्धःसंज्ञानरकभेदाः ॥ ९० ॥

एतद्विदन्तोविद्वांसोब्राह्मणाब्रह्मवादिनः ॥ न राज्ञः प्रतिगृह्णन्ति प्रेत्य श्रेयोऽभिकाङ्क्षिणः ॥ ९१ ॥

(१) मेधातिथिः । पूर्वस्यप्रतिग्रहनिषेधविधेरुपसंहारएषः । राज्ञःप्रतिग्रहोविविधदुःखनरकादिहेतुरितिजानन्तोविद्वांसोब्राह्मणान राज्ञः प्रतिगृह्णीयुः । प्रेत्यभवान्तरे । श्रेयः कल्याणम् । येकांक्षन्ति कामयन्ते । प्रेत्येति तु ल्यबन्तप्रतिरूपकंशब्दान्तरम् । ब्रह्मवेदस्तवदन्ति पठन्ति । विद्वद्ग्रहणंब्रह्मवादिग्रहणंचदुःखातिशयदर्शनार्थम् । तेषांचातीव प्रतिग्रहाद्दोषः । वक्ष्यति तस्मादपि विद्वान्बिभीयादिति ॥ ९१ ॥

(२) सर्वज्ञनारायणः । विद्वांसोवेदार्थज्ञाः ब्रह्मवादिनोवेदाध्येतारः राज्ञोराजमात्रस्य लुब्धत्वादिदोषाशङ्कया ॥ ९१ ॥

(३) कुल्लूकः । प्रतिग्रहोविविधनरकहेतुरितिजानन्तोब्राह्मणाधर्मशास्त्रपुराणादिविदोवेदाध्यायिनोजन्मान्तरेश्रेयःकामवन्तोन राज्ञः प्रतिगृह्णीयुःविदुषोहि प्रतिग्रहेनातीव दोषः । यतोवक्ष्यति तस्मादविद्वान्बिभीयादिति । तेषामपि निषिद्धोराजप्रतिग्रहःप्रचुरप्रत्यवायफलकइतिदर्शयितुंविद्वद्ग्रहणंब्रह्मवादिग्रहणंच ॥ ९१ ॥

(४) राघवानन्दः । एतदुक्तंनरकसाधनत्वं । विद्वांसोधर्मशास्त्रपुराणादिविदः । ब्रह्मवादिनोवेदार्थनिपुणाअपि प्रेत्य श्रेयोभिकाङ्क्षिणः अराजन्यप्रसूतेराज्ञोन प्रतिगृह्णन्तीत्यर्थः ॥ ९१ ॥

(५) नन्दनः । उक्तंनिगमयति एतदिति । एतदेकविंशतिनरकपतनम् । राज्ञः क्षत्रियस्याक्षत्रियस्यचलुब्धस्योच्छास्त्रवर्तिनः ॥ ९१ ॥

(६) रामचन्द्रः । ब्रह्म वेदं वदन्ति ते ब्रह्मवादिनः एतत् नरकस्वरूपं विदन्तः जानन्तः । राज्ञः प्रतिगृह्णन्ति । कीदृशा ब्राह्मणाः प्रेत्य परलोके श्रेयोभिकाङ्क्षिणः ॥ ९१ ॥

ब्राह्मे मुहूर्ते बुध्येत धर्मार्थौ चानुचिन्तयेत् ॥ कायक्लेशांश्च तन्मूलान्वेदतत्त्वार्थमेव च ॥ ९२ ॥

(१) मेधातिथिः । त्रियामा रात्रिस्तस्याः पश्चिमोब्राह्मोमुहूर्तस्तत्र निद्रांत्यजेत् । विबुद्धश्च तस्मिन्कालेधर्मार्थावनुचिन्तयेत् । यस्मिंश्चधर्मआसेव्यमाने यादृशः शरीरक्लेशोभवतितमपि चिन्तयेत् । स्वल्पश्चेद्धर्मोमहान्तंकायक्लेशंजनयति

---

(८९) कुड्मलंप्रतिमूर्तिकम्=कुड्मलंपूतिमृत्तिकम् (क, ख, ग, घ, च, ण, अ, द)
संहातम्=संघातम् (ल, न, ब, य, र, भ)

योधर्मान्तरविरोधी तंपरिहरेत् । अर्थोऽपि सेवादिरतिक्लेशकरः । सोऽपि वर्ज्यः । सर्वतएवात्मानंगोपायेदिति । अनिश्चित्य न किंचित्कुर्यात् । न च मनोराज्यादिविकल्पान्कुर्यात् । स्वभावो ह्ययंपुरुषाणामसति बाह्ये व्यापारे मनसोविकल्पाः परद्रव्याभिलाषादिरूपाः समुद्भवन्ति । तन्निवृत्त्यर्थमिदंपुरुषार्थम । तस्यांवेलायांसाध्यसाधनभावेन चिन्त्योवेदस्य तत्त्वार्थः । रहस्यमात्मज्ञानंचिन्तयेद्वेदान्तविधिनाऽभ्यस्येत् । अथवा कर्मकाण्डेऽपियंवेदस्तस्यार्थस्तंनिरूपयेत् । अयंविधिरयमर्थइदंकर्मैवंरूपमियमत्रदेवतेदंद्रव्यमयमत्राधिकारीयमितिकर्तव्यतेत्यादिस्वबुद्ध्यानिश्चिनुयात् । व्याख्यातॄणांमतभेदाद्धेतून्निरूपयेदस्य सम्यग्ज्ञानमस्यभ्रान्तिरिति ॥ ९२ ॥

(२) **सर्वज्ञनारायणः** । ब्राह्मोमुहूर्तउषःकालः । धर्मार्थौ धर्मार्थसाधने अनुचिन्तयेदूहापोहाभ्यांविविच्य निर्धारयेत् । एतद्रागिणःकार्यमुक्तं । विरक्तस्यचाह कायक्लेशानिति तन्मूलांस्तथा वेदस्य तत्वतात्पर्यविषयमर्थंब्रह्म ॥ ९२ ॥

(३) **कुल्लूकः** । ब्राह्मोमुहूर्तोरात्रेःपश्चिमोयामः ब्राह्मी भारती तत्प्रबोधहेतुत्वात् । मुहूर्तशब्दोऽत्र कालमात्रवचनः । तत्र बुध्येत । दक्षेणापि प्रदोषपश्चिमौ यामौ वेदाभ्यासेन तौ नयेत् । यामद्वयंशयानोहि ब्रह्मभूयाय कल्पतइतिब्रुवता ॥ तत्र प्रबोधोऽभ्यनुज्ञातः । गोविन्दराजस्तु रात्रेःपश्चिमे मुहूर्ते बुध्येतेत्याह । धर्मार्थौ च परस्पराविरोधेनानुष्ठानार्थमवधारयेत् । तथा धर्मार्थार्जनहेतून्कायक्लेशान्निरूपयेत् । यदि महान्कायक्लेशोऽल्पौ च धर्मार्थौ वा तदा तंपरिहरेत् । वेदस्य तत्त्वार्थं ब्रह्मकर्मात्मकंनिश्चिनुयात्तस्मिन्समये बुद्धिप्रकाशात् ॥ ९२ ॥

(४) **राघवानन्दः** । स्नातकस्य कृत्यंप्रतिजानीतेब्राह्मेति रात्रेःपश्चिमोयामोब्राह्ममुहूर्तः ब्राह्मी भारती तत्प्रबोधहेतुत्वात् । मुहूर्तशब्दोत्र कालमात्रवचनः तत्र बुध्येत । दक्षेणापि प्रदोषपश्चिमौ यामौवेदाभ्यासेन तौ नयेत् । यामद्वयंशयानोहि ब्रह्मभूयाय कल्पतइति ब्रुवता तत्र बोधोभ्यनुज्ञातः । गोविन्दराजस्तुरात्रेःपश्चिमे मुहूर्ते बुध्येतेति तन्मूलान् धर्मार्थाश्रयहेतून् । तत्रापि स्वल्पफलबह्वायासांस्त्यजेदित्यर्थः । वेदतत्त्वार्थं ब्रह्म चिन्तयेदिति भावः ॥ ९२ ॥

(५) **नन्दनः** । अथसंक्षेपतोनित्यकर्तव्यमाह ब्राह्मइति । ब्राह्मोमुहूर्तो रात्रेः पश्चिमोयामः ॥ ९२ ॥

(६) **रामचन्द्रः** । तन्मूलान्धर्मार्थमूलान् कायक्लेशान् चिन्तयेत् । तत्वार्थमेव चिन्तयेत् ॥ ९२ ॥

उत्थायावश्यकं कृत्वा कृतशौचः समाहितः ॥ पूर्वां सन्ध्यां जपंस्तिष्ठेत्स्वकाले चापरां चिरम् ॥ ९३ ॥

(१) **मेधातिथिः** । अनन्तरंप्रभातायांशयनंरात्रौ जह्यात् । आवश्यकंमूत्रविट्त्यागः । प्रायेणतस्यांवेलायांपुरुषस्तंकुर्वीत । तत्र आवश्यकस्त्यागउच्यते मुखदन्तधावनादिश्च तंकृत्वाकृतशौचः एकालिङ्गेत्यादिविधिनाऽऽचान्तः । समाहितोविकल्पान्तरतिरस्कारेण सन्ध्यांतिष्ठेत् । जपन्सावित्रींभगवतिसवितरि मनोदध्याच्चिरं । अर्कदर्शनावधिः कालउक्तः सन्ध्यासमयः । ततोऽप्यधिककालंजपेदायुःकामइत्येवमर्थमयंप्रागुक्तः सान्ध्योविधिरन्तर्हितः । अपरांचसन्ध्यांस्वेकालेभस्तमयसमयादारभ्यतारकोदयादूर्ध्वमपि ॥ ९३ ॥

(२) **सर्वज्ञनारायणः** । आवश्यकंमूत्रत्यागादि । जपंस्तिष्ठेदितिष्ठञ्जपेदित्यर्थः । स्वकाले स्वीये अपरांसायन्तनीं चिरमितिपूर्वसन्ध्यातोधिकजपकरणमुक्तं । एतच्चासीनेनेति ब्रह्मचारिप्रकरण उक्तमेव ॥ ९३ ॥

(३) **कुल्लूकः** । ततउषःकाले शय्यायाउत्थाय सति वेगे मूत्रपुरीषोत्सर्गंकृत्वाअत्रकृतवक्ष्यमाणशौचोऽनन्यमनाः पूर्वांसन्ध्यांचिरगायत्रीजपंकुर्वन्वर्तेतार्कदर्शनात् । अयंविधिःप्रातःसन्ध्यायामुक्तः । उदयादूर्ध्वमपिजपेदायुरादिकामइतिविधानार्थोयमारम्भः । अपरामपि सन्ध्यांस्वकाले प्रारभ्य तारकोदयादूर्ध्वमपि जपन्नासीत ॥ ९३ ॥

(४) राघवानन्दः । उत्थाय शय्यातः । विण्मूत्रोत्सर्गादिकमाचरेदित्यावश्यकम । कृतशौचः एकाग्रित्यादिना । समाहितआचान्तःपूर्वामासूर्योदयाज्जपंस्तिष्ठेत । अपरां सायन्तनीं स्वकाले तारकोदयादूर्ध्वमपि जपन्नासीतेति-चिरं सम्यगृक्षविभावनादित्यत्रोक्तम ॥ ९३ ॥

(५) नन्दनः । स्वकालेऽर्धास्तमितभास्करे । चिरमासीतेत्यध्याहार्यम ॥ ९३ ॥

(६) रामचन्द्रः । उत्थाय आवश्यकं मूत्रपुरीषादि कृत्वा । कृतशौचः पूर्वांसन्ध्यां गायत्रीं जपन स्वे काले सूर्योदयपर्यन्तं तिष्ठेत । अपरां सायंकाले चिरंतिष्ठेत । नक्षत्रदर्शनपर्यन्तं जपंस्तिष्ठेत । आतारकोदयात ॥ ९३ ॥

ऋषयोदीर्घसन्ध्यत्वाद्दीर्घमायुरवाप्नुयुः ॥ प्रज्ञां यशश्च कीर्तिंच ब्रह्मवर्चसमेव च ॥ ९४ ॥

(१) मेधातिथिः । यदर्थोऽयंपुनर्विधिस्तद्दर्शयति । आयुरादिफलकामोदीर्घकालसन्ध्याजपंकुर्यात । सत्यपि नित्यत्वे दैर्घ्याद्गुणात्फलमिदंअनग्निकस्यप्रोषितस्यैतत्संभवति । अन्यस्य त्वग्निहोत्रकालोपरोधोदीर्घसन्ध्याविधिसंपादनात । दीर्घसन्ध्यागुणतउच्यते । सन्ध्यासहचरितेजपादिविधौ सन्ध्याशब्दोवर्तते । दीर्घासन्ध्यैषामितिबहुव्रीहिः । ऋषिग्रहणमर्थवादः ॥ ९४ ॥

(२) सर्वज्ञनारायणः । अवाप्नुयुरवाप्नुवन । यशः परैःस्वगुणानांज्ञानं कीर्तिस्तेषांपरैःकीर्तनम ॥ ९४ ॥

(३) कुल्लूकः । आयुरादिकामाधिकारोऽयमितिदर्शयन्नाह ऋषयइति । सन्ध्याशब्दोऽत्र सन्ध्यानुष्ठेयजपादिपरः यस्मादृषयोदीर्घसन्ध्यानुष्ठानाद्दीर्घमायुर्जीवन्तःप्रज्ञांयशोऽमृतांच कीर्तिमध्ययनादिसंपन्नंयशश्च प्राप्नुयुः तस्मादायुरादिकामश्चिरंसन्ध्यामुपासीत ॥ ९४॥

(४) राघवानन्दः । तत्रार्थवादमाह ऋषयइति । दीर्घसन्ध्यत्वात्सन्ध्याशब्दोत्रानुष्ठितजपसङ्ख्यापरःसहस्रपरमामित्युक्तेः ॥ ९४ ॥

(५) नन्दनः । सन्ध्योपासनं प्रशंसति ऋषयइति । दानधर्मकृताख्यातिर्यशः । त्यागकृताकीर्तिः ॥ ९४ ॥

(६) रामचन्द्रः । प्रज्ञादिसर्वं अवापुः ॥ ९४ ॥

श्रावण्यां प्रौष्ठपद्यां वाप्युपाकृत्य यथाविधि॥युक्तश्छन्दांस्यधीयीत मासान्विप्रोऽर्धपञ्चमान्॥९५॥

(१) मेधातिथिः । श्रवणयुक्ता पौर्णमासी श्रावणी । एवंप्रोष्ठपदी । तत्रोपाकृत्योपाकर्माख्यंकर्मकृत्वा यथाविध्यधीयीत । प्राक्कूलानित्यादिप्रागुक्तोविधिः स्मर्यते । युक्तस्तत्परः । छन्दांसिवेदान । छन्दः शब्दोऽयंवेदवचनोन गायत्र्यादिवचनस्तेनब्राह्मणादीनप्यधीयानस्यैषपरमविधिः । उभयत्रापि चायंयुक्तएवमत्ययाविशेषात । अयंविकल्पोव्यवस्थितः । छन्दोगाः प्रौष्ठपद्यामुपाकुर्वन्ति बह्वृचाअध्वर्यवः श्रावण्याम ॥९५॥

(२) सर्वज्ञनारायणः । श्रावणस्य पूर्णिमाश्रावणी । भाद्रपदस्य प्रौष्ठपदी उपाकृत्य वेदमारभ्य यथाविधि गृह्योक्तविधिना युक्तःसर्वदा युक्तः । अध्यापयेदितिवाच्ये अधीयीतेति अध्येतुर्ब्रह्मचारिणोप्ययमेवाध्ययनकालइतिदर्शयितुमुक्तम । अध्ययनपदेन वाच्याध्यापनमपिगृह्यते न त्वध्यापनपदेनाध्ययनमिति स्नातकप्रकरणे त्वस्याभिधानं । उपाकर्मोत्सर्गहोमयोराचार्यस्योपासने करणार्थम । अर्धपञ्चमान्पञ्चमस्यार्धेन सहितांश्चतुरोमासान । श्रावण्यांचेत ॥ ९५॥

(३) कुल्लूकः । श्रावणस्य पौर्णमास्यांभाद्रपदस्य वा स्वगृह्यानुसारेणोपाकर्माख्यंकर्म कृत्वा सार्धांश्चतुरोमासान्ब्राह्मणउद्युक्तोवेदानधीयीत ॥ ९५ ॥

(४) राघवानन्दः । श्रावण्यां भाद्रपदपौर्णमास्यांवा स्वगृह्यानुसारेण उपाकर्म कृत्वा छन्दांसिमन्त्रब्राह्मणा-दीनि छन्दःशब्दस्यात्र वेदवचनत्वात् सार्धचतुरोमासानधीयीत ॥ ९५ ॥

(५) नन्दनः । इदानीमुपाकरणविधिमाह श्रावण्यामिति । श्रवणेनयुक्तापौर्णमासीश्रावणी । तथाप्रोष्ठपदनक्षत्रयुक्ताप्रौष्ठपदी । अथछन्दांसिमन्त्रान्गायत्रीजगत्यादिरूपान उभयवार्धपञ्चमान ॥ व्यवस्थितविषयोऽयंविकल्पः ॥ ९५ ॥

(६) रामचन्द्रः । द्वाभ्यामाह श्रावण्यामिति । यथाविधि स्वगृह्योक्तविधिना उपाकृत्य वेदमारभ्य उपाकरणसंज्ञंकर्म कृत्वा श्रावण्यां प्रौष्ठपद्यांवा छन्दोगाःप्रौष्ठपद्यांचकृत्वा अध्वर्यवः श्रावण्यां कुर्युः विप्रःअर्धपञ्चमोमासोये येषांसार्धचतुष्टयानित्यर्थः अधीयीत पठेत ॥ ९५ ॥

पुष्ये तु च्छन्दसां कुर्याद्बहिरुत्सर्जनं द्विजः ॥ माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमेऽहनि ॥ ९६ ॥

(१) मेधातिथिः । अर्धपञ्चमेषु मासेषु गतेषु यः पुष्योनक्षत्रंतत्रोत्सर्जनंकर्तव्यम । उत्सर्गोकंकर्म गृह्यकारैराम्नातम । बहिरित्यनावृतेदेशे । अनयोरुपाकर्मोत्सर्गयोर्गृह्यात्स्वरूपंज्ञातव्यम ॥ ९६ ॥

(२) सर्वज्ञनारायणः । तिष्ये पौषमासे पुष्यर्क्षे भाद्र्यांचेन्माघस्य शुक्लप्रतिपदिशुक्लः शुक्लःपक्षः । प्रथमेहनि प्रतिपदि एवंचदर्शान्तोमासोमनोरपेक्षितइतिगम्यते । उत्सर्जनंनिरन्तरवेदाध्ययनत्यागार्थंकर्म ॥ ९६ ॥

(३) कुल्लूकः । ततःपक्षाधिकेषु चतुर्षुमासेषुयःपुष्यस्तत्र ग्रामाद्बहिर्गत्वा स्वगृह्यानुसारेणोत्सर्गाख्यंकर्म कुर्यात । अथवा माघशुक्लस्य प्रथमेहनि पूर्वाह्णे कुर्यात । माघशुक्लेच विधिःप्रौष्ठपद्यांयेनोपाकर्म न कृतंतद्विषयः ॥ ९६ ॥

(४) राघवानन्दः । तत्र मासे यःपुष्यो नक्षत्रंतत्र स्वगृह्यानुसारेण ग्रामाद्बहिर्गत्वा उत्सर्गाख्यंकर्म कुर्यात-शुक्लस्यपक्षस्येति शेषः । प्रथमेहनि प्रतिपदि ॥ ९६ ॥

(५) नन्दनः । बहिर्ग्रामाच्छन्दसामुपाकृतानामुत्सर्जनमुत्सर्जनाख्यंकर्म । प्रथमेऽहनि प्रथमायांतिथौ । पुष्येऽध्वर्यूणां माघेच्छन्दोगानाम ॥ ९६ ॥

(६) रामचन्द्रः । बहिः ग्रामाद्बहिः । अर्धपञ्चमेषु गतेषु पुष्ये नक्षत्रे पौर्णिमायां छन्दसां वेदानां उत्सर्जनं वेदसमाप्तिं द्विजःकुर्यात ॥ ९६ ॥

यथाशास्त्रं तु कृत्वैवमुत्सर्गंछन्दसांबहिः ॥ विरमेत्पक्षिणीं रात्रिं तदेवैकमहर्निशम ॥ ९७ ॥

(१) मेधातिथिः । उत्सर्गंकृत्वा द्वेअहनीरात्रिरियन्तंनाधीयीततदहर्निशंद्वितीयंचाहरेव न रात्रिरित्येतावन्तंकालंविरमेन्नाधीयीत । उभयतोहःपक्षारात्रिःपक्षिणी । तद्वा यस्मिन्नहन्युत्सर्गःकृतस्तदहःसैवचरात्रिः । अनध्याये द्वितीयस्मिन्नहन्यध्येतव्यम । आद्ये तु पक्षे द्वितीयमहरनध्यायोरात्रौ त्वध्ययनमुच्यते ॥ ९७ ॥

(२) सर्वज्ञनारायणः । आगामिवर्तमानाहर्युक्तायांनिशिपक्षिणीत्यमरः ॥ पक्षिणींरात्रिमुत्तरदिवसास्तपर्यन्तं विरमेदध्यापनात । तदेकमहर्निशंयस्मिन्नहनि उत्सर्गकृतः तिष्यमाघोत्सर्गयोः क्रमादध्ययनपक्षद्वयान्वयः ॥ ९७ ॥

(३) कुल्लूकः । एवमुक्तशास्त्रानुसारेण ग्रामाद्बहिश्छन्दसामुत्सर्गाख्यंकर्म कृत्वा पक्षिणींरात्रिंविरमेन्नाधीयीत । द्वे दिने पूर्वापरे पक्षाविव यस्यामध्यवर्तिन्यारात्रेःसा पक्षिणी रात्रिः । अस्मिन्पक्षे तूत्सर्गाहो रात्रे द्वितीयदिने चाह्नि नाध्ये-

(९७) तदेवैकमहर्निशम=तद्वाप्येकमहर्निशम (क, ख, ग, घ, च, भ)

तव्यंद्वितीयरात्रौ त्वध्येतव्यम्। अथवा तमेवैकमुत्सर्गाहोरात्रमनध्यायंकुर्यात्। विद्यानैपुण्यकामंप्रत्ययमहोरात्रानध्याय-विधिः ॥ ९७ ॥

(४) **राघवानन्दः**। विरमेत् नाधीयीत पक्षिणी अहर्द्वययुतारात्रिः। तथाचामरः। आगामिवर्तमानहर्युक्तायां-निशि पक्षिणीति। यद्वा यस्मिन्नहनि उत्सर्गःकृतस्तदहस्तांरात्रिंच विरमेदित्यनुषज्यते ॥ ९७ ॥

(५) **नन्दनः**। आगामिवर्तमानाहर्युक्तायांनिशि पक्षिणीत्यमरः। विरमेद्वेदाध्ययनात् ॥ ९७ ॥

(६) **रामचन्द्रः**। यथाशास्त्रं यथाविधि छन्दसां वेदानां उत्सर्गंबहिःकृत्वा पक्षिणींरात्रिं विरमेत् ॥ ९७ ॥

अतऊर्ध्वंतु छन्दांसि शुक्लेषु नियतः पठेत् ॥ वेदाङ्गानि च सर्वाणि कृष्णपक्षेषु संपठेत् ॥ ९८ ॥

(१) **मेधातिथिः**। अतोऽस्मादुत्सर्गकर्मणःकृतादूर्ध्वंपरतः शुक्लपक्षेषु छन्दांसि मन्त्रब्राह्मणसमुदायात्मकान्वेदा-न्पठेत्। अङ्गानि शिक्षयेत्सूत्रव्याकरणादीनि कृष्णपक्षेषु संपठेत् ॥ ९८ ॥

(२) **सर्वज्ञनारायणः**। छन्दांसि वेदान् ॥ ९८ ॥

(३) **कुल्लूकः**। उत्सर्गानध्ययनादूर्ध्वंमन्त्रब्राह्मणात्मकंवेदंशुक्लपक्षेषु संयतःपठेत्। सर्वाणि तु वेदाङ्गादीनि शि-क्षाव्याकरणादीनि कृष्णपक्षेषु पठेत् ॥ ९८ ॥

(४) **राघवानन्दः**। शुक्लेषु द्वितीयादित्रयोदश्यन्तासु शुक्लपक्षतिथिषुवेदावेदाङ्गानीतिवेदाङ्गानि शिक्षाकल्पोव्या-करणंनिरुक्तंछन्दोज्योतिषमितिषट्। तदुक्तं छन्दःपादौतु वेदस्य हस्तौ कल्पोथपठ्यते। ज्योतिषामयनंचक्षुर्निरुक्तंश्रोत्रमु-च्यते। शिक्षाघ्राणंतु वेदस्य मुखंव्याकरणंस्मृतम् ॥ ९८ ॥

(५) **नन्दनः**। अतऊर्ध्वमुत्सर्गादूर्ध्वम् ॥ ९८ ॥

(६) **रामचन्द्रः**। अत ऊर्ध्वं उत्सर्गानन्तरं। शुक्लेषु पक्षेषु छन्दांसि पठेत् वेदाङ्गानि कृष्णपक्षेषु पठेत् शिक्षा-कल्पादीनि ॥ ९८ ॥

नाविस्पष्टमधीयीत न शूद्रजनसन्निधौ ॥ न निशान्ते परिश्रान्तो ब्रह्माधीत्य पुनः स्वपेत् ॥ ९९ ॥

(१) **मेधातिथिः**। यत्रवर्णस्वराभिव्यक्तिः स्फुटा नभवति तदविस्पष्टम्। तच्चद्रुतायांवृत्तौ प्रायेण भवति। निशान्त पश्चिमरात्रिभागे। सुप्तोत्थितोयदाधीयीत पुनःश्राम्येत्तदा न शयीत न निशान्ते। परिश्रान्तोब्रह्माधीत्य शयीततु एवंयुक्तःपाठः ॥ ९९ ॥

(२) **सर्वज्ञनारायणः**। शूद्रसंनिधौ न च जनानां बहूनांसंनिधौ निशान्ते ब्रह्माधीत्य परिश्रान्तोपि न स्वपेदि-त्यन्वयः ॥ ९९ ॥

(३) **कुल्लूकः**। स्वरवर्णाद्यभिव्यक्तिशून्यंशूद्रसन्निधौ च नाधीयीत। तथा रात्रेःपश्चिमे यामे सुप्तोत्थितोवेदमधी-त्य श्रान्तोन पुनःस्वप्यात् ॥ ९९ ॥

(४) **राघवानन्दः**। किंच नेति निशान्ते पश्चिमे यामे ब्रह्माधीत्य अन्ते श्रान्तःपुनर्न स्वपेत् ॥ ९९ ॥

(५) **नन्दनः**। ब्रह्माधीत्यपरिश्रान्तः परिश्रान्तात्माऽपि ॥ ९९ ॥

(६) **रामचन्द्रः**। शूद्रजनसमूहसंनिधौ नाधीयीत। अविस्पष्टं वेदं नाधीयीतनिशान्ते निशाप्रान्ते ब्रह्म वेदं अधीत्य पठित्वा परिश्रान्तःसन् पुनः न स्वपेत् ॥ ९९ ॥

यथोदितेन विधिना नित्यं छन्दस्कृतं पठेत् ॥ ब्रह्मच्छन्दस्कृतं चैव द्विजोयुक्तोह्यनापदि ॥१००॥

(१) **मेधातिथिः** । छन्दांसि गायत्र्यादीन्यभिप्रेतानि तैःकृतंयुक्तंब्रह्मऋक्साम । अनेकार्थत्वात्करोतेरयमत्रार्थो-व्याख्यायते । यथागोमयान्कुर्वितिसंहारेपृष्ठंकुर्वित्युन्मर्दने एवमत्र युजेरर्थे वर्तते । ब्रह्मचछन्दश्चब्रह्मच्छन्दसी ताभ्यां युक्तंब्रह्मछन्दस्कृतम् । यजूंषि गायत्र्यादियुक्ताश्चमन्त्राः । एकस्मिन्नेवावस्थानके पठन्ति । न यथाबाह्वृच्येछान्दोग्ये-चविभागेनैकस्मिन्ग्रन्थेमन्त्राअन्यत्र ब्राह्मणम् । एवंप्रकारभेदाद्वेदानामेवंयुक्तमितिपूर्वे व्याख्यातवन्तः । यथोदितेन पूर्वो-विधिरनापद्युपसंह्रियते । आपदि अध्यापकस्यासंनिधानंबहुदेवताविभागमपेक्षमाणस्य तत्रागुणवतः । सर्हविस्मृत्य-स्यात् । तस्मान्नापद्ययंविभागोनादरणीयः ॥ १०० ॥

(२) **सर्वज्ञनारायणः** । ब्रह्म ब्राह्मणं तत्र वेदत्वाविशेषेप्यापत्कालएकदेशमात्राध्ययने कर्तव्ये छन्दस्कृतमेव विधिना गुरुकुलवासादिपूर्वकंपठेत् । न तु ब्राह्मणभागं । मन्त्राणांसाक्षात्कर्माङ्गतयान्तरङ्गत्वात् । यथा विधिगृहीतानामेव च विनियोगार्हत्वात् । ब्राह्मणंतूपदेशमात्रार्थत्वाद्बहिरङ्गम् । अतोनियमेनाधीतादप्यर्थप्रतिपत्तिविरोधः । अनापदितुकृत्स्न-स्यवेदस्य नियमेनाध्येतव्यत्वात् । ब्रह्मछन्दस्कृतंयुक्तउद्युक्तोनियमेनैव पठेदित्यर्थः । यद्प्यनध्ययनादिकमध्ये तु ब्रह्मचा-रिणःप्रकरणे वक्तुंयुक्तं । कथंचित्सन्ध्यादिवत्स्नातकव्रतत्वमप्याविष्कर्तुंमत्रसंक्षेपतःपुनरुच्यते । तथापि गहनत्वादस्यार्थ-स्य ब्रह्मचारिणश्चाव्युत्पन्नत्वात्स्नातकएव ज्ञातुमेतच्छक्नोतीतिदर्शयितुमत्रैवोक्तं । सन्ध्याशौचादिकंत्वस्यापि तत्कालएव वेद्यमित्याशयेन तत्रोक्तम् ॥ १०० ॥

(३) **कुल्लूकः** । यथोक्तविधिना नित्यंछन्दस्कृतंगायत्र्यादिछन्दोयुक्तंमन्त्रमात्रंपठेत् मन्त्राणामेव कर्मान्तरङ्गत्वात् । अनापदि सम्यक्करणादौ सति ब्रह्म ब्राह्मणमन्त्रजातंच यथोक्तविधिना युक्तःसन्द्विजः पठेत् ॥ १०० ॥

(४) **राघवानन्दः** । ब्रह्मात्र वेदः । कृतंगायत्र्यादिछन्दोयुक्तं मन्त्रजातं । अनापदि धारणशक्तौ ॥ १०० ॥

(५) **नन्दनः** । उपसंहरति यथेति । यथोदितेन विधिनाऽर्धपञ्चमासान्पठेदित्युक्तेन विधिना । छन्दस्कृतंगायत्र्या-दिछन्दोनुगतं मन्त्रभागम् । नित्यमापद्यनापदि च । अनापदि ब्राह्मणभागंछन्दस्कृतं चोभयपठेत् । एतदुपाकृत्याध्ययनं स्नातानामेवेति प्रकरणसामर्थ्याद्विज्ञेयं ब्रह्मचारिणमित्यभिधानाच्च ॥ १०० ॥

(६) **रामचन्द्रः** । छन्दस्कृतं मन्त्रभागं पठेत् ब्रह्मब्राह्मणंछन्दस्कृतंमन्त्रभागसहितं पठेत् ब्राह्मछन्दस्कृतं ब्रा-ह्मणभागं पठेत् ब्रह्मछन्दसी ताभ्यांयुक्तं अनापदि युक्तः नियमवान् द्विजः ॥ १०० ॥

इमान्नित्यमनध्यायानधीयानोविवर्जयेत् ॥ अध्यापनं च कुर्वाणः शिष्याणां विधिपूर्व-कम् ॥ १०१ ॥

(१) **मेधातिथिः** । इमान्वक्ष्यमाणाननध्यायानधीयानोविवर्जयेत् । अध्यापनंचकुर्वाणः अध्यापनग्रहणमनधीय-तोग्रहणार्थमभ्यासार्थंच । नित्यम् नोत्सर्गादेवप्रभृति किंतर्ह्यर्धपञ्चमेष्वपिमासेषूपाकर्मणःप्रभृति । शिष्याणाम् अनुवादः॥१०१

(२) **सर्वज्ञनारायणः** । अधीयानोगुरोः । स्वतोवा पठन् ॥ १०१ ॥

(३) **कुल्लूकः** । इमान्वक्ष्यमाणाननध्याया...र्था यथोक्तविधिनाऽधीयानः शिष्याध्यापनंच कुर्वाणोगुरुर्वर्जयेत्१०१

(४) राघवानन्दः । इमान्वक्ष्यमाणान् ॥ १०१ ॥

(५) नन्दनः । इमान्वक्ष्यमाणान् । नित्यंब्रह्मचर्याश्रमेऽपीत्यर्थः ॥ १०१ ॥

(६) रामचन्द्रः । अथ अनध्यायानाह इमानिति । इमान् वक्ष्यमाणलक्षणान् अनध्यायान् । द्विजः । विसर्जयेत् कीदृशः विधिपूर्वकंशिष्याणामध्यापनंकुर्वाणः ॥ १०१ ॥

कर्णश्रवे ऽनिले रात्रौ दिवा पांसुसमूहने ॥ एतौ वर्षास्वनध्यायावध्यायज्ञाः प्रचक्षते ॥ १०२ ॥

(१) मेधातिथिः । अनिलोवायुः । वेगेन वाति वायौ वाय्वन्तरसंघर्षाद्ध्वनिःश्रूयते यत्र सकर्णश्रवोवायुः । कर्णाभ्यांश्रूयते यः सकर्णश्रवः । साधनंकृतेतिसमासः । अवस्थाविशेषोपलक्षणार्थंकर्णग्रहणम् । श्रूयतेकर्णाभ्यामेव । तेन यदैवंवायुशब्दः श्रूयते । तदानाध्येतव्यम् । पांसून्समूहति पांसून्समाहरति पांसुसमूहनः । पांसुर्धूलिः । उपलक्षणंचैतत् । तथाभूतस्य वायोर्वा यतस्ततश्चवृष्टे देवे यदि वायुरीदृशोवाति तावत्कालोऽनध्यायः । अध्यायज्ञाअध्यापनविधिज्ञाः॥१०२॥

(२) सर्वज्ञनारायणः । रात्रौ श्रवणोद्वेजकशब्दकारिणि दिवा च पांसुसमूहनसमर्थवेगवति वायौ वात्यनध्यायः सच वक्ष्यमाणा ऽकालिकरूपः। एतावेतावेव नतु वक्ष्यमाणानि विद्युत्स्तनितादीनि । अध्यायज्ञाः अध्ययनधर्मज्ञाः॥१०२॥

(३) कुल्लूकः । रात्रौ कर्णश्रवणयोग्यशब्दजनके वायौ वाति । गोविन्दराजस्तु कर्णाभ्यामेव श्रवणोपपत्तेरतिशयविवक्षया कर्णश्रवइत्युक्तम् तेनातिशब्दवति वायौ वातीत्यभिहितवान् । दिवाच धूलिपटलोत्सारणसमर्थे वायौ वहति एतौ वर्षाकालेऽनध्यायौ तात्कालिकावध्यापनविधिज्ञामुनयःकथयन्ति ॥ १०२ ॥

(४) राघवानन्दः । कर्णश्रवणयोग्यशब्दजनके वायाविति केचित् । कर्णाच्छब्दंश्रावयति ध्यावर्तयतीति प्रतिकूले महावायाविति रात्रौ नाधीयीत । तथादिवापि पांसुसमूहने पांसून्समूहयति वर्तुलीकुर्वति वायौचन ग्रीष्मादिषु तत्र वायुकृतपांसूनां सातत्यात् । अध्यायज्ञाः अध्यापनविधिज्ञाः मन्वादयइति ॥ १०२ ॥

(५) नन्दनः । कर्णश्रवेसशब्दे । पांसुसमूहने पांसुसमुत्थापने ॥ १०२ ॥

(६) रामचन्द्रः । दिवा पांशुसमूहने पांशूत्कर्षे । रात्रौअनिले कर्णश्रवे श्रवणोद्वेगशब्दकारिणि काले वर्षासु एतौ अनध्यायौ । अध्यायज्ञाः अध्यापनधर्मज्ञाः ॥ १०२ ॥

विद्युत्स्तनितवर्षेषु महोल्कानां च संप्लवे ॥ आकालिकमनध्यायमेतेषु मनुरब्रवीत् ॥१०३॥

(१) मेधातिथिः । विद्युत्तडित् । स्तनितंगर्जितम् । द्वन्द्वनिर्देशाद्युगपदेतेषु समुच्चितेष्वनध्यायः । महोल्का दिवः पततांज्योतिषांप्रभास्तासांसंप्लवोऽमुत्र च पतनम् । आकालिकशब्दोनिमित्तकालादारभ्यान्येद्युर्यावत्सएवकालःसउच्यते । मनुग्रहणंश्लोकपूरणार्थम् विकल्पार्थमन्ये ॥ १०३ ॥

(२) सर्वज्ञनारायणः । विद्युदादित्रयस्य सन्ध्याकालादन्यदासंप्लवे मिलितानांत्रयाणामुत्पत्तौ तथा महोल्कानांसंप्लवे विद्युदाद्यन्यतरेण सह युगपत्पाते आकालिकं यत्र काले निमित्तमुत्पन्नं दिनान्तरेतत्कालोत्पत्तिपर्यन्तम् । एतच्च वर्षाव्यतिरिक्तकालएव ॥ १०३ ॥

(३) कुल्लूकः । विद्युद्गर्जितवर्षेषु द्वन्द्वनिर्देशाद्युगपदुपस्थितेषु महतीनांचोल्कानांसंप्लवइतस्ततःपाते सति । आकालिकमितितु निमित्तकालादारभ्यापरेद्युर्यावत्सएव कालस्तावत्पर्यन्तमनध्यायमेतेषु मनुरवोचत् ॥ १०३ ॥

(४) राघवानन्दः । किंचनैमित्तिकमनध्यायमाह । विद्युदितिद्वाभ्यां द्वन्द्वनिर्देशाद्युगपत्संपातेषु विद्युदादिषु आकालिकं निमित्तकालादारभ्य परेद्युस्तावन्तंकालंवर्षास्वपि ॥ १०३ ॥

(५) नन्दनः । वर्षास्वित्यनुषज्यते । विद्युदादिप्रादुर्भावकालादारभ्यनाडिकाषष्टिरकालः । तत्र भवमाकालिकमनध्यायंविद्यात् । येयमुक्ताविद्युदादिप्रवृत्तिः सासन्ध्ययोश्चेदाकालिकानध्यायनिमित्तंभवति ॥ १०३ ॥

(६) रामचन्द्रः । एतेषु आकालिकं कालं मर्यादीकृत्येत्याकालिकं तावत्कालपर्यन्तं अनध्यायः ॥ १०३ ॥

एतांस्त्वभ्युदितान्विद्याद्यदा प्रादुष्कृताग्निषु ॥ तदा विद्यादनध्यायमनृतौ चाभ्रदर्शने ॥ १०४ ॥

(१) मेधातिथिः । नायमनध्यायोयस्यांकस्यांचन वेलायामुपजातेष्वेतेषु किंतर्हि प्रादुष्कृताग्निषु सन्ध्याकालइत्यर्थः । तदा ह्यग्नयोजुहूषयानियमतः प्रादुष्क्रियन्ते । प्रादुःशब्दः प्राकाश्ये । अनृतौऋतुर्वर्षास्ताभ्योन्यःशरदादिः । तत्रवाभ्रदर्शने प्रादुष्कृताग्निष्वित्यपेक्ष्यते ॥ १०४ ॥

(२) सर्वज्ञनारायणः । यउक्तकालिकोनध्यायस्तं तदैव विद्याद्यानेतानविद्युदादीन्त्रीन् संभूतानूमहोल्काअसंभुताः । प्रादुष्कृताग्निषु उद्धृताग्निहोत्रेषु कालेष्वभ्युदितानुत्पन्नान् विद्यादुपलभेत। तथानृतौ वर्षातोनृतावभ्रदर्शने वृष्टिहेतुमेघदर्शने आकालिकोनध्यायः सोपि प्रादुष्कृताग्निकालएव ॥ १०४ ॥

(३) कुल्लूकः । एतान्विद्युदादीन्यदाहोमार्थप्रकटीकृताग्निकालेषु सन्ध्याक्षणेषु युगपदुत्पन्नाञ्जानीयात। तदानध्यायंवर्षासु कुर्यान्न सर्वदा तथाऽनृतौ प्रादुष्कृताग्निकालेषु मेघदर्शनमात्रे सत्यनध्यायोन वर्षासु ॥ १०४ ॥

(४) राघवानन्दः । एतान्विद्युदादीन्सन्ध्याकालेष्वेव विजानीयाद्यदातदापरेद्युरपि तावत्कालपर्यन्तमनध्ययनंकुर्यान्न यदाकदाचिद्विद्युदादीनांसमुच्चयइत्याह एतानिति । प्रादुष्कृताग्निषु प्रादुष्कृतःप्रकटीकृतोहोमार्थमग्निर्येषु सन्ध्याकालेष्वित्यर्थः । अनृतौ वर्षाभ्योन्यत्राभ्रदर्शनेच ॥ १०४ ॥

(५) नन्दनः । अन्यदा चेन्नेत्याह एतांस्त्विति। प्रादुष्कृताग्निषु विहृतेष्वग्निषु सन्ध्ययोरितियावत् । एतान्विद्युदादीन्यदाप्रादुष्कृतान्विद्यात्पश्येत्तदाऽऽकालिकमनध्यायंविद्यात् । अनृतौवर्षर्तुव्यतिरिक्तेचर्तौ । अभ्रसंप्लव आकालिकमनध्यायंविद्यात् ॥ १०४ ॥

(६) रामचन्द्रः । एताननध्यायान् अभ्युदितसंज्ञान् यदा प्रादुष्कृताग्निषु उद्धृताग्निहोत्रकालेषु प्रजागरिताग्निषु तदा अनध्यायंविद्यात् । अनृतौ अकाले अभ्रदर्शने अनध्यायम ॥ १०४ ॥

निर्घाते भूमिचलने ज्योतिषां चोपसर्जने ॥ एतानाकालिकान्विद्यादनध्यायानृतावपि ॥ १०५ ॥

(१) मेधातिथिः । निर्घातआन्तरिक्षउत्पातध्वनिः । ज्योतिषांचन्द्रादित्यगुरुप्रभृतीनांउपसर्जनंपरिवेषणमितरेतरपीडनंच । ऋतावपि अपिग्रहणंवर्षासु किल नोत्पातागण्यन्तइत्यभिप्रायेण ॥ १०५ ॥

(२) सर्वज्ञनारायणः । उपसर्जनेउपसर्जनहेतौ विकारे युद्धच्छिद्रादौ एतान्निर्घातादीन् ऋतौ वर्षास्वपि एतच्चाप्रादुष्कृतेष्वप्यग्निषु वाक्यान्तरोपात्तत्वात् ॥ १०५ ॥

(३) कुल्लूकः । अन्तरिक्षभवोत्पातध्वनौ भूकम्पे सूर्यचन्द्रतारागणानांचोपसर्गेसत्यनध्यायानिमानाकालिकाञ्जानीयात् । आकालिकशब्दार्थोव्याकृतएव । ऋतावपिवर्षासु किलभूकम्पादयोन दोषावहाइत्यभिप्रायेणर्तावपीत्युक्तम । अपिशब्दादन्यत्रापि ॥ १०५ ॥

(४) राघवानन्दः । किंचान्यदित्याह निर्घातइति त्रिभिः । निर्घाते अनभ्रगर्जिते । उपसर्जनेसूर्याद्युपरागे । एतान् निर्घातादित्रीन् आकालिकान् तेषांकालानियमात । इदमपि निर्घातादिघटितमाकालिकंऋतावपिवर्षास्वपि । ऋतावपीत्यनुवादमात्रम् ॥१०५ ॥

(५) नन्दनः । उपसर्जनउपप्लवे । वैवर्ण्यंचलनादावपिशब्दादनृतावपीति गम्यते ॥ १०५ ॥

(६) रामचन्द्रः । ज्योतिषां चन्द्रादित्यगुरुप्रभृतीनां उपसर्जने उपसर्गहेतुभूते ग्रहयुद्धे । परिवेषणे अन्योन्यपीडनेन ॥ १०५ ॥

प्रादुष्कृतेष्वग्निषु तु विद्युत्स्तनितनिःस्वने ॥ सज्योतिः स्यादनध्यायः शेषे रात्रौ यथा दिवा॥१०६॥

(१) मेधातिथिः । त्रिसंनिपाते पूर्वेणाकालिकमुक्तम् । अनेनद्वयोः । सन्निपातेऽपिसज्योतिरुच्यते । स्तनितंच तन्निःस्वनश्चासौस्तनितनिःस्वनः । विद्युच्चस्तनितनिःस्वनश्चविद्युत्स्तनितनिस्वनम् । समाहारद्वन्द्वः । तस्मिन्सन्ध्यायामुपजाते द्वये सज्योतिरनध्यायः । सूर्योज्योतिः दिवा । नक्तमग्निर्ज्योतिः । प्रातःसन्ध्यायामुत्पन्नेदिवैवानध्यायोरात्रौ तु नास्ति । एवंपश्चिमसन्ध्यायांरात्रावनध्यायोनप्रातरध्ययनदोषः । विद्युत्स्तनितवर्षाणांत्रयाणांप्रकृतानांविद्युत्स्तनितयोर्विभज्य निर्देशोभवति । वर्षाः शेषस्तस्मिंस्तृतीये दृश्यमाने पूर्वोक्तआकालिकोऽनध्यायः । प्रसिद्धतरंज्योतिष्टोमादि तदपेक्षयोक्तंयथादिवातथारात्रावपि । शेषमितिपाठः । शेषंहूयमानमहरनध्यायहेतुर्भवतीति । अथकस्मान्नैवमुक्तंशेषंत्वाकालिकंस्मृतमिति विचित्राश्लोकानांकृतिर्मनोः ॥ १०६ ॥

(२) सर्वज्ञनारायणः । प्रादुष्कृताग्निकाले च विद्युत्सहिते स्तनितनिःस्वने वृष्टिशून्ये सज्योतिर्यदि प्रातस्तदायावदादित्यदर्शनं । यदि सायंतदा यावन्नक्षत्रस्थितिः शेषे प्रागुक्ते वक्ष्यमाणे चानध्यायनिमित्ते सति यथा दिवाआकालिकादिनियतोनध्यायस्तथा रात्रावपिनिमित्तपाते ग्राह्यः । एतच्च दिवसस्यवाध्ययनमुख्यकालत्वात् रात्रौनिमित्तपातेऽपि नाध्ययनशङ्कानिरासार्थमुक्तं शेषमिति क्वचित्पाठः । तत्राप्येवंज्ञेयम् ॥ १०६ ॥

(३) कुल्लूकः । होमार्थप्रकाशितेष्वग्निषु सन्ध्यायांयदा विद्युद्गर्जितशब्दावेव भवतोनतु वर्षंतदा सज्योतिरनध्यायः स्यात् नाकालिकः तत्र यदिप्रातः सन्ध्यायांविद्युद्गर्जितशब्दौ तदा यावत्सूर्यज्योतिस्तावदनध्यायोदिनमात्रमेव यदि सायंसन्ध्यायांतौ स्यातांतदायावन्नक्षत्रज्योतिस्तावदनध्यायोरात्रिमात्रमिति रात्रौ स्तनितविद्युद्वर्षाख्यत्रयाणांपूर्वोक्तानां शेषे वर्षाख्येत्रितये+जाते यथादिवानध्यायस्तथा रात्रावप्यहोरात्रएवेत्यर्थः ॥ १०६ ॥

(४) राघवानन्दः । सन्ध्यायांविद्युच्छब्दयोरेव सन्निपातोनिमित्तान्तरमित्या हप्रादुरिति । सज्योतिः । यदि प्रातः सन्ध्यायांविद्युत्स्तनितशब्दौ तदा यावत्सूर्यस्तिष्ठति तावदनध्यायः । शेषे सायंतदा रात्रौ यथादिवासज्योतिस्तथेत्यर्थः ॥ १०६ ॥

(५) नन्दनः । प्रादुष्कृतेष्वग्निषु सन्ध्याकालयोरित्यर्थः। विद्युत्स्तनितनिःस्वने रात्रौ तथा दिवाच सज्योतिर्नक्षत्रसूर्यसहितंराज्यह्नोः शेषमनध्यायःस्यात् । सन्ध्याकालाभ्यामुत्तरंमेघतिरोधानाभावेऽपि यथाऽनध्यायः स्यादित्युक्तं सज्योतिरिति । विद्युत्स्तनितवर्षेष्वित्यादिश्लोकोक्तस्तनितशब्दोमन्दगर्जितविषयः । अस्मिञ्छ्लोकेस्तनितग्रहणं महागर्जितविषयमित्यपुनरुक्तिः ॥ १०६ ॥

(६) रामचन्द्रः । सज्योतिः तावत्कालपर्यन्तंअनध्यायः स्यात् । प्रातरारभ्यानध्यायः यथा दिवा तथा रात्रौ सायंसन्ध्यामारभ्य रात्रावनध्यायः । शेषेतात्कालिकः ॥ १०६ ॥

+ त्रितये=तृतीयं (अ)

नित्यानध्यायएव स्याद्ग्रामेषु नगरेषु च ॥ धर्मनैपुण्यकामानां पूतिगन्धे च सर्वदा ॥१०७॥

(१) **मेधातिथिः** । निपुणंधर्मंयेकामयन्तेते ग्रामनगरयोर्नाधीयीरन् । धर्मशब्दश्च स्वर्गादौ धर्मफले वर्तते । यदिवाऽधर्मेणाननुवेधोधर्मस्यनैपुण्यंतेन सुपरिपूर्णोविध्यर्थोऽनुष्ठितोभवति । अतश्चाशक्तस्यानुष्ठानंभवति । पूतिगन्धः कुत्सितगन्धस्तस्मिंनासिकापथंगच्छत्यनध्यायः । सर्वशः सर्वस्मिन्शवगन्धेऽपि ॥ १०७ ॥

(२) **सर्वज्ञनारायणः** । व्रतपारणमात्रेण विद्यामसमाप्यैव यःस्नास्यति सधर्मनैपुणकामः । विद्यानिरपेक्षब्रह्मचारिधर्ममात्रानुरोधकत्वात् । यस्तु विद्यांसमाप्यैव व्रतमसमाप्येव स्नास्यति सविद्यानैपुणकामः । तत्राद्यस्य ग्रामादिमध्येऽनध्यायोनित्यमत्राध्ययनसंभवेऽपि यस्तु द्वितीयस्तस्य न तत्रानध्यायः तत्परित्यागे तस्य विद्याधिगमनियमानिष्पत्तेः । नगरेषु चेतिखेटखर्वटादिसंग्रहार्थश्चाकारः । पूतिगन्धेतूपलभ्यमाने सर्वशः सर्वेषांविद्यानैपुणकामानामपीत्यर्थः ॥ १०७ ॥

(३) **कुल्लूकः** । नैपुण्यविषयोधर्मातिशयार्थिनोग्रामनगरयोः सर्वदानध्यायः स्यात् । कुत्सितगन्धे च सर्वस्मिन्नपि गम्यमाने धर्मनैपुण्यकामंप्रत्ययं विद्यानध्यायोपदेशोविद्यानैपुण्यकामस्य कदाचिदध्ययनमनुजानाति ये शिष्याः केचिद्गृहीतवेदाध्ययनजन्मादृष्टेच्छवस्तेधर्मनैपुण्यकामाः केचित्प्रथमाध्येतारोविद्यातिशयमात्रार्थिनस्ते विद्यानैपुण्यकामाः ॥ १०७ ॥

(४) **राघवानन्दः** । अध्यापनंहि प्रत्यवायपरिहारार्थंकर्माङ्गबोधनार्थंधर्मार्थंवेदरक्षार्थंच तत्राद्यमुपनीतमात्रकृत्यं द्वितीयमुपकुर्वाणस्य विद्यानिपुणकामानामस्वाध्यायोन विद्यतइति उक्तेःकामंवेदाङ्गानीति न्यायाच्चतृतीयंस्नातकस्य । चतुर्थंतु त्रयाणामेवब्राह्मणोदक्षतेति निन्दाश्रवणात् स्वाध्याये चैव नित्यकइतिचतत्र धर्मकामानांविशेषमाहनित्यानध्यायइतित्रिभिः । ग्रामनगरयोःपूतिगन्धेवानध्यायः एवमग्रामेऋचोधीते इत्यादिप्रयोगातफलार्थिनामेतेषु नाध्ययनमित्यन्वयः ॥ १०७ ॥

(५) **नन्दनः** । धर्मनैपुण्यकामानामित्यनेनात्राध्ययनेदोषमात्रंसूचितं ॥ १०७ ॥

(६) **रामचन्द्रः** । धर्मनैपुण्यकामानां धर्मराद्धस्वर्गादौ धर्मकालेच नैपुण्यं कामयन्ते तेषां धर्मनैपुण्यकामानां निपुणंधर्मंज्ञात्वा तत्र स्थितानां ग्रामेषु च पुनः नगरेपुनित्यमनध्यायएव स्यात् । एतद्व्रतस्नातकविषयम् ॥ १०७ ॥

अन्तर्गतशवे ग्रामे वृषलस्य च सन्निधौ ॥ अनध्यायोरुद्यमाने समवाये जनस्य च ॥ १०८ ॥

(१) **मेधातिथिः** । अन्तर्गतः शवोयस्मिन्ग्राममध्येस्थितोयावन्न निर्हृतः । वृषलस्य नात्र शूद्रोवृषलस्तस्यप्रागेव निषिद्धत्वात् । नशूद्रजनसंनिधाविति किंतर्हि तत्प्रायिकेणाधर्मेणाधार्मिकत्वंलक्ष्यते । तेन यः पापाचारस्तत्संनिधानाच्च तेन निषेधः । रुद्यमाने रुदनशब्दे सति । भावमात्रेरुद्यमानशब्दः । समवायोजनस्य यत्रबहवोजनाःकार्यार्थमेकत्रसंघटिताभवन्ति तादृशे देशे नाध्येयम् । अथवा जनस्य समवाये रुद्यमाने रुदतीत्यर्थः । बहुषुरुदत्सुप्रतिषेधः । छान्दसंकर्तर्यात्मनेपदम् ॥ १०८ ॥

(२) **सर्वज्ञनारायणः** । अन्तः स्थितेन्तरस्थानगते भूम्युपरिभागसंयुक्ते ग्रामे गतपदंग्राममध्ये निवातस्य नानध्यायहेतुत्वेत्येतदर्थम् । एतद्येषांग्रामेध्ययनप्राप्तिस्तद्विषयम् । वृषलस्याचारशून्यस्य न शूद्रमात्रस्य शूद्रसंनिधौ पुरा निषेधोक्तेस्तत्संनिधौ श्रवणयोग्यदेशे रुद्यमाने जनैः रोदनश्रवणइत्यर्थः । समवाये बहुतरसंपाद्यमेलके ॥ १०८ ॥

---

(१०७) सर्वदा = सर्वशः (मे) ०

(१०८) रुद्यमाने = रुध्यमाने (नन्दनः)

(३) कुल्लूकः। अन्तर्गतः शवोयस्मिन्ग्रामे ज्ञायते तत्र। वृषलोऽधार्मिकस्तस्य सन्निधौनतु शूद्रः तस्यन शूद्रजनसन्निधावितिनिषेधात्। रुद्यमाने रोदनध्वनौ। भावेलकारः। कार्यान्तरार्थबहुजनमेलके सत्यनध्यायः॥ १०८॥

(४) राघवानन्दः। अन्तर्गतशवेअन्तर्गतत्वेन ज्ञातःशवोयस्मिन् वृषलोत्राधार्मिकःन शूद्रजनसन्निधावितिनिषेधोक्तेः।रुद्यमानइति भावसाधनंरोदनेसति क्रियमाणे वा। जनानांसमवाये निमित्तान्तरवशाज्जनानांमेलनंसमवायस्तस्मिन्॥१०८

(५) नन्दनः। अन्तर्गतशवेऽन्तर्मनुष्यशवयुक्ते। पूर्वेणग्रामानध्याये सिद्धेपुनरन्तर्गतशवे ग्रामइतिनिषेधोदोषातिशयख्यापनार्थः। वृषलस्याधर्मिष्ठस्य। रुध्यमानेराजपुरुषलुण्टाकादिभिर्ग्रामे समवायेसंमर्दे॥ १०८॥

(६) रामचन्द्रः। अन्तःशवे ग्रामे अनध्यायः स्यात् च पुनः वृषलस्य धर्मच्छेदकस्य सन्निधौ अनध्यायः। च पुनः जनस्य समवाये रुद्यमाने अनध्यायः॥१०८॥

उदके मध्यरात्रे च विण्मूत्रस्य विसर्जने॥ उच्छिष्टः श्राद्धभुक्चैव मनसापि न चिन्तयेत्॥ १०९॥

(१) मेधातिथिः। चतुर्मुहूर्तोऽर्धरात्रःसैव महानिशा प्रथमादर्धरात्राद्वौमुहूर्तावुत्तराद्वौउदके नदीतडागादिस्थः। अन्तर्जलेजपस्त्वनध्यायरूपत्वादघमर्षणादिर्न निषिध्यते। उदयइत्यन्ये पठन्ति। प्रथमोदयकाले सूर्यस्यानध्यायः। उच्छिष्टोभुजिसंबन्धेनाकृताचमनोयावत्। कृतमूत्रपुरीषोऽपि प्रागाचमनादुच्छिष्टउच्यतएव। आचमनार्हप्रत्ययमात्रवचनइत्यन्ये। तेन कृतनिष्ठीवनादिरपि गृह्यते। मनसाऽपि नान्यत्राध्याये मनसाचिन्तनमभ्यनुज्ञायते। किंतर्हि दोषगौरवार्थमेतेषांनिमित्तानाम्॥ १०९॥

(२) सर्वज्ञनारायणः। उदके जलमध्ये मध्यरात्रे रात्रेर्मध्यमदण्डदशकमध्ये विण्मूत्रे विष्ठायांमूत्रे वा विषये विसर्जने त्यागे चकारादेतसि उच्छिष्टभक्षणात् श्राद्धभुक्तदन्नभुक्। अत्र मनसा चिन्तनस्य निषेधात् अन्यत्र मानसोच्चारणे दोषाभावोगम्यते॥ १०९॥

(३) कुल्लूकः। उदकमध्ये मध्यरात्रे च मुहूर्तचतुष्टये च निशायांच चतुर्मुहूर्तमितिगौतमस्मरणात्। गोविन्दराजस्तु रात्रिमध्यप्रहरद्वयइत्युक्तवान्। तथा मूत्रपुरीषोत्सर्गकालेऽन्नभोजनादिना चोच्छिष्टोनिमन्त्रणसमयादारभ्य श्राद्धभोजनाहोरात्रंयावन्मनसापि वेदं चिन्तयेत्॥ १०९॥

(४) राघवानन्दः। निषेधादरार्थंपुनःश्राद्धभुग्ग्रहणं न चिन्तयेद्वेदमिति शेषः॥ १०९॥

(५) नन्दनः। पूर्वार्धेऽनध्यायइत्यनुषज्यते। चिन्तयेदित्यत्र ब्रह्मेति परस्मादपकृष्यते। मनसेत्यत्रवचनादन्यस्य मनसाचिन्तनमभ्यनुज्ञातमितिगम्यते॥ १०९॥

प्रतिगृह्य द्विजोविद्वानेकोद्दिष्टस्य केतनम्॥ त्र्यहं न कीर्तयेद्ब्रह्म राज्ञोराहोश्च सूतके॥ ११०॥

(१) मेधातिथिः। एकउद्दिश्यतेयस्मिंस्तदेकोद्दिष्टंनवश्राद्धम्। तत्रनिकेतनंनिमन्त्रणंप्रतिगृह्यअङ्गीकृत्य त्र्यहमनध्यायआमन्त्रणात्प्रभृति एवंराजाचन्द्रमास्तस्यसूतकंराहुंप्रत्यग्मृतस्रवणं चशब्दात्सूर्यस्यच। अथवा जनपदेश्वरस्य राज्ञःसूतकंपुत्रजन्मोत्सवः। राहोः सूतकंचन्द्रसूर्ययोरुपरागःग्रहणमितिप्रसिद्धम्॥ ११०॥

(२) सर्वज्ञनारायणः। एकोद्दिष्टनिकेतनंप्रेतश्राद्धामन्त्रणंप्रतिगृह्य तदा मन्त्रणादि त्र्यहंराज्ञश्चन्द्रस्य राहोःसकाशात्। सूतके प्रसवेराहुच्छायाभिभूतस्य पुनरुद्भवे राहोश्चेति चकारोभिन्नक्रमोराज्ञश्चेत्यर्थः। तेन यदितरराहुसूतक-

स्य सूर्यग्रहाभिधानस्य सङ्ग्रहार्थः । न तु राज्ञःसूतकइत्यत्र नृपमरणमुच्यते तन्मरणे श्रोत्रिये त्वहः कृत्स्नमित्याशौचस्य वक्ष्यमाणत्वात् ॥ ११० ॥

(३) कुल्लूकः । एकएवोद्दिश्यते यत्र श्राद्धे तदेकोद्दिष्टंनवश्राद्धंतत्केतनंनिमन्त्रणंगृहीत्वा निमन्त्रणादारभ्य क्षत्रियस्य जनपदेश्वरस्य पुत्रजन्मादिसूतके । राहोश्च सूतकंचन्द्रसूर्योपरागःतत्र त्रिरात्रंवेदंनाधीयीत ॥ ११० ॥

(४) राघवानन्दः । कालसङ्ख्यार्थमाह प्रतिगृह्येति । केतनं निमन्त्रणं । नवश्राद्धमत्रैकोद्दिष्टं । राज्ञःसूतकेपुत्राद्युत्पत्तौराज्ञोराहोश्चसूतके चकारात्समुच्चयइतिकेचित् ॥ ११० ॥

(५) नन्दनः । विद्वानविद्वानप्येकोद्दिष्टस्य नवश्राद्धस्य केत्यते निमन्त्र्यते ऽनेनेति केतनंत्र्यहंप्रतिगृह्यत्र्यहंब्रह्म न कीर्तयेत् । राज्ञःसूतके पुत्रजन्मनिराहोःसूतकेग्रहणमुक्तौ च ब्रह्म त्र्यहंनकीर्तयेदिति ॥ ११० ॥

(६) रामचन्द्रः । एकोद्दिष्टस्य केतनं नवश्राद्धनिमन्त्रणंप्रतिगृह्य त्र्यहं ब्रह्म न कीर्तयेत् । अनध्यायः स्यात् ॥ ११० ॥

यावदेकानुदिष्टस्य गन्धोलेपश्च तिष्ठति ॥ विप्रस्य विदुषोदेहे तावद्ब्रह्म न कीर्तयेत् ॥ १११ ॥

(१) मेधातिथिः । एकमनुदिश्यआमश्राद्धंतस्ययावच्छ्राद्धकृतोगन्धलेपौतिष्ठतस्तावदनध्यायः । पूर्वस्माद्विधेर्विध्यन्तरम् । द्वितीयस्मिन्नहनि कृतस्नानोऽपनीततद्गन्धोऽध्ययनार्हः । उपलक्षणंचैतदसतोरपि गन्धलेपयोर्यावद्भुक्तमन्नं न जीर्णतावन्नाधीयीत । विदुषइति तस्यैव श्राद्धभोजनाधिकारमनुवदति ॥ १११ ॥

(२) सर्वज्ञनारायणः । एकानुद्दिष्टस्यैकोद्दिष्टगन्धोलेपश्च तत्र दत्तस्यचन्दनादेस्तिष्ठति तत्र्यहादूर्ध्वमपि विदुषइतिज्ञानेन काममभिप्रैति अकामेत्वदोषइत्यर्थः ॥ १११ ॥

(३) कुल्लूकः । यावदेकस्यानुद्दिष्टस्यउच्छिष्टस्य सकुंकुमादेर्गन्धोलेपश्च ब्राह्मणस्य शास्त्रविदोदेहे तिष्ठति तावन्त्यहोरात्राण्यूर्ध्वमपिवेदंनाधीयीत ॥ १११ ॥

(४) राघवानन्दः । निमित्तान्तरमाह यावदिति । एकस्माअनुदिष्टस्योच्छिष्टस्यैकानुदिष्टस्य । तावत्त्र्यहादूर्ध्वमपिवेदंनाधीयीत ॥ १११ ॥

(५) नन्दनः । एकानुदिष्टस्यैकोद्दिष्टस्य लेहस्तैलादिकः । गन्धश्चन्दनादिकः । विदुषः विदुषोपि ॥ १११ ॥

(६) रामचन्द्रः । तावद्ब्रह्म वेदं न कीर्तयेत अनध्यायः स्यात् ॥ १११ ॥

शयानः प्रौढपादश्च कृत्वा चैवावसक्थिकाम् ॥ नाधीयीतामिषं जग्ध्वा सूतकान्नाद्यमेव च ॥११२॥

(१) मेधातिथिः । प्रसारितपादः पादारोपितपादोवा खट्वासनादौ वा संहृतपादः । अवसक्थिकावस्त्रादिना जान्वोर्मध्यस्यचबन्धः । आमिषंमांसम् । सूतकग्रहणंशावाशौचादेरपि प्रदर्शनार्थम् ॥११२ ॥

(२) सर्वज्ञनारायणः । प्रौढपादआसनारूढपादः । अवसक्थिकापर्यङ्कबन्धनम् । आमिषंजगध्वातद्दिने सूतकान्नाद्यं सूतकिसंबन्ध्यन्नम् । एतच्चानध्ययनमप्रायश्चित्तकरणात् ॥ ११२ ॥

(३) कुल्लूकः । शय्यायांपतिताङ्गआसनारूढपादःकृतावसक्थिकोवा मांसंजग्ध्वा जननमरणाशौचिनांचान्नंभुक्त्वा नाधीयीत ॥ ११२ ॥

---

* स्या = मुद्दिश्यां (अ)   (१११) गन्धोलेपश्च=लेहोगन्धश्च (नन्दनः)

(४) **राघवानन्दः** । तत्पञ्चकमध्ययनविरोधीत्याह शयानइति पृष्ठजानुद्वयव्यापीबन्धः । आवसक्थिका । सूतकपदं मृतकोपलक्षकंअशुचित्वाविशेषात् ॥ ११२ ॥

(५) **नन्दनः** । पादस्योपरिनिहितः पादोयस्यसप्रौढपादः । वस्त्रादिनाकृतपादबन्धोऽवसक्थिकः ॥ ११२ ॥

(६) **रामचन्द्रः** । अवसक्थिक कृत्वा न ब्राह्मणः अधीयीत ॥ ११२ ॥

नीहारे बाणशब्दे च सन्ध्ययोरेव चोभयोः ॥ अमावास्याचतुर्दश्योः पौर्णमास्यष्टकासु च॥११३॥

(१) **मेधातिथिः** । नीहारोदिङ्मोहोधूमिकेत्यनर्थान्तरम् । बाष्परजोवृताइवयेन दिशः क्रियन्ते । बाणशब्दःशरनिर्घोषः । दन्त्योष्ठ्यमन्येपठन्ति व्याचक्षते च वीणावाणइति महाव्रतेहि प्रयोगोदृश्यते । शततन्त्रीकोभवतिर्वाणावितन्त्रीतिच । चतुर्दश्यांउभयोरपि पक्षयोः । अष्टकाश्च सर्वाअष्टम्यः स्मृत्यन्तरसमाचाराभ्याम् । अन्येत्वष्टमीष्वित्येवंपठन्ति ॥ ११३ ॥

(२) **सर्वज्ञनारायणः** । नीहारे सर्वतोधूम्रिकावृते । बाणशब्दे बाणमोक्षशिक्षादेशाद्युत्पन्ने अमावास्यादिशब्दास्ततिथिकालमात्रपराः । तत्र शुक्लकृष्णप्रतिपदोरपि दर्शपूर्णमासमेलकत्वाचन्द्रस्यामावास्यापौर्णमासी पदाभ्यांग्रहणम । अष्टकाष्टमी ॥ ११३ ॥

(३) **कुल्लूकः** । नीहारे धूलिकायाम बाणशब्दे शरध्वनौ । बाणोवीणाविशेषइत्यन्ये प्रातःसायंसन्ध्ययोरमावास्याचतुर्दशीपौर्णमास्यष्टमीषु नाधीयीत । अष्टकासूत्तरत्र निषेधात्पौर्णमास्यादिसाहचर्यादष्टकाशब्दोऽष्टमीतिथिपरः ॥ ११३ ॥

(४) **राघवानन्दः** । किंच नीति । नीहारे व्यापिनि । बाणशब्दे शरादिध्वनौबाणोवीणेति वा ॥ ११३ ॥

(५) **नन्दनः** । अष्टकास्वष्टमीषु । अत्र नाधीयीतेत्यनुषङ्गः ११३॥

(६) **रामचन्द्रः** । द्वाभ्यामाह बाणशब्दे वंशशब्दे अनध्यायः अष्टकाश्चतस्रः ॥ ११३ ॥

अमावास्या गुरुं हन्ति शिष्यं हन्ति चतुर्दशी॥ ब्रह्माष्टकापौर्णमास्यौ तस्मात्ताः परिवर्जयेत्॥११४॥

(१) **मेधातिथिः** । पूर्वस्यार्थवादोनित्यार्थः । तेन यत्र नित्यत्वज्ञापकंन किंचित्सविकल्पतेऽनध्यायः । वक्ष्यति च द्वावेववर्जयेन्नित्यमिति । ताः परिवर्जयेत् अध्ययनक्रियातः ॥ ११४ ॥

(२) **सर्वज्ञनारायणः** । अमावास्या तत्र पाठेन ब्रह्म वेदं घ्नन्ति ॥ ११४ ॥

(३) **कुल्लूकः** । विशेषदोषमाह अमावास्येति । यस्मादमावास्या गुरुंहन्ति शिष्यंहन्ति चतुर्दशी वेदंचाष्टमीपौर्णमास्यौ विस्मारयतस्तस्मात्ताअध्ययनाध्यापनयोःपरित्यजेत् ॥ ११४ ॥

(४) **राघवानन्दः** । तिथौ निषेधति अमेति । अष्टकासु चतसृषु तत्ररूढेस्तिथिसंनिधेर्दुर्बलत्वेन न तिथिपरता अतोअमाष्टकासुनाधीयीतेत्यनुषज्यते । तत्रार्थवादमाहअष्टेति । ब्रह्मात्र वेदस्तदधीतंनश्यतीतिभावः ॥ ११४ ॥

(५) **नन्दनः** । ब्रह्म वेदवीर्यंहन्ति ॥ ११४ ॥

(६) **रामचन्द्रः** । वेदंहन्ति विस्मरणं प्रापयति ॥ ११४ ॥

पांसुवर्षे दिशां दाहे गोमायुविरुते तथा ॥ श्वखरोष्ट्रे च रुवति पङ्क्तौ च न पठेद्द्विजः ॥ ११५ ॥

(१) **मेधातिथिः** । गोमायुः शृगालःतस्यविरुतंशब्दकरणंश्वखरोष्ट्राणांपङ्क्त्यवस्थितानांशब्दंकुर्वतामनध्यायः । एकैकस्यसमानजातीयपङ्क्तौ ॥ ११५ ॥

(२) **सर्वज्ञनारायणः** । गोमायुःसृगालः । पङ्क्तौ श्वखरादिपङ्क्तिमध्ये केचिदपाङ्क्त्यपङ्क्तावित्याहुः । केचित्तु प-ङ्क्तीभूय नाध्येतव्यमित्यस्यार्थमित्याहुः ॥ ११५ ॥

(३) **कुल्लूकः** । धूलीवर्षे दिशांदाहे सृगालकुक्कुरगर्दभोष्ट्रेषु च रुवत्सु पङ्क्तौ चोपविश्य प्रकृतत्वात्सृगालश्वखरादी-नामेव ब्राह्मणोन पठेत् ॥ ११५ ॥

(४) **राघवानन्दः** । किंचपांसुवर्षे रजसापूर्णे पूर्वपांसुममहनइतिचक्रवातोक्तेः । दिशांदाहे दिग्दाहइति प्रसिद्धे । गोमायुरुदितेगोमायोःशृगालविशेषस्य विरुद्धरुतौ । स्वाभाविकविरुद्धारावेखरादीनांतेषांपङ्क्तौ प्रविश्यचज-नसमूहे निषेधस्योक्तत्वात् ॥ ११५ ॥

(५) **नन्दनः** । ब्रह्मेतिशेषः । ११५ ॥

नाधीयीत श्मशानान्ते ग्रामान्ते गोव्रजेपि वा ॥ वसित्वा मैथुनं वासः श्राद्धिकं प्रतिगृह्य च ॥ ११६ ॥

(१) **मेधातिथिः** । अन्तः शब्दः सामीप्यवचनःश्मशानसमीपे ग्रामसमीपेच । गोव्रजेगावोयत्रचरितुंव्रजन्तिगोष्ठोवा-गोव्रजः । स्त्रीसंप्रयोगकाले यत्प्रावृतंवासस्तदेव प्रावृत्य नाधीयीत । मैथुनशब्दः साहचर्यात्तत्कालप्रवृत्ते वाससि वर्तते । श्राद्धिकंश्राद्धनिमित्तंशुष्कान्नाद्यमपि गृहीत्वा नाधीयीत ॥ ११६ ॥

(२) **सर्वज्ञनारायणः** । श्मशानान्तेःश्मशानसमीपे ग्रामान्ते ग्रामस्यान्ते समीपे तत्र विष्ठाद्यशुचिलेपसंभवात् । गो-व्रजे गवांमध्ये । मैथुनंवासोयत्परिधाय मैथुनंकृतम् । एतेषु यावन्निमित्तानुवृत्त्यनध्यायइत्यर्थसिद्धत्वान्नोक्तम् । श्राद्धि-कं प्रेतश्राद्धव्यतिरिक्तश्राद्धसंबन्ध्यन्नदक्षिणादि प्रतिगृह्य तद्दिनेऽनध्यायः ॥ ११६ ॥

(३) **कुल्लूकः** । श्मशानसमीपे ग्रामसमीपे गोष्ठे च मैथुनसमयधृतवासः परिधाय श्राद्धीयंच सिद्धान्नादिप्रतिगृह्य नाधीयीत ॥ ११६ ॥

(४) **राघवानन्दः** । श्मशानान्तइत्याहअन्तपदंसामीप्ये । मैथुनसमये धृतवस्त्रंमैथुनंवासः । श्राद्धिकं सिद्धान्ना-दिकमेकोद्दिष्टातिरिक्तम् ॥ ११६ ॥

(५) **नन्दनः** । श्मशानान्ते श्मशानसमीपे । गोव्रजे घोषे मैथुनंमैथुनसंबन्धि । प्रतिगृह्य स्वीकृत्य ॥ ११६ ॥

(६) **रामचन्द्रः** । मैथुनंवासः मैथुनसंबन्धिवासः वस्त्रं परिधाय । श्राद्धिकं वस्तु प्रतिगृह्य अनध्यायःस्यात् ॥ ११६ ॥

प्राणि वा यदिवाऽप्राणि यत्किंचिच्छ्राद्धिकं भवेत् ॥ तदालभ्याप्यनध्यायः पाण्यास्योहि द्विजः स्मृतः ॥ ११७ ॥

(१) **मेधातिथिः** । श्राद्धनिमित्तंदीयमानंभक्तादिश्राद्धिकमितिप्रसिद्धंतन्निवृत्त्यर्थमिदमुच्यते । न केवलंव्रीहितण्डु-लादिप्रतिग्रहएवश्राद्धेऽनध्यायहेतुः । यावदन्यदपिप्राणि वा गवादि तथाऽप्राणिवासोयुगादि तदप्यालभ्य प्रतिग्रहकाले हस्तेन स्पृष्ट्वा नाधीयीत यतस्तदेवतस्यभोजनम् । पाणिरेवास्यमस्येतिपाण्यास्यः । श्राद्धभोजनंतन्निमित्तंच द्रव्यग्रह-णंतुल्यमितिदर्शयति ॥ ११७ ॥

(२) **सर्वज्ञनारायणः** । प्राणि पश्वादि । अप्राण्यन्नादि । श्राद्धिकं श्राद्धसंबन्धि । आलभ्य प्रतिग्रहार्थंस्पृष्ट्वापि । एतेनाणदि सामान्यतउत्सृज्य प्रतिपादनमात्रं श्राद्धिकद्रव्यस्य कृतं । तद्ग्रहणेऽपि तद्दिनेऽनध्यायइत्युक्तम् । पाण्यास्य-इति यथा भुक्त्वा दुष्यति तथा हस्तेन गृहीत्वापि । यथाह्यस्य मुखेऽग्निस्तथा पाणावपीति तयोः साम्यम् ॥ ११७ ॥

(३) **कुल्लूकः** । श्राद्धिकमन्नादिभुक्त्वा तावदनध्यायोभवतीत्युक्तम् । प्राणि वा गवाश्वाद्यप्राणि वा वस्त्रमाल्यादि प्रतिग्रहकाले हस्तेन गृहीत्वाऽनध्यायोभवति यस्मात्पाणिरेवास्यमस्येतिपाण्यास्योहि ब्राह्मणःस्मृतः ॥ ११७ ॥

(४) **राघवानन्दः** । अतएवाहप्राणीति । प्राणिगवाश्वादिअप्राणिहिरण्यवस्त्रादिकंतत्प्रतिग्रहकाले आलभ्यपृष्ट्वा स्थितस्यानध्यायः तत्र हेतुःपाण्यास्यः तेनास्य दुष्टत्वाद्वेदोच्चारणमयुक्तम् एकाहमितिशेषः ॥ ११७ ॥

(५) **नन्दनः** । श्राद्धिकं । प्रतिगृह्यचेत्येतत्प्रपञ्चयति प्राणिनेति । आलभ्यदत्तंपाणिना स्पृष्ट्वा । प्रतिग्रहएवभोज-नमित्युक्तं पाण्यास्योहीति ॥ ११७ ॥

(६) **रामचन्द्रः** । प्राणी पश्वादिः । अप्राणि वस्त्रादि यत्किञ्चित् श्राद्धादिकं भवेत् तत्श्राद्धिकं आलभ्य प्रा-प्य अनध्यायः । पाणिरेव आस्यंयस्य सः पाण्यास्यः द्विजः । अग्निमान्स्मृतः ॥ ११७ ॥

चौरैरुपप्लुते ग्रामे संभ्रमे चाग्निकारिते ॥ आकालिकमनध्यायं विद्यात्सर्वाद्भुतेषु च ॥ ११८ ॥

(१) **मेधातिथिः** । उपप्लुतउपद्रुतः यत्र बहवश्चौराग्रामेघातार्थेपतन्ति तत्र नाध्येयम् । संभ्रमे यत्राग्निना संभ्रमोभयंजन्यते गेहदाहादिप्रवृत्तेनादग्धेऽपि गेहादावाकालिकोनध्यायः । प्रवृत्तिकालादारभ्य यावदन्येद्युःसएव का-लः । अन्येषुचाद्भुतेषूत्पातेषु दिव्यभौमान्तरिक्षेषु शिलाप्लवादिषु दिवाऽदर्शनादिषु ॥ ११८ ॥

(२) **सर्वज्ञनारायणः** । उपप्लुते आकुलिते अग्निकारितेग्निदाहशङ्कया । संभ्रमे भये एषु श्राद्धिकप्रतिग्रहादिषु पञ्चस्वाकालिकं यावद्दिनान्तरीयतत्कालप्राप्तिः । सर्वाद्भुतेषु तन्दुलोत्पतनाद्युत्पातेषु दण्डलोष्ठताडनाद्युत्पातेषु ॥ ११८ ॥

(३) **कुल्लूकः** । चौरैरुपप्लुते ग्रामे गृहादिदाहादिकृते भये दिव्यान्तरिक्षभौमेषु चाद्भुतेषूत्पातेष्वाकालिकमनध्यायं-जानीयात् ॥ ११८ ॥

(४) **राघवानन्दः** । किंचचोरेत्यादि त्रिष्वप्याकालिकं निमित्तकालादारभ्य परेद्युस्तावत्कालपर्यन्तम् । सर्वाद्भुते-षूत्पातेषुः ॥ ११८ ॥

(५) **नन्दनः** । सर्वाद्भुतेषु दिव्यान्तरिक्षभौमेषूत्पातेषु ॥ ११८ ॥

(६) **रामचन्द्रः** । आकालिकं दिनान्तरे तावत्कालपर्यन्तं अनध्यायः स्यात् ॥ १८ ॥

उपाकर्मणि चोत्सर्गे त्रिरात्रं क्षेपणं स्मृतम् ॥ अष्टकासु त्वहोरात्रमृत्वन्तासु च रात्रिषु ॥ ११९ ॥

(१) **मेधातिथिः** । उत्सर्गेपक्षिण्यहोरात्रंच पूर्वमुक्तम् । अनेनत्रिरात्रेण विकल्प्यते । उपाकर्मण्यपूर्वोविधिः । अष्ट-काऊर्ध्वमाग्रहायण्यास्तमिस्रपक्षेष्टम्यस्तिस्रश्चतस्रोवा । यद्यपि सर्वास्वष्टमीष्वहोरात्रमुक्तंतथापि नित्यार्थोयमारम्भोयुक्त-एव । विकल्पश्च सर्वत्रास्मिन्प्रकरणेकृतार्थत्वापेक्षः । ऋत्वन्तासुअहोरात्रमित्यनुषज्यते षड्तवः । तेषांयत्रपूर्वोनिवर्तते-परश्च प्रवर्तते तत्रानध्यायः । रात्रिग्रहणमुपलक्षणार्थम् ॥ ११९ ॥

(२) **सर्वज्ञनारायणः** । त्रिरात्रंक्षपणमिति मुख्यः कल्पः । तावद्विलम्बेनाध्ययनविरोधसंभवे चोत्सर्गेविरमेत्पक्षि-

---

(११९) क्षेपणम्=क्षपणम् (ल, ब, भ, न, र य)

णीमहोरात्रंचेतिपक्षद्वयमुक्तम् । अष्टकासु अष्टकाश्राद्धतिथिषु हेमन्तशिशिरकृष्णपक्षाष्टमीनवमीषु श्राद्धकरणतदन्नभोजनयोरभावेप्यहोरात्रम् । अष्टमीषु प्रागनध्ययनमुक्तमेव इदंतु नवम्यामप्यन्वष्टकातिथावहोरात्रानध्ययनार्थम् । तथाल्पकालिकतत्तिथिसंबन्धेप्यन्वष्टकाकर्मयोग्याहोरात्रेकृत्स्नएवानध्यायइत्येतदर्थमष्टकापदम् । ऋत्वन्तासु हेमन्तादीनां षण्णामृतूनामन्त्यायाः षट्रात्रयस्तासु । एतच्चान्द्रमासकृतर्त्वन्तरात्रिषु दशरात्रित्वादेवानध्ययनसिद्धौ वचनंसौरमासद्वयकृतर्त्वन्तदिनेऽनध्ययनसिद्ध्यर्थम् ॥ ११९॥

(३) कुल्लूकः । उपाकर्मणि चोत्सर्गे त्रिरात्रमध्ययनक्षेपणम् । उत्सर्गे पक्षिण्यहोरात्रावनध्यायावुक्तौ । तत्रायंधर्मनैपुण्यकामंप्रति त्रिरात्रोपदेशः । तथाग्रहायण्याऊर्ध्वंकृष्णपक्षाष्टमीषु तिसृषु चतसृषु चाहोरात्रमनध्यायः । दिवाकालमात्रसद्भावेऽपि पौर्णमास्यष्टकासु चेत्यनेन यावदष्टम्येवानध्यायइतराष्टमीषूक्तइत्यपुनरुक्तिः । ऋत्वन्ताहोरात्रेषु चानध्यायः ॥ ११९॥

(४) राघवानन्दः । किंच उपेति । क्षपणंत्यागोऽध्ययनस्य उत्सर्गे पक्षिण्यादेरुक्तत्वानुउपाकर्मणि उत्सर्गइव कालाकांक्षायामाहत्रिरात्रमित्यपूर्वविधिःधर्मकामानामुभयत्र त्रिरात्रमितिवा । पक्षिण्यासह विकल्प इतिमेधातिथिः । निषिद्धकालमाहअष्टकास्विति । अष्टकाश्चतस्रोन तु सर्वाष्टम्यः । ऋत्वान्तासु प्रतिपत्सु तिसृष्वेव आद्याःप्रतिपदस्तिस्रोवाइतिहारीतोक्तेः । एतासु समाहोरात्रमनध्यायःएकवाक्यनिर्दिष्टानाममावास्यदीनामपि तथा ॥ ११९ ॥

(५) नन्दनः । त्रिरात्रंक्षपणंत्रिरात्रमनध्यायः । प्रथमप्रयोगे त्रिरात्रमन्यत्रपक्षिण्यहर्वा पूर्वोक्तंद्रष्टव्यम् । अष्टकाः श्राद्धकालत्वेन विहिताश्चतस्रस्तिस्रोवाप्रसिद्धास्तासुअहोरात्रंक्षपणमिति ॥ ११९ ॥

(६) रामचन्द्रः । त्रिरात्रंक्षपणं अनध्यायःस्मृतः ऋत्वन्तासु रात्रिषु ऋतुसन्धिगतासु । श्राद्धिकंभुक्त्वा तत्प्रतिग्रहदिने अनध्यायः । द्वितीया माघमासस्य ज्येष्ठश्रावणयोस्तथा । मार्गस्य चैत्राश्विनयोर्ऋतुसन्धिःसउच्यते ॥ ११९ ॥

नाधीयीताश्वमारूढोन वृक्षं न च हस्तिनम् ॥ न नावं न खरं नोष्ट्रं नेरिणस्थोन यानगः ॥ १२०॥

(१) मेधातिथिः । इरिणंबहिर्ग्रामंजलतृणवर्जितोदेशऊषरपर्यायः । यानंगन्त्रीशकटशिबिकादि तेनगच्छतोनिषेधः ॥ १२० ॥

(२) सर्वज्ञनारायणः । नखरंनोष्ट्रमिति तदुक्तयानपरं साक्षात्तदारोहणस्य निषिद्धत्वात् । इरिणमूषरभूः । यानमुक्तेभ्योन्यत् दोलारथादि तद्गतः ॥ १२० ॥

(३) कुल्लूकः । तुरगतरुकरिनौकाखरोष्ट्रारूढस्तथोषरदेशस्थः शकटादियानेन गच्छन्नाधीयीत ॥ १२० ॥

(४) राघवानन्दः । अश्वाद्यारूढोनाधीयीतेत्याह नेति । नेरिणस्थोनोषरस्थः । यानमत्र शकटादि परिशेषात् ॥१२०॥

(५) नन्दनः । इरिणमूषरंस्थलम् । यानमुक्ताश्वादिव्यतिरिक्तम् ॥ १२० ॥

(६) रामचन्द्रः । अश्वादिमारूढः नाधीयीत इरिणस्थः ऊषरभूमिस्थःसन्वेदं नाधीयीत ॥ १२० ॥

न विवादे न कलहे न सेनायां न सङ्गरे ॥ न भुक्तमात्रे नाजीर्णे न वमित्वा न शुक्तके ॥ १२१॥

(१) मेधातिथिः । विवादः क्रोशपूर्वकोऽभ्याक्रोशः । कलहोदण्डादिनेतरेतरताडनम् । सेना हस्त्यश्वरथपादातम् । सङ्गरःसङ्ग्रामः । असङ्गरेऽपि सेनास्थस्य निषेधः । भुक्तमात्रंयावदार्द्रपाणिरितिस्मृत्यन्तरम् । अजीर्णंपूर्वेद्युर्भुक्तमपरेद्युरपरिणतमुच्यते । वमनंप्रसिद्धम् । शुक्तकउद्गारेऽसत्यप्यजीर्णे तदहरपरेद्युर्वा ॥ १२१ ॥

(२) **सर्वज्ञनारायणः** । विवादे ऋणदानादिविप्रतिपत्तिशब्दश्रवणे । कलहेऽन्योन्यापेक्षशब्दश्रवणे । सेनायांमध्ये । सङ्गरेयुद्धमध्ये । भुक्तमात्रे यावदार्द्रपाणिः । अजीर्णेजीर्णताकालेऽप्यन्नस्याजीर्तौ शुक्तके जीर्णेऽप्यन्नेऽर्चितादिनाम्लोद्गारे ॥ १२१ ॥

(३) **कुल्लूकः** । विवादे वाक्कलहे कलहेदण्डादण्डयादौ सेनायामप्रवृत्तयुद्धायां सङ्गरे युद्धे भोजनानन्तरंच यावदार्द्रहस्तो यावदार्द्रपाणिरितिवसिष्ठस्मरणात् तथाऽजीर्णेऽन्ने वमनंच कृत्वाऽम्लोद्गारे च न पठेत् ॥ १२१ ॥

(४) **राघवानन्दः** । किंच विवादाद्यष्टसु नाधीयीतेत्यनुषज्यतइत्याह नेति । विवादे वाक्कृते । कलहे दण्डादिजे । सङ्गरे युद्धे । वमित्वा उदीर्य च भुक्तान्नं । शुक्तके अम्लोद्गारे ॥ १२१ ॥

(५) **नन्दनः** । वाग्युद्धंविवादः । अङ्गयुद्धंकलहः । शस्त्रयुद्धंसङ्गरः । समवायेजनस्यचेतिसिद्धेजनसंमर्देदोषातिशयप्रकाशनार्थंसेनाग्रहणम् । सेनायामित्येव सिद्धेयुद्धे द्वयोरपियुद्धंसंभवेदिति सङ्गरग्रहणम् । शुक्तकेशूक्तस्यान्नस्य यातयामस्य गन्धरसाविर्भावे । नाधीयीतेत्यनुवर्तते ॥ १२१ ॥

(६) **रामचन्द्रः** । वमित्वा छर्दिंकृत्वा नाधीयीत ॥ १२१ ॥

अतिथिं चाननुज्ञाप्य मारुते वाति वा भृशम् ॥ रुधिरे च स्रुते गात्राच्छस्त्रेण च परिक्षते॥१२२॥

(१) **मेधातिथिः** । अतिथिग्रहणंशिष्टोपलक्षणार्थम् । अनित्यागमनःशिष्टश्चातिथिस्तस्मिन्गृहआगतेऽसावध्येतव्यमधीमहइतिनानुज्ञातोऽधीयीत । तथा च स्मृत्यन्तरं शिष्टेचगृहमागतइति । मारुते वायौ वाति वेगेन । ननु कर्णश्रवइत्याद्युक्तमेव । सत्यम् ततोऽधिकतरे ततोवर्षाभ्योऽन्यत्र वाति प्रतिषेधः । अथवाति परिशुष्यति वातस्यशोषणार्थत्वात् । मारुतग्रहणचवातमात्रोपलक्षणार्थम् । अध्ययनश्रमेणधातुषुक्षीयमाणेष्वप्यनध्यायः । मारुते वर्धमाने विधायिन्यध्येतरीतिभिन्नसंबन्धे व्यधिकरणसप्तम्यौ । रुधिरे जलौकादिना परिस्रुतेऽथवा शस्त्रेणचपरिक्षते शरीरेरुधिरेस्रुते । गात्रादिवाक्यैनैकवाक्यता ॥ १२२ ॥

(२) **सर्वज्ञनारायणः** । अतिथिमभ्यर्हितमभ्यागतं । अतिवायति गृहादिभङ्गकारिणि चातिवाति वर्षाभ्योऽन्यत्रापि । शस्त्रेणक्षते । तथा गण्डादावपि रुधिरे स्रुते यावत्तद्विरामता तावदनध्यायकालः ॥ १२२ ॥

(३) **कुल्लूकः** । अध्ययनंकरोमीतियावदतिथिरनुज्ञापितोन भवति मारुते चात्यर्थंवाति रुधिरे च गात्रात्स्रुते रुधिरस्रावंविनाऽपि शस्त्रेण क्षतमात्रेऽपि नाऽधीयीत ॥ १२२ ॥

(४) **राघवानन्दः** । भृशमत्यर्थं वाति मारुतइत्यन्वयः । रुधिरदर्शनाभावेपि शस्त्रेण परिक्षते । एतच्चतुर्ष्वपि नाधीयीतेत्यनुषज्यते ॥ १२२ ॥

(५) **नन्दनः** । परिक्षते गात्रइतिशेषः । नाधीयीतेत्येव ॥ १२२ ॥

(६) **रामचन्द्रः** । अतिथीन् अनुज्ञाप्य अधीयीत । च पुनः शस्त्रेण परिक्षते अशुद्धे शुष्के ॥ १२२ ॥

सामध्वनावृग्यजुषी नाधीयीत कदाचन ॥ वेदस्याधीत्य वाप्यन्तमारण्यकमधीत्य च ॥ १२३॥

(१) **मेधातिथिः** । ऋचोयजूंषि सामध्वनौ श्रूयमाणे नाधीयीत । ऋग्वेदयजुर्वेदब्राह्मणयोरप्रतिषेधः । पञ्चविंशेच श्रूयमाणऋग्यजुषयोरप्ययंप्रतिषेधः । वेदस्यान्तोयत्र वेदः समाप्तिमुपैतिमन्त्रान्तोब्राह्मणान्तश्च । आरण्यकोनामवेदैकदेशस्तमधीत्याप्योग्रन्थोनाध्येतव्यः ॥ १२३ ॥

(२) **सर्वज्ञनारायणः** । सामध्वनौ श्रूयमाणे । वेदस्यान्तषड्वाक्यमधीत्य सर्ववेदानध्यायः आरण्यकमरण्येऽध्येतव्यं वेदभागमधीत्यामतोन्यत्राध्येतव्येऽनध्यायः ॥ १२३ ॥

(३) **कुल्लूकः** । सामध्वनौ च श्रूयमाणेऋग्यजुषोःकदाचिदध्ययनंन कुर्यात् । वेदंच समाप्य चारण्यकाख्यंच वेदैकदेशमधीत्य तदहोरात्रे वेदान्तरंनाधीयीत ॥ १२३ ॥

(४) **राघवानन्दः** । सामध्वनौ श्रूयमाणे सति । अधीत्य चान्तं अध्यायंसमाप्य । आरण्यकमधीत्यग्रन्थान्तरंनाध्येतव्यमितिशेषः ॥ १२३ ॥

(५) **नन्दनः** । सामध्वनौ सामगाने । सामाधीत्यतत्क्षणएवर्ग्यजुषीनाधीयीत । कदाचनआपद्यपि । अध्यायकालेऽपि वेदस्यान्तमुपनिषदमारण्यकमाश्वकेतुकंचाधीत्य तत् क्षणएवर्ग्यजुषीनाधीयीत ॥ १२३ ॥

(६) **रामचन्द्रः** । सामध्वनौसति ऋग्यजुषी नाधीयीत च पुनः वेदस्य अन्तं अधीत्य च पुनः आरण्यकं अधीत्यआरण्यकाध्यायंअधीत्य अनध्यायः ॥ १२३ ॥

ऋग्वेदोदेवदैवत्यो यजुर्वेदस्तु मानुषः ॥ सामवेदः स्मृतः पित्र्यस्तस्मात्तस्याशुचिर्ध्वनिः ॥ १२४ ॥

(१) **मेधातिथिः** । सामगीतध्वनावृग्यजुषस्यानध्यायउक्तः । तत्रायमर्थवादः । देवादेवताअस्यदेवदैवत्योदेवतास्तुतिपरइत्यर्थः । ऋचःप्रायेण स्तुतिप्रधानाः । अतउक्तंदेवदैवत्यइति । मनुष्याणांकर्मप्रधानत्वाद्यजुर्वेदे च कर्मणांबाहुल्योपदेशादेतेनसाम्येनयजुर्वेदोमानुषइत्युच्यते । मानुषशब्दोमनुष्यजातिवचनः । अभेदाध्यासाद्यजुर्वेदोमानुषइत्युक्तम । पित्र्यःपितृभ्योहितः । पितरोवा देवताअस्येति यथाकथंचित्पितृशब्दसंबन्धेन श्रूयते । त्रयोलोकास्तेषांत्रयएवाधिष्ठातारः दिवोदेवताभूमेर्मनुष्याअन्तरिक्षस्य पितर एवंत्रयोवेदाः । द्वयोर्देवमनुष्यसंबन्धोक्तत्वात्पारिशेष्यात्पित्र्यःसामवेदः। तस्याशुचिर्ध्वनिः । नात्रतदीयस्यध्वनेरशुचित्वंपरमार्थतोविज्ञेयम् । किंतर्हि यथाऽशुचिसंनिधाने नाध्येतव्यम् । एवंतत्सन्निधानइतिसामान्यमशुचित्वालम्बनम् । अयंचाध्ययनविधौ प्रकरणात्साम्निगीयमानऋग्यजुषप्रतिषेधोनयज्ञप्रयोगे ॥ १२४ ॥

(२) **सर्वज्ञनारायणः** । सामध्वनावित्युक्तस्यास्योपादनमृग्वेदोदेवदैवत्यइति । देवाअधिष्ठात्री देवता अस्येतिदेवदैवत्यः । तस्मात्पितृसंबन्धिनां देवसंबन्धिनांचापेक्षया अशुचित्वस्यकर्मादिषु दृष्टत्वात् ॥ १२४ ॥

(३) **कुल्लूकः** । सामगानश्रुतावृग्यजुषोरनध्यायउक्तस्तस्यायमनुवादः । ऋग्वेदेदिवएव देवताअस्येतिदेवदैवत्यः । यजुर्वेदोमानुषोमानुषदेवताकत्वात्प्रायेण मानुषकर्मोपदेशाद्वामानुषः। सामवेदःपितृदेवताकत्वात् पित्र्यःपितृकर्मकत्वाजलोपस्पर्शनंस्मरन्ति । तस्मात्तस्याशुचिरिव ध्वनिःनत्वशुचिरेव । अतस्तस्मिञ्छ्रूयमाणऋग्यजुषी नाधीयीत ॥ १२४ ॥

(४) **राघवानन्दः** । सामध्वनेरशुचित्वमाह ऋगिति । देवादेवताअस्येति देवदेवत्यः । अशुचिरिति अशुचिरिवपितृपक्षपातित्वात्नत्वशुचिरेव वेदध्वनेरशुचित्वाभावात् वचनात् पितृदेवताकत्वाच्चऋग्यजुषीनाध्येतव्यइतिभावः।१२४॥

(५) **नन्दनः** । सामध्वनावृग्यजुषोरनध्यायेऽर्थवादमाह ऋग्वेदइति । पितृकर्मानुष्ठायिनोऽपामुपस्पर्शनस्मरणात् । श्राद्धकर्तृप्रतिग्रहीत्रोरध्ययननिषेधाच्चपित्र्यस्याशुचित्वमुपपन्नम् । सामवेदश्चापि पित्र्यस्तस्मात्तस्य ध्वनिरशुचिः । तेन सामाधीत्य तत्क्षणमेवर्ग्यजुषीनाधीयीतेति ॥ १२४ ॥

एतद्विदन्तोविद्वांसस्त्रयीनिष्कर्षमन्वहम् ॥ क्रमतः पूर्वमभ्यस्य पश्चाद्वेदमधीयते ॥ १२५ ॥

---

(१२५) एतद्विदन्तः=एतंविदित्वा (नन्दनः)

(१) मेधातिथिः । एतत्त्रिलोक्याधिष्ठातृसंबन्धित्वमृग्वेदोदेवदैवत्यइत्यादिविदन्तोविद्वांसः प्राज्ञास्त्रय्यानिष्कर्षं-सारभूतंपूर्वमभ्यस्य प्रणवव्याहृतिसावित्र्याख्यमुक्तेन क्रमेण पश्चाद्वेदमधीयतेपठन्ति । तेन त्रयोलोकास्तिस्रोदेवताएतत्त्रि-काध्ययनेन परिगृहीताभवन्ति । उक्तोऽप्ययमर्थोद्वितीयेऽध्यायेपुनरुच्यते । यथाऽनध्यायेषु पठ्यते । तथा त्रयीनिष्क-र्षं प्रागनधीते ॥ १२५ ॥

(२) सर्वज्ञनारायणः । त्रयीनिष्कर्षं त्रय्यास्तत्त्वंवेदत्रयउत्तरापेक्षया पूर्वस्य श्रेष्ठताम् । ऋगादिषुयत्पूर्वं तद-भ्यस्यक्रमशः उत्तरोत्तरक्रमेण पश्चाद्वेदंतदनन्तरवेदम् । एवंच यजुर्वेदीयसामवेदीयविधिना संस्कृतेनापिऋग्वेदाध्ययनपू-र्वकं ऋग्यजुषामध्ययनपूर्वकंच स्ववेदाध्ययनंकार्यमित्यत्रापेक्षितम् । एतच्चानेकशाखाध्ययनपक्षेएकशाखाध्ययनपक्षे-तु स्वशाखाध्ययनमात्रमिति ग्राह्यम् ॥ १२५ ॥

(३) कुल्लूकः । एतद्वेदत्रयस्य देवमनुष्यपितृदेवताकत्वंजानन्तः शास्त्रज्ञास्त्रयीनिष्कर्षसारोद्धृतंप्रणवव्याहृतिसावि-त्र्यात्मकंप्रणवव्याहृतिसावित्रीः क्रमेण पूर्वमधीत्य पश्चाद्वेदाध्ययनंकुर्युः । द्वितीयाध्यायोक्तोप्ययमर्थः पुनरनध्यायप्र-करणेऽभिहितः यथैते यथोक्तानध्यायाएवंप्रणवव्याहृतिसावित्रीष्वपठितास्त्वनध्यायइतिदर्शयितुंशिष्यस्याध्यापनमेवंक-र्तव्यमितिस्नातकव्रतत्वावगमार्थंच ॥ १२५ ॥

(४) राघवानन्दः । एतत्पठनमाह एतदिति । त्रय्यानिष्कर्षसारभूतंबीजभूतंवा प्रणवव्याहृतिसावित्रीः ॥१२५॥

(५) नन्दनः । एवंचसति कथमध्येतव्यमित्यपेक्षायामाह एतमिति । एतंत्रयीनिष्कर्षंदेवमानुषपित्र्यात्मकंपृथक्-भावं विदित्वा विद्वांसः पूर्ववेदविदः पूर्वमादावृग्वेदमभ्यस्याधीत्य पश्चात्क्रमशोऽन्वहमधीयते । एकस्मिन्दिनऋचोऽधीत्य-परस्मिन्यजूंषिपरस्मिन्सामान्यधीयीतेत्यर्थः । विद्वद्भिः कृतमन्यैरपिकर्तव्यमित्यभिप्रायः ॥ १२५ ॥

(६) रामचन्द्रः । त्रयी वेदत्रयी निष्कर्षंअन्वेषणंमत्यहंकुर्यात् एतद्विद्वांसः विदन्तः जानन्तः पश्चात् अनन्तरं वेदंस्वकीयं अधीते ॥ १२५ ॥

पशुमण्डूकमार्जारश्वसर्पनकुलाखुभिः ॥ अन्तरागमने विद्यादनध्यायमहर्निशम् ॥ १२६ ॥

(१) मेधातिथिः । अन्तरागमनेऽध्याप्याध्यापकयोर्मध्येनाधीयानानांवा । अहर्निशमहोरात्रम् । गौतमे तु त्र्यहमु-पवासोविप्रवासश्चोक्तः । श्मशानाध्ययने च एतदेव । अत्रविकल्पोविज्ञेयः ॥ १२६ ॥

(२) सर्वज्ञनारायणः । पशुः छागः । अन्तराध्यापकाध्येत्रोः ॥१२६ ॥

(३) कुल्लूकः । पशुर्गवादिःमण्डूकबिडालकुक्कुरसर्पनकुलमूषिकैः शिष्योपाध्याययोर्मध्यागमनेऽनध्यायमहोरात्रं-जानीयात् ॥ १२६ ॥

(४) राघवानन्दः । किंच पश्वादिभिःसप्तभिरन्तरागमनेप्यनध्यायइत्याह पश्विति । पशुर्गवादिः ॥ १२६ ॥

(५) नन्दनः । पशुशब्देनात्र ग्राम्याश्चारण्याश्च पशवउच्यन्ते । पशुना यजेतेत्यत्रापि नित्यवदुपादानाच्छागएवे-त्यपरे ॥ १२६ ॥

(६) रामचन्द्रः । पशुः छागः । गुरुशिष्ययोः पश्वादीनामन्तरागमने अहर्निशं अनध्यायः ॥ १२६ ॥

द्वावेव वर्जयेन्नित्यमनध्यायौ प्रयत्नतः ॥ स्वाध्यायभूमिं चाशुद्धामात्मानं चाशुचिं द्विजः ॥ १२७ ॥

(१) मेधातिथिः । नित्यग्रहणात्पूर्वत्रानध्यायानांविकल्पः । तत्रापि येषांनित्यत्वमात्रंतत्प्रदर्शितमेव । यत्र नि-त्यग्रहणमर्थवादोवायथाअमावास्यागुरुंहन्तीति भूमेश्चाशुद्धिरस्थिभगलिङ्गादिकामेध्यादिसंसर्गः । आत्मनस्तुपञ्चमेव-

क्ष्यते। यद्यप्यध्ययनविधिप्रकरणएतावनध्यायौ तथापिनैत्यके भवतः । नह्यशुचिरधिक्रियते तथाचब्राह्मणं तस्य-वा एतस्ययज्ञस्य द्वावनध्यायौयदात्माशुचिर्यद्देशइति ब्रह्मयज्ञश्च नित्योजपः ॥ १२७ ॥

(२) **सर्वज्ञनारायणः**। वक्ष्यमाणौद्वावेववर्जयेत्नित्यंनित्यकर्तव्ये ब्रह्मयज्ञे। अतएव श्रुतौ तस्यवाएतस्य ब्रह्मयज्ञस्यद्वावनध्यायौयदात्माअशुचिर्यद्देशइत्युक्तम्। अत्र नाधीयीतेतिनिषेधे अध्यापनमपि निषिद्धं तत्रापि वेदोच्चारणरूपाध्ययनसंभवात् ॥१२७॥

(३) **कुल्लूकः**। संप्रतिविद्यानैपुण्यकामंप्रतिपूर्वोक्तानध्यायविकल्पार्थमाह द्वावेवेति। स्वाध्यायभूमिंचोच्छिष्टाद्यमेध्योपहतां। आत्मानंच यथोक्तशौचरहितमिति द्वावेवानध्यायौनित्यंप्रयत्नतोवर्जयेत् नतु पूर्वोक्तान्। तेषामपि यत्र नित्यग्रहणमनुवादोवा नित्यत्वख्यापकोवाऽस्ति तानपि नित्यंवर्जयेत्। अन्यत्र विकल्पः ॥ १२७ ॥

(४) **राघवानन्दः**। पर्युदासाधिकरणन्यायेनभूम्यात्माशुद्धिव्यतिरिक्तेषु निषिद्धेषु नित्याध्ययनंकर्तव्यमिति प्रदर्शनार्थम् द्वावेवेति। वेदरक्षाहेतुत्वात्तस्य वेदोपकरणेचैव स्वाध्यायेचैव नैत्यकइत्युक्तत्वात्। अष्टकासु त्वहोरात्रमिति यद्यप्यत्रस्वाध्यायविचारःप्रकरणात्स्नातकस्यतथापि अधीयानइति लिङ्गात्प्रथमाध्यायनेप्ययन्नमतःप्राथमिकाध्यायनमपि मनूक्तसर्ववर्जनपुरःसरमितिभावः। इत्यनध्यायप्रकरणम् ॥ १२७ ॥

(५) **नन्दनः** नित्यमापद्यपि। अनेनान्येषामनध्यायनिमित्तानामापद्यनुज्ञासूचिता ॥ १२७ ॥

(६) **रामचन्द्रः**। द्विजः द्वावेव विवर्जयेत्। अशुद्धां भूमिं। च पुनः आत्मानमशुचिम् ॥ १२७ ॥

अमावास्यामष्टमीं च पौर्णमासीं चतुर्दशीम् ॥ ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नातकोद्विजः ॥१२८॥

[षष्ठ्यष्टम्यौ त्वामावास्या मुभयत्र चतुर्दशीम् ॥ वर्जयेत्पौर्णमासींच तैले मांसे भगे क्षुरे ॥१॥]

(१) **मेधातिथिः**। ब्रह्मचारी भवेद्ब्रह्मचारिधर्मोमैथुननिवृत्तिरतिदिश्यते नपुनर्भिक्षाचरणादिः । अप्यृतावितिसंबन्धात्तदेवप्रथमंहृदयमागच्छति। अन्ये तु मधुमांसनिवृत्तिमपीच्छन्त्येतेष्वहःसु। तत्र स्मृत्यन्तरमुदाहार्यम्। षष्ठ्यष्टमीममावास्यामुभयत्र चतुर्दशीम् । वर्जयेत्पौर्णमासींचतैलेमांसेभगे क्षुरे ॥ अन्येत्वाहुर्ब्रह्मचारीतिर्विशिष्टाश्रमिणोनामधेयमेतत्। अतआश्रमान्तरवर्तिनिगृहस्थादौ प्रयुज्यमानेवेदग्रहणार्थधर्मलक्षणयाऽतिदेशार्थोभवति । ब्रह्मचारीभवेत् परशब्दोहि परत्र प्रयुज्यमानोवत्यर्थंगमयति। सर्वेषु ब्रह्मचारिधर्मेषु प्राप्तेष्वग्नीन्धनभैक्ष्यचरणादयः । आसमावर्तनात्कुर्यादितिवचनात्। गृहस्थः शेषभुगितिचप्रत्यक्षे विनिवर्तन्ते । केवलंमधुमांसमैथुनप्रतिषेधमात्रमतिदिश्यतइति । प्रसिद्धस्तु ब्रह्मचारिशब्दोमैथुननिवृत्तावेवेतियत्किंचिदेतत् ॥ १२८ ॥

(२) **सर्वज्ञनारायणः**। ब्रह्मचारीमैथुनरहितः ॥ १२८॥

(३) **कुल्लूकः**। अमावास्यादिष्वृतावपि स्नातकोद्विजोन स्त्रियमुपगच्छेत् । पर्ववर्जंव्रजेच्चैनामित्यनेनैव निषेधसिद्धौ स्नातकव्रतलोपप्रायश्चित्तार्थमिहपुनर्वर्जनम् ॥ १२८ ॥

(४) **राघवानन्दः**। अमावास्यामित्यत्र कालकर्म तेनैतेषु स्त्रियमृतावपि न गच्छेत् पर्ववर्जंव्रजेच्चैनामित्यादिना निषेधस्य प्राप्तत्वेपि स्नातकव्रतलोपार्थंपुनर्ग्रहणं । ऋतावितिं लिङ्गात् ब्रह्मचारीति पदंमैथुननिवृत्तिमात्रपरम् ॥ १२८॥

(५) **नन्दनः**। अथस्नातकस्यव्रतान्तराण्याह अमेति ॥ १२८ ॥

(६) **रामचन्द्रः** । स्नातकोद्विजः अमावास्यादिषु नित्यंऋतावपि ब्रह्मचारी भवेत् ॥ १२८ ॥

[**रामचन्द्रः**। षष्ठीति तैले तैलाभ्यङ्गे मांसभक्षणे भगे सुरते क्षुरे श्मश्र्वादिक्रियायां वर्जयेत् ॥१॥]

न स्नानमाचरेद्भुक्त्वा नातुरो न महानिशि ॥ न वासोभिःसहाजस्रंनाविज्ञाते जलाशये ॥ १२९॥

(१) **मेधातिथिः** । नित्यस्य स्नानस्य भुक्तवतः प्राप्त्यभावान्नायंप्रतिषेधः । स्मृत्यन्तरे हि स्नानंमहायज्ञाःशेषभोजनमित्यर्थक्रमःश्रुतः । न चण्डालस्पर्शनादिनिमित्तकस्यापि नाशुचिःक्षणमपितिष्ठेदितिविरोधात् । अतइच्छालक्षणस्य धर्मायपनोदहेतोरयंप्रतिषेधः । आतुरोव्याधिगृहीतः तस्यसर्वप्रकारस्नानप्रतिषेधोऽशुचित्वेऽपिसर्वतएवात्मानंगोपायेदिति । का तर्हि तस्य शुद्धिर्मार्जनंमन्त्रवत्प्रोक्षणंवस्त्रत्यागएवमादिकर्तव्यंमहानिशामुन्युक्तउभयतोऽर्धरात्रिकः । ये तु महती निशा यस्मिन्काले हेमन्तादाविति व्याचक्षते तेषांमाघफाल्गुनयोः प्रातःस्नानविधिविरोधादपव्याख्यानम् । नापि हैमन्तिकीषु रात्रिषु निषेधइतिप्रमाणमस्ति द्वितीयस्य निशाशब्दस्याभावात् । वासोभिरतिसामर्थ्यलक्षणे शीतादौवाससांबहुत्वे सति प्रतिषेधः । एकेन विहितमेव ननग्नःस्नायादितिद्वाभ्यामनियमोबहूनांप्रतिषेधः । जलाशयोजलाधारोऽविज्ञातः गाधागाधतया ग्राहादिभयेनच । अजस्रंसर्वदेत्यर्थः ॥ १२९ ॥

(२) **सर्वज्ञनारायणः** । आतुरोरोगी । महानिशातुविज्ञेयामध्यमंप्रहरद्वयमितिस्मृतिः । न वासोभिर्बहुभिः सह सचैलस्नानादन्यत्र । नाजस्रंपुनःपुनरेकस्मिन्दिने निमित्तान्तरपातंविना । अविज्ञातेविशेषतोन्त्यजाद्यखातत्वादिनाऽज्ञाते ॥ १२९ ॥

(३) **कुल्लूकः** । नित्यस्नानस्य भोजनानन्तरमप्रसक्तेश्चाण्डालादिस्पर्शनिमित्तकस्य मुहूर्तमपि शक्तिविषयेनाप्रयतःस्यादित्यापस्तम्बस्मरणान्निषेद्धुमयोग्यत्वाद्यदृच्छास्नानमिदंभोजनानन्तरंनिषिध्यते तथा रोगी नैमित्तिकमपि स्नानंन कुर्यात् किंतु यथासामर्थ्यं अशिरस्कंभवेत्स्नानंस्नानाशक्तौ तु कर्मिणाम् । आर्द्रेण वाससा वा स्यान्मार्जनंदैहिकंविदुरित्यादिजाबालाद्युक्तमनुसंधेयम् । तथा महानिशातुविज्ञेया मध्यस्थंप्रहरद्वयम् । तस्मिन्स्नानं न कुर्वीत काम्यनैमित्तिकादृतइतिदेवलवचनात्तत्र न स्नायात् । बहुवासाश्च नित्यं न स्नायात् । नैमित्तिकचाण्डालादिस्पर्शे सति तु स्नानंबहुवाससोऽप्यनिषिद्धम् । ग्राहाद्याक्रान्तागाधरूपतयाचविशेषेणाज्ञाते जलाशये च ॥ १२९ ॥

(४) **राघवानन्दः** । महानिशीति महानिशा तु सा ज्ञेया मध्यमंप्रहरद्वयम् । तस्यांस्नानं न कुर्वीत काम्यनैमित्तिकादृतइति हारीतोक्तेः ॥ मुहूर्तमपि शक्तिविषयेनाप्रयतःस्यादित्यापस्तम्बस्मरणात् ॥ चण्डालादिस्पर्शेवद्यंस्नानमिति यादृच्छिकस्नानविषयोनिषेधः । वासोभिर्विशिष्टइति कपिञ्जलाधिकरणन्यायेन त्रित्वंविवक्षितम् । अविज्ञाते नक्राद्याक्रान्तेगाधाद्ये ॥ १२९ ॥

(५) **नन्दनः** । नस्नानमाचरेत् भुक्त्वेति दृष्टार्थस्नानस्य प्रतिषेधः नातुरइत्यायदृष्टार्थस्नानस्यच । अन्तर्वासउत्तरवासोबहिर्वासइति त्रीणि वासांसिधार्याणि । तेषु बहिरुत्तरवाससोराप्लवननिषेधोबहुवचनग्रहणाद्गम्यते । अजस्रग्रहणादत्यन्तोपहतयोराप्लावनानुज्ञाच ॥ १२९ ॥

(६) **रामचन्द्रः** । निमित्तंविना वासोभिः सह स्नानं नसमाचरेत् । अविज्ञाते अन्त्यजादिना खानितत्वा ज्ञाते ॥ १२९ ॥

देवतानां गुरोराज्ञः स्नातकाचार्ययोस्तथा ॥ नाक्रामेत्कामतश्छायां बभ्रुणोदीक्षितस्य च ॥१३०॥

(१) **मेधातिथिः** । प्रतिकृतयोऽत्रदेवतास्तासांछायासंभवात् । गुरुः पिता । आचार्यउपनेता । भेदोपादानमातिदेशिकगौरवनिवृत्त्यर्थम् । तेन मातुलादिषु नायंविधिरिति । केचित्समाचारविरोधान्नैतद्युक्तम् गोबलीवर्दवद्भेदोविज्ञेयइति

वदन्ति । बभ्रुः कपिलोवर्णः । तद्गुणयुक्तंद्रव्यंबभ्र्वत्र गौः कपिला सोमलतावा । उभयोर्बभ्रुशब्देन वेदे प्रयोगदर्शनात् । कामतइत्यबुद्धिपूर्वमदोषः ॥ १३० ॥

(२) **सर्वज्ञनारायणः** । देवतानां देवतार्चानाम् । बभ्रुणः कपिलस्य प्राणिनश्छायाम् । दीक्षितस्य दीक्षाकाले ॥ १३० ॥

(३) **कुल्लूकः** । देवतानांपाषाणादिमयीनां गुरोःपित्रादेर्नृपतेःस्नातकस्याचार्यस्य च गुरुत्वेप्याचार्यस्य प्राधान्यविवक्षया पृथङ्निर्देशः । बभ्रुणः कपिलस्य यज्ञे दीक्षितस्यावभृथस्नानात्पूर्वमिच्छया छायांनाक्रामेत् चशब्दाच्चांडालादीनामपि । कामतइत्यभिधानादबुद्धिपूर्वके न दोषः ॥ १३० ॥

(४) **राघवानन्दः** । किंच देवतानामिति । आक्रमणंतदुपर्युपवेशनंउल्लङ्घनंचङ्क्रमणंअबुद्धिपूर्वे न दोषः नापि स्पर्शे बभ्रुणःकपिलस्य दीक्षितस्यकृतयज्ञस्य ॥ १३० ॥

(५) **नन्दनः** । देवतानांदेवताप्रतिमानाम् । स्नातकोब्राह्मणः । आचार्यउपनेता । बभ्रुः कपिलागौः ॥ १३० ॥

(६) **रामचन्द्रः** । देवतादीनां छायां कामतः नाक्रामेत् बभ्रूणां गवां कपिलां छायाम् । च पुनः दीक्षितस्य छायांनाक्रामेत् ॥ १३० ॥

मध्यंदिनेऽर्धरात्रे च श्राद्धं भुक्त्वा च सामिषम् ॥ सन्ध्ययोरुभयोश्चैव न सेवेत चतुष्पथम् ॥ १३१ ॥

(१) **मेधातिथिः** । मध्यान्हेऽर्धरात्रे महानिशायांसमांसंचश्राद्धंभुक्त्वानसेवेत चिरंन तत्रासीत । यदिकथंचिद्ग्रामादिगच्छतोनान्तरेण चतुष्पथंमार्गान्तरमस्ति तदा तावन्मात्रसंबन्धोन निषिध्यते । केचित्तुचकारमेवंयोजयन्तिश्राद्धंभुक्त्वासामिषंचान्यदपिभोजनम् । अस्मिंश्च संबन्धे समाचारोऽन्वेष्यः । नान्यथाव्यवहितः संबन्धोलभ्यते ॥ १३१ ॥

(२) **सर्वज्ञनारायणः** । श्राद्धंभुक्त्वा तथामिषंभुक्त्वापि । मध्यन्दिनार्धरात्रयोः । सन्ध्ययोश्च । न सेवेत चिरंन तत्रतिष्ठेत् ॥ १३१ ॥

(३) **कुल्लूकः** । दिवारात्रे च संपूर्णे प्रहरद्वये समांसंच श्राद्धंभुक्त्वा प्रातःसायंसन्ध्ययोश्च चिरंचतुष्पथंनाधितिष्ठेत् ॥ १३१ ॥

(४) **राघवानन्दः** । सामिषमामिषमित्यसकृन्निषेधाच्छ्राद्धे तद्दानंभक्षणंचावश्यकम् ॥ १३१॥

(५) **नन्दनः** । सामिषंश्राद्धंभुक्त्वामध्यन्दिनादिषुच चतुष्पथंनसेवेत ॥ १३१ ॥

(६) **रामचन्द्रः** । चतुष्पथं मध्यंदिने मध्यान्हकाले न सेवेत ॥ १३१ ॥

उद्वर्तनमपस्नानं विण्मूत्रे रक्तमेव च ॥ श्लेष्मनिष्ठ्यूतवान्तानि नाधितिष्ठेत्तु कामतः ॥ १३२ ॥

(१) **मेधातिथिः** । उद्वर्तनमभ्यङ्गमलापकर्षणंपिष्टादि । अपस्नानमुपयुक्तमुदकम् । निष्ठ्यूतमश्लेष्मरूपमपि भुक्त्वा त्यक्तंताम्बूलवीटिकादि । अधिष्ठानंतदुपरिस्थानम् । कामतःअज्ञानपूर्वमदोषः ॥ १३२ ॥

२) **सर्वज्ञनारायणः** । उद्वर्तनंगात्रोद्वर्तनमलम् । अपस्नानंमृतनिमित्तस्नानजलं मृतज्ञात्यादीनाम् । नाऽधितिष्ठेन्नोपरि तेषांतिष्ठेत् ॥ १३२ ॥

(३) कुल्लूकः। उद्वर्तनमभ्यङ्गमलापकर्षणपिष्टकादि। अपस्नानंस्नानोदकं मूत्रपुरीषे रुधिरंच श्लेष्माणंनिष्ठ्यूतमश्लेष्मरूपमपि चर्वितपरित्यक्तरूपताम्बूलादि वान्तंभुक्तोद्गीर्णभक्तादि एतानि कामतोनाधितिष्ठेत्। अधिष्ठानंतदुपर्यवस्थानम्॥ १३२॥

(४) राघवानन्दः। उद्वर्तनं गात्रान्निःसारितंमलं। अपस्नानं स्नानोदकं। निष्ठ्यूतं मुखनिःसृतं। कफं नाधितिष्ठेत्तदुपरीतिशेषः॥ १३२॥

(५) नन्दनः। उद्वर्तनंशरीरत्यक्तंमलं। अपस्नानंमृतस्नानजलम्॥ १३२॥

(६) रामचन्द्रः। उद्वर्तनादिषु कामतः नाधितिष्ठेत् उद्वर्तनं अभ्यङ्गमलापकर्षणं विण्मूत्रेच रक्तमेव श्लेष्मनिष्ठ्यूतवान्तानि एतेषु स्थानेषु कामतः नाधितिष्ठेत्॥ १३२॥

वैरिणं नोपसेवेत सहायं चैव वैरिणः॥ अधार्मिकं तस्करं च परस्यैव च योषितम्॥ १३३॥

(१) मेधातिथिः। वैरी शत्रुस्तस्यसदैवउपायनप्रेषणान्येकत्रस्थानासने गृहमानादिकथाप्रवृत्तिरित्येवमादि न कार्यम्। अधार्मिकः पातकी यश्च कुसृत्या वर्तते। तस्करश्चौरः। अस्मादेवचभेदोपादानादधार्मिकोनसर्वःकिंतर्हियथाव्याख्यातम्। परस्ययोषितम्। योषिद्ग्रहणान्नपत्न्येवकिंतर्ह्यवरुद्धापिवैरकरणत्वादुभयोर्दृष्टदोषनिमित्तैश्च प्रतिषेधःसाहचर्यात्। उत्तरत्र च दारग्रहणमदृष्टदोषातिशयदर्शनार्थम्। पुनरेवंवक्तव्यंयोषितमितिसामान्यनिर्देशे दारशब्दार्थवादाद्विशेषावगतिः। नायमस्यार्थवादोभिन्नमेवैतद्वाक्यम्॥ १३३॥

(२) सर्वज्ञनारायणः। अरिंन सेवेत चिरंन तत्समीपे तिष्ठेत्॥ ३३॥

(३) कुल्लूकः। शत्रुंतन्मन्त्रिणमधर्मशीलंचौरंपरदारांश्चनसेवेत। चौरस्याधार्मिकत्वेऽप्यत्यन्तगर्हितत्वात्पृथङ्निर्देशः॥ १३३॥

(४) राघवानन्दः। वैरिणःसहायमित्यन्वयोतस्तन्मित्रंवर्जयेत्॥ १३३॥

(५) नन्दनः। योषितोदारान्॥ १३३॥

(६) रामचन्द्रः। परस्य योषितं न सेवेत॥ १३३॥

न हीदृशमनायुष्यं लोके किंचन विद्यते॥ यादृशं पुरुषस्येह परदारोपसेवनम्॥ १३४॥

(१) मेधातिथिः। अजीर्णकारभोजनादि सुवर्णापहरणादिचेदृशमनायुष्यमायुष्यक्षयकरंयादृशंपरदारगमनम्। अदृष्टेन दृष्टेन च दोषः॥ १३४॥

(२) सर्वज्ञनारायणः। अनायुष्यं। लोके इहलोके॥ १३४॥

(३) कुल्लूकः। यस्मादीदृशमनायुष्यमिह लोके पुरुषस्य न किंचिदस्ति यादृशंपरदारगमनम् तस्मादेतन्न कर्तव्यम्॥ १३४॥

(४) राघवानन्दः। तेषु परस्त्रीगमनमत्यर्थनिराकर्तव्यमित्याह नहीति। सेवनं संभोगः॥ १३४॥

(६) रामचन्द्रः। परदारोपसेवनं यादृशंअनायुष्यकरं ततो न्यतरम्॥ १३४॥

क्षत्रियं चैव सर्पं च ब्राह्मणं च बहुश्रुतम्॥ नावमन्येत वै भूष्णुः कृशानपि कदाचन॥ १३५॥

(१) मेधातिथिः। अवमानअनादरोगौरवाभावस्तिरस्कारश्च। कृशानपि तदात्वे प्रीतिंकर्तुमसमर्थानपि॥ १३५॥

(२) सर्वज्ञनारायणः । नावमन्येताधिक्षेपादिनाऽवमतान्नकुर्यात् भूष्णुर्भूतिशीलइतिभूतिकामिताऽभिप्रेता ॥१३५॥

(३) कुल्लूकः । वृद्धयर्थे भूधातुः । भूष्णुःवर्धिष्णुर्धनगवादिना वर्धनशीलः क्षत्रियंसर्पंबहुश्रुतंच ब्राह्मणंनावजानीयात । कृशानपितत्काले प्रतीकाराक्षमान् ॥ १३५ ॥

(४) राघवानन्दः । किंच क्षत्रियमिति द्वाभ्यां । बहुश्रुतंविद्वांसं । भूष्णुरायुरादिना वर्धनशीलः ॥ १३५ ॥

(५) नन्दनः । क्षत्रियमभिषिक्तम् ॥ १३५ ॥

(६) रामचन्द्रः । भूष्णुः वर्धिष्णुः क्षत्रियादिकं नावमन्येत न तिरस्कुर्यात् ॥ १३५ ॥

एतत्त्रयं हि पुरुषं निर्दहेदवमानितम् ॥ तस्मादेतत्त्रयं नित्यं नावमन्येत बुद्धिमान् ॥ १३६ ॥

(१) मेधातिथिः । अवमन्तारंपुरुषम् त्रयमवमानितम् क्षत्रियः सर्पोऽदृष्टया शक्त्या ब्राह्मणोजपहोमैरदृष्टेन च दोषेण तस्मादेतत्त्रयंनित्यमित्युपसंहारः । विधाय दोषदर्शनंपुनरुपसंहारोयत्नेन परिहारार्थः । यत्नातिशयाच्च प्रायश्चित्ते गौरवमप्यनुमीयते ॥ १३६ ॥

(२) सर्वज्ञनारायणः । तस्मादित्युक्तोपसंहारोदोषाधिक्यज्ञापनार्थः ॥ १३६ ॥

(३) कुल्लूकः । एतत्त्रयमवमानितंसदवमन्तारंविनाशयति । क्षत्रियसर्पौ दृष्टशक्त्या ब्राह्मणश्चाभिचारादिना दृष्टेन तस्मात्कल्याणबुद्धिरेतत्त्रयंसर्वदा नावजानीयात् ॥ १३६ ॥

(४) राघवानन्दः । तत्काले अनपकारित्वेपि उदर्केअनर्थावहमित्याह एतदिति । त्रयंक्षत्रियादि । अवमानितंसत्पुरुषमवमन्तारंदृष्टादृष्टाभ्यांदहति ॥ १३६ ॥

(५) नन्दनः । उक्तमर्थंनिगमयति एतदिति ॥ १३६ ॥

(६) रामचन्द्रः । क्षत्रियः ब्राह्मणः सर्पः एतत्त्रयमवमानितं तिरस्कृतं निर्दहति ॥ १३६ ॥

नात्मानमवमन्येत पूर्वाभिरसमृद्धिभिः ॥ आमृत्योः श्रियमन्विच्छेन्नैनां मन्येत दुर्लभाम् ॥१३७॥

(१) मेधातिथिः । असमृद्धिर्धनाद्यसंपत्तिःकृष्यादिना धनार्जनावसरे । तत्र नात्माऽवमन्तव्योदुर्भगोऽहमकृतपुण्योनास्मिन्नवसरेधनंमयालब्धंकुतोऽन्यदा प्राप्स्यामीति नावसादोभावनीयः । आमृत्योः श्रियमन्विच्छेत् आन्त्यादुच्छ्वासाद्धनार्जनकामोन त्यक्तव्यः । न चैनांश्रियंदुर्लभांमन्येत । अवश्यंममसंपद्यतेमद्व्यवसायइतिगृहदौःस्थित्याद्यपरिगणय्य तदर्जने प्रवर्तितव्यम् । अस्ति कस्यचित्सुभाषितम् । हीनाःपुरुषकारेणगणयन्तिगृहस्थितिम् । सत्त्वोद्यमसमर्थानांनासाध्यंव्यवसायिनाम् ॥ अनेन चैतद्दर्शयति नाहंदुर्गतःक्लेशमाप्यधनआधानादौ नाधिक्रिये ततोऽग्निहोत्रहोमक्लेशाद्युत्तीर्णोऽस्मीति यस्यबुद्धिःसन सम्यङ्मन्यतइति । अतस्तदर्थंप्रयतेत ॥ १३७ ॥

(२) सर्वज्ञनारायणः । पूर्वाभिः पित्रादिक्रमागताभिः । अन्विच्छेत् प्रयत्नेनानुसंदध्यात् ॥ १३७ ॥

(३) कुल्लूकः । प्रथमंधनार्थमुद्यमे कृते तत्र धनानामसंपत्तिभिर्मन्दभाग्योऽहमितिनात्मानमवजानीयात् । किंतु मरणपर्यन्तंश्रीसिद्धयर्थमुद्यमंकुर्यात् न त्विमांदुर्लभांबुध्येत् ॥ १३७ ॥

(४) राघवानन्दः । अवमाननप्रसङ्गेनाह नेति । पूर्वसंपन्नः सांप्रतंन्दतधनःकृतोद्यमस्तदशक्त्या मन्दभाग्योहमि-

---

* धनगवादिना=धनायुरादिना (अ)

त्यात्मानंनावजानीयादिति । उक्तनिषेधातिक्रमिणंस्वावमानेनावसन्नंप्रत्याह आमृत्योरिति । एनां श्रियंपुरुषकारस्यासाध्यत्वाभावात् ॥ १३७ ॥

(६) रामचन्द्रः । एनां श्रियं दुर्लभांनमन्येत् नासाध्यंव्यवसायिनः पूर्वापरसमृद्धिभिः पित्रादिक्रमादागताभिः ॥ १३७ ॥

सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम् ॥ प्रियं च नानृतं ब्रूयादेषधर्मः सनातनः ॥ १३८ ॥

(१) मेधातिथिः । अर्थप्रयुक्तवचनं सत्येनियम्यते । यथादृष्टंश्रुतंचसत्यंप्रियंब्रूयात् । द्वितीयोऽयंविधिः । औदार्यादिगुणानुकथनंपरस्यादृष्टेनापि केनचिदवसरेण । तथा पुत्रजन्मादि ब्राह्मणपुत्रस्तेजातइत्यसत्यपि स्वप्रयोजने यदि सत्यंतद्वक्तव्यं । यदितस्य तन्नविदितंसत्यंप्रियमप्रियंवास्ति । प्रियंदर्शितंब्राह्मणपुत्रइत्यादि । अप्रियंयथाब्राह्मण कन्याते गर्भिणी तदसत्यंन ब्रूयात्सत्यमपि कन्यागर्भग्रहणमप्रियत्वादप्रकाश्यम् । सत्यांगतौतूष्णीमासितव्यम् । ननुगर्भिण्यागार्भिणीति वक्तव्यंप्रियत्वादतआहप्रियंचनानृतंब्रूयादिति । एवंच यस्यप्रथमःसाक्षात्कारस्तेन तत्रतूष्णीमासितुंन लभ्यते । एषसनातनोधर्मः । सनातनोनित्योवेदस्तेन विहितत्वाद्धर्मोऽपि सनातनः ॥ १३८ ॥

(२) सर्वज्ञनारायणः । सत्यंब्रूयात् प्रियंब्रूयादिति समुच्चितंवाक्यमिति स्फुटयितुम् न ब्रूयादिति व्यतिरेकोपदर्शनम् ॥ १३८ ॥

(३) कुल्लूकः । यथादृष्टश्रुतंतत्त्वंब्रूयात् तथा प्रीतिसाधनंब्रूयात् पुत्रस्तेजातइति । यथादृष्टश्रुतमप्यप्रियंपुत्रस्तेमृत इत्यादि न वदेत् प्रियमपि मिथ्या न वदेत् । एषवेदमूलतया नित्योधर्मः ॥ १३८ ॥

(४) राघवानन्दः । किंचसत्यमिति । विप्रंक्षत्रियंवैश्यंवा न । भोभोक्षत्रियदायाद न क्षत्रियाधमेति । क्षत्रियंब्राह्मणंन ब्रूयात् ॥ १३८ ॥

(६) रामचन्द्रः । प्रियमपि अनृतं न ब्रूयात् ॥ १३८ ॥

भद्रंभद्रमितिब्रूयाद्भद्रमित्येव वा वदेत् ॥ शुष्कवैरं विवादं च न कुर्यात्केनचित्सह ॥ १३९ ॥

(१) मेधातिथिः । अत्र प्रथमस्य भद्रशब्दस्यनञ्लोपंव्याचक्षते । यदभद्रंतद्भद्रमितिब्रूयात् । इतिकरणः प्रदर्शनार्थः । कल्याणंमङ्गलंसिद्धंश्रेयइत्यादयः सिद्धाः शब्दाः प्रयोक्तव्याः । पूर्वपदस्यापि प्रदर्शनार्थत्वेऽन्धे चक्षुष्मान्मूर्खे प्राज्ञइत्यादिवचनंलभ्यते । अथवाभद्रमित्येषएवशब्दएवमादिषु वक्तव्यः । शुष्कवैरंअसत्यर्थादिप्रयोजनआहोपुरुषिकंवाक्यंनकर्तव्यम् । एवंराजाधिकरणेविवादंशुष्कमेवेत्यादिसंपद्यते । केनचिदसमर्थेनापि ॥ १३९ ॥

(२) सर्वज्ञनारायणः । भद्रंवस्तुतोयच्छोभनं भद्रमित्येववा भद्रमपि । शुष्कंवैरंनिर्निमित्तंद्वेषं विवादंविरुद्धवादम् ॥ १३९ ॥

(३) कुल्लूकः । प्रथमंभद्रपदमभद्रपदपरं द्वितीयंभद्रशब्दपर्यायपरं अभद्रंयत्तद्भद्रशब्दपर्यायपरमप्रशस्तादिशब्देन प्रब्रूयात् । तथाचापस्तम्बः । नाभद्रमभद्रंब्रूयात्पुण्यंप्रशस्तमितिब्रूयात्भद्रमित्येवेति भद्रपदमेव वा तत्र योज्यं । शुष्कंनिष्प्रयोजनंवैरंविवादंन केनचित्सह कुर्यात् ॥ १३९ ॥

(४) राघवानन्दः । किंचभद्रमिति । भद्रंभद्रमितिवीप्सा । शुष्कंवैरमितिफलरहितंवैरम् ॥ १३९ ॥

(५) नन्दनः । शुभाशुभेषु सर्वत्र भद्रंभद्रमितिब्रूयात् । भद्रमितिब्रूयादितियावत् । भद्रमित्येव वा वदेत् । सकृद्भद्रमित्येव वा ब्रूयात् । शुष्कंनिरर्थकम् ॥ १३९ ॥

(६) रामचन्द्रः। अभद्रमपि वस्तु भद्रंभद्रमिति ब्रूयात् शुष्कवैरं निष्प्रयोजनं वैरं न कुर्यात् ॥ १३९ ॥

नातिकल्यं नातिसायं नातिमध्यंदिने स्थिते ॥ नाज्ञातेन समं गच्छेन्नैको न वृषलैः सह ॥ १४० ॥

(१) मेधातिथिः। अतिकल्यशब्दश्चाहर्मुखे वर्तते। उषःकाले नगन्तव्यम्। अतिसायंपश्चिमसन्ध्यासमयेऽज्ञानेन पुरुषेण सह न गच्छेत्। असहायश्च वृषलैः शूद्रैश्च सह ॥ १४० ॥

(२) सर्वज्ञनारायणः। अतिकल्यमुदयसमये न गच्छेत् पन्थानं। स्थिते वर्तमाने। न वृषलैरेव सह ॥१४०॥

(३) कुल्लूकः। उषःसमये प्रदोषे च दिवा संपूर्णप्रहरद्वये चअज्ञातकुलशीलेन पुरुषेण शूद्रैश्च सह न गच्छेत्। नैकःप्रपद्येताध्वानमित्युक्ते प्रतिषेधेऽपि पुनर्नैकइतिप्रतिषेधःस्नातकव्रतलोपप्रायश्चित्तगौरवार्थः ॥ १४० ॥

(४) राघवानन्दः। षडेतान्वर्जयेदित्याह नेति। अतिकल्यंउषसिस्थितेसूर्यइति शेषः। अज्ञातेन कुलशीलादिना वृषलैर्वेष्टितोनैकोविप्रः१४०

(५) नन्दनः। अज्ञातेनाविदितस्वभावेन ॥ १४० ॥

(६) रामचन्द्रः। अतिकल्यं प्रातः अज्ञातेन पुरुषेण समं नाधिगच्छेत्। प्रत्यूषोहर्मुखं कल्यमित्यमरः। अतिसायंकालं अतिमध्यंदिने स्थिते तथा वृषलैःसह न गच्छेत् ॥१४० ॥

हीनाङ्गानतिरिक्ताङ्गान्विद्याहीनान्वयोधिकान् ॥ रूपद्रव्यविहीनांश्च जातिहीनांश्च नाक्षिपेत् ॥ १४१ ॥

(१) मेधातिथिः। हीनाङ्गाःकाणकुष्ठिकुब्जादयः। अतिरिक्तमधिकंअङ्गंयेषांश्लीपद्यादयः। विद्याहीनामूर्खाः। वयोतिगाअत्यन्तवृद्धाः। रूपहीनादुःसंस्थानाश्चिपिटकेकरादयः। द्रविणहीनाःदरिद्राःद्रविणंधनंतेन हीनावर्जिताः। जात्याहीनानिकृष्टजातयः कुण्डगोलकाद्यास्तान्नाक्षिपेत्। आक्षेपःकुत्सा एतेषांएतैः शब्दैराव्हानमेव कुत्सा ॥ १४१ ॥

(२) सर्वज्ञनारायणः। वयोतिगानतिवृद्धान्। द्रविणंधनं। जातिर्विशिष्टकुलजन्म नाऽऽक्षिपेद्धीनाङ्गत्वाद्यन्तर्भावेनाक्षेपंन कुर्यात् ॥ १४१ ॥

(३) कुल्लूकः। हीनाङ्गाधिकाङ्गमूर्खवृद्धकुरूपार्थहीनहीनजातीन्काणशब्दाह्वानादिना न निन्देत् ॥ १४१ ॥

(४) राघवानन्दः। खञ्जपादइतिवा अङ्गहीनान्षट्नाधिक्षिपेदित्याहहीनाङ्गानिति ॥ १४१ ॥

(५) नन्दनः। द्रव्यंधनम्। जातिराभिजात्यं ॥ १४१ ॥

(६) रामचन्द्रः। हीनाङ्गादींश्च न क्षिपेत् न तिरस्कुर्यात् ॥ १४१ ॥

न स्पृशेत्पाणिनोच्छिष्टोविप्रोगोब्राह्मणानलान् ॥ न चापि पश्येदशुचिःसुस्थोज्योतिर्गणान्दिवि ॥ १४२ ॥

(१) मेधातिथिः। उच्छिष्टोभुक्तवानमाचान्तःकृतमूत्रपुरीषश्च। अशुचिमात्रमिहोच्छिष्टशब्देनोच्यते। तथाचोच्छिष्टस्य गवादिस्पर्शः प्रतिषिध्यतेऽशुचिशब्देन। प्रायश्चित्तंवक्ष्यति पाणिग्रहणमतन्त्रम्। अन्येनाप्यङ्गेन स्पर्शोने-

---

(१४१) वयोऽधिकान्=वयोऽतिगान् (मे०)

ष्यते । वस्त्राद्यन्तरिते न निषेधः ॥ दिविज्योतिर्गणंनपश्येत् । स्वस्थोनातुरः । दिवीतिवचनाद्भूमौ ज्योतिषोऽग्ने र्नाप्रतिषेधः ॥ १४२ ॥

(२) सर्वज्ञनारायणः । पाणिना न स्पृशेदिति गात्रान्तरेण स्पर्शे तादृशदोषाभावार्थः । उच्छिष्टइत्यशुचिमात्रोपलक्षणम् ॥ १४२ ॥

(३) कुल्लूकः । कृतभोजनःकृतमूत्रपुरीषादिश्चाकृतशौचाचमनोब्राह्मणोहस्तादिना गोब्राह्मणाग्नीन्न स्पृशेत् । नचाशुचिःसन्नानातुरोदिविस्थांत्सूर्यचन्द्रग्रहादिज्योतिर्गणान्न पश्येत् ॥ १४२ ॥

(४) राघवानन्दः । किंच नेति । स्वयमुच्छिष्टोविप्रः पाणिना गोब्राह्मणादीन् न स्पृशेदित्यन्वयः । तथा स्वयंसुस्थोऽशुचिःसन् ॥ १४२ ॥

(५) नन्दनः । उच्छिष्टः स्नानाचमनशौच्याशौचयुक्तः । स्वस्थःसावधानः । अत्र दिवीतिविशेषणाज्जलेनुज्ञातंदर्शनमितिगम्यते ॥ १४२ ॥

(६) रामचन्द्रः । युग्मं । न स्पृशेदिति । अशुचिःसञ्ज्योतिर्गणंन पश्येत् ॥ १४२ ॥

स्पृष्ट्वैतानशुचिर्नित्यमद्भिःप्राणानुपस्पृशेत् ॥ गात्राणि चैव सर्वाणि नाभिंपाणितलेन तु ॥ १४३॥

(१) मेधातिथिः । अविशेषवचनेऽपि प्राणाश्चक्षुरादयएवमूर्धन्याउच्यन्ते । प्राणशब्दश्चक्षुरादिवचनोवेदे प्राणसंभवोपनिषदि दृश्यते । गात्राणिअंसजानुपादादीनि । पाणितलेनापोगृहीत्वा स्पृशेत् ॥ १४३ ॥

(२) सर्वज्ञनारायणः । एतान्गोब्राह्मणानलान् स्पृष्ट्वा ज्योतिर्गणंच दृष्ट्वेत्यपि । अद्भिःप्राणानिति आचमनंकृत्वा जलसहितेन हस्तेन मूर्धन्येन्द्रियस्थानानिसमहस्ततलेन सर्वगात्रंनाभिंच स्पृशेदिति तस्यप्रायश्चित्तमित्यर्थः ॥ १४३ ॥

(३) कुल्लूकः । एतान्गवादीनशुचिःसन्स्पृष्ट्वा कृताचमनःपाणिना गृहीताभिरद्भिःप्राणांश्चक्षुरादीनीन्द्रियाणि शिरःस्कन्धजानुपादान्नाभिंच स्पृशेत् । अप्रकरणे चेदंप्रायश्चित्ताभिधानंलाघवार्थम् । तत्रप्रकरणे गवादिग्रहणमपि कर्तव्यंस्यात् ॥ १४३ ॥

(४) राघवानन्दः । दैवाच्चेत्तत्राह स्पृष्ट्वेति । प्राणान्चक्षुरादीन्द्रियाणिजलपूर्वमुपस्पृशेदिति । नाभिंचपाणितलेनकरणेन ॥ १४३ ॥

(५) नन्दनः । अत्र प्रायश्चितमाह स्पृष्ट्वेति । एतानि गोब्राह्मणानलान्पाणिना ज्योतिर्गणांश्चक्षुषा स्पृष्ट्वाअद्भिःसहपाणितलेन प्राणांश्चक्षुरादीनि प्राणस्थानानीति । गात्राण्यवयवांश्चनाभिंचोपस्पृशेत् ॥ १४३ ॥

(६) रामचन्द्रः । एतान् विप्रादीन् अशुचिःसन् स्पृष्ट्वा अद्भिःप्राणान्प्राणेन्द्रियादीन् उपस्पृशेत् । सर्वाणि गात्राणि नाभिंच पाणितलेन स्पृशेत् ॥ १४३ ॥

अनातुरःस्वानि खानि न स्पृशेदनिमित्ततः ॥ रोमाणि च रहस्यानि सर्वाण्येव विवर्जयेत्॥१४४॥

(१) मेधातिथिः । अनिमित्ततःकण्डूयनादिनिमित्तंविना । स्वानि खानि चक्षुरादीनि छिद्राणि न स्पृशेत् । रह-

* स्थान्=ग्रान् (अ)

स्थानि कक्षोपस्थगतानि विवर्जयेत्प्रकृतेन स्पर्शेन । श्लोकपूरणार्थमाख्यातान्तरोपादानम् । अन्येत्वाहुः आख्याता-न्तरनिर्देशाद्दर्शनंप्रतिषिध्यते ॥ १४४ ॥

(२) सर्वज्ञनारायणः । अनातुरः कण्डूत्यादिपीडाभावे । तथा ऽनिमित्ततआचमनादिनिमित्तव्यतिरेकेण । खानि इन्द्रियस्थानानि नाभ्यूर्ध्वस्थान्यपि न स्पृशेत् । रहस्यान्युपस्थादिस्थितानि वर्जयेत् । स्पृशेन्नित्यमेवातुरत्वेपि ॥१४४ ॥

(३) कुल्लूकः । अनातुरःसन् खानि खानीन्द्रियच्छिद्राणिरोमाणि च गोप्यान्युपस्थकक्षादिगतानि निर्निमित्तं स्पृशेत् ॥ १४४ ॥

(४) राघवानन्दः । अनिमित्ततः । आचमनादिनिमित्तंविना । रहस्थानि कक्षोपस्थगतानिविवर्जयेन्नस्पृशेत ॥ १४४ ॥

(५) नन्दनः । अनातुरः श्रोत्रादिषु पीडारहितः । खानि श्रोत्रादीनि । वर्जयेत् स्पर्शनइतिशेषः ॥ १४४ ॥

(६) रामचन्द्रः । खानि खानि । छिद्राणि अनिमित्ततः न स्पृशेत् । सरहस्यानिगुह्यस्थानि यानि रोमाणि तानि वर्जयेत् ॥ १४४ ॥

मङ्गलाचारयुक्तःस्यात्प्रयतात्मा जितेन्द्रियः ॥ जपेच्च जुहुयाच्चैव नित्यमग्निमतन्द्रितः ॥ १४५ ॥

(१) मेधातिथिः । अभिलषितायुर्धनादिसिद्धिर्मङ्गलम् । तदर्थमाचारोमङ्गलाचारोगोरोचनातिलकशुभफलादिस्पर्शस्तेन युक्तोनित्यंतत्सेवापरः स्यात् । ननु चाचारस्य प्रामाण्यमुक्तमेव । सत्यम् । अदृष्टस्यार्थस्यानेनोच्यते । दृष्टबुद्ध्याहि क्रियमाणस्य व्यभिचारदर्शनेनकश्चिदनादरपरः स्यात् । तदर्थंपुनरुच्यते यथाप्रस्थानकाले संनिहिते पुनः कथनं दध्यादौवन्दनंशुक्लनिवसनदर्शनंदक्षिणतःकपिञ्जलवासितं फलिते वृक्षे दक्षिणतएव वायसस्य । एवमादिमङ्गलार्थमादरणीयंविपरीतंविपरीतंवर्जनीयम् । जितेन्द्रियोविषयेष्वलालसः । पुरुषार्थतयैतदसकृदुक्तमपि विनिपातनिवृत्त्यर्थमुमुच्यते । अग्नेरन्यत्रापिहोमसंभवाज्जुहुयादग्निमित्याह । अतन्द्रितइत्युक्तानुवादः ॥ १४५ ॥

(२) सर्वज्ञनारायणः । मङ्गलाचारः । पापालक्ष्मीनाशहेतुराचारः । नियतात्मा शुचिः । जितेन्द्रियो नियतेन्द्रियः । जपेत्गायत्र्यादि जुहुयात्तेनैव पापशान्त्यर्थम् ॥ १४५ ॥

(३) कुल्लूकः । अभिप्रेतार्थसिद्धिर्मङ्गलंतद्धेतुत्वेन गोरोचनादिधारणमपि मङ्गलम् । गुरुसेवादिकमाचारस्तत्रोयुक्तः स्यात् । बाह्याभ्यन्तरशौचोपेतोजितेन्द्रियश्च भवेत् । गायत्र्यादिजपंविहितहोमंचनित्यंकुर्यात् । अतन्द्रितोऽनलसः । अत्राचारादीनामुक्तानामपि विनिपातनिवृत्त्यर्थत्वात्पुनरभिधानम् ॥ १४५ ॥

(४) राघवानन्दः । किंचमङ्गलेति । मङ्गल्यं स्वर्णदूर्वादि । प्रयतात्मा शुचिः । जपेद्गायत्रीमिति शेषः ॥ १४५ ॥

(५) नन्दनः । नैमित्तिकानाचारानाह मङ्गलेति । मङ्गलानि सुवर्णंचन्दनंरत्नंपञ्चगव्यानिरोचनां । प्रियङ्गुंसर्षपंक्षौद्रंमङ्गलानि प्रचक्षते ॥ आचारोव्याख्यातः ॥ १४५ ॥

(६) रामचन्द्रः । मङ्गलाचारयुक्तः स्याद्दलालंकारयुक्तःस्याद्गायत्रींजपेत् ॥ १४५ ॥

मङ्गलाचारयुक्तानां नित्यं च प्रयतात्मनाम् ॥ जपतां जुह्वतां चैव विनिपातोन विद्यते ॥१४६ ॥

(१) मेधातिथिः । विनिपातः प्राकृताशुभनिमित्तकोदैवोपद्रवोव्याधिर्धननाशइष्टवियोगादिः । सएवमाचाराणांमाङ्गल्यकान्निवर्तते । अनेनापि नित्यतैवोक्ता भवति सत्यपि फलार्थत्वे । नहि कश्चिद्दैवोपद्रवानिवृत्तिमर्थयते । अतो-

नित्यग्रहणमनुवादः। अथापि कश्चिदनर्थोस्यात्तथापि नित्यएवायंविधिः। एवंचोभयार्थतातस्य नित्याधिकारवृत्तिर्विनिपातनिवृत्तिश्च ॥ १४६ ॥

(२) सर्वज्ञनारायणः। विनिपातइहलोकेपरलोके च ॥ १४६ ॥

(३) कुल्लूकः। अतआहमङ्गलाचारयुक्तानामिति। मङ्गलाचाराभ्यांयुक्तानांनित्यंशुचीनांजपहोमरतानांदैवमानुषोपद्रवोन जायते ॥ १४६ ॥

(४) राघवानन्दः। उक्तानामनुष्ठानेअर्थवादमाह मङ्गलेति। विनिपातोदैवमानुषोपद्रवः जपादिफलराहित्यंवा। मङ्गलाचारयुक्तानामित्याद्यनुवादः ॥ १४६ ॥

(६) रामचन्द्रः। मङ्गलेति। मङ्गलाचारयुक्तादीनांविनिपातोव्याध्यादीभिःचरणादेरनिष्टप्राप्तिर्नविद्यते ॥ १४६ ॥

वेदमेवाभ्यसेन्नित्यं यथाकालमतन्द्रितः ॥ तं ह्यस्याहुः परं धर्ममुपधर्मोऽन्यउच्यते ॥ १४७ ॥

(१) मेधातिथिः। जपेच्चजुहुयाच्चैवेत्युक्तम्। तत्र तावज्जपस्य साधनमाह वेदमेवजपेदिति। अवशिष्टोऽर्थवादः। यथाकालंयस्मिन्यस्मिन्काले वीप्सायामव्ययीभावः। यदैव हैहिकी चेष्टा नातिपद्यते। तदैव जपेत्। अन्यान्यग्निहोत्रादिकर्माणि नियतकालानि। जपस्यतुशुचित्वमेवकालः। अयंमुख्योधर्मः। उपधर्मोधर्मस्यसमीपेउपधर्मः। समीपप्रधानस्तत्पुरुषोनाव्ययीभावः। उपमानानिसामान्यवचनैरिति यथा। धर्मान्तरनिन्दा वेदजपस्तुत्यर्था न तन्निषेधार्था ॥ १४७ ॥

(२) सर्वज्ञनारायणः। वेदमेव यथाकालंस्वाध्यायकाले जपेत वेदजपमेव कुर्यात्। नतु तद्विरोधि कर्मान्तरमिति। अभ्युदयसाधनं नियतेनास्य स्नातकस्य उपधर्मोऽल्पधर्मः ॥ १४७ ॥

(३) कुल्लूकः। नित्यकृत्यावसरे श्रेयोहेततया प्रणवगायत्र्यादिकंवेदमेवानलसोजपेत्। यस्मात्तंब्राह्मणस्य श्रेष्ठंधर्ममन्वादयोवदन्ति। अन्यः पुनस्ततोऽपकृष्टोधर्मोमुनिभिरुच्यते। उक्तस्यैव वेदाभ्यासादेः पूर्वजातिस्मरणद्वारेण मोक्षहेतुत्वंवदितुंपुनरभिधानम् ॥ १४७ ॥

(४) राघवानन्दः। तंवेदजपं उपधर्मः। अपकृष्टधर्मः विधर्मोवा ॥ १४७ ॥

(५) नन्दनः। जपेच्चेत्युक्तम् किंजप्यमित्यपेक्षायामाह वेदमिति। तंवेदजपम्। अन्योऽवेदजपः ॥ १४७ ॥

(६) रामचन्द्रः। तंपरंधर्मआहुः। अन्योधर्मउपधर्म उच्यते ॥ १४७ ॥

वेदाभ्यासेन सततं शौचेन तपसैव च ॥ अद्रोहेण च भूतानां जातिं स्मरति पौर्विकीम् ॥ १४८ ॥

(१) मेधातिथिः। अद्रोहोऽहिंसा। भूतानिस्थावरजङ्गमानि। जातिस्मरफलान्येतानि कर्माणिचत्वारियावज्जीवमनुष्ठीयमानानिभवन्ति। जातिर्जन्मान्तरम्। पूर्वेभवापौर्विकी ॥ १४८ ॥

(२) सर्वज्ञनारायणः। एषच वेदाभ्यासः शौचादिभिर्यमैस्तपःप्रभृतिभिर्नियमैश्च सहितएवाभ्युदयहेतुरित्याह वेदाभ्यासेनेति। तपसाप्राणायामादिना शौचादिकं यमस्य तपश्च नियमस्योपलक्षणम्। जातिंजन्म ॥ १४८ ॥

(३) कुल्लूकः। सततवेदाभ्यासशौचतपोऽहिंसाभिःपूर्वभवस्य जातिंस्मरति ॥ १४८ ॥

(४) राघवानन्दः। वेदाभ्यासादिचतुष्टयंजातिस्मृतेरपि हेतुरित्याह वेदेति ॥ १४८ ॥

(५) नन्दनः। योयंवेदजपः सशौचसत्यतपोऽहिंसायुक्तश्चेत्परमोधर्मोभवति नान्यथेत्याह वेदेति ॥ १४८ ॥

(६) **रामचन्द्रः** । भूतानामद्रोहेणैव पौर्विकींजातिंस्मरति ॥ १४८ ॥

पौर्विकीं संस्मरन् जातिं ब्रह्मैवाभ्यसते पुनः ॥ ब्रह्माभ्यासेन चाजस्रमनन्तंसुखमश्नुते ॥ १४९ ॥

(१) **मेधातिथिः** । ननुचेष्टफलकामः सर्वसमीहते जन्मान्तरानुस्मरणमेकतरसुखंयेन फलत्वेन वेदाभ्यासादिचतुष्टयस्य वर्ण्यते । ततआह पौर्विकींजातिंस्मरन्पुनस्तदभ्यासे वर्तते । तस्माच्चानेकजन्माभ्यासादनन्तरंब्रह्मप्राप्तिलक्षणं सुखम् । अजस्रमपुनरावृत्ति अश्नुतेप्राप्नोति । अनन्तशब्देन सुखविशेषोलक्ष्यतोऽसाधना परितृप्तिरात्मनस्तस्याजस्रपदेन शाश्वतंप्रतिपाद्यते तादृशंसुखंप्राप्यते नचैतत्क्षीयते । समानार्थावथपुनरुक्तौ यथावृत्तकंवहतः पुरीषमिति । वृत्तकमुदकं पुरीषंच तत्रैकोरूढोऽपरः क्रियाशब्दः । पुरीषंपूरणसमर्थंवृत्तकमुदकम् ॥ १४९ ॥

(२) **सर्वज्ञनारायणः** । अजस्रंसर्वदा ब्रह्मणोवेदस्याभ्यासेन आनन्त्यमनन्तकालस्थायि ॥ १४९ ॥

(३) **कुल्लूकः** । ततःकिमतआह पौर्विकीमिति । पूर्वजातिंस्मरन् जातिमित्येकत्वमनाकाङ्क्षितत्वादविवक्षितम् । बहूनि जन्मानि स्मरंस्तेषु च गर्भजन्मजरामरणदुःखान्यपि स्मरन्संसारे विरज्यन्ब्रह्मैवाजस्रमभ्यसति श्रवणमननध्यानैः साक्षात्करोति तेन चानन्तमविनाशिपरमानन्दाविर्भावलक्षणंमोक्षसुखंप्राप्नोति ॥ १४९ ॥

(४) **राघवानन्दः** । पूर्वजातिस्मृतौकिंस्यादित्यत्राह पौर्विकीमिति । वेदाभ्यासेनैवंमम जातिस्मरता जातेतिकृत्वा ब्रह्मैवाभ्यस्यंतततोऽनन्तमविनाशि मोक्षरूपम् ॥ १४९ ॥

(५) **नन्दनः** । जातिस्मरणेन किंप्रयोजनमित्यपेक्षायामाह पौर्विकीमिति । ब्रह्मवेदमनन्तरं सुखंमुक्तिम् ॥ १४९ ॥

(६) **रामचन्द्रः** । ब्रह्मैव वेदमेव । पुनरभ्यसेतब्रह्माभ्यासेन अजस्रं निरन्तरं आनन्त्यंफलंअश्नुते ॥ १४९ ॥

सावित्रान् शान्तिहोमांश्च कुर्यात्पर्वसु नित्यशः ॥ पितॄंश्चैवाष्टकास्वर्चेन्नित्यमन्वष्टकासु च ॥ १५० ॥

(१) **मेधातिथिः** । पूर्वोक्तानांहोमानांस्वरूपमुच्यते । सावित्राः सवितृदेवताकाः । पर्वसुच पौर्णमास्यमावास्ययोः कर्तव्याः शान्त्यर्थंहोमाअनिष्टनिवृत्तिप्रयोजनाः द्रव्यंचात्राज्यमेवानुपात्तद्रव्यविशेषेषु सर्वहोमेषुश्रूयते । सर्वस्मैवाएतद्यज्ञायगृह्यतेयत्ध्रुवायामाज्यमिति । पर्वस्विति च सप्तमीद्वितीयार्थे द्रष्टव्या । अधिकरणमग्निर्होमस्य न कर्मकचित् । होतव्यानि पञ्चन्तेलाजाज्यमांससक्तुदधिपयोधानाः पिष्टमित्यादि । एतेचहोमाअपूर्वाः । यावतीच समाचारादितिकर्तव्यता सा प्राग्दर्शिता । अष्टकाऊर्ध्वमाग्रहायण्यास्तामिस्रपक्षाणांतिस्रोऽष्टम्यः केषांचिद्धेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामितिवचनम् । तत्र पितॄनर्चयेच्छ्राद्धेन । पितृशब्दः पूर्वप्रमीतपित्रादिवचनः । अन्वष्टकास्ताएवनवम्यः ॥ १५० ॥

(२) **सर्वज्ञनारायणः** सावित्रान् सावित्रीमन्त्रनिष्पाद्यान् । शान्तिहोमान् पापशान्त्यर्थंहोमान् । पर्वस्वमावास्यापौर्णमास्योः । नित्यशः सर्वदा अष्टकासु हेमन्तशिशिरकृष्णाष्टमीषु । अन्वष्टकासु तन्नवमीषु ॥ १५० ॥

(३) **कुल्लूकः** । सावित्रीदेवताकान्होमाननिष्टनिवृत्त्यर्थंचशान्तिहोमान्पौर्णमास्यमावास्ययोः सर्वदा कुर्यात् । तथा आग्रहायण्याऊर्ध्वंकृष्णाष्टमीषु तिसृषु चाष्टकाख्येन कर्मणाश्राद्धेन च तदन्तरितकृष्णनवमीषु चान्वष्टकाख्येन परलोकगतान्पितॄन्यजेत् ॥ १५० ॥

---

(१५०) सावित्रान्=साविव्या (नन्दनः)

(४) **राघवानन्दः** । सावित्रान् सवितृदेवताकान् । शान्त्यर्थंहोमान् शान्तिहोमान् । सूर्योज्योतिर्ज्योतिःसूर्याय-स्वाहेति मन्त्रलिङ्गादाज्यद्रव्यकान् । सर्वस्मैवाएतद्यज्ञायगृह्यतेयत्ध्रुवायामाज्यमिति । अतस्तेषांहुतसमर्पणमात्रमनेन । पर्वस्विति दर्शादिकालविधिस्तेषां अष्टकान्वष्टकासु च पितॄंश्चार्चयेदित्यन्वयः । आग्रहायण्याऊर्ध्वंचतसृष्वष्टकासु अष्टकाख्येन कर्मणाअन्वष्टकासुअन्वष्टकाख्येनच ॥ १५० ॥

(५) **नन्दनः** । जुहुयाच्चैवेत्युक्तम् तत्केन मन्त्रेणेत्यपेक्षायामाह साविभ्येति । साविभ्याआज्येन शान्तिहोमान्कुर्यात् । अष्टकासु हेमन्ताद्यष्टमीषु । अन्वष्टकासु नवमीषु ॥ १५० ॥

(६) **रामचन्द्रः** । सावित्रान्सवितृदेवताकान् गायत्र्यादिमन्त्रान् शान्तिहोमांश्च कुर्यात् । अष्टकासु हेमन्तशिशिर-कृष्णनवमीषु अन्वकाष्टकासु पितॄनर्चयेत् ॥ १५० ॥

दूरादावसथान्मूत्रं दूरात्पादावसेचनम् ॥ उच्छिष्टान्ननिषेकं च दूरादेव समाचरेत् ॥ १५१ ॥

(१) **मेधातिथिः** । पादाववसिच्येते येनोदकादिना तत्पादावसेचनंतद्दूरात्क्षिपेत् । अथवा पादप्रक्षालनमेव दूरात्कुर्यात् । निषेकःपरिषेकः । तैलादिकृतस्नानोदकमपिशक्यते निषेकशब्देनाभिधातुम् । उपयुक्तशेषस्य त्याज्य-स्यायंदूरतोनिक्षेपउच्यते । तद्धि निषेकशब्देन प्रसिद्धतरम् ॥ १५१ ॥

(२) **सर्वज्ञनारायणः** । उच्छिष्टान्नस्य निषेकंत्यागम् ॥ १५१ ॥

(३) **कुल्लूकः** । नैर्ऋत्यामिषुविक्षेपमतीत्याभ्यधिकंभुवर्ह्रानविष्णुपुराणवचनादेवंविधादग्निगृहस्य दूरान्मूत्रपुरी-षपादप्रक्षालनसंकलोच्छिष्टान्नानि । निषिच्यतइतिनिषेकंरेतश्चोत्सृजेत् ॥ १५१ ॥

(४) **राघवानन्दः** । किंच दूरादिति । निषेकंरेतः समाचरेद्दूरे कुर्यात् ॥ १५१ ॥

(६) **रामचन्द्रः** । उच्छिष्टान्नं निषेकं रेतः दूरादेव समाचरेत् ॥ १५१ ॥

मैत्रं प्रसाधनं स्नानं दन्तधावनमञ्जनम् ॥ पूर्वाह्णएव कुर्वीत देवतानां च पूजनम् ॥ २५२ ॥

(१) **मेधातिथिः** । अर्थवादेषु पश्वङ्गसंस्तवे मैत्रःपायुरितिश्रूयते । तदिहाप्यभेदोपचारान्मित्रःपायुस्तत्रभवंशौ-चंमैत्रम् । प्रसाधनंकेशरचनामुपलेपनादि । अथवाविशेषणविशेष्येपदेमैत्रंप्रसाधनम् । अकृतशकृतापि प्रातः पायुप्रक्षाल-नंकर्तव्यम् । यथाहि मुखस्य लालास्रावादेरवश्यंभावित्वान्मुखधावनंविहितम् । एवमेतदपि विनैव वा निमित्तेन मुखस्य जघन्ययोरङ्गयोः प्रक्षालनमवश्यंकर्तव्यम् । अन्येत्वाहुर्मित्रकार्यमैत्रंतत्सर्वकार्येभ्योन्तरङ्गेभ्योऽपिपूर्वंकर्तव्यम् । तत्रा-प्यशुचेः क्षणमप्यवस्थाभावात्त्वकार्यापेक्षया पूर्वत्वंद्रष्टव्यम् । तदाच पूर्वाह्णशब्दः कार्यान्तरेभ्यः पूर्वतामात्रोपलक्ष-णार्थोनपुनरपराह्णप्रतिषेधार्थः । अथवामित्रआदित्यस्तदुपस्थानंमैत्रम् । नचायमेषविद्वत्तादिगुणसंपन्नःसाध्यते । प्रजाया-याह्येते गुणाः प्रार्थ्यन्ते । तदुक्तम् ॥ तया गवा किंक्रियते या न धेनुर्नगर्भिणी । कोऽर्थः पुत्रेण जातेन योन विद्वान्न धार्मिकः ॥ अक्षय्यमपि प्रभूतंयदसद्व्यसनैरप्यलक्षणस्कन्धोपरितिलकादिदारिद्र्यादिदौर्भाग्यसूचकं तदप्याचारोहन्ति । तेनह्यधर्मआचारपरत्वेन नश्यति ॥ १५२ ॥

(२) **सर्वज्ञनारायणः** । मैत्रं विष्ठोत्सर्गं मित्रदैवततया प्रसाध्यत्वात् । वक्ष्यतिच मित्रमुत्सर्गइति । प्रसाधनपदेनै-व चक्षुरंजनस्य प्राप्तत्वात् । अञ्जनं तैलाभ्यङ्गम् । पूर्वाण्हएव संभवे असंभवेत्वन्यदापि ॥ १५२ ॥

+ क-ज (अ)

(३) **कुल्लूकः** । मित्रदेवताकत्वान्मैत्रःपायुस्तद्भवत्वान्मैत्रंपुरीषोत्सर्गम् । तथादेहप्रसाधनप्रातःस्नानदन्तधावनाञ्जनदेवार्चनादि पूर्वाह्णएव कुर्यात् । पूर्वाह्णशब्देन रात्रिशेषदिनपूर्वभागाविह विवक्षितौ । पदार्थमात्रविधिपरत्वाच्चास्य पाठक्रमोऽपि नादरणीयः । नहि स्नानानन्तरंदन्तधावनम् ॥ १५२ ॥

(४) **राघवानन्दः** । किंचैतांत्समारुणोदयमारभ्य कुर्यादित्याह मैत्रमिति मित्रदेवताकत्वात् मैत्रःपायुःतदुद्भवत्वान्मैत्रं पुरीषोत्सर्गे । प्रसाधनं केशानां । पूर्वाह्णशब्देन जहल्लक्षणया रात्रिशेषोग्राह्यःतेनानुदितहोमनिर्वाहः । अत्र पाठक्रमंबाधित्वा अर्थाच्चेति न्यायेन दन्तधावनमादौ बोद्धव्यम् । उदिते पद्मिनीनाथे यःकुर्याद्दन्तधावनम् । सनिर्लज्जः कथंब्रूयात्पूजयामि जनार्दनमिति निन्दास्मरणात् ॥ १५२ ॥

(५) **नन्दनः** । मैत्रमुच्चारः ॥ १५२ ॥

(६) **रामचन्द्रः** । मैत्रं मूत्रपुरीषोत्सर्गः । अंजनं प्रसाधनं केशानांकर्मपूर्वाह्णएव कुर्वीत ॥ १५२ ॥

दैवतान्यभिगच्छेत्तु धार्मिकांश्च द्विजोत्तमान् ॥ ईश्वरं चैव रक्षार्थं गुरूनेव च पर्वसु ॥ १५३ ॥

(२) **सर्वज्ञनारायणः** । दैवतानि । धार्मिकद्विजांश्च नमस्कारार्थम् । ईश्वरंच रक्षार्थंनित्यमभिगच्छेत् । गुरूंस्तु पर्वसु नमस्क्रियार्थम् ॥ १५३ ॥

(३) **कुल्लूकः** । पाषाणादिमयानि धर्मप्रधानांश्च ब्राह्मणान्रक्षार्थंराजादिकं गुरूंश्च पित्रादीनमावास्यादिपर्वसु द्रष्टुमभिमुखोगच्छेत् ॥ १५३ ॥

(४) **राघवानन्दः** । दैवतानि पाषाणादिप्रतिमाः । धार्मिकान् धर्मोपदेष्टॄन् । पर्वस्वमादिषु ॥ १५३ ॥

(५) **नन्दनः** । दैवतानि देवताप्रतिमाः । ईश्वरंराजानमन्यंवाप्रभुम् ॥ १५३ ॥

(६) **रामचन्द्रः** । ईश्वरं ग्रामाधिपं योगक्षेमार्थंगच्छेत् । अलब्धलाभोयोगः लब्धस्य परिपालनं क्षेमःतं कुर्वीत । गुरून् आचार्यान् ॥ १५३ ॥

अभिवादयेद्वृद्धांश्च दद्याच्चैवासनं स्वकम् ॥ कृताञ्जलिरुपासीत गच्छतः पृष्ठतोऽन्वियात् ॥ १५४ ॥

(२) **सर्वज्ञनारायणः** । वृद्धान् विद्यादिवृद्धान् । पृष्ठतोन्वियात् न त्वग्रतः ॥ १५४ ॥

(३) **कुल्लूकः** । गृहागतान्गुरूनभिवादयेत्तेषांच स्वीयमासनमुपवेष्टुंच दद्यात् । बद्धाञ्जलिश्च गुरुसमीपआसीत । गच्छतश्च पृष्ठदेशेऽनुगच्छेत् । उक्तोऽप्ययमभिवादनाद्याचारःफलाभिधानाय पुनरुच्यते ॥ १५४ ॥

(४) **राघवानन्दः** । संभ्रमेणासनंदद्यादिति भावः । उपासीत आसीनानिति शेषः । गच्छतस्तस्य पृष्ठतः ॥ १५४ ॥

(६) **रामचन्द्रः** । स्वं स्वकीयं आसनंदद्यात् ॥ १५४ ॥

श्रुतिस्मृत्युदितं सम्यङ्निबद्धं स्वेषु कर्मसु ॥ धर्ममूलं निषेवेत सदाचारमतन्द्रितः ॥ १५५ ॥

(२) **सर्वज्ञनारायणः** । श्रुतिस्मृत्युदितं सदाचारंच धर्ममूलंधर्मसाधनं स्वेषु स्ववर्णाश्रमकर्मसु निबद्धंसंबद्धं तत्कर्मानुगुणंसेवेत ॥ १५५ ॥

(३) **कुल्लूकः** । वेदस्मृतिभ्यांसम्यगुक्तंस्वेषु कर्मस्वध्ययनादिष्वङ्गत्वेन संबन्धंधर्मस्य हेतुंसाधूनामाचारमनलसः सन्नितान्तंसेवेतेतिसामान्येनाचारानुष्ठानोपदेशःफलकथनाय ॥ १५५ ॥

(४) राघवानन्दः । निबद्धं कर्माङ्गत्वेन । सदाचारं त्वद्भिः पूयतेविप्रइत्यादिनाआचमनाद्यनुष्ठानं । धर्ममूलं अङ्गारपात्रादिधारणलक्षणशिरोव्रतादिधर्महेतुः ॥ १५५ ॥

(५) नन्दनः । स्वेषु कर्मसु निबद्धंस्वानि कर्माणि वर्णाश्रमप्रयुक्तानि कुर्वन्धर्ममूलंधर्मस्य मूलम् । धर्ममूलत्वंचाचारप्रभवोधर्मः श्रुत्युक्तःस्मार्तएवचेत्यत्रप्रतिपादितम् ॥ १५५ ॥

आचाराल्लभते ह्यायुराचारादीप्सिताः प्रजाः ॥ आचाराद्धनमक्षय्यमाचारोहन्त्यलक्षणम् ॥ १५६ ॥

(२) सर्वज्ञनारायणः । आचाराद्धर्माचरणात् अलक्षणमलक्ष्मीम् ॥ १५६ ॥

(३) कुल्लूकः । आचाराद्वेदोक्तमायुर्लभतेऽभिमताश्च प्रजाः पुत्रपौत्रदुहित्रात्मिकाः प्रभूतंचधनम् । अशुभफलसूचकंच देहस्थमलक्षणमाचारोनिष्फलयति आचाराख्यधर्मेणालक्षणसूचितारिष्टनाशात् ॥ १५६ ॥

(४) राघवानन्दः । आचारानुष्ठानंस्तौति आचारादिति । आचारः स्मार्ताचमनादिः । अक्षय्यं पुत्रपौत्रादि । अलक्षणं निन्दितरोगपरदारादिसेवनम् ॥ १५६ ॥

(६) रामचन्द्रः । अलक्षणं अलक्ष्मीम् ॥ १५६ ॥

दुराचारोहि पुरुषोलोके भवति निन्दितः ॥ दुःखभागी च सततं व्याधितोऽल्पायुरेव च ॥ १५७ ॥

(२) सर्वज्ञनारायणः । दुराचारोदुष्टाचरणशीलः ॥ १५७ ॥

(३) कुल्लूकः । यस्माद्दुराचारः पुरुषोलोके गर्हितःस्यात्सर्वदा दुःखान्वितोरोगवानल्पायुश्च भवति तस्मात्सदाचारयुक्तःस्यात् ॥ १५७ ॥

(४) राघवानन्दः । विपक्षेत्वाह दुराचारइति ॥ १५७ ॥

(६) रामचन्द्रः । दुराचारः अश्रद्दधानः ॥ १५७ ॥

सर्वलक्षणहीनोऽपि यः सदाचारवान्नरः ॥ श्रद्दधानोऽनसूयश्च शतं वर्षाणि जीवति ॥ १५८ ॥

(२) सर्वज्ञनारायणः । लक्षणं एतज्जन्मशुभसूचकं कुलरेखादि । सदाचारः समीचीनाचारः तत्राचारे श्रद्दधानः। अनसूयः परगुणसहनः ॥ १५८ ॥

(३) कुल्लूकः । यःसदाचारवाञ्छ्रद्धान्वितः परदोषानभिधाता सं*शुभसूचकलक्षणशून्योऽपि शतायुर्भवति ॥ १५८॥

(४) राघवानन्दः । सदाचारः सतामाचारे श्रद्दधानः ॥ १५८ ॥

यद्यत्परवशं कर्म तत्तद्यत्नेन वर्जयेत् ॥ यद्यदात्मवशं तु स्यात्तत्तत्सेवेत यत्नतः ॥ १५९ ॥

(१) मेधातिथिः । यत्परप्रार्थनया स्वपरहितादि क्रियते तत्परवशंवर्ज्यतेनतुयद्वृत्तिसाध्यमार्त्विज्यादि । तद्विषयकमेवभृत्यादिःस्वीक्रियते । यत्त्वात्मनोऽवश्यंस्वल्पयाधनमात्रयापरोपकारःस्वल्पोऽपितंस्वयमेवकुर्यात् । नचानेनपरवशमपि दीक्षितस्य निषिध्यते । स्मृत्या श्रुतिबाधितुमन्याय्यत्वात् उक्तेचविषयेसावकाशत्वात्स्मृतेर्नित्यकर्मासंपत्तौ कुटुम्बोपयोगिनिधनेऽसति कर्तव्यैव याञ्चोपायान्तराभावे । किंतुविशेषतोदास्यइति सत्यांकस्यांचिद्धनमात्रायांसंतोषपरेणभवितव्यमित्येवमस्यतात्पर्यम् ॥ १५९ ॥

---

* स=स्व (अ)

(२) सर्वज्ञनारायणः । परवशं नित्यंपराधीनं कर्म दृष्टार्थम् ॥ १५९ ॥

(३) कुल्लूक- । यद्यत्कर्म पराधीनंपरप्रार्थनादिसाध्यंतत्तद्यत्नतोवर्जयेत् । यद्यत्स्वाधीनदेहव्यापारसाध्यंपरमात्मप्र हार्दं तत्तद्यत्नतोऽनुतिष्ठेत् ॥ १५९ ॥

(४) राघवानन्दः । नैतादृशंदुःखहेतुरित्यनुभवाधिरूढमाह यदितित्रिभिः । अध्यापनादित्रितयंपरित्यज्य यथालाभेन संतुष्टोवेदानभ्यसेदिति तात्पर्यार्थः ॥ १५९ ॥

(५) नन्दनः । परवशंपराधीनम् । अनावश्यकंयत्कर्म तत्फलवदपि वर्जनीयमित्यर्थः ॥ १५९ ॥

(६) रामचन्द्रः । यद्यत् परतरं कर्म पराधीनंकर्म तत्प्रयत्नेन वर्जयेत् । यद्यत् आत्मवशंकर्म तद्यत्नेन च सेवेत ॥ १५९ ॥

सर्वं परवशं दुःखं सर्वमात्मवशं सुखम् ॥ एतद्विद्यात्समासेन लक्षणं सुखदुःखयोः ॥ १६० ॥

(१) मेधातिथिः । याच्ञांनिन्दति । यत्परवशंतत्सर्वंदुःखम् । तिष्ठतु तावत्परस्य गृहद्वार्युपस्थानमनुवृत्तिरत्रचामुत्रचभ्रमणम् । यत्तु संकल्पएवयाच्ञायांन्हृदयंनप्रसज्जते नूनंमायामसंदिग्धांसृष्टिर्नासौत्वयंभुवः । समासेन संक्षेपेणैतद्दुःखस्यलक्षणंयायाच्ञा । सुखंचैतद्याऽस्पृहा ॥ १६० ॥

(२) सर्वज्ञनारायणः । लक्षणंकारणम् ॥ १६० ॥

(३) कुल्लूकः । अत्रहेतुमाह सर्वपरवशमिति । सर्वंपरप्रार्थनादिसाध्यंदुःखहेतुः सर्वमात्माधीनंसुखहेतुः । एतत्सुखदुःखयोःकारणंजानीयात् ॥ १६० ॥

(४) राघवानन्दः । आत्मवशंदेहमात्रनिर्वाहं । शारीरंकेवलंकर्म कुर्वन्नाप्नोति किल्बिषमिति गीतोक्तेः । समासेन संक्षेपेण लक्षणंगमकम् ॥ १६० ॥

(५) नन्दनः । यस्मादेवं तस्मादिदंमनसि कर्तव्यमित्याह सर्वमिति ॥ १६० ॥

(६) रामचन्द्रः । सुखदुःखयोः लक्षणं कारणं एतद्विद्यात् ॥ १६० ॥

यत्कर्म कुर्वतोऽस्य स्यात्परितोषोऽन्तरात्मनः ॥ तत्प्रयत्नेन कुर्वीत विपरीतं तु वर्जयेत् ॥ १६१ ॥

(१) मेधातिथिः । आत्मतुष्टेःप्रागुक्तायाः पुनर्वचनंस्मरणार्थम् । विषयश्चतस्यादर्शनएव । यत्र कर्मणि क्रियमाणे किंकथिका न भवति तत्कर्तव्यम् । यत्र तु हृदयंन तुष्यति तद्वर्जनीयम् ॥ १६१ ॥

(२) सर्वज्ञनारायणः । परितोषोधर्मसाधनं ममैतदिति बुद्ध्याप्रीतिः । एतच्च बहुषु धर्मप्रकारेषु मध्ये द्रष्टव्यं एतदेव स्वस्यच प्रियमात्मनइति । प्रागुक्तविपरीतं यत्र न कदाचित्परितोषः ॥ १६१ ॥

(३) कुल्लूकः । यत्कर्मकुर्वतोऽस्यानुष्ठातुःपुरुषस्यान्तरात्मनस्तुष्टिःस्यात्तत्प्रयत्नतोऽनुष्ठेयमतुष्टिकरंवर्जयेत् । एतच्चाविहितानिषिद्धगोचरंवैकल्पिकविषयंच ॥ १६१ ॥

(४) राघवानन्दः । किंच परवशमपिपुत्रोत्पादनादिकार्यमन्तरात्मनोमनसः संतोषहेतुत्वात्तद्विपरीतंपारदार्यादि नकार्यं । तस्योदर्केऽसंतोषहेतुत्वात् ॥ १६१ ॥

(५) नन्दनः । एवंवर्जनीयंचकार्यंचयत्तल्लक्षणउक्तम् इदानींलक्षणान्तरमाह यत्कर्मेति । सतामयमुपदेशोनासताम् ॥ १६१ ॥

(६) **रामचन्द्रः** । अस्य द्विजस्य यत्कर्म कुर्वतः अन्तरात्मनः परितोषः स्यात् तत्कर्म कुर्वीत कुर्यात् ॥१६१॥

आचार्यं च प्रवक्तारं पितरं मातरं गुरुम् ॥ न हिंस्याद्ब्राह्मणान् गाश्च सर्वांश्चैव तपस्विनः॥१६२॥

(१) **मेधातिथिः** । प्रायश्चित्तप्रवृत्तान्पातकिनोऽपिसर्वग्रहणमविशेषेण सर्वभूतानांतत्र तत्र हिंसानिषिद्धापुनर्वचनमाचार्यादीनामाततायिनामपि निषेधार्थमितिकेचित् । यस्तुगुरुंवाबालवृद्धौवेत्यादिरर्थवादोऽस्यैवप्रतिप्रसवः । उपाध्यायस्त्वाह नायंप्रतिषेधः पर्युदासोऽयंसंकल्पविधानार्थोनोद्यन्तमादित्यमीक्षेतेतिवत् । अतः प्रयत्नेनातिक्रान्तंभवति संकल्पप्रतिषेधश्चेति । अथवादुरुक्तभाषणंहिंसावाग्भिस्तैस्तैर्जघानतामितिप्रयोगदर्शनात् । अथवाप्रतिकूलाचरणे हन्तिःप्रयुक्तः ॥ १६२ ॥

(२) **सर्वज्ञनारायणः** । आचार्यमुपनीयाध्यापकम् । प्रवक्तारंउपाध्यायं व्याख्यातारंच । गुरुमुपनयनकारिणमन्नदंच । तपस्विनस्तपःशीलाः । नहिंस्यात् प्रतिकूलंतेषांनाचरेत् ॥ १६२ ॥

(३) **कुल्लूकः** । आचार्यमुपनयनपूर्वकवेदाध्यापकंप्रवक्तारंवेदार्थव्याख्यातारंगुरुमल्पंवा बहुवा यस्येत्युक्तं । आचार्यादींस्तु न हिंस्यात् प्रतिकूलाचरणेऽत्र हिंसाशब्दः । गोविन्दराजस्तु । सामान्येन हिंसानिषेधादाततायिनोऽप्येतान्न हिंस्यादितिव्याख्यातवांस्तदयुक्तम् । गुरुंवा बालवृद्धौ वेत्यनेनविरोधात् ॥ १६२ ॥

(४) **राघवानन्दः** । किंच एतानष्टौ कदाचिदपि न पीडयेदित्याह आचार्येति । आचार्यमुपनेतारं । प्रवक्तारमध्यापकं । गुरुं हितोपदेष्टारम् ॥ १६२ ॥

(५) **नन्दनः** । न हिंस्यान्न प्रतिकूलंकुर्यात् ॥ १६२ ॥

(६) **रामचन्द्रः** । आचार्यं उपनेतारं । प्रवक्तारं उपाध्यायं व्याख्यातारं । पितरं । मातरं । गुरुं । ब्राह्मणान् । गाश्च । सर्वांश्चैव तपस्विनः । प्रायश्चित्तप्रवृत्तानएतान् आचार्यादीन् न हिंस्यात् । न साक्षाद्धननेनापितु वचनेनापि दुःखं नोत्पादयेत् । प्रतिकूलाचरणं हननंन कार्यम् ॥ १६२ ॥

नास्तिक्यं वेदनिन्दां च देवतानां च कुत्सनम् ॥ द्वेषं दम्भं च मानंच क्रोधंतैक्ष्ण्यं च वर्जयेत् ॥ १६३ ॥

(१ **मेधातिथिः** । वेदप्रमाणकानामर्थानांमिथ्यात्वाध्यवसायस्यनास्तिक्यशब्देनप्रतिपादनम् । निन्दापुनरुक्तौ । वेदोन्योन्यव्याहतोनात्रसत्यमस्तीतिभावदोषेण नपूर्वपक्षभङ्ग्या । अग्न्यादयोदेवतास्तासांकुत्सनंनिन्दैव यथा दग्धदैवेन हताः स्मइतिदैवेभवन्ति वक्तारः । द्वेषोमात्सर्यादिहेतुकाऽप्रीतिः । स्तम्भोऽहंकारादनम्रता । मानोऽहंकारआत्माभिमानः पण्डितोऽहमाढ्योऽहमिति । अमर्षः क्रोधस्तैक्ष्ण्यंपारुष्यंद्वेषपूर्वकः क्रोधः ॥ १६३ ॥

(२) **सर्वज्ञनारायणः** । नास्तिक्यं परलोकनास्तितोपपादनम् । द्वेषोऽपचिकीर्षा । स्तम्भोविनयाभावः । आत्मन्युत्कर्षप्रत्ययोमानम् । द्वेषहेतुरात्मगुणविशेषः क्रोधः । तैक्ष्ण्यंहिंसापरता ॥ १६३ ॥

(३) **कुल्लूकः** । नास्ति परलोकइतिबुद्धिंवेदस्य देवतानांच निन्दांमात्सर्यंधर्मानुत्साहाभिमानकोपक्रौर्याणित्यजेत् ॥ १६३ ॥

(४) **राघवानन्दः** । किंच नास्तिक्याद्यष्टवर्जनमतीव सुखहेतुरित्याह नेति । कुत्सनं धिगित्यादितिरस्करणं । मानं पूजाकांक्षां । तैक्ष्ण्यं क्रौर्यम् ॥ १६३ ॥

(५) नन्दनः । नास्तिक्यंपरलोकाभावनिश्चयः । वेदनिन्दावेदाप्रामाण्यनिर्णयव्यवहारः । देवताकुत्सनंदेवतानिकर्षवादः । द्वेषोमानसोविकारः । दम्भः परसत्कारानुद्यमः । अलभ्यलाभेपिमभुत्वंमानः । क्रोधोबहिर्विकारः । तैक्ष्ण्यंक्रूरता ॥ १६३ ॥

(६) रामचन्द्रः । च पुनः वेदविदांमिथ्यात्वाध्यवसायश्च अन्यत्प्रसिद्धं तैक्ष्ण्यं हिंसाभिरतिः इत्यादि वर्जयेत् ॥ १६३ ॥

परस्य दण्डं नोद्यच्छेत्क्रुद्धोनैव निपातयेत् ॥ अन्यत्र पुत्राच्छिष्याद्वा शिष्ट्यर्थं ताडयेत्तु तौ ॥१६४॥

(१) मेधातिथिः । येनदम्यतेसदण्डः करलगुडशिफारज्जुविदलादिस्तंपरस्यक्रुद्धः सन्नोद्यच्छेन्नोत्क्षिपेत् । प्रहारार्थं तिर्यगपि न निपातयेत् । निपातनंवेगेनतदङ्गसंयोगः । पुत्रशिष्यावनुताडयेच्छिफावेणुदलचपेटाभिर्यथाष्टमे वक्ष्यति न दण्डेन तौच न क्रोधेन तर्हिशिष्ट्यर्थमनुशासनार्थंबाल्याद्यदिचापलमाचरतः । तथा । पृष्ठतस्तुशरीरस्येतोषत्ताड्यौ । शिष्यग्रहणंदासीदासस्यापिप्रदर्शनार्थम् । समानकार्यत्वात् ॥ १६४ ॥

(२) सर्वज्ञनारायणः । दण्डं ताडनार्थंलगुडादि । नोद्यच्छेन्न व्यापारयेत् न निपातयेत् ताडनफलंन निष्पादयेत् । शिष्ट्यर्थं शिक्षार्थं नतु द्वेषमात्रेण शिष्यपदंशासनीयपरम् । तथाच भार्यादिप्राप्तिरित्येके ॥ १६४ ॥

(३) कुल्लूकः । परस्य हननार्थंक्रुद्धःसन्दण्डादि नोत्क्षिपेन्नच परगात्रे निपातयेत्पुत्रशिष्येभार्यादासादेरन्यत्र कृतापराधानेताननुशासनार्थंरज्ज्वा वेणुदलेन वेत्यादिवक्ष्यमाणप्रकारेण ताडयेत् ॥ १६४ ॥

(४) राघवानन्दः । नोपयच्छेत्परस्य हननार्थंनादद्यात् । नएनंदण्डंनिपातयेत् शिष्ट्यर्थंशिष्टिरनुशासनंतदर्थम् ॥ १६४ ॥

(५) नन्दनः । एनंदण्डंनिपातयेत् । परस्योपरीतिशेषः ॥ १६४ ॥

(६) रामचन्द्रः । परस्येति । परस्य अन्यस्य दण्डंनउद्यच्छेत् न कुर्यात् । क्रुद्धःसनपुत्रात् शिष्यात् अन्यत्रएवंदण्डंननिपातयेत् । शिक्षार्थंतु निश्चयेन तौ पुत्र शिष्यौ ताडयेत् ॥ १६४ ॥

ब्राह्मणायावगुर्यैव द्विजातिर्वधकाम्यया ॥ शतं वर्षाणि तामिस्रे नरके परिवर्तते ॥१६५॥

(१) मेधातिथिः । अविशेषेण सर्वविषये ताडने निषिद्धेब्राह्मणेतत्क्रियायादोषातिशयदर्शनार्थंपञ्चश्लोकी । अवगूर्यंउद्यम्यचदण्डादि वधकाम्यया ताडनेच्छयाविनैव निपातेन शतंवर्षाणि नरके पच्यते परिवर्तते तत्फलमुपभुङ्क्ते ॥ १६५ ॥

(२) सर्वज्ञनारायणः । वधकाम्यया ताडनार्थतया ॥ १६५ ॥

(३) कुल्लूकः । द्विजातिरपि ब्राह्मणस्य हननार्थंदण्डादिकमुद्यम्यैव नतु निपात्य वर्षशतंतामिस्रादिनरके परिभ्रमति ॥ १६५ ॥

(४) राघवानन्दः । तत्राप्यहोकष्टंब्राह्मणताडनमित्याह ब्राह्मणायेति । अवगूर्य वधकाम्यया दण्डाद्युद्यम्य । एतत्रयंकदापि न कुर्यात् द्विजातिश्चातुर्वर्ण्यम् ॥ १६५ ॥

(५) नन्दनः । दण्डोद्यमने ब्राह्मणविषये दोषविशेषमाह ब्राह्मणायेति । अवगुर्य दण्डमुद्यम्य ॥ १६५ ॥

(६) रामचन्द्रः । द्विजातिःवधकाम्यया ब्राह्मणान् अवगूर्यैव दण्डंउत्थाप्यैव ॥ १६५ ॥

ताडयित्वा तृणेनापि संरम्भान्मतिपूर्वकम् ॥ एकविंशतिमाजातीः पापयोनिषु जायते ॥ १६६ ॥

(१) **मेधातिथिः** । संरंभः क्रोधावेशोनतुकर्मणा बुद्धिपूर्वम् । एकविंशतिमाजातीः जातिर्जन्म । आकारोऽनर्थकः- प्रलम्बतइतिवत् । तृणेनापि ताडने दीर्घकालोनरकानुभवः ॥ १६६ ॥

(२) **सर्वज्ञनारायणः** । संरम्भात्क्रोधात् नतु कर्मणा । आजातीर्जन्मान्येकविंशतिं पापयोनिषु श्वादिषु । एत- च्चतामिस्रेदुःखमनुभूय पश्चात् ॥ १६६ ॥

(३) **कुल्लूकः** । तृणेनापि क्रोधाद्बुद्धिपूर्वकंब्राह्मणंताडयित्वा* एकविंशतिजन्मानि पापयोनिषु कुक्कुरादियोनिषु जायते ॥ १६६ ॥

(४) **राघवानन्दः** । संरम्भात्क्रोधात् । आजातीः जन्मानि । पापयोनिषु शूकरादिषु ॥ १६६ ॥

(५) **नन्दनः** । ब्राह्मणविषये दण्डपातने दोषविशेषमाह ताडयित्वेति । आजातेराजननात् । जायतेः सकर्मत्वमृ- षितिपातनात् ॥ १६६ ॥

(६) **रामचन्द्रः** । तृणेनापि ताडयित्वा एकविंशतिजन्मानि प्रामोति ॥ १६६ ॥

अयुध्यमानस्योत्पाद्य ब्राह्मणस्यासृगङ्गतः ॥ दुःखं सुमहदाप्नोति प्रेत्याप्राज्ञतया नरः ॥ १६७ ॥

(१) **मेधातिथिः** । असृग्लोहितम् । तदङ्गतोऽङ्गाच्चोत्पादयति ब्राह्मणस्य खड्गप्रहारादिनाऽयुध्यमानस्य न तुद्रोणा- चार्यवत्क्षात्रेण धर्मेण युयुत्सोःसुमहद्दुःखंनरकादि प्रेत्य मृतोजन्मान्तरे । अप्राज्ञतयेत्यनुवादः । प्राज्ञोहिशास्त्रार्थज्ञानान्न- कथमेवंकुर्यात् ॥ १६७ ॥

(२) **सर्वज्ञनारायणः** । अयुध्यमानस्येति युध्यमानस्य क्षतकरणे दोषाल्पता दर्शिता । अतएव तद्वधेपि प्राय- श्चित्ताल्पत्वमुन्नेयम् । सामान्योक्तदुःखपरिमाणाभिधानं । शोणितम् ॥ १६७ ॥

(३) **कुल्लूकः** । अयुध्यमानस्य ब्राह्मणस्याङ्गे शास्त्रानभिज्ञतया शोणितमुत्पाद्य परलोके महद्दुःखमाप्नोति ॥१६७॥

(४) **राघवानन्दः** । असृग्रक्तं । अङ्गतोदेहात् । युद्धे तु न दोषः नतुदृश्यते दुःखमिति चेत्तत्राह प्रेत्येति । अ- प्राज्ञतया अदोषज्ञत्वेन ॥ १६७ ॥

(६) **रामचन्द्रः** । अयुध्यमानस्य शास्त्रेण धर्मेण युयुत्सोःब्राह्मणस्यअन्ततःमध्यतःअसृक् उत्पाद्य प्रेत्य परलो- के अप्राज्ञतया नरः सुमहद्दुःखं प्राप्नोति ॥ १६७ ॥

शोणितं यावतः पांसूंत्संगृह्णाति महीतलात् ॥ तावतोऽब्दानमुत्रान्यैः शोणितोत्पादकोऽद्यते ॥ १६८ ॥

(१) **मेधातिथिः** । ईषत्प्रहारेपूर्वफलम् । अधिके तु पांसवोरजांसिधूल्यवयवास्तान्यावतोयत्परिमाणान्गृण्हाति सं- हन्ति । ब्राह्मणाङ्गच्युतंभूमिपतितंलोहितंतावतोऽब्दांस्तावन्ति वर्षाण्यमुत्र परलोके द्यतेश्वशृगालैर्यःशोणितस्योत्पादकः- प्रहर्ता ॥ १६८ ॥

(२) **सर्वज्ञनारायणः** । संगृण्हाति संगृहीतुंशक्नोति । अमुत्र नरके । अद्यते भक्ष्यते ॥ १६८ ॥

(३) **कुल्लूकः** । खड्गादिहतब्राह्मणाङ्गनिर्गतंरुधिरंभूमिपतितंयावतोधूलिधणुकान्पिण्डीकरोति तावत्संख्यानि वर्षा- णि परलोके शोणितोत्पादकः प्रहर्त्ताअन्यैः श्वशृगालादिभिर्भक्ष्यते ॥ १६८ ॥

---

* एकविंशतिमाजातीः=एकविंशतिमाजातेः (नन्दनः)

(४) **राघवानन्दः**। संगृण्हाति पिण्डंकरोति पांशुः त्रसरेणुः। तावतस्तत्सङ्ख्याकान्। अन्यैः गृध्रादिभिः॥१६८॥

(५) **नन्दनः**। अन्यैरिहलोकगतैः ॥ १६८ ॥

(६) **रामचन्द्रः**। तावतः अब्दान् वर्षान् अमुत्र परलोके अद्यैः अदनीयैःसह शोणितोत्पादकः अद्यते भक्ष्यते ॥ १६८ ॥

न कदाचिद्द्विजे तस्माद्विद्वानवगुरेदपि ॥ न ताडयेत्तृणेनापि न गात्रात्स्रावयेदसृक् ॥ १६९ ॥

(१) **मेधातिथिः**। पूर्वस्य क्रियात्रयप्रतिषेधविधेरुद्यमननिपातनविषयस्योपसंहारः। नकदाचिदापद्यपीत्यर्थः१६९

(२) **सर्वज्ञनारायणः**। द्विजे विप्रे। अवगुरेदप्युद्यच्छेदपि ॥ १६९ ॥

(३) **कुल्लूकः**। तस्मादवगोरणादिदोषाभिज्ञोब्राह्मणे दण्डाद्युद्यमननिपातरुधिरस्रवणानि नापद्यपि कुर्यादिति पूर्वोक्तक्रियात्रयस्योपसंहारः ॥ १६९ ॥

(४) **राघवानन्दः**। हिंसाप्रकरणमुपसंहरति नेति। असृगिति द्वितीयान्तम् ॥ १६९ ॥

(५) **नन्दनः**। उपसंहरति नेति ॥ १६९ ॥

(६) **रामचन्द्रः**। द्विजे तस्मात्कदाचिदपि विद्वान्नावगुरेत् नदण्डमुत्थापयेदित्यर्थः ॥ १६९ ॥

अधार्मिकोनरोयोहि यस्य चाप्यनृतं धनम् ॥ हिंसारतश्च योनित्यं नेहासौ सुखमेधते ॥१७०॥

(१) **मेधातिथिः**। सामान्यतः सर्वहिंसाप्रतिषेधशेषोयम्।अधर्मःशास्त्रप्रतिषिद्धोऽगम्यागमनादिस्तंचरत्यधार्मिकः। यस्यचानृतमेवधनंसाक्ष्ये व्यवहारनिर्णयादौचासत्यमुत्कोचधनंसाधयति यश्च हिंसारतिर्हिंसायांअभिरतोवैरानुबन्धादर्थहेतोर्वापरान्हिनस्ति नासौसुखमेधतेनरकंप्राप्नोति। इहास्मिल्लोके ॥ १७० ॥

(२) **सर्वज्ञनारायणः**। अधार्मिकोऽधर्मवृत्तिः। अनृतं मिथ्यावचनंधनमिवोपादेयम् ॥ १७० ॥

(३) **कुल्लूकः**। अधर्मेण व्यवहरतीत्यधार्मिकः शास्त्रप्रतिषिद्धागम्यागमनाद्यनुष्ठाता योमानुषोयस्य च साक्ष्ये व्यवहारनिर्णयादौ च मिथ्याभिधानमेव धनोपायअसत्यमभिधायोत्कोचधनंगृह्णाति यश्च परहिंसाभिरतः नासाविहलोके सुखयुक्तोवर्त्तते तस्मादेतन्न कर्त्तव्यमितिनिन्दयानिषेधःकल्प्यते ॥ १७० ॥

(४) **राघवानन्दः**। अधार्मिकः परदारादिरतः। अनृतंधनं मिथ्याभिधानमेव धनोपायः। असाविति परोक्षनिर्देशादमुत्रापि ॥ १७० ॥

(५) **नन्दनः**। एवमधर्मस्य वर्जनीयत्वमुक्तम्। इदानीं केवलामुत्रिकाद्भयादधर्मोवर्जनीयः किन्त्वैहिकादपीत्याह अधार्मिकइति। अधार्मिकमानसदोषयुक्तस्योपलक्षणम्। अनृतंधनमिति वाचिकदोषयुक्तस्य। हिंसारतइति कायिकदोषयुक्तस्य। इहास्मिन्नेव लोकेनसुखमेधते। अधार्मिकंवर्जयन्ति सन्तोऽनृतबहुलंवर्जयन्ति द्विषन्ति च हिंसारतंवर्जयन्ति द्विषन्ति हिंसन्ति च। तस्मादैहिकादपि भयादधर्मोवर्जनीयइत्यभिप्रायः ॥ १७० ॥

(६) **रामचन्द्रः**। अधार्मिकादीनांमध्ये च पुनः हिंसारतिः असौनेहलोके सुखं वर्धते ॥ १७० ॥

न सीदन्नपि धर्मेण मनोऽधर्मे निवेशयेत् ॥ अधार्मिकाणां पापानामाशु पश्यन्विपर्ययम् ॥१७१॥

(१) **मेधातिथिः**। धर्मःशास्त्रमर्यादा तेन वर्तमानःसीदन्नप्यवसादमपि प्राप्नुवन्नाधर्मे मनोनिवेशयेत्। यतअधा-

ताडयित्वा तृणेनापि संरम्भान्मतिपूर्वकम् ॥ एकविंशतिमाजातीः पापयोनिषु जायते ॥ १६६ ॥

(१) **मेधातिथिः** । संरंभःक्रोधावेशोनतुकर्मणा बुद्धिपूर्वम् । एकविंशतिमाजातीः जातिर्जन्म । आकारोऽनर्थकः-प्रलम्बतइतिवत् । तृणेनापि ताडने दीर्घकालोनरकानुभवः ॥ १६६ ॥

(२) **सर्वज्ञनारायणः** । संरम्भात्क्रोधात् नतु कर्मणा । आजातीर्जन्मान्येकविंशतिं पापयोनिषु श्वादिषु । एत-च्चतामिस्रेदुःखमनुभूय पश्चात् ॥ १६६ ॥

(३) **कुल्लूकः** । तृणेनापि क्रोधाद्बुद्धिपूर्वकंब्राह्मणंताडयित्वा* एकविंशतिजन्मानि पापयोनिषु कुक्कुरादियोनिषु जायते ॥ १६६ ॥

(४) **राघवानन्दः** । संरम्भात्क्रोधात् । आजातीः जन्मानि । पापयोनिषु शूकरादिषु ॥ १६६ ॥

(५) **नन्दनः** । ब्राह्मणविषये दण्डपातने दोषविशेषमाह ताडयित्वेति । आजातेराजननात् । जायतेः सकर्मत्वमृ-षितिपातनात् ॥ १६६ ॥

(६) **रामचन्द्रः** । तृणेनापि ताडयित्वा एकविंशतिजन्मानि प्राप्नोति ॥ १६६ ॥

अयुध्यमानस्योत्पाद्य ब्राह्मणस्यासृगङ्गतः ॥ दुःखं सुमहदाप्नोति प्रेत्याप्राज्ञतया नरः ॥ १६७ ॥

(१) **मेधातिथिः** । असृग्लोहितम् । तदङ्गतोङ्गाद्यत्रोत्पादयति ब्राह्मणस्य खड्गप्रहारादिनाऽयुध्यमानस्य न तुद्रोणा-चार्यवत्क्षात्रेण धर्मेण युयुत्सोःसुमहद्दुःखंनरकादि प्रेत्य मृतोजन्मान्तरे । अप्राज्ञतयेत्यनुवादः । प्राज्ञोहिशास्त्रार्थज्ञानान्न-कथमेवंकुर्यात् ॥ १६७ ॥

(२) **सर्वज्ञनारायणः** । अयुध्यमानस्येति युध्यमानस्य क्षतकरणे दोषाल्पता दर्शिता । अतएव तद्वधेपि प्राय-श्चित्ताल्पत्वमुन्नेयम् । सामान्योक्तदुःखपरिमाणाभिधानं । शोणितम् ॥ १६७ ॥

(३) **कुल्लूकः** । अयुध्यमानस्य ब्राह्मणस्याङ्गे शास्त्रानभिज्ञतया शोणितमुत्पाद्य परलोके महद्दुःखमाप्नोति ॥१६७॥

(४) **राघवानन्दः** । असृग्रक्तं । अङ्गतोदेहात् । युद्धे तु न दोषः नतद्दश्यते दुःखमिति चेत्तत्राह प्रत्येति । अ-प्राज्ञतया अदोषज्ञत्वेन ॥ १६७ ॥

(६) **रामचन्द्रः** । अयुध्यमानस्य शास्त्रेण धर्मेण युयुत्सोःब्राह्मणस्यअन्ततःमध्यतःअसृक् उत्पाद्य प्रेत्य परलो-के अप्राज्ञतया नरः सुमहद्दुःखं प्राप्नोति ॥ १६७ ॥

शोणितं यावतः पांसूंत्संगृह्णाति महीतलात् ॥ तावतोऽब्दानमुत्रान्यैः शोणितोत्पादकोऽद्यते ॥ १६८ ॥

(१) **मेधातिथिः** । ईषत्प्रहारेपूर्वफलम् । अधिके तु पांसवोरजांसिधूल्यवयवास्तान्यावतोयत्परिमाणान्गृण्हाति सं-हन्ति । ब्राह्मणाङ्गच्युतंभूमिपतितंलोहितंतावतोऽब्दांस्तावन्ति वर्षाण्यमुत्र परलोके द्यतेश्वश्रृगालैर्यःशोणितस्योत्पादकः-प्रहर्ता ॥ १६८ ॥

(२) **सर्वज्ञनारायणः** । संगृण्हाति संगृहीतुंशक्नोति । अमुत्र नरके । अद्यते भक्ष्यते ॥ १६८ ॥

(३) **कुल्लूकः** । खड्गादिहतब्राह्मणाङ्गनिर्गतंरुधिरंभूमिपतितंयावतोधूलिद्यणुकान्पिण्डीकरोति तावत्संख्यानि वर्षा-णि परलोके शोणितोत्पादकः प्रहर्त्ताअन्यैः श्वश्रृगालादिभिर्भक्ष्यते ॥ १६८ ॥

---

* एकविंशतिमाजातीः=एकविंशतिमाजातेः (नन्दनः)

(४) राघवानन्दः । संगृह्णाति पिण्डंकरोति पांशुः त्रसरेणुः । तावतस्तत्सङ्ख्याकान् । अन्यैः गृध्रादिभिः॥१६८॥

(५) नन्दनः । अन्यैरिहलोकगतैः ॥ १६८ ॥

(६) रामचन्द्रः । तावतः अब्दान् वर्षान् अमुत्र परलोके अद्यैः अदनीयैःसह शोणितोत्पादकः अद्यते भक्ष्यते ॥ १६८ ॥

न कदाचिद्द्विजे तस्माद्विद्वानवगुरेदपि ॥ न ताडयेत्तृणेनापि न गात्रात्स्रावयेदसृक् ॥ १६९ ॥

(१) मेधातिथिः । पूर्वस्य क्रियात्रयप्रतिषेधविधेरुद्यमननिपातनविषयस्योपसंहारः । नकदाचिदापद्यपीत्यर्थः१६९

(२) सर्वज्ञनारायणः । द्विजे विप्रे । अवगुरेदप्युद्यच्छेदपि ॥ १६९ ॥

(३) कुल्लूकः । तस्मादवगोरणादिदोषाभिज्ञोब्राह्मणे दण्डाद्युद्यमननिपातरुधिरस्रवणानि नापद्यपि कुर्यादिति पूर्वोक्तक्रियात्रयस्योपसंहारः ॥ १६९ ॥

(४) राघवानन्दः । हिंसाप्रकरणमुपसंहरति नेति । असृगिति द्वितीयान्तम् ॥ १६९ ॥

(५) नन्दनः । उपसंहरति नेति ॥ १६९ ॥

(६) रामचन्द्रः । द्विजे तस्मात्कदाचिदपि विद्वान्नावगुरेत् नदण्डमुत्थापयेदित्यर्थः ॥ १६९ ॥

अधार्मिकोनरोयोहि यस्य चाप्यनृतं धनम् ॥ हिंसारतश्च योनित्यं नेहासौ सुखमेधते ॥१७०॥

(१) मेधातिथिः । सामान्यतः सर्वहिंसाप्रतिषेधशेषोयम् ।अधर्मःशास्त्रप्रतिषिद्धोऽगम्यागमनादिस्तंचरत्यधार्मिकः । यस्यचानृतमेवधनंसाक्ष्ये व्यवहारनिर्णयादौचासत्यमुक्त्वाचधनंसाधयति यश्च हिंसारतिर्हिंसायांअभिरतोवैरानुबन्धादर्थहेतोर्वापराञ्हिनस्ति नासौसुखमेधतेनरकंप्राप्नोति । इहास्मिँल्लोके ॥ १७० ॥

(२) सर्वज्ञनारायणः । अधार्मिकोऽधर्मवृत्तिः । अनृतं मिथ्यावचनंधनमिवोपादेयम् ॥ १७० ॥

(३) कुल्लूकः । अधर्मेण व्यवहरतीत्यधार्मिकः शास्त्रप्रतिषिद्धागम्यागमनाद्यनुष्ठाता योमानुषोयस्य च साक्ष्ये व्यवहारनिर्णयादौ च मिथ्याभिधानमेव धनोपायअसत्यमभिधायोत्कोचधनंगृह्णाति यश्च परहिंसाभिरतः नासाविहलोके सुखयुक्तोवर्त्तते तस्मादेतन्न कर्त्तव्यमितिनिन्दयानिषेधःकल्प्यते ॥ १७० ॥

(४) राघवानन्दः । अधार्मिकः परदारादिरतः । अनृतंधनं मिथ्याभिधानमेव धनोपायः । असाविति परोक्षनिर्देशादमुत्रापि ॥ १७० ॥

(५) नन्दनः । एवमधर्मस्य वर्जनीयत्वमुक्तम् । इदानीं केवलामुत्रिकाद्भयादधर्मोवर्जनीयः किन्त्वैहिकादपीत्याह अधार्मिकइति । अधार्मिकमानसदोषयुक्तस्योपलक्षणम् । अनृतंधनमिति वाचिकदोषयुक्तस्य । हिंसारतइति कायिकदोषयुक्तस्य । इहास्मिन्नेव लोकेनसुखमेधते । अधार्मिकंवर्जयन्ति सन्तोऽनृतबहुलंवर्जयन्ति द्विषन्ति च हिंसारतंवर्जयन्ति द्विषन्ति हिंसन्ति च । तस्मादैहिकादपि भयादधर्मोवर्जनीयइत्यभिप्रायः ॥ १७० ॥

(६) रामचन्द्रः । अधार्मिकादीनांमध्ये च पुनः हिंसारतिः असौनेहलोके सुखं वर्धते ॥ १७० ॥

न सीदन्नपि धर्मेण मनोऽधर्मे निवेशयेत् ॥ अधार्मिकाणां पापानामाशु पश्यन्विपर्ययम् ॥१७१॥

(१) मेधातिथिः । धर्मःशास्त्रमर्यादा तेन वर्तमानःसीदन्नप्यवसादमपि प्राप्नुवन्नाधर्मे मनोनिवेशयेत् । यतअधा-

मिकायद्यपि चौर्योत्कोचदम्भादिभिर्धनसमृद्धाद्दश्यन्ते तथापि तेषामाशु विपर्ययोदृश्यते धननाशादि। अतोन धर्माद्वि-चलेनमुत्कृष्टत्वाद्दष्टमर्थंदर्शितवान् ॥ १७१ ॥

(२ सर्वज्ञनारायणः। धर्मेण धर्मे क्रियमाणेसीदन्नवसीदन्नपि। अधार्मिकाणामधर्महेतुर्हिंसादिकारिणां पापाना-मकृतप्रायश्चित्ततया तज्जन्यपापवतां आशु परलोके परलोकगमनमात्रेण विपर्ययंदुःखम् ॥ १७१ ॥

(३) कुल्लूकः। शास्त्रविहितमनुतिष्ठन्धनाद्यभावेनाऽवसीदन्नपि कदाचिन्नाधर्मे बुद्धिंकुर्यात्। यस्मादधर्मव्यवहारि-णोयद्यप्यापाततोधनादिसंपद्भागिनोपि दृश्यन्ते तथापि तेषामधार्मिकाणामधर्मचौरादिव्यवहारिणांपापिनांतज्जनितदुरित-शालिनांशीघ्रंधनादिविपर्ययोपि दृश्यते। तंपश्यन्नाधर्मे धियंदद्यादितिशिष्यहितायदृष्टमर्थंदर्शितवान् ॥ १७१ ॥

(४) राघवानन्दः। किंचनेति। धर्मेण सीदन्नपि मनोऽधर्मे न निवेशयेदित्यन्वयः ॥ १७१ ॥

(५) नन्दनः। न केवलमधर्मप्रकर्षोलोकोपक्रोशभयाद्वर्जनीयः किंतु प्रत्यक्षतोऽनर्थबहुत्वादपीत्याह नेति। प्रमु-खदुःखेन परिणामसुखेन भेषजेनेव सेव्यमानेनधर्मेण शास्त्रव्यवस्थारूपेणात्मसंकोचाख्येनसीदन्नपि तद्विपरीतरूपेविषमि-श्रेमधुनीवाधर्मेमनोननिवेशयेत्। अत्रहेतुरुत्तरार्धेनोक्तः। अधार्मिकाणांधर्मानुष्ठानरहितानां पापानांपापकारिणांचोरादी-नामाशुसद्योविपर्ययमनर्थंराजदण्डादिकंपश्यन्निति। न हि पापानांपापाचरणानन्तरमेवानर्थंउपलभ्यते ॥ १७१ ॥

(६) रामचन्द्रः। धर्मेण धर्मशास्त्रमर्यादया सीदन्नपि नरः मनः अधर्मे न निवेशयेत्। अधार्मिकाणांआशु विपर्ययंपश्यन्। यद्यपि चौर्योत्कोचादिना धनसमृद्धिः तथापि तस्याः समृद्धेरपिआशुविनाशः ॥ १७१ ॥

नाधर्मश्चरितोलोके सद्यः फलति गौरिव ॥ शनैरावर्तमानस्तु कर्तुर्मूलानि कृन्तति ॥ १७२ ॥

(१) मेधातिथिः। इदानींशास्त्रार्थमाह। अनियतकालत्वाद्वैदिकानांशुभाशुभफलानांकर्मणामेवमुच्यते। नाधर्म-श्चरितोऽनुष्ठितः सद्यः फलति फलंददाति। वेदेहि केवलंकर्मणांविहितप्रतिषिद्धानांसुखदुःखफलत्वंश्रुतम् कालविशेषस्तु नावगमितः। वाक्यव्यापारोहि कर्तव्यतावगमपरत्वेऽपि कर्मफलसंबन्धबोधमात्रे पर्यवस्यति नकालविशेषमाक्षिपति। फलवतांकर्मणांनित्यानांतु फलतः कर्तव्यताप्रतिषिद्धपरिहारेऽपि नैवनरकादिदुःखनिवृत्तिकामस्याधिकारः किंतु शास्त्रप्र-तिषेधसामर्थ्यात्। सतु प्रतिषेधोदुःखफलत्वंप्रतिषिद्धानुष्ठानस्य बोधयति। निपुणवएतदुच्यमानमतिग्रन्थविस्तरमाक्षिपती-त्युपरम्यते। गौरिव साधर्म्यवैधर्माभ्यामयंदृष्टान्तः। यथा गौः पृथिवीव्युप्तबीजान तदैवानेकसस्यशालिनीभवति किंत-र्हिपरिपाकमपेक्षते तादृशंवैदिकंकर्मेतिसाधर्म्यम्। वैधर्म्येणापि यथागौःपशुर्वा दोहाभ्यांसद्यः फलति नैवंधर्माधर्मौ। अधर्मग्रहणंधर्मस्यापिफलदानंप्रतिकालानियमप्रदर्शनार्थम्। आवर्त्यमानःकालेनोपचीयमानः कर्तुः प्रतिषिद्धानुष्ठातुःमूला-निकृन्तति छिनत्ति। मूलकर्तनेन सर्वेण सर्वविनाशउपलक्ष्यते। यथामूलच्छेदाद्वृक्षादिस्थावराणामपुनर्भवस्तद्वदधर्मका-रिणाम् ॥ १७२ ॥

(२) सर्वज्ञनारायणः। सद्यस्तत्क्षणादेव यथागौर्दुग्धंफलति न तथा अधर्मः आवर्त्यमानः पुनः पुनः क्रियमाणः मूलानिभोगस्य साधनानि कर्माणि कृन्तति छिनत्ति तच्छेदानन्तरंतु स्वफलंदुःखंकरोतीत्यपि द्रष्टव्यम् ॥ १७२ ॥

(३) कुल्लूकः। शास्त्रेणानियमितकालपरिपाकत्वात्शुभाशुभकर्मणांनाधर्मोऽनुतिष्ठतस्तत्कालएव फलति गौरिवेह-भूमिपक्षे साधर्म्यदृष्टान्तः। यथाभूमिरुप्तबीजमात्रा तदैव प्रचुरपचेलिमफलव्रीहिस्तबकसंवलिता न भवति किंतु नियमफल-पाकसमयमासाद्य पशुपक्षे वैधर्म्यदृष्टान्तः यथा गौःपशुर्वाहदोहाभ्यांसद्यःफलति नैवमधर्मः किंतु क्रमेणावर्तमानःफलो-न्मुखीभवन्नधर्मकर्तुर्मूलानिछिनत्तिमूलछेदेन सर्वनाशोलक्ष्यतेदेहधनाद्यन्वितोनश्यति ॥ १७२ ॥

(४) **राघवानन्दः** । विपर्ययंविवृणोति नेति । चरितोऽनुष्ठितः । गौः पृथिवी सा यथाविलम्बेनसस्यवती । व्यतिरेके वा धेनुरिव दृष्टान्तः आवर्त्यमानोभ्यस्यमानः मूलानि देहधनादीनिकृन्तति छिनत्ति ॥ १७२ ॥

(५) **नन्दनः** । तदिष्टविरुद्धमिदमुक्तमित्याशङ्क्यपरिहरति नेति । गौरिवेतिवैधर्म्यदृष्टान्तः । लोकेऽस्मिल्लोके । कर्तुर्मूलानि कर्तुरपेक्षितार्थमूलानि गृहक्षेत्रादीनि । तस्मात्कालान्तरेऽपि फलोपलम्भान्नदृष्टविरोधइत्यभिप्रायः ॥ १७२ ॥

(६) **रामचन्द्रः** । चरितः अधर्मः सद्यः गौरिव न फलतिसाधर्म्येण दृष्टान्तः । पृथिवो साधर्म्ये पशुवैधर्म्येशनैः-आवर्तमानस्तु प्रवर्तमानःअधर्मकर्तुर्मूलानिभोगसाधनानि कृन्तति छिनत्ति ॥ १७२ ॥

यदि नात्मनि पुत्रेषु न चेत्पुत्रेषु नप्तृषु ॥ नत्वेव तु कृतोऽधर्मः कर्तुर्भवति निष्फलः ॥ १७३ ॥

(१) **मेधातिथिः** । इदमयुक्तंयदन्यकृतस्यकर्मणोऽन्यगामिता फलस्योच्यते । कर्तः फलदानिवैदिकानि कर्माणि । नवैश्वानरन्यायोस्ति श्रवणाभावात् । नहि पुत्राद्यर्थतात्रश्रुता । सत्यम् । पुत्रे पीड्यमानेपीडितस्यपितुरधिकतरंदुःखं भवति अतः कर्तुरेवदुःखम् । पुत्रस्यापि स्वकृतात्पौर्वदेहिकात्कर्मणस्तत्फलमित्यविरुद्धम् । एवंनप्तृष्वपि द्रष्टव्यम् । नप्तारः पौत्राः । कृतोधर्मइतिसंहितायास्तुल्यत्वाद्धर्माधर्मौ द्वावप्युपात्तौ ॥ १७३ ॥

(२) **सर्वज्ञनारायणः** । अस्मिन्नेव तावद्रोगादिदुःखंजनयतिकथंचिदुत्कटधर्मप्रतिरोधेन साक्षाद्दुःखजननाशक्तौ पुत्रपौत्रादिद्वारेण रोगाद्युत्पादनद्वारापि दुःखंजनयतीत्यर्थः ॥ १७३ ॥

(३) **कुल्लूकः** । यदि स्वयंकर्तुर्देहधनादिनाशंफलं जनयति तदा तत्पुत्रेषु नोचेत्पौत्रेषु जनयति ननु निष्फलएव भवति । ननुअन्यकृतस्य कर्मणःकथमन्यत्र फलजनकत्वं उच्यते । पुत्रादिनाशस्य पितुःक्लेशहेतुत्वात् । शास्त्रीयत्वाच्चास्यार्थस्य नाविश्वासः ॥ १७३ ॥

(४) **राघवानन्दः** । कर्तर्यदृश्यमानमपि कृतं पुत्रादिषु फलतीत्याह यदीति अवश्यमेव भोक्तव्यंकृतंकर्म शुभाशुभमितिस्मरणान्नात्मनि तच्छरीरावच्छेदेन फलति चेत्पुत्रपौत्रादिरूपशरीरप्रामावपि फलति । वाचनिकातिरिक्तफलस्यान्यत्रासंभवात् । न चैतद्वचनंव्यर्थंअर्थवादेनाप्युपपत्तेःअतएव प्रियेषुस्वेषु सुकृतमप्रियेषु तु दुष्कृतमित्याद्यपि स्तुतिवादोहानौतूपायनमित्यादिसूत्रैर्निरर्दिष्ट ॥ १७३ ॥

(५) **नन्दनः** । यदातुकर्तारंप्रबलधर्मसहितमधर्मः साक्षात्पीडयितुंन शक्नोति तदा सन्तानपीडाद्वारेणापि तंपीडयतीत्याह यदीति । अधर्मः कृतआत्मनि कर्तरि यदि न फलति ततः पुत्रेषु फलति न चेत्पुत्रेषु ततोनप्तृषु पौत्रेषु फलतीति । पुत्राद्यनर्थकरणस्य कर्तृफलत्वं कर्तुस्तथाभिमानात् तत्पीडया पीडोपलम्भाच्चेति ॥ १७३ ॥

(६) **रामचन्द्रः** । यदि आत्मनि पापः अधर्मः न फलति तदा पुत्रेषु फलेत् यदि पुत्रेषु न तर्हि नप्तृषु फलेदिति । कर्तुःकृतंकर्म निष्फलं नभवति ॥ १७३ ॥

अधर्मेणैधते तावत्ततोभद्राणि पश्यति ॥ ततः सपत्नान् जयति समूलस्तु विनश्यति ॥ १७४ ॥

(१) **मेधातिथिः** । अधर्मेण प्रभुद्रोहादिनैधते वृद्धिंलभते तावत्तस्मिन्नेव काले ततोधनंग्रामंवाप्राप्य ततोभद्राणि बहुभृत्यगवाश्वादिसंपत्तिलक्षणानि पश्यत्यनुभवति । ततः सपत्नानरीन्दस्यूञ्जयति परिभवति । तर्हि धर्मे स्थितान्कुतश्चन कुसृतिहीनालभन्ते । अतस्तेषांदारिद्र्यशब्दऐश्वर्ये परिभवः । समूलंचकियन्तंकालमेवंभूत्वा सपुत्रज्ञातिधनबान्धवाउच्छिद्यन्ते । तस्माद्धर्मोन हातव्यः ॥ १७४ ॥

(२) **सर्वज्ञनारायणः** । अधर्मेणापि क्रियमाणेनोपलक्षितोधनादिभिर्वर्धतएव तावद्यावदुत्कटोधर्मोस्ति । तदन्तरं च भद्राणि सुखानि पश्यति । ततः शत्रूनभिभवति ततस्तेन फलदानोपक्षीणेन धर्मेण भोगमूलेन सह नश्यति ॥१७४ ॥

(३) **कुल्लूकः** । अधर्मेण परद्रोहादिना तावदापाततोग्रामधनादिना वर्धते । ततोभद्राणि बहुभृत्यगवाश्वादीनि लभते । ततःशत्रून्बलात्पदकृष्टाञ्जयति पश्चात्कियता कालेनाधर्मपरिपाकवशाद्देहधनतनयादिसहितोविनश्यति ॥ १७४ ॥

(४) **राघवानन्दः** । किंच प्रभुद्रोहादिनाऽधर्मेण तावद्वर्धते पुत्रपौत्रादिना । भद्राणि गवाश्वादीनिपश्यति च लभतइति । इदमत्राकूतंचित्रायागादिरिवेहामुत्रानियतफलतया कदाचिदपिकुत्रचित्फलंनिन्दाभावि अथवा सर्वधर्मस्य-ज्ञानमेव फलंप्रसिद्धम् । धर्मात्सुखं ज्ञानंचेति श्रुतेः । प्राक्तनकर्मफलंभुञ्जानःऐहिकंमन्यते ॥ १७४ ॥

(५) **नन्दनः** । नन्वधर्मंकुर्वन्कश्चित्क्षेमीदृश्यते तेनाभ्युदयहेतुत्वमप्यधर्मस्याभ्युपगन्तुंशक्यते ततः कथंतस्यै-कान्ततोऽनर्थहेतुत्वमित्याशङ्क्यपरिहरति अधर्मेणेति । १७४ ॥

(६) **रामचन्द्रः** । तावत्अधर्मेणअधर्माचरणेन पूर्वपुण्येनएधते वर्धते । यावदुत्कृष्टोधर्मः ततः तस्माद्भद्राणि पश्यति । च पुनः सपत्नान् जयति । धर्मसर्वस्य दानं ततः धर्मक्षयात्समूलंसपुत्रज्ञातिधनबान्धवादिरूपशर्मसहितो विनश्यति ॥ १७४ ॥

सत्यधर्मार्यवृत्तेषु शौचे चैवारमेत्सदा ॥ शिष्यांश्च शिष्याद्धर्मेण वाग्बाहूदरसंयतः ॥१७५ ॥

(१) **मेधातिथिः** । सत्यंयथादृष्टार्थवादिता । धर्मः श्रुतिविषयौ विधिप्रतिषेधौ । सत्यस्य ताद्रूप्येऽपिभेदेन निर्दे-शोऽतिशयार्थः । अनृतंपुरुषाणांस्वभावभूतम् अतोयत्नेन पुनः पुनः प्रतिषिध्यते । आर्यवृत्तंसदाचारः। आर्याः शिष्टास्तेषां-वृत्तमाचरितंतत्रारमेत् । रतिः परितोषः । एतेष्वर्थेषु परितोषोऽनेन विधीयते । अन्यानप्येवमाचारान्दृष्ट्वा मनःप्रसादंकु र्यात् । शिष्याश्च भार्यापुत्रदासच्छात्राधर्मेणानुशासनीयाः । पृष्ठतः शरीरस्येत्यादिधर्माः वाग्बाहूदरसंयतः सत्यसतिचप्रयो-जने । अबहुभाषितावाक्संयमः । बाह्वोः संयमोबाहुबलाश्रयणेन कस्यचिदप्यपीडनम् । उदरस्यसंयमोऽनौदरिकता औदरिकताभोजित्वंभोज्यविशेषोगर्धयापरगृहे बाहुल्येन भोजनम् । उक्तोप्यर्थः पुनरुच्यतेबहुकृत्वोऽपि पथ्यंवदितव्य-मितिसर्वत्र पौनरुक्त्यपरिहारः ॥ १७५ ॥

(२) **सर्वज्ञनारायणः** । धर्मोधर्मसाधनं सत्यस्य शौचस्यच धर्मत्वेपि अभ्यर्हिततया पृथगुक्तिः । आर्याः आरा-दूरंपापेभ्योगताः तेषांवृत्तमाचारोधर्मेणभोगहेतुरपि तत्रैव शौचंबाह्याभ्यन्तरं । आरमेत सर्वदा रतः स्यात् । धर्मेण धर्मोप-देशेन वागादिसंयतश्च स्यात् । वाकसंयमः परुषावचनादिः बाहुसंयमोऽहिंसादिः उदरसंयमः अनदनीयाभक्षणादिः ॥१७५॥

(३) **कुल्लूकः** । सत्यधर्मसदाचारशौचेषुसर्वदारतिंकुर्यात् शिष्यांश्चानुशासनीयान्भार्यापुत्रदासच्छात्रान्रज्जुवावेणुद-लेनवेतिप्रकारेणशासयेत् उक्तानामप्यभिधानादादरार्थंवाग्बाहूदरसंयतश्च स्यात् वाक्संयमःसत्यभाषिता बाहुसंयमो-बाहुबलेन कस्याप्यपीडनम् उदरसंयमोयथालब्धाल्पभोजनम् ॥ १७५ ॥

(४) **राघवानन्दः** । प्राक्तनजपुण्यफलंभुञ्जानोपि वा लोकप्रतीत्याअधर्मेण वर्धतइवेत्यनूद्य धर्मक्षये समूलोनं-क्ष्यतीत्याह सत्येत्यादि । सत्यंयथाश्रुतस्य यथादृष्टस्य भाषणं । धर्मोबलवद्दुःखाजनकत्वे सति विधिबोध्यः । आयर्वृत्तिःसदाचारः । वाक्संयमः सत्यंब्रूयादितिश्लोकोक्तः । बाहुसंयमोन पाणिपादचपलइत्यादिना वक्ष्यते । उदरसं-यमोगर्हितंचातिभोजनमित्याद्युक्तः । संयतस्तेषांनिग्रहयुक्तः ॥ १७५ ॥

(५) **नन्दनः** । एवंदृष्टविरुद्धत्वेनाप्यधर्मस्यवर्जनीयत्वमुक्तम् इदानींव्रतान्तराण्येवाह सत्येति ॥ १७५ ॥

(६) रामचन्द्रः । सत्यं यथार्थभाषणं । धर्मः श्रुतिस्मृत्यभिहितः । आर्यवृत्तं सद्वृत्ताचरणं । तेषु सदा रमेत च पुनः शौचे अन्तर्बाह्यशौचे सदारमेत । वाग्बाहूदरसंयतः नियतगात्रः । वाक्मौनं व्यर्थालापरहितं । बाह्वोः संयमः बाहुबलाश्रयः । उदरं बहुभोजितंभवेत् ॥ १७५ ॥

परित्यजेदर्थकामौ यौ स्यातां धर्मवर्जितौ ॥ धर्मं चाप्यसुखोदर्कं लोकविक्रुष्टमेव च ॥१७६ ॥

(१) मेधातिथिः । उक्तस्त्रिवर्गः पुरुषार्थः । कश्चित्तुल्यतांमन्यमाऽनोर्थकामपरिहारेणयथा धर्मः सेव्यते तद्विरोधी ज्योतिष्टोमादिः । सह्यर्थविरोधीदक्षिणादिदानेन कामविरोधी दीक्षितस्य ब्रह्मचर्यविधानात् । एवमर्थकामावपि धर्मपरिहारेण न सेवेत । तत्र नाहिंस्याद्भूतानीतियत्रकामोहिंसायांवैरानुबन्धाद्यः कश्चिद्दुर्कर्मण्यतेतत्रसविषयप्रतिषेधाय यत्र तु कस्यचिद्धिंसयार्थकामावाप्येते तत्र नास्तिहिंसादोषइतिप्रवर्ततेतद्भ्रान्तिनिवृत्त्यर्थमिदमुच्यते । परित्यजेत्परिहरेत्तादृशार्थकामौ यत्र धर्मविरोधः । एवंसर्वतोधर्मस्यबलीयस्त्वमुक्त्वा कस्मिंश्चिद्विषये तस्यापि परिहर्तव्यतामाह धर्मंचाप्यसुखोदर्कम् । उदर्कउत्तरकालः सोऽसुखोयस्य । यथासर्वस्वदानंवाददातिधर्मकोयंमहापुण्यइति। यथानदीतीरेष्वेकान्तेष्वपि प्राकृतजनाबहवःपश्यन्ति तत्रस्नानंभवतीत्यर्थस्नानंधर्मार्जनसमक्षतापेक्षातु साधुवादाय यथाच तीर्थकाकेभ्योदानंभवतिदानंधर्मोदातृत्वप्रसिध्युत्पादनार्थत्वात्तेभ्योनिन्द्यते । अथवायद्दृष्टतयालोकः संक्रोशतियथागोरवध्यस्यवधोमांसस्यभक्षणंचतद्विगर्हिततरंपश्यन्तरेभ्योलोके । दृष्टमूलश्चायमहिस्पर्शवत्प्रतिषेधः। विहितोऽयमर्थइत्यवैधतया प्राकृतजनाअजानानाधार्मिकत्वंयष्टुः प्रख्यापयेयुस्तेषांचबहुत्वतः प्रसिद्ध्याशिष्टाअपियेनाप्रसिद्धमूलमनवगच्छन्तः परिवर्जयेयुस्तदुक्तंधार्मिके सतिराजनीति एतदुक्तंपूर्वैर्व्याख्यातमित्यनुगतम् । नहि प्रत्यक्षश्रुतिविहितस्य स्मृत्या बाधोन्याय्यः । इदंतु युक्ततरमुदाहरणम् नियोगधर्मः स्मृत्याविहितोलोकसंक्रुष्टत्वान्न क्रियते। तथा यःकश्चिदनाथतरुणींस्त्रियंकारुण्याद्बिभर्ति तत्र यदि लोकसंक्रोशआशङ्क्यते स्त्रीत्वेनैवास्माएषा रोचते सलोकक्रुष्टधर्मः ॥ १७६ ॥

(२) सर्वज्ञनारायणः । धर्मवर्जितौ धर्मविरोधिनौ । असुखोदर्कंयावान्धर्मस्तदधिकप्रत्यवायाविनाकृतं यथावातरोगिणउपवासादितीक्ष्णव्रतानुष्ठानमित्यादि । लोकविक्रुष्टंलोकनिन्दितं । कलियुगेमधुराग्रहादि ॥ १७६ ॥

(३) कुल्लूकः । यावर्थकामौ धर्मविरोधिनौ भवेतांतौ परिहरेत । यथा चौर्यादिनार्थोपपादनं दीक्षादिने यजमानस्य पत्न्युपगमः उदर्कउत्तरकालस्तत्रासुखंयत्र धर्मे तद्धर्ममपि परित्यजेत् यथा पुत्रादिवर्गपोष्ययुक्तस्य सर्वस्वदानं लोकविक्रुष्टं यत्र लोकानांविक्रोशःयथा कलौ मध्यमाष्टकादिषु गोवधादिः ॥ १७६ ॥

(४) राघवानन्दः । किंचपरीति । धर्मवर्जितौ धर्मविरोधिनौ । असुखोदर्कं आयत्यामनुतापजननंयेनादि पुत्राद्यर्थपरस्वादानंवा । लोकविक्रुष्टं यत्र लोकानांविक्रोशः । यथा कलौ मध्यमाष्टकासु गोवधादि ॥ १७६ ॥

(६) रामचन्द्रः । धर्मं सर्वस्वदानं उत्तरकाले असुखोदर्कं। च पुनः लोकसंक्रुष्टंधर्मं लोकनिन्दितं परित्यजेत्॥१७६॥

न पाणिपादचपलो न नेत्रचपलोऽनृजुः ॥ न स्याद्वाक्चपलश्चैव न परद्रोहकर्मधीः ॥ १७७ ॥

(१) मेधातिथिः । पाणिपादाभ्यांचपलः । तृतीयेति योगविभागात्समासः । चापलंचहस्तेनानुपयुज्यमानस्यापि वस्तुनोग्रहणापसारणे । परस्त्रीप्रेक्षणचित्रसंदर्शनादि नेत्रचापलम् । परद्रोहार्थकर्मबुद्धिश्च नकर्तव्या ॥ १७७ ॥

(२) सर्वज्ञनारायणः । पाणिपादनेत्रवाक्चापलानि वृथाहस्तकरणोत्प्लवनकुतूहलित्वासंबद्धभाषाः । अनृजुर्वक्रमतिः । परद्रोहार्थयत्कर्म तद्धीस्तत्परः ॥ १७७ ॥

(३) **कुल्लूकः** । पाण्यादिचापलंत्यजेत् अनुपयुक्तवस्तूपादानादि पाणिचापलं निष्प्रयोजनभ्रमणादि पादचापलं । परस्त्रीप्रेक्षणादि नेत्रचापलं बहुगर्ह्यवादिता वाक्चापलं । अनृजुःकुटिलोन स्यात् परद्रोहोर्हिंसा तदर्थचेष्टांधियंच न कुर्यात् ॥ १७७ ॥

(४) **राघवानन्दः** । किंच नेति । अनृजुः ऋजुभिन्नः कुटिलोनस्यात् । परद्रोहकर्मणि धियोनिषेधोभ्यासस्तस्यातिनिन्दितत्वसूचनार्थः । इदमत्राकूतंशतकृत्वःपथ्यंरोचयन्तेस्मवृद्धाइतिन्यायेननिषिद्धाचरणस्य कायिकादिभेदेनानेकत्वात्तस्य दृष्टफलतयाच तदभ्यासस्य प्रबलत्वाच्छतधा निषेधोपि निवर्तयितुमशक्यत्वान्नैतेषु पुनरुक्तिरिति ॥ १७७ ॥

(५) **नन्दनः** । पाणिपादचपलः पाणिभ्यांपादाभ्यांच कर्तव्यकरणेचागम्यागमने च निरतः । एतेनोत्तरमपिचापलंव्याख्यातम् ॥ १७७ ॥

(६) **रामचन्द्रः** । पाणिपादचपलोन भवेत् । अनियुक्तचरस्तु न ग्रहणाय । नेत्रे चले परस्त्रीषु । परद्रोहार्थं कर्म न कुर्यात् अनृजुः न स्यात् किंतु ऋजुरेवस्यात् ॥ १७७ ॥

येनास्य पितरोयाता येन याताः पितामहाः ॥ तेन यायात्सतां मार्गं तेन गच्छन्नरिष्यते ॥ १७८॥

(१) **मेधातिथिः** । योधर्मः पित्रादिभिरनुष्ठितो यैश्च सह प्रीतिर्भाविता यैःसहकन्याविवाहादिःकृतोयैश्चशाखाअधीताःसएव पन्थाआश्रयणीयः । तथा कुर्वन्न रिष्यति न बाध्यते लोके न निन्द्यते । अन्येत्वविदुषधर्मेष्वहिंसादिषु प्रत्युपायोयंराजपटहइवम्लेच्छादीनाम् अग्निहोत्रादयस्तु स्वप्रत्ययापेक्षाएव । अत्रचोदयन्ति । यदि निर्मूलः पित्रादिभिरनुष्ठितोऽर्थः कथतस्याधर्मत्वम् अथास्ति मूलंतत्पुत्रस्यापि भविष्यति किंपित्रादिग्रहणेन तदेतत्परित्वतमविदुषांमूलमजानानामुपदेशोऽयमिति । अन्येतुयत्र निपुणतोऽपिनिरूप्यमाणे संदेहोन निवर्तत उभयथा वाक्यार्थप्रतिपत्तिस्तत्रपित्राद्याचरितः पन्थाआश्रयणीयइत्याहुः एतदपिचिन्त्यम् । नहि नित्यसंदिग्धंनाम प्रमाणमस्ति । अवश्यंह्येकार्थनिष्ठेन वाक्येन भवितव्यम् । विकल्पितेषु वापदार्थेषु पित्राद्याचरितंकर्मानुचरणीयम् यतोन्यदाचरितवन्तः । सतांमार्गमिति यदिपितृपितामहादिभिः कैश्चित्कथंचिदधर्मआचरितपूर्वःसनआश्रयणीयइतिसतांमार्गमित्याह ॥ १७८ ॥

(२) **सर्वज्ञनारायणः** । येनास्येति यत्रश्रुत्यर्थे अयमर्थोयंवेतिसंदेहे व्याख्यातृविप्रतिपत्त्या विवादस्तदेकपक्षविषयमेतत् । अतएव सतांमार्गंसदाचारविषयं यायादित्युक्तम् । नरिष्यते नहिंस्यते ॥ १७८ ॥

(३) **कुल्लूकः** । बहुविधशास्त्रार्थसंभवे पितृपितामहाद्यनुष्ठितएव शास्त्रार्थोऽनुष्ठातव्यःतेन गच्छन्नरिष्यते नाधर्मेणहिंस्यते ॥ १७८॥

(४) **राघवानन्दः** । बहुशास्त्रानभिज्ञस्य शास्त्रवर्त्मानुसारित्वमाह येनेति । सतांमार्गं सद्भिराचरितंपन्थानं । तेन पित्रादिकृतमद्यपानमातुलकन्यापरिणयनादिषुनातिप्रसङ्गः । नरिष्यति अधर्मेण न हिंस्यते ॥ १७८ ॥

(५) **नन्दनः** । न रिष्यति न हिंस्यते ॥ १७८ ॥

(६) **रामचन्द्रः** । येन धर्ममार्गेणास्य पितरोयाताः येन धर्ममार्गेण पितामहाःयाताः । अस्यार्थेये धर्माःपित्रादिभिःकृताःयैस्तेयेचपितामहादिभिःकृताःप्रीतिंगताःतानाचरंस्तेन मार्गेण गच्छन् नरिष्यति न नश्यति । तेन सतांमार्गमाश्रयेदित्यर्थः ॥ १७८ ॥

ऋत्विक्पुरोहिताचार्यैर्मातुलातिथिसंश्रितैः ॥ बालवृद्धातुरैर्वैद्यैर्ज्ञातिसंबन्धिबान्धवैः ॥ १७९ ॥

(१) **मेधातिथिः** । नसमाचरेदित्येकैकेनसंबध्यते । संश्रिताआश्रयागताउपजीविनः । वैद्याविद्वांसोभिषजोवा-ज्ञातयः पितृपक्षाः । संबधिनोवैवाह्याः । बान्धवामातृपक्षामातृष्वस्रीयप्रभृतयः ॥ १७९ ॥

(२) **सर्वज्ञनारायणः** । संश्रितैरनुगतैः । आतुरोत्र व्याधितः । कृशश्चान्नाभावादिना । वैद्यैर्विद्यावद्भिः । ज्ञातयः सपिण्डाः । संबन्धिनः आगन्तुसंबन्धाः स्यालाद्याः । बान्धवाः आत्ममातृपितृबान्धवाः ॥ १७९ ॥

(३) **कुल्लूकः** । ऋत्विगितिवचनद्वयम् ऋत्विगादिभिर्वाक्कलहंन कुर्यात् । शान्त्यादिकर्ता पुरोहितः । संश्रिता-अनुजीविनः ज्ञातयःपितृपक्षाः संबन्धिनोजामातृश्यालकादयः बान्धवामातृपक्षाः । जामयोभगिनीस्नुषाद्याः ॥ १७९ ॥ ॥ १८० ॥

(४) **राघवानन्दः** । सार्थवादमृत्विगादिभिर्विवादपरिहारमाह ऋत्विगितिसप्तभिः । संश्रितैः शरण्यैःअनुजीवि-भिर्वा । संबन्धिनः श्वशुराद्याः । बान्धवामातुलेयाद्याः ॥ १७९ ॥

(५) **नन्दनः** । वैद्यैर्विद्वद्भिः ॥ १७९ ॥

(६) **रामचन्द्रः** । त्रिभिराह ऋत्विजइति । ऋत्विगादिभिः संविवादंन कुर्यात् । वेदविद्भिः भिषजैर्वा । ज्ञातिसंब-न्धिबान्धवैःसह विवादंन कुर्यात् । ज्ञातयःपितृपक्षीयाः । संबन्धिनःवैवाह्याः । बान्धवाः मातृपक्षीयाः ॥ १७९ ॥

मातापितृभ्यांजामीभिर्भ्रात्रा पुत्रेण भार्यया ॥ दुहित्रा दासवर्गेण विवादं न समाचरेत् ॥ १८० ॥

(१) **मेधातिथिः** । जामयोभगिन्यः स्ववासिनश्च । विवादोविरोधःप्रतिकूलाचरणंवाक्कलहश्च तैर्नकुर्यात् ॥ १८० ॥

(२) **सर्वज्ञनारायणः** । जामी स्वसा । विवादंविरुद्धभाषणम् ॥ १८० ॥

(४) **राघवानन्दः** । यामयोभ्रातृपत्नीभगिनीस्नुषाद्याः । दुहिता कन्या ॥ १८० ॥

(५) **नन्दनः** । जामिभिर्भगिनीभिः ॥ १८० ॥

(६) **रामचन्द्रः** । जामिभिः भगिनीभिः ॥ १८० ॥

एतैर्विवादान्संत्यज्य सर्वपापैः प्रमुच्यते ॥ एभिर्जितैश्च जयति सर्वांल्लोकानिमान्गृही ॥ १८१ ॥

(१) **मेधातिथिः** । एतैर्विवादैः क्रियमाणैर्यः पापयोगोभवत्यकर्तुस्तेन न संबन्धः । सर्वपापैःप्रमुच्यतइत्युच्य-ते । एतैश्चजितैरुपेक्षितैःक्षमया सर्वांल्लोकाञ्जयति स्वीकरोतीत्यर्थवादः ॥ १८१ ॥

(२) **सर्वज्ञनारायणः** । जितोविवादे तैरधिक्षिप्तः सहमानः एतान्जित्वा जयतीतिकचित्पाठः ॥ १८१ ॥

(३) **कुल्लूकः** । एतैःऋत्विगादिभिःसह विवादान्परित्यज्यऽज्ञातपापैःप्रमुच्यते तथैतैर्विवादैरुपेक्षितैरिमान्वक्ष्यमा-णान् सर्वलोकान्गृहस्थोजयति ॥ १८१ ॥

(४) **राघवानन्दः** । विवादान् विवादविषयीभूतान् । एतैर्जितोवशीकृतः ॥ १८१ ॥

(५) **नन्दनः** । इमान्वक्ष्यमाणान् ॥ १८१ ॥

(६) **रामचन्द्रः** । एतैः ऋत्विगादिदासान्तैः विवादरहितैः उपेक्षितैः इमान् लोकान् जयति स्वीकरोति ॥ १८१ ॥

---

१८० यामीभिः=जामीभिः (मे०)

आचार्योब्रह्मलोकेशः प्राजापत्ये पिता प्रभुः॥ अतिथिस्त्विन्द्रलोकेशोदेवलोकस्य चर्त्विजः॥१८२॥

(१) मेधातिथिः। आचार्योब्रह्मलोकस्येशःप्रभुस्तस्मिन्परितुष्टे ब्रह्मलोकः प्राप्यते। अतोगुणतोब्रह्मलोकेशइत्युच्यते। प्राजापत्येलोके पिता प्रभुः॥ १८२॥

(२) सर्वज्ञनारायणः। जेतव्यलोकान्दर्शयतिआचार्यइति। आचार्यपदंवैद्यानामुपलक्षणम्॥ १८२॥

(३) कुल्लूकः। आचार्योब्रह्मलोकस्य प्रभुःतेन सह विवादपरित्यागेन तत्संतुष्ट्या तु ब्रह्मलोकमभिगौणं ब्रह्मलोकेशत्वम् एवंप्रजापत्यलोकेशः प्राजापत्ये पिताच प्रभुः अतिथिरिन्द्रलोके देवलोकस्य चर्त्विजः। एवमुत्तरत्रापि-तत्तल्लोकेशत्वंबोद्धव्यम्॥ १८२॥

(४) राघवानन्दः। सर्वलोकजयंविवृणोति आचार्यइति। आचार्यदत्तविद्यया ब्रह्मलोकाद्यापत्तेः। पितृभक्तस्य प्राजापत्यत्वं। दातारोनोभिवर्धन्तामितिमन्त्रलिङ्गात्। अतिथेरतिपुण्यदत्वेनेन्द्रत्वावाप्तिहेतुत्वादृत्विजोयज्ञद्वारा देवत्वहेतुत्वादित्याद्यूहनीयम्॥ १८२॥

(५) नन्दनः। प्राजापत्योदक्षादीनांलोकः॥ १८२॥

(६) रामचन्द्रः। पूजिताआचार्यादयोब्रह्मलोकादीन्प्रापयन्ति॥ १८२॥

जामयोऽप्सरसांलोके वैश्वदेवस्य बान्धवाः॥ संबन्धिनोह्यपांलोके पृथिव्यांमातृमातुलौ॥१८३॥

(२)सर्वज्ञनारायणः। अप्सरसां लोके लोकस्य वैश्वदेवस्य विश्वेषांदेवानांलोकस्य संबन्धिपदंज्ञातीनामप्युपलक्षणम्॥ १८३॥

(३) कुल्लूकः। अप्सरसांलोके जामयःप्रभवन्ति वैश्वदेवलोके बान्धवाः वरुणलोके संबन्धिनः भूर्लोके मातृमातुलौ॥ १८३॥

(४) राघवानन्दः। जामयः यामयइतिवाक्वचित्पाठः॥ १८३॥

(६) रामचन्द्रः। जामयः भगिन्यः विवासिन्यः॥ १८३॥

आकाशेशास्तु विज्ञेया बालवृद्धकृशातुराः॥ भ्राता ज्येष्ठःसमःपित्रा भार्या पुत्रः स्वका तनु॥१८४॥

(१) मेधातिथिः। भार्यापुत्रःस्वकीयातनुरात्मीयमेवशरीरम्॥ १८४॥

(२) सर्वज्ञनारायणः। आकाशमन्तरिक्षलोकः। कृशोऽभोजनादिना। समःपित्राप्राजापत्यलोकेशः। स्वकातनुरतः स्वमाप्यलोकेशः॥ १८४॥

(३) कुल्लूकः। कृशःकृशधनःसंश्रितोविवक्षितःबालवृद्धसंश्रितातुराअन्तरिक्षे प्रभवन्ति। भ्राता च ज्येष्ठःपितृतुल्यस्तस्मात्सोपि प्रजापतिलोकप्रभुः। भार्यापुत्रौ च स्वशरीरमेवातःकथमात्मनैव सह विवादःसंभवति॥ १८४॥

(४) राघवानन्दः। आकाशेशाअन्तरिक्षलोकहेतवः। कृशः संश्रितःभ्राता प्राजापत्येशः पित्रा समत्वात्। स्वका तनुः अर्धवाएषआत्मनःयत्पत्नीनाम आत्मावै जायते पुत्रइति श्रुतेः॥ १८४॥

छाया स्वोदासवर्गश्च दुहिता कृपणंपरम्॥ तस्मादेतैरधिक्षिप्तःसहेतासंज्वरः सदा॥ १८५॥

(१) मेधातिथिः। योभृत्यवर्गःसआत्मीयाच्छाया यथा छाया नित्यानुगतान क्रोधविषयएवंभृत्यवर्गोऽपि।

---

१८३ जामयो=यामयो (मे०)

दुहिता कृपणमनुकम्पा दया। एतैः पूर्वोक्तैरधिक्षिप्तःपरुषवचनैराकृष्टःकोपितःसहेत क्षमेत। असञ्ज्वरोऽविद्यमानज्वरःज्वराभावेन च चित्तस्यासंक्षोभोलक्ष्यते। ज्वरितस्य हि चित्तसंक्षोभोभवति तद्वत्क्रुद्धस्य। अथवापाठान्तरं। असंज्वरः। संतापःसंज्वरःसोऽनेनाप्रतिषिध्यते ॥ १८५ ॥

(२) सर्वज्ञनारायणः। स्वच्छायातुल्यः। एतेन यत्र स्वयंगच्छति तत्र यथा छाया तथा दासवर्गोपीति स्वलोके-शतैवोक्ता। कृपणंकृपाविषयः। तेन परकरुणया योलोकोजीयते सदुहित्रासहाविवादेनेत्यर्थः। असंज्वरोमानसाभिनिवेशेनापि शून्यः ॥ १८५ ॥

(३) कुल्लूकः। स्वदासवर्गश्च नित्यानुगतत्वादात्मच्छायेव न विवादार्हांदुहिता च परंकृपापात्रंतस्मादेतैरधिक्षिप्तःसन्न संतापःसहेत नतु विवदेत् ॥ १८५ ॥

(४) राघवानन्दः। छायास्वदासवर्गःस्वच्छायावदव्यभिचारित्वात्। दुहिता कृपणं कृपापात्रम्। असंज्वरउदर्क-संतापरहितः ॥ १८५ ॥

(६) रामचन्द्रः। योदासवर्गः सः स्वा स्वकीया छायानुगता भवति। दुहिता परंकृपास्थानंतस्मात्कारणादे-तैराचार्यादिभिः अधिक्षिप्तस्तिरस्कृतः असञ्ज्वरः क्लेशरहितः सन सहेत ॥ १८५ ॥

प्रतिग्रहसमर्थोपि प्रसङ्गंतत्र वर्जयेत् ॥ प्रतिग्रहेण ह्यस्याशु ब्राह्मं तेजः प्रशाम्यति ॥ १८६ ॥

(१) मेधातिथिः। परस्माददृष्टः प्रयुक्तायल्लभ्यते सप्रतिग्रहः। तत्र समर्थःशक्तोऽपिप्रसङ्गंपुनः प्रवृत्तिं वर्जयेत। श्रुताध्ययनशीलसंपत्तिर्द्रव्यविधिज्ञताचसामर्थ्यम्। तस्मादविद्वान् बिभीयादित्यत्रोक्तमप्येतदुत्तरार्थंपुनरनूद्यते ॥ १८६ ॥

(२) सर्वज्ञनारायणः। प्रसङ्गं पुनःपुनःकरणम्। ब्राह्मंवेदाध्ययनकृतम् ॥ १८६ ॥

(३) कुल्लूकः। विद्यातपोवृत्तसंपन्नतया प्रतिग्रहेऽधिकार्यपि तत्र पुनःपुनःप्रवृत्तिंत्यजेत् यस्मात्प्रतिग्रहेणाऽस्यवे-दाध्ययनादिनिमित्तप्रभावःशीघ्रमेव विनश्यति। यात्रामात्रप्रसिद्ध्यर्थमित्युक्तेऽपि सामान्येनार्जनसंकोचे विशेषेण प्रतिग्र-हस्य ब्राह्मप्रभावप्रशमनफलत्वकथनार्थंवचनम् ॥ १८६ ॥

(४) राघवानन्दः। प्रकारान्तरेण जीवन्प्रतिग्रहंन कुर्यादित्याह प्रतीति। समर्थोविद्यातपोभिः। प्रसंगं प्रसक्तिं। ब्राह्मं वेदाध्ययनजम् ॥ १८६ ॥

(५) नन्दनः। प्रतिग्रहविधिज्ञोविद्यादियुक्तश्चप्रतिग्रहसमर्थः। अयावदर्थापुनः पुनः प्रवृत्तिः प्रसङ्गः। ब्राह्मंतेजः ब्राह्मीशक्तिः। समर्थोऽपीतिवचनादर्थस्य दोषातिशयः सूचितः ॥ १८६ ॥

(६) रामचन्द्रः। प्रतिग्रहं ग्रहीतुं समर्थोपि तत्र प्रसङ्गंवर्जयेत्। प्रतिग्रहस्वीकारेणाशुब्राह्मंतेजःशाम्यति ॥ १८६ ॥

न द्रव्याणामविज्ञाय विधिं धर्म्यं प्रतिग्रहे ॥ प्राज्ञः प्रतिग्रहं कुर्यादवसीदन्नपि क्षुधा ॥ १८७ ॥

(१) मेधातिथिः। तद्दर्शयति। अविज्ञायकामोपभोगाद्यर्थंनप्रतिग्रहः कर्तव्यः। एतदुक्तंभवति। आत्मनः कुटु-म्बस्थित्यै नित्यकर्मसंपत्त्यैच प्रतिग्रहः कर्तव्योनान्यथा अवसीदन्नपिक्षुधा। अप्रतिगृह्णन्यद्यप्यवसादंगच्छति। अव-सादः शरीरस्यानभिवृद्धिः। अथवा द्रव्याणांविधिंधर्म्यंप्रतिग्रहइत्येवंसंबन्धः क्रियते। कोऽसौधर्म्योविधिः। धर्मप्रयोज-नंविज्ञायप्रतिग्रहमन्त्रद्रव्याणांचदेवताग्नयेहिरण्यंरुद्रायगामित्यादिः ॥ १८७ ॥

(२) सर्वज्ञनारायणः। द्रव्याणांप्रतिग्रहे धर्म्यंविधिं द्रव्यदेवताज्ञानमन्त्रपाठादिकम् ॥ १८७ ॥

(३) कुल्लूकः । द्रव्याणांप्रतिग्रहंधर्माय हितंविधानंग्राह्यदेवताप्रतिग्रहमन्त्रादिकमज्ञात्वा क्षुधावसानंगच्छन्नपि प्राज्ञोन प्रतिगृह्णीयात्किंपुनरनापदि ॥ १८७ ॥

(४) राघवानन्दः । तेन विना जीवन्तंप्रति द्रव्याद्यविज्ञाय प्रतिग्रहोन कार्यइत्याह नेतिपञ्चभिः । धर्मं अग्नये हिरण्यंरुद्रायगामित्यादिप्रतिग्रहमन्त्रादिकम् ॥ १८७ ॥

(५) नन्दनः । तंव्यक्तीकरोति नेति ।यत्किंचप्रतिगृह्णीयात्तत्सर्वमुत्तानस्त्वाङ्गिरसः प्रतिगृह्णात्वित्येव प्रतिगृह्णीयादित्ययंविधिर्द्रव्यप्रतिग्रहेविधिः ॥ १८७ ॥

(६) रामचन्द्रः । द्रव्याणांविधिंद्रव्यदेवताप्रतिग्रहमन्त्रादिंअविज्ञाय । द्रव्यंहिरण्यादि । प्राज्ञः पण्डितः । क्षुधा- अवसीदन् अवसादंगच्छन् प्रतिग्रहंकुर्यात् ॥ १८७ ॥

हिरण्यं भूमिमश्वं गामन्नं वासस्तिलान्घृतं ॥ प्रतिगृह्णन्नविद्वांस्तु भस्मीभवति दारुवत् ॥१८८॥

(१) मेधातिथिः । अविदुषोद्रव्यविशेषप्रतिग्रहे दोषातिशयमाह । भस्मीभवतिदारुवत् । यथा । दार्वग्निना दग्धं- भस्मीभवति तथा योब्राह्मणोविद्यासंपन्नोन भवति सएतानिहिरण्यादीनि द्रव्याणि प्रतिगृह्णन्भस्मीभवति ॥ १८८ ॥

(२) सर्वज्ञनारायणः । अन्नंपक्वान्नम् । अविद्वान्धर्म्यंविधिमजानन् । भस्मीभवति फलशून्योभवति ॥ १८८ ॥

(३) कुल्लूकः । स्वर्णादीञ्छ्रुतस्वाध्यायहीनः प्रतिगृह्णन्नग्निसंयोगेन दारुवद्भस्मीभूतोभवति पुनरुत्पत्तिंन लभते ॥ १८८ ॥

(४) राघवानन्दः । अज्ञायापि कृते दोषमाहहिरण्यमिति । भस्मीभवतिअविद्वान् तपोविद्यादिरहितःप्रतिग्रहाग्निना ॥ १८८ ॥

(५) नन्दनः । विशेषतोहिरण्यादिकंविदुषा न प्रतिग्राह्यमित्याह हिरण्यमिति ॥ १८८ ॥

(६) रामचन्द्रः । अविद्वान्मूर्खः हिरण्यादि प्रतिगृह्णानोदारुवद्भस्मीभवति ॥ १८८ ॥

हिरण्यमायुरन्नं च भूर्गौश्चाप्योषतस्तनुम् ॥ अश्वश्चक्षुस्त्वचं वासोघृतंतेजस्तिलाः प्रजाः॥१८९॥

(१) मेधातिथिः । भूर्गौश्च तनुंशरीरमोषतोदहतः । हिरण्यमायुर्विभक्तिपरिणामःओषतीतिकर्तव्यः । एवंअश्वश्च- क्षुरित्यादिषु क्रियापदानुषङ्गःकर्तव्यः ॥ १८९ ॥

(२) सर्वज्ञनारायणः । तस्यैव प्रपञ्चोहिरण्यमायुरित्यादि । उषतोदहतः त्वचोदाहः । कुष्ठाद्युपहत्या ॥ १८९ ॥

(३) कुल्लूकः । अविदुषः प्रतिग्रहीतुर्भूर्गौश्च शरीरमोषतोदहतः । उषदाहे भौवादिकस्तस्येदंरूपम् । भूगवोर्द्वि- त्वविवक्षायांद्विवचनम् । एवंहिरण्यमन्नंचायुरोषतः । अश्वश्चक्षुरित्यादिषु विभक्तिविपरिणामादोषतीत्येकवचनान्तस्या- नुषङ्गः ॥ १८९ ॥

(४) राघवानन्दः । किंकिंनाशयतीत्याहहिरण्याद्यष्टद्रव्याणि प्रतिगृहीतानि आयुरादीनि अष्टौनाशयन्तीत्यर्थः । ओषतः भूगावौ ॥ १८९ ॥

(५) नन्दनः । अथहिरण्यादीनांप्रतिग्रहेषु दोषविशेषानाह हिरण्यमिति । ओषतोदहतः । दाहश्चात्र रोगः ॥१८९॥

(६) रामचन्द्रः । हिरण्यं हिरण्यप्रतिग्रहः आयुर्हरति । च पुनः रत्नंआयुर्हरति भुवःगोश्च प्रतिग्रहः तनुं देहं उषतः दहतः । अश्वः अश्वप्रतिग्रहः चक्षुर्हरति । वासः वस्त्रप्रतिग्रहः त्वचंहरति । घृतंघृतप्रतिग्रहः तेजःहरति । तिलप्रतिग्रहः प्रजांहरति ॥ १८९ ॥

अतपास्त्वनधीयानः प्रतिग्रहरुचिर्द्विजः ॥ अम्भस्यश्मप्लवेनेव सह तेनैव मज्जति ॥ १९० ॥

(१) **मेधातिथिः** । यस्य तपोनास्त्यनधीयानोनचाधीते । अध्ययनेन प्रकृता विद्वत्ता लक्ष्यते । समुदितेचैते विद्यातपसीप्रतिग्रहाधिकारनिमित्तम् । उभयगुणभ्रष्टःप्रतिग्रहेचाभिलाषी सतेन सह मज्जत्यधोगच्छति । केनसह अन्यस्यानिर्देशाद्दातुश्च संनिधानानेन सहेतिगम्यते । प्रतिग्रहीतारंप्लवमिवात्मोत्तारणायाश्रयते । यस्त्वीदृशोऽपात्रभूतःस दातारमात्मानमुभावप्यधोनयति यथाऽम्भस्यश्मप्लवोऽश्मप्लवः । पारंतरतियेन सप्लवोनावादिः । तत्रयथाश्मन्यारूढोनदीतरणार्थमम्भसि मज्जत्यश्मप्लवेनसहदाता हि ब्राह्मणायददावनक्षरश्चतादृशो ब्राह्मणउभावपिनरकंगच्छतः ॥ १९० ॥

(२) **सर्वज्ञनारायणः** । अनधीयानोपि अतिशयिततया न मज्जतीत्येतदर्थमतपस्वीति । प्लवोभेदः तेनदात्रासह मज्जति । दातुरपि तादृक्फलाभावान्मज्जनोक्तिः ॥ १९० ॥

(३) **कुल्लूकः** । यस्तपोविद्याशून्यःप्रतिग्रहेच्छुःब्राह्मणोभवति सप्रतिग्रहाधिकाराभावाद्बुद्धिस्थेन तेनइतिपरामृष्टेनैव दात्रैवानर्हप्रतिग्रहादानपापयुक्तेन सह नरके मज्जति यथा पाषाणमयेनोडुपेनाम्भस्तरंस्तेनैव सहाम्भसि मग्नोभवति ॥ १९० ॥

(४) **राघवानन्दः** । किंच अतपाइतिद्वाभ्यां । अश्मप्लवेन पाषाणनावा । सह तेन दात्रा ॥ १९० ॥

(५) **नन्दनः** । न केवलमविद्वान्प्रतिगृह्णन्नात्मानमेव पातयति किंतु दातारमपीत्याह अतपास्त्विति । अनधीयानोऽविद्वानतपाश्च सन्नम्भस्यश्मप्लवेनेव तेन दात्रा सहैव मज्जति । यथा जले स्वयमेव मज्जन्नश्मा स्वाश्रितमप्यधोनयति एवंस्वयमेव नरके पतन्नविद्वान्स्वाश्रितंदातारमप्यधोनयतीत्यभिप्रायः । अतपाइतिविशेषणात्सतपसोदोषमात्रत्वंगम्यते ॥ १९० ॥

(६) **रामचन्द्रः** । अतपस्वी तपोरहितः । अनधीयानः मूर्खः । एतादृशः प्रतिग्रहरुचिर्द्विजः यथा अम्भसि अश्मप्लवेन तरति कश्चित्समज्जति तथा तेन दात्रा सह प्रतिग्रहीता द्विजःमज्जति ॥ १९० ॥

तस्मादविद्वान्बिभियाद्यस्मात्तस्मात्प्रतिग्रहात् ॥ स्वल्पकेनाप्यविद्वान्हि पङ्के गौरिव सीदति ॥ १९१ ॥

(२) **सर्वज्ञनारायणः** । यस्मात्तस्माद्धिरण्यादिव्यतिरिक्तप्रतिग्रहादपि ॥ १९१ ॥

(३) **कुल्लूकः** । यस्मादसावल्पद्रव्यप्रतिग्रहेणापि मूर्खः पङ्के गौरिव नरकेऽसमर्थोभवति तस्माद्यतःकुतश्चित्सुवर्णादिव्यतिरिक्तसीसकायसारप्रतिग्रहादपि त्रस्येत् ॥ १९१ ॥

(४) **राघवानन्दः** । अतोऽविद्वान्प्रतिग्रहीता बिभियात् अल्पकेन हिरण्याद्यन्यतमेन सीदत्येव । अविद्वन्निषेधाभ्यासोनिन्दातात्पर्यकःनविद्वत्प्रतिग्रहतात्पर्यकः प्रतिग्रहसमर्थोपीत्यत्र तन्निषेधोक्तेः ॥ १९१ ॥

(५) **नन्दनः** । उपसंहरति तस्मादिति । न केवलमश्वादिप्रतिग्रहादविद्वान्बिभीयात् किंतु यस्मात्कस्मात्प्रतिग्रहादपि बिभीयात् ॥ १९१ ॥

(६) **रामचन्द्रः** । तस्मात् विद्वान् बिभीयात् स्वल्पकेनापि प्रतिग्रहेण । अविद्वांस्तु सीदति ॥ १९१ ॥

न वार्यपि प्रयच्छेत्तु बैडालव्रतिके द्विजे ॥ न बकव्रतिके विप्रे नावेदविदि धर्मवित् ॥ १९२ ॥

(१) **मेधातिथिः** । प्रतिग्रहीतुर्धर्मउक्तः । इदानींदातुरुच्यते । अपिशब्दात्सर्वंदेयंनिवार्यते । यत्र वारि न कस्मैचिद्दीयते तदपि नैभ्योदातव्यंकुतोन्यद्द्रव्यंदीयते । अतिशयोक्त्या द्रव्यान्तरदाननिषेधोऽयम् । वारिणस्तुसर्वार्थत्वाद-

निषेधः। ननु च बैडालव्रतिकान्वाङ्मात्रेणापि नार्चयेदित्युक्तमेव। सत्यम् तत्रार्चा निषिद्धा इहतु दानंतच्च धनस्य नान्यस्य। एवंहिःप्रतिषेधोऽर्थवान्भवति। तथाचोत्तरत्र वक्ष्यति विधिनाप्यर्जितंधनमिति। अतःपाखण्ड्यादिभ्यः सावन्नमन्नदानंतन्निषिध्यते। अत्र कश्चिदाह यद्यवेदविदीतिश्रुतंतथाप्यनधीयानइत्यपि द्रष्टव्यम् तथाहिकेवलवेदाध्यायिभ्योदानमुक्तम्। नच दाम्भिकेभ्यःकाम्ययुक्तम्। सइदंप्रष्टव्यःपुनर्वेदाध्यायिमात्राय विचारहिताय दानमुक्तम् श्रोत्रियायैव देयानीतिचेत्तर्ह्यर्हत्तमायेत्यप्रामिकत्वादत्रविद्यया विना वाक्यान्तराणि चविदुषे दक्षिणेत्यादीन्येकप्रकारगतानि सन्त्येव। अतस्तत्पर्यालोचनयोभयविशेषणचेष्टया देयमितिगम्यते। अतः श्रौत्रार्थपरित्यागे न किंचित्कारणंपश्यामोयस्य तु साम्यमयुक्तमिति। वचनगम्येऽर्थे का नामायुक्तता। बिडालव्रतेन चरति बैडालव्रतिकः। बकानांव्रतंतदस्यास्तीति बकव्रतिकः। अधिकरणविवक्षायांसप्तमी। संप्रदानविवक्षायांचतुर्थी युक्ता॥ १९२॥

(२) **सर्वज्ञनारायणः**। वार्यपि प्रतिग्रहरूपेण न देयम्। करुणयातु देयमित्यर्थः॥ १९२॥

(३) **कुल्लूकः**। प्रतिग्रहीतुर्धर्ममभिधायाऽधुना दातुराह नवार्यपीति। वायसादिभ्योयद्दीयते तदपि बैडालव्रतिकेभ्योधर्मज्ञोन दद्यादित्यतिशयोक्त्या द्रव्यान्तरदानंनिषिध्यते नतु वारिदानमेव पाषण्डिनोविकर्मस्थानित्यनेन बैडालव्रतिकायाऽतिथित्वेन सत्कृतार्थदानादि निषिद्धम्। इहतु धनदानंनिषिद्ध्यते। अतएव विधिनाप्यर्जितंधनमितिवक्ष्यति। नावेदविदीति वेदार्थानभिज्ञे एतच्च विद्वत्संभवे नावेदविदीतिनिषिध्यते॥ १९२॥

(४) **राघवानन्दः**। निन्दार्थवादसहितंदानपात्रंनिन्दति नवार्यपीतिनवभिः। अवेदविदि वेदानभिज्ञे॥ १९२॥

(५) **नन्दनः**। दातृप्रतिग्रहीतृप्रसङ्गाद्दातारमित्याह नेति। बैडालबकवृत्तिकौवक्ष्यति। धर्मवित्प्रतिषेधशास्त्रज्ञः॥ १९२॥

(६) **रामचन्द्रः**। वार्यपि जलमपि अवेदविदि॥ १९२॥

त्रिष्वप्येतेषु दत्तंहि विधिनाप्यर्जितं धनम्॥ दातुर्भवत्यनर्थाय परत्राऽदातुरेव च॥ १९३॥

(१) **मेधातिथिः**। धनग्रहणादन्नदानंन निषिध्यतइत्युक्तम्भवति। विधिनाप्यर्जितंसत्प्रतिग्रहक्रयादिना शास्त्राभ्यनुज्ञातेन प्रकारेण दातुरादातुश्च तादृशंदानंपरत्रोभयोरनर्थाय॥ १९३॥

(२) **सर्वज्ञनारायणः**। अनर्थाय। दोषाय॥ १९३॥

(३) **कुल्लूकः**। एतेषु त्रिष्वपि बैडालव्रतिकादिषु न्यायार्जितमपि धनंदत्तंदातुःप्रतिग्रहीतुश्च परलोके नरकहेतुत्वादनर्थाय भवति॥ १९३॥

(४) **राघवानन्दः**। त्रिषु बैडालव्रतिकादिषु। विधिनोपार्जितं न्यायोपार्जितमपि अनर्थाय नरकाय॥ १९३॥

(५) **नन्दनः**। न केवलमेतेभ्योदानेन दृष्टे धनहानिरदृष्टे फलहानिश्च भवतः किंतु प्रतिषिद्धाचरणात् पापमप्यस्तीति व्यक्तमुक्तमनर्थायेति। आदातुः प्रतिग्रहीतुः॥ १९३॥

(६) **रामचन्द्रः**। एतेषु त्रिषु बैडालवृत्तिबकवृत्त्यवेदवित्सु दत्तं दातुः आदातुः उभयोः अनर्थाय भवति॥ १९३॥

यथा प्लवेनौपलेन निमज्जत्युदके तरन्॥ तथा निमज्जतोधस्तादज्ञौ दातृप्रतीच्छकौ॥ १९४॥

(१) **मेधातिथिः**। औपलआश्मनः। जलसंतरणाय नावादिः प्लवस्तेन यस्तरति तरितुंप्रवर्तते। सोऽधस्ताज्जलस्य मज्जत्यन्तर्धीयते। एवमज्ञौ दातृप्रतीच्छकौ। प्रतीच्छकः प्रतीच्छांकरोतीति णिचंकृत्वा ण्वुल्कर्तव्यः। प्रतीप्सकइतिपाठान्तरम्। तत्र संप्रन्तादाप्नोतेर्ण्वुल्। अर्थस्तूभयोरेकएव॥ १९४॥

(२) **सर्वज्ञनारायणः** । दातुरज्ञत्वं पात्राज्ञानात् दानफलाज्ञानाच्च ॥ १९४ ॥

(३) **कुल्लूकः** । यथा पाषाणमयेनोडुपादिना जले तरस्तेनैव सहाधोगच्छत्येवंदानप्रतिग्रहशास्त्रानभिज्ञौ दातृग्राहकौ नरकंगच्छतः । अतपास्त्वनधीयानइतिप्रतिग्रहीतृप्राधान्येन निन्दोक्ता । इहतु दातृप्राधान्येनेत्यपुनरुक्तिः ॥ १९४ ॥

(४) **राघवानन्दः** । औपलेनाश्मनिर्मितेन । प्रतीच्छकोधनंप्रति लुब्धोग्रहीता ॥ १९४ ॥

(५) **नन्दनः** । उक्तेऽर्थे दृष्टान्तंप्रपञ्चयति यथेति । अज्ञौअपात्रदानेदोषमविदुषः प्रतिग्रहदोषंचाजानन्तौ । प्रतीच्छकः प्रतिग्राहकः ॥ १९४ ॥

(६) **रामचन्द्रः** । यथा औपलेन प्लवेन पाषाणप्लवेन उदके तरन् निमज्जति तथा अज्ञौ । दातृप्रतीच्छकौ दातृग्रहीतारौ अधस्तान्निमज्जतः ॥ १९४ ॥

धर्मध्वजी सदालुब्धश्छाद्मिकोलोकदम्भकः ॥ बैडालव्रतिकोज्ञेयोहिंस्रः सर्वाभिसन्धकः ॥ १९५ ॥

[यस्य धर्मध्वजोनित्यंसुरध्वजइवोच्छ्रितः । प्रच्छन्नानि च पापानि बैडालंनाम तद्व्रतम् ॥ १* ॥]

(१) **मेधातिथिः** । उपचारेणैतौ शब्दौ प्रयुज्येते । अनेकस्मिंश्चोपचारहेतौ सएवसंभवति । यन्निमित्तंप्रयोगस्तदवधारणप्रतिषेधविषयप्रकृत्यर्थम् । धर्मोध्वजमिवव्याघ्रादेराकृतिगणत्वात्समासः । कदाचित्कर्मधारयः सर्वधनाद्यर्थइति । ततःसोऽस्यास्तीति मत्वर्थीयः । ख्यात्यर्थमेव धर्मंकरोति न शास्त्रपरतया सएवमुच्यते । यस्तत्रैव धर्मंकरोति यत्र जनाः पश्यन्ति स्वपुरुषैश्च ख्यापयन्ति धार्मिकत्वप्रसिद्ध्याप्रतिग्रहादिलप्स्यइति लुब्धोमत्सरीकृपणश्च । लोकंदम्भोतिवञ्चयति लोकदम्भकः । छद्मना चरति छाद्मिकः । छद्म व्याजः । प्रकाशधार्मिकोरहसिनिक्षिप्तमपहरत्यप्रकाश्यंप्रकाशयति । धार्मिकोऽयमेतस्ययत्समक्षंकथितंनान्यत्र यातीति । केन चिद्विश्वस्य कथितंदृश्यते यावद्यतएव गोप्यंतस्यैवमुखाज्जातमितिपरद्रोहः । सर्वेषांचाभिसंधानाक्षेपकःपरगुणान्न सहते । ईदृशोबैडालव्रतिकोज्ञेयः । अभिसंधकःअभिसंधत्तइति । आतश्चोपसर्गइतिकः । ततःस्वार्थे कः । सर्वेषामभिसंधकइतिषष्ठीसमासः । केचिदत्रश्लोकंपठन्ति । यस्यधर्मध्वजोनित्यंसुरध्वजइवोच्छ्रितः । प्रच्छन्नानि च पापानि बैडालंनाम तद्व्रतमिति ॥ एषएवार्थः संक्षेपेण कथ्यते । एकैकगुणसंबन्धेबैडालव्रतिकोज्ञेयः । अस्मादेवश्लोकादेवमनुमीयते प्रच्छन्नानि च पापानीतिविशेषाश्रवणात्सर्वेषांचैषांपापत्वादुभयथाचार्येण शिष्याःपाठिताः । केचिदिमंश्लोकमध्यापिताःकेचित्पूर्वम् । उभयंच प्रमाणम् । तेन यद्यपिअङ्गदी कुण्डली पीनस्कन्धःपृथुवक्षादेवदत्तइतिसमुदितानांलक्षणत्वंप्रतीयते तथापीह प्रत्येकमेतानिलक्षणानि ॥ १९५ ॥

(२) **सर्वज्ञनारायणः** । धर्मध्वजी धर्मप्रकाशनशीलः । सदाअतिधनत्वेपि लुब्धः । लोकानांदम्भकोहिंस्रोधनग्रहणेन हिंस्रोवधादिर्हिंसारतिः । सर्वाभिसंधकः सर्वेषु पित्रादिष्वपि स्वोपकाराभिसंधिनैवोपकर्ता ॥ १९५ ॥

(३) **कुल्लूकः** । योबहुजनसमक्षंधर्ममाचरन् स्वतःपरतश्च लोके ख्यापयति तस्य धर्मोध्वजचिन्हमिवेतिधर्मध्वजी । लुब्धः परधनाभिलाषुकः । छद्मना व्याजेन चलतीति छाद्मिकः । लोकदम्भकोनिक्षेपापहारादिना जनवञ्चकः । हिंस्रःपरहिंसाशीलः । सर्वाभिसन्धकः परगुणासहनतया सर्वाक्षेपकः । बिडालव्रतेन चरतीतिबैडालव्रतिकः बिडालोहि प्रायेण मूषिकादिर्हिंसारुचितया ध्याननिष्ठइव विनीतः सन्नवतिष्ठतइत्युपचाराद्बिडालव्रतशब्दः ॥ १९५ ॥

(४) **राघवानन्दः** । तत्र द्वाभ्यामुक्तबैडालबकव्रतिनोर्लक्षणमाह धर्मेति । धर्मध्वजी बहुजनेषु धर्मएव ध्वजवत्प्र-

* (ट, ड, ढ, त)

काश्यतया यस्यसः । छाद्मिकः सर्वत्र छद्मना व्यवहरति सर्वाभिसन्धकः परगुणासहनतया सर्वाक्षेपकः ॥ १९५ ॥

(५) **नन्दनः** । बैडालवृत्तिकमाह धर्मेति । धर्मध्वजीधर्मलिङ्गधारी । छाद्मिको व्याजवृत्तिः । दाम्भिकोविशिष्टवेषेण स्वदोषतिरस्कारी । अभिसन्धको वञ्चकः ॥ १९५ ॥

(६) **रामचन्द्रः** । धर्मध्वजी धर्मस्थापकः पुरुषेभ्यः ख्यापयन् । छद्मिकः कृतव्याजःप्रकाशंधार्मिकः रहसि निक्षिप्तमपिअपहरति । लुब्धः कृपणः प्रसिद्धः । प्रतिग्रहादिलभ्यइत्येतादृशोबैडालव्रतिकसंज्ञः । हिंस्रः हिंसारुचिः । सर्वाभिसन्धिकः परगुणासहनतया सर्वेषु निन्दाकरः ॥ १९५ ॥

अधोदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः ॥ शठोमिथ्याविनीतश्च बकव्रतचरोद्विजः ॥ १९६ ॥

(१) **मेधातिथिः** । बकव्रतलक्षणमधोनिरीक्षणम् अथवा नीचदृष्टिः नीचोदीनःसर्वदैवव्यापारयतिकथंचित्कुतश्चन लभतेऽधमादपि गृह्णाति । निष्कृतिर्निष्ठुरता तया चरति तत्प्रधानोनैष्कृतिकोऽसम्यग्भाषी । अलीकविनीतःश्रयतिप्रश्रयंनम्रतांकार्ये तु व्याघातकःबिडालोऽलीकनिद्रांकरोत्यामिषंलिप्सन् । एवंसोपाधेर्धर्मचरणेबैडालव्रतिकउक्तः । तथैव बकव्रतचरोपि । बकाहिमत्स्यान्गृण्हन्तोजलचरेष्ववज्ञांदर्शयन्ति । अथचमत्स्यग्रहणबुद्धयएव । व्रतानि शीलितंकर्मोच्यते । प्रदर्शितंपदानामपौनरुक्तम् । अथापि स्याल्लक्षणत्वाददोषः । अविज्ञातंहि लक्षणंभवति । पौनःपुन्याभिधानेनसुग्रहोऽर्थोभवति । कःपुनः । बैडालव्रतिकबकव्रतिकयोर्भेदः । उच्यते । अयंस्वार्थसाधनपरोनान्यस्यकार्यंविहन्ति पूर्वस्तुमात्सर्यात्स्वार्थसिद्धावसत्यामपि परस्य नाशयति ॥ १९६ ॥

(२) **सर्वज्ञनारायणः** । अधोदृष्टिरुपरोधभयान्मुखानिरीक्षकः । नैकृतिकश्छद्मवृत्तिः । शठोवक्रमतिः । मिथ्याविनीतोवाचादेहे नचविनयंकुर्वन् मनसाविपरीतः । बकव्रतधरोबकवृत्तिः ॥ १९६ ॥

(३) **कुल्लूकः** । अधोदृष्टिर्निजविनयख्यापनाय सततमधएव निरीक्षते । निष्कृतिर्निष्ठुरता तया चरतीतिनैष्कृतिकःस्वार्थसाधनतत्परःपदार्थखण्डनेन । शठोवक्रः मिथ्याविनीतः कपटविनयवान् । बकव्रतंचरतीतिबकव्रतचरः । बकोहि प्रायेण मीनहननरुचितया मिथ्याविनीतः सन्नेवंशीलोभवतीतिगौणोबकव्रतशब्दः ॥ १९६ ॥

(४) **राघवानन्दः** । निजविनयख्यापनाय सततमधोदृष्टिःनिकृत्या । निष्ठुरतया चरति नैकृतिकःनिष्ठुरोनिराकृतिः । शठोवञ्चकः । मिथ्याविनीतः । धनाद्यर्थंमिथ्याविनयी ॥ १९६ ॥

(५) **नन्दनः** । अधोदृष्टिः परलोकानवेक्षकः । वैकृतिकोगूढैरुपायैः परानर्थकारी । शठोनृशंसः ॥ १९६ ॥

(६) **रामचन्द्रः** । अधोदृष्टिः उपरोधभयान्मुखानिरीक्षकः । नैकृतिकः छद्मवृत्तिः । स्वार्थसाधनतत्परः स्वकार्यसाधकः । शठः वक्रमतिः ॥ १९६ ॥

ये बकव्रतिनोविप्राये च मार्जारलिङ्गिनः ॥ तेपतन्त्यन्धतामिस्रे तेन पापेन कर्मणा ॥ १९७ ॥

(१) **मेधातिथिः** । स्वशब्दैश्च व्याख्यातःश्लोकः ॥ १९७ ॥

(२) **सर्वज्ञनारायणः** । येविप्राइति विप्राणांहिंसाछद्मप्रधानतयैतद्विधमतिर्दुष्टेत्यर्थः ॥ १९७ ॥

(३) **कुल्लूकः** । ये बकव्रतंबिडालव्रतंचरन्ति ते ब्राह्मणास्तेन पापहेतुना कर्मणाअन्धतामिस्रनाम्नि नरकेपतन्ति ॥ १९७ ॥

---

* नैष्कृतिकः=नैकृतिकः (अ)

(४) राघवानन्दः । तेन बकादिवृत्त्या पापकर्मणा ॥ १९७ ॥

(५) नन्दनः । अन्धतामिस्रेऽन्धतामिस्राख्ये नरके ॥ १९७ ॥

न धर्मस्यापदेशेन पापं कृत्वा व्रतं चरेत् ॥ व्रतेन पापं प्रच्छाद्य कुर्वन्स्त्रीशूद्रदम्भनम् ॥ १९८ ॥

(१) मेधातिथिः । पापंकृत्वाव्रतं प्रायश्चित्तंन कुर्यात् । धर्मस्यापदेशेन धर्ममपदिश्यलोके ख्यापयति धर्मार्थमहंव्रतं-करोमि न मे प्रायश्चित्तनिमित्तमस्तीति परमार्थतस्तु प्रायश्चितार्थमेव करोति एवंन कर्तव्यम् । पापंप्रच्छाद्यापन्हुत्य तेनव्र तेन स्त्रीशूद्रदम्भनंन कुर्यात् । प्रकटंप्रायश्चित्तंकर्तव्यमन्यत्ररहस्यात् ॥ १९८ ॥

(२) सर्वज्ञनारायणः । धर्मध्वजित्वं केवलमपि दुष्टमित्याह नधर्मस्येति । अपदेशेन धर्मंसाधयितुमेतत्करोमीति व्यपदेशेन व्रतंचान्द्रायणादिप्रायश्चित्तं न चरेत् । पापंकृतंप्रच्छाद्य निन्हुतंकृत्वातदपगमार्थंकुर्वन्नपि । व्रतेन स्त्रीशूद्र-म्भनं स्त्रीशूद्राद्यज्ञानाद्दम्भनं विप्रलम्भनं कुर्वन् ॥ १९८ ॥

(३) कुल्लूकः । पापंकृत्वा प्रायश्चित्तरूपंप्राजापत्यादिव्रतंपापमपनयति तन्नेदंप्रायश्चित्तं किंतु धर्मार्थमहमनुति-ष्ठामीति स्त्रीशूद्रमूर्खादिजनमोहनंकुर्वन्नानुतिष्ठेत् ॥ १९८ ॥

(४) राघवानन्दः । पापनुत्यै व्रतमनुतिष्ठतोधर्मंकरोमीति ख्यापनशीलस्य न शुद्धिःकिंतुदम्भमात्रमित्याह नधर्म-स्येति । स्त्रीशूद्रदम्भनं स्त्रीशूद्रौदम्भयतिदम्भेन व्यामोहयतीति ॥ १९८ ॥

(५) नन्दनः । धर्मध्वजित्वादीनांवृत्तान्तमाह नेति । पापंकृत्वा तत्प्रायश्चित्तरूपंव्रतंधर्मव्याजेन न कुर्यात् । पापं-प्रच्छाद्य व्रतेन स्त्रीशूद्रदम्भनंकुर्वन् । स्त्रीशूद्रग्रहणमविद्वदुपलक्षणम् । दम्भनंवञ्चनम् ॥ १९८ ॥

(६) रामचन्द्रः । धर्मस्य अपदेशेन व्याजेन व्रतंन चरेत । स्त्रीशूद्रदम्भनं स्त्रीशूद्रयोर्वंचनं कुर्वन् ॥ १९८ ॥

प्रेत्येह चेदृशाविप्रागर्ह्यन्ते ब्रह्मवादिभिः ॥ छद्मनाचरितं यच्च व्रतं रक्षांसि गच्छति ॥ १९९ ॥

(१) मेधातिथिः । इह पदार्थस्वाभाव्येनान्योद्देशेनापि कृतंयत्फलंततोभवत्येव । तथाहि गुरुनियोगे प्रवृत्तोध-र्मोद्देशेन गुरुवचनंकरोमीति नकामहेतोः । अर्थ स्वाभाव्यात्तु कर्मप्रतिजनयति । एवंकश्चिन्मन्यते व्रतानि पापापनो-दार्थानि तानिपरोद्देशेनापि क्रियमाणानि न स्वभावंजहति एवमेतन्ममप्रायश्चित्तमुभयार्थंभविष्यतिलोकेतपस्वीति-ख्यातोभविष्यामिपापंचापनोत्स्यते । तस्यैवंबुद्धिमतोनिवृत्त्यर्थमिदमारभ्यते । तदेतद्व्रतंछद्मनाचरितमनुष्ठितंरक्षांसि गच्छ-तिनिष्फलंभवति न पापमपनुदतीत्यर्थः । न केवलंकार्याकरणंभवति यावदीदृशोविप्रव्रतचारिणोगर्ह्यन्ते निन्द्यन्ते ब्रह्मवा-दिभिःवेदप्रमाणज्ञैःशिष्टैः ॥ १९९ ॥

(२) सर्वज्ञनारायणः । प्रेत्य पारलौकिककर्मणि । इहैव लौकिककर्मणि । तच्च व्रतंधर्मध्वजिनाम् ॥ १९९ ॥

(३) कुल्लूकः । प्रेत्येहइतिश्लोकद्वयम् । प्रथमंसुबोधम् ॥ १९९ ॥

(४) राघवानन्दः । किंचैतादृशाअतीव पापिष्ठाइत्याह प्रेत्येति । तत्फलंरक्षोगामीति भावः ॥ १९९ ॥

(५) नन्दनः । अत्र कारणमाह । प्रेत्येति ॥ १९९ ॥

(६) रामचन्द्रः । ईदृशा विप्रा गर्ह्यन्ते । छद्मना चारितंव्रतंरक्षांसि प्रतिगच्छति निष्फलं भवति ॥ १९९ ॥

अलिङ्गी लिङ्गिवेषेण योवृत्तिमुपजीवति ॥ सलिङ्गिनांहरत्येनस्तिर्यग्योनौ च जायते ॥२००॥

(१) मेधातिथिः । प्रत्याश्रमंलिङ्गधारणंयथाब्रह्मचारिणोमेखलादिधारणं गृहस्थस्य वैणवदण्डकुण्डलकमण्डल्वादि

वानप्रस्थस्य चर्मचीरजटादि परिव्राजकस्य कषायवसनदण्डादि। एतेन वेषेणानाश्रमी योभिक्षाहेतोर्लोके चरति-वृत्तिमुपजीवतिसलिङ्गिनामेनःपापंहरति। तिर्यग्योनौ तिरश्चांश्वशृगालादीनांयोनौ जायते । नचात्रैतद्राशङ्कनीयंलिङ्गिनां-यत्पापंततेभ्योऽपसृत्य तस्मिन्संचरतीत्यसंभाव्यम् । अकर्तव्यतापरंलिङ्गाधारणात्प्रतीयते। अश्रुतेऽपि प्रतिषेधे निन्दा-र्थवादादेव तदवगतिः ॥ २०० ॥

(२) **सर्वज्ञनारायणः** । अलिङ्गी तत्तदीक्षितस्नातकादिलिङ्गानर्हः । वृत्तिंप्रतिग्रहादिना धनोत्पत्तिम् ॥ २०० ॥

(३) **कुल्लूकः** । अब्रह्मचारी योब्राह्मणोब्रह्मचर्यादिलिङ्गंमेखलाजिनदण्डादिवेषोपलक्षितस्तद्वृत्त्या भिक्षाभ्रमणादि-ना जीवति सब्रह्मचार्यादीनांयत्पापंतदात्मन्याहरति कुकुरादितिर्यग्योनौचोत्पद्यते । तस्मादेतन्न कर्तव्यमितिनिषेधः कल्प्यते ॥ २०० ॥

(४) **राघवान्दः** । किंचस्वयमलिङ्गीलिङ्गिनांसन्यास्यादीनाम् ॥ २०० ॥

(६) **रामचन्द्रः** । यःअलिङ्गीअनाश्रमी भूत्वा लिङ्गिवेषेणआश्रमिवेषेण वृत्तिंउपजीवतिसः लिङ्गिनां आश्रमिणां एनः पापं हरति आनृण्यंतर्पयति स्वयंतिर्यग्योनौ शृगालयोनौ । प्रजायते ॥ २०० ॥

परकीयनिपानेषु न स्नायाच्च कदाचन ॥ निपानकर्त्तुःस्नात्वा तु दुष्कृतांशेन लिप्यते ॥ २०१ ॥

[सप्तोद्धृत्य ततः पिण्डान्कामंस्नायाच्च पञ्चवा ॥ उदपानात्स्वयंग्राहाद्बहिः स्नात्वा न दुष्यति ॥ १ ॥×]

(१) **मेधातिथिः** । निपिबंत्यस्मिन्नतोवेतिनिपानंजलाशयः । सच वापीकूपतडागादि तस्मिन्परकीये परेणयदा-त्मार्थंकृतंसर्वार्थेनोत्सृष्टंतत्र न कदाचित्स्नायात् । नित्यंचण्डालादिस्पर्शने च नैमित्तिकधर्मस्वेदापनोदार्थंचसर्वंस्नानंप्रतिषि-ध्यते। अत्रव्यतिक्रमे दोषमाह। निपानस्य यः कर्ता तस्य यत्किंचिद्दुष्कृतंतस्य केनचिदंशेन लिप्यते संबध्यते। नि-न्दार्थवादोऽयंप्रतिषेधः ॥ २०१ ॥

(२) **सर्वज्ञनारायणः** । जलंनिपीयते येषु निपानेषु पुष्करिण्यादिषु परकीयेषु परेण खातेषु सर्वार्थमनुत्सृष्टेषु । अंशेन चतुर्थेन ॥ २०१ ॥

(३) **कुल्लूकः** । निपानंजलाधारःपरकृतपुष्करिण्यादिषु न कदाचित्स्नायात्तत्रस्नात्वा पुष्करिण्यादिकर्तुर्यत्पापं-तस्यांशेन वक्ष्यमाणचतुर्थभागरूपेणसंबध्यते अकृत्रिमनद्याद्यसंभवे परकृतेऽपि पुष्करिण्यादौ प्राक्प्रदानात्पञ्चपिण्डा-नुद्धृत्य स्नातव्यम् । तदाह याज्ञवल्क्यः । पञ्चपिण्डाननुद्धृत्य न स्नायात्परवारिषु । उद्धृत्य चतुरः पिण्डान्पारक्ये स्नान-माचरेत् ॥ स्नात्वा च तर्पयेद्देवान्पितॄंश्चैव विशेषतः ॥ २०१ ॥

(४) **रघवानन्दः** । तत्र । नित्यंनैमित्तिकंकाम्यंक्रियाङ्गंमलकर्षणम् । क्रियास्नानंतथा षष्ठंषोढास्नानंप्रकीर्तितम् ॥ अस्नातःपुनरानर्होजप्याग्न्यहवनादिषु । प्रातःस्नानंतदर्थंतु नित्यस्नानंप्रकीर्तितम् ॥ नित्यस्नानंग्रहवैगुण्यशमं । का-म्यंदेवतार्चाद्यर्थं । क्रियाङ्गंअपूर्वनद्यादिषु स्नानंक्रियास्नानं । तत्रापि ॥ तीर्थं प्राप्यानुमार्गेण स्नानंतीर्थेसमाचरेत् । -स्नानजंफलमाप्नोति तीर्थयात्राफलंन चेति शङ्खोक्तेः ॥ स्नानाधिकरणविधिनिषेधावाहपरेतित्रिभिः । परकीयत्वंतत्कृति साध्यत्वे सति तदनुत्सृष्टत्वंकूपतडागादिष्वदत्तेषुअदत्तानीत्युत्तरलिङ्गात् । अंशेन चतुर्थांशेन तुरीयभागितिवक्ष्यमाणत्वात् ।

× (क, ख, च, ड, ढ, ळ, र.)

पञ्चपिण्डाननुद्धृत्य न स्नायात्परवारिणीति ॥ वाचनिकंसर्वसत्वोद्देशेनोत्सृष्टत्वात् । अतएवाह । यदात्मार्थंकृतंसर्वार्थंनोत्सृष्टमितिमेधातिथिः ॥ २०१ ॥

(५) नन्दनः । अत्रांशशब्दश्चतुर्थभागवचनः उत्तरत्र तुरीयग्रहणात् ॥ २०१ ॥

(६) रामचन्द्रः । स्नानविधिमाह परकीयेति । परकीयनिपानेषु कदाचन न स्नायात् । स्नात्वा निपानकर्तुःदुष्कृतांशेन लिप्यते । कूपसमीपंनिबद्धंपशुपानाय निपानसंज्ञम् ॥ २०१ ॥

यानशय्यासनान्यस्य कूपोद्यानगृहाणि च ॥ अदत्तान्युपभुञ्जानएनसःस्यात्तुरीयभाक् ॥२०२॥

(१) मेधातिथिः । यानादीनिपरकीयान्यदत्तान्युपयुञ्जानएनसस्तदीयस्य तुरीयभाक्चतुर्थभागंप्राप्नुयात् । अत्रकश्चिदाह । अदत्तानीतिवचनात्सर्वार्थतयाप्यपकल्पितानि नोपयोज्यानितदयुक्तं । परकीयाधिकारात् । नच तानि परकीयानि । त्यक्तंहि तत्सम्यक् । तुरीयग्रहणमविवक्षितमितिप्रागेवव्याख्यातम् ॥ २०२ ॥

(२) सर्वज्ञनारायणः । एवं परयानाद्युपभोगेपि दोषइत्याह यानशय्येति । अस्य परस्य ॥ २०२ ॥

(३) कुल्लूकः । अस्येतिप्रकृतः पुनः परामृश्यते । परस्य यानादीन्यदत्तान्युपयुञ्जानस्तदीयपापचतुर्थभागभागी भवति । अदत्तानीतिपरस्यानुमत्यभावश्च विवक्षितस्तेन सर्वार्थोत्सृष्टमठकूपादावुपयोगार्थान्मस्नानादौ न विरोधः ॥२०२॥

(४) राघवानन्दः । मनुरप्याह । पानेत्यादिअदत्तान्यनुत्सृष्टानीति स्वखातःसागरोपमइत्युक्तेःखातकृदुत्सृष्टे । विश्वस्याधिकारोवाचनिकः ॥ २०२ ॥

(५) नन्दनः । अस्य परस्य । तुरीयभाक्तुरीयांशभाक् ॥ २०२ ॥

(६) रामचन्द्रः । यानादीनि अदत्तानि भुञ्जानः । अस्य एतेषांप्रभोः एनसः । तुरीयभाक् चतुर्थांशभाक् स्यात् ॥ २०२ ॥

नदीषु देवखातेषु तडागेषु सरःसु च ॥ स्नानं समाचरेन्नित्यं गर्तप्रस्रवणेषु च ॥ २०३॥

(१) मेधातिथिः । सर्वानद्योदेवखाताअतस्तासामुभयथासंभवादेवखातग्रहणवाच्यत्वेन तल्लिङ्गंपठितव्यम् । तडागादीनि हि देवखातानि मनुष्यखातान्यपि सन्ति । नचदेवैःखन्यन्ते । केवलं महत्त्वं स्मर्यमाणकर्तृकत्वेन लक्ष्यते॥२०३॥

(२) सर्वज्ञनारायणः । देवखातेषु पुष्करादिषुतडागेषु । अन्येन खातेषु उत्सृष्टेषु गर्तेषु नद्यादिकृतन्हदेषु । प्रस्रवणेषु निर्झरेषु ॥ २०३ ॥

(३) कुल्लूकः । नद्यादिषु सर्वदा स्नानमाचरेत् । देवखातेष्वितितडागविशेषणम् । देवसंबन्धित्वेन प्रसिद्धेषु सरःसु गर्त्तेषु अष्टधनुःसहस्रेभ्योन्यूनगतिषु तदुक्तंछन्दोगपरिशिष्टे । धनुःसहस्राण्यष्टौ च गतिर्यासांन विद्यते । न तानदीशब्दवहागर्तास्ताः परिकीर्तिताः । चतुर्हस्तप्रमाणंधनुः । प्रस्रवणेषु निर्झरेषु चानेनैव परकीयनिपानव्यावृत्तिसिद्धौयत्पृथग्वचनंतदात्मीयोत्सृष्टतडागादिषु स्नानाद्यनुज्ञानार्थंतदपि नद्याद्यसंभवे द्रष्टव्यम् ॥ २०३ ॥

(४) राघवानन्दः । किंच देवखातेषु तत्कृतत्वेन प्रसिद्धेषु सरःसुसमंतात्समेषुतटाकेषुविन्ध्यादिगतेषु । अष्टधनुःसहस्रेभ्योन्यूनगतिषु । तदुक्तंछन्दोगपरिशिष्टे । धनुःसहस्राण्यष्टौतुगतिर्यासांनविद्यते । नतानदीशब्दवहागर्तास्ताःपरिकीर्तिताः धनुर्हस्तचतुष्टयम् । प्रस्रवणेषु निर्झरेषु अत्रपञ्चपिण्डानुद्धरणेऽप्यदोषः । अदत्तेअन्त्यजकृतेऽपि न दोषः । अन्त्यजेनकृते

कूपे सेतौ वाप्यादिके तथा । तत्र स्नात्वा च पीत्वा च प्रायश्चित्तंनविद्यते ॥ जानुदघ्नमदूष्यंस्यादधःस्थमशुचिस्मृतम् । एतेन परकीयवारिनिषेधोऽर्थवादइति मेधातिथिमतम् । यानादिपङ्कप्रासङ्गिकंजलाशये दर्शितत्वात् ॥ २०३ ॥

(५) नन्दनः । मनुष्यैरखातोजलाशयोदेवखातः । मनुष्यैः खातस्तडागः ऋषिसेवितंसरः । गतान्ह्रदः । प्रस्रवणं-निर्झरः ॥ २०३ ॥

यमान्सेवेत सततं न नित्यं नियमान्बुधः ॥ यमान्पतत्यकुर्वाणोनियमान्केवलान् भजन् ॥२०४॥

[आनृशस्यं क्षमा सत्यमहिंसा दममस्पृहा ॥ ध्यानं प्रसादोमाधुर्यमार्जवं च यमादश॥१॥*]

[अहिंसा सत्यवचनं ब्रह्मचर्यमकल्पता ॥ अस्तेयमितिपञ्चैते यमाश्चोपव्रतानि च ॥२॥ऽऽ]

[शौचमिज्या तपोदानं स्वाध्यायोपस्थनिग्रहौ॥ व्रतोपवासौ मौनं च स्नानं च नियमादशः॥३॥§]

[अक्रोधोगुरुशुश्रूषा शौचमाहारलाघवम् ॥ अप्रमादश्चनियमाः पञ्चैवोपव्रतानि च ॥४॥‡]

(१) मेधातिथिः । प्रतिषेधरूपायमाब्राह्मणोन हन्तव्यः सुरा न पेयेत्यादयः । अनुष्ठेयरूपानियमाः । वेदमेवजपे-न्नित्यमित्यादयः । न नित्यंनियमान् नाने न नियमानामसेवोच्यते किंतु यमानांनियमेभ्योनित्यत्वम् । तथाचाह यमान्पतत्यकुर्वाणः । ब्रह्महादिर्यमलोपे सति । पतितत्वात्सन्ध्योपासनादिभिर्नाधिक्रियते ननु तथा नियमलोपे । तथाच शिष्टस्मरणम् । पतति नियमवान्यमेष्वसक्तोन तुयमवान्नियमालसोऽवसीदेदिति । ननियमानसमीक्ष्यबुद्ध्यायम-बहुलेष्वतिसंदधीत बुद्धिमान् । येषामपि पारिभाषिकायमनियमाः॥ अहिंसासत्यवचनंब्रह्मचर्यमकल्कता । अस्तेयमपिपञ्चैते यमा श्चैवव्रतानिच ॥ अक्रोधोगुरुशुश्रूषाशौचमाचारलाघवम् । अप्रमादश्चनियमाः पञ्चैवोपव्रतानिच॥ तेषामपि गुरुलाघव-मनेन श्लोकेन प्रतिपाद्यते । अतोनानेन यमानां सेवोच्यते नापि नियमानामसेवा उभयेषांतैःशास्त्रैर्विहितत्वात् ॥ २०४ ॥

(२) सर्वज्ञनारायणः । यमान्नित्यकर्माणि । नियमान् कामनानियतानि काम्यकर्माणि नित्यंनसेवेतेति । किंतु कामनोदयएव । केवलान्कृत्स्नानपि भजन् । अहिंसासत्यास्तेयापरिग्रहेन्द्रियनिग्रहादयः शरीरमात्रापेक्षानियतकर्तव्या-यमाः । तपःस्वाध्यायादयोधिकसाधनापेक्षा नियमाअत्रेत्येके ॥ २०४ ॥

(३) कुल्लूकः । नियमापेक्षया यमानुष्ठानगौरवज्ञापनार्थमिदम् । नतु नियमनिषेधार्थं द्वयोरेव शास्त्रार्थत्वात् । यमनियमविवेकश्च मुनिभिरेव कृतः । तदाहयाज्ञवल्क्यः । ब्रह्मचर्यंदया क्षान्तिर्ध्यानंसत्यमकल्कता । अहिंसास्तेयमाधु-र्ये दमश्चेति यमाःस्मृताः ॥ स्नानंमौनोपवासेज्यास्वाध्यायोपस्थनिग्रहाः । नियमोगुरुशुश्रूषा शौचाक्रोधाप्रमादता ॥ यम-नियमस्वरूपज्ञःसमस्तस्नानादिनियमत्यागेनाप्यहिंसादिरूपंयममनुतिष्ठेत् । नियमाननुतिष्ठन्नपि यमानुष्ठानरहितःपतती-त्ययंयमस्तुत्यर्थआरंभइति मेधातिथिगोविन्दराजौ । हिंसादिप्रतिषेधार्थकायमाः । वेदमेव जपेन्नित्यमित्यादयोऽनुष्ठेयरूपा-नियमाइतिव्याचक्षते । अहिंसासत्यवचनंब्रह्मचर्यमकल्कता । अस्तेयमितिपञ्चैते यमावै परिकीर्त्तिताः । अक्रोधोगुरु-शुश्रूषा शौचमाहारलाघवम् । अप्रमादश्च सततंपञ्चैते नियमाःस्मृताः ॥ २०४ ॥

---

* (क, ख, ग, घ, च, ट, ठ, ड, ढ, ण, त, थ, ल, र.)

ऽऽ (ख, ड, ढ, त)

§ (क, ख, घ, च, ट, ठ, ड, ण, त, र, ल)

‡ (ख, ढ, ण, त.)

(४) **राघवानन्दः** । स्नातकस्यापि नित्यंयमस्यावश्यकत्वमाहयमानिति । अत्र ॥ ब्रह्मचर्यंदयाक्षान्तिर्ध्यानंसत्यमवक्रता । अहिंसास्तेयमाधुर्येदमश्चेतियमादश ॥ स्नानंमौनोपवासेज्यास्वाध्यायोपस्थनिग्रहाः । नियमोगुरुशुश्रूषा शौचाक्रोधाप्रमादितेति याज्ञवल्क्योक्तयमनियमग्रहइतिकेचित् । यःस्वशाखांपरित्यज्येति न्यायात् । अत्रैवोक्ताहिंसानिषेधकोपायसाध्या वेदमेत्रजपेन्नित्यमित्यादिरूपनियमाग्राह्याइति तु मेधातिथिगोविन्दराजमतम् । यमानांनित्यत्वे पततीत्येव हेतुः ॥ २०४ ॥

(५) **नन्दनः** । व्रतान्तरमाह यमानिति । अत्र व्यासः । अहिंसासत्यवचनंब्रह्मचर्यमकल्कता । अस्तेयमिति पञ्चैते यमाश्चैव व्रतानिच ॥ अक्रोधोगुरुशुश्रूषा शौचमाहारलाघवम् । अप्रमादश्चनियमाः पञ्चैवोपव्रतानिचेति ॥ उभयेषांयमेष्वादरः कर्तव्यइत्युक्तं ननित्यंनियमानबुधइति । उक्तमर्थमुपपादयत्युत्तरार्धेन । केवलान्यमहीनान् । पतति दोषयुक्तोभवतीतियावत् ॥ २०४ ॥

(६) **रामचन्द्रः** । यमान्नित्यकर्माणि सततंसेवेत अनुतिष्ठेत् ॥ २०४ ॥

[**रामचन्द्रः** । यमनियममाह चतुर्भिः । प्रसादःईश्वरप्रसन्नता (१)]

[व्रतंस्नातकव्रतादि । उपवासोमासोपवासादिः (३)]

नाश्रोत्रियतते यज्ञे ग्रामयाजिकृते तथा॥ स्त्रिया क्लीबेन च हुते भुञ्जीत ब्राह्मणः क्वचित्॥२०५॥

(१) **मेधातिथिः** । पूर्वेण श्लोकेन व्रताधिकारोविच्छिन्नः । इदानींप्रतिषेधप्रकरणमारभ्यते । तत्रभोजनमेव तावद्दर्शितत्वाद्यत्रकुत्रचित्प्राप्तंनिषिध्यते । अश्रोत्रियोऽनधीयानस्तेन तते प्रारब्धे यज्ञऋत्विग्भिर्वाऽश्रोत्रियैस्तते न भुञ्जीतब्राह्मणः ग्रामयाजीग्रामयाजकस्तेन यत्र हूयते यत्र च स्त्री होमंकरोति । छान्दोग्ये हि स्त्रीणांगृह्यस्मृतिकारैर्होमोऽत्रहोउक्तोऽतस्तंपश्यन्प्रतिषेधति । अथवा यत्र यज्ञेस्त्रीप्रधानंभर्तादारिद्र्यादिदोषैरुपहतः स्त्रीचासौदायिकेन धनेन ज्ञातिबलेन च दर्पितातत्रायंप्रतिषेधः । क्लीबोनपुंसकम् ॥ २०५ ॥

(२) **सर्वज्ञनारायणः** । अश्रोत्रियैर्धर्मतोऽनधीतवेदैर्ऋत्विग्भिस्तादृशा यजमानेन तते प्रारब्धे यज्ञे प्रक्रान्ते दर्शपूर्णमासादौसोमेवाग्नीषोमीयवपाहोमानन्तरमपि यज्ञनिमित्तभोजने न भुञ्जीत । ग्रामयाजीबहूनां क्रोशतामुपदेष्टा । स्त्रिया हुते हाविते स्त्रीमात्रयजमानकव्रतादिहोमे निमित्ते । एवंक्लीबेन हुतइत्यत्रापि । स्त्रिया शूद्रेणवेति क्वचित्पाठः ॥ २०५ ॥

(३) **कुल्लूकः** । अनधीतवेदेनोपक्रान्ते यज्ञेऽग्नीषोमीयादूर्ध्वमपि भोजनयोग्यसमये ब्राह्मणोन भुञ्जीत तथा बहूनांयाजकेनर्त्विजा स्त्रिया नपुंसकेन च यत्र यज्ञे हूयते तत्र कदाचिन्नभुञ्जीत ॥ २०५ ॥

(४) **राघवानन्दः** । पूर्वश्लोके व्रताधिकारोविच्छिन्नइदानींनिषेधोधिक्रियते नाश्रोत्रियइतित्रयोदशभिः । एतैर्हुते यज्ञादिकृतेन ब्राह्मणोभुञ्जीत ॥ २०५ ॥

(५) **नन्दनः** ।.अश्रोत्रियततेऽनधीतवेदबहुले । श्रोत्रियततेऽपि ग्रामयाज्यादिहुते । ग्रामयाजी बहुनांयाजकः । क्वचित्कर्मण्यभ्युदयश्राद्धादावपि ॥ २०५ ॥

(६) **रामचन्द्रः** । अश्रोत्रिययज्ञे तते विस्तृते ब्राह्मणःक्वचिन्नभुञ्जीत । ग्रामयाजिना पुरोहितेन । स्त्रीप्रधानंस्त्रिया हुते होमे तत्र न भुञ्जीत क्लीबेन हुते होमे तत्र न भुञ्जीत ॥२०५ ॥

(३) **कुल्लूकः** । चौरगायनजीविनोस्तथा तक्षवृत्तिजीवनस्य वृद्ध्युपजीविनश्चान्नंन भुञ्जीत । तथा यज्ञे दीक्षितस्य प्रागग्नीषोमीयात् । कदर्यस्य कृपणस्य निगडस्येतितृतीयार्थेषष्ठी । निगडेनबद्धस्य । गोविन्दराजस्तु बद्धशब्दस्य बन्धनैर्विना प्ययोनिगडैर्निगडितस्य दत्तायोनिगडस्येतिव्याख्यातवान् ॥ २१० ॥

(४) **राघवानन्दः** । जात्या तक्षणः । वार्धुषिकस्य वृद्धिमात्रोपजीविनः । यज्ञे दीक्षितस्य प्रागग्नीषोमीयात् । कदर्यस्य कृपणस्य । आत्मनोधर्मकृत्यंच पुत्रदारांश्च वर्जयन्नित्याद्युक्तलक्षणस्य वा । बद्धस्य दण्डाद्यर्थमवरुद्धस्य । निगडस्य निगडैर्बद्धस्य । शरैः शातितपत्रवत् ॥ २१० ॥

(५) **नन्दनः** । बद्धस्य रज्वादिना । निगडस्य निगडवतो निगडितस्येति यावत् । निगडेनेतिसाधुःपाठः ॥ २१० ॥

(६) **रामचन्द्रः** । दीक्षितस्य असंस्कृताग्निषोमीयपशोः । कदर्यस्य बद्धस्य वासमात्रेण विरुद्धस्य निगडादिना ॥ २१० ॥

अभिशस्तस्य षण्ढस्य पुंश्चल्यादाम्भिकस्य च ॥ शुक्तं पर्युषितं चैव शूद्रस्योच्छिष्टमेव च॥२११॥

(१) **मेधातिथिः** । पुंश्चली यस्य कस्यचिन्मैथुनसंबन्धेन घटते । ननु च गणिकान्नंप्रतिषिद्धमेव नैतदेवम् । अन्या गणिकाऽन्या पुंश्चलीगणिका वेश्यात्वेनेनजीवतिपुंश्चलीत्विन्द्रियचपला दाम्भिकोबैडालव्रतिकादिःसोपधियोगधर्मचरणः । प्रायश्चित्तविशेषार्थंशूद्रोच्छिष्टंप्रतिषिध्यते सर्वस्यैवोच्छिष्टभोजनप्रतिषेधात् । अन्ये तु शूद्रोच्छिष्टंस्थालीस्थंभोज्यान्नंशूद्रभुक्तशिष्टमुच्छिष्टमुच्यतइत्याहुः । पाठान्तरंतु उच्छिष्टमगुरोस्तथेति । उच्छिष्टमुच्यते यत्परस्यस्पर्शनादशुद्धंभुक्तोज्झितंच । आत्मीये ह्यभुक्तोज्झितएकग्रासाशनमेव स्यात् । नचैषशिष्टानांसमाचारोयत्सकृदन्नंदत्तंभुक्त्वापुनराचम्यपात्रान्तरेगृहीतंभुज्यते । तथा नाद्यादन्नम् । तथान्तरेऽभ्युत्थानादिक्रियान्तरस्य प्रतिषेधः । अतआतृप्तेःप्रागाचमनात्पश्चात्स्पर्शेनदोषः । सहभोजनंतु सत्यपि परस्य स्पर्शे पदार्थान्तरत्वान्नोच्छिष्टभोजनम् । अत्रपित्रा पुत्रादिभिःशिष्टंसहभुज्यते । तथा चापस्तम्बादयोदेशग्रहणात्प्रसङ्गेनानुपनीतेन सह भोजनंनिन्दन्ति । नोपनीतेन । अस्मिंस्तुपक्षे विजातीयैः सह भोजनप्रतिषेधः । व्यवधानान्तरमाश्रयणीयम् । भुक्तोज्झितंतु धात्वर्थयोगादुच्छिष्टमन्यदीयमपि ॥ २११ ॥

(२) **सर्वज्ञनारायणः** । अभिशस्तस्य दोषवत्तया शङ्कितस्य । षण्ढस्य क्लीबस्य । पुंश्चल्याः स्वपतिव्यभिचारिण्याः । शुक्तमनम्लमम्लतांकालवशाद्गतम् । पर्युषितं स्वाभाविकरसगन्धादिविपरिवर्तनकालपर्यन्तंस्थितम् । एवंच शुक्तस्य पृथक्ग्रहणंदोषातिशयप्रदर्शनार्थं निगडस्येतिवत् । तथा शूद्रस्य यदन्नंतदभक्ष्यम् । उच्छिष्टंचसर्वेषाम् ॥ २११ ॥

(३) **कुल्लूकः** । महापातकित्वेन संजातलोकविक्रोशस्य नपुंसकस्य नपुंश्चल्याव्यभिचारिण्याअगणिकायाअपि दाम्भिकस्य छद्मना धर्मचारिणोबैडालव्रतिकादेरन्नंन भुञ्जीत । शुक्तंयत्स्वभावतोमधुरंदध्यादिसंपर्कवशेनोदकादीनांचाम्लादिभावंगतम् । पर्युषितंरात्र्यन्तरितं शूद्रस्यान्नंन भुञ्जीतेतिसंबन्धः । उच्छिष्टंच भुक्तावशिष्टान्नमविशेषात्कस्यापि न भुञ्जीत । गुरूच्छिष्टंच विहितत्वाद्भोज्यम् । गोविन्दराजस्तु । शूद्रस्योच्छिष्टंतद्भुक्तावशिष्टंच स्थालीस्थमपि न भुञ्जीतेत्याह ॥२११ ॥

(४) **राघवानन्दः** । महापातकित्वेनाभिशस्तस्य संजातलोकविक्रोशस्य । षण्ढस्य नपुंसकस्य । पुंश्चल्याः वेश्याभिन्नव्यभिचारिण्याः । शुक्तस्य स्वाभाविकमधुरत्वेपि कालवशादुदकादिरसवशाद्वा यदाम्लीभवति तदपि वर्ज्यं । पर्युषितं रात्र्यन्तरितं प्रतिप्रसवशास्त्रबोधिताद्यतिरिक्तं । शूद्रोच्छिष्टं शूद्रपक्वान्नाशनेनतुदोषोक्तेःशूद्रभुक्तावशिष्टंस्थालीस्थमपि । ब्रह्मचर्यादिप्रकरणादौ यच्छुक्तादिनिषेधःसप्रायश्चित्तगौरवार्थः ॥ २११ ॥

(५) **नन्दनः** । कालातिक्रमेणरसान्तरंप्राप्तंशुक्तम् । पर्युषितमेकाहान्तरितम् । शूद्रस्योच्छिष्टंशूद्रेणभुक्तान्नंस्थाल्यादिस्थम् ॥ २११॥

(६) **रामचन्द्रः** । योऽभिशस्तस्तस्य कलङ्कवतः पुंश्चली परपुरुषरता । स्वयमेव अथवा कालपरिपाकेन अम्लंभवति तत्शुक्तं । रात्र्यन्तरितं पर्युषितम् ॥ २११ ॥

चिकित्सकस्य मृगयोः क्रूरस्योच्छिष्टभोजिनः॥ उग्रान्नंसूतिकान्नंच पर्याचान्तमनिर्दशम् ॥ २१२ ॥

(१) **मेधातिथिः** । स्मृत्यन्तरे विशेषः श्रूयते । शल्यान्नर्तकजीविनः । मृगयुर्मृगव्याधः । आखेटकार्थेमांसविक्रयार्थंवा योमृगान्हन्ति । क्रूरअनृजुप्रकृतिःदुष्प्रसादउच्छिष्टभोजीनिर्षिद्धोच्छिष्टभोजी । उग्रोजातिविशेषः । राजेत्येतस्यवेदे प्रयोगोदृश्यते । उग्रोमध्यमशीरि वेति वचनस्यान्यःप्रतिषेधोऽस्तिदोषप्रदर्शनप्रकरणेचनश्रूयते । राजान्नंतेजआदत्तइत्यर्थवादाच्च प्रतिषेधः । सूतिकान्नंसूतिकामुद्दिश्य यत्कृतंतत्कुलीनैरपि तदनाद्यमनिर्दशदशाहानि यावत् । तेन यद्यपि क्षत्रियादीनांदशाहादूर्ध्वमाशौचंतथापि दशाहानि न भोज्यम् । पाठान्तरंसूतकान्नमिति । सूतकशब्देन च तद्वन्तःपुरुषालक्ष्यन्ते । येषांकुले सूतकंतेदशाहंन भोज्यान्नाइति । यस्मिन्पक्षे सर्वेषांदशाहंसूतकाशौचंतत्रायंप्रतिषेधः । यदातुमातापित्रोःसूतकंमातुर्वेतिपक्षस्तदायावदाशौचंनभोज्यम् । अनिर्दशग्रहणमाशौचनिवृत्त्युपलक्षणार्थम् । तेन क्षत्रियादीनांयस्य यावदाशौचकालःसतावत्कालमभोज्यान्नः । सूतकान्नमनिर्दशमितिपठितव्ये वृत्तानुरोधात्पर्याचान्तपदेनव्यवधानम् । अन्यैस्तुस्वतन्त्रमनिर्दशग्रहणंव्याख्यातम् । सूतकशब्देनाशौचकालोत्रोच्यते । अनिर्दशंगवादीनांपयःपर्याचान्तंशौचाचमनव्यपेतमर्धभुक्ते केनचित्कारणेन यद्याचामति तदापुनर्भुक्तोज्झितंनाशितव्यम् ॥ २१२ ॥

(२) **सर्वज्ञनारायणः** । चिकित्सकस्य भिषग्वृत्तेः । मृगयोर्मृगबन्धजीविनः । क्रूरस्य हिंसारुचेः । उच्छिष्टभोजिनः उच्छिष्टभोजनशीलस्य । उग्रः क्षत्रियात् शूद्रायां जातः । सूतिकान्नंसूतिकाभोजनार्थंपक्वमन्नम् । पर्याचान्तं तत्पङ्क्तिभोजिना यत्राचमनंकृतम् । अनिर्दशं सूतकिना सूतकमध्ये दत्तम् ॥ २१२ ॥

(३) **कुल्लूकः** । चिकित्साजीविनः । मृगयोर्मांसविक्रयार्थंमृगादिपशुहन्तुः । क्रूरस्यानृजुप्रकृतेः । निषिद्धोच्छिष्टभोक्तुरन्नंन भुञ्जीत । उग्रादारुणकर्मा तस्यान्नम् । गोविन्दराजोमञ्जर्यामुग्रंराजानमुक्तवान् । मनुवृत्तौ च शूद्रायां क्षत्रियोत्पन्नमभ्यधात् । भेदोक्तेर्याज्ञवल्कीयेनोग्रोराजेतिवावदत् । आश्चर्यमिदमेतस्यत्वकीयन्ददिभूषणम् ॥ सूतिकान्नंसूतिकामुद्दिश्य यत्क्रियतेतदन्नंतत्कुलजैरपि न भोक्तव्यम् । एकपङ्क्तिस्थानन्यानवमन्य यत्रान्ने भुज्यमाने केनचिदाचमनंक्रियते तत्पर्याचान्तम् । अनिर्दशंसूतिकान्नवक्ष्यमाणत्वान्न भुञ्जीत ॥ २१२ ॥

(४) **राघवानन्दः** । किंचचिकित्सकस्य भिषजः । मृगयोर्व्याधस्यजातितःकर्मतोवा । उच्छिष्टभोजिनः निषिद्धोच्छिष्टभोजिनोन तु गुर्वाद्युच्छिष्टभोजिनः ताच्छील्यार्थोवा । उग्रान्नंउग्रोजातिविशेषोदारुणकर्मावा । सूतिकान्नं सूतिकामुद्दिश्य यत्क्रियतेतदन्नं तत्कुलजैरपि नभोक्तव्यम् । एकपङ्क्तिस्थानवलम्बिनामन्यस्मिन्भुज्यमाने तंपरित्यज्यकेनाप्याचमनंक्रियते तत्पर्याचान्तम् । अनिर्दशं सूतकाद्याशौचान्तर्गतम् ॥ २१२ ॥

(५) **नन्दनः** । उग्रोवैश्येन शूद्रायांजातः । पर्याचान्तंप्रतिदानपरम्परयाप्राप्तवारम् । अनिर्दशंसूतिकान्नमित्यन्वयः ॥ २१२ ॥

(६) रामचन्द्रः । क्रूरस्य हिंसारुचेः । उग्रान्नं क्षत्रियात्शूद्रायामुत्पन्नउग्रसंज्ञस्तस्यान्नं । यद्वा वाक्काय-व्यापारेणोद्वेजकउग्रः । पङ्क्तिभोजने यत्र एकेनाचमनंकृतं तत्पर्याचान्तं । अनिर्दशं अनतिक्रान्तदशाहं अनिर्गताशौचम् ॥ २१२ ॥

अनर्चितंवृथामांसमवीरायाश्च योषितः ॥ द्विषदन्नंनगर्यन्नंपतितान्नमवक्षुतम् ॥ २१३ ॥

(१) मेधातिथिः । अर्चार्हस्य यदवज्ञया दीयते तदनर्चितमननुसुहृदादेः । वृथामांसंदेवाद्यर्चनशिष्टंयन्नभवत्यात्मार्थयत्साधितम् । अवीरा स्त्री यस्या न भर्ता नापिपुत्रः । द्विषञ्छत्रुः । नगरीनगरस्वाम्यराजापि । अवक्षुतमुपरियस्मिन्क्षवथुःकृतः ॥ २१३

(२) सर्वज्ञनारायणः। अनर्चितंसंमानेनादत्तम् । वृथामांसं पशुबन्धव्यतिरेकेण मांसम् । अवीरायाः पुत्रपतिहीनायाः । द्विषतः शत्रोः । नगरी नगरवान् नगराधिपतिस्तदन्नम् । पतितः कृतपापोऽकृतप्रायश्चित्तः । अवक्षुतं यदुपरिक्षुतंकृतम् ॥ २१३ ॥

(३) कुल्लूकः । अर्चार्हस्य यदवज्ञयादीयते । वृथामांसंदेवतादिमुद्दिश्ययन्नकृतं । अवीरायाःपतिपुत्ररहितायाः । शत्रुनगरपतितानांच उपरिकृतक्षुतंचान्नं भुञ्जीत ॥ २१३ ॥

(४) राघवानन्दः । योग्येष्ववज्ञयादत्तमनर्चितं । वृथामांसं देवपित्राद्युद्देशरहितम् । अवीरायाः पतिपुत्ररहितायाः योषितोरूपयौवनशालिन्याःअन्नमिति शेषः । नगर्यन्नं नगरस्थस्यान्नं । कर्मतोजातितोवा पतितस्यान्नं । अवक्षुतं यदुपरिक्षुतंकृतम् ॥ २१३ ॥

(५) नन्दनः । अनर्चितमवज्ञया दत्तम् । वृथामांसंआत्मार्थसंस्कृतंमांसम् । अवीरायाः पतिपुत्रहीनायाः नगर्यन्नं देशसंबन्धेनायमन्नस्यनिषेधः । यस्योपरिक्षुतंतदवक्षुतं ॥ २१३ ॥

(६) रामचन्द्रः । अहरहर्यदवज्ञया दत्तंतदनर्चितम् । अविहितफलसाधनमांसंतद्वृथामांसम् । च पुनः अवीराया योषितः अवीरा पतिपुत्ररहिता । द्विषतः अन्नं । नगराधिपतेस्तस्य राज्ञोन्नं । पतितान्नंच महापातकिनोन्नम् । अवक्षुतंयस्याज्ञातस्य उपरिक्षुतं तदवक्षुतम् ॥ २१३ ॥

पिशुनानृतिनोश्चान्नंक्रतुविक्रयिणस्तथा ॥ शैलूषतुन्नवायान्नंकृतघ्नस्यान्नमेव च ॥ २१४ ॥

(१) मेधातिथिः । पिशुनोयोविश्रब्धमर्मकथितंभिनत्तिपरच्छिद्रवादीयश्चपरोक्षम् । अनृती कृतकौटसाक्ष्यः। क्रतुर्यज्ञस्तंकृत्वाविक्रीणीतेक्रतुफलंमदीयंतवास्त्वितिमूल्येन ददाति यद्यपि परमार्थतः क्रतोर्विक्रयोनास्ति तथापि यस्यैवंविषयात्रान्यविप्रलम्भेन वा प्रवृत्तिस्तस्य प्रतिषेधः । शैलूषोनटः भार्यापण्यइत्यपरे । तुन्नवायः सौचिकः । कृतघ्नःकृतमुपकारंयोनाशयति । प्रत्युतोपकर्तुरपकारे वर्तते नचशक्तःसन्प्रत्युपकारेऽपि ॥ २१४ ॥

(२) सर्वज्ञनारायणः । पिशुनः परगुणासहनः । क्रतुविक्रयिकः परगतंफलमुद्दिश्य क्रतुकारी । शैलूषोनटवृत्तिः । तुन्नवायः सूचीसीवनवृत्तिः ॥ २१४ ॥

(३) कुल्लूकः । पिशुनःपरोक्षे परापवादभाषणपरः अनृतीत्यतिशयेनानृतवादीकूटसाक्ष्यादिः । क्रतुविक्रयिकः

---

(२१३) नगर्यन्नम्=कदर्यन्न (ट, ठ, त)

मदीययागस्य फलंतव भवत्वित्यभिधाय योधनंगृह्णाति। शैलूषोनटः। तुन्नवायःसौचिकः । कृतघ्नोयःकृतोपकारस्याप-कारे प्रवतते तस्यान्नं भुञ्जीत ॥ २१४ ॥

(४) राघवानन्दः। विरुद्धमर्थंकथयतीति पिशुनः। अनृती कूटसाक्षी । मत्कृतुफलंतवैवेतिवदन्धनंगृह्णातियः सक्रतुविक्रयीतस्य। शैलूषोनटः भायापण्यः। सौचिकस्तन्तुवायः कर्मतोज्ञातितोवा। कृतोपकारिणि अपकारी कृतघ्नः ॥ २१४ ॥

(५) नन्दनः। परेभ्योभार्यांदत्त्वा योजीवति सशैलूषः। नटइत्येके ॥ २१४ ॥

(६) रामचन्द्रः। पिशुनः सूचकः। अनृतीपरछिद्रवादी । च पुनः क्रतुविक्रयी यागविक्रयी यागफलविक्रयी। शैलूषोनटवृत्तिः। तुन्नवायः सौचिकः च पुनः कृतघ्नस्य अन्नमेव ॥ २१४ ॥

कर्मारस्य निषादस्य रङ्गावतारकस्य च ॥ सुवर्णकर्तुर्वेणस्य शस्त्रविक्रयिणस्तथा ॥ २१५ ॥

(१) मेधातिथिः। कर्मारोऽयस्कारः। निषादोदशमे वक्ष्यते । रङ्गावतरकोनटगायनकेभ्योऽन्योमल्लादिः। अथवाप्रतिरङ्गमुपतिष्ठते कुतूहली। वेणुवादित्रजीवितः। शस्त्रविक्रयी कृतस्य खड्गादेरकृतस्य वायसोविक्रेता ॥ २१५ ॥

(२) सर्वज्ञनारायणः। कर्मारोलोहकारवृत्तिः। निषादोजालवृत्तिः । रङ्गावतारकोवाद्यादिप्रदर्शनवृत्तिः। वैणोवेणुपिटकादिकरणवृत्तिः। शस्त्रं खड्गादि ॥ २१५ ॥

(३) कुल्लूकः। कर्मारस्य लोहकारस्य निषादस्य दशमाध्यायोक्तस्य । नटगायनव्यतिरिक्तस्य रङ्गावतरणजीविनः सुवर्णकारस्य वेणोर्भेदनेन योजीवति बुरुडइतिविश्वरुपः। शस्त्रंलोहः तद्विक्रयिणश्चान्नं भुञ्जीत ॥ २१५ ॥

(४) राघवानन्दः। कर्मारोऽयस्कारः। रङ्गावतारकोदशमेवक्ष्यमाणः। वेणः वाद्योपजीवी । बरुडः लोहादिनिर्मितशस्त्रविक्रयी ॥ २१५ ॥

(५) नन्दनः। कर्मारोऽयस्कारः। वैदेहकादम्बष्ठायामुत्पन्नोवेनः ॥ २१५ ॥

(६) रामचन्द्रः। कर्मारस्य लोहकारस्य। च पुनः रङ्गावतरकस्य वाद्योपजीविनः । वैण्यस्य वेणुछेदनजीविनः वेणुवादनजीविनोवा ॥ २१५ ॥

श्ववतां शौण्डिकानां च चैलनिर्णेजकस्य च ॥ रजकस्य नृशंसस्य यस्य चोपपतिर्गृहे ॥२१६॥

(१) मेधातिथिः। आखेटकाद्यर्थंयेशुनोबिभ्रति ते श्ववन्तः। शौण्डिकामद्यव्यसनिनस्तत्पण्यजीविनोवा। चैलंवस्त्रंतन्निर्णेक्ति प्रक्षालय ति। कारुकनामधेयमेतत् । रजकोवाससांनीलादिरागकारकः । नृशंसोनुन्मनुष्याञ्छंसति स्तौति योलोके बन्दीतिप्रसिद्धः। अथवा निर्दयोनृशंसः। उपपतिर्जारोभार्यायागृहेजारोवर्तते ॥ २१६ ॥

(२) सर्वज्ञनारायणः। श्ववतां श्वपोषकाणाम्। शौण्डिकानां मद्यसंधायकानाम्। चैलनिर्णेजकस्य वस्त्रक्षालनवृत्तेः। रजकस्य वस्त्ररञ्जनकर्तुः। नृशंसस्य वृत्त्यर्थंनरस्तोत्रकर्तुः। यस्य गृहे भार्यायामुपपतिः ॥ २१६ ॥

(३) कुल्लूकः। आखेटकाद्यर्थंशुनःपोषकाणां । मद्यविक्रयिणां वस्त्रधावकस्य कुसुम्भादिना वस्त्ररागकृतः निर्दयस्य यस्य चोपपतिर्गृहे जारश्च यस्याज्ञानतोगृहे स्थितस्तस्य गेहे नाद्यात् ॥ २१६ ॥

(४) राघवानन्दः । श्ववतां शुनःपोषकाणां । चैलनिर्णेजकस्य वृत्त्यर्थंमलिनवस्त्रक्षालकस्य । रजकस्य वस्त्ररागकृतः। नृशंसस्य निर्दयस्य यस्य चोपपतिर्गृहेतस्याप्यन्नंनाद्यात्। सततंदुष्टभार्यत्वात् ॥ २१६ ॥

(५) **नन्दनः** । श्ववतांश्वपोषकारिणाम् । शौण्डिकानांसुराविक्रयिणाम् । चैलनिर्णेजकस्यवस्त्रशोधकस्य । रञ्जकस्य वस्त्रादीनांनीलादिरागकारस्य । नृशंसस्यनिर्दयस्य । यस्यगृहउपपतिर्जारोवर्तते तस्य चान्नंन भुञ्जीतेति ॥ २१६॥

(६) **रामचन्द्रः** । श्वपचां श्वपोषकाणां । श्ववतांवेति पाठः श्ववतां सारमेयवतां मृगयार्थम् । शौण्डिकानां मद्यकर्तृणां । च पुनः चैलनिर्णेजकस्य वस्त्रप्रक्षालकस्य । रञ्जकस्य वस्त्रादीनांनीलादिरङ्गकारस्य । नृशंसस्य वृत्त्यर्थंनरस्तुतिकर्तुः । च पुनः यस्यगृहेउपपति जारः ॥ २१६ ॥

मृष्यन्ति ये चोपपतिं स्त्रीजितानां च सर्वशः ॥ अनिर्दशं च प्रेतान्नमतुष्टिकरमेव च ॥२१७॥

(१) **मेधातिथिः** । पूर्वोऽविदितभार्याजारः । अयंतु विदित्वा क्षमते न भार्याया निग्रहंकरोति । नापितस्यअविदितान्यगृहजारस्यभोज्यान्नंनैव । स्त्रीजिताः । एषांभार्यैवगृहेकर्त्रीहर्त्रीचस्वयंपरिजनस्यच नेशस्तेन सर्वत्र तद्वशवर्तिनः । प्रेतान्नंमरणाशौचेतत्कुलीनाअभोज्यान्नाः । अनिर्दशग्रहणंकालोपलक्षणार्थम् । यदाऽनिर्दशग्रहणपूर्वत्रस्वतन्त्रमाशौचसंबन्धिनामविशेषेणान्नंप्रतिषेधतितदिह प्रेतान्नंकृतंयस्याप्याशौचंनास्ति सुहृद्बान्धवादेः कारुण्याच्चतुर्थीश्राद्धादिप्रवृत्तस्य यदन्नंतन्न भोज्यम् । दशाहिकंनावमिकंचतुर्थीश्राद्धमष्टमीत्यादिरामायणेवर्णितमन्यैरपि गृह्यकारैः । अतुष्टिकरंयस्मिन्भुज्यमाने चित्ततुष्टिर्नभवेत् ॥ २१७ ॥

(२) **सर्वज्ञनारायणः** । मृष्यन्ति न तान्भज्यन्तीत्यर्थः । प्रेतान्नं शवान्नमनिर्दशमनिर्गताशौचम् । अतुष्टिकरंसविचिकित्सया ॥ २१७ ॥

(३) **कुल्लूकः** । गृहइत्यनुषज्यते गेहे ज्ञातंभार्याजारंये सहन्ते तेषामन्नंन भुञ्जीत । तेन गृहान्निःसारितायाजारसहनएषदोषः । तथा सर्वकर्मसु स्त्रीपरतन्त्राणां । अनिर्गताशौचंच सूतकान्नं । अतुष्टिकरमेव च न भुञ्जीत ॥ २१७ ॥

(४) **राघवानन्दः** । मृष्यन्ति ज्ञात्वोपपतिंतस्करइति कृत्वा अथवा गृहसत्वासत्वभेदेन व्यवस्था । अनिर्दशं मृतकान्नं दशाहाद्यन्तरे दत्तं । अतुष्टिकरं तथैव प्रयच्छति यथा तोषोन जायते तस्यान्नम् ॥ २१७ ॥

(५) **नन्दनः** । येस्वभार्यायांवर्तमानमुपपतिं मृष्यन्ति सहन्ते तेषांचान्नम् । सर्वशः सर्वावस्थायाम् । प्रेतान्नंशावाशौचवतामन्नम् । अतुष्टिकरममनः सन्तोषकरम् ॥ २१७ ॥

(६) **रामचन्द्रः** । येउपपतिंजारंमृष्यन्ति न त्यजन्ति विदित्वादमतः । अनिर्दशं अनिर्गताशौचं । च पुनः प्रेतान्नं एकादशाहस्यान्नम् । च पुनः अतुष्टिकरमेव ॥ २१७ ॥

राजान्नं तेजआदत्ते शूद्रान्नं ब्रह्मवर्चसम् ॥ आयुः सुवर्णकारान्नं यशश्चर्मावकर्तिनः ॥ २१८ ॥

(१) **मेधातिथिः** । अथेदानीमतिक्रमफलंदर्शयति । राजान्नभोजिनस्तेजोनाशः । एवंसर्वत्रद्रष्टव्यम् । सुवर्णकारादयःशब्दाःशिल्पिविशेषजीविनांवाचकाः । येसुवर्णंजीविकार्थंघटयन्ति सुवर्णकाराउच्यन्ते । एवंरजकादिष्वपिद्रष्टव्यम् । चर्मावकृत्तंछिन्दति चर्मावकर्तिनः । तेनकर्मणायेजीवन्ति तेषामेषारूढिः । इह येषांपूर्वत्र प्रतिषेधोनास्ति केवलंदोषः श्रूयते तेषांततएव प्रतिषेधोऽनुमेयः ॥ २१८ ॥

(२) **सर्वज्ञनारायणः** । इदानीं शूद्रादीनां प्रक्रान्तानामप्रक्रान्तस्यच राज्ञोऽन्नाशने दृष्टंफलमाहराजान्नमिति । तेजस्तपोबलं ब्रह्मवर्चसं वेदबलम् । चर्मावकर्तिनश्चर्मकारवृत्तेः ॥ २१८ ॥

(३) **कुल्लूकः** । राजान्नंतेजोनाशयति इतएव दोषदर्शनात्तदन्नभक्षणनिषेधःकल्प्यते । एवमुत्तरत्रापि पूर्वमनि-

षिद्धस्य दोषदर्शनादेव निषेधकल्पनम् । नाद्याच्छूद्रस्य पक्वान्नमितिनिषेधिष्यति तदतिक्रमणफलकथनमिदम् । शूद्रस्य पक्वान्नमध्ययनादिनिमित्तंतेजोनाशयति । सुवर्णकारस्यान्नमायुः । चर्मकारान्नंख्यातिंनाशयति ॥ २१८ ॥

(४) **राघवानन्दः** । एतेषु फलवादेन निषेधान्मुखंव्यावर्तयति राजेतिचतुर्भिः । अत्र येषांराजादीनामन्नभक्षणनिषेधोनोक्तस्तेषामपि फलवादेन निषेधःकल्पनीयः । तेजःप्रागल्भ्यं सौन्दर्यंवा । ब्रह्मवर्चसं वृत्तस्वाध्यायजंतेजः । चर्मावकर्तिनःचर्मकारस्य यशआदत्तइत्यनुषङ्गः ॥ २१८ ॥

(५) **नन्दनः** । अत्रोक्तोपादानंनिन्दातिशयार्थम् । अनुक्तोपादानंवर्जनार्थम् ॥ २१८ ॥

(६) **रामचन्द्रः** । एतेषांअन्नभक्षणे दोषमाह । राजान्नं तेजः तपोबलं आदत्ते ॥ २१८ ॥

कारुकान्नं प्रजांहन्ति बलं निर्णेजकस्य च ॥ गणान्नं गणिकान्नं च लोकेभ्यः परिकृन्तति ॥२१९॥

(१) **मेधातिथिः** । कारुकाः सूपकारानातिगर्हितकर्माणः । एषएतेषांशिल्पिभ्योभेदः । प्रजायाविघातोऽनुत्पत्तिः ॥ २१९ ॥

(२) **सर्वज्ञनारायणः** । कारुकः सूपकारादिवृत्तिः । बलंदेहबलं । लोकेभ्यः स्वर्गात्परिकृन्तति छिनत्ति ततः पातयतीत्यर्थः ॥२१९ ॥

(३) **कुल्लूकः** । कारुकस्य सूपकारादेरन्नंप्रजामपत्यंनिहन्ति । चर्मकारादेःकारुकत्वेऽपि गोबलीवर्दन्यायेन पृथङ्निर्देशः । निर्णेजकस्यान्नंबलंहन्ति । गणगणिकयोरन्नंच कर्मान्तरार्जितेभ्यःस्वर्गादिलोकेभ्यआच्छिनत्ति ॥ २१९॥

(४) **राघवानन्दः** । कारुकः शिल्पी । निर्णेजकोवस्त्रधावकः । लोकेभ्यस्तज्जन्मनि तद्भक्षणादूर्ध्वंपुण्यसाध्यस्वर्गादिभ्यःतत्फलंनभवतीत्यर्थोन्यथानवस्थितिः ॥ २१९ ॥

(५) **नन्दनः** । कारुकान्नंकर्मकारान्नम् । लोकेभ्यःस्वर्गादिभ्यः ॥ २१९ ॥

(६) **रामचन्द्रः** । कारुकान्नंसूपकारान्नंप्रजांहन्ति । असंतोषकरमेव । च पुनः लोकेभ्यः स्वर्गादि । लोकेभ्यः परिकृन्तति ॥ २१९ ॥

पूयं चिकित्सकस्यान्नं पुंश्चल्यास्त्वन्नमिन्द्रियम् ॥ विष्ठा वार्धुषिकस्यान्नं शस्त्रविक्रयिणोमलम् ॥ २२० ॥

(१) **मेधातिथिः** । पूयतुल्यंचिकित्सकस्यान्नंभोजनम । इन्द्रियंशुक्रम् । विष्ठामलमेकमेव ॥ २२० ॥

(२) **सर्वज्ञनारायणः** । इन्द्रियं शुक्रम् । मलंगात्रमलम् ॥ २२० ॥

(३) **कुल्लूकः** । चिकित्सकस्यान्नंपूयंपूयभक्षणसमदोषम् । एवंपुंश्चल्याअन्नंइन्द्रियंशुक्रम् । वार्धुषिकस्यान्नंपुरीषम् । लोहविक्रयिणोऽन्नंविष्ठाव्यतिरिक्तश्लेष्मादि । गोविन्दराजस्तु । चिकित्सकान्नभक्षणेन तथा विधायांजातौ जायते यत्र पूयभुग्भवतीत्याह ॥ २२० ॥

(४) **राघवानन्दः** । इन्द्रियं तन्निसृतंरेतः । इन्द्रियं पुंस्त्वंनिकृन्ततीति वा । मलं विष्ठा । चिकित्सकान्नादनेन तथाविधायांजातावुत्पद्यते यत्र पूयभुग्भवति गोविन्दराजः । पूयादिभक्षणप्रायश्चित्तार्थमेवेतितुतत्त्वम् ॥ २२० ॥

(५) **नन्दनः** । पूयंपूयवदभक्ष्यमित्यर्थः । एवमुत्तरत्रापि । इन्द्रियंरेतः ॥ २२० ॥

(६) **रामचन्द्रः** । पूयतुल्यं । पुंश्चल्याअन्नं इन्द्रियं गुह्येन्द्रियसमं शुक्रसमंवा वार्धुषिकस्य परनिन्दकः आत्मप्रशंसी तस्यान्नं विष्ठासमम् ॥ २२० ॥

य एतेन्ये त्वभोज्यान्नाः क्रमशः परिकीर्तिताः ॥ तेषां त्वगस्थिरोमाणि वदन्त्यन्नं मनीषिणः ॥ २२१ ॥

[अमृतं ब्राह्मणस्यान्नं क्षत्रियान्नं पयः स्मृतं । वैश्यान्नमन्नमित्याहुः शूद्रस्य रुधिरं स्मृतम् ॥१॥[1]]

(१) मेधातिथिः । प्रतिपदनिर्दिष्टेभ्योयेऽन्येन्यभोज्यान्नाअस्मिन्प्रकरणे पठितास्तेषांयदन्नंतत्त्वगस्थिरोमादि । यस्तदीयायास्त्वचोभुक्तायादोषः सएवान्नस्यापि ॥ २२१ ॥

(२) सर्वज्ञनारायणः । यएतेक्रमशः कीर्तिताः येचान्येस्मृत्यन्तरसिद्धाः । अत्र पूयत्वाद्यभिधानं तद्भक्षणे कृतप्रायश्चित्तार्थम् । तथाच वक्ष्यमाणप्रायश्चित्तेन तस्य विकल्पः ॥ २२१ ॥

(३) कुल्लूकः । प्रतिपदनिर्दिष्टेभ्योयेऽन्ये क्रमेणाभोज्यान्नाअस्मिन्प्रकरणे पठितास्तेषांयदन्नंत्वगस्थिरोमाणि यास्तदीयास्त्वचःकीकशस्य रोम्णांच भुक्तानांयोदोषः सएव तदन्नस्यापि भुक्तस्य बोद्धव्यः ॥ २२१ ॥

(६) रामचन्द्रः । एते अन्ये त्वभोज्यान्नाः । मया भृगुणावा मनुनावा पक्षान्तरम् ॥ २२१ ॥

भुक्त्वातोऽन्यतमस्यान्नममत्या क्षपणं त्र्यहम् ॥ मत्या भुक्त्वाचरेत्कृच्छ्रं रेतोविण्मूत्रमेव च ॥२२२॥

(१) मेधातिथिः । त्र्यहंक्षपणमभोजनं । अमत्याबुद्धिपूर्वम् । बुद्धिपूर्वे तु कृच्छ्रंचरेत् । तच्चकृच्छ्रंस्मृत्यन्तरैकवाक्यत्वात्तप्तकृच्छ्रम् । तत्ररेतोविण्मूत्रप्राशनेतप्तकृच्छ्रमाम्नातम् । मत्यापानेपयोघृतमुदकंवायुःप्रतित्र्यहंतप्तातिकृच्छ्रः । ततोऽस्यसंस्कारइति । अप्रकरणेच प्रायश्चित्तवचनंदोषातिशयदर्शनार्थम् । अन्यतमस्येतिषष्ठीनिर्देशात्परिग्रहदुष्टएवेदंप्रायश्चित्तंमन्यते न कालस्वभावसंसर्गदुष्टे । शुक्तपर्युषितादौ चतुर्विधंह्यभोज्यम् । कालदुष्टंशुक्तपर्युषितादि । संसर्गदुष्टंमद्यानुगतादि । स्वभावदुष्टंलशुनादि । परिग्रहदुष्टंप्रकृताभोज्यान्नानांयत् । अत्रोच्यते । सत्यम् चतुर्विधमभोज्यंभवति । षष्ठीनिर्देशोऽप्यस्ति । किंतु यदिशुक्तादेर्नेदंप्रायश्चित्तंस्यात्तदिह प्रकरणे तेषामुपादानमनर्थकमेवापद्येत । पञ्चमे हि तयोः प्रतिषेधोनास्ति तस्मादिह प्रायश्चित्तार्थमेवैवमादीनामुपादानम् । तत्रतर्हिकिमर्थंतत्रैववक्ष्यामः । यद्यपिगर्हितानाद्ययोर्जग्धः अभोज्यानांतुभुक्त्वान्नमितिच तत्सर्वमेकादशेविभागतोनिर्णेष्यते ॥ २२२ ॥

(२) सर्वज्ञनारायणः । अतएषुमध्ये क्षपणमुपवासेन कृच्छ्रं प्राजापत्यम् । अत्रच स्मृत्यन्तरदर्शनेन गुरुत्वलघुत्वावधारणेन यथोक्तप्रायश्चित्तद्वयंयथायथं द्वैगुण्यत्रैगुण्यादिना व्यवस्थाप्यम् । रेतोविण्मूत्रं नरस्य ॥ २२२ ॥

(३) कुल्लूकः । एषांमध्येऽन्यतमसंबन्धान्नमज्ञानतोभुक्त्वा त्र्यहमुपवासः । ज्ञानतस्तु कृच्छ्रम् । एवंरेतोविण्मूत्रभोजनेऽपि एतच्चान्यतमस्येतिषष्ठीनिर्देशान्मत्तादिसंबन्धिनःपरिग्रहदुष्टान्नस्यैव प्रायश्चित्तं न संसर्गदुष्टस्य केशकीटावपन्नादेः । नाऽपिकालदुष्टस्य पर्युषितान्नादेः नाऽपि निमित्तदुष्टस्य क्षुताद्देः । एकप्रकरणोपदेशश्चैषांलातकत्वज्ञापनार्थम् । प्रायश्चित्तंचैतेष्वेकादशे वक्ष्यति । यदितु सर्वेष्वेवंप्रायश्चित्तंस्यात्तदा भुक्त्वातोन्यतमस्यान्नंदुष्टमित्यभ्यधास्यत् । न त्वन्यतमस्य तु भुक्तेति ॥ तत्तादिकप्रकरणाद्यन्मेधातिथिरभ्यधात् । प्रायश्चित्तमिदंयुक्तंशुक्तादौ तदसुन्दरम् ॥ अप्रकरणे च प्रायश्चित्तस्याभिधानंलाघवार्थंतत्र क्रियमाणे मत्तादिग्रहणमपि कर्तव्यंस्यात् ॥ २२ ॥

१ (ङ, ढ)

(४) राघवानन्दः । अतएव प्रायश्चित्तभेदमाह भुक्केति । भुक्कातोन्यतमस्यअमत्या अज्ञानेन क्षपणमुपोषणं । कृच्छ्रंवक्ष्यमाणलक्षणम् ॥ २२२ ॥

(५) नन्दनः । एषामन्यतमस्य । अमत्याऽज्ञानेन । क्षपणमभोजनं तुल्यप्रायश्चित्तत्वात् । तदुक्तं रेतोविण्मूत्रमेवेति । अत्रप्रकरणे प्रायश्चित्तोपदेशोनिन्दातिशयार्थः ॥ २२२ ॥

(६) रामचन्द्रः । अन्यतमस्यान्नं अनुक्तस्यान्नं अमत्या अज्ञानेन भुक्त्वा त्र्यहं त्रिदिनपर्यन्तं क्षपणं अन्नपरित्यागः उपोषणमित्यर्थः मत्या ज्ञानेन चेत् भुक्त्वा कृच्छ्रसंज्ञंव्रतं चरेत् कुर्यात् । च पुनः रेतोविण्मूत्रमेव मत्या भुक्त्वाकृच्छ्रंचरेत् ॥ २२२ ॥

नाद्याच्छूद्रस्य पक्वान्नं विद्वानश्राद्धिनोद्विजः ॥ आददीताममेवास्मादवृत्तावेकरात्रिकम् ॥२२३॥

[चन्द्रसूर्यग्रहे नाद्यादद्यात्स्नात्वा तु मुक्तयोः ॥ अमुक्तयोरगतयोरद्याच्चैव परेहनि ॥ १ ॥ +]

(१) मेधातिथिः अविशेषेण शूद्रान्नंप्रतिषिद्धंतस्येदानींविशिष्टविषयतोच्यते । अश्राद्धिनः क्व पुनः शूद्रान्नंप्रतिषिद्धम् शूद्रस्योच्छिष्टमेवचेत्यत्र । ननु च तत्रशूद्रस्योच्छिष्टंप्रतिषिद्धंनान्यदन्नम् । नेतिब्रूमः । एवंतत्रसंबन्धः । शूद्रस्यान्नंनाद्यादुच्छिष्टमन्यस्यापि । यत्तु प्राग्व्याख्यातंतत्पूर्वेषांदर्शनमित्यस्माभिरपिसंवर्णितम् । अश्राद्धिनः श्राद्धशब्देन पाकयज्ञादिक्रिया शूद्रस्य विहिता लक्ष्यते ततस्तत्क्रियाननुष्ठायिनः । सच्छूद्रादन्यस्य यत्पक्वमन्नंतन्नाद्यात् । अश्रद्धिनइतिवा पाठः ।अश्रद्धावानित्यर्थः । तथाचोत्तरश्लोकेश्रद्धायाः प्राधान्यमेवाह । आमंशुष्कंधान्यंतण्डुलादितथैकरात्रिकमेकस्मिन्नहनिपर्याप्तंनबहु ॥ २२३ ॥

(२) सर्वज्ञनारायणः । अश्राद्धिनः श्रद्धारहितस्य एकरात्रिकमेकाहपर्याप्तम् । एवं श्राद्धिनः पायसादिपक्वमाममपि बहुदिवसवृत्तियोग्यंग्राह्यमितिलभ्यते । केचित्तु श्राद्धकर्मशीलोत्र श्राद्धीत्याहुः । तत्रापि श्रद्धास्तुतिरसंगतिरिति हेयमेवैतत् ॥ २२३ ॥

(३) कुल्लूकः । अविशेषेण शूद्रान्नंप्रतिषिद्धंतस्येदानींविशिष्टविषयतोच्यते अश्राद्धिनःश्राद्धादिपञ्चयज्ञशून्यस्य शूद्रस्य शास्त्रविद्विजःपक्वान्नंन भुञ्जीत किंत्वन्नान्तराभावे सत्येकरात्रनिर्वाहोचितमाममेवान्नमस्माद्गृह्णीयात् नतुपक्वान्नम् ॥ २२३ ॥

(४) राघवानन्दः । शूद्रोच्छिष्टंनिषिद्धमिति चेदन्यदन्नमश्नीयात्तत्राह नाद्यादिति । अश्राद्धिनः श्राद्धं पञ्चयज्ञाः तच्छून्यस्य अवृत्तौ अन्नान्तराभावेसति तेनाश्राद्धिनाघृतपक्वादिकंग्राह्यम् । तदुक्तं ॥ कन्दुपक्वं स्नेहपक्वं पायसंदधिसक्तवः। एतानि शूद्रान्नभुजोभोज्यानि मनुरब्रवीदिति ॥ २२३ ॥

(५) नन्दनः । अश्रद्धिनः श्रद्धाहीनस्य । अश्रद्धिनइतिविशेषणाच्छ्रद्धायुक्तस्य पक्वान्नमनुज्ञातमितिगम्यते । आमस्याभ्यनुज्ञानात्पूर्वोक्तेषु मत्तक्रुद्धादिष्ववचनात्पक्वामयोरुभयोरपि वर्जनीयत्वम् ॥ २२३ ॥

(६) रामचन्द्रः । विद्वान् शूद्रस्य पक्वान्नंनाद्यात् । अश्राद्धिनः श्रद्धाहीनस्य यद्वानित्यश्राद्धरहितस्यवा । अस्मात् शूद्रात् आममेव आमान्नं अवृत्तौभोजनाभावे एकरात्रिकं एकदिनपर्याप्तम् ॥ २२३ ॥

+ (ख)

(२२३) विद्वानश्राद्धिन=विद्वानश्रद्धिनः (नन्दनः)

(५) नन्दनः । यतएवमतः सर्वेधर्माःश्रद्धयाकर्तव्याइत्याह श्रद्धयेति । इष्टंदैवम् । पूर्तंपित्र्यम् स्वागतैर्विहितोपार्जितैः ॥ २२६ ॥

(६) रामचन्द्रः । श्रद्धया इष्टंयागादि पूर्तंकूपादि नित्यंकुर्यात् । इष्टापूर्ते श्रद्धाकृते श्रद्धया कृते स्वागतैर्धनैः स्वकर्मोपार्जितैर्धनैः श्रुतशौर्यकन्यादिनाप्राप्तैः अक्षये भवतः । श्रुतशौर्यतपःकन्यायाज्यशिष्टान्वयागतं । धनंसप्तविधं शुद्धमुदयोयस्य तद्विधः ॥ श्रुतं अध्ययनं । शौर्यं क्षात्रधर्मेण लब्धम् ॥ २२६ ॥

दानधर्मंनिषेवेत नित्यमैष्टिकपौर्तिकं ॥ परितुष्टेन भावेन पात्रमासाद्य शक्तितः ॥ २२७ ॥

[पात्रभूतोहि योविप्रः प्रतिगृह्य प्रतिग्रहम् । असत्सु विनियुञ्जीत तस्मै देयं न किंचन ॥ १ ॥]

[संचयं कुरुते यस्तु प्रतिगृह्य समंततः । धर्मार्थंनोपयुङ्क्ते च न तं तस्करमर्चयेत् ॥ २ ॥]

(१) मेधातिथिः । दानधर्मश्चतडागादिः । समाहारद्वन्द्वः । अथवादानंचतद्धर्मश्चासाविति । धर्मग्रहणेन प्रीत्या विना नियमभावमाह । भावे तुष्टेन प्रसन्नेन चित्तेन पात्रमासाद्य व्रतादिदानंच । एवंपौर्तिकंबहिर्वेदिकम् ॥ २२७ ॥

(२) सर्वज्ञनारायणः । दानधर्मंदानरूपंधर्मसाधनम् । ऐष्टिकंयागदक्षिणारूपम् । पौर्तिकं पूर्तसंगतम् । परितुष्टेन नोपरोधेन ॥ २२७ ॥

(३) कुल्लूकः । दानाख्यंधर्ममैष्टिकंपौर्तिकमन्तर्वेदिकंबहिर्वेदिकंच सर्वदा विद्यातपोयुक्तंब्राह्मणमासाद्य परितोषाख्येनान्तःकरणयुक्तंयथाशक्ति कुर्यात् ॥ २२७ ॥

(४) राघवानन्दः । किंच दानेति दानधर्मं दानं यथाशक्तिअर्थिभ्योद्रव्यविभागः तद्रूपंधर्मम् । ऐष्टिकं इष्टिस्वरूपं । पौर्तं पूर्तस्वरूपंवाप्यादि । योग्यंपात्रमिति भावेन भावनाश्रयेणमनसा प्रसन्नेन ॥ २२७ ॥

(५) नन्दनः । इष्टे भवमैष्टिकम् । परितुष्टेन भावेन श्रद्धायुक्तेनत्हृदयेन ॥ २२७ ॥

(६) रामचन्द्रः । सार्धेनाह दानेति । नित्यं ऐष्टिकपौर्तिकं कुर्यात् । प्रतिपदेष्टिपूर्तास्पदं पौर्तिकं पात्रं आसाद्य प्राप्य शक्तितः ॥ २२७ ॥

यत्किंचिदपि दातव्यं याचितेनानसूयया ॥ उत्पत्स्यते हि तत्पात्रं यत्तारयति सर्वतः ॥ २२८ ॥

(१) मेधातिथिः । यत्किंचित्स्वल्पमपि याचितेनाभ्यर्थितेन दातव्यम् । पात्रापात्रसंदेहेअसतिनिश्चयेकिंचिद्दातव्यं नातिबहु । वचनाच्च संदेहेनदातव्यम् । उत्पत्स्यते कदाचित्पात्रमसौभविष्यतिकिंभूतंयत्पात्रंतारयति रक्षति सर्वतोनरकपातहेतोःसर्वस्मादेनसः । यदुक्तंवेदतत्वार्थविदुषेब्राह्मणायेति तत्रायंसंदेहाश्रयईषद्द्रव्यविषयोऽपवादः ॥ २२८ ॥

(२) सर्वज्ञनारायणः । अनसूयया अद्वेषेण । सर्वतः पापात् बहुषु दीयमानेषु हि तादृक्पात्रं मिलतीत्यर्थः ॥२२८॥

(३) कुल्लूकः । प्रार्थितेन परगुणामत्सरेणाल्पमपि यथाशक्ति दातव्यंयस्मात्सर्वदा दानशीलस्य कदाचित्तादृशंपात्रमागमिष्यति तत्सर्वस्मान्नरकहेतोर्मोचयिष्यति ॥ २२८ ॥

(४) राघवानन्दः । तत्रापि दानमत्यर्थमुररीकरोति यदिदितथाच श्रुतिः ह्रियादेयंभियादेयंश्रद्धयादेयं अश्रद्धयादेयं-

इति याचितेन याच्ञाविषयेणापि हियस्मात्सर्वदा दानशीलस्य तादृशपात्रमुत्पत्स्यतेआगमिष्यति । वार्धुषिकमपि सर्वस्माद्दोषात्तारयतीत्याहसर्वतइति ॥ २२८ ॥

(५) नन्दनः । अनसूयया श्रद्धया । अत्रहेतुरुत्तरार्धेनोक्तः । उत्पत्स्यतेसेत्स्यति । सर्वतोदुःखादितिशेषः ॥२२८॥

(६) रामचन्द्रः । यत्किंचिदपि दातव्यं । हि निश्चयेन यत्पात्रंउत्पत्स्यते संमिलति तत्पात्रं सर्वतः पापात्तारयति उद्धरति ॥ २२८ ॥

वारिदस्तृप्तिमाप्नोति सुखमक्षय्यमन्नदः ॥ तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमम् ॥ २२९ ॥

(१) मेधातिथिः । तृप्तिः क्षुत्पिपासाभ्यामपीडनम् । तच्चाढ्यस्यारोगस्यच भवति तेन बहुधनत्वमरोगताच फलमुक्तंभवति । अक्षय्यंसुखम् । अविशेषितत्वान्नोपकरणंसुखंप्रतीयते । अक्षय्यंयावज्जीविकमित्यर्थः । अन्नदःसक्तवोदनादि सिद्धमन्नमामंचतण्डुलादि । दीपस्यदानंचतुष्पथे ब्राह्मणसमायांच ॥ २२९ ॥

(२) सर्वज्ञनारायणः । तृप्तिं पिपासादुःखाभावम् ॥२२९॥

(३) कुल्लूकः । जलदःक्षुत्पिपासविगमात्तृप्तिम् । अन्नदोऽत्यन्तसुखं । तिलप्रदईप्सितान्यपत्यादीनि । दीपदोविप्रवेश्मादौ निर्दोषंचक्षुःप्राप्नोति ॥ २२९ ॥

(४) राघवानन्दः । प्रसङ्गाद्देयद्रव्यभेदेन तत्फलभेदमाह वारिदइतिचतुर्भिः । तृप्तिं क्षुत्पिपासाद्यपीडनं । तेन बहुधनत्वारोग्येइति मेधातिथिः । अक्षय्यं यावज्जीवंप्राप्नोतीत्येवंसर्वत्रानुषङ्गः ॥ २२९ ॥

(५) नन्दनः । द्रव्यविशेषात्फलविशेषमाह वारिदइति ॥ २२९ ॥

(६) रामचन्द्रः । तिलप्रदः प्रजां संततिं इष्टां आप्नोति ॥ २२९ ॥

भूमिदोभूमिमाप्नोति दीर्घमायुर्हिरण्यदः ॥ गृहदोग्र्याणि वेश्मानि रूप्यदोरूपमुत्तमम् ॥ २३० ॥

(१) मेधातिथिः । भूमेराधिपत्यंप्राप्नोति । हिरण्यंसुवर्णम् । रूप्यदउत्तमंरूपंलभते ॥ २३० ॥

(२) सर्वज्ञनारायणः । भूमिं भूमिपतित्वम् ॥ २३० ॥

(३) कुल्लूकः । भूमिदोभूमेराधिपत्यं सुवर्णदःचिरजीवित्वं गृहदःश्रेष्ठानि वेश्मानि । रूप्यदःसकलजननयनमनोहरंरूपंलभते ॥ २३० ॥

(४) राघवानन्दः । रूप्यं रजतम् ॥ २३० ॥

(६) रामचन्द्रः । भूमिदः भूमिं आप्नोति राज्यं आप्नोति । गृहदः अग्र्याणि श्रेष्ठानि वेश्मानि प्राप्नोति ॥ २३० ॥

वासोदश्चन्द्रसालोक्यमश्विसालोक्यमश्वदः ॥ अनडुहःश्रियं पुष्टां गोदोब्रध्नस्य विष्टपम् ॥२३१॥

(१) मेधातिथिः । चन्द्रइवलोक्यतेसर्वस्यप्रियदर्शनोभवति । इतिहासदर्शने चन्द्रलोकोनामस्वर्गस्थानविशेषस्तमाप्नोति । अश्विनामश्ववतां सालोक्यंबह्वश्वतांप्राप्नोति । दर्शने पुनरश्विनोर्लोकमाप्नोति । अनड्वान्पुङ्गवः शाकटवहनसमर्थस्तंददतः पुष्टा महती श्रीर्गोजाविधनधान्यादिसंपद्भवति । ब्रध्नआदित्यस्तस्यविष्टपंस्थानमाप्नोति । महातेजाः सर्व-

(२३०) भूमिमाप्नोति=सर्वमाप्नोति (ठ)

(२३१) अश्विसालोक्यम्=सूर्यसालोक्यम् (अ)

स्योपरि भवति । स्वर्गो वा ब्रध्नविष्टपंस्मृत्यन्तरेऽनसोविशेषाश्रयः फलविशेषः श्रूयते । हेमशृङ्गीरूप्यखुरासुशीलावस्त्रसंवृता । सकांस्यपात्रा दातव्याक्षीरिणी गौः सदक्षिणा ॥ सुदक्षिणेतिपाठेऽन्यदपि सुवर्णादि तत्र दातव्यम् । शोभनार्थे वा सुशब्दःपठितव्यः । सागौः शोभनादक्षिणादीनाम् । कांस्योपदोहेतिपाठान्तरम् । कांस्यंनामपरिमाणविशेषः । तत्रोपदुह्यते बहुक्षीरेत्यर्थः । लाङ्गलभूषितांभूमिंतुल्यपसंछन्नांकृत्वेत्यादिस्मृत्यन्तरदृष्टोविधिः फलविशेषार्थिनाश्रयणीयः । तथा । कपिला चेत्तारयति भूयआसप्तमात्कुलात् । वत्सवत्याः कपिलायादानएतत्फलंरोमतुल्यानि युगानि उभयतोमुखी दीयमाना रोमतुल्यानि वर्षसहस्राणि स्वर्गः प्राप्यते तारयति पापान्मोचयति । भारते सर्वफलंगोदानमुक्तम् । वार्यादीन्यपि स्वर्गफलानिश्रूयन्ते । भूमिपश्चन्नवस्त्राम्भस्तिलसर्पिष्प्रतिश्रयान् । नैवेशिकस्वर्णपुर्यादत्वा स्वर्गेमहीयते । नैवेशिकंवेश्म ॥ २३१ ॥

(२) सर्वज्ञनारायणः । ब्रध्नस्य सूर्यस्य विष्टपं लोकम् ॥ २३१ ॥

(३) कुल्लूकः । वस्त्रदश्चन्द्रसमानलोकान्प्राप्नोति । चन्द्रलोके चन्द्रसमविभूतिर्वसतीति एवमेवाश्विलोकंघोटकदः । बलीवर्दस्य दाता प्रचुरांश्रियं स्त्रीगवीप्रदःसूर्यलोकंप्राप्नोति ॥ २३१ ॥

(४) राघवानन्दः । तावत्पर्यन्तंऐहिकामुष्मिकंफलं । तदुत्तरेषामामुष्मिकमेव । अनडुत् बलीवर्दः । पुष्टिंमहतीं ऐश्वर्यंप्रभुत्वं महतींश्रीयुक्तस्यापि नियम्यत्वदृष्टेः । ब्रध्नस्य सूर्यस्य विष्टपं लोकम् ॥ २३१ ॥

(६) रामचन्द्रः । गोदः गवांदाता ब्रध्नस्य विष्टपं सूर्यलोकम् भास्कराहस्करब्रध्नइत्यमरः ॥ २३१ ॥

यानशय्याप्रदोभार्यामैश्वर्यमभयप्रदः ॥ धान्यदः शाश्वतं सौख्यं ब्रह्मदोब्रह्मसार्ष्टिताम् ॥ २३२ ॥

(१) मेधातिथिः । ऐश्वर्यमीश्वरत्वंप्रभुत्वम् । सुखित्वंसौख्यम् । धान्यानिव्रीहिमाषमुद्गादीनि । तिलानांफलान्तरमुक्तम् । ब्रह्म वेदः तद्ददाति योऽध्यापयति । व्याख्यातिच । ब्रह्मसार्ष्टिताअर्पणमृष्टिः । समाऋष्टिर्यस्य असौसार्ष्टिः । छान्दसत्वात्समानस्यसभावः । ऋषिगतौ । अर्पणंवा सार्ष्टिः । तद्भावासार्ष्टिता । उभयथापि ब्रह्मणःसमानगतित्वमेततुल्यत्वमित्युक्तंभवति ॥ २३२ ॥

(२) सर्वज्ञनारायणः । ब्रह्मदोवेदाध्यापकः ब्रह्मणा हिरण्यगर्भेण सहसार्ष्टितांसमानायुधत्वं तुल्याकारतामितियावत् । ऋष्टिशब्दआयुधपर्यायः ॥ २३२ ॥

(३) कुल्लूकः । रथादियानस्य शय्यायाश्च दाता भार्यां । अभयप्रदःप्राणिनामहिंसकःप्रभुत्वं । धान्यदोव्रीहियवमाषमुद्गादिसस्यानांदाता चिरस्थायि सुखित्वं । ब्रह्मवेदस्तत्प्रदोवेदस्याध्यापकोव्याख्याता च ब्रह्मणःसार्ष्टितांसमानगतितांतत्तुल्यतांप्राप्नोति ॥ २३२ ॥

(४) राघवानन्दः । भार्याप्रकृष्टां । अभयप्रदोऽहिंसकः । ब्रह्मदोवेददः । ब्रह्मसार्ष्टितां ब्रह्मसमानगतिं तत्तुल्यतांप्राप्नोतीत्यनुषज्यते । ऋषिर्गतिः । ऋषीगतौ समाना ऋष्टिः सार्ष्टिः ॥ २३२ ॥

(५) नन्दनः । ब्रह्मदोवेददः ब्रह्मसार्ष्टितांपरमात्मसायुज्यम् ॥ २३२ ॥

(६) रामचन्द्रः । ब्रह्मदः वेदस्याध्यापकः ब्रह्मसाम्यं तादात्म्यं प्राप्नोति ॥ २३२ ॥

सर्वेषामेव दानानांब्रह्मदानं विशिष्यते ॥ वार्यन्नगोमहीवासस्तिलकाञ्चनसर्पिषाम् ॥ २३३ ॥

(१) मेधातिथिः । पूर्वस्यविधेरर्थवादः । दीयन्तइति दानानि देयद्रव्याणि । दानक्रियैव वा दानम् । ब्रह्मदानं वेदाध्ययनव्याख्याने । वार्यादीनांसर्वदानोत्तमत्वाद्ग्रहणम् ॥ २३३ ॥

(२) **सर्वज्ञनारायणः** । दीयतइति दानं । वार्यादीनि यानि यानि दानानि तेषांदानानांमध्ये ब्रह्मवेदस्तद्रूपम ॥ २३३ ॥

(३) **कुल्लूकः** । उदकान्नधेनुभूमिवस्त्रतिलसुवर्णघृतादीनांसर्वेषामेव यानि दानानि तेषांमध्यात्वेददानंविशिष्यते प्रकृष्टफलदंभवति ॥ २३३ ॥

(४) **राघवानन्दः** । वार्याद्यष्टादशदानानांमध्ये वेददानंश्रेष्ठमित्याहसर्वेषामिति । वारीत्यादि दिक्प्रदर्शनं । अष्टादशानां सर्वदायेनगृहीतं उभयनाकसाधनत्वाद्वेदस्य ॥ २३३ ॥

(५) **नन्दनः** । सर्वेषांवार्यादीनांप्रदानानांप्रदेयानांमध्ये ॥ २३३ ॥

(६) **रामचन्द्रः** । ब्रह्मदानं वेदाध्ययनं विशिष्यते ॥ २३३ ॥

येन येन तु भावेन यद्यद्दानं प्रयच्छति ॥ तत्तत्तेनैव भावेन प्राप्नोति प्रतिपूजितः ॥ २३४ ॥

(१) **मेधातिथिः** । भावशब्दोऽयंचित्तधर्मे वर्तते । यादृशेन भावेन प्रसन्नेनचित्तेनश्रद्धयाऽऽदरेणददाति तादृशेनैव लभते । अथाऽश्रद्धयाऽवज्ञयाक्लिष्टंपरिभूय ददाति सोऽपि तथैव प्राप्नोति । यद्यदपि न द्रव्यजात्यभिप्रायम् । किंतर्हिफलएतदुच्यते । तांतांप्रीतिंतत्तद्द्रव्यसाध्यांप्राप्नोति । जात्यभिप्राये ह्यातुरायौषधवत् । औषधएव लभ्यतेतत्तद्दाभ्या तस्यानुपयोगीतिसोऽप्याक्षिपेत् । तथायादृश्युल्लासाद्यस्य प्रीतिस्तादृशींचैव प्राप्नोति । अतश्चसर्वदैवौषधदानआरोगित्वमुक्तंभवति । अथवाइदंमेस्यादिति या फलकामना सभावःयत्फलमभिसंधाय यद्यद्द्रव्यंददाति तत्तत्प्राप्नोति । तेनैव भावेन तयैवेच्छया यदैवेच्छतितदैवलभतइत्युक्तंभवति । सर्वफलत्वंसर्वद्रव्याणांप्रदर्शितंभवति ॥ २३४ ॥

(२) **सर्वज्ञनारायणः** । येनयेन भावेन सात्विकराजसादिना तेन भावेन तादृक्भावयोग्येन देवादिदेहेन प्रतिपूजितस्तत्तल्लोके ॥ २३४ ॥

(३) **कुल्लूकः** । अवधारणे तु शब्दः । येन येनैव भावेनाभिप्रायेण फलाभिसन्धिकःस्वर्गोमेस्यादितिमुमुक्षुर्मोक्षाभिप्रायेण निष्कामोयद्यद्दानंददाति तेनैव भावेनोपलक्षितस्तत्तद्दानफलद्वारेण जन्मान्तरे पूजितःसन्प्राप्नोति ॥ २३४ ॥

(४) **राघवानन्दः** । श्रद्धयैव देयमित्युपसंहरन्विपर्यये दोषमाह येनेतिद्वाभ्यां । भावेन सात्विकादिना ॥२३४ ॥

(५) **नन्दनः** । न केवलंवार्यादिप्रदाने तृप्त्यादिर्लाभः । किंतु सर्वस्याप्यभिलषितस्येत्याह येनेति ॥ २३४ ॥

योऽर्चितं प्रतिगृह्णाति ददात्यर्चितमेव च । तावुभौ गच्छतःस्वर्गं नरकं तु विपर्यये ॥ २३५ ॥

(१) **मेधातिथिः** । पूजापूर्वकंदातव्यंतादृशमेवचप्रतिग्रहीतव्यंनावज्ञयादातव्यमितिश्लोकस्यतात्पर्यम् । अर्चितमितिक्रियाविशेषणम् ॥ २३५ ॥

(२) **सर्वज्ञनारायणः** । अर्चितंयथाभवति तथा यद्दीयते पात्रपूजापूर्वकमित्यर्थः । अत्र दातुरर्चितानर्चितदानयोः स्वर्गनरकौ प्रतिग्रहीतुस्तु अर्चितमेव मयाग्राह्यमितिनियमे फलम् । अनर्चितग्रहणेतु दोषोस्त्येव ॥ २३५ ॥

(३) **कुल्लूकः** । योर्चापूर्वकमेव दाता ददाति यश्च प्रतिग्रहीताऽर्चापूर्वकमेव दत्तंप्रतिगृह्णाति तावुभौ स्वर्गंगच्छतोऽनर्चितदानप्रतिग्रहणे नरकं । पुरुषार्थे तु प्रतिग्रहेऽनर्चितमेव मयागृहीतव्यंनान्यथेतिनियमात्फललाभोन विरुद्धः ॥२३५॥

(४) **राघवानन्दः** । भावमेव व्यनक्ति यइति । अर्चितादिद्वयंद्रव्यविशेषणंक्रियाविशेषणंच तेन सत्कृत्य दत्तंसत्काप्पुरःसरमवाप्नोति । तदुक्तं । दातव्यमितियद्दानंदीयतेनुपकारिणे । देशे काले च पात्रेच तद्दानंसात्विकंस्मृतम् ॥ यत्तुप्रत्यु-

पकारार्थफलमुद्दिश्य वा पुनः। दीयते च परिक्लिष्टंतद्राजसमुदाहृतम् ॥ अदेशकाले यद्दानमपात्रेभ्यश्च दीयते॥ असत्कृतमवज्ञातंतत्तामसमुदाहृतमिति ॥ २३५ ॥

(५) नन्दनः। अर्चितंद्रव्यमितिशेषः ॥ २३५ ॥

(६) रामचन्द्रः। अर्चितं विधिना विध्युक्तप्रकारेण संकल्पितं गृह्णाति ददातिच ॥ २३५ ॥

न विस्मयेत तपसा वदेदिष्ट्वा च नानृतम् ॥ नार्तोप्यपवदेद्विप्रान्नदत्वा परिकीर्तयेत् ॥ २३६ ॥

(१) मेधातिथिः। तपसाऽनुष्ठितेन विस्मयंन कुर्यादति तीव्रंतपोमयाकृतंसुदुश्चरमित्येवंमनसिनकर्तव्यम्। इष्ट्वायागंकृत्वाऽनृतंन वदेत्। अविशेषेणप्रतिषिद्धस्यापि पुरुषार्थतया पुनः प्रतिषेधोयागाङ्गत्वज्ञापनार्थः। प्रतिषेधातिक्रमे हि ज्योतिष्टोमादेरङ्गहीनता भवति। आर्त्तः पीडितोऽपि ब्राह्मणैर्नतानपवदेन्ननिन्देत। दत्त्वागवादिद्रव्यंन कस्यचिदग्रतः परिकीर्तयेदिदंमयादत्तम् ॥ २३६ ॥

(२) सर्वज्ञनारायणः। नविस्मयेतअभिमानंन कुर्यात्। इष्ट्वा सोमयागंकृत्वा नानृतंवदेत्। आर्तोप्यतिपीडितोपि अपवदेत् निन्देत् ॥ २३६ ॥

(३) कुल्लूकः। चान्द्रायणादितपसा कृतेन कथंमयेदंदुष्करमनुष्ठितमितिविस्मयंन कुर्यात्। यागंच कृत्वा नासत्यंवदेत् कृतेपि पुरुषार्थतयाऽनृतवदननिषेधे क्रत्वर्थोयंपुनर्निषेधः ब्राह्मणैःपीडितोपि न तान्निन्दयेत्। गवादिकंच दत्वा मयेदंदत्तमितिपरस्य न कथयेत् ॥ २३६ ॥

(४) राघवानन्दः। विस्मयादिचतुष्टयकर्तव्यतांसार्थवादंनिषेधति नविस्मयेतिद्वाभ्यां। विस्मयेत कथंमयेदंदुष्करंकृतंतपइति। यद्वा। अहंतपस्वीति गर्वी न स्यात्। व्रीहिभिर्यागंकरोमीति संकल्प्य यवैर्न कुर्यात् नानृतंवदेदिति श्रुतेरयमर्थोनिर्णीतः। नानिष्ट्वा वाइष्टंमयेति न ब्रूयात्। स्वरसतोयज्वाअनृतवादी न स्यात्। आर्तः विप्रैःपरिपीडितोपि तान्न निन्देत् रोगार्तोवा ॥ २३६ ॥

(५) नन्दनः। बहुभ्यः कीर्तनंस्ववाचा परिकीर्तनम् ॥ २३६ ॥

(६) रामचन्द्रः। तपसा न विस्मयेदभिमानं न कुर्यात्। इष्ट्वायागंकृत्वा अनृतं मृषा न वदेत्। आर्तोब्राह्मणैः पीडितोपि विद्वान्पंडितः। नापवदेत् अपवादं न कुर्यात् न वदेत् विप्रान्दत्वा दानंन कीर्तयेत् ॥ २३६ ॥

यज्ञोऽनृतेन क्षरति तपःक्षरति विस्मयात् ॥ आयुर्विप्रापवादेन दानं च परिकीर्तनात् ॥ २३७ ॥

१) मेधातिथिः। पूर्वस्य प्रतिषेधस्यार्थवादोऽयम्। अनृतेन हेतुनायज्ञः क्षरतिस्रवति निष्फलोभवति यदर्थंकृतंतन्न संपद्यते। एवंसर्वत्र ॥२३७ ॥

(२) सर्वज्ञनारायणः। क्षरति तादृशफलशून्योभवति ॥ २३७ ॥

(३) कुल्लूकः। अनृतेन हेतुना यज्ञः क्षरति सत्येनैव सफलं साधयति एवंतपसि दानेच योज्यम्। विप्रनिन्दया चायुःक्षीयते ॥ २३७ ॥

(४) राघवानन्दः। कृते किंस्यात्तत्राह यज्ञ इति। क्षरति फलमदत्वैव नश्यति तच्चतुष्टयमित्यर्थः ॥ २३७ ॥

(६) रामचन्द्रः। यज्ञो ऽनृतेन क्षरति नश्यति निष्फलोभवति ॥ २३७ ॥

धर्मं शनैः संचिनुयाद्वल्मीकमिव पुत्तिकाः ॥ परलोकसहायार्थं सर्वभूतान्यपीडयन् ॥ २३८ ॥

(१) **मेधातिथिः** । महति दाने महति च तपसि महति च यज्ञे ज्योतिष्टोमादौ यद्यसमर्थस्तदा नोदासीनेन भवितव्यम् । किंतर्हि शनैः शनैः स्वल्पेन दानेन स्वल्पेन तपसा यथाशक्तिपरोपकारेण जपहोमाभ्यांस्मार्ताभ्यांधर्मः संचेतव्यो- यथामृत्संघातंपुत्तिकाः पिपीलिकाः संचिन्वन्ति । परलोकसहायार्थमितिधर्मफलानुवादः । सर्वभूतान्यपीडयन् याञ्चया धर्मार्थयाभूतानांपीडा न कर्तव्या ॥ २३८ ॥

(२) **सर्वज्ञनारायणः** । वल्मीकंमृत्स्तूपम् । वल्मीकामृत्करकीटः । पुत्रिकेतिक्वचित्पाठः । सहायः सहगामी । भूतान्यपीडयन्नितिहिंसाद्यधर्मेषु नात्यन्तं प्रसज्येतेत्यर्थः ॥ २३८ ॥

(३) **कुल्लूकः** । सर्वप्राणिनांपीडांपरिहरन्परलोकसहायार्थंयथाशक्ति शनैःशनैर्धर्ममनुतिष्ठेत् । यथा पुत्तिकाःपिपीलिकाप्रभेदाःशनैःशनैर्महान्तंमृत्तिकाकूटंसंचिन्वन्ति ॥ २३८ ॥

(४) **राघवानन्दः** । धर्मस्यावश्यकर्तव्यतामाहधर्ममितिषड्भिः । पुत्तिकाः स्वमूत्रेण भूमिमार्द्रीकृत्य सच्छिद्रंमृत्पुञ्जंसंचिन्वन्तियाःपिपीलिकाविशेषास्ताः । वल्मीकं प्रसिद्धं । तत्किमर्थंतत्राहपरेति । अपीडयन् वैधेतरहिंसामकुर्वाणःअहिंसन्सर्वभूतान्यन्यत्र तीर्थेभ्यइतिश्रुतेः ॥ २३८ ॥

(६) **रामचन्द्रः** । पुत्तिकाः कृमयः पिपीलिकाः । वल्मीकमिव संचिनुयात् ॥ २३८ ॥

नामुत्र हि सहायार्थं पिता माता च तिष्ठतः॥ न पुत्रदारान ज्ञातिर्धर्मस्तिष्ठति केवलः॥२३९॥

(१) **मेधातिथिः** । भूतानुवादोऽयम् । अमुत्र जन्मान्तरे सहायार्थंनरकादिदुःखादुद्धरणार्थंन कस्यचित्सुहृद्बान्धवादेः शक्तिरस्ति । केवलएव जीवता योधर्मः कृतः सतमुद्धरति ॥ २३९ ॥

(२) **सर्वज्ञनारायणः** । धर्मस्तिष्ठतिकेवलः कृत्स्नः ॥ २३९ ॥

(३) **कुल्लूकः** । यस्मात्परलोके सहायकार्यसिद्ध्यर्थंन पितृमातृपत्नीज्ञातयस्तिष्ठन्ति । किंतु धर्मएवैकोद्वितीयभावेनोपकारार्थमवतिष्ठते । तस्मात्पुत्रादिभ्योपि महोपकारकंधर्ममनुतिष्ठेत् ॥ २३९ ॥

(४) **राघवानन्दः** । अमुत्र परलोके । अतोन धर्मतुल्यः कश्चित् । पुत्राश्च दाराश्च तत्पुत्रदारम् ॥ २३९ ॥

(६) **रामचन्द्रः** । अमुत्र परलोके सहायार्थं पित्रादयोन तिष्ठन्ति केवलः एकः धर्मः साहाय्यार्थंतिष्ठति ॥२३९॥

एकःप्रजायते जन्तुरेकएव प्रलीयते ॥ एकोऽनुभुङ्क्ते सुकृतमेकएव च दुष्कृतम् ॥ २४० ॥

(१) **मेधातिथिः** । यथा जन्तुः प्राण्येकएवजायते न सुहृद्बान्धवादिना सहैकएवप्रलीयते न सुहृदोबान्धवाः सहमरणमनुभवन्ति । यदिनामभार्याऽन्योवा भक्तोजनस्तन्मरणकालआत्मानंहन्यात्तथापि पृथगेवासौ मरणक्रिया । अनयानगर्भैक्यमन्विवदनुभवन्ति एवंसुकृतदुष्कृतेअपि पृथगेवानुभवन्ति । ननु च नपुत्रदारमित्युक्तंयावता पुत्रःश्राद्धादिक्रियया पितुरुपकरोत्येवमृतस्यैवं भार्यापि । सत्यम् । धार्मिकस्यैव तादृशः पुत्रोभवतीति तत्परमेतत् । यथाजीवतः कस्यचिद्धस्तग्राहिकया कश्चित्सहायोभवत्येवंमृतस्य पुत्रोधर्मद्वारेणैवोपकरोति ॥ २४० ॥

(२) **सर्वज्ञनारायणः** । प्रसूयते जायते । प्रलीयतेम्रियते ॥ २४० ॥

(३) **कुल्लूकः** । एकएव प्राण्युत्पद्यते न बान्धवैःसहितः । एकएव च म्रियते । सुकृतफलमपि स्वर्गादिकंच दुरितफलंच नरकादिकमेकएव भुङ्क्ते न मात्रादिभिःसह तस्मान्मात्राद्यपेक्षयाऽपि धर्मंन त्यजेत् ॥ २४० ॥

(४)राघवानन्दः। एकोऽसहायी। प्रमीयतेम्रियते। सुकृतभोगेपि सहायोनास्तिकिंदुष्कृतभोगइत्याहएकइति ॥२४०॥

मृतं शरीरमुत्सृज्य काष्ठलोष्ठसमं क्षितौ ॥ विमुखाबान्धवायान्ति धर्मस्तमनुगच्छति ॥२४१॥

(१) **मेधातिथिः**। सह गच्छति । इदमन्यक्षसिद्धप्रसंख्यानार्थमुच्यते। मृतस्य शरीरंक्षितावुत्सृज्य काष्ठमिव निःप्रयोजनंविमुखाबान्धवाः प्रतिगच्छन्ति। धर्मस्तु केवलस्तंपुरुषमनुगच्छति ॥ २४१ ॥

(२) **सर्वज्ञनारायणः**। काष्ठसमं दाहपक्षे। लोष्ठसमं भूमिप्रापणपक्षे ॥ २४१ ॥

(३) **कुल्लूकः**। मृतंशरीरमनःप्राणादित्यक्तंकाष्ठलोष्ठवदचेतनंभूमौ त्यक्त्वा पराङ्मुखाबान्धवायान्ति न मृतंजीवमनुयान्ति। धर्मस्तु तमनुगच्छति ॥ २४१ ॥

(४) **राघवानन्दः**। क्षितौ प्रक्षेपाधारे। यान्ति स्वगृहंप्रति । तत्रापि विमुखाःअहोकष्टंवर्तते ॥ २४१ ॥

(६) **रामचन्द्रः**। तं मृतं धर्मः अनुगच्छति ॥ २४१ ॥

तस्माद्धर्मं सहायार्थं नित्यं संचिनुयाच्छनैः ॥ धर्मेण हि सहायेन तमस्तरति दुस्तरम् ॥ २४२॥

(१) **मेधातिथिः**। उपसंहारोऽयम्। दुस्तरंतमः कृच्छ्रेण यत्तीर्यते तमोदुःखंतदपि धर्मेण सहायेन सुतरंभवति। नहितादृशे तमसि मज्जतीत्यर्थः ॥ २४२ ॥

(२) **सर्वज्ञनारायणः**। शनैरितिनात्यन्तमात्मानमवसादयेदित्यर्थः ॥ २४२ ॥

(३) **कुल्लूकः**। यस्माद्धर्मेण सहायेन दुस्तरंतमोनरकादिदुःखंतरति तस्माद्धर्मंसहायभावेन सततंशनैरनुतिष्ठेत् ॥ २४२ ॥

(४) **राघवानन्दः**। स्वौत्सुक्यमाह तस्मादिति। तमः नरकं अविद्यां। अन्तःकरणशुद्धिद्वाराज्ञानावाप्त्या ॥१४२॥

(६) **रामचन्द्रः**। तमः नरकं तरति ॥ २४२ ॥

धर्मप्रधानं पुरुषं तपसा हतकिल्बिषम् ॥ परलोकं नयत्याशु भास्वन्तं खशरीरिणम् ॥२४३॥

(१) **मेधातिथिः**। धर्मः प्रधानंयस्यासौ धर्मप्रधानो धर्मपरायणोयथाविहितकर्मानुष्ठायी। तपसाहतकिल्बिषंकथंचित्प्रमादकृतव्यतिक्रमे तपसा प्रायश्चित्तेन हतकिल्बिषः शास्त्रव्यतिक्रमे जातोयोदोषस्तस्मिंस्तत्प्रायश्चित्तेन नष्टे परलोकंनयति भास्वन्तंपरलोकंदेवस्थानंस्वर्गादि नयति प्रापयतिकः प्रकृतत्वाद्धर्मएव । शरीरिणंपुरुषंखेन शरीरेणशरीरी। नयशाऽन्येषांपुरुषाणांपाञ्चभौतिकंशरीरमेवंतस्य। किंतर्हि खमेवशरीरंब्रह्मविभुत्वमनेनोच्यते ॥ २४३ ॥

(२) **सर्वज्ञनारायणः**। तपसा चान्द्रायणादिना । नयति धर्मः खशरीरिणं आकाशवत्क्वचिदप्यप्रतिहतदेहम् ॥ २४३ ॥

(३) **कुल्लूकः**। धर्मपरंपुरुषंदैवादुपजाते पापे प्राजापत्यादितपोरूपप्रायश्चित्तेन हतपापंदीप्तिमन्तंप्रकृतोधर्मएव शीघ्रंब्रह्मस्वर्गादिरूपंपरलोकंनयति । खंब्रह्मेत्याद्युपनिषत्सुखशब्दस्य ब्रह्मणि प्रयोगः खरशरीरिणंब्रह्मस्वरूपमित्यर्थः। यद्यपि लिङ्गशरीरावच्छिन्नोजीवएव गच्छति तथापि ब्रह्मांशत्वाद्ब्रह्मस्वरूपमुपपन्नंधर्मएव चेत्परंलोकंनयति ततोधर्ममनुतिष्ठेत् ॥ नहि वेदाःस्वधीतास्तु शास्त्राणि विविधानि च। तत्र गच्छन्ति यत्रास्य धर्मएकोनुच्छति ॥ २४३ ॥

(४) **राघवानन्दः**। अहोधर्मस्यासाध्यंनास्तीत्याह धर्ममिति। धर्मप्रधानं फलप्रधानंपरलोकंपरंब्रह्मैव लोकंआत्मा येषांनोयमात्मायंलोकइति श्रुतेः। खशरीरिणं आकाशशरीरं ब्रह्मभूतंआकाशोवै नामरूपयोर्निर्वहितेत्यादौ ब्रह्मण्याकाशशब्दप्रयोगात्। नयति प्रापयति धर्मएव परंपरयेति शेषः ॥ २४३ ॥

(६) रामचन्द्रः । कीदृशं पुरुषं खशरीरिणं आकाशवदप्रतिहतगतिम् ॥ २४३ ॥

उत्तमैरुत्तमैर्नित्यं संबन्धानाचरेत्सह ॥ निनीषुः कुलमुत्कर्षमधमानधमांस्त्यजेत् ॥ २४४ ॥

(१) मेधातिथिः । बहुप्रकारत्वादुत्तमस्य तदपेक्षावीप्सा । कश्चिज्जात्योत्कृष्टः कश्चिद्विद्यया कश्चिच्छीलेनाथवा-संबन्धिभेदाद्यः कश्चित्संबधः केनचिदुत्तमेन योग्यः । उत्तमैरुत्तमैर्जात्यादिभिरुत्कृष्टैः कन्यादानादिलक्षणांन्संबन्धानाचरे-त्कुर्यान्निनीषुर्नेतुंप्रापयितुमिच्छुः कुलमुत्कर्षंश्रैष्ठ्यमधमानधमांस्त्यजेत् । उत्तमैश्च विधानादधमानांत्यागे सिद्धउत्तमासंभवे मध्यमानुज्ञानार्थं त्यागवचनम् । अधमानिकृष्टाः ॥ २४४ ॥

(२) सर्वज्ञनारायणः । सबन्धानविवाहयाजनमैत्र्यात्रीन् ॥ २४४ ॥

(३) कुल्लूकः । कुलमुत्कर्षंनेतुमिच्छन्विद्याचारजन्मादिभिरुत्कृष्टैःसह सर्वदा कन्यादानादिसंबन्धानाचरेत । अप-कृष्टांस्तु संबन्धांस्त्यजेत् । उत्तमविधानादेवाधमपरित्यागे सिद्धे यत्पुनरधमांस्त्यजेदित्यभिधानंतदुत्तमासंभवे स्वतुल्या-द्यनुज्ञानार्थम् ॥ २४४ ॥

(४) राघवानन्दः । कुलस्योत्कर्षोपायमाह उत्तमैरितिद्वाभ्याम् । वेदाचारनिष्ठैः । संबन्धान्ब्राह्मान् । यौनांश्च निनीषुः प्रापयितुमिच्छुः । वीप्सात्र जात्युत्कर्षविद्योत्कर्षधर्मोत्कर्षाद्यपेक्षया । त्यजेदित्यन्यत्यागस्यार्थिकत्वेऽप्युत्तमा-लाभेऽधमोऽपि ग्राह्यइत्यर्थम् ॥ २४४ ॥

(६) रामचन्द्रः । उत्तमैःकुलैःसह संबन्धान्कुर्वन् आचरेतकुलं उत्कर्षं निनीषुः प्रापयिषुः अधमांस्त्यजेत्॥२४४॥

उत्तमानुत्तमान् गच्छन् हीनान् हीनांश्च वर्जयन् ॥ ब्राह्मणः श्रेष्ठतामेति प्रत्यवायेनशूद्रताम्॥२४५॥

(१) मेधातिथिः । उत्तमान्गच्छंस्तैः सहसंबन्धंकुर्वन्ब्राह्मणः श्रेष्ठतामेति । ब्राह्मणग्रहणंक्षत्रियवैश्ययोरपिप्रदर्शना-र्थम् । प्रत्यवायेन विपरीताचरणेन हीनैः सह संबन्धिनः प्रातिलोम्येन शूद्रतांगच्छति । जातेरनपायस्तांतुल्यतांप्राप्नोती-त्युक्तंभवति ॥ २४५ ॥

(२) सर्वज्ञनारायणः । प्रत्यवायेन प्रतिकूलगमनेनाधर्म्यसंबन्धेनेतियावत् ॥ २४५ ॥

(३) कुल्लूकः । उत्तमान्गच्छंस्तैःसह संबन्धंकुर्वन्ब्राह्मणःश्रेष्ठतांगच्छति । प्रत्यवायेन विपरीताचारेण हीनैः सह संबन्धे जातेरपकर्षतया शूद्रतुल्यतामेति ॥ २४५ ॥

(४) राघवानन्दः । धर्मानुष्ठानेन ब्राह्मणोब्रह्मबन्धुः श्रेष्ठतामेति । हीनानवरान् । हीनस्त्रीपाखण्डादिगमनंप्रत्यवा-यस्तेनावरसंबन्धेनः ॥ २४५ ॥

(५) नन्दनः । प्रत्यवायेनोक्तविपर्ययेणक्रियायाम् । शूद्रतांशूद्रसमताम् ॥ २४५ ॥

(६) रामचन्द्रः । उत्तमैः सहसंबन्धान्कुर्वन्ब्राह्मणः श्रेष्ठतामेति । एवंक्षत्रियवैश्ययोरपि प्रत्यवायेन प्रतिकूलाचरणे-नशूद्रतां ब्राह्मणएति । स्वधर्मेण श्रेष्ठतांएति ॥ २४५ ॥

दृढकारी मृदुर्दान्तः क्रूराचारैरसंवसन् ॥ अहिंस्रोदमदानाभ्यांजयेत्स्वर्गंतथाव्रतः ॥ २४६ ॥

(१) मेधातिथिः । कर्तव्येषु दृढनिश्चयोदृढकारी । यत्करोति तदवश्यंसमापयति न पुनःकार्यमारभ्यासमाप्य नि-वर्तते नानवस्थितइत्यर्थः । तदुक्तंप्रारब्धस्यान्तगमनम् । मृदुरनिष्ठुरः क्रूराचारैस्तेनादिभिर्नसंबन्धः । तैः सह संबन्धंन-कुर्वन्यथादमदानाभ्यांस्वर्गंजयेत्प्राप्नुयात् । तथाव्रतःएतद्व्रतंनियमंधारयन् । दमस्य पृथगुपादानाद्दान्तोद्वन्द्वसहिष्णुर्द्रष्टव्यः ॥ २४६ ॥

(२) सर्वज्ञनारायणः । दृढकारी यद्धर्मसाधनंकर्तुंप्रवृत्तस्ततोनविरतः मृदुर्मृदुवाक् दान्तः क्लेशसहः । असंवसन्-सहावसन्दमदानाभ्यामिति दमशब्देन तपःक्लेशसहत्वाभिधायिना तपोलक्ष्यते । व्रतैर्निषिद्धानाचरणनियमैः। क्वचित्तथाव्रत-इतिपाठस्तत्रतादृक्गृहीतनियमइत्यर्थः ॥ २४६ ॥

(३) कुल्लूकः । प्रारब्धसंपादयितादृढकारी मृदुरनिष्ठुरः । दमस्य पृथगुपादानाद्दान्तइनिशीतातपादिद्वन्द्वसहिष्णु-र्गृहीतव्यः । क्रूराचारैःपुरुषैःसंसर्गपरिहरन्परहिंसानिवृत्तः । तथाव्रतएवनियमदमेन्द्रियसंयमाख्येन च दानेन स्वर्गप्राप्नो-ति ॥ २४५ ॥

(४) राघवानन्दः । किंचदृढकारीति । प्रारब्धकर्मसमापयिता । क्रूराचारैः क्रूरआचारोविप्रहिंसादिर्येषां तथा-व्रतः उक्तसाधननिष्ठः । जयेत् प्राप्नुयात् । केन दमदानाभ्यां दमोबाह्येन्द्रियनियमः । दानम् प्रसिद्धम् ॥ २४६ ॥

(५) नन्दनः । धर्मसमुच्चयमाह दृढेति ॥ २४६ ॥

(६) रामचन्द्रः । क्रूराचारैःपुरुषैःस्तेनादिभिः असंवसन् वसेत् । दमः इन्द्रियनिग्रहः । समाहितः । तथाव्रत-इतिपाठः ॥ २४६ ॥

एधोदकंमूलफलमन्नमभ्युद्यतंच यत् ॥ सर्वतः प्रतिगृह्णीयान्मध्वथाभयदक्षिणाम् ॥२४७॥

(१) मेधातिथिः । एधइन्धनंकाष्ठादि । अन्नंपक्वमामंवा । अभ्युद्यतमभिमुखमुपनीतम् । एतत्सर्वतः प्रतिग्रहीतव्यं-पतिताभिशस्तचण्डालादिप्रतिलोमवर्जेशूद्रादन्यस्माद्वेषत्पापकर्मणः।मधु माक्षिकंा।अभयंदक्षिणेव दृष्टान्तार्थमेतत्। प्रतिग्रहोहि परकीयस्यद्रव्यस्य तदिच्छया स्वीकारोन चान्नरूपता । न ह्यत्र कस्यचित्स्वाम्यंनिवर्तते नच कस्यचिदुपजायते । अतः स्तुत्यादक्षिणाशब्दप्रयोगः । यथाचण्डालादिभ्योऽप्यरण्ये कान्तारे वा रक्षा चौरादिभ्योङ्गीक्रियमाणानदोषायैवमेतदे-धादिगृह्यमाणंन दोषाय । अनापदि चायंविधिः । आपदितुचण्डालादिभ्योऽपि वक्ष्यति । अभ्युद्यतशब्दश्चान्नेनैव सह सं-बध्यतेप्रत्यासत्त्या नैधादिभिः । अतएधादिषुयाच्याऽविरुद्धा । धार्मिकेभ्योद्विजातिभ्यःकर्तव्यस्तुपरिग्रहइत्यधार्मिकेभ्यो-द्विजेभ्यःशूद्राच्चाप्राप्तः । इष्यतेचद्रव्यविशेषोपयाच्ञा ।तदर्थमिदम् ॥ २४७ ॥

(२) सर्वज्ञनारायणः । अत्राभयदक्षिणाव्यतिरिक्तेष्वभ्युद्यतमिति सर्वत्र संबध्यते । अभ्युद्यतमभ्यर्थ्य दत्तम् । सर्वऽतोप्रतिग्राह्यवित्तादपि प्रतिगृह्णीयात् प्रतिग्रहीतृवृत्तौ नतु तन्निवृत्तोपि याचित्वा ग्रहणेतु दोषः । अभयरूपांदक्षि-णाम् ॥ २४७ ॥

(३) कुल्लूकः । काष्ठजलफलमूलमधूनि अन्नंचाभ्युद्यतमयाचितोपनीतम् । अन्यत्र कुलटाषण्ढपतितेभ्यस्तथा-द्विषइति याज्ञवल्क्यवचनात्कुलटादिवर्जंसर्वतः शूद्रादिभ्योपि प्रतिगृह्णीयात् । आममेवाददीतास्मादित्युक्तत्वादामान्नमेव शूद्रात्प्रतिग्राह्यं अभयंचात्मत्राणात्मकंप्रीतिहेतुत्वाद्दक्षिणातुल्यंचण्डालादिभ्योपि स्वीकुर्यात् ॥ २४७ ॥

(४) राघवानन्दः । द्रव्याभावे कथंदानमिति चेत्तत्रेदर्शीभिक्षांसार्थवादांसर्वतोग्राह्यामाह एधेतिचतुर्भिः । अभ्यु-द्यतंअयाचितोपपन्नं । एधआदिषण्णांविशेषणं । अन्यत्रकुलटाषण्डपतितेभ्यस्तथाद्विषइतियाज्ञवल्क्यवचनात्तदन्येभ्यः । शूद्रादिभ्योपिगृण्हीयात् । अभयं स्वात्मत्राणं तदेव दक्षिणा प्रीतिहेतुत्वात् ॥ २४७ ॥

(५) नन्दनः । अथानापद्यपि प्रतिग्राह्याण्याह एधइति । अभयदक्षिणामभयदानम् ॥ २४७ ॥

(६) रामचन्द्रः । ग्राह्यवस्तून्याह गन्धेति गन्धं सुगन्धं कर्पूरादिकं । यदभ्युदितं अभ्यर्थ्यदत्तम् । च पुनः उदकादिकं सर्वं प्रतिगृह्णीयात् ॥ २४७ ॥

आहृताभ्युद्यतां भिक्षां पुरस्तादप्रचोदिताम् ॥ मेने प्रजापतिर्ग्राह्यामपि दुष्कृतकर्मणः ॥ २४८ ॥

(१) **मेधातिथिः** । एधादतिरेकेण यदन्यद्द्रव्यंतस्याप्यनेन विशेषेण ग्राह्यतोच्यते । भिक्षाशब्दश्च प्रशंसायांप्रयुक्तोन भिक्षेव विवक्षिता यद्यप्ययंसिद्धान्नाल्पतावचनः । भिक्षा किल स्वल्पत्वान्नातीव दोषावहा । ब्रह्मचारिणश्च सार्ववर्णिकी विहिता । एवमन्यदप्यनेनविशेषेण तत्तुल्यंद्रष्टम । भिक्षाशब्दस्यैवंविधार्थविवक्षया प्रयोगः । तथाहि महाभारते । गत्वातुभौभार्गवकर्मशालांपार्थौपृथाप्राप्यमहानुभावौ । तौयाज्ञसेनींपरमप्रतीतौ भिक्षेयमित्यावेदयतांनराग्र्याविति । आहृतोपहृता तंदेशमानीता यत्र प्रतिग्राहीस्थितः । अभ्युद्यताऽग्रेस्थापिता वचनेनेङ्गितेन वा गृह्यतामिति निवेदिता । पुरस्तात्पूर्वमप्रचोदिताऽयाचिता प्रतिग्रहीत्रा । स्वयंपरमुखेन वा दात्रा पूर्वेनोक्तमिदंमेद्रव्यमस्ति तत्प्रसादमाश्रित्य गृह्यतामिति केवलमतर्कितोपपादिता तत्कालएवदर्शिताभिप्राया तादृशींभिक्षांप्रजापतिर्हिरण्यगर्भोमेनेमन्यतेस्म । किमितिदुष्कृतकर्मणोऽपिसकाशाद्ग्राह्येति । दुष्कृतंपापंकर्मयस्यासौ दुष्कृतकर्मा ॥ २४८ ॥

(२) **सर्वज्ञनारायणः** । भिक्षां आहृतांस्वंगृहं अभ्युद्यतांप्रयत्नोपहृतां पुरस्तात्पूर्वमप्रचोदितां दास्यामीत्यनिवेदिताम् ॥ २४८ ॥

(३) **कुल्लूकः** । आहृतांसंप्रदानदेशमानीताम् । अभ्युद्यतामाभिमुख्येन स्थापिताम् । अप्रचोदितांप्रतिग्रहीत्रास्वयमन्यमुखेनवा पूर्वमयाचितांदात्राच तुभ्यमिदंददानीतिपूर्वमकथितांहिरण्यादिभिक्षां । नतु सिद्धान्नरूपां अन्नमभ्युद्यतंचेत्युक्तत्वात्पापकारिणोपि पतितादिवर्ज्यंग्राह्यमितिविरिञ्चिरमन्यत ॥ २४८ ॥

(४) **राघवानन्दः** । किंच आहृतां संप्रदानदेशमानीतांअभ्युदितां आभिमुख्येन स्थापितांअप्रचोदितां प्रतिग्रहीत्रा स्वयमन्यमुखेन वाऽयाचितांदात्रा तुभ्यंददामीति पूर्वमकथितांचगोहिरण्यादिरूपाम् ॥ २४८ ॥

(५) **नन्दनः** । न केवलमभ्युद्यतमन्नंप्रतिग्राह्यमेव किंतुभोज्यमपीत्याह आहृतेति । आहृतांदात्राप्रतिग्रहीत्रेदातुमानीताम् । उद्यतांदेयत्वेनोत्क्षिप्ताम् । भिक्षामन्नम ॥ २४८ ॥

(६) **रामचन्द्रः** । आनीतां अभ्युदितां अभ्यर्थ्य प्रार्थ्य दत्तां भिक्षां नोदितां ग्राह्यां प्रजापतिः मेने अपि दुष्कृतकर्मणः सकाशात् ॥ २४८ ॥

नाश्नन्ति पितरस्तस्य दशवर्षाणि पञ्च च ॥ न च हव्यं वहत्यग्निर्यस्तामभ्यवमन्यते ॥ २४९ ॥

[चिकित्सककृतघ्नानां शिल्पकर्तुश्च वार्धुषेः ॥ षण्ढस्य कुलटायाश्च उद्यतामपि वर्जयेत् ॥ १ ॥[1]]

[न विद्यमानमेवंवै प्रतिग्राह्यं विजानता ॥ विकल्प्याविद्यमाने तु धर्महीनः प्रकीर्तितः ॥ २ ॥ §]

(१) **मेधातिथिः** । अथाग्रहणनिन्दार्थवादः । अभयोयत्रैतामवधीरयति तस्य पितरःश्राद्धंनाश्नन्ति नप्रतीच्छन्तीति । अग्निश्च देवेभ्योहव्यंन वहति पित्र्यादैवाच्चकर्मणोनफलंलभ्यतइत्यर्थः । अत्र कश्चिदाह अनुपयुज्यमानमपिदातुरनु-

१ (क, ख, ग, घ, ञ, ठ, ढ, ण, त, थ, ल.) । (ट, ड.) चिन्हितपुस्तकयोः सप्त श्लोकोवर्तते परंतु तन्मध्ये-केचनशब्दाभिन्नाःसन्ति अर्थस्तु एकएव ।

§ (ल)

ग्रहार्थमवश्यमीदृशंग्रहीतव्यं तत्त्वयुक्तम् । निर्दोषताऽस्यायाचितप्रतिग्रहस्योच्यते । प्रतिप्रसवोह्ययम् प्रतिषिद्धस्यचप्रतिप्रसवोभवति । लौकिक्याचार्थितया प्राप्तिःप्रतिषिद्धा सैवप्रतिप्रसूयते ॥ २४९ ॥

(२) सर्वज्ञनारायणः । पञ्चदशवर्षाणि पित्र्यं दैवंच तस्य वृथा भवति यस्तामवमन्यतेप्रतिक्षिपतीति निन्दार्थवादः । पूर्वविधिविशेषोदोषानांदृढीकरणार्थः ॥ २४९ ॥

(३) कुल्लूकः । तेनोपकल्पितंश्राद्धेषु कव्यंपञ्चदशवर्षाणि पितरोन भुञ्जते । नच यज्ञेषु तेन दत्तंपुरोडाशादिहव्यमग्निर्वहति देवान्प्रापयति यस्तांभिक्षांन स्वीकरोति ॥ २४९ ॥

(४) राघवानन्दः । ईदृशींपरित्यजन्हव्यकव्ययोःफलंनप्राप्नोतीत्याह नेति । अभ्यवमन्येत न स्वीकरोति ॥२४९॥

(५) नन्दनः । तस्यदीयमानांभिक्षामभ्यवमन्यते प्रत्याख्याति ॥ २४९ ॥

(६) रामचन्द्रः । यः पुरुषः एतादृशींभिक्षां अवमन्यते तस्य पुरुषस्य पितरः नाश्नन्ति अग्निः हव्यंन वहति न स्वीकरोतीत्युच्यते । भिक्षाशब्दः प्रशंसायांप्रयुक्तोन भिक्षैव भिक्षैव चेद्ब्रह्मचारिणः सार्ववर्णिकी अभिहिता तस्मादर्थविशेषे भिक्षाशब्दः अपरत्रच ॥ २४९ ॥

[(६) रामचन्द्रः । चिकित्सकेति । चिकित्सकादिभिः उद्यतांभिक्षांवर्जयेत् ॥ १ ॥]

[(६) रामचन्द्रः । नविद्येति । गन्धादिव्यतिरेकेण यदन्यद्द्रव्यंतस्याप्यनेन विशेषेण न ग्राह्यत्वम् ॥ २ ॥]

शय्यांगृहान्कुशान्गन्धानपः पुष्पं मणीन्दधि ॥ धानामत्स्यान्पयोमांसं शाकं चैव न निर्नुदेत् ॥ २५० ॥

(१) मेधातिथिः । शय्यादीन्यनाहृतान्यपि न निर्णुदेन्न प्रत्याचक्षीत यदि गृहेऽवस्थितानि द्रव्याणि कश्चिदुच्यतेचेदमिदमाहराम्येतत्प्रगृह्यतां तदान प्रत्याख्येयानि ॥ २५० ॥

(२) सर्वज्ञनारायणः । पयोदुग्धं न निर्णुदेन्नपरिहरेत् । एतत्सर्वंप्रतिग्राह्यद्रव्यादागतं प्रयोजनाभावादिप्रतिसंधानेन न त्याज्यं त्यागेतु दोषइत्यर्थः ॥ २५०

(३) कुल्लूकः । गन्धान्गन्धवन्ति कर्पूरादीनि । धानाभृष्टयवतण्डुलान् । पयःक्षीरं । पूर्वमाहरणोपायनिबन्धेन गवादीनामप्रत्याख्यानमुक्तं शय्यादीनि त्वयाचिताद्वृतान्यपि दात्रा स्वगृहस्थितान्ययाचितोपकल्पितानि न प्रत्याचक्षीत ॥ २५० ॥

(४) राघवानन्दः किंच गुर्वादीनांपीष्टा नैतान्परित्यजेदित्याह शय्यामिति । मणीन् मरकतादीन् । धानाभृष्टयवान्-हृतान्ननिर्णुदेत् न त्यजेत् । गुर्वाद्युपजीवनार्थेसर्वमादेयम् ॥ २५० ॥

(५) नन्दनः । अन्यदप्यभ्युद्यतं प्रतिग्राह्यमाह शय्यामिति । निर्णुदेन्निराकुर्यात् । निर्णुदेदितिवचनाद्दातुमभ्युद्यतमितिगम्यते ॥ २५० ॥

(६) रामचन्द्रः । ग्राह्याण्याह शय्यामिति । शय्यागृहादीन्ननिर्नुदेत् न त्यजेदित्यर्थः ॥ २५० ॥

गुरून्भृत्यांश्चोज्जिहीर्षन्नर्चिष्यन् देवतातिथीन् ॥ सर्वतः प्रतिगृह्णीयान्न तु तृप्येत्स्वयं ततः ॥२५१॥

(१) मेधातिथिः । गुरवउपदेशातिदेशैर्बहवः । भृत्याआश्रिताः स्मृत्यन्तरे तु संख्याताः । वृद्धौ तु मातापितरौ भा-

---

(२५०) मणीन्दधि=फलंदधि (न, ह्न, ढ)

र्या साध्वी सुतः शिशुः । तानुद्धर्तुमिच्छुःक्षुधावसन्नानदेवतातिथींश्चार्चिष्यन्नित्यकर्मसंपत्त्यर्थंसर्वतः प्रतिगृह्णीयात्साधुभ्योऽसाधुभ्यश्च । नतु तृप्येत्स्वयंततः तृप्तिःक्षुन्निवृत्तिरुपभोगश्च तन्न कुर्यात् । गुर्वादिप्रयोजनमेवतद्गृहीतव्यंनत्वात्मार्थम् ॥ २५१ ॥

(२) सर्वज्ञनारायणः । गुरून् मातृपित्राचार्योपाध्यायादीन् । उज्जिहीर्षन्नवृत्त्या नश्यतउत्तरिष्यन् । देवताअतिथींश्चार्चिष्यन्निति प्राक्संकल्पिकत्वे सत्यर्चनस्य सर्वतोनिन्दितादपि । तृप्येदुपयुञ्जीत तस्यांशेन ॥ २५१ ॥

(३) कुल्लूकः । मातापित्रादिगुरून्भृत्यांश्च भार्यादीन् क्षुधावसन्नानुद्धर्तुमिच्छन्पतितादिवर्जंसर्वतःशूद्रादेरसाधुभ्यश्च प्रतिगृह्णीयात् । नतु तेन धनेन स्वयंवर्त्तेत ॥ २५१ ॥

(४) राघवानन्दः । अतः कुल्यादिभ्योऽपि प्रतिगृह्णीयादित्याह गुरूनिति । गुरूनुपदेष्टॄन् भृत्यानाश्रितान् भार्यादींश्चोज्जिहीर्षन् क्षुधाधिभ्यउद्धर्तुमिच्छन् अदृष्टार्थमर्चिष्यन् न तु तृप्येत्तद्धनंस्वभोगाय नादद्यात् ॥ २५१ ॥

(५) नन्दनः । एवंद्रव्यविशेषतः सर्वात्माप्रतिग्रहउक्तः इदानीमुपयोगविशेषतोऽप्याह गुरूनिति । गुरवः पित्रादयः । भृत्याःपुत्रदारादयः । उद्धरिष्यन्नापदइतिशेषः । ततःस्वयंन तृप्येत्तेनप्रतिगृहीतेन द्रव्येण स्वशरीरंन पोषयेत् ॥ २५१ ॥

(६) रामचन्द्रः । गुरून्भृत्यांश्च उज्जिहीर्षन्अवृत्त्या नश्यतः उद्धरिष्यन्सर्वतः प्रतिगृह्णीयात् ततःप्रतिग्रहात्स्वयंन तृप्येत् ॥ २५१ ॥

गुरुषु त्वभ्यतीतेषु विना वा तैर्गृहे वसन् ॥ आत्मनोवृत्तिमन्विच्छन् गृह्णीयात्साधुतः सदा ॥२५२॥

(१) मेधातिथिः । कथंतर्ह्यात्मायापयितव्योऽतआह । अभ्यतीतेष्वतीतेषुविना वा तैर्जीवन्तोऽपि यदि पृथग्वसन्ति । गुरुग्रहणंसर्वेषांचभृत्यानामपि प्रदर्शनार्थम् । आत्मनोवृत्तिंजीवनंप्रतीच्छन्नर्थयमानः साधुभ्योधार्मिकेभ्यःप्रतिगृह्णीयात् । जातेरत्रानुपादाच्छूद्रादपिधार्मिकादस्ति प्रतिग्रहः । तदुक्तं नाद्याच्छूद्रस्येत्यादि ॥ २५२ ॥

(२) सर्वज्ञनारायणः । अत्यतीतेषु मृतेषु विनातैस्तेषु जीवत्स्वपि । वृत्तिंजीवनं साधुतः प्रतिग्राह्यतएव ॥ २५२॥

(३) कुल्लूकः । मातापित्रादिषु मृतेषु तैर्वा जीवद्भिरपि स्वयोगावस्थितैर्विना गृहान्तरे वसन्नात्मनोवृत्तिमन्विच्छन्सर्वदा साधुभ्योगृह्णीयादेव ॥ २५२ ॥

(४) राघवानन्दः । गुर्वाद्युपरते तु न तथा कुर्यादित्याह गुरुष्विति । पितृमात्राचार्येष्वभ्यतीतेषु प्रव्रज्यामरणमहापातकाद्यैरसंबद्धेषु ॥ २५२ ॥

(५) नन्दनः । आत्मार्थंसाधुभ्यएव प्रतिगृह्णीयान्नासाधुभ्यइत्याह गुरुषुत्विति । तैर्विनागुरुभिर्विना स्वप्रतिगृहीतन्द्रव्यनिरपेक्षेषु गुरुष्वित्यर्थः । सदाआपद्यपि ॥ २५२ ॥

(६) रामचन्द्रः । गुरुषु अभ्यतीतेषु नष्टेषु सत्सु तैर्गुर्वादिभिर्विना गृहे वसन्साधुतः सकाशात् आत्मनो वृत्तिमन्विच्छन् सदा गृह्णीयात् ॥ २५२ ॥

आर्धिकः कुलमित्रं च गोपालोदासनापितौ ॥ एते शूद्रेषु भोज्यान्नायश्चात्मानं निवेदयेत् ॥ २५३ ॥

(१) मेधातिथिः । अर्धसीरी आर्धिकः कुटुम्बीभूमिकर्षकइतियउच्यते । गोपालदासौ संबन्धिशब्दौ योयस्यगाः पा-

ल्यति स तस्य भोज्यान्नः। यश्चात्मानंनिवेदयेत् । अहंत्वच्छरणःत्वयिविश्रब्धोवत्स्यामीत्येवंयआत्मानमर्पयति सोऽपि भोज्यान्नः ॥ २५३ ॥

(२) **सर्वज्ञनारायणः**। अर्धिकोर्धभागेनतस्यभूमौकृषिंकुर्वन्। कुलमित्रं कुलपरंपरमित्रसंततिः। गोपालः स्वीयगवांपालकः। दासोगर्भदासः। नापितोपिमुण्डनादिकर्मकारी। आत्मानंनिवेदयेत्तवाहमिति। भोज्यान्नाएषां कन्दुपक्कशूलपक्कपायसदधिसक्तवः स्मृत्यन्तरोक्ताभोज्याः ॥ २५३ ॥

(३) **कुल्लूकः**। आर्द्धिकःकार्षिकःसंबन्धिशब्दाश्चैते योयस्य कृषिंकरोति सतस्य भोज्यान्नः। एवंस्वकुलस्य मित्रंयोयस्य गोपालोयोयस्यदासोयोयस्य नापितःकर्म करोति योयस्मिन्नात्मानंनिवेदयति दुर्गतिरहंत्वदीयसेवांकुर्वन्नितिच त्वत्समीपे वसामीतियःशूद्रस्तस्य भोज्यान्नः ॥ २५३ ॥

(४) **राघवानन्दः**। स्वार्थंशूद्रेभ्योयदि गृह्णीयात्तदा एभ्यः षड्भ्यएवेत्याह आर्धिकइति । आर्धिकः कर्षकः। कुलमित्रं कुलपरंपरया मित्रतांगतं। दासः क्रीतः । यआत्मानमतिदुर्गतिरहंत्वदीयसेवामेव कुर्वंस्त्वत्समीपे वत्स्यामीति निवेदयेत्तस्मादपि ग्राह्यम् ॥ २५३ ॥

(५) **नन्दनः**। शूद्रेष्वपि च कानिचिद्भोज्यान्नान्याह आर्धिकइति। परस्य क्षेत्रधनादिकमाश्रित्य कृषिवाणिज्यादिना धनमुत्पाद्य तदर्धंक्षेत्रादिस्वामिने दत्त्वा योऽर्धेन जीवति सःआर्धिकः । यश्चात्मानंनिवेदयेत् आत्मनिवेदकोनामस्ववशः कर्मकरः सोऽपि भोज्यान्नः ॥ २५३ ॥

(६) **रामचन्द्रः** । भोज्यानाह आर्धिकइति । आर्धिकः स्वकृषिफलभागी । कुलमित्रंपितृपितामहादिक्रमागतं। दासः गर्भदासः। नापितः एते शूद्रेषु भोज्यान्नाः। यःपुरुषः आत्मानंनिवेदयति प्रयच्छति वाङ्मनःकायकर्मभिः। गृहस्थाश्रमप्रकरणम् ॥ २५३ ॥

यादृशोस्य भवेदात्मा यादृशं च चिकीर्षितम् ॥ यथा चोपचरेदेनं तथात्मानं निवेदयेत् ॥ २५४॥

(१) **मेधातिथिः**। आत्मनिवेदनमेव व्यक्तीकरोति । अस्य शूद्रस्य यादृशआत्मा भवेत्यत्कुलीनोयद्देशोयच्छिल्पंयच्चिकीर्षितं। अनेन कार्येण त्वामहमाश्रितोधर्मेणअन्येनवाप्रयोजनेनराजकुलरक्षादिना । यथावोपचरेच्छिल्पेनानेन त्वांसेवे पादवन्दनादिगृहकृत्यकरत्वे सर्वस्मिन्निवेदितआत्मानिवेदितोभवति । अन्येतु आत्मावैपुत्रनामासीत्यपत्यवचनमात्मशब्दंमन्यमानाः यस्य शूद्रस्य कामतः प्रवृत्ताद्दुहिता विवाह्यते तस्यानेन भोज्यान्नतोच्यत इत्याहुःतदयुक्तम्। न तावदयमात्मशब्दोदुहितरि विस्पष्टंप्रयुक्तः। पुत्रशब्दोहिपुंस्येवप्रसिद्धतरः। नचपरोक्षशब्दोपदेशेनकिंचित्प्रयोजनम्। एतावदेववक्तुंयुक्तंदद्यादुहितरंचयइति । अन्येत्वार्धिकादिग्रहणंशूद्रोपलक्षणार्थंवर्णयन्ति। तेन पारशवस्य श्वशुरस्य च भोज्यान्नता सिद्धाभवति ॥ २५४ ॥

(२) **सर्वज्ञनारायणः** । आत्मनिवेदनप्रकारमाह यादृशइति । आत्मदेहोजनितः कुलतः धर्मतश्च। चिकीर्षितं तदीयंकर्म। यथायावद्वृत्तिलाभेन निवेदयेन्मांपरिगृहाणेति ॥ २५४ ॥

(३) **कुल्लूकः**। यथात्मनिवेदनंशूद्रेण कर्त्तव्यंतदाह यादृशइति। अस्य शूद्रस्य कुलशीलादिभिर्यादृशआत्मास्वरूपंयच्चास्य कर्मकर्तुरीप्सितंयथाचानेन सेवा कर्त्तव्या तेन प्रकारेणात्मानंकथयेत् ॥ २५४ ॥

(४) **राघवानन्दः**। निवेदनप्रकारमाह यादृशइति । आत्मा कुलशीलादिः । तथा चोपचरेत् कृषिं करिष्यामि गृहादिपरिचर्यांवेति ॥ २५४ ॥

(५) नन्दनः। शूद्रस्यात्मनिवेदनप्रकारंप्रसङ्गादाह यादृशइति। अस्य शूद्रस्य। आत्मायादृशः कुलीनोऽकुलीनो दक्षोऽदक्षोऽपि वा भवेत्। यादृशमस्यचिकीर्षितमात्मनोरक्षणादिप्रयोजनंदृष्टमदृष्टंवा। एनंस्वामिनंयथोपचरेद्वेधोदकाहरणादिना यथा सेवेत तथाऽऽत्मानंनिवेदयेत्॥ २५४॥

(६) रामचन्द्रः। आत्मनिवेदनमित्याह यादृशेति। अस्य शूद्रस्य यादृशः यज्जातिविशिष्टः कुलतः कर्मतः आत्मा मनः। आत्मा पुत्रोवा यस्य भवेत् यादृशंचिकीर्षितं। तदीयं कर्म वाञ्छितं यथा एनंद्विजं उपचरेत् तथात्मानंनिवेदयेत्॥ २५४॥

योन्यथासन्तमात्मानमन्यथा सत्सु भाषते॥ सपापकृत्तमोलोके स्तेनआत्मापहारकः॥२५५॥

(१) मेधातिथिः। अन्यथाभूतमधार्मिकंसन्तंसत्सुशिष्टेष्वन्यथाभाषते धार्मिकोऽहमिति। अन्येन वा प्रयोजनेन चाश्रितोऽन्यद्दर्शयति ससर्वेषांपापकृतामधिकतमः पापकृत्। स्तेनश्चौरः। आत्मापहारकोन्यश्चौरोद्रव्यमपहरत्ययंपुनरात्मानमेवेतिनिन्दाशयः॥ २५५॥

(२) सर्वज्ञनारायणः। यस्तु जातिमपन्हुते तस्यदोषमाह योन्यथेति। आत्मापहारकः स्वजातेरात्मन्यपन्हवकर्ता अतस्तेनः अतः पापकृत्तमः॥ २५५॥

(३) कुल्लूकः। यइतिसामान्यनिर्देशात्प्रकृतशूद्रादन्योपि यःकश्चित्कुलादिभिरन्यथाभूतमात्मानमन्यथा साधुषु कथयति सलोकेऽतिशयेन पापकारीचौरः। यस्मादात्मापहारकः। अन्यःस्तेनोद्रव्यान्तरमपहरत्ययंतु सर्वप्रधानमात्मानमेवापहरेत्॥ २५५॥

(४) राघवानन्दः। अहोअन्यथाभाषणान्नाधिकंपापमस्तीति मिथ्योक्तौ साक्रोशंदोषमाह यइति द्वाभ्यां। अन्यथासंन्तकुलादिभिः। सत्स्वितिविशेषणाद्राजदण्डादौ मिथ्यापि कुर्यात्। आत्मापहारकः। तदुक्तम्। किंतेन न कृतंपापंचोरेणात्मापहारिणा। योन्यथासन्तमात्मानमन्यथा प्रतिपद्यतइति॥ २५५॥

(५) नन्दनः। आत्मनिवेदने शूद्रेण यथार्थमेव वक्तव्यं नान्यथेत्याह यइति॥ २५५॥

(६) रामचन्द्रः। यःअन्यथासन्तमात्मानम् स्वयंसत्सु साधुष्वन्यथा भाषते सःस्तेन आत्मापहारकः॥ २५५॥

वाच्यर्थानियताः सर्वे वाङ्मूलावाग्विनिःसृताः॥ तांस्तु यःस्तेनयेद्वाचं ससर्वस्तेयकृन्नरः॥२५६॥

(१) मेधातिथिः। शब्दार्थयोर्नित्यसंबन्धाद्वाचिशब्देऽर्थानियताउच्यन्ते। वाङ्मूलावक्तुः स्वाभिप्रायप्रकाशनस्य तदधीनत्वात्तन्मूलाउच्यन्ते। वाचोविनिःसृताः संभूताः श्रोतुरपि प्रतिपत्तेस्तत्सुल्यत्वाद्वाग्विनिःसृताउच्यन्ते। न चात्र पौनरुक्त्याशङ्कापरिहारे प्रयतितव्यम्। अनुवादत्वादस्ययथाकथंचिद्वस्तुपरिहारत्वात्। तांवाचंयश्चोरयति मुष्णात्यन्यदुक्त्वाऽन्यदनुतिष्ठत्यन्येनाभिप्रायेण संगच्छतेऽन्यच्चदर्शयति ससर्वस्तेयकृत्। नास्तितद्द्रव्यंसुवर्णादियत्तेन नापहृतंभवतीतिनिन्दार्थवादोनृतवचनस्य॥ २५६॥

(२) सर्वज्ञनारायणः। वाचि नियताअविनाभूताः। सर्वेषांशब्दानुविद्धतयैव प्रतीतेः। वाङ्मूलावाचा सूक्ष्मप्रबन्धज्ञापना जनिताः वाग्विनिसृताः। वाक्सहकृतैः स्वकारणैर्जन्याः वागधीनत्वात्सर्वव्यवहाराणाम्। स्तेनयेन्मिथ्याभिधानेनान्यरूपांकृत्वोपादद्यात्॥ २५६॥

(३) कुल्लूकः । सर्वेऽर्थाःशब्देषु नियतावाच्यत्वेन नियताः वाङ्मूलाश्च शब्दास्तेषांप्रतिपत्तौ शब्देभ्यएवप्रतीयन्ते । प्रतीतिद्वारेण शब्दमूलत्वंशब्देभ्यएवावगम्य चानुष्ठीयन्तइतिवाग्विनिर्गताइत्युच्यन्ते । अतएव वेदशब्देभ्यएवादाविति ब्रह्मणोपि सृष्टिर्वेदशब्दमूलैवोक्ता । अतोयस्तांवाचंस्तेनयेत्स्वार्थव्यभिचारिणींवाचयति सनरःसर्वार्थस्तेयकृद्भवति ॥ २५६ ॥

(४) राघवानन्दः । किंच वाचीति । वागर्थयोर्नित्यसंबन्धात्तंविना तैस्तत्प्रयोगायोगाद्वाङ्मूलाः । तदधीनत्वंवक्तुरभिप्रायादेःतएवार्थावाग्विनिःसृताःपरबुद्धौ संक्रान्ताभवन्ति । अतस्तांयस्तेनयेत्ससर्वस्तेनएवेति भावः ॥ २५६ ॥

(५) नन्दनः । पापकृत्तमत्वमेवोपपादयति वाच्यर्थाइति । वाचि शब्देसर्वेऽर्थानियता अभिधेयतयासंबद्धाः । वाङ्मूलावाक्परिणामभूताः । वाग्विनिःसृताः वाचा प्रतिपादिताः । एतैर्हेतुभिः सर्वार्थावाङ्मयाइत्यर्थः । तांसर्वार्थमयींवाचंयः स्तेनयेत्तत्त्ववचनंतिरस्कृत्यानर्थंब्रूयात्ससर्वस्तेयकृत्सर्वार्थचोरः ॥ २५६ ॥

(६) रामचन्द्रः । वाग्विनिसृतावागिन्द्रियाद्विनिसृतामुखान्निर्गताः वाचःवाच्यार्थाः । वाच्याश्च तेअर्थाश्च वाच्यार्थाः । वाङ्मूलाः वचनमूलाः नियताः तद्यथायः वाच्यार्थः सएव मुखान्निःसरतीति भावः । तुपुनः यः पुरुषः तांवाचंस्तेनयेत् विपरीतं वदेत् अन्यदुक्त्वा अन्यदनुतिष्ठति सःसर्वस्तेयकृच्चौर्यकृत् ॥ २५६ ॥

महर्षिपितृदेवानांगत्वानृण्यंयथाविधि ॥ पुत्रे सर्वं समासज्य वसेन्माध्यस्थमाश्रितः ॥ २५७ ॥

(१) मेधातिथिः । गृहस्थस्यैवेदंप्रकारान्तरमुच्यते । महर्षीणामानृण्यंस्वाध्यायेन पितृणामपत्योत्पादनेन देवानांयज्ञैर्यथोक्तंत्रिभिर्ऋणैर्ऋणवानितिमत्वा कृत्वैतत्त्रयंपुत्रे प्राप्तव्यहारेसर्वगृहकुटुम्बव्यवहारंसमासज्य सन्यस्य वसेद्गृहएवमाध्यस्थ्येनास्थितस्त्यक्ताहंकारइदंमेधनमिदंमेपुत्रदारमिदंमेदासीदासमितिस्वबुद्धिंसंत्यज्यासीत । नाहंकस्यचिन्न कश्चिन्ममेतित्यक्तस्वतृष्णतामाध्यस्थ्यम् । अयंचसन्यासःकामानांचदृष्टानांचकर्मणांनसर्वेषामुत्तरत्रदर्शयिष्यामः ॥ २५७ ॥

(२) सर्वज्ञनारायणः । महर्षीणामध्ययनेन पितॄणांशुद्धसंतानोत्पादनेन देवानांयज्ञेन माध्यस्थंप्रवर्त्यौदासीन्यमास्थितोवेदसन्यासिकोभूत्वेत्यर्थः ॥ २५७ ॥

(३) कुल्लूकः । गृहस्थस्यैव संन्यासप्रकारोयमुच्यते । महर्षीणांस्वाध्यायेन पितॄणांपुत्रोत्पादनेन देवतानांयज्ञैर्यथाशास्त्रमानृण्यंगत्वा योग्यपुत्रे सर्वंकुटुम्बचिन्ताभारमारोप्य माध्यस्थमाश्रितःपुत्रदारधनादौ त्यक्तममत्वोब्रह्मबुद्ध्या सर्वत्र समदर्शनोगृहएव वसेत् ॥ २५७ ॥

(४) राघवानन्दः । सर्वाश्रमसाधारणंभक्ष्याभक्ष्यंवक्तुंगृहस्थस्य हितमुपदिशन्कृतकृत्यतामाह महर्षीति चतुर्भिः । आनृण्यमुक्तेन वेदाध्ययनेन ऋषीणां । पुत्रोत्पादनेनश्राद्धेनपितॄणां । यज्ञेनदेवानामितिसमासज्यत्वंब्रह्मात्वंयज्ञस्त्वंलोकइत्यादिसंमाष्यमाध्यस्थमुदासीनताम् ॥ २५७ ॥

(५) नन्दनः । पुत्रवतोगृहस्थस्याश्रमान्तरासमर्थस्योत्तरे वयसि कर्तव्यमाह महर्षीति । माध्यस्थ्यंशोकहर्षादिराहित्यम् ॥ २५७ ॥

(६) रामचन्द्रः । माध्यस्थं प्रवृत्यौदासीन्यं आस्थितो वसेत् । वेदाध्ययनेन सुतोत्पादनेन यज्ञैः आनृण्यंगत्वा वनंप्रविशेदित्यर्थः ॥ २५७ ॥

एकाकी चिन्तयेन्नित्यं विविक्ते हितमात्मनः ॥ एकाकी चिन्तयानोहि परं श्रेयोधिगच्छति ॥ २५८ ॥

(१) मेधातिथिः । कृते सर्वकर्मसन्यासद्दर्दनस्य विशेषतः कर्तव्यम् । एकाक्यसहायःसन्ननियमानसंभाषणोऽना-कुले विविक्तेनिर्जने रहसि चिन्तयेद्ध्यायेद्धितमात्मन्युपनिषत्सु या ब्रह्मोपासना विहितास्ताअभ्यसेत् । तच्चिन्तया तद-भ्यासे परंश्रेयोमोक्षाख्यमधिगच्छति प्राप्नोति ॥ २५८ ॥

(२) सर्वज्ञनारायणः । विविक्ते शुद्धस्थाने । आत्मनोहितं आत्मनोहितसाधनम् । श्रेयोब्रह्म ॥ २५८ ॥

(३) कुल्लूकः । काम्यकर्मणांधनार्जनस्य च कृतसंन्यासः षष्ठाध्याये वक्ष्यमाणः पुत्रोपकल्पितवृत्तिरेकाकी नि-र्जनदेशआत्महितंजीवस्य ब्रह्मभावंवेदान्तोक्तंसर्वदा ध्यायेत् । यस्मात्तद्ध्यायन्ब्रह्मसाक्षात्कारेण परंश्रेयोमोक्षलक्षणं-प्राप्नोति ॥ २५८ ॥

(४) राघवानन्दः । ततःकिंतत्राह एकाकीति । आत्मनेहितं यत्त्वांहिततमंमन्यमइति श्रुतेर्हितंमोक्षःतदुपायमि-त्यर्थः ॥ २५८ ॥

(५) नन्दनः । एकाकीइन्द्रियमनःप्रभृतिबाह्यसहायनिरपेक्षः । चिन्तयानः परमात्मानमितिशेषः । परंश्रेयः मोक्ष-म् ॥ २५८ ॥

(६) रामचन्द्रः । एकाकी चिन्तयेदित्यर्थः । आत्मनः हितं हितरूपं । ऐश्वर्यं चिन्तयेद्यतिरित्यर्थः ॥ २५८ ॥

एषोदिता गृहस्थस्य वृत्तिर्विप्रस्य शाश्वती ॥ स्नातकव्रतकल्पश्च सत्त्ववृद्धिकरः शुभः ॥ २५९ ॥

(१) मेधातिथिः । अध्यायार्थोपसंहारएषावृत्तिर्विप्रस्य गृहस्योक्ता । शाश्वती नित्या । अनित्याह्यापदिवक्ष्यते । विप्रग्रहणाद्ब्राह्मणस्यैव स्नातकव्रतानांकल्पोविधिः । सत्वंनामात्मगुणस्तस्यवृद्धिकरः । शुभः प्रशस्तः । प्रशंसैषा ॥२५९ ॥

(२) सर्वज्ञनारायणः । वृत्तिर्जीवनोपायः । स्नातकव्रतस्य कल्पः प्रकारः । सच प्रकाशः ॥ २५९ ॥

(३) कुल्लूकः । अयमध्यायार्थोपसंहारः । एषाऋतादिवृत्तिर्गृहस्थस्य ब्राह्मणस्योक्ता शाश्वती नित्या आपदि त्वनित्या वक्ष्यते । स्नातकव्रतविधिश्चसत्त्वगुणस्य वृद्धिकरणप्रशस्तउक्तः ॥ २५९ ॥

(४) राघवानन्दः । विप्रस्येतिश्रुतेरुक्तस्नातकव्रतकल्पोब्राह्मणस्यैवासाधारणः ॥ २५९ ॥

(५) नन्दनः । विप्रस्य वृत्तिरद्रोहेणैव भूतानामित्यादिनोक्ता । स्नातकव्रतकल्पश्चवेदोदितंस्वकंकर्मइत्यादिनोक्तः ॥ २५९ ॥

अनेन विप्रोवृत्तेन वर्तयन् वेदशास्त्रवित् ॥ व्यपेतकल्मषोनित्यं ब्रह्मलोके महीयते ॥ २६० ॥

इति मानवे धर्मशास्त्रे भृगुप्रोक्तायांसंहितायांचतुर्थोध्यायः ॥ ४ ॥ ॥ ५ ५ ॥

(१) मेधातिथिः । सर्वस्यास्य फलकथनमेतत् । अनेनविप्रोवर्तयन्वर्तमानोवेदशास्त्रविद्व्यपेतकल्मषः प्रतिषेधाप-राधजंपापकल्मषंतद्व्यपेतंव्यपनीतंप्रायश्चित्तैः । तेनैतदुक्तंभवति विहितकरणात्प्रतिषिद्धस्यानासेवनात्कथंचित्कृतस्य प्राय-श्चित्तैर्निष्क्रीतत्वात् । ब्रह्मलोके महीयते स्थानविशेषेमहिमानंप्राप्नोति । दर्शनान्तरंब्रह्मरूपः संपद्यतइतिसिद्धम् ॥ २६० ॥

॥ इति भट्टवीरस्वामिसूनोर्भट्टमेधातिथिविरचिते मनुभाष्ये चतुर्थोध्यायः ॥ ४॥ ॥ ५ ॥ ॥ ५ ॥

(२) सर्वज्ञनारायणः । वृत्तेनाचरणेन । विप्रइतितस्य प्राधान्यादुक्तम् । वेदः श्रुतिः शास्त्रंधर्मशास्त्रम् । अत्र-स्नातकव्रतमध्ये केषांचिदन्यत्रोक्तानामपि पुनरभिधानं स्नातकव्रतलोपनिमित्तैकाहत्र्यहभोजनप्रायश्चित्तप्राप्त्यर्थमिति द्रष्टव्यम् ॥ २६० ॥

व्याहतमनुतात्पर्यप्रतिहतकुनिबन्धदार्शितव्याख्याम् । नारायणस्यसूक्तिःसर्वज्ञस्यानुसंधत्ते ॥ १ ॥

॥ इति सर्वज्ञनारायणकृतौ मन्वर्थविवृतौ चतुर्थोऽध्यायः ॥ ४ ॥ ॥ध्र॥

(३) कुल्लूकः । सर्वस्योक्तस्य फलकथनमिदं । अनेन शास्त्रोक्ताचारेण वेदविद्ब्राह्मणोवर्तमानोनित्यकर्मानुष्ठानात्क्षीणपापःसन्ब्रह्मज्ञानप्रकर्षेण ब्रह्मैव लोकःतस्मिन्लीनोमहिमानंसर्वोत्कर्षप्राप्नोति ॥ २६० ॥

इति कुल्लूकभट्टविरचितायांमन्वर्थमुक्तावल्यांचतुर्थोऽध्यायः ॥ ४ ॥ ॥ ध्र ध्र ॥

(४) राघवानन्दः । अनेन क्रमेण मोक्षोपायचिन्तनपर्यन्तेन वृत्तेन कृतेनानुष्ठितेन व्यपेतकल्मषःविगतंनिषेकापराधजंकल्मषंपापंयस्य सः । महीयते पूज्यतया व्यवतिष्ठतइतिभावः ॥ २६० ॥

॥ इति श्रीराघवानन्दविरचितायां मन्वर्थचन्द्रिकायां चतुर्थोऽध्यायः ॥ ४ ॥

(५) नन्दनः । अनेनोक्तेन चरितेन । वर्तयन्देहयात्रांयापयन् । व्यपेतकल्मषः विमुक्तपुण्यपापः । ब्रह्मलोके परब्रह्मसाक्षात्कारे संति । महीयतेआध्यात्मिकैरितिशेषः ॥ इति श्रीनन्दनविरचितेमानवव्याख्याने चतुर्थोऽध्यायः ॥ ४ ॥

॥ श्री ॥

॥ श्रीगणेशायनमः ॥

॥ अथ पञ्चमाध्यायप्रारम्भः ॥

श्रुत्वैतानृषयोधर्मान् स्नातकस्य यथोदितान् ॥ इदमूचुर्महात्मानमनलप्रभवं भृगुम् ॥ १ ॥

(१) **मेधातिथिः** । ब्रह्मचारिगृहस्थयोरध्यायत्रयेयेधर्माविहितास्ताञ्च्छ्रुत्वा ऋषयोमरीच्यादयोभृगुमाचार्यमिदंवक्ष्यमाणंवस्त्वब्रुवन् पृष्टवन्तः । ननु चात्र स्नातकस्येति श्रूयते तत्र ब्रह्मचारिग्रहणंकिमर्थम् । उच्यते । वृत्तसंकीर्तनमेतत् । ब्रह्मचारिणोधर्माउक्ताएव । महात्मानमनलप्रभवमिति च भृगुविशेषणम् । अनलादग्नेःप्रभवउत्पत्तिस्तस्य । ननु प्रथमेऽध्याये अहंप्रजाःसिसृक्षुरित्यत्र मनोरपत्यंभृगुरुक्तः । सत्यमर्थवादः । अमुत्र अग्नेःसकाशाद्भृगोर्जन्मश्रुतं तद्दर्शने नैवमुक्तम् । तथाच नामनिर्वचनम् । भृष्टाद्रेतसःप्रथममुददीप्यत तदसावादित्योऽभवत् यद्द्वितीयमासीत्तद्भृगुरिति । उपचारतोवैतदुच्यते । तेजस्वितासामान्यादग्नेरिव प्रसवइति । नचात्राभिनिवेष्टव्यं कतरःपक्षो युक्तइति । अनिदंपरत्वादस्य शास्त्रस्य सर्वएवायंप्रश्नप्रतिवचनसंदर्भोवक्ष्यमाणस्यान्नदोषस्यगौरवज्ञापनार्थंपरिग्रहदुष्टादन्नलाभाद्दुष्टंगुरुतरमिति । संबन्धिदोषात्स्वरूपदोषोबलवानन्तरङ्गत्वात् । ननुच पूर्वंबहुतरंप्रायश्चित्तंश्रूयते अमत्याक्षपणंत्र्यहमिति इदंतु शेषेषूपवसेदहरितितत्कथमस्यगुरुतरत्वमुच्यते । लशुनाद्यपेक्षमेतत् । तेषु हि मत्या जग्ध्वापतेदिति पतितप्रायश्चित्तंभवति ॥ १ ॥

(२) **सर्वज्ञनारायणः** । अथ भक्ष्याभक्ष्यविवेकंप्रस्तौति श्रुत्वैतानिति । अनलभवमिति द्वितीयसृष्टौ तस्यानलरूपाद्ब्रह्मशुक्राद्उद्भूतत्वात् यथा यद्द्वितीयमासीत्तद्भृगुरभवदित्यैतरेयब्राह्मणे ॥ १ ॥

(३) **कुल्लूकः** । ऋषयःस्नातकस्यैतान्यथोदितधर्मान्श्रुत्वा महात्मानंपरमार्थपरंभृगुमिदंवचनमब्रुवन् । यद्यपि प्रथमाध्याये दशप्रजापतिमध्ये भृगुंनारदमेव चेति भृगुसृष्टिरपि मनुतएवोक्ता तथापि कल्पभेदेनाग्निप्रभवत्वमुच्यते । तथाच श्रुतिः तस्य यद्रेतसःप्रथमंदेदीप्यते तदसावादित्योऽभवत् यद्द्वितीयमासीद्भृगुरिति । अतएव भ्रष्टाद्रेतसउत्पन्नत्वाद्भृगुः ॥ १ ॥

(४) **राघवानन्दः** । वर्तिष्यमाणार्थंवृत्तंकीर्तयति श्रुत्वेति । श्रोतॄणांमेधावित्वेवक्तुःशास्त्रकथनेश्रद्धास्यादितिसूचनार्थमध्यायत्रयेणब्रह्मचारिगृहस्थयोर्विदितान्धर्मान्मरीच्यादयोऽनुवदन्ति श्रुत्वेत्यादिना । अनलप्रभवंभृगुमिति तदुक्तंशान्तिपर्वणि ॥ शुक्रेहुतेऽग्नौतस्मिंस्तुप्रादुरासुस्त्रयःप्रभो ॥ पुरुषावपुषायुक्ताः स्वैःस्वैःप्रसवजैर्गुणैः ॥ भृगुत्वेनभृगुःपूर्वमङ्गारेभ्योऽङ्गिराभवदित्यादि ॥ १ ॥

(५) **नन्दनः** । मनुपुत्रस्यैव भृगोर्वरुणयज्ञेऽनलप्रभवत्वंपुराणे श्रूयते । तस्मान्नपूर्वापरविरोधः ॥ १ ॥

(६) **रामचन्द्रः** । अथ भक्ष्याभक्ष्यप्रकरणमाह श्रुत्वेति कांचित्पतिव्रतांदृष्ट्वा ब्रह्मणः शुक्रमपतत् ब्रह्मातदातच्छुक्रमग्निकुण्डेऽक्षिपत् तदग्निकुण्डाज्जातो भृगुः । अनलप्रभवंभृगुमृषयइदमूचुः द्वितीयसृष्टावनलरूपत्वात् ॥ १ ॥

एवं यथोक्तं विप्राणां स्वधर्ममनुतिष्ठताम् ॥ कथं मृत्युः प्रभवति वेदशास्त्रविदां प्रभो ॥ २ ॥

(१) **मेधातिथिः** । यन्महर्षिभिः पृष्टंतदिदानींदर्शयति । एवमिति शास्त्रव्यापारपरामर्शः । यथोक्तमिति शास्त्रार्थं परामृशति । एतेन शास्त्रसंदर्भेण यादृशोधर्मउक्तस्तत्पुनस्तमनुतिष्ठतांद्विजातीनां । विप्रग्रहणस्य दर्शनार्थत्वाद्वक्ष्यत्येतदुक्तं-द्विजातीनामिति । कथंमृत्युः प्रभवति स्नातकावस्थायांब्रह्मचर्यावस्थायांवा यतःपरिपूर्णायुर्भिस्तैर्भवितुंयुक्तंपुरुषायुषजीवि-भिः शतवर्षं पुरुषाणामायुस्ततः पुरा मृत्युर्मरणमेषांन युक्तं यतउक्तमाचाराल्लभतेह्यायुर्जपतांजुव्हतामिति ॥ २ ॥

(२) **सर्वज्ञनारायणः** । कथंमृत्युरिति कस्मिन्स्नातकव्रते त्यक्ते मृत्युभयमित्यर्थः । वेदशास्त्रविदामिति स्वधर्म-ज्ञानसाधनोपदर्शनेन तज्ज्ञानंदर्शितम् ॥ २ ॥

(३) **कुल्लूकः** । एवंयथोक्तंस्वधर्मंकुर्वतांब्राह्मणानांश्रुतिशास्त्रज्ञानांवेदोदितायुषः पूर्वंकथंमृत्युःप्रभवति । आयुरल्प-त्वहेतोरधर्माचरणस्याभावात् । सकलसंशयोच्छेदनसमर्थत्वात्प्रभोइतिसंबोधनम् ॥ २ ॥

(४) **राघवानन्दः** । आश्रमचतुष्टयसाधारणत्वादस्याध्यायस्य चातुर्वर्ण्यचातुराश्रम्यसाधारणधर्मप्रतिपादकत्व-माह एवमिति । शास्त्रोक्तंस्वधर्ममनुतिष्ठतां । कथमिति प्रकारे विप्रपदमुपलक्षणम् । चातुर्वर्ण्यस्य वेदशास्त्रविदामपीति भावः ॥ २ ॥

(५) **नन्दनः** । आचारवान्पुरुषःशतंवर्षाणिजीवतीति भवता पूर्वमुक्तम् । तेनस्वधर्ममनुतिष्ठतामकालमृत्युर्नोपपद्य-तइति ॥ २ ॥

(६) **रामचन्द्रः** । विप्राणां यथोक्तमेवमनुतिष्ठतांमृत्युःकथंप्रभवति ॥ २॥

सतानुवाच धर्मात्मा महर्षीन्मानवोभृगुः ॥ श्रूयतां येन दोषेण मृत्युर्विप्रान् जिघांसति ॥ ३॥

(१) **मेधातिथिः** । ननुच स्वधर्ममनुतिष्ठतामिति प्रश्नेन युक्तं येन दोषेणेति उत्तरश्च ग्रन्थोनैवोपपद्यते ॥ ३ ॥

(२) **सर्वज्ञनारायणः** । मानवः प्रथमजन्मनि मनुसुतत्वात् ॥ ३ ॥

(३) **कुल्लूकः** । समनोःपुत्रोभृगुर्धर्मस्वभावोयेन दोषेणाल्पकाले विप्रान् हन्तुमिच्छति मृत्युः श्रूयतामित्येवंतान्म-हर्षीञ्जगाद ॥ ३ ॥

(४) **राघवानन्दः** । तत्रापि चतुरःप्रकारानाह सतानिति द्वाभ्यां । जिघांसति नरकाप्त्यै ॥ ३ ॥

(६) **रामचन्द्रः** । भृगुस्तान्महर्षीनुवाच येन दोषेण विप्रान्मृत्युर्जिघांसतीति श्रूयताम् ॥ ३ ॥

अनभ्यासेन वेदानामाचारस्य च वर्जनात् ॥ आलस्यादन्नदोषाच्च मृत्युर्विप्रान् जिघांसति ॥४ ॥

(१) **मेधातिथिः** । उच्यते । अनभ्यासेनेत्यादिदृष्टान्तत्वेनोच्यते । यथा भवद्भिः प्रतिपन्नंवेदानभ्यासादयः पुरायुषोमरणहेतवः । एवंवक्ष्यमाणोऽन्नदोषः । सत्स्वपि वेदाभ्यासादिषु नतावत्स्वधर्मोयःपूर्वत्रकथितः किंत्वयमन्नदोषो-गरीयस्तरः पृथक्प्रकरणाच्चैतदभिधीयते । नास्नातकस्यविज्ञानलेपमात्रमधर्मोयम् ॥ ४ ॥

(२) **सर्वज्ञनारायणः** । अनभ्यासेनेति एतेनैते प्रतिनियताः स्नातकधर्माः सर्वथा नातिक्रमणीयाइतिदर्शितम् । अनभ्यासेनानध्ययनेनाधीतानांच त्यागेन । आचारस्य च शिष्टाचरितस्य मङ्गल्यालम्भनादेः । आलस्यात् अलसतया क्रियमाणेषु कर्मसु शक्त्याङ्गानुपसंहारात् । अन्नदोषाद्दुष्टान्नाशनात् । तत्र केचित्संसर्गदुष्टान्नदोषागणान्नमित्यादिना पूर्वा-ध्याये उक्ताः ॥ ४ ॥

(३) **कुल्लूकः** वेदानामनभ्यासात्स्वीयाचारपरित्यागात् । सामर्थ्ये सत्यवश्यकर्तव्यकरणानुत्साहलक्षणादालस्यात् । अदनीयदोषाच्च मृत्युर्विप्रान् हन्तुमिच्छति । एतेषामधर्मोत्पादनद्वारेणायुःक्षयहेतुत्वात् ॥ ४ ॥

(४) **राघवानन्दः** । तानाह अनभ्यासेनेति । अनधीतेन अधीतविस्मरणेन च । आलस्यात्तत्पूर्वकस्वधर्माननुष्ठानात् ॥ ४ ॥

(५) **नन्दनः** । अन्नदोषाद्भक्ष्यदोषात् । अन्नदोषस्यैवाकालमृत्युहेतुत्वमत्रप्रतिपाद्यम् । वेदानभ्यासादीनामुपन्यासोदृष्टान्तार्थः ॥ ४ ॥

(६) **रामचन्द्रः** । अन्नदोषाद्भक्ष्याभक्ष्यान्नदोषान्मृत्युर्विप्राञ्जिघांसति ॥ ४ ॥

लशुनंगृञ्जनं चैव पलाण्डुं कवकानि च ॥ अभक्ष्याणि द्विजातीनाममेध्यप्रभवानि च ॥ ५॥

(१) **मेधातिथिः** । लशुनादयःपदार्थालोके प्रसिद्धाएव । कवकशब्दोजातिशब्दः । क्वचित्कयाकुरितिप्रसिद्धेर्थेमन्यते । छत्राकानि कवकान्येव तथाहि कवकशब्देन प्रतिषिद्धं छत्राकशब्देन प्रायश्चित्तंवक्ष्यति छत्राकंविड्वराहंचेति । नच छत्राकंनाम पदार्थान्तरंप्रसिद्धम् । नचाक्षरवर्णसामान्येन योयश्छत्राकारस्तंतंछत्राकमिति युक्तं प्रतिपत्तुम् । तथासति सुवर्चलादीनांसमाचारविरोधी प्रतिषेधः प्राप्नोति । तस्माद्यान्येव कवकानि तान्येव छत्राकाणि । तथाच निरुक्तकारः क्षुण्णमहिछत्रकंभवति यत् क्षुद्यतइति । तेन पादप्रहारेण यान्येतानि भूमावकृष्टायामनुपूर्वजायांचसितवर्णानि जायन्ते तानि च कवकानि । वक्ष्यतिच भौमानिकवकानीति । दर्शितंचपदाक्षुण्णमिवेति । पादप्रहारेण यानि क्षुद्यन्ते । यतोयानि वृक्षाद्गुल्माज्जायन्ते तेषांतदाकाराणामप्रतिषेधः । कुकुण्डानि कवकानि वैद्यके व्याख्यातानि । एतच्च व्याख्यानं न गवादिशब्दवत् । कवकशब्दोलोके च प्रयुज्यते अतोस्य समाचाराद्वैद्यकादिशास्त्रार्थेनिश्चयः । प्रदर्शितश्चासौ लशुनादीनांतु समानवर्णगन्धाअपि विष्णुना प्रतिषिद्धाः । पाराशरिकायांतु शब्देनैव निषेधः प्रायश्चितविशेषार्थउक्तःचान्द्रायणमिति । तेन लवतककर्णिकारादीनांप्रतिषेधः । अमेध्यप्रभवान्यमेध्यजातानि च संसर्गजातानि । अन्येत्वाहुर्मूलवास्तूकवत्केवलामेध्यप्रभवानांयुक्तः प्रतिषेधः ततश्च यान्यधिकपुष्ट्यर्थंधान्यशाकादीन्यमेध्यक्षेत्रजातानि संसृज्यन्ते तानि न दुष्यन्तीति । तदयुक्तं । अस्तिहि तत्र पुनः श्रुतेनवृत्तौसर्वस्याप्यभक्ष्यत्वादिहापिच । यद्यमेध्यसंसर्गमन्तरेण न किंचिद्वस्तूत्पद्यते ततः स्यादपि यतस्तु किंचिन्मेध्याज्जायते किंचित्संसृष्टात्ततोयंप्रतिषेधः । केवलेऽमेध्यप्रभवे न संसृष्टेऽवतिष्ठते मांसस्य सत्यपि शुक्रशोणितामेध्यप्रभवत्वे नायंप्रतिषेधः । पृथक्प्रकरणारम्भात्तस्य ॥ ५ ॥

(२) **सर्वज्ञनारायणः** । अधुनाऽवशिष्टान्नजातिदुष्टान्नदोषानाह लशुनमिति । श्वेतकन्दोबृहत्पत्रोलशुनं । गृञ्जनं क्षुद्रपत्रः । क्लीबलिङ्गता छान्दसी । पलाण्डूरक्तकन्दः कवकं छत्राकं । अमेध्यप्रभवाणि विष्ठादिषुजातानिकन्दादीनि ॥५ ॥

(३) **कुल्लूकः** । वेदानभ्यासादेरुक्तत्वादनुक्तमन्नदोषमाह लशुनमिति । लशुनगृञ्जनपलाण्ड्वाख्यानि त्रीणिस्थूलकन्दशाकानि । कवकंछत्राकममेध्यप्रभवानि विष्ठादिजातानि तण्डुलीयादीनि । द्विजातीनामिति* याज्ञवल्क्यवचनादेतानि द्विजातीनामभक्ष्याणि । द्विजातिग्रहणंशूद्रपर्युदासार्थम् ॥ ५ ॥

(४) **राघवानन्दः** । अन्नदोषादित्याद्युक्तंतत्रादौ दुष्टान्नान्याह लशुनमित्येकादशभिः । लशुनादीनि त्रीणि स्थूलकन्दशालीनि तत्रापि लशुनं शुद्धमूलं गृञ्जनं रक्तमूलकं पलाण्डुं रक्तवर्तुलमूलं । कवकं छत्राकं भूमिजं वार्क्षभूजंच । अमेध्यं मूत्रपुरीषादि तज्जातानि ॥ ५ ॥

---

* द्विजातीनामिति = विड्जातानीति (अ)

(५) **नन्दनः**। अन्नदोषस्यैवोपरिष्टाद्दुष्टान्नान्याह लशुनमिति। लशुनंसूक्ष्मरक्तकन्दनालंरसोनं। गृञ्जनंशाकविशेषः। पलाण्डुःस्थूलश्वेतकन्दनालोलशुनानुकारी। कवकंकुरवण्डकम्। अमेध्यप्रभवानिमाषवराकादीनि। द्विजातिग्रहणंशूद्रपर्युदासार्थम् ॥ ५ ॥

(६) **रामचन्द्रः** । लशुनं श्वेतकन्दोबृहत्पत्रः। गृञ्जनं क्षुद्रपत्रोलोहितसूक्ष्मकन्दः। पलाण्डुः स्थूलरक्तकन्दः। कवकानिछत्राकसर्पछत्रशिलीन्ध्राणि। एतानि द्विजानामभक्ष्याणि । च पुनः अमेध्यस्थानप्रभवानि ॥ ५ ॥

लोहितान् वृक्षनिर्यासान् व्रश्चनप्रभवांस्तथा ॥ शेलुं गव्यं च पेयूषं प्रयत्नेन विवर्जयेत् ॥ ६ ॥

(१) **मेधातिथिः** । वृक्षकोटरस्रावेण हेत्वन्तरेण वा बहिर्यन्मूलस्कन्धफलपलाशशाखाकुसुमव्यतिरिक्तंवृक्षलग्नंजायते सवृक्षनिर्यासः। लोहितग्रहणात्कर्पूरादीनामप्रतिषेधः । व्रश्चनाच्छेदनाद्येषांप्रभवोजन्म एवंवृक्षादेर्वल्कलप्रदेशस्तत्रैव जायन्ते तेषामलोहितानामप्रतिषेधः। शेलुः श्लेष्मातकः प्रसिद्धोवैद्यकादिशास्त्रेभ्यः। ननु सृतस्य क्षीरस्य संतानिकाअप्रसिद्धत्वात् यत्तु पियूषसाहचर्यात्संतानिकायुक्तेति भवति साहचर्यविशेषहेतुरुभयत्र प्रयोगे सति न पुनः साहचर्यमदृष्टप्रयोगाणांप्रयोगज्ञापकम्। गव्यंच गव्यग्रहणान्माहिषादेरप्रतिषेधः अनाद्यंयदि तदग्निमात्रसंयोगात्पिण्डीभूतमनासक्तंच। सद्यः प्रसूतायागोः क्षीरंपीयूषशब्देनोच्यते। ननुच क्षीरस्य सविकारस्य दशाहंचाभक्ष्यतांवक्ष्यति। त्रिचतुराणिवाहानि तादृशंक्षीरंभवति। सत्यं यदि कथंचित्कस्यापिदशाहात्परेण भवति तदिदमर्थवत्। प्रयत्नेनेत्यादिपदद्वयं श्लोकपूरणार्थम् अभक्ष्याणीत्यनुवर्तते ॥ ६ ॥

(२) **सर्वज्ञनारायणः**। लोहितान् व्रश्चनजानपि क्रथनादिनाकृष्टान् । व्रश्चनप्रभवान् वृक्षक्षतजानलोहितानपि निर्यासान्। शेलुः श्लेष्मातकफलं। गव्यं गोसंबन्धिपेयुषंनवप्रसूतायागोर्मासपर्यन्तंपयः। महिष्यादिक्षीराणांतु दशाहोर्ध्वमेव भक्ष्यत्वम् ॥ ६ ॥

(३) **कुल्लूकः**। लोहितवर्णान्वृक्षनिर्यासान्वृक्षान्निर्गतरसान्कठिनतांयातान् । व्रश्चनंछेदनंतत्प्रभवानलोहितानपि। तथाच तैत्तिरीश्रुतिः अथोखलु यएवलोहितोयोवाव्रश्चनान्निर्येषतितस्यनाश्यंकाममन्यस्येति। शेलुं बहुवारकफलं । गोभवंपेयूषन्नवप्रसूतायागोः क्षीरमग्निसंयोगात्कठिनंभवत्येतान्यत्नतस्त्यजेत् । अनिर्दशायागोः क्षीरमित्यनेनैव पेयूषस्यापि निषेधसिद्धावधिकदोषत्वात्प्रायश्चित्तगौरवज्ञापनार्थंपृथङ्निर्देशः अतएव यत्नतइत्युक्तम् ॥ ६ ॥

(४) **राघवानन्दः**। वृक्षनिर्यासान् वृक्षकोटरेभ्योजातान् लोहितानितिकर्पूरवारणार्थम्। व्रश्चनंछेदनंतत्प्रभवम्। तथाच तैत्तिरीयकश्रुतिः। अथो खलु यएवलोहितोयोवा व्रश्चनान्निर्येषति तस्यनाश्यंकाममन्यस्येति। अयमेव लोहितोयोव्रश्चनान्निसृतस्तस्यनाश्यंकाममन्यस्येतितस्यनाश्यमभक्ष्यमन्यस्यानिषिद्धस्यकामंभक्षणमितिश्रुतेरर्थः। व्रश्चनप्रभवानामलोहितोपि निषिद्धः। शेलुं बहुवारकं। पेयूषं नवप्रसूतायागोःक्षीरं अनिर्दशायाइत्यनेनैव प्राप्तत्वेप्यत्यन्तनिषेधार्थम् । गर्भादारभ्य स्तनस्थकठिनतरदुग्धंवा ॥ ६ ॥

(५) **नन्दनः**। व्रश्चनप्रभवान्हिङ्गुप्रभृतीन् । शेलुःश्लेष्मातकः । गव्यंपेयूषंतत्क्षणप्रसूताया गोःप्रथमदुग्धम्। पीयूषोऽभिनवंपयःइत्यमरः ॥ ६ ॥

(६) **रामचन्द्रः**। लोहितान् आरक्तान्वृक्षनिर्यासादीन्विवर्जयेत्। व्रश्चनप्रभवान् वृक्षछेदजातान्। लोहितग्रहणात् हिङ्गुकर्पूरादीनामनिषेधः । शेलुं श्लेष्मातकफलं। गव्यं गोरिदं गव्यं। नवप्रसूताया दुग्धविकारंपेयूषंपेयूषीति संज्ञा। एतानि प्रयत्नेन वर्जयेत् ॥ ६ ॥

वृथाकृसरसंयावं पायसापूपमेव च ॥ अनुपाकृतमांसानि देवान्नानि हवींषि च ॥ ७ ॥

(१) मेधातिथिः। अत्र कृसरसंयावमिति समाहारद्वन्द्वः। तिलैः सह सिद्ध ओदनः कृसरशब्देनोच्यते। संयावो भोज्यविशेषः सर्पिर्गुडतिलादिकृतः पुरेषु प्रसिद्धः। येतु यौतेर्मिश्रणार्थत्वाद्यानि मिश्रीकृत्यान्नानि साध्यन्ते मुद्गमकुष्ठकादिभिस्तानि संयावशब्देनोच्यन्तइति तेषांकृसरग्रहणमनर्थकम्। सोपि ह्यनेन प्रकारेण संयावएव। वृथाशब्दःसर्वत्रानुषज्यते। यदात्मार्थंक्रियते न देवपित्रतिथ्यर्थंतदाकृसरादीनामुपदेशइति। तदुक्तम्। नहिगृहस्थाः केनार्थतः पठन्ति हविषइवा वापात्प्रभृति तादर्थ्येनोद्देशः। अत्रहि कस्य पाकःस्यात्। किंतर्हि अनुद्दिष्टविशेषस्यसामान्यतः कृतस्यान्नस्य पञ्चयज्ञानुष्ठानंविहितम्। तत्राकृतवैश्वदेवस्य भोजने विहितातिक्रमोनपुनः प्रतिषेधः समस्ति तथाहि द्वेप्रायश्चित्ते भवतः विहितातिक्रमात्प्रतिषिद्धसेवनाच्च। कृसरादयस्तु देवताविशेषंवास्तुयज्ञादिविषयमनुदिश्य कृताकृतत्वादाह्निकविधयोपि प्रतिषिध्यन्ते। यच्चापि नात्मार्थंपचेदितितन्न सोप्यवश्यकर्तव्यत्वात्। कृताक्रमस्य भोजनप्राप्त्यनुवादोन पुनः प्रतिषेधः। तथासति द्विमूलकल्पनाप्रायश्चित्तंस्यादित्युक्तम्। न चान्यार्थत्वेनापि कृतस्यात्मार्थता पाकस्य निषेद्धुंशक्यते। पच्यमानार्थोहिपाकस्तस्य तद्वारिका नशक्या आत्मार्थता निषेद्धुं तेनैव वृत्तिविधानात् नहि वृत्यादिशिष्टभोजनंगृहस्थस्य शेषसंस्कारोन चात्र संकल्पःश्रुतोयेन मदर्थंपच्यतामिति पाककाले संकल्पमात्रंनिषिध्यते । आत्मार्थंचोत्तरकालम विचार्थेत्युच्यते। मिथ्यासंकल्पदोषश्च स्यात्। देवतार्थतया संकल्पितस्यात्मार्थतयायोगइति। तस्मादयमनुवादोयत्पचेन्नात्मार्थमेवोपयोज्यंप्राग्विधेर्वैश्वदेविकादिति। तथाच पक्वान्नभोजनेपि विधिमेतंस्मरन्ति। यदन्नः पुरुषोराजंस्तदन्नास्तस्य देवताइति। नच बुभुक्षमाणस्यैवाधिकारोगार्हस्थ्यप्रतिपत्तिनिमित्तत्वात्। तेन यदहर्नभुञ्जीत तदहरप्यकुर्वन्प्रत्यवैति। एतदुक्तंभवति। स्वार्थंवा पचतु परार्थंवा पाक्षीदिति सर्वथा कृतवैश्वदेवातिक्रमणव्रताअपि न प्रवर्तन्तेइति नित्यतामनुवदति। यच्चापि पठति॥ लौकिके वैदिके वापि हुतोत्सृष्टे जले क्षितौ। वैश्वदेवस्तु कर्तव्यः पञ्चसूनापनुत्तयइति॥ अनेनापि नित्यतैवोच्यते। नहि वैदिके वैश्वदेवसंभवः । नच स्मार्तवचने प्रमाणमस्ति । पायसापूपमिति पयसा सिद्धओदनः पायसोन दध्यादिपयोविकारः । अपूपाः पुरोडाशाः। देवान्नानि समाचारप्रमाणकानि । हवींषि श्रुतिविहितानिहोतव्यानि प्राग्ग्रहहोमाद्यतोहविःशेषस्य भक्ष्यतांवक्ष्यति। अनुपाकृतस्य अयज्ञहुतस्य पशोर्मांसानि उपाकरणं पशोः संस्कारविशेषः सपशुयागेषु विहितः। एतेन च यज्ञोपयुक्तशेषभक्ष्यता मांसस्य लक्ष्यते। वृथाशब्दाधिकारेप्यनुपाकृतग्रहणमतिथ्यादिशिष्टस्यापि गोव्यजमांसस्य प्रतिषेधार्थं गोव्यजमांसमेव वानुपाकृतशब्देन विवक्षितम्। गोव्यजस्यैव तत्रालम्भश्चोदितो यतः। शिष्टंप्रोक्तम्॥ ७ ॥

(२) सर्वज्ञनारायणः। वृथा विप्रेभ्योदेवेभ्यश्चादत्वा। कृसरस्तिलमुद्गमाषसहसिद्धओदनः। संयावोगुडक्षीरघृतादिसाधितः पेयविशेषस्तत्करिकेतिप्रसिद्धः। अनुपाकृतानि पशुबन्धाङ्गभूतमन्त्रवद्दर्भस्पर्शरूपसंस्कारेणासंस्कृतानि। एतत्पूर्वाध्यायस्थवृथामांसपदव्याख्यानम्। तथाच श्राद्धादावपि मांसभक्षणे दोषइतिगम्यते। देवान्नानि देवेभ्योनिवेदितान्नानि। हवींषि हविः शेषाः। ऋत्विग्यजमानव्यतिरिक्तानामभक्ष्याः॥ ७॥

(३) कुल्लूकः। देवताद्यनुद्देशेनात्मार्थंयत्पच्यते तद्वृथाकृसरस्तिलेन सह सिद्धओदनः। तथाच छन्दोगपरिशिष्टम् तिलतण्डुलसंपक्वः कृसरः सोभिधीयते। संयावोघृतक्षीरगुडगोधूमचूर्णसिद्धस्तत्करिकेतिप्रसिद्धः। क्षीरतण्डुलमिश्रः पाय-

(७) पूपमेवच= पूपशष्कुली (ठ)

सः। अपूपः पिष्टकः एतान्वृथापक्कान्विवर्जयेत्। पशुयागादौमन्त्रबहुलेन पशोः स्पर्शनमुपाकरणंतद्रहितः पशुरनुपाकृतस्तस्यमांसानि देवान्नानिनैवेद्यार्थमन्नानि प्राङ्निवेदनात्। हवींषि च पुरोडाशादीनिहोमात्प्राग्वर्जयेत्। अनुपाकृतमांसानीत्येतद्विशेषनिषेधदर्शनादनर्चितंवृथामांसमितिसामान्यनिषेधोबलीवर्दन्यायेनानुपाकृतमांसेतरश्राद्धाद्यनुद्देश्यमांसभक्षणेपर्यवस्यति ॥ ७ ॥

(४) **राघवानन्दः**। कृसरस्तिलेन सह सिद्धओदनः। संयावः घृतक्षीरगुडगोधूमचूर्णसिद्धः। एतच्चतुष्टयंदेवान्नंतेभ्योदत्त्वैव भोज्यम्। अनुपाकृतमांसानि पशुयागादौ मन्त्रेण पशोः स्पर्शनमुपाकरणंतद्रहितपशोर्मांसानि। देवान्नानिदेवपूजार्थं संचितानि। हवींषि होमार्थंपित्रर्थंवा संचितानि ॥ ७ ॥

(५) **नन्दनः**। आत्मार्थमुपादानंवृथात्वम्। तिलमिश्रमोदनंकृसरः। संयावंपिष्टविकारोऽपूपादि। उपाकृतंयज्ञविशिष्टम्। देवस्वामिकमन्नंदेवान्नम्। हविस्तु देवतायै निवेदयिष्यमाणंस्थापितद्रव्यम्। विवर्जयेदित्यनुवर्तते ॥ ७ ॥

(६) **रामचन्द्रः**। वृथाकृसरः देवताद्युद्देशमन्तरेण साधितःकृसरः तिलमुद्गतण्डुलमिश्रितान्नसिद्धःकृसरसंज्ञः। संयावः गुडक्षीरघृतादिगोधूमचूर्णविकारः। पायसं अपूपमेव अनुपाकृतमांसानि यज्ञेसंस्कृतस्य पशोर्मांसानि। देवान्नानि देवतोद्देशेन संकल्पितान्नानि हविर्हवनीयद्रव्यं ऋत्विक्यजमानव्यतिरिक्तानाम् ॥ ७ ॥

अनिर्दशायागोः क्षीरमौष्ट्रमैकशफं तथा ॥ आविकं सन्धिनीक्षीरंविवत्सायाश्च गोः पयः ॥ ८ ॥

[क्षीराणि यान्यभक्ष्याणि तद्विकाराशने बुधः ॥ सप्तरात्रव्रतंकुर्यात्प्रयत्नेन समाहितः ॥ १]+

(१) **मेधातिथिः**। यदीहानिर्दशाहंगोः क्षीरमितिपाठः उष्ट्रादीनामपि दाशाहादिकःप्रतिषेधआशङ्क्यते। अनिर्दशाग्रहणानुवृत्त्या तत्र समाचारआत्यन्तिकप्रतिषेधार्थआश्रयणीयः। अनिर्दशायाइति तु स्त्रीलिङ्गपाठेआशङ्कैव नास्ति नहि तद्धितान्तैरनिर्दशायाउष्ट्रमित्यादिभिः संबन्धोपपत्तिरुत्तरत्र। चपुनः क्षीरग्रहणात्समाचाराच्च उष्ट्रैकशफाविकानिर्दशगवीक्षीराणि सविकाराणि प्रतिषिध्यन्ते। सन्धिनीविवत्सयोस्तु क्षीरमेव। अनिर्दशाच गौरुच्यते यस्याः प्रसूतायादशाहान्यनतिक्रान्तानि। सन्धिनी याउभयोः प्राप्तदोहा कथंचिदन्यतरस्मिन्दुह्यते। सायमप्रदुग्धासायंदुह्यते। सातु स्वल्पक्षीरत्वादेकस्मिन्नेव काले सासौसंधिनी कश्चिदाह। या मृतस्ववत्सा परकीयंवत्सं संचार्यदुह्यते सा सन्धिनी। विवत्सातु या सत्येववत्से विनाकृतवत्सा वत्सप्रस्रवणमनपेक्ष्य मकुष्टकयवशालितुषादिना भोजनविशेषेण दुह्यात्। विवत्सायाइति तेनैव वत्सग्रहणे नावत्साधेनुरानीयतामितिवद्गोरितिलब्धे गोग्रहणमजामहिष्योरप्रतिषेधार्थं। नपुनरनिर्दशायाइत्यत्र अतश्च गोग्रहणंतत्राजाद्युपलक्षणार्थम्। तथाच गौतमः। गोश्चक्षीरमनिर्दशायाः सूतकेऽजामहिष्योश्चेत्याह। पयोग्रहणंसन्धिनीक्षीरमिति समासान्तवर्तिनः क्षीरपदस्य नातिसुकरः संबन्धोयतः ॥ ८ ॥

(२) **सर्वज्ञनारायणः**। अनिर्दशायाइति पेयूषान्तराद्दोषाधिक्यप्रदर्शनार्थम्। गोरित्यजामहिष्योरप्युपलक्षणम्। उष्ट्रैकशफाविकपदैरुष्ट्रादिपयांस्युच्यन्ते। सन्धिनी वृषाक्रान्ता गौः ॥ ८ ॥

(३) **कुल्लूकः**। प्रसूतायाअनिर्दशायागोर्दुग्धम्। गोरितिपेयक्षीरपशूपलक्षणार्थं तेनाजामहिष्योरपि दशाहमध्ये प्रतिषेधः। तथाच यमः अनिर्दशाहंगोक्षीरमाजंमाहिषमेवच। तथोष्ट्रभवं। अश्वाद्येकखुरसंबन्धि। मेषभवं। सन्धिनी याऋतुमती वृषमिच्छती तस्याः क्षीरम्। तथाच हारीतः। सन्धिनी वृषस्यन्तीतस्याः पयोन पिबेत् ऋतुमत्तद्भवति। वि-

---

+ (ण)

वत्सायामृतवत्सायाः । असन्निहितवत्सायाश्च क्षीरंवर्जयेत् । धेन्वधिकरणन्यायेन वत्सग्रहणादेव गविलब्धायांपुनर्गोग्रहणंगोरेव नत्वजामहिष्योरितिज्ञापनार्थम् ॥ ८ ॥

(४) **राघवानन्दः** । ऐकशफं एकशफागर्दभाश्वादयस्तेषामिदं दुग्धादि । आविकं अविर्मेषस्तस्येदं । सन्धिनी-ऋतुमती ॥ ८ ॥

(५) **नन्दनः** । अनिर्दशायाःअनिर्गतदशाहायाः । एकशफाः अश्वादयः । सन्धिनी गर्भिणी ॥ ८ ॥

(६) **रामचन्द्रः** । अनतिक्रान्तदशाहमस्या अनिर्दशाया गोःक्षीरं । औष्ट्रंपयः ऐकशफं वडवादीनांपयः । अवेः आविकंपयः । सन्धिनीक्षीरं वृषेण सन्धीयते या सासन्धिनी । मृतवत्सायाःपयः ॥ ८ ॥

आरण्यानां च सर्वेषां मृगाणां माहिषं विना ॥ स्त्रीक्षीरं चैव वर्ज्यानि सर्वशुक्तानि चैव हि ॥ ९॥

(१) **मेधातिथिः** । आरण्यागोहस्तिमर्कटादयः पुंसांक्षीराभावः सर्वेषांमृगाणामिति जातिमात्रविवक्षायांपुल्लिङ्गनिर्देशसामर्थ्यात्स्त्रीभिः संबन्धः मृगक्षीरंकुक्कुटाण्डमितिवत् दर्शितंचैतत्पुम्भावविधौ महाभाष्यकारेण । माहिषंविना पयोऽपेक्षया नपुंसकनिर्देशः । स्त्री मानुषी । यद्यपि स्त्री गौः सोमक्रयणीत्यादौ सास्नादिमत्यर्थेप्रयोगदर्शनं तथापि जात्यन्तरस्याप्रकृतत्वात् प्रसिद्धतरत्वात् तत्रप्रयोगःस्यात् । स्त्रियोमधुरमिच्छन्ति स्त्रियोरत्नमनुत्तममिति नार्येव प्रतीयते । एवकारमञ्जनादिप्रतिषेधे व्याचक्षते । न केवलंस्त्रीक्षीरंभक्षणे वर्ज्यंकिंतर्ह्यन्यास्वप्येवंविधासु क्रियासु । एषतु स्मृत्यन्तरसमाचारसापेक्षएव शब्दः सूचको युक्तोनत्वस्यार्थस्य वाचकः ॥ ९ ॥

(२) **सर्वज्ञनारायणः** । आरण्यानां मृगव्यतिरिक्तानामप्यरण्यजानाम् । तथा मृगाणां मृगजातीनां गवयादीनां संबन्धि पयः । स्त्रीक्षीरं मानुषीक्षीरम् । अत्र क्षीरप्रक्रमे पुनःक्षीरग्रहणमस्याः क्षीरमेवाभक्ष्यं न तु घृतादीतिदर्शयितुमिति-केचित् । शुक्तस्य पुनरत्राध्याये निषेधोदध्यादिप्रतिप्रसवार्थः ॥ ९ ॥

(३) **कुल्लूकः** । मृगशब्दोत्र महिषपर्युदासात्पशुमात्रपरः माहिषंक्षीरंवर्जयित्वा सर्वेषामारण्यप्रभवपशूनांहस्त्यादीनांक्षीरंस्त्रीक्षीरंच सर्वाणि शुक्तानिवर्जनीयानि । स्वभावतोमधुररसानियानिकालवशेनोदकादिनाचाम्लीभवन्तितानि शुक्तशब्दवाच्यानि । शुक्तंपर्युषितंचैवेतिचतुर्थे कृतेपि शुक्तप्रतिषेधे दध्यादिप्रतिप्रसवार्थंपुनरिहोच्यते ॥ ९ ॥

(४) **राघवानन्दः** । माहिषं दुग्धादि विनारण्यानां । स्त्रीक्षीरं स्वभार्यायाअन्यस्त्रियोवा । एतानि त्रीणि वर्ज्यान्येव ॥ ९ ॥

(५) **नन्दनः** । सर्वासांमृगीणां महिषींविनेतिपाठः । कालातिपत्त्या स्वरसंविहाय रसान्तरगतंशुक्तम् ॥ ९ ॥

(६) **रामचन्द्रः** । स्त्रीक्षीरं द्विस्तनीनाम् ॥ ९ ॥

दधिभक्ष्यं च शुक्तेषु सर्वं च दधिसंभवम् ॥ यानि चैवाभिषूयन्ते पुष्पमूलफलैः शुभैः ॥ १० ॥

(१) **मेधातिथिः**। अविशेषेण सर्वशुक्तेषु प्रतिषिद्धेषु केषुचिदयमर्थवादः । शुक्तान्युच्यन्ते यानि प्राप्तस्वरसावस्थानिकालात्ययेन द्रव्यान्तरसंसर्गेण वाम्लतामापद्यन्ते । यथाम्रातकादीनि मधुराणि चिरकालअतिरसत्वाच्छुक्तानिभवंन्ति निष्पीडितोमधुररसः कालतोम्लतामेतीत्यादिना एवंविधानि तु यानि तु स्वभावतोम्लानि दाडिमामलकजम्बीरादीनि तानि नैव शुक्तानि यानि च प्राप्तकालोत्पत्त्यादीनि । नह्ययमाम्लपर्यायः शुक्तशब्दस्तत्र केवलानि पाकतःशुक्तानि प्रतिषिध्यन्ते । द्रव्यान्तरैश्चपुष्पमूलकादिभिर्योजितान्यत्र ज्ञायन्ते । तथाच गौतमः । शुक्तंकेवलमदधि । अभिषूयन्ते अभिषवउदकेन संसृज्य परिवासनम् । यद्येवं कालएव तर्ह्यम्लताहेतुः सत्यम् । एतान्यपि द्रव्याणि। तृतीयाच करणे सहयोगे वा।

पुष्पादिभिरुदकेन सह अभिषूयन्ते सन्धीयन्ते । केचित्त्वाहुः यत्र पुष्पमूलान्यम्लतांजनयन्ति । यानि दाडिमामलकादीनि शुक्तानि तानि भक्ष्याणि यानि द्राक्षादिभिर्मधुरैरभिषूयन्ते सन्धीयन्ते तानि न भक्ष्यन्ते । अभिषवोह्युच्यते शुक्तताजननं यानि पुष्पादिभिः शुक्तीक्रियन्ते नच द्राक्षादीनि शुक्ततापादकानि किंतर्हिकेवलएव कालः । एतत्तुन सम्यक् । अशब्दार्थत्वान्नहि सोममभिषुणोतीतिशुक्तंकरोतीतिप्रतिपत्तिः । किंतर्हि यएवप्राग्व्याख्यातोर्थः । दधिसंभवं उदश्विन्मस्तुकिलाटकूर्चिकादि ॥ १० ॥

(२) **सर्वज्ञनारायणः** । दधिसंभवं तक्रनवनीतादि । यानि काञ्जिकादीनि अभिषूयन्ते मिश्रीक्रियन्ते । शुभैरनिषिद्धैः ॥ १० ॥

(३) **कुल्लूकः** । शुक्तेषु मध्ये दधिभक्ष्यं दधिसंभवंचसर्वंतक्रादि । यानितु पुष्पमूलफलैरुदकेन संधीयन्ते तानिभक्षणीयानि । शुभैरितिविशेषणोपादानान्मोहादिविकारकारिभिः कृतसंधानस्य प्रतिषेधः । तथाच बृहस्पतिः ॥ कन्दमूलफलैः पुष्पैःशस्तैः* शुक्तान्न वर्जयेत् । अविकारि भवेद्भक्ष्यमभक्ष्यंतद्विकारकृत् ॥ १० ॥

(४) **राघवानन्दः** । दधिसंभवं दध्युपादानकं दधिमिश्रं च तेनामिक्षादिग्रहः । शुभैरिति विशेषणान्निषिद्धेतरैरभिषूयन्ते रसगन्धादीनि तान्यपि भक्ष्याणीत्यन्वयः ॥ कन्दमूलफलैःपुष्पैःशस्तैर्युक्तंतुवस्तुयत् । अविकारिभवेद्भक्ष्यमभक्ष्यं तद्विकारकृत् ॥ इतिबृहस्पतिः ॥ १० ॥

(५) **नन्दनः** । शुक्तेषु वस्तुषु कानिचित्प्रतिप्रसूते दधीति ॥ १० ॥

(६) **रामचन्द्रः** । भक्ष्यमाह दधीति । पुष्पमूलफलैः शुभैरसैर्यान्यभिषूयन्ते मिश्रीक्रियन्ते तानि मेध्यानि ॥ १० ॥

क्रव्यादान् शकुनीन् सर्वान् तथा ग्रामनिवासिनः ॥ अनिर्दिष्टांश्चैकशफांष्टिट्टिभं च विवर्जयेत् ॥ ११ ॥

(१) **मेधातिथिः** । क्रव्याद आममांसभक्षकाः कङ्कगृध्रादयः । अभक्ष्यवत्केवलाममांसभक्षकागृह्यन्ते । तत्रोभयरक्तामयूरादयः । ग्रामनिवासिनः अक्रव्यादाअपि । एकशफाअश्वाश्वतरगर्दभादयः । अनिर्दिष्टास्तुनाभक्ष्यत्वेनोक्तास्ते न भक्ष्याइति । ये तूक्ता स्तेनैव भक्ष्या ये त्वौष्ट्रवडवऋक्षगोवानरगर्दभाःप्रजाकामस्तेषांचमांसंनाश्नीयादिति । ननुच श्रुतितएव तत्र भक्ष्यावाप्तिः प्रत्युत निर्दिष्टग्रहणे सति श्रुतौ चोदितानामन्यत्र भक्ष्यताशङ्का अनिर्दिष्टान्वर्जयेन्न निर्दिष्टानिति वाक्यार्थप्रतिपत्तेः । नच स्मृतौ केचिद्भक्ष्यत्वेननिर्दिष्टाः येन तद्व्यतिरिक्तविषयमनिर्दिष्टग्रहणंव्याख्यायेत । अतः श्रुतौ ये निर्दिष्टास्ते न भक्ष्या इति प्राप्नोति । उच्यते । आचाराविरोधी सस्मृत्यर्थः । अनिर्दिष्टग्रहणमनुवादः । टिट्टिभः शकुनिरेव टिटीतियोवाशते । प्रायेण शब्दानुकरणनिमित्तंशकुनीनांनामधेयप्रतिलम्भस्तदुक्तंनिरुक्तकारेण काकइतिशब्दानुकृतिस्तदिदंशकुनिषु बहुलमिति ॥ ११ ॥

(२) **सर्वज्ञनारायणः** । क्रव्यं मांसं तन्मात्रादः क्रव्यादः । ग्रामनिवासिनोग्राममात्रचरान् । अनिर्दिष्टान् भक्ष्यत्वेनानुक्तान् । तथैकशफानश्वादीन् ॥ ११ ॥

(३) **कुल्लूकः** । आममांसंये भक्षयन्ति ते क्रव्यादास्तान्सर्वान्गृध्रादीन्पक्षिणोवर्जयेत् । तथा ग्रामनिवासिनश्च पक्षिणः पारावतादीन् । तथाश्रुतौ केचिदेकशफाभक्ष्यत्वेन निर्दिष्टाः तथाचोष्ट्रंवाडवमालभेत तस्य चर्मांसमश्नीयादिति ।

---

* शस्तैः शुक्तान्नवर्जयेत् = शस्तैर्युक्तंतुवस्तुयत् (अ)

केचिद्यानिर्दिष्टारासभादयस्तेषांमांसंवर्जयेत् । येपि यज्ञाङ्गत्वेन विहितास्तेषामपि यज्ञएव मांसभक्षणंन सर्वदा । टिट्टिभाख्यंच पक्षिणंवर्जयेत् ॥ ११ ॥

(४) **राघवानन्दः** । किंचैतानेकोनत्रिंशतोनाद्यादित्याह । क्रव्यादानाम मांसभोजिनः । शकुनीन् पक्षिणः । ग्रामनिवासिनः पारावतादीन् । अनिर्दिष्टेतिविशेषणात् त्वाष्टुंवाडवमालभेतेति तन्मांसंभक्ष्यमिति । एकशफानिति पक्षिविशेषणम् ॥ ११ ॥

(५) **नन्दनः** । अथ भक्ष्येष्वभक्ष्यानाह क्रव्यादानिति । क्रव्यंमांसंतदत्तिभक्षयतीतिक्रव्यात् गृध्रादयः क्रव्यादः । ग्रामनिवासिनः पारावतादयः । अनिर्दिष्टाननुपदिष्टान् ॥ ११ ॥

(६) **रामचन्द्रः** । वर्ज्यानाह क्रव्यादानिति । क्रव्यंमांसंतद्भक्षयन्ति ये क्रव्यादास्तान्गृध्रादीन् । तथा सर्वान्ग्रामनिवासिनः पारावतप्रभृतीन् नर्निर्दिष्टाननिर्दिष्टान् भक्ष्यत्वेनाकथितानेकशफादीन् । टिट्टिभः शब्दानुकारी एतादृशान्वर्जयेत् ॥ ११ ॥

कलविङ्कं प्लवं हंसं चक्राह्वं ग्रामकुक्कुटम् ॥ सारसं रज्जुवालं च दात्यूहं शुकसारिके ॥ १२ ॥

(१) **मेधातिथिः** । कलविङ्कोग्रामचटकोनिगमेषूक्तः ग्रामवासित्वात्तस्य सिद्धे प्रतिषेधे पुनः प्रतिषेधः स्त्रियाश्चटकायाअभ्यनुज्ञानार्थः । पुंशब्दोह्ययंवृषभवत् । अन्येत्वारण्यस्य निवृत्त्यर्थमन्यन्ते । तेहि वर्षासु वनवासिनोभवन्ति । बाहुल्यव्यपदेशाच्च ग्रामचटकाउच्यन्ते । यथामहिषाआरण्याः । प्लवहंसचक्रवाकानां वक्ष्यमाणजालपादप्रतिषेधात्सिद्धे प्रतिषेधे नित्यार्थग्रहणम् । अतआट्यादीनांविकल्पेन भक्षणंगम्यते । ग्रामकुक्कुटं । ग्रामग्रहणादारण्याभ्यनुज्ञानम् । कुतः पुनरारण्यस्याभक्ष्यताशङ्का । स्मृत्यन्तरेहि कुक्कुटोविकिराणामितिपठ्यते अतश्चाविशेषेणाभक्ष्यताप्राप्ता वचनेन तस्य सामान्यप्रतिषेधस्यविशिष्टविषयताप्रज्ञायते । ननुविकल्पःकस्माद्भवत्यनेनशास्त्रेणास्याभ्यनुज्ञानाच्छास्त्रान्तरेण चाविशेषेण तस्यापि प्रतिषेधात् । नायंविकल्पस्य विषयः विरोधेहि तुल्यबलानांविकल्पोन चात्र विरोधोस्ति । नह्यनयोःस्मृत्योःशाखाभेदोपि । सामान्यस्य विशेषउपसंहर्तुंन्याय्यत्वात् । शाखान्तरतस्तृतीयस्याप्येकशाखस्य दर्शितत्वात् । यद्येवंजालपादप्रतिषेधस्यापि हंसादिविशेषएवोपसंहारोयुक्तोनाविशेषेणकाकजालपादानांसर्वेषांप्रतिषेधोभवेदेवंयद्यपौरुषेयोयंग्रन्थःस्यात् भिन्नकर्तृकेत्वपौरुषेयत्वेनसामान्यस्यनकिंचित्प्रयोजनम् । हंसादिविशेषमात्रपर्यवसाने भिन्नकर्तृकश्च पौरुषेयत्वे सति सामान्यदर्शिनोविशेषविषयमज्ञानंसंभवति विशेषदर्शिनोपि सामान्यविषयः उभयोश्चमूलकल्पनायामेकस्य सामान्यवेदनंवचनमूलंकल्प्यते । अन्यस्य विशेषवचनं तयोश्च वैदिकयोर्भिन्नशाखाधीतयोरसति शाखाभेदे एकवाक्यतैव न्याय्या । न च वेदे पर्यनुयोगोस्ति । किंसामान्येन यदि विशेषनिष्ठता तस्य कर्तुरभावात् । श्रुताद्धितत्र प्रतिपत्तिःकेवलशब्दशक्तिसमाश्रिता । न प्रयोजनवशेनार्थान्तरकल्पनं । रज्जुदालादयः शाकुनिकेभ्यउपलब्धव्याः ॥ १२ ॥

(२) **सर्वज्ञनारायणः** । कलविङ्कोवन्योग्राम्यश्चेति वन्यनिषेधार्थंपृथक्प्रतिषेधः । प्लवोजलकाकः । चक्राह्वश्चक्रवाकः । रज्जुवालोजलचरपक्षिभेदः ॥ १२ ॥

(३) **कुल्लूकः** । कलविङ्कंचटकंतस्य ग्रामारण्योभयवासित्वादेवनिषेधः इत्यारण्यस्याप्यभक्ष्यत्वार्थंजातिशब्देन निषेधः । प्लवाख्यंपक्षिणं तथा हंसचक्रवाकग्रामकुक्कुटसारसरज्जुवालदात्यूहशुकसारिकाख्यान्पक्षिणोवर्जयेत् । वक्ष्यमाणजालपादनिषेधेनैव हंसचक्रवाकयोरपि निषेधसिद्धौ पृथक्प्रतिषेधोऽन्येषामापदि जालपादानांविकल्पार्थः सच व्यवस्थितोविज्ञेयः।

आपदिभक्ष्यानत्वनापदि इच्छाविकल्पस्यरागतएव प्राप्तेः। ग्रामकुक्कुटेतु ग्रामग्रहणमारण्यकुक्कुटाभ्यनुज्ञानार्थं न त्वेतद्यतिरिक्तग्रामवासिविकल्पार्थम्। आपदर्थे गत*प्रयोजनंभवति । वाक्यान्तरगतविशेषावधारणपरत्वस्यान्याय्यत्वात् ॥ १२ ॥

(४) **राघवानन्दः**। कलविङ्कोग्रामचटकः। ग्रामवासित्वात्तस्य प्रतिषेधे सिद्धे पुनर्ग्रहणमष्टकासु स्त्रीणामारण्यानांचानुमत्यर्थम् ॥ १२ ॥

(५) **नन्दनः**। कलविङ्कोग्रामचटकः। प्लवोहंसविशेषः ॥ १२ ॥

(६) **रामचन्द्रः**। कलविङ्कं ग्रामचटकं । प्लवंजलकुक्कुटं । हंसं चक्रवाकं ग्रामकुक्कुटं सारसं रज्जुदालंवृक्षकुक्कुटं दात्यूहं। दात्यूहः कालकण्ठकइत्यमरः। एतादृशांश्च वर्जयेत् ॥ १२ ॥

प्रतुदान् जालपादांश्च कोयष्टिनखविष्किरान् ॥ निमज्जतश्च मत्स्यादान् सौनं वल्लूरमेव च ॥१३॥

(१) **मेधातिथिः**। प्रतुद्य प्रहृत्य चञ्च्वा ये भक्षयन्ति । स्वभावएषएषांपक्षिणां। प्रतुदाः शतपत्रादयः। जालपादाआट्यादयः। तेषांविकल्पउक्तोननुच यत्र विकल्पउच्यते तत्रेच्छातः प्रवृत्तिः। साचाप्रतिषिद्धेष्वपि स्थितैव लौकिकंहि भक्षणं तत्सत्येवार्थित्वे न शास्त्रीयं येन नियमतः स्यात्। तत्र विकल्पितस्य प्रतिषेधस्य न किंचित्प्रयोजनंपश्यामः। उच्यते । दत्तोत्तरमेतत्। यत्राबुद्धिपूर्वप्रयोगाच्छब्दादेवार्थावगतिः। पौरुषेयः स्वयंग्रन्थः समाहितचेतसा प्रयत्नवता शतसाहस्रिकंसंक्षेपुमाचार्येण प्रणीतोयत्राशक्यमनर्थकंप्रयोक्तुं अतआचार्याभिधानंउन्नीयते नूनं जालपादे प्रतिषेधेत्वसति येन तद्विशेषंहंसंत्वशब्देन निषेधयति। यतएतदपिस्मरणमेव अन्येत्वन्येनजालपादस्त्विवतिप्रमादपाठः स्यात् उक्तंचैतदिङ्गितेन चेष्टितेन महतावासूत्रप्रणयनेनाचार्याणामभिप्रायालक्ष्यन्ते विशेषश्चात्रानुमीयते । अनापदिनभक्षयेदितिवक्ष्यति सामान्यप्रतिषेधउभयोरर्थवत्वाय। यत्रमांसविक्रयार्थाः पशवोहन्यन्ते सासूना आपणोमांसस्येत्येके। वल्लूरं मांसंसंशोष्य चिरस्थापितं । नखैर्विकीर्य भक्षयन्ति ते नखविष्किराः। मयूरबलाकादयः। आपत्स्विति वचनात्तु तेषांपाक्षिकी भक्ष्यंताप्यस्ति सहि पठति कुक्कुटोविकिराणामिति नचास्य मानवस्य वचनस्य कुक्कुटोपसंहारः शक्योवक्तुं कुक्कुटनामग्रहणस्यानर्थक्यप्रसंगात् ॥ १३ ॥

(२) **सर्वज्ञनारायणः**। प्रतुदान् चञ्च्वाप्रतुद्यकृमीन्भक्षयतः। जालपादानुक्तहंसादिव्यतिरिक्तानपि तेषांतु पृथग्वचनंदोषाधिक्यार्थम्। नखविष्किरान् नखैर्भूमिंविकीर्य कृमीनुत्पाट्य भक्षयतः। निमज्जतोनिमज्ज्यनिमज्ज्य मत्स्यादान् मत्स्यान्भक्षयतः। सूना अनेकप्राणिप्राणवियोजनस्थानं ततोगृहीतंसौनं। वल्लूरं शुष्कमांसम् ॥ १३ ॥

(३) **कुल्लूकः**। प्रतुद्य चञ्च्वा ये भक्षयन्ति तान्दार्वाघाटादीन्। जालपादानिति जालाकारपादान् शरारिप्रभृतीन्। कोयष्ट्याख्यंपक्षिणं नखविष्किरान्नखैर्विकीर्य ये भक्षयन्ति तानभ्यनुज्ञातारण्यकुक्कुटादिव्यतिरिक्तान्श्येनादीन्। तथा निमज्ज्य ये मत्स्यान्खादन्ति तान्मद्गुप्रभृतीन्। सूना मारणस्थानं तत्र स्थितंयन्मांसं भक्ष्यमपि। वल्लूरंशुष्कमांसं एतानि वर्जयेत् ॥ १३ ॥

(४) **राघवानन्दः**। प्रतुदान् दार्वाघाटादीन्। जालपादान् शरारिप्रभृतीन्। हंसचक्रवाकयोर्जालपादत्वेपि पृथग्ग्रहणमतिनिन्दार्थम्। नखविष्किरान् कुक्कुटाद्यतिरिक्तत्वे सति नखैर्विकीर्य ये भक्षयन्ति तान्। मत्स्यादान् मद्गुप्रभृतीन्। सौनं वधस्थलस्थितमज्ञातमांसम्। वल्लूरं शुष्कमांसम् ॥ १३ ॥

---

* आपदर्थेगतप्रयोजनंभवति=स्वपदानुगतेप्रयोजनसंभवेसति (अ)

(५) **नन्दनः** कोयष्टिष्टिट्टिभकः। नखैर्विकीर्य ये भक्षयन्ति ते नखविष्किराः। निमज्जन्तोमत्स्यादाजलव्यालादयः। सौनंसूनास्थानम्। वल्लूरंशुष्कमांसम्। उत्तमंशुष्कमांसंस्यात्तद्वल्लूरंत्रिलिङ्गकमित्यमरः॥ १३॥

(६) **रामचन्द्रः**। प्रतुदशब्दंकुर्वाणांस्तित्तिरादीन्। जालपादांश्च जालाकारपादांश्च। नखैर्विकीर्यये भक्षयन्तितान्नखविष्किरान् श्येनादीन्। तथा निमज्जतः मत्स्यादीन्पक्षिणः। सूनास्थाने मांसंसौनं। वल्लूरं शुष्कमांसम्॥१३॥

बकं चैव बलाकां च काकोलं खञ्जरीटकम्॥ मत्स्यादान् विड्वराहांश्च मत्स्यानेव च सर्वशः॥१४॥

(१) **मेधातिथिः**। बकबलाकाकाकोलादीनांमत्स्यादग्रहणात्सिद्धे प्रतिषेधेतदन्येषांविकल्पार्थंपुनर्वचनम्। मत्स्यादाअपक्षिणोपिमत्स्यादग्रहणादभक्ष्याविज्ञेयाःनक्रादयः क्रियानिमित्तत्वान्मत्स्यादशब्दस्य। काकोलश्च श्येनोदेशान्तरप्रसिद्धेरयंबाह्लीकेष्वेवमुच्यतइतिप्रसिद्धम्। विड्वराहप्रतिषेधाच्चारण्याभ्यनुज्ञायामप्रतिषेधश्च पूर्वसूत्रे प्रकरणाच्छकुनिविशेषणार्थोविज्ञेयः। एवंहि चेह विड्वराहग्रहणमर्थवद्भवति ग्रामवासी शूकरोविड्वराहः। ननुच यदितत्र प्रकरणाद्ग्रामवासिनः पक्षिणोगृह्यन्ते। इहापि मत्स्यादाःपक्षिणएव गृहीतुंन्याय्याः। नैवं नचात्र शकुनीनांप्रकरणमस्ति विड्वराहमत्स्यानामितिपक्षिणामपि निर्देशार्थम्। सर्वशः सर्वदा। उत्सर्गोयं अस्यापवादंवक्ष्यामः॥ १४॥

(२) **सर्वज्ञनारायणः**। बलाका बिसकण्ठी। काकोलोद्रोणकाकः तेन काकमात्रोपलक्षणम्। मत्स्यादान् मत्स्यभक्षिणोवन्यानपिवराहान् तथा विड्वराहान् विष्ठाभक्षकान्। मत्स्यानेवच सर्वशः सर्वे मत्स्यानभक्ष्याइत्यर्थः॥ १४॥

(३) **कुल्लूकः**। बकबलाकाद्रोणकाकखञ्जनांस्तथा मत्स्यादान्पक्षिव्यतिरिक्तानपि नक्रादीन्विड्वराहांश्च। विडितिविशेषणमारण्यसूकराभ्यनुज्ञानार्थम्। मत्स्यांश्च सर्वान्वर्जयेत्॥ १४॥

(४) **राघवानन्दः**। काकोलं द्रोणकाकं। खञ्जरीटं खञ्जनइति प्रसिद्धम्। मत्स्यादान् नक्रादीन्। बकबलाकयोर्मत्स्यादत्वेन प्रतिषिद्धत्वेपि पुनर्ग्रहणमेषांविकल्पार्थमितिमेधातिथिः॥ १४॥

(५) **नन्दनः**। बलाका बकविशेषः। काकोलोद्रोणकाकः। मत्स्यादानक्रादयः। मत्स्यादनिषेधे सामान्यतःसिद्धेऽपि विशेषेणकेषांचिदुपादानंदोषातिशयसूचनार्थम्॥ १४॥

(६) **रामचन्द्रः**। द्रोणकाको काकोलः। विड्वराहं ग्रामशूकरं। सर्वशः मत्स्यानेव वर्जयेत्॥ १४॥

योयस्य मांसमश्नाति सतन्मांसादउच्यते॥ मत्स्यादः सर्वमांसादस्तस्मान्मत्स्यान् विवर्जयेत्॥ १५॥

(१) **मेधातिथिः**। पूर्वस्य मत्स्यप्रतिषेधविधेरर्थवादोयम्। यत्संबन्धिमांसंयोश्नाति सतन्मांससंबन्धिन्याशनक्रियया व्यपदिश्यते। यथा सर्पादोनकुलोमार्जारोमूषकादइत्यादि। यस्तु मत्स्यादः ससर्वमांसाशी भवति। गोमांसादइत्यपि व्यपदेष्टुंयुक्तः। अतोनिन्दातिशयान्मत्स्यान्विवर्जयेत्॥ १५॥

(२) **सर्वज्ञनारायणः**। एतदुपपादयति योयस्येति। यस्य मांसंछागादेः योनरोऽश्नाति सतन्मांसादइत्येवोच्यते लोकैः। यस्तु मत्स्यादः ससर्वमांसादइति। मत्स्यानांसर्वमांसाशित्वेन तदशने सर्वमांसाशनदोषात्॥ १५॥

(३) **कुल्लूकः**। मत्स्यभक्षणान्निन्दामाह योयस्येति। योयदीयंमांसंखादति सतन्मांसादएव परंव्यपदिश्यते यथा मार्जारोमूषिकादः। मत्स्यादः पुनः सर्वमांसभक्षकत्वेन व्यपदेष्टुंयोग्यस्तस्मान्मत्स्यान्न खादेत्॥ १५॥

(४) **राघवानन्दः**। मत्स्यस्य सर्वप्राणिभक्षणयोग्यत्वात्तद्भक्षकस्यापि सर्वमांसादत्वमित्याह यइति॥ १५॥

(६) रामचन्द्रः । योयस्य जीवस्य मांसमश्नाति सतन्मांसादउच्यते मत्स्यान्वर्जयेत् ॥ १५ ॥

पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः ॥ राजीवान् सिंहतुण्डांश्च सशल्कांश्चैव सर्वशः॥१६॥

(१) मेधातिथिः । पाठीनरोहितौ मत्स्यजातिविशेषौ तयोर्हव्यकव्यनियोगेन श्राद्धादौ भक्ष्यताऽभ्यनुज्ञायते । नान्वाहिके भोजने । राजीवसिंहतुण्डसशल्कानां सर्वशः हव्यकव्याभ्यामन्यत्राप्यनिवृत्तिर्भोजने । राजीवाः । पद्मवर्णाःकैश्चिदिष्यन्ते । अपरैस्तु राजयोरेखायेषांसन्ति । सिंहतुण्डाः सिंहाकृतिमुखाः । सशल्काः शकलिनः ॥ १६ ॥

(२) सर्वज्ञनारायणः । अत्रविशेषमाह पाठीनेति । पाठीनोववालः । आद्यावदनार्हौ । हव्यकव्ययोः श्राद्धस्य देवपित्र्यभागयोर्नियुक्तौ । नियोगेसति तेन श्राद्धे पाठीनरोहितयोराजीवादीनांच वक्ष्यमाणानांचभक्षणे न मत्स्यभक्षणदोषः । ततोन्यत्रतु भक्षणे मत्स्यांश्च कामतोजग्ध्वा सोपवासस्त्र्यहंवसेदिति स्मृत्यन्तरोक्तंप्रायश्चित्तमित्यर्थः । एतेनैतएव मत्स्याः श्राद्धेयाइत्यपिदर्शितम् । नियुक्तैरितिक्वचित्पाठः । राजीवोराजग्रीवाख्योमत्स्यः । सिंहतुण्डाः सिंहसदृशवक्त्रामत्स्यभेदामद्गुरादयोशल्काअपि । सशल्कानखण्डत्वग्युक्तान् रोहितादिभ्योन्यानपि सर्वान् । सर्वत्र चात्र नियुक्तावित्यनुवर्तते पूर्वमत्स्यानेवचसर्वशइति सर्वमत्स्यानांरागप्राप्तभक्षणनिषेधात् ॥ १६॥

(३) कुल्लूकः । इदानीं भक्ष्यमत्स्यानाह पाठीनरोहिताविति । पाठीनरोहितौ मत्स्यभेदौ भक्षणीयौ । हव्यकव्ययोर्नियुक्तावितिसमस्तवक्ष्यमाणभक्षणनिषिद्धोपलक्षणार्थं तेन प्राणात्ययादावदोषः । तथा राजीवाख्यान्सिंहतुण्डांश्चसशल्कांश्च सर्वान्वक्ष्यमाणलक्षणोपेतानद्यात् । मेधातिथिगोविन्दराजौतु पाठीनरोहितौदैवपैत्रादिकर्मणि नियुक्काववादनीयौ नत्वन्यदा राजीवसिंहतुण्डसशल्कमत्स्यास्तु हव्यकव्याभ्यामन्यत्राऽपि भक्षणीयाइत्याचक्षतुः । न तन्मनोहरं । पाठीनरोहितौ श्राद्धेनियुक्तौ श्राद्धभोक्त्रैव भक्षणीयौ नतु श्राद्धकर्त्रापि राजीवादयोहव्यकव्याभ्यामन्यत्राऽपि भक्ष्याइत्यस्याप्रमाणत्वात् । मुन्यन्तरैश्च रोहितपाठीनराजीवादीनांतुल्यत्वेनाभिधानात् । तथाच शङ्खः ॥ राजीवाः सिंहतुण्डाश्च सशल्काश्च तथैव च । पाठीनरोहितौ चाऽपि भक्ष्यामत्स्येषु कीर्तिताः ॥ याज्ञवल्क्यः ॥ भक्ष्याः पञ्चनखाः श्वाविद्गोधाः कच्छपशल्यकाः । शशश्च मत्स्येष्वपितु सिंहतुण्डकरोहिताः ॥ तथापाठीनराजीवसशल्काश्च द्विजातिभिः ॥ हारीतः सशल्कान्मत्स्यान्न्यायोपपन्नान्भक्षयेत् । एवंच ॥ भोक्त्रैवाद्यौ न कर्त्रापि श्राद्धे पाठीनरोहितौ । राजीवाद्यास्तथा नेति व्याख्या न मुनिसंमता ॥ १६ ॥

(४) राघवानन्दः । उक्तेषु प्रतिप्रसवमाह पाठीनेत्यादि । हव्यकव्ययोर्नियुक्तौ विनियुक्तौ सन्तावाद्यौ भक्ष्यौ । राजीवादिष्वप्येवंयोजना । मेधातिथिगोविन्दराजौ तु राजीवादयोऽन्यदापि भोक्तव्याइत्याहतुः ॥ राजीवाः सिंहतुण्डाश्च सशल्काश्च तथैव च ॥ पाठीनरोहितौ चापि भक्ष्यामत्स्येषु कीर्तिताः इति शङ्खवचनात् ॥ तत्रसहस्रदंष्ट्रः पाठीनः राजीवः शकुलः सिंहतुण्डः सिंहस्येव मुखंयस्य समाणिप्रभेदः । सशल्काः सवल्काः । रोहितराजीवयोः सशल्कत्वेपि पुनर्ग्रहणमत्यादरार्थम् ॥ १६ ॥

(५) नन्दनः । अत्रापवादमाह पाठीनेति । पाठीनश्वक्राख्योमत्स्यविशेषः । आद्यौ भक्ष्यौ । सर्वावस्थंनभक्ष्याविल्युक्तं नियुक्तौहव्यकव्ययोरिति । राजीवान्पद्मवर्णान् । सिंहतुण्डान् सिंहमुखान् । सहशल्कैर्वल्कलैर्वर्तन्तइतिसशल्काः । एतान्राजीवादीन्मत्स्यविशेषानाद्यादितिशेषः । सर्वशोहव्यकव्ययोरनियुक्तानपीत्यर्थः ॥ १६ ॥

(६) रामचन्द्रः । पाठीनादीन्भक्ष्यानाह पाठीनेति । पाठीनरोहितौ रोहितसंज्ञोलोहितवर्णः । हव्यकव्ययोः कार्ये

आद्यौ भक्ष्यौ । राजीवान् पद्मवर्णान् सिंहतुण्डांश्च सिंहमुखान्मत्स्यान् सशल्कान् शल्कैः सह वर्तन्ते सशल्कास्तान् भक्षयेत् ॥ १६ ॥

न भक्षयेदेकचरानज्ञातांश्च मृगद्विजान् ॥ भक्ष्येष्वपि समुद्दिष्टान् सर्वान् पञ्चनखांस्तथा ॥ १७ ॥

(१) **मेधातिथिः** । एकचराः सर्पोलूकादय एकाकिनश्चरन्ति । अज्ञातान्नामतोजातिविशेषतश्च । मृगद्विजान् मृगाःपक्षिणश्च न भक्ष्याः । भक्ष्येष्वपि समुद्दिष्टान् ये प्रतिषिद्धास्ते तादूप्ये असति भक्ष्यतांप्राप्ताः समुद्दिष्टाइव भवन्ति । नतु भक्ष्याणांसमुद्देशोस्ति । परिहर्तव्यतया विशेषतोऽविज्ञातान् भक्ष्यपक्षपतितान् भक्षेष्वपि समुद्दिष्टाइत्येवमुच्यन्ते । पञ्चनखाश्च वानरशृगालादयः । सर्व ग्रहणं पादपूरणार्थम् ॥ १७ ॥

(२) **सर्वज्ञनारायणः** । एकचरान् संघचारिजातीयान्दैवादेकाकिनश्चरतः भक्ष्येषु समुद्दिष्टान् गणितानपि । अज्ञातांश्चाप्रसिद्धान्मृगद्विजान् द्विजाः पक्षिणः । सर्वान् पञ्चनखान् वक्ष्यमाणव्यतिरिक्तान् ॥ १७ ॥

(३) **कुल्लूकः** । यएकाकिनःप्रायेण चरन्ति सर्पादयस्तानेकचरान् तथा यआभियुक्तैरपि नामजातिभेदेनावधार्य विभागतश्च मृगपक्षिणोन ज्ञायन्तेतान् भक्ष्येष्वपि समुद्दिष्टानितिसामान्यविशेषनिषेधाभावेन भक्ष्यपक्ष*निक्षिप्तान्भक्ष्यत्वेन समुद्दिष्टांश्च तथा सर्वान्पञ्चनखान्वानरादीन्न भक्षयेत् ॥ १७ ॥

(४) **राघवानन्दः** । प्रकृतमनुसरति नेति । एकचरान् सर्पादीन् भक्ष्येष्वपि समुद्दिष्टान् समुद्दिश्यमानान् एकचरान् स्वतन्त्रानिति वा न भक्षयेत् । मृगाश्च द्विजाः पक्षिणश्च तान् अज्ञातान् जातितोनामतश्च पञ्चनखान्वानरादींश्च न भक्षयेदित्यनुषङ्गः। श्वाविधादीन्पञ्चनखान्पञ्च वर्जयित्वाऽन्यान्न भक्षयेदित्यर्थः ॥ १७ ॥

(५) **नन्दनः** । एकचरान् सर्पादीन् । अज्ञातान्मनुष्यैर्नामतोजातितश्च । भक्ष्येषु सामान्यतोऽभक्ष्यतया न ज्ञातेष्वपि समुद्दिष्टान्विशेषतः । शास्त्रान्तरेण भक्ष्यतया निर्दिष्टान्नभक्षयेत् ॥ १७ ॥

(६) **रामचन्द्रः** । एकचरान्न भक्षयेत् । अज्ञातांश्च मृगद्विजान् जातितोये अज्ञातामृगाः पक्षिणश्च तान्नभक्षयेत् । सर्वान्पञ्चनखान्भक्ष्येषु समुद्दिष्टानपि नभक्षयेत् ॥ १७ ॥

श्वाविधं शल्यकं गोधां खड्गकूर्मशशांस्तथा ॥ भक्ष्यान् पञ्चनखेष्वाहुरनुष्ट्रांश्चैकतोदतः ॥ १८ ॥

(१) **मेधातिथिः** । पञ्चनखानांमध्याच्छ्वावित्कादयोभक्ष्याः । स्मृत्यन्तरे तु खड्गे विकल्पः । तथाच वसिष्ठः । खड्गे तु विवदन्तइति । उष्ट्रवर्जिताएकतोदतोगोव्यजमृगाभक्ष्याः । ननुच श्वावित्प्रभृतीनांपञ्चनखानांभक्ष्यत्ववचनादन्येषामभक्ष्यतासिद्धेःसर्वान्पञ्चनखानिति प्रतिषेधवचनमनर्थकम् । नैषदोषः। सर्वशब्देन प्रतिषेधे स्पष्टा प्रतिपत्तिर्भवति । भक्ष्यविशेषनिर्देशेन तदन्येषांयाअभक्ष्यताप्रतिपत्तिः साआनुमानिकीप्रतिपत्तिः । गौरवंहितथास्यात् ॥ १८ ॥

(२) **सर्वज्ञनारायणः** । श्वावित् कण्टकी प्राणिभेदः यः श्वानंस्वगात्रकण्टकैर्विध्यति । शल्यकस्तत्सदृशोपरः । एकतोदतः एकदन्तपङ्क्तियुक्तान् ॥ १८ ॥

(३) **कुल्लूकः** । अत्रप्रतिप्रसवमाह श्वाविधमिति । श्वाविधंसेधाख्यंप्राणिभेदं शल्यकं तत्सदृशंस्थूललोमानम् । तथा गोधागण्डककच्छपशशान्पञ्चनखेषु भक्ष्यान्मन्वादयः प्राहुः । तथा उष्ट्रवर्जितानेकदन्तपङ्क्त्युपेतान् ॥ १८ ॥

(४) **राघवानन्दः** । पञ्चनखानांमध्ये पञ्चानामेव हव्यकव्यार्थत्वम् । तत्र श्वाविधः शुनोविध्यतीति वन्तुरः ।

---

* पक्ष=कुक्षि (अ)

शल्यकं शल्यानिकण्टकाकाराणि रोमाणि सन्ति यस्यतं । गोधा कृकलासाकारा । देवान्पितॄंसमभ्यर्च्य खादन्मांसंन दुष्यतीत्युक्तेः । अनुष्ट्रान् उष्ट्रभिन्नान् । एकतोदतः एकपङ्क्तिदन्तयुक्तान्गवादीन् ॥ १८ ॥

(५) नन्दनः । पञ्चनखेष्वपि केषांचिद्भक्षणंप्रतिप्रसौति श्वाविधमिति । शल्यकः शल्ली । गोधा कृकलासानुकारिणी । खड्गः पिच्छेप्रशस्तोमृगविशेषः । अनुष्ट्रानुष्ट्रवर्जितान् । एकतोदतोऽजप्रभृतीन् ॥ १८ ॥

(६) रामचन्द्रः । श्वाविधं सेधाख्यं । गोधा कृकलासानुकारिणी । खड्गकूर्मशशांस्तथा भक्ष्यानाह । अनुष्ट्रान् उष्ट्रव्यतिरिक्तान् ॥ १८॥

छत्राकं विड्वराहं च लशुनं ग्रामकुक्कुटम् ॥ पलाण्डुं गृञ्जनं चैव मत्या जग्ध्वा पतेद्द्विजः ॥१९॥

(१) मेधातिथिः । छत्राकं कवकानि । विड्वराहः ग्रामशूकरः स्वतन्त्रविहारः एतानिभक्षयित्वापतितोभवेत् पतितप्रायश्चित्तंकुर्यात् । वक्ष्यति च । गर्हितान्नाद्ययोर्जग्धिःसुरापानसमानि षट् ॥ १९ ॥

(२) सर्वज्ञनारायणः । जग्ध्वा एकैकं प्रत्येकमेव स्मृत्यन्तरे निषेधात् । पतेत् द्विजातिकर्मभ्योहानिः पतनमिति-गौतमोक्तपातित्यवान्भवति । तेन प्रायश्चित्तचरणात्प्राक् संध्यादावनधिकारउक्तः । एवंयत्रयत्रान्यदोषे पातोक्तिस्तत्र द्रष्टव्यम् ॥ १९ ॥

(३) कुल्लूकः । कवकग्रामसूकरलशुनादीनामन्यतमंबुद्धिपूर्वकं गुरुप्रायश्चित्तोपदेशादभ्यासतोभक्षयित्वा द्विजातिः पतति । ततश्च पतितप्रायश्चित्तंकुर्यात् । गर्हितानांतथा जग्धिः सुरापानसमानिषडिति ॥ १९॥

(४) राघवानन्दः । प्रायश्चितार्थंपुनश्छत्राकादिग्रहणम् । मत्या ज्ञानेन जग्ध्वा भक्षयित्वा पतेदतःपतितस्येव प्रायश्चित्तंकुर्यादिति ॥ १९ ॥

(५) नन्दनः । प्रतिषिद्धेष्वपिकेषांचिद्वर्जनीयतामन्वाह छत्राकमिति । छत्राकंद्विविधं भूजंवृक्षजंचेति ॥ १९॥

(६) रामचन्द्रः। भक्षणे प्रत्यवायमाह छत्राकमिति । मत्या ज्ञात्वा जग्ध्वा भक्षयित्वा द्विजः पतति पतितोभवेत् । पुनर्लशुनादिग्रहणंप्रायश्चितातिशयार्थम् ॥ १९ ॥

अमत्यैतानि षड् जग्ध्वा कृच्छ्रं सान्तपनं चरेत् ॥ यतिचान्द्रायणं वापि शेषेषूपवसेदहः ॥ २० ॥

(१) मेधातिथिः । अमत्याअबुद्धिपूर्वंषटजग्ध्वाषण्णामन्यतममपि भक्षणस्यअविधेयत्वनिमित्ततया साहित्यस्याविवक्षा । शेषेषु अभक्ष्येषु भक्षणे लोहितवृक्षनिर्यासादिषु एकमहोरात्रंनभुञ्जीत । अहःशब्दोरात्रावपि दृष्टप्रयोगः । अहश्च कृष्णमहरर्जुनंचेति । येषु चात्र प्रकरणे प्रतिषिद्धेषु प्रायश्चित्ताधिकारे प्रतिपदंप्रायश्चित्तमन्यद्वक्ष्यते क्रव्यादशूकरेत्यादि तत्र तदेव द्रष्टव्यं प्रतिपदविहितत्वात् । अस्य चोपवासस्याऽन्यत्र चरितार्थत्वात् ॥ २० ॥

(२) सर्वज्ञनारायणः । मतिरिच्छा तदभावोऽमतिः । षट् षण्णांमध्ये यत्किंचिदेकम् । अत्रत्वमत्या भक्षणेविहितंयदकामानांकामात्तद्द्विगुणमितिवचनात् मतिभक्षणप्रायश्चित्तंद्विगुणमूह्यम् । सांतपनं द्व्यहसाध्यं वक्त्रमात्रप्रवेशे । सम्यग्भक्षणेतु यतिचान्द्रायणम् । शेषेषु अभक्ष्येष्वमेध्यप्रभवकन्दादिष्वमत्याभक्षितेषु । मत्या द्व्यहोपवासः । एतच्च तन्मध्यपतिताल्पप्रत्यवायहेतुभक्षणे पेयूषपानमत्स्यभक्षणादौ स्मृत्यन्तरे प्रायश्चित्ताधिक्यविधानात् ॥२० ॥

(३) कुल्लूकः । एतानि छत्राकादीनि षट् बुद्धिपूर्वकमेव भक्षयित्वाऽभिधेयभक्षणस्यनिमित्तत्वेन साहित्यस्याविवक्षितत्वात् । एकादशाध्यायवक्ष्यमाणस्वरूपंसमाहसाध्यंसान्तपनं यतिचान्द्रायणं वाचरेत् । एतद्व्यतिरिक्तेषु लोहित-

वृक्षनिर्यासादिषु प्रत्येकंभक्षणादहोरात्रोपवासंकुर्यात । छत्राकादीनांच प्रायश्चित्तापकर्षोवर्जनादरार्थः । शेषेषूपवसेदहरि-तिलाघवार्थं तत्र हि क्रियमाणे लोहितनिर्याससग्रहणमपि कर्तव्यंस्यात् ॥ २० ॥

(४) राघवानन्दः । शेषेषु छत्राकादिषड्वर्जितेष्वमेध्यप्रभवादिपञ्चनखान्तेषूपवासमात्रम् । कामतोभक्षणे प्रायश्चितम ॥ २० ॥

(६) रामचन्द्रः । एतानि छत्राकादीनि षडमत्याऽज्ञानेन जग्ध्वा भक्षयित्वा कृच्छ्रं कृच्छ्रसंज्ञं व्रतं चरेत् । यतीनांयचान्द्रायणंतच्चरेत् । शेषेषु छत्राकादिव्यतिरिक्तेषु वस्तुषु भुक्तेषु सत्सु अहः उपवसेत् ॥ २० ॥

संवत्सरस्यैकमपि चरेत्कृच्छ्रं द्विजोत्तमः ॥ अज्ञातभुक्तशुद्ध्यर्थं ज्ञातस्य तु विशेषतः ॥ २१॥

(१) मेधातिथिः । भोज्यशूद्रगृहभोजिनोब्राह्मणस्येदमुच्यते । यस्य शूद्रस्य गृहे यानि ब्राह्मणानामभोज्यान्यन्नानि संभवन्ति नदूरतःपरिन्हियन्ते तादृशस्य गृहेयोब्राह्मणोऽन्नंभुङ्क्ते तस्य प्रतिषिद्धान्नभोजनाशङ्कायांप्राजापत्यकृच्छ्र-चरणमुपदिश्यते । अविशेषनोदनायांप्राजापत्यंकृच्छ्रंप्रतीयतइति वक्ष्यामः । अज्ञातभुक्तशुद्ध्यर्थमज्ञातदोषशङ्कायामाह । दोषोयदिभुङ्क्ते तस्यशुद्ध्यर्थं । ननुच ईदृशस्य शुद्धिंवक्ष्यति अदृष्टमद्भिर्निर्णिक्तमिति तस्य विषयंतत्रैव दर्शयिष्यामः । ज्ञातस्यतुदोषस्यविशेषतः वैशेषिकंप्रायश्चित्तंकर्तव्यम् । यस्य यद्विहितंप्रतिपदम् ॥ २१ ॥

(२) सर्वज्ञनारायणः । संवत्सरस्येतिषष्ठ्या तन्मध्यइतिविवक्षितम् । कृच्छ्रं प्राजापत्यं । द्विजोत्तमोविप्रः । अपिशब्देन शक्तस्याधिककरणमुक्तम् । अज्ञातभुक्तशुद्ध्यर्थं अज्ञायमानदुष्टसंसर्गभुक्तान्नदोषनिवृत्त्यर्थम् । ज्ञातस्यतु विशेषतोयत्र यथोक्तंतदेव ॥ २१ ॥

(३) कुल्लूकः । द्विजोत्तमपदंद्विजातिपरं त्रयाणांप्रकृतत्वात् एतदुक्तंद्विजानामित्युपसंहाराच्च । द्विजातिःसंवत्सरमध्यं एकमपि कृच्छ्रंप्रथमाम्नानात्प्राजापत्याख्यमज्ञातभक्षणदोषोपशमनार्थमनुतिष्ठेत् । ज्ञातस्य पुनरभक्ष्यभक्षणदोषस्यविशेषतोयत्र यद्विहितंतदेव प्रायश्चित्तंकुर्यात् । यत्तु । त्रीणि देवाः पवित्राणि ब्राह्मणानामकल्पयन् । अदृष्टमद्भिर्निर्णिक्तंयच्च वाचा प्रशस्यतइति ॥ तद्द्रव्यशुद्धिप्रकरणपठितप्रायश्चित्तव्यतिरिक्तद्रव्यशुद्धिविशेषेऽवतिष्ठते ॥ २१ ॥

(४) राघवानन्दः । तेषामज्ञानतोभक्षणे त्वाह सर्मिति । अज्ञातभुक्तिशुद्ध्यर्थमिदंकृच्छ्रमात्रमिति शेषः । विशेषतः विशेषाकारेण छत्राकादीनामुक्तत्वात् ॥ २१ ॥

(६) रामचन्द्रः । अज्ञातभुक्तशुद्ध्यर्थमेकंकृच्छ्रं संवत्सरस्य संवत्सरपर्यन्तंचरेद्द्विजोत्तमः । ज्ञातस्य ज्ञानपूर्वंभक्षितस्य विशेषतः ॥ २१ ॥

यज्ञार्थं ब्राह्मणैर्वध्याः प्रशस्तामृगपक्षिणः ॥ भृत्यानांचैव वृत्त्यर्थमगस्त्योह्याचरत्पुरा ॥ २२ ॥

(१) मेधातिथिः । भक्ष्यप्रसंगेन हिंसाभ्यनुज्ञायते । अत्यर्थंक्षुत्पीडायांभृत्यादेर्भोजनान्तरासंभवे भक्ष्यमृगपक्षिवधःकर्तव्यः । भृत्याःप्राग्व्याख्याताः । अगस्त्यस्तथाकृतवानित्यगस्त्यग्रहणंप्रशंसार्थम् । यज्ञार्थमित्यार्धश्लोकोऽर्थवादएव । तत्रहि वधः प्रत्यक्षश्रुतिविहितत्वादेव प्रसिद्धः । प्रशस्ताये भक्ष्यतयाऽनुज्ञाताः । एषएवार्थउत्तरश्लोके विस्तरतः कर्मार्थवादतया कथ्यते ॥ २२ ॥

। (२) सर्वज्ञनारायणः । अत्र मांसेषु भक्ष्याणि कानिचिदुक्तानि मांसोत्पादनंच प्राणिनोहत्वा हतानांवा मांस-

---

* शेषे=षये (अ)

ग्रहणेनेति द्विधा तत्रैमेत्राब्राह्मणउच्यतइत्यादिषु प्राणिवधस्यातिपापहेतुत्वंप्रतीयते तथाच स्वयंप्राणिवधाचरणेऽपि यत्र ब्राह्मणानां तादृशोहिंसादोषस्तत्प्रसंगात्कथयति यज्ञार्थमिति । यज्ञार्थं पाकयज्ञहविर्यज्ञसोमयज्ञास्तदर्थं वध्याः। स्वयं भृत्यानां भरणीयानांमातापितृभार्यादीनां दुर्भिक्षाद्यापदि वृत्तिर्जीवनमात्रं तदर्थम् । अगस्त्योह्याचरद्भयार्थम् । अगस्त्यग्रहणं ब्राह्मणकार्यतांदर्शयितुम् ॥ २२ ॥

(३) कुल्लूकः । इदानींभक्षणप्रसंगेन यागाद्यर्थंहिंसामप्यनुजानाति यज्ञार्थमिति । ब्राह्मणादिभिर्यागार्थंप्रशस्ताः शास्त्रविहितामृगपक्षिणोवध्याः । भृत्यानांचावश्यभरणीयानांवृद्धमातापित्रादीनांसंवर्धनार्थम् । यस्मादगस्त्योमुनिः पूर्वं तथाकृतवान् । परकृतिरूपोयमनुवादः ॥ २२ ॥

(४) राघवानन्दः । किंच भक्ष्यप्रसङ्गेन हिंसांकुर्वित्यनुजानाति यज्ञार्थमिति । भृत्यानां भरणीयानां। सदाचारं प्रमाणयति अगस्त्यइति ॥ २२ ॥

(५) नन्दनः । भक्ष्यत्वेनानुज्ञातानांमृगपक्षिणांयज्ञार्थंभृत्यार्थंच वधोब्राह्मणानामपि निर्दोषइत्याह यज्ञार्थमिति ॥ २२ ॥

(६) रामचन्द्रः । द्वाभ्यामाह यज्ञार्थमिति । मृगपक्षिणः वध्याहिंस्यायज्ञार्थंब्राह्मणैः प्रशस्ताउक्ताः । अगस्त्यः भृत्यानांपित्रादीनांतृप्त्यर्थं पुरा आचरत् ॥ २२ ॥

बभूवुर्हि पुरोडाशाभक्ष्याणांमृगपक्षिणाम् ॥ पुराणेष्वृषियज्ञेषु ब्रह्मक्षत्रसवेषु च ॥ २३ ॥

(१) मेधातिथिः । षट्त्रिंशत्संवत्सरंनाम सत्रं तत्र मृगपक्षिवधआम्नातः सोनेनानूद्यते। इदंतत्रब्राह्मणं संस्थितेऽहनि गृहपतिर्मृगयांयाति सतत्रयान्यान्मृगान्हन्ति तेषांतरसाःपुरोडाशाभवन्ति । अर्थवादत्वाद्बभूवुरितिभूतप्रत्ययेन विवक्षा तेनाद्यत्वेपिभवन्ति । एवंपुराणेष्वपि न केवलंकश्चिदद्यत्वे सत्राणांव्यवहारइतिदर्शनाभिप्रायमेतत्पुराणेष्विति। न पुनरद्यत्वे यदि केचित्सर्वाण्येव हरेयुस्तेषामेषविधिर्नभवतीतिमन्तव्यम् । अथवा यःस्वयंशास्त्रार्थंवेदितुमसमर्थः केवलंपरप्रसिद्ध्या महाजनोयेन गतःसपन्थाइतिन्यायेन प्रवर्तते तत्रत्वेतदुच्यते । पुराणेष्विति नार्यमिदंप्रथमकोधर्मः किंतर्हि अनादिः । पौराणाऋषयोब्राह्मणाःकेवलतपःसिद्धाः जात्यन्तरंवा यथामहाभारतादौ वर्णितम् । नचात्र निर्बन्धः कर्तव्यः । ऋषीणांजात्यन्तरत्वे गन्धर्वादिवत्कथंयागेष्वधिकारइति यतोयमर्थवादोयेन केन चिदालम्बनेनप्रतीयते । ब्रह्मक्षत्रसवाः ब्रह्मक्षत्रिययज्ञाः ॥ २३ ॥

(२) सर्वज्ञनारायणः । तथाह्यन्येष्वृषीणां यज्ञेषु सत्रेषु पुराणेषु अतिपूर्वकालेषु मृगपक्षिमांसेन पुरोडाशाबभूवुः । तानितु ब्रह्मक्षत्रसवेषु ब्राह्मणक्षत्रियजातीयैर्मिलितैः कृतेषु सवेषु यज्ञेषु सत्ररूपेषु वा बभूवुः । भवतिहि ब्राह्मणक्षत्रियौ गृहपती कृत्वा ब्राह्मणैर्ऋत्विग्भूतैः सत्रं तत्र तरसाःपुरोडाशाभवन्तीति श्रुतावुक्तम् । तरसामांसमयाः । तदुत्पादनप्रकारश्च संस्थितेगृहपतिर्मृगयामेतीत्यादिनोक्तः तत्रमृगयाप्रकारस्य ब्राह्मणैरज्ञानात्क्षत्रियस्यापि गृहपतित्वेनान्तर्भावनंक्रियतइतिब्रह्मक्षत्रसवेष्वितिविशेषितम् ॥ २३ ॥

(३) कुल्लूकः । यस्मात्पुरातनेष्वपि ऋषिकर्तृकयज्ञेषु च भक्ष्याणांमृगपक्षिणांमांसेन पुरोडाशाअभवंस्तस्माद्यज्ञार्थमधुनातनैरपि मृगपक्षिणोवध्याः ॥ २३ ॥

(४) राघवानन्दः । संस्थितेहनि गृहपतिर्मृगयांयाति सयांस्तत्र मृगान्हिनस्ति तेषांतरसाःसवनीयाःपुरोडाशा

भवन्तीति वसन्तायकपिञ्जलानालभेतेत्यादिश्रुतेर्यज्ञार्थंतेषांपुरोडाशाइत्याह बभूवुरिति। ऋषीणां यज्ञेषु ब्रह्म ब्राह्मणजातिः तथा क्षत्रं तयोः सर्वेषु यागेषु मृगाणांपक्ष्यादीनांपुरोडाशादयोबभूवुरिति पुराणेषु श्रूयतइतिशेषः॥ २३॥

(५) **नन्दनः**। मृगपक्षिणां मांसानीतिशेषः। ब्रह्मक्षत्रसवेषु ब्राह्मणानांक्षत्रियाणांच यज्ञेषु॥ २३॥

(६) **रामचन्द्रः**। भक्ष्याणांमृगपक्षिणामगस्त्येन प्रोक्षितानांमांसैः पुरोडाशाबभूवुः। ब्रह्मक्षत्रसवेषु ब्राह्मणक्षत्रियैर्मिलित्वा कृतेषु। तद्यथा ब्राह्मणक्षत्रियौ गृहपती कृत्वा ब्राह्मणैर्ऋत्विग्भूतैः सत्रंभवति तत्रतरसाःपुरोडाशा भवन्तीति श्रुतावुक्तं। तरसामांसमयाः। तत्प्रकारश्च संस्थिते गृहपतिर्मृगयामेतीत्यादिनोक्तः। ब्राह्मणस्य मृगयाप्रकाराज्ञानात्क्षत्रियस्यब्राह्मणमिलितस्याधिकारः॥ २३॥

यत्किंचित्स्नेहसंयुक्तं भक्ष्यं भोज्यमगर्हितम्॥ तत्पर्युषितमप्याद्यं हविःशेषं च यद्भवेत् ॥२४॥

(१) **मेधातिथिः**। भक्ष्यंयत्किंचित्स्नेहसंयुक्तं। भोज्यमोदनादि। भुक्तिभुज्योरेकार्थत्वेपि पृथगुपादानाद्विषयभेदोयंप्रतीयते अगर्हितं शुक्ततामनापन्नं तत्पर्युषितमप्याद्यम्। रात्र्यन्तरे पर्युषितमुच्यते। पूर्वेद्युःसिद्धमप्यपरेद्युः पर्युषितंभवति। स्नेहसंयुक्तमिति एवंसंदिह्यते किंयत्स्नेहसंयुक्तंसत्पर्युषितंरसमिश्रशाकादितत्पर्युषितमशितव्यम्। उक्तशुक्तस्यापि पर्युषितस्य भक्षणम्। कालेस्नेहसंयोगःकर्तव्यः। भक्षापूपाद्यपि पर्युषितंभोजनकाले स्नेहेन संयोज्य भक्षयितव्यमिति। अतःसंदिह्य यावता यत्स्नेहयुक्तानांभक्ष्यतोच्यते तत्पर्युषितमाद्यमिति। उद्दिश्यमानंस्नेहसंयुक्तमिदमितिन पुनर्विधेयार्थे नहितच्छब्दसंबन्धोस्य श्रुतोयत्पर्युषितंस्नेहासंयुक्तमाद्यमिति। उच्यते। हविःशेषाणांपर्युषितानामस्नेहसंयुक्तानांतेषांवचनमनर्थम्। नच तेषांस्नेहसंयुक्तानांपरिवासःसंभवति। एवंच तेषांवचनमर्थवद्भवति यदि भोजनकाले तेषांस्नेहसंयोगोनापेक्ष्यते। अतस्तेषांतावद्भोजनकालएव स्नेहसंयोगनिरपेक्षतया वचनस्यार्थवत्त्वम्। यद्येवंतथापि न संदेहोऽर्थवत्त्वाद्विशेषपदस्य विधेयार्थता स्नेहसंयुक्ताशब्दस्यन्याय्या। उच्यते एतावदत्रसन्देहेबीजं यथाश्रुतसंबन्धस्यबलीयस्त्वात्किं हविःशेषपदमनुवादोस्तु उतानर्थकत्वंमाप्रापदितियत्पर्युषितं तेन स्नेहसंबन्धः क्रियताम्। तत्रानर्थक्याद्व्यवहितकल्पना ज्यायसी। समाचारान्निर्णयः। सर्पिस्तैलवसामज्जानःस्नेहाः॥ २४॥

(२) **सर्वज्ञनारायणः**। पर्युषितेविशेषमाह यत्किंचिदिति। यत्किंचित्स्नेहसंयुक्तं येनकेनचित्स्नेहेन संयुक्तं सर्वतोव्याप्तंनत्वेकदेशस्नेहसंबन्धादपि हविः शेषस्य पर्युषितस्य पृथग्भक्ष्यत्वाभिधानात्। एवंहि हविषोभिघारणादवश्यंस्नेहेनैकदेशसंबन्धोव्याप्तिस्तन्नास्तीतितस्यपृथगभिधानंयुज्यते। भक्ष्यंलड्डुकादि। भोज्यमोदनादि॥ २४॥

(३) **कुल्लूकः**। इदानींपर्युषितप्रतिप्रसवार्थमाह यत्किंचिदिति। यत्किंचित्खरविशदमभ्यवहार्यं मोदकादि भोज्यंपायसादि अगर्हितमुपघातान्तररहितंतत्पर्युषितंरात्र्यन्तरितमपि घृततैलदध्यादिसंयुक्तंकृत्वा भक्षणीयम्। ननु प्रागेव यत्स्नेहसंयुक्तंतत्पर्युषितंभक्षणीयमितिव्याख्येयं तथाच सति हविःशेषस्य स्नेहसंयोगावश्यंभावाद्यत्किंचित्स्नेहसंयुक्तमित्यनेनैव भक्षणे सिद्धे हविःशेषंच यद्भवेदित्यनर्थकंस्यात्। स्मृत्यन्तरेऽपि भक्षणकालएवाभिघारणमुपदिश्यते। तथाच यमः। मसूरमाषसंयुक्तंतथा पर्युषितंचयत्। तत्तु प्रक्षालितंकृत्वा भुञ्जीत ह्यभिघारितम्॥ हविःशेषंतु चरुपुरोडाशादि पर्युषितमपि भोजनकाले स्नेहसंयोगशून्यमेव भक्षणीयं पृथगुपदेशात्॥ २४॥

(४) **राघवानन्दः**। एतानि पर्युषितान्यप्यदनीयानीत्याह यदितिद्वाभ्यां। आद्यं भक्षणीयं अस्निग्धंभक्ष्यंभोज्यंस्नेहसंयुक्तंकृत्वा। तथाच यमः॥ मसूरमाषसंयुक्तंतथापर्युषितंचयत्। तच्च प्रक्षालितंकृत्वा भुञ्जीताज्याभिघारितमिति॥२४॥

(५) **नन्दनः** । पर्युषितमभक्ष्यमित्युक्तंतस्यापवादंश्लोकद्वयेनाह यदिति । अगर्हितमनिषिद्धंयत्किंचिद्भक्ष्यमपूपादि । भोज्यमन्नादि । तदुभयंस्नेहसंयुक्तंघृतादिना संयुक्तंचेत्पर्युषितमप्याद्यमदनीयम् । स्नेहयुक्तंहविःशेषंयत्तदप्यदनीयम् ॥ २४ ॥

(६) **रामचन्द्रः** । भक्ष्यं मोदकादि भोज्यं ओदनादि तत्पर्युषितमप्याद्यंभक्ष्यम् । यत् हविःशेषं तदाद्यंभक्ष्यंभवेत् ॥ २४ ॥

चिरस्थितमपि त्वाद्यमस्नेहाक्तं द्विजातिभिः ॥ यवगोधूमजं सर्वं पयसश्चैव विक्रिया ॥ २५॥

(१) **मेधातिथिः** । चिरस्थितं द्विरात्राद्यन्तरितं अपिशब्दादाक्तमित्यत्रापिसंबन्धयितव्यम् । स्नेहाक्तमपि यवगोधूमजं सक्तुपूपादि । पयसोविक्रियाविकाराःदधिमथितादयः ॥ २५ ॥

(२) **सर्वज्ञनारायणः** । चिरस्थितंपर्युषितमस्नेहाक्तमप्याद्यं भोज्यं यवगोधूमयोर्विकारजातमित्यर्थः ॥ २५॥

(३) **कुल्लूकः** । अनेकरात्र्यन्तरिताअपि यवगोधूमदुग्धविकाराः स्नेहसंयोगरहिताअपि द्विजातिभिर्भक्षणीयाः ॥ २५ ॥

(४) **राघवानन्दः** । पयसश्चैव विक्रियाः पर्युषिताभक्ष्याइत्यन्वयः । अगर्हितंचेद्भक्ष्यमिति स्वतोगर्हितंस्नेहसंयुक्तमपि न भोक्तव्यम् ॥ २५ ॥

(५) **नन्दनः** । अस्नेहाक्तमसंयुक्तंघृतादिभिः ॥ २५ ॥

(६) **रामचन्द्रः** । द्विजातिभिः अस्नेहाक्तंयवगोधूमजंचिरस्थितमपि आद्यं भक्ष्यंभवति । च पुनः दुग्धस्य विक्रियाः ॥ २५ ॥

एतदुक्तं द्विजातीनां भक्ष्याभक्ष्यमशेषतः ॥ मांसस्यातः प्रवक्ष्यामि विधिंभक्षणवर्जने ॥ २६ ॥

(१ **मेधातिथिः** । आद्येन श्लोकार्धेन पूर्वप्रकरणमवच्छिनत्ति । तदेतदनन्तरमनुक्रान्तंप्रकरणमेतद्द्विजातीनां न शूद्राणाम् । इत्युत्तरंतु यद्वक्ष्यते त च्छूद्राणामपीति प्रकरणव्यवच्छेदप्रयोजनम् । अतश्च मांसभक्षणे प्रकारोवक्ष्यते । यच्च तद्वर्जनेन फलं तच्छूद्रस्यापि भवतीत्यन्यथा अभक्ष्याणिद्विजातीनामित्यधिकाराल्लशुनादिष्वथ शूद्रस्य मांसभक्षणेपि कामचारःस्यात । यद्येवंदेवाद्यर्चने शिष्टस्य मांसस्य भक्ष्यता वक्ष्यते । देवान्पितॄंश्चार्चयित्वा खादन्मांसंन दुष्यतीति देवाद्यर्चनंमेध्येन मांसेन । येच द्विजातीनांप्रतिषिद्धामृगशकुन्तास्तेऽमेध्याः अतश्च तेषांमांसेन देवार्चनासंभवादतच्छेषस्य भक्ष्यत्वादन्येपि प्रकरणभेदायथाब्राह्मणादीनांमृगपक्षिणः प्रतिषिद्धास्ते शूद्रस्यापि प्रकारान्तरेण प्रतिषिद्धाभवन्ति । तत्र प्रकरणभेदेन केनचिदुच्यते । लशुनादिप्रतिषेधः शूद्रस्य न भवति । अस्तितावत्प्रकरणभेदेन प्रयोजनंलशुनादिप्र तषेधे शूद्रस्याधिकारोमाभूदिति मांसेपि देवाद्यर्चने गृहस्थस्याधिकारादगृहस्थस्य शूद्रस्य यथाकाम्यम् । ननुच पाकयज्ञे शूद्रस्याधिकारतःस्थितस्य भोजनंगृहस्थानां च विहितम् । नच लशुनादिभिः पाकयज्ञाःक्रियन्ते । ततश्च नापि शूद्रस्य यथाकाम्यं । लशुनादयोभक्ष्याःस्युः । कोदोषः । द्विजातिग्रहणमनर्थकम् ।परित्यक्तमेतदगृहस्थस्य प्रोषितस्य वा कामचारः नचगृहस्थेन यदहुतंतन्न भोक्तव्यं शेषभुग्भवेदित्यस्यायमर्थः। अकृतवैश्वदेवक्रियेण नभोक्तव्यम् ।तत्र यस्यैव यागसाधनता द्रव्यस्य तदेव मेध्यंहोतव्यम् ।अन्येतु भोजनकाले कुतश्चिदाहृत्यमध्यगेहेवाभुञ्जते तच्च हुतशेषमपि न प्रतिषिद्धं मांसेतु पुनर्वचनान्नियमः । न कदाचिद्देवानुपयुक्तंभोज्यमिति । यदि चातुर्वर्ण्यस्यात्राधिकारस्तदा यद्वक्ष्यति

परस्तात्तु शुद्धविधौ चतुर्णामपि वर्णानामिति तदनर्थकम् । तत्रैव तस्य प्रयोजनंवक्ष्यामः । अथ श्वमांसाद्यपि शूद्रस्य भक्ष्यं प्राप्नोति द्विजातिग्रहणात्पूर्वत्र । किन्त्वेकादशे विड्वराहखरोष्ट्राणामित्यादिश्लोकत्रयनिर्दिष्टाःशूद्रस्यापि न भक्ष्याइतिज्ञापकंदर्शयिष्यामः ॥ २६ ॥

(२) सर्वज्ञनारायणः । इहखलु मांसेषु सर्ववर्णाविशेषेण भक्ष्याभक्ष्यविवेकोदर्शितः तत्र द्विजातीनांत्रयाणांयादृशेन नियमेन भक्ष्यमांसानामपि भक्षणं तत्कथयितुमवतारयति एतदुक्तमिति । द्विजातीनांत्रयाणांसामान्यात्तदुक्तम् । भक्षणे वर्जने च विधिं प्रकारं द्विजातीनामेव ॥ २६ ॥

(३) कुल्लूकः । एतद्द्विजातीनांभक्ष्याभक्ष्यमुक्तम् । अतऊर्ध्वंमांसस्य भक्षणेवर्जने च विधानंनिःशेषंवक्ष्यामि ॥ २६ ॥

(४) राघवानन्दः । अशेषतःशेषःप्रायश्चित्तंसोपि परिशिष्टोविद्यते न यत्र तेन प्रायश्चित्तसहितंभक्ष्यमुक्तमिति सूचीकटाहन्यायेन प्रायश्चित्ताभिधानमेकादशोक्तम् । द्विजस्यैवात्र प्रायश्चित्तमुक्तं न तुशूद्राणामिति मेधातिथिः । तत्रशूद्राणांमांसभक्षणे दोषएव नास्तीति जग्ध्वा मांसमित्युपक्रम्योपसंहारेऽसर्वद्विजइति तत्रोक्तेः । स्थानभ्रष्टाएते भवन्तीति भावः । प्रतिज्ञान्तरमाह मांसस्येति । भक्षणवर्जने यथा भक्षितव्यंयथा वा नेति ॥ २६ ॥

(५) नन्दनः । विधिं प्रकारम् ॥ २६ ॥

प्रोक्षितं भक्षयेन्मांसं ब्राह्मणानां च काम्यया॥यथाविधि नियुक्तस्तु प्राणानामेव चात्यये॥२७॥

(१) मेधातिथिः । अग्नीषोमीये पशौ हुतशिष्टंमांसं लक्षणया प्रोक्षितमुच्यते । ननु प्रोक्षितशब्दोयौगिकउक्षसेचनइत्यस्यधातोःप्रक्षालनक्रियानिमित्तकः तथाच प्रोक्षणीरासादय घृतंप्रोक्षणीर्यमिति प्रोक्षणीभिरुद्वेजितास्थइति सर्वत्र क्रियायोगात्प्रयुज्यते । यद्यासेचनसाधनं तत्र कुतोवैदिकसंस्कारनिमित्तकानांत्वसंबन्धे पशुलक्षणाद्वारेणमांसे प्रवर्तते । मुख्यंच शब्दार्थमतिक्रम्यकिमितिलक्षणाश्रीयते अतःप्रक्षालितमुदकादिना मांसंक्रियादिना युक्तम् । सत्यं यद्यत्र वाक्यान्तराण्यर्थवादाश्चेति निःशेषंभुञ्जाने स्युः अनुपाकृतमांसानि असंस्कृतान्पशून्मन्त्रैरिति । अतस्तत्पर्यालोचनयायमेवार्थोवतिष्ठते । यद्येवंततएव सिद्धत्वात्किमनेन केचिदाहुः अनुवादोयम् । मांसेच्छया भक्षणस्य विधिस्तावदयंन भवति क्षुत्प्रतिघातार्थिनोलिप्सया प्रवृत्त्युपपत्तेः । सहि विधिरुच्यते । यःपुरुषस्यदृष्टेन प्रयोजनेन प्रवृत्तावसत्यांप्रवृत्त्यवबोधकोयावज्जीवमग्निहोत्रंजुहुयादिति । शास्त्रमेवात्र प्रमाणं । तत्रास्मिन्कृते इदमभिमतमभिनिवर्तते अकृतेवायमनर्थआपतत्येवमन्वयव्यतिरेकाभ्यामवगम्यते तत्र शास्त्रमेव मृग्यते । यत्तु नायमन्यतोवगतःकेवलागमैकगोचरोर्थःसविधिरितिचोच्यते । इहतु भोजने कृते पुष्टिरुपजायते यद्दुःखंतन्निवर्ततइति । बालाअपि स्तनपायिनोनुपदिष्टमवयन्ति । नियमोपि भवति तद्रूपानवधारणात् । यदितावत्प्रोक्षितंच भक्षयेदेवेति नियमस्तदा कालविशेषावच्छेदाभावादाहारविहारकालाअप्यवसीदेयुरनवरतमश्नन्नेवासीत अशक्यश्चार्थउद्दिष्टःस्यात् यथोक्तमश्राद्धभोजीति । यदहरेव प्रत्यवेयादिति महाभाष्यकारेण विधिविशेषएव च नियमउक्तः । असंभवति च विधौ कुतोनियमः न चान्येन प्रोक्षितमन्येन लभ्येत तस्मादयमर्थः । अथप्रोक्षितमेवेति अप्रोक्षितंनेतिपरिसंख्या । नहि प्रोक्षिताप्रोक्षितोभयभक्षणस्य त्यागादशनाया निवृत्तौ युगपत्पर्यायेणवा प्रवृत्त्या परिसंख्यालक्षणस्य विद्यमानत्वात् । तथाप्यनुपाकृतमांसानीत्येव सिद्धम् । अन्येत्वस्य पक्षस्यैवंदोषमुपपादयन्ते । विशेषेण सर्वाप्रोक्षितप्रतिषेधःशकुनीनामप्रतिषेधःप्राप्नोति । नच येषामेव प्रोक्षणंविहितंतेषांतु प्रतिविधानाद्यभावादितिनविशेषपरिग्रहेप्रमाणमस्ति तदयुक्तमन्यन्ते एवंसति भेदेन शकुनीनांप्रतिषेधानुक्रमेण गमक-

त्वात्। तस्माच्छ्रुतकर्माङ्गत्वेन नियमस्य प्रोक्षितमांसभक्षणस्यायमनुवादइति युक्तं दृष्टान्ततया। यथा यज्ञेवश्यंभक्षणमभक्षणा च्छास्त्रातिक्रमः। एवमुत्तरेष्वपि निमित्तेषु अनुवादश्चेत्परिसंख्यापेक्षाप्यस्तु गोव्यजमांसमप्रोक्षितंभक्षयेदित्यनेनैतदनुपाकृतानामेवासद्रूपमनूद्यते। अप्रोक्षितस्यापि ब्राह्मणकाम्यानिमित्तेष्वनुज्ञापनार्थः। अन्यच्चानर्चितंवृथामांसमपि। चातुर्थिकेन वृथामांसशब्देन एतदनुपरिज्ञानार्थमितरथा विज्ञायेत किंतद्वृथामांसमिति। अथवा एकत्र भोक्तुरुपदेशोऽन्यत्रकल्पयित्वा येन देवाद्यर्चनंकृतंतदीयंमांसमन्येनाप्यतिथ्यादिना न भोक्तव्यम्। अनधिकृतेनापि देवाद्यर्चनेन ह्यतिथ्यादयेपरगृहे न दीयेत मांसेन देवार्चनेधिक्रियते। अथ कल्पयित्वा यदि कृतं तदार्हत्यशितुं। द्वितीयस्तु प्रतिषेधोदेवान्पितॄनिति। स्वगृहेधिकृतानामकृतवतांभक्षणादयस्तर्हि असंस्कृतान्पशून्मन्त्रैरिति उक्तःप्रोक्षणशब्दार्थः। एवंपञ्चापि निषेधवाक्यानि पृथगर्थानि दर्शितानि। ब्राह्मणानांच काम्यया कामना इच्छा काम्या शब्दः छान्दसः। यदाब्राह्मणादीनामप्रोक्षितानामिदमनुज्ञानं तदाकिंपुनरयंनियमः। अभक्षणे शास्त्रातिक्रमः। उत प्रतिप्रसवमात्रं प्रतिप्रसवे भोक्तव्यं विवाहेपुनर्भोक्तव्यमिति वचनादपि प्रतिषेधाप्रवृत्तिर्विवाहे गम्यते। न भोजनार्थमावश्यकं किंतु ब्राह्मणा यदि गरीयांसस्तदा तद्वचनातिक्रमोन युक्तः। अन्येतु क्रीत्वादिश्लोके ब्राह्मणानामित्यनुवर्त्य शशादिमांसस्यापि विधिमिच्छन्ति। यज्ञविवाहयोरन्यत्र चगोष्ठीभोजनादौ यदि ब्राह्मणाअर्थयन्तेतदा तेषांमांसंस्वरूपेण देवोद्देशिकया न प्रतिषिद्धमवस्थाविशेषेण प्रोक्षणं देवाद्यर्चनादीनि कर्तव्यानि विशेषःप्रतिषिद्धः तस्य ब्राह्मणकामनानिमित्ते अभ्यनुज्ञाते। ननु क्रव्यादान्शकुनानित्यादेरत्र प्रतिषेधस्यापिनिवृत्तिस्तु महाफलेतिकृतसंकल्पस्तस्याप्यनुज्ञानमिष्यते प्रोक्षितेऽप्रोक्षितेच कृतार्चनेऽकृतार्चने वा। यथाविधिनियुक्तस्तु प्राणानामेवचात्यये। मधुपर्केच श्राद्धेच नियुक्तोऽप्रोक्षणेनापि भक्षयेत्। एषहि यथाशास्त्रंनियोगस्तत्र श्राद्धेनियमा उक्ता एव केचित्तस्तु यथान्यायं कथंचिदप्यतिक्रामन्निति। श्राद्धंभोक्ष्यइत्यभ्युपत्येदमहंनाश्नामीति न लभ्यते। वक्तुम्। अभक्ष्यमशुचिकरंव्याधिजननंच वर्जयित्वा हविष्यविधानान्नभक्ष्यं यद्यद्रोचतेतत्तन्नामीतिकरंदीयते। अतइदंवचनंमधुपर्कएव। ननु मधुपर्के नास्ति नियोगः। अशितव्यंमधुपर्कार्हेणच नियमोनासौमधुपर्कस्य वधिः। सहितत्राधिकृतोनधन्योराजादिः। यथैव नास्यानश्नन्गृहेवसेदिति गृहस्थस्य नियमोदृश्यते। एतेनावगम्यते अमतिके न दातव्यमिति। यैस्तु कामचारएवंपूजितसमादानेन पूज्यस्याशनेन नहितत्तदर्थं कर्म। ननुचातिथ्यमेवानित्यं। सत्यं दृष्टंत्वात्युत्पादनेन धर्मार्थमनुष्ठानं। तस्य नियमोक्तधर्मार्थमेवदातुस्तस्य हिगोरुत्सर्गपक्षे विहितोनामांसोमधुपर्कःस्यादिति। नार्त्विज्येवचनस्यापिविषयइतिचेत्। अस्त्वयमपिपूर्ववदनुवादः श्राद्धेआर्त्विज्ये च। ननुचार्त्विज्येउक्तमेव। इडादिभक्षणंयजमानस्य तत्र शास्त्रनिबन्धनोनियमोनार्त्विजां। सत्यं। किंतु ऋत्विजोयदि न भक्षयन्ति ते प्रवाद्यन्ते। अविदितेनअदृष्टेनापि दोषेण युज्यन्ते। ननु तेषांभक्षणमधिकृतानांभासतां नहि ते कर्मफलेन युज्यन्ते। भृत्यादिर्हि परिक्रीतानविहितान्पदार्थाननुतिष्ठति। विहितश्च यजमानपञ्चमाइडांभक्षयन्तीति। तेषांभक्षणतोस्याभ्युपगत्यार्त्विज्यानांनियतंभक्षणं तदा तेनानूद्यतइति युक्तं। नहि श्राद्धभुजामृत्विजांच भक्षणे शास्त्रीययोगोयजमानस्यैवाऽनुवादःकिमर्थइतिचेन्नानुवादःप्रयोजनमपेक्षते। किंतर्हि प्राप्तमस्तिचात्र उच्यते। अत्रापि यदागोपेनगोवधपूजाभ्युपगता तदावश्यमशितव्यं। तदनुग्रहार्थमसौ मधुपर्कपूजांप्रतीच्छति। अतःपूर्वा तेन क्रिया संपादनीया। अन्यथा प्राक्रमिकःस्याद्य परिपूर्णेन मधुपर्केण तदनुग्रहासंपत्तेस्तस्मिन्प्रतिषिद्धमांसाशने मधुपर्कपूजार्त्विज्यंच प्रथममेवाभ्युपगन्तव्यम्। ब्राह्मणभोजने च। ब्रह्मचारिणस्तुव्रतवदित्यनुज्ञादानमेव ग्राह्यं मांसस्य प्राणानामेवचात्यये प्रकृतत्वाद्देवाद्यर्चनमन्तरेण। अभक्ष्यमाणे व्याधिना क्षुधा भोजनान्तरासंभवे जीवनाशशङ्कायांगोजाविभक्षयितव्यम्। सर्वतएवात्मानंगोपायेदित्येतच्छ्रुतिमूलो-

यंनियमः। अतश्चेदशेनिमित्ते मांसमभन्नात्महा संपद्यते। आत्मवधश्च सर्वतएवात्मानंगोपायेत्तस्मात् नपुरायुषःस्वःका मीत्यादलोक्यंतद्भवतीत्यादिश्रुतिभिर्मन्त्रार्थवादैश्चतैर्दोषवानेतिज्ञापितः। तथाहि मन्त्रः। असूर्यानाम ते लोकाअन्धेन तमसा वृताः। तांस्ते प्रेत्याभिगच्छन्ति येकेचात्महनोजनाइति ब्रह्मचारिणोपि प्राणात्यये भक्षणमिष्यते। तस्यैबाल्याद्य- वस्थानिमित्तंवाचनिकंप्रायश्चित्तंभविष्यतीति। ब्रह्मचारीतु योश्नीयान्मधुमांसंकदाचनेति। क्षुधातु प्राणात्ययाशङ्कायां- प्रतिषिद्धमांसाशनमपीतिव्यासः। जानातीतिदर्शनेनैकाहिकंचेष्यते। एतावता कान्तारं अतीतव्याधौ तु न शक्यमेतत् ज्ञा- तु मवश्यमशितेनानेन जीवतीति। तत्रतु प्रतिषिद्धग्राम्यकुक्कुटादिमांसभक्षणमिष्यते। प्रोक्षणंदेवाभ्यर्चनसहितस्य तु प्रकृत- त्वादस्त्यनुज्ञानं। व्याधेश्च न केवलमुत्पन्नस्य निवृत्त्यर्थंयावत्कशक्षय्यातुरदुर्बालादीनांसर्वकालंमांसाशनं नियमतइ- ष्यते। स्त्रीमद्यनित्याःक्षयिणःश्रमव्याध्याचकर्शिताः। नित्यमांसरसाहाराआतुराश्चापिदुर्बलाः॥ अप्रोक्षितस्यापि छागमां- सस्य देवताद्यर्चनंतु तैरवश्यंकर्तव्यम्। असंभवेतु कार्श्मिश्चिदहनि न दोषः॥ २७॥

(२) **सर्वज्ञनारायणः**। प्रोक्षितमुपाकृतं भक्षयेत् यजमानः। तथा बहूनांब्राह्मणानां यत्र मांसभक्षणे संतोषस्तत्र ब्राह्मणानां काम्यया इच्छया भक्षयेत्। यथाविधि वरणादिना नियुक्तः ऋत्विक् श्राद्धीच। प्राणानामत्यये तदभक्षणे म- रणनिश्चये। अत्रच भक्षयेदिति न विधीयते किंतु रागप्राप्तंभक्षणमनूद्य परिसंख्यायते। यथा मन्वर्थानुवादी बृहस्पतिः॥ रोगी नियुक्तोविधिना हुतं विप्रवृतस्तथा। मांसमद्याचतुर्द्धेषा परिसंख्या प्रकीर्तिता॥ अतोन्यथा तु योश्नीयाद्विधिंहित्वा पिशाचवत्। यावन्ति पशुरोमाणि तावत्प्राप्नोति मारणमिति॥ अतएवात्र परिसंख्यादोषोपि न दोषाय स्मृत्यैव स्मृतेस्तथा व्याख्यातत्वात्॥ २७॥

(३) **कुल्लूकः**। प्रोक्षितंभक्षयेदिति परिसंख्या वा स्यात् नियमविधिर्वा। तत्र परिसंख्यात्वे प्रोक्षितादन्यन्न भ- क्षणीयमितिवाक्यार्थः स्यात्। सचानुपाकृतमांसानीत्यनेनैव निषेधात्प्राप्तस्तस्मान्मन्त्रकृतप्रोक्षणाख्यसंस्कारयुक्तयज्ञहु- तपशुमांसभक्षणमिदंयज्ञाङ्गंविधीयते। अतएवासंस्कृतान्पशून्मन्त्रैरित्यस्यानुवादंवक्ष्यति। ब्राह्मणानांच यदा कामना भ- वति तदावश्यंमांसंभोक्तव्यमिति तदापि नियमतएकवारंभक्षयेत्सकृद्ब्राह्मणकाम्ययेतियमवचनात्। तथा श्राद्धे मधुपर्केच समांसोमधुपर्कइतिगृह्यवचनात्। नियुक्तेन नियमान्मांसंभक्षणीयमिति। अतएव नियुक्तस्तु यथान्यायमित्यतिक्रमदोष- वक्ष्यति। प्राणात्यये चाहारान्तराभावनिमित्तके व्याधिहेतुके वा नियमतोमांसंभक्षयेत्॥ २७॥

(४) **राघवानन्दः**। प्रोक्षितमग्नीषोमीयादिपश्ववशिष्टम्। यथाविधिनियुक्तः श्राद्धादौ। अत्यये मांसैकनिवर्त्यरो गेइतिचतुष्टये नियमविधिः॥ २७॥

(५) **नन्दनः**। अभक्ष्यमपि मांसंप्रोक्ष्यैव भक्षयेत्। काम्यया प्रार्थनया। यथाविधिनियुक्तोदैवपित्र्ययोर्निम- न्त्रितः। प्राणानामत्यये क्षुधादिपीडायाम्। एवंचतुर्धा मांसभक्षणे विधिरुक्तः॥२७॥

(६) **रामचन्द्रः**। मांसंभक्षयेत्प्रोक्षितादन्यन्न भक्षयेदित्यन्यनिषेधपरम्। च पुनः नियुक्तःसन् निमन्त्रितः सन्ब्रा- ह्मणानांकाम्यया भक्षयेत्। च पुनः प्राणानामत्यये नाशे उपस्थिते मांसंभक्षयेत् औषधार्थमित्यर्थः॥ २७॥

प्राणस्यान्नमिदं सर्वंप्रजापतिरकल्पयत्॥ स्थावरं जङ्गमं चैव सर्वं प्राणस्य भोजनम्॥ २८॥

(१) **मेधातिथिः**। प्राणःकौक्षोवायुः जीवबीजभूतः पञ्चवृत्तस्योदानादिकस्यशरीरस्थित्यर्थं। इदंसर्वंजगत्प्र- जापतिरेकत्वेनाकल्पयत्। इदमितिसामान्यतोनिर्दिश्य विशेषेणनिर्दिशति स्थावरंजङ्गममिति। अतोहेतोःसर्वंप्राणस्य भोजनम्। तिर्यक्पक्षिमनुष्यसरीसृपावस्थाहेतुभद्देदनिर्देशात्। द्वितीयंसर्वग्रहणमपुनरुक्तम्। यतःप्रजापतिना सर्व-

मापदिप्राणस्य कल्पितम्। अतःसर्वमेतस्य भोजनम्। तथाच प्राणसंवादोपनिषदि श्रूयते। सहोवाच किंमेत्वंभविष्यसीति। यदिदंकिंचित् आश्वभ्यआकीटपतङ्गेभ्यइति ॥ २८॥

(२) **सर्वज्ञनारायणः**। अत्रापरेषांमतमुत्थापयति प्राणस्यान्नमिति। प्राणस्य जीवात्मनः। यतोकल्पयदतस्तस्य भोजनं भोज्यम् ॥ २८ ॥

(३) **कुल्लूकः**। प्राणान्यये मांसभक्षणानुवादमाह प्राणस्यान्नमिति। प्राणितीति प्राणोजीवः शरीरान्तर्गतोभोक्ता तस्यादनीयंसर्वमिदंब्रह्मा कल्पितवान्। किंतदाह जङ्गमं पश्वादि स्थावरं व्रीहियवादि सर्वंतस्य भोजनं तस्मात्प्राणधारणार्थंजीवोमांसंभक्षयेत् ॥ २८ ॥

(४) **राघवानन्दः**। अत्रार्थे भूतार्थवादमाह प्राणस्येति। भोजनं भक्ष्यम् ॥ २८ ॥

(५) **नन्दनः**। प्राणानामेव चात्ययइत्यस्यार्थवादंश्लोकत्रयेणाह प्राणेति। प्राणस्य प्राणिनः ॥ २८ ॥

(६) **रामचन्द्रः**। प्राणस्यान्नमित्यारभ्य यज्ञार्थेति पर्यन्तंचार्वाकपूर्वपक्षोनिरूप्यते प्राणस्येति। प्राणस्य क्षुत्पिपासे इति श्रुतिः। प्रजापतिरिदंसर्वमन्नंप्राणस्याकल्पयत्। सर्वंस्थावरंजङ्गमंप्राणस्य भोजनंस्मृतम् ॥ २८ ॥

चराणामन्नमचरादंष्ट्रिणामप्यदंष्ट्रिणः॥ अहस्ताश्च सहस्तानां शूराणांचैव भीरवः ॥ २९ ॥

(१) **मेधातिथिः**। चराश्चरणपतनरणोत्साहयोगिनःश्येननकुलादयः तेषामचराः सर्पकपोतादयः अन्नम्। एवं दंष्ट्रिणां सिंहव्याघ्रादीनां अदंष्ट्रिणः रुरुपृषतादयोमृगाः। अहस्ताःसर्पमत्स्यादयः सहस्तानां नकुलनिषादादीनाम्। शूराणां महोत्साहयुक्तानांजीवितनिरपेक्षाणांभीरवः प्रियजीविताः। अल्पसत्त्वाअन्नत्वेन हन्यन्ते ॥ २९ ॥

(२) **सर्वज्ञनारायणः**। शूराणां सिंहादीनां भीरवोमृगाद्याः ॥ २९ ॥

(३) **कुल्लूकः**। प्राणस्यान्नमिदंसर्वमित्येव प्रपञ्चयति चराणामिति। जङ्गमानांहरिणादीनां अजङ्गमास्तृणादयः। दंष्ट्रिणां व्याघ्रादीनामदंष्ट्रिणोहरिणादयः। सहस्तानांमनुष्यादीनामहस्तामत्स्यादयः। शूराणांसिंहादीनां भीरवोहस्त्यादयोऽदनीयाएतादृश्यांविधातुरेव सृष्टौ ॥ २९ ॥

(४) **राघवानन्दः**। एतमेवानुभवशास्त्राभ्यांस्त्वहरतयति चराणामित्यादिना। चराणांजङ्गमानां अचराः स्थावराः। शूराणां सिंहादीनां भीरवोहस्त्यादयः ॥ २९ ॥

(५) **नन्दनः**। सर्वंप्राणस्य भोजनमित्येतद्विवृणोति चराणामिति। चराणांमनुष्यादीनामचरंवृक्षौषध्यादि। दंष्ट्रिणांव्याघ्रादीनामदंष्ट्रिणोमृगादयः। सहस्तानां मृगनकुलादीनां अहस्ताःसर्पादयः। शूराणांशक्तिमत्तराणांभीरवोऽशक्ताअन्नम् ॥ २९ ॥

(६) **रामचन्द्रः**। अचराः भक्ष्यागोधूमादयः चराणांप्राणिनामन्नम्। दंष्ट्रिणां व्याघ्रादीनां अदंष्ट्रिणोमृगादयः अन्नंभोज्यम्। अहस्तामत्स्यादयः सहस्तानांमनुष्याणामन्नम्। शूराणां सिंहादीनां भीरवोमृगादयःअन्नम् ॥ २९॥

नात्ता दुष्यत्यदन्नाद्यान् प्राणिनोहन्यहन्यपि ॥ धात्रैव सृष्टाह्याद्याश्च प्राणिनोऽत्तारएव च ॥३०॥

(१) **मेधातिथिः**। अत्ताभक्षयिता। आद्यान्प्राणिनः अत्तुंशक्यान् प्रतिदिवसंभक्षयन्नदुष्यति धात्रैव प्रजापतिना अत्तारआद्याउभयेपि सृष्टास्तस्मात्प्राणात्ययेमांसमवश्यंभक्षणीयमिति त्रिश्लोकी विधेरस्यार्थवादः ॥ ३०॥

(२) सर्वज्ञनारायणः । अहन्यहन्याहारलुब्ध्याऽदन्नपि न दुष्यति न पापंलभते । इति तन्मतोपसंहारः ॥ ३० ॥

(३) कुल्लूकः । भक्षयिताभक्षणार्हान्प्राणिनः प्रत्यहमपि भक्षयन्न दोषमाप्नोति । यस्माद्विधात्रैव भक्षणार्हाभक्षयितारश्च निर्मिताइति । त्रिभिः श्लोकैः प्राणात्यये मांसभक्षणस्तुतिरियम् ॥ ३० ॥

(४) राघवानन्दः । किंच नेति । अत्ता भक्षयिता । आद्यान् भक्षणार्हान् । आद्यात्तृसृष्टेर्ब्रह्मकृतत्वेन स्वाभाविकत्वात् सापेक्षत्वाच्च न दोषइति भावः ॥ ३० ॥

(६) रामचन्द्रः । अहन्यहनि आद्यान् भक्ष्यान् प्राणिनः अत्ता भोक्ता न दुष्यति । धात्रैव आद्याः भक्ष्याः प्राणिनः च पुनः अत्तारएव भक्षकाएव सृष्टाः ॥ ३० ॥

यज्ञाय जग्धिर्मांसस्येत्येषदैवोविधिः स्मृतः ॥ अतोन्यथाप्रवृत्तिस्तु राक्षसोविधिरुच्यते ॥ ३१॥

(१) मेधातिथिः । यज्ञार्थंमांसस्य पिण्डप्राशित्रादि जग्धिरशनं । एषदैवोविधिर्देवैरेतद्विहितम् । अन्यथातु मांसाशी यतः शरीरपुष्ट्यर्थकमांसाशने प्रवृत्तिः सराक्षसोविधिःपिशाचानांमांसभक्षणेस्थितिरितिनिन्दा ॥ ३१ ॥

(२) सर्वज्ञनारायणः । स्वमतमाह यज्ञायेति । यज्ञाय यज्ञाङ्गशेषप्रतिपत्तिसिद्धये । जग्धिर्भक्षणं दैवोविधिः देवतार्थप्रवृत्तत्वात् । अतोन्यथा उपाकृतमांसव्यतिरेकेण । राक्षसोराक्षसान्नाशनरूपत्वात् अतएवाग्रे वक्ष्यति॥ यक्षरक्षःपिशाचान्नंमद्यंमांसंसुरासवम् । तद्ब्राह्मणेन नात्तव्यंदेवानामश्नता हविरिति॥ देवानांहविर्देवतार्थमुपात्तंमांसहविरश्नतान्यमांसंन भक्ष्यमित्यर्थः । अत्रच वचने ब्राह्मणेनेतिवचनाद्ब्राह्मणस्यानुपाकृतमांसाशने क्षत्रियाद्यपेक्षया दोषभूयस्त्वंप्रतीयते । एवंच ब्राह्मणैर्मांसभक्षणंयज्ञएव कार्यं तत्राप्यल्पः प्रत्यवायोनतु प्रत्यवायाभावएव तथाच महाभारते ॥ प्रोक्षिताभ्युक्षितंमांसं तथा ब्राह्मणकाम्यया । अल्पदोषमितिज्ञेयंविपरीते तु लिप्यतइत्युक्तम्॥प्रोक्षितं पशुबन्धार्थं । अभ्युक्षितं श्राद्धार्थं । ब्राह्मणानांकाम्ययेति व्याख्यातमेव । अत्रच प्रोक्षितव्यतिरिक्तोपादानं प्रोक्षितापेक्षयाधिकपापहेतुत्वेपि वृथामांसाशनापेक्षयाऽल्पदोषत्वोपवर्णनार्थम् । अतएवानुपाकृतमांसानीत्यभक्ष्यगणे श्राद्धादावपि मांसस्याभक्ष्यत्वाभिधानम् । तथा प्रोक्षितंभक्षयेदित्यादिनान्येषामपि प्रकाराणांभक्षणाभ्यनुज्ञानंच न विरुध्यते । लिप्यते संपूर्णपापेन युज्यते । यत्तु पुराणादिषु पितृकल्पे समानांद्विजानांभक्षणोद्देशेन गांहत्वा श्राद्धकरणंतेन च जन्मान्तरे जातिस्मरत्वमुक्तम् तत्र प्राचीनभाग्यसहितश्राद्धप्रभावाज्जातिस्मरत्वं मांसभक्षणात्त्वनेकतिर्यग्योनिगमनमिति न काचिदनुपपत्तिः । अतएवयत्स्वार्थंपक्वमपि पितृकार्यादि कृत्वा भुज्यते तद्ब्राह्मणानामतिगर्हितं क्षत्रियादीनांतु न तादृग्दोषकरंदेवपित्रादिकार्यमकृत्वा तु भक्षणं सर्वेषांगर्हितमिति व्यवस्था द्रष्टव्या ॥ ३१ ॥

(३) कुल्लूकः । अथ प्रोक्षितभक्षणनियमार्थवादमाह यज्ञायेति । यज्ञसंपत्त्यर्थंतदङ्गभूतमांसस्य जग्धिर्भक्षणमेतद्दैवमनुष्ठानं । उक्तव्यतिरिक्तप्रकारेण पुमरात्मार्थमेव पशुंव्यापाद्य तन्मांसभक्षणेषु प्रवृत्तीराक्षसोचितमनुष्ठानमित्युत्तराधंवृथामांसभक्षणनिवृत्त्यनुवादः ॥ ३१ ॥

(४) राघवानन्दः । जग्धिर्भक्षणं । यज्ञाय यज्ञार्थम् । मांसस्य तद्विना रागतोभक्षणे दोषमाह अतइति। अन्यथा उक्तविधिंविना । राक्षसआसुरोनरकायैव ॥ ३१ ॥

(६) रामचन्द्रः । मांसस्य जग्धिर्भक्षणं यज्ञाय यज्ञविषयएव पुरोडाशमात्रमित्येषदैवोविधिः । अतः अन्यथा अविधिना प्रवृत्तिःमांसभक्षणे राक्षसोविधिरुच्यते । तद्यथा प्रोक्षितंभक्षयेन्मांसंतथा ब्राह्मणकाम्यया । अल्पदोषमिति ज्ञेयंविपरीते तु लिप्यतइति महाभारतवचनेन । यज्ञाङ्गशेषप्रतिपत्तिसिद्ध्येऽपि मांसभक्षणं स्वल्पप्रत्यवायहेतुः ॥ ३१ ॥

क्रीत्वा स्वयं वाप्युत्पाद्य परोपकृतमेव वा ॥ देवान्पितॄंश्चार्चयित्वा खादन्मांसं न दुष्यति ॥३२॥

(१) **मेधातिथिः** । मृगपक्षिमांसविषयमिदंशास्त्रम् । रुरुपृषतादीनां शशकपिञ्जलादीनांमांसंदेवानांपितॄणांचार्चनंकृत्वा खादतोन दोषः । यथा गृहे वैश्वदेवाद्यर्थंकृते संविधानं विनापिवैश्वदेवेनोदनादिभोजनमस्ति न तथा मांसस्याएवमर्थमेतत्पुनर्वचनं देवान्पितॄंश्चार्चयित्वेति । अन्यथा गृहस्थस्य पूर्वमेव भोजनमेवंरूपंदेवंभ्यइति । तेन शब्देनोद्दिश्य शुचौ देशे मांसस्य प्रक्षेपः । यदिवा अग्नये वायवे सूर्यायजातवेदसइति देवार्चनंकर्तव्यम् । फलैर्वावर्तयन्नग्नौ जुहुयादाहुतयःकृत्वाअग्निमतोन्यत्रनभवन्ति । नचाग्नौ होमेन विना बलिहरणं कर्तव्यम् । कर्मान्तरस्य प्रयोगान्तरस्यच प्रतिपादितत्वात् । आ स्तांतावदेतत् । अन्येतु श्राद्धंच पितॄणामर्चनमाहुः । दृष्टश्च श्राद्धेऽर्चनप्रयोगः । पितॄंश्चैवाष्टकान्वदन्ति ततश्च सर्वस्मृतिकारैःश्राद्धमेव विहितं न पुनरन्या काचिदेवक्रिया । कथंपुनर्मांसस्य क्रयसंभवः यावता आपणभूमेर्मांसंक्रियमाणंसौनमापद्यते । अथोच्यते । सौनिकैरहतस्य स्वयंमृतस्य पशोर्मांसमभक्ष्यमनारोग्यकरत्वात् । उच्यते । व्याधशाकुनिकादिभिराहृतं क्रेष्यते नच ते सौनिकाइतिप्रसिद्धास्तैश्च विक्रयार्थंग्राम्यद्भिर्गृहआनीतंभवति तदा संभवति क्रयः नहि तत्सौनमुच्यते । स्वयंवाप्युत्पाद्य ब्राह्मणोयाच्ञयाक्षत्रियोमृगयाकर्मणा ॥ ३२ ॥

(२) **सर्वज्ञनारायणः** । तत्र क्षत्रियादीन्प्रत्यनिषिद्धमांसभक्षणप्रकारमाह क्रीत्वेति । स्वयमुत्पाद्य मृगयादिना हत्वा । परोपकृतं लब्धं । स्वयमुत्पादनसाहचर्याच्च क्षत्रादिपरमेवैतत् ब्राह्मणस्य यज्ञोद्देशंविना पशुहिंसायाःपूर्वमेव निषेधात् ॥ ३२ ॥

(३) **कुल्लूकः** । क्रीत्वा आत्मना चोत्पाद्य अन्येन वा केनाप्यानीय दत्तंमांसं देवपितृभ्योदत्वा शेषंभक्षयन्न पापंप्राप्नोति । अतः प्रोक्षितादिचतुष्टयभक्षणवन्नेदंनियतंभक्षणं नदुष्यतीत्यभिधानात् । वर्षेवर्षेऽश्वमेधेनेत्यादिवक्ष्यमाणमांसवर्जनविधिरप्येतद्विषयएवाविरोधात् ॥ ३२ ॥

(४) **राघवानन्दः** । उपकृतं दत्तम् ॥ ३२ ॥

(५) **नन्दनः** । एवंविधातृविहितत्वात्तल्लक्षणत्वाच्च धर्मस्य प्राणापेक्षेमांसभक्षणे नदोषइत्याह नात्तेतिपञ्चभिः । यज्ञायजग्धिरेषदैवो विधिः । इतरमपिविधिमाह क्रीत्वेति । अर्चयित्वा मांसेन । मांसं दैवपित्र्यशिष्टम् ॥ ३२॥

(६) **रामचन्द्रः** । क्रीत्वा स्वयमुत्पाद्य मृगयादिना परोपहृतमेव च परेणान्येनोपहृतमानीतंमांसं देवान्पितॄनर्चयित्वा खादन्नदुष्यति । एतत्क्षत्रियविषयम् ॥ ३२ ॥

नाद्यादविधिना मांसं विधिज्ञोऽनापदि द्विजः ॥ जग्ध्वा ह्यविधिना मांसं प्रेत्य तैरद्यतेऽवशः ॥३३॥

(१) **मेधातिथिः** । पूर्वोक्ताद्देवाद्यर्चनशिष्टात् ब्राह्मणकामनादिनिमित्तान्तरंयद्भक्षणंयोविधिस्तेननाश्नीयात् मांसं । उक्तानुवादोयंआपदि प्राणात्यये देवाद्यर्चनमपि नापेक्ष्यम् । ननुचैतदपि निमित्ततयोक्तमेव ततश्चाविधिरेवायंनाविधिःसत्यं प्रोक्षितसंबन्धाद्गोव्यजस्यैव तत्र संनिधानमाशङ्कयांशशादिविषयेऽभ्यनुज्ञानार्थमनापदीत्युच्यते । किंतर्हि विध्यर्थानुष्ठानपरोविधिज्ञउच्यते तथालौकिकानुष्ठानेपि जानातिरुपचारात्प्रयुज्यते । एषसतज्जानातीति अनुष्ठानपरे प्रयुञ्जते अत्रफलकथायांजग्ध्वा अशास्त्रीयेणनिमित्तेन प्रेतोमृतस्तैःप्राणिभिरवशोद्यते येनविषयेणयोयेषांमांसमश्नाति तस्य विविधा पीडा भवति ।

---

(३२) परोपकृतं = परोपहृतं (ज, झ, ञ, ठ)

एतावन्मात्रपरमेतत् । अन्यथा प्रायेण छागादिमांसमश्नन्ति लोकानचछागादयोमांसाशिनः । अथवा तत्कृतेनापायेनक्रव्याद्भिरप्यद्यमानस्तैरद्यतइत्युच्यते ॥ ३३ ॥

(२) **सर्वज्ञनारायणः** । प्रकृतंब्राह्मणविषयमुपसंहरति नाद्यादिति । अविधिना उपाकरणव्यतिरेकेण । विधिज्ञोमांसाशनविधिज्ञः द्विजोब्राह्मणः ॥ ३३ ॥

(३) **कुल्लूकः** । मांसभक्षणानुष्ठानदोषज्ञोद्विजातिरनापदि तत्तद्देवाद्यर्चनविधानंविना न मांसंभक्षयेत् । यस्मादविधानेन योमांसंखादति समृतःसन्यन्मांसंतेन भक्षितंतैः प्राणिभिः परलोके त्वरक्षणाक्षमःखाद्यतइति सर्वश्लोकानुवादः ॥ ३३ ॥

(४) **राघवानन्दः** । अनापदि रोगाद्यसंपत्तौ । तैर्भक्षितैः अवशोरक्षणाक्षमः प्रेत्य मृतः अत्ताद्यते ॥ ३३ ॥

(५) **नन्दनः** । योऽयंमांसभक्षणेषोढाविऽधिरुक्तस्तद्विपर्ययेण भक्षणे दोषमाह नाद्यादिति ॥ ३३ ॥

(६) **रामचन्द्रः** । तैःपशुभिः द्विजः ब्राह्मणः अद्यते भक्ष्यते अवशः पराधीनःसन् ॥ ३३ ॥

न तादृशं भवत्येनोमृगहन्तुर्धनार्थिनः ॥ यादृशं भवति प्रेत्य वृथामांसानि खादतः ॥ ३४ ॥

(१) **मेधातिथिः** । प्रसिद्धार्थःश्लोकः ॥ ३४ ॥

(२) **सर्वज्ञनारायणः** । आहारबुद्ध्या तु भक्षणमतिनिन्दितंतस्येत्याह नतादृशमिति । धनार्थिनइतिवदंस्तस्य मांसविक्रयजीविनस्तदेकवृत्तितया नातिशयितदोषतेतिच दर्शयति ॥ ३४ ॥

(३) **कुल्लूकः** । मृगवधजीविनोव्याधादेर्धननिमित्तंमृगाणांहन्तुर्न तथाविधंपापंभवति यादृशमदेवपितृशेषभूतमांसानि खादतःपरलोके भवतीति पूर्वानुवादएव ॥ ३४ ॥

(४) **राघवानन्दः** । अहोकष्टंवर्ततइत्याह नेति । एनोदुःखं । मृगहन्ता देहयात्राद्यर्थंप्रवर्तते अयंतु भोगार्थमित्यस्ति विशेषः ॥ ३४ ॥

(५) **नन्दनः** । वृथाऽविधिना ॥ ३४ ॥

(६) **रामचन्द्रः** । धनार्थिनः क्रेतुः मृगहर्तुः तादृशं एनः पापं न भवति वृथामांसानि खादतः प्रेत्य यादृशमेनोभवति ॥ ३४ ॥

नियुक्तस्तु यथान्यायं योमांसं नात्ति मानवः ॥ सप्रेत्य पशुतां याति संभवानेकविंशतिम् ॥ ३५ ॥

(१) **मेधातिथिः** । जन्मानि अवश्यंप्राणात्ययसंभवे देवार्चनंयोनकरोति अथच मांसमश्नाति सदुष्यत्येव ॥ ३५ ॥

(२) **सर्वज्ञनारायणः** । न चार्त्विज्यश्राद्धभोजनादौ प्रवृत्तोमांसभक्षणदोषदर्शनात्ततोनिवर्तेततत्कालमांसाभक्षणस्यैवातिदोषहेतुत्वात् । अतआदावेव याजनादेर्निवर्तेतेत्याह नियुक्तस्त्विति । यथान्यायं वरणादिना ॥ ३५ ॥

(३) **कुल्लूकः** । श्राद्धे मधुपर्के च यथाशास्त्रंनियुक्तःसन्योमनुष्योमांसंन खादति समृतःसन्नेकविंशतिजन्मानि पशुर्भवति । यथा विधिनियुक्तस्त्वित्येतन्नियमातिक्रमफलविधानमिदम् ॥ ३५ ॥

(४) **राघवानन्दः** । यथाविधि नियुक्तइत्युक्तंतत्रार्थवादमाह नीति । नियुक्तः श्राद्धादौ । संभवान् जन्मानि उपरतब्रह्मधारणंविना ॥ ३५ ॥

(५) नन्दनः । दैवे पित्र्ये च नियुक्तस्य मांसाभक्षणे दोषमाह नियुक्तइति ॥ ३५ ॥

(६) रामचन्द्रः । प्रतिप्रसवमाह नियुक्तइति यथान्यायं विधिना नियुक्तः आर्त्विज्यादौ निमन्त्रितः मानवः ब्राह्मणः मांसंनात्ति न भक्षयति सः प्रेत्य भवे जन्मनिएकविंशतिपर्यन्तंपशुतांयाति । एतद्ब्राह्मणविषयम् ॥ ३५ ॥

असंस्कृतान्पशून्मन्त्रैर्नाद्याद्विप्रः कदाचन ॥ मन्त्रैस्तु संस्कृतानद्याच्छाश्वतं विधिमास्थितः ॥३६॥

(१) मेधातिथिः । प्रोक्षणादयःपशुबन्धेमन्त्रवन्तः संस्काराविहितास्ते येषांक्रियन्ते पशूनांवैदिकयागशेषाणांमांसमद्यात् । सीतायज्ञादिषु च सत्यपि सामयाचारिकयागशेषत्वे मन्त्रसंस्काराभावादभक्ष्यता । शाश्वतंशाश्वतोनित्योवैदिकइत्यर्थः । आस्थित आश्रितः ॥ ३६ ॥

(२) सर्वज्ञनारायणः । नाद्यादविधिनेतियत्प्रागुक्तंतत्र विधिशब्दार्थनिरुक्तया तदेव स्पष्टयति असंस्कृतानिति । मन्त्रैरुपाकरणनियोजनप्रोक्षणादिमन्त्रैः । एतेनोपाकरणादिसंस्कारसंस्कृतस्यैव पशोर्मांसंविप्रेण भक्ष्यम् । सचान्वष्टकायां पशुकल्पे मधुपर्के सोमे हविर्यज्ञविशेषेचास्तीति तत्रैव मांसाशनंविप्रेण कार्यम् । तदपि पूर्वैर्मुनिभिः कृतत्वात्क्रियते नतु सर्वथादोषाभावादिति दर्शयितुंशाश्वतंविधिमास्थितइत्युक्तम् । शाश्वतंविधिं प्रवृत्तिप्रकारंपूर्वर्षीणाम् । आस्थितआश्रितः । एवंचतदामिषेण कर्तव्यमितिपार्वणप्रकरणोक्तमपि क्षत्रियादिपरमेव ॥ ३६ ॥

(३) कुल्लूकः । वेदविहितमन्त्रवत्प्रोक्षणादिसंस्कारशून्यान्पशून्विप्रादिः कदाचिन्नाश्नीयात् । शाश्वतंप्रवाहानादितया नित्यंपशुयागादिविधिमास्थितोमन्त्रसंस्कृतानेवाश्नीयादिति । प्रोक्षितंभक्षयेन्मांसमित्येतस्यानुवादार्थमेतत् ॥ ३६ ॥

(४) राघवानन्दः । विधिनिषेधप्रकारौ निगमयति असंस्कृतानिति । शाश्वतं शास्त्रोक्तम् ॥ ३६ ॥

(५) नन्दनः । सप्तममपिविधिमाह असंस्कृतानिति । असंस्कृतान्याजुषैरुपाकरणपर्यग्निकरणादिप्रयुक्तैर्मन्त्रैरसंयुक्तान् । मन्त्रैस्तु संस्कृतानद्यात् । अभक्षणार्हानपिपशून्मन्त्रैःसंस्कृतान्कृत्वाऽद्यादिति ॥ ३६ ॥

(६) रामचन्द्रः । मन्त्रैः उपाकरणप्रयोजनप्रोक्षणादिभिः असंस्कृतान्पशून् । विप्रइत्युपलक्षणमात्रं अन्योपि कथंचननाद्यात् न भक्षयेत् । मन्त्रैः संस्कृतान्पशूनद्यात् । शाश्वतंविधिमास्थितः शाश्वतमित्यनेन मुनिकृतत्वमुक्तम् । तेनान्यैः कृतमिति तेन तु सर्वथा दोषाभावः ॥ ३६ ॥

कुर्याद्घृतपशुं सङ्गे कुर्यात्पिष्टपशुं तथा ॥ नत्वेव तु वृथा हन्तुं पशुमिच्छेत्कदाचन ॥३७॥

(१) मेधातिथिः । यद्येषांबुद्धिःस्यात्सीतायज्ञखञ्जिकायज्ञखण्डिकायागादिषु समाचारप्रमाणेषु पशुवधःफलकामस्य त्याज्यः दृष्टाहि पशुवधोपयाचितकेनातिशयवती सस्यसंपत्तिरिति तन्निषेधार्थमाह । सङ्गे प्रस्तावात्पशुवधप्रसङ्गे घृतपशुंकुर्याद्घृतपशुमेव कुर्यात् । पशुना यष्टव्ये तत्स्थाने घृतेन यजेत देवताः । तद्धि सामान्येनयागद्रव्यम् अथवा पिष्टपशुं पिष्टमयपशुमतिकृतिंकृत्वा देवताभ्यउपहरेत्पिष्टेन वा पुरोडाशादि कृत्वा । कथमयंवृथा पशुवधः । उच्यते । शिष्टानांसमाचारःप्रमाणम् । ननु स्त्रीशूद्रजनानामवैद्यत्वान्नात्रवेदमूलता शक्या कल्पयितुम् । देवताराधनार्थंनह्येतदाचरन्ति नच देवताराधनार्थानि वैदिकानि कर्माणि गुणत्वेन देवताश्रुतेः । अन्वयव्यतिरेकमूलतांचात्रेच्छन्ति । दृश्यते पशुवधोपयाचितकेन फलसंपत्तिरितिमन्यमानाः । अतोनवेदमूलता अन्वयव्यतिरेकावपि भ्रान्तिमात्रमसकृद्व्यभिचारात् । अतोऽयंश्लोकोन्यायप्रमाणार्थानुवादएव सौहार्दादाचार्येण पठितः ॥ ३७ ॥

(२) **सर्वज्ञनारायणः** । यदात् सर्वथात्यन्तोत्कटरागता पशुभक्षणे भवति तदापि प्रकारेण तदाकांक्षा निवर्तनीया नतु पशुहिंसा युक्तेत्याह कुर्यादिति । घृतपशुर्घृतविकारः पशुमांसतुल्यरूपत्वात्पशुः । एवंपिष्टपशुः । संगेऽत्यन्तेच्छायां । भूताद्यभिभवः संगइतितु केचित् तत्तु न लोकप्रसिद्धमितिहेयमेव ॥ ३७ ॥

(३) **कुल्लूकः** । सङ्गआसक्तौ पशुभक्षणानुरागेण घृतमयींपिष्टमयींवा पशुप्रतिकृतिंकृत्वा खादयेत् न पुनर्देवताद्युद्देशंविनैवपशून्कदाचिदपि हन्तुमिच्छेत् ॥ ३७ ॥

(४) **राघवानन्दः** । घृतपशुं घृतमयींपशुप्रतिकृतिं । संगे पशुबलिप्रसक्तौ आसत्तया भोजनेरागप्रसक्तौवा आवश्यकेस्मार्तकर्मणिवा नतु वैदिकेकर्मणि घृतपश्वादावेकादशावदानबाधापत्तेः । तस्माद्यज्ञेवधोऽवधइत्युक्तम् ॥ ३७ ॥

(५) **नन्दनः** । हिंसामविधिना न कुर्यादित्याह कुर्यादिति । सङ्गेसंगतउत्सवादिनिमित्तेज्ञात्यादिसमवायइतियावद्घृतपशुमुपाकुर्यात् । पशुस्थानेप्रभूतंघृतंपिष्टमपूपादिकंचदद्यादिति ॥ ३७ ॥

(६) **रामचन्द्रः** । घृतपशुं सङ्गे आसक्तौ कुर्यात । पिष्टपशुं तथा कुर्यात । वृथा पशुंहन्तुंकदाचन नेच्छेत् ॥ ३७ ॥

यावन्ति पशुरोमाणि तावत्कृत्वोह मारणम् ॥ वृथापशुघ्नः प्राप्नोति प्रेत्य जन्मनि जन्मनि ॥ ३८ ॥

(१) **मेधातिथिः** । तावतीर्जन्मना मावृत्तोर्मारणंप्राप्नोति । वृथापशुघ्नःश्रुतिस्मृत्योरचोदितंपशुवधंयःकरोति । तच्च प्रकरणान्महानवम्यादिषु लौकिकैर्यत्क्रियते । पशुघ्नइतिकप्रत्ययेच्छान्दसंरूपम् ॥ ३८ ॥

(२) **सर्वज्ञनारायणः** । तावत्कृत्वस्तावत्संख्यान्वारान् । वृथा उपाकरणादन्यत्र पशुघ्नः ॥ ३८ ॥

(३) **कुल्लूकः** । देवताद्युद्देशमन्तरेणात्मार्थंयः पशून्हन्ति सवृथापशुघ्नोमृतःसन्यावत्संख्यानि पशुरोमाणि तावत्संख्याभूतंजन्मनि जन्मनि मारणंप्राप्नोति तस्माद्वृथापशुंन हन्यात् । तावत्कृत्वइति वत्त्वंतात क्रियाभ्यावृत्तिगणने कृत्वसुच्प्रत्ययः । इह हशब्दआगमप्रसिद्धिसूचनार्थः ॥ ३८ ॥

(४) **राघवानन्दः** । विपक्षेदण्डमाह यावन्तीति । अत्रहशब्दःप्रसिद्धार्थद्योती॥ ३८ ॥

(५) **नन्दनः** । तावत्कृत्वः स्तावतोवारान् । हशब्दोनुकम्पायाम् ॥ ३८ ॥

(६) **रामचन्द्रः** । वृथापशुघ्नःपुरुषः इहलोके अधर्मान्मारणंकृत्वा यावन्ति पशुरोमाणि अष्टकोटिरोमाणि तावन्ति पशुप्रायतांप्रेत्यसंप्राप्नोति जन्मनिजन्मनि ॥ ३८ ॥

यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयंभुवा ॥ यज्ञस्य भूत्यै सर्वस्य तस्माद्यज्ञे वधोऽवधः ॥ ३९ ॥

(१) **मेधातिथिः** । नायमनन्तरोक्तोदोषः । श्रुतिस्मृतिचोदिते वधे यज्ञाङ्गभूते याभूतिस्तन्निवृत्त्यर्थमेव । स्वयंभुवा प्रजापतिना पशवः सृष्टाउत्पादिताः । स्वयमेवेत्यर्थवादः । अस्य जगतोविश्वस्य यज्ञोज्योतिष्टोमादिः । भूत्यै भूतिर्विभवः पुष्टिःस्फीतिः तस्मात्तत्र योवधः सोऽवधोविज्ञेयः । हिंसाजन्यस्यपापस्यनिवृत्तेरेवमुच्यते ॥ ३९ ॥

(२) **सर्वज्ञनारायणः** । अत्र यज्ञार्थहनने कथंतादृग्दोषाभावइत्याशंकामपनयति यज्ञार्थमिति । लोकस्य भूत्यै जन्मने आहुत्या सूर्याप्यायनवृष्टिबीजपरंपरया शुक्रोत्पत्तौ प्राण्युत्पादात । एतेनैकपशुहिंसयाऽनेकप्राणिनिस्तारात्तादृशदोषाभावउक्तः ॥ ३९ ॥

(३८) तावत्कृत्वोह=कृत्वेह (क, ख, ग, ण, च)

(३) कुल्लूकः । यज्ञार्थेतु पशुवधे न दोषइत्याह यज्ञार्थंपशवइति । यज्ञसिद्ध्यर्थंप्रजापतिनाऽऽत्मनैवादरेण पशवः सृष्टाः । यज्ञश्चाग्नौ प्रास्ताहुतिन्यायात्सर्वस्यास्य जगतोविवृद्ध्यर्थः । तस्माद्यज्ञे वधोऽवधएव । वधजन्यदोषाभावात् ॥ ३९ ॥

(४) राघवानन्दः । अस्य जगतोभूत्यैउद्भूत्यै । तथाचगीता यज्ञाद्भवति पर्जन्यः पर्जन्यादन्नसंभवः । अन्नाद्भवन्तिभूतानीत्यादि ॥ ३९ ॥

(५) नन्दनः । यज्ञार्थे पशुवधे न दोषोऽस्तीत्याह यज्ञार्थमिति । यज्ञेऽवधोवधकार्याभावादवधः ॥ ३९ ॥

(६) रामचन्द्रः । यज्ञः अस्य द्विजस्य सर्वस्य क्षत्रियादेः भूत्यै ऐश्वर्याय भवति तस्माद्यज्ञे वधोऽवधएव । पशोर्वधइति पाठः ॥ ३९ ॥

ओषध्यः पशवोवृक्षास्तिर्यञ्चः पक्षिणस्तथा ॥ यज्ञार्थं निधनं प्राप्ताः प्राप्नुवन्त्युच्छ्रितीः पुनः ॥ ४० ॥

(१) मेधातिथिः । कथंपुनर्यज्ञे हिंसादोषोनास्ति । उच्यते । हिंसा हिंस्यमानस्य महानपकारः । प्राणवियोगेन पुत्रदारधनविभवादिवियोगेन सर्वानर्थोत्पत्तेर्दुष्कृतस्यच समनन्तरंनरकादिफलविपाकस्य प्रत्यासत्तेः। यज्ञेतुहतानामुपकारेणापकारः नरकादिफलानुत्पत्तेः । यतोयज्ञे निधनंविनाशंगताउच्छ्रितीरुत्कर्षजातितोदेवगन्धर्वयोनित्वंद्वीपान्तरेषूत्तरकुरुप्रभृतिषु वर्षसहस्रादिजीविषु वर्षान्तरे वा जन्मप्राप्नुवन्ति । अर्थवादश्चायम् । नह्यत्र विधिः श्रूयते प्राप्नुवन्तीतिवर्तमानोपदेशात् । न चार्थवादात्प्रतितिष्ठन्तीतिवद्विधिप्रतिपत्तिर्युक्ता । विध्यन्तरस्याभावादसंभवाच्च सर्वोयमविधिमांसभक्षणप्रतिषेधशेषः । ऐहलौकसंपाद्यतयाप्ययंप्रतिषेधोनत्वेवतुवृथाहन्तुंपशुमिच्छेदिति । यच्चाभ्यनुज्ञानं यज्ञार्थंपशवः सृष्टाइति तत्सर्वंभक्षणप्रतिषेधतया प्रतीयते । तथाच वक्ष्यति नाकृत्वा प्राणिनांहिंसामित्यादि । नचात्रविधेरस्ति संभवः । नतिरश्चामधिकारः संभवति विशेषविज्ञानाभावात् । न चानधिकृतस्यकर्तृत्वम् । नाप्यकर्तृत्वे शास्त्रीयात्कर्मणः फलोत्पत्तिः । नह्यत्र दृष्टवस्तुस्वाभाव्येन फलोत्पत्तिः यथा विषमविद्वुषोऽपि पीतवतोजनयत्येवस्वफलम् । नैवंवैदिकार्थाः । अचैतन्याच्चौषधादीनामृत्विङ्न्यायोऽपि नास्ति । दृष्टंकिल कुतश्चन कर्मणः परप्रयुक्तादप्यृत्विजांफलम् यः कामयेत पापीयान्स्यादित्यादि तत्र विध्यन्तरशेषत्वाभावात्स्पृष्टत्वाच्च विधिप्रतिपत्तेर्मनुष्याधिकारत्वाच्च । शास्त्रस्य युक्ताङ्गव्यापारसमाश्रितोवाचनिकस्तावन्मात्रोधिकारः । यथा परकीयाश्वमेधावभृथे ब्राह्मणस्य प्रायश्चित्तमुक्तम् इहत्वधिकारएव नास्तीत्युक्तम् । ओषध्योदर्भादयः । पशवश्छागादयः वृक्षाः पूज्याः । तिर्यञ्चोऽपशवोऽपिपशवोयेषांहविष्येन चोदना कपिञ्जलानालभतइति । भीमप्रवहणादनड्वाहस्तिर्यञ्चोवाजपेयादौ तिर्यञ्चइति व्यपदिश्यन्ते । यद्यपि तेषांतत्र निधनंनास्ति तथापि यावती च पीडा विद्यतइति सा निधनशब्देन लक्ष्यते । पक्षिणः कपिञ्जलादयोयद्यपि ते पशुत्वेन चोद्यन्ते । अप्रसिद्धतरप्रयोगास्तु समग्राम्याः पशवः समारण्याइति । गवादयोपक्षिणश्चतुष्पाज्जातिवचनः पशुशब्दः । गोबलीवर्दवद्भावोद्रष्टव्यः ॥ ४० ॥

(२) सर्वज्ञनारायणः । तथाचवध्यस्याप्युपकारोभवेदित्याह ओषध्यइति । पशवश्छागाः । तिर्यञ्चस्ततोन्ये चतुष्पदाः । उच्छ्रितीरुत्तमजातीः ॥ ४० ॥

(३) कुल्लूकः । किंच ओषध्यइति । ओषध्योव्रीहियवाद्याःपशवश्छागाद्याः वृक्षायूपाद्यर्थाःतिर्यञ्चःकूर्मादयः । पक्षिणःकपिञ्जलाद्याः । यज्ञार्थंविनाशंगताः पुनर्जात्युत्कर्षंप्राप्नुवन्ति ॥ ४० ॥

---

(३९) यज्ञस्य=यज्ञोऽस्य (क, ख, ग, घ, च, ञ, ढ, ण)

(४) **राघवानन्दः** । ननु कथमवधस्तत्राह ओषध्यइति। तिर्यञ्चोगोकूर्मादयः । उच्छ्रितीर्जात्युत्कर्षं । नवधोऽनुपकारायपश्वादेरयमुपकारक इत्यवधइतिभावः ॥ ४० ॥

(५) **नन्दनः** । यज्ञार्थे वधे न केवलंयजमानस्यैवाभ्युदयः किंतु पश्वादीनामपीत्याह ओषध्यइति । उच्छ्रितीः उच्छ्रयानभ्युदयानितियावत् ॥ ४० ॥

(६) **रामचन्द्रः** । तिर्यञ्चः तिर्यग्योनय यज्ञार्थंनिधनंप्राप्ताः उच्छ्रितीः उत्कृष्टजातीः उत्कृष्टजातित्वं प्राप्नुवन्ति ॥ ४० ॥

मधुपर्के च यज्ञे च पितृदैवतकर्मणि ॥ अत्रैव पशवोहिंस्यानान्यत्रेत्यब्रवीन्मनुः ॥ ४१ ॥

(१) **मेधातिथिः** । यावत्यः काश्चिच्छास्त्रचोदितहिंसास्ताः संक्षिप्य दर्शयति । मधुपर्कोव्याख्यातः तत्र गोवधोविहितः । यज्ञोज्योतिष्टोमादिस्तत्र संस्थैकादशिन्यादि । पशुवधोनिरूढपशुवधादिः स्वतन्त्रएवच । पितृदैवतं पितरोदेवतायस्मिन्कर्मण्यष्टकादौ नतु श्राद्धम् । तद्धि सिद्धेन मांसेन विहितम् नच पशुवधश्चोदितः । नचेदमेवविधायकंयुक्तम् उत्पत्तौ श्राद्धस्य हिंसायाअचोदितत्वात् । अस्यच विस्पष्टविधानादष्टकापशुवधेनापि नेतुंशक्यत्वाद्विधित्वेचास्य मूलकल्पनाप्रसङ्गाद्विध्यन्तरशेषतायाश्च वक्ष्यमाणत्वात् । येषांतु मतं पितॄणांदेवतानांच कर्म महायज्ञादि। ब्राह्मणैर्वध्याभृत्यानांचैववृत्त्यर्थमापदि पशुहिंसनमप्रामंप्राणात्ययेऽभ्यनुज्ञायते । अवेदविहितहिंसाप्रतिषेधोऽयम् । नचवेदविहिताऽभ्यनुज्ञायते ॥ ४१ ॥

(२) **सर्वज्ञनारायणः** । उपसंहरति मधुपर्केचेति । यज्ञे पशुबन्धसौत्रामणीसोमेषु । पितृकर्मण्यष्टकायां । दैवतकर्मणि आश्वलायनगृह्याद्युक्तपशुकल्पे अत्रैव ब्राह्मणेन हिंस्यादित्येवकारेण व्यवच्छिद्यापि नान्यत्रेति पुनर्वदन्नभ्यासे भूयांसमर्थंमन्यन्तइतिन्यायेन निमित्तान्तरेण पार्वणादावपि हिंसायाऽतिशयितप्रत्यवायहेतुतांदर्शयति ॥ ४१ ॥

(३) **कुल्लूकः** । समांसोमधुपर्कइति विधानान्मधुपर्के च यज्ञे च ज्योतिष्टोमादौ पित्र्ये दैवे च कर्मणि श्राद्धादौ पशवोहिंसनीयानान्यत्रेति मनुरभिहितवान् ॥ ४१ ॥

(४) **राघवानन्दः** । हिंसास्थलंगणयति मधिवति । अत्रैवेति । तथाच श्रुतिः । न हिंस्यात्सर्वभूतान्यन्यत्र तीर्थेभ्यः ॥ ४१ ॥

(५) **नन्दनः** । त्रिष्वेव पशुवधइत्याह मध्विति । पितृदैवत्यंकर्मश्राद्धम् ॥ ४१ ॥

(६) **रामचन्द्रः** । अत्र मधुपर्के पशुवधःसत्ययुगपरोज्ञेयः ॥ ४१ ॥

एष्वर्थेषु पशून् हिंसन्वेदतत्त्वार्थविद्द्विजः ॥ आत्मानं च पशुं चैव गमयत्युत्तमां गतिम् ॥ ४२ ॥

(२) **सर्वज्ञनारायणः** । वेदतत्वार्थविदिति वेदस्य तात्विकं तात्पर्यविषयमर्थं यदि जानाति यदि तत्कर्म साङ्गंकरोतीतियावत् । गमयत्युत्तमांगतिमतउपकाराधिक्याददोषइत्यर्थः ॥ ४२ ॥

(३) **कुल्लूकः** । एषु मधुपर्कादिषु पदार्थेषु पशून्हिंसन्नात्मानंपशुंचोत्तमांगतिंस्वर्गाद्युपभोगयोग्यविलक्षणदेहदेशादिसंबन्धंप्रापयति । वेदतत्त्वार्थविदिति विद्वदधिकारबोधनार्थम् । नन्वन्याधिकारिकेकर्मणि कथमनधिकृतस्य पश्वादेरुत्तमगतिप्राप्तिःफलं। उच्यते। शास्त्रप्रमाणकत्वात् अस्यार्थस्य पित्रधिकारिकायांजातेष्टावनधिकारिणोऽपि पुत्रस्य फलप्राप्तिव-

दिहापि पश्वादिगतफलसंभवाद्यजमानएव कारुणिकतया पशुगतफलविशिष्टमेव फलंकामयिष्यति अतएवात्मानंच पशुंचै-वेत्यभिधानात् यजमानव्यापारादेव पशुगतफलसिद्धिरुक्ता ॥ ४२ ॥

(४) **राघवानन्दः**। अतआह एष्विति । आत्मनःस्वर्गकामोयजेत वायव्यंश्वेतमालभेतेति श्रुतेः। पशूंश्चेति यज्ञार्थेनिधनंप्राप्ताइत्युक्तम् ॥ ४२ ॥

(६) **रामचन्द्रः**। एष्वर्थेषु मधुपर्कादिषु पशून्हिंसन्सद्द्विजआत्मानंपशूंश्चोत्तमांगतिं गमयति प्रापयति ॥ ४२ ॥

गृहे गुरावरण्ये वा निवसन्नात्मवान्द्विजः ॥ नावेदविहितां हिंसामापद्यपि समाचरेत् ॥ ४३ ॥

(१) **मेधातिथिः**। नच गुरौ वसतोब्रह्मचारिणोऽरण्ये चतपस्यतोन्या काचिद्धिंसास्ति । अवकीर्णिनोब्रह्म-चारिणः स्यादपिवानप्रस्थस्यतु नैवास्ति । ब्रह्मचारिणोऽप्यात्मोपेक्षणंनैवेष्यते । अतोऽयंविधिरेवश्राद्धे गृहइत्यनुवा-दएव । यदिचायं विधिःस्यादरण्यआपद्यपीतिकिमालम्बनमेतत्स्यात् । नच वानप्रस्थस्य साग्निकस्यापि पशुयागोऽस्ति पुरोडाशांश्चरूंश्चैवेत्यत्र दर्शयिष्यामइति केचित् । उपाध्यायस्त्वाह युक्तंब्रह्मचारिणोवानप्रस्थस्यत्वपराजितांवास्थायेत्या-दिनात्मत्यागोपि विहितस्तस्य नास्ति जीवितार्थाहिंसेति स्फुटतरं तत्रैव निरूपयिष्यते । ननुचापद्ययंप्रतिषेधउच्यते । तत्कुतस्तत्रैवानुज्ञानंव्याख्यायते । सत्यम् । अन्यथा न किंचिदनेन कृतंस्यात् । अर्थवादार्थमितिचेदर्थवादस्याप्यालम्ब-नमन्वेषणीयम् । अतोनापद्ययंप्रतिषेधोविधिश्चापद्यविरुद्धः । बहुभेदादापदामल्पीयस्यामापदिमासिकमर्धमासिकंवा भोजनंभविष्यतीति बुद्ध्यामवृत्तिर्निषिध्यते ॥ यदा त्वेषाबुद्धिरधुनैवानश्नन् जीवामि यदानाभिमुखागतउद्यतशस्त्रआ-ततायी तदापद्यनुज्ञा । एवंसर्वतएवात्मानंगोपायेदितिश्रुतिरनुगृहीताभवति ॥ ४३ ॥

(२) **सर्वज्ञनारायणः**। गृहे गार्हस्थ्ये । गुरौ ब्रह्मचर्ये । अरण्ये वनस्थत्वभिक्षुत्वयोः । एतेन यथा ब्रह्म-चार्यादीनांहिंसादोषस्तादृगेव गृहिणोपीत्युक्तम् ॥ ४३ ॥

(३) **कुल्लूकः**। गृहाश्रमे ब्रह्मचर्याश्रमे वानप्रस्थाश्रमे च प्रशस्तात्मा द्विजोनिवसन्नापद्यपि नाशास्त्रीयांहिंसांस-माचरेत् ॥ ४३ ॥

(४) **राघवानन्दः**। गृहइत्यादि त्रयमाश्रमत्रयसंग्राहकम् । ब्रह्मचारिगृहस्थयोःस्वतोमांसाभोजित्वेपि गुर्वाद्यर्थे-हिंसासंभवात् ॥ ४३ ॥

(५) **नन्दनः**। गृहेगृहाश्रमे । गुरौब्रह्मचर्याश्रमे । अरण्येवानप्रस्थाश्रमे ॥ ४३ ॥

(६) **रामचन्द्रः**। आत्मवान् यत्नवान् द्विजः अवेदविहितांहिंसांन समाचरेत् । गृहे गृहस्थाश्रमे । गुरौब्रह्मचर्या-श्रमे । अरण्येवानप्रस्थाश्रमइति । ब्रह्मचारिवनस्थसाहचर्यादूहस्थस्यापि हिंसायांदोषः ॥ ४३ ॥

या वेदविहिता हिंसा नियताऽस्मिश्चराचरे ॥ अहिंसामेव तां विद्याद्वेदाद्धर्मोहि निर्बभौ ॥ ४४ ॥

(१) **मेधातिथिः**। वेदविहितोयः प्राणिवधः सोऽस्मिञ्जगति चराचरेस्थावरजङ्गमे नियतोनित्योऽनादिः । यस्तु तन्त्रादिः सोन्वयव्यतिरेकभ्रान्त्याइदानींतनः अतोवैदिकीमहिंसामेव विद्यात् अमुत्र प्रत्यवायाभावात् । अहिंसेति कार्य-तउच्यते न स्वरूपतः । ननुच सैव हिंसारूपाभेदात्कथंकार्योभेदः । उच्यते । वेदाद्धर्मोहिनिर्बभौ धर्मस्याधर्मस्य च यत्प्रमाण-यनंतद्वेदादेवपौरुषेयाणामप्रामाण्यात् । वेदस्यस्वतएवाभ्युदयहेतुत्वंक्वचित्ज्ञापयति । स्वरूपाभेदोपिनास्ति । क्रत्वर्थपुरु-षार्थत्वेन भेदादाशयभेदेन प्रवृत्तेः । लौकिक्यांमांसयतोद्विषाणस्यचाप्रवृत्तिः वैदिक्यांतु शास्त्रेण चोदितमिदंक्रत्वर्थमिति । निर्बभौ निःशेषेण भातः प्रकाशतांगतइतियावत् ॥ ४४ ॥

(२) सर्वज्ञनारायणः। नियता सर्वैरनुष्ठीयमाना । अहिंसामेव तां तामेवाहिंसां अहिंसासाम्याभिधानेएवकार स्यानुपयोगात्। निर्बभौ प्रकाशंगतः॥ ४४ ॥

(३) कुल्लूकः। कथंतर्हितुल्येहिंसात्वेवैदिकीदैक्षादिपशुहिंसानाधर्मायेत्यतआह यावेदविहितेति। या श्रुतिविहिता कर्मविशेषदेशकालादिनियताऽस्मिञ्जगति स्थावरजङ्गमात्मन्यहिंसामेव तांजानीयात् हिंसाजन्याधर्मविरहात्। दैक्षपशुहननमधर्मः प्राणिहननत्वात् ब्राह्मणहननवत् इत्याद्यनुमानमुपजीव्यशास्त्रबाधादेव न प्रवर्तते दृष्टान्तीकृतब्राह्मणहननस्याप्यधर्मत्वे शास्त्रमेवोपजीव्यम्। वेदाद्धर्मोहि निर्बभौ यस्मादनन्यप्रमाणकोधर्मोवेदादेव निःशेषेण प्रकाशतांगतः॥ ४४ ॥

(४) राघवानन्दः। किंच वेदविहिता हिंसा न हिंसेत्याह येतित्रिभिः। हिंसातोऽधर्मोयथावेदप्रमाणकस्तथा यज्ञे हिंसातोधर्मस्तत्प्रमाणक इति भावः। कर्म ब्रह्मोद्भवंविद्धीति स्मृतेः॥ ४४ ॥

(५) नन्दनः। वेदाद्धर्मोहि निर्बभौ न प्रमाणान्तरात्। तेनवेदविहितांहिंसा हिंसात्वेन वक्तुंनयुक्तेत्यभिप्रायः॥ ४४ ॥

(६) रामचन्द्रः। अस्मिंश्चराचरे या वेदविहिता हिंसा विध्युक्ताहिंसा तांहिंसामहिंसामेव विद्याज्जानीयात्। धर्मोवेदान्निर्बभौ नितरांबभौ प्रकाशतइत्यर्थः॥ ४४ ॥

योऽहिंसकानि भूतानि हिनस्त्यात्मसुखेच्छया॥ सजीवंश्च मृतश्चैव न क्वचित्सुखमेधते॥ ४५॥

(१) मेधातिथिः। अकारोत्रप्रतिषेधार्थीयः प्रश्लिष्टोद्रष्टव्यः। अहिंसकानांच प्रतिषेधात्सर्पव्याघ्रादीनामप्रतिषेधः॥ ४५ ॥

(२) सर्वज्ञनारायणः। अहिंसकान्यनपकारीणीत्यपकारिवधे दोषाल्पतोक्ता। आत्मसुखेच्छया आत्ममात्रसुखार्थं नान्येषांवध्यस्य चोपकाराय॥ ४५ ॥

(३) कुल्लूकः। योऽनुपघातकान्प्राणिनोहरिणादीनात्मसुखेच्छया मारयति सइहलोके परलोके च न सुखेन वर्धते॥ ४५ ॥

(४) राघवानन्दः। अहिंसकानि मृगमीनादीनि। न क्वचिदिहामुत्र पूर्वकृतहिंसादुरदृष्टवशादिहापि॥ ४५ ॥

(५) नन्दनः। अहिंसकानीति विशेषणाद्व्याघ्रादिहिंसायांदोषमात्रं सूचितम्॥ ४५ ॥

(६) रामचन्द्रः। यान्यहिंसकानि भूतानि तानि यआत्मसुखेच्छया हिनस्तिसजीवंस्सन्मृतसंज्ञः जीवन्मृतकइत्यर्थः। क्वचित्कस्मिंश्चिल्लोके सुखंनैधते न प्राप्नोतीत्यर्थः॥ ४५ ॥

योबन्धनवधक्लेशान् प्राणिनां न चिकीर्षति॥ ससर्वस्य हितप्रेप्सुः सुखमत्यन्तमश्नुते॥ ४६॥

(१) मेधातिथिः। बन्धनवधाएव क्लेशाः। अथवा वित्ताशनादयः तान्योन कर्तुमिच्छति वित्ताशनमेव येन नकृतं तद्विषयेच्छैव यस्य निवृत्ता न केवलंपीडांन करोति यावद्धितंमेप्सितुमिच्छति सर्वस्य ससुखमत्यन्तमश्नुते॥ ४६ ॥

(२) सर्वज्ञनारायणः। नचिकीर्षत्येतादृक्संकल्पोत्पादनेन॥ ४६ ॥

(३) कुल्लूकः। योबन्धनमारणक्लेशादीन्प्राणिनांकर्तुंनेच्छति ससर्वहितप्रामीच्छुरनन्तसुखंप्राप्नोति॥ ४६ ॥

(४) राघवानन्दः। अहिंसकस्य गुणानाह यइतिद्वाभ्यां। बन्धनवधाभ्यांयःक्लेशस्तं। अत्यन्तं कल्पस्थायि॥ ४६ ॥

यद्ध्यायति यत्कुरुते धृतिं बध्नाति यत्र च ॥ तदवाप्नोत्ययत्नेन योहिनस्ति न किंचन ॥ ४७ ॥

(१) **मेधातिथिः** । यच्चिन्तयति शुल्कमर्हणादि यत्रच रतिमभिलाषंबध्नात्यभिमेत्यवस्तुनि तदयत्नेन स्वल्पेनैव कालेनावाप्नोति । यत्तु कुरुते कर्मणा तत्कर्मनिष्पत्तिसमनन्तरमेवाविघ्नेन प्राप्नोति ॥ ४७ ॥

(२) **सर्वज्ञनारायणः** । ध्यायति चिन्तयति । रतिमिच्छाम् ॥ ४७ ॥

(३) **कुल्लूकः** । अन्यच्च यद्ध्यायतीति । यच्चिन्तयति धर्मादिकमिदंमेस्त्विति यच्च श्रेयःसाधनंकर्म करोति यत्र च परमार्थध्यानादौ धृतिंबध्नाति तत्सर्वमक्लेशेन लभते । यउपघातनिमित्तंदंशमशकाद्यपि न व्यापादयति ॥ ४७ ॥

(४) **राघवानन्दः** । न केवलमेवंकिंतु सत्यसंकल्पःस्यादित्याह यद्ध्यायतीत्यादि । अप्रतिबद्धंतस्य कर्म फलतीतिभावः । रतिर्विजिगीषा तेन वाचिकंकर्म लक्ष्यते ॥ ४७ ॥

नाकृत्वा प्राणिनां हिंसां मांसमुत्पद्यते क्वचित् ॥ न च प्राणिवधः स्वर्ग्यस्तस्मान्मांसं विवर्जयेत् ॥ ४८ ॥

(१) **मेधातिथिः** । सर्वस्य हिंसाप्रतिषेधश्लोकसंघातस्य मांसभक्षणशेषतांदर्शयति । यावत्प्राणिनोन हतास्तावन्मांसंनोत्पद्यते । हिंसाचातिशयेन दुःखावहा तस्मान्मांसंविवर्जयेत् । ननुच स्वयंमृतानांभवत्येवमांसंकिमिदमुच्यते नाकृत्वेति । अर्थवादोयं । स्वयंमृतानांच मांसंरोगहेतुत्वादग्राह्यमेव नह्यदत्वामांसंभक्ष्यते नच रोगहेतोर्दानमस्ति । उत्पद्यतइतिमांसस्य हिंसानिमित्तत्वात्कर्तृव्यपदेशसमानकर्तृकत्वंभवत्येवाविरुद्धम्। अथवोत्पद्यतइति । न च स्वर्ग्यइति न स्वर्गानुत्पत्तिहेतुमात्रमभिमेतमपितु नरकादिदुःखहेतूनाम् ॥ ४८ ॥

(२) **सर्वज्ञनारायणः** । एवं प्रपञ्चेन मांसभक्षणे तद्भक्षणदोषोहिंसादोषश्चेतिदर्शितम् तत्र स्वयंहिंसामकृत्वा क्रीतस्य लब्धस्य वा मांसस्य भक्षणेऽपि हिंसादोषोस्तीत्याह नाकृत्वेति । क्रीतलब्धादौ साक्षादहननेपि क्रेतृग्रहीत्रुद्देशेन हननादस्तिहिंसादोषइत्यर्थः ॥ ४८ ॥

(३) **कुल्लूकः** । मांसभक्षणप्रसङ्गेन हिंसागुणदोषावभिधाय पुनःप्रकृतमांसाभक्षणमाह नाकृत्वेति । प्राणिहिंसाव्यतिरेकेण न क्वचिन्मांसमुत्पद्यते प्राणिवधश्च न स्वर्गनिमित्तं नरकहेतुरेव यस्मात्तस्मादविधिना मांसंन भक्षयेदिति ॥ ४८ ॥

(४) **राघवानन्दः** । प्राणिप्रसूतस्यैव मांसत्वमित्याह नेति । मांसमविधिसंपादितं वर्जयेत् न भक्षयेत् ॥ ४८॥

(५) **नन्दनः** । पुनरपिमांसभक्षणवर्जनमेवोपक्रम्याह नाकृत्वेति । स्वर्ग्यः स्वर्गाय हितः ॥ ४८ ॥

समुत्पत्तिं च मांसस्य वधबन्धौ च देहिनाम् ॥ प्रसमीक्ष्य निवर्तेत सर्वमांसस्य भक्षणात् ॥ ४९ ॥

(१) **मेधातिथिः** । अशुचिस्थाने कुक्षौ गर्भवृद्धिः शुक्रशोणिताभ्यांवाऽशुचिभ्यांप्रभवः । तथाच वधबन्धौ शरीरवतांतत्कृतौ एतत्सर्वंप्रसमीक्ष्य निपुणबुध्या तत्वतोनिरूप्य निवर्तेत सर्वमांसस्य भक्षणात्सर्वस्या प्रतिषिद्धस्यापि किंपुनः प्रतिषिद्धस्य । अर्थवादोयम् । नपुनस्तत्वतः अशुच्येव मांसंज्ञेयं नहि तदशुचित्वविधिपरंवाक्यम् ॥ ४९ ॥

(२) **सर्वज्ञनारायणः** । समुत्पत्तिं शुक्रशोणितप्रभवतया कुत्सिताम् । वधबन्धौ परलोकविरुद्धौ ॥ ४९ ॥

---

(४७) तदवाप्नोति=तदेवा (क, ख, ण)=तत्तदा. (घ)
धृतिं=रतिं (ट, ठ, ड, थ)

(३) **कुल्लूकः** । शुक्रशोणितपरिणामात्मिकांसमुत्पत्तिंघृणाकरींविज्ञाय प्राणिनांवधबन्धौचक्रूरकर्मरूपौ निरूप्य विहितमांसभक्षणादपि निवर्तेत किमुताविहितमांसभक्षणादित्यविधिना मांसभक्षणनिन्दानुवादः ॥ ४९ ॥

(४) **राघवानन्दः** । मांसभक्षितारंधिगस्त्वित्याह समिति । समुत्पत्तिं शुक्रशोणितपरिणामत्वाज्जुगुप्सितंप्रेक्ष्य । मेषविशेषस्य बन्धनंकृत्वामांसंगृह्यतेनम्रियतेसइत्यपि ॥ ४९ ॥

(५) **नन्दनः** । समुत्पत्तिर्मातापित्रोः शोणितशुक्राभ्यां विण्मूत्रादिभिर्दूषिते कुक्षौ संभवः ॥ ४९ ॥

न भक्षयति योमांसं विधिं हित्वा पिशाचवत् ॥ सलोके प्रियतांयाति व्याधिभिश्च न पीड्यते ॥ ५० ॥

(१) **मेधातिथिः** । विधिर्देवार्चनं तद्धित्वा योन भक्षयति किंतर्हि विधिना भक्षयति सलोकस्य प्रियतांमाप्नोति प्रियःसर्वस्य भवति । व्याधिभिश्च कृशदुर्बलादेर्मांसमश्नतोव्याधिरुपजायते तेनापि विधिनैवाशितव्यम् । तथाभक्षयन्व्याधिभिर्नपीड्यते । अन्यथा अश्नन्नपिमांसं पीड्यतएव व्याधिभिः । पिशाचवदितिपिशाचास्तिर्यग्जातिविशेषा स्ते विधिमनपेक्ष्यमांसमश्नन्ति ततोन्योपि तथा भक्षयन्पिशाचसदृशोभवतीति निन्द्यते ॥ ५० ॥

(२) **सर्वज्ञनारायणः** । सर्वमांसस्याभक्ष्यत्वेनोक्तस्यापि पिशाचवदिति विधिहानौ दृष्टान्तः ॥ ५० ॥

(३) **कुल्लूकः** । उक्तविधिव्यतिरेकेण योन मांसंभक्षयति । पिशाचवदिति यथा पिशाचोभक्षयति तथा नेति व्यतिरेके दृष्टान्तः । सलोकस्य प्रियोभवति रोगैश्च न बाध्यते । तस्मादवैधमांसभक्षणाद्व्याधयोभवन्तीति दर्शितम् ॥ ५० ॥

(४) **राघवानन्दः** । मांसाभक्षिणमलंकरोति नेति । पिशाचवदिति व्यतिरेकेणदृष्टान्तः ॥ ५० ॥

(५) **नन्दनः** । पिशाचवद्विधिंहित्वेत्यन्वयः ॥ ५० ॥

अनुमन्ता विशसिता निहन्ता क्रयविक्रयी ॥ संस्कर्ता चोपहर्ता च खादकश्चेति घातकाः ॥ ५१ ॥

(१) **मेधातिथिः** । अन्येनहन्यमानंस्वप्रयोजनतोयद्यन्योनुमोदते साध्वयंहन्ताकरोतीत्यनुमन्ता विशसिता हतस्याङ्गविभागकारः । उपहर्तापरिवेषकः । खादकइत्येतेसर्वेघातकाः । अघातकेषु खादनसंस्कारविक्रयादिकर्तृषु घातकत्वेभ्यारोपिते निन्दा न पुनस्तत्वतएते घातकाएव लौकिकी हि वधक्रिया प्राणत्यागफला तस्यकर्ता घातकः स्मृतितोगम्यते । स्वतंत्रःकर्तेति विशेषशास्त्रादिना यःप्राणवियोजनंप्राणिनांकरोति सहन्तोच्यते क्रयविक्रयाद्याश्च क्रियास्ततोन्या एव । ननुचेयमपि स्मृतिरेव । एते अनुमन्तृप्रभृतयोघातकाइति नेदंशब्दार्थसंबन्धे प्रमाणम् । किंतर्हि धर्माधर्मयोरभियुक्ततरोहि तत्र भवान्पाणिनिः मन्वादयश्च लोकप्रसिद्धैः पदार्थैर्व्यवहरन्ति न शब्दार्थसंबन्धविधिंस्मरन्ति प्रयोक्तारोह्येते न स्मर्तारः । ननुच तमाचार्यंप्रचक्षतइत्यादेःस्मरन्त्येते । सत्यं । न तत्र शास्त्रस्मृतिविरोधः । नच तेषांवाक्यानामन्यत्प्रयोजनमस्ति । इहतु गौणेनापि प्रयोजनेनार्थवादतयाप्युपपत्तेर्न घातकत्वंशक्यमवसातुं । येप्याहुर्भक्षकश्चेन्न विद्यते वधकोपि न विद्यतइति भक्षणप्रयुक्तएव वधः प्रयोजकश्च कर्ता स्मर्यते । ततोमुख्यमेव घातकत्वमतोघातकप्रायश्चित्तमेव खादकस्य युक्तमिति ब्रूमः । पृथक्प्रायश्चित्तंहतानांरसास्वादकस्य जग्ध्वामांसमभक्ष्यंचेति । यदि प्रयोजकत्वेन कर्तृत्वमुक्तं तदपि नैवास्ति । इदंहि तस्य लक्षणं । प्रेषणाध्येषणाभ्यांतु यःस्वतन्त्रस्य चोदकः सकर्ता सएव हेतुश्च मुख्योपर इति । वधकोहि जीवनप्रयुक्त्या प्रवर्तते मांसविक्रयेण जीविष्यामीति नतु खादकेन विनियुज्यते । अथ तत्समर्थाचरणंप्रयोजकत्वम् । योयंक्रियांकर्तुमभ्यवसितस्तत्रानुकूल्येन यः संविधि-

न्तुः समयोजकइति । एतदप्यत्र नैवास्ति साधनोपनिधानं त्रसतः पशोरस्वतन्त्रीकरणंखङ्गोपनयनमित्येव संविधानशब्द-वाच्यंयुक्तम् । तेन विना क्रिया न निष्पद्यते । अथ यदर्थःक्रियारम्भः समयोजकश्चेतिचेन्माणवकमध्यापयतीत्यध्याप-नेहेतुकर्तृसंज्ञाप्रतिलम्भोन ह्यध्ययनमध्यापयति । नचासौ किंचिदुद्दिश्य हनने प्रवर्तते । येनास्य तदर्थनिरूपणाय भ-क्षणेऽनर्था प्रवृत्तिः स्यात् । सर्वइमे स्वभूत्यै यतन्ते न केनकश्चित्परोनुग्रहीतव्यइति मुहूर्तमप्यवतिष्ठतइत्यपि पूर्णकामः अथ स्वार्थप्रवृत्तस्य भक्षयितारमन्तरेण प्रवृत्तिरनर्थिका तस्मिंस्तु सति फलवती फलंच प्रयोजकम् तच्च खादका-धीनमिति पारंपर्येण खादकःप्रयोजकइति । एवंतर्हि योद्वेषाद्धन्यते सहन्तुः प्रयोजकः स्यात्तश्च हन्यमानएव ह-न्ता संपद्यते । नहि द्वेषेण विना हन्तृत्वोपपत्तिरिति । तथा ब्रह्महत्यायामपि सर्वत्रंदद्यात्पातकसंप्रयोजकं नहि प्रति-ग्राहयितारमन्तरेण प्रतिग्रहोपपत्तिस्ततश्च प्रतिग्राही न केवलंपत्यवेयादपितु दातापि । रूपवती च स्त्री स्मरशरदह्य-मानहृदयेन रागिणा दर्शितस्पृहातिशयेनशीलंरक्षन्ती प्रत्यवेयात् तस्मान्नेदंप्रयोजकलक्षणम् । तौहि वधकखादकौ स्वा-र्थप्रवृत्तौ नष्टाश्वदग्धरथवदितरेतरोपकारमनुभवन्तौ न पुनरन्यतरप्रयोजकस्मृतिविशङ्कया च शूद्रविट्क्षत्रविप्राणामित्यत्र श्लोके निपुणमेतन्निर्णीतम् ॥ ५१ ॥

(२) **सर्वज्ञनारायणः** । क्रीत्वा लब्ध्वा वा भक्षयितुरपि हिंसादोषइत्युक्तं तदुपपादयन्भक्षणोचितव्यापारान्तर करणेऽपि हिंसायांदोषइति दर्शयति अनुमन्तेति । अनुमन्ता यदनुमत्या विना न वधः । विशसिता मांसविभागकारी । निहन्ता प्राणव्यापादकः । क्रयविक्रयीति क्रयाय परार्थंक्रेता विक्रेता परनिहतपशोर्मांसंक्रीत्वा तद्विक्रयणकारी । सं-स्कर्ता पाचकः । उपहर्ता परिवेषकः । खादकोभक्षकः । एतैर्व्यापारैर्विना उद्देश्याभावाद्घातकोपि न घातयतीत्येतेपि हिंसकाइत्यर्थः ॥ ५१ ॥

(३) **कुल्लूकः** । यदनुमतिव्यतिरेकेण हननंकर्तुंन शक्यते सोऽनुमन्ता । विशसिता अङ्गानि यःकर्तर्यादिना पृथ-क्पृथक्करोति । क्रयविक्रयी मांसस्य क्रेताविक्रेता च । संस्कर्ता पाचकः । उपहर्तापरिवेषकः । खादकोभक्षयिता । गोवि-न्दराजस्तु यः क्रीत्वा विक्रीणाति सक्रयविक्रयीत्येकमेवाह तदयुक्तं । हननेन तथा हन्ता धनेनक्रायकस्तथा । विक्रयी तु धनादानात्सस्कंर्तातत्प्रवर्तनादिति यमवचनेन पृथङ्निर्देशात् । घातकत्ववचनंचेदमशास्त्रीयपशुवधेनुमत्यादयोऽपि न कर्त-व्याइत्येवंपरंविधिनिषेधपरत्वाच्छास्त्रस्य खादकादीनांपृथक्प्रायश्चित्तदर्शनात् ॥ ५१ ॥

(४) **राघवानन्दः** । नैतादृशंपापमस्तियदष्टौ दूषयतीत्याह अनुमन्तेति । सम्यक्कृतमित्यनुमन्यते यः सोनुमन्ता । पश्वङ्गानि कर्तनादिना यःपृथक्पृथक्करोति सविशसिता संस्कर्ता पाचकः । उपहर्ता परिवेषकः ॥५१॥

(५) **नन्दनः** । खादके हि सत्यनुमन्त्रादयोभवन्ति । तेन वधमकुर्वतोऽपिखादकस्यातोदोषोभूयान्भवति । तस्मा-न्न खादकः स्यादित्यर्थः ॥ ५१ ॥

(६) **रामचन्द्रः** । अनुमन्ता यदनुज्ञया हतः । विशसिता अवयवमांसविभागकर्ता ॥ ५१ ॥

स्वमांसं परमांसेन योवर्धयितुमिच्छति ॥ अनभ्यर्च्य पितॄन्देवांस्ततोऽन्योनास्त्यपुण्यकृत् ॥५२॥

(१) **मेधातिथिः** । अधिकपुष्ट्यर्थंयोमांसमश्नाति तस्येयंनिन्दा नतु रोगोत्पत्तिभयाशङ्कया यतआह योवर्धयितु मिच्छतीति तस्याप्यनभ्यर्च्यपितॄन्देवान् । नतु रोगहेतोस्त्वर्चनमकुर्वतोपि कथंचिदसंभवान्न दोषः ॥ ५२ ॥

(२) **सर्वज्ञनारायणः** । अनभ्यर्च्य पितॄन्देवानिति पितॄनन्वष्टकायां देवान्पशुबन्धादौ ॥ ५२ ॥

(३) **कुल्लूकः** । स्वशरीरमांसंपरमांसेन देवपित्राद्यर्चनंविना योवृद्धिंनेतुमिच्छति तस्मादपरोनापुण्यकर्तास्तीत्यविधिमांसभक्षणनिन्दानुवादः ॥ ५२ ॥

(४) **राघवानन्दः** । किंच स्वेति । अपुण्यकृत्पातकी ॥ ५२ ॥

(६) **रामचन्द्रः** । तत्तस्मात्पुरुषात् अपुण्यकृत् पापकर्ता नास्ति ॥ ५२ ॥

वर्षे वर्षेऽश्वमेधेन योयजेत शतंसमाः ॥ मांसानि च न खादेद्यस्तयोः पुण्यफलं समम् ॥ ५३ ॥

[सदा यजति यज्ञेन सदा दानानि यच्छति । सतपस्वी सदा विप्रोयश्च मांसं विवर्जयेत् ॥ १ ॥]+

(१) **मेधातिथिः** । देवाद्यर्चनशिष्टस्य शशादिमांसस्य भक्षणमनुज्ञातं। ततोनिवर्तमानो ऽश्वमेधफलमश्नुते अश्वमेधस्य फलं सर्वान्कामानश्यंसर्वाविजितीरित्यादि । न चात्र चोदनोयम् कथंमहाप्रयासेन बहुधनव्ययेन च तुल्यफलता मांसनिवृत्तेः स्यात् । यतएषोपि संयमोतिदुष्करः । किंच लोकवत्परिमाणतःफलविशेषः स्यादित्ययंन्यायोजृम्भतएव । अतः फलविधौ न दोषः वयंतु ब्रूमः । अर्थवादएवायं यतोवर्षे शतंसमाइतिवार्थवादपक्षेसुघटम् । नहि प्रतिवर्षमश्वमेधस्य विधेयत्वसंभवः । नापि वर्षे शतं तावतः कालस्याधिकारिणोजीवनाद्यसंभवात् । पुण्यंच फलंच पुण्यफलम् । समाहारद्वन्द्वः । षष्ठीसमासेत्वसामर्थ्यम् ॥ ५३ ॥

(२) **सर्वज्ञनारायणः** । अधुना यस्य वर्णस्य यादृशंमांसभक्षणंनिषिद्धंतदकरणे फलमाह वर्षेवर्षे इति । शतंसमा इति यावदायुः प्रतिवर्षमश्वमेधफलमित्यर्थः ॥ ५३ ॥

(३) **कुल्लूकः** । इदानीमनियमिताप्रतिषिद्धमांसभक्षणस्य निवृत्तिर्धर्मायेत्येतद्दर्शयितुमाह वर्षेवर्षइति । योवर्षशतंयावत्प्रतिवर्षमश्वमेधेन यजेत यश्च यावज्जीवंमांसंन खादति तयोःपुण्यस्य फलंस्वर्गादि तुल्यम् ॥ ५३ ॥

(४) **राघवानन्दः** । मांसवर्जनादधिकंपुण्यंनसंभाव्यमित्याह वर्षइति । तयोर्मांसाभक्षकाश्वमेधयाजिनोःप्राणिवधाकरणात्समम् ॥ ५३ ॥

फलमूलाशनैर्मेध्यैर्मुन्यन्नानां च भोजनैः ॥ न तत्फलमवाप्नोति यन्मांसपरिवर्जनात् ॥ ५४ ॥

(१) **मेधातिथिः** । मेध्यैर्देवार्हैः । मुन्यन्नानि नीवाराद्यन्नान्यकृष्टपच्यजनितानि । अयमर्थवादएव ॥ ५४ ॥

(२) **सर्वज्ञनारायणः** । फलमूलाशनैःतन्मात्रभक्षणैः । मुन्यन्नानां नीवारादिमुन्यन्नानां भोजनैर्भक्षणैः ॥ ५४ ॥

(३) **कुल्लूकः** । पवित्रफलमूलभक्षणैर्वानप्रस्थभोज्यानांच नीवाराद्यन्नानांभोजनैर्न तत्फलमवाप्नोति यच्चास्यानियमिताप्रतिषिद्धमांसवर्जनाल्लभते ॥ ५४ ॥

(४) **राघवानन्दः** । फलमूलाशनैरनयोरेव भोजनैः मेध्यैर्देवयोग्यैः मेधोयज्ञस्तत्तुल्यफलैः । न भक्षयामीति संकल्पपूर्वकंमांसपरिवर्जनात् ॥ ५४ ॥

मांसभक्षयितामुत्र यस्य मांसमिहाद्म्यहम् ॥ एतन्मांसस्य मांसत्वं प्रवदन्ति मनीषिणः ॥ ५५ ॥

(१) **मेधातिथिः** । नामधेयनिर्वचनमर्थवादः । मांसभक्षयिता सइतिसर्वनाम सामान्यापेक्षं योग्येनार्थेनप्रतिराकांक्षीकरोति यस्य मांसमश्नाति ॥ ५५ ॥

(२) **सर्वज्ञनारायणः** । अनिष्टफलमाह मांसभक्षयितेति । अमुत्रजन्मान्तरे ॥ ५५ ॥

+(अ, ढ, ढ)

(३) **कुल्लूकः** । इहलोके यस्य मांसमहमश्नामि परलोके मां सभक्षयिष्यतीत्येतन्मांसशब्दस्य निरुक्तंपण्डिताः प्रवदन्ति । इतिमांसशब्दस्य निर्वचनमवैधमांसभक्षणपापफलकथनार्थम् ॥ ५५ ॥

(४) **राघवानन्दः** । मांसपदव्युत्पत्तिमाह मांसेति । सपशुर्मांसस्य भक्षकममुत्र परलोकेभक्षयिता यस्य पशोर्मांस महमिहाद्मीति ॥ ५५ ॥

(५) **नन्दनः** । मांसभक्षणस्य वर्जनीयतांमांसशब्दनिर्वचनेनाप्याह मांसइति । भक्षयिता भक्षयिष्यति ॥ ५५ ॥

(६) **रामचन्द्रः** । यस्य मांसमहमिहाद्मि अमुत्र परलोके मां सभक्षयिता भक्षयिष्यति । एतन्मांसस्यमांसत्वंमनीषिणःप्रवदन्ति ॥ ५५ ॥

न मांसभक्षणे दोषोन मद्ये न च मैथुने ॥ प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला ॥ ५६ ॥

(१) **मेधातिथिः** । प्राणस्यान्नमित्यतआरम्य यावदयंश्लोकोर्थवादसंघातएव द्वित्राः श्लोकाविषयार्थाः । नमांसभक्षणेदोषोयथाक्रीत्वास्वयंचाप्युत्पाद्येति तथायमपि श्लोकः । निवृत्तिस्तुमहाफलेत्येतदत्र श्रूयते । बहुभिर्निन्दार्थाकरैरीदृशः संस्कारोजातोयन्न किंचिन्मांसमशितव्यम् । भूतानांवृत्त्यर्थमाह न मांसभक्षणेदोषइति । देवार्चनशिष्टे ब्राह्मणकाम्यादिषु निमित्तेषु प्रागुक्तेषु न दोषः किंचिदशितुमिच्छन्ति । निवृत्तिर्नभक्षयामीतिसंकल्पपूर्विका महाफला । फलविशेषाश्रुतेःस्वर्गः फलमितिमीमांसकाः एवंमद्ये क्षत्रियादीनां मैथुनेतु सर्ववर्णानां दिवोदक्यापर्वकालादन्यत्र । अल्पत्वल्पा प्रवृत्तिरेषा शास्त्रीया भूतानां शरीरस्थितिहेत्वर्था प्रवृत्तिः तथाचायुर्वेदकृत । आहारोब्रह्मचर्यंच निद्राचेति त्रयंमतम् । मादकंचस्त्रियश्चैव ह्युपस्तम्भनमायुषइति । यस्तु तेन विनापि शक्नोति जीवितुं तस्य निवृत्तिर्महाफला । प्रदर्शनार्थंचैतदशिष्टाप्रतिषिद्धविषयाणामन्यासामपिनिवृत्तीनामेवमेव । यत्र विधानंपुरुषस्य प्रवर्तमानस्य प्रीत्यतिशयोत्पत्तिप्रयोजनमनिन्द्यंगर्हेतवा यतोनिवृत्तिःफलाय यथा मध्वशनंसंपन्नभोजनंराङ्कवंपरिधानमित्येवमादि तथाच शिष्टसमाचारः व्यासश्च भगवानेवमेवाह । ये तुसंसक्तितोऽशिष्टाप्रतिषिद्धाअपि यथा हसितकण्डूयनादयस्ततोनिवृत्तिर्धर्माय ॥ ५६ ॥

(२) **सर्वज्ञनारायणः** । उक्तमर्थमुपसंहरति नमांसभक्षणइति । अनुपाकृतमांसभक्षणे श्राद्धादिष्वपि अदोषोनास्ति किंतु दोषोस्त्येवेति व्यतिरेकनिषेधमुखेनान्वयप्रदर्शनमवधारणार्थम् तेन सर्वेष्वेव मांसभक्षणेषुच सर्वेषांदोषोस्तीत्येवेत्यर्थः । यथा येषांक्षत्रियादीनां मद्यमनिषिद्धं येषांच ब्राह्मणानां निषिद्धं तेषांसर्वेषांमद्यपानेनादोषोज्ञेयः गुरुलघुत्वाभ्यांतु निषेधानिषेधौ तथा पर्ववर्जंव्रजेच्चैनामित्यनृतुमैथुने विहितेपि न दोषः यतःप्रवृत्तिरेषा भूतानांरागवशात्सर्वसाधारणा प्रवृत्तिर्न वैधी । पाठीनरोहितावाद्यावित्यादिविधानामपि परिसङ्ख्यादिपरत्वेन मांसभक्षणविधित्वाभावात्सामान्यतश्च मांसमद्यमैथुनानांहिंसामदकामरागहेतुत्वात्तेषांच निषिद्धत्वादित्यर्थः । नन्वेवं मांसादेः सामान्यतोनिषिद्धत्वात् लशुनादेरिव ततोनिवृत्तिर्नाभ्युदयहेतुः स्यादतआह निवृत्तिस्तु महाफलेति । एतादृशमेवैतत् यत्सामान्यतोनिषिद्धत्वेपि ततोनिवृत्तिर्महाफलेति । एतच्च वेदैकसमधिगम्यत्वान्न विपरीतदृष्टान्तमात्रेणान्यथा संभावयितुंशक्यमितितात्पर्यम् । एषएव मनुवचनार्थोयमेन स्फुटीकृतः यदाह ॥ सर्वेषामेव मांसानांमहान्दोषस्तु भक्षणे । निवर्तने महत्पुण्यमितिप्राह पितामहः ॥ तथा बृहस्पतिः मद्यंमांसंमैथुनंच भूतानांल्ललनंस्मृतम् । तदेव विधिना कुर्वन्स्वर्गंप्राप्नोति मानवः ॥ अभूम्मांसपुरोडाशोभक्ष्याणांमृगपक्षिणाम् । पुराणेष्वपि यज्ञेषु ब्रह्मक्षत्रसवेषु च ॥ सौत्रामण्यांतथा मद्यं श्रुतौ भक्ष्यमुदाहृतम् । ऋतौ च मैथुनंधर्म्यंपुत्रोत्पत्तिनिमित्ततः ॥ स्वर्गंप्राप्नोति नैवंतु प्रत्यवायेन युज्यते ॥ यमेन सर्वेषामित्युक्तत्वात् । तथाचमांसंप्रक्रम्य भारतेप्युक्तम् । भक्षणस्य महान्दोषोनिवृत्त्या पुण्यमुच्यतइति ॥ तथा बृहस्पतिना मां-

समद्याचतुर्दश परिसंख्येत्युक्त्वा रोगार्तोभ्यर्थितोवापि योमांसंनात्यलोलुपः । फलंप्राप्नोत्ययत्नेन सोश्वमेधशतस्य चे-त्युक्तम् ॥ अतोविहितादपि भक्षणान्निवृत्तिर्महाफलेति गम्यते । तथा तद्भक्षणे दोषोप्यस्ति उक्तंच महाभारते अल्पदो-षमिह ज्ञेयमिति । अतएव देवान्पितॄंश्चार्चयित्वा खादन् मांसंन दुष्यतीति । अत्रापि न तादृक्संपूर्णदोषभाग्भवतीत्यर्थः । यत्तु मांसभक्षणे दोषोनास्तीत्येतत्परतयैतच्छ्लोकव्याख्यानंनिबन्धान्तरेषु कृतं तत्कथमप्यसंगतत्वात् प्रवृत्तिरेषा भूताना-मित्याद्यनन्वयाच्च नोवाप्येतेन दुष्यते कामधेनुदीपिकायांचैतद्बहुविचारितमितिनेह भूयःप्रतिपाद्यते ॥ ५६ ॥

(३) **कुल्लूकः** । ब्राह्मणादीनांवर्णानांयथाधिकारमविहिताप्रतिषिद्धभक्षणादौ न कश्चिद्दोषोयस्मात्प्राणिनांभक्षणपान-मैथुनादौ प्रवृत्तिःस्वाभाविकोयंधर्मः वर्जनंपुनर्महाफलं । अविहिताप्रतिषिद्धमद्यमैथुननिवृत्तेर्महाफलकथनार्थोयमुक्तस्यैव मांसवर्जनमहाफलकथनस्यानुवादः ॥ ५६ ॥

(४) **राघवानन्दः** । विहितमांसभक्षणे न दोषोयद्यपि तथापि ततोपि निवृत्तिःकार्येत्याह न मांसेति । अग्नीषोमीयं-पशुमालभेतेति तन्मांसं सुराग्रहांश्च गृह्णातीति वाजपेयादौ मद्यं क्रतौ भार्यामुपेयादिति मैथुनंचविधिप्राप्तं तन्निवृत्तिर्मये-दंनभोक्तव्यं नपातव्यं न गन्तव्यमिति निःशेषेणनिवृत्तिर्नियमस्ततःफललाभसंभवात् । इत्यभक्ष्यप्रकरणम् ॥ ५६ ॥

(५) **नन्दनः** । मांसभक्षणेऽनुज्ञातमांसभक्षणे । मद्ये मदकरद्रव्ये । अविहिताप्रतिषिद्धे ताम्बूलादौमैथुने चाविहि-ताप्रतिषिद्धेऽनृतौ स्वदारगमने ॥ ५६ ॥

(६) **रामचन्द्रः** । मांसभक्षणे दोषोन यज्ञादौ पुरोडाशमात्रे । न मद्ये मद्यपाने दोषः सौत्रामण्यां सुराग्रहान्गृह्णाती-ति श्रुतेः । रागवशात्सर्वसाधारणप्रवृत्तिर्नचैतस्मात्पुण्यं । आघ्राणंन तु पानं पानात्पतितोभवेदिति वचनात् । मैथुने न दो-षोविवाहितास्वेव व्यवायःकार्योनान्यस्त्रीषु । भूतानां मनुष्याणां एषा प्रवृत्तिर्ज्ञेया निवृत्तिस्तर्हिमहाफलेत्यत्र किमुवक्तव्यं । इतिमांसप्रकरणम् ॥ ५६ ॥

प्रेतशुद्धिं प्रवक्ष्यामि द्रव्यशुद्धिं तथैव च ॥ चतुर्णामपि वर्णानां यथावदनुपूर्वशः ॥ ५७ ॥

(१) **मेधातिथिः** । चतुर्णामपीतिवचनंसामान्यविहिताधर्माः शूद्रस्यनेदृशंयत्नमन्तरेण भवन्तीति ज्ञापनार्थम् । प्रे-तेषु जीवतांशुद्धिः । सुप्सुपेतिसमासः । प्रापणंचाप्रेतवन्निमित्ता शुद्धिरियंविशेषस्य । अतश्च यद्यपि शुद्धिवचनंप्रत-ज्ञायते तथाप्यशुद्धिसापक्षत्वाच्छुद्धेः । शास्त्रमस्ययकारकत्वादुभयोरप्रतिज्ञातापि प्रथममशुद्धिरुच्यते ॥ ५७ ॥

(२) **सर्वज्ञनारायणः** । अथ देहद्रव्याशौचंमक्रमते प्रेतशुद्धिमिति । प्रेतशुद्धिः प्रेतनिमित्ता शुद्धिः शोधनं कालादि चतुर्णामिति ब्राह्मणादीनां प्रेतशुद्ध्यान्वितम् ॥ ५७॥

(३) **कुल्लूकः** । ब्राह्मणादीनांचतुर्णामपि वर्णानांप्रेतेष्वपिपित्रादीनां शुद्धिर्ब्राह्मणादिक्रमेण या यस्येति । द्रव्यादी-नांच तैजसादीनांशुद्धिमभिधास्यामि ॥ ५७ ॥

(४) **राघवानन्दः** । अशौचंप्रतिजानीते प्रेति । अपिना नानासंकरजातिग्रहः ॥ ५७ ॥

(५) **नन्दनः** । अथप्रकरणान्तरमारभते प्रेतेति । प्रेतशब्दोऽत्र जातस्याप्युपलक्षणार्थम् ॥ ५७ ॥

(६) **रामचन्द्रः** । अथप्रेतशुद्धिमाह प्रेतशुद्धिमिति । प्रेतशुद्धिं देहद्रव्याशौचं । चतुर्णामपिवर्णानां । अनुपूर्वशः ब्राह्मणादिवर्णक्रमेण ॥ ५७ ॥

दन्तजातेऽनुजाते च कृतचूडे च संस्थिते ॥ अशुद्धा बान्धवाः सर्वे सूतके च तथोच्यते ॥ ५८ ॥

(१) मेधातिथिः । अनुजातो दन्तजाताद्बालतरइतिस्मरन्ति । तथाविभागेनोद्देशमात्रमिदं यतस्तदपेक्षआशौचकालभेदोभविष्यति । तद्यथा स्मृत्यन्तरे आदन्तजन्मनः तथा बाले देशान्तरस्थेचेत्यादिना सद्यःशौचंश्रुतम् । बालश्चाजातदन्तोविज्ञेयः । एवंच नृणामकृतचूडानामित्येतदेकरात्रिकमाशौचंदन्तजातेऽप्यवस्थाप्यते । एवमेते स्मृतिविषयव्यवस्थाया अविरोधिन्यौ बालविषये भवतः । नैशिकीच शुद्धिराचूडाकरणात् यतोनिवृत्तमुण्डकानांत्रिरात्रंवक्ष्यति । तच्च त्रिरात्रमाउपनयनात्परतः शुद्ध्येद्द्विभिरित्यादि । येतु दशाहंशावमाशौचमित्येतान्पक्षान्वयोविभागेन वर्णयन्ति स्मृत्यन्तरात्समाचाराच्चव्युत्क्रमेण संबन्धयन्ति दशाहमुपनीतस्य अनुपनीतस्य चतुरहं कृतमुण्डस्य त्र्यहं जातदन्तस्यैकाहमनुजातस्य सद्यःशौचिकादयस्तुविकल्पाः एवंत्र्यहचतुरहयोः कृतचूडस्य तेषांमते स्मृत्यन्तरप्रसिद्धोवृत्तस्वाध्यायापेक्षोन विकल्पःप्रतिपादितःस्यात्तच्चोत्तरत्र दर्शयिष्यामः । सर्वव्यापारनिवृत्त्या मृतउच्यते । संपूर्वस्य तिष्ठतेर्व्यापारोपरमदर्शनात् । बान्धवाः सपिण्डाःसमानोदकाः । सूतकेच पुत्रजन्मादौ तथोच्यते अशुद्धाबान्धवाः सर्वइत्येतेनास्य संबन्धः । कथंपुनरत्र वयोभेदप्रतिपत्तिर्यावता कृतमुण्डइति संस्कारसंबन्धोगम्यते । कृतोपनयनेचेत्यत्र श्रुतमेव । अतएव कृतचौडः कियन्तंकालमुच्यतइति नैव श्रूयते । उच्यते । दन्तजातानुसाहचर्यात्कृतमुण्डःकाललक्षणार्थोविज्ञायते सच कालोत्र प्रथम तृतीयइत्येषः यद्यपि प्रथमे वर्षे वैकल्पिकंमुण्डीकरणंतस्मिन्समयआदन्तजन्मनः सद्यइत्येतद्बाधितंभवति । तदप्ययुक्तं कियानवधिः कृतमुण्डइति चशब्दात्कृतमुण्डेचेतिकृतोपनयेचेतिलभ्यते । संस्कारान्तरप्राप्तौ व्यपदेशान्तरप्रवृत्तेः । एवं चैतयास्मृत्या एकवाक्यता भविष्यत्यादन्तजन्मनः सद्यइत्यत्रापि। त्रिरात्रमाव्रतादेशादिति । व्रतादेशग्रहणंकालोपलक्षणार्थमेव नच ब्राह्मणस्यानित्योष्टमवर्षे एवंक्षत्रियवैश्ययोर्यश्च कालः तदा शूद्रस्य न कश्चित्कालउक्तःस्यात् । तत्राप्यतीतशैशवस्य परिपूर्णसर्वेषामितिवचनादतश्चाष्टमाद्वर्षादूर्ध्वंचतुर्णामपिवर्णानांसर्वाशौचंशूद्रस्यापि तस्य कालस्य सद्भावात् । यस्मिंस्तु पक्षे एकादशे वर्षे क्षत्रियवैश्ययोरुपनयनंलक्ष्यते तदा शूद्रस्य नकश्चित्कालउक्तःस्यात् । तत्राप्यतीतशैशवस्य परिपूर्णमर्वाक्त्रिरात्रं । शैशवस्य निवृत्तेश्च । स्मृत्यन्तरे प्रागष्टमाच्छिशुः प्रोक्तः अन्यैस्तु आषोडशाद्बवेद्बालइति । येपि षोडशाद्बाल्य निवृत्तिमाहुस्तेषामप्यष्टमादूर्ध्वमासिक्येव शुद्धिः । एवंपठ्यते । ऊर्ध्वंतुषड्भ्योवर्षेभ्यः शुद्धिः शूद्रस्य मासिकी। अन्यत्र पठितमष्टवर्षस्य मासइति । ननु वक्ष्यमाणेभ्यएव वाक्येभ्यएषावयोभेदव्यवस्था लभ्यते किमनेन दन्तजातइत्युद्देशेनसत्यं सुखावबोधार्थम् ॥ ५८ ॥

(२) सर्वज्ञनारायणः । दन्तजाते जातदन्ते । अनुजाते जातदन्तादनुपश्चाज्जाते अजातदन्तइत्यर्थः । कृतचौलेचेति चकारादुपनीतेच संस्थितेमृते सर्वे बान्धवाः सपिण्डसमानोदकाः । सूतके बान्धवस्य जन्मनि । तथोच्यतइत्यशुद्धाः सर्वेबान्धवाइत्यर्थः ॥ ५८ ॥

(३) कुल्लूकः । तत्रशुद्धेरशुद्धिसापेक्षत्वात्तन्निरूपणार्थमाह दन्तजातइति । दन्तजाते जातदन्तइत्यर्थः । वाहिताग्न्यादिष्वित्यनेन जातशब्दस्य परनिपातः । अनुजाते जातदन्तानन्तरे कृतचूडाकरणे च चकारात्कृतोपनयनेच संस्थिते मृतेसति बान्धवाःसपिण्डाःसमानोदकाश्चाशुद्धाभवन्ति प्रसवे च तथैवाशुद्धाभवन्तीत्युच्यते । वयोविभागेनोद्देशमात्रमिदं वक्ष्यमाणाशौचकालभेदादिसुखावबोधनार्थम् ॥ ५८ ॥

(४) राघवानन्दः । तत्र जातकाद्याशौचशुद्धीराह दन्तेत्यष्टाविंशत्या । दन्तजाते उत्पन्नदन्ते । अनुजाते पूर्वस्य-

पतनानन्तरंपश्चाद्भाविन्यनुत्पन्नदन्ते आदन्तजन्मनः । कृतचूडेत्यत्रचकारउपनयनोपलक्षकः । संस्थिते मृते । सूतकं जन्म ॥ ५८ ॥

(५) **नन्दनः** । आशौचनिमित्तान्याह दन्तेति । दतजान्ते जातदन्ते षाण्मासाधिकइतियावत् । अनुजाते पुनर्जातउपनीतइतियावत् प्रागष्टवर्षइत्यर्थः । कृतचौले प्राप्ततृतीयवर्षइतियावत् । संस्थितेमृते । बान्धवाः सपिण्डाः सर्वे सन्निकृष्टाअसन्निकृष्टाश्च अवस्थाविशेषोपन्यासोऽशुद्धिवैषम्यात् ॥ ५८ ॥

(६) **रामचन्द्रः** । दन्तजाते जातदन्ते । सर्वेबान्धवाअशुद्धाभवन्ति । च पुनः अनुजातःअनुपश्चाज्जातोऽनुजातः परस्य विशेषणंदन्तोत्पत्तिकालपर्यन्तमित्यर्थः । च पुनः कृतचूडे अनुपनीते चकारादुपनीतेपि संस्थिते मृते सतिसर्वेबान्धवाअशुद्धाभवन्ति । तथा सूतके जननाशौचे बान्धवाअशुद्धाः। योगीश्वरः आदन्ताजननात्सद्यआचूडान्नैशिकीस्मृता । त्रिरात्रमाव्रतादेशाद्दशरात्रमतःपरम् ॥ ५८ ॥

दशाहं शावमाशौचं सपिण्डेषु विधीयते ॥ अर्वाक्संचयनादस्थ्नां त्र्यहमेकाहमेव वा ॥ ५९ ॥

(१) **मेधातिथिः** । सापिण्ड्यलक्षणंवक्ष्यते । अर्वाक्संचयनादिति चतुरहोपलक्षणंवक्ष्यति । आहिताग्नेः संचयनंचतुर्थ्यामितिवचनमस्ति । अयंच विकल्पोवृत्तस्वाध्यायापेक्षोवृत्तापेक्षोवा । तथाच स्मृत्यन्तरम् । एकाहाद्ब्राह्मणः शुद्धोयस्तु ब्रह्माग्निसंयुतः । त्र्यहात्केवलवेदस्तुनिर्गुणोदशभिर्दिनैः । तत्र त्रिवेदस्याग्निमतएकाहः । द्विवेदस्य तु त्र्यहं । निर्गुणस्य दशाहम् । गौतमेनपठितंसद्यः शौचं तच्च विशेषएव ब्राह्मणस्य स्वाध्यायानिवृत्त्यर्थं तत्रक्रियान्तराणि उभयत्र दशाहानि कुलस्यान्नं भुज्यते । दानंप्रतिग्रहोहोमः स्वाध्यायश्चनिवर्ततइत्याद्याः क्रियानिवर्तन्ते । केवलंबहुवेदस्यागुण्यमानंप्रणश्यतीति स्वाध्यायोननिवर्तते । तथावृत्त्यपेक्षोयुक्तोविकल्पः । षट्कर्मजीविनोदशाहः त्रिभिरन्यइत्यस्य चतुरहोद्वाभ्यामेकइत्यस्यत्र्यहः । दाशाहिकआशौचे प्रतिग्रहादावनधिकारात्प्राणयात्रैव दुर्लभा येतु वयांसि चत्वारि चत्वारश्चाशौचकालाः अतोयथावयोयथासंख्येन संबन्धः तेषांदन्तजाते दशाहः प्राप्नोति उपनीतेतु मृतेएकाहएव तत्र स्मृत्यन्तरसमाचारविरोधः । अथविरोधपरिहारार्थंप्रातिलोम्येन संबन्धः क्रियते । उपनीते दशाहः कृतमुण्डे चतुरहः त्र्यहोदन्तजाते एकाहोनुजातइति । अत्रापि निवृत्तचौडकानांतुत्रिरात्रादितिविरोधेन विकल्पोयुक्तः स्वशब्देन त्रिरात्रस्यानुविधानात् । चतुरहस्य वृत्तिभेदेन संचयभेदेन विषयत्वसिद्धेः स्मृत्यन्तरेणैवमेकवाक्यता भवति एकाहादित्यनेन । अन्यथा वयोभेदेन विकल्पे व्याख्यायमाने वृत्तस्वाध्यायापेक्षोमानवे शास्त्रे केन विकल्पोलभ्यते । अतोगौतमवचनाद्यस्य प्रात्यहिकेन प्रतिग्रहेण विनापि वृत्तिरस्ति कुसूलधान्यादेस्तस्य बहुस्वाध्यायस्य स्वाध्यायाध्ययनमात्रे सद्यःशुद्धिः। येपि त्र्यहादयःकल्पास्तत्रापि त्र्यहैहिकादीनांतावन्मात्रएव विशुद्धिर्वृत्त्यर्थे प्रतिग्रहेऽनेनैव गौतमदर्शनेन । अन्यथा ब्राह्मणस्य स्वाध्यायिनइत्येवावक्ष्यत् न स्वाध्यायानिवृत्त्यर्थमिति । अतोयद्यप्यविशेषणैकाहाच्छुद्धिरित्यादि श्रुतं तथापि नियतक्रियाविषयंविज्ञेयम् । येननित्यवद्ब्राह्मणस्य दशाहमाह शुद्ध्येद्विप्रोदशाहेनेति । न ह्यन्यत्पुनर्वचने प्रयोजनमस्ति तस्मा द्विकल्पोयंयुक्तेन मार्गेण व्याख्येयः । यत्र पुनर्बालादौ सद्यःशौचं निवृत्तमुण्डकादौ त्रिरात्रं तत्र विकल्पाभावात्सर्वक्रियासु शुचित्वम् ॥ ५९ ॥

(२) **सर्वज्ञनारायणः** । दशाहमितिगुणरहितब्राह्मणविषयम् । सपिण्डेषु मृतेषु । अर्वाक्संचयनादिति विप्राणांचतुर्थेह्नि संचयनस्य प्रायिकत्वाच्चतुरहोपलक्षणं एतदेकशाखीयमन्त्रमात्रमधीतवतोदशाहस्थाने । त्र्यहः संपूर्णैकशाखाध्येतुः । एकाहोवेदश्रौताग्निमतः ॥ ५९ ॥

(३) कुल्लूकः। सप्तपुरुषपर्यन्तंसपिण्डतांवक्ष्यति । सपिण्डेषु शवनिमित्तमाशौचंदशाहोरात्रंब्राह्मणस्योपदिश्यते शुध्येद्विप्रो दशाहेनेतिवक्ष्यमाणत्वात्। अर्वाक्संचयनादस्थ्नामितिचतुरहोपलक्षणम्। चतुर्थे दिवसेऽस्थिसंचयनंकुर्यादितिविष्णुवचनात्। त्र्यहमेकाहंवा अहःशब्दोऽहोरात्रपरः। अयंचाग्निवेदादिगुणापेक्षोव्यवस्थितविकल्पः। यथाह दक्षः एकाहाच्छुध्यते विप्रोयो ऽग्निवेदसमन्वितः। हीनेहीनंभवे*चैव त्र्यहश्चतुरहस्तथा॥ श्रौताग्निमतो मन्त्रब्राह्मणात्मककृत्स्नशाखाध्यायिन एकाहाशौचम्। तत्र श्रौताग्निवेदाध्ययनगुणयोरेकगुणरहितोहीनस्तस्यत्र्यहः। उभयगुणरहितस्तु हीनतरः केवलस्मार्ताग्निमांस्तस्यचतुरहः। सकलगुणरहितस्य दशाहः। तदाहपराशरः निर्गुणो दशभिर्दिनैरिति॥ ५९॥

(४) राघवानन्दः। शवनिमित्तं शावं मृतोमनुष्यःशवः। सकलगुणरहितस्य तु दशाहंतथाह पराशरः। निर्गुणोदशभिर्दिनैः। अनाहिताग्नेःसंचयनंचतुर्थ्यामिति स्मृतेश्चतुर्थदिवसेऽस्थिसंयचनंकुर्यादिति विष्णुवचनाच्चतुरहोपलक्षणमिदम्। आशब्दोत्र छन्दसि व्यवहिताश्चेति समः पूर्वः तेन हीनतरस्याचतुरहमाशौचमितिभावः। अर्वाक्संचयनादिति मेधातिथिः। अहःशब्दोत्राहोरात्रपरः। तथोक्तं॥ एकाहाच्छुध्यते विप्रोयोग्निवेदसमन्वितः। हीने हीनतरे चैव त्र्यहश्चतुरहस्तथा॥ एवंचसाग्निःशाखायुक्तोविप्रः। स्वशाखाध्याय्यग्निहीनोहीनरतरस्य त्र्यहं। स्मार्ताग्निमात्रेणहीनतरस्तस्य चतुरहं; उक्तसकलगुणहीनस्य दशाहमितिचतुर्णांव्यवस्थितविकल्पइति। उक्तषट्कर्मा दशाहेन शुध्यति तथा त्रिभिर्जीवी चतुर्भिः। द्वाभ्यांजीवी त्र्यहैः। एकेन जीव्येकाहेनेति मेधातिथिः॥ ५९॥

(५) नन्दनः। दशाहमनिर्गुणेषु सपिण्डेषु बान्धवेषु। अस्थ्नामासंचयनाद्वेति चतुरहोपलक्षणं चतुर्थेऽन्हि संचयनमितिवचनात्। चतुरहंगुणवत्स्वित्यर्थः। त्र्यहंगुणवत्तरेषु। एकाहमग्निहोत्रनित्यस्वाध्यायवत्सु। स्मृत्यन्तरानुरोधादेवंव्याख्यानम्॥ ५९॥

(६) रामचन्द्रः। आशौचनिमित्तकालनियममाह दशाहमिति। शावमाशौचंदशाहपर्यन्तंसपिण्डेषु विधीयते गुणरहितब्राह्मणविषयम्। अस्थिसंचयनादर्वाक् त्र्यहं वेदैकदेशाध्येतृविषयम्। एकाहंवा साङ्गसमग्रशाखाध्येतृपरम्। तद्यशासञ्चयश्चब्राह्मणानांप्रायेण चतुर्थेऽहनि भवत्यतोदिनचतुष्टयमेकशाखामन्त्रमात्रमधीतवतोदशाहस्थाने। त्र्यहः संपूर्णैकशाखाध्येतुः। एकाहोवेदश्रौताग्निमतः॥ ५९॥

सपिण्डता तु पुरुषे सप्तमे विनिवर्तते॥ समानोदकभावस्तु जन्मनाम्नोरवेदने॥ ६०॥

(१) मेधातिथिः। अन्वर्थसंज्ञाविज्ञानाद्वान्धवग्रहणानुवृत्तेश्चान्वयजाः सप्तमपुरुषावधयः सपिण्डाउच्यन्ते। येभ्यश्चास्य पिता दद्यात्तेभ्यः पुत्रइतिजीवत्पूर्वपित्रादेर्विधानात् षट् तावद्योग्यतया सपिण्डाभवन्ति। यद्यपिपितृभ्योदीयते आत्मना सप्तमअतःपितामहप्रपितामहाद्याःपूर्वमन्वयजातास्तेसपिण्डाइतिव्यपदिश्यन्ते। पूर्वे षट् सपिण्डाः। अपरे पुत्रादयः षडेव यतएकस्याःपिण्डदानक्रियायाः सहभावात्सपिण्डाद्युपदेशोलभ्यते। पुत्रादेरपिसहभावः पौत्रादिनाक्रियमाणोऽयम् तेनयेभ्योदीयते यैश्च सह संप्रदानवाग्भविष्यति सर्वे ते सपिण्डाव्यपदिश्यन्ते। यतोन तत्र पिण्डदानमभ्युपलक्षणत्वाच्छरद्यवेलायामागन्तव्यमिति। तेन यावदुक्तंस्यात् प्रपितामहस्य यःप्रपितामहस्तदन्वयजाये यावत्सप्तमास्ते सपिण्डाएव स्वसन्ततौपित्रादिसन्ततौ द्रष्टव्यम्। यतएव भेदस्तमुपादाय गणना कर्तव्या यावत्सप्तमावधि। यथा पितामहोयेषामेकस्तत आरभ्य सप्तमावधयःसपिण्डाइत्येव सर्वत्र तदन्वयजत्वे चोपलक्षणे जातेरनाश्रयणाद्द्विजातीयाअपि क्षत्रियादयोब्राह्मणादीनांसपिण्डाभवन्ति। अतएव तज्जननाद्याशौचे ब्राह्मणस्यदशाहएव तेषांतुस्वकालएव द्वादशाहादिः।

---

* हीनंभवे=हीनतरे (अ)

अतःसर्वस्यविजातीयनिमित्तेविजातीयसपिण्डनिमित्तेवाजन्मादौस्वकालएवशुद्धिः। क्षत्रियादीनांब्राह्मणापेक्षया त्रिपुरुषंसापिण्ड्यं तथाच शङ्खः। यद्येकजाताबहवःपृथक्क्षेत्राःपृथग्जनाः। एकपिण्डाःपृथक्शौचाःपिण्डस्त्वावर्तते त्रिषु॥ पृथक्क्षेत्राः भिन्नजातीयासुस्त्रीष्वित्यर्थः। पृथग्जनाः पृथक्क्षेत्राः समानजातीयाअप्यनेकमातृकाभवन्ति तदर्थमुभयोरुपादानम्। एकपिण्डाःसपिण्डाभवन्ति किंतु पृथक्शौचाः स्वजातिनिमित्तएव तेषांशुद्धिकालः। ब्राह्मणस्य क्षत्रियादेः सूतकादौ दशाहः। ब्राह्मणसूतके तेषां द्वादशाहश्च। तथाचान्योपि विशेषःपिण्डस्त्रिष्वावर्तते त्रिष्वेव भवति पुरुषेषु। समानजातीयापेक्षया क्षत्रियादीनांब्राह्मणवत्षट्पुरुषस्य सापिण्ड्यं एकजाताःपृथक्क्षेत्राइत्यादिविशेषणोपादानादसमानजातीयापेक्षंत्रिपुरुषत्वमनेन वाक्येनशक्यते प्रतिपादयितुम्। एषएवार्थोऽनया स्मृत्या स्पष्टीक्रियते। क्षत्रविट्शूद्रदायादा ये स्युर्विप्रस्यबान्धवाः। तेषामाशौचे विप्रस्य दशाहाच्छुद्धिरिष्यते॥ षड्भिस्त्रिभिरथैकेनेत्यादिच॥ स्त्रीणांतु विजातीयानांभर्तृकालेन जीवति भर्तरि शुद्धिः। आह च। सूतौ मृते तु दासानां पत्नीनांचानुलोमतः। स्वामितुल्यंभवेच्छौचं मृते स्वामिनि पैतृकम्॥ अन्ये पठन्तिअसवर्णासुतानामिति प्रथमंपादंयद्ययमस्तिपाठस्तदा पुत्राणामपि शूद्राणांपितृगृहे व्यवस्थितानांतत्परतन्त्राणांपितृजात्यपेक्षया दशाहादिरेव शुद्धिकालः। दासाश्चात्र वैतनिकागृह्यन्ते येतु गर्भदासास्तेषांविष्यन्तरंश्रूयते। कारवः शिल्पिनोवैद्यादासीदासंतथैवच। राजानोराजभृत्याश्च सद्यःशौचाः प्रकीर्तिताइति॥ स्पर्शनेचैवमेतेषांशुचित्वंविज्ञेयं न पुनर्दानभोजनादिक्रियासु यतःकर्मनिमित्ताएते शब्दाअतःकिंविपर्यये शुद्धिः किंसर्वाःक्रियाः प्रतिप्रसवाउतकाश्चिदेवाभ्यनुज्ञायन्ते। यतोराज्ञश्च कार्याविघातार्थमत्याकांक्षायांयान्येव कर्माणि तान्येव त्वदयमागच्छन्ति। तथैवच समाचारः। ननुच नात्र स्पर्शप्रतिषेधः श्रुतोयावता स्मृत्यन्तरे पठ्यते। अस्थिसंचयनादूर्ध्वमङ्गस्पर्शोविधीयते। तथान्यच्चत्रिभिश्चतुर्भिर्वाहोभिर्ब्राह्मणःस्पृश्यतामियात्। एकादशेन शुद्धिःस्यान्मृतके सूतके तथा। राज्ञः षष्ठे सप्तमे वा स्पर्शोद्वादशाहेनान्नशुद्धिः। वैश्यस्य स्पर्शनमष्टमे नवमे वा पक्षेणान्नशुद्धिः। शूद्रस्य स्पर्शनमेकादशे द्वादशे वा मासेनान्नशुद्धिः। हारीतस्तथा वाक्यान्तरमपि। स्पर्शेक्रमेण वर्णानांत्रिचतुःपञ्चषैर्दिनैः। भोज्यान्नोदशभिर्विप्रःशेषाद्विनिषडुत्तरैः। एतेच विकल्पाः। प्रयोजनापेक्षया गुणवदगुणापेक्षया व्यवस्थापनीयाः। सर्वेषांतावद्ब्राह्मणस्य भक्तदासास्त्रिचतुरैरहोभिःस्पर्शनेन दूषयन्ति। गर्भदासास्तु सद्यः। एवमितरेषामपि वर्णानांयत्रेदंसद्यःशौचंतत्र सर्वत्रस्नानंवाससा च। द्रव्यस्य शुद्धिर्यायस्य विहितेतिज्ञापयिष्यते। कन्यानामपि त्रिपौरुषेयी सपिण्डता। सपुत्राणांतुस्त्रीणांत्रिपुरुषंविज्ञायतइतिवसिष्ठः। आशौचएवैतत्। विवाहे तु विधिर्दर्शितः। स्थितमेतत्। सप्तमपुरुषोमर्यादा षट्पुरुषाःसपिण्डाइति। सप्तमे भावे विनिवर्तते। समानोदकभावः समानोदकव्यपदेशः जन्मनाम्नोरवेदने जन्मचायमस्मत्कुले जातः नाम अमुष्मादिदं नामकात्पितृपितामहादेरुभयोरवेदने। निवृत्तिरतश्चान्यतरज्ञानेप्यनिष्टोदकंज्ञेयम्। अवतीर्य नदीमन्यद्वा जलाशयंनाभिदघ्नमभुग्नोदक्षिणाभिमुखः सव्योत्तराभ्यांपाणिभ्यामुदकंकृत्वानवेक्षमाणाः प्रत्याव्रजेयुरिति॥ ६०॥

(२) सर्वज्ञनारायणः। सप्तमे स्वंविहाय स्वापेक्षया त्वष्टमे निवर्तते। अत्रच सप्तमे पुरुषइतिसामान्याभिधानस्य स्वापेक्षयार्वाचीनेषु षट्सु पराचीनेष्वपि षट्सु तेषामपिच सन्ततौ सप्तसङ्ख्यावच्छिन्नायांसपिण्डतानुवर्तते। तत्रैतदुक्तमाशौचमितितात्पर्यम्। सप्तमे देयपिण्डेपि पिण्डभोजितया त्रयाणांलेपभागितया च त्रयाणांसमानपिण्डसंबन्धात्सापिण्ड्यमितितुमत्स्यपुराणादिषूपलक्षणमात्रमुक्तम्। जन्मस्वार्वाचीनपराचीनधाराम्भ्यउत्पत्तिः। नामामुकशर्मेति। एतयोरुभयोरवेदनेज्ञानाभावे निवर्तते। एतत्संज्ञाकरणमाशौचविष्यर्थम्॥ ६०॥

(३) कुल्लूकः । सपिण्डलक्षणमाह । यंपुरुषंप्रतियोगिनंकृत्वा निरूप्यते तस्य पितृपितामहप्रभृतीन्षट्पुरुषानतिक्रम्य सप्तमे पुरुषे प्राप्ते सपिण्डत्वंनिवर्तते । एवंपुत्रपौत्रादिष्वप्यवगन्तव्यम् । पिण्डसंबन्धिनिबन्धनाचेयंसपिण्डता । तथाहि पितृपितामहप्रपितामहेभ्यस्त्रिभ्यःपिण्डदानंप्रपितामहस्य पित्रादयस्त्रयःपिण्डलेपभुजश्च तत्पूर्वस्य तु सप्तमस्यपिण्डसंबन्धोनास्तीत्यसपिण्डता । यस्य चैते षट्पुरुषाःसपिण्डाःसोपि तेषांसपिण्डः पिण्डदातृत्वेन तत्पिण्डसंबन्धात् । अतःसाप्तपौरुषीयंसपिण्डता । तदुक्तंमत्स्यपुराणे लेपभाजश्चतुर्थाद्याःपित्राद्याःपिण्डभागिनः । पिण्डदःसप्तमस्तेषांसापिण्ड्यंसाप्तपौरुषम् ॥ सगोत्रत्वे चेयंसपिण्डता । अतएव शङ्खलिखितौ सपिण्डता तु सर्वेषां गोत्रतः साप्तपौरुषी । तेन मातामहादीनामेकपिण्डसंबन्धेपि न सपिण्डता । समानोदकत्वंपुनरस्मत्कुलेऽमुकनामा भूदितिजन्मनामोभयापरिज्ञानेनिवर्तते ॥ ६० ॥

(४) राघवानन्दः । सपिण्डेष्वित्युक्तंसप्रतियोगिकंतल्लक्षणमाह सपिण्डतेति । तदुक्तं मात्स्ये ॥ लेपभाजश्चतुर्थाद्याःपित्राद्याःपिण्डभागिनः । पिण्डदः सप्तमस्तेषांसापिण्ड्यंसाप्तपौरुषम् ॥ पिण्डभागिनःप्रपितामहान्ताउत्तरे त्रयोलेपभुजइति षट् सपिण्डता तु सर्वेषांगोत्रतःसाप्तपौरुषीति शङ्खोक्तेःअतोमातामहादीनामेकपिण्डसंबन्धेपि न सपिण्डता गोत्रभेदात् अस्मत्कुलेऽमुकनामाजातआसीत्तावत्पर्यन्तंसमानोदकभावःतदवेदने तदज्ञाने समानोदकता निवर्ततइत्यन्वयः ॥ ६० ॥

(५) नन्दनः । सपिण्डानाह सपिण्डतेति । पित्रादिषु पूर्वेषु षट्सु पुत्रादिष्वपरेषु सत्सु सपिण्डता वर्तते सप्तमादौ निवर्तते । पुरुषग्रहणंस्त्रीद्वारसंबन्धिनिवृत्त्यर्थम् । उत्तरार्धेविनिवर्ततइत्यनुषञ्जनीयम् ॥ ६० ॥

(६) रामचन्द्रः । सप्तमे स्वंविहाय स्वापेक्षयात्वष्टमेनिवर्तते सप्तमे पुरुषइति सामान्याभिधानात्स्वापेक्षयार्वाचीनेषु षट्सुतेषामपि च संततौ जन्मनाम्नोरवेदनेऽज्ञाने समानोदकभावःसमानोदकसंज्ञो भवति । शवस्पर्शे विशुध्यन्ति त्र्यहादुदकदायिनइत्यादिवाक्यैः ॥ ६० ॥

यथेदं शावमाशौचं सपिण्डेषु विधीयते ॥ जननेप्येवमेवस्यान्निपुणं शुद्धिमिच्छताम् ॥ ६१ ॥

[उभयत्र दशाहानि कुलस्यान्नं न भुज्यते । दानं प्रतिग्रहोयज्ञः स्वाध्यायश्च निवर्तते ॥ १॥]‡

(२) सर्वज्ञनारायणः । यथेदंदशाहादि एवमेव दशाहचतुरूयेकाहाशौचं गुणापेक्षया व्यवस्थितं सपिण्डानाम् । निपुणां सर्वप्रकारामन्नादिविषयामपि । शावाशौचेतिगुणापेक्षया भर्तुश्चतुरहाद्याशौचापकर्षात्पत्न्याअप्याशौचापकर्षः । सूतकेतु नाशौचं सूतकेपुंसः संसर्गंचेन्न गच्छति । रजस्तत्राशुचिज्ञेयंतच्च पुंसि न विद्यतइत्यङ्गिरोवचनात् रजः प्रवृत्तिनिमित्तकंसूत्याशौचंपुंसआशौचापकर्षेपिस्त्रियादशाहमेव तथाचान्नादावप्याशौचशङ्कामाभूदित्येतदर्थंनिपुणामित्युक्तम् ॥६१॥

[सर्वज्ञनारायणः । उभयत्र सूतके मृतके च दशाहानीत्याशौचकालोपलक्षणम् । दशाहग्रहणंतु ब्राह्मणस्य प्राधान्यात् तदाशौचेषु च दशाहस्याप्युत्कृष्टत्वात् । कुलस्य तत्कुलस्यान्नंनभुज्यतेन्यैः । दानप्रतिग्रहादयश्चाशौचिभिः क्रियमाणाः । होमःस्मार्तः ॥ १ ॥]

(३) कुल्लूकः । यथेदंदशाहादिकंशवनिमित्तमाशौचंकर्मानर्हत्वलक्षणंसपिण्डेषु दशाहंशावमाशौचमित्यनेन विधीय

(६१) निपुणं=निपुणां (क, ख, ण, च, ञ, ज, झ, ढ.)

‡ (क, ख, द, त.)

ते। प्रसवेऽपि सम्यक्शुद्धिमिच्छतांसपिण्डानांतादशमेवाशौचंभवेत् ॥ ६१ ॥

(४) राघवानन्दः। सूतकंनिर्दिशति यथेदमिति। एवंवृत्तिभेदेपि दशाहाद्युन्नेयम् ॥ ६१ ॥

(५) नन्दनः। एवमेवस्यात् पूर्ववदेवस्यात्। दशाहंनिर्गुणेषु चतुरहंगुणवत्सु त्र्यहंगुणवत्तरेष्वेकाहंगुणवत्तमेष्वित्यर्थः ॥ ६१ ॥

(६) रामचन्द्रः। यथेदं आशौचं शावाशौचंदशाहपर्यन्तंसपिण्डेषु विधीयतेजननेपि एवंदशाहंस्यात्। निपुणां यथोदितांशुद्धिमिच्छताम् ॥ ६१ ॥

[रामचन्द्रः। उभयत्रेति। उभयत्र शावाशौचे जननाशौचेच दशाहंतत्कुलस्यान्नं भुञ्जते न भुञ्जीत। दानप्रतिग्रहौवर्ज्यौ यज्ञंवर्जयेत् यज्ञाहुतिंतत्र हावयेन्न तु हापयेत्। स्वाध्यायोवेदाध्ययनं न भवेत्।]

सर्वेषां शावमाशौचं मातापित्रोस्तु सूतकम् ॥ सूतकं मातुरेव स्यादुपस्पृश्य पिता शुचिः ॥ ६२॥

[सत्रधर्मप्रवृत्तस्य दानधर्मफलैषिणः ॥ त्रेताधर्मापरोधार्थमरण्यस्यैतदुच्यते ॥ १ ॥] [१]

(२) सर्वज्ञनारायणः। सर्वेषामिति। सपिण्डानांसर्वेषामस्थिसंचयनात्प्राक्शावमाशौचमङ्गाशौचमस्पृश्यताहेतु स्मृत्यन्तरोक्तम्। सूतकंतुप्रसवनिमित्तमङ्गाशौचंमातापित्रोरेव। सूतकंयावद्दशरात्रमङ्गाशौचं। पिता तु स्नातएव स्पर्शे शुचिरित्यर्थः ॥ ६२ ॥

(३) कुल्लूकः। अनिर्देशेन तुल्यतायांमाप्तायां विशेषमाह सर्वेषामिति। मरणनिमित्तमस्पृश्यत्वलक्षणमाशौचं सर्वेषामेव सपिण्डानांसमानम्। जननिमित्तंतु मातापित्रोरेव भवति तत्राप्ययंविशेषः जननिमित्तमस्पृश्यत्वंमातुरेव दशरात्रं पिता तु स्नानात्स्पृश्योभवति। अयमेवसंबन्धःसंवर्तेन व्यक्तीकृतः॥ जाते पुत्रे पितुःस्नानंसचैलंतु विधीयते। माता शुध्येद्दशाहेन स्नानात्तु स्पर्शनंपितुः ॥ ६२ ॥

(४) राघवानन्दः। किंच सर्वेषामिति। मरणनिमित्तमस्पृश्यत्वलक्षणमाशौचंसर्वेषामेव सपिण्डानांसमानं जन्मनिमित्तमस्पृश्यत्वंमातापित्रोरेव स्यात् तत्रैव विशेषान्तरमाहसूतकंमातुःसूतकनिमित्तमस्पृश्यता दशरात्रं पिता तु प्रातःस्पृश्योभवति तथाच संवर्तः॥ जाते पुत्रे पितुःस्नानंसचैलंतु विधीयते। माता शुध्येद्दशाहेन स्नानात्तु स्पर्शनंपितुरिति ॥ तस्मात्सदिवसःपुण्यःपितॄणांप्रीतिवर्धनइत्यपि संगतम् ॥ ६२ ॥

(५) नन्दनः। मातापित्रोरेवसूतकं नसपिण्डानाम्। उत्तरार्धेन पक्षान्तरमाह सूतकंमातुरेवेति। उपस्पृश्य पिता शुचिरित्युत्तरार्धेनोपपादयति ॥ ६२ ॥

(६) रामचन्द्रः। सपिण्डानांशावमाशौचं सूतकं जननिमित्तं अस्पृश्यत्वमाशौचंमातापित्रोरेव नसपिण्डानां अस्पृश्यत्वंसूतकंमातुरेव च उपस्पृश्य स्नात्वा पिता शुचिःस्यात् ॥ ६२ ॥

[रामचन्द्रः। सत्रेति। सत्रकर्म बहुकर्तृकयज्ञकर्म तथा त्रेताधर्मः। उपलक्षणंतृतीयो धर्मोयस्येति त्रेताधर्मः वानप्रस्थः अरण्यवासी वानप्रस्थस्यएतद्विधिरुच्यते।]

---

१ (क, ख, ट, ण)।

निरस्य तु पुमाञ्छुक्रमुपस्पृश्यैव शुध्यति ॥ बैजिकादभिसंबन्धादनुरुन्ध्यादघंत्र्यहम् ॥ ६२ ॥

[जननेऽप्येवमेवस्यान्मातापित्रोस्तुसूतकम् ॥ सूतकंमातुरेवस्यादुपस्पृश्यपिताशुचिः । ।१ ॥]

[मेधातिथिः । एवमेतत्सपिण्डानांजनने यथैव दशाहादयः कल्पाः षट्कर्मादिवृत्त्यपेक्षया स्वाध्यायाल्पमहत्त्वापेक्षयाच व्यवस्थितामरणे तथैव जननेपिशौचमात्रमतिदिश्यते कालानवच्छिन्नं । सामर्थ्याच्चागृह्यमाणविशेषतया तत्संबन्धसकललाभः । कालावच्छिन्नातिदेशे तु एकेनैव मुख्यत्वाद्दशाहेन संबन्धः स्वाध्यायादिष्वपाठप्रत्यासत्या दशाहाद्यपेक्षया एकाहेनशक्येनैवच निराकांक्षीकृतत्वादन्यैस्त्र्यहादिभिर्नसंबन्धः स्यात् । तत्रेयंस्मृतिरविशेषेण वृत्तिस्वाध्यापेक्षायांव्यवस्थायांमृतसूतकयोर्विदधती जनने गुणाद्यनपेक्षया जातिमात्रे स्थाप्यमानाविरुध्येत समाचारश्च बाधितः स्यात् । नन्वेवंस्त्रीणामपि त्र्यहैकाहादयः कल्पाः सूतिकानांप्राप्नुवन्ति समाचारविरोधिनः । अत्रोच्यते । यद्ययंविकल्पःस्यात्तदैव व्यवस्थितएवासीत्कल्पः । तथाहि तुशब्दउपपन्नतरोभवति । सूतकशब्दश्च नाशौचे वर्तते । लक्षणया सूतकसंबन्ध्यशौचंलक्षयेत् । लक्षणायासाहचर्यादस्पृश्यतैव लक्षयितुंयुक्ता यदिच सर्वमाशौचमभिप्रेतंस्यादाशौचग्रहणमेवाकरिष्यत् अशौचंमातुरेवेति । अतश्चस्मृत्यन्तरे त्रिरात्रमस्पृश्यतोक्त्या इह तदभावस्तयोर्विकल्पः सूतकंमातुरेव । मातापित्रोर्मातुरेवेतिपितुर्विकल्पः उपस्पृश्यस्नात्वा शुचिर्भवतीति उपक्रममात्रमिदंवक्ष्यमाणेन श्लोकेन पितुरपित्र्यहमेव ॥ ६१ ॥]

(१) मेधातिथिः । सहेतुकंत्र्यहमुपदिशन्नुपस्पर्शनशुद्धिपूर्वोक्तामनुमन्यते । किमर्थमुच्यतइतिचेत् सरूपविधितयार्थवादार्थे नविधेयतया जर्तिलयवाग्वाजुहुयादितिवत् । निरस्यतुशुक्रं मैथुनधर्मेण संप्रयुज्य शुक्रोत्सर्गादनन्तरं उपस्पृश्य स्नात्वा शुचिर्भवति । अतोबैजिकादभिसंबन्धात् । बीजनिमित्तोबैजिकः । अभिसंबन्धःअपत्योत्पत्तिःअतस्तत्र कथंनानुरुन्ध्यान्नानुवर्तेत । अघमाशौचं त्र्यहं यादृशंच शुक्रनिरसनेन । कृतस्नानस्याशुचित्वं न तादृशमेव प्रसवे । अपि तु त्र्यहं पूर्वश्लोकार्धत्र्यहशेषतयाऽनूद्यते । अतएवो पस्पृश्येति स्नानमुच्यते । स्नानंमैथुनिनःस्मृतमितिवचनान्नाचमनं पुत्रेतु जाते तदहःस्पृश्यतैवेति केचित् । तथाच शङ्खआह । कुमारप्रसवे नाड्यामच्छिन्नायांगुडतिलहिरण्यवस्त्रप्रावरणगोधान्यप्रतिग्रहेष्वदोषस्तदहरित्येके ॥ तस्मात्सदिवसःपुण्यःपितॄणांप्रीतिवर्धनः । स्मरणाच्चैव पूर्वेषांतदहर्न प्रदुष्यतीति ॥ तथा श्राद्धमप्येके कुर्वन्तीतिच । अनेन पितुःसर्वथाशौचाभावएव । तत्रैते स्मृती पूर्ववद्वृत्तिसदसद्भावापेक्षया विकल्प्येते ॥६२॥

(२) सर्वज्ञनारायणः । निरस्य स्वस्त्रीव्यतिरिक्तस्त्रीषु प्रक्षिप्य उपस्पृश्यस्नात्वा । एतच्च शुद्धेर्हेतुमात्रम् । प्रायश्चित्तंत्वन्यदेव । एतच्च स्नानं यथोक्तंमृज्जलशौचंकृत्वा कर्तव्यम् । बैजिकादिति स्वस्त्रीव्यतिरिक्तस्त्रीषु जनितानांप्रसवमरणयोर्बीजसंबन्धात्त्र्यहमघमाशौचमनुरुन्ध्यात् । बैजिकादितिदशाहाशौचाभावार्थंबीजमात्रासंबन्धोनतु स्वभार्याद्वारापि संबन्धइतितात्पर्येणोक्तम् ॥ ६२ ॥

(३) कुल्लूकः । स्नानंमैथुनिनःस्मृतमिति मैथुने स्नानंविधास्यति । तेन मैथुनंविनाऽपि कामतोरेतःस्खलने स्नात्वा पुमाञ्छुद्धोभवति । अकामतस्तु स्वप्नादौ रेतःपाते मूत्रवद्रेतसउत्सर्गइत्यापस्तम्बोक्तेः स्नानंविनाऽपि गृहस्थस्य शुद्धिः । ब्रह्मचारिणस्त्वकामतोऽपि स्वप्ने सिक्त्वा ब्रह्मचारीत्यनेन स्नानादिना शुद्धिरुक्ता । बैजिके तु संबन्धे परपूर्वभार्यायामपत्योत्पत्तौ त्र्यहमाशौचंभवति । तथाच विष्णुः । परपूर्वभार्यासु त्रिरात्रम् । रेतःपातिनामाशौचमप्रकृतमपि जननप्रकरणे प्रसङ्गात्तदनुगुणतयोक्तम् । यत्र रेतःपातमात्रेण स्नानंतत्रापत्योत्पत्तौ त्रिरात्रमुचितम् ॥ ६२ ॥

(४) राघवानन्दः । स्नानंमैथुनिनःस्मृतमित्यृतुकालमैथुने स्नानंविधास्यति तद्दते तु कामतोरेतःस्कन्दने स्नानं-स्वप्ने तु न स्नानंगृहस्थस्यसूत्रवदितिवदन्न्यार्त्किंचिद्विधत्ते निरस्यत्विति । निरस्य मैथुनेन योनावृत्तौ नियोज्योपस्पृश्य-स्नात्वा अन्यत्रमूत्रवद्रेतउत्सर्गइत्यापस्तम्बोक्तेः । परभार्यायामपत्योत्पत्तौ त्र्यहमाशौचंस्यादित्याह बैजिकादिति । सपिण्डतादिसंबन्धासत्वेन बीजंरेतः संबन्धे हेतुर्यत्रापत्योत्पत्तौतस्मादघमशौचमनुरुंध्यात्कुर्यात्तथाच विष्णुः । पर-पूर्वासु भार्यासु त्रिरात्रंरेतःपाते तुमूत्रवदिति ॥ ६३ ॥

(५) नन्दनः । शुक्रंनिरस्य गर्भाधानंकृत्वेतियावत् । उपस्पृश्य स्नात्वा । पुमान्पिता शुचिःस्याच्छुध्यति । ग-र्भाधानंकृत्वातदानीमेव स्नातस्यापि जननाशौचसंबन्धोनभवतीत्यर्थः । सूतिकामस्पृशतोऽयंपक्षउक्तः । स्पृशतस्तु गुणव-त्तमस्याऽपि दशरात्रमेवैतदिन्यवगन्तव्यम् । स्मृत्यन्तरानुरोधात्पक्षान्तरमाह बैजिकादिति अघमाशौचम् । अनुरुन्ध्या-त्कुर्यात् ॥ ६३ ॥

(६) रामचन्द्रः । पुमान् शुक्रंनिरस्य योनौ पातयित्वा उपस्पृश्य स्नात्वा शुध्यति ऋतुशंकित्वात् । बैजिका-देवसंबन्धात् स्वस्त्रीव्यतिरिक्तस्त्रिषु जनितानांप्रजनमरणयोर्बीजसंबन्धात् त्र्यहं त्रिदिनपर्यन्तं अघं आशौचं अनुरुन्ध्यात् । बैजिकादिति दशाहाशौचाभावार्थं बीजमात्रसबन्धः । नतुस्वभार्याद्वारासंबन्धइति तात्पर्यार्थः ॥ ६३ ॥

अन्हा चैकेन राऽया च त्रिरात्रैरेव च त्रिभिः ॥ शवस्पृशोविशुध्यन्ति त्र्यहादुदकदायिनः॥६४॥

(१) मेधातिथिः । त्रयस्त्रिरात्रानवाहानि एकेनच । अन्हा एकयाच राऽया अहोरात्रः एवं दशाहोवृत्तानुरोधा-देवमुपदिष्टः । शवस्पृशः शवस्य स्नानालंकारादिकारिणः । अन्येषांस्नानमात्रंवक्ष्यति तन्निर्यापकांश्च । तथाच प्रकटी-करिष्यति प्रेताहारैःसममित्यत्र एतच्च समानोदकानां मूल्येनवा निर्हरतां । अनाथनिर्हरणे तु स्मृत्यन्तरे ॥ नतेषामशुभं-किंचिन्नाशौचंशुभकर्मणाम् । जलावगाहनात्तेषांसद्यः शौचंविधीयते ॥ यत्तु असपिण्डंद्विजमिति तत्रवै वक्ष्यामः। उदकदा-यिनः समानोदकाःतेषांच पृथक्पिण्डेचसंस्थितइति सद्यःशौचमपि वक्ष्यते । तत्र विकल्पः । सपिण्डेष्वेतदस्वाध्यायाद्य-पेक्षम् ॥ ६४ ॥

(२) सर्वज्ञनारायणः । अन्हैकेनराऽयाअहोरात्रेणेत्यर्थः । त्रिरात्रैस्त्रिभिर्नवरात्रेणेत्येवंदशभिर्दिनैः शवस्पृशोध-नाभिसंधिनाशवस्पृशोवहनादिकर्तारोविशुद्ध्यन्ति । एतदाशौचमुक्तम् । प्रायश्चित्तंतु स्मृत्यन्तरोक्तम् । उदकदायिनः समानोदकाः । समानोदकमरणे त्र्यहाच्छुध्यन्ति ॥ ६४ ॥

(३) कुल्लूकः । एकेनान्हैकया च राऽयेत्यहोरात्रेण त्रिरात्रैस्त्रिभिरितिनवाहोरात्रैर्मिलित्वा दशाहेनेतिवैदग्ध्येनो-क्तम् । ननु दशाहेनेतिवक्तव्ये किमर्थोयंवाग्विस्तरः । उच्यते ॥ बंहीयसीमपिघ्नांवा गिरंनिर्मान्ति वाग्मिनः । न चाव-श्यत्वमेतेषांलघूक्त्यैव नियम्यते ॥ वृत्तस्वाध्यायगुणयोगेन ये सपिण्डाएकाहाद्यल्पाशौचयोग्यास्ते यदि स्नेहादिना शव-स्पृशोभवन्ति तदा दशाहेनैव शुध्यन्ति उदकदायिनःपुनःसमानोदकास्त्र्यहेण । गोविन्दराजस्तु धनग्रहणपूर्वकशवनिर्हा-रकासंबन्धिब्राह्मणविषयमिदंदशाहाशौचमाह ॥ ६४ ॥

(४) राघवानन्दः । अन्हाचेति। स्वाध्यायगुणयोगिनोऽसपिण्डास्ते शवस्पृशः शवस्य स्नानालङ्कारकारिणोऽन्हाए-काहोरात्रेण हीनतराश्च त्रिरात्रैःनिर्गुणाश्च दशरात्रेण शुध्येयुरिति । उदकदायिनःसमानोदकाःत्र्यहादिति । दशरात्रैर्धनग्र-

(६४) त्रयहादुद०=त्र्यहात्तूदक ०(ख)

किंतु विशुध्यतीति प्रकृते पुनः साध्वीतिवचनादनिवृत्ते रजसि वैदिककर्माधिकारानुप्रवेशोनास्ति न पुनः स्पर्शादिनिषेधणपूर्वकशवस्पृशोऽल्पशौचयोग्याअपि शुध्येयुरिति गोविन्दः। त्रिरात्रैःत्रिभिरिति नवाहोभिःरात्र्या चेत्येकं तथाचदशरात्रयः तैः शुध्येयुरिति मेधातिथिः ॥ ६४ ॥

(५) नन्दनः। रजन्याऽन्हैवचैकेनेत्यहोरात्रस्य निर्देशः। त्रिरात्रैरेवचत्रिभिरिति नवरात्रस्य संहृत्य दशभिरहोरात्रैरितियावत्। उक्तिवैचित्र्यमिदम्। शवस्पृशश्चेद्गुणवत्तमाअपिसपिण्डादशाहेनैव शुध्यन्तीति । उदकदायिनःसमानोदकाः ॥ ६४॥

(६) रामचन्द्रः। एकेनान्हा राम्याचैकया एवमेकंदिनं त्रिरात्रैःतिसृभीरात्रिभिस्त्रिगुणितैःएवंनवभिःएवंदशदिनपर्यन्तंशवस्पृशःमौल्येन शववाहकाः विशुध्यन्ति उदकदायिनः सपिण्डाः त्र्यहाच्छुध्यन्ति ॥ ६४ ॥

गुरोः प्रेतस्यशिष्यस्तु पितृमेधंसमाचरन् ॥ प्रेतहारैःसमंतत्र दशरात्रेण शुध्यति॥६५॥

(१) मेधातिथिः। पितृमेधः चरमेष्टिः अन्येतु सर्वं कर्मैवलक्ष्यतइतिप्राहुः। तत्कुर्वन् शिष्योदशरात्रेण शुध्यति। ब्रह्मचारिणोप्ययंविधिरस्त्येव । प्रेताहारैःसमः प्रेतंहरन्ति निर्यापयन्ति यथा तेषांदशाहएवंशिष्यस्यापीत्यर्थः ॥ ६५ ॥

(२) सर्वज्ञनारायणः । गुरोराचार्यस्य सपिण्डपुत्राद्यभावे पितृमेधंस्वयंकुर्वन् दशाहमाशौचंकुर्यात्। ईदृशे चासपिण्डशिष्यकर्तृके संस्कारे ये प्रेतहाराः प्रेतवाहकास्तेपि धनाद्यभिसंधिशून्यत्वेपि तावदाशौचिनइति प्रेतहारैः सममित्यनेनोक्तम् ॥ ६५ ॥

(३) कुल्लूकः। गुरोराचार्यादेरसपिण्डस्य मृतस्य शिष्योऽन्त्येष्टिंकृत्वा प्रेतनिर्हारकैर्गुरुसपिण्डैस्तुल्योदशरात्रेण शुद्धोभवति ॥ ६५ ॥

(४) राघवानन्दः । किंच गुरोरिति। यद्यसपिण्डस्य प्रेतस्य मृतस्य पितृमेधमन्त्येष्टिंकृत्वा शिष्यः प्रेतहारैः सपिण्डैः। समं तुल्यः अतोदशरात्रेण शुध्यति ॥ ६५

(५) नन्दनः। शिष्योऽसपिण्डोऽपि प्रेताहारैः प्रेतान्नभोजिभिः सपिण्डैरितियावत्। एवंवदता गुणवत्तमानामपि प्रेताहाराणांदशाहमेवाशौचमितिसूचितम् ॥ ६५ ॥

(६) रामचन्द्रः। शिष्यःप्रेतस्य गुरोः पितृक्रियांसमाचरेत् प्रेताहारैः प्रेतवाहकैः समंमिलित्वा ॥ ६५॥

रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुध्यति॥ रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला ॥ ६६ ॥

(१) मेधातिथिः। गर्भस्रावे गर्भमासरात्रीस्त्रियाएव शुद्धिर्युक्ताइहवाक्येतस्याः श्रुतत्वात् । सपिण्डानांतुस्मृत्यन्तरसमाचारावन्वेषणीयौ। वसिष्ठेन तु सपिण्डानां त्र्यहः समाम्नातः। ऊनद्विवर्षे प्रेते गर्भपतने सपिण्डानांत्रिरात्रमशौचम्। स्रावस्तु गर्भस्य मासत्रयादूर्ध्वंप्राग्दशमान्मासात् । केचित्तु प्राक्तनमादित्याहुः । अप्राप्तकालस्य पातः स्रावउच्यते। न पुनर्द्रवरूपस्यैव । तथा गौतमेन गर्भविस्रंसने गर्भमाससमारात्रीरितिपठितम्। सप्तमास्याश्च जीवन्ति। अतः सप्तमे मासे पूर्णमाशौचं एतत्तु जीवतोजातस्य युक्तमन्यथातु गर्भमाससमाइत्येव। इह रजस्वलायारजस्युपरते स्नानेन शुद्धिराम्नातास्मृत्यन्तरे त्र्यहादूर्ध्वं तत्रैवंव्यवस्था । प्राक्त्र्यहाद्रजोनिवृत्तावपि नास्ति शुद्धिरूर्ध्वमनुपरतेपि भवति।

---

(६५) समाचरन्=समाचरत् (स्व, च)
(६५) प्रेतहारैः=प्रेताहारैः (नन्दनः)

धः । उक्तमाद्याश्चतस्रोनिन्दिताइति । रजस्वला स्त्री रजस्युपरते स्नानेन साध्वी भवति शुद्धा कर्मयोग्येत्येवंपदयोजना। स्त्रीग्रहणंवर्णमात्ररूयर्थम् । पूर्वेतु श्लोकाब्राह्मणविषयाव्याख्यातास्तदाशङ्कानिवृत्त्यर्थंस्त्रीग्रहणम् । उत्तरत्रापि यत्र विशेषप्रमाणंनास्ति तत्रापि वर्णमात्रविषयतयैवयथा नृणामकृतमुण्डानामिति ॥ ६६ ॥

(२) सर्वज्ञनारायणः । अर्वाक् षण्मासतःस्त्रीणामितिब्राह्मवचनात्षण्मासमध्यएव स्रावः तत्र मासतुल्याभिः स्रावसंबन्धिमाससमसङ्ख्याभिःस्त्री शुद्ध्यति । शुचिकर्त्राकाङ्क्षायांस्त्रीपदस्योत्तरार्धस्थस्यान्वयात् । अतएव सपिण्डान्तराणांसद्यः शौचम् । रात्रिभिरितिबहुवचनाच्चाद्यद्वितीयमासयोरपि स्रावे त्रिरात्राशौचम् । तत्रतु मासतुल्याभिरितिनान्वीयते अयोग्यत्वात् । रजस्वला तु स्त्री रजस्युपरते स्नाता सती धर्मकार्येषु शुध्यतियदि सा साध्वी भवतिमनसापि पतिं न व्यभिचरतिअन्यथात्वागामिरजःपर्यन्तमेव तस्याआशौचमित्यर्थः । रजस्युपरतइतिवचनादनुपरते रजसि चतुर्थेऽन्हि स्नातापि न धर्मकृत्ये शुध्यतीत्युक्तम् ॥ ६६ ॥

(३) कुल्लूकः । अत्र रात्रिभिरितिविधेयगामिनोबहुत्वस्य विवक्षितत्वात्तृतीयमासात्प्रभृति गर्भस्रावे गर्भमासतुल्याहोरात्रैर्विशेषाभिधानाच्चातुर्वर्ण्यस्त्री विशुध्यति । एतच्चषण्मासपर्यन्तम् । यथोक्तमादिपुराणे । षण्मासाभ्यन्तरंयावद्गर्भस्रावोभवेद्यदि । तदामाससमैस्तासांदिवसैःशुद्धिरिष्यते ॥ अतऊर्ध्वंतु जात्युक्तमाशौचंतासु विद्यते ॥ मेधातिथिगोविन्दराजादयस्त्वादिपुराणे वचनादर्शनात्सप्तमासादर्वाग्गर्भस्रावे मासतुल्याहोरात्रैःस्त्रीणांविशुद्धिरित्यतिदिशन्ति । प्रथमद्वितीयमासीयगर्भस्रावे स्त्रीणांत्रिरात्रम् । यथाह हारीतः । गर्भस्रावे स्त्रीणांत्रिरात्रंसाधीयोरजोविशेषत्वात् । पित्रादिसपिण्डानांत्वत्र सद्यःशौचम् । यथाह सुमन्तुः गर्भमासतुल्यादिवसागर्भसंस्रवणे सद्यःशौचंवा । भवति । गर्भमासतुल्याइतिस्त्रीविषयं सद्यःशौचंवेतिपित्रादिसपिण्डविषयमितिव्यवस्थितविकल्पः । रजस्वला च स्त्री रजसि निवृत्ते सति पञ्चमे दिने स्नानेनादृष्टार्थकल्पनयोग्या भवति । स्पर्शयोग्या तु त्रिरात्रव्यपगमे चतुर्थेऽहनि कृतस्नाने नैव शुद्धा भवति ॥ ६६ ॥

(४) राघवानन्दः । किंच रात्रिभिरिति । मासद्वयाभ्यन्तरे त्रिरात्रंबहुवचनवशात् तृतीयमासप्रभृति षण्मासपर्यन्तंमासतुल्याहोरात्रैःस्त्री शुध्यति अतऊर्ध्वंस्वजातिक्रमेण । सप्तमे मासे जीवेन संयुक्तोभवतीतिगर्भोपनिषच्छ्रुतेर्जीवावेशात्पूर्णाशौचम्। अतः षण्मासाभ्यन्तरंयावद्गर्भस्रावोभवेद्यदि। तदा माससमैस्तासांदिवसैःशुद्धिरिष्यते॥अतऊर्ध्वंस्वजात्युक्तमाशौचंतासु विद्यतइत्यादित्यपुराणोक्तेः। तथा गर्भमासतुल्यादिवसागर्भस्रावेसद्यःशौचंवा भवतीतिसुमन्तूक्तेः । गर्भमासतुल्येति सर्ववर्णस्त्रीसाधारणम् । सद्यइति पितृसपिण्डानामितिशेषः सपिण्डानांतु त्रिरात्रंवृत्ते गर्भपतने सपिण्डानांत्रिरात्रमाशौचमितिवसिष्ठोक्तेः । ऋतुःस्वाभाविकइत्यत्राशुद्धिरुक्ता न शुद्धिस्तत्राहरजसि उपरतेनिवृत्ते स्नानेन मैथुनयोग्या साध्वीति विशेषणात् पञ्चमेऽहनि तासामदृष्टार्थाशुद्धिः ॥ शुद्धाभर्तुश्चतुर्थेऽन्हि स्नानेनस्त्री रजस्वला । दैवे कर्मणि पित्र्ये च पञ्चमेऽहनि शुध्यतीति याज्ञवल्क्योक्तेः ॥ ६६ ॥

(५) नन्दनः । प्रथमद्वितीययोर्मासयोरार्तवंतृतीयादिषुचतुर्षुगर्भस्रावःसप्तमादिषुमासेषु प्रसवइतिप्रसिद्धम् तत्र तृतीये मासे गर्भस्रावे तिस्रोरात्रयआशौचंचतुर्थेचतस्रःपञ्चमेपञ्च षष्ठेषट्उत्तरार्धेन रजस्वलाशौचमुच्यते । रजस्युपरते त्रिरात्रेऽतीतइत्यर्थः । स्नानेनविशुध्यतीत्यनुवर्तते ॥ ६६ ॥

(६) रामचन्द्रः । गर्भमासतुल्याभिः रात्रिभिरिति बहुवचनात्प्रथमद्वितीयमासयोरपि स्रावे त्रिरात्रंस्त्रियाएवाशौचं अन्येषांतु सद्यः पुनःरजसिउपरते निवृत्ते पुनःरजोद्गमे स्नानेन साध्वीशुद्धा भवेत् । असाध्वी चेदृत्वन्तरपर्यन्तमशुद्धा स्यात् ॥ ६६ ॥

नृणामकृतचूडानांविशुद्धिर्नैशिकी स्मृता ॥ निर्वृत्तचूडकानां तु त्रिरात्राच्छुद्धिरिष्यते ॥ ६७ ॥

[प्राक्संस्कारप्रमीतानां वर्णानामविशेषतः । त्रिरात्रात्तु भवेच्छुद्धिःकन्यास्वह्नोविधीयते ॥ १ ॥]‡

[अदन्तजन्मनःसद्यआचूडान्नैशिकी स्मृता । त्रिरात्रमाव्रता देशात्दशरात्रमतःपरम् ॥ २ ॥]‡

[परपूर्वासु भार्यासु पुत्रेषु प्रकृतेषु च । मातामहे त्रिरात्रंतु एकाहंत्वसपिण्डतः ॥ ३ ॥]‡

(१) मेधातिथिः । इमाः षष्ठीः कर्तृकर्मणोः कृतीति कर्तृलक्षणाः केचिद्याचक्षते । अकृतचूडएकाहेन शुध्यति । तथाच योवस्थापेक्षोपिविकल्पइत्येकीयमतमुक्तम् । तस्यैव श्लोकस्य व्यवस्थावाक्ये इमेअन्येत्वध्याहारेण संबन्धलक्षणाआहुः । अकृतमुण्डानांमृतानांये सपिण्डास्तत्रोत्तरपक्षः । समाचाराभिमतः । स्मृत्यन्तरेसद्यः शौचमप्याप्रातंविषयस्तत्रैव दर्शितः । आदन्तजन्मनः सद्यः आचूडान्नैशिकी निवृत्तचूडकानांत्रिरात्रमिति ॥ ६७ ॥

(२) सर्वज्ञनारायणः । अकृतचूडानांमरणे नैशिकी निशाव्यापिनीएकाहोरात्रमशुद्धिरित्यर्थः । अत्र चादन्तजातमरणेपि प्रागाशौचमात्रस्योक्तत्वादेकाहापकर्षः । सद्यः शौचमेवाशौचंतच्च स्नानपर्यन्ताशौचम् । निवृत्तचूडकानां प्रागुपनयनान्मरणेत्रिरात्रंऊनद्विवार्षिकमित्यग्रे वक्ष्यमाणत्वात् कृतचूडापदंपूर्णद्विवर्षतोपलक्षणम् ॥ ६७ ॥

(३) कुल्लूकः। अकृतचूडानांबालनांमरणे सपिण्डानामहोरात्रेण शुद्धिर्भवति । कृतचूडानांतुमरणेप्रागुपनयनकालात्रिरात्रेण शुद्धिः ॥ ६७ ॥

(४) राघवानन्दः । किंच नृणामिति नैशिकी एकाहोरात्रनिर्वर्त्यायदाह याज्ञवल्क्यः ॥ आदन्तजननात्सद्यआचूडान्नैशिकी स्मृता । त्रिरात्रैमाव्रतादेशाद्दशरात्रमतःपरमिति सर्वमेतदुचितकालपरम् ॥ ६७ ॥

(५) नन्दनः । अकृतचौलानामप्राप्ततृतीयवर्षाणांषष्ठमासादूर्ध्वमरणे ज्ञातीनांशुद्धिर्नैशिकी । आशौचमेकरात्रंनिवृत्तचौलकानां प्राप्ततृतीयवर्षाणांसप्तमंवर्षात्प्राड्मरणेत्रिरात्रमाशौचम् ॥ ६७ ॥

(६) रामचन्द्रः । नृणां बालानां अकृतचूडानांनैशिकी स्मृता निवृत्तचूडकानां आव्रतादेशात् आव्रतबन्धात् त्रिरात्राच्च शुद्धिरिष्यते ॥ ६७ ॥

ऊनद्विवार्षिकं प्रेत निदध्युर्बान्धवाबहिः ॥ अलंकृत्यशुचौ भूमावस्थिसंचयनादृते ॥ ६८ ॥

(१) मेधातिथिः । ऊने असंस्कृतस्यद्वेवर्षे यस्य जातस्य उच्यते ऊनद्विवार्षिकस्तंप्रेतंबान्धवाबहिर्ग्रामंनिदध्युर्भूमौ निखातायांस्थापयेयुः । स्मृत्यन्तरे निखनेदितिपठ्यते । अलंकृत्य प्रेतालंकारैः । ऊनद्विवर्षेपि श्रूयमाणो ऽलंकारः समाचारात्कृतोपनयनादावपि विज्ञेयः । शुचौ यत्रास्थीनि भूमदेशे न सन्ति अस्थिसंचयरहितत्वेन या शुद्धा तत्र निखाय स्थाप्यः । श्मशाने किलास्थीनि संचितानि भवन्ति । अतएव तेन वचनेन ततोन्यत्र विधानमुच्यते । न पुनस्तादृशस्यास्थिसंचयोन कर्तव्यइत्येव वाक्यार्थः । अग्निसंस्काराभावादेवतदप्राप्तेः ॥ ६८ ॥

---

‡ सप्त=नव (अ) १ तिदिशंति=भिदधाति (अ)

(६७) विशुद्धि=मशुद्धि ॥ (क, ख, ग ण)

‡ (क)

(२) **सर्वज्ञनारायणः** । बहिर्ग्रामाद्भूमौ निदध्युरिति निखननमुक्तम् । अलंकृत्य स्रगादिना । अस्थिसंचयनादृते मांसापगमानन्तरमपि तन्न कार्यमित्यर्थः ॥ ६८ ॥

(३) **कुल्लूकः** । असंपूर्णद्विवर्षबालंमृतकृतचूडं माल्यादिभिरलंकृत्य ग्रामाद्बहिःकृत्वा विशुद्धायांभूमौ कालांतरे शीर्णदेहतया शक्यमस्थिसंचसनवर्जंबान्धवाः प्रक्षिपेयुः । विश्वरूपस्तु । यस्यां भूमावन्यस्यास्थिलचयनंन कृतंतस्यां निदध्युरिति व्याचष्टे ॥ ६८ ॥

(४) **राघवानन्दः** । असंपूर्णद्विवर्षस्यकृत्यमाहऊनेतिद्वाभ्यां । अलंकृत्य माल्यादिभिः । अस्थिसंचयनादृते दाहाभावादस्थिसंचयनाप्राप्तेःशुद्धायांभूमौनिक्षिपेदितिविश्वरूपः ॥ ६८ ॥

(५) **नन्दनः** । ऊनद्विवार्षिकमसंपूर्णद्वितीयवर्षम् । निदध्युर्निखनेयुः । बहिर्ग्रामसीम्नःअस्थिसंचयनादृतेअस्थिसञ्चयनरहितायांभूमावित्यर्थः ॥ ६८ ॥

(६) **रामचन्द्रः** । ऊनद्विवार्षिकं ऊने अपरिपूर्णे द्वे वर्षे यस्यासौऊन द्विवार्षिकः तंप्रेतंशुचौ भूमौ अवटंगर्तंकृत्वा गन्धमाल्यादिभिरलंकृत्य श्मशानादेर्बहिर्निदध्युः स्थापयेयुः बान्धवाः अस्थिसञ्चनादृते अस्थिसञ्चयनंन कर्तव्यम् । ब्रह्मपुराणे ॥ विप्रे द्विवर्षन्यूने तु मृते शुद्धिस्तु नैशिकी । द्व्यहा तु क्षत्रिये शुद्धिस्त्रिभिर्वैश्ये मृते सति ॥ निवृत्तचूडकेविप्रे त्रिरात्राच्छुद्धिरिष्यते । निवृत्तेक्षत्रिये षड्भिर्वैश्ये नवभिरेव च ॥ शूद्रे द्विवर्षन्यूने तु मृते शुद्धिस्तुपञ्चभिः । अतऊर्ध्वंमृते शूद्रे द्वादशाहा द्विशुध्यति ॥ षड्वर्षान्तमतीतोयःशूद्रश्चेन्म्रियतेयदि ॥ मासिकंचे त्याङ्गिरसभाषितम् ॥ ६८ ॥

नास्य कार्योऽग्निसंस्कारोन च कार्योदकक्रिया ॥ अरण्ये काष्ठवत्त्यक्त्वा क्षपेयुस्त्र्यहमेव च ॥ ६९॥

(१) **मेधातिथिः** । काष्ठवदिति निरपेक्षतामाह । श्राद्धमपि न कर्तव्यंनचोदकं उदकक्रियानिषेधेन श्राद्धनिषेधः सिद्धः अद्भाद्भिभावात् । अतः समाचारप्रसिद्धः । श्राद्धनिषेधोलिङ्गेन साधयितव्यः। अन्येतु स्मृत्यन्तरदृष्टनिखननमतिषेधार्थंवर्णयन्ति । ततश्च विकल्पः । क्षपेयुः उदास्येयुः शास्त्रचोदितंव्यापारंन कुर्यात् ॥ ६९ ॥

(२) **सर्वज्ञनारायणः** । उदकक्रिया पिण्डमप्युपलक्षयति काष्ठवदिति । यमसूक्तपाठादिस्मृत्यन्तरसिद्धमनुप्रेतस्य कार्यमपि न कर्तव्यमित्यर्थः । आरण्यदृतिचारण्यमध्यएव निखननंमुख्यं तदभावे बहिर्ग्रामादितिदर्शितम् । क्षपेयुः क्षपयेयुस्त्र्यहमाशौचेन तच्छवनिखननकारिणःसपिण्डाः इतरसपिण्डानांतु यथोक्तमेव ॥ ६९ ॥

(३) **कुल्लूकः** । अस्योनद्विवार्षिकस्याग्निसंस्कारोन कर्तव्यः । नाप्युदकक्रिया कर्तव्या । उदकदाननिषेधोऽयंश्राद्धादिसकलप्रेतकृत्यनिवृत्त्यर्थः । किंत्वरण्ये काष्ठवत्परित्यज्य काष्ठवदितिशोकाभावोऽभिहितः । यथाऽरण्ये काष्ठंपरित्यज्य शोकोन भवति । एवंत्यक्त्वा त्र्यहंक्षपेत् त्र्यहाशौचंकुर्यात् । अयंचाकृतचूडस्य त्र्यहाशौचविधिः । पूर्वोक्तैकाहाशौचविकल्पपरः सच व्यवस्थितोवृत्तस्याध्यायादियुक्तस्यैकाहः । तद्रहितस्य त्र्यहः । यद्यपि मनुना परित्यागमात्रंविहितं तथाप्यूनद्विवार्षिकंनिखनेदिति याज्ञवल्क्यवचनाद्विशुद्धभूमौ निखायैव त्यक्तव्यः ॥ ६९ ॥

(४) **राघवानन्दः** । तदेवाह नेति । अरण्ये काष्ठवदितिस्थानविकल्पउपेक्षायां दृष्टान्तोवा । ऊनद्विवर्षस्य कृतचूडस्य त्र्यहमाशौचमित्यर्थः ॥ ६९ ॥

(५) **नन्दनः** । अस्योनद्विवार्षिकस्यनिखातस्य प्रेतस्यनकेवलंनिखननमेव संस्कारः किंतु त्यागोऽप्युत्तरार्धेनोच्यते । नियमैःकालयापनंक्षपणम् । त्र्यहमाशौचवान्भवेदित्यर्थः ॥ ६९ ॥

(६) रामचन्द्रः । अस्य ऊन द्विवर्षस्य अग्निसंस्कारोन कर्तव्यः । उदकक्रिया जलाञ्जलिक्रिया न कर्तव्या । अरण्ये काष्ठवदमन्त्रपूर्वकंत्यक्त्वाग्र्यहंत्रिदिनपर्यन्नंआशौचं क्षपेरन् क्षपेयुः ॥ ६९ ॥

नात्रिवर्षस्य कर्तव्या बान्धवैरुदकक्रिया ॥ जातदन्तस्य वा कुर्युर्नाम्निवापि कृते सति ॥ ७० ॥

(१) मेधातिथिः । आत्रिवर्षस्येति आतृतीयाद्वर्षात्प्रतिषेधः न पुनश्चतुर्वर्षादौएवमर्थमेवादिशब्दंकेचित्पठन्ति । नात्रिवर्षस्य कर्तव्या त्रिवर्षादेरिति । समाचारश्चैवमेव । जातदन्तस्य वा कुर्युः उदकक्रियासाहचर्यादग्निसंस्कारोभ्यनुज्ञायते । ननुच विकल्पे कामचारः तत्र कः मयाससाध्यंचित्तक्षयकरमनुष्ठानपक्षमाश्रयेन व्यर्थस्तदुपदेशः । उच्यते । सर्वविलक्षणोयंपित्रोरधिकारः । मेतोपकारार्थमेतत्क्रियते ननैमित्तिकत्वादवश्यकर्तव्यमित्येतत्प्रागेवोक्तम् । तत्रावश्यकर्तव्यताप्रतिषेधोस्तीतोहनिश्चीयते । मेतोपकारार्थत्वमस्तीत्यभ्यनुज्ञानेन ज्ञाप्यते । तत्राकरणे नास्ति विध्यतिक्रमः । मेतोपकारस्त्वनुष्ठानाद्भवतीतिविधिप्रतिषेधयोर्नासमञ्जस्यम् ॥ ७० ॥

(२) सर्वज्ञनारायणः । नात्रिवर्षस्येति अत्रोनद्विवर्षस्योदकक्रियांनिषिद्धामनूद्य प्रेताभ्युदयार्थित्वेन सा पुनर्न विधीयते । अत्रिवर्षः अप्रविष्टतृतीयवर्षः । जातदन्तस्यवा कुर्युरिति स्त्रीविषयम् । तेन स्त्रियां जातदन्तायांमृतायां तदभ्युदयार्थित्वेउदकंकार्यम् । अनिर्दिष्टविशेषत्वाच्च नपुंसकलिङ्गेनाभिधानं शवविशेषणतयाचेति । नाम्नि वापीतिपुत्रविषयं तस्य जन्ममात्रेणातिशयितोपकारकारित्वात् । नामव्यतिरेकेणचोदकदानानुपपत्तेर्नामकरणानन्तरंप्रेताभ्युदयार्थमुदकदानम्॥७०॥

(३) कुल्लूकः । अप्राप्ततृतीयवर्षस्य पित्रादिसपिण्डैरुदकक्रिया न कर्तव्येति पूर्वत्र निषिद्धाप्युत्तरार्थमनूद्यते । जातदन्तस्य वा उदकदानंकर्तव्यं । नामकरणे वा कृते उदकक्रिया साहचर्यादग्निसंस्कारोप्यनुज्ञामात्रं । प्रेतपिण्डश्राद्धादिकंच । यद्यप्यकरणसंभवे करणं क्लेशावहं । तथापि करणाकरणयोराम्नानाज्जातदन्तकृतनाम्नोःकरणे प्रेतोपकारोभवत्यकरणे प्रत्यवायाभावइत्यवगम्यते ॥ ७० ॥

(४) राघवानन्दः । अप्राप्ततृतीयवर्षस्य जातदन्तस्य कृतनाम्नउदकक्रियास्ति । तयाचाग्निसंस्कारप्रेतश्राद्धे उपलक्षिते तेषांकरणाकरणयोराम्नातत्वात्करणे प्रेतोपकारोऽकरणे न प्रत्यवायइति भावः । तत्रोदकक्रिया अपनःशोशुचदघमित्येनेन मन्त्रेण । एवंमातामहाचार्यप्रेतानामुदकक्रिया ॥ कामोदकंसखिप्रत्तास्वस्रीयश्वशुर्त्विजम् इतियाज्ञवल्क्योक्तेः॥ ७० ॥

(५) नन्दनः । त्यागपक्षे किमुदकक्रिया कार्या नवेतिचोदनायामाह नात्रिवर्षस्येति । उत्तरार्धेनोदकक्रियाकार्येतिगृह्यतेकुर्युरुदकक्रियामितिविभक्तिविपरिणामः ॥ ७० ॥

(६) रामचन्द्रः । अत्रिवर्षस्य अपरिपूर्णत्रिवर्षस्य बान्धवैरुदकक्रिया न कर्तव्या । जातदन्तस्य स्त्रीशवस्य ॥ ७० ॥

सब्रह्मचारिण्येकाहमतीते क्षपणंस्मृतम् ॥ जन्मन्येकोदकानांतु त्रिरात्राच्छुद्धिरिष्यते ॥ ७१ ॥

(१) मेधातिथिः । सब्रह्मचारी समानचरणोऽतएकोदकाअप्यासपिण्डेभ्यःपरिगृह्यन्ते तेषामितरेतरंजन्मनि सूतके त्रिरात्रम् । सद्यःशौचमपि स्मृत्यन्तरादुदकदायिनांविकल्पितंद्रष्टव्यम् ॥ ७१ ॥

(२) सर्वज्ञनारायणः । सब्रह्मचारिणि स्वाध्ययनसमकालंस्वगुरुणोपनीताध्यापिते । एकोदकाः समानोदकाः ॥ ७१ ॥

(३) कुल्लूकः । सहाध्यायिनि मृते एकरात्रमाशौचंकतर्व्यम् । समानोदकानांपुनः पुत्रजनने सति त्रिरात्रेण शुद्धिर्भवति । त्र्यहानुदकदायिनइति मरणविषयमुक्तम् ॥ ७१ ॥

(४) राघवानन्दः । किंचसेति । सब्रह्मचारिणि सहाध्यायिनि अतीतेमृते क्षपणमशौचस्य निवृत्तिः । सपिण्डानां दशाहत्वेपि समानोदकानांसूतके तन्यूनतामाहजन्मनीति त्र्यहादुदकदायिनइति मरणेउक्तत्वात् ॥ ७१ ॥

(६) रामचन्द्रः । ब्रह्मणासहचरतीति सब्रह्मचारी सवेदाध्यायी सहाध्यायी अतीते मृते एकाहं आशौचं क्षपणं स्मृतम् जन्मन्येकोदकानांत्रिरात्राच्छुद्धिः ॥ ७१ ॥

स्त्रीणामसंस्कृतानां तु त्र्यहाच्छुध्यन्ति बान्धवाः॥ यथोक्तेनैव कल्पेन शुध्यन्ति तु सनाभयः॥७२॥

[परपूर्वासु पुत्रेषु सूतके मृतकेषु च । मातामहे त्रिरात्रंस्यादेकाहंतु सपिण्डने ॥ १ ॥] +

(१) मेधातिथिः । असंस्कृतायावाङ्मन्त्रेण प्रतिगृहीतानच विवाहितास्तासांमरणे बान्धवाःपतिपक्षास्त्रिरात्रेण सनाभयस्तु सपिण्डाःस्वपितृपक्षायथोक्तेन कल्पेन निवृत्तचौडकानामितिजातेरधिकारात्त्रिरात्रेण । अन्यैस्तूक्तंसोदर्यादशरात्रेणेति तेषांचाभिप्रायः अष्टवर्षायाःकन्यायादानंविहितं अदत्तायाश्च निवृत्तचौडकव्यपदेशाभावात्पुंसइवोपनीतस्य तदार्भकल्पान्तरस्यानाम्नानाद्दशाहएव युक्तः । अन्यैस्तु पठितम् । अहस्त्वदत्तकन्यासुबालेषुच विशोधनमिति । तत्र व्याख्यातारःपश्चाद्दशाब्ददेशीयापि याह्यदत्ता कन्या तिष्ठेत्तदहरेवाशौचम् । यतोमुख्यमाम्नानमतिक्रम्य कालक्षपणे प्रमाणाभावात् । तत्रोच्यते । बालेषुचेतिकोस्यार्थोयावताउक्तमेव योगविभागे आदन्तजन्मनःसद्यइति नचैतेनतद्बाधितुंयुक्तंसामान्यरूपत्वादस्य तस्यच विशेषव्यवस्थापनरूपत्वादतोयमेकाहःपृथगुक्तोपि आचूडादेव व्यवतिष्ठते । सामान्यस्य विशेषापेक्षत्वात्तस्मादनार्षएवायमर्धश्लोकः प्रतिपद्यते स्पर्शविषयतया नेयम् । स्पर्शप्रतिषेधोहि मृतकसूतकयोर्बालस्यापि पुंवत्प्राप्तःतदर्थमेतदुक्तंस्यात् अहस्त्वदत्तकन्यासुबालेषुचविशोधनमिति । एवंच विषयसप्तम्याश्रिताभवति साच युक्ताकारकविभक्तित्वात् । इतरथा अध्याहृत्य भावलक्षणा सप्तमी व्याख्यायेत बालेषु मृतेषु जीवतांशुद्धिरिति नच तदुस्पर्शनादाशौचमेतेनैतत्सिध्यतीति विषयान्तरे तस्य च चरितार्थत्वात् भूमौपरिवृत्तत्वात् भूमौ परिवृत्तस्य च स्पर्शनसंभवात् । अविशेषोक्तौ कुतोविशेषप्रतिपत्तिरितिचेत् तस्याचमनकल्पोविद्यतइत्येतत्संनिधौ तादृशस्यैवस्पर्शस्यप्रतीयमानत्वात् । तथाच रजस्वलास्पृष्टिनोबालस्य स्पर्शनंनेच्छन्ति । अथास्य विशेषेणस्यात् । तथा गौतमेन तदुक्तंत्वस्यांस्मृतौयुक्तमेवाधानतुमंतस्य तस्माद्युक्तैवाधानकाललक्षणा ॥ ७२ ॥

(२) सर्वज्ञनारायणः । असंस्कृतानां अपरिणीतानां वाग्दत्तानां । बान्धवाः पतिपक्षाः । यथोक्तेन त्र्यहेण कल्पेन प्रकारेण वाग्दत्तानामेव स्त्रीणां सनाभयोज्ञातयः ॥ ७२ ॥

(३) कुल्लूकः । स्त्रीणामकृतविवाहानांवाग्दत्तानांमरणेबान्धवाः भर्त्रादयस्त्र्यहेन शुध्यन्ति । वाग्दानंविना भर्तृपक्षेसंबन्धाभावात् । आश्रुतमपि वाग्दानान्तपर्यन्तंबोद्धव्यम् । सनाभयःपितृपक्षावाग्दत्तानांविवाहादर्वाङ्मरणे यथोक्तेनैव कल्पेनेत्येतच्छ्लोकपूर्वार्धोक्तेन त्रिरात्रेणैव शुध्यन्तीत्यर्थः । तदुक्तमादिपुराणे आजन्मनस्तु चूडान्तंयत्र कन्याविपद्यते । सद्यःशौचंभवेत्तत्र सर्ववर्णेषु नित्यशः ॥ ततोवाग्दानपर्यन्तंयावदेकाहमेव हि । अतःपरंप्रवृद्धानांत्रिरात्रमिति निश्चयः ॥

+ (ण)

वाग्दाने तु कृते तत्र ज्ञेयंचोभयतस्त्र्यहम् । पितुर्वरस्य च ततोदत्तानां भर्तुरेव हि ॥ स्वजात्युक्तमशौचंस्यान्मृतके सूतकेऽपि च ॥ मेधातिथिगोविन्दराजौतु यथोक्तेनैव कल्पेनेतिनृणामकृतचूडानामित्येतदुक्तेन विधिना शुध्यन्तीति व्याचक्षाते । अत्रच व्याख्याने पुत्रवत्कन्यायामपि चूडाकरणादूर्ध्वंमरणे त्र्यहाशौचंस्यात् । तच्चादिपुराणाद्यनेकवचनविरुद्धम् ॥ ७२ ॥

(४) **राघवानन्दः** । किंच स्त्रीणामिति । असंस्कृतानां केवलवाग्दत्तानां बान्धवाः भर्तुःसंबधिनः वाग्दानंविना भर्तृपक्षैःसंबन्धाभावात् इतिभावः । दत्तानांभर्तुरेवहीति भर्तृपक्षाणांकेवलंतासां । अपितुपितृपक्षाअपित्र्यहाच्छुध्यन्तीत्याह यथेति । सनाभयः सपिण्डाः यथोक्तेन त्रिरात्रेण । अवाग्दत्तानांतु अहस्त्वदत्तकन्यासु बालेषुच विशोधनमिति । अत्र अष्टवर्षान्यूनाकन्य बालश्चद्विवर्षान्यूनः ॥ ७२ ॥

(५) **नन्दनः** । असंस्कृतानामनूढानांचौलादूर्ध्वंमरणे सनाभयःसोदराःयथोक्तेन दशरात्रेण शुध्यन्ति ॥ ७२ ॥

(६) **रामचन्द्रः** । स्त्रीणांकन्यकानां असंस्कृतानांअपरिणीतानांवाग्दत्तानांबान्धवाः पतिपक्षीयाः त्र्यहाच्छुध्यन्ति तद्यथा अकृतचूडायां सद्यःशौच वाग्दानादूर्ध्वंसंस्कारात्प्राक्पतिपक्षे पितृपक्षेचत्रिरात्रमेव संस्कृतासु स्त्रीषु नाशौचंपितृपक्षे । प्रसव मरणे चेत्पितृगृहे प्रसव एकरात्रं मरणे त्रिरात्रमित्यर्थः । यथोक्तेन त्र्यहेन कल्पेन प्रकारेण सनाभयः भ्रात्रादयः शुध्यन्ति ॥ ७२ ॥

अक्षारलवणान्नाः स्युर्निमज्जेयुश्च ते त्र्यहम् ॥ मांसाशनं च नाश्नीयुः शयीरंश्च पृथक्क्षितौ ॥ ७३ ॥

(१) **मेधातिथिः** । क्षारलवणंच यवक्षारादिक्षारं लवणं सैन्धवादितन्नभुञ्जीरन् लवणविशेषणंवा क्षारग्रहणं तेनसैन्धवस्याप्रतिषेधः । निमज्जनंच नदीतडागादौचतीर्थस्नानमङ्गपरिघर्षणादिवर्जनम् । मांसाशनंच यावदाशौचं स्मृत्यन्तरात्प्रतिषिध्यते । एवंपठ्यते नस्त्रियमुपेयुर्नमार्जयेयुर्नमांसमश्नीयुः । गृह्यकारस्तु त्र्यहमनश्नन्तआसीरन् क्रीतोत्पन्नेन वा वर्तेरन्नित्याहशयीरंश्च स्थण्डिले परसंगवर्जे । सूतकेपि ब्रह्मचर्यंस्मृत्यन्तरे प्रदर्शितम् ॥ ७३ ॥

(२) **सर्वज्ञनारायणः** । क्षारः सर्जिकादिः लवणंसैन्धवादि तदन्यान्नाशनाः । निमज्जेयुरुदकदानार्थम् । तेसपिण्डाः । त्र्यहमिति दशाहस्नानाशक्तौ निमज्जनमात्रेणान्वीयते । अन्यत्तु सर्वयावद्दशाहमेव । मांसाशनं मांसरूपमशनीयम् । पृथगेकैकं क्षितौ क्षितिस्पृष्टस्रस्तरादौ न खट्वादौ ॥ ७३ ॥

(३) **कुल्लूकः** । क्षारलवणंकृत्रिमलवणंतद्रहितमन्नमश्नीयुः । त्रिरात्रंनद्यादौ स्नानमाचरेयुः । मांसंच न भक्षयेयुः । भूमौ चैकाकिनःशयनंकुर्युः ॥ ७३ ॥

(४) **राघवानन्दः** । उभयपक्षिणांनियममाह अक्षारेति । मांसाशनं मांसयुक्तमशनमन्नंपृथक्क्षितावेव । आचम्यार्कंचसलिलंगोमयंगौरसर्षपान् । प्रविशेयुःसमालभ्य कृत्वाश्मनि पदंशनैरित्यपि याज्ञवल्क्यवचनात्कार्यमुक्तरकृत्यम् ॥ ७३ ॥

(५) **नन्दनः** । शावाशौचवतान्नियमानाह अक्षारेति । निमज्जेयुश्चतेन्वहमितिपाठः । ते शावाशौचिनः ॥ ७३ ॥

(६) **रामचन्द्रः** । अक्षारलवणान्नाः अक्षारं अलवणं अन्नं येषांते अक्षारलवणाः पुरुषाः स्युः क्षारलवणसंयुक्तान्नवर्ज्याःस्युस्तेआशौचिनः । त्र्यहंनिमज्जेयुः तद्यथा दशाहस्नानाशक्तावुदकदानार्थं त्र्यहंनिमज्जन्ति कुशादिभिराच्छादितायांक्षितौपृथक्शयीरन् ॥ ७३ ॥

सन्निधावेषवै कल्पः शावाशौचस्य कीर्तितः ॥ असन्निधावयं ज्ञेयोविधिः संबन्धिबान्धवैः ॥७४॥

(१) मेधातिथिः । संनिधौ यत्रासौ मृतस्तत्र तत्संनिधीयते । अन्येतु प्रयाणकाले ये संनिहितास्तेषामेवायंविधिरित्याहुः । संबन्धिनः समानोदकाः । बान्धवाः सपिण्डाः । अन्येतु ग्रामान्तरेनगरान्तरेऽवस्थानमसंनिधानंमन्यन्ते-तेषांच ॥ ७४ ॥

(२) सर्वज्ञनारायणः । कल्पः प्रकारः । अयं वक्ष्यमाणः । संबन्धिनः सब्रह्मचारिसमानोदकाद्याः । बान्धवा-ज्ञातयः ॥ ७४ ॥

(३) कुल्लूकः । मृतस्य सन्निधावेकस्थानावस्थानादहःपरिज्ञाने शावाशौचस्य विधिरयमुक्तश्च देशान्तरावस्थानादज्ञाने सत्ययंवक्ष्यमाणोविधिःसंबन्धिबान्धवैर्ज्ञातव्यः । संबन्धिनःसपिण्डाः समानोदकाबान्धवाः ॥ ७४ ॥

(४) राघवानन्दः । वर्तिष्यमाणार्थंवृत्तंकीर्तयति । सन्निधाविति । मृतस्य सन्निधानावस्थानात्तदहःपरिज्ञान उक्तःकल्पोविधिः । देशान्तरावस्थानादज्ञाने संस्कृतानांतु संबन्धिबान्धवैः सपिण्डसमानोदकैःकार्योवक्ष्यमाणविधिरितिशेषः ॥ ७४ ॥

(५) नन्दनः । एतच्छब्देन दन्तजातइत्यारभ्योक्तस्य सकलस्याशौचकल्पस्य परामर्शः । नानान्तरोक्तस्यैव । अयंवक्ष्यमाणः । संबन्धिनोजामातृदौहित्रादयः । बान्धवाज्ञातयः ॥ ७४ ॥

(६) रामचन्द्रः । सन्निधौ समीपे मरणएवएषवैकल्पोविधिः शावाशौचस्यकीर्तितः असंनिधावयंविधिः संबन्धिबान्धवैरितिसंबन्धिभिःसमानोदकैःबान्धवैः ज्ञातिभिः ॥ ७४ ॥

विगतं तु विदेशस्थं शृणुयाद्योह्यनिर्दशम् ॥ यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत् ॥ ७५ ॥

[मासत्रये त्रिरात्रं स्यात्षण्मासे पक्षिणी तथा ॥ अहस्तु नवमादर्वागूर्ध्वं स्नानेन शुध्यति ॥१॥†]

(१) मेधातिथिः । देशोग्रामान्तरादिः पूर्ववत् । विगतं मृतं । अनिर्दशं उपलक्षणमेतद्यस्य यआशौचकालस्तच्छेषंतस्याशौचम् । पुनर्दशरात्रग्रहणंश्लोकपूरणार्थम् । उत्पत्त्यपेक्षयाजन्ममरणयोराशौचकालविकल्पेनावश्यमपेक्षा यदा सूतकाद्युत्पन्नं तदाप्रभृति दशाहादिकल्पेन यदासपिण्डैर्ज्ञातमिति । अतश्च यदातिथिना ज्ञातंमृतकादि नतु गृहस्थेन तदाप्यभोज्यमन्नंतथैवोत्पत्तिनिमित्तमात्रमिदमुभयत्रेति । दशाहमाशौचिनांततऊर्ध्वंत्रिरात्रैकाहाशौचिनांतु सचेलस्नानजासद्यः शुचिः ॥ ७५ ॥

(२) सर्वज्ञनारायणः । विगतं मृतं विदेशोयत्र मृतस्तद्दिने न श्रूयते । अनिर्दशं अनतीततन्निमित्ताशौचम । दशरात्रस्य तन्निमित्ताशौचस्य । दशरात्रपदमाशौचमात्रोपलक्षणमितिसंबन्धिबान्धवैरित्युभयप्रक्रमाद्गम्यते ॥ ७५ ॥

(३) कुल्लूकः । विगतंमृतंविदेशस्थंविप्रकृष्टदेशस्थमनिर्दशमनिर्गतदशाहाद्यशौचकालं यः शृणोति सयदवशिष्टंदशरात्राद्यशौचस्य तावत्कालमविशुद्धोभवति । विगतमित्युपलक्षणंजननेप्येतदवगन्तव्यम् । तथाचबृहस्पतिः । अन्यदेशमृतंज्ञातिंश्रुत्वा वा पुत्रजन्मच । अनिर्गते दशाहे तु शेषाहोभिर्विशुध्यति ॥ ७५ ॥

(४) राघवानन्दः । विगतं विशिष्टंपरलोकगतं । तावदवशिष्टदिवसपर्यन्तं एतदप्युपलक्षणंजननस्य । अन्यदेशमृतंज्ञातिंश्रुत्वा वा पुत्रजन्मच ॥ अनिर्गतदशाहेतुशेषाहोभिर्विशुध्यतेति बृहस्पत्युक्तेः ॥ ७५ ॥

(५) नन्दनः । विगतंमृतम् । दशरात्रग्रहणंएकाहादीनामप्युपलक्षणार्थम् ॥ ७५ ॥

---

† (ग)

(६) रामचन्द्रः। संबन्धिबान्धवैरित्युभयत्र तन्निमित्ताशौचमध्ये श्रवणे आशौचशेषेणैवशुद्धिः॥ ७५॥

अतिक्रान्ते दशाहे च त्रिरात्रमशुचिर्भवेत्॥ संवत्सरे व्यतीते तु स्पृष्ट्वैवापोविशुध्यति॥ ७६॥

(१) मेधातिथिः। यस्य यः कृतआशौचकालोदशाहादिस्तस्यतदूर्ध्वंत्रिरात्रं। यस्यतु त्र्यहैकाहादिस्तस्य ततऊर्ध्वंसवाससः स्नानमात्रमेव। तथाचोत्तरत्रवक्ष्यति। सवासाइत्यादि। संवत्सरे अतीते अतिक्रान्ते स्पृष्ट्वैवापः स्नात्वा शुध्येदित्यर्थः। हस्तेनचसपादेनेत्यादिवचनात्सर्वाङ्गस्पर्शनं प्रतीयते तच्च स्नानमेव॥ ७६॥

(२) सर्वज्ञनारायणः। अतिक्रान्ते दशाहइतितु दशाहपदंनोपलक्षकं। अतिक्रान्ते शृणुयादित्यनुषङ्गः एवंव्यतीतइत्यत्रापि। स्पृष्ट्वापः स्नात्वा। एतद्दशाहाशौचिनांसपिण्डनाम्। समानोदकादीनांत्वाशौचमध्येश्रवणे। आशौचशेषेणैवेति विगतंत्वित्यत्र सिद्धम्॥ ७६॥

(३) कुल्लूकः। नाशौचंप्रसवस्यास्ति व्यतीतेषु दिनेष्वपि॥ इतिदेवलवचनान्मरणविषयंवचनमिदम्। सपिण्डमरणे दशाहाशौचेऽतिक्रांतेत्रिरात्रमशुद्धोभवति संवत्सरे पुनरतीते स्नात्वैव विशुध्यति। एतच्चाविशेषणाभिधानाच्चातुर्वर्ण्यविषयम्॥ ७६॥

(४) राघवानन्दः। दशाहादुत्तीर्णे त्वाह अतीति॥ नाशौचंप्रसवस्यास्ति व्यतीतेषु दिनेष्वपीति देवलवचनान्मरण विषयंत्विदम्। सपिण्डमरणेदशाहोत्तरंत्रिरात्रंवर्षोत्तरंतुस्नानं। दशाहादुत्तीर्णेसंवत्सराभ्यन्तरेसमानोदकानांस्नानम्। एतच्चातुर्वर्ण्यसाधारणम्॥ ७६॥

(५) नन्दनः। दशाहेऽतिक्रान्तेवत्सरादर्वाक् त्रिरात्रमशुचिर्भवेत्। अत्रापिदशाहग्रहणमेकाहादीनामुपलक्षणम्। अपःस्पृष्ट्वैवस्नात्वैव॥ ७६॥

(६) रामचन्द्रः। दशाहादिप्राप्तमशौचस्यापवादमाह अतिक्रान्तइति। दशाहे अतिक्रान्ते त्रिरात्रमशुचिर्भवेत्। व्यतीते संवत्सरे अपःस्पृष्ट्वा स्नानेन शुध्यति। तथा देवलः॥ नाशुद्धिःप्रसवाशौचे व्यतीतेषु दिनेष्वपि। प्रोषिते कालशेषःस्यादशेषे त्र्यहमेवतु॥ संवत्सरे पूर्णे प्रेते दत्वोदकंशुचिः॥ सर्वेषां द्विजानां तत्राह॥ मासत्रये त्रिरात्रंस्यात्षण्मासे पक्षिणी तथा। अहस्तु नवमादर्वागूर्ध्वंस्नानेन शुध्यति॥ पितरौ चेन्मृतौस्यातां दूरस्थोपि हि पुत्रकः। श्रुत्वा तद्दिनमारभ्य दशाहंसूतकीभवेत्॥ ७६॥

निर्दशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च॥ सवासाजलमाप्लुत्य शुद्धोभवति मानवः॥ ७७॥

(१) मेधातिथिः। समानोदकानामयंविधिस्त्र्यहैकाहपक्षेच सपिण्डानामपि। सवासावाससा सहितः। जलमाप्लुत्य स्नात्वेत्यर्थः॥ ७७॥

(२) सर्वज्ञनारायणः। ऊर्ध्वंत्वाहनिर्दशमिति। निर्दशमतीततदाशौचकालं। ज्ञातिः समानोदकः। पुत्रस्य स्वपुत्रस्य जन्म निर्दशमेव। शुद्धोऽपगताशौचः। एवमन्येषामपि त्रिरात्रपक्षिण्याद्याशौचिनामूह्यम्। ज्ञातिपदस्यासपिण्डोपलक्षणार्थत्वात्। एवंदशाहव्यतिरिक्ताशौचनिमित्तस्य तन्मध्ये श्रवणे शेषेण शुद्धिरूर्ध्वंतु श्रवणे स्नानमात्रमिति सिद्धम्॥ ७७॥

(३) कुल्लूकः। दशाहाशौचव्यपगमे कर्मानर्हत्वलक्षणस्य त्र्यहाशौचस्योक्तत्वात्तदङ्गास्पर्शविषयम्। निर्गतदशाहंसपिण्डमरणंश्रुत्वा पुत्रस्य जन्म च सचेलंस्नात्वा स्पृश्योभवति॥ ७७॥

(४) राघवानन्दः । दशाहादुत्तीर्णेसपिण्डमरणे पुत्रजन्मनि च स्नानमात्रमितिमेधातिथिः । मानवइति विशेषणान्निर्दशमिति स्वस्वजात्युचिताशौचपरंशुद्धः स्पृश्यः । कर्माधिकारिता तु त्र्यहोत्तरमितिकुल्लूकः ॥ ७७ ॥

(५) नन्दनः । निर्दशंज्ञातिमरणंसंवत्सरादर्वागपिश्रुत्वा । अयंपूर्वोक्तस्य त्रिरात्राशौचस्य विकल्पः ॥ ७७ ॥

(६) रामचन्द्रः । मानवः समानोदकः ॥ ७७ ॥

बाले देशान्तरस्थे च पृथक्पिण्डे च संस्थिते ॥ सवासाजलमाप्लुत्य सद्यएव विशुध्यति ॥ ७८ ॥

(१) मेधातिथिः । बालेदन्तजाते सूनौ देशान्तरस्थे पृथक्पिण्डे । चसंस्थितइत्येकार्थानि पदानि । पृथक्पिण्डः समानोदकइतियावत् । तस्मिन्देशान्तरस्थे संस्थिते सद्यः शुद्धिः । संनिधौ त्र्यहात्रुदकदायिनइत्युक्तम् ॥ ७८ ॥

(२) सर्वज्ञनारायणः । अत्र बालमरणे विशेषमाह बालइति । यदि सपिण्डेदेशान्तरस्थोबालोऽकृतचौलोम्रियते यदि वाबालएव पृथक्पिण्डः समानोदकमातुलतत्तुल्यस्यालादिः सबन्धी म्रियते तदा सचैलस्नानमात्रमित्यर्थः । बालपदस्योभयत्रान्वयार्थंचकारद्वयम् ।

इहच दशाहप्रक्रमेण तदतिक्रमे संवत्सरमध्ये श्रवणे तत्त्रिभागत्र्यहाशौचविधानात्तदनुसारेणगुणोत्कर्षादिकृतचतुरहाद्याशौचान्तश्रवणेपि तत्त्रिभागेनाशौचव्यवस्थाग्राह्या तेषांदशाहाशौचस्थानपतितत्वात् ॥ ७८ ॥

(३) कुल्लूकः । बालेऽजातदन्ते मृते जातदन्ते नृणामकृतचूडानामित्येकाहोरात्राभिधानाद्देशान्तरस्थे च सपिण्डे मृतइत्येकाहाशौचविषयम् । पूर्वश्लोके दशाहाशौचिनस्त्र्यहविधानात्पृथक्पिण्डे समानोदके त्रिरात्रमुक्तम् । तत्र त्रिरात्रव्यपगमे सर्वेष्वेषु सचैलंस्नात्वा सद्योविशुद्धोभवति ॥ ७८ ॥

(४) राघवानन्दः । जातदन्तबाले देशान्तरस्थेदशाहाभ्यन्तरेपिसद्यः शौचमित्याह बालेति । पृथक्पिण्डे सपिण्डातिरिक्ते समानोदके । सन्निधौ तु त्र्यहादुदकदायिनइत्युक्तम् ॥ ७८ ॥

(५) नन्दनः । बालेऽजातदन्ते । प्रागषष्ठमासइत्यर्थः । संस्थितेमृते । सपिण्डःसद्यएवस्नानेन शुध्यति । देशान्तरस्थे च सपिण्डे पृथक्पिण्डे समानोदके च संस्थितेदशाहादूर्ध्वंश्रुत्वा सद्यः शुध्येत्स्नानेन ॥ ७८ ॥

(६) रामचन्द्रः । बालेऽजातदन्ते । अकृतचूडे देशान्तरस्थेच पुनः पृथक्पिण्डेऽस्यसपिण्डे समानोदकमातुलतत्तुल्यशालकादौ ॥ ७८ ॥

अन्तर्दशाहे स्यातां चेत्पुनर्मरणजन्मनी ॥ तावत्स्यादशुचिर्विप्रोयावत्तत्स्यादनिर्दशम् ॥ ७९ ॥

(१) मेधातिथिः । अत्रापिदशाहग्रहणमाशौचकालोपलक्षणार्थम् । यस्य यआशौचकालस्तस्मिन्ननिवृत्ते यदिपुनरन्यदाशौचनिमित्तमुत्पद्यते तदा पूर्वशेषेणैव शुद्धिर्नःत्वन्तरानिपतितंयत्तदीयादन्हःप्रभृतिदशाहादिगणना कर्तव्या । तथाच गौतमः । तच्चेदन्तःपुनरापतेत्तच्छेषेण शुध्येयुरिति । मरणजन्मनी इतिसमासे यत्नमन्तरेण क्रमाप्रतिपत्तेर्व्यन्तरेणाप्युपनिपातनप्राप्तौ समाचारात्समानजातीयएवेतिद्रष्टव्यम् । पुनःशब्दश्च समानजातीयापेक्षया समर्थतरोभवति । विप्रग्रहणमप्याशौचिनामुपलक्षणार्थं स्मृत्यन्तरेतु विहितं रात्रिशेषे द्वाभ्यांप्रभाते तिसृभिरिति । एतस्य ब्राह्मणस्य प्रेतस्पर्शे दशरात्रमाशौचमिति । प्रकृत्य नचेदन्तरा म्रियेत जायेत वा शिष्टैरेव दिवसैःशुद्ध्येतेतीयंस्मृतिः समानजातीयासमानजातीयभेदंनानुमन्यते ॥ ७९ ॥

(२) सर्वज्ञनारायणः। अन्तर्दशाहे पुनर्मरणमेकं दशाहाशौचमध्ये तादृग्मरणानन्तरं पुनर्जननंतु तादृग्जनने जननान्तरं तद्यदि पूर्वाशौचदशमदिनात्प्राक्पतेत्तदा यावत्पूर्वाशौचमनिर्दशमनतीतं तावदेवाशुचिः। पुनर्मरणं पुनर्जन्मचपुन र्मरणजन्मनी। अत्रापिदशाहपदंसंपूर्णशौचोपलक्षणं तेन क्षत्रियादीनामपिस्वशावाशौचमादायैवमेव व्यवस्था। किंचात्र सर्वत्र विष्ण्वादिस्मृतिदर्शनात्पूर्वाशौचशेषदिनआशौचान्तरपाते दशाहोर्ध्वमपि दिनद्वयमाशौचं तद्दिवसीयाष्टमयामे त्वाशौचान्तरपाते दिनत्रयमिति प्रपञ्चितंचैतच्छुद्धिदीपिकायाम् विस्तरभयान्नात्र लिख्यते ॥ ७९ ॥

(३) कुल्लूकः। दशाहादिमध्ये यदि पुनर्मरणे मरणंजनने जननंस्यात्पुनःशब्दात्सजातीयावगमात् तदातावत्काल-मेव विप्रादिरशुद्धःस्यात्। यावत्पूर्वजातदशाहाद्यशौचंनापगतंस्यात्तावत्पूर्वाशौचव्यपगमेनैव द्वितीयेऽपि मृतके सूतके च-शुद्धिरित्यर्थः ॥ ७९ ॥

(४) राघवानन्दः। किंच दशाहादिमध्ये यदि मरणंजननंतदा पूर्वाशौचनिवृत्तावनयोर्निवृत्तिरित्याह अंतर्दशाहेति। तत्पूर्वाशौचं अनिर्दशंयावत्तावद्विप्रोऽशुचिः स्यादित्यन्वयः। विप्रपदंचातुर्वर्ण्यपरम्॥ अन्तराजन्ममरणे शेषाहोभिर्विशुध्य-तीति याज्ञवल्क्योक्तेः ॥ ७९ ॥

(५) नन्दनः। तत्पूर्वाशौचम् ॥ ७९ ॥

(६) रामचन्द्रः। पुनर्दशाहाद्याशौचप्राप्तौ तदपवादमाह अन्तरिति। अन्तर्दशाहेमरणजन्मनीमरणे स्यातांचेत् यावद-निर्दशंस्यातावद्विप्रोऽशुचिःस्यात्। जनने मरणे जाते पूर्वाशौचावशिष्टैरहोभिर्नविशुध्यति। उशनाअप्याह ॥ स्वल्पाशौचस्य मध्ये तु दीर्घाशौचंभवेद्यदि। न पूर्वेणैव शुद्धिःस्यात्सकालेनैव शुध्यति ॥ तथा अङ्गिराअप्याह ॥ सूतके मृतकंचेत्स्या-न्मृतके त्वथ सूतकम्। तत्राधिकृत्य मृतकंशौचंकुर्यान्न सौतकं ॥ षट्त्रिंशन्मतेपि ॥ शावाशौचे समुत्पन्ने सूतकंतु यदाभ-वेत्। शावेन शुध्यते सूतिर्नसूतिःशावशोधिनी ॥ यदि स्यात्सूतके सूतिर्मरणे वा मृतिर्भवेत्। शेषेणैवभवेच्छुद्धिरहःशेषे त्रिरात्रिकमिति ॥ अपवादमाह ॥ मातर्यग्रेप्रमीतायामशुद्धोम्रियते पिता। पितुःशेषेण शुद्धिःस्यान्मातुर्मातृकपक्षिणी ॥ कौशिकः ॥ पितुर्दशाहमध्ये तु मातुश्चेन्मरणंयदि। न तिलोदकादिकंकर्म दाहमन्त्राहुतिंविना ॥ पितृकर्म समाप्याथ मा-त्राशौचंच पक्षिणीम्। मातुःक्रियांततःकुर्यात्तिलाञ्जल्यादिकंच यत् ॥ पितुराशौचंसमाप्य सपिण्डीकरणान्तंकृत्वा पश्चा-न्मातुः पक्षिणी पक्षिणीमध्ये सर्वाःक्रियाः कार्याः। अथवा ॥ आद्यंहिषोडशश्राद्धंसपिण्डीकरणान्न हि। मातुः ततःकुर्या-त्पितुः पुत्रः षोडशंवा सपिण्डनम्। अथैकस्मिन्दिने चाथ सपिण्डीकरणंतयोरिति ॥ ७९ ॥

त्रिरात्रमाहुराशौचमाचार्ये संस्थिते सति ॥ तस्य पुत्रे च पत्न्यांच दिवारात्रमिति स्थितिः॥८०॥

(१) मेधातिथिः। आचार्यउपनेता तस्मिन्संस्थिते त्रिरात्रंशिष्यस्य तस्याचार्यस्य पुत्रे पत्न्यांच संस्थितायाम-होरात्रम् ॥ ८० ॥

(२) सर्वज्ञनारायणः। आचार्ये उपनीयाध्यापके ॥ ८० ॥

(३) कुल्लूकः। आचार्ये मृते सति शिष्यस्य त्रिरात्रमाशौचंवदन्ति। तत्पुत्रपत्न्योश्च मृतयोरहोरात्रमित्येषा शा-स्त्रमर्यादा ॥ ८० ॥

(४) राघवानन्दः। आचार्येउपनेतरि। ज्ञातिभिन्ने त्रिरात्रंव्याप्याशौचंशिष्यस्येत्याहुः ॥ ८० ॥

(६) रामचन्द्रः। आचार्ये संस्थिते मृते त्रिरात्रमाशौचं। आचार्यपुत्रे आचार्यपत्न्यांवा मृते दिवारात्रं अहोरात्र-मित्यर्थः ॥ ८० ॥

श्रोत्रिये तूपसंपन्ने त्रिरात्रमशुचिर्भवेत् ॥ मातुले पक्षिणीं रात्रिं शिष्यर्त्विग्बान्धवेषु च ॥ ८१ ॥

(१) **मेधातिथिः**। वेदशाखाध्यायी श्रोत्रियः। उपसंपन्नः मैत्र्या प्रयोजनेन वा केन चित्संगतः शीलेन युक्तो-वा। पूर्वेतु सब्रह्मचारिण्येकाहमगृहीतवेदे दृष्टम्। अभिधानकोशे तु उपसंपन्नोमृतपर्यायः। बहुकालत्वादाशौचस्य पूर्वेत्र व्याख्याज्यायसी। अन्येतु श्रोत्रिये मातुले त्रिरात्रमित्येव संबध्नन्ति पक्षिणींरात्रिमिति शिष्यादिभिः। बान्धवाः शालकमातृष्वस्रेयादयः। यदातु मातुले पक्षिणीमितिसंबन्धस्तदा मातुलबान्धवत्वादेव सिद्धा पक्षिणी पुनर्वचनंनित्यार्थं तेनान्येषु बान्धवेषु यथाकामम् ॥ ८१ ॥

(२) **सर्वज्ञनारायणः**। उपसंपन्ने प्रातिविश्ये श्रोत्रिये मृते। पक्षिणीं पक्षाविव दिनद्वयेनोभयतोयुक्तांरात्रिम्। शिष्ये मृते आचार्यस्य पक्षिणी। आगामिवर्तमानाहर्युक्तायांनिशि पक्षिणीति मालाकारः। एवमृत्विजि याज्यस्य तथा बान्धवेष्वात्मबन्धुषु मातुलपितृष्वसृमातृष्वसृसुतेषु ॥ ८१ ॥

(३) **कुल्लूकः**। वेदशाखाध्यायिनि उपसंपन्ने मैत्रादिना तत्समीपवर्तिनि तद्गृहवासिनीत्यर्थः। तस्मिन्मृते त्रिरात्रेण शुद्धोभवति। मातुलऋत्विक्शिष्यादिषु पक्षिणीरात्रिंव्याप्याशौचं द्वेअहनी पूर्वोत्तरे पक्षाविव यस्याःसा पक्षिणी ॥ ८१ ॥

(४) **राघवानन्दः**। किंच श्रोत्रियइति। उपसंपन्ने मैत्रादिना समीपवर्तिनि स्वशाखाध्यायिनि वा। पक्षिणी पक्षाविवाहनी यस्यादिवसद्वयसंदर्शिनीरात्रिस्तांबान्धवेषुपैतृष्वस्रीयादिषु ॥ ८१ ॥

(५) **नन्दनः**। उपसंपन्नः स्वगृहेवासी। संस्थितइत्यनुषङ्गः। बान्धवा मित्राणि ॥ ८१ ॥

(६) **रामचन्द्रः**। श्रोत्रिये प्रातिवेश्ये स्वगृहपार्श्ववर्तिनि साङ्गवेदाध्येतरि उपसंपन्नेमृते त्रिरात्रमशुचिः। मातुले पक्षिणीं रात्रिंच पुनः शिष्यर्त्विग्बान्धवेषु पितृष्वस्रादिपुत्रादिषु पक्षिणीम् ॥ ८१ ॥

प्रेते राजनि सज्योतिर्यस्य स्याद्विषये स्थितः ॥ अश्रोत्रिये त्वहः कृत्स्नमनूचाने तथा गुरौ ॥ ८२ ॥

(१) **मेधातिथिः**। राजशब्दोयमभिषेकादिगुणयोगिनि वर्णमात्रे लक्षणया वर्तते यतआह। यस्यस्याद्विषयेस्थितः। जातिविशेषावच्छिन्नविषयेश्वरवचनत्वे लक्षणा नच शब्दार्थः। सज्योतिः सह ज्योतिषा वर्तते दिवा मृते दिवैव रात्रौतु तन्नास्ति। एवंरात्रौ रात्रिरेव नाहः इदमेव ज्ञापकमन्यत्र रात्रिग्रहणेहर्ग्रहणेप्यहोरात्रप्रतिपत्तेः। यथा रात्रिभिर्मासतुल्याभिरुयहमेकाहमिति। अन्हाचैकेनेत्यत्र तु रात्रिग्रहणंपादपूरणार्थं रात्रावग्निर्ज्योतिः। एवंह्यग्निहोत्रब्राह्मणे अग्निनावै तेजसातेजस्विन्यादित्येन तेजसा भवति। अश्रोत्रियेऽवेदाध्यायिनि अनूचाने कृत्स्नमहः। रात्रौनभवत्येव उत्पन्नेऽपि रात्रौ निमित्ते कथंपुनरश्रोत्रियेनूचाने एवंहि स्मर्यते प्रवरे स्वाङ्गेधीतीति सत्यं प्रवक्ताप्यनूचानउच्यते। तेनैवंकथंचिदङ्गादिग्रन्थार्थान्यः प्रवक्ति तस्मिन्नयमहर्विधिः। उपसन्नेवा उपसन्ने च गुरौ पूज्यत्वेन मुख्येआचार्येवा विध्यन्तरभावात् केचित्तु अश्रोत्रियेत्वित्यत्र नञंसंबध्नन्ति इह नञःप्रश्लेषेण योन्येषामुपाध्यायस्तस्य च न कश्चित्तत्रेमंविधिमाचक्षते ॥ ८२ ॥

(२) **सर्वज्ञनारायणः**। राजन्ये क्षत्रिये स्वनिवासदेशाधिपतौ मृते सज्योतिः सूर्यनक्षत्रयोरन्यतरेण येनोप-

---

८२ यस्य स्याद्विषये स्थितः=यस्य यद्विषये स्थितिः (ख)

=यस्य स्याद्विषये स्थितिः (घ, च,)। (ख) चिन्हितपुस्तके टीकायामपिएवमेव।

लक्षिते काले निमित्तोत्पत्तिस्तज्ज्योतिरवस्थानपर्यन्तम् अश्रोत्रिये उपसन्नइति व्यवहितेनान्वयः तेन श्रोत्रिये प्रातिवेश्ये मृते एकरात्रमित्यर्थः। अनूचाने साङ्गवेदाध्येतरि गुरौ वेदार्थव्याख्यातरि ॥ ८२ ॥

(३) **कुल्लूकः**। यस्य देशेब्राह्मणादिःस्थितःतस्मिन्राजनि कृताभिषेके क्षत्रिये मृते सज्योतिराशौचंस्यात्। सह ज्योतिषा वर्ततइति सज्योतिः। यदि दिवा तदा यावत्सूर्यज्योतिस्तावदाशौचं। यदि रात्रौ मृतस्तदा यावत्तारकाज्योतिस्तावदाशौचम्। श्रोत्रिये त्रिरात्रमुक्तम्। अश्रोत्रिये पुनस्तद्गृहे मृते कृत्स्नंदिनमात्रमाशौचं। नतु रात्रावपि। रात्रौमृते-रात्रावेवेत्यवगन्तव्यम्। साङ्गवेदाध्यायिनि स्वल्पंवा बहु वा यस्येत्येतन्निर्दिष्टे गुरावप्यहर्मात्रमेव ॥ ८२ ॥

(४) **राघवानन्दः**। राजादित्रयमरणे आशौचमाह प्रेतइति। विषये देशेइति लिङ्गात्प्रजापालनकर्तरि चातुर्वर्ण्येन ज्योतिर्मरणावधि यावत्सूर्योनक्षत्रंवा परेद्युस्तावदाशौचं अश्रोत्रिये संपन्ने कृत्स्नमित्यहोरात्रम्। अनूचाने साङ्गवेदाध्यायिनि गुरौ वेदातिरिक्ते अल्पंवा बहुवायस्य श्रुतस्योपकरोतियइत्युक्तलक्षणे ॥ ८२ ॥

(५) **नन्दनः**। यस्य राज्ञोविषये देशेस्थितिस्तस्मिन्राजनि प्रेते स्वस्य सज्योतिर्ज्योतिःसहितमाशौचम्। दिवाचेज्ज्योतिःशब्दः सूर्यवचनः नक्तंचेन्नक्षत्रवचनः। अश्रोत्रियउपसंपन्ने श्रोत्रियेऽगुरावनुपसंपन्नेऽनूचाने चैकाहम् ॥ ८२ ॥

(६) **रामचन्द्रः**। राजनि प्रेते सति सज्योतिः सूर्यनक्षत्रयोरन्यतरेणयेनोपलक्षिते काले निमित्तोत्पत्तिस्तज्ज्योतिरवस्थानपर्यन्तं। यस्य स्याद्विषये स्थितिः यस्य विषये देशे स्थितिः। अश्रोत्रिये मृतेऽहःकृत्स्नं। समग्रं अनूचाने साङ्गवेदाध्येतरि तथा गुरौ वेदशास्त्रार्थव्याख्यातरि मृते अहः कृत्स्नंआशौचम् ॥ ८२ ॥

शुध्येद्विप्रोदशाहेन द्वादशाहेन भूमिपः॥ वैश्यः पञ्चदशाहेन शूद्रोमासेन शुध्यति ॥ ८३ ॥

[क्षत्रविट्शूद्रदायादास्युश्चेद्विप्रस्य बान्धवाः। तेषामशौचं विप्रस्य दशाहाच्छुद्धिरिष्यते ॥ १ ॥]§

राजन्यवैश्ययोश्चैवं हीनयोनिषु बन्धुषु। स्वमेव शौचं कुर्वीत विशुद्ध्यर्थमिति स्थितिः ॥ २ ॥‡

विप्रः शुध्येद्दशाहेन जन्महानौ स्वयोनिषु। षड्भिस्त्रिभिरथैकेन क्षत्रविट्शूद्रयोनिषु ॥ ३ ॥‡

सर्वेचोत्तमवर्णास्तु शौचं कुर्युरतन्द्रिताः। तद्वर्णं विधिदृष्टेन स्वं तु शौचं स्वयोनिषु ॥ ४ ॥‡]

(१) **मेधातिथिः**। क्षत्रियादीनांप्रागुक्तवृत्ताद्यपेक्षरूयहचतुरहादिकल्पव्यावृत्त्यर्थमिदम्। ब्राह्मणे दशाहस्त्वनूद्यतएव। अत्र त्विदंवाक्यंकेन क्षत्रियादीनां द्वादशाहेन नियतकालप्राप्तिर्येन कल्पान्तरव्यावृत्त्यर्थतावगम्यते। इयमेवह्येषा नियत्कालस्य प्रापकंसत्यांस्मस्तत्र दशाहोयमाशौचकालस्तदुपलक्षणार्थो विज्ञायते। ननुच सत्यप्यांस्मस्तस्योपलक्षणार्थता सत्यपि चातुर्वर्ण्याधिकारे यस्यैव दशाहउक्तस्तस्यैवेतरेकल्पाइति। स्मृत्यन्तरेच ब्राह्मणविवक्षयैवोक्तम्। एकाहाद्ब्राह्मणस्यस्यात्स्वाध्यायेत्यादि। तेषांतु स्मृत्यन्तरे यानि कल्पान्तराण्याम्नातानि विकल्पन्ते। एकादशे आशौचकालः कश्चिद्विवरणकारआह। शुध्येद्विप्रोदशाहेनेति अत्राहर्ग्रहणंविवक्षितं तेन दशम्यांरात्रौ नास्त्याशौचं। ततः पूर्वेद्युर्निमन्त्रणादि युक्तं। अग्निचाधास्यतः पौर्वाह्णिकजागरणादिनाशौचउपक्रान्तंभविष्यति। तदयुक्तं अहर्विवक्षायामाद्यास्वपि रात्रिषुनस्यादाशौचम्। अथ दशाहंशावमिति एतस्मात्तत्र भविष्यति। अत्राविवक्षायांकिंप्रमाणं तस्मादहःशब्दोऽयमहोरात्रवचनइतिप्रदर्शितम्। तथाच पूर्वश्लोके ऽहः कृत्स्नमिति रात्रिनिवृत्त्यर्थंकृत्स्नग्रहणम् ॥ ८३ ॥

§ द, इ, ‡ (अ, इ) चिन्हितपुस्तकेचत्वारएव।

(२) सर्वज्ञनारायणः । दशाहस्थाने क्षत्रियादिषु विशेषाभिधानार्थं विप्रसंबन्धेन विहितंदशाहमनूद्य विशेषमाह शुध्येद्विप्रइति ॥ ८३ ॥

(३) कुल्लूकः । उपनीतसपिण्डमरणे संपूर्णकालीनजनने च वृत्तस्वाध्यायादिरहितब्राह्मणोदशाहेन शुद्धोभवति। क्षत्रियोद्वादशाहेन वैश्यःपञ्चदशाहेन । शूद्रोमासेन तस्य चोपनयनस्थाने विवाहः ॥ ८३ ॥

(४) राघवानन्दः । संप्रति क्षत्रियादित्रयस्याशौचमाह शुध्येदिति । दशाहेन निर्गुणविप्रःशुध्येत् । इतिद्वादशाहादिना शुध्येयुरित्यन्वयः । नैतेषु गुणवदगुणवत्त्वापेक्षा ॥ ८३ ॥

(५) नन्दनः । अथशावाशौचयोर्वर्णविशेषात्कालविशेषमाह शुध्येदिति ॥ ८३ ॥

(६) रामचन्द्रः । पूर्णाशौचमित्यर्थः ॥ ८३ ॥

न वर्धयेदघाहानि प्रत्यूहेन्नाग्निषु क्रियाः ॥ न च तत्कर्म कुर्वाणः सनाभ्योऽप्यशुचिर्भवेत् ॥८४॥

(१) मेधातिथिः । यस्यैषाबुद्धिः । यदुक्ताख्यहादयःकल्पास्तुल्यंदशाहेन विकल्प्यन्ते । न वृत्तादिव्यवस्थयेति ततश्चिरतरकालमन्यस्यसंभवे किमित्येकाहपक्षंनित्यस्वाध्यायाक्लेशकरंप्रतिपत्स्ये । दशाहमपाश्रयामि । निष्कर्मसुखमासिष्यइतितंप्रति सौहार्देन सा व्यवस्था स्पष्टीक्रियते । नैते तुल्याअपितु व्यवस्थिताएव । व्यवस्था च प्राग्दर्शिता । अन्यथा यस्याशौचकालोविहितस्तस्य ततःकालादधिकस्य कुतोवृद्धिप्राप्तिः । येनैवमर्थवत्स्याद्विस्पष्टार्थत्वे कोदोषः । अन्येत्वाहुरतीतेष्वप्यहःसु यावत्स्नानादिक्रियानकृतातावन्नैव शुद्धिः विप्रःशुध्यत्यपइत्यादि वक्ष्यतितत्राशुचित्वादनुष्ठानेन दुष्यामीति स्नानादिषु शुद्धये न प्रवर्तते तत्रैवमुच्यते न वर्धयेन्नानीतेष्वहःसुबाह्याशौचेविलम्बितव्यम । येत्वहःशब्दादशमस्यान्होया रात्रिस्तस्यामाशौचं न भवतीति ते न सम्यङ्मन्यन्तइत्युक्तम । तथाच गौतमः । आशौचमध्यआशौचान्तरउत्पन्ने तच्छेषेण शुद्धिरित्युक्ता एकस्यांरात्रौ शेषायां तयैव शुद्धिंमन्यमानआह रात्रिशेषे द्वाभ्यामिति । प्रत्यूहेन्नाग्निषु क्रियाः अशुचित्वात्सर्वश्रौतस्मार्तक्रियानिवृत्तौ प्राप्तायामिदमुच्यते । अग्निषुयाःक्रियाः सायंहोमाद्यास्तान प्रत्यूहेन्न प्रत्यस्येत् । प्रत्यूहोनिर्हासअननुष्ठानं। नच स्वयंकुर्यादतआह नच तत्कर्मकुर्वाणःसनाभ्योपीति । सनाभ्योपिनाशुचिःस्यात्किंपुनरन्यस्तथा गृह्यनित्यानिनिवर्तेरन्वैतानवर्जं शालाग्नौचैकइत्युक्ता आह अन्यएतानि कुर्युरिति । नच यदग्न्याधानंहोममात्रमेवक्रियते किंतर्हि साङ्गप्रयोगस्तत्रैव कर्तुर्नरस्य संभवात्प्रधानहोमस्यतु द्रव्यत्यागरूपत्वात्स्वयकर्तृतेव । अतोहोमवैश्वदेवदर्शपूर्णमासाद्यानिवर्तन्ते । अन्येषांतु जपसंध्योपासनादीनांनिवृत्तिर्नदर्शिता तानिचानित्यानि अतोअन्येषामेवाभ्यनुज्ञानं यतः स्मृत्यन्तरे प्रतिषिद्धं होमस्वाध्यायौ निवर्ततइति । अतोनित्यकाम्यभेदेन व्यवस्था । काम्यंतु नैव कर्तव्यमशुचित्वादधिकारापगमात् । ननुच नित्येष्वपि नैवाशुचेरधिकारः ॥ नचशौचमङ्गंयदि विगुणंनित्यमनुष्ठीयते नकाम्यमित्युच्यते अथास्माद्वचनाद्भवति । मेवं । इहयदपि मानंतदस्यान्यएतानि कुर्युरितिपरकर्तृकत्वमभ्यनुज्ञायते तच्चविगुणत्वान्नित्येषूपपद्यते न काम्येषुवैश्वदेवे तु विवदन्तेस्मृत्यन्तरंचोदाहरन्ति ॥ होमंतत्र न कुर्वीतशुष्कधान्यफलैरपि । पञ्चयविधानंतु न कुर्यान्मृत्युजन्मनोः ॥ अतःसन्ध्याहोमौ दर्शपूर्णमासौ सांवत्सरिकंचाश्वयुज्यादिकर्तव्यम । उपाकरणंतु नक्षत्र अयमेव न पौर्णमास्याश्रयम ॥ ८४ ॥

(२) सर्वज्ञनारायणः । नवर्धयेदिति । निःकर्मतासुखाभिसंधिना गुणवत्तया चतुरहाद्याशौचाहीन दशाहादिपरिग्रहंकुर्यादित्यर्थः । प्रत्यूहेद्विघ्नताःकुर्यात् । अग्निषु श्रौतेषु होमादि क्रियानित्याः । तच्छ्रौताग्निसंबन्धि कर्मसनाभ्यःसपिण्डोभ्योपि यःसाग्निःसोपि स्वतोहोमोसंभवःस्याग्निषु होमंकुर्वाणोनाशुचिःकिमुत स्वयमित्यर्थः ॥ ८४ ॥

(३) कुल्लूकः । यस्य तु वृत्तस्वाध्यायाद्यपेक्षया पूर्वमर्वाक्संचयनादद्स्थामित्याद्याशौचसंकोचउक्तःसनिष्कर्मासुखमासिष्यइतिबुध्यानाशौचदिनानि दशाहादिरूपतया वर्धयेत् । संकुचिताशौचदिनेष्वपि । अग्निष्विति बहुवचनाच्छ्रौताग्निष्वग्निहोत्रहोमान्न विघातयेत् । स्वयंकुर्यादशक्तौ वा पुत्रादीन्कारयेत् । अत्रैव हेतुमाह । यस्मात्तत्कर्माग्निहोत्ररूपंकुर्वाणः पुत्रादिः सपिण्डोनाशुचिर्भवति । तदाह पारस्करः नित्यानि विनिवर्तन्ते वैतानवर्जम् । वैतानंश्रौतोहोमः गार्हपत्यकुण्डस्थानग्नीनाहवनीयादिकुण्डेषु वितत्य क्रियतइति । तथाच शङ्खलिखितौ अग्निहोत्रार्थंस्नानोपस्पर्शनाच्छुचिः । जाबालोऽप्याह ॥ जन्महानौ वितानस्य कर्मलोपोन विद्यते । शालाग्नौ केवलोहोमः कार्यएवान्यगोत्रजैः॥ छन्दोगपरिशिष्टमपि । मृतके कर्मणांत्यागः संध्यादीनांविधीयते । होमः श्रौते तु कर्तव्यः शुष्कान्नेनापि वा फलैः ॥ तस्मादेकाहव्यहाद्याशौचसंकोचे संध्यादीनामेव परित्यागोनतु श्रौतहोमस्य । एकाहव्यहाद्यपगमे तु संध्यापञ्चमहायज्ञादिसर्वमेवानुष्ठेयम् । अतोयन्मेधातिथिगोविन्दराजाभ्यामन्यथाप्यभिधायि एकाहव्यहाद्यशौचसंकोचोऽयंहोमस्वाध्यायमात्रविषयः संध्योपासनादिकंतु तेनाऽपि दशाहमेव न कर्तव्यमिततिन्निष्प्रमाणकम् । यत्तु गौतमेनराज्ञांच कर्मविरोधाद्ब्राह्मणस्य स्वाध्यायानिवृत्त्यर्थं । याज्ञवल्क्येन च ऋत्विजांदीक्षितानांचेत्यादिना सद्यः शौचमुक्तं तत्सर्वेषामेव दशाहाद्यशौचिनामपि तत्तत्कर्मविषयम् । यानि तूभयत्र दशाहानि कुलस्यान्नंन भुञ्जीतेत्यादीनि दशाहंतत्तत्कर्मनिषेधकानि वचनानि तानि दशाहाशौचविषयाणीति न कश्चिद्विरोधः । तस्माद्धोमस्वाध्यायमात्रार्थंसगुणेऽशौचलाघवंन संध्योपासनार्थमितीदंनिष्प्रमाणम् ॥ ८४ ॥

(४) राघवानन्दः । अर्वाक्संचयनादित्यादिना गुणवदगुणवत्सु संकुचिताशौचमालस्यान्नवर्धयेदित्याह नवर्धयेदिति । संकुचिताशौचेपि कुण्डान्तरेष्वग्नीन्समूहमानोहोमकरणेनाशुचिःस्यादित्याह प्रत्यूहेदिति । प्रत्यूहेन्नविघातयेत् तदुक्तं । छन्दोगपरिशिष्टे सूतके कर्मणांत्यागःसन्ध्यादीनांविधीयते । होमःश्रौते तु कर्तव्यः शुष्कान्नेनापि वा फलैरिति ॥ सायंप्रातर्होममात्रं नतुवैश्वदेवदर्शादिकं होमस्वाध्यायादि वर्ततइतिकाम्यपरं सूतकंमृतकोपलक्षणं ॥ जन्महानौ वितानस्य कर्मत्यागोन विद्यते इतिजाबालोक्तेः । हानिर्मरणं वितानस्य श्रौतस्य । सनाभ्यः पुत्रादिःशुचिरिति कैमुत्योक्तेः ॥८४ ॥

(५) नन्दनः । श्रौतस्मार्तकर्मनिरतैर्लघुरेवाशौचकल्पआश्रयणीयोन गुरुरित्याह नेति । लघुकल्पसंभवे गुरुकल्पाश्रयेणाघवानघाहानि न वर्धयेत् । लघुकल्पमाश्रितोऽप्यग्निषु क्रियान प्रत्यूहेन्न विहन्यात् । तत्कर्म अग्निकर्म । सनाभ्यः सोदरः । अग्निशब्दोऽयंवैतानिकविषयोबहुवचनादितिकेचित् ॥ ८४ ॥

(६) रामचन्द्रः । अघाहानि अघस्य आशौचस्य अहानि दिनानि न वर्धयेत् । अग्निषु क्रियानप्रत्यूहे न्न हन्यात् विघ्नं कुर्यात् । विघ्नोन्तरायःप्रत्यूहइत्यमरः । हावयेन्न तु हापयेत् । च पुनः तत्कर्म श्रौताग्निकर्म कुर्वाणः एतेन कर्मणा सनाभ्यःसगोत्रीनाशुचिर्भवेत् ॥ ८४ ॥

दिवाकीर्तिमुदक्यांच पतितं सूतिकां तथा ॥ शवंतत्स्पृष्टिनंचैव स्पृष्ट्वा स्नानेन शुध्यति ॥ ८५॥

(१) मेधातिथिः दिवाकीर्तिश्चाण्डालः अत्यन्ताशुचिसाहचर्याद्भारतेच प्रयोगदर्शनान्मार्जारमूषिकसंवादे तस्मिन्नपिचकालेभूद्दिवाकीर्तिभयादितइति । न नापितस्तस्य स्पृश्यत्वात् भोज्यान्नत्वाच्च । यत्तु श्मश्रुकर्मणि तस्येदंस्नानमित्याहुस्तदपि सिद्धत्वादवाच्यं आवःश्यंश्मश्रुकर्माणि कारयतोरोमाणि गात्राणि स्पृशन्ति तानि शरीरच्युतान्यशुद्धानीति सिद्धंस्नानम् । तत्स्पृष्टिनं तस्यस्पृष्टं तत्स्पृष्टं तदस्यास्तीति तत्स्पृष्टी येनैते स्पृष्टास्तदपि स्नानमेव । इहसर्वस्याप्रत्यासत्तेः तत्स्पृष्टिनमित्यनेन संबन्धःशवस्यैव केचिदाहुर्नदिवाकीर्त्यादीनाम् । अन्येतु एकवाक्योपनिपातादन्ते श्रुतत्वात्सर्वेषांबुद्धौ संनिधानातच्छब्देन सर्वनाम्नापरामर्शइति । अत्र हि शवपर्यन्तानांद्वन्द्वंकृत्वा स्पृष्टीत्यनेनसंबंधः तत्रतत्स्पृष्टी-

तिसमासार्थस्य बुद्धौ संनिहितत्वात्तच्छब्देनावमर्शः नहिशवस्पृष्टिपदेनसबन्धोलक्ष्यते पतितादिभिरितरेयुक्तत्वात्। किंतु केवलस्य पदान्तसंबन्धः द्वन्द्वे ह्येकैकः शब्दःसर्वार्थाभिधायी। ततः सर्वे मत्यासन्नाः अथापि शवस्पृष्टिशब्दस्य तत्स्पृष्टिपदेन संबन्धंकृत्वा ततोन्यैरभिसंबन्धः। तथासति पतितादीनांस्पृष्टिपदेन संबन्धोन स्यात्। तस्मात्समाचारतएव निर्णयः ॥८५॥

(२) सर्वज्ञनारायणः। दिवाकीर्तिचाण्डालं। पतितं महापातकिनं। सूतिकां स्त्रियं दशाहमध्ये। तत्स्पृष्टिनं दिवाकीर्त्यादीनांपञ्चानामन्यतमस्यस्प्रष्टारम् ॥ ८५ ॥

(३) कुल्लूकः। चाण्डालं रजस्वलां ब्रह्महादिकं प्रसूतां दशाहाभ्यन्तरे शवंशवस्पृष्टिनंच स्पृष्ट्वा स्नानेन शुद्धो भवति। केचित्तु तत्स्पृष्टिनमितिचाण्डालोदक्यादिभिः सर्वैः संबन्धयन्ति। गोविन्दराजस्तु याज्ञवल्क्यवचनाच्छवस्पृष्टिनमेवतत्स्पृष्टिनमाह नोदक्यादिस्पृष्टिनम् तत्राचमनविधानात्। तदाह याज्ञवल्क्यः॥ उदक्याशुचिभिः स्नायात्संस्पृष्टस्तैरुपस्पृशेत्। उदक्याशुचिभिः स्पृष्टः स्नानंकुर्यात् उदक्याशौचिभिः स्पृष्टैः स्पृष्टस्तूपस्पृशेदाचमेत् ॥ ८५ ॥

(४) राघवानन्दः। किंचैतान्षट्स्पृष्ट्वा स्नायादित्याह दिवेति। दिवाकीर्तिं चण्डालं उदक्यां रजस्वलां। तत्स्पृष्टिनं शवस्पृष्टिनं। ननु दिवाकीर्त्यादिस्पृष्टिनंतेषांसाक्षात्स्पर्शेस्नानमेव परंपरास्पर्शे त्वाचमनं ॥ उदक्याशौचिभिःस्नायात्स्पृष्टस्तैर्वार्युपस्पृशेदि इति याज्ञवल्क्योक्तेः ॥ ८५ ॥

(५) नन्दनः। दिवाकीर्तिः चण्डालः। तत्स्पृष्टंदिवाकीर्त्यादिस्पृष्टम् ॥ ८५ ॥

(६) रामचन्द्रः। दिवाकीर्तिर्नापितः चाण्डालइति केचित्। च पुनः तत्स्पृष्टिनं शवस्पृष्टिनं स्पृष्ट्वा स्नानेन शुध्यति ॥ ८५ ॥

आचम्य प्रयतोनित्यंजपेदशुचिदर्शने ॥ सौरान्मन्त्रान्यथोत्साहंपावमानीश्च शक्तितः ॥ ८६ ॥

(१) मेधातिथिः। अशुचयः संनिधानात्पूर्वोक्ताएव। सूर्यदैवत्यामन्त्राःसौराउदुत्यंजातवेदसमित्यादयः। पावमान्यः दाशतयीषु नवमे मण्डलेऽधीताःस्वादिष्टयेत्याद्याः। यथोत्साहं शक्तितइतिच एकएवार्थः वृत्तवशाच्छब्दद्वयंपठितम्। बहुवचननिर्देशात्त्रित्वसंख्यावश्यंकर्तव्या परतस्तु यदिगुरुतरकार्यात्ययोन भवति तदाकर्तव्यएवजपः। मन्त्रग्रहणात्पावमानीरितिचऋचामुपादानादसमाप्तेपि सूक्ते त्रिभ्यउर्ध्वं भवत्येव शुद्धिः। श्वाप्यत्र प्रक्षेपमध्यः सोप्यशुचिरेव। पठितंच गौतमीयेस्मिन्नेव वर्गे शुनश्चयदुपहन्यादित्येकइति। प्रयतः अनन्यमनामन्त्रदेवतादिध्यानपरः। अथवा प्रयतोदेवतादिपूजाप्रवृत्तोयदा पश्येत्तदैवकुर्यान्नान्यदेति ॥ ८६ ॥

(२) सर्वज्ञनारायणः। प्रयतोजपादिकर्मकरणार्थंप्रायश्चित्तकाले। अशुचिः चाण्डालादिः। सौरानुदुत्यंजातवेदसं चित्रंदेवानामुद्वयंतमसइत्यादीन्। यथोत्साहं यथाशक्ति पावमानीः स्वादिष्ठयामदिष्ठयेत्याद्याः ॥ ८६ ॥

(३) कुल्लूकः। श्राद्धदेवपूजादिसंचिकीर्षुः स्नानाचमनादिना प्रयतः सन्प्रकृतचाण्डालाद्यशुचिदर्शने सतिउदुत्यंजातवेदसमित्यादिसूर्यदैवतमन्त्रान्यथासामर्थ्यंपावमानीश्च शक्त्या जपेत् ॥ ८६ ॥

(४) राघवानन्दः। किंचान्यदित्याहआचम्येति। प्रयतः श्राद्धदेवादिपूजाचिकीर्षुः सन्निधानाद्दिवाकीर्त्यादिषण्णामशुचीनांदर्शने उदुत्यमित्यादिसौरमन्त्राः। यथोत्साहं यथासामर्थ्यंसान्निध्यादिदर्शनानुरूपंवा ॥ ८६ ॥

(५) नन्दनः। अशुचयोदिवाकीर्त्यादयः। सौरान्सूर्यदैवत्यान्। पावमानीः पवमानदैवत्याऋचइतिशेषः ॥ ८६ ॥

(६) रामचन्द्रः। अशुचिदर्शने सौरान्मन्त्रान् गायत्र्यादीन्जपेत्। च पुनः शक्तितः पावमानीं सूक्तं जपेत् पावमान्यः पुनन्तुमामिति पठेत् ॥ ८६ ॥

नारंस्पृष्ट्वास्थिसस्नेहं स्नात्वा विप्रोविशुध्यति॥ आचम्यैव तु निःस्नेहं गामालभ्यार्कमीक्ष्यवा॥८७॥

(१) मेधातिथिः। नरोमनुष्यस्तस्येदंनारं सस्नेहं मांसमज्जादिग्धम्। गोरालभनंस्पर्शः। अर्कदर्शनगवालम्भौ विकल्पेने॥ ८७॥

(२) सर्वज्ञनारायणः। सस्नेहमदग्धमशुष्कंच निःस्नेहं दग्धंशुष्कंवा। आचाम्यैवेत्याचमनंकृत्वा गोस्पर्शन-सूर्येक्षणयोरन्यतरत्कार्यमित्यर्थः॥ ८७॥

(३) कुल्लूकः। मानुषास्थि स्नेहसंयुक्तंस्पृष्ट्वा ब्राह्मणादिः स्नानेन विशुध्यति। स्नेहशून्यंपुनः स्पृष्ट्वाऽऽचम्य गोस्पर्शार्कवीक्षणयोरन्यतरत्कृत्वाविशुद्धोभवति॥ ८७॥

(४) राघवानन्दः। नारं नरस्येदं। गोस्पर्शोरवेरीक्षणंवा॥ ८७॥

(६) रामचन्द्रः। नराज्जातंनारं सस्नेहमस्थि स्पृष्ट्वा स्नात्वा शुध्यति द्विजात्यस्थिविषयं शूद्रस्यास्थिस्पर्शने त्रिरात्रमाशौचम्। निःस्नेहं शुष्कं अस्थि स्पृष्ट्वा पादौ प्रक्षाल्याचम्य गामालभ्य स्पृष्ट्वा अर्कमीक्ष्य वा शुद्धोभवेत॥ ८७॥

आदिष्टी नोदकं कुर्यादाव्रतस्य समापनात्॥ समाप्ते तूदकं कृत्वा त्रिरात्रेणैव शुध्यति॥ ८८॥

(१) मेधातिथिः। आदेशआदिष्टं व्रतादेशनसंबन्धात्तद्विरूपेण ब्रह्मचार्युच्यते तस्यब्रह्मचर्याश्रमस्थस्य सतोये सपिण्डाःप्रमीयन्ते तेषामयमनिष्टोदकदानप्रतिषेधः। प्राक्प्रमीतानांतु विहितमन्वाहिकंकुर्याद्देवपितृतर्पणमिति। आव्रतस्येति आसमावर्तनादित्यर्थः। न पुनरान्तरालिकसाहसिकादित्यर्थः। व्रतचरणसमाप्तेः समावृत्तःसर्वेषामेकैकस्योदकंकृत्वै-कस्मिन्नहनि त्रिरात्रमाशौचंकुर्यात्। मातुस्तूदकदानंव्रतिनोपीष्यते नचव्रतलोपः। स्मृत्यन्तरमुदाहरन्ति। अपराध्यआदिष्टोनोदकइति॥ ८८॥

(२) सर्वज्ञनारायणः। आदिष्टमाचार्येण ब्रह्मचार्यस्यपोशानेत्यादिना ब्रह्मचर्यव्रतं यस्यसआदिष्टी सपितर्यपि प्रेते नोदकमर्थादाशौचमपिनकुर्यात्। समाप्तेत्विति। समाप्ते तु ब्रह्मचर्ये यद्यनतीतवत्सरंपित्रादिमरणंशृणुयात्तदा शौचमुदकदानंच प्रेतोद्देशेन त्रिरात्रंब्रह्मचारिणा कार्यं। ततः प्राक्सपिण्डने कृते प्रेतत्वाभावान्नैतदुदकदानमित्यर्थासिद्धम्। एतेन व्रतिनोव्रतकालआपादितत्वादाशौचस्य तदाशौचात्ययकालप्राप्तकालमाशौचंकालान्तरेपिनास्तीतियाज्ञमतिदर्शितम्। एतच्च युक्तिसिद्धमपि स्पष्टार्थमुक्तम्। उदककरणोत्तरकालानन्तर्याच्चिरात्रपूरणस्योदकंकृत्वेत्युक्तम्॥ ८८॥

(३) कुल्लूकः। व्रतादेशनमादिष्टंतदस्यास्तीतिब्रह्मचारी समेतोदकमाव्रतसमापनान्न कुर्यात। उदकमितिपृथक्-पिण्डषोडशश्राद्धादिसकलप्रेतकृत्योपलक्षणम्। समाप्ते पुनर्ब्रह्मचर्ये प्रेतोदकंकृत्वा त्रिरात्रमशौचंकृत्वा विशुद्धोभवति। एतच्च मातापित्राचार्यव्यतिरिक्तविषयम्। तदाह वसिष्ठः ब्रह्मचारिणः शवकर्मणा व्रतान्निवृत्तिरन्यत्र मातापित्रोर्गुरोर्वा शवकर्मणेति शवनिमित्तकेन निर्हरणदहनोदकदानपूर्वकपिण्डषोडशश्राद्धादिकर्मणा। वक्ष्यति च आचार्यत्वमुपाध्याय-मिति॥ ८८॥

(४) राघवानन्दः। किंचआदिष्टीति। आदिष्टीब्रह्मचारी उदकंतत्पूर्वकसपिण्डषोडशश्राद्धादिप्रेतकृत्योपलक्षकंएतन्मातापित्राचार्यातिरिक्तविषयं तेषांकुर्यात्। आचार्यत्वमुपाध्यायमित्यादिवक्ष्यमाणत्वात॥ ८८॥

---

(८७) गामालभ्यार्कमीक्ष्य वा=गांस्पृष्ट्वा वीक्ष्य वा रविम (क, ग)
=गामालभ्यार्कमीक्ष्य च (ख, ण)

(५) **नन्दनः** । आदिष्टंव्रतं तद्वानादिष्टी । इतरस्यब्रह्मचर्यस्य । समाप्ते इते । कृतसमावर्तनस्याकृतविवाहस्यायंत्रिरात्रविधिः ॥ ८८ ॥

(६) **रामचन्द्रः** । आदिष्टी ब्रह्मचारी आव्रतस्य समापनात् उदकं जलं जालिन कुर्यात् व्रतं समाप्य जलाञ्जलिं कृत्वा त्रिरात्रेणैव शुध्यति । एतवद्दन्सराभ्यन्तरे अकृतसपिण्डे बोद्धव्यम् ॥ ८८ ॥

वृथासंकरजातानां प्रव्रज्यासु च तिष्ठताम् ॥ आत्मनस्त्यागिनां चैव निवर्तेतोदकक्रिया ॥ ८९ ॥

(१) **मेधातिथिः** । जातशब्दः प्रत्येकमभिसंबध्यते । वृथाजातोयोन देवानर्चयति न पितॄन्न मनुष्यानिति । इत्यधिकारेऽनाश्रमी । हुताहुतपरित्यक्तः संवत्सरमनाश्रमी भूत्वेत्यादिचिरकालावस्थाने महादोषश्रवणात् । ब्रह्मचारिपरिव्राजकाभ्यामन्यस्य परयाकर्तन्व आत्माथेऽस्तु पाकोऽनिषिद्धः । संकरजातास्तर इजातल्यातकरण प्रतिलोमाआयोगवादयः । निन्दितत्वाद्दृथाजातसाहचर्येण । अनुलोमास्तु सत्यपिसंकीर्णयोनित्वे मातृजातीयत्वादधिकारित्वाच्च नेहगृह्यन्ते । नचानुलोमेषुसंकीर्णयोनित्वव्यवहारः । संकीर्णयोनयस्त्वेताः प्रतिलोमानुलोमजादीनि । अनियुक्तासुतादयश्चानेकपुरुषसंसर्गजाः वेश्याजाताश्च । पारलौकिकेषु अमन्यनेककृत्रसंसर्गसंकरजाताः । अयंच सपिण्डानांनिषेधोन तत्पुत्राणामिति केचित् । आत्मत्यागिनांतु पुत्राणामपि तदुक्तकर्मविशेषश्रवणात् । प्रव्रज्यासु बाह्यासु भगात्वरक्तपटाद्यासनधिकाराद्दहुवचननिर्देशात् । व्रतादिदर्शनभेदेन बाह्याः । आत्मनस्त्यागिनां पुरुषाणामायुषोऽक्षये स्वेच्छया शरीरंत्यजन्ति वृद्धानामचिकित्स्यमहाव्याधीनांभिषक्प्रत्याख्यातानामित्यतएव । यथोक्तम् ॥ वृद्धःशौचस्मृतेर्लुप्तःप्रत्याख्यातभिषक्क्रियः । आत्मानंघातयेद्यस्तु भृग्वग्न्यनशनाम्बुभिः ॥ तस्य त्रिरात्रमाशौचंद्वितीयेत्वस्थिसंचयः । तृतीयेतूदकं कृत्वा चतुर्थे श्राद्धमाचरेदिति ॥ कुष्ठ्यादिः क्षुधाधिगृहीतस्य इत्यतएव । यथोक्तं लुप्तचेष्टस्यगृहस्थावस्थायामपि महाप्रस्थानगमनावृथानेच्छन्तिजीवितुं लुप्तचेष्टश्चोच्यतेयः शौचादिष्वसमर्थः संध्योपासनादिषुच । अपरिक्षीणशरीरोवा । सादयेयस्त्वात्मानमलुप्तचेष्टोवा । अतस्तद्विषयेनेस्यानुज्ञानंभवति । स्मृत्यन्तरेष्वन्येषामप्युदकक्रियानिषेधोविहितः । यथोक्तं राजभिर्निहतानांच शृंगिदंष्ट्रिसरीसृपैः । आत्मनस्त्यागिनांचैव श्राद्धमेषांन कल्पयेत् ॥ उदकंपिण्डदानंच प्रेतेभ्योयच्च दीयते । नोपतिष्ठतितत्सर्वमन्तरिक्षे विनश्यति ॥ नारायणबलिःकार्योलोकगर्हाभयान्नरैः । तस्मादेभ्योपि दातव्यमन्नमेव सदक्षिणम् ॥ तथान्यत्र ॥ चण्डालादुदकात्सर्पाद्ब्राह्मणाद्वैद्युतादपि । दंष्ट्रिभ्यश्च पशुभ्यश्च मरणंपापकर्मणाम् ॥ तथाचोक्तम् ॥ नृणांचैवाग्निदानांच स्नानालंकारकारिणाम् । तप्तकृच्छ्द्वयंशुद्धिरश्रुपातेऽनुयायिनाम् ॥ तेनोद्दिष्टंनचैवान्यैःकार्यमस्यौर्ध्वदैहिकम् । नचनामापि कर्तव्यंतद्वंशस्य तदीयकम् ॥ अत्यन्तनरकस्थस्य तस्य पापीयसोऽधिकम् । कारणंकीर्तनंनाम सर्वंचैव भयावहम् ॥ संवर्तेन आस्वेव क्रियासु सान्तपनमाम्नातम् । पराशरेण तप्तकृच्छ्रं वसिष्ठेन तप्तकृच्छ्रसहितंचान्द्रायणम् । तत्रापूर्वादिविशेषाउपेक्ष्याः । यदुक्तं । चण्डालादुदकादित्याद्युपक्रम्यं मरणंपापकर्मणामिति । तत्रेदंसन्दिह्यते । किं यश्चण्डालादिर्बुद्धिपूर्वमात्मानंघातयति । तस्यायंविधिरौर्ध्वदैहिकाकरणं तत्करणं च प्रायश्चित्तमुतप्रमादहतस्यानिच्छतइति । कुतःसंदेहइह गौतमेनप्रायोनाशकशस्त्राग्निविषोदकोद्बन्धनप्रयतनमित्युक्तम् । इहचाविशेषेण श्रुतं चण्डालादुदकादिति । तत्र स्मृत्यन्तरेणैकशास्त्रत्वादुदकादित्यत्र तावदवश्यमिच्छतामितिसंबध्यते । साहचर्यादन्यत्रापि तथैवेत्याशङ्काजायते । किंच पापकर्मणामिति श्रूयते । पापंच कर्म प्रतिषिद्धं । अत्रप्रतिषिद्धंयोनुतिष्ठतिसपापकर्मेत्युपपद्यते । अनुष्ठातृत्वंच स्वव्यापारेण परप्रयोक्तृतयाच तत्र न वैद्युतदंष्ट्रिशृङ्ग्यादयःतेचन प्रयुज्यन्ते नापि ते श्वभ्रोदकखड्गादिस्थानीयाः । येन तदुपादानेनात्मानंघ्नन् स्वतन्त्रःक-

(८९) सङ्करजातानाम्=जातीनाम् (क, ख)

र्तां स्यात् । किंतर्हि यस्येदृशंमरणमुपनतंसपूर्वजन्मनि कृतपापकइति शास्त्रेण ज्ञाप्यते । यथाश्यावदन्तप्रभृतयस्तत्रापि किमेतेन ज्ञापितेन । अङ्गहीनादीनांपूर्वपापसंबन्धित्वंज्ञाप्यते । प्रायश्चित्तमनुष्ठेयं यथा वसिष्ठेनोक्तम् । कस्यचित्कृच्छ्रद्वयचरणंकस्यचिदभ्यधिकमपि । इह मृत्युना सर्वाधिकारस्यापहृतत्वान्नार्थोनेन । यदिवासौ कृतपातकइत्यवसीयते । तेनसह येकेचन केनचित् यौनमौखस्त्रौवाःसंबन्धाःकृताः । सोपि पापकारी स्यात् । नचैवंशिष्टानामाचारः । नहि तादृशेन संबन्धं कृतवन्तःकेनचिद्विचिकित्स्यन्ते । प्रायश्चित्तंनाचरन्ति अतइच्छतामनुमीयते । येतुगोब्राह्मणहतानामिति स्मृत्यन्तरे पठित्वा आत्मनस्त्यागिनामिति पृथक्पठन्ति तेनविशेषपक्षः प्रतिभाति । अतःसंशयः किं पुनरत्र युक्तंइच्छतामितिकुतः पापकर्मवचनात् । स्वेच्छया यश्चात्मव्यापत्तिहेतौ व्यापारे प्रवर्तते तेन तस्माद्दुहनपुरायुषःस्वःकामी प्रेयादितिशास्त्रमतिक्रान्तं भवति । सच युक्तःपापकर्मेतिव्यपदेष्टुं । ननुचोक्तं नहि ते खड्गादिस्थानीयाः । येनेच्छयावधोपपत्तिः । उच्यते । यः प्रमादंनरक्षति तेन तत्कृतमेवेति । तेन यश्चाण्डालदस्युभूयिष्ठेरण्यएकाकी गच्छति तस्ययद्यपि चण्डालामांघ्नन्त्वितीच्छा न भवति तथापि तत्समर्थाचरणेन प्रमादस्यापरिहृतत्वाद्भवत्येव शास्त्रातिक्रमः । एवंयोबाहुभ्यांनदींतरति संदिग्धांवा नावमधिरोहत्यकुशलकर्णधाराधिष्ठिताम् । एवंतस्य व्यापद्यमानस्य वेगक्षयेण नौपरिवर्तनादिनावा युक्तैव पापकारिता । तथाचागाधतांदण्डादिना ग्राहमकरसंगंचाज्ञात्वास्नातारोयद्यपह्रियेरन्नदुष्येयुरेवम् । यस्तु दृढबन्धनांतारींतीव्राम्भसि कुशलावहितसमर्थप्रेरकप्रेर्यमाणामधिरूढः सहसोत्पतिते जविनिपवने चक्रवातेन पिच्छलमवाप्तवान् ध्रुवव्यापत्याम्रियेतशास्त्रमतिक्रमेत् एवंसर्पोपहतंदंशंच परिहरन्दष्टोव्यापद्येत प्रत्यवेयादेव नान्यथा । एवंतीक्ष्णशृङ्गांगां हस्तिनं चादृष्ट्वा दूरमनपक्रामतोहन्यमानस्य युक्तोऽतिक्रमः । एवमरण्येवर्षासूच्चरन्तीषु विद्युत्सु ग्रामनगरयोरप्रवेशेदुष्टतैव । ग्रामस्थस्योपरि कथंचिद्विद्युत्पातःस्यात्तदा न किंचिदपराध्यति । अतोयुक्तमीदृशंयथाविहितक्रियाकरणम् । तत्रचोदकक्रियानिषेधः सर्वौर्ध्वदेहिकप्रदर्शनार्थः स्मृत्यन्तरेस्योदाहृतत्वात् ॥ ८९ ॥

(२) **सर्वज्ञनारायणः** । वृथाजाताः क्लीबाः । संकरजाः प्रतिलोमजाः । प्रव्रज्या चतुर्थाश्रमः । आत्मनस्त्यागिनामुद्बन्धनादिना । उदकक्रियेत्याशौचस्यापि ग्रहणम् ॥ ८९ ॥

(३) **कुल्लूकः** । जातशब्दः प्रत्येकमभिसंबध्यते वृथाजातानांबाहुल्येन त्यक्तस्वधर्माणांसंकरजातानांहीनवर्णेनोत्कृष्टस्त्रीषूत्पन्नानां वेदबाह्यरक्तपटादिप्रव्रज्यासुवर्तमानानामशास्त्रीयविषोद्बन्धनादिना कामतश्च कृतजीविततत्यागिनामुदकादिक्रिया न कर्तव्या ॥ ८९ ॥

(४) **राघवानन्दः** । एषामुदकंनास्तीत्याह वृथेतिद्वाभ्यां । वृथाजातानां पञ्चयज्ञाद्यनधिकारित्वेन चिरकालमनाश्रमिणामिति मेधातिथिः । संकरजातानांहीनवर्णेनोत्कृष्टस्त्रीषु जातानां । तिष्ठतां परमहंसानाम ॥ ८९ ॥

(५) **नन्दनः** । वृथाजाताः पञ्चमहायज्ञादीनामकर्तारः । संकरजाताः परभार्यायामनियुक्तायामुत्पन्नाः ॥ ८९ ॥

(६) **रामचन्द्रः** । द्वाभ्यामाह वृथेति । वृथाजातापञ्चयज्ञरहिताः क्लिबादयोवा सङ्करजातानांच पुनः यतीनांच पुनः आत्मत्यागिनाम् पाषण्डमाश्रितानाम् । च पुनः कामतः चरन्तीनां व्यभिचारिणीनाम् । एवंवृथादिसुराप्यंतानां योषितां उदकक्रियाजलाञ्जलिदानसूतकमपि निवर्तेत न कुर्यात् ॥ ८९ ॥

पाषण्डमाश्रितानां च चरन्तीनां च कामतः ॥ गर्भभर्तृद्रुहां चैव सुरापीनां च योषिताम् ॥ ९० ॥

(१) **मेधातिथिः** । शास्त्रपरित्यागेनबाह्यदर्शनाश्रयं नरशिरःकपालरक्ताम्बरादिधारणंपाषण्डं तदाश्रिताः कृततल्लिङ्गपरिग्रहाः तद्दर्शनवशवर्तिन्यः । चरन्तीनांच कामतः तदाचारकुलस्थितित्यागेनेच्छामात्रानुवृत्त्येकानेकपरपुरुषसंप्रयोगः-

कामचारः । भर्तुर्विषगरादिदानेन । गर्भस्य च पातनं द्रोहः । सुराप्यः यथाप्रतिषेधंप्रतिषिद्धायाःपानेन । अत्रकाश्चिदाह ब्राह्मणो न पिबेत्सुरामिति । सत्यपि जात्यर्थाविशेषलिङ्गात्पुंसएव ब्राह्मणस्य प्रतिषेधोन स्त्रियाइति । यद्यपि स्त्रीपुंसयोरेकाजातिस्तथापि स्त्रीत्वपुंस्त्वलिङ्गे भिद्येते इहच ब्राह्मणइति पुल्लिङ्गस्य शब्दस्य श्रवणादश्रुतायाःकः प्रसङ्गः । यथा ब्राह्मणींपाययेत्पुत्रार्थमिति न पुंसःपाययेदिति तद्वत्पुंलिङ्गश्रुतौ न स्त्रियउपादीयन्ते । क्वचिल्लिङ्गंन विवक्ष्यते यथा ब्राह्मणोनहन्तव्यइति स्त्रियाअपि प्रतिषेधोविज्ञायते । तत्रद्वितीययाश्रुत्या ब्राह्मणस्येप्सिततमत्वात्प्राधान्यम् । नच प्रधाने प्रातिपदिकार्थव्यतिरेकेणान्यलिङ्गसंख्यादि विवक्ष्यते यथा ग्रहंसंमार्ष्टीतिनैकस्य संमार्गः । इह पुनर्ब्राह्मणेन सुरा न पेयेति कर्तृतया साधनभावेन क्रियांप्रतिनिर्देशात् ब्राह्मणोनपिबेत्सुरामित्याख्याताभिहितेपि तादर्थ्यनामनिवृत्तेःप्रातिपदिकार्थोपपत्या प्रथमापि तृतीयानुगुणेतिगुणभावात् गुणेच सर्वंश्रुतंविवक्ष्यते । यथा पशुना यजेतेति पुमान्पशुरालभ्यते एकश्च । अत्रोच्यते । नात्र द्वितीयातृतीये गुणप्रधानभावेनाविवक्षाविवक्षयोःकारणं किंतर्हि प्राप्यप्राप्ती यदप्राप्तंविधिविषयतयोपपद्येततद्विवक्ष्यते । अनन्यपरशब्दावगम्यत्वात् । यत्त्वन्यतोवगतमर्थान्तरंविभ्यर्थमुपादीयते तद्यादृशमेव प्रमाणान्तरावगतंतादृशमेव विधेयकार्यान्तरसंबन्धितया शब्देन प्रतिपाद्यते । ब्राह्मणोनहन्तव्यइत्यत्र वाक्येविप्रतिषेधएव पर्यवस्यति यदन्यत्तदन्यतोवगतम् । प्रातिपदिकार्थविवक्षातु श्रुत्यानर्थक्यप्रसंगात् । लिङ्गसंख्यादिस्तु प्रत्ययार्थस्य नान्तरीयकत्वेनाप्युपादानसंभवाद्विवक्षाविवक्षे उच्येते । तत्रेह न ब्राह्मणादिभिःपुरुषोविधिनाप्रवर्त्यः । तद्द्वेषात्स्वतःप्रवृत्तेः तत्सर्वस्यचात्रत्वप्रसंगात् । नह्यविधीयमानःप्रतिषेधःकथंचिदन्वेतुमलं । अन्यतःप्राप्यभावात् । अकारकत्वादकारकविशेषणत्वात्स्वभावानुप्रवेशेनापि संबन्धंलभ्यते । तस्मादस्यान्वयसिद्ध्यर्थंविषयभावएषितव्यः । तस्मिंश्च विधिना विषयीकृतेन भावार्थोविषयतयापेक्ष्यते । भावार्थश्च प्रतिषेधेन विषयांशस्य गृहीतत्वात्ततःप्रच्युतलौकिक्या च प्रवृत्त्या सिद्धानुष्ठानआत्मविधिसिध्यर्थमनुप्रवेशमप्यकांक्षन्नधिकारमात्रसापेक्षविधौप्रमाणान्तरतःप्रतिपन्नहननकर्तृभावस्य पुंसोधिकारतांप्रतिपादयंस्तद्विशेषणद्वारेणान्वयंप्रतिपद्यतइत्युपपन्नमन्विताभिधानं तेन भावार्थस्य सविशेषणस्याविधेयत्वाल्लौकिकी प्रवृत्तिरभ्युपेतव्या । अस्तिच रागलक्षणा प्रवृत्तिर्नतस्यालिङ्गसंख्यानियमोस्ति द्वेषाद्वा तस्मादविधेयार्थशब्दोऽवगतार्थपरत्वादभिधानंशक्तिमुत्सृज्य प्रमाणान्तरतोयथावधृतस्वरूपमर्थंलक्षयति । तत्र लिङ्गसंख्ययोस्तात्पर्यन्तःशब्देनानभिधानात्कुतोविवक्षा केवलंप्रातिपदिकनिर्देशार्थंयेनकेनचिद्वचनेन निर्देशःकर्तव्योनकेवला प्रकृतिः प्रयोक्तव्येति तदर्थंलिङ्गसंख्ययोरुपादानम् । अतइयमत्रावगतिः हननेध्यवसितकर्तृभावःसनञर्थेनियुज्यते । अतःप्रतिषेधवाक्ये द्वितीयाश्रुतिरविवक्षायामतन्त्रं यथापिहि तृतीयाश्रूयते प्रथमावा ब्राह्मणेन न पातव्या ब्राह्मणोनपिबेदिति तत्रापि तदर्थस्यान्यतः प्राप्तिरविधेयत्वादनूद्यते । या अधिकारविशेषणत्वेनैव संबध्यतेएते द्वितीयाविशिष्टे प्रथमातृतीये । सत्यामपि च द्वितीयाश्रुतौ । पदप्राप्तंतद्विधेयत्वाद्विवक्ष्यते यथा भार्यामुपगच्छेत् अपत्यमुत्पादयेदिति । नहि लौकिकोभार्यार्थः । उपयमनेनैव तत्सिद्धेः । नापि वाक्यान्तरे विधिना क्वचिदुपात्तोयेन यथावगममुद्दिश्येत यथाश्विनंगृह्णाति मैत्रावरुणंगृह्णाति दशैतानध्वर्युर्गृण्हातीति संख्याविशिष्टाएव ग्रहाउपादीयन्ते । अतोनिर्ज्ञातसंख्यत्वात्संमार्गविधौयथासंख्यावगमंनिर्दिश्यते । अत्र पुनर्वाक्यान्तराभावादस्यैवोत्पत्तिवाक्यत्वात्कृतसंख्यापरित्यागे प्रमाणाभावान्निरपेक्षाभिधानशक्तिसमर्पितस्यैकस्य परित्यागः । पुरुषबुद्धिप्रभवएव स्यात् । एवंपशुना यजेतेति यागविषयत्वाद्विधेस्तस्यच साध्यत्वभावत्वात्सधनाकांक्षायांसमर्पितसविशेषणकारितमहिनस्यानिधेयत्वे यद्यर्थमात्रेविधिव्यापारापरिसमाप्तेः स्वार्थपरशब्दाभिहितापेक्षितस्वार्थाःकिमितिनयन्ति । प्रमाणाशास्त्रविदस्तु स्वयंविभिविदन्ति । अन्योक्तमत्रगा-

हन्ते । यत्वस्माभिरुक्तंतत्सुखोपायग्राह्यं नातिमहतीव्युत्पत्तिरत्रोपयुज्यते इयदेववक्तत्सारद्वंयतीसाविद्यानुष्ठानोपयोगिनी यदधिकमाहोपुरुषिकामात्रंतदर्थवादएव । तत्र ह्यर्थवादाद्विशेषावगतिर्भवति यत्राकांक्षाविधेरनिवृत्तिरिति यथोक्तमुपदधातीति । बहुषु भोजनसाधनेषु सर्पिस्तैललवणादिषु सत्सु केनेत्यनवसाये घृतेनेति गम्यते यथातु रात्रिष्वनुष्ठानाश्रवणदाकांक्षायांप्रतितिष्ठन्तीत्यर्थवादः । अतःप्रतिष्ठाकामस्येतिगम्यते । इह पुनर्ब्राह्मणाईतिपरिसमासत्वात्पदार्थस्य निवृत्तकांक्षेति । स्तुतिमात्रापेक्षयार्थवादः । अथलिङ्गदर्शनमात्रतयोपन्यस्यते देवानामश्नता हविरितितस्माच्छ्रेयःसंपन्नंपापीयानन्वेतीतिवत्तदपिपुंसःप्रतिषिद्धत्वात्पाक्षिकेनानुवादेन सालम्बनमितिन किंचित् । स्त्रीणामपि देवान्नशेषमाज्यादिप्राशनमस्त्येव वेदोदाहरश्च दर्शपूर्णमासादिषु वैश्वदेविकमासीतेति । नचश्राद्धस्य कर्तुःसुरांपाययेदितिचोदनया तासांपानमनुमीयते । ब्रह्महत्यादाविव । नैवंप्रतिग्रहस्तस्माज्जातिमात्रस्यप्रतिषेधइत्येषएतस्यांविप्रतिपत्तौ निर्णयः ॥ ९० ॥

(२) **सर्वज्ञनारायणः** । पाषण्डयं बौद्धादिदर्शनं तल्लिङ्गंवा आश्रितानां पुंसांस्त्रीणांचकामतश्चरन्तीनां सवर्णव्यभिचारिणीनामपि । गर्भद्रुहां गर्भानुत्पत्त्यर्थंकृतौषधीनां । भर्तृद्रुहां भर्तृताडनादिकारिणीनां । सुरापीनामिति ब्राह्मणीविषयेणान्यदप्यन्यजातीयास्वपि महापातकमुपलक्ष्यते । वृथासंकरजातानामित्यादौ पुल्लिङ्गमत्र च स्त्रीलिङ्गं योषितामितिपदं चाविवक्षितार्थम् ॥ ९० ॥

(३) **कुल्लूकः** । वेदबाह्यरक्तपटमौञ्ज्यादिव्रतचर्या पाषण्डतदनुतिष्ठन्तीनां स्वच्छन्दमेकानेकपुरुषगामिनीनां गर्भपातनभर्तृवधकारिणीनांद्विजातिस्त्रीणां सुरापीनामुदकक्रियौर्ध्वदेहिकंनिवर्ततइति पूर्वेण संबन्धः ॥ ९० ॥

(४) **राघवानन्दः** । अशास्त्रीयबन्धनादिना प्राणस्य त्यागिनांचरंतीनां कामतः काममात्रोपशमनार्थं कुलटानां । योषितां सुरापीनां द्विजातिस्त्रीणाम् ॥ ९० ॥

(५) **नन्दनः** । पाखण्डयंवेदबाह्यंकर्म । कामचारोव्यभिचारः । निवर्ततोदकक्रियेत्यनुषङ्गः ॥ ९० ॥

आचार्यं स्वमुपाध्यायं पितरं मातरं गुरुम् ॥ निर्हृत्य तु व्रती प्रेतान्न व्रतेन वियुज्यते ॥ ९१॥

(१) **मेधातिथिः** । स्वग्रहणमाचार्यविशेषणंमन्यते । गुरोर्गुरौ संनिहितइत्यतिदेशात्तदाचार्येपि प्राप्तेप्रतिषेधः । अन्येतु स्वशब्दंबान्धववचनंव्याचक्षते । अत्रतु पितरंमातरमितिनवक्तव्यं नित्यार्थत्वभिधानमिति । गुरुरल्पंवाबहुवापीत्यनेन यउक्तः । एतान्निर्हरतोव्रतवियोगोनास्तीति श्रुतसामर्थ्याद्दर्शयति । अन्यान्निर्हृत्यानेन वियुज्यतइति पदार्थसिद्धिः ॥ ९१ ॥

(२) **सर्वज्ञनारायणः** । आचार्यमुपनायकं । उपाध्यायं वेदाध्यापकं । गुरुं वेदार्थव्याख्यातारं । निर्हृत्य निर्हरणंदाहादितेषांकृत्वा । एतच्चान्यस्मिन्कर्तर्यसति । अर्थादन्यस्मिन्सति तथाचार्यादिभ्योन्यस्य निर्हरणादिकरणे व्रतलोपस्तथाच पुनः संस्कारः ॥ ९१ ॥

(३) **कुल्लूकः** । आचार्यउपनयनपूर्वकंसंपूर्णशाखाध्यापयिता । उपाध्यायोवेदैकदेशस्याङ्गस्य वा ऽध्यापकः । वेदस्य वेदानांचैकदेशस्यापि व्याख्याता गुरुः । निर्हरणपूर्वकत्वात्प्रेतकृत्यस्य निर्हृत्यइतिदाहदशाहपिण्डषोडशश्राद्धादिसकलप्रेतकृत्यस्य प्रदर्शनार्थमाचार्यादीन्पञ्च मृतान्निर्हृत्य ब्रह्मचारी न लुप्तव्रतोभवति । एवंचान्यान्निर्हृत्यव्रतलोपोभवतीति गम्यते । आचार्यस्वमित्यभिधानाद्गुरोर्गुरौ सन्निहिते गुरुवद्वृत्तिमाचरेदिति न्यायान्नाचार्याचार्यमपि स्वमितिसर्वत्र संबध्यते तेनोपाध्यायोपाध्यायमपि निर्हृत्य व्रतलोपएव ॥ ९१ ॥

(४) **राघवानन्दः** । उक्तलक्षणाचार्यादिपञ्चकंप्रत्युदकादिकृद्ब्रह्मचारी न व्रतलोपीस्यादित्याह आचार्यमिति । आदिष्टीत्यस्य प्रतिप्रसवः तेषांपुत्राद्यभावे ॥ ९१ ॥

(५) **नन्दनः** । त्वमुपाध्यायमितिवचनाद्गुरोरुपाध्याये प्रतिषेधः । व्रतीब्रह्मचारी । निर्हृत्य पितृमेधकर्मणासंस्कृत्य । एभ्योऽन्यान्निर्हृत्य व्रतेन वियुज्यतंइत्यभिप्रायः ॥ ९१ ॥

(६) **रामचन्द्रः** । व्रती ब्रह्मचारी आचार्यादीन् निर्हृत्य दग्ध्वा व्रतेन न वियुज्यते ॥ ९१ ॥

दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत् ॥ पश्चिमोत्तरपूर्वैस्तु यथायोगं द्विजन्मनः॥९२॥

(१) **मेधातिथिः** । पुरद्वारेणेतिपुरग्रहणंग्रामादीनामप्युपलक्षणार्थम् । यत्रानेकद्वारसंभवस्तत्रायंनियमः । योयत्रेष्टतस्यायमुपदेशः । अमङ्गल्यत्वाच्च शूद्रादारभ्यक्रमेणोपदिष्टम् । अतश्च यथायोगमितिवैश्यक्षत्रियब्राह्मणाःपश्चिमादिभिर्यथासंख्यंसंबन्धनीयाः ॥ ९२ ॥

(२) **सर्वज्ञनारायणः** । यथायोगं यथार्हं वैश्यक्षत्रियविप्रक्रमेणेत्यर्थः ॥ ९२ ॥

(३) **कुल्लूकः** । अमाङ्गलिकत्वादत्यन्तापकृष्टशूद्रक्रमेणाभिधानम । शूद्रंमृतंदक्षिणपुरद्वारेण निर्हरेत् । द्विजातीन्पुनर्यथायोगंयथायुक्त्यापकृष्टवैश्यक्षत्रियक्रमेणैव पश्चिमोत्तरपूर्वद्वारेण निर्हरेत् ॥ ९२ ॥

(४) **राघवानन्दः** । शावाशौचप्रसंगेनाह दक्षिणेनेति । यथोपयोगमपकृष्टवैश्यादिक्रमेण । पूर्वेण विप्रमित्येव संभवद्विषयत्वात् । पुरादन्यत्रानियमः ॥ ९२ ॥

(५) **नन्दनः** । पश्चिमेन वैश्यं उत्तरेण क्षत्रियं पूर्वेण ब्राह्मणं यथायोगं यथाक्रमं हारयेत् ॥ ९२ ॥

(६) **रामचन्द्रः** । दक्षिणेन पुरद्वारेण मृतंशूद्रं निर्वहेत् निष्क्रामयेत् । यथायोगं यथाक्रमं द्विजन्मानः द्विजातयः तद्यथा पश्चिमेन वैश्यं उत्तरेण क्षत्रियं पूर्वेण ब्राह्मणमिति ॥ ९२ ॥

न राज्ञामघदोषोस्ति व्रतिनांन च सत्रिणाम् ॥ ऐन्द्रंस्थानमुपासीनाब्रह्मभूताहि ते सदा॥९३॥

(१) **मेधातिथिः** । राजशब्दोयद्यपि क्षत्रियजातौ वर्तते । तथापीह ऐन्द्रंस्थानमुपासीनाइतिकारणस्योपादानाज्जनपदेश्वरवचनोलक्षणया विज्ञायते । उत्तरश्लोके निपुणंवक्ष्यामः । व्रतिनोव्रतचारिणः चान्द्रायणादिस्थाश्च । सत्रिणोगवामयनिका अन्यस्मिन्वा यज्ञे दीक्षिताः । तथाच गौतमः । ऋत्विग्दीक्षितब्रह्मचारिणामिति । अत्रार्थवादः । ऐन्द्रस्थान माधिपत्यपदंप्रजैश्वर्यमुपासीनाःकुर्वाणाराजानोब्रह्मत्वंप्राप्ताः । व्रतिनः सत्रिणश्च । अघदोषमाशौचं । अन्येतु सततदानप्रवृत्तान्सत्रिणोमन्यन्ते । मुख्ययानुवृत्त्या क्रतुविशेषे वर्तते ॥ ९३ ॥

(२) **सर्वज्ञनारायणः** । न राज्ञां राजकर्मणि न व्रतिनां व्रते न सत्रिणां सत्रइति स्मृत्यन्तरेभिधानात । राजब्रह्मचारियजमानानां व्यवहारदर्शनाद्यसाधारणराजकार्याध्ययनसंध्योपासनादिब्रह्मचारिकृत्ययागतदङ्गमन्त्रपाठादियजमानकृत्येष्वेवाशौचाभावः । अघदोषआशौचकृतमनधिकारित्वम । सत्रं यज्ञं तद्वतां यजमानानामित्यर्थः । ऐन्द्रं स्थानं परलोकमुपासीनाअकाङ्क्षमाणाएतत्कर्मकुर्वन्तोब्रह्मभूताब्रह्मवच्छुद्धाः । ब्रह्मपूताइतिपाठे ब्रह्मवत्पूताइत्यर्थः ॥ ९३ ॥

(३) **कुल्लूकः** । राज्ञामभिषिक्तक्षत्रियाणांसपिण्डमरणादावाशौचदोषोनास्ति यतोराजानऐन्द्रंस्थानंराज्याभिषेकाख्यमाधिपत्यकारणंप्राप्ताः । व्रतिनांब्रह्मचारिणश्चान्द्रायणादिव्रतकारिणश्च । सत्रिणोगवामयनादियागप्रवृत्ताः । यतोब्रह्मभूतास्ते ब्रह्मेव निष्पापाः । आशौचाभावश्चायंकर्मविशेषे । तदाहविष्णुः आशौचंन राज्ञांराजकर्मणि नव्रतिनांव्रते नसत्रिणांसत्रे राजकर्मणि व्यवहारदर्शनशान्तिहोमादिकर्मणि ॥ ९३ ॥

(४) **राघवानन्दः** । अयमपि प्रतिप्रसवः नराज्ञामिति । प्रकरणादघपदमाशौचपरं इदमाशौचराहित्यंकर्मविशेषे तदाहविष्णुः आशौचं नराज्ञांराजकर्मणि नव्रतिनांव्रते न सत्रिणांसत्रइति । ऐन्द्रमिन्द्रवदधिकृतं । ब्रह्मभूताः ब्रह्मेव तत्तत्कर्मसु निष्पापाः आरब्धत्वेन श्रौताहोमवदावश्यकत्वादितिभावः ॥ ९३ ॥

(५) **नन्दनः** । राज्ञामभिषिक्तक्षत्रियाणाम् । व्रतिनांप्रारब्धवेदपारायणकृच्छ्रादीनाम् । सत्रिणांप्रारब्धयज्ञानाम् । उत्तरार्धेन हेतुरुक्तः । ऐन्द्रंस्थानमुपासीनाः देवतायजनपरत्वात् तथाहि श्रुतिः एषवाएतर्हीन्द्रोयोयजतइति । ब्रह्मभूताधर्मस्वरूपिणइत्यर्थः । हियस्मात् ॥ ९३ ॥

(६) **रामचन्द्रः** । राज्ञां राजकर्मणि अघदोषः आशौचदोषः नास्ति । व्रतिनां पूर्वसंकल्पितव्रते दोषोनास्ति स्नातकव्रतादिकानांवा । सत्रिणां सत्रकर्मणि दोषोनास्ति । अघदोषः आशौचकृतमनधिकारित्वम् । ऐन्द्रंस्थानं परंलोकं उपासीनाः आकाङ्क्षमाणाः एतत्कर्म कुर्वन्तोब्रह्मभूताः ब्रह्मवच्छुद्धाः हि निश्चये । न तेषांशौचाभावः ॥ ९३ ॥

राज्ञोमाहात्मिके स्थाने सद्यः शौचं विधीयते ॥ प्रजानां परिरक्षार्थमासनं चात्रकारणम् ॥ ९४॥

(१) **मेधातिथिः** । महानात्मा यस्य स्थानस्य तन्माहात्मकं यस्मिंस्थाने स्थितस्य पुंसः प्रजानांपरिरक्षा । महात्मंतदैवमुच्यते तच्चप्रजैश्वर्यं । यदाह आसनंचात्रकारणमिति । तदुक्तं । नात्र जातिमात्रंकिंतु प्रजापालनाधिकारः । आसनशब्दोपीह नासनशय्यादिवचनः अपितु तत्पदंप्रामवतोयत्कर्तव्यंतदाह अतश्चक्षत्रियोपियदिप्रजापालनेसमर्थःतस्याप्याशौचाभावएवपूर्वैर्व्याख्यातः प्रजानांपरिरक्षार्थमिति । न सर्वेण सर्वाशौचनिवृत्तिः किंतर्हि प्रजापालनविरोधि यदाशौचधारणंतन्निवर्तते । यथा दुर्भिक्षादौ स्वकोशादन्नदानेन प्रजाभरणं । तथादिव्यन्तरिक्षभौमेषूत्पातेषु शान्तिः । अकस्मात्सभ्यैः कर्तव्येन राज्ञा अथवा श्रमेषु द्विजातीनांधर्मसंशयसत्वेन प्रथमिज्यादावप्यस्ति प्रवक्तृत्वंतदपि प्रयोजनम् ॥ ९४ ॥

(२) **सर्वज्ञनारायणः** । उक्तमर्थमेकदेशेनविवृणोति राज्ञइति । यत्रस्थितस्य महानात्माभवति तद्व्यवहारदर्शनादिस्थानं माहात्मिकंतत्र स्थानेतत्रापि धनार्थितया तत्करणे नाशौचाभावः किंतु प्रजारक्षोद्देशेन करणइत्याह प्रजानामिति । आसनमवस्थानं अत्र सद्यःशौचकारणम् ॥ ९४ ॥

(३) **कुल्लूकः** । महात्मनइदंस्थानंमाहात्मिकंराज्यपदाख्यंसर्वाधिपत्यलक्षणंमहात्मैवप्राचीनपुण्यराज्यमासादयति तस्मिन्वर्तमानस्य सद्यःशौचमुपदिश्यते । नतु राज्यप्रच्युतस्य क्षत्रियजातेरपि । अत्र जातिरविवक्षितेत्यनेन श्लोकेन दर्शितं । यतोन्यायनिरूपणेन दुर्भिक्षेऽन्नदानेनोपसर्गेषु शान्तिहोमादिना प्रजारक्षार्थंराज्यासनेष्ववस्थानमाशौचाभावे कारणम् । तच्चाक्षत्रियाणामपि तत्कार्यकारिणांविप्रवैश्यशूद्राणामविशिष्टम् । अतएव सोमकार्यकारिणिफलचमसे सोमधर्माअतएव व्रीहिधर्मान्विततयाश्रुतमप्यवघातादितत्कार्यकारित्वस्य विवक्षितत्वात्प्रकृतौ यवे विकृतौ च नीवारादिषु संबध्यतइतिकर्ममीमांसायां तत्तदधिकरणेषु निरणायि ॥ ९४ ॥

(४) **राघवानन्दः** । अतएवाह राज्ञइति । माहात्मिके माहात्म्यं प्रततैश्वर्यं तेन राज्यरक्षाव्यवहारदर्शशान्तिहोमादिके सर्वाधिपत्यआसने एतच्चचातुर्वर्ण्यराजसाधारणम् अवघातवत्प्रकृतिविकृतिसाधारणनियमविधित्वात् ॥ ९४ ॥

---

(९४) ०र्थमासनं=०र्थंशासनं (ज, झ)

(५) **नन्दनः** । महात्माइन्द्रस्तस्येदं माहात्मिकं तस्मिन्स्थानआसीनस्येतिशेषः । अत्र सद्यःशौचे ॥ ९४ ॥

(६) **रामचन्द्रः** । परिरक्षार्थमित्युक्ते महात्मिके स्थाने । धनार्थितया व्यवहारदर्शने नाशौचाभावः । आसनं सिंहासनं अत्र शौचे कारणं सिंहासनस्थस्याभावः ॥ ९४ ॥

डिम्बाहवहतानां च विद्युता पार्थिवेन च ॥ गोब्राह्मणस्य चैवार्थे यस्य चेच्छति पार्थिवः॥९५॥

(१) **मेधातिथिः** । डिम्बोबहुजनसंकुलःअशस्त्रकलहोवा । आहवः संग्रामोयुद्धःतत्र हतानांसद्यःशौचम् । विद्युदशनिःएतद्याख्यातं । पार्थिवः पृथिव्याईश्वरश्चातुर्वर्ण्यस्य यःकश्चित् । ब्राह्मणार्थेगवार्थेच युद्धादन्यत्रापि जलाग्निदंष्ट्रिहतस्य । यस्यचेच्छतिपार्थिवः स्वकार्यार्थपरिपालनाधिकृतस्य कुतएतद्यतोराज्ञांपरिपालनएवाशौचनिवृत्तिस्तत्र कुतोन्यस्याविशेषेण तदिच्छयाविनिवृत्तिःस्यात् ॥ ९५ ॥

(२) **सर्वज्ञनारायणः** । डिम्बाहवहतानां ये बान्धवास्तेषांसद्यःशौचमित्यर्थः । एवमुत्तरेष्वपि । अत्रच कानिचिन्मरणान्यतिनिन्दितत्वेनाशौचाभावकारणानिकानिचिदतिशस्तत्वेनेतिविवेचनीयम् । डिम्बाहवोऽराजकंयुद्धं । विद्युता हतानां पार्थिवैः क्षुद्रापराधेन हतानां द्विजैरभिचारादिना तदभिचारनिमित्तंतद्विप्रियकरणएव । गोब्राह्मणस्येति गवां ब्राह्मणस्य वा प्राणरक्षार्थं हतानां । यस्य च स्वपरिचारकस्यानन्यसाध्यव्यापारेष्वाशौचाभावंराजेच्छति ॥ ९५ ॥

(३) **कुल्लूकः** । डिम्भाहवोनृपरहितयुद्धं तत्र हतानां विद्युता वज्रेण पार्थिवेण वधार्हे ऽपराधे हते गोब्राह्मणरक्षणार्थंविनापि युद्धंजलाग्निव्याघ्रादिभिर्हतानां यस्य पुरोहितादेःस्वकार्याविघातार्थंनृपतिरशौचाभावमिच्छति तस्यापि सद्यः शौचम् ॥ ९५ ॥

(४) **राघवानन्दः** । किंच डिम्भेति । डिम्भाहवोनृपतिरहितयुद्धंतेन हतानां युद्धंविना हतानामपिगोविप्रार्थंजलादिव्याघ्राद्यैश्च हतानां । पार्थिवोवा यस्य पुरोहितादेः स्वकार्यपरिपालनाद्यर्थमाशौचाभावमिच्छति तस्यापि सद्यः शौचम् ॥ ९५ ॥

(५) **नन्दनः** । डिम्भोबालः । महाजनसंमर्दइतिकेचित् । विद्युताअशन्या । गोब्राह्मणहेतोर्हतानांच । अत्रापि सद्यःशौचमित्यनुषज्यते ॥ ९५ ॥

(६) **रामचन्द्रः** । डिम्भाहवहतानां डिम्भाहवोराजकंयुद्धं अशस्त्रकलहः तत्र हतानां । विद्युत्पातेन पार्थिवेनच हतानां । गोब्राह्मणरक्षार्थंविपन्नानां मृतानां संबन्धिनां ये सपिण्डास्तैरप्याशौचंन कार्यम् । यस्य पार्थिवः शुद्धत्वमिच्छति सएव शुद्धः स्वस्वाधिकारस्थलेपौरोहित्यादौ ॥ ९५ ॥

सोमाग्न्यर्कानिलेन्द्राणांवित्ताप्पत्योर्यमस्य च ॥ अष्टानां लोकपालानां वपुर्धारयते नृपः ॥९६॥

(१) **मेधातिथिः** । वपुस्तेजोंशः । वित्तपतिर्वैश्रवणः । अपांपतिर्वरुणः । अत्रैव द्वितीयोर्थवादः ॥ ९६ ॥

(२) **सर्वज्ञनारायणः** । सोमादीनामष्टानांलोकरक्षकाणाम् । वपुस्तेजोंऽशं । सोमउत्तरस्याअधिपतिः । अर्कस्त्वैशान्यारुद्रमूर्तित्वात्तस्य । वित्तपतिः कुबेरोनैर्ऋत्याः । कालपतित्वात् । अप्पतिर्वरुणः । अन्येषांतु लोकपालानां दिशः प्रसिद्धाः । राजधर्मेषु चैतदुपपादयिष्यति ॥ ९६ ॥

(३) **कुल्लूकः** । चन्द्राग्निसूर्यवायुशक्रयमानांवित्तस्यापांच पत्योःकुबेरवरुणयोरेवमष्टानांलोकपालानांसंबन्धिदेहं राजा धारयति ॥ ९६ ॥

---

(९५) डिम्बाहव=डिम्भाहव (नं०)

(४) **राघवानन्दः** । राज्ञआशौचसंकोचेतद्वाक्यतस्तत्संकोचेचार्थवादमाह सोमेतिद्वाभ्यां । वित्ताप्पत्योः कुबेर-वरुणयोः वपुस्तेजस्तत्तत्कर्मणि ॥ ९६ ॥

(५) **नन्दनः** । राज्ञामाशौचाभावंश्लोकद्वयेनोपपादयति सोमेति । वित्तपतिर्वैश्रवणः । अप्पतिर्वरुणः ॥ ९६ ॥

(६) **रामचन्द्रः** । कुतोराज्ञामाशौचाभावइत्यपेक्षायामाह सोमेति । सोमादीनामष्टानांलोकपालानांवपुर्नृपोधारयते । वित्ताप्पत्योः कुबेरवरुणयोः ॥ ९६ ॥

लोकेशाधिष्ठितोराजा नास्याशौचंविधीयते ॥ शौचाशौचं हि मर्त्यानां लोकेशप्रभवाप्ययम् ॥ ९७ ॥

(१) **मेधातिथिः** । एतैर्लोकेशैरधिष्ठितोराजा नास्यशौचाशौचं । यतोमर्त्यानांमनुष्याणामाभ्यामधिकारः । तयोश्च प्रभवाप्ययौ प्रवृत्तिनिवृत्ती लोकेभ्यःसकाशान्मर्त्यानां नतु लोकेशानामेव ॥ ९७ ॥

(२) **सर्वज्ञनारायणः** । नास्याशौचमसाधारणंलोकेशकर्मणि । शौचाशौचंहि मिलितंमर्त्यानामेव न देवानां तेषां शौचमात्रत्वात् । लोकेशप्रभवोह्ययमतोनास्याशौचमित्यर्थः । लोकेशप्रभवोऽप्ययइतितुक्वचित्पाठस्तत्र लोकेश प्रभवे नृपेशौचाशौचयोरप्ययोभ्यपनयोऽतोयस्य शौचमाशौचंवाऽपनेतुमिच्छति तस्य तदपनयोभवतीत्यर्थः ॥ ९७ ॥

(३) **कुल्लूकः** । ततः किमतआह लोकेशेति । यतोलोकेशांशाक्रान्तोनृपतिरतोनास्याशौचमुपदिश्यते यस्मान्मनुष्याणांयच्छौचमशौचंवा तल्लोकेशेभ्यः प्रभवति विनश्यति च अप्ययोविनाशः । एतेनान्यदीयशौचाशौचोत्पादनविनाशशक्तस्य लोकेश्वररूपस्य नृपतेः कुतः स्वकीयाशौचमिति पूर्वोक्ताशौचाभावस्तुतिः ॥ ९७ ॥

(४) **राघवानन्दः** । लोकेशाधिष्ठितः उक्तैः सोमाद्यैर्लोकपालैरधिष्ठितः स्वांशेनानुगृहीतः । लोकेशप्रभवात्ययं लोकेशेभ्यः प्रभवतितद्वाक्यतआशौचंभवति पुनस्तेभ्योत्ययः अभावोपि तद्वाक्यादेव यस्य शौचाशौचंविशेष्यंअस्यापि लोकेशत्वादयमेव परकीयाशौचसंकोचे हेतुर्युक्तः । लोकेशप्रभवाप्ययावितिक्वचित्पाठस्तदा तयोः प्रवृत्तिनिवृत्ती लोकेशेभ्यः सकाशान्मर्त्यानां नतु लोकेशानामितिमेधातिथिः ॥ ९७ ॥

(५) **नन्दनः** । अयंराजालोकेशप्रभवोदेवइत्यर्थः ॥ ९७ ॥

(६) **रामचन्द्रः** । राजा लोकेशाधिष्ठितः तस्मात्कारणादस्य राज्ञः आशौचंन विद्यते । अयं राजा लोकेशेभ्यः । प्रभवोयस्य सलोकेशप्रभावः ॥ ९७ ॥

उद्यतैराहवे शस्त्रैः क्षत्रधर्महतस्य च ॥ सद्यः संतिष्ठते यज्ञस्तथाऽऽशौचमिति स्थितिः ॥ ९८ ॥

(१) **मेधातिथिः** । येन शस्यते हन्यते तच्छस्त्रम् । अतः पाषाणलगुडादिनापि हतस्य यज्ञसंस्था निष्पद्यतेनायुधैरेव खड्गादिभिः । आहूयन्ते यत्रेतरेतरंस्पर्धमानायुद्धाय सआहवः संग्रामः । क्षत्रधर्मः अपराङ्मुखत्वं प्रजार्थे प्रभुप्रयुक्तंच सद्यःसंतिष्ठते समाप्तिमेति । यज्ञोज्योतिष्टोमादिरतत्पुण्येन युज्यतइति यावदाशौचमपि सद्यएव । अत्रकेचित् क्षत्रधर्महतस्येत्यनेन सद्यइत्यभिसंबध्नन्ति । ततश्च यःसंग्रामभूमौ मृतःतस्यैवायंविधिर्नतु योम्येद्युस्ततोन्यत्र गतस्तदेतद्विचार्यम् ॥ ९८ ॥

(२) **सर्वज्ञनारायणः** । उद्यतैःशस्त्रैरिति कूटशस्त्रादिघातव्यवच्छेदः । आहवे नृपतिकर्तृके युद्धे क्षत्रधर्मेणापराङ्मुखत्वादिना हतस्य यज्ञः । पितृयज्ञोऽस्थिसंचयनदशाहपिण्डादिसहितः सद्यः सन्तिष्ठते समापनीयस्तदाशौचंच सद्यइत्यर्थः ॥ ९८ ॥

(३) कुल्लूकः । उद्यतैः शस्त्रैः खड्गादिभिर्नतु लगुडपाषाणादिभिरपराङ्मुखत्वादिक्षत्रियधर्मयुक्तसंग्रामे हतस्य तत्क्षणादेव ज्योतिष्टोमादियज्ञः संतिष्ठते समाप्तिमेवेति तत्पुण्येन युज्यतइत्यर्थः । तथाशौचमपि तत्क्षणादेव समाप्तिमेति इयंशास्त्रे मर्यादा ॥ ९८ ॥

(४) राघवानन्दः । किंच उद्यदस्त्राद्यपराङ्मुखयुद्धहतस्य क्षत्रियादेर्ज्योतिष्टोमादियज्ञः समाप्तिंगच्छतिआशौचंचेत्याह उद्यतैरिति । अस्त्रैरस्यतेघात्यतेयैर्लगुडाद्यैरपि आहवे संग्रामे । ज्योतिष्टोमादिपुण्येन युज्यतइतिमेधातिथिः । प्रकरणात्पुत्राद्याशौचाभावपरंवा ॥ ९८ ॥

(५) नन्दनः । संतिष्ठते समाप्नोति । युद्धस्य यज्ञत्वसंस्तवः परधर्मत्वप्रतिपादनार्थः । तथाशौचमपिसद्यः संतिष्ठते ॥ ९८ ॥

(६) रामचन्द्रः । आहवे सङ्ग्रामे उद्यतैःशस्त्रैः कूटशस्त्रैः व्यवच्छेदरूपैः क्षत्रधर्महतस्य च सद्यःशौचं यज्ञः पितृयज्ञः सद्यःसंतिष्ठते भवति । तथा अशौचं सद्यः अशौचंशौचाभावः । इति स्थितिः मर्यादा ॥ ९८ ॥

विप्रः शुध्यत्यपःस्पृष्ट्वा क्षत्रियोवाहनायुधम् ॥ वैश्यः प्रतोदं रश्मीन्वा यष्टिं शूद्रः कृतक्रियः॥९९॥

(१) मेधातिथिः । दशाहादीनांकल्पानांपरिपूर्णआशौचकालइदमपरंकर्तव्यम् । अपःस्पृष्ट्वेतिस्नानमुपदिश्यतइति प्राग्व्याख्यातम् । कृतक्रियइतिक्षत्रियादिभिरभिसंबध्यते । क्रियाच स्नानमेव अन्यस्याश्रुतत्वात् । स्नात्वावहनादीनि स्पृशेयुः । अन्येतु श्राद्धक्रियामाहुः । श्राद्धादिकृत्वा सर्वएव विशुध्यति । तत्रापि ब्राह्मणउदकंहस्तेन स्पृष्ट्वा क्षत्रियादयस्तु वाहनादिभिः ॥ ९९ ॥

(२) सर्वज्ञनारायणः । एकादशेन्हि प्रातःशुध्यर्थं स्नात्वा जलस्पर्शखड्गाश्वादिस्पर्शप्रतोदरश्म्यन्यतरस्पर्शकाष्ठदण्डस्पर्शैःक्रमाच्छुद्धिरित्यर्थः । कृतक्रियोतीतदशाहकृत्यकालइत्यर्थः ॥ ९९ ॥

(३) कुल्लूकः । अशौचान्ते कृतश्राद्धादिकृत्योब्राह्मणोऽपः स्पृष्ट्वेति जलस्पर्शमात्रंदक्षिणहस्तेन कृत्वा शुद्धोभवति नतु संवत्सरे व्यतीते तु स्पृष्ट्वैरद्भिर्विशुध्यतीतिवत् स्नात्वा वाहनादिस्पर्शसाहचर्यात् स्पृष्ट्वेत्यस्य च सकृदुच्चरितस्यार्थभेदस्यान्याय्यत्वात्क्षत्रियोहस्त्यादिवाहनंखड्गाद्यस्त्रंच वैश्योबलीवर्दादितोदंलोहमोताग्रं योक्त्रंवा शूद्रोयष्टिंवंशदण्डकाम् ॥ ९९ ॥

(४) राघवानन्दः । कृतश्राद्धादिब्राह्मणादिचतुष्टयमाशौचान्तेऽबादिचतुर्णांस्पर्शनेनैव शुध्येदित्युत्तराङ्गमाह विप्रइति । प्रतोदं सूक्ष्मलोहाग्रदण्डं । रश्मीन् योक्त्ररज्जुं । कृतक्रियः कृतोर्ध्वदैहिकाक्रिया येन सविप्रादिः । इतिदैहिकशुद्धिः ॥ ९९ ॥

(५) नन्दनः । कृतक्रियः समापितसमस्ताशौचक्रियइत्यर्थः ॥ ९९ ॥

(६) रामचन्द्रः । सूतकान्ते कृतक्रियः कृतश्मश्रुवपनादि तैलेन पिण्याकेन सह कृतस्नानः विप्रःअपःस्पृष्ट्वा कृताचमनः शुध्यति । एवंकृतशौचोक्षत्रियः वाहनायुधंस्पृष्ट्वा शुध्यति । एवंकृतशौचोवैश्यः प्रतोदंरश्मीन्वा स्पृष्ट्वा शुध्यति । एवंशूद्रःकृतशौचोयष्टिंस्पृष्ट्वाशुध्यति ॥ ९९ ॥

एतद्वोऽभिहितं शौचं सपिण्डेषु द्विजोत्तमाः ॥ असपिण्डेषु सर्वेषु प्रेतशुद्धिं निबोधत ॥१००॥

(१) मेधातिथिः । पूर्वोत्तरवस्तुपसंहारोपपत्त्युपन्यासार्थौपूर्वोत्तरावर्धश्लोकौ ॥ १०० ॥

(२) सर्वज्ञनारायणः । सपिण्डेषु मृतेषु तन्मरणनिमित्तकाशौचे सति शौचं । असपिण्डेषु प्रेतशुद्धिं प्रेतवहनादिनिमित्ताशौचशुद्धिम् ॥ १०० ॥

(३) कुल्लूकः । भोद्विजश्रेष्ठाएतच्छौचंसपिण्डेषु प्रेतषु युष्माकमुक्तम् । इदानीमसपिण्डेषु प्रेतशुद्धिंशृणुत ॥ १०० ॥

(४) राघवानन्दः । वर्तिष्यमाणशुत्थ्यर्थंवृत्तमुपसंहरति एतदितित्रिभिः ॥ १०० ॥

असपिण्डं द्विजं प्रेतंविप्रोनिर्हृत्य बन्धुवत् ॥ विशुध्यति त्रिरात्रेण मातुराप्तांश्च बान्धवान् ॥१०१॥

(१) मेधातिथिः । बन्धुवदिति धर्मेण न मूल्येन । मातुराप्तांश्च आप्तग्रहणंप्रत्यासन्नबान्धवमातुलादिग्रहणार्थम् । अत्मात्रानुमीयते असपिण्डः असमानोदकोन सर्वसपिण्डादन्यः ॥ १०१ ॥

(२) सर्वज्ञनारायणः । निर्हृत्य दाहाङ्गनिर्हरणान्यतमं दाहंवा कृत्वा । बन्धुवत् धनमगृहीत्वा त्र्यहमात्रेण तद्गृहवासे नचेत्तस्मिन्नित्येकाहे वक्ष्यमाणत्वात् । मातुश्च बान्धवान् चकारात्पितुश्चासगोत्रबन्धून् तथा आप्तानागन्तुना संबन्धेन आप्तान्स्यालादीन् ॥ १०१ ॥

(३) कुल्लूकः । असपिण्डंब्राह्मणंमृतंब्राह्मणोबन्धुवत् स्नेहानुबन्धेन न त्वदृष्टबुद्ध्येत्यर्थादुक्तम् । मातुश्चाप्तान्सन्निकृष्टान्सहोदरभ्रातृभगिन्यादीन्बान्धवान्निर्हृत्यत्रिरात्रेण शुद्धोभवति ॥ १०१ ॥

(४) राघवानन्दः । धर्मेणैवं मातुराप्तान् सोदरभ्रातृतत्पुत्रभगिन्यादीन् । मातुले पक्षिणीमित्यसन्निकृष्टे ॥ १०१ ॥

(५) नन्दनः । निर्हृत्य वहनादिकंकृत्वा । बन्धुवदुपकारबुद्ध्या ॥ १०१ ॥

(६) रामचन्द्रः । मातुर्बान्धवान् मातृष्वस्रीयादीन् चकारात्पितुःष्वसुःपुत्रादीन् तथा आप्तान् स्यालादीन् निर्हृत्य दग्ध्वा त्रिरात्रेण विशुध्यति ॥ १०१ ॥

यद्यन्नमत्ति तेषां तु दशाहेनैव शुध्यति ॥ अनदन्नन्नमह्नैव न चेत्तस्मिन्गृहे वसेत् ॥ १०२ ॥

(१) मेधातिथिः । अनश्नतोनिवसतश्च पूर्वोक्तस्त्रिरात्रएव । अश्नतोऽनिवसतश्च एकाहएव । अश्नतःनिवसतश्च दशाहएव ॥ १०२ ॥

(२) सर्वज्ञनारायणः । यद्यन्नमत्ति निर्हृत्य वा उभयथा दशाहेन । तदन्नाशनतद्गृहवासयोरकरणे निर्हरणाद्यकरणे चैकाहइति विवेकः ॥ १०२ ॥

(३) कुल्लूकः । निर्हारकोयदि तेषांमृतस्य सपिण्डानामाशौचिनामन्नमश्नाति तदा तद्दशाहेनैव शुध्यति न त्रिरात्रेण । अथ तेषामन्नंनाश्नाति गृहे च तेषां न वसति निर्हरति च तदाहोरात्रेणैव शुध्यति । एवंच तद्गृहवासे सति तदन्नाभोजिनोनिर्हारकस्य पूर्वोक्तंत्रिरात्रम् ॥ १०२ ॥

(४) राघवानन्दः । स्नेहादिवत्वेत्वाह यदीति । अयमर्थः अन्नंनाश्नाति गृहे न वसति निर्हरति च तदाहोरात्रेण शुध्यति । गृहेवसन्नान्नमश्नाति तदा पूर्वोक्तत्रिरात्रेण । गृहेवसन्नन्नमदन्दशाहेनेति ॥ १०२ ॥

(६) रामचन्द्रः । अन्नमनदन्नभक्षयन् अह्नैव विशुध्यति ॥ १०२ ॥

अनुगम्येच्छया प्रेतं ज्ञातिमज्ञातिमेव च ॥ स्नात्वा सचैलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यति ॥१०३॥

(१) मेधातिथिः । अनुगमनंबुद्धिपूर्वमनुव्रजनम् । यथाकथंचिदधिगमनेनच सचैलंस्नानम् । अग्निस्पर्शौघृतप्राशनंचसमुच्चितंशुद्धिहेतुः ॥ १०३ ॥

(२) सर्वज्ञनारायणः। इच्छया न धनादिना । ज्ञातिं सपिण्डादिसंबन्धिनम् । अज्ञातिमसंबन्धिनम् घृतप्राशनं नान्नान्तरनिवर्तकम् । विशुध्यति अनुगमदोषात् ॥ १०३ ॥

(३) कुल्लूकः। ज्ञातिमज्ञातिंवा मृतमिच्छातोऽनुगम्य सचैलस्नानंच कृत्वा ततोऽग्निंस्पृष्ट्वा पश्चाद्घृतप्राशनं कृत्वा अनुगमननिमित्ताशौचाद्विशुध्यति ॥ १०३ ॥

(४) राघवानन्दः। ज्ञातिमिवाज्ञातिमनुगम्य बुद्धिपूर्वं अनुगमननिमित्तस्यौपाधिकस्याशौचस्य स्नानादित्रयंप्रायश्चित्तं नाधिकाशौचे मानमस्तीति भावः। अनुगमननिमित्ताद्वाशौचात् अग्न्यादित्रयेण सर्वे शुध्येयुः शुद्धेः कर्तॄणि देहिनामिति वक्ष्यमाणत्वात् । ज्ञातिपक्षेउक्तमाशौचमस्त्येव ॥ १०३ ॥

(५) नन्दनः। अनुगम्यनीयमानेन शवेन सहगत्वा ॥ १०३ ॥

न विप्रं स्वेषु तिष्ठत्सु मृतं शूद्रेण नाययेत् ॥ अस्वर्ग्या ह्याहुतिः सा स्याच्छूद्रसंस्पर्शदूषिता ॥ १०४

(१) मेधातिथिः। ननाययेन्ननिर्हारयेत् । स्वेषु तिष्ठत्सु समानजातीयेषु सत्सु । आहुतिग्रहणान्न दाहयेदिति । विप्रग्रहणमतन्त्रं । क्षत्रियवैश्ययोरपि शूद्रसंस्पर्शोदोषएवेत्यर्थवादात्प्रतिषेधःप्रतीयते ॥ १०४ ॥

(२) सर्वज्ञनारायणः। स्वेषु विप्रेषु । क्षत्रियादेस्तु स्वेषु तिष्ठत्स्वपि शूद्रेण नयने दोषाभावः। स्वेषुतिष्ठत्स्विति वचनात्स्वेष्वसत्सुशूद्रेणापि निर्हार्योविप्रः। अस्वर्ग्या स्वर्ग्यानभवतीत्यर्थः । यजमानोहिपितृमेधे हविस्तस्य शूद्रेण संपर्कात्तेन हविषा कृताहुतिर्दुष्यतीतितात्पर्यम् । अत्र शौचमधिकृत्य स्मृत्यन्तरीयशुद्धिप्रकारोऽस्माभिः शुद्धिदीपिकायांप्रपञ्चितइतितेषामेतदविरोधेन व्यापारस्तत्रैवानुसंधेयः ॥ १०४ ॥

(३) कुल्लूकः। ब्राह्मणादिंमृतंसमानजातीयेषु स्थितेषु न शूद्रेण पुत्रादिर्निर्हारयेत् यस्मात्सा शरीराहुतिः शूद्रस्पर्शदुष्टासती मृतस्य स्वर्गाय हिता न भवति मृतं स्वर्गं न प्रापयतीत्यर्थः। स्वेषु तिष्ठत्स्वित्यभिधानाद्ब्राह्मणाभावे क्षत्रियेण तदभावे वैश्येन तदभावे शूद्रेणाऽपि निर्हारयेदित्युक्तम् । यथापूर्वंश्रेष्ठत्वादस्वर्ग्यदोषश्च ब्राह्मणादिसद्भावे शूद्रेण निर्हरणे सति बोद्धव्यः। गोविन्दराजस्तु दोषनिर्देशात्स्वेषु तिष्ठत्स्वित्यविवक्षितमित्याह तदयुक्तम् । संभवदर्थपदद्वयोच्चारणवैयर्थ्यप्रसङ्गादुपक्रमावगतेश्च वेदोदितन्यायेनानुबोध्यत्वाद्गुणभूतशुद्ध्यनुरोधेन प्रधानभूतायाजातेरुपेक्षायांगुणलोपेनऽमुख्यस्येत्यपि न्यायो बाध्येत तस्मात्स्वेषु तिष्ठत्स्वितिपदद्वितयं विवक्षितम् । इमांगोविन्दराजस्य राजाज्ञांनाद्रियामहे ॥ १०४ ॥

(४) राघवानन्दः। स्वेषुज्ञातिषुसत्सु सजातीयेषुवा नहापयेत् न निर्हरेत् । सादेहाहुतिः स्वर्गार्हानभवतीत्यर्थवादः न स्वाहुतिर्नकार्या प्रधानलोपापत्तेः प्रकरणबाधश्चातोवक्ष्यति संकरजातिनिर्णये अबान्धवंशवंचैवनिर्हरेयुरितिस्थितिरिति ॥ १०४ ॥

(५) नन्दनः। स्वेषु सजातीयेषु । तिष्ठत्सु तत्र विद्यमानेषु । आहुतिः शवाहुतिः ॥ १०४ ॥

(६) रामचन्द्रः। शूद्रसंस्पर्शगर्हिता दूषिता । यथा यमः ॥ प्रस्थानयति शूद्रोग्निंतृणंकाष्ठंहवींषि च । प्रेतत्वंहिसदा तस्य सचाधर्मेण लिप्यते ॥ १०४ ॥

ज्ञानंतपोग्निराहारोमृन्मनोवार्युपाञ्जनम् ॥ वायुः कर्मार्ककालौ च शुद्धेः कर्तॄणि देहिनाम् ॥ १०५ ॥

(१) मेधातिथिः। ज्ञानादीनि कालशुद्धेःदृष्टान्ततयोपादीयन्ते । तथैतानि स्वविषये शुद्धिकारणानि एवंकालोपि

नात्रातिशङ्कितव्यः। एतेषांयस्य यत्र शुद्धिहेतुत्वं तदिहैव प्रकरणे तेषांवक्ष्यते। अन्येषांतत्रतत्रदेशे। तत्र ज्ञानमाध्यात्मिकं साङ्ख्ययोगोपदिष्टं तेनहि अविद्यावासनापासनेन रागादिक्षयेनिर्दोषज्ञानमुपैति। वक्ष्यतिच बुद्धिर्ज्ञानेन शुध्यतीति। तपः कृच्छ्रचान्द्रायणादि तत्पातकोपपातकानांशुद्धिहेतुः। अग्निर्मृन्मयादिषु पुनःपाकेनेति। आहारः पवित्राणां पयोमूलानां सोपि तपइव शोधयति। मृद्वारिणांशुद्धिहेतुताप्रसिद्धैव। मनसोवक्ष्यते मनःसत्येनेति। उपाञ्जनं मठादेःसुधागोमयादिना संमार्जनानुलेपने। वायुश्चण्डालादिस्पृष्टे तृणकाष्ठादौ रथ्यापतिते। कर्माणि संध्योपासनादीनि। उक्तंच॥ पूर्वांसंध्यांजपंस्तिष्ठेन्नैशमेनोव्यपोहतीति। एतच्च द्वितीये व्याख्यातम्। सत्यपि तपसःकर्मत्वे प्राधान्यख्यापनार्थंपृथगुपदेशः प्रायेण च शास्त्रेभेदेनैव कर्मणस्तपोनिर्दिश्यते कर्मनिष्ठास्तपोनिष्ठाइति॥ १०५॥

(२) **सर्वज्ञनारायणः**। अथ बाह्यद्रव्यशरीरोपघातशुद्धिप्रकारानभिधित्सुः सामान्यतः शोधनान्याह ज्ञानमिति। ज्ञानं ब्रह्मज्ञानं सकलपापक्षयहेतुत्वाच्छोधकम्। तपः प्राणायामः। प्राणायामः परंतपइतिवचनात्। अग्निस्तैजसादीनामिव देहिनांमूर्धाग्निः। आहारोब्रह्मसुवर्चलापानादिर्दुष्टजलादिपाने। मृद्दशौचादौमनःक्षमाख्यनियमयुक्तंजीवस्य वारिक्षालनादिना। उपाञ्जनं सजातीयेन लेपोभूम्यादेः। वायुः सर्वायुष्टेन जीवपावनः। कर्मचान्द्रायणव्रात्यस्तोमादि। अर्कोदर्शनादिना अस्थिस्पर्शादेः। कालोदशाहादिः। आशौचिनांदेहिनांदाहप्रभृति॥ १०५॥

(३) **कुल्लूकः**। ज्ञानादीनि शुद्धेः साधनानि भवन्ति। तत्रब्रह्मज्ञानंबुद्धिरूपान्तःकरणशुद्धेः साधनम्। यथा वक्ष्यति। बुद्धिर्ज्ञानेन शुध्यति तपोयथा तपसा वेदवित्तमाः। अग्निर्यथा पुनः पाकेन मृन्मयम्। आहारोयथा हविष्येण यवाग्वा इति। मृद्वारिणी यथा मृद्वार्यादेयमर्थवदिति। मनोयथा मनःपूतंसमाचरेदिति। संकल्पविकल्पात्मकंमनोनिश्चयात्मिका बुद्धिरिति मनोबुद्ध्योर्भेदः। उपाञ्जनमुपलेपनं यथा मार्जनोपाञ्जनैर्वेश्म। कर्मयथायजेद्वाऽश्वमेधेनेत्यादि। अर्कोयथा गामालभ्याकंमीक्ष्यवा। कालोयथा शुध्येद्विप्रोदशाहेन वायोस्तु शुद्धिहेतुत्वं मनुनानुक्तमपिपन्थानश्च विशुध्यन्ति सोमसूर्यांशुमारुतैरितिविष्णवादावुक्तंग्राह्यम्॥ १०५॥

(४) **राघवानन्दः**। दशाहादेः शुद्धिहेतुतावत्ज्ञानादेरप्याह ज्ञानमिति। ज्ञानंब्रह्मज्ञानं। असौवावलोकोगौतमाग्निरित्यादिपञ्चाग्निविद्यादिज्ञानंच नहि ज्ञानेन सदृशंपवित्रमित्युक्तेः। तपश्चान्द्रायणादि आहारोहविष्येण यवाग्वा वा। मनोमनःपूतंसमाचरेत्। वायुः प्राणायामः बाह्यवायुश्च। वारि जलं। उपाञ्जनं उपलेपनं। कर्म तरति ब्रह्महत्यां योश्वमेधेनयजतइत्यादि। कालः शुध्येद्विप्रोदशाहेनेत्यादिः। प्रकरणात्कालवदेतान्यपि देहिनांशुद्धिहेतवइतिवा॥ १०५॥

(५) **नन्दनः**। शुद्धिहेतूनाह ज्ञानमिति। ज्ञानमध्यात्मज्ञानंतच्छुद्धिकारणं शरीरात्मविवेकेन। तपोऽनशनादिकंतच्छरीरगतदोषनिर्हरणे। अग्निःस्पर्शनादिना। आहारः पञ्चगव्यादिसत्त्वशोधनेन। मृद्वारणादिना। मनोदेवताध्यानेन वारि स्नानादिना। उपाञ्जनं गोमयादिकं तदुपलेपेन। वायुश्चण्डालादिस्पृष्टतृणकाष्ठादीनांस्पर्शेन। कर्मयज्ञादिकंतद्देवताप्रीणनेन। अर्ककोंऽशुभिर्वस्तुशोषणेन। कालएकरात्रपक्षिण्यादिः सदोषपावनेन॥ १०५॥

(६) **रामचन्द्रः**। ज्ञानं आध्यात्मिकं। तपः प्राणायामादि। आहारः जलपानादिः। देहिनामेतानि शुद्धेःकर्तृणीत्यर्थः॥ १०५॥

सर्वेषामेव शौचानामर्थशौचं परंस्मृतम्॥ योऽर्थे शुचिर्हि सशुचिर्न मृद्वारिशुचिःशुचिः॥१०६॥

(१) **मेधातिथिः**। कोस्यप्रसंगः। यथामृद्वारिशुचावविलम्बंकृतोत्सर्गःप्रवर्तते तथा प्रमादस्खलितेपरद्रव्यापहरणादावविलम्बितंप्रायश्चितंशुद्धये समाश्रयणीम्॥ १०६॥

(२) **सर्वज्ञनारायणः** । अर्थशौचं शुद्धोपायागतार्थत्वम् ॥ १०६ ॥

(३) **कुल्लूकः** । सर्वेषांमृद्वारिनिर्मित्तदेहशौचमनःशौचादीनांमध्यादर्थशौचमन्यायेन परधनहरणपरीहारेण यद्वनेहा तत्परंप्रकृष्टमन्वादिभिः स्मृतम् । यस्माद्योऽर्थे शुद्धः सशुद्धोभवति । यः पुनर्मृद्वारिशुचिरर्थे चाशुद्धः सोऽशुद्धएव ॥ १०६ ॥

(४) **राघवानन्दः** । एकादशाहादौवक्ष्यमाणंप्रासंगिकमाह सर्वेषामिति । अर्थेशुचिः परद्रव्याहरणंकर्मविवक्षितं अथवाअर्थेनदत्तेनैवाशौचशुद्धिरतआह यइति अर्थेविषये शुचिरकृपणोदातेतियावत् अतएव वक्ष्यति दानेनाकार्यकारिण इतिदानेनवधनिर्णेजकमित्यादिच ॥ १०६ ॥

(५) **नन्दनः** । अर्थशौचमान्तरेभ्यः श्रेष्ठमित्याह सर्वेषामिति ॥ १०६ ॥

(६) **रामचन्द्रः** । सर्वेषांशौचानांमध्ये अर्थशौचं मानसंशौचमिन्द्रियनिग्रहादिकं परं उत्कृष्टं स्मृतम् । यः कश्चन पदार्थः अर्थे मानसिके शौचे इन्द्रियनिग्रहादौ शुचिः सएव शुचिः । मृद्वारिभ्यांशुचिः शुचिर्न किंतु एतादृशः स्वयमेव शुचिः ॥ १०६ ॥

क्षान्त्या शुध्यन्ति विद्वांसोदानेनाकार्यकारिणः ॥ प्रच्छन्नपापाजप्येन तपसा वेदवित्तमाः॥१०७॥

(१) **मेधातिथिः** । एकादशे वक्ष्यति । ये विद्वांसस्तेक्षान्त्यैव शुध्यन्ति । तेहि द्वेषेर्ष्यामत्सरैर्नोपहन्यन्ते ततोदुष्कृतेषु प्रवृत्तेषु नित्यशुद्धाभवन्ति । क्षान्तिर्नाम चित्तधर्मः सर्वत्र साम्यम् । दानस्याप्यकार्यकृच्छुद्धिरुक्ता दानेन वधनिर्णेकमित्यादिना प्रच्छन्नपापानामपि रहस्याधिकारे जपउक्त एव । तपोवेदविदांवेदाभ्यासएव ज्ञानंच । यथोक्तं ब्राह्मणस्य तपोज्ञानमिति । कृच्छ्रादि तु सर्वेषांशुद्धिहेतु न वेदविदामेव ॥ १०७ ॥

(२) **सर्वज्ञनारायणः** । क्षान्त्या क्लेशसहत्वेन विद्वांसोऽज्ञात्वाऽकार्यकारिणः । अकार्यकारिणः षण्ढवधादिना दानापनेयपापकारिणोदानेन वक्ष्यमाणसीमादिदानेन । प्रच्छन्नपापाः परैरज्ञातपापचरणाः जप्येन रहस्यप्रायश्चित्तरूपेण । तपसा प्राणायामेन वेदवित्तमाः । उपनिषदर्थीभूतात्मविदःवेदोवेदार्थः । एतेन यतिनांसर्वविषये प्राणायामाएव प्रायश्चित्तंगुरुलघ्वपेक्षयातुभूयस्त्वाल्पत्वे इतिग्राह्यम् ॥ १०७ ॥

(३) **कुल्लूकः** । परेणापकारे कृते तस्मिन्प्रत्यपकारबुद्ध्यनुत्पत्तिरूपया पण्डिताः शुध्यन्ति । यथाच वक्ष्यति महायज्ञक्रियाः क्षमा नाशयंत्याशुपापानीति । अकार्यकारिणोदानेन । यथा वक्ष्यतिसर्वस्वंवा वेदविदे ब्राह्मणायेति । अप्रख्यातपापाजप्येन यथावक्ष्यति जपंस्तूपवसेद्दिनमिति वेदवित्तमाः वेदार्थचान्द्रायणादितपोविदः तपसेत्येकादशाध्याये वक्ष्यमाणेन ॥ १०७ ॥

(४) **राघवानन्दः** । किंच क्षान्त्येति । तितिक्षया । प्रच्छन्नपापामिथुनातिरिक्तजनाविदितपापाः मनोजनितपापावा जप्येन गायत्र्यादेः । तपसा कृच्छ्रचान्द्रायणादिना वेदान्ताभ्यासेन वा ॥ १०७ ॥

(५) **नन्दनः** । क्षान्त्या द्वन्द्वसहिष्णुतया । विद्वांसोऽध्यात्मविदः । तपसास्वाध्यायेन तपोहिस्वाध्यायइति स्वाध्यायप्रवचने । तद्धि तपस्तद्धितपः इतिश्रुतेः ॥ १०७ ॥

(६) **रामचन्द्रः** । परमार्थशुचित्वमाह क्षान्त्येति । विद्वान् क्षान्त्या कायक्लेशेन शुध्यति । अकार्यकारिणः यज्ञाहितकारिणः दानेन बन्धनादिना शुध्यन्ति । प्रच्छन्नपापानां अविख्यातदोषाणां अघमर्षणादिसूक्तजाप्येन शुद्धिः । वेदवित्तमोद्विजः तपसा कृच्छ्रचान्द्रायणादिना शुध्यति ॥ १०७ ॥

मृत्तोयैः शुध्यते शोध्यं नदी वेगेन शुध्यति॥ रजसा स्त्री मनोदुष्टा सन्यासेन द्विजोत्तमः॥१०८॥

(१) मेधातिथिः। नद्याःपारावारे क्षीणोदकायाअशुच्युपहते तस्याएव वेगागतायाःकूलंकषायाउदकंवेगेन शुध्यति। यथान्यस्याभूमेः भूमिःशुध्यति पञ्चभिरिति शुद्धये प्रतीतिर्नैवंनदीतीरेषु। अथवा वेगवत्या अशुचिप्रवाहसंसर्गेणाशुध्याशङ्कायामिदमुच्यते नदीवेगेनेति। नैवंमन्तव्यं इतश्चामुतश्चाशुचिप्रवाहैःसंस्पृष्टा न शुध्यति। शारीरेव्यभिचारे ऽनुपलभ्यमाने परपुरुषरूपगुणानुचिन्तनेन मनोदुष्टा रजसा ऋतौ शोणितेन सृतेन शुध्यति स्त्री। सन्यासः षष्ठे वक्ष्यते तेन द्विजोत्तमाःशुद्धाभवन्ति। न कथंचिन्मानसापचारे यदविदुषाचिन्तितसूक्ष्मप्राणिवधादितदेषामपनीयते ॥ १०८ ॥

(२) सर्वज्ञनारायणः। शोध्यं बहिर्द्रव्यं देहश्च। नदी ग्राममलवहा। मनोदुष्टा मनसा पुरुषान्तररक्ता रजसा रजोन्तरप्रवृत्त्या। सन्यासेन पारिव्राज्येन द्विजोत्तमोविप्रः। ॥ १०८ ॥

(३) कुल्लूकः। मलाद्युपहतंशोधनीयंमृज्जलैः शोध्यते। नदीप्रवाहश्च श्लेष्माद्यशुचिदूर्षितोवेगेन शुध्यति। स्त्री च परपुरुषमैथुनसंकल्पादिदूषितमानसा प्रतिमासार्तवेन तस्मात्पापाच्छुद्धा भवति। ब्राह्मणश्च संन्यासेन षष्ठाध्यायाभिधेयेन पापाच्छुध्यति ॥ १०८ ॥

(४) राघवानन्दः। शोध्यं मलाद्युपेतं। नदी श्लेष्माद्यशुचिदूषिता। मनोदुष्टा परपुरुषमैथुनसंकल्पदुष्टा रजसा पुनर्ऋतुयोगेन। द्विजोत्तमोब्राह्मणः संन्यासमुपक्रम्य ब्राह्मणः पुत्रैषणायाश्चसब्राह्मणः केन स्यादिति श्रुतेः पारिव्राज्यदर्शनाच्चेति भाष्योक्तेश्च सन्यासएवासाधारणः संस्कारोविप्रस्येति ॥ १०८ ॥

(५) नन्दनः। शोध्यंशरीरलग्नमलम्। मनोदुष्टा मनसा भर्तारंव्यतिक्रान्ता। सन्यासेन सङ्गत्यागेन ॥ १०८ ॥

(६) रामचन्द्रः। शोध्यंवस्तु अमेध्योपहतं मृत्तोयैः शुध्यति। नदी वेगेन वर्षाम्बुप्रवाहवेगेन। मनोदुष्टा मनसिव्यभिचारेण स्त्री रजोदर्शनेन शुध्यति। संन्यासः प्रव्रज्या द्विजन्मनांमानसोपचारे शुद्धिकृत् ॥ १०८ ॥

अद्भिर्गात्राणि शुध्यन्ति मनः सत्येन शुध्यति॥ विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुध्यति॥ १०९॥

(१) मेधातिथिः। इयानेवाधिकारी कर्ताच पुरुषोयदान्तरात्मा। अन्तःकरणंमनः। बुद्धिः। शरीरं भोगायतनं इन्द्रियाणांभौतिकत्वान्नपृथक्त्वम्। अत्र किंचित्केनचिच्छोध्यते। कालेनतु सर्वमितिस्तुतिपरम्। गात्राणीत्यवयवैरवयविनंलक्षयति। अद्भिः स्नानेन शरीरंशुध्यति। मनस्तु सदसदात्मकं तस्यासत्संकल्पादशुद्धिः सत्येन साधुसंकल्पेन निवर्तते। पूर्वमनसःशुद्धिहेतुत्वमुक्तं तदभ्याहारेणनेदंवाचोमनः शुद्धिकरणं। तथाच श्रुतिः। मनसावाइषिता वाग्वदति यांह्यन्यमनावाचंवदत्यसुर्यावैसावागंदेवजुष्टेति। यावाऽनुपभुक्तजन्मान्तरकृताशुभकर्मजा। एकैकदुष्कृतजावाबुद्धिरात्मनोयावत्सहजाविद्यात्मकाभेदग्रहणलक्षणागुणात्मविवेकाभावलक्षणावा धनपुत्राद्यभिषङ्गरूपा तृष्णातिशयहेतुःसातुविद्ययासाङ्ख्यवेदान्ताभ्यासजन्यया। तपसा च कृच्छ्रादिनाभ्युपेतःशुध्यति। भूतात्म भूतशब्दस्तत्ववचनः। पारमार्थिकोयमात्माऽनुभविताहंप्रत्ययवेद्योनतुभूतमयआत्मा शरीरात्मेतिमन्तव्यम्। बुद्धिरविद्यमानार्थाकारदर्शनीयात्वप्रमादिष्वसत्सिद्धान्तप्रकल्पितार्थाभिनिवेशतयावस्त्वात्मार्थाकारयीरसङ्गेदाध्यवसायेन दुष्यन्ती ज्ञानेन स्वप्रकाशाश्रययाप्रमाणव्युत्पत्त्या शुध्य-

---

(१०९) सत्येन=सत्त्वेन (नन्दनः)

ति । बुध्यर्थयोर्भेदादाकारवत्वादर्थस्य विषयाकारेण च परिणामासिद्धिर्निर्विकारत्वनिश्चयाद्बुद्धिशुद्धिः पूर्वत्रचविद्यावेदार्थवेदनमेव । तस्याश्चहेतुत्वं यथैधांस्तेजसा वन्हिरितिवदति । एवंशुद्धःपूतोब्रह्मलोकमवाप्नोतीत्येषा सा चतुर्विधा शुद्धिः । यथैताशुद्धयःपरपुरुषार्थहेतवस्तज्जननादिष्वियमितिप्रशंसा । ॥ १०९ ॥

(२) सर्वज्ञनारायणः । अद्भिः स्नानेन शुध्यन्ति कर्माधिकारंलभन्ते । मनः शुध्यति मनसा यत्पापंकृतंतत्सत्याभिधानेननश्यति । विद्या वैश्वानराद्युपासना तपोऽनाशकं भूतात्मा स्थूलः सूक्ष्मश्चदेहः बुद्धिः क्षेत्रईश्वरज्ञानेन ॥ १०९ ॥

(३) कुल्लूकः । स्वेदाद्युपहतान्यङ्गानि जलेन क्षालितानि शुध्यन्ति । मनश्च निषिद्धचिन्तादिना दूषितंसत्याभिधानेन शुध्यति । भूतात्मा सूक्ष्मादिलिङ्गशरीरावच्छिन्नोजीवात्मा ब्रह्मविद्यया पापक्षयहेतुतया तपसा च शुद्धोभवति । शुद्धः परमात्मरूपेणावतिष्ठते । बुद्धिश्चविपर्ययज्ञानोपहता यथार्थविषयज्ञानेन शुध्यति ॥ १०९ ॥

(४) राघवानन्दः । किंचअद्भिरिति । गात्राणिकरचरणादीनि । मनः निषिद्धचिन्ताद्यशुद्धंसत्येनसत्याभिधानेन । सर्वदा प्रसन्नमनाव्यवहरे न्न मिथ्याभाषेतेति । विद्यातपोभ्यां भूतात्मासचित्कोदेहः स्थूलोहमित्यभिमानात् शुध्यति विद्याआत्मानात्मविवेकधीः तपश्चान्द्रायणादि विपर्ययज्ञानोपहताबुद्धिर्यथार्थज्ञानेन । वस्तुतस्तु । विद्या सगुणोपासना तपोनित्यनैमित्तिकप्रायश्चित्तंकर्म ताभ्यांविशुद्धो भूतात्मा ब्रह्मसाक्षात्काराार्हः । ज्ञानेन बुद्धिर्जीवोपाधिरन्तःकरणंशुध्यति । तत्त्वंपदार्थद्वयनिश्चयवती तदुपहितचैतन्यस्य ब्रह्ममात्रत्वे तस्याअपि तन्मात्रताशुद्धिरात्यन्तिकी नान्या । तपसा कल्मषंहन्ति विद्यांचाविद्यांच यस्तद्वेदोभयंसह अविद्यया मृत्युंतीर्त्वाविद्ययामृतमश्नुतइति श्रुतेः एवंच सगुणब्रह्मविदोपि न श्राद्धादि । नाशौचंच तथाचश्रुतिः यद्यस्मिन्छव्यंकुर्वन्ति यदु च नर्तोचिषमतिसंभवतीति अस्यार्थः कंब्रह्मखंब्रह्मेत्येवंविद्यस्मिन्पुरुषे यदिशव्यंकुर्वन्ति शवसंबन्धिदाहश्राद्धादिकंकर्म कुर्वन्ति यदु चनयदिवानउभयथाअर्चिरादिमार्गेण ब्रह्मलोकंगच्छन्तीत्यनेनाप्यविदुषस्तदकरणे प्रेतत्वमस्तीति भावः । इतिप्रेतशुद्धिः ॥ १०९ ॥

(५) नन्दनः । गात्राणि शरीरमितियावत् । रजस्तमोदूषितंमनः सत्त्वेन सत्त्वगुणेन शुध्यति । विद्यातपोभ्यांज्ञानस्वाध्यायाभ्याम् । भूतात्मा चेतः । बुद्धिरध्यवसायनिमित्तमन्तःकरणम् । ज्ञानेनशास्त्रार्थज्ञानेन ॥ १०९ ॥

(६) रामचन्द्रः । गात्राणि अङ्गानि हस्तपादादीनि अद्भिःप्रक्षालनेन शुध्यन्ति । मनः सत्याचारेण शुध्यति । भूतात्मा विद्यातपोभ्यांशुध्यति । तद्यथा भूतशब्देन तद्विकारभूतोदेहेन्द्रियसंघोलक्ष्यते तत्र स्थूलोऽहंकृशोऽहमित्येवंतदभिमानित्वेन योयमात्मा वर्तते सभूतात्मा तस्य तपोविधे शुद्धि निमित्ते । तपः ब्रह्मजिज्ञासुश्चेति पञ्चकोशव्यतिरेकप्रतिपादानपरंवाक्यं । विद्याशब्देन चोपनिषदस्थूलमनण्वह्रस्वमसंगोह्ययमात्मेत्यात्मपदार्थनिरूपकवाक्यजन्यंज्ञानं विद्या वैखानसाद्युपासना वा तपः अनशनादि । भूतात्मा जीवात्मा । बुद्धिः सूक्ष्मदेहः । ज्ञानेन आत्मज्ञानेन शुध्यति शरीरादिव्यतिरिक्तसंशयविपर्ययरूपत्वेन स्वरूपज्ञानंविशोधनम् ॥ १०९ ॥

एषशौचस्य वः प्रोक्तः शारीरस्य विनिर्णयः ॥ नानाविधानां द्रव्याणां शुद्धेः शृणुत निर्णयम् ॥ ११० ॥

(१) मेधातिथिः । नानाविधानांद्रव्याणांबहुप्रकाराणांतैजसमार्तिकद्रवकठिनव्यस्तसंहतकार्यद्रव्यादिभेदैर्द्रव्याणामुपकरणभूतानांपूर्वस्याःशुद्धेर्भेदमेतेनाह । तत्र बुद्ध्यात्मनःप्रधानता शुद्धिः । द्रव्याणांतु तत्संपरिग्रहात् । इहतु विपरीतंशृणुत निर्णयं पूर्वेणार्थस्यासांकार्यार्थः श्लोकः ॥ ११० ॥

(२) **सर्वज्ञनारायणः** । शारीरस्य बाह्यद्रव्यविषयस्येत्यपि । द्रव्याणां बाह्यानां नानाविधानां प्रकारविशेषोपाधिभिन्नानांतत्तदुपाधिभेदनियतायाःशुद्धेः ॥ ११० ॥

(३) **कुल्लूकः** । अयंशरीरसंबन्धिनः शौचस्य युष्माकंनिश्चयउक्तः । इदानींनानाप्रकारद्रव्याणांयेन यच्छुध्यति तस्य निर्णयंशृणुत ॥ ११० ॥

(४) **राघवानन्दः** । तामुपसंहरन्द्रव्यशुद्धिंप्रतिजानीते एवेति । शारीरस्य देहद्वयसंबन्धिनः ॥ ११० ॥

(६) **रामचन्द्रः** । नानाविधानांपात्राणांतथा द्रव्याणांशुद्धेर्निर्णयंशृणुत ॥ ११० ॥

तैजसानां मणीनां च सर्वस्याश्ममयस्य च ॥ भस्मनाद्भिर्मृदा चैव शुद्धिरुक्ता मनीषिभिः॥१११॥

(१) **मेधातिथिः** । तैजसान्युच्यन्तेयान्यग्निसंयोगाद्द्रवीभवन्ति रजतसुवर्णताम्रायसत्रपुसीसादीनि । मणयः स्फटिककल्पाःअश्मापाषाणः तद्विकारःपात्रमश्ममयम् । सर्वस्येति पादपूरणार्थं । पर्वतग्राव्णोनदीस्थस्यचेत्यालंबनम् । भस्मनएककार्यत्वान्मृद्भस्मनी विकल्प्येते । आपःसमुच्चीयन्ते । किंपुनरत्र कार्यंलेपगन्धापमार्जनं । उक्तं लेपगन्धापकर्षणे शौचममेध्यस्य । इहापि यावन्नापैत्यमेध्याक्तादिति तत्ररूपतोऽपारुष्यंसमानंमृद्भस्मनोःस्नेहानिमित्तकार्यभेदेशुद्धिः । अशुचेःशुचित्वापादनमत्यवायापनयेन संव्यवहारयोग्यता । यद्येवमशुद्धिर्वाच्या इदमनेन संपृक्तमशुचीति । ननु लौकिकाःपदार्थास्तत्रलोकाएव ज्ञास्यन्ते । नैकसामान्यमात्रंलोकाज्ज्ञायते । यज्जुगुप्सितंमूत्रपुरीषशोणितसंसर्गेण तादृशंलोकेशुचीत्याह । यदयोग्यंस्पर्शनादिक्रियासु तदशुचि । कथंच तस्यायोग्यतेत्येतच्छास्त्रादेव विवेक्तव्यम् । किंच परद्रव्यादौ योन स्खलति सशुचिरुच्यते । अतोऽनया पदार्थप्रसिध्येह किंचित्सिध्यति अपहतमशुचीति सिद्धेपिइदमनेनापहन्यतइति । नान्तरेण शास्त्रविशेषःसिध्यति कथंपुनः शास्त्रात्पदार्थविशेषावसायोयावता कर्तव्यतापरत्वेन शास्त्रंप्रमाणंनपदार्थप्रसिद्धौ पाणिनिवत् । वेदमूलत्वाभ्युपगमान्मन्वादिस्मृतीनामुच्यते । अनेन द्रव्येण यद्दुष्टंतेन न व्यवहर्तव्यमित्यस्त्येव विध्यनुमानम् । यत्संसर्गेण व्यवहारप्रतिषेधः सउपघातहेतुरित्यवगमोनविरुध्यते । एवंशुद्धावपि यदुपहतंद्रव्यंतेन यथाविहितंकृतप्रक्षालनादिक्रियेणव्यवहर्तव्यमितिशक्यतेविधिमूलताप्रतिपत्तुम् । न च शुद्धिःकर्तव्येतिविध्यर्थः तथा सत्यकुर्वन्प्रत्यवेयात् । किंतु दृष्टार्थे व्यवहारेयेन केचित्पात्रेण शुचिनान्येनवा कर्तव्येर्थित्वात्प्राप्ते नियमःशास्त्रीयः । इत्थंभूतेन व्यवहर्तव्यं सत्यर्थित्वे नानित्थंभूतेन । ननुच नियमपक्षेभ्युदयार्थिनोधिकारः अन्यस्य तु कामप्रसंगः । यथाकुसाधुत्वचिन्तायांवाचकत्वाविशेषेपि नियमः पुण्यपापयोरिति । सत्यं । यद्यशुद्धे पात्रस्य प्रतिषेधोन स्यात् । प्रतिषेधेतु सति कुतोऽकृतशुद्धिना व्यवहारः । शुद्धिविधिस्तु प्रतिप्रसवमात्रम् । प्रतिप्रसवे कुतोभ्युदयः केवलंप्रतिषेधातिक्रमोन भवति । भवतु वा पदार्थाधिगमपरैव स्मृतिरियं साध्वसाधुविवेकवत्स्वल्पस्मृतिवच्चयत्तुकार्यमूलत्वंमन्वादिवाक्यानामिति । केनैतदुक्तं यत्रयादृश्यंमूलत्वेन शक्यतेवगन्तुं तत्र तदेवाभ्युपगम्यते । अष्टकादौकार्यरूपे तादृशमेव वाक्यंमूलसिद्धार्थमेव पदार्थव्यवस्थायामिदंप्रथमता व्यहारमूलेति न कदाचित्क्षतिः । इहतु न कथंचिद्व्यवहारमूलंसंभवति वैदिकमन्त्रसाध्यायांच शुद्धौ का व्यवहारमूलता शक्या विधिश्चानर्थकःस्यात् । ननुच पाणिनेरपि विधिरस्ति साधुभिर्भाषितव्यंनासाधुभिरिति नैषा पाणिनेःस्मृतिः । साह्येतावतिपर्यवसिता साधुरयमयंनेति एतत्तुधर्मसूत्रकारिणा यद्यप्यस्ति । अभिधानसाराच्चैतन्निपुणतोऽवगन्तव्यम् । ननु तत्स्मृतावपिविधिःश्रूयते । दायादाएवपरिभजेरन् चतुरोंशान्हरेज्ज्येष्ठः ज्येष्ठएव तु गृण्हीयादिति । किंविध्यर्थएव लिङ्गान्तरेप्रैषादौ स्मर्यते । पदार्थाविधिरूपाविधिशेषाःप्रैषादयः सर्वत्र प्रवर्तनाप्रतिपत्तेरितिचेत् । हेतुहेतुमतोराशिषि प्राप्तकालादिषु का प्रवर्तना नच ग्रहणंविधेयः अर्थितया प्राप्तत्वात् । स्वपरांशयोरविशिष्टायामर्थि-

तायांनियमार्थोविधिरितिचेत् अदृष्टकल्पेन विहितांशातिरेकेण विधिनियमानुपपत्तेः । प्रतिषेधाख्यापरिसंख्येतिचेत् युक्तमेतत् विभागकालएव यः कश्चिदधिकमंशंभ्रातृभिरनुज्ञातमाददीत सप्रत्यवेयात्सत्यामप्यनुज्ञायामेकवस्त्वांशः । नच स्वत्वंज्ञाप्येतग्रहणविधौहि स्वत्वापत्तिरुपात्ता । तस्य यदन्यत्तदस्वमितिविज्ञायते प्रतिषेधः । पुनस्तदतिक्रमेणापि परिग्रहे स्यादेव स्वाम्यं अतश्च चौर्यादिनापीष्यते न तदा इदमस्य स्वमिदंनेति परिग्रहादृते निश्चीयते तस्माद्विधिनियमपरिसंख्यानामसंभवादित्यंशेऽयंस्वामीयत्यंशेऽयमिति । एतावान्विभागार्थः । अतोयमर्थान्तरेलिङ्ग भजेरन्निति । प्राप्तकालतायां हरेयुरित्यादिषु लौकिकप्रवृत्त्यनुवादोयथा क्षुधितोभुञ्जीत योगक्षेमार्थमीश्वरमभिगच्छेदिति । गौतमश्च स्पष्टमेवाह । रिक्थक्रयेत्यादि । तस्मादष्टकादिस्मृतेःशुध्यशुद्धिवचनस्यसंस्कारविधितैव शिष्यते । विधिमूलत्वाद्विधिशिष्टैव । अतः शुध्यशुद्धीउभेअपि शास्त्रावसेये ततः शुद्धिरपि वाच्या । उच्यते। उक्तैवतर्हि वसाशुक्रमिति । नृहग्रणंचतत्र स्मृत्यन्तरदर्शनेन प्रदर्शनार्थं । श्वमार्जारखरोष्ट्रकपिकाकविड्वराहग्राम्यकुक्कुटाखुशृगालक्रव्यादमृगशकुन्तनखिनकुलानांवसादिग्रहणंच । रोममांसानांशुद्धिवचनाच्चाशुद्धानांमूत्राद्युपहातानामयंसंस्कारःकर्तव्योन पुनरेवमेवप्रयुज्यमानानाम् । नहि सुवर्णादयोभावाःस्वरूपेणाशुद्धायेन प्रयोगकालेशुद्धिमपेक्षेरन् । अथवा दृष्टार्थोदृष्टप्रयोगाश्रयःसंस्कारोविधीयते । प्राङ्मुखेनेव भोजने तत्र शुद्धिवचनंविरुध्यते । येतु पात्राणांभोजनारम्भसंमार्जनप्रक्षालनेते समाचारतः न पुनरस्याःशुद्धिःस्मृतेः। यदप्यन्यदस्पृश्यं पुरुषस्य पतितचाण्डालादि तथा लशुनापलाण्डुसुरामांसादि तदपि द्रव्याणामुपघातकम् । तत्र कस्मिन्नुपघाते का शुद्धिरिति स्मृत्यन्तरसमाचारावन्वेषणीयौ । उक्तश्च विशेषोहारीतापस्तम्बपराशरमुनिभिः । तानितु वचनान्यस्माभिरिह सर्वाणि न परिवर्तितानि । लेखकविशेषप्रसंगाच्चन्द्रगोपतन्त्रकारवत् ॥ १११ ॥

(२) **सर्वज्ञनारायणः** । तैजसानां सुवर्णादीनां । मणीनां माणिक्यादीनाम् । अश्ममयस्य प्रस्तरमयस्य । भस्मनेति भस्ममृदोरन्यतरेणाद्भिश्च सलेपोपघाते शुद्धिः ॥ १११ ॥

(३) **कुल्लूकः** । तैजसानांसुवर्णादीनांमरकतादिमणीनांपाषाणमयस्य च सर्वस्य भस्मना जलेन मृत्तिकया च मन्वादिभिः शुद्धिरुक्ता । निर्लेपस्य जलेनैवान्तरंशुद्धेर्वक्ष्यमाणत्वादिदमुच्छिष्टघृतादिलिप्तविषयम् । तत्र मृद्भस्मनोर्गन्धक्षयैककार्यत्वाद्विकल्पः । आपस्तूभयत्र समुच्चीयन्ते ॥ १११ ॥

(४) **राघवानन्दः** । तामाह तैजसानामिति । पञ्चत्रिंशता तैजसानां ताम्रकटाहादीनां मणीनां मरकतादीनां अश्ममयस्य पात्रादेः उच्छिष्टघृतादिसलेपानांतेषांभस्मादित्रिभिरेव शुद्धिरुक्तेत्यन्वयः ॥ १११ ॥

(५) **नन्दनः** । तैजसानांलोहविकाराणांमणीनांरत्नादीनां भस्मादिभिस्त्रिभिर्द्वाभ्यामेकेन वा यथायोगंशुद्धिःप्रोक्ता ॥ १११ ॥

(६) **रामचन्द्रः** । अथ पात्रद्रव्यशुद्धिमाह तैजसानामिति । तैजसानां सुवर्णादीनां मणीनां मुक्तादीनां सर्वस्याश्ममयस्य दृषदुपलादीनां तेषां सौवर्णादीनां सोच्छिष्टानां मृद्भस्मवारिणा शुद्धिरुक्ता ॥ १११ ॥

निर्लेपं काञ्चनं भाण्डमद्भिरेव विशुद्ध्यति ॥ अब्जमश्ममयं चैव राजतं चानुपस्कृतम् ॥ ११२ ॥

(१) **मेधातिथिः** । तैजसविशेषयोः काञ्चनराजतयोर्निर्लेपयोरयंविधिः । अन्येषांतु ताम्रादीनांयथोच्छिष्टस्पर्शेप्लावनादिष्टकादिभिःक्षीरंवा पानीयंवा पीतंतत्र न भवति लेपः । यत्र मांसघृतक्षीरादिभिरुच्छिष्टैःसंश्लिष्यन्त्यवयवास्तत्र वक्ष्यति तत्रात्तयोःस्वयोर्न्यैवेति लेपगन्धापकर्षणवचनाच्च योलेपोयेनैवापक्रष्टुंशक्यते तत्र तदेवोपादेयंन भस्मवारिणीएव । तथाच हारीतः गोधूममकुष्ठककसाययवमुद्गमसूरचूर्णैरित्यादिपठति । श्वचाण्डालोदक्यादिस्पर्शेतुनिर्लेपयो-

रपि भस्मना त्रिःसप्तकृत्वःपरिमार्जनमिति हारीतः। शङ्खस्तु तैजसानांकुणपरुधिररेतोमूत्रपुरीषोपहतानामावर्तनमुल्लेखनंभस्मना वा त्रिःसप्तकृत्वःपरिमार्जनमिति । तत्र चिरकालमूत्रादिवासितानामावर्तनम् । नामाकृतिमुपमृद्येच्छातस्तदाकृतिसंपादनमावर्तनम्। उल्लेखनं तीक्ष्णेन शस्त्रेणाश्मना वा निघर्षः । स्मृत्यन्तरे त्वाकारदाहावचूलनान्याम्नातानि तत्रसुवर्णकारैर्वर्णीकृतस्य शुद्धिः। दाहःअग्नौ सुवर्णकारैर्निष्टपनम्। अवचूलनं दाहोनातीतानांसुवर्णकाराणांसुवर्णघनभाण्डे तेन सर्वतअहननम्। तस्मिन्स्वर्णाकारे। तथाचोक्तं । आकराःशुचयःसर्वइति। अब्जं शङ्खस्फोटनादि । शङ्खस्यतु सलेपस्य गौरसर्षपकल्केन गोमूत्रोदकाभ्यांक्षीरेणच। स्मृत्यन्तरेहि पठ्यते। अद्भिःशङ्खस्येति क्षीरोदकाभ्यांगौरसर्षपकल्केनोच्छिष्टस्नेहयुक्तस्येति । अनुपस्कृतमखातपूरितमथवात्यन्तानुपहतं । सर्वशेषश्चायम्। तेन शुष्कामेध्यचण्डालादिस्पर्शे सत्यपि निर्लेपत्वे प्राक्प्रदर्शितैव शाखान्तरीयाशुद्धिः ॥ ११२ ॥

(२) **सर्वज्ञनारायणः**। निर्लेप शुष्कविष्ठादिस्पृष्टं उच्छिष्टनरादिस्पृष्टंच। अब्जंशङ्खादि। अश्ममयपदेन मणीनामपि ग्रहणम्। अनुपस्कृतमनुत्कीर्णकाञ्चनाब्जादि । उत्कीर्णे रेखान्तर्मलावस्थानसंभवादधिकंशौचम्। रजतपदं ताम्रादिव्यवच्छेदार्थम् ॥ ११२ ॥

(३) **कुल्लूकः**। उच्छिष्टादिलेपरहितंसौवर्णभाण्डं जलभवंच शङ्खमुक्तादि पाषाणमयंच राजतमनुपस्कृतंरेखादिगुणान्तराधानरहितं तथाविधमलासंभवाज्जलेनैव भस्मादिरहितेन शुध्यति ॥ ११२ ॥

(४) **राघवानन्दः**। अब्जं शङ्खशुक्त्यादि अनुपस्कृतं रेखादिरहितं निर्लेपंचेज्जलेनैवं ॥ ११२ ॥

(५) **नन्दनः**। भाण्डंपात्रम्। अब्जंशङ्खशुक्त्यादिकम्। अनुपस्कृतंनिर्लेपमित्यर्थः। निर्लेपमित्यत्रविशेषणात्सलेपविषयाः पूर्वोक्ताः ॥ ११२ ॥

(६) **रामचन्द्रः**। अब्जं मुक्ताफलशङ्खशुक्त्यादि राजतंच अनुपस्कृतंरेखादिरहितं अन्नादिना असंस्पृष्टं अद्भिः प्रक्षालनेन शुध्यति ॥ ११२ ॥

अपामग्नेश्च संयोगाद्धैमं रौप्यं च निर्बभौ॥ तस्मात्तयोः स्वयोन्यैव निर्णेकोगुणवत्तरः॥ ११३ ॥

(१) **मेधातिथिः**। अर्थवादोयम्। अग्निर्वैवरुणानीत्यारभ्याकामयतेत्याद्यर्थवादेषु हेम्नःसुवर्णस्यरूप्यस्यचोत्पत्तिःश्रुता। पुरुषधर्मेणाग्निर्वरुणानीरपोऽकामयतमैथुनधर्मेण समयुज्यत ततएतद्द्वयंनिर्बभौ उद्भूतंअतस्तयोःस्वयोन्या स्वेनोत्पत्तिकारणेनाग्निना अत्यन्तोपघातउदकेनच । सयोन्येतिपाठे समानोत्पत्तिना भस्मनेति व्याख्येयम्। तद्दर्शनाच्च मृदोपि कदाचिदनुज्ञायन्ते। निर्णेकःशोधनं गुणवत्तरः ॥ ११३ ॥

(२) **सर्वज्ञनारायणः**। अत्यन्तोपघातेत्वाह अपामग्नेश्चेति । अप्सुअग्नितेजोरूपवीर्यविसर्गात्सौवर्णराजतोर्ध्वाधःशकलद्वयवद्ब्रह्माण्डोत्पत्तिरितितात्पर्येणेदमुक्तम्। स्वयोन्या अग्नौ प्रताप्य आवर्त्यवा जलप्रक्षेपेणेत्यर्थः। निर्णेकः शोधनं गुणवत्तरः शोधनान्तरेभ्यः ॥ ११३ ॥

(३) **कुल्लूकः**। अग्निर्वै वरुणानीरकामयतइत्यादिवेदे श्रूयते तथाग्नेः सुवर्णमिन्द्रियंवरुणानीनांरजतमित्यादिश्रुतिष्वग्न्यापःसंयोगात्सुवर्णरजतंचोद्भूतंयस्मादतस्तयोः स्वेनकारणेनैव जलेनात्यन्तोपघातेनाग्निना निर्णेकःशुद्धिहेतुः। गुणवत्तरः प्रशस्ततरः ॥ ११३ ॥

(४) **राघवानन्दः**। किंच अपामग्नेश्चेति। अत्यन्तोपघाते तयोःसुवर्णरजतयोः। अग्निजलजत्वंश्रौतमाश्रित्याह तस्मात्तयोरिति। सुवर्णरेताह्युतभुक् सोरोदीद्यदरोदीत्तद्रजतमभूदिति श्रवणादग्निजलरूपया स्वयोन्या निर्णेकःशुद्धिर्गुणवत्तरःप्रशस्तः ॥ ११३ ॥

---

(११३) गुणवत्तरः=बलवत्तरः (नन्दनः)

(५) नन्दनः । आग्नेयंहिरेतोगंगाजलसंयोगात्सुवर्णरजतंचाभवदितिहासपुराणेषु स्मर्यते तेनोक्तमग्नेश्चापांचसंयोगाद्धेमरूप्यंचनिर्बभाविति । बलवत्तरशब्देनात्यन्तोपहतहेमरूप्यमिदमितिगम्यते ॥ ११३ ॥

(६)) रामचन्द्रः । हैमं हेमविकारं रौप्यं रौप्यविकारं जलाग्निसंयोगान्निर्बभौ तयोर्न्यैव जलाग्निसंयोगेनैव निर्णेकः शुद्धिगुणवत्तरः उत्कृष्टः ॥ ११३ ॥

ताम्रायःकांस्यरैत्यानां त्रपुणः सीसकस्य च ॥ शौचं यथार्हं कर्तव्यं क्षाराम्लोदकवारिभिः॥११४॥

(१) मेधातिथिः । यथार्हं यस्ययदर्हति येन यस्य मलमपक्रष्टुंशक्यतइत्यर्थः । अतएव स्मृत्यन्तरोक्तमपि लभ्यते वाहनीयास्त्रपुसीसकविकारागोमयतुषैरिति । यथा गवाघ्रातानि कांस्यानि शूद्रोच्छिष्टानि यानि च । शुध्यन्ति दशभिः क्षारैः श्वकाकोपहतानि चेति । अतएव क्षारभेदाश्च काञ्जिकदाडिमादियोजिताःसिद्धाभवन्ति ॥ ११४ ॥

(२) सर्वज्ञनारायणः । रैत्यं पैत्तलं । त्रपुरङ्गं । अत्ररैत्यानामितिविकारमुक्त्वा त्रपुणइति प्रकृत्यभिधानात्तत्प्रकृतिविकारयोस्तुल्यंशौचमित्युक्तम् । यथार्हं येन यस्य मलापगमः । क्षारसहितेन वारिणा ताम्ररैत्यव्यतिरिक्तानाम् तयोस्तु अम्लोदकेनअम्लरसेन वारिणाचेत्यर्थः ॥ ११४ ॥

(३) कुल्लूकः । अयोलोहं रीतिःपित्तलं तद्भवंपात्ररैत्यं त्रपुरङ्गम् एषांभस्माम्लोदकैः शोधनंकर्तव्यं यथार्हंयस्येयदर्हति ॥ अम्भसा हेमरौप्यायःकांस्यंशुध्यति भस्मना । अम्लैस्ताम्रंच रैत्यंच पुनः पाकेन मृण्मयम् ॥ इति बृहस्पत्यादिवचनाद्विशेषोऽत्र बोद्धव्यः ॥ ११४ ॥

(४) राघवानन्दः । ताम्रादिषण्णांशुद्धिमाह ताम्रेति । अयोलोहं रीतिः पित्तलं तदुद्भवंरैत्यं त्रपु रङ्गं यथार्हं यस्य यदिति ॥ अम्भसा हेमरूप्यायःकांस्यंशुध्यति भस्मना । आम्लाद्यैस्ताम्ररैत्येच पुनः पाकेन मृण्मयम् ॥ इति बृहस्पतिवचनात् । मद्योपहतत्वेऽल्पोपहतत्वे च वारिणैव अत्यन्तोपहतत्वेभस्मक्षारादिनाशुद्धिः ॥ ११४ ॥

(५) नन्दनः । क्षारोभस्मोषोवा । अम्लोदकंचिश्चाफलादिरसः । गन्धवर्णादिदूषितविषयमेतत् । कुतः यथार्हमिति लोकदृष्टिसामर्थ्यानुसारोपदेशात् । इह रूप्यस्य पुर्ग्रहणमम्लोदकार्थम् ॥ ११४ ॥

(६) रामचन्द्रः । रैत्यं पैत्तलं । त्रपुणः रङ्गस्य च पुनः सीसकस्य पात्रस्य ताम्रादेः क्षाराम्लोदकेन शुद्धिः ॥ ११४ ॥

द्रवाणांचैव सर्वेषांशुद्धिरुत्पवनंस्मृतं ॥ प्रोक्षणंसंहतानांच दारवाणांच तक्षणम् ॥ ११५ ॥

(१) मेधातिथिः । क्षरणधर्माणोद्रवाः । घृततैलोदश्वित्प्रभृतयस्तेषांश्वकाकाद्युच्छिष्टानांप्रस्थमात्रपरिमाणानामुत्पवनं कस्यचिदंशस्यापनयनंपूर्वभागस्थितस्य । स्मृत्यन्तरेत्वेवमाम्नातम् ॥ कुशाग्राभ्यांपवमानःसुवर्जनइत्यनुवाकेन । अन्येतुप्लावनमुत्पवनमाहुरन्यत्समानजातीयं तावदासिच्यते यावत्पूर्णे भाण्डे कांश्चिन्मात्राअवस्रवन्ति । साक्षादुपघातएतत् अल्पानांत्यागएव । भाण्डोपघातेतु पात्रान्तरनयनमुच्छिष्टस्पर्शे तु तैलसर्पिषो उदकेवधायजपेदित्युक्तम् । तत्रार्थापात्रोत्क्षेपः । नहि तैलस्य उदके क्षिप्तस्य पात्ररहितस्योपयोगःसंभवति साहचर्यात् घृतस्यापि । एतच्चोत्पवनंद्रवाणाम् । मद्यामेध्यसंसर्गकृतौ गन्धवर्णौ नदृश्येते तयोस्तु सत्योस्त्यागएव सर्वचैतद्बौधायनस्मृतौ परिगृहीतम् । पक्कानांतु द्रव्याणांपुनःपाकोपि श-

(११४) रैत्यानां=रौप्यानां (क, ख, नन्दनश्च)

कृत्स्नेनाप्लातः । सर्वेषां येप्यमेध्यामद्यादयस्तेषामप्येवमेव शूद्रादीन्प्रति शुद्धिः । अत्रतूत्पवनंप्लावनमेव । यथा वसिष्ठेनोक्तं । भूमिष्ठानांतूदकवत् । संहताः कठिनाः शातंघृतं आमिक्षागुडपर्पटकादयस्तेषांयःप्रदेशउपहतस्तमपनीयशेषस्य शुद्धिः । उक्तं-चशब्देन शुष्काणामुद्धृतदोषाणामिति । अथवासमुदायादवयविनः संहताःशयनासनसरणादयःसजातीयविजातीयद्रव्यसं-घातात्मकाः । उद्धृतदोषाणामितिसर्वत्र द्रष्टव्यम् । शवशुष्कामेध्यसंसर्गेषु यःप्रदेशोवृत्तसंसर्गस्तस्य प्रक्षालनमवशिष्टस्य-प्रोक्षणम् । दारवाणां केवलदारुकृतानां बृशीफलकादीनांकाष्ठमयानांच शवचण्डालपुरीषसंसर्गे तक्षणम् । अन्येतु पुरीषसं-सर्गएवेच्छन्ति । तक्षणेनगन्धलेपाद्यपनेतव्यम् । अवशिष्टस्य मृद्वारिभ्यांप्रक्षालनंप्रोक्षणंवा । श्वाद्युपघाते तु प्रक्षालनमे-व । पुरीषवत्खट्वाशय्यादीनांच दारुचर्मसूत्रघटितानांसंहतत्वेन शुद्धिः ॥ ११५ ॥

(२) सर्वज्ञनारायणः । उत्पवनं वस्त्रेण पावनं कठिने चोपघाते संहतानामेकत्र स्यूतानामनेकेषांपटचर्मादीनाम् । दारवाणां तक्षणं मलाद्युपघाते ॥ ११५ ॥

(३) कुल्लूकः । द्रवाणांघृततैलानांकाककीटाद्युपहतानांबौधायनादिवचनात्प्रसृतिमात्रप्रमाणानांप्रादेशप्रमाणकुशपत्र-द्वयाभ्यामुत्पवनेन शुद्धिः । संहतानांच शय्यादीनामुच्छिष्टाद्युपघाते प्रोक्षणं । दारवाणांचात्यन्तोपघाते तक्षणेन ॥ ११५ ॥

(४) राघवानन्दः । किंच । द्रवाणां काकाद्युपहतघृतादीनां उत्पवनं प्रस्थमात्रपरिमाणानांप्रादेशपरिमितकुश-पत्रद्वयाभ्यामुत्पवनेनशुद्धिरिति बौधायनोक्तेः । संहतानांसूत्रादिसंयुक्तानां उच्छिष्टाद्युपघाते तद्देशंप्रक्षाल्य प्रोक्षणं उपस्पर्शेतु प्रोक्षणमात्रं । दारवाणांदारुनिर्मितानां तक्षणं छेदनं अवयवस्य ॥ ११५ ॥

(५) नन्दनः । संहतानाम् अपृथक्कृव्यसमवायरूपाणां शयानादीनाम् । तथा चाङ्गिराः ॥ शयनासनयानानिरोमब न्धानि यानि च । वस्त्राणि तानि सर्वाणि संहतानि प्रचक्षतेइति ॥ उत्पवनंस्वल्पोपघाते तक्षणमत्यन्तोपघाते ॥ ११५ ॥

(६) रामचन्द्रः । सर्वेषांद्रवाणां द्रवभूतानांघृतादीनां अस्य प्रमाणाधिकस्य काकाद्योपहतस्य अमेध्यसंस्पृष्टस्य सर्वद्रव्यस्य उत्प्लवनं सजातीयेन द्रवद्रव्येण भाण्डस्यातिपूरंयावन्निःसरणं शुद्धिः संहतानांसूत्रपटचर्मादीनांबहूनांधान्यवा-ससांप्रोक्षणं शुद्धिः । दारवाणां काष्ठपात्राणां अमेध्यलिप्तानां तक्षणं शुद्धिः ॥ ११५ ॥

मार्जनंयज्ञपात्राणांपाणिना यज्ञकर्मणि ॥ चमसानांग्रहाणांच शुद्धिःप्रक्षालनेन तु ॥११६ ॥

(१) मेधातिथिः । श्लोकद्वयंश्रुतिसिद्धार्थानुवादेन दृष्टान्ततया नेयम् । ग्रहचमसादीनांयज्ञपात्राणांप्रयोगान्तरे प्रयु-ज्यमानानां पूर्वप्रयोगलग्नाज्यहविर्लेपादिससर्गपरिहारार्थमुष्णेन वारिणा लेपाद्यपकर्षःकर्तव्यः । ततोयथाश्रुति क्वचित्पा-णिना क्वचिद्दर्भैः क्वचिद्दशापवित्रेण संमार्गःकर्तव्यः । इयंप्रायोगिकीशुद्धिःउच्छिष्टाद्युपघातेतुलौकिकपात्रवत् । न सोमेनो-च्छिष्टा भवन्तीतिविशेषश्रुतेरन्यत्रोपघाते सामान्यशुद्धिरस्तीति ज्ञायते । ग्रहचमसस्थाल्यादिकेभ्यआकारविशेषेणावसात-व्याः ॥ ११६ ॥ ११७ ॥

(२) सर्वज्ञनारायणः । शम्याकृष्णाजिनादियज्ञपात्राणां मललेपोपघाते यज्ञमध्ये मार्जनम् । चमसानां ग्रहा णांच ऋत्विगादिभिस्तद्गतशेषपाने क्षालनमात्रम् ॥ ११६ ॥

(३) कुल्लूकः । चमसानांग्रहाणांचान्येषांयज्ञपात्राणांपूर्वंपाणिना मार्जनंकार्यं पश्चात्प्रक्षालनेन यज्ञे कर्तव्ये शु-द्धिर्भवति ॥ ११६ ॥

(४) राघवानन्दः । मार्जनं चमसातिरिक्तयज्ञपात्राणां चमसानां ग्रहाणांच यज्ञकर्मणि कर्तव्ये पूर्वंपाणिना संस्कृत्य प्रक्षालनमन्यदा मार्जनमात्रम् ॥ ११६ ॥

(५) नन्दनः । यज्ञकर्मणीतिविशेषणात्कार्यान्तरेषु जातिनिमित्तैवशुद्धिर्द्रष्टव्या ॥ ११६ ॥

(६) रामचन्द्रः । यज्ञपात्राणांस्रुकस्रुवादीनां यज्ञकर्मणि प्रयुज्यमानानां दक्षिणेन पाणिना कुशसहितेन कर्माङ्गतया मार्जनं प्रक्षालनं कर्तव्यम् । चमसानां जलपात्राणां ग्रहाणां सोमपात्राणां षोडशीप्रभृतीनां जलप्रक्षालनेन शुद्धिः ॥ ११६ ॥

चरूणांस्रुक्स्रुवाणांच शुद्धिरुष्णेन वारिणा ॥ स्फ्यशूर्पशकटानांच मुसलोलूखलस्य च॥११७॥

(२) सर्वज्ञनारायणः । चरूणामित्यादि सलेपयज्ञभाण्डपरम् । स्फ्यादीनां प्रोक्षणं मलोपघाते ॥ ११७ ॥

(३) कुल्लूकः । स्नेहाक्तानांचरुस्रुगादीनामुष्णजलेन शुद्धिः स्नेहाद्ययुक्तानांतु जलमात्रेणैव शुद्धिर्यज्ञार्थम् ११७ ॥

(४) राघवानन्दः । उष्णेनेतीति विशेषणादन्यत्र शीतोदं चरूणां चर्वर्थपात्रस्यस्फ्यः खड्गाकारंकाष्ठम् ॥ ११७ ॥

(५) नन्दनः । स्रुकस्रुवाणामाज्यसंपृक्तानामुष्णेन वारिणा शुद्धिः । अत्र यज्ञकर्मणीत्यनुवर्तते ॥ ११७ ॥

(६) रामचन्द्रः । चरूणां चरुस्थाली स्रुकस्रुवौ प्रसिद्धौ सस्नेहानि पात्राणि एतानि लेपरहितानि उष्णेन वारिणा शुध्यन्ति । स्फ्यः वज्रः यज्ञाङ्गकाष्ठखड्गः प्रसिद्धः शकटानां रथानां उष्णेन वारिणा मुसलोलूखलस्य च ॥ ११७ ॥

अद्भिस्तु प्रोक्षणंशौचंबहूनांधान्यवाससाम् ॥ प्रक्षालनेन त्वल्पानामद्भिःशौचंविधीयते ॥ ११८ ॥

[त्र्यहस्रुतशौचानांतु वायसी शुद्धिरिष्यते । पर्युक्षणात्धूपनाद्वा मलिनामतिधावनात् ॥ १ ॥][1]

(१) मेधातिथिः । बहुत्वंधान्यानांद्रोणाधिक्ये स्मर्यते । अन्येतु पुरुषापेक्षयादेशकालापेक्षयाचवर्णयन्ति । कस्यचिद्दुर्गतस्य कुडवार्धमपि बहु भवति । तथा कस्यांचिदवस्थायांवर्धितकोशोबहुतामेति । यथाहबौधायनः । देशंकालंतथात्मानंद्रव्यंद्रव्यप्रयोजनम् । उपपत्तिमवस्थांतु ज्ञात्वा शुद्धिंप्रयोजयेत् । एवंवासस्त्वपि केचिदाहुस्त्रिभ्यऊर्ध्वंबहूनियद्यपि त्रिप्रभृतिषु बहुत्वं यतोल्पानामिति बहुवचनंश्रुतमतस्त्रिपर्यन्तान्यल्पानि । अद्भिरित्युपलक्षणम् । तेन यस्ववाससोयेनैव दोषसंसर्गोव्यपैति तदपि द्रष्टव्यम् । तच्च प्राग्दर्शितम् । प्रोक्षणसंबंद्धोऽभ्यहरणनियमार्थः । उदकेनैव प्रोक्षणंकर्तव्यं । एतेनैवच भेदेन द्विःपाठः । एतच्च महत्युपघाते शवपुरीषचाण्डालादिस्पर्शे अन्यथा त्वल्पानामिति प्रोक्षणमेव । यदि पर्यवस्यतोपि लेपादिवासतानापैति तदा तन्मात्रछेदनमुत्सर्गोवेतिगौतमेनोक्तम् ॥ ११८ ॥

(२) सर्वज्ञनारायणः । बहूनां द्रोणाधिकधान्यानाम् । तत्समभिव्याहाराच्च वाससामपि तावद्गुरुत्वयोग्ये बहुत्वे प्रोक्षणम् । अल्पानां धान्यवाससामेव । अत्र सर्वत्राद्भिरितिपदं द्रव्यान्तरेण गोमूत्रादिना क्षालनादि निवृत्त्यर्थम् ॥११८॥

(३) कुल्लूकः । बहूनांधान्यानांवस्त्राणांच चाण्डालाद्युपघाते जलेन प्रोक्षणाच्छुद्धिः । बहुत्वंच पुरुषभारहार्याधिकत्वमिति व्याचक्षते । तदल्पानांतु प्रक्षालनाच्छुद्धिर्मन्वादिभिरुपदिश्यते ॥ ११८ ॥

(४) राघवानन्दः । किंच पुरुषबाह्यातिरिक्तत्वेन बहुत्वं तद्युक्तानांधान्यानांचाद्भिः प्रोक्षणं उत्तानहस्तेन जलक्षेपः ॥ तिरश्चाभ्युक्षणंप्रोक्तंन्यञ्चता वोक्षणंमतम् । उत्तानेन तु हस्तेन प्रोक्षणंसमुदाहृतमिति गौतमीतन्त्रवचनात् । तथा वाससांच पुंवाह्यन्यूनानामल्पानां धान्यवाससामद्भिःप्रक्षालनम् ॥ ११८ ॥

---

[1] (ज, झ)

(५) नन्दनः । धान्यानांबहुत्वंद्रोणाधिकत्वम् । वाससांबहुत्वंदशाधिकत्वम् ॥ ११८ ॥

(६) रामचन्द्रः । बहूनां धान्यवाससां द्रोणाधिकधान्यानां राशीकृतानां प्रोक्षणेनैव शुद्धिः चाण्डालादिस्पृष्टत्वात् ॥ ११८ ॥

चैलवच्चर्मणांशुद्धिर्वैदलानांतथैवच ॥ शाकमूलफलानांच धान्यवच्छुद्धिरिष्यते ॥ ११९ ॥

(१) मेधातिथिः । चर्मणां वर्माणांस्पृश्यानां नतु श्वशृगालादिसमन्वितानां स्वभावाशुचीनां उपानत्कवचादीनामपि तद्विकाराणामेषएव विधिः । अत्र हिप्रकरणे प्रकृत्यापि विकृतिर्गृह्यते । विकृत्यापि प्रकृतिः । तथाच दारवाणामित्यत्र दारूणामप्येषैव शुद्धिः । वसिष्ठेन हि दारवाणांशुद्धिमभिधाय दार्वस्थिभूम्यानीत्युक्तम् । यदिच विकृत्या प्रकृतिर्न गृह्येत तदनुक्तशुद्धिविधानेन दारूणांकथमतिदेशःक्रियेत । प्रकृतेस्तु विकारग्रहणं तद्ध्यनपायाद्युक्तमेव । वैदलानि वार्क्षत्वगादीनि । स्मृत्यन्तरे पक्षपवित्रचर्मचामरतृणवेत्रबालवल्कलानांचैत्यादिनेषैव शुद्धिर्विहिता । तत्र मयूरादिपक्षास्तन्निर्वृत्ताश्च छत्रपिच्छिकादयोगृह्यन्ते । पवित्रंदर्भस्तेषां दर्भमयानांच वाससां । तृणशब्देन तालपत्राण्युच्यन्ते । तृणराजंविदुस्तालमिति स्मर्यते । तत्रैकदेशात्समुदायप्रतिपत्तिर्दत्तशब्दादिवद्देवदत्ते । वालागवाश्वाजानां न मनुष्याणां तेषांच्युतानामस्पृश्यत्वात् । सर्वाचेयंद्रव्यान्तरोपघाते शुद्धिरुच्यते न स्वभावोपहतौ चेलधान्ययोरेकरूपत्वाच्छुद्धेः शाकादेर्धान्यवद्वचनम् । यथा धान्यानामवघातादिसंस्कारान्तररहितानांधान्यावस्थानामेव प्रोक्षणप्रक्षालने शुद्धिहेतूतद्वच्छाकादीनामपि । तेनापक्वानामयंविधिः पक्वानांतु सत्यपि शाकादिशब्दवाच्यत्वे शुद्ध्यन्तरमन्वेषणीयम् । यथोक्तम् । सुवर्णवारिणा पावकज्वालयावेत्यादि । आकरादाहृतानांतु शाकादीनामुदश्विद्दधिक्षीरादीनांप्रोक्षणपर्यग्निकरणेविशेषतोहारीतेनाम्नाते । तथा शिम्बीधान्यानामुद्घर्षणदलनपेषणादि । एतच्च पादस्पर्शे शङ्कानिवृत्त्यर्थं तदुक्तम् आकराः शुचयःसर्वइति ॥ ११९ ॥

(२) सर्वज्ञनारायणः । चैलवद्बहुत्वे प्रोक्षणमल्पत्वे क्षालनम् । वैदलानां वेत्रवंशादिविदलकृतानां शाकादीनामपि । चैलवदित्यनेनान्वयसंभवे धान्यवदितिवचनं धान्यानामत्यल्पानां बहुमलोपघाते त्यागइति स्मृत्यन्तरसिद्धस्यार्थस्य शाकादावपि प्राप्त्यर्थम् ॥ ११९ ॥

(३) कुल्लूकः । स्पृश्यपशुचर्मणांवंशादिदलनिर्मितानांच वस्त्रवच्छुद्धिर्भवति । शाकमूलफलानांच धान्यवच्छुद्धिः ॥ ११९ ॥

(४) राघवानन्दः । किंच चैलवदबहुत्वे प्रोक्षणं अल्पत्वे क्षालनंवैदलानांवंशदलादिनिर्मितानाम् ॥ ११९ ॥

(५) नन्दनः । चैलवत् वासोवत् । वैदलानांवेणुदलनिर्मितानाम् । शाकमूलफलानामपक्वानाम् ॥ ११९ ॥

(६) रामचन्द्रः । चर्मणां शुद्धिः चैलवद्वस्त्रवत् शुष्के चर्मणि वस्त्रवदिति वचनात् । चर्म अजादिचर्मविकारछत्रचामरादीनामुपलक्षणम् । वैदलानां वेत्रवैणवादीनां धान्यवत्प्रोक्षणेन शुद्धिः ॥ ११९ ॥

कौशेयाविकयोरूषैः कुतपानामरिष्टकैः ॥ श्रीफलैरंशुपट्टानां क्षौमाणां गौरसर्षपैः ॥ १२० ॥

(१) मेधातिथिः । ऊषाःकाञ्चनमृदः । अरिष्टकादयःप्रसिद्धाःलेहादिलेपे सत्युदकेनैतेषांद्रव्याणांचूर्णसंमिश्रेणान लेपनोच्छेदनादि कर्तव्यम् । कौशेयःपट्टविशेषः । एवमंशुपट्टमाविकमूर्णामयंतस्य हारीतेनोक्तंआदित्येनोर्णामयानांतन्नित्यंप्रध्रियमाणानामनेकपुरुषस्य शरीरसंस्पर्शेद्रष्टव्यंनान्यस्मिन्नुपघातेवासस्त्वादेःतेषांकेवलयोःप्रोक्षणप्रक्षालनयोःप्राप्तयोःलेहादिलेपापकर्षणेअतिदिश्येते । क्षौमग्रहणं शाणादीनामपि प्रदर्शनार्थम् ॥ १२० ॥

(२) **सर्वज्ञनारायणः** । ऊषैरुष्ररमृद्भिर्जलेनचेत्यर्थात् । कुतपानां नेपालकम्बलानां अरिष्टकैर्बिम्बसदृशैः । अंशूनां नाडीवादिवल्कलजातीनांसूत्राणां । पट्टानां कौशेयविशेषाणांच । क्षौमाणामतसीत्वग्जनितानाम् ॥ १२० ॥

(३) **कुल्लूकः** । कृमिकोशोद्भवस्य वस्त्रस्य मेषादिलोमप्रभवस्य कम्बलादेरूषैः क्षारमृत्तिकाभिः कुतपानांनेपालकम्बलानामरिष्टकैररिष्टचूर्णैः अंशुपट्टानांपट्टशाटकानांबिल्वफलैः क्षौमाणांदुकूलानांक्षुमावल्कलभवानांवस्त्राणांतु पिष्टश्वेतसर्षपप्रक्षालनाच्छुद्धिः ॥ १२० ॥

(४) **राघवानन्दः** । पट्टसूत्रातिरिक्तकृमिजः कौशेयः । आविकोमेषलोमजः । ऊषैःक्षारमृत्तिकादिभिः । स्यादूषः क्षारमृत्तिकेत्युक्तेः । अरिष्टकैररिष्टफलचूर्णैः । कुतपोनेपालदेशजःकम्बलः । अंशुपट्टः पट्टशाटी । क्षुमा वल्कलसूत्रं तज्जानाम् ॥ १२० ॥

(५) **नन्दनः** । कौशेयम् कृमिकोशप्रभवम् । आविकमूर्णामयम् । ऊषोमृत्तिकाविशेषः क्षारवान् । पर्वतसंबन्धिच्छागरोमनिर्मितकम्बलविशेषः कुतपः । अरिष्टः फेनकः । श्रीफलंबिल्वफलम् । अंशुपट्टोवल्कलविशेषः । अतसीसूत्रनिर्मितंक्षौमम् । मलगन्धादिदूषितानामियंशुद्धिः न स्पर्शमात्रोपहतानाम् ॥ १२० ॥

(६) **रामचन्द्रः** । कौशेयं कृमिकोशोत्थमित्यमरः । कौशेयं कोशप्रभवं । आविकं ऊर्णामयं । ऊषःस्यात्क्षारमृत्तिकेत्यमरः क्षारमृत्तिकासहितोदकेन प्रक्षालनंशुद्धिः । कुतपं नेपालकम्बलं अरिष्टफलसहितोदकैः। अंशुपट्टं वल्कलं तन्तुकनं नु श्रीफलैर्बिल्वफलोदकैः । क्षौमाणां अतसीवल्कलजानां अतसीसूत्रनिर्मितंक्षौमं गौरसर्षपसहितोदकैः शुध्यति ॥ १२० ॥

क्षौमवच्छङ्खशृङ्गाणामस्थिदन्तमयस्य च ॥ शुद्धिर्विजानता कार्या गोमूत्रेणोदकेन वा ॥ १२१ ॥

(१) **मेधातिथिः** । अस्थिशृङ्गदन्ताः स्पृश्यानांगोमेषहस्त्यादीनां नश्वगर्दभादीनाम् । गोमूत्रोदकयोर्विकल्पः । गौरसर्षपकल्कस्तु समुच्चीयते ॥ १२१ ॥

(२) **सर्वज्ञनारायणः** । क्षौमवद्गौरसर्षपकल्कसहितजलैः शङ्खशृङ्गाणां सलेपबहूपघाते । अस्थिमयस्य हस्त्यादिदन्तमयस्य क्षौमवदेव गोमूत्रोदकाभ्यांप्रोक्षणेन ॥ १२१ ॥

(३) **कुल्लूकः** । शङ्खस्य पशुशृङ्गाणांस्पृश्यपश्वस्थिभवस्य गजादिदन्तस्य च क्षौमवत्पिष्टश्वेतसर्षपकल्केन गोमूत्रजलयोरन्यतरयुक्तेन शास्त्रविदा शुद्धिः कर्तव्या ॥ १२१ ॥

(४) **राघवानन्दः** । क्षौमवदिति गौरसर्षपातिदेशः । पुनः शङ्खग्रहणमत्यन्तोपहत्यर्थम् । शृङ्गं कृष्णसारादेः । अस्थिगोमेषयोः । दन्तोगजवराहयोर्नतु गर्दभादेरिति मेधातिथिः । विजानता अत्यन्तोपहतानुपहतभेदविदा ॥ १२१ ॥

(५) **नन्दनः** । गौरसर्षपाणामतिदेशः । गोमूत्रेणोदकेनवेतिशोध्यमलविशेषापेक्षोऽयंविकल्पः ॥ १२१ ॥

प्रोक्षणात्तृणकाष्ठं च पलालं चैव शुध्यति ॥ मार्जनोपाञ्जनैर्वेश्म पुनःपाकेन मृन्मयम् ॥ १२२ ॥

(१) **मेधातिथिः** । व्रीह्यादिकाण्डंरूस्तरादिप्रयोजनं पलालम् । तृणानि कुशशाद्वलादीनि । ननुच दारवाणामित्यत्र विकृतिःप्रकृतेर्ग्राहिकेत्युक्तं किमर्थंकाष्ठग्रहणं । नियमार्थं । प्रोक्षणमेव तेन यावन्न महानुपघातस्तावद्दारूणि तक्ष्यन्ते । चण्डालादिस्पर्शेतु सोमसूर्यांशुमारुतैरित्यनेनैव शुद्धिः । तद्विकाराणांतु दर्व्यादीनांप्रक्षालनतक्षणेत्वल्पोपघातेऽन्नाद्युपयोगिमांकर्तव्ये । मार्जनं शोधनं गृहस्यधूमांधकाराद्यपनयनम् । उपाञ्जनं सुधागोमयादिभिर्भूमिविलेपनम् । एतच्चशवचण्डा-

---

(१२२) णात्तृण=णात्पर्ण (च)

लोदक्यादिभिर्भित्तिसंस्पर्शेव्यापिनिद्रष्टव्यम् । अस्थामैतु तावन्मात्रस्यैव । ऊर्ध्वशवोपघातेतु भित्तितक्षणं सूर्यरश्म्यनुप्रवेशोऽग्निज्वालाभिमर्शनम् । क्वचित्पुनर्नवीकरणमित्यादिपठितंसंमार्जनम् । मृन्मयानांपुनःपाकः । पर्यग्निकरणमुच्छिष्टपुरुषसंस्पर्शादौ द्रष्टव्यम् । पुनःपाकस्तु मद्यभाण्डादिसंस्पर्शे द्रष्टव्यःसाक्षात्स्पर्शेतु त्यागएव । यथोक्तम् ॥ मद्यैर्मूत्रपुरीषैर्वा ष्ठीवनैः पूयशोणितैः । संस्पृष्टनैव शुध्येत पुनःपाकेन मृन्मयमिति ॥ १२२ ॥

(२) सर्वज्ञनारायणः । तृणानि काष्ठानि बहूनि पलालस्य तृणत्वेपि पृथग्ग्रहणं तल्लग्नधान्यानामपि तावन्मात्रेण शुद्धिरित्येतदर्थम् । मार्जनम् संमार्जन्या मृद्भागकाष्ठभागयोः । उपाञ्जनं सजातीयेन लेपोभूमिकुड्यभागयोः । पुनःपाकेन चाण्डालादिमद्यादिस्पर्शव्यतिरिक्तलेपोपघाते मृन्मयं स्थाल्यादि ॥ १२२ ॥

(३) कुल्लूकः । तृणकाष्ठपलालंच चाण्डालादिस्पर्शदूषितंप्रोक्षणेन शुध्यति । तृणपलालसाहचर्यादिदमिन्धनादिकाष्ठविषयम् । दारवाणांच तक्षणमितिनिर्मितदारुमयगृहमात्रविषयम् । गृहमुदक्यानिवासादिदूषितं मार्जनगोमयाद्युपलेपनेन मृन्मयभाण्डमुच्छिष्टादिस्पर्शदूषितंपुनः पाकेन शुध्यति । १२२ ॥

(४) राघवानन्दः । तृणंकाष्ठानि शुध्यन्तीत्यनुषज्यते । मार्जनं संमार्जन्या ॥ १२२ ॥

(५) नन्दनः । उपाञ्जनमुपलेपनम् ॥ १२२ ॥

(६) रामचन्द्रः । पलालं सस्यलग्नधान्यं वेश्म मार्जनगोमयादिलिम्पनैः । मृन्मयं पुनःपाकेन शुध्यति ॥ १२२ ॥

मद्यैर्मूत्रैः पुरीषैर्वा ष्ठीवनैः पूयशोणितैः ॥ संस्पृष्टंनैव शुध्येत पुनःपाकेन मृन्मयम् ॥ १२३ ॥

(३) कुल्लूकः । मद्यादिभिस्तु संस्पृष्टंमृन्मयपात्रंपुनः पाकेनापि न शुध्यति । ष्ठीवनंश्लेष्मा पूयंशोणितविकारः ॥ १२३ ॥

(४) राघवानन्दः । मद्यादिषड्भिःस्पृष्टंमृन्मयंपुनःपाकेपि न शुध्यतीत्याह मद्यैरिति ॥ १२३ ॥

(६) रामचन्द्रः । मद्याद्यैरुपस्पृष्टंमृन्मयंपुनःपाकेन न शुध्यति ॥ १२३ ॥

संमार्जनोपाञ्जनेन सेकेनोल्लेखनेन च ॥ गवां च परिवासेन भूमिः शुध्यतिपञ्चभिः ॥ १२४ ॥

(१) मेधातिथिः । सेकोगोमूत्रेणोदकेनवा क्षीरेणापि क्वचिदुक्तः । उल्लेखनं शस्त्रादिना लेखाकरणं आवापनंच । आवापनंच भूमेरितिगौतमनिर्देशादेव । पञ्चभिरितिपुनर्वचनमभिघातापेक्षया व्यस्तसमस्तप्रयोगदर्शनार्थम् । तत्र संमार्जनंशून्यं शोधनमुपाञ्जनंत्वाकाररहितायाःकेवलमपि मूत्रपुरीषादिलेपे । उल्लेखनसंमार्जनसेकानदीपुलिनवनादिषु । गवांपरिवासःएकाहमात्रंगोष्ठीकरणम् । एतच्च श्मशानभुवःसर्वेकर्तव्यम् । आवपनंतु यत्र पूर्वमस्थिकपालिकाद्यस्ति तदुद्धृत्यमृदामन्यासांप्रक्षेपोयत्र चान्तर्हितमेवमादिकालान्तरेणाशङ्क्यमानसद्भावमित्यादिवत्तत्रापि ॥ १२४ ॥

(२) सर्वज्ञनारायणः । सेकेन जलस्य । उल्लेखनेन कुद्दालादिनोद्धरणेन । परिवासेन सर्वतोव्याप्य शयनेन पञ्चभिरुपघाताल्पबहुत्वापेक्षया व्यस्तैः समस्तैश्च ॥ १२४ ॥

(३) कुल्लूकः । अवकरशोधनेन गोमयाद्युपलेपनेन गोमूत्रोदकादिसेकेन खात्वा कतिपयमृदपनयनेन गवामहोरात्रनिवासेन पञ्चभिरेकैकशोभूमिः शुध्यति । एषांचोच्छिष्टमूत्रपुरीषचण्डालनिवासाद्युपघातगौरवलाघवाभ्यांसमुच्चयविकल्पाववगन्तव्यौ ॥ १२४ ॥

(४) राघवानन्दः । किंच संमार्जनेनेति । संमार्जनं संमार्जन्या अञ्जनं गोमयेन सेकोजलेन उल्लिखनं खात्वा पुनर्मृत्पूरणं गवामहोरात्रवासेन पञ्चभिरिति । एषांचोच्छिष्टमूत्रपुरीषचाण्डालनिवासाद्युपघातगौरवलाघवाभ्यांसमुच्चयविकल्पौ ज्ञेयौ ॥ १२४ ॥

(५) नन्दनः । मार्जनेनाञ्जनेनचाशुचित्वतारतम्यवशेन समस्तैर्व्यस्तैर्वा शुद्धिः ॥ १२४ ॥

(६) रामचन्द्रः । भूमिशुद्धिमाह संमार्जनेति । संमार्जनादिना पञ्चधा पञ्चप्रकारेण भूमिःशुध्यति । पांसुतृणादीनांमोत्सारणं मार्जनं उपाञ्जनेन गोमयादिलेपेन । सेकः क्षीरगोमूत्रगोमयवारिभिः । उल्लेखनेन तक्षणेन भूमिःशुध्यति । गृहं मार्जनानुलेपनाभ्यांशुध्यति । गृहस्य पृथगग्रहणंसंमार्जनलेपनयोःप्रतिदिवसेनिमित्तम् ॥ १२४ ॥

पक्षिजग्धं गवा घ्रातमवधूतमवक्षुतम् ॥ दूषितं केशकीटैश्च मृत्प्रक्षेपेण शुध्यति ॥ १२५ ॥

(१) मेधातिथिः । अत्र जग्धिपदाल्लिङ्गादन्नविषयतास्य श्लोकस्य प्रतीयते । पक्षिभिस्तु शुकादिभिरन्यैश्च भक्ष्यैर्यदन्नमुच्छिष्टीकृतम् नतु काककङ्कगृध्रादिभिस्तत्र हि महत्प्रायश्चित्तं पतत्रिणावलीढमितितदेतदुक्तम् । प्रकृतशुद्धे भोजनप्रायश्चितम् । तथाच तत्तुल्यप्रायश्चित्तस्य गवाघ्रातस्य नैव शुद्धिः । भवेदयंन्यायः । तथापि स्मृत्यन्तरसमाचारावन्वेष्यौ । एवंहि शिष्टादशशरावाधिककाकादिरूध्यादोपहतंतावन्मात्रमपनीयावशिष्टंशोधयित्वोपयुञ्जते अर्वाक्तस्त्यजन्ति । अत्राप्यवस्थाविशेषोपेक्ष्यः । स्मृत्यन्तरेतु कृष्णशकुनिनोपहतमपि निषिद्धम् । अवधूतं मुखश्वासेनावकम्पितंवाससोवा । यस्योपरि रजोपनयनार्थमुत्क्षेपणादि क्रियते आकाशदेशात् । अवक्षुतंयस्योपरि क्षुतंतदेव । केशामनुष्याणांच्युताः । कीटाः क्षुद्रजन्तवःकृमयः । तेकेचिद्दहत्स्वेदान्नाद्यजास्तेजीवन्तोमक्षिकावन्नोपघ्नन्ति मृतानांतेषामन्नसंस्पर्शे शुद्धिरियम् । येत्वमेध्यसंसर्गजास्तेविड्भोजिनश्च तेषांजोवतामपि । गौतमीयम् नित्यमभोज्यंकेशकीटावपन्नमिति । बहुध्यामौ सर्वत्र त्यागः । महाराशावशुचिकीटसंसर्गेपिस्वल्पे तन्मात्रापनयनमवशिष्टस्यशुद्धिः । काञ्चनरजतदर्भमणीनां वारिसहितानां स्पर्शः स्मृत्यन्तरे केशाद्यवपन्नेहितः । अवज्वलनमपि क्वचित् । येतु भूमेरिमांशुद्धिमाहुस्तैःस्मृत्यन्तरसमाचारोवाक्यार्थश्च त्यक्तः ॥ १२५ ॥

(२) सर्वज्ञनारायणः । पक्वान्नफलादिविषयेआह पक्षिजग्धमिति । पक्षिस्पर्शोत्र ग्राह्यः । अवधूतं वस्त्राञ्चलपादादिवातेन । अवक्षुतं यदुपरि क्षुतंकृतं । केशैः । कीटैश्च मृतैश्च तत्क्षणपतितैः । एतादशमोदनाद्यन्नं मृत्प्रक्षेपेणाल्पमृत्क्षेपणानन्तरंच मोक्षणेन स्मृत्यन्तरप्रसिद्धेन शुध्यति ॥ १२५ ॥

(३) कुल्लूकः । भक्ष्यपक्षिभिर्नतु काकगृध्रादिभिः कश्चिद्भागोयस्य भक्षितः गवा यस्य घ्राणंकृतं पदाचावधूतमुपरिकृतक्षुतं केशकीटदूषितं जग्धशब्दलिङ्गादन्नमल्पंमृत्प्रक्षेपेण शुध्यति ॥ १२५ ॥

(४) राघवानन्दः । किंच पक्षीति । अवधूतंपादेन धूनितं । अवक्षुतंयदुपरिक्षुतंकृतं केशकीटोपपन्नंच पदास्पृष्टंच कामतइत्यादि स्नातकप्रकरणे धृतमनूद्य शुद्धिविधानादेतदकरणएव प्रायश्चित्तमिति । मृदित्युपलक्षणम् जलस्यन्दनेनोभाभ्यांशुद्धिः ॥ १२५ ॥

(५) नन्दनः । पक्वान्नशुद्धिमाह । पक्षिजग्धमिति । अवधूतंसंमार्जनरजःकुक्कुटपक्षपादादिदूषितम् । अवाक्क्षुतेन यस्योपरि क्षवथुः कृतस्तदवक्षुतम् ॥ १०५ ॥

(६) रामचन्द्रः । पक्षिभिर्जग्धमन्नं गवाघ्रातंगोनिश्वासोपहतमन्नं अवधूतं अवधूतान्नं यस्योपरि क्षुतंकृतं केशकीटैर्दूषितं एतादशमन्नं मृत्प्रक्षेपेण शुध्यति ॥ १२५ ॥

यावन्नापैत्यमेध्याक्ताद्गन्धोलेपश्च तत्कृतः ॥ तावन्मृद्वारिचादेयं सर्वासु द्रव्यशुद्धिषु ॥ १२६ ॥

(१) मेधातिथिः । अमेध्यमस्पृश्यं तच्च यद्यस्य यदभोज्यंतस्य तदशुद्धिहेतुर्यथा ब्राह्मणस्य सुरा मद्यंशूद्रस्य तदयुक्तम् । प्राग्घोमाद्धवींष्यभोज्यानि नच तान्यस्पृश्यानि सुरामद्यादीनि तु स्पर्शेपिप्रतिषिद्धानि ब्राह्मणस्य । तत्राप-

स्यैव स्पर्शः प्रतिषिद्धः सएव संसर्गेणाशुचित्वमापादयति । अतोनायंनियमोयदभोज्यंतदस्पृश्यंयत्त्वस्पृश्यंतदभोज्यमिति । आक्तंलिप्तंउपदिग्धं तावदित्यावृत्तिविधानं मृद्वारि सति प्रयोजने प्रयोजनंच गन्धलेपापनयनं शुष्कामेध्यसंसर्गे चिरवृत्तसंसर्गेवा कालेनापि तयोर्गन्धलेपयोः सकृदेव मृद्वारिभ्यामार्जनम् । ननु मृद्वार्यादीनांशुध्यर्थमादानंदृष्टार्थं तत्रैव शुध्यत्यपगतेलेपइति किमनेन यावन्नापैतीति उच्यते । एकालिङ्गइत्यादौ संख्यातिक्रमार्थम् । उक्तया संख्यया अशक्ये पुरीषादिलेपापनये अनादृत्याश्रुतसंख्याऽधिकाप्याश्रयणीया । संख्यावचनंतु ततोन्यूनतयाप्यपनीते लेपे संख्यापूरयितव्येत्येवमर्थम् । मृद्वारिग्रहणंशुद्धिसाधनोपलक्षणार्थंवर्णयन्ति । अतश्च यद्यप्यशुद्धिहेतुभूतंवारिणाक्षालितमपि क्षीरादिना संमार्ष्टव्यमन्यथा नपश्यत् । अपैति अपगच्छति निवर्ततइति । यावत्तत्कृतस्तेनामेध्येन कृतः । अतश्च कस्तूरिकादिवत्सुगंधोनापैति नैव दुष्येत । कुंकुमाद्यनुलिप्तस्य यः प्रदेशोऽमेध्येन संसृज्येतत्र कुंकुमाद्यप्यपमार्जितव्यम् । अमेध्यसंसृष्टं हितत् तत्रापि गन्धलेपग्रहणात् । यदिगात्ररूढः कुंकुमवर्णोनिघृष्यमाणोन शक्येतापक्रष्टुं स्यादेव शुद्धिः ॥ १२६ ॥

(२) सर्वज्ञनारायणः । यावन्नापैतीत्युक्तानुक्तशुद्धिकपक्वान्नद्रवद्रव्येतरद्रव्यवद्देहगतलेपतदुपघातविषया शुद्धिः ॥ १२६ ॥

(३) कुल्लूकः । विष्ठादिलिप्ताद्द्रव्याद्यावत्तत्संबन्धिनौ गन्धलेपौ तिष्ठतस्तावद्द्रव्यमुद्धृत्य मृद्वारिप्रक्षिप्यग्रहीतव्यम् । यत्र वसामज्जादौ मृदा शुद्धिस्तत्र मृत्सहितंजलग्रहणंकर्तव्यम् । यत्र कर्णमलादौ जलेनैव शुद्धिस्तत्र जलमात्रमित्यवगन्तव्यम् ॥ १२६ ॥

(४) राघवानन्दः । किंच । अमेध्याक्ताद्द्रव्यात् । तत्कृतोऽमेध्यकृतः । आदेयमासमन्ताद्देयं कर्तव्यासु द्रव्य शुद्धिषु ॥ ॥ १२६ ॥

(५) नन्दनः । तत्कृतोऽमेध्यकृतः । मृद्ग्रहणंगन्धलेपक्षयकराणांद्रव्याणामुपलक्षणार्थम् ॥ १२६ ॥

(६) रामचन्द्रः । अमेध्याक्तः अमेध्याः शरीरजामलाः वसाशुक्रादयः एैतर्वसादिभिः अक्तः लिप्तः सन्कृतो गन्धलेपोयावन्नापैति तावन्मृद्वारि देयं स्यात् मृदा तोयेन शुद्धिः कर्तव्या सर्वासु द्रव्यजातिषु ॥ १२६ ॥

त्रीणि देवाः पवित्राणि ब्राह्मणानामकल्पयन् ॥ अदृष्टमद्भिर्निर्णिक्तं यच्च वाचा प्रशस्यते ॥१२७॥

(१) मेधातिथिः । पवित्राणि शुद्धानि देवग्रहणंस्तुतिः । ब्राह्मणग्रहणमपि समाचारात्तत्सर्ववर्णार्थम् । अदृष्टं यदनारक्षप्रदेशस्थंद्रव्यमदुष्टश्वकाकादिसंसर्गनचसद्भावमात्रेण तदुपघाताशङ्का निष्प्रमाणिका कर्तव्या । एवंमहानसादौ सूदादिभिरकृतशौचैर्व्यवहरद्भिः पाक्यंद्रव्यमदृष्टंपरिभोक्तुंन दुष्यति न पुनरियमाशङ्का कर्तव्या उत्तरकाले तत्प्रागविज्ञातोपघाते न दोषः । तथाह्यमत्यैतानिचेत्यादिविरुध्येत । एवंतावद्यत्र दोषसंबन्धोन केन चित्प्रमाणेनावगम्यते तच्छुद्धं । यत्र पुनरसत्यपि निश्चायके प्रमाणे कुतर्केण संभाव्यते तत्राद्भिर्निर्णेक्तव्यम् । यथा समानदेशस्थालीपीठरादिश्वकाकादिभिरुपहन्यमानंदृष्टम् । अन्यददृष्टमप्यद्भिर्निर्णेक्तव्यं । तथैवंविधमेव वाचा प्रशंसनीयम् । शुद्धमेतदस्त्विवतिशिष्टावाचयितव्याः ब्राह्मणवचनाच्छुद्धिर्भवतीत्याहुः । प्रशस्यतइतिलडयंविधौद्रष्टव्यः । येत्वाहुर्दृष्टोपघातंयत्तस्यव्यवहर्त्रा साक्षाच्छुद्धौक्रियमाणायामदृष्टायांशिष्टाश्चेदाहुः कृतमस्य शौचमिति तत्रप्रत्येतव्यमिति वाक्प्रशस्तस्यार्थस्तदयुक्तं । आप्तवचनस्य सर्वत्रैवाप्रामाण्यस्यानङ्गीकृतत्वात्पौनरुक्त्यप्रसङ्गः । अन्येत्वद्भिर्निर्णिक्तमिति दृष्टान्ततया व्याख्यानयन्ति । अदृष्टवाक्प्रशस्ते विधीयते । यथाद्भिर्निर्णिक्तंशुद्धमेवनदृष्टंवाक्प्रशस्तंविधीयते । ननुच यद्यदृष्टदोषंप्रत्यक्षानुमानागमैः शुद्धंतत्कथंसंवत्सरस्यैकमपीति भक्ष्यविषयं तत्स्पृश्यविषयाशुद्धिरियं गुरुलघुतयावाआपदनापद्भेदेन वा व्यवस्था ॥१२७ ॥

(२) **सर्वज्ञनारायणः** । अदृष्टंवस्तु उपघातेसत्यप्यज्ञातोपघातं एतच्च पश्चादप्यज्ञाने ज्ञानेतुयथोक्तंप्रायश्चित्तं कार्यम् । भक्ष्यादन्यतमभक्षणेतु संवत्सरस्यैकमपीत्युक्तत्वात्कल्प्यंब्राह्मणेन कर्तव्यमेव । अद्भिर्निर्णिक्तं क्षालितमल्पदोषत्वे । वाचा प्रशस्यते ब्राह्मणैः शुद्धमस्त्वित्युच्यते । वाचेति मनसा तादृशाशंसायामपि दोषानपगमउक्तः एतदप्यल्पोपघाते । ब्राह्मणा...मित्युक्तत्वादन्येषांद्रव्यस्य यथोक्तमेव शोधनम् । तदभावे चाज्ञानेपि पूर्णएव दोषः ॥ १२७ ॥

(३) **कुल्लूकः** । केनापि प्रकारेणादृष्टोपघातहेतुसंसर्गमदृष्टं संजातोपघातशङ्कायांजलेन प्रक्षालितम् । तदाह हारीतः यच्चन्मीमांस्यंस्यात्तदद्भिः स्पर्शाच्छुद्धंभवति । उपघातशङ्कायामेव पवित्रंभवत्विति ब्राह्मणवाचा यत्प्रशस्यते तानि त्रीणि पवित्राणि देवाः ब्राह्मणानांकल्पितवन्तः ॥ १२७ ॥

(४) **राघवानन्दः** । किंच त्रीणीति । ब्राह्मणानामित्यन्येषामपि । अदृष्टंकेनापि मानेनानिर्णीतंसंदिग्धंच निर्णिक्तंक्षालितंयन्मीमांस्यंस्यात्तदद्भिःस्पर्शाच्छुध्यतीति हारीतोक्तेः । वाचा विप्रस्यैव ॥ १२७ ॥

(५) **नन्दनः** । अथ सर्वद्रव्यसाधारणाञ्छुद्धिहेतूनाह त्रीणिदेवाइति । ब्राह्मणग्रहणमन्येषामप्युपलक्षणम् । अदृष्टमज्ञातोपघातम् । अल्पदोषशङ्काविषयोऽयंश्लोकः ॥ १२७ ॥

(६) **रामचन्द्रः** । स्पृष्टास्पृष्टमदृष्टंयद्वस्तु अद्भिर्यन्निर्णिक्तं प्रक्षालितं शुद्धिसन्देहे यद्वाचा शुद्धंभवतीति ब्राह्मणवचनेन प्रशस्यते ॥ १२७ ॥

आपःशुद्धाभूमिगतावैतृष्ण्यं यासु गोर्भवेत् ॥ अव्याप्ताश्चेदमेध्येन गन्धवर्णरसान्विताः ॥१२८॥

(१) **मेधातिथिः** । भूमिग्रहणमुपलक्षणार्थं नेन प्रणालिकागताअपि शुचयएव । स्वभावशुचयोह्यापोभूमिगताआकाशगताश्च । किंतु भूमेरमेध्यद्रव्यसंसर्गात्किंचिदशुचित्वं तत्र गतानांसर्गतोऽशुचित्वप्राप्तौ यावतीनांच शुद्धिस्तदर्थमिदं वैतृष्ण्यंयासुगोर्भवेदिति । वैतृष्ण्यंपिपासाविच्छेदः परिमाणोपलक्षणार्थंचैतत् । तत्र चिरन्तनैर्व्याख्यातं लिङ्गदर्शनेन यथावै गोःसास्नाम्भसिप्लाव्येति । यत्र गोः सास्नादिमज्जति तृष्णाच विच्छिद्यते तावत्यः । यास्तु मेध्यभूमिगतास्ताःस्वल्पाअपि शुद्धाः । कथंपुनरमेध्यवाप्तिरवसेया गन्धवर्णरसान्विताः । अमेध्येनेति तृतीयान्तंषष्ठ्या विपरिणम्यते । अमेध्यसम्बन्धिभिर्गन्धादिभिर्यद्यन्विताःसंयुक्ताभवन्ति । ततोव्याप्ताउच्यन्ते । एवंच कृत्वा पानीयंतडागादिषु यद्येकस्मिन्प्रदेशेऽमेध्यंदृश्यते प्रदेशान्तरेगन्धादिशून्यंशुध्येदेव ॥ १२८ ॥

(२) **सर्वज्ञनारायणः** । भूमिगताः नतु शिलाकाष्ठादिस्थाः तासांदिनान्तरावस्थानेनाशुद्धत्वात् गोरेकस्याः पाने वैतृष्ण्यं जलेच्छाविगमः । अव्याप्ता अवेष्टिताः सर्वतोबहिर्गन्धादयोयत्र देशे जलस्य यादृशास्तैरन्विताः ॥ १२८ ॥

(३) **कुल्लूकः** । यत्परिमाणास्वप्सुगोः पिपासाविच्छेदोभवति ताआपोगन्धवर्णरसशालिन्यः सत्यः यद्यमेध्यलिप्तान भवन्ति तदा विशुद्धभूमिगताविशुद्धाः स्युः । भूमिगताइतिविशुद्धभूमिसंबन्धप्रदर्शनाय न त्वन्तरिक्षगतानांनिवृत्त्यर्थम् ॥ १२८ ॥

(४) **राघवानन्दः** । आपइति स्वाभाविकगन्धादियुक्ताः अमेध्यमूत्रादिनाऽनुपहताःयावत्योगोर्वैतृष्ण्यकारिण्यश्चान्याश्च । उद्धताश्चापि शुध्यन्तिशुद्धैःपात्रैःसमुद्धताः । एकरात्रोषिताआपस्त्याज्याःशुद्धाअपि स्वयमित्यतोन्तरिक्षगा अपि ॥ १२८ ॥

(५) नन्दनः । भूमिगताइतिविशेषणात्तु वर्षाधारावस्थानांशुद्धिर्गम्यते । अमेध्येनाशुद्धेन द्रव्येणाप्यामा असंबद्धाः । गन्धवर्णरसान्विताः चेदित्यत्रापि संबध्यते ॥ १२८ ॥

(६) रामचन्द्रः । भूमिस्थाआपोयासुगोर्वैतृष्ण्यंभवेत् चाण्डालादिभिरसंस्पृष्टाश्चेत् ॥ १२८ ॥

नित्यं शुद्धः कारुहस्तः पण्ये यच्च प्रसारितम् ॥ ब्रह्मचारिगतं भैक्ष्यं नित्यं मेध्यमिति स्थितिः ॥ १२९ ॥

(१) मेधातिथिः । कारवः शिल्पिनः सूदरञ्जकतन्तुवायादयस्तेषांहस्तोनित्यंशुद्धः । अतश्च जननमरणाशौचयोस्तत्स्पृश्यतास्ति नतु पुरीषादिलेपे दृश्यमाने शुद्धता विज्ञेया । यदुक्तं सद्यःशौचाः प्रकीर्तिताइतितदेवेदम् । अत्र चापौनरुक्त्यंमनुशास्त्रेऽस्यानुपदेशात् । विषयान्तरमप्यस्ति । अनाचान्तास्तन्तुवायावयन्ति तन्तूनांस्तम्भविश्लेषणार्थंयत्पिष्टमण्डादि दीयते तद्भाजनंच यत्र तत्र भूमौ निधीयते तावती याऽशुद्धिः सानेन निवर्त्यते । नतु स्वभावाशुचीनांस्पर्शस्तैस्तस्यशुद्धता विज्ञेया नहि तेषांतत्कारुकर्मविहितम् । एवंचैषैवोपपत्तिरितिम्लेच्छसृष्टानामपि नाशुचित्वं । तत्र शङ्खवचनात्प्रोक्षणाभ्युक्षणे । तत्रहि पठितं । कारुहस्तःशुचिस्तथा करद्रव्याणीति । पण्यं व्यवहाराय यद्द्रव्यंरूपकैर्विक्रीयतेऽन्येनवा द्रव्येण मीयते तत्पण्यं तच्च प्रसारितमापणभूमौ शुचि अनेकक्रेतृसंस्पर्शाद्भूमौच लेपनादिरहितायांस्थापनाद्युपघातस्तेन नाशुचि । पुनःपुनर्दृश्यमानोपघातम् । प्रसारितग्रहणाद्गृहावस्थितस्य बुद्धौस्थितेपि पण्येनशुद्धिः सिद्धान्नानांतु सक्तुपूपादीनांसत्यपि शुचित्वेऽभक्ष्यता शङ्खवचनादेव आपणीयान्यभक्ष्याणीति । ब्रह्मचारिगतमस्मादेव साहचर्यात्पूर्वोक्ताशुद्धिरीदृशउपघाते विज्ञायते । भिक्षमाणस्य रथ्याक्रमणमशुचिदर्शनंक्षवथुनिष्ठीवनमनेकहस्तसंपातोभिक्षायाइत्याद्युपघातःसंभाव्यते ॥ १२९ ॥

(२) सर्वज्ञनारायणः । शुद्धः संभाव्यमानदोषतया न दुष्टः किंतु निश्चितदोषतयैव । पण्यं विक्रेयं प्रसारितमापणे नतु तद्गृहस्थम् । ब्रह्मचारिपदं भिक्षावृत्तिपरं तद्गतं भैक्ष्यं रथ्याक्रमणकालसंभावितदोषेणादुष्टम् ॥ १२९ ॥

(३) कुल्लूकः । कारोर्मालाकारादेर्दैवब्राह्मणाद्यर्थेऽपि माल्यादिग्रथने द्रव्यप्रयोजनाद्यपेक्षया शुद्धिविशेषाकरणेऽपि स्वभावादेव हस्तः सर्वदा शुद्धः । तथा जननमरणयोरपि स्वव्यापारे शुद्धः । नत्वाशौचंकारूणां कारुकर्मणीतिवचनात् । तथा यद्विक्रेतव्यंपण्यवीथिकायांप्रसारितंनापणनीयमन्नमश्नीयादितिशङ्खवचनात् सिद्धान्नव्यतिरिक्तं तदनेकक्रेतृकरस्पर्शेऽपि शुद्धमेव तथाच ब्रह्मचार्यादिगतभैक्ष्यमनाचान्तस्त्रीदत्तमपि रथ्यादिक्रमणेऽपि सर्वदा शुद्धमिति शास्त्रमर्यादा ॥ १२९ ॥

(४) राघवानन्दः । कारुहस्तइति कारुर्मालाकारादिः । तद्धस्तस्थंशुद्धमिति । न त्वशौचं कारूणांकारकर्मणीति वचनात् । जननाद्याशौचाभावः । प्रसारितंवीथिकायांविक्रयार्थम् ॥ १२९ ॥

(५) नन्दनः । अशुद्ध्यपवादमाह नित्यमिति । नित्यमाशौचेऽपि । कारवोरजकादयः । हस्तग्रहणादङ्गान्तरस्पृष्टानामशुचित्वम् । पण्येयत्प्रसारितं तच्चण्डालादिस्पृष्टमपि शुद्धम् । अशुद्धदेशाक्रमणादुपघातेऽपि ब्रह्मचारिगतं भैक्ष्यंच नित्यमनापद्यपि मेध्यम् ॥ १२९ ॥

(६) रामचन्द्रः । कारुहस्तः कारवोरजकचेलधावकसूपकाराद्याः तेषांहस्तः शुचिः शुचित्वंतत्साध्ये कर्मणि वस्त्रधावनादौ सूतकादिसंभवेपि पण्यंपण्यार्हंविक्रेयं वस्त्रादि तत्शुद्धं । भिक्षाणांसमूहोभैक्षंब्रह्मचारिगतं प्राप्तं रथ्याक्रमणादिनापि न दुष्यति ॥ १२९ ॥

नित्यमास्यं शुचि स्त्रीणां शकुनिः फलपातने ॥ प्रस्रवे च शुचिर्वत्सः श्वा मृगग्रहणे शुचिः ॥१३०॥

(१) **मेधातिथिः** । मेध्यतयाशुचित्वमाह । सर्वस्त्रीणामास्यं शुचि परिचुंबनादौ स्त्रियश्च रतिसंसर्गइति स्मृत्यन्तरम् । रतिसंबन्धिनीष्वेव न मातृभगिन्यादिषु । अत्रउच्छिष्टप्रतिषेधोयंनः मन्तव्योयोषितःसत्यपि रतिसंबन्धित्वेनाश्नीयाद्भार्यया सार्धमितिवचनान्न भुञ्ज्येतेतिसिद्धंचतुर्थाध्याये । नित्यग्रहणान्नसंयोगवेलायामेव किंतर्हि तदर्थायांमन्त्रप्रवृत्तौ । शकुनिःफलपातने पक्षिमात्रवचनेपि शकुनिशब्दःकाककङ्कादीनांविट्भुजांनेष्यते । समाचारात्पातनग्रहणाद्वृक्षस्थस्य फलस्यायंविधिः । प्रस्रवे दुह्यमानायागोर्वत्सःपयःप्रक्षरणार्थस्तनेषु संश्लिष्यते । अथवोच्यते । गावोमेध्यामुखादतइतिवचनादशुचित्वे प्राप्ते तन्निवृत्त्यर्थंवचनमतस्तदीयास्यसंस्पर्शस्य । नतु श्वा शुचिः मृगंतु यदाखेटकादौ गृह्णाति हन्तुंतदाशुचिः । ॥ १३० ॥

(२) **सर्वज्ञनारायणः** । आस्यं रतिकाले चुम्बनादौ । फलस्य पातने पातनार्थं चञ्च्वा वृन्ताघाते नतु फलघातेपि । प्रस्रवे प्रस्रवार्थस्तनोच्छिष्टतायां । मृगग्रहणे दन्तैरुच्छिष्टीकृत्य जीवतोग्रहणे ॥ १३० ॥

(३) **कुल्लूकः** । सर्वदा स्त्रीणांमुखंशुचि । तथा काकादिपक्षिणांचञ्चूपघातपतितंफलंशुचि वत्समुखंच दोहसमये क्षीरप्रक्षरणेशुचि । श्वाच यदा मृगादीन्हन्तुंगृण्हाति तदा तत्र व्यापारे शुचिः स्यात् ॥ १३० ॥

(४) **राघवानन्दः** । किंच नित्यमास्यमिति । चुम्बनादौ आस्यमुपलक्षणम् ॥ सोमःशौचंददौ स्त्रीणांगन्धर्वाश्च शुभांगिरम् । पावकः सर्वमेध्यत्वंमेध्यावै योषितःसदेति याज्ञवल्क्योक्तेः । शकुनिः फलपातने चञ्च्वाघातेन काकादीनां पतितंफलंशुचिः । प्रस्रवे दुग्धक्षरणार्थेचोषणे । श्वा मृगग्रहणे शुचिरिति ॥ १३० ॥

(५) **नन्दनः** । कार्यविशेषापेक्षया शुचीत्याह नित्यमिति । नित्यग्रहणं सर्ववर्णस्त्रीणांविशेषणार्थम् ॥ १३० ॥

(६) **रामचन्द्रः** । स्त्रीणां आस्यं मुखं संभोगकाले चुम्बनादिविषये शुचि ॥ १३० ॥

श्वभिर्हतस्य यन्मांसं शुचि तन्मनुरब्रवीत् ॥ क्रव्याद्भिश्च हतस्यान्यैश्चण्डालाद्यैश्च दस्युभिः॥१३१॥

[शुचिरग्निःशुचिर्वायुः प्रवृत्तोहि बहिश्चरः । जलं शुचि विविक्तस्थं पन्था संचरणे शुचिः ॥१॥]+

(१) **मेधातिथिः** । पूर्वंश्वामृगग्रहणइतिमृगवधेश्वाशुचिरित्येतावदेवविवक्षितं इहतु तेन गृहीतोन्यैर्वादण्डादिघातेनेतिविशेषः । उत्तरार्धश्लोकार्थोविधीयते । क्रव्याद्भिः श्येनजम्बूकप्रभृतिभिः चण्डालाद्यैः । आदिग्रहणंश्वपदादीनामबाधाय । दस्यवोनिषादव्याधादयःप्राणिवधजीविनः ॥ १३१ ॥

(२) **सर्वज्ञनारायणः** । श्वभिर्हतस्य दन्ताघातादिना मृतस्य । क्रव्याद्भिर्व्याघ्राद्यैः । चाण्डालाद्यैर्हत्वा स्पृष्टस्य न तत्स्पर्शदोषः ॥ १३१ ॥

(३) **कुल्लूकः** । कुक्कुरैर्हतस्य मृगादेर्यन्मांसंतच्छुचि मनुरवोचत् तच्छ्राद्धाद्यतिथिभोजनादावेव द्रष्टव्यम् । अन्यैश्चाममांसादिभिर्व्याघ्रश्येनादिभिश्चव्याधादिभिश्च मृगवधजीविभिर्हतस्य ॥ १३१ ॥

(४) **राघवानन्दः** । तत्रोपलक्षणंक्रव्यादादीनामित्याह श्वभिरिति । दस्युर्जातिविशेषः वक्ष्यमाणः ॥ १३१ ॥

(६) **रामचन्द्रः** । क्रव्याद्भिः व्याघ्रादिभिः एतैर्हतंमांसंशुचि ॥ १३१ ॥

[**रामचन्द्रः** । शुचिरिति । पन्थाः संचरणे सोमसूर्यांशुभिः शुचिः । बहिश्चरः वायुः ।]

+ (ख, ट, ण, त.)

ऊर्ध्वं नाभेर्यानि खानि तानि मेध्यानि सर्वशः ॥ यान्यधस्तान्यमेध्यानि देहाच्चैव मलाश्च्युताः ॥ १३२ ॥

(१) मेधातिथिः । खशब्दोयमिन्द्रियवचनः । तेन कर्मेन्द्रियाणिपादयोर्ग्रहणे यान्यधस्तान्यमेध्यानिबहुवचनंएतद्युक्तं ऊर्ध्वंनाभेरित्यनेन विरोधात् । तत्रनाभेरूर्ध्वंमेध्यतरत्वमुक्तम् । प्रकर्षश्च । यद्यधस्तान्मेध्यत्वंभवति ततउपपद्यते । नहि भवति शुक्लःकृष्णतरइति । न चायमिन्द्रियवचनःकिंतर्हिछिद्रार्थोयम् । तदुक्तं समशीर्षण्याःप्राणाइति । अधश्छिद्रे स्त्रीपुंसोपस्थभेदाद्बहुवचनं । एवंसत्यन्तरास्पर्शेपि हस्तादेःशुद्धता । यदितद्गतश्लेष्मसंबन्धोनभवति ॥ १३२ ॥

(२) सर्वज्ञनारायणः । खानि चक्षुरादिरन्ध्राणि । यान्यधः पायुलिङ्गमिति अतस्तत्संस्पर्शे प्रायश्चित्ताधिक्यमित्यर्थः । बहुवचनंव्यक्त्यपेक्षया । देहात् यत्रदेहदेशेश्लेष्मादिमलानांनित्यावस्थानं तस्माच्च्युताअतएवामेध्याः । तत्रस्थास्तु तेनैवाङ्गेन स्पृश्यमानान दोषाय अङ्गान्तरेणाकर्षे देहाच्च्युतेरप्यावश्यकत्वात् ॥ १३२ ॥

(३) कुल्लूकः । यानि नाभेरुपरीन्द्रियच्छिद्राणि तानि सर्वाणि पवित्राणि भवन्ति अतस्तेषांस्पर्शने नाशौचम् । यानि नाभेरधस्तान्यशुचीनि भवन्ति अधश्छिद्रेषु च बहुवचनंव्यक्तिबहुत्वापेक्षया वक्ष्यमाणाश्च वसादयोदेहमलादेहान्निःसृताअशुद्धाभवन्ति ॥ १३२ ॥

(४) राघवानन्दः । किंच ऊर्ध्वमिति खानि इन्द्रियाणि देहात् स्वस्वस्थानात् च्युताभ्रष्टामलाविण्मूत्रदूषिकादयः ॥ १३२ ॥

(५) नन्दनः । खानिचक्षुरादीनीन्द्रियाणि । मलान्वक्ष्यति । मलादेहच्युताश्चेदमेध्यानदेहस्थाः । अमेध्यानांस्पर्शोनकर्तव्यइतिभावः ॥ १३२ ॥

(६) रामचन्द्रः । देहच्युतामलाः अमेध्याः ॥ १३२ ॥

मक्षिका विप्रुषश्छाया गौरश्वः सूर्यरश्मयः ॥ रजोभूर्वायुरग्निश्च स्पर्शे मेध्यानि निर्दिशेत् ॥ १३३ ॥

(१) मेधातिथिः । तथा दूषिकादृष्टेन पुनश्चासंस्पर्शनाय स्वेदजानाम् । गोग्रहणमजैडकस्य । अश्वग्रहणंहस्त्यश्वतराणाम् । सूर्यग्रहणंज्योतिषाम् । विप्रुषउदबिन्दवः स्पर्शमात्रानुभवेनयाअदृश्यमानरूपविशेषाः छाया चण्डालादीनां । भूश्चण्डालादिस्पृष्टा पथ्यामाक्रम्यमाणाशुद्धा । अन्यस्यास्तु संमार्जनादिविहितम् । एते मक्षिकादयः पुरीषादिस्पृशन्तोन दूषयन्ति ॥ अजाश्वंमुखतोमेध्यंगावोमेध्यामुखादृते ॥ मार्जारनकुलौ स्पृश्यौ शुभाश्च मृगपक्षिणइति स्मृत्यन्तरे ॥ १३३ ॥

(२) सर्वज्ञनारायणः । मक्षिका जीवनकालेऽन्नाद्याक्रमणे । विप्रुषोल्पजलकणाउच्छिष्टभूताअपि न स्नानपर्यन्तशोध्यदोषहेतवः यद्वा आचामयतोये तोयबिन्दवः पादावुपस्पृशन्ति तत्परमेतत् । छाया वृक्षादेः । सूर्यरश्मयो गवाश्वौ रजोभूमिर्वायुरग्निश्चाण्डालादिस्पर्शेपि स्वेन स्पर्शने कर्तव्ये मेध्यानीत्यर्थः । अनाकरस्थोयंश्लोकइतिकेचित् ॥ १३३ ॥

(३) कुल्लूकः । मक्षिकाअमेध्यस्पर्शिन्योऽपि विप्रुषोमुखनिःसृताअल्पाजलकणाः छायापतितादेहीनस्पर्शस्यापि गवादीनि चाग्निपर्यन्तानि चण्डालादिस्पृष्टानि स्पर्शे शुचीनि जानीयात् ॥ १३३ ॥

(४) राघवानन्दः । किंच । एतानिमेध्यानीत्याह मक्षिकेति । विप्रुषोमुखनिःसृताबिन्दवः अनवच्छिन्नजलधारावा । मक्षिकासन्ततधाराइत्युक्तेः । छाया वृक्षादेः । स्पृष्टा चण्डालादिभिः । एवंगवादिसम । अन्यच्च ॥ अजाश्वमुखतोमेध्यागावो

---

(१३२) न्यधस्तानि=न्यधस्तादमेध्यानि (क, ग, घ, च, ण)

मेध्यामुखादते। मार्जारनकुलौऽस्पृश्यौ शुभाश्च मृगपक्षिणइति स्मृत्यन्तरात्। मार्जारनिषेधाचारस्तुकर्मण्येव ॥१३३

(५) **नन्दनः**। उपहतान्यपि कानि मेध्यानीत्याह मक्षिकेति। विप्रुषोबिन्दवः। छाया वृक्षादिच्छाया। चण्डालादिस्पृष्टानामपि मक्षिकादीनांस्पर्शोनानुपपन्नइत्यर्थः ॥ १३३ ॥

(६) **रामचन्द्रः**। एतानि मक्षिकादीनि चाण्डालस्पर्शकृतानि स्पर्शे मेध्यानि निर्दिशेत् विप्रुषः अल्पजलकणाउच्छिष्टभूताः। छाया वृक्षादेः गोः अश्वः भूः भूमिः ॥ १३३ ॥

विण्मूत्रोत्सर्गशुद्ध्यर्थंमृद्वार्यादेयमर्थवत् ॥ दैहिकानां मलानां च शुद्धिषु द्वादशस्वपि ॥ १३४ ॥

(१) **मेधातिथिः**। देहाच्चैव मलाःच्युताइत्यशुद्धतायामिदमुच्यते। विण्मूत्रे उत्सृज्येते येन सविण्मूत्रोत्सर्गः पाय्वादिस्तस्य शुद्ध्यर्थंमृद्वार्यादेयमर्थवत् अनादृत्यसंख्यांयावतीभिर्गन्धलेपावपसर्पतस्तावतीरपोमृदश्चगृह्णीयात्। देहेभवादैहिकामलाअशुचित्वापादकाः। तदर्थास्वपि शुद्धिषु मृद्वारिणी उभे अप्यर्थवती आदेये। स्मृत्यन्तरे पठ्यते ॥ आददीतमृदोऽपश्च षट्सु पूर्वेषु शुद्धये वसादिषु। उत्तरेषु तु षट्स्वद्भिःकेवलाभिस्तुशुध्यति। विशुद्धेषु श्लेष्मादिषु स्मृत्यन्तरे पठितं स्नेहविस्रंसनंनासिक्यंश्लेष्माचक्षते तेषामेवसत्यप्युत्तरषट्कतयानमृदआदातव्याएव ॥ १३४ ॥

(२) **सर्वज्ञनारायणः**। उत्सर्गउत्सृष्टशेषः। मृद्वारीत्यविवक्षितः शब्दक्रमोवारिणःप्रथममादेयत्वात्। अर्थवत प्रयोजनवत्तया यावतागन्धलेपक्षयः। दैहिकानां वसाशुक्रमित्यादिना वक्ष्यमाणानां द्वादशानां तद्भेदाद्वादशसु शुद्धिषु तत्र पूर्वमलषट्के मृद्वारिणी उत्तरषट्केतु वारिमात्रं बौधायनवचनात् अत्रोत्तरषट्केपि मृद्विधानंलेपबाहुल्यापेक्षयेति ग्राह्यम् ॥ १३४ ॥

(३) **कुल्लूकः**। विण्मूत्रमुत्सृज्यते येन सविण्मूत्रोत्सर्गः पाय्वादिस्तस्य शुद्ध्यर्थंमृद्वारि ग्रहीतव्यमर्थवत्प्रयोजनवद्यावता गन्धलेपक्षयोभवति। तथा शारीराणांवसादिमलानांसंबन्धिषु द्वादशस्वपि गन्धलेपक्षयार्थंमृद्वारि ग्राह्यम्। तत्र स्मृत्यन्तरात्पूर्वषट्के मृज्जलग्रहणम्। उत्तरषट्के जलमात्रग्रहणम्। तदाह बौधायनः॥ आददीत मृदोऽपश्च षट्सु पूर्वेषु शुद्धये। उत्तरेषु च षट्स्वद्भिःकेवलाभिर्विशुध्यति। ततश्च द्वादशस्वपीति मानवंमृद्वारिग्रहणवचनं व्यवस्थयामृद्वारिणोर्ग्रहणे सति न विरुध्यते। गोविन्दराजस्तु मनुबौधायनवचनसंदर्शनादुत्तरषट्केऽपि विकल्पमाह। सच व्यवस्थितोदैवपित्राद्यदृष्टकर्मप्रवृत्तेउत्तरेष्वपि मृदमादद्यान्नान्यदा ॥ १३४ ॥

(४) **राघवानन्दः**। किंच विण्मूत्रेति। अर्थवत्। यावतागन्धलेपक्षयोभवेत्तावदुपादेयमित्यर्थः। गन्धलेपक्षयकरंशौचं कुर्यादिति याज्ञवल्क्योक्तेः। शुद्धिषु शोधनकर्तव्यासु तदुक्तं ॥ आददीत मृदोपश्च षट्सु पूर्वेषु शुद्धये। उत्तरेषुतु षट्स्वद्भिःकेवलाभिर्विशुध्यतीति बौधायनोक्तेर्व्यवस्था। अतोगोविन्दराजोक्तविकल्पोऽनवसरः ॥ १३४ ॥

(५) **नन्दनः**। विण्मूत्रयोरुत्सर्गे तल्लेपाद्यभावेऽपि शुद्धयेमृद्वार्यादेयम्। अर्थवत्प्रयोजनवत् गन्धलेपक्षयकरमितियावत्। दैहिकानांमलानां द्वादशसु शुद्धिषु द्वादशमलानांशुद्धिषु। अत्रापिमृद्वार्यादेयमित्यनुषङ्गः ॥ १३४ ॥

(६) **रामचन्द्रः**। विण्मूत्रोत्सर्गे तयोःशुध्यर्थंमृद्वारि अर्थवत् प्रयोजनवत्। गन्धादिदूरीकरमित्यर्थः ॥ १३४ ॥

वसाशुक्रमसृङ्मज्जामूत्रविट्घ्राणकर्णविट् ॥ श्लेष्माश्रुदूषिकास्वेदोद्वादशैते नृणां मलाः ॥ १३५ ॥

(१) **मेधातिथिः**। यान्येतानि द्वादशमलानि दर्शितानि नृग्रहणंपश्वनखानांप्रदर्शनार्थं। श्वशृगालादीनांत्वस्पृश्यत्वादेव सिद्धम्। विण्मूत्रे तु सर्वस्याजाविकगवाश्वेभ्योन्यत्र ॥ १३५ ॥

(२) सर्वज्ञनारायणः । शुक्रपदं रजसोप्युपलक्षणम् । असृक्पदं पूयस्नायुमांसादेः । विट् विष्ठा । कर्णविट् कर्णमलं तदास्यमलस्यापिष्ठीवनादेरुपलक्षणम् । नखपदं केशलोमादेरपि । श्लेष्म नासामलं । दूषिका नेत्रमलं । स्वेदपदेन गात्रमलानामपि ग्रहणम् ॥ १३५ ॥

(३) कुल्लूकः । वसा कायस्नेहः शुक्रंरेतः असृयक्तं मज्जा शिरोमध्ये पिण्डितस्नेहः दूषिकाऽक्षिमलः स्वेदःश्रमादिना देहनिःसृतंजलं वसादयोद्वादशनराणांदैहिकामलाभवन्ति ॥ १३५ ॥

(४) राघवानन्दः। तन्मलान्याह वसेति । वसा कायस्नेहः । मज्जा अस्थिगतस्नेहः । अश्रु नेत्रमलं । दूषिका तदुद्भवःपूयविशेषः ॥ १३५ ॥

(५) नन्दनः । द्वादशमलानाह वसेति । कर्णविट्कर्णमलम् । मलग्रहणमन्येषामपि तत्तुल्यानामुपलक्षणार्थम् । अर्थान्तरितेन येन कार्यं पादावनेजनं मृत्पूर्वकं यथा तोयमशुचिक्षालनायच ॥ १३५ ॥

(६) रामचन्द्रः । वसादयोद्वादश नृणां मलाः मज्जा पूयस्नायूमांसत्वगादेरुपलक्षणम् । कर्णविट् स्वदेहमात्रमलानामुपलक्षणम् । दूषिका नेत्रमलम् ॥ १३५ ॥

एका लिङ्गे गुदे तिस्रस्तथैकत्र करे दश ॥ उभयोः सप्त दातव्यामृदः शुद्धिमभीप्सता ॥ १३६ ॥

(१) मेधातिथिः । विण्मूत्रोत्सर्गानन्तरं मेढ्रस्य शुध्यर्थमेकामृद्दातव्या वामेन । स्मृत्यन्तरे शुद्धिविधानाद्यावती तस्मिन्हस्ते याति तावती सोदका ग्रहीतव्या । अहंतु ब्रुवे । अर्थवदिति वचनेनोक्तमेव परिमाणम् । केचित्तु पठन्ति । प्रथमा प्रसृतिर्ज्ञेया द्वितीयातुत दर्धिका । तृतीया मृत्तिका ज्ञेया त्रिभागकरपूरणे । एतच्च परिमाणंपायावेव । अन्यत्र त्वर्थवदित्येकोत्सर्गेपीत्येव संख्या । आवृत्तिविधानंचेदं मृदांभेदे गवादिवत् । तथाचात्रोच्यते । वल्मीकाद्दूरतरादश्वस्थानाद्यान्येत्यादि । एवमिह सिताकृष्णालोहितेत्याद्यपि नादरणीयम् । अभीप्सता इच्छतेति ॥ १३६ ॥

(२) सर्वज्ञनारायणः । तत्र विष्ठोत्सर्गे शौचप्रकारमाह एकालिङ्गइति । एकामृत्त्रिपर्वपूरिका । गुदाल्लोष्टेन मलमपकृष्य तिस्रः प्रसृतितदर्धतदर्धमानाः स्मृत्यन्तरात् । करादौत्वामलकमात्रास्त्वित्युपक्रमे शौचार्थंचैवमृत्तिका इति स्मृत्यन्तरेऽभिधानात्तावत्प्रमाणतोमृदः । एकत्र वामे । उभयोर्वामदक्षिणयोः ॥ १३६ ॥

(३) कुल्लूकः । मूत्रपुरीषोत्सर्गे सति शुद्धिमभीप्सता मृद्दार्यादेयमर्थवदित्युक्त्वाज्जलसहिता मृदेका लिङ्गेदातव्या । गुदे तिस्रोमृदः । तथैकस्मिन्करे वामे । शौचविद्दक्षिणंहस्तंनाधःशौचे नियोजयेत् । तथैव वामहस्तेन नाभेरूर्ध्वंन शोधयेदिति देवलवचनात्तस्यैवाधःशौचसाधनत्वात्तत्रैव दशमृदोदातव्यास्ततउभयोःकरयोःसप्तदातव्याः । यदातूक्तशौचेनापि गन्धलेपक्षयोन भवति तदा यावदपैत्यमेध्याक्तादितिवचनादधिकसंख्याऽपि मृद्दातव्या । एतद्विषयाण्येव मुनीनामधिकमृत्संख्यावचनानि । मृत्परिमाणमाह दक्षः ॥ लिङ्गेऽपिमृत्समाख्याता त्रिपर्वी पूर्यते यया । द्वितीया च तृतीया च तदर्धार्धा प्रकीर्तिता इति यदातूक्तसंख्यायाअल्पेनापि गन्धलेपक्षयोभवति तदा संख्यावाक्यारम्भसामर्थ्यात्संख्या पूरयितव्यैव ॥ १३६ ॥

(४) राघवानन्दः । किंचैकेति । एकत्र करे वामकरे उभयोरिति शुध्यधिकरणद्वित्वोपलक्षणं तेन पाणिपादद्वय शौचसिद्धिरतआह ॥ शौचविद्दक्षिणंहस्तंनाधःशौचेनियोजयेत् । तथैव वामहस्तेन नाभेरूर्ध्वंन शोधयेदिति देवलोक्तेः । दक्षि-

---

(१३६) तथैकत्र करेदश (क, ग, घ, ण) =तथावामकरे दश (ख, च)

णकरशौचं संसर्गजलेपक्षयार्थम्। अत्रसङ्ख्याऽदृष्टार्था अधिकेनन्यूनेनवा गन्धलेपक्षयस्यादःसंभावित्वात् ॥ गन्धलेपक्षयं करं शौचंकुर्यादतन्द्रितइति याज्ञवल्क्योक्तेः ॥ १३६ ॥

(५) **नन्दनः**। एकालिङ्गे विभक्तिविपरिणामः । एकस्मिन्वामेकरे । उभयोः करयोःसंहतयोः ॥ १३६ ॥

(६) **रामचन्द्रः**। मूत्रपुरीषशौचाय मृत्परिमाणमाह एकेति । शुद्धिमभीप्सता पुंसा मृदोदातव्याः । उभयोर्हस्तयोः ॥ १३६ ॥

एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम् ॥ त्रिगुणं स्याद्वनस्थानां यतीनां तु चतुर्गुणम् ॥१३७॥

(१) **मेधातिथिः**। शौचविधिराश्रमविशेषेण अनाश्रामिणस्त मृद्वार्यदेयमर्थवदित्येतदेव शूद्रस्यापि गार्हस्थ्येऽधिकारास्त्यवत्यषा सख्या ॥ १३७ ॥

(२) **सर्वज्ञनारायणः**। द्विगुणमित्यादि संख्यातोन स्मृत्यन्तरसिद्धपरिमाणतः अत्र तस्याएव प्रक्रमात् प्रकृतार्थत्वाच्चसर्वनाम्नां वारत्रयगृहीताधिकानांतु मानापेक्षायामन्त्यमानस्य प्रसृत्यर्धार्धस्य ग्रहणम् ॥ ३७ ॥

(३) **कुल्लूकः**। एका लिङ्गइत्यादियच्छौचमुक्तंतद्गृहस्थानामेव ब्रह्मचारिणांद्विगुणं वानप्रस्थानांत्रिगुणं यतीनांपुनश्चतुर्गुणम् ॥ १३७ ॥

(४) **राघवानन्दः**। तत्र व्यवस्थितिमाह एतदिति। यतीनां त्रिदण्डिनां आश्रमसमभिव्याहारान्नैकदण्डिनां नोच्छिष्टोनाशुचिर्भवेत् अन्याश्रमस्थइत्यादिश्रुतेः। तत्रच ॥ यच्छौचंदिवसेप्रोक्तंतदर्धंनिशिसन्ध्ययोः। तदर्धमातुरेकाले पथि शूद्रवदाचरेदिति पठन्ति। तेन शूद्रे सङ्ख्यानेष्टा किंतु गन्धलेपक्षयमात्रम् ॥ १३७ ॥

कृत्वा मूत्रं पुरीषं वा खान्याचान्तउपस्पृशेत् ॥ वेदमध्येष्यमाणश्च अन्नमश्नंश्च सर्वदा ॥ १३८ ॥

(१) **मेधातिथिः**। मूत्रोत्सर्गदेशान्मूत्रादिसंबन्धात् कृत्वा शोधयित्वा यथोक्तेन विधिना आचान्तः खानि इंन्द्रियाणि उपस्पृशेत् । वेदमध्येष्यमाणश्च द्वितीयेस्वाध्यायविधौप्राथमिकार्थत्वात्करोतेःकृत्वा उत्सृज्येति प्रतीयते। उन्मृज्य मूत्रंपुरीषंचपायूपस्थंक्षालयित्वाआचामेद्वेदमध्येष्यमाणश्च स्वाध्यायविधेर्धर्मतयोक्तमध्येष्यमाणस्त्वाचान्तइति। इदंत्वध्यापयतोऽन्यतोवाअन्यथा वेदमुदाहरन्तउच्यन्ते। लौकिकानि क्रियान्तराणि कृत्वा नानाचान्तोवेदाक्षराण्युच्चारयेत्। अन्नमश्नंश्च। ॥ १३८ ॥

(२) **सर्वज्ञनारायणः**। आचान्तइति त्रिर्जलंपीत्वा द्विःप्रमृज्यादिति वक्ष्यमाणमाचमनंकृत्वेत्यर्थः । खानि आस्यघ्राणचक्षुश्श्रोत्रनाभिहृदयब्रह्मरन्ध्राणि स्पृशेदिति साङ्गमाचमनंदर्शितम् । वेदमध्येष्यमाणोऽध्यापयिष्यन्नध्येष्यमाणोवा। अश्नन्नशनादौ। अत्र कृत्वामूत्रंपुरीषंवेत्यप्रायत्यातिशयमात्रोपलक्षणम् । अध्येष्यमाणोन्नमश्नन्नित्यत्यन्तप्रयतसाध्यकर्मारम्भोपलक्षणम् । तेनाप्रायत्यनिवृत्त्यर्थंप्रयतसाध्यकर्मारम्भयोग्यतार्थंवाचमने कार्ये । गृहस्थानामिन्द्रियादिस्पर्शनसहितमाचमनमितिदर्शितम् ॥ १३८ ॥

(३) **कुल्लूकः**। मूत्रपुरीषंकृत्वा कृतयथोक्तशौचस्त्रिराचान्तइन्द्रियच्छिद्राणि शीर्षाण्यन्यानि च स्पृशेद्वेदाध्ययनंचिकीर्षन्नन्नंवाऽश्नन्। यत्तु द्वितीयाध्याये अध्येष्यमाणस्त्वाचान्तोनिवेद्य गुरवेश्नीयादाचम्येत्युभयमुक्तंतद्व्रताङ्गत्वार्थम्। इदंतु पुरुषार्थशौचायेत्यपुनरुक्तिः ॥ १३८ ॥

(४) **राघवानन्दः**। किंच कृत्वेति वेदमध्येष्यमाणइति द्वितीयाध्यायोक्ताचमनधर्मप्रापणार्थम् ॥ १३८ ॥

(५) नन्दनः । आचान्तः पीतजलः । खानि चक्षुर्नासिकाश्रोत्राणि । अन्नंचमोक्ष्यमाणः । सर्वदाशुचिरपि ॥ १३८ ॥

(६) रामचन्द्रः । मूत्रपुरीषंकृत्वा हस्तपादौ प्रक्षाल्य आचान्तःसन् खानि छिद्राणि मुखादीनिउपस्पृशेत् तत्राह कूर्मपुराणे ॥ अङ्गुष्ठानामिकाभ्यांच स्पृशन्नेत्रद्वयंततः । तर्जन्यङ्गुष्ठयोगेन स्पृशेन्नासापुटद्वयं ॥ कनिष्ठाङ्गुष्ठयोगेन श्रवणे च समंस्पृशेत् । सर्वासामथयोगेनहृदयंसुतलेन च ॥ संस्पृशेद्वै शिरस्तद्वदङ्गुष्ठेनाथ वा द्वयमिति । वेदमध्येष्यमाणः वेदाध्ययनंकुर्वाणः अध्ययनादौ आचान्तः त्रिराचम्य खानि छिद्राणि स्पृशेत् । च पुनः स्नानभोजनेकुर्वन् आदावेवाचामेत ॥ १३८ ॥

त्रिराचामेदपः पूर्वं द्विः प्रमृज्यात्ततोमुखम्॥ शारीरं शौचमिच्छन्हि स्त्री शूद्रस्तु सकृत्सकृत्॥१३९॥

(१) मेधातिथिः । अयमनुवादःस्त्रीशूद्रार्थः उक्तमप्येतत्स्त्रीशूद्रार्थमुच्यते । केचिद्याचक्षते शूद्रःस्पृष्टाभिरद्भिरितिस्पर्शमात्रमपांशूद्रेण कर्तव्यं अतःपरिमार्जनंश्रोत्रादिस्पर्शनंत्वाप्राप्तंसच्छूद्रविषयतया विधीयते । स्त्रीणांतु हृद्गाभिः पूयतेविप्रइतिजातिनिर्देशात्पुंवत्प्राप्ताविदमुच्यते । शारीरंशौचमन्विच्छन्नितिवचनसामर्थ्याद्यद्यध्ययनभोजनयोःशुद्धःप्रवर्तेत तदा नावश्यंत्रिरावृत्तिःस्यात् । नापि प्रमार्जनं । किंतर्हि आचमनं यावतीनांतावतीनामपामिन्द्रियस्पर्शनंच । नान्योब्रह्मचारिधर्मोक्तआचमनविधिः ॥ १३९ ॥

(२) सर्वज्ञनारायणः । अन्यत्र यथाकर्तव्यंतदाह त्रिराचामेदिति । आचामेत पिबेत् हृद्गाभिः पूयतइत्याद्युक्तविधिना । प्रमृज्यादङ्गुष्ठतलेन । शारीरं शरीरस्य शौचमिच्छन् । एतेन प्राणस्पर्शनशून्यमप्यल्पप्रायत्यविषयेगृहस्थस्याचमनान्तरमस्तीतिदर्शितम् । ब्रह्मचारिणस्त्विन्द्रियादिस्पर्शवदेवाचमनमितिद्वितीयेदर्शितम् । अतएव नपौनरुक्त्यम् । यतिवनस्थयोश्चशौचवदाचमनेऽप्याधिक्यस्य युक्तत्वात् आधिक्यान्तराश्रवणाच्च ब्रह्मचारिवदेवाचमनम् । स्त्रीशूद्रमिति स्त्रीच शूद्रश्च सर्वत्र विषये सकृत्सकृत् एकवारंपिबेत्सकृच्च मार्जयेदित्यर्थः । एतच्चानुपनीतस्यापि शूद्रतुल्यत्वान्नास्याचमनकल्प इतितु त्रिराचामेदित्यादिकल्पनिषेधपरम् ॥ १३९ ॥

(३) कुल्लूकः । आचान्तइतियदुक्तंतत्र विशेषमाह त्रिराचामेदिति । देहस्य शुद्धिमिच्छन्प्रथमंवारत्रयमपोभक्षयेत् । ततोद्विर्मुखंपरिमृज्यात् । स्त्रीशूद्रश्चैकवारमाचमनार्थमुदकंभक्षयेत् ॥ १३९ ॥

(४) राघवानन्दः । किंच त्रिराचामेदित्यादि सकृदिति तत्राप्यन्तः सकृत्स्पृष्टाभिरन्ततइत्युक्तेः । अत्रविड्भ्यादिसकृदन्ताःषट्श्लोकाज्ञानेन शुध्यतीत्यत्र स्थानभ्रष्टाः शारीरंशौचमितिलिङ्गात्ज्ञेयाः ॥ १३९ ॥

(५) नन्दनः । आचान्तउपस्पृशेदित्युक्तं तत्कतिकृत्वआचान्तइत्यपेक्षायामाह त्रिराचामेदिति । मुखमोष्ठौ । स्त्रीशूद्रौसकृत्सकृदाचामेतां सकृत्प्रमृज्याताम् । उक्तस्याचमनकल्पस्य पुनरुपन्यासस्तस्य शारीरशुद्धौप्राधान्यज्ञापनार्थः ॥ १३९ ॥

(६) रामचन्द्रः । त्रिः त्रीन्वारान् आचामेत् । ततोमुखंद्विः प्रमृज्यात् स्त्रीशूद्रयोःसकृत् सकृत् ॥ १३९ ॥

शूद्राणां मासिकं कार्यं वपनं न्यायवर्तिनाम्॥वैश्यवच्छौचकल्पश्च द्विजोच्छिष्टं च भोजनम्॥१४०॥

(१) मेधातिथिः । सामान्योक्तःसच्छूद्राणांप्रसंगेनायंधर्मउच्यते । न्यायवर्तिनोद्विजशुश्रूषवोमहायज्ञानुष्ठायिनश्च-

---

(१३९) शौचमिच्छन्हि=मिच्छन्ति (च)

तैर्वपनंमुण्डनंमासिकंकर्तव्यं तृतीयार्थेषष्ठी । अथवा ब्राह्मणाश्रितास्तत्परतन्त्राब्राह्मणैःकार्यम् । अनेकार्थत्वात्करोते-रुपदेष्टव्यमितिप्रतिपत्तिः । वैश्यवत् शौचकल्पविशेषाः । सूतकादावाचमनेच । द्विजोच्छिष्टंच भोजनं एतत्प्राग्व्या-ख्यातम् ॥ १४० ॥

(२) सर्वज्ञनारायणः । न्यायवर्तिनात्स्ववर्णधर्माऽच्युतानांशूद्राणां मासिकंमासिमासिमुण्डनं कार्यम् । भोजनंच द्विजोच्छिष्टं द्विजपाकभाण्डावशिष्टं एवंविधवृत्तवतांशूद्राणांवैश्यवच्छौचकल्पमाशौचादिशुद्धिः तेन पञ्चदशाहान्ते सूतक-मृतकशुद्धिः । आचमनंच वैश्यवदेवतत्र अद्भिः प्राश्निताभिरित्यादि ग्राह्यम् ॥ १४० ॥

(३) कुल्लूकः । शूद्राणांकार्यमितिकृत्यानांकर्तरिवेति कर्तरि षष्ठी । यथाशास्त्रव्यवहारिभिर्द्विजशुश्रूषकैः शूद्रैर्मा-सिमासि मुण्डनंकार्यं वैश्यवच्च मृतसूतकादौ शौचकल्पोऽनुष्ठातव्यः द्विजोच्छिष्टंच भोजनं भुज्यतइतिभोजनं कार्यमिति ॥ १४० ॥

(४) राघवानन्दः । किंच शूद्राणामपि । कृत्यानां कर्तरीति तृतीयार्थे षष्ठी । वपनंमुण्डनरूपं मासिकमिति । प्रासंगिकं । नोच्छिष्टंन हविष्कृतमिति सेवकेतराणांप्रतिषेधः ॥ १४० ॥

(५) नन्दनः । न्यायवर्तिनांशूद्राणामितरेभ्योविशेषंप्रसङ्गादाह शूद्राणामिति । मासिकं मासिश्राद्धंकार्यं प्रतिमा-संवपनंकार्यमितिवा । शौचाचमनादिकल्पः ॥ १४० ॥

(६) रामचन्द्रः । शूद्रधर्ममाह शूद्राणामिति । न्यायवर्तिनां शूद्राणां मासिकं माससंबन्धि श्राद्धं कार्यम् । न्या-यवर्तिनां शूद्राणां वपनं क्षौरं कार्यम् । वैश्यवच्छौचकल्पः पञ्चदशदिनपर्यन्तः । द्विजपाकभाण्डावशिष्टं द्विजोच्छिष्टं भोजनं द्विजैर्दत्तं कार्यम् । शूद्रस्तु द्विजसेवयेति वाक्येन ॥ १४० ॥

नोच्छिष्टं कुर्वते मुख्याविप्रुषोङ्गे पतन्ति याः ॥ न श्मश्रूणि गतान्यास्यं नदन्तान्तरधिष्ठितम् ॥१४१॥

[अजाश्वं मुखतोमेध्यं गावोमेध्याश्चपृष्ठतः ॥ ब्राह्मणाः पादतोमेध्याः स्त्रियोमेध्याश्च सर्वतः॥१॥
गौरमेध्या मुखेप्रोक्ता अजा मेध्या ततःस्मृता ॥ गोः पुरीषं च मूत्रंच मेध्यमित्यब्रवीन्मनुः ॥२॥][१]

(१) मेधातिथिः । निष्ठीव्योक्तानृतानिचेतिनिष्ठीवनआचमनविधानादनाचान्तस्याशुद्धिता ज्ञापिता । विप्रुषामपि मुखान्निष्क्रमणंनिष्ठीवनमेव । अतोविप्रुषांश्लेष्मनिरसनरूपनिष्ठीवनादाचमनप्राप्तौविदमाह । मुखेभवामुखनिर्गतावामुख्याः-विप्रुषइत्यनुच्छिष्टंकुर्वन्ति नचेदङ्गे निपतन्तीति । ननुच विप्रुषःशुद्धाइत्युक्तंमुखजाविप्रुषइत्यत्रउक्तं । दैहिकमलव्यतिरेकेणा-न्यत्र । इदमेवज्ञापकं न सर्वोविषयःसंदर्शितः । श्मश्रूणि दाडिकालोमानि । आस्यगतानि प्रविष्टानि नोच्छिष्टंकुर्वन्तीत्यनु-षङ्गः । अतश्चान्यत्पूगफलादि जनयत्येव । तथा दन्तान्तरधिष्ठितंलग्नं । स्मृत्यन्तरे विशेषः । दन्तश्लिष्टेतु दन्तवदन्यत्र जिह्वाविमर्शनात् । प्राक्च्युतेरित्येके । च्युतेष्वास्रावविद्यान्निगिरन्नैवतच्छुचिरितिच्युतेष्वजिह्वयेतिविद्यात् जिह्वासं-स्पर्शे शुचित्वनिषेधात् । ॥ १४१ ॥

(२) सर्वज्ञनारायणः । मुख्याः मुखजाः विप्रुषोद्रप्सबिन्दवोतिक्षुद्राबाह्यद्रव्येषु पतिताअपिनोच्छिष्टतांजनयन्ति-

---

(१४१) विप्रुषोङ्गे पतन्तियाः =विप्रुषोङ्गं नयन्ति याः (ख, ग, च)

[१] (ठ)

यदङ्गं नयन्ति नगच्छन्ति अङ्गगमनेत्वङ्गस्य क्षालनादिनैव शुद्धिरितितात्पर्यम् । गतान्यास्यमास्यमभ्यप्रविष्टायाणि । दन्तयोरन्तरे मध्येऽधिष्ठितंप्रविष्टमन्नकल्कादि नोच्छिष्टंपुरुषंकरोति एतच्चोद्धरणासंभवे रसाद्यनुपलब्धौ चेतिस्मृत्यन्तरात् ॥ १४१ ॥

(३) **कुल्लूकः** । निष्ठीव्योक्त्वानृतानिचेति । निष्ठीवतामाचमनविधानाद्विदुषामपि मुखान्निःसरणंनिष्ठीवनमेवेति प्रसक्तौशुद्ध्यर्थमपवादमाह । मुखभवाविप्रुषोयाअङ्गेनिपतन्ति ताउच्छिष्टंन कुर्वन्ति तथा श्मश्रुलोमानि मुखप्रविष्टानि नोच्छिष्टतांजनयन्ति । दन्तावकाशस्थितंचान्नावयवादि नोच्छिष्टंकुरुते । अत्र गौतमीये विशेषः । दन्ताश्लिष्टेषु दन्तवदन्यत्रजिह्वाभिमर्षणात्प्राक्च्युतेरिति । एके च्युतेष्वाहारवद्विद्यान्निगिरन्नेव तच्छुचिः ॥ १४१ ॥

(४) **राघवानन्दः** । नोच्छिष्टंकुर्वते नोच्छिष्टदोषमावहन्ति । आस्यंगतान्यपि सन्ति । दन्तान्तरधिष्ठितं दन्तासक्तमन्नादि दन्तासक्तं तुदन्तवदित्युक्तेः ॥ १४१ ॥

(५) **नन्दनः** । अथक्वचिदनुष्ठितादाचमनादपवादमाह नोच्छिष्टमिति । मुख्याः मुखोद्भवाः मुखान्निर्गताइतियावत् । याविप्रुषोऽङ्गंनयान्ति तानोच्छिष्टंपुरुषंकुर्वन्ति । तथा आस्यंगतानि श्मश्रूणि च नोच्छिष्टंकुर्वन्ति । यद्दन्तान्तरधिष्ठितं स्थितमन्नादिकं चोच्छिष्टं नकरोति । दन्तवद्दन्तलग्नेषु शुचिस्थानाच्च्युतेषुतु । दन्तलग्नेष्वन्नादिषु दन्तेष्विव शुचित्वम् । स्थानाद्दन्तस्थानाद्दन्तलग्नेषु परिच्युतेषुतन्निगिरञ्छुचिःस्यात् ॥ १४१ ॥

(६) **रामचन्द्रः** । या विप्रुषः अङ्गं नयन्ति न प्राप्नुवन्ति तामुख्यामुखोद्भवा उच्छिष्टंन कुर्वते । यत्वङ्गंगच्छन्ति तर्ह्यङ्गस्य क्षालनाच्छुद्धिः । आस्यं मुखं गतानि प्रविष्टानि श्मश्रूणि नोच्छिष्टंकुर्वन्ति । दन्तान्तरधिष्ठितं दन्तसक्तंचान्नादिकंनोच्छिष्टंकरोति । अच्युतं दन्तसमंज्ञेयं ॥ दन्तवद्दन्तसक्तेषु जिह्वास्पर्शे शुचिर्भवेदिति वाक्येन ॥ १४१ ॥

स्पृशन्ति बिन्दवः पादौ यआचामयतः परान् ॥ भौमिकैस्ते समाज्ञेयान तैराप्रयतोभवेत् ॥१४२॥

[दन्तवद्दन्तलग्नेषु जिह्वास्पर्शेषु चेन्न तु ॥ परिच्युतेषु तत्स्थानान्निगिरन्नेव तच्छुचिः ॥ १ ॥]×

(१) **मेधातिथिः** । परानाचमयतः परेभ्यआचमनंददतइत्यर्थः । एतदुक्तंभवति । यः परस्माआचमनंददाति तस्याचमयितृहस्तादधोङ्गुलिविवरेभ्यःपतद्भिरुदबिन्दुभिर्भूम्यभिघातोत्थैर्यद्याचमनस्य दातुः पादौ स्पृश्येते तदा न तैरशुचिर्भवति । भौमिकैर्यथानुपहतायांभूमौ स्थिताःकाश्चिदुदकमात्राः शुद्धाएवंतेप्युच्छिष्टाहस्तात्पतन्तउदबिन्दवः । न तैःस्पृष्टः अप्रयतः अशुचिः । परग्रहणाद्यआचामति तेन तत्संसर्गोरक्षितव्यः अन्येनच समीपस्थेन । पादग्रहणाच्च जङ्घाद्यन्तरस्पर्शोदुष्टएव ॥ १४२ ॥

(२) **सर्वज्ञनारायणः** । बिन्दवोवक्त्रान्निर्गताजलबिन्दवोनतु बहुजलम् । पादावितिप्रायिकत्वादुक्तमङ्गान्तराण्यपि । आचामयतआचमनार्थेजलमपवर्जगतः । भौमिकैर्भूमिस्थैः शुद्धैर्बिन्द्वन्तरैः ॥ १४२ ॥

(३) **कुल्लूकः** । अन्येषामाचमनार्थंजलंददतांयेबिन्दवः पादौ स्पृशन्ति न जङ्घादि विशुद्धभूमिष्ठोदकैस्तुल्यास्तेन नाचमनार्होभवति । तदा तत्र च्यवनावस्थैरकृताचमनःशुध्यति द्रव्यंच शुध्यति ॥ १४२ ॥

(४) **राघवानन्दः** । किंचान्यत् परानाचामयतो जनस्य ये जलबिन्दवःपादौ स्पृशन्ति तेनोच्छिष्टादित्याह स्पृश-

× क

न्तीति । भौमिकैर्विशुद्धिर्भूमिगैः । समाःसदृशाः । तैर्जलबिन्दुभिरप्रयतोऽशुद्धोन भवेत् । पादग्रहणात्ततोऽन्यत्र स्पृष्टाभिरशुद्धइति मेधातिथिः ॥ १४२ ॥

(५) नन्दनः । परानाचमयतोजलमावर्जयतः पादौस्पृशन्त्याचामतोमुखगलितायेबिन्दवस्तेभूगतजलवन्नोच्छिष्टकरा इत्यर्थः ॥ १४२ ॥

(६) रामचन्द्रः । येबिन्दवः आचामयतः परान्समीपवर्तिनः द्विजान् तैर्बिन्दुभिः अप्रयतः अशुचिः । न भवेत् । भौमिकैः भूमिसंबन्धिकैः समाज्ञेयाः ॥ १४२ ॥

उच्छिष्टेन तु संस्पृष्टोद्रव्यहस्तः कथंचन ॥ अनिधायैव तद्द्रव्यमाचान्तः शुचितामियात् ॥१४३॥

(१) मेधातिथिः । आचमनार्हेण प्रायश्चित्तेन युक्तः पुरुषउच्छिष्टउच्यते । तद्यथा कृतमूत्राद्युत्सर्गश्चाकृतशौचाचमनादिश्च यश्चामेध्यादिसंस्पर्शदूषितोयदि पुरुषोद्रव्यहस्तोहस्तेन च गृहीतंभक्ष्यभोज्यादि द्रव्यवस्त्रादिवा येन सउच्यते द्रव्यहस्तः । वज्रहस्तादिवत्प्रयोगव्यवस्था । सचेत्स्पृष्टोभवतितदा अनिधायैव तद्द्रव्यमनपनीय हस्तगृहीतद्रव्यएवाचामेत् । कथंपुनर्हस्तस्थे द्रव्यआचमनसंभवः । आमणिबन्धनात्पाणी प्रक्षालयेदिति तत्रविधिः । केचिदाहुः । शरीरसंस्पर्शमात्रंद्रव्यस्य विवक्षितं न हस्तस्यैवएवमशुद्धावपि स्कन्धाद्यारोपितेऽपि द्रव्ये उच्छिष्टस्याशुद्धौतत्र तथैवाचान्ते शुद्धिःअतोहस्तात्प्रदेशान्तरे प्रकोष्ठोत्सङ्गादिके तु द्रव्यंगृहीत्वाचामेत् । अभिप्रायोयमेवं पुरुषाशौचसंबन्धादशुच्येवंतस्यैवान्नशुद्धिः । गौतमेनतु द्रव्यहस्तउच्छिष्टोनिधायाचामेदित्युक्तम् । अत्र व्याख्यानयन्ति । सत्यपि तुल्यसंहितत्वेत्र निधानमेवाभिमेतम् । इतरथा द्रव्यहस्तस्योभयोःशुद्धौ कर्तव्यायांकः प्रसंगोद्रव्यनिधानस्य अतोन्तरेण वचनंनिधानाप्राप्तेर्वचनंनिधानार्थमेव । कथंतर्हि द्रव्यस्य शुद्धिः प्रयतेन पुरुषेण ग्रहणात् । स्मृत्यन्तरविहितेन वा प्रोक्षणेन ॥ प्रचरन्नन्नपानेषु उच्छिष्टंसंस्पृशेद्यदि । आचामेद्द्रव्यमभ्युक्ष्यएवंचैव न दुष्यतीति । यद्यन्तरेण वचनमत्रनिधानंलभ्यते अप्यनिधायैवेतिवचनमनर्थकं एकवाक्यत्वात् स्मृतीनामिह निश्चितेन विधानेन तथाप्येवंविज्ञायते । अद्यपुनर्मतभेदोगम्यते ततश्च विकल्पः तस्यचव्यवस्था गरीयोद्रव्यंनिधीयते अन्यदङ्कस्थंकृत्वावगम्यते । यदापित्वयमन्नमश्नाति भूयिष्ठंवा उच्छिष्टंस्पृशति आचमनार्हेन वा कृताचमनेन स्पृश्यते । सर्वोपिद्रव्यस्योच्छिष्टंसंस्पर्शः ॥ १४३ ॥

(२) सर्वज्ञनारायणः । द्रव्यहस्तः अग्निपक्वद्रव्यहस्तः । भूमावनिधायोत्सङ्गे कृत्वा आचान्तआचमनेन शुचितामियात् स्वयंतद्द्रव्यंच ॥ १४३ ॥

(३) कुल्लूकः । द्रव्यहस्तपदेन शरीरसंबन्धमात्रंद्रव्यस्य विवक्षितम् । आमणिबन्धात्पाणिंप्रक्षाल्येति द्रव्यहस्तस्याचमनासंभवात् स्कंधादिस्थितद्रव्योयद्युच्छिष्टेन संस्पृष्टोभवति तदा द्रव्यमनवस्थाप्यैव कृताचमनःशुध्यति । द्रव्यंच शुद्धंभवति ॥ १४३ ॥

(४) राघवानन्दः । किंच उच्छिष्टेनेति । उच्छिष्टेन जलेन तादृगन्नादिनावा द्रव्यहस्तः अन्नं हविर्द्रव्यादिवा हस्ते यस्य सतद्द्रव्यमनिधाय हस्ते कृत्वैवाचान्तः शुचितामियात् । द्रव्यंसोपीति भावः ॥ १४३ ॥

(५) नन्दनः । उच्छिष्टेन स्पृष्टोद्रव्यहस्तोद्विजस्तद्द्रव्यंहस्तगतंभूम्यादौनिधायैवाचान्तः सहद्रव्येण शुद्धःस्यात् । द्रव्यंभूम्यादौ निधायाचामेत्सउच्छिष्टस्पर्शदोषोद्रव्यंसंक्रामतीत्यभिप्रायः ॥ १४३ ॥

(६) रामचन्द्रः । द्रव्यहस्तः अग्निपक्वद्रव्यहस्तः उच्छिष्टेन पुरुषेण संस्पृष्टः तद्द्रव्यं तद्धस्तु भूमावनिधाय आचान्तःसन् शुचितां इयात् प्राप्नुयादित्यर्थः ॥ १४३ ॥

वान्तोविरिक्तः स्नात्वा तु घृतप्राशनमाचरेत् आचामेदेव भुक्त्वान्नं स्नानं मैथुनिनः स्मृतम्॥१४४॥

[अनृतौ तु मृदा शौचं कार्यं मूत्रपुरीषवत् ॥ ऋतौ तु गर्भशङ्कित्वात्स्नानं मैथुनिनः स्मृतम् ॥१॥]+

(१) **मेधातिथिः** । वमनविरेचने प्रसिद्धे । अशितमन्नंयेन मुखेनोद्गीर्णंसवान्तःपुरुषः । यस्योच्चारवेगाअष्टसंख्यायाऊर्ध्वजाताहरीतक्यादिभक्षणेन व्याधिनावा सविरिक्तः । तौ स्नानंप्रथमंकुर्यातां । ततोन्तेघृतप्राशनंकृत्वैतदन्यदन्नमयाताम् । नचानेन घृतप्राशनेन भोजनान्तरंनिवृत्तिः । प्रायश्चित्तेपुद्रव्यशुद्धिरियं भस्मोदकमार्जनवद्घृतप्राशनं । आचमेदेव भुक्त्वान्नं । अन्नंभुक्त्वा तदहरेव यदि वमनविरेचने स्यातां तदाचमनमेव केवलं न स्नानघृतप्राशने । अपरैस्तु स्वतन्त्रंव्याख्यायते । भुक्त्वाचामेदेव भोजनानन्तरमाचनंविहितंतस्यैवायमपवादः । मैथुनिनः स्त्रियांकृतशुक्रोत्सर्गः स्नानेन शुध्यति ॥ १४४ ॥

(२) **सर्वज्ञनारायणः** । वान्तोवमनंकृत्वा विरिक्तः कोष्ठमलमतिसार्य स्नानं घृतप्राशनंच कामतः अकामतः स्नानमात्रम् । आचामेदेव नतु तदुच्छिष्टतापगमेपिस्नायात् । मैथुनिनः ऋतुकालेमैथुनकरणे अनृतौ तु मैथुने आचमनमात्रं स्मृत्यन्तरे उक्तम् ॥ १४४ ॥

(३) **कुल्लूकः** । कृतवमनःसंजातविरेकःस्नात्वा घृतप्राशनंकुर्यात् दशविरेकान्विरिक्तइतिगोविन्दराजः* । यदि भुक्त्वाअनन्तरमेव वमति तदाऽऽचमनमेव कुर्यान्न स्नानघृतप्राशने । मैथुनंच कृत्वा स्नायात् । इदंत्वृतुमतीविषयम् ॥ १४४॥

(४) **राघवानन्दः** । किंच वान्तइति वान्तः कृतवमनः विरिक्तः संजातविरेकः । भुक्तान्नंसद्योवमने त्वाचमनमित्याचामेदिति गोविन्दराजः । मैथुनिनः ऋतुमत्या सह अन्यत्र मूत्रवदित्युक्तम् । सन्निधेर्भोजनाव्यवहितमैथुनिनोवा ॥ १४४ ॥

(५) **नन्दनः** । वमनविरेचनयोःसमुच्चितयोः स्नात्वाघृतंप्राश्नीयात् । अन्नंभुक्त्वा तदानीमेव वान्तोविरिक्तश्चेदाचामेदेव नतु स्नानघृतप्राशने कुर्यात् ॥ १४४ ॥

(६) **रामचन्द्रः** । विरक्तंकृतविरेकः कृतपुरीषः मैथुनिनः मैथुनकर्तुः ऋतावपि गमनेन शुध्यति यज्ञादिकार्यार्थम् ॥ १४४ ॥

सुप्त्वा क्षुत्वा च भुक्त्वा च निष्ठीव्योक्त्वानृतानि च ॥ पीत्वापोऽध्येष्यमाणश्च आचामेत्प्रयतोऽपि सन् ॥ १४५ ॥

(१) **मेधातिथिः** । क्षुत्वा अनिच्छतोवायुप्रेर्यमाणस्य योनासिकाच्छिद्राद्दुपजायते शब्दःसक्षवथुस्तंकृत्वा । प्रयतोपिसन् एतदध्येष्यमाणपदेनैवसंबन्ध्यते । प्रयतोप्यध्येष्यमाणआचम्याधीयीतअध्ययनविध्यङ्गतयाचमनंकुर्यादित्यर्थः । स्नानादिभ्यस्त्वनन्तरंसकृदेव । यत्पुनरुक्तं । सुप्त्वाक्षुत्वाचभुक्त्वाचपीत्वापोवैमुनिस्तथा । आचान्तःपुनराचामेन्निष्ठीव्योक्त्वानृतंवचइति एवमभिसंबन्धोत्र कर्तव्यः । आचान्तोभुक्त्वापुनराचामेत् । यत्र पुनर्द्विराचामेदितिपठ्यते तत्रानन्तर्येणैकक्रियावृत्तिः ॥ १४५ ॥

+ (अ, ट, ठ, ड)

* दशविरेकोविरिक्त इतिपाठः । (अ)

(२) सर्वज्ञनारायणः । क्षुत्वा क्षुतंकृत्वा निष्ठीव्य सश्लेष्मवक्त्रसंनिरस्य प्रयतोपिसन्नेकेनाचमनेनापरमप्याचामेदितिद्विराचमनमुक्तम् । अध्येष्यमाणइत्यध्ययनार्थप्रायत्यहेतुतया द्विराचमनंविहितम् ॥ १४५ ॥

(३) कुल्लूकः । निद्राक्षुद्भोजनश्लेष्मनिरसनमृषावादजलपानादि कृत्वाऽध्ययनंचिकीर्षुः शुचिरप्याचामेत । यत्तु भुक्त्वाचोपस्पृशेत्सम्यगिति तथा अध्येष्यमाणस्त्वाचान्तइति द्वितीयाध्यायोक्तंतद्व्रताङ्गत्वेन । इहतु भुक्त्वाचमनविधानंपुरुषार्थमध्ययनाङ्गतयाचमनविधानंगृहस्थादीनामपीति ॥ १४५ ॥

(४) राघवानन्दः । किंचैतेषट्सु पुनराचामेदित्याह सुप्तेति । आचमनं द्विविधं मार्याश्चत्तार्थं कर्माङ्गंचआचान्तेन कर्तव्यमिति गोभिलस्मरणात् प्रयतोपीत्यनेन कर्माद्यर्थमाचान्त एतेषु जातेष्वाचामेदित्यर्थः । चत्रयमनुक्तरथ्योपसर्पणाद्यर्थम् । प्रयतोप्यध्येष्यमाणआचम्याधीयीतेति मेधातिथिः । तत्राप्यध्येष्यमाणश्चाचामेदित्यनेन प्रत्याचमनस्य पूर्वाङ्गत्वप्राप्तेरेतेनाचान्तःपुनराचामेदित्यपिव्याख्या ॥ १४५ ॥

(५) नन्दनः । पुनरध्येष्यमाणग्रहणमादरातिशयार्थम् ॥ १४५ ॥

एषशौचविधिः कृत्स्नोद्रव्यशुद्धिस्तथैव च ॥ उक्तोवः सर्ववर्णानां स्त्रीणां धर्मान्निबोधत ॥१४६॥

(१) मेधातिथिः । आद्येनपादत्रयेण शुद्धिप्रकरणोपसंहारश्चतुर्थेन वक्ष्यमाणसंक्षेपवचनम् । शौचविधिशब्दःसामान्यशब्दोपि द्रव्यशुद्धिसंनिधानाद्गोबलीवर्दवदितरविशेषपरःसंपद्यते । स्त्रीणांधर्माअसाधारणस्त्रीकर्तृकाएव । यस्तु साधारणोयागादिःसइह नोच्यते ॥ १४६ ॥

(२) सर्वज्ञनारायणः । शौचविधिः देहस्यसर्ववर्णानां याः स्त्रियस्तासां धर्मम् ॥ १४६ ॥

(३) कुल्लूकः । एषवर्णानांजननमरणादौ दशरात्रादिरशौचविधिः समग्रोद्रव्याणांतैजसादीनांचैलादीनांच जलादिना शुद्धिविधिर्युष्माकमुक्तः । इदानींस्त्रीणामनुष्ठेयंधर्मंशृणुत ॥ १४६ ॥

(४) राघवानन्दः । प्रतिज्ञान्तरमेषइति त्रयोदशभिः । स्त्रीणां स्त्रीकर्तृकं धर्मम् ॥ १४६ ॥

(५) नन्दनः । शौचविधिःशरीरमलशोधनविधिः ॥ १४६ ॥

बालया वा युवत्या वा वृद्धया वापि योषिता ॥ न स्वातन्त्र्येण कर्तव्यं किंचित्कार्यंगृहेष्वपि ॥ १४७ ॥

(१) मेधातिथिः । स्वातंत्र्यंस्त्रीषु कस्यांचिदवस्थायांनास्तीत्युपदेशार्थः । वयोविभागवचनंतु यत्रास्याःपारतन्त्र्यंतत्प्रदर्शनार्थमविवक्षितस्वरूपम् । तथाचोक्तं ॥ तत्सपिण्डेषु वा सत्सु पितृपक्षे प्रभुःस्त्रियाः । पक्षद्वयावसानेतु राजा भर्ता स्त्रियामतः ॥ १४७ ॥

(२) सर्वज्ञनारायणः । योषिता स्वातन्त्र्येण भर्त्राद्यननुज्ञया किंचिदणुमात्रमपि न कार्यं कार्यम् ॥ १४७ ॥

(३) कुल्लूकः । बाल्ये यौवने वार्धके च वर्तमानया किंचित्सूक्ष्ममपि कार्यंभर्त्राद्यननुमतं न स्वातन्त्र्येण कर्तव्यमिति ॥ १४७ ॥

(५) नन्दनः । गृहेष्वपीत्यर्थप्राप्तस्यानुवादोनविशेषणंसर्वेषुकृत्येष्वस्वातन्त्र्यस्येष्टत्वात् । किंचिदपीत्यन्वयः ॥ १४७ ॥

---

(१४७) गृहेष्वपि=गृहेण्वपि (ल, र, ब, न, भ)

(६) रामचन्द्रः । स्त्रीधर्मानाह बाल्येति । न स्वातन्त्र्यं स्त्रियाः कचिदित्यर्थः ॥ १४७ ॥

बाल्ये पितुर्वशे तिष्ठेत्पाणिग्राहस्य यौवने ॥ पुत्राणां भर्तरि प्रेते न भजेत्स्त्री स्वतन्त्रताम् ॥१४८॥

(२) सर्वज्ञनारायणः । बाल्यइत्यादि पित्रादिगृहवासकालोपलक्षणम् ॥ १४८ ॥

(३) कुल्लूकः । किंतु बाल्ये पितुर्वशे तिष्ठेत । यौवनेभर्तुः भर्तरि मृते पुत्राणां ॥ तदभावे तत्सपिण्डेषु चासत्सु पितृपक्षःप्रभुःस्त्रियः । पक्षद्वयावसाने तु राजा भर्ता स्त्रियामतः । इतिनारदवचनात् ज्ञातिराजादीनामायत्ता स्यात्कदाचिन्न स्वतन्त्रा भवेत् ॥ १४८ ॥

(४) राघवानन्दः । स्वातन्त्र्याभावंव्यनक्ति बाल्यइति । पाणिग्राहस्य भर्तुः पुत्राणामिति बहुवचनंसपिण्डादिग्रहणार्थं सर्वत्र तिष्ठेद्वशे इत्यनुषज्यते पितारक्षतीत्युक्तपोषकाभावविषयम् ॥ १४८ ॥

(५) नन्दनः । पाणिग्राहस्य भर्तुः ॥ १४८ ॥

(६) रामचन्द्रः । पाणिग्राहस्यभर्तुर्वशेयौवने तिष्ठेत् । भर्तरि प्रेते पुत्राणांवशे तिष्ठेत् ॥ १४८ ॥

पित्रा भर्त्रा सुतैर्वाऽपि नेच्छेद्विरहमात्मनः ॥ एषां हि विरहेण स्त्री गर्ह्ये कुर्यादुभे कुले ॥ १४९ ॥

(१) मेधातिथिः । तत्सपिण्डेष्वित्यादिना चासतिस्वामिनि कर्तव्यं । अव्यवस्थानंवचनीयताहेतुःकथितोगर्ह्ये-कुर्यादिति । एषांहि विरहेण निवसन्ती गच्छन्तीवा ग्रामान्तरमित्यध्याहार्यम् ॥ १४८ ॥ १४९ ॥

(२) सर्वज्ञनारायणः । गर्ह्येकुर्यात् व्यभिचारेण उभे कुले पितुर्भर्तुश्च ॥ १४९ ॥

(३) कुल्लूकः । पित्रा पत्या पुत्रैर्वा नात्मनोविरहंकुर्यात् यस्मादेषांवियोगेन स्त्रीबन्धकीभावंगतापि पतिपितृकुले निन्दिते करोति ॥ १४९ ॥

(४) राघवानन्दः । किंचान्यत् पित्रेपि । विरहं वियोगं विरहेदण्डमाह तेषामिति गर्ह्ये गर्ह्यायोग्ये ॥ १४९ ॥

(५) नन्दनः । उभे कुले पितृभर्तृकुले ॥ १४९ ॥

(६) रामचन्द्रः । पित्रादीनामेषांविरहेण स्त्री उभेकुले गर्ह्ये कुर्यात् ॥ १४९ ॥

सदा प्रहृष्टया भाव्यंगृहकार्येषु दक्षया ॥ सुसंस्कृतोपस्करया व्यये चामुक्तहस्तया ॥ १५० ॥

(१) मेधातिथिः । आभीक्ष्णवचनःसदाशब्दोनित्यशब्दवत् । नित्यप्रहसितयेइतिसत्यप्यन्यत्र क्रोधशोकवेगे भर्तुर्दर्शनेमुखप्रसादस्मितनर्मवचनादिनाप्रहर्षोदर्शनीयः । कुमार्याभर्तृमत्याश्चायमुपदेशः । गृहकार्येच दक्षया । अर्थसंग्रहव्यययोःधर्मकार्येस्नानादौचअर्थस्य संग्रहे चैनामित्यादिना गृहकार्यमुक्तम् । तत्र दक्षया चतुरया भवितव्यम् । अत्र संस्कारादिशीघ्रंनिष्पाद्यम् । सुसंस्कृतोपस्करया उपस्करं गृहोपयोगिभाण्डंघटिकादि तत्सुसंस्कृतंसुसंमृष्टंशोभावत्कर्तव्यम् । व्ययेच मित्रज्ञात्यतिथ्यभोजनार्थे धने अमुक्तहस्तया उदारया नभवितव्यम् । नबहुव्ययितव्यमित्यर्थः । सुसंस्कृतान्युपस्कराणि यस्याइति बहुव्रीहिः एवंमुक्तोहस्तोयस्याइतिविग्रहः पश्चान्नञ्समासः । रूढ्या उदारवचनोमुक्तहस्तशब्दः ॥ १५० ॥

(२) सर्वज्ञनारायणः । उपस्करोगृहोपकरणंतत्सुसंस्कृतं निर्णिक्तंकार्यम् । अमुक्तहस्तया संयतहस्तया ॥ १५०॥

---

(१४८) पितुर्वशे=पितुर्गृहे (ग)

(३) कुल्लूकः । सर्वदा भर्तरि विरुद्धेऽपि प्रसन्नवदनया गृहकर्मणि चतुरया सुशोधितकुण्डकटाहादिग्रहभाण्डया व्ययेचाबहुमदया स्त्रिया भवितव्यम् ॥ १५० ॥

(४) राघवानन्दः । तस्याःकृत्यमाह सदेति । प्रहृष्टया प्रहृष्टवदनया सुसंस्कृतोपस्करयां सुष्ठु संस्कृतानि कुण्डकटाहपात्राणि यया तया तथा अमुक्तौ हस्तौ बहुव्यये कर्तव्ये यस्याः साऽमुक्तहस्ता तया ॥ १५० ॥

(५) नन्दनः । उपस्करोगृहोपकरणवर्गोघटपिठरशरावपानभोजनभाजनमुसलोलूखलादि ॥ १५० ॥

(६) रामचन्द्रः । व्यये द्रव्यस्य आयव्यये अमुक्तहस्तया संयतहस्तया व्ययपराङ्मुख्या भाव्यमित्यर्थः ॥१५०॥

यस्मै दद्यात्पिता त्वेनां भ्राता वानुमते पितुः॥ तं शुश्रूषेत जीवन्तं संस्थितं च न लङ्घयेत्॥१५१॥

(१) मेधातिथिः । भ्रातावानुमतेपितुः यथैव पित्रानुज्ञातस्य भ्रातुर्दातृत्वमेवंपितुर्निरपेक्षस्यापि दातृत्वश्रुतौ भार्यायाअनुमतेसति दानंबोद्धव्यम् । सर्वत्र सहाधिकारादुभयोश्च दुहितरि स्वाम्यात् । असति पितरि मात्रापि देयेति नवमे दर्शितम् । मातापित्रोरपत्यंतन्निमित्तंच स्वाम्यमिति युक्ता इतरेतरापेक्षा । शुश्रूषेत आराधयेत् । संस्थितंच मृतंच न लङ्घयेत् लङ्घनमतिक्रमणंन स्वातन्त्र्येणासीतेत्यर्थः । यथा जीवति भर्तरि तत्परवती एवंमृतेपि तदेव तत्परतन्त्रया भवितव्यम् । यतआह प्रदानंस्वामिकारकम् । यदैवपित्रा दत्ता तदैव पितुःस्वाम्यंनिवर्तते । यस्मैदीयते तस्योत्पद्यते- अतश्च न विवाहकालएवदानंप्रागपि विवाहाद्वरणकालेअस्तिदानंकिमर्थस्तर्हिविवाहः ॥ १५१ ॥

(२) सर्वज्ञनारायणः । भ्रातावेतिदानाधिकार्यन्तरोपलक्षणम् । अनुमतेपितुरितिप्रायिकत्वात् । तंसंस्थितं मृतंच न लङ्घयेन्न व्यभिचरेत् ॥ १५१ ॥

(३) कुल्लूकः । यस्मै पितैनां दद्यात्पितुरनुमत्या भ्रातावा तंजीवन्तंपरिचरेन्मृतंच नातिक्रामेद्व्यभिचारेण तदीयश्राद्धतर्पणादिविरहितया पारलौकिककृत्यखण्डनेन च ॥ १५१ ॥

(४) राघवानन्दः । किंच यस्माइति । न लङ्घयेत् मृतंच नातिक्रामेत् व्यभिचारेण तदीयश्राद्धतर्पणादिविहितपारलौकिकखण्डनेन च ॥ १५१ ॥

(५) नन्दनः । संस्थितंच नलङ्घयेत् । मृते पत्यौ पुरुषान्तरंनभुञ्जेदित्यर्थः ॥ १५१ ॥

(६) रामचन्द्रः । संस्थितं मृतं तत्कर्म न लङ्घयेत् न व्यभिचरेत् ॥ १५१ ॥

मङ्गलार्थंस्वस्त्ययनंयज्ञश्चासांप्रजापतेः॥ प्रयुज्यते विवाहेषु प्रदानं स्वाम्यकारणम् ॥ १५२ ॥

(१) मेधातिथिः । अभिलषितार्थनिष्पत्तिर्मङ्गलं तत्साधनंतदर्थंप्रयुज्यते । तत्र प्रजापतेर्यज्ञइतिक्रियाविशेषणत्वान्नपुंसकम् । स्वस्तिरइयते प्राप्यते येन तत्स्वस्त्ययनं । यदस्य प्रियंवस्तुविद्यते तन्न नश्यतीत्यर्थः । आसांस्त्रीणां । तेषु विवाहेषु । यज्ञःप्रजापतेः । प्रजापतेर्देवतायाः क्रियते प्रजापतिनत्वदेतान्यइतिविवाहे आज्यहोमाः केषांचिदाम्नाताः उपलक्षणंचैतदन्यासामपिदेवतानांपूषवरुणार्यम्णाम् । तथाहि । तत्र मन्त्रवर्णाःपूषणंनुदेवंवरुणंनुदेवमित्यादयोदेवतान्तरप्रकाशनपराः । प्रदानादेवासत्यपि विवाहे स्वाम्यमुत्पद्यतइत्येतदत्रज्ञाप्यते । विवाहयज्ञस्तु मङ्गलार्थइत्याद्यविवक्षितम् दारकरणंहि विवाहइतिस्मर्यते । सत्यपि स्वाम्ये नैवान्तरेण विवाहंभार्याभवतीति ॥ १५२ ॥

(२) सर्वज्ञनारायणः । अत्र केनाप्यधिकारिणा यदि न दत्ता बलाद्धोमादिना ब्राह्मणेन स्त्री संस्क्रियते तदपि विप्रस्य तत्रस्वाम्यमस्तीति प्रसंगाद्दर्शयतिमङ्गलार्थमिति । यत्पुण्याहवाचनादि स्वस्त्ययनं तन्न स्वाम्यकारकं मङ्गलार्थत्वेनान्यार्थत्वात्मनवेतल्पमितिश्रुतेः कन्यायामन्वक्षितत्वेप्रजापतिदैवतत्वात्कन्याविवाहे योहोमरूपोयज्ञः स

आपतेर्यज्ञोभवति सोपि मङ्गलार्थं संपत्त्यर्थंप्रयुज्यते नतु ततःस्वत्वं किंतु सत्स्वधिकारिषु तैर्दानमसत्सु स्वयंवा स्वस्य दानं-विप्रस्य स्वाम्यकारकमतोयस्मै दत्ता तमेव नव्यभिचरेदित्यर्थः ॥ १५२ ॥

(३) कुल्लूकः । यदासांहास्त्ययनशान्त्यनुमन्त्रवचनादिरूपं यश्चासांप्रजापतियागः प्रजापत्युद्देशेनाज्यहोमात्मको-विवाहेषु क्रियते तन्मङ्गलार्थमभीष्टसंपत्त्यर्थंकर्म । यत्पुनःप्रथमंप्रदानंवाग्दानात्मकंतदेव भर्तुः स्वाम्यजनकं ततश्च वाग्दा-नादारभ्य स्त्रीभर्तृपरतन्त्रा तमाश्रयेतेति पूर्वोक्तशेषः । यत्तु नवमे वक्ष्यते । तेषांनिष्ठा तु विज्ञेया विद्वद्भिःसप्तमेपदेइति तद्भार्यात्वसंस्कारार्थमित्यविरोधः ॥ १५२ ॥

(४) राघवानन्दः । किंच मङ्गलेति । पूषणंनु देवं वरुणंनु देवमित्यादिमन्त्रवाचनादिपुरःसरंप्रजापत्युद्देशेनाज्यहो मात्मकोविवाहेषु क्रियते योयज्ञःतन्मङ्गलार्थमभीष्टसंपत्त्यर्थं स्वस्ति मङ्गलमीयतेऽनेनेति स्वस्त्ययनं यथास्यात्प्रदानं वाग्दानंतद्भर्तुःस्वाम्यकारणंविवाहविना न स्वाम्यमात्रेण भार्यात्वमिति भावः ॥ १५२ ॥

(५) नन्दनः । कदायं भर्ता भवतीतिचेत्प्रदानात्प्रभृत्येवेत्याह । मङ्गलार्थमिति । स्वस्त्ययनंवैवाहिकंमन्त्रक्रियारू-पम् । प्रजापतेर्यज्ञःप्राजापत्योहोमश्चयद्द्वयमासांस्त्रीणांविवाहेषु मङ्गलार्थंप्रयुज्यते नत्वामित्वार्थम् । स्वाम्यकारणस्वामित्व-कारकंप्रदानमेवप्रदानात्प्रभृतिस्वामिपारतन्त्र्यंयुक्तमितिभावः ॥ १५२ ॥

(६) रामचन्द्रः । स्वस्त्ययनं स्वस्तिवाचनं आसांयज्ञः विवाहहोमः प्रजायते कन्यायाअधिदेवतायाः स्वाम्य-कारकं स्वामित्वकारकम् ॥ १५२ ॥

अनृतावृतुकाले च मन्त्रसंस्कारकृत्पतिः ॥ सुखस्य नित्यं दातेह परलोके च योषितः ॥१५३ ॥

(१) मेधातिथिः । सर्वत्रैवाप्रतिषिद्धवर्जमिति अनृतावपिसुखस्य दाता । मन्त्रसंस्कारोविवाहविधिस्तस्य कर्ता मन्त्रसंस्कारकृत् । परलोकेच पत्यासह धर्मेधिकाराच्च तत्फलावाप्तेः परलोकसुखस्य दातेत्युच्यते ॥ १५३ ॥

(२) सर्वज्ञनारायणः । योदानानन्तरं मन्त्रतः पाणिग्रहणादिसंस्कारकृत्पतिः सोऽनृतौ मैथुनेनेह सुखस्यकृतौ च प्रजोत्पादनद्वारा परलोके सुखस्य दाता । उपपतिस्त्विहैव सुखस्य दातेति न भर्तारंव्यभिचरेदित्यर्थः ॥ १५३ ॥

(३) कुल्लूकः । यतः मन्त्रसंस्कारोविवाहस्तत्कर्ता भर्ततावुपेयात्सर्वत्र वा प्रतिषिद्धवर्ज्यमिति गोतमवचनादृतु-कालेऽन्यदाच नित्यमिहलोके च सुखस्य दाता तदाराधनेन च स्वर्गादिप्राप्तेः परलोकेऽपि सुखस्य दातेति ॥ १५३ ॥

(४) राघवानन्दः । अनृतौ मन्त्रसंस्कारोविवाहस्तस्य कर्ता ऋतावपि गर्भंधेहिसिनीवालीत्यादिमन्त्रेण यःसं स्कारस्तस्यापि कर्ता अतऋतावुपगच्छेदिति शेषः । उभयत्रगच्छेद्वा । ऋतावुपेयात्सर्वत्रवा प्रतिषिद्धवर्ज्यमिति गोतमव चनात् । अत्रापि तद्व्रतोरतिकाम्ययेत्युक्तं पतिविनोभयत्र सुखाहर्तिरित्याह सुखस्येति ॥ १५३ ॥

(५) नन्दनः । अनृतावृतुकालेच सर्वदेत्यर्थः ॥ १५३ ॥

विशीलः कामवृत्तोवा गुणैर्वा परिवर्जितः॥ उपचर्यः स्त्रिया साध्व्या सततं देववत्पतिः ॥ १५४ ॥

[दानप्रभृति यातु स्याद्यावदायुः पतिव्रता ॥ भर्तृलोकं न त्यजति यथैवारुन्धती तथा ॥१॥]+

(१) मेधातिथिः । द्यूतादिसक्तोविशीलः । कामप्रधानंवृत्तमस्येति कामवृत्तः । गुणैर्वा परिवर्जितः । श्रुतधनादिगुण-विहीनः । उपचार्यःआराधनीयः ॥ १५४ ॥

+ (क, ख, ग)

(२) **सर्वज्ञनारायणः** । विशीलोनिष्ठुरः । कामवृत्तः अप्रतिनियतस्त्र्यन्तरसक्तः । गुणैर्विद्यादिभिः ॥ १५४ ॥

(३) **कुल्लूकः** । तस्मात्तुविशीलइति । सदाचारशून्यःस्त्र्यन्तरानुरक्तोवा विद्यादिगुणहीनोवा तथापि साध्व्या स्त्रिया देववत्पतिराराधनीयः ॥ १५४ ॥

(४) **राघवानन्दः** । किंच विशीलइति । कामवृत्तः निवृत्तकामः परदाररतोवा । उपचर्यः सेव्यः ॥ १५४ ॥

(५) **नन्दनः** । देववद्देवतेव । दानात्प्रभृतिसततमापद्यपिसमाहिता भर्तृलोकानामोतीत्युत्तरत्रसंबन्धः ॥ १५४ ॥

(६) **रामचन्द्रः** । विशीलः शीलरहितः निष्ठुरइत्यर्थः । कामवृत्तः अन्यस्त्रीसक्तः गुणैः विद्यादिभिः परिवर्जितः ॥ १५४ ॥

[(६) **रामचन्द्रः** । दानेति । दानप्रभृति कन्यादानप्रभृति ॥]

नास्ति स्त्रीणां पृथग्यज्ञोन व्रतं नाप्युपोषणम्* ॥ पतिंशुश्रूषते येन तेन स्वर्गे महीयते ॥ १५५ ॥

[पत्यौ जीवति यातु स्त्री उपवासं व्रतं चरेत् ॥ आयुष्यं हरते भर्तुः नरकं चैव गच्छति ॥ १ ॥]¹

(१) **मेधातिथिः** । भर्त्राविना कृतानांयज्ञाधिकारोनास्तीत्येतदसकृत्प्रतिपादितं तेनव्रतोपवासावपि । कुर्वती तदनुज्ञांगृण्हीयात् । व्रतं मद्यमांसादिनिवृत्तिसंकल्पः नतु कृच्छ्राणि । तत्र जपहोमयोरङ्गत्वात्तदभावाच्च स्त्रियाः । नच वक्तुंयुक्तं । जपेहोमविकलंकृच्छ्रानुष्ठानमस्याभविष्यति नहि स्वेच्छयाङ्गत्यागोयुक्तः सर्वाङ्गकल्पयुक्तस्य कर्मणोभ्युदयसाधनत्वेनावगतत्वात् । नहि पुरुषशक्तिभेदापेक्षयाङ्गानामुपचयापचयौ भवतः । सन्तिच सर्वाङ्गोपसंहारेण सवर्णास्त्रैवर्णिकाः प्रयोगमनुष्ठातुम् । अतोन स्त्रीशूद्रस्याभ्युदयकामस्य कृच्छ्रेष्वधिकारः प्रायश्चित्तेषु विशेषंवक्ष्यामः । उपोषितं उपवासः आहारविच्छेदएकरात्रद्विरात्रादिषु । शुश्रूषते परिचरति ॥ १५५ ॥

(२) **सर्वज्ञनारायणः** । पृथक् भर्त्रा विना । न यज्ञः तथा व्रतं चान्द्रायणादि । उपोषणं देवताप्रीत्यर्थमुपवासः । पृथक् स्वातन्त्र्येण पत्यौ जीवति नास्ति । येन कर्मणा पतिंशुश्रूषते सेवते तेन कर्मणा ॥ १५५ ॥

(३) **कुल्लूकः** । यस्माच्च नास्तिस्त्रीणामिति । यथा भर्तुःकस्याश्चित्पत्न्यारजोयोगादिनाअनुपस्थितावपि पत्न्यन्तरेण यज्ञनिष्पत्तिः तथा न स्त्रीणांभर्त्राविना यज्ञसिद्धिः । नापि भर्तुरनुमतिमन्तरेण व्रतोपवासौ किंतु भर्तृपरिचर्ययैव स्त्री स्वर्गलोके पूज्यते ॥ १५५ ॥

(४) **राघवानन्दः** । किंच नास्तीति । न व्रतमुपोषितमुपवासः भर्तुराज्ञांविना व्रतोपवासौनस्तः येनविनयादिना ॥ १५५ ॥

(५) **नन्दनः** । पतिशुश्रूषांविना । स्त्रीणांयज्ञोनास्ति । शुश्रूषैव यज्ञःस्त्रीणामित्यर्थः । तेन शुश्रूषणेन यज्ञप्रतिनिधिनेत्यभिप्रायः ॥ १५५ ॥

पाणिग्राहस्य साध्वी स्त्री जीवतोवा मृतस्य वा ॥ पतिलोकमभीप्सन्ती नाचरेत्किंचिदप्रियम् ॥ १५६ ॥

(१) **मेधातिथिः** । पत्युर्लोकः पत्या सह धर्मानुष्ठानेन योऽर्जितः स्वर्गादिःसपतिलोकस्तमभीप्सन्तीप्राप्तुकामा-

---

¹ (क, ख, ग) * पोषणम्=पोषितम् [(अ), मेधा०]

नाचरेत्किंचिदप्रियंपरपुरुषसंसर्गादिशास्त्रप्रतिषिद्धम् । नहि मृतस्य किंप्रियमप्रियंचाशक्यमवसातुं । नच जीवतोयत्प्रियंतदेव मृतस्य भवान्तरोपपन्नानांतु प्रीतिभेदात् तस्माद्यत्प्रतिषिद्धंस्यात्तत्प्रियंतदेवाप्रियं तन्नाचरेत् ॥ १५६ ॥

(२) सर्वज्ञनारायणः । मृतस्यापि तदप्रियं यज्जीवनकाले न प्रियम् ॥ १५६ ॥

(३) कुल्लूकः । पत्यासह धर्माचरणेन योजितःस्वर्गादिलोकस्तमिच्छन्ती साध्वी स्त्री जीवतोवा मृतस्य वा भर्तुर्न किंचिदप्रियमर्जयेत् । मृतस्याप्रियंव्यभिचारेण विहितश्राद्धखण्डनेनच ॥ १५६ ॥

(४) राघवानन्दः । तदेवाह नाचरेत्किंचिदप्रियमिति अविनयं श्राद्धाद्यभावम् ॥ १५६ ॥

कामं तु क्षपयेद्देहं पुष्पमूलफलैः शुभैः ॥ नतु नामापि गृह्णीयात्पत्यौ प्रेते परस्यतु ॥ १५७ ॥

(१) मेधातिथिः । तदेवसविशेषंदर्शयति । पुंवत्स्त्रीणामपि प्रतिषिद्धआत्मत्यागोयदप्यङ्गिरसापतिमनुम्रियेरन्नित्युक्तं तदपि नित्यवदवश्यं कर्तव्यं फलस्तुतिस्तत्रास्तिफलकामायाश्चाधिकारेऽश्येनतुल्यता । तथैव श्येनेन हिंस्याद्भूतानीत्यधिकारस्यातिप्रवृद्धतरद्वेषान्धतया सत्यामपि प्रवृत्तौ न धर्मत्वमेवमिहाप्यतिप्रवृद्धफलाभिलाषायाःसत्यपि प्रतिषेधे तदतिक्रमेण मरणे प्रवृत्युपपत्तेर्नशास्त्रीयत्वमतोस्त्येव पतिमनुमरणेपि स्त्रियाःप्रतिषेधः । किंच तस्मादुहनपुरायुषःप्रेयादितिप्रत्यक्षश्रुतिविरोधोयंस्मृतिरप्येषाशक्यते कल्पयितुम् । यथा वेदमधीत्य स्नायादित्यध्ययनानन्तरमकृतार्थोवबोधस्य स्नानस्मरणमतोमृतपतिकायाअनपत्यायाअसति भर्तृधनादौ दायिकेच कर्तनादिना च केनचिदुपायेन जीवन्त्याजीवितस्यातिप्रियत्वात्तदुपेक्षणस्याशास्त्रत्वात्प्रतिषिद्धत्वादापदि सर्वाभिचाराणांविश्वामित्रजाघनीमित्यादिनानुज्ञातत्वाद्यभिचारोपजीविताप्राप्ताविदमुच्यते काममस्यामवस्थायांशरीरंक्षपयेत् क्षयंनयेत्पुष्पमूलफलैर्यथोपपादंवृत्तिंविदधीत । नतु नामापि गृह्णीयात्पतिर्मेत्वमद्येत्यन्यस्य यत्तु । नष्टे मृते प्रव्रजिते क्लीबेऽथपतिते पतौ । पञ्चस्वापत्सु नारीणांपतिरन्योविधीयतइति । तत्र पालनात्पतिमन्यमाश्रयेत सैरन्ध्रकर्मादिनात्मवृत्त्यर्थं नवमेच निपुणंनिर्णेष्यते । प्रोषितभर्तृकायाश्च सविधिः । कामशब्दप्रयोगोऽर्थसंसूचनार्थम् । देहक्षपणमप्यकार्यमिदंत्वन्यदकार्यतरंयदन्येन पुरुषेण संप्रयोगः ॥ १५७ ॥

(२) सर्वज्ञनारायणः । यद्यस्याजीवनोपायमविधायैव भर्ता मृतस्तदापि जीवनोचितधनाद्यर्थेन व्यभिचरेदित्यर्थः । न नामापि गृण्हीयात् वचसापि तवाहमितिन ब्रूयात् ॥ १५७ ॥

(३) कुल्लूकः । वृत्तिसंभवेऽपिपुष्पमूलफलैःपवित्रैश्च देहंक्षपयेदल्पाहारेण क्षीणंकुर्यात् । नच भर्तरि मृते व्यभिचारधिया परपुरुषस्य नामाप्युच्चारयेत् ॥ १५७ ॥

(४) राघवानन्दः । किंच काममिति । तद्देहंक्षपयेदित्यन्वयः । नामापीति व्यभिचारधिया श्रवणंकीर्तनंकेलिरित्यत्र नामग्रहणस्यापि मैथुनाङ्गत्वोक्तेः ॥ १५७ ॥

(५) नन्दनः । आपद्यपि नान्यंभजेदित्याह काममिति । शुभैरनिषिद्धैःकदल्यादिपुष्पमूलफलैर्देहंक्षपयेद्यापयेत् ॥ १५७ ॥

(६) रामचन्द्रः । परस्य अन्यस्य नामापि न गृह्णीयात् किंपुनः अत्यल्पशीलाचरणादि ॥ १५७ ॥

आसीतामरणात्क्षान्ता नियता ब्रह्मचारिणी ॥ योधर्मएकपत्नीनां कांक्षन्ति तमनुत्तमम् ॥ १५८ ॥

(१) मेधातिथिः । एषएवार्थोविस्पष्टीक्रियते । आमरणाद्ब्रह्मचारिण्यासीत अस्यामापदि न व्यभिचारेणात्मानं-

जीवयेत् । क्षान्ता तत्कृतंदुःखमवधीरयन्तीनब्रह्मचर्यंक्षुदुपसृष्टंयेनचित्तंकल्लोलेनखण्डयेत् । एकः पतिर्यासांताएकस्य वा पत्न्यः एकपत्न्यस्तासांसावित्रीप्रभृतीनांयोधर्मो यस्यफलं वरदानाभिशापादिषु शक्तता तंकांक्षन्ती कामयमाना ब्रह्मचर्येनजह्यात् । अस्यामवस्थायां मूलफलाशिन्यायदि भवति मरणंततोन दोषः ॥ १५८ ॥

(२) सर्वज्ञनारायणः । आमरणात् स्वस्य । क्षान्ता क्लेशसहा । नियता भोजनादिसंयमवती । ब्रह्मचारिणी अनुत्पन्नापत्यवत्यपि त्यक्तमैथुना नतु पत्युरात्मनैवोपकारबुध्या पुत्रोत्पत्यर्थंपुरुषान्तरंगच्छेदित्यर्थः । योधर्मएकपत्नीनामेकपतिनियमे योलभ्यः । अनुत्तमं प्रजोत्पादनलभ्याद्धर्माच्छ्रेष्ठंधर्मम् ॥ १५८ ॥

(३) कुल्लूकः । एवंचसति आसीतेति । क्षमायुक्ता नियमवत्येकभर्तृकानांयोधर्मःप्रकृष्टतमस्तमिच्छन्ती मधुमांसमैथुनवर्जनात्मकब्रह्मचर्यशालिनी मरणपर्यन्तंतिष्ठेत् । अपुत्रापि पुत्रार्थेन परपुरुषंसेवेत ॥ १५८ ॥

(४) राघवानन्दः । क्षान्ता उद्रिक्तकामापिक्षमाशीला । नियता नियमवती पुंवार्ताविरहिता ब्रह्मचारिणी । ताम्बूलंविधवास्त्रीणांयतीनामूर्ध्वरेतसाम् । प्रत्येकंमांसतुल्यंस्यात्मिलितंतु सुरासमम् इत्युक्तमधुमांसताम्बूलादिनिषेधपरा । एकपत्नीनामेकभर्तृकाणांयोधर्मस्तं अनुत्तमं न विद्यतेउत्तमोधर्मोयस्मात् सोऽनुत्तमस्तम् ॥ १५८ ॥

(५) नन्दनः । क्षान्ता दुःखसहिष्णुः ॥ १५८ ॥

(६) रामचन्द्रः । एकपत्नीनांपतिव्रतानांपतिधर्मपरायणानांयोधर्मः तंधर्मंअनुत्तमं कांक्षन्ती ॥ १५८ ॥

अनेकानि सहस्राणि कुमारब्रह्मचारिणाम् ॥ दिवं गतानि विप्राणामकृत्वा कुलसंततिम् ॥१५९॥

(१) मेधातिथिः । पूर्वेणापदि जीविकार्थःपरपुरुषसंसर्गोनिषिद्धोऽनेन पुत्रार्थाप्रवृत्तिर्निषिध्यते । एवंकिल श्रूयते । नापुत्रस्य लोकोस्तीतिलिङ्गंच तत्राविवक्षितमतःपुत्रार्थे प्रसङ्गइदमुच्यते । बहूनि सहस्राणि कुमाराएव ब्रह्मचारिणोऽकृतदारानैष्ठिकास्तेषामनेकानि सहस्राणि दिवंगतानि स्वर्गमाप्नुवन्ति । नियोगस्तु नवमे चतुर्विषयो विहितोनात्मतन्त्रतया पुत्रार्थिन्याः । अकृत्वा कुलसंततिं कुलवृध्यर्थासंततिस्तामकृत्वा पुत्रानजनयित्वेत्यर्थः । अनेकानीति नञ्समासस्योत्तरपदार्थप्राधान्येन बहुवचनंचिन्त्यम् । सत्यप्येकत्वप्रतिषेधेद्व्यादिसंख्यावचनंदुर्लभम् । तथाह्ययंस्वधर्माविशेनपरित्यक्तस्वगतिकत्वेनाच्छादिततद्रूपोप्यतिदीर्घसंख्याविशेषानाचष्टे यथा गोदौग्रामइति । उक्तंच चूर्णिकाकारेण अनेकस्मादितिसिध्यतीति । एकवचनप्रयोगशिष्टिसिद्धिंदर्शितवान् असहायवचनोवायमनेकशब्दः । असहायानि गतानिभार्यासहायभूताएषांनासीदित्यर्थः ॥ १५९ ॥

(२) सर्वज्ञनारायणः । एतदेवप्रपंचयतिबहूनिहीति । कौमारादारभ्य ब्रह्मचारिणाम् । कुलस्य स्वकुलजस्य संहतिं परंपराम् ॥ १५९ ॥

(३) कुल्लूकः । यस्मात् अनेकानीति । बाल्यतएव ब्रह्मचारिणामकृतदाराणांसनकवालखिल्यादीनांब्राह्मणानां बहूनि सहस्राणिकुलवृद्ध्यर्थंसंततिमनुत्पाद्यापि स्वर्गंगतानि ॥ १५९ ॥

(४) राघवानन्दः । ऊर्ध्वरेतसांयेलोकास्तेलोकाअस्याइत्याह अनेकेति द्वाभ्याम् । अकृत्वाकुलसन्ततिं विरक्तनैष्ठिकानांदाराकरणे न दोषइति ध्वनितं तान्फलवादेनावर्जयति ते यथास्वर्गलोकंगच्छन्ति ब्रह्मचर्येण विन्दतइति श्रुतेः । तथेयमपीत्यन्वयः ॥ १५९ ॥

(५) नन्दनः । मृतभर्तृका पुत्रहीनापि ब्रह्मचर्येणस्वर्गंगच्छतीतिनिदर्शनंश्लोकद्वयेनाह अनेकानीति । कुमारब्रह्मचारिणांकौमारात्प्रभृत्यामरणंब्रह्मचारिणाम् ॥ १५९ ॥

(६) **रामचन्द्रः** । द्वाभ्यामाह अनेकेति । कौमारब्रह्मचारिणां विप्राणामनेकानि सहस्राणि अकृत्वा कुलसन्ततिंदिवंगतानि ॥ १५९ ॥

मृते भर्तरि साध्वी स्त्री ब्रह्मचर्ये व्यवस्थिता ॥ स्वर्गंगच्छत्यपुत्राऽपि यथा ते ब्रह्मचारिणः॥१६०॥

(१) **मेधातिथिः** । एषएवार्थोभूयउच्यते प्रतिपत्तिदार्ढ्यार्थम् ॥ १६० ॥

(२) **सर्वज्ञनारायणः** । साध्वी मनसाप्यव्यभिचारिणी । अतः पुत्रेण विनाप्युक्तमलोकलाभान्न प्रजार्थमपि व्यभिचरेदित्यर्थः ॥ १६० ॥

(३) **कुल्लूकः** । साध्वाचारा स्त्री मृतेभर्तर्यकृतपुरुषान्तरमैथुना पुत्ररहिताऽपि स्वर्गंगच्छति यथा ते सनकवालखिल्यादयः पुत्रशून्याःस्वर्गंगताः ॥ १६० ॥

(४) **राघवानन्दः** । एतादृश्याःपुत्रेणालमित्याह अपुत्रापीति ॥ १६० ॥

(६) **रामचन्द्रः** । साध्वी स्त्री मृते भर्तरिब्रह्मचर्येऽवस्थिता अपुत्रापि स्वर्गंगच्छति यथा ते ब्रह्मचारिणःस्वर्गंगताः ॥ १६० ॥

अपत्यलोभाद्या तु स्त्री भर्तारमतिवर्तते ॥ सेहनिन्दामवाप्नोति पतिलोकाच्च हीयते ॥ १६१ ॥

(१) **मेधातिथिः** । पुत्रोमेजायतामित्यभिलाषःसोऽपत्यलोभस्ततोहेतोर्या भर्तारमतिक्रम्य वर्ततेऽन्येनसंप्रयुज्येत सा इहलोके निंदां गर्हां प्राप्नोति स्वर्गंच न प्राप्नोति ॥ १६१ ॥

(२) **सर्वज्ञनारायणः** । अतिवर्तते व्यभिचरति । पतिलोकात् पतिशुश्रूषालभ्यलोकात् ॥ १६१ ॥

(३) **कुल्लूकः** । पुत्रोमे जायतां तेन स्वर्गमाप्स्यामीति लोभेन या स्त्री भर्तारमतिक्रम्य वर्तते व्यभिचरतीत्यर्थः सेह लोकेगर्हांप्राप्नोति परलोकंच स्वर्गंतेन पुत्रेण न लभते ॥ १६१ ॥

(४) **राघवानन्दः** । विपरीते दण्डमाह अपत्येति । गुर्वनुज्ञांविनेति शेषः स्वर्गलोकवत् प्रापयति लोकात् ॥ १६१ ॥

(५) **नन्दनः** । अपत्यहेतोः स्त्रीणामन्यपरिग्रहे दोषमाह अपत्येति ॥ १६१ ॥

(६) **रामचन्द्रः** । पुत्रस्य लोभाद्या स्त्री भर्तारमतिवर्तते अतिक्रम्यान्यत्रगच्छति सानिन्दामाप्नोति ॥ १६१ ॥

नान्योत्पन्ना प्रजास्तीह न चाप्यन्यपरिग्रहे ॥ न द्वितीयश्च साध्वीनां क्वचिद्भर्तोपदिश्यते॥१६२॥

(१) **मेधातिथिः** । अन्येन भर्त्रा याउत्पादिता प्रजा सा नैव तस्याःप्रजा । अन्यदारेषु च या पुंसोत्पादिता सापि तस्य न भवति ॥ १६२ ॥

(२) **सर्वज्ञनारायणः** । अन्येन भर्तुरन्येनोत्पन्नोत्पादिता न प्रजास्ति स्त्रियाः । नचान्यस्य परिग्रहे भार्यायामुत्पन्ना प्रजा पुरुषस्यास्तीति प्रसंगादुक्तम् । नचैकस्मादन्योपि भर्ता भवति येनतदुत्पन्नाप्रजापिनान्योत्पन्नेत्याह नद्वितीयइति ॥ १६२ ॥

(३) **कुल्लूकः** । अत्रैवहेतुमाह नान्योत्पन्नेति । यस्माद्भर्तृव्यतिरिक्तेन पुरुषेणोत्पन्ना सा प्रजा तस्याःशास्त्रीया नभवति न चान्यपत्न्यामुत्पादितोत्पादकस्य प्रजा भवति । एतच्चानियोगोत्पादितविषयम् । बहुभर्तृकेयमिति लोकप्रसिद्धेः

(१६१) पति=पर (मेधा०)

द्वितीयोपि भर्त्तैव तस्मादन्योत्पादितत्वमसिद्धमित्याशङ्क्याह नेति । लोके गर्हाप्रसिद्धावपि साध्वाचाराणांन क्वचिच्छास्त्रे द्वितीयोपभर्त्तोपदिश्यते एवंच सति पुनर्भूत्वमपि प्रतिषिद्धम् ॥ ६२ ॥

(४) **राघवानन्दः** । साध्वीति विशेषणान्नास्यानियुक्तता कुतोऽस्याःसाध्वीत्वंतत्रहेतुर्नान्येति । नाप्यन्यस्य परिग्रहे अन्यस्य परिग्रहे न वर्तते अन्योस्याःपरिग्रहीता न भवतीति भर्ता गर्भस्येति शेषः ॥ १६२ ॥

(५) **नन्दनः** । अपत्यहेतोः स्त्रीणामन्यपरिग्रहवर्जने हेतुमाह नान्योत्पन्नेति । अन्योत्पन्ना प्रजेह स्त्रीषु नान्य स्त्रीणामन्योत्पन्ना प्रजा कार्याय न कल्पतइत्यर्थः । अन्यपरिग्रहेऽन्यस्यांभार्यायामन्योत्पन्नाप्रजानास्त्युत्पादकस्य प्रजाकार्यायन कल्पतइत्यर्थः । अस्योपन्यासोदृष्टान्तार्थः । क्वचिच्छास्त्रे साध्वीनांद्वितीयोभर्ता नोपदिश्यते । आभ्याम पिहेतुभ्यामप्रजसापि स्त्रिया ऽन्यपरिग्रहोन कर्तव्यइति ॥ १६२ ॥

(६) **रामचन्द्रः** । अन्योत्पन्ना परपुरुषोत्पन्ना स्त्रीणांप्रजा न भवेत युक्ता न भवेदित्यर्थः । च पुनः अन्यपरिग्रहेऽपि न प्रजायुक्ता भवेत् ॥ १६२ ॥

पतिंहित्वाऽपकृष्टंस्वमुत्कृष्टंया निषेवते ॥ निन्द्यैव सा भवेल्लोके परपूर्वेति चोच्यते ॥१६३॥

(१) **मेधातिथिः** । न केवलंनिन्दामेव येन ॥ व्यभिचारात्तुभर्तुःस्त्री लोके प्राप्नोति निन्द्यतां । शृगालयोनिंचाप्नोति पापरोगैश्चपीड्यते ॥ अतोनातिचरेद्भर्तारंदृष्टादृष्टफललोभेन स्त्रीधर्मोपसंहारश्लोकाऋजवश्चस्त्रीधर्माइत्यतोमयात्र व्याख्यानादरःकृतः एतावत्तत्रोपदेशार्थः यथापुंसोन्ययासह पुनःप्रवृत्तिकर्म नेह संस्थितंच नलङ्घयेदित्यनेन न्यायेन पुनःसहप्रवृत्तिरिति । तथा स्वर्गंगच्छत्यपुत्रापीत्यनेनापत्यजननमापादि प्रतिषिध्यते नियोगस्मृत्या तु तत्पुनरभ्यनुज्ञायते । तदेतदपत्योत्पादनमुक्तप्रतिषिद्धत्वाद्विकल्प्यते । अनयोस्तुस्मृत्योःकतमा स्मृतिर्ज्यायसीति न शक्यंकर्तुमतिशयावधारणं येनैकत्रापत्यमन्यत्रास्याःसंयमः उभयोरपि वस्तुनिर्वहति ॥ १६३ ॥

(२) **सर्वज्ञनारायणः** । नच यस्मै दत्ता तस्यापकृष्टकुलत्वे उत्कृष्टकुलभर्त्राश्रयणंकार्यमित्याह पतिमिति । वर्तमानभर्तुः परोन्यः पूर्वोभर्ता यस्याः सा परपूर्वा ॥ १६३ ॥

(३) **कुल्लूकः** । अपकृष्टंक्षत्रियादिकंस्वकीयंपतिंत्यक्त्वोत्कृष्टंब्राह्मणादिकंयाऽऽश्रयति सा लोके गर्हणीयैव भवति । परोऽन्यःपूर्वोभर्तास्याअभूदितिच लोकैरुच्यते ॥ ६३ ॥

(४) **राघवानन्दः** । किंच पतिमिति । स्वपतिंधनादिहीनतयानिकृष्टमपि । परापूर्वा परंभर्त्रन्तरंपूर्वमन्यकालेयस्याः सा ॥ १६३ ॥

(५) **नन्दनः** । अपकृष्टोऽपिसाध्व्यापतिर्नहातव्यइत्याह पतिमिति ॥ १६३ ॥

(६) **रामचन्द्रः** । या स्त्री स्वपतिमवकृष्टं पुंस्त्वरहितं हित्वा उत्कृष्टमन्यं निषेवते सा परपूर्वेत्युच्यते ॥ १६३ ॥

व्यभिचारात्तुभर्त्तुःस्त्री लोके प्राप्नोति निन्द्यताम् ॥ शृगालयोनिंप्राप्नोति पापरोगैश्च पीड्यते॥१६४॥

(२) **सर्वज्ञनारायणः** । तत्रपरपूर्वात्वे दोषमाह व्यभिचारादिति । लोके परलोके ॥ १६४ ॥

(३) **कुल्लूकः** । व्यभिचारफलमाह व्यभिचारेति । परपुरुषोपभोगेन स्त्रीहलोके गर्हणीयतांलभते मृताच शृगालीभवति कुष्ठादिरोगैश्च पीड्यते ॥ १६४ ॥

(४) **राघवानन्दः** । किंच भर्तुर्व्यभिचाराहुल्लङ्घनात् पापरोगैः कुष्ठश्वित्रादिभिः ॥ १६४ ॥

(६) **रामचन्द्रः** । भर्तुःसकाशात् ॥ १६४ ॥

पतिंया नाऽभिचरति मनोवाग्देहसंयता ॥ सा भर्तृलोकमाप्नोति सद्भिः साध्वीति चोच्यते १६५ ॥

(२) **सर्वज्ञनारायणः** । नाभिचरति न व्यभिचरति । मनः संयमोमनसः परपुरुषस्यास्मरणम् । वाक्संयमः तस्य स्वभर्तृतोगुणातिशयानभिधानम् । देहसंयमः तदसंस्पर्शः ॥ १६५ ॥

(३) **कुल्लूकः** । मनोवाग्देहसंयतेतिविशेषणोपादानाद्यामनोवाग्देहैरेव भर्तारंन व्यभिचरति सा भर्तृमात्रनिष्ठमनोवाग्देहव्यापारत्वाद्भर्त्रासहार्जितांल्लोकान्प्राप्नोति इहच शिष्टैःसाध्वीत्युच्यते । वाङ्मनसाभ्यामपि पतिंनव्यभिचरेदिति विधानार्थोदैहिकव्यभिचारनिवृत्तेरुक्तायाअप्यनुवादः ॥ १६५ ॥

(४) **राघवानन्दः** । किंचयथोक्तंविधानास्यात्तस्याउभयत्र सुखमित्याह पतिमिति ॥ १६५ ॥

अनेन नारी वृत्तेन मनोवाग्देहसंयता ॥ इहाग्र्यांकीर्तिमाप्नोति पतिलोकंपरत्र च ॥ १६६ ॥

(२) **सर्वज्ञनारायणः** । पतिलोकंपरत्रचेति परत्र यः पतिलोकः पतिपरिचर्यालभ्योलोकस्तंप्राप्नोति ॥ १६६ ॥

(३) **कुल्लूकः** । अनेन स्त्रीधर्मप्रकारेणोक्तेनाचारेण पतिशुश्रूषाभर्त्रव्यभिचारादिना मनोवाक्कायसंयता स्त्रीहलोके प्रकृष्टांकीर्तिंपरत्र पत्यासहार्जितंच स्वर्गादिलोकंप्राप्नोतीति प्रकरणार्थोपसंहारः ॥ १६६ ॥

(४) **राघवानन्दः** । किंच अनेनेति । नारीवृत्तेन नार्युक्तशीलेन । अग्र्यां श्रेष्ठां परत्रमृतौ पतिलोकमाप्नोतीत्यन्वयः ॥ १६६ ॥

(६) **रामचन्द्रः** । अनेन वृत्तेन भर्तृशुश्रूषणेन ॥ १६६ ॥

एवंवृत्तांसवर्णांस्त्रींद्विजातिः पूर्वमारिणीम् ॥ दाहयेदग्निहोत्रेण यज्ञपात्रैश्च धर्मवित् ॥ १६७ ॥

(१) **मेधातिथिः** । न्यायप्राप्तानुवादःश्लोकः । एवंतस्याः साध्वीत्वाद्युक्तएवात्राग्निहोत्रिणः संस्कारःनवाग्नयोहवाएतेपत्न्यांप्रमीतायांधार्यन्तइति ॥ १६७ ॥

(२) **सर्वज्ञनारायणः** । एवंवृत्तां साध्वीं सवर्णां पूर्वमारिणीं स्वस्मात्पूर्वमृतां दाहयेत्तस्याः पुत्रेण कर्त्रा । अग्निहोत्रेण स्वीयेन यज्ञपात्रैस्तद्यात्रोचितैः ॥ १६७ ॥

(३) **कुल्लूकः** । द्विजातिःसमानवर्णांयथोक्ताचारयुक्तांपूर्वमृतांश्रौतस्मार्ताग्निभिर्यज्ञपात्रैश्च दाहधर्मज्ञोदाहयेत् ॥ १६७ ॥

(४) **राघवानन्दः** । पूर्वमारिणीं पूर्वं मृताम् ॥ १६७ ॥

(६) **रामचन्द्रः** । पूर्वमारिणीं स्त्रीं अभ्युत्थापनपात्रसंबन्धिनीं मृतां यज्ञपात्रैःसह अग्निहोत्रस्याग्निना दाहयेत् ॥ १६७ ॥

भार्यायै पूर्वमारिण्यै दत्वाग्नीनन्त्यकर्मणि ॥ पुनर्दारक्रियांकुर्यात्पुनराधानमेव च ॥ १६८ ॥

(१) **मेधातिथिः** । तदेतत्पुनरधिकारार्थमुदाह्रियते । इदमप्यन्ययासहाधिकारप्रतिप्रसवः । यदात्वर्थेप्रयोजनेघर्मकर्मानुष्ठानेवा तदान्यसहायभावाद्वानप्रस्थपारिव्राज्येवाधिकारस्याप्रतिषेधः । तथाच श्रुतिः । जरसाहवाएतस्माद्विमुच्यतइति । अर्थलोपेन वा । अपरेत्वाहुः अत्र यदेतिकल्पयिष्यते । एतेन यावज्जीवहोमीयश्रुतेरविरोधःसिद्धोभविष्यति ॥ १६८ ॥

(२) **सर्वज्ञनारायणः** । अन्त्यकर्मण्यौर्ध्वदेहिकेकर्मणि । पुनराधानमेव चेत्याहिताग्निर्नानग्निरितिष्ठेदित्यर्थः ॥ १६८ ॥

(३) **कुल्लूकः** । पूर्वमृतायाअन्त्यकर्मणि दाहनिमित्तमग्नीन्समर्प्य गृहस्थाश्रममिच्छन्नुत्पन्नपुत्रोऽनुत्पन्नपुत्रोवा पुनर्विवाहंकुर्यात् । स्मार्ताग्नीञ्छ्रौताग्नीन्वादध्यात् ॥ १६८ ॥

(४) **राघवानन्दः** । अनाश्रमी न तिष्ठेत क्षणमेकमपि द्विजः इतिस्मृतिमाश्रित्याह पुनर्दारक्रियामिति । स्वरसाभ्यन्तरसत्वे आधानमात्रम्भ्रेष्ठायांविद्यमानायांनाग्नित्यागः ॥ १६८ ॥

(६) **रामचन्द्रः** । पूर्वमारिण्यै अरणिपात्रसंबन्धिन्यै भार्यायै अन्तकर्मणि अग्नीन् यज्ञादीन् दत्वा पुनः दारक्रियांकुर्यात् । च पुनः आधानं अग्न्याधानमपि कुर्यात् ॥ १६८ ॥

अनेन विधिना नित्यंपञ्चयज्ञान्न हापयेत् ॥ द्वितीयमायुषोभागंकृतदारोगृहे वसेत् ॥ १६९ ॥

इतिमानवेधर्मशास्त्रेभृगुप्रोक्तायांसंहितायांशौचविधिः+पंचमोऽध्यायः ॥ ५ ॥

(१) **मेधातिथिः** । उपसंहारश्लोकः । पञ्चयज्ञग्रहणंच सर्वप्रसिध्यर्थमिति ॥ १६९ ॥

इतिश्रीभट्टवीरस्वामिसूनोर्भट्टमेधातिथिस्वामिनःकृतौ मनुभाष्ये पञ्चमोऽध्यायः समाप्तः ॥ ५ ॥ ॥ ७ ॥ ॥ ७ ॥

(२) **सर्वज्ञनारायणः** । अनेन विधिना स्नातकव्रतादिनियमेन सहितः न हापयेन्न त्यजेत् । द्वितीयमिति द्वितीयभागे पुनराधानपुत्रोत्पत्तियज्ञानांच संभवे असंभवे त्वधिकमपिकालं गृहे वसेत् गार्हस्थाश्रमे वर्तेत । ब्राह्मणइतिप्राधान्यादुक्तम् ॥ १६९ ॥

इति सर्वज्ञनारायणकृतौ मन्वर्थविवृतौ भक्ष्याभक्ष्यप्रेतशुद्धिद्रव्यशुद्धिस्त्रीधर्मोनाम पञ्चमोध्यायः ॥ ५ ॥ श्रीनारायणसर्वज्ञनिर्मितांवीक्ष्य भारतीम् । धर्मस्य निर्णयंब्रूत पदवाक्यसुनिश्चितम् ॥ ॥ ७ ॥ ॥ ७ ॥

(३) **कुल्लूकः** । अनेन तृतीयाध्यायाद्युक्तविधिना प्रत्यहंपञ्चयज्ञान्न त्यजेत् । द्वितीयमायुर्भागंकृतदारपरिग्रहोऽनेनैव यथोक्तविधिना गृहस्थविहितान्धर्माननुतिष्ठेत् गृहस्थधर्मत्वेऽपि पञ्चयज्ञानां प्रकृष्टधर्मज्ञापनार्थंपृथङ्निर्देशः ॥ १६९ ॥

इतिकुल्लूकभट्टविरचितायांमन्वर्थमुक्तावल्यांपञ्चमोऽध्यायः ॥ ५ ॥ ॥ ७ ॥

(४) **राघवानन्दः** । गार्हस्थाश्रमकृत्यमुपसंहरति अनेनेति ॥ १६९ ॥

राघवानन्दविरचितायांमन्वर्थचन्द्रिकायांपञ्चमोध्यायः समाप्तः ॥ ५ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

(५) **नन्दनः** । एवंमपञ्चितंगृहस्थाश्रमाचारविधिमुपसंहरति । अनेनेति । अत्र पुनः पञ्चयज्ञग्रहणंतेषांप्राधान्यप्रतिपत्त्यर्थमिति ॥ १६९ ॥ इतिश्रीनन्दनविरचितेमानवव्याख्यानेपञ्चमोऽध्यायः ॥ ५ ॥

(६) **रामचन्द्रः** । इतिश्रीरामचन्द्रविरचितायांचन्द्रिकायांपञ्चमोध्यायः ॥ ५ ॥

+ शौचविधिः=गृहस्थाश्रमवर्णनं, (ख)

॥ श्री ॥

॥ श्रीगणेशायनमः ॥

॥ अथ षष्ठोऽध्यायःप्रारभ्यते ॥

एवंगृहाश्रमे स्थित्वा विधिवत्स्नातकोद्विजः ॥ वने वसेत्तु नियतोयथावद्विजितेन्द्रियः ॥ १ ॥

[अतःपरंप्रवक्ष्यामि धर्मं वैखानसाश्रमम् । वन्यमूलफलानांच विधिग्रहणमोक्षणे ॥ १ ॥ ऽऽ]

(१) **मेधातिथिः** । गृहोपलक्षितआश्रमोगृहाश्रमः गृहादाराः तत्र स्थित्वातमनुष्ठायवनेवसेदितिविधिः । स्थित्वेति क्त्वाप्रत्ययेन पौर्वकाल्यंगार्हस्थ्यस्य वनवासाद्दर्शयति । क्रमेणाश्रमःकर्तव्यः कृतगार्हस्थ्योवनवासेऽधिक्रियते । समुच्चयपक्षमाश्रित्यैतदुक्तम् । अन्यथाऽविप्लुतब्रह्मचर्यादपि वनवासोविद्यतइत्येतदपिवक्ष्यते । विजितेन्द्रियः पक्ककषायः क्षीणरागइत्यर्थः । एवंविधिवद्यथावदितिपदानि वृत्तपूरणार्थानि तानि प्राक्तत्रतत्रव्याख्यातानि । एतावद्विधीयते । गार्हस्थ्यं कृत्वावनवासआश्रयितव्यः ॥ १ ॥

(२) **सर्वज्ञनारायणः** । क्रमप्राप्तौ वनस्थयतिधर्मौ वक्तव्यौ तत्र वनस्थधर्मंतावत्प्रक्रमते एवंगृहाश्रमइति । यथावद्वक्ष्यमाणविधिना वने वसेत् नियतस्तपःस्वाध्यायादिनियमाख्ययोगाङ्गयुक्तः । विजितेन्द्रियोब्रह्मचर्यरूपयमवान् । तेनैकदेशेन हिंसास्तेयापरिग्रहसत्यान्यपि यमान्तराणि गृह्यन्ते ॥ १ ॥

(३) **कुल्लूकः** । आश्रमसमुच्चयपक्षाश्रितोद्विजातिः कृतसमावर्तनउक्तप्रकारेण यथाशास्त्रंगृहाश्रममनुष्ठाय नियतः कृतनिश्चयोयथाविधानंवक्ष्यमाणधर्मेण यथार्हंविशेषेणजितेन्द्रियः परिपक्वकषायइत्यर्थः वानप्रस्थाश्रममनुतिष्ठेत् ॥ १ ॥

(४) **राघवानन्दः** । एवमितिगृहीभूत्वा वनीभवेदिति श्रुतिसंगतिः । स्नातकःउक्तस्नातकधर्मवान् ॥ न गृहंगृहमित्याहुर्गृहिणी गृहमुच्यते ॥ गृहंच गृहिणीशून्यमरण्यसदृशंविदुः ॥ तयोपलक्षितमाश्रमंस्थित्वा तदुचितधर्मंसंपाद्य ॥ १ ॥

[**रामचन्द्रः** । ब्रह्मचारीगृहस्थयोः धर्माःप्रतिपादिताअतः अधुना वानप्रस्थधर्मानाह अतइति । वैखानसाश्रमेवैखानसऋषिप्रयुक्तआश्रमे । च पुनः वन्यमूलफलादीनांविधिम् ॥]

गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः ॥ अपत्यस्यैव चापत्यंतदारण्यंसमाश्रयेत् ॥ २ ॥

(१) **मेधातिथिः** । यदुक्तंत्यक्तविषयोपभोगगर्धोऽधिक्रियतइति तदेवदर्शयति । वली त्वक्शैथिल्यं । पलितंकेशपाण्डुर्यम् । अपत्यस्यापत्यं पुत्रस्यपुत्रइत्याहुः सत्यपि दुहितुरपत्ये दौहित्रे कन्यायांपुत्रस्यापि जातायां नैवंविधिमिच्छन्तिशिष्टाः । अन्येतु शिरः पालित्यं पौत्रोत्पत्तिंच वयोविशेषलक्षणार्थमाहुः । यस्य कथंचित्पालित्यं न भवेत्सोपि वार्ध-

---

ऽऽ (ख, नन्दनश्च)

क्येवनंसमाश्रयेत्। यथैव जातपुत्रः कृष्णकेशस्तु आधानेऽधिक्रियते एवंजातपौत्रः पलितशिराः तदापि पुत्रजन्मकृष्ण-केशताच वयोविशेषोपलक्षणार्थमेव । नातिशीघ्रंनातिचिरमित्यर्थस्योपलक्षणत्त्वे तु प्रमाणंवक्तव्यम् ॥ २ ॥

(२) **सर्वज्ञनारायणः**। तृतीयायुर्भागे वनगमनंदर्शयित्वा कालान्तरमप्याह गृहस्थइति। वलीपलितं मिलितं यदा पश्येदिति द्वितीयःकालः। अपत्यस्यापत्यं पौत्रं यदापश्येदिति तृतीयःप्रकारः ॥ २ ॥

(३) **कुल्लूकः**। गृहस्थोयदात्मदेहस्य त्वक्शैथिल्यंकेशधावल्यं पुत्रस्यपुत्रंच पश्यति तथाविधवयोवस्थयाविग-तविषयरागतया* वनमाश्रयेत् ॥ २ ॥

(४) **राघवानन्दः**। आत्मनोदेहस्य वली चर्मशैथिल्यं पलितंकेशधावल्यं एतद्रागक्षयोपलक्षकम्। अपत्यस्ये-त्यादिकंसंभवद्विषयम् ॥ २ ॥

(६) **रामचन्द्रः**। यदा आत्मनः वलीपलितं पश्येत् जराजर्जरत्वंपश्येत् ॥ २ ॥

संत्यज्य ग्राम्यमाहारंसर्वंचैव परिच्छदम् ॥ पुत्रेषु भार्यांनिक्षिप्य वनंगच्छेत्सहैव वा ॥ ३ ॥

(१) **मेधातिथिः** । व्रीहियवमयमन्नंततःप्रभृतिनाश्नीयादित्येतत्संत्यज्येत्युच्यते । तदुक्तंमूलाशीत्यादि । परि-च्छदः गवाश्ववस्त्रासनशय्यादिः यदि भार्यायाइच्छा तदा सहगमनम् अन्यथा एकाकिनः । अन्येतु तरुणींनिक्षिप्य वृ-द्धयासहेति वर्णयन्ति। सत्यांभार्यायामयंविधिः पुत्रेषु निक्षेपःवनगमनंवा। असत्यामपिमृतायां वनवासआपस्तम्बादिभिः स्मर्यते पुनराधानइत्यत्र यस्येन्द्रियचापल्यंनास्ति सवानप्रस्थः। इतरः पुनर्दारान्परिगृह्णीयादितिव्यवस्था ॥ ३ ॥

(२) **सर्वज्ञनारायणः**। ग्राम्यंसर्वंपरिच्छदं गोभूहिरण्यादि। भार्यांनिक्षिप्येति भार्यासंभवे ॥ ३ ॥

(३) **कुल्लूकः**। ग्राम्यंव्रीहियवादिकंभक्ष्यंसर्वंच गवाश्वशय्यादिपरिच्छदंपरित्यज्य विद्यमानभार्यश्च वनवासम-निच्छन्तींभार्यांपुत्रेषु समर्प्यैच्छन्त्या सहैव वनंगच्छेत् ॥ ३ ॥

(४) **राघवानन्दः**। किंच संत्यज्येति। ग्राम्यं कृष्यादियत्नोत्पाद्यंपरिच्छदं गवादिकं। सहैव वा वनवासमिच्छ-न्त्या भार्ययाऋतुमत्या मृतायांवनवासइत्यापस्तबोक्तेः सति रागेविवाहोऽसति वनंगच्छेदिति ॥ ३ ॥

(६) **रामचन्द्रः**। ग्राम्यमाहारं गोधूमतिलादिकम्। च पुनः सर्वंपरिच्छदमपि गोभूतिलहिरण्यादि । पक्षान्तरं-प्रति परिचर्याऽभिलाषेण स्वयमपि वनंगंतुमिच्छति तर्हि तया पत्न्यैव सह वनंगच्छेत् ॥ ३ ॥

अग्निहोत्रंसमादाय गृह्यंचाग्निपरिच्छदम् ॥ ग्रामादरण्यंनिःसृत्य निवसेन्नियतेन्द्रियः ॥ ४ ॥

(१) **मेधातिथिः**। अग्नयएवाग्निहोत्रशब्देनोक्ताः श्रौतानग्नीन्समादाय गृहीत्वा गृह्यंच अग्निहोत्रपरिच्छदं स्रुक्स्रु-वादि। ग्राम्यपरिच्छदस्य त्यागविधानादग्निसंबद्धस्य प्रतिप्रसवोयम् ॥ ४ ॥

(२) **सर्वज्ञनारायणः**। सहगमनपक्षेऽग्निहोत्रसंभवेऽग्निहोत्रमादाय गृह्यमौपासनमादायैकाकिगमनेपि । एवं-तत्तदग्निपरिच्छदं स्रुगादिकं तत्तदग्निनयनेनयेदित्यर्थसिद्धमपि स्पष्टार्थमुक्तम् ॥ ४ ॥

(३) **कुल्लूकः**। श्रौताग्निमावसथ्याग्निमप्युपकरणंच स्रुक्स्रुवादिगृहीत्वा ग्रामादरण्यंनिःसृत्यगत्वा संयतेन्द्रियः सन्निवसेत् ॥ ४ ॥

(४) **राघवानन्दः**। अग्निहोत्रं श्रौतंगृह्यं आवसथ्याख्यंच। परिच्छदमग्नेःस्रुवादिकं। निःसृत्य अरण्यंनिषेवेत ॥४॥

---

* वानप्रस्थत्वार्थम् (अ)

(५) **नन्दनः** । [वैखानसाश्रमवानप्रस्थाश्रमविषयम् । वन्यानांमूलफलानामुपादानेपरित्यागेच कालविधिः ।] द्विविधो वानप्रस्थः गृहस्थसमोभिक्षुसमश्चेति । तयोर्गृहस्थसमस्यधर्मास्तावदाह अग्निहोत्रमिति । गृह्यंगृहेविद्यमानम् । अग्निपरिच्छदमरणिपात्रशकटादिकम् । निःसृत्य प्रविश्य ॥ ४ ॥

(६) **रामचन्द्रः** । अग्निहोत्रं वैतानाग्निं गृह्यं आवसथ्याग्निं च पुनः अग्निपरिच्छदंकृष्णाजिनादि । ग्रामान्निःसृत्यारण्यंनिवसेज्जितेन्द्रियःसन् ॥ ४ ॥

मुन्यन्नैर्विविधैर्मेध्यैः शाकमूलफलेन वा ॥ एतानेव महायज्ञान्निर्वपेद्विधिपूर्वकम् ॥ ५ ॥

(१) **मेधातिथिः** । एतानेव ये गृहस्थविहिताः निर्वपेदनुतिष्ठेत् विधिपूर्वकमित्यनुवादः श्लोकपूरणार्थः ॥ ५ ॥

(२) **सर्वज्ञनारायणः** । मुन्यन्नैरकृष्टपच्यैः । विविधैस्तत्तत्कालोपपन्नैः मेधोयज्ञस्तदर्हैर्मेध्यैर्यज्ञियैः शाकादिनापि मेध्येनैव । एतानेव गृहस्थकार्यान् चतुरोमहायज्ञान् ब्रह्मयज्ञस्तु नान्नसाध्यः ॥ ५ ॥

(३) **कुल्लूकः** । मुन्यन्नैर्नीवारादिभिर्नानाप्रकारैः पवित्रैः शाकमूलफलैर्वारण्योद्भवैरेतानेवेति गृहस्थस्य पूर्वोक्तान्महायज्ञान्यथाशास्त्रमनुतिष्ठेत् ॥ ५ ॥

(४) **राघवानन्दः** । किंच । मुन्यन्नैरिति । मुन्यन्नैर्नीवाराद्यैः यदन्नःपुरुषोराजंस्तदन्नास्तस्य देवताः इतिस्मृतिमाश्रित्याहएतानेवेति । महायज्ञान् वैश्वदेवादीन् निर्वपेत् कुर्यात् ॥ ५ ॥

(५) **नन्दनः** । अन्नैर्नीवारादिभिः । एतान्पूर्वाध्यायोक्तान् ॥ ५ ॥

(६) **रामचन्द्रः** । मुन्यन्नैःअकृष्टक्षेत्रोद्भवैर्नीवारवेणुश्यामाकशाकादिभिः एतान्पञ्चमहायज्ञान्विधिपूर्वकंनिर्वपेदेव ॥ ५ ॥

वसीत चर्मचीरंवा सायंस्नायात्प्रगे तथा ॥ जटाश्चबिभृयान्नित्यंश्मश्रुलोमनखानि च ॥ ६ ॥

(१) **मेधातिथिः** । चर्म गोमृगादीनाम् । चीरं वस्त्रखण्डं । सायं दिवसावसानसमयः । प्रगेचान्हःप्रथमोदये । एवंसायंस्नानविधानाद्रात्रौभोजनमन्याहुः भुक्तेस्नानप्रतिषेधात् । तदयुक्तमित्यन्ये यतःस्नातकव्रतमतः स्नानमाचरेद्भुक्तेति । महाभारते तु पुरुषमात्रधर्मतया स्मर्यते । त्रैकालिकमप्यस्य स्नानंभविष्यति वैकल्पिकम् । जटाश्मश्रुलोमनखानि न कर्तयेत् ॥ ६ ॥

(२) **सर्वज्ञनारायणः** । चीरं तृणवल्कलादिकृतंवासः । प्रगे प्रातः । बिभृयात् नछिन्द्यात् ॥ ६ ॥

(३) **कुल्लूकः** । मृगादिचर्म वृक्षवल्कलंवाआच्छादयेत् । हारीतेन तु वल्कलशाली चर्मचीरकुशमुञ्जफलकवासाइतिविदधता वल्कलादिकमप्यनुज्ञातम् । सायंप्रातः स्नायात् जटाश्मश्रुलोमनखानि नित्यंधारयेत् ॥ ६ ॥

(४) **राघवानन्दः** । चीरं खण्डितवस्त्रं एतदुपलक्षकंवल्कलादेः । तदुक्तंहारीतेन वल्कलशाणचीरचर्मकुशमुञ्जफलवासाइति । प्रगे प्रातः । जटाश्च कृत्रिमाअकृत्रिमावा ॥ ६ ॥

(५) **नन्दनः** । चीरंकुशमयतन्तुस्यूतंवस्त्रम् । प्रगे उषसि ॥ ६ ॥

(६) **रामचन्द्रः** । चर्म कृष्णाजिनादि । चीरं वल्कलकृतं । प्रगे प्रातःसमये ॥ ६ ॥

☛ वृक्षवल्कलंवा=वस्त्रखंडंवा (अ)

यद्भक्ष्यंस्यात्ततोदद्याद्बलिंभिक्षांचशक्तितः॥ अम्मूलफलभिक्षाभिरर्चयेदाश्रमागतान् ॥ ७ ॥

(१) **मेधातिथिः** । मुन्यन्नैरित्युक्तं तानि च नीवारादीनि वन्यानि धान्यानि तथा शाकादीनि वन्यान्येव । अन्नशब्दोबाहुल्येन धान्यविकारे भक्तसक्तुपिष्टादौ प्रयुज्यते ततःशाकादीनांसत्यपि मुन्यन्नत्वे पृथगुपादानम् । मुनयस्तापसास्तेषामन्नानि मुन्यन्नानि । अग्नौपाकधर्मान्महायज्ञान्निर्वपेत् । यदा कालपक्वफलाशी तदा न निर्वपेदित्याशङ्कायामाह यद्भक्षःस्यात् यदेव भक्षयेत्तदेव पिष्टादि यथासामर्थ्यंदद्यात् । बलिं अनग्निहोत्रं इन्द्रायेन्द्रपुरुषेत्यादि यद्विहितम । अग्नौत्वस्मिन्पक्षे होमोनास्ति तदयुक्तं बलिशब्दस्य चेज्यामात्रवचनत्वादग्नावनग्नौच तुल्यमेतत् अथाप्ययंपक्षः स्याद्यदेवभक्षयेत्तदेव । अग्नावेव पक्वेनाग्नौ होमः कर्तव्यस्तथापि तावन्मात्रप्रयोजनंशाकादिवक्ष्यति स्वयंकालपक्वंभोक्ष्यते । सर्वथा कालपक्वाशिनोप्यस्ति वैश्वदेवोऽग्नावेव । अबादिभिर्द्वन्द्वोयम । अद्भिर्मूलफलैः भिक्षयाच नीवारादिनाऽर्चयेदाश्रमागतंपान्थम् ॥ ७ ॥

(२) **सर्वज्ञनारायणः** । बलिपदंमहायज्ञोपलक्षणम । भिक्षां भिक्षमाणेभ्यः । अन्नाभावेऽम्मूलादिरूपाभिः भिक्षाभिः भैक्ष्यभूताभिः ॥ ७ ॥

(३) **कुल्लूकः** । यद्भुञ्जीत ततोयथाशक्ति बलिंभिक्षांच दद्यात् । बलिमितितु वैश्वदेवनित्यश्राद्धयोरुपलक्षणम एतानेव महायज्ञानितिविहितत्वात् । आश्रमागताञ्जलफलमूलभिक्षादानेन पूजयेत् ॥ ७ ॥

(४) **राघवानन्दः** । किंच यदिति । भक्ष्यं स्वनियमप्राप्तंशाकादि । बलिं वैश्वदेवम । आश्रमागतार्चनमावश्यकमित्याह अद्भिरिति । अद्भिर्जलैःअतोननीवारादिभिर्भिक्षितैः ॥ ७ ॥

(५) **नन्दनः** । बलिंवैश्वदेवाङ्गिष्टभूतबलिंवा । आश्रमागताततिथीनितिशेषः ॥ ७ ॥

(६) **रामचन्द्रः** । ततोभक्ष्याद्बलिंदद्यात् बलिपदंमहायज्ञोपलक्षणं । च पुनः शक्तितोभिक्षांदद्यात् ॥ ७ ॥

स्वाध्याये नित्ययुक्तः स्याद्दान्तोमैत्रः समाहितः ॥ दाता नित्यमनादातासर्वभूतानुकम्पकः ॥ ८ ॥

(१) **मेधातिथिः** । आश्रमबुद्ध्या स्वाध्यायादीनांनिवृत्तिमाशङ्कमानआश्रमान्तरत्वादस्यानिवृत्त्यर्थमाह । नित्ययुक्तः न यथागार्हस्थ्ये तत्रहि गृहचेष्टार्थाअपि व्यापाराः सन्ति तेष्वनुष्ठीयमानेषु नास्ति स्वाध्यायः । दान्तोदमयुक्तः मदवर्जितः । मैत्रः मित्रकर्मप्रधानः प्रियहितभाषी । सन्निहितस्य चित्तानुकूलतापरस्समाहितः नासंबद्धंनाप्राकर्णिकंबहुपराधीनोपिब्रूयात् । दाता अपांमूलभिक्षाणांच । अनादातापथ्यौषधाद्यर्थमाश्रमान्तरादागतंन याचेत् । सर्वभूतानुकम्पकः अनुकम्पा कारुण्यं सत्यपि कारुणिकत्वे नपरार्थमन्यंयाचेत ॥ ८ ॥

(२) **सर्वज्ञनारायणः** । स्वाध्याये जपादौ । दान्तोजितमनाः । मैत्रोमैत्रीपरः । सर्वत्र समाहितः । आत्मविषयनिहितचित्तः । दाता नित्यं सततंदानशीलः । अनादाता अप्रत्युपलब्धिशीलः आदातृत्वशून्यः । सर्वभूतानुकम्पकः सर्वभूतदुःखप्रहरणेच्छावान् ॥ ८ ॥

(३) **कुल्लूकः** । वेदाभ्यासे नित्ययुक्तःस्यात् शीतातपादिद्वन्द्वसहिष्णुः सर्वोपकारकः संयतमनाः सततंदाता प्रतिग्रहनिवृत्तः सर्वभूतेषु कृपावान्भवेत् ॥ ८ ॥

---

(७) यद्भक्ष्यंस्यात=यद्भक्षःस्यात् (मेधा०)
आश्रमागतान्=अश्रमागतम (”)

(४) **राघवानन्दः** । किंच स्वाध्यायइति । तद्विस्मरणे ब्रह्मोज्झतेतिचतुर्णामाश्रमाणांप्रत्यवायसाधारण्यात् । अनादाता अप्रतिग्रहः । सर्वभूतानुकम्पकः सर्वोपकारकः ॥ ८ ॥

(५) **नन्दनः** । मित्रभावोमैत्री तद्वान्मैत्रः ॥ ८ ॥

(६) **रामचन्द्रः** । दान्तः जितेन्द्रियः स्यादिति सर्वत्र संबन्धः । मैत्रः मैत्रीपरः । समाहितः । नियतचित्तः । नित्यं दाताटानपरः ॥ ८ ॥

वैतानिकं च जुहुयादग्निहोत्रं यथाविधि ॥ दर्शमस्कन्दयन्पर्व पौर्णमासं च योगतः ॥ ९ ॥

(१) **मेधातिथिः** । वितानोविहारस्तत्रभवंवैतानिकम् । त्रेताग्निविषयं कर्म श्रौतं तज्जुहुयात्कुर्यात् । अग्निहोत्रशब्दोयवाग्वादौ होमसाधनद्रव्ये वर्तते न कर्मनामधेयम् । ततश्च तज्जुहुयादाहवनीयेऽग्निहोत्रादिभिर्जुहोतीत्यर्थः । उपपन्नः प्रथमपक्षेऽग्निहोत्रशब्दोजुहोतिनाऽभिन्नार्थः । ननु च पुत्रेषु भार्यानिक्षिप्येतिपक्षान्तरमुक्तं तत्र कथंतया विना श्रौतेष्वधिकारः प्रोषितस्य यथेतिचेत् यथा प्रोषितोवा यजमानः संविधानादिना दूरस्थोप्यधिक्रियते संविधानेएवंभवति कर्ता तद्वत्पत्न्यपि वनंप्रतिष्ठमानमनुज्ञास्यति न सहाधिकारोविरोत्स्यतइति तदपिवार्तम् । दैवान्मानुषाद्वा प्रतिबलात्कथञ्चित्प्रवासोपपत्तेः युक्तमीदृशमनुष्ठानं न स्वेच्छया । सत्यांशक्तौ बहूनि चाङ्गानि परिलुप्येरन् । दर्शपौर्णमासयोः वेदोसि वित्तिरसीत्यादिपत्नींवाचयेदित्युक्तं तद्धीयेत अथोच्येत सहप्रस्थानपक्षे विधिरयंभविष्यतीत्येतदपि न विशेषस्याऽश्रुतत्वात् विनिक्षेपपक्षेचाग्नीनांप्रतिपत्त्यन्तरमनाम्नातं किञ्चसहत्वपक्षेपीदंविरुध्यते ॥ वासन्तशारदैर्मेध्यैर्मुन्यन्नैः स्वयमाहृतैः । पुरोडाशांश्चरूंश्चैवविविधवान्निर्वपेत्पृथगिति॥ आरण्यानि मुन्यन्नानि नीवारादीन्यभिप्रेतानि ग्राम्यस्य परिच्छदस्य त्यागविधानात् । व्रीह्यादिभिश्च वेदे पुरोडाशाविहितास्तेच ग्राम्याः नच स्मृतिश्रुतिषु उत्पन्नन्यायेन व्रीहिशास्त्रविधिन्यायेनवा केनचिन्मेध्येनारण्येनान्नेन प्रयोगः परिसमाप्येतनिक्षेपे । तेच भार्ययादुरुपपादाः । कथंयावज्जीवश्रुतौ सत्यामग्नीनांत्यागोभार्यायावा तस्मादाश्रमान्तरविधानंवैतानिकानांच कर्मणामनुष्ठानंन संवदेत् । कर्तव्योऽत्र यत्नः केचिदाहुः वैतानिकशब्दः स्मार्तेष्वेव कर्मसु स्तुत्या प्रयुक्तः नच स्मार्तेषु व्रीह्यादिनियमशास्त्रमस्ति तत्रह्याम्नायते ॥ यदन्नः पुरुषोराजंस्तदन्नास्तस्यदेवताइति । अतश्च मुन्यन्नैरनुष्ठानमविरुद्धंभवेद्व्रीह्यादिशास्त्रविरोधः परिहृतः स्यात् । सहाधिकारस्तत्रापि विद्यते तस्यकः परिहारः उभयोःस्मार्तत्वादस्यामवस्थायांबाधिष्यते यत्तु श्रौतवचनं पत्न्यासह यष्टव्यमिति तच्छ्रौतेष्वेव अथवा नैवायंविधिर्गृहस्थाग्नेः किंतर्हि श्रावणिकेनाग्निमाधायेतिगौनमेन पठितं इहापि वक्ष्यति वैखानसमतेस्थितइति तस्माच्छास्त्रविहितानि कर्मान्तराण्येववैतानि । दर्शपूर्णमासादयस्तु शब्दाःभक्त्याः तत्र प्रयुक्ताअतस्तत्रतदाधानमभार्यस्यैव । गार्हस्थ्योपात्तानांप्रतिपत्तिरुक्ता अग्नीन्स्वात्मनि वैतानानिति । यत्तु यावज्जीवश्रुतौ सत्यां कथमग्नीनांत्यागइति एतच्चातुराश्रम्यानुक्रमणप्रकरणे निरूपयिष्यते । अन्ये पुनराहुः होमेग्राम्यानामन्नानांप्रतिषिद्धोनतु देवतार्थउपयोगः ननुच यजमानपञ्चमाइडांभक्षयन्तीति तत्रापि विद्यते भक्षः सत्यं सतु शास्त्रीयोन लौकिकः लौकिकस्यच प्रतिषेधः संत्यज्येति ग्रामप्रवेशश्च तस्य तदर्थोन विरुध्यते यथा वक्ष्यति ग्रामादाहृत्यवाश्नीयादिति तदेव सत् मुन्यन्नैरितिविधानात् तदेवंश्रावणिकेनाग्निमाधायेत्यादिसर्वमुपपन्नम् । तथाह्यग्निहोत्रंसमाधायेति पठ्यते नतु संत्यज्येति । समारोपणमपि मुमूर्षोस्तप्तमतपसोवक्ष्यते प्रथमंप्रवासेन नतुरागादिशब्दानांश्रवणिकाग्निविषयत्वे कथंचिदुपपत्तिः मृतभार्यस्य तदाधानंवाचनिकंभविष्यति यदावा ब्रह्मचर्यादेव वनवासमिच्छेत्तदा श्रावणिकाधानं तस्मादाहिताग्नेःसहाग्निभिर्वनप्रस्थानंसभार्यस्य । तत्रच यथा-

विधि व्रीह्यादिना श्रौतकर्मानुष्ठानम् । व्रीह्यादीनामपि मुन्यन्नता कथंचिदुपपाद्या व्रीहियवावपि पवित्रं । भार्यानिक्षेपश्चानाहिताग्नेः कथंचित्स्मार्तेऽग्नौ गतिरुभयोःस्मार्तत्वात् । यस्यचद्वे भार्येजाते एकयाचाग्नयोनीतास्तस्य द्वितीयांभार्यानिक्षिप्येतिवचनम् । अस्कन्दयन् स्कन्दनं विध्यतिक्रमः यथाविहितस्यानुष्ठानस्यासंपादनं एतच्च पादपूरणं योगइत्येतदपि योगतअस्कन्दयन् युक्त्याऽविनाशयन् । युक्तिर्विधिरेव ॥ ९ ॥

(२) **सर्वज्ञनारायणः** । वैतानिकं विततेष्वग्निषुकार्यमग्निहोत्रहोमं । दर्शं पर्वदर्शाख्यं पर्वकृत्यमस्कंदयन्नपातयन् । योगतउद्योगतः ॥ ९ ॥

(३) **कुल्लूकः** । गार्हपत्यकुण्डस्थानामग्नीनामाहवनीयदक्षिणाग्निकुण्डयोर्विहारोवितानंतत्रभवंवैतानिकमग्निहोत्रंयथाशास्त्रमनुतिष्ठेत् । दर्शपौर्णमासंच पर्वेतिश्रौतस्मार्तदर्शपौर्णमासौयोगतः स्वकालेऽस्कन्दयन्नपरित्यजन् । भार्यानिक्षेपपक्षेच रजस्वलायामिव भार्यायामेतेषामनुष्ठानमुचितं विशेषाश्रवणात् ॥ ९ ॥

(४) **राघवानन्दः** । वैतानिकं गार्हपत्यकुण्डस्थिताग्नेराहवनीयदक्षिणाग्निकुण्डयोर्विहारोवितानं तत्र भवंवैतानिकर्माग्निहोत्रं यथाशास्त्रमनुतिष्ठेत् । अस्कन्दयन्नपरिलोपयन्पर्वपर्वसंबन्धि दर्शाख्यंकर्म एवंपौर्णमासाख्यं योगतः श्रौतस्मार्तदर्शादेःकाले ॥ ९ ॥

(५) **नन्दनः** । वैतानिकमित्यनुवादः । योगतः प्रमितःप्रामकालइतियावत् । अस्कन्दयन्ननतिक्रामन् ॥ ९ ॥

(६) **रामचन्द्रः** । तथा वैतानिकं अग्नित्रयसाध्यं । च पुनः अग्निहोत्रं यावदन्नादिकंहोमद्रव्यसाध्यं । दर्शश्राद्धंअस्कंदयन्नलुम्पयन् । च पुनः योगतः पौर्णमासंपर्वास्कंदयन् ॥ ९ ॥

ऋक्षेष्ट्याग्रयणं चैव चातुर्मास्यानि चाहरेत् ॥ तुरायणं च क्रमशोदाक्षस्यायनमेवच ॥ १० ॥

(१) **मेधातिथिः** । दर्शेष्टिश्च आग्रहणंचेति समाहारद्वन्द्वः । चातुर्मास्यतुरायणदाक्षायणाः श्रौतकर्मविशेषवचना नित्याएवतुरायणादयः केषांचित् ॥ १० ॥

(२) **सर्वज्ञनारायणः** । ऋक्षेष्टयोऽग्निर्वाअकामयतेत्यादितैत्तिरीयेकृत्तिकादिनक्षत्रेष्टयआम्नाताः तुरायणं संवत्सरं सवनविधाइष्टीरित्यादिनापस्तम्बेनोक्तं । दक्षस्यायनं दाक्षायणयज्ञेन स्वर्गकामोयजेतेतितैत्तिरीयआम्नातम् । अत्र यद्यपि वन्यैरेवाकृष्टपच्यैर्नीवारादिभिःपुरोडाशादि तथापि दर्शादेर्घृतंविना दाक्षायणादीनांक्षीरंविनाऽसिद्धेर्गवामपि परिग्रहः ॥ १० ॥

(३) **कुल्लूकः** । ऋक्षेष्टिर्नक्षत्रेष्टिः आग्रयणंनवसस्येष्टिः ऋक्षेष्ट्याग्रयणंचेतिसमाहारद्वन्द्वः तथाचातुर्मास्यतुरायणदाक्षायणानि श्रौतकर्माणि क्रमेण कुर्यात् । अत्र केचित् सर्वमेतच्छ्रौतंदर्शपौर्णमासादिकर्म वानप्रस्थस्य स्तुत्यर्थमुच्यते नत्वस्यानुष्ठेयंग्राम्यव्रीह्यादिसाध्यत्वादेषांच नचस्मृतिः श्रौताद्बाधनेशक्तेत्याहुस्तदसत् नासन्तशारदैरित्युत्तरश्लोके मुन्यन्नैर्नीवारादिभिर्वानप्रस्थविषयतया स्पष्टस्य चरुपुरोडाशादिविधेर्बाधनस्यान्याय्यत्वात् । गोविन्दराजस्तु व्रीह्यादिभिरेवकथंचिदरण्यजातैरेतान्निर्वर्तयिष्यतइत्याह ॥ १० ॥

---

(१०) ऋक्षेष्ट्याग्रयणंच=दर्शेष्ट्याग्रहणं (मे०)

(१०) दाक्षस्यायनमेवच=दक्षिणायनमेवच (क, थ,)

=दक्षस्यायनमेवच (ख, ग, घ, च, ड, ण, त,)

(४) **राघवानन्दः** । ऋक्षेष्टिर्नक्षत्रेष्टिः । आग्रहायणं नवसस्येष्टिः । चातुर्मास्यं वैश्वदेववरुणप्रघाससाकमेध शुनासीरैरितिचतुष्कम् । अथ तुरायणमित्याश्वलायनोक्तेः । केषांचित् श्रौतकर्मविशेषास्तुरायणादयः । पञ्चभावादयनाद्युपपत्तेः । एते यागभेदाव्रीह्यभावेपि कार्याः नीवारादेःसत्वादावश्यके मुख्यालाभे प्रतिनिधेरावश्यकत्वात् ॥ १० ॥

(५) **नन्दनः** । ऋक्षेष्टिनक्षत्रेष्टिम् । आग्रयणमिति जातावेकवचनम् । श्यामाकव्रीहियवाग्रयणानि । चातुर्मास्यानि वैश्वदेवादीनि । तुरायणंसंवत्सरसाध्यक्रतुविशेषः । दाक्षायणंदर्शेष्टिविकृतिः । क्रमशः तत्र तत्रकाले ॥ १० ॥

(६) **रामचन्द्रः** । ऋक्षेषु कृत्तिकादिषु आग्रयणेच पुनः उत्तरायणं संवत्सरेष्टिविशेषः दक्षस्यायन तैत्तिरीयशाखायांदाक्षायणसंज्ञम् ॥ १० ॥

वासन्तशारदैर्मेध्यैर्मुन्यन्नैः स्वयमाहृतैः ॥ पुरोडाशांश्चरूंश्चैव विधिवन्निर्वपेत्पृथक् ॥ ११ ॥

(१) **मेधातिथिः** । यदा मुन्यन्नैरिति न पूर्वेण संबध्यते तदा नास्ति चोद्यं वैतानिकानि कथंव्रीह्यादिचोदितानि क्रियेरन् । अत्र चरुपुरोडाशावैखानसशास्त्रोक्ताएव वेदितव्याः । वसन्ते जायन्ते पच्यन्तेवा वासन्तानि । एवंशारदैर्मेध्यैरित्यनुवादः । स्वयमाहृतैः प्रतिग्रहादीनि वृत्तिकर्माणि निषिध्यन्ते । स्मार्तानामुक्तानांकर्मणामनुष्ठानार्थंपुनर्हृत्यादि नापहरणम् । विधिवत्पृथगितिपूरणे ॥ ११ ॥

(२) **सर्वज्ञनारायणः** । शारदपदंवार्षिकश्यामाकादेरप्युपलक्षणम् ॥ ११ ॥

(३) **कुल्लूकः** । वसन्तोद्भवैःशरदुद्भवैर्मेध्यैर्यागार्हभूतैर्मुन्यन्नैर्नीवारादिभिःस्वयमानीतैःपुरोडाशांश्चरूंश्चयथाशास्त्रंतत्तद्यागादिसिद्धयेसंपादयेत् ॥ ११ ॥

(४) **राघवानन्दः** । अतआह वासन्तेति । वासन्तशारदैस्तत्रोद्भूतैःमेध्यैः यागार्हैः ॥ ११ ॥

(५) **नन्दनः** । पृथक्नवे सस्ये प्राप्ते पुराणस्य त्यागेनेत्यर्थः ॥ ११ ॥

(६) **रामचन्द्रः** । वासन्तादिशारदैर्वार्षिकश्यामाकाद्युपलक्षकैः ॥ ११ ॥

देवताभ्यस्तुतद्धुत्वा वन्यं मेध्यतरं हविः ॥ शेषमात्मनि युञ्जीत लवणंच स्वयं कृतम् ॥१२॥

(१) **मेधातिथिः** । पर्वसु यद्देवताभ्योदत्तंतच्छिष्टमेवभक्षयेन्नशाकमूलफलादि । शेषमात्मनि युञ्जीत आत्मनिमित्तमुपयोजयेत् । आत्मार्थं शरीरस्थित्यर्थमित्यर्थः । स्वयंकृतंच लवणंसैन्धवादिनिषेवेत ॥ १२ ॥

(२) **सर्वज्ञनारायणः** । देवताभ्योहुत्वाग्रयणेष्टौ मेध्यतरं ग्राम्यापेक्षयापि मेध्यत्वात् । स्वयंकृतं लवणं वृक्षादिक्षारकृतम् ॥ १२ ॥

(३) **कुल्लूकः** । तद्वनोद्भवनीवारादिकसाधनमतिशयेनयागार्हहविर्देवताभ्यउपकल्प्यशेषान्नमुपभुञ्जीत आत्मना च कृतंलवणमूषरलवणाद्युपभुञ्जीत ॥ १२ ॥

(४) **राघवानन्दः** । किंचान्यदित्याह देवेति । देवताभ्योग्नेःसोमयमाभ्यामित्याद्युक्ताभ्यः युञ्जीत । स्वयंकृतलवणंच भुञ्जीतेत्यर्थः ॥ १२ ॥

(५) **नन्दनः** । आत्मनिवेदनंभोजनम् ॥ १२ ॥

(६) **रामचन्द्रः** । च पुनः स्वयंकृतं लवणं वृक्षादिक्षारकृतं युञ्जीतभुञ्जीत ॥ १२ ॥

• शेषान्न=शेषमात्मार्थं (अ)

स्थलजौदकशाकानि पुष्पमूलफलानि च ॥ मेध्यवृक्षोद्भवान्यद्यात्स्नेहांश्च फलसंभवान् ॥ १३ ॥

(१) मेधातिथिः । स्थलजानि उदकजानि अद्यात् तथा पुष्पमूलफलानि च ॥ १३ ॥

(२) सर्वज्ञनारायणः । स्थलजानि वास्तुकादीनि औदकानि हिलमोचिकादीनि शाकानि फलसंभवान् वन्यफलजान् ॥ १३ ॥

(३) कुल्लूकः । स्थलजलोद्भवशाकान्यरण्ययज्ञियवृक्षोद्भवानिपुष्पमूलफलानीङ्गुद्यादिफलोद्भवांश्च स्नेहानद्यात् ॥ १३ ॥

(४) राघवानन्दः । किंच स्थलजेति । स्नेहान्घृतस्थानीयान् इङ्गुदीफलादिभ्यःसंभवोयेषाम् ॥ १३ ॥

(५) नन्दनः । मेध्योयज्ञार्हः ॥ १३ ॥

(६) रामचन्द्रः । स्थलजं वास्तुकादि उदकशाकानि मोचकादीनि च पुनः फलसंभवांश्च स्नेहान् अद्याद्भक्षयेत् ॥ १३ ॥

वर्जयेन्मधु मांसं च भौमानि कवकानि च ॥ भूस्तृणं शिग्रुकं चैव श्लेष्मातकफलानि च॥१४॥

(१) मेधातिथिः । भौमानि कवकानि कवकशब्दः प्राग्व्याख्यातः छत्राकपर्यायः । तानिच कवकानि भूमौ जायन्ते वृक्षकोटरादावपि अतोविशेषणार्थं भौमग्रहणम् । समाचारविरोधोगृहस्थधर्मेषु चाविशेषेण कवकानांप्रतिषेधः । वानप्रस्थस्य च नियमातिशयोयुक्तः तस्माद्भौमानीतित्वतन्त्रपदं तत्र गोजिव्हिकानामकश्चित्पदार्थोवनेचराणांप्रसिद्धस्तद्विषयंबोद्धव्यम् । नतु यत्किंचिद्भुविजातमात्रस्य । कवकानांप्रतिषिद्धत्वात्पुनःप्रतिषेधोभूस्तृणादीनांतत्समप्रायश्चित्तार्थः । भूस्तृणशिग्रुकशब्दौ शाकविशेषवचनौ वाहीकेषु प्रसिद्धौ ॥ १४ ॥

(२) सर्वज्ञनारायणः । मधुमांसमिति ब्रह्मचारिवर्जनीयोपलक्षणम् । भौमानि भूमिजानि । कवकानि छत्राकानि । चकारात्काष्ठजानि । भूस्तृणं शाकभेदः । शिग्रु सौभाञ्जनं । श्लेष्मातकोबहुवारः । एतेन गृहस्थानामपि यान्यभक्ष्यत्वेनोक्तानि तानि सर्वाण्युपलक्ष्यन्ते ॥ १४ ॥

(३) कुल्लूकः । माक्षिकंमांसं भौमानीतिप्रदर्शनार्थम् भौमादीनि कवकानि छत्राकान्भूस्तृणंमालवदेशेप्रसिद्धंशाकंशिग्रुकंवाहीकेषुप्रसिद्धशाकंश्लेष्मातकफलानिवर्जयेत् । गोविन्दराजस्तु भौमानि कवकानीत्यन्यव्यवच्छेदकंविशेषणमिच्छन्भौमानांकवकानांनिषेधः वार्क्षानांतु भक्षणमाह तदयुक्तम् मनुनैवपञ्चमेद्विजातेरेव कवकमात्रनिषेधाद्वनस्थगोचरतया नियमातिशयस्योचितत्वात् । यमस्तु भूमिजंवृक्षजंवापिछत्राकंभक्षयन्तिये । ब्रह्मघ्नांस्तान्विजानीयाद्ब्रह्मवादिषुगर्हितान् इति विशेषेणवृक्षजस्यापिनिषेधमाह । मेधातिथिस्तु भौमानीतित्वतन्त्रंपदंवदन्गोजिव्हिकानाम कश्चित्पदार्थोवनेचराणांप्रसिद्धस्तद्विषयंनिषेधमाह तदपि बहुष्वभिधानकोशादिष्वप्रसिद्धंनश्रद्दधीमहि कवकानांद्विजातिविशेषेपाञ्चमिके निषेधे सत्यपि पुनर्निषेधोभूस्तृणादीनांनिषेधेपिचसमप्रायश्चित्तविधानार्थः ॥ १४ ॥

(४) राघवानन्दः । किंच वर्जयेदिति । कवकादीनांपुनर्ग्रहणंभूस्तृणादितुल्यप्रायश्चित्तार्थम् । भौमानीतिविशेषाद्गोजिव्हाकाराणीति मेधातिथिः । भूस्तृणं मालवदेशप्रसिद्धशाकं । शिग्रुकं वाल्हीके प्रसिद्धम् ॥ १४ ॥

(५) नन्दनः । भौमानि कवकानि भूमिजानि छत्राकाणि । वृक्षकोटरजातानांकवकानामप्यभक्ष्यत्वेभौमानामादरेणवर्जनार्थंविशेषेणनिषेधनम् । भूस्तृणंतृणजातिविशेषः । शिग्रुकंसौभाञ्जनकइत्यन्ये ॥ १४ ॥

---

* हो=हि (अ)

(६) **रामचन्द्रः** । कवकानि छत्राकाणि शिग्रुकं सौभाञ्जनं भूस्तृणं श्लेष्मातकफलानि च वर्जयेत् । मालातृणक-भूस्तृणेइत्यमरः ॥ १४ ॥

त्यजेदाश्वयुजे मासि मुन्यन्नं पूर्वसंचितम् ॥ जीर्णानि चैव वासांसि शाकमूलफलानिच ॥ १५ ॥

(१) **मेधातिथिः** । षण्मासनिचयसमानिचयपक्षयोराश्वयुजे त्यागः ननुमुन्यन्नंतावदेव संचेयं यत्कर्मपर्याप्तं तत्र नैवाधिकमस्ति कस्यत्यागः उच्यते न शक्या तुलागृहीतुमर्जनकाले अतोयत्किंचिदवशिष्टमस्ति तस्याश्वयुजे त्यागः । जीर्णानि चैव वासांसि अजीर्णानांनास्ति त्यागः ॥ १५ ॥

(२) **सर्वज्ञनारायणः** । पूर्वसंचितं पूर्ववर्षे शरदि वसन्तेवा परिगृहीतम् । वासांस्यजिनानि चीराणिवा जीर्णानीति यदिजीर्णानि तदैवाश्वयुजेमासित्याज्यानीत्यर्थः । शाकेति शाकादीन्यप्याहारार्थंशोषयित्वा स्थापितान्याश्वयुजे त्याज्यानीत्यर्थः ॥ १५ ॥

(३) **कुल्लूकः** । संवत्सरनिचयपक्षे पूर्वसंचितनीवाराद्यन्नं जीर्णानि च वासांसि शाकमूलफलानिचाश्विने मासि त्यजेत् ॥ १५ ॥

(४) **राघवानन्दः** । वक्ष्यमाणसमानिचयस्य त्यागकालमाह त्यजेदिति । आश्वयुजे नीवारादेः प्राप्तिकाले । वासांसीति विशेषणान्न चर्मणांत्यागः । संचितशाकादित्रितयमपि त्यजेदित्यन्वयः ॥ १५ ॥

न फालकृष्टमश्नीयादुत्सृष्टमपि केनचित् ॥ न ग्रामजातान्यार्तोऽपि मूलानि च फलानि च ॥ १६ ॥

(१) **मेधातिथिः** । आरण्यस्यापि फालकृष्टस्य प्रतिषेधः । ग्रामजातान्यफालकृष्टान्यपि संत्यज्यग्राम्यमाहारमित्यनेन प्रतिषेधः । पुष्पफलानांक्रियते नोपयोगः ग्राम्याणांदेवताभ्यर्चनादौ पुष्पफलानांनिषेधः । आर्तोपि अन्यासंभवेऽप्यवश्यकर्तव्यत्वाद्देवताद्यर्चनस्य प्रतिनिधिपक्षेऽपि नोपादेयमित्यर्थः । अपिशब्दोभिन्नक्रमोद्रष्टव्यः । पुष्पाण्यपिनोपादेयानि किंपुनर्धान्यानि ॥ १६ ॥

(२) **सर्वज्ञनारायणः** । फालकृष्टानि वनजान्यपि । न ग्रामजातान्यफालकृष्टान्यपि । आर्तोरोगी फलादीनीति व्रीह्यादेरप्युपलक्षणम् ॥ १६ ॥

(३) **कुल्लूकः** । अरण्येऽपिफालकृष्टप्रदेशे जातंस्वामिनोपेक्षितमपि व्रीह्यादि नाद्यात् । तथाग्रामजातान्याफलकृष्टभूभागेऽपि लतावृक्षमूलफलानि क्षुत्पीडितोऽपि न भक्षयेत् ॥ १६ ॥

(४) **राघवानन्दः** । किंच नेति । उत्सृष्टं वानप्रस्थाद्युद्देशेनत्यक्तं । पुष्पाणीति मेधातिथिः । फलानि नारिकेलादीनि ॥ १६ ॥

(५) **नन्दनः** । वन्यमपिधान्यंहलकर्षणोत्पादितंनाश्नीयात् । केनचिदुत्सृष्टंपूर्वंपरिगृहीतंपश्चादनादरेणत्यक्तम् ॥ १६ ॥

(६) **रामचन्द्रः** । फालकृष्टं हलोत्कृष्टं केन चिदुत्सृष्टमपि नाऽश्नीयात् ॥ १६ ॥

अग्निपक्वाशनोवा स्यात्कालपक्वभुगेव वा ॥ अश्मकुट्टोभवेद्वापि दन्तोलूखलिकोपिवा ॥ १७ ॥

(१) **मेधातिथिः** । अग्निना पक्वं शाकौदनादि तदशनंयस्य सोऽग्निपक्वाशनः । काले स्वयमेव यत्पक्वंतदेव भुञ्जी-

त नाद्रंफलं अथवा धान्यानामेव नीवारादीनां निष्पिष्येदं भक्षणम् । अश्मभिः पाषाणैः कुट्टयित्वा पिष्टरूपंकृत्वा भुञ्जीत । यद्वा यद्दतुपपन्नंवृतकादिभिर्बहिस्तुषकपाटकंतदश्मभिरपनीय कवाटमन्तः फलंभक्षयेत् । दन्ताउलूखलम् अस्यदन्तोलूखलिकः दन्तैस्तुषकवाटमपनीय भक्षयेत् । असत्यपि संस्कारे सनकर्तव्यः यदिवा पूर्ववदशनविशेषोपलक्षणं तादृशमश्नीयाद्यदस्य दन्ताएव उलूखलकार्यमवघातंसंपादयन्ति ॥ १७ ॥

(२) सर्वज्ञनारायणः । कालपक्कं परिणामपक्कं । अश्मकुट्टोऽश्मन्यश्मना तुषमोक्षंकृत्वाऽश्नन् । दन्तोलूखलिकः स्वदन्तैरेव तुषमोक्षंकृत्वा भुञ्जानः । अत्रचान्यतरस्यैव परिग्रहः कार्यः तत्राप्युत्तरोत्तरस्य श्रेष्ठत्वमितिक्रमोक्तिफलम् ॥ १७ ॥

(३) कुल्लूकः । अग्निपक्कंवन्यमन्नंकालपक्कंवा फलादियद्वानोलूखलमुसलाभ्यांकिंतुपाषाणेनचूर्णीकृत्यापक्कमेवाद्यात्। दन्ताएवोलूखलस्थानानि यस्य तथाविधोवा भवेत् ॥ १७ ॥

(४) राघवानन्दः । वानप्रस्थस्य नियमविशेषानाह अग्नीति द्वाभ्यां । दन्तोलूखलिकःदन्ताएवउलूखलाभक्ष्यसाधनानि यस्यसः । अग्निपक्कादिचतुष्टयंभक्षणप्रकारनियमः ॥ १७ ॥

(५) नन्दनः । फलान्यश्मना निष्पीड्य योभक्षयति न दन्तादिना सोऽश्मकुट्टकः । दन्तैरेवमुसलोलूखलकार्यंयस्यसदन्तोलूखलिकः । प्राधान्यादुलूखलस्यैवग्रहणम् । सतुषाभ्यवहारीत्यर्थः । अनेन व्रतेन परिग्रहपराङ्मुखत्वमुक्तम् ॥ १७ ॥

सद्यः प्रक्षालकोवा स्यान्माससंचयिकोऽपि वा॥षण्मासनिचयोवा स्यात्समानिचयएव वा॥१८॥

(१) मेधातिथिः । यत्पूर्वमशनमुक्तंतदैकाह्निकभोजनपर्याप्तमेवानयेत् । मासोपयोगीवा संचयोमासपर्याप्तः संचयोमाससंचयः सोऽस्यास्तीतिठन्कर्तव्यः यदिवा माससंचयकइति बहुव्रीहिसमासोत्र कर्तव्यः मासपर्याप्तःसंचयोस्येति एवमुत्तरयोरपि ॥ १८ ॥

(२) सर्वज्ञनारायणः । अथ सञ्चयेविशेषमाह सद्यःप्रक्षालकइति । सद्यएव संचयभाण्डंप्रक्षालयतीति प्रक्षालनेन तदव्यभिचरिता रिक्तता लक्ष्यते । समानिचयः संवत्सरार्थान्नाद्यसञ्चयकारी संवत्सरोर्ध्वंकालार्थसंचयस्तु नास्त्याश्वयुजे त्यागस्योक्तत्वात् । पक्षचतुष्टयंतु पूर्वपूर्वप्राशस्त्यार्थमुक्तम् ॥ १८ ॥

(३) कुल्लूकः । एकाहमात्रजीवनोचितंमासवृत्त्युपचितंवा षण्मासंसंवत्सरनिर्वाहसमर्थंवा नीवारादिकंसंचिनुयात् । यथापूर्वंनियमातिशयः मासवृत्तियोग्यसंचयोमाससंचयःसोऽस्यास्तीतिअतइनिठनावितिठन्प्रत्यये नमाससंचयिकइतिरूपम् ॥ १८ ॥

(४) राघवानन्दः। सद्यःप्रक्षालिकादिचतुष्टयं संचयनियमः । नियमभङ्गे प्रायश्चित्ती स्यात् । सद्यःप्रक्षालिकएकाहनिर्वाहकसंचितभक्तः । निचयःसंचयस्तेन षण्मासव्यापी संचयोयस्य एवंसमाअब्दंव्याप्यनिचयोयस्येति ॥ १८ ॥

(५) नन्दनः । प्रतिदिनमन्नंसंपाद्यातिथिशेषंभुक्त्वाश्वस्तनिकोहस्तप्रक्षालनंयः करोतिससद्यःप्रक्षालकः ॥ १८ ॥

(६) रामचन्द्रः । सद्यः प्रक्षालकोवास्यात् तदहःपर्याप्तकःस्यात् सञ्चयरहितइत्यर्थः । च पुनः समानिचयएववा वर्षपर्याप्तान्नोवा । हायनोस्त्री शरत्समाइत्यमरः । वर्षपर्याप्तान्नसंचयइत्यर्थः ॥ १८ ॥

नक्तं चान्नं समश्नीयाद्दिवा वाहृत्य शक्तितः॥चतुर्थकालिकोवा स्यात्स्याद्वाप्यष्टमकालिकः॥१९॥

(१) मेधातिथिः । द्विर्भोजनस्य पुरुषार्थतया विहितत्वादन्यतरस्मिन्काले निर्वृत्तिर्विधीयते । यथायथा वयोया-

ति तथातथा भोजनकालंजह्यात् । चतुर्थमष्टमावधितयाऽऽश्रयेत् । त्रीण्यहोरात्राण्यतीत्य चतुर्थेऽहनि सायंभुञ्जानोऽष्टमकालिकोभवति । भोजनस्य प्रकृतत्वात्तद्विषयश्चतुर्थकालसंबन्धःप्रतीयते ॥ १९ ॥

(२) **सर्वज्ञनारायणः** । नक्तमेव दिवैववा भोजनं तत्र शक्तितः शक्तौसत्यांनक्तमेव यदातु दिवा तदा नित्यमाहृत्य सद्यःप्रक्षालकवृत्तौ स्थित्वैव भोजनमित्यर्थः । चतुर्थकालिकोवेत्याद्यपि शक्तावेकस्मिन्दिने दिवा नक्तंवा भुक्त्वा द्वितीयदिनेऽभुक्त्वा तृतीये दिवा नक्तंवा भोजनमिति चतुर्थकालभोजनम् । सामान्यतोहि सायंप्रातःकालयोर्भोजनकालत्वात्प्रत्यहंद्वौ कालौ भवतः एवमष्टमकालिकत्वमप्युन्नेयम् ॥ १९ ॥

(३) **कुल्लूकः** । यथासामर्थ्यमन्नमाहृत्य प्रदोषेभुञ्जीत । अहन्येव वा चतुर्थकालाशनोवास्यात् ॥ सायंप्रातर्मनुष्याणामशनंदेवनिर्मितमिति विहितम् । तत्रैकस्मिन्नहन्युपोष्यापरेद्युःसायंभुञ्जीत । अष्टमकालिकोवाभवेत्त्रिरात्रमुपोष्यचतुर्थस्याह्नो रात्रौभुञ्जीत ॥ १९ ॥

(४) **राघवानन्दः** । नक्तंभोजिनोऽहरेवाहरणमाह दिवावेति । वाशब्दोत्रएवशब्दार्थः । सायंप्रातर्मनुष्याणामशनं देवनिर्मितमिति स्मृतेश्चतुर्थभोजनस्य यःकालःसभोजनार्थंविहितोयस्य सः तेन पूर्वेद्युरुपोष्य परेद्युःसायंभोजी चतुर्थकालिकः । एवंत्रिरात्रमुपोष्य चतुर्थेऽहनि सायंभोजी अष्टमकालिकः ॥ १९ ॥

(५) **नन्दनः** । एकमहोरात्रमुपोष्य द्वितीयेऽहोरात्रे नक्तमेव भुञ्जानश्चतुर्थकालिकः ॥ १९ ॥

(६) **रामचन्द्रः** । दिवा अन्नं आहृत्य आनीय नक्तं नक्तकाले अश्नीयात् । नक्तकालमाह आत्मनोद्विगुणांछायामतिक्रामतिभास्करः । तंनक्तंनक्तमित्याहुर्न नक्तंनिशिभोजनम् ॥ चतुर्थकालिकोवा स्यात् एकस्मिन्दिने दिवानक्तंवा भुक्त्वा द्वितीयदिने त्वभुक्त्वा तृतीयदिने दिवा नक्तंवा भोजनमिति चतुर्थकालिकत्वम् । सायंप्रातर्भोजनकालत्वात्प्रत्यहंद्वौ कालौ भवतः एवमष्टमकालिकत्वमप्युन्नेयं चतुर्दिनसाध्यम् ॥ १९ ॥

चान्द्रायणविधानैर्वा शुक्लकृष्णे च वर्तयेत् ॥ पक्षान्तयोर्वाप्यश्नीयाद्यवागूं क्वथितां सकृत् ॥२०॥

[यतः पत्रं समादद्यान्न ततः पुष्पमाहरेत् ॥ यतः पुष्पं समादद्यान्न ततः फलमाहरेत् ॥ १ ॥]+

(१) **मेधातिथिः** । पक्षान्तौ पूर्णमास्यमावास्ये । अत्र श्रितांयवागूमश्नीयात । सकृदिति सायंप्रातर्वा ॥ २०॥

(२) **सर्वज्ञनारायणः** । शुक्लेकृष्णेचेतिमासमित्यर्थः । पक्षान्तयोःदर्शपौर्णमास्यांच । क्वथितांतप्तां । सकृदेकदैव ॥ २० ॥

(३) **कुल्लूकः** । शुक्लकृष्णयोः ॥ एकैकंह्रासयेत्पिण्डं शुक्ले कृष्णे च वर्धयेत् इत्यादिनैकादशाध्याये च वक्ष्यमाणैश्चान्द्रायणैर्वावर्तयेत् । पक्षान्तौ पौर्णमास्यमावास्ये तत्र श्तांयवागूंवाप्यश्नीयात्सकृदितिसायंप्रातर्वा ॥ २० ॥

(४) **राघवानन्दः** । चान्द्रायणविधानैर्वर्तयेकादशाध्याये वक्ष्यमाणैः । क्वथितां पक्वां पक्षान्तयोः अमावास्यांपौर्णमास्यांच सकृत्सायंप्रातर्वा वारमात्रमश्नीयात ॥ २० ॥

(६) **रामचन्द्रः** । पक्षान्तयोः शुक्लकृष्णयोः अन्ते मासांतेऽश्नीयात् मासोपवासइत्यर्थः । यद्वा पक्षान्तयोः शुक्लपक्षान्ते कृष्णपक्षान्ते वाऽश्नीयात् । पक्षागमेथवाऽश्नीदितियोगीश्वरः । क्वथितां यवागूं नीवारादिचूर्णविकाराम् ॥ २० ॥

पुष्पमूलफलैर्वापि केवलैर्वर्तयेत्सदा ॥ कालपक्वैः स्वयं शीर्णैर्वैखानसमते स्थितः ॥ २१ ॥

(१) **मेधातिथिः** । कालपक्वैः पनसादीनाम् अग्निनापि पाकःक्रियते तन्निषेधार्थम् । तदग्निपक्वंगृहस्थस्यानिषि-

---

+ (८)

त्रम । वैखानसंनाम शास्त्रं यत्र वानप्रस्थस्य धर्माविहितास्तेषांमतेस्थितः । अन्यामपि तच्छास्त्रोक्तांचर्यांशिक्षेत ॥ २१ ॥

(२) **सर्वज्ञनारायणः** । केवलैरन्नान्तरासंसृष्टैः कालपक्वैः फलैः स्वयंशीर्णैः फलाङ्कुरादिजननशक्तिहीनतांप्राप्तैः । वैखानसमते वानप्रस्थधर्मे ॥ २१ ॥

(३) **कुल्लूकः** । पुष्पमूलफलैरेव वा कालपक्वैःनाग्निपक्वैःस्वयंपतितैर्जीवेत् । वैखानसोवानप्रस्थः तद्धर्मप्रतिपादकशास्त्रदर्शनेस्थितः । तेनैतदुक्तम् अन्यदपिवैखानसशास्त्रोक्तंधर्ममनुतिष्ठेत् ॥ २१ ॥

(४) **राघवानन्दः** । केवलैः प्रत्येकैर्न मिश्रैः कालपक्वैः पनसादिभिरग्निपक्वनिषेधार्थं वैखानसमते वानप्रस्थप्रतिपादकशास्त्रदर्शने स्थितः ॥ २१ ॥

(५) **नन्दनः** । केवलैरनतिपक्वैरामैरितियावत् । वैखानसमिति विखनसाप्रणीतंसूत्रं तत्रहि वानप्रस्थधर्मस्य पूर्णउपदेशः क्रियते ॥ २१ ॥

(६) **रामचन्द्रः** । केवलैः अन्नान्तरासंसृष्टैः स्वयंशीर्णैः फलाङ्कुरादिजननशक्तिहीनैः । वैखानसमते स्थितः वानप्रस्थाश्रमस्थः ॥ २१ ॥

भूमौ विपरिवर्तेत तिष्ठेद्वाप्रपदैर्दिनम् ॥ स्थानासनाभ्यां विहरेत्सवनेषूपयन्नपः ॥ २२ ॥

(१) **मेधातिथिः** । विपरिवर्तनं केवलायांभूमावेकेन पार्श्वेन निषद्यपुनः पार्श्वान्तरेणावस्थानम् । आहारविहारकालौ वर्जयित्वा एवंवर्तेत । नोपविशेन्नचङ्क्रमेत न शय्यायान्नासने नभित्तौनिषीदेदित्यर्थः । प्रपदैः पादाग्रैर्वातिष्ठेत् स्थानासनाभ्यांच दिने रात्रौतु केवलस्थण्डिलशायितांवक्ष्यति । सवनेषु प्रातर्मध्यन्दिनापराह्णेषु उपयन्नपइतिच असंभवे नद्यादीनामुद्धृतोदकेनापि स्नानंदर्शयति ॥ २२ ॥

(२) **सर्वज्ञनारायणः** । विपरिवर्तेतइतस्ततोभ्रमन्वर्तेत । प्रपदैः पादाग्रैः । स्थानासनाभ्यां कदाचिदूर्ध्वंस्थितः कदाचिदुपविष्टोविहरेत् कालंनयेत् । अत्रतु पक्षेत्रिषवणस्नानंकार्यमित्याह सवनेष्विति ॥ २२ ॥

(३) **कुल्लूकः** । केवलायांभूमौ लुठन्गतागतानि कुर्यात् स्थानासनादावुपविशेत् उत्तिष्ठेत्पर्यटेदित्यर्थः । आवश्यकंस्नानभोजनादिकालंविहाय चायंनियमः । एवमुत्तरत्रापि । पादाग्राभ्यांवादिनंतिष्ठेत्कंचित्कालंस्थितएवस्यात्कंचिच्चोपविष्टएव नत्वन्तरा पर्यटेत् । सवनेषु सायंप्रातर्मध्याह्नेषु स्नायात् । यत्तु सायंप्रगे तथेत्युक्तंतेनसहास्यनियमातिशयापेक्षोविकल्पः ॥ २२ ॥

(४) **राघवानन्दः** । भूमावेव गतागतंकुर्यादित्याह भूमाविति । आहारतदाहरणकालौवर्जयित्वा प्रपदैःपादाग्रैः तिष्ठेत् नासनादावुपविशेत् । स्थाने न तिष्ठेत् । आसनेन पद्मासनादिना वा विहरेत् दिवसंनयेत् । सवनेषु सायंप्रातर्मध्याह्नेषु स्नायात् । सायंस्नायात्प्रगे तथेत्युक्तेः । तेन सहास्य पञ्चातपादीनियमाविशेषाद्विकल्पः ॥ २२ ॥

(५) **नन्दनः** । विपरिवर्तेत शयीत । प्रपदैः पादाङ्गुल्यग्रैः । विहरेत्कालंक्षिपेत् । सवनेष्वपउपयन्नुपगच्छंस्त्रिषवणस्नायीतियावत् ॥ २२ ॥

(६) **रामचन्द्रः** । भूमौविपरिवर्तेत इतस्ततोभ्रमन्विपरिवर्तेत दिनं प्रपदैः पादाग्रैः तिष्ठेद्वा । प्रपदंतु पदाग्रंस्यादित्यमरः । स्थानासनाभ्यां विहरेत् स्थानतः कदाचिदूर्ध्वस्थितःकदाचिदुपविष्टस्ताभ्यांस्थानासनाभ्यांविहरेत्सवनेषु अपउपनयन् त्रिषवणंस्नानंकुर्वन् ॥ २२ ॥

ग्रीष्मे पञ्चतपास्तु स्याद्वर्षास्वभ्रावकाशिकः ॥ आर्द्रवासास्तु हेमन्ते क्रमशोवर्धयंस्तपः ॥ २३ ॥

(१) **मेधातिथिः** । पञ्चभिरात्मानंतापयेत् चतसृषु दिक्षु अग्नीन्सन्निधाप्यमध्येतिष्ठेदुपरिष्टादादित्यतापंसेवेत । प्रावृष्यभ्राण्येवावकाशाऽऽश्रयोयस्मिन्देशे देवोवर्षति तंप्रदेशमाश्रयेद्वर्षनिवारणार्थंछत्रवस्त्रादि न गृह्णीयात् । हेमन्ते शीतोपलक्षणार्थं । एतेन शिशिरेप्येषएव विधिः । आर्द्रवासस्त्वं क्रमशः क्रमेण ॥ २३ ॥

(१) **सर्वज्ञनारायणः** । शक्तावपि तीव्रतपःप्रकारानाह ग्रीष्मइति । चतुर्दिक्स्थवह्निचतुष्टयेन सूर्येण चेति पञ्चभिस्तापनात्पञ्चतपाः । अभ्रावकाशकोमेघप्रेक्षकोऽनावृतदेशस्थइत्यर्थः । ग्रीष्मादिपदानि चतुर्मासर्तुपराणि ॥ २३ ॥

(३) **कुल्लूकः** । आत्मतपोविवृद्ध्यर्थंग्रीष्मे चतुर्दिगवस्थितैरग्निभिरूर्ध्वंचादित्यतेजसात्मानंतापयेत् वर्षास्वभ्रावकाशमाश्रयेत् यत्र देशे देवोवर्षति तत्र छत्राद्यावरणरहितस्तिष्ठेदित्यर्थः हेमन्तेचार्द्रवासाभवेत् । ऋतुत्रयसंवत्सरावलम्बेनायंसांवत्सरिकएव नियमः ॥ २३ ॥

(४) **राघवानन्दः** । तेषांतपोविशेषानाह ग्रीष्मेति द्वाभ्यां । चतुर्दिक्ष्वग्निर्मध्येसूर्यइतिपञ्चातपाःयस्य सपञ्चातपः अभ्रेषु वर्षासु अवकाशेनानावरणतया चरतीत्यभ्रावकाशिकः । हेमन्तइति शीतोपलक्षकम् ॥ २३ ॥

(५) **नन्दनः** । अभ्रमाकाशम् ॥ २३ ॥

उपस्पृशंस्त्रिषवणंपितॄन्देवांश्च तर्पयेत् ॥ तपश्चरंश्चोग्रतरंशोषयेद्देहमात्मनः ॥ २४ ॥

(१) **मेधातिथिः** । उपस्पर्शनं स्नानं अन्यदपि ऊर्ध्वबाह्वादि मासोपवासद्वादशरात्रादि तपः । उग्रतरं प्रकृष्टतरं शरीरपीडाजननं कुर्वन् शोषयेच्छरीरम् ॥ २४ ॥

(२) **सर्वज्ञनारायणः** । उग्रंतपोयदा चरति तदोपस्पृशन् स्नानंकुर्वन् त्रिषवणं देहंशोषयेत् आयासेन ॥ २४ ॥

(३) **कुल्लूकः** । विहितमपित्रिषवणंस्नानंदेवर्षिपितृतर्पणविधानार्थमनूद्यते । प्रातर्मध्यंदिनंसायंसवनेषु त्रिष्वपि देवर्षिपितृतर्पणंकुर्वन्नन्यदपि पक्षमासोपवासादिकतीव्रव्रतंतपोऽनुतिष्ठन्यथोक्तयमेनपक्षोपवासिनः केचिन्मासोपवासिनःइतिस्वशरीरंशोषयेत् ॥ २४ ॥

(४) **राघवानन्दः** । स्नानतर्पणयोगावश्यकत्वमाह उपेति । देहं बाह्याभ्यन्तरद्वयम् ॥ २४ ॥

(५) **नन्दनः** । त्रिषवणस्य स्नानस्य पुनर्वचनमादरार्थम् ॥ २४ ॥

(६) **रामचन्द्रः** । त्रिषवणे त्रिषु सवनेषु त्रिकालेषु उपस्पृशेत् ॥ २४ ॥

अग्नीनात्मनि वैतानान्समारोप्य यथाविधि ॥ अनग्निरग्निरनिकेतः स्यान्मुनिर्मूलफलाशनः ॥ २५ ॥

(१) **मेधातिथिः** । वितानै भवावैतानाः तान्समारोपयेद्भस्मपानादिविधानेन । आत्मनिसमारोपणविधिश्च श्रवणकादव गन्तव्यः । चिरकालंयदा तपश्चरितंभवति समत्यवस्थांवयः प्राप्तंतदा वानप्रस्थएवसन्ननग्निरनिकेतः पर्णकुटीनिवासार्थोजह्यात् । क्वतर्ह्यासीत उपरिष्टाद्वक्ष्यति वृक्षमूलनिकेतनइति । मुनिःस्यादिति संबध्यते तेनायमर्थउक्तोभवति वाङ्नियमंकुर्यादिति मौनव्रतधारी नियतवागुच्यतेलोके । मूलफलाशनः अन्यान्ननिवृत्त्यर्थंमतत् । नीवारादीन्यारण्यान्यपि नाश्नीयात् ॥ २५ ॥

(२) **सर्वज्ञनारायणः** । अत्रैवाश्रमे धर्मकाष्ठांदर्शयति अग्नीनिति । वैतानान् श्रौतान् । यथाविधि यातेअग्ने यज्ञियेतिमन्त्रेण । अनग्निस्त्यक्तपाकसाधनाग्निः । अनिकेतोगृहेष्ववसन् । मुनिर्मननपरः ॥ २५ ॥

(३) कुल्लूकः । श्रौतानग्नीन्वैखानसशास्त्रविधानेन भक्ष्यपानादिनात्मनि समारोप्य लौकिकाग्निगृहशून्योयथा वक्ष्यति वृक्षमूलनिकेतनइति । मुनिर्मौनव्रतचारीफलमूलाशनएवस्यात् नीवाराद्यपिनाश्नीयात् एतच्चोर्ध्वंषण्मासेभ्योऽप्युपरि अनग्निरनिकेतनइतिवसिष्ठवचनात् षण्मासोपर्यनग्नित्वमनिकेतत्वंच ॥ २५ ॥

(४) राघवानन्दः । तत्राप्यपरितुष्यन्तंविरक्तंमत्याह । अग्नीनित्यष्टभिः । अग्नीन् भस्मात्मकान् पीत्वा भैक्ष्यमाहरेदितितृतीयेनान्वयः । ऊर्ध्वंषण्मासेभ्योऽनग्निरनिकेतइति वसिष्ठोक्तेः षण्मासंवानमस्थं कृत्वा यथाविधि वैश्वानसशास्त्रविधानेन ॥ २५ ॥

(५) नन्दनः । एवंगृहस्थसमस्य वानप्रस्थस्य धर्माउक्ताः अथ भिक्षुकस्य धर्मानाह अग्नीनिति । अनग्निः त्यक्तपञ्चाग्निः । मुनिर्मौनी ॥ २५ ॥

(६) रामचन्द्रः । वैतानानग्नीनात्मनि समारोप्य अनग्निः पाकादिरहितः अनिकेतःस्यात् गृहरहितःस्यात् ॥२५॥

अप्रयत्नःसुखार्थेषु ब्रह्मचारी धराशयः ॥ शरणेष्वममश्चैव वृक्षमूलनिकेतनः ॥ २६ ॥

(१) मेधातिथिः । सुखप्रयोजनेषु वस्तुषु यत्नंन कुर्यात् आतपपीडितः छायांनोपसर्पेत् शीतार्दितोनाग्निंसमिन्धीत यदितु दैवोपपादितादित्यतापादिना शीतादिदुःखनिवृत्तिर्भवतीत्यत्रैव तद्दुःखापनोदः क्रियते न निषिध्यते वर्षादिकालादन्यत्रैतद्विधीयते तत्र प्रतिपन्नस्य धर्मस्य विधानात् । अथवा व्याधितस्यौषधप्रयत्नोनिवार्यते व्याधिनिवृत्तिरपिसुखमुच्यते अतस्तन्निवृत्त्यर्थंयत्नंकुर्यात् । धराशयः केवलैस्तृणैराच्छादिते स्थण्डिले शयीत शरणेष्वाश्रयेषु गृहवृक्षमूलादिषु ममकारमात्मीयाभिनिवेशं न कुर्यात् । वृक्षमूलानि निकेतनं गृहस्थानीयं कुर्यात् तदसंभवे शिलातलगुहादयोपि विहिताः ॥ २६ ॥

(२) सर्वज्ञनारायणः । सुखार्थेषु सुखसाधनेषु । ब्रह्मचारी त्यक्तस्त्रीसंगः । एवंच सपत्नीकस्य ऋतुगमनानुमतिर्गम्यते । धराशयः क्षितिशायी । शरणेषु वृष्ट्यादिवारकेषु वृक्षादिष्वसमर्थः ॥ २६ ॥

(३) कुल्लूकः । सुखप्रयोजनेषु स्वादुफलभक्षणशीतातपपरीहारादिषु प्रयत्नशून्योऽस्त्रीसंभोगी भूशायीच निवासस्थानेषु ममत्वरहितोवृक्षमूलवासी स्यात् ॥ २६ ॥

(४) राघवानन्दः । सुखार्थेषु सुखजनकीभूतेषु स्रक्चन्दनादिषु । धराशयोभूमिशयः । शरणेषु निवासेषु । वृक्षमूलमेवनिकेतनंगृहंयस्य सवृक्षमूलनिकेतनः ॥ २६ ॥

(५) नन्दनः । सुखार्थेषु सुखहेतुषु । धराशयः स्थलशायी ॥ २६ ॥

(६) रामचन्द्रः । शरणेषु वृष्ट्यादिनिवारककुटीवृक्षादिषु अममः निर्ममः भवेत् ॥ २६ ॥

तापसेष्वेव विप्रेषु यात्रिकं भैक्षमाहरेत् ॥ गृहमेधिषु चान्येषु द्विजेषु वनवासिषु ॥ २७ ॥

(१) मेधातिथिः । पञ्चम्यर्थे सप्तमी । तापसेभ्योमूलफलासंभवे भैक्षमाहरेत् । गृहमेधिभ्योगृहस्थेभ्योवा वनवासिभ्यः । यात्रिकं प्राणमात्रसौहित्यंभवति ॥ २७ ॥

(२) सर्वज्ञनारायणः । तापसेषु वनस्थेषु । यात्रिकं प्राणयात्रामात्रार्थं । गृहमेधेषु गृहस्थेषु वनवासिष्विति वदन्नेकान्तशीलतया गृहस्थस्यापि वनवासोदर्शितः । अन्येष्वसंबन्धिषु ॥ २७ ॥

---

(२६) अप्रयत्न=अप्रमत्त (ल, य)

(३) कुल्लूकः । फलमूलासंभवेचवानप्रस्थेभ्योब्राह्मणेभ्यः प्राणमात्रधारणोचितं भैक्षमाहरेत् तदभावेचान्येभ्योवन-वासिभ्योगृहस्थेभ्योद्विजेभ्यः ॥ २७ ॥

(४) राघवानन्दः । यात्रिकं प्राणधारणोचितं । गृहमेधिष्वित्यनेन वने ये गृहस्थाःस्युस्तेभ्योपि ॥ २७ ॥

(५) नन्दनः । तापसेषु वानप्रस्थेषु । तदलाभेगृहमेधिषु ॥ २७ ॥

(६) रामचन्द्रः । यात्रिकंयात्रामात्रं यावत्प्राणधारणंतावद्भैक्ष्यं आहरेत् आचरेत् । च पुनः अन्येषु गृहमेधिषु वनवासिषु भैक्ष्यंआचरेत् ॥ २७ ॥

ग्रामादाहृत्य वाश्नीयादष्टौ ग्रासान्वने वसन् ॥ प्रतिगृह्य पुटेनैव पाणिना शकलेन वा ॥२८॥

(१) मेधातिथिः । असंभवेतु । ग्रासग्रहणान्नमूलफलभिक्षैव ग्राम्यान्नाशनमन्यासंभवेऽनेनानुज्ञातम् । गृहीत्वा-पत्रपुटेनैव पाणिना भाजनरहितेन शकलेन शरावाद्येकदेशखण्डेन ॥ २८ ॥

(२) सर्वज्ञनारायणः । ग्रामादाहृत्येतिर्विधिना तस्मात्रार्थंग्रामंप्रविशेत् । पुटेन पर्णपुटेन । पाणिनेतिदक्षिणपा-णिना । वनंप्रतिभैक्ष्यानयनविधानादष्टौग्रासानितिपुटशकलाहरणपक्षयोरेवान्वितम् । शकलेन स्थालीकर्परेण ॥ २८ ॥

(३) कुल्लूकः । तस्याप्यसंभवे ग्रामादानीय ग्रामस्यान्नस्याष्टौग्रासान्पर्णशरावादिखण्डेन पाणिनैव वा गृहीत्वा वानप्रस्थोभुञ्जीत ॥ २८ ॥

(४) राघवानन्दः । तदलाभे प्रकारान्तरमाह ग्रामादिति । तादृशस्यभिक्षापात्रमपि नास्तीत्याह । पुटेनेति । प-त्रस्यानियतत्वादञ्जलिनावा पाणिपात्रमिति श्रुतेश्च । शकलेन अर्धेन पाणिना ॥ २८ ॥

(५) नन्दनः । तदलाभे किंकर्तव्यमित्यपेक्षायामाह ग्रामादिति । पुटेन पत्रघटितेन पात्रेण । शकलेन भिन्नभाण्ड-खण्डेन ॥ २८ ॥

(६) रामचन्द्रः । पाणिना दक्षिणेन प्रतिगृह्य अष्टौ ग्रासानश्नीयात् । शकलेन शरावखण्डेनवा ॥ २८ ॥

एताश्चान्याश्च सेवेत दीक्षाविप्रोवने वसन् ॥ विविधाश्चौपनिषदीरात्मसंसिद्धये श्रुतीः ॥ २९ ॥

(१) मेधातिथिः । एतादीक्षा नियमानन्यांश्चाऽन्तर्जलस्थानचक्षुर्निमीलनादिकं सेवेत । श्रुतीरौपनिषदीः रहस्या-धिकारपठितानि वेदवाक्यानि अधीयीत चिन्तयेद्भावयेच्चाऽऽत्मसंसिद्धये ब्रह्मप्राप्त्यर्थायाउपासनाउक्ताः । विविधाइत्य-नुवादः ॥ २९ ॥

(२) सर्वज्ञनारायणः । अन्याःस्मृत्यन्तरोक्तामासोपवासाद्याः दीक्षाः नियमानुउपनिषण्णायोच्यतइत्युपनिष-द्रहस्यं तादृगर्थाऔपनिषदीःश्रुतीःसेवेतेत्यनुषङ्गः । आत्मनःसंसिद्धिर्विवेकः ॥ २९ ॥

(३) कुल्लूकः । वानप्रस्थएतादीक्षाएतान्नियमानन्यांश्चवानप्रस्थशास्त्रोक्तानभ्यसेत् । औपनिषदीश्चश्रुतीःउपनिषत्प-ठितब्रह्मप्रतिपादकवाक्यानिविविधान्यस्यात्मनोब्रह्मसिद्धये ग्रन्थतोऽर्थतश्चाभ्यसेत् ॥ २९ ॥

(४) राघवानन्दः । किंच एताश्चेति । दीक्षाशब्दोनियमवचनः । औपनिषदीःरहस्याधिकारपठिताः परीक्ष्य लो-कान्कर्मचितान्ब्राह्मणोनिर्वेदमायादित्यादिकाः । आत्मसंशुद्धये मोक्षाय साह्येवात्मनोवास्तवी शुद्धिः ॥ २९ ॥

(५) नन्दनः । एताश्चेत्यादिश्लोकद्वयमेकान्वयम् । दीक्षानियमान् ॥ २९ ॥

(६) रामचन्द्रः । युग्मं एतानिति । एतान्पूर्वोक्तान्व्रतान् । च पुनः अन्यान् मासोपवासव्रतादीन् विप्रःवने वस-न् सेवेत । च पुनः दीक्षांवानप्रस्थदीक्षां सेवेत ॥ २९ ॥

ऋषिभिर्ब्राह्मणैश्चैव गृहस्थैरेव सेविताः ॥ विद्यातपोविवृद्ध्यर्थं शरीरस्य च शुद्धये ॥ ३० ॥

(१) **मेधातिथिः** ।अविशेषेणोक्ताअन्याश्च सेवेत। शाक्यपाशुपतादिदीक्षादिसेवनमपि प्राप्तंतन्निषेधति ऋषिभिर्महाभारते संतप्यवनेष्वाद्यैः सेविताववर्ण्यन्ते। ब्राह्मणैश्च गृहस्थैर्याः सेविताः तदुक्तमुत्तरेषांचैतदविरोधीति। विद्या आत्मैकत्वविज्ञानं तच्छ्रुतिसेवनेन वृद्धिंनयेत् दृढीकुर्यात्। शरीरस्य च शुद्धये आहारनियमदीक्षाः सेवेत ॥ ३० ॥

(२) **सर्वज्ञनारायणः** । ताश्चविद्या वैश्वानराद्युपासना तपः स्वाध्यायस्तयोर्वृद्ध्यर्थं तथा तासामेव पवित्राणांजपेन शरीरस्य शुद्धिः पापक्षयस्तदर्थंच ऋष्यादिभिःसेविताःश्रुतीः सेवेतेत्यन्वयः ऋषिभिर्ज्ञानपरैर्यतिभिः ब्राह्मणैस्तथागृहस्थैरेव ब्राह्मणैर्गृहस्थत्वेपिसेविताः। अतोद्वयोर्मध्यवर्तिनोवनवासिनोऽतिप्रशस्ताएव ताइत्यर्थः ॥ ३० ॥

(३) **कुल्लूकः** । यस्मादेताऋषिभिर्ब्रह्मदर्शिभिःपरिव्राजकैर्गृहस्थैश्च वानप्रस्थैर्ब्रह्माद्वैतज्ञानधर्मयोर्विवृद्ध्यर्थमुपनिषच्छ्रुतयः सेवितास्तस्मादेताः सेवेतेतिपूर्वस्यानुवादः ॥ ३० ॥

(४) **राघवानन्दः** । तास्तौति ऋषिभिरिति । ब्राह्मणैर्ब्रह्मतत्वदर्शिभिः सेविताअभ्यस्यमानाः । शरीरस्य च शुद्धये लिङ्गशरीरे यत्पापंतत्वज्ञानप्रतिबन्धकं स्थूलदेहे यत्पापंतयोर्नाशाय ॥ ३० ॥

(५) **नन्दनः** । सेविताइतिदीक्षाणांचश्रुतीनांचविशेषणम् । विद्या ज्ञानम् ॥ ३० ॥

(६) **रामचन्द्रः** । च पुनः ब्राह्मणैः ब्रह्मचारिभिः च पुनः गृहस्थैः वानप्रस्थैः सेविता धर्माविद्यातपोविवृध्यर्थं । च पुनः शरीरस्य शुद्धये सेवेतेति सर्वत्र संबन्धः ॥ ३० ॥

अपराजितां वास्थाय व्रजेद्दिशमजिह्मगः ॥ आनिपाताच्छरीरस्य युक्तोवार्यनिलाशनः ॥ ३१ ॥

(१) **मेधातिथिः** । प्राच्याउदीच्याश्चदिशोरन्तरालमपराजितादिक् लोकेष्वैशानीत्युच्यते दिशमास्थाय चेतसिनिधायैषामयागन्तव्येति ततस्तामेवव्रजेत् अजिह्मगः अकुटिलगामी श्वभ्रनदीस्रोतांसि न परिहरेत्। आनिपाताच्छरीरस्य युक्तोवार्यनिलाशनः। प्राच्याउदीच्याश्च गमनविधिरयम् । यावन्नपतति तावद्वायुभक्षोम्बुभक्षश्च स्यात्। युक्तः योगशास्त्रैरात्मानंयुक्त्वा तदेतन्महाप्रस्थानमुच्यते ॥ ३१ ॥

(२) **सर्वज्ञनारायणः** । अथ तपसा खिन्नस्याप्रत्यवायंमृत्युप्रकारमाह अपराजितामिति । अपराजितेशानी आस्थायोद्दिश्य । अजिह्मगोग्निकण्टकजलादीनांवर्त्मनि दर्शने तत्परिहारार्थं वक्रगतिमकुर्वन्। युक्तोनियतचित्तवृत्तिः। वार्यनिलाशनस्तदन्यतराशनः ॥ ३१ ॥

(३) **कुल्लूकः** । अचिकित्सितव्याध्याद्युद्भवेऽपराजितामैशानींदिशमाश्रित्याकुटिलगतिर्युक्तोयोगनिष्ठोजलानिलाशनआशरीरनिपाताद्गच्छेत्। महाप्रस्थानाख्यंशास्त्रेविहितंचेदंमरणम् तेन न पुरायुषःस्वःकामी प्रेयादितिश्रुत्यापि नविरोधः यतः स्वःकामिशब्दप्रयोगादवैधंमरणमनया निषिध्यते नशास्त्रीयम् ॥ ३१ ॥

(४) **राघवानन्दः** । उपायान्तरमाह अपराजितामिति। ऐशानीं दिशमाश्रित्याजिह्मगोऽकुटिलगतिः युक्तोयोगशास्त्रनिश्चितमहाप्रस्थानः शरीरस्यानिपाताद्व्रजेत् म्रियेतेत्यर्थः ॥ ३१ ॥

(५) **नन्दनः** । प्रकारान्तरमाह अपराजितामिति। अपराजितां प्रागुदीचीम् । अजिह्मगऋजुगतिः । शरीरस्यानिपाताद्व्रजेदित्यन्वयः ॥ ३१ ॥

(६) रामचन्द्रः । अपराजितां ईशानीं आख्याय अजिह्मगःसन्व्रजेत् । कीदृशोवानप्रस्थः शरीरस्यानिपातात् । युक्तः नियतचित्तः । पुनःकीदृशः वार्यनिलाशनः वार्याधारोवा अनिलाधारोवा ॥ ३१ ॥

आसां महर्षिचर्याणां त्यक्त्वान्यतमया तनुम् ॥ वीतशोकभयोविप्रोब्रह्मलोके महीयते ॥३२ ॥

(१) मेधातिथिः । पूर्वोक्तानि तपांसि महाप्रस्थानंचानन्तरोक्तं महर्षिचर्या आसामन्यतमया नदीप्रवेशेन भृगुप्रपतनेनाग्निप्रवेशेनाहारनिवृत्त्यावा शरीरंत्यजेत् । अस्य च फलं वीतशोकभयस्य ब्रह्मलोकप्राप्तिः । नरकादिदुःखानुभवः शोकः भयं नरकंगमिष्यामीति तदस्य व्येति । अव्यवधानेनैवार्चिरादिक्रमेण ब्रह्मलोकंप्राप्नोति इहस्थानविशेषोब्रह्मलोकः स्वर्गादपिनिरतिशयस्तत्र महीयते पूज्यमानआस्ते नतु ब्रह्मणः स्वाराज्यंप्राप्नोति लोकग्रहणात् । चतुर्थेह्याश्रमे मोक्षंवक्ष्यति न केवलकर्मकृतोमोक्षइत्याहुः । ननुचाप्युक्तं विविधाश्चौपनिषदीरात्मसंसिद्धयेश्रुतीरिति आत्मसंसिद्धिश्च आत्मोपासनया तद्भावापत्तिः नह्यन्यः संसिद्धिशब्दस्यार्थउपपद्यते औपनिषदीषु श्रुतिषु तद्भाव्यंयोगिनामात्मानंब्रह्मसंस्थोमृतत्वमेतीतिच । अथसायुज्यंगच्छतीत्यादि अथोच्यते अन्याअपि तपःसिद्धयःश्रूयन्ते यस्तपति पितृलोकवासोभवतीत्यादिसंकल्पितार्थोपपादितासार्ष्टितासालोक्यंच पुरुषस्य भविष्यति न पुनर्मोक्षइति तदयुक्तं विशेषाभावात् । यथैव परिमितफलाप्त्युपासनात्स्वधिक्रियते एवममृतत्वप्राप्तावपि । नक्कचिच्छ्रूयते परिव्राजकेनैवोपासनायद्वैतविषयाणि कर्तव्यानि । ननुच त्रयोधर्मस्कन्धाइत्युपक्रम्य यज्ञोऽध्ययनंदानमित्यनेन गृहस्थधर्माउक्तास्तपएवेत्यनेन वानप्रस्थोब्रह्मचार्याचार्यकुलवासीत्यनेन नैष्ठिकोब्रह्मसंस्थइत्यनेन परिव्राजकः । एतेषांत्रयाणांपुण्यलोकाउक्ताः पारिशेष्यादेतद्व्यतिरिक्तस्यामृतत्वम् । नैवं ब्रह्मणिसंतिष्ठते । प्रयतते तत्परस्यब्रह्मसंस्थस्य यौगिकत्वादस्य शब्दस्य । ननुच यदि सर्वेषामधिकारस्तदैतावदेव वक्तव्यंब्रह्मसंस्थोमृतत्वमेतीति । नैवं आश्रमाणांत्रिविधिवाक्यावगतंफलंसंपत्क्षयिणः पुण्यलोकाभवन्तीति ब्रह्मसंस्थस्यतदाश्रमावस्थितस्यैवामृतत्वमपुनरावृत्तिलक्षणंविधीयते । ननुचाद्वैतरूपंब्रह्मेत्यात्मविदः सचनिवृत्तकर्माख्यः । आश्रमाश्च प्रवृत्तमार्गाख्याः क्रियाकारकफलभेदानुष्ठानात्मकाः । तत्राद्वैतात्मविज्ञानेसमानभेदाश्रयाणि च गृहस्थाद्यग्निहोत्रकर्मादीनीति परस्परविरोधः । अत्रोच्यते । समानमेतत पारिव्राज्येपि यमनियमानामिष्टत्वात्तेच भेदाश्रयाः । अथाप्युच्येतकर्मसंन्यासिनोनिवृत्तिमार्गावस्थायिनोनैव केचिच्छास्त्रार्थविधयःसन्ति । नायंशास्त्रार्थः अहंकारममकारत्यागएव संन्यासोवक्ष्यते नाशेषशास्त्रार्थत्यागः तस्यापि क्षुधाद्युपहतस्य भिक्षादौ प्रवर्तमानस्यास्त्येव क्रियाकारकसंबन्धः तत्र लौकिके दृष्टार्थभेदे प्रवर्तमानस्य अद्वैतात्मविज्ञानभावनमविरुद्धम् । शास्त्रीये त्वग्निहोत्रादौ विरोधादिति कोयुक्तःकार्येवंवदेत् । अथोच्यते क्षुधाद्युपहतस्याप्यद्वैतत्यागोविरोधिना भोजनेन तावत्कालएव । यथान्धतमसि चलितस्य गच्छतः कण्टकप्रदेशे पादन्यासः सवितरि पुनरुदिते लब्धप्रकाशस्य पुनर्न्याय्यमेवाध्वन्यस्याकण्टकेवस्थानम् । तथा क्षुधाद्युपघाते विच्छिन्नात्मविज्ञानस्य क्षणमालोकस्थानीयायांक्षुन्निवृत्तौ पुनर्दृढसंस्कारवशादेवावस्थानमिति । तत्तापसेऽप्यविरुद्धम् । गृहस्थस्यापि पुत्रदारादितयोपासनमविरुद्धं बहुव्यापारः । ततस्तु भेदसात्म्यतांगतस्य कुतोऽद्वैतसंस्कारोत्पत्तिः । उक्तंच गृहस्थधर्मेष्वेकाकीचिन्तयेदिति । तथा पुत्रे सर्वंसमासज्येति । ननुच तस्मादुहनपुरायुषःस्वः कामीप्रेयादितिश्रुतिस्तत्र कुतोवानप्रस्थस्य शरीरत्यागः नहिसाश्रुतिर्वानप्रस्थादन्यत्रानयास्मृत्या विषयउपस्थापयितुंशक्यते । बलीयसी हिश्रुतिः साच स्मृत्यनुरोधेन न संकोचमर्हति । उच्यते जरसा विशीर्णस्यानिष्टसंदर्शनादिना वा विदिते प्रत्यासन्ने मृत्यौ मुमूर्षतोन

श्रुतिविरोधः । एवंहि तत्र श्रूयते नपुरायुषइति अवस्थाविशेषेह्यनभिमेते मरणे एतावदेवावक्ष्यन्नलवःकामीप्रेयादिति अ-रिष्टोपदेशश्चोपनिषत्स्वेवमर्थवान्भवति । यस्यत्वेतन्निमित्तंमरणंनास्ति ॥ ३२ ॥

(२) **सर्वज्ञनारायणः** । आसां पञ्चतपःप्रभृतीनां महर्षयःप्रथमसर्गजाऋषयस्तेषां चर्या आचारः । शोकोदुःखं ततोभयं शोकभयम् ॥ ३२ ॥

(३) **कुल्लूकः** । एषांपूर्वोक्तानुष्ठानानामन्यतमेनानुष्ठानेन शरीरंत्यक्त्वाऽपगतदुःखभयोब्रह्मलोकस्तत्र पूजांलभ-ते मोक्षमाप्नोतीत्यर्थः । केवलकर्मणोवानप्रस्थस्यकथंमोक्षइतिचेन्न । विविधाश्चोपनिषदीरात्मसंशुद्धयेश्रुतीरित्यनेनास्या-प्यात्मज्ञानसंभवात् ॥ ३२ ॥

(४) **राघवानन्दः** । आसामुक्तानां । दीक्षाणांमध्येऽन्यतमया तनुंत्यक्त्वेत्यन्वयः । महीयते पूजामाप्नोति ॥ ३२ ॥

(५) **नन्दनः** । आसां महर्षिचर्याणामुक्तानांनियमानाम् ॥ ३२ ॥

(६) **रामचन्द्रः** । आसां महर्षिचर्याणां पञ्चतपःप्रभृतीनांमध्ये अन्यतमया वा चर्यया तनुंत्यक्त्वा विप्रोब्रह्मलोके महीयते । कीदृशोविप्रः वीतशोकभयोऽपारलौकिकभयः ॥ ३२ ॥

वनेषु च विहृत्यैवं तृतीयं भागमायुषः ॥ चतुर्थमायुषोभागं त्यक्त्वा सङ्गान्परिव्रजेत् ॥ ३३ ॥

(१) **मेधातिथिः** । इतःप्रभृतिचतुर्थाश्रममतिः । तृतीयंभागमिति । कञ्चित्कालंस्थित्वेत्यर्थः । यावता कालेन तपः-स्रुतंभवतिविषयाभिलाषश्च सर्वोनिवृत्तः । नहि मुख्यतृतीयआयुषोभागएवानेन शक्योज्ञातुम् । नहि वर्षशतापेक्षाऽऽश्रमा-णां यतोवलीपलितापत्योत्पत्तीस्तृतीयाश्रमप्रतिपत्तौ कालउक्तः नच सर्वस्य पञ्चाशद्वर्षदेशीयस्यतदुत्पद्यतेउक्तंचान्यत्र त-पसि ऋद्धे परिव्रजेदिति । ननुच यथान्येषामाश्रमाणांकालोविवृतोग्रहणान्तंब्रह्मचर्यं वलीपलिताद्यवधि गार्हस्थ्यं । नैवमिह कश्चित्परिच्छेदे हेतुरस्ति यदि यथाश्रुतंतृतीयोभागःसमाश्रियेत । यच्च तपसिऋद्धइति तत्रापि कालापेक्षायुक्तैव न ज्ञा-यते कियता तपसाऋद्धिर्भवति अतःकालपरिच्छेदो न वचनार्हः । उक्तमत्र न शतवर्षापेक्षया तृतीयायुर्भागनिश्चयस्सं-भवति । उक्तश्च कालः कायपाके प्रव्रज्या प्रतिपत्तव्या । यावता तपसा यावतिचवयसि पुनर्मदवृद्धिर्नाशंक्यते तदा परि-व्रजेत् । विहृत्यासित्वायथोक्तंविधिमनुष्ठायेतियावत् । संगत्यागश्च ममतापरिग्रहः एकारामता ॥ ३३ ॥

(२) **सर्वज्ञनारायणः** । अथ यतिधर्मानाह वनेष्विति । विहृत्य क्षपयित्वेत्युक्ताप्रयोगेण पक्वकषायस्य वानप्रस्थचर्यया । कष्टावपाकेसत्येव यत्याश्रमेऽधिकारइतिदर्शितं अत्रापि तृतीयंभागमिति तावता कालेन तावद्वैरा-ग्योत्पत्तिसंभवे अन्यथातु यावज्जीवमपि वनएव वसेत् संगान् परिग्रहान् । परिव्रजेत् गृहादिपरित्यज्य व्रजेत् ॥ ३३ ॥

(३) **कुल्लूकः** । यस्यतुमरणाभावस्तस्याह वनेष्वित्यादि । अनियतपरिमाणत्वादायुषस्तृतीयभागस्य दुर्विज्ञा-नात्तृतीयमायुषोभागमितिरागक्षयावधि वानप्रस्थकालोपलक्षणार्थम् । अतएवशङ्खलिखितौ वनवासादूर्ध्वंशान्तस्य परिगतवयसः पारिव्राज्यमित्याचख्यतुः । एवंवनेषु विहृत्यैवंविधिवद्बहुश्चरतपोऽनुष्ठानप्रकारेण वानप्रस्थाश्रमंविषय-रागोपशमनाय कंचित्कालमनुष्ठाय चतुर्थमायुषोभागमितिशेषायुःकाले सर्वथा विषयसङ्गांस्त्यक्त्वा परिव्राजकाश्रममनु-तिष्ठेत् ॥ ३३ ॥

(४) **राघवानन्दः** । अविरक्तस्यापि । चतुर्थेवयस्यवश्यंसंन्यासइत्याह वनेष्विति । चतुर्थमायुषोभागंप्राप्य परि-व्रजेदित्यन्वयः वनी भूत्वा प्रव्रजेदिति श्रुतेः । विरक्तस्यतुक्रमोत्क्रमाभ्यांसंन्यासःअव्रतीवाव्रतीवा उच्छिन्नाग्निरनुच्छि

न्साग्निकोवायदहरेव विरजेत्तदहरेव प्रव्रजेत्। यदि चेतरथा ब्रह्मचर्यादेव प्रव्रजेद्वनाद्वा गृहाद्वेत्यादि श्रुतिशतैश्च संन्यासस्य विहितत्वात्। अयंत्वविरक्तोत्रब्रह्मलोकेप्सुःसंन्यासाद्ब्रह्मणःस्थानमितिश्रवणात्॥ ३३॥

(५) नन्दनः। अथसन्यासाश्रमंप्रस्तौति वनेष्विति। विहृत्य चरित्वा॥ ३३॥

(६) रामचन्द्रः। अथ संन्यासाश्रमप्रकरणं वनेष्विति। एवमायुषस्तृतीयभागंनीत्वा चतुर्थमायुषोभागंज्ञात्वा संगान्सर्वांस्त्यक्त्वा परिव्रजेत् संन्यसेत्॥ ३३॥

आश्रमादाश्रमं गत्वाहुतहोमोजितेन्द्रियः॥ भिक्षाबलिपरिश्रान्तः प्रव्रजन् प्रेत्य वर्धते॥ ३४॥

(१) मेधातिथिः। समुच्चयपक्षमुपोद्बलयति। आश्रमादाश्रममिति। गृहस्थाश्रमाद्वानप्रस्थाश्रमंगत्वा हुतहोमउभयोरप्याश्रमयोर्यदा जितेन्द्रियस्तदा परिव्रजेत् प्रेत्य वर्धते मृत्वा विभूत्यतिशयेन। भिक्षाबलिदानेन परिश्रान्तः। द्विराश्रमधर्मानुवादोयम्॥ ३४॥

(२) सर्वज्ञनारायणः। अत्र वनवासानन्तरंपारिव्राज्याभिधानेन गृहस्थस्य पारिव्राज्याधिकारोनास्तीतिप्रसक्तितांशङ्कांनिराचष्टे आश्रमादिति। नकेवलंब्रह्मचर्ये वर्तमानस्य तादृशवैराग्यादि तस्य ऋणत्रयापाकरणसंभवात्तमाश्रमं त्यक्त्वा गृहस्थाश्रमगमनमवश्यं नतु गृहस्थस्य ऋणापाकरणमाश्रमान्तरसाध्यमतोस्य विरागस्यानन्तरमेव पारिव्राज्यंसंभवतीति तात्पर्यम्। हुतहोमइति यज्ञैकदेशाभिधानेन यज्ञस्वाध्यायापत्यैर्ऋणत्रयापाकरणमुक्तम्। जितेन्द्रियोभ्युत्थापितवैराग्यः तेन जितेन्द्रियोहमिति यदि गृहस्थोमन्यते तदा तदैव परिव्रजेदन्यथा वनवासेन जितेन्द्रियतांप्राप्येत्यर्थः। भिक्षादानबलिदानाभ्यांकर्मकलापोलक्ष्यते तेन श्रान्तस्तत्करणासमर्थः। एतेन तच्छक्तौ तत्कुर्वतैवात्मा जिज्ञास्यइतिदर्शितम्। प्रेत्य वर्धते लिङ्गदेहावच्छिन्नस्तदवच्छेदन्यासोद्भवंविभुत्वंलभते॥ ३४॥

(३) कुल्लूकः। पूर्वपूर्वाश्रमादुत्तरोत्तराश्रमंगत्वा ब्रह्मचर्याद्गृहाश्रमंततोवानप्रस्थाश्रममनुष्ठायेत्यर्थः। यथाशक्तिगताश्रमहुतहोमोजितेन्द्रियोभिक्षाबलिदानचिरसेवयाश्रान्तःपरिव्रज्याश्रममनुतिष्ठन्परलोके मोक्षलाभाद्ब्रह्मभूतऊर्ध्वतिशयंप्राप्नोति॥ ३४॥

(४) राघवानन्दः। आश्रमाद्वानप्रस्थान्तादाश्रमंतेष्वन्तर्गतंब्रह्मचर्याद्यन्यतमंतेषु हुतोहोमोबहुधा श्रौतलौकिकाग्निषु येन सः अतःपरंन होष्यतीत्यर्थः। भिक्षाबलिपरिश्रान्तः ब्रह्मचर्ये भिक्षया गार्हस्थ्य वानप्रस्थयोर्बलिदानेन परिश्रान्तःभिक्षारूपबलेरभिमतत्वाद्वाश्रान्तः व्युत्थायाथ भिक्षाचर्यमस्तीति श्रुतेः। तथाविधएव प्रेत्य सुखी स्यात्॥ ३४॥

(५) नन्दनः। इयमेवाश्रमप्राप्तिरुचिता नान्येत्याह आश्रमादिति। हुतहोमःकृतसमिदाधानाग्निहोत्रहोमः। भिक्षाबलिपरिश्रान्तः भिक्षाहरणवैश्वदेवबलिहरणाभ्यांक्षीणदेहः। आभ्यांविशेषणाभ्यामाश्रमत्रयविहितंकर्म लक्ष्यते। आश्रमादाश्रमंगत्वा ब्रह्मचर्याश्रमाद्गार्हस्थ्यं ततोवानप्रस्थाश्रमंगत्वा॥ ३४॥

(६) रामचन्द्रः। भिक्षाबलिपरिश्रान्तः भिक्षाबलिभ्यांरहितः संचयरहितः हुतहोमः। शिखासूत्रपरित्यागे कृतहोमः एतादृशःप्रव्रजेत् प्रेत्य परलोके वर्धते मोक्षंप्राप्नोति। लिङ्गदेहाद्यनवच्छिन्नविभुत्वंमोक्षत्वंएवंयत्तत्प्राप्नोतीत्यर्थः॥ ३४॥

ऋणानि त्रीण्यपाकृत्य मनोमोक्षे निवेशयेत्॥ अनपाकृत्य मोक्षं तु सेवमानोव्रजत्यधः॥ ३५॥

(१) मेधातिथिः। अपाकरणम् ऋणसंशुद्धिः। मनोमोक्षेनिवेशयेत्। मोक्षशब्देन प्रव्रज्याश्रमोलक्ष्यते। तस्य प्राधान्येन मोक्षैकफलतोच्यते। न तथाऽन्येष्वाश्रमेषु अतोमोक्षः परिव्राज्यकेन॥ ३५॥

(२) सर्वज्ञनारायणः । उक्तमर्थंस्फुटयति ऋणानीति । मोक्षे मोक्षसाधने चतुर्थाश्रमे । अधोव्रजति प्रत्यवायोत्पत्त्या पूर्वाश्रमेऽप्यनधिकृतोभवति । नचैवं ब्रह्मचर्यादेवप्रव्रजेद्वनाद्गृहाद्वेतिश्रुत्याविरोधः तस्याः पूर्वजन्माभ्यासवशादित्यात्यन्तिकवैराग्यपुरुषविषयत्वात् । तदाहदेवलः यस्यैतानि सुगुप्तानि जिह्वोपस्थोदरंगिरः । सन्न्यसेदकृतोद्वाहोब्राह्मणोब्रह्मचर्यवानिति ॥ यस्तुनात्यन्तंवीतरागःसमन्दाधिकारः । तद्विषयाणिच अनपाकृतर्णत्रयसंन्यासनिषेधकमन्वादिवचनानि यथा भारते ॥ कषायंपाचयित्वा च श्रेणिस्थानेषु च त्रिषु । प्रव्रजेच्च परंस्थानंयत्र गत्वा न शोचतीति ॥ यस्तूत्कटरागस्तद्विषयमैकाश्रम्यंत्वाचार्याः प्रत्यक्षविधानाद्गार्हस्थ्यस्येति ऐकाश्रम्यं गार्हस्थ्यरूपैकाश्रमित्वमेव रागिणांयुक्तमित्याचार्याः । रागिणामधिकृत्य गार्हस्थ्यस्य प्रत्यक्षतः श्रुतौ विधानादित्यर्थः ॥ ३५ ॥

(३) कुल्लूकः । आश्रमसमुच्चयपक्षमाश्रितोब्राह्मणउत्तरश्लोकाभिधेयानि त्रीण्यृणानि संशोध्य मोक्षे मोक्षान्तरङ्गे परिव्रज्याश्रमे मनोनियोजयेत् । तान्यृणानि त्वसंशोध्य मोक्षंचतुर्थाश्रममनुतिष्ठन्नरकंव्रजति ॥ ३५ ॥

(४) राघवानन्दः । किंच वेदाध्ययनपुत्रोत्पादनयज्ञानुष्ठानैर्ऋषिपितृदेवानामृणान्यपाकृत्यशोधयित्वा मोक्षे संन्यासे मोक्षसाधनत्वान्मनोनिवेशयेदित्यविरक्तंशिक्षयन्नाह ऋणानीति । तदकरणे दोषमाह अनपाकृत्येति । अधोनरकंव्रजेदेव ॥ ३५ ॥

(५) नन्दनः । ब्रह्मचर्यगार्हस्थ्येकृत्वा वानप्रस्थमकृत्वापिसंन्यासःकर्तव्योनान्यथेत्याह ऋणानीति । ऋणानि त्रीण्यध्ययनप्रजननयजनाख्यानि । मोक्षे मोक्षसाधने संन्यासाश्रमे । अनपाकृत्य ऋणानीत्येव ॥ ३५ ॥

(६) रामचन्द्रः । त्रीणि ऋणानि अपाकृत्य परित्यज्य मनो मोक्षे निवेशयेत् । देवर्षिपित्रर्णानि यज्ञेन दैवमृणं वेदाध्ययनेनार्षं पुत्रोत्पादनेन पैतृकं एतदृणत्रयमपाकृत्य परित्यज्य परिव्रजेत् । तुपुनः त्रीणि ऋणानि अनपाकृत्य अनपाकृत्य मोक्षं सेवमानः अधोव्रजति पतति ॥ ३५ ॥

अधीत्य विधिवद्वेदान्पुत्रांश्चोत्पाद्यधर्मतः ॥ इष्ट्वा च शक्तितोयज्ञैर्मनोमोक्षे निवेशयेत् ॥ ३६ ॥

(१) मेधातिथिः । कानि पुनस्तानिऋणान्यतआह त्रिभिर्ऋणैर्ऋणवान् जायते । यज्ञेन देवेभ्यः प्रजया पितृभ्यः स्वाध्यायेनर्षिभ्यइति श्रुत्यनुवादिनी स्मृतिरियम् । ननुच गृही भूत्वा प्रव्रजेदथवेतरथा ब्रह्मचर्यादेव प्रव्रजेदिति जाबालश्रुतिरुच्यते । उत्पत्तिमात्रमाश्रित्योक्तमुदाहरति तत्रेदं विरुध्यते अनुत्पाद्य तथा प्रजामिति । यद्येषाश्रुतिरस्ति किंतर्हि इदमुच्यते । प्रत्यक्षविधानाद्गार्हस्थ्यस्येति प्रव्रजेदिति । ननु प्रव्रजितेनेमानि कर्माणि कर्तव्यान्यनयावेतिकर्तव्यतयेत्येतन्नास्ति गृहस्थस्य त्वग्निहोत्रादीनि साङ्गकलापान्याम्नातानीत्येतदभिप्रायमेतत् । येत्वेतांश्रुतिमदृष्ट्वास्मार्ताएव नैष्ठिकादयस्तेच गृहस्थाश्रमेण प्रत्यक्षश्रुतिविधानेन बाध्यन्ते । येच क्लीबाद्यनधिकृतविषयतया स्मृतिवाक्यानामर्थवत्तां वर्णयन्ति तेषामभिप्रायंन विद्मः । यदि तावदाज्यावेक्षणविष्णुक्रमाद्यशक्तौ श्रौतेषु नाधिक्रियते यतस्तथा विधायुक्तंकर्म संपादयितुंसमर्थस्तंप्रत्यधिकारश्रुतीनामर्थवत्त्वे जाते न तदसमर्थमपि कुर्वीतेति । यद्येवं स्मार्तेष्वपिनैष्ठिकस्य गुर्वर्थमुदकुम्भाद्याहरणंभैक्षपरिचरणम् पारिव्राजोपि न द्वितीयामपि रात्रिंग्रामे वसेदिति कुतःपङ्ग्वन्धयोः स्मार्तकर्मक्रमाधिकारः उपनयनंचैषामस्ति लिङ्गं ततएषांविवाहार्थंनंयर्थिताद्दारैरिति । यद्यप्युपनयनमादित्यदर्शनमग्निप्रदक्षिणंपरीत्येतिच विहितं यतोनानुपनीतस्यविवाहसंभवोव्रात्यत्वात । अतोयावच्छक्यं गुरुशुश्रूषणंविगुणमपि ब्रह्मचर्यमेवमस्ति । क्लीबस्य तु प्रकृतेऽनुपनेयतैव सच पतितश्च न क्वचिदधिकृतः तस्मादनधिकृतविषयंपारिव्राज्यंनैष्ठिकतावेति

मनः परितोषमादधाति। सत्यं उदितहोमेन तावद्भविष्यति समुच्चयपक्षमाश्रित्य। अनपाकृत्येति निन्दावचनं न पुनः प्रतिषेधएव अथवा यदाऽकृतदारपरिग्रहस्य प्रव्रज्यायामधिकारइत्येवमेतन्नेयम् ॥ ३६ ॥

(२) सर्वज्ञनारायणः। ऋणत्रयापाकरणस्वरूपमाह अधीत्येति। धर्मतोयथोक्तकन्याविवाहादृतुगमनादित्यर्थः ॥ ३६ ॥

(३) कुल्लूकः। तान्येवऋणानि दर्शयति अधीत्येति। जायमानोब्राह्मणस्त्रिभिर्ऋणैर्ऋणवाजायते यज्ञेन देवेभ्यः प्रजयापितृभ्यःस्वाध्यायेनऋषिभ्यइतिश्रूयते। अतोयथाशास्त्रंवेदानधीत्य पर्वगमनवर्जनादिधर्मेण च पुत्रानुत्पाद्य यथासामर्थ्यंज्योतिष्टोमादियज्ञांश्चानुष्ठाय मोक्षान्तरङ्गे चतुर्थाश्रमे मनोनियोजयेत् ॥ ३६ ॥

(४) राघवानन्दः। ऋणानीत्युक्तंविवृणोति अधित्येति। धर्मतोधर्मेण ब्राह्मादिना विवाहेन यदिनिवेशयेदेतान्कुर्वन्नेवेत्यर्थः ॥ ३६ ॥

(५) नन्दनः। उक्तमेवार्थमादरार्थंश्लोकद्वयेन प्रपञ्चयति ॥ ३६ ॥

(६) रामचन्द्रः। मोक्षे मोक्षसाधने संन्यासे मनो निवेशयेत् ॥ ३६ ॥

अनधीत्य द्विजोवेदाननुत्पाद्य तथा सुतान् ॥ अनिष्ट्वा चैव यज्ञैश्च मोक्षमिच्छन् व्रजत्यधः ॥३७॥

(१) मेधातिथिः। यज्ञैराहिताग्निर्नित्यैःपशुसोमैः ॥ ३७ ॥

(२) सर्वज्ञनारायणः। अस्यव्यतिरेकमाह अनधीत्येति। मोक्षगार्हस्थ्ये तिष्ठन्नेव स्वाध्याये यज्ञादिषुचर्णत्रयापाकरणबुद्ध्याऽप्रवर्तमानोब्रह्मचर्यान्मोक्षइत्यभिमानादृतुगमनादिगार्हस्थ्यनियतधर्मेभ्योनिवृत्तः प्राणायामादियोगाङ्गान्यनुतिष्ठन्नित्यर्थः ॥ ३७ ॥

(३) कुल्लूक। वेदाध्ययनमकृत्वा पुत्रमनुत्पाद्य यज्ञांश्चाननुष्ठाय मोक्षमिच्छन्नरकव्रजंति ॥ ३७ ॥

(४) राघवानन्दः। विपक्षेत्वाह अनधीत्येति। उक्ताननुष्ठायाधोव्रजतीत्यन्वयः। अर्थवादात्मकश्लोकद्वयम् ॥ ३७ ॥

(६) रामचन्द्रः। द्विजः न क्षत्रियादिः तथाच श्रुतिः ब्राह्मणःप्रव्रजतीति ॥ ३७ ॥

प्राजापत्यांनिरूप्येष्टिंसर्ववेदसदक्षिणाम् ॥ आत्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजेद्गृहात् ॥ ३८ ॥

(१) मेधातिथिः। प्राजापत्याऽध्वर्युवेदे विहिता तस्यांच सर्वस्वदानंविहितं तांकृत्वाऽऽत्मन्यग्नयः समारोप्यंते। समारोपणेपि विधिस्ततएवावगन्तव्यः। सार्ववेदसंदक्षिणाऽस्यास्तीत्यन्यपदार्थः। वेदोधनंतत्सर्वंदेयम्। इदमर्थे विहितः स्वार्थिकोवा प्रज्ञादेराकृतिगणत्वात्। अन्येतु पुरुषमेधंप्राजापत्यामिष्टिमाहुः। तत्र ब्रह्मणेब्राह्मणमालभतइति प्रथमःपशुर्ब्रह्मा च प्रजापतिः मुख्येन व्यपदेशप्रवृत्तेः प्राजापत्यः पुरुषमेधः सर्वस्वदानमग्निसमारोपणं प्रव्रज्याच तत्रैव विहिता। एवंहि तत्र श्रुतिः अथात्मन्यग्नीन्समारोप्य तत्रारोपणेनादित्योपस्थानादपेक्षमाणैररण्यमभिप्रेयात्तदैव देवमनुष्येभ्यस्थिरोभवतीति। येत्वात्मन्यग्नीन्समारोप्य प्रव्रज्ययाप्यपदिष्टा अथाह एतएवआत्मनोयज्ञाइत्यतस्तन्मरणात्तस्यै दत्ता आत्मन्येव समारोपिताभवन्ति। अतोभार्यामरणपक्षे प्रव्रज्या नावश्या पुनर्दारक्रियेति तत्र किंतु तस्याःपूर्वमरणेभार्यायै दत्वाग्नीनन्त्यकर्मणीतिपठितमिति वक्तव्यमितिपौरुषेयोह्ययंग्रन्थोनवेदोयेनोक्तमुपालम्भमहीतिपरिहारःस्यात् ॥ ३८ ॥

(२) सर्वज्ञनारायणः। प्राजापत्यां प्रजापतिदैवतपुरोडाशहविष्कां वेदइति धननाम सर्ववेदोदक्षिणा यत्र सातथा

सर्वस्वदक्षिणामित्यर्थः । सर्ववेदएव सर्ववेदसं । पुत्राणांच संविभजनीयत्वादवशिष्टः स्वीयोभागःसर्वोदेयइतियाज्ञम् । समारोप्य यातेअग्नेर्याज्ञयातनूरितिमन्त्रेण । ब्राह्मणइतिपदस्यानन्यपरत्वात्क्षत्रियादीनांन पारिव्राज्यमस्तीतिगम्यते अतएव श्रुतिरपि ब्राह्मणाःप्रव्रजन्तीति । प्रकर्षेण व्रजेदपुनरावर्तनाय ॥ ३८ ॥

(३) कुल्लूकः । यजुर्वेदीयोपाख्यानग्रन्थोक्तांसर्वस्वदक्षिणांप्रजापतिदेवताकामिष्टिंकृत्वा तदुक्तविधिनैवात्मन्यग्नीन्समारोप्य गृहादित्यभिधानाद्वानप्रस्थाश्रममनुष्ठायैव चतुर्थाश्रममनुतिष्ठेत् । एतेन मनुना चातुराश्रमस्य समुच्चयोऽपि दर्शितः श्रुतिसिद्धाश्चएकद्वित्रिचतुराश्रमाणांसमुच्चयाविकल्पिताः । तथाजाबालश्रुतिः ब्रह्मचर्यंसमाप्य गृहीभवेद्गृही भूत्वा वनीभवेद्वनीभूत्वा प्रव्रजेत् इतरथा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वा वनाद्वा ॥ ३८ ॥

(४) राघवानन्दः । प्रव्रजनप्रकारमाह प्रेति । प्राजापत्यां प्रजापतिदेवताकां यजुर्वेदविहितां सर्ववेदसदक्षिणां सर्वस्वदक्षिणां । अग्नीन् श्रौतान् स्मार्तंच । गृहादित्याश्रमत्रयोपलक्षकं कुटीचकादिसंन्यासिचतुष्टयसाधारणं तत्रैकदण्डिनां तु शिखायज्ञोपवीतवेदानांत्यागः सशिखंवपनंकृत्वा बहिःसूत्रंत्यजेदिति श्रुतेः । सत्यानृतेसुखदुःखेवेदानिमंचलोकममुंचलोकंपरित्यज्यात्मानमन्विच्छेदित्यापस्तम्बोक्तेः । ॐभूः सावित्रींप्रविशामीत्युपक्रम्य ॐभूर्भुवःस्वरोंयज्ञोपवीतंजुहोमीत्यादिशौनकेनधृतत्वात् ॥ ३८ ॥

(५) नन्दनः । प्रव्रज्याप्रकारमाह प्राजेति । सर्ववेदसंसर्वस्वम् ॥ ३८ ॥

(६) रामचन्द्रः । प्राजापत्यां प्रजापतिदैवतसंज्ञां इष्टिं निरूप्य कृत्वा सर्ववेदसदक्षिणां सर्वः वेदोधनं दक्षिणा यस्याःसा सर्ववेदसमेव सार्ववेदसं सर्वस्वदक्षिणां आत्मनि अग्नीन् वैतानाग्नीन् श्रुत्युक्तविधानेन समारोप्य ब्राह्मणएव गृहात्प्रव्रजेत् न तु क्षत्रियादिः ॥ ३८ ॥

योऽदत्त्वा सर्वभूतेभ्यः प्रव्रजत्यभयं गृहात् ॥ तस्य तेजोमयालोकाभवन्ति ब्रह्मवादिनः ॥ ३९ ॥

(१) मेधातिथिः । गार्हस्थ्यनिन्दया चतुर्थाश्रमप्रशंसा । यज्ञेहि पशवोहन्यन्ते । प्ररोहधर्मकाश्चेतनाइतिदर्शने तृणौषधीनां छेदइत्येत तद्भूतभयं । तद्गृहात्प्रव्रजितस्य समारोपिताग्नेर्नास्तीत्युक्तम् अभयंसर्वभूतेभ्योदत्वेति अनेनाशुष्काणांतृणपलाशानामनुपादानमाह । तेजोमयानित्यप्रकाशाउदयास्तमयौ यत्रादित्यस्य न विभाव्येते यथोक्तमतऊर्ध्वमादित्योनैवोदेति नवास्तमेतीत्युपनिषत्स्वित्येवमाहुर्वचांसि ॥ ३९ ॥

(२) सर्वज्ञनारायणः । गृहादिति ग्रामस्थितादरण्यस्थिताद्वेत्यर्थः । तेजोमयालोकाब्रह्मलोकगतास्तदेकदेशाः । संन्यासाद्ब्रह्मणः स्थानमितिपुराणेष्वभिधानात् । ब्रह्मवादिनोब्रह्मविषयश्रौतज्ञानवतः । तेनात्मन्यसाक्षात्कृतेऽपि संन्यासमात्राद्ब्रह्मलोकप्राप्तिरुक्ता ॥ ३९ ॥

(३) कुल्लूकः । यःसर्वेभ्योभूतारब्धेभ्यः स्थावरजङ्गमेभ्योऽभयंदत्त्वा गृहाश्रमात्प्रव्रजति तस्य ब्रह्मप्रतिपादकोपनिषन्निष्ठस्य सूर्याद्यालोकरहिताहिरण्यगर्भादेर्लोकास्तत्तेजसैव प्रकाशाभवन्ति तानाप्नोतीत्यर्थः ॥ ३९ ॥

(४) राघवानन्दः । तादृशे संन्यासे योदत्वेति फलवादः । अभयं दत्वेत्यन्वयः । तस्याहंब्रह्मास्मीति ब्रह्मवादिनस्तेजोमयाःस्वप्रकाशालोकाः ॥ ३९ ॥

(५) नन्दनः । गृहनिष्क्रमणात्पूर्वमेव सर्वभूतेभ्योऽभयंदातव्यमित्याह योदत्वेति ॥ ३९ ॥

यस्मादण्वपि भूतानां द्विजान्नोत्पद्यते भयम् ॥ तस्य देहाद्विमुक्तस्य भयं नास्ति कुतश्चन ॥४०॥

(१) मेधातिथिः। एषएवार्थः। पुनरुक्तः। देहाद्विमुक्तस्य वार्तमानिकंशरीरंतस्य पततीत्यर्थः ॥ ४० ॥

(२) सर्वज्ञनारायणः। एतत्प्रपञ्चयति यस्मादिति । देहाद्विमुक्तस्य मृतस्य भयंनास्ति नित्याभयत्वाद्ब्रह्मलोकस्य ॥ ४० ॥

(३) कुल्लूकः। यस्माद्विजात्सूक्ष्ममपिभयंभूतानां न भवति तस्य देहाद्विमुक्तस्यवर्तमानदेहनाशे कस्मादपिभयंनभवति ॥ ४० ॥

(४) राघवानन्दः। येषांनोयमात्मायंलोकइति श्रुतेः किमुवाच्यंपरत्र तेजोमयालोकाइतीहैवजीवन्मुक्तःसइत्याह यस्मादिति। द्विजात् कृतसंन्यासात्। कुतश्चन यमाद्राजादेश्च नबिभेतिकुतश्चनेति श्रुतेः ॥ ४० ॥

(५) नन्दनः। अभयप्रदानस्य फलान्तरमाह यस्मादिति । न केवलमिदमभयदानंसंन्यासिनएव धर्मः किंतु सर्वस्यापीतिसूचितम् ॥ ४० ॥

(६) रामचन्द्रः। यस्माद्विजाद्भूतानामण्वपिभयं न उत्पद्यते नजायते तस्य द्विजस्य देहाद्विमुक्तस्य कुतश्चन कस्मिन्नपि लोके भयंनास्ति ॥ ४० ॥

आगारादभिनिष्क्रान्तः पवित्रोपचितोमुनिः ॥ समुपोढेषु कामेषु निरपेक्षः परिव्रजेत् ॥ ४१ ॥

(१) मेधातिथिः। पवित्रैर्मन्त्रजपैर्दर्भकमण्डलुकृष्णाजिनैरुपचितोयुक्तः। अथवापावनैः कृच्छ्रैः। मुनिरकिंचिद्वादी। समुपोढेषु केनचित्कामेषु स्पृहणीयेषु मृष्टभोजनादिषु यदृच्छातोगीतादिशब्देषु सन्निहितेषु पुत्रादिषुवासमुपस्थितेषु निरपेक्षोभवेत। नैतांश्चिरंस्निग्धेन चक्षुषा पश्येन्नाकर्णयेन्नतैस्सहासीत ॥ ४१ ॥

(२) सर्वज्ञनारायणः। पवित्रोपचितः पवित्रैस्तपोजपादिभिर्गार्हस्थ्यकालकृतैः उपचितः उत्तमतांनीतः। मुनिर्मनननिरतः। समुपोढेषु सम्यग्भुक्तेषु तथाच भोगाभ्मन्दीभूतायांतृष्णायां निरपेक्षस्तादृगिच्छाशून्यः। यत्तु न जातु कामः कामानामुपभोगेन शाम्यतीति ॥ तस्योपभोगमात्रेण न शाम्यतीतितात्पर्यम्। धर्मपरिव्राजकधर्ममाचरेन्नित्यमितिक्वचित्पाठः ॥ ४१ ॥

(३) कुल्लूकः। गृहान्निर्गतःपवित्रैर्दण्डकमण्डल्वादियुक्तोमुनिर्मौनी समुपोढेषु कामेषु केनचित्सम्यक्समीपंप्रापितेषु स्वाद्वन्नादिषु विगतस्पृहः परिव्रजेत्। मेधातिथिस्तु पवित्रैर्मन्त्रजपैरथवा पावनैः कृच्छ्रैर्युक्तइतिव्याचष्टे ॥ ४१ ॥

(४) राघवानन्दः। पवित्रेण ज्ञानेनोपनिषदावोपचितोयुक्तः। समुपोढेषु सम्यक्तया प्रीतिजनकत्वेनोपस्थितेषु दारान्नादिषु निरपेक्षः विगतस्पृहः ॥ ४१ ॥

(५) नन्दनः। गृहनिष्क्रमणकाले कर्तव्यमाह आगेति । समुपोढेषु गृहसंचितेषु भोगेषु। पवित्रंजलपवित्रम्। एतच्छिक्यकमण्डल्वादेरप्युपलक्षणम् उपचितग्रहणात्। मुनिर्मित्रादीननामन्त्रयन्नगारादपि निष्क्रान्तः परिव्रजेत्सर्वंवर्जयित्वागच्छेत् ॥ ४१ ॥

(६) रामचन्द्रः। अगाराद्गृहादभिनिष्क्रान्तः पवित्रोजपयज्ञादिभिः संपूर्णः समुपोढेषु कामेषु सम्यगनुभूतेषु कामेषु मुनिः परिव्रजेत् ॥ ४१ ॥

एकएव चरेन्नित्यंसिद्ध्यर्थमसहायवान् ॥ सिद्धिमेकस्य संपश्यन्न जहाति न हीयते ॥ ४२ ॥

(१) **मेधातिथिः** । यतआह । एकारामताऽनेन विधीयते । एकएवेत्यनेन पूर्ववस्तु परित्यागउच्यते । असहायवानिति भृत्यादेः पूर्वस्यापि परिग्रहोन कर्तव्यः संविद्रागद्वेषविनिर्मुक्तस्य सर्वसमता एवंभवति । अन्यथा एषएव भृत्यादिरन्तिकस्थः तत्रैवं बुद्धिः स्यादयंमदीयोनायमिति । एषएव संगोऽवधिहेतुर्यथात्वेषसंपत्स्यते यदा न जहाति न कचित्पुत्रादिस्तेनत्यक्तोभवति । अतोन हीयते न वियुज्यते पुत्रादिभिस्तद्वियोगदुःखंनासादयति । इतरथा संगात्पुनस्त्यागे महद्दुःखं न तस्य कश्चिन्म्रियते सनकस्यचिदिति ॥ ४२ ॥

(२) **सर्वज्ञनारायणः** । सिद्ध्यर्थं शमनार्थं । एकएवेत्यसहकारिणांमेलकेनिषिद्धे असहायवानिति तद्धर्मानुगुण तयाऽपि द्वितीयस्य ग्रहणंनिवर्तयितुमुक्तम् । एकस्यैव सिद्धिरिति सिद्धिमेकस्यासहायस्य पश्यन् हेयस्य द्वितीयस्याग्रहणान्नकिंचित्त्यजति नच त्यज्यतेऽनेनेनियोगदुःखाभावउक्तः ॥ ४२ ॥

(३) **कुल्लूकः** । एकस्य सर्वसङ्गविरहिणोमोक्षावाप्तिर्भवतीतिजानन्नेकएव सर्वदापि मोक्षार्थंचरेत् । एकएवेत्यनेन पूर्वपरिचितपुत्रादित्यागउच्यते । असहायवान् इत्युत्तरस्यापि । एकाकीयदि चरति सकिंचिन्नत्यजति न कस्यापि त्यागेन दुःखमनुभवति नापि केनापि त्यज्यते न कोऽप्यनेन त्यागदुःखमनुभाव्यते । ततश्चसर्वत्रनिर्ममत्वः-सुखेन मुक्तिमाप्नोति ॥ ४२ ॥

(४) **राघवानन्दः** । किंचैकइति । सिद्धिमिति सिद्ध्यर्थंमोक्षार्थंत्यक्तव्याभावादेकाकिनस्त्यागान्न दुःखंत्यक्तुरप्यभावाच्च न हीयते ॥ ४२ ॥

(५) **नन्दनः** । अभिनिष्क्रान्तस्य धर्मानाह एकएवेति । एकस्यसिद्धिंपश्यन्नसहायस्य सिद्धिर्भवतीति जानन्सिद्धिनजहाति ॥ ४२ ॥

(६) **रामचन्द्रः** । एकएव एकाकीसन्मोक्षार्थं संचरेत ॥ ४२ ॥

अनग्निरनिकेतः स्याद्ग्राममन्नार्थमाश्रयेत् ॥ उपेक्षकोऽशंकुसुकोमुनिर्भावसमाहितः ॥ ४३ ॥

(१) **मेधातिथिः** । श्रौतानामग्नीनांपूर्वमभावउक्तोऽनेन गार्हस्थ्यस्योच्यते । अथवा पाकप्रतिषेधोयमग्न्यर्थस्य चेन्धनस्य शीतादिनिवृत्तिप्रयोजनस्य । निकेतोगृहं । ग्राममेकांरात्रिमन्नार्थमाश्रयेत् । कृतप्रयोजनोरण्ये शेषंकालं । एषा चैकरात्रिर्ग्रामे गौतमेनोक्ता तत्र यदि समयाग्रामंतदान्नार्थएवप्रवेशः । अथदूरतस्तदैकांरात्रिंवसेत् । द्वितीयामरण्ये संभावयेत् । उपेक्षकः अचेतनेष्वपि भावेषु कमण्डल्वादिषु न तन्निजायत्तंकुर्यात् । अथवा शरीरस्य व्याधिप्रतिकारंन कुर्यात् । अन्येत्वशङ्कुसुकइतिपठन्ति अस्थिरः शङ्कुसुकः तन्निषेधेनचित्तवृत्तिधैर्यमुपदिशति । मुनिःसंयतवाग्निन्द्रियः । भावेन चित्तेन समाहितः मनसा विकल्पान्वर्जयेत् । भावेनैव समाहितोन वाङ्मात्रेण ॥ ४३ ॥

(२) **सर्वज्ञनारायणः** । अनग्निः पाकसाधनाद्यर्थमप्यपरिग्रहीता निकेतोगृहं तत्परिग्रहशून्योऽनिकेतः उपेक्षकः ग्रामस्यापि भोगसाधनस्याऽभोक्ता असंचयिकः प्राणयात्रार्थमपिधनसंग्रहमकुर्वन् । कचिदशङ्कुशुकइतिपाठस्तत्रात्मतत्वापवर्गसाधनेषु स्थिरमतिरित्यर्थः । भावसमाहितोमनसा सदा समाधिपरः ॥ ४३ ॥

---

(४३) संकुसुको=संचयिको (क, ख, ग, ट, ठ, ड, ण, त, ल, य
=संकसुको (च, थ)

(३) कुल्लूकः। अनग्निर्लौकिकाग्निसंयोगरहितःशास्त्रीयाग्निसमारोप्येतिपूर्वमुक्तत्वात् । अनिकेतोगृहशून्य.उपेक्षकःशरीरस्यव्याध्याद्युत्पादेतत्प्रतीकाररहितः । अशंकुसुकःस्थिरमतिः असंचयिकइत्यन्येपठन्ति मुनिर्ब्रह्ममननान्मौनस्य पूर्वोक्तत्वात् भावेन ब्रह्मणि समाहितः तदेकतानमनाअरण्ये च दिवारात्रौ वसन्भिक्षार्थमेव ग्रामंप्रविशेत् ॥ ४३ ॥

(४) राघवानन्दः। किंच अनग्निरिति । अनिकेतः निकेतआमन्त्रणं तद्रहितःसन्ग्राममाविशेत् । उपेक्षकः शरीरस्य व्याध्याद्युत्पत्तौ प्रतीकाररहितः । क्वचिदसंकुसुकइतपाठस्तदात्वसंशयः । भावसमाहितः भावेनब्रह्मणि समाहितः ॥ ४३ ॥

(५) नन्दनः। अनग्निस्त्यक्तपचनाग्निः । भावसमन्वितोविधेयान्तःकरणः ॥ ४३ ॥

(६) रामचन्द्रः। उपेक्षकः प्राप्ते भोगसाधन उपेक्षाशीलः । असंचयिकः प्राणयात्रार्थं अगृहीतधनः ॥ ४३ ॥

कपालं वृक्षमूलानि कुचेलमसहायता ॥ समता चैव सर्वस्मिन्नेतन्मुक्तस्य लक्षणम् ॥ ४४ ॥

(१) मेधातिथिः। भिक्षाभोजनपात्रंकपालम् । निकेतोवृक्षमूलानि । कुचेलं स्थूलजीर्णवस्त्रखण्डम् । समता शत्रौ मित्रे उभयरूपरहिते स्वात्मनि च । मुक्तस्य लक्षणं अविलम्ब्याप्यतो मोक्षस्योच्यते न पुनरियतेव मुक्तोभवति ॥ ४४ ॥

(२) सर्वज्ञनारायणः। कपालं स्थाल्यादिखण्डोभिक्षार्थम् । वृक्षमूलं निवासार्थम् । कुचेलं जीर्णकर्पटचर्मादि परिधानार्थम् । असहायताएकाकिता । समता मैत्रीप्रवृत्तिः शत्रावपि मुक्तस्य संगान्निर्गतस्य लक्षणं चिन्हम् । एतेन त्रिदण्डेन यतिश्चेति लक्षणानीति स्मृत्यन्तरोक्तं लक्षणमनावश्यकमितिदर्शितम् मन्दाधिकारसंन्यासिपरत्वात्तस्येति ॥ ४४ ॥

(३) कुल्लूकः। कपालमित्यादिमृन्मयकर्परादिभिक्षापात्रंवासार्थंवृक्षमूलानि स्थूलजीर्णवस्त्रंकौपीनकन्थासर्वत्र ब्रह्मबुद्ध्या शत्रुमित्राभावः । एतन्मुक्तिसाधनत्वान्मुक्तस्यलिङ्गम् ॥ ४४ ॥

(४) राघवानन्दः। भावसमाहितंलक्षयति कपालमिति । कपालं भिक्षापात्रं । वृक्षमूलानीत्यनेन सर्वदानैकवृक्षाश्रयः । समता निर्वैरता । मुक्तस्यात्मनिष्ठस्यजीवन्मुक्तस्य वा ॥ ४४ ॥

(५) नन्दनः। कपालंभिक्षार्थमलाबुपात्रम् । वृक्षमूलानि वृक्षमूलनिवासइतियावत् । कुचेलंजीर्णमलिनवस्त्रधारित्वम् । मुक्तस्य संन्यासिनः ॥ ४४ ॥

(६) रामचन्द्रः। कपालस्थाल्यादिखण्डसमता मैत्रीवृत्तिः मुक्तस्यैतल्लक्षणं अतिवैराग्यमित्यर्थः ॥ ४४ ॥

नाभिनन्देत मरणं नाभिनन्देत जीवितम्॥ कालमेव प्रतीक्षेत निर्देशं भृतकोयथा ॥ ४५ ॥

[ग्रीष्म्यान्हैमन्तिकान्मासानष्टौभिक्षुर्विचक्रमेत् ॥ दयार्थं सर्वभूतानां वर्षास्वेकत्र संवसेत् ॥ १ ॥

नासूर्यं हिव्रजेन्मार्गे नादृष्टां भूमिमाक्रमेत् । परिभूताभिरद्भिस्तु कार्यं कुर्वीत नित्यशः ॥ २ ॥

सत्यां वाचमहिंस्रां च वदेदनपकारिणीम् । कल्कापेतामपरुषामनृशंसामपैशुनाम् ॥ ३ ॥] +

+ (ख, च, ञ, ट, ठ, ड, ण, ब,) । (र) चिन्हित पुस्तके प्रथमौ द्वौ स्तः (त) चिन्हिते प्रथम एव । (ड) चिन्हितपुस्तकेद्वितीयश्लोकस्यपूर्वार्धे (नादृष्टाम्) इत्यत्र (नाज्ञाताम् (इति पाठो दृश्यते ।

(१) **मेधातिथिः** । अनेनाक्लेशिताभिहिता न मरणंकामयेत । नाप्यतिशयलाभार्थीजीवितं कालमेव प्रतीक्षेत यदा भविष्यति तत्तदैवास्त्विति चिन्तयेत् । यथा भृतकोनिर्वेशंभृतिंगृहीत्वा कालंपरिपालयति । आहरेत्तस्य मया कर्त्तव्यमिति नान्तरा विच्छेदे मूल्यलाभः । एवंसंसारक्षयाच्छरीरपाते मोक्षोभवत्येतेन विधिना न स्वेच्छावृत्तेन ॥ ४५ ॥

(२) **सर्वज्ञनारायणः** । अभिनन्देताशंसेत् । कालं स्वतःसिद्धंजीवनकालंप्रतीक्षेतानुपालयेत् । निर्देशमाज्ञां । निर्वेशमितिपाठे निर्वेशं भृतिं भृतिशोधनावाधिमितियावत् ॥ ४५ ॥

(३) **कुल्लूकः** । मरणंजीवनंच द्वयमपि न कामयेत्किंतु स्वकर्माधीनंमरणकालमेव प्रतीक्षेत । निर्दिश्यतइति निर्देशोभृतिस्तत्परिशोधनकालमिवभृतकः ॥ ४५ ॥

(४) **राघवानन्दः** । जीवन्मुक्तश्चेत्कृतंदेहस्थित्या तत्राह नेति । भृतकः भृतिमुपजीव्यकर्मकर्ता सयथाकालक्षयेउपरतव्यापारःस्यादेवंकालंमारब्धम् ॥ ४५ ॥

[**राघवानन्दः** । ग्रीष्मेति । तेषुमासेषुक्षुद्रजंतूनांनविशेषतःसंचरणं इतरेषुतेषांबाहुल्यमिति भावः ॥ १ ॥]

(५) **नन्दनः** । निर्देशं भृतिम् । भृतकसादृश्यात्क्रियमाणकर्मफलनैरपेक्ष्यमुक्तम् ॥ ४५ ॥

(६) **रामचन्द्रः** । निर्देशोभृतिः ॥ ४५ ॥

[**रामचन्द्रः** । ग्रैष्मानिति । वर्षासु चतुर्मासेषु एकत्र एकस्मिन्ग्रामे संवसेत् ॥ १ ॥]

[**रामचन्द्रः** । असूर्यं सूर्यादर्शनंमार्गं न गच्छेत् रात्रौ न गच्छेदित्यर्थः ॥ २ ॥]

[**रामचन्द्रः** । सत्यामिति । कस्यापि अपकारिणींवाचंन वदेत् । कल्कान्वितां सपापांन वदेत् । कल्कोऽस्त्रीशमलैनसोः इत्यमरः । च पुनः परुषांवाचंन वदेत् । चकारःसमुच्चयार्थः च पुनः हिंस्रांवाचंन वदेत् । च पुनः नृशंसाभिधांन वदेत् । तथा पैशुन्यांवाचंन वदेत् । असत्यांवाचंन वदेत् ॥ ३ ॥]

दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत् ॥ सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत् ॥ ४६ ॥

(१) **मेधातिथिः** । चक्षुषा मार्गंनिरूप्य यस्मिन्प्रदेशे प्राणिनःपीडांन गच्छन्ति तत्र पादंनिदध्यात् । सत्यांवाचंवदेदितिसिद्धे पूतग्रहणंसत्यशब्दस्योपलक्षणतांदर्शयति । तेनापविद्धंभवति । मनसा पूतोमनःपूतः सदा स्यात्परद्रव्याभिध्यानादि न कुर्यात् ॥ ४६ ॥

(२) **सर्वज्ञनारायणः** । दृष्टिपूतं दृष्ट्या पवित्रत्वेन पदंनिधानस्थानंयदाज्ञातंभवतितदेत्यर्थः क्रियाविशेषणंचैतत् । वस्त्रपूतं वस्त्रेणोत्पूयापनीतजन्तुजातम् । सत्यपूतां सत्यार्थत्वेन शुद्धां । मनःपूतं मनसा समीचीनत्वेन ज्ञातम् ॥ ४६ ॥

(३) **कुल्लूकः** । केशास्थ्यादिपरिहारार्थंदृष्टिशोधितभूमौ पादौ क्षिपेत् । जलेषु क्षुद्रजन्त्वादिवारणार्थंवस्त्रशोधितंजलंपिबेत् । सत्यपवित्रांवाचंवदेत् । ततश्च मौनेन सह सत्यस्य विकल्पः प्रतिषिद्धसंकल्पशून्यमनसा सर्वदा पवित्रात्मा स्यात् ॥ ४६ ॥

(४) **राघवानन्दः** । किंच । दृष्टीति । भूतानामनुकम्पार्थं दृष्टिपूतमित्यादिचतुष्टयम् । अग्राह्यादपि यद्गृह्यते तदन्यात्मानिरिक्तंनास्तीतिमनःपूतता । परद्रव्यानभिलाषिता वा प्रतिषिद्धसंकल्पशून्यता वा योगान्निरुद्धतात्रा ॥ ४६ ॥

अतिवादांस्तितिक्षेत नावमन्येत कं चन ॥ न चेमं देहमाश्रित्य वैरं कुर्वीत केनचित् ॥ ४७ ॥

(१) **मेधातिथिः** । शास्त्रमतिक्रम्य यः कश्चिद्वदति सोऽतिवादः अप्रियाक्रोशः । तितिक्षेत क्षमेत नच मनसा

कुध्येदित्यतोवक्ष्यत्याकुष्टः कुशलंवदेदिति । अनेन मनसः क्षोभोविनिवार्यते न कुशलशब्दाभिधानंविधीयते । तदाहि मिथ्यावादी स्यादन्यद्धृदयेऽन्यत्तु वाचा वदन्नावमन्येतेति । अवज्ञानंन कस्यचित्कुर्यात् गुर्वादिपूजनंनातिक्रामेत् । नचेमंदेहं यदि कश्चित्प्रहरेच्छरीरे तेनसह वैरंकुर्यात् । किमनेन मे शरीरेण नष्टेनानष्टेन वा तेजोमयंमे शरीरंभवत्विति ध्यायेत् ॥ ४७ ॥

(२) **सर्वज्ञनारायणः**। अतिवादानतिक्रमवादाननिष्टभाषणानि तितिक्षेत क्षमेत । इमंदेहमाश्रित्य एतद्देहसंवर्धनोत्साहेनात्मानंत्वाश्रित्य दुःखसाधनैरधर्माद्यैः योगविघ्नकारिभिश्चराक्षसाद्यैर्वैरंनविरोधीत्यनेनदर्शितम् ॥ ४७ ॥

(३) **कुल्लूकः**। अतिक्रमवादान्परोक्तान्सहेत न कंचित्परिभवेत् । नेमंदेहमस्थिरंव्याध्यायतनमाश्रित्य तदर्थंकेनचित्सह वैरंकुर्यात् ॥ ४७ ॥

(४) **राघवानन्दः**। किंचातिवादानन्येनोक्तान्सहेतेत्याह अतिवादानिति । देहनिमित्तंतद्रक्षार्थम् ॥ ४७ ॥

(५) **नन्दनः**। इमंदेहं विनश्वरमितियावत् ॥ ४७ ॥

(६) **रामचन्द्रः**। अतिवादं अनिष्टभाषणं तितिक्षेत सहेत ॥ ४७ ॥

क्रुध्यंतं न प्रतिक्रुध्येदाक्रुष्टः कुशलं वदेत् ॥ सप्तद्वारावकीर्णां च न वाचमनृतां वदेत् ॥४८॥

(१) **मेधातिथिः**। सप्तद्वाराणि चधर्मार्थौ धर्मकामावर्थकामौकामार्थौकामधर्मौअर्थधर्मौत्रिवर्गइति अत्राऽवकीर्णांविक्षिप्तामेतद्विषयांन वाचंवदेदनृतां भेदाश्रयत्वादेतेषांभेदस्य सर्वस्यासत्यत्वावनृतामित्युक्तम् । किंतर्हि मोक्षाश्रयामेव वदेत् । अथवा सप्त शीर्षण्याः प्राणास्ते वाचोद्वाराणि अथवा षडिन्द्रियाणि बुद्धिः सप्तमी एतैर्गृहीतेष्वर्थेषुवाक्प्रवर्तते सप्तविभक्तयइत्यन्ये ॥ ४८ ॥

(२) **सर्वज्ञनारायणः**। सप्तसु द्वारेषु करणेषु चक्षुस्त्वक्श्रोत्रघ्राणरसनामनोहंकारेषु अवकीर्णां विक्षिप्तां वाचं तद्विषयेषु विक्षिप्तत्वात् । एतेनचक्षुरादिगृहीतेषु विषयेषु वाचमुच्चारयन्नानृतांवदेदित्यर्थः । बुद्धेस्त्वध्यवसायव्यापारायाहंकाराद्भेद विवक्षयासतेत्युक्तम् ॥ ४८ ॥

(३) **कुल्लूकः**। संजातक्रोधाय कस्मैचित्प्रतिक्रोधं न कुर्यात् । निन्दितश्चान्येन वाचंभद्रांवदेत् नतुनिन्देत् । सप्तद्वारावकीर्णामितिचक्षुरादीनिपञ्चबाहिर्बुद्धीन्द्रियाणिमनोबुद्धिरित्यन्तःकरणद्वयम् । वेदान्तदर्शनएतैर्गृहीतेषुतेषुवाचाम्प्रवृत्तेरेतानि सप्तद्वाराणीत्युच्यन्ते । एतैरवकीर्णांनिक्षिप्तांतद्गृहीतार्थविषयांवाचं न वदेत् किंतुब्रह्ममात्रविषयांवदेत् । ननु मनसैव ब्रह्मोपास्यते । ब्रह्मविषयवागुच्चारणमपिमनोव्यापारः तत्कथंसप्तद्वारावकीर्णत्वविशेषेऽपिब्रह्मविषयांवदेदित्यन्यांविषयांन वदेदितिलभ्यते । उच्यते । अतएवानृतामितिविशेषयतिस्म । अनृतमसत्यंविनाशीतियावत्तद्विषया वागप्यनृतोच्यते । तेनविनाशिकार्यविषयांवाचंनोच्चारयेत् । अविनाशिब्रह्मविषयांतु प्रणवोपनिषदादिरूपांवदेत् । गोविन्दराजस्तु धर्मोऽर्थःकामोधर्मार्थावर्थकामौधर्मार्थकामाइत्येतानि सप्तवाग्विषयतया वाक्प्रवृत्तेर्द्वाराणि तेष्ववकीर्णांविक्षिप्तांसर्वस्यभेदस्यासत्वात्तद्विषयामसत्यरूपांवाचंन वदेत् । अन्ये तु सप्तभुवनान्येव वाग्विषयत्वात्सप्तद्वाराणि तेषांभेदाद्विनाशित्वाच्चासत्यतया तद्विषयांवाचमसत्यांन वदेत्केवलंब्रह्मविषयांवदेत् ॥ ४८ ॥

---

(४८) सप्तद्वारा=अष्टद्वारा० (नं०)

(४) **राघवानन्दः** । आकुष्टःपरेण तमाक्रोष्टारं । समभिश्चक्षुःश्रोत्रत्वग्जिह्वाघ्राणमनोबुद्धिभिरिन्द्रियैरवकीर्णांत- त्तद्विषयविषयिणींअतएवानृतामनृतविषयत्वात्तैर्गृहीतेर्थे वाक्प्रवर्तते यन्मनसा ध्यायति तद्वाचा वदतीति श्रुतेः । ऋतंच सूनृता वाणी तद्भिन्नारुक्षा अतउक्तं सर्वेन्द्रियक्षोभकारिणींतांवाचंन वदेदिति । सत्यस्य सत्यमित्यादिसत्यंब्रह्म तद्विषयि- णींवाचंकुर्यादिति मौनंकुर्यादिति तात्पर्यार्थः ओमित्येवंध्यायत्यथात्मानमन्यावाचोविमुञ्चथेत्यादिश्रुतेः ॥ ४८ ॥

(५) **नन्दनः** । बोध्यव्यवसायः प्रथमं आहंकारिकोभिमानोद्वितीयं मानससंकल्पस्तृतीयं पञ्चेन्द्रियनिवृत्तिरूपमा- लोचनपञ्चकंपञ्चइत्यष्टौवाचोद्वाराणिनिर्गमनमार्गावाचोनिमित्तानीतियावत् । अष्टद्वारावकीर्णावाक्सत्याध्यवसायसहि- तत्वात् । अहंकारादिसप्तद्वारावकीर्णावाक्सत्याध्यवसायरहितत्वात् । तांनवदेत् स्वयमनध्यवसितमर्थं परस्मै न वदेदि- त्यर्थः । धर्मोर्थःकामोधर्मार्थौधर्मकामावर्थकामौधर्मार्थकामाश्चेतिये केचित्सप्तद्वाराण्याहुस्तेषांपक्षेऽयमर्थः । मोक्षाश्रि- तामेव वाचंवदेन्नत्रिवर्गाश्रितामिति । अपरे सप्तद्वाराणि सप्तविभक्तयइति व्याचक्षते । चक्षुषी नासिके श्रोत्रे आस्यंचे- त्यन्ये ॥ ४८ ॥

(६) **रामचन्द्रः** । आकुष्टः कुशलंशुभंवदेत सप्तद्वारावकीर्णां चक्षुस्त्वक्श्रोत्रघ्राणरसनामनोहंकारेषु विवक्षितां तद्विषयाधीनां वाचमनृतांन वदेत् ॥ ४८ ॥

अध्यात्मरतिरासीनोनिरपेक्षोनिरामिषः ॥ आत्मनैव सहायेन सुखार्थी विचरेदिह ॥ ४९ ॥

(१) **मेधातिथिः** ।आत्मतत्वप्रतिबोधापादनपरमेकाग्रत्वमध्यात्मं तद्रतिस्तदर्थचिन्तापरआसीत। निरपेक्षइत्युक्ता- नुवादोविषयान्येभ्योधर्मेभ्योनुष्ठानार्थः । निरामिषोनिःस्पृहः । मांसमामिषम् । तेनस्पृहांलक्षयित्वा प्रतिषेधस्तत्रातिशयवती प्राणिनांस्पृहा । अन्यत्प्रागुक्तमेव ॥ ४९ ॥

(२) **सर्वज्ञनारायणः** । अध्यामरतिरात्मविषये दृढरतिः । सुखार्थी नित्यसुखार्थी ॥ ४९ ॥

(३) **कुल्लूकः** । आत्मानंब्रह्माधिकृत्य रतिर्यस्य सोऽध्यात्मरतिः सर्वदा ब्रह्मध्यानपरः आसीनइति स्वस्तिका- दियोगासननिष्ठः निरपेक्षोदण्डकमण्डल्वादिष्वपि विशेषापेक्षाशून्यः निरामिषः आमिषविषयाः तदभिलाषरहितः आत्मना- देहेनैव सहायेन मोक्षसुखार्थीह संसारे विचरेत् ॥ ४९ ॥

(४) **राघवानन्दः** । अतएवाध्यात्मरतिः आत्मानमधिकृत्यप्रवर्ततेऽध्यात्मंतस्य ध्यानंतद्वाचकशब्दोवा । आत्मा वा रे द्रष्टव्यःश्रोतव्योमन्तव्योनिदिध्यासितव्यइति तत्रैव रतिःश्रद्धायस्यसतथा। निरामिषः आमिषंविषयःमनोमत्स्याकर्ष- कत्वात्तत्र हेतुः आत्मनैवदेहेन परमात्मना वा शरीरसुखार्थी मोक्षसुखान्वेषी वा ॥ शारीरंकेवलंकर्म कुर्वन्नाप्नोति किल्बि- षमित्युक्तेः ॥ ४९ ॥

(५) **नन्दनः** । ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि विषयात्मनोऽहंकारोबुद्धिरव्यक्तंजीवः परमात्मा चेतिषड्विंशतिरध्या- त्मम् । एकएवचरेद्धर्ममित्यत्रासहायत्वस्य प्रतिपादितत्वादासीनोऽध्यात्मरतिस्स्यात् विचरंश्च परमात्मपरःस्यादि- त्यर्थः ॥ ४९ ॥

(६) **रामचन्द्रः** । निरामिषो निष्प्रतिग्रहः ॥ ४९ ॥

न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया ॥ नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित् ॥ ५० ॥

(१) **मेधातिथिः** । उत्पातादिर्दिव्यान्तरिक्षभौमाउपरागग्रहोदयकेतूदयदिग्दाहावनिचलनादयस्तत्फलंन कथ- येद्भिक्षालिप्सया । निमित्तंगृहादौ स्थित्यादि । नक्षत्रविद्यायकृत्तिकाकर्मण्यायात्रानक्षत्रमित्यादि । अङ्गविद्या ह-

स्तलेख्यादिलक्षणम् । अनुशासनंराज्ञस्तत्प्रकृतीनां एवंयुक्तंवर्तितुं एतेन सन्धिरनेन विग्रहइदंत्वया किमिति कृत-मिदंकिन्न करोषीतिवादोऽभिमानहेतुकः शास्त्रार्थविप्रतिपत्तौ साधनदूषणाद्युपन्यासः ॥ ५० ॥

(२) **सर्वज्ञनारायणः** । उत्पातउल्कापातादिरशुभसूचकः निमित्तमुल्कादिचेष्टितंशुभसूचकं ताभ्यां तत्सूचनीयोपदेशेन । नक्षत्रविद्या नक्षत्रगुणदोषज्ञानं अङ्गविद्या व्याकरणादिवेदाङ्गज्ञानं । अनुशासनं वेदाध्यापनादि वादोविगृह्यकथांकृत्वाजयः ॥ ५० ॥

(३) **कुल्लूकः** । भूकम्पाद्युत्पातचक्षुःस्पन्दादिनिमित्तफलकथनेनाद्याश्विनीहस्तरेखादेरीदृशंफलमितिनक्षत्राङ्गविद्यया ईदृशोनीतिमार्गइत्थं वर्तितव्यं अनुशासनेन शास्त्रार्थकथनेन च कदाचिन्न भिक्षांलब्धुमिच्छेत् ॥ ५० ॥

(४) **राघवानन्दः** । एतादृशस्य भिक्षोरुपाधिनिराह नेति । नचोत्पातनिमित्ताभ्यां उत्पातोभूमिकम्पःचक्षुरादिस्फन्दोनिमित्तं तयोःफलकथनेन नक्षत्रविद्या ग्रहसंचारादिनिर्णयः अङ्गविद्या व्याकरणादि ताभ्यांच । नानुशासनवादाभ्यामनुशासनमुपदेशः वादश्छलवितर्कात्मकःताभ्यामपि न भिक्षां लिप्सेत कर्हिचिदत्यन्तकष्टदशायामपीत्यन्वयः ॥ ५० ॥

(५) **नन्दनः** । उत्पातोऽद्भुतम् । निमित्तं वायसस्वरादिः । नक्षत्रविद्या ज्योतिःशास्त्रम् । अङ्गविद्या सामुद्रिकम् । चिकित्सावा । अनुशासनंशिष्यपरिग्रहः । वादस्तर्कः ॥ ५० ॥

(६) **रामचन्द्रः** । नक्षत्राङ्गविद्यया ज्योतिर्विद्यया षडङ्गया अनुशासनवादाभ्यां वेदाध्ययनकथाप्रवर्तिताभ्यां न भिक्षांलिप्सेत ॥ ५० ॥

न तापसैर्ब्राह्मणैर्वा वयोभिरपि वा श्वभिः ॥ आकीर्णं भिक्षुकैर्वान्यैरागारमुपसंव्रजेत् ॥ ५१ ॥

(१) **मेधातिथिः** । आकीर्णं यत्र बहवोन्नलाभाय संघटितास्तंप्रदेशंभिक्षार्थंवर्जयेत् ॥ ५१ ॥

(२) **सर्वज्ञनारायणः** । तापसैः व्रतस्थैः अन्नार्थं वने चरद्भिः ग्रामेवाप्रविष्टैःब्राह्मणैः तदन्यैर्भिक्षार्थिभिर्विप्रैः । तथान्यैः षण्ढ्यादिभिः पूर्वोक्तव्यतिरिक्तैर्भिक्षुकैः आकीर्णं व्याप्तं नोपसंव्रजेत् तेषामेवोपरोधभिया ॥ ५१ ॥

(३) **कुल्लूकः** । वानप्रस्थैरन्यैर्वा ब्राह्मणैर्भक्षणशीलैः पक्षिभिः कुक्कुरैर्वा व्याप्तंगृहंभिक्षार्थंन प्रविशेत् ॥ ५१ ॥

(४) **राघवानन्दः** । सोपि श्वादिभिराकीर्णगृहंभिक्षार्थं न गच्छेदित्याह नेति । तापसैर्विरक्तवानप्रस्थैः ब्राह्मणैः ब्रह्मनिष्ठैः भिक्षुकैः संन्यासिभिः अन्यैः चातुर्वर्ण्यसाधारणदुःखितैः आक्रान्तागारंभिक्षार्थंसंन्यासी नोपसंव्रजेदित्यन्वयः ॥ ५१ ॥

(६) **रामचन्द्रः** । तापसादिभिराकीर्णं आगारंगृहं नोपसंव्रजेत् । वयोभिः पक्षिभिः शुकादिभिः अन्यैर्वाध्वांक्षादिभिः आकीर्णाम् ॥ ५१ ॥

क्लृप्तकेशनखश्मश्रुः पात्री दण्डी कुसुम्भवान् ॥ विचरेन्नियतोनित्यं सर्वभूतान्यपीडयन् ॥ ५२ ॥

(१) **मेधातिथिः** । पात्राणि वक्ष्यति । दण्डाश्रयः त्रिदण्डी हि सः । कुसुम्भः कमण्डलुः न महारजनम् । उत्तरश्लोकार्धस्यार्थः प्राग्विहितएव ॥ ५२ ॥

(२) **सर्वज्ञनारायणः** । नीचकेशादिर्मासिमासि क्षौरादिकर्मणा । क्वचित् क्लृप्तकेशनखश्मश्रुरितिपाठस्तत्रक्लृप्तपदं

छिन्नमात्रपरम्। छेदनंच क्षुरेणैव केशानां स्मृत्यन्तरदर्शनात् । पात्री भिक्षापात्रवान्। दण्डी एकेनत्रिभिर्वा। कुसुम्भं कमण्डलुः। नित्यंविचरेन्नैकत्र तिष्ठेत् ॥ ५२ ॥

(३) कुल्लूकः । क्लृप्तकेशनखश्मश्रुर्भिक्षापात्रवान्दण्डीकुसुम्भःकमण्डलुस्तद्युक्तः सर्वप्राणिनोऽपीडयन्सर्वदा परिभ्रमेत् ॥ ५२ ॥

(४) राघवानन्दः । ऋतुसन्धिषु वापयेदिति श्रुतिमाश्रित्याह क्लृप्तेति । क्लृप्तानि छिन्नानि केशादीनि यस्य सः । कुसुम्भं कमण्डलुरुदकाधारः सच मृदादिविकारः मृत्पात्रंअलाबुपात्रंदारुपात्रंचेति श्रुतेः। भिक्षापात्रं त्रिदण्डिनामेव नैकदण्डिनाम् पाणिपात्रमुदरपात्रंवेतिश्रुतेः ॥ ५२ ॥

(५) नन्दनः। क्लृप्तंकृत्तंगुप्तमितियावत्। केशश्मश्रुग्रहणादन्यतोरोमवपनर्निषेधः। पात्रंभाजनंतद्वान्पात्री। कुसुम्भवान्कुसुम्भकरः ॥ ५२ ।

(६) रामचन्द्रः। कुसुम्भं कमण्डलुः तद्वान् ॥ ५२ ॥

अतैजसानि पात्राणि तस्य स्युर्निर्व्रणानि च ॥ तेषामद्भिः स्मृतं शौचं चमसानामिवाध्वरे ॥५३॥

(२) सर्वज्ञनारायणः । अतैजसानि सुवर्णाद्यघटितानि पात्राणि भिक्षायाजलस्यच निर्व्रणान्यछिद्राणि। अद्भिरम्मात्रेण चमसानामिव निर्लेपत्वे लेपसंभवेतु तदपनयोऽपि द्रव्यान्तरेण कार्यइतिग्राह्यम् ॥ ५३ ॥

(३) कुल्लूकः । सौवर्णादिवर्जितानि निश्छिद्राणि भिक्षोर्भिक्षापात्राणि भवेयुः । तथायमः ॥ सुवर्णरूप्यपात्रेषुताम्रकांस्यायसेषुच । गृह्णन्*भिक्षांनधर्मोस्ति गृहीत्वा नरकंव्रजेत् ॥ तेषांच यतिपात्राणांजलेनैव तु शुद्धिः यज्ञेचमसानामिव ॥ ५३ ॥

(४) राघवानन्दः। किंच अतैजसानीति। निर्व्रणानि निश्छिद्राणि। तैजसेतु ॥ सुवर्णरूप्यपात्रेषु ताम्रकांस्यायसेषु च। भिक्षांदत्वा न धर्मोस्ति गृहीत्वा नरकंव्रजेदिति यमवचनात्। तैजसपात्राःस्वीकृतिः। तत्र भक्षणे न दोषः। ग्रामंग्रामंभजेन्मुनिरितिस्मरणात्। अद्भिरिति। गोवालच्छेददाहानांस्नातकादिपात्रे ग्रामानान्निवृत्त्यर्थं चमसानांग्रहाणांच शुद्धिःप्रक्षालनेनचेत्युक्तेः ॥ ५३ ॥

(५) नन्दनः। अतैजसान्यलोहमयानि। शौचंभोजनकृते ॥ ५३ ॥

(६) रामचन्द्रः। तस्य यतेः अतैजसानि अधातुकानि तेषां पात्राणां अद्भिःशौचं प्रक्षालनं स्मृतम् ॥ ५३ ॥

अलाबुं दारुपात्रं च मृन्मयं वैदलं तथा ॥ एतानि यतिपात्राणि मनुः स्वायम्भुवोऽब्रवीत् ॥५४ ॥

(२) सर्वज्ञनारायणः। वैदलं वंशादिविदलकृतं। यतिपात्राणि भिक्षार्थंजलार्थंच ॥ ५४ ॥

(३) कुल्लूकः। तान्येवदर्शयति अलाबुमित्यादि। अलाबुदारुमृत्तिकावंशादिखण्डनिर्मितानि यतीनांभिक्षापात्राणि स्वायम्भुवोमनुरवदत्। वैदलंतरुत्वक्निर्मितमितिगोविन्दराजः ॥ ५४ ॥

(४) राघवानन्दः। अतैजसानीत्युक्तंविवृणोति अलाबुमिति। वैदलं वंशपर्वात्मकं विशिष्टपत्रनिर्मितंवा ॥ ५४ ॥

(५) नन्दनः। वैदलंवेणुदलनिर्मितम् ॥ ५४ ॥

(६) रामचन्द्रः। वैदलंवैणवम् ॥ ५४ ॥

---

* गृह्णन्=दत्त्वा (अ)

एककालंचरेद्भैक्षं न प्रसज्जेत विस्तरे ॥ भैक्षे प्रसक्तोहि यतिर्विषयेष्वपि सज्जति ॥ ५५ ॥

(१) मेधातिथिः । भैक्षकार्यस्य भोजनस्यैककालता विधीयते न पुनर्भैक्षचरणस्यैव । द्विर्भोजनप्रतिषेधोत्राऽभिसंहितस्तत्र सकृच्चरित्वा द्वितीयस्मिन्काले शेषयित्वा न भुञ्जीत तदर्थोभोजनप्रतिषेधः । अतएवाह न प्रसज्जेत विस्तरइति । द्वितीयभोजनार्थितया हि विस्तरः प्राप्नोति । एकारामस्य न भृत्यार्थेन भैक्षविस्तरइति हेतंत्रवन्सकृद्भोजनेपि सौहित्यंनिषेधति ॥ ५५ ॥

(२) सर्वज्ञनारायणः । विस्तरे विस्तारे भिक्षाबहुत्वे न प्रसज्येतैककालंचरन्नपि । प्रसक्तिनिषेधाद्दैवादधिमाप्तौ दोषाभावः । विषयेषु रूपादिषु आकाङ्क्षायाअवकाशलाभेन प्रसारात् ॥ ५५ ॥

(३) कुल्लूकः । एकवारंप्राणधारणार्थंभैक्षंचरेत् । तत्रापि प्रचुरभिक्षाप्रसङ्गं न कुर्यात् यतोबहुतरभिक्षाभक्षणप्रसक्तोयतिः प्रधानधातुवृद्ध्या रूपादिविषयेष्वपि प्रसज्जते ॥ ५५ ॥

(४) राघवानन्दः । भिक्षाकालस्य नियममाह एकेति । बहुभिक्षणे बहुवारभिक्षणेच दोषमाह भैक्षइति । विषयेषु स्त्रीभोगाद्यनर्थेषु ॥ ५५ ॥

(५) नन्दनः । विस्तरे भिक्षाबहुत्वे ॥ ५५ ॥

(६) रामचन्द्रः । विस्तरे भिक्षाविस्तरे न प्रसज्जेत न संसक्तोभवेत् ॥ ५५ ॥

विधूमे सन्नमुसले व्यङ्गारे भुक्तवज्जने ॥ वृत्ते शरावसंपाते भिक्षां नित्यं यतिश्चरेत् ॥ ५६ ॥

(१) मेधातिथिः । भुक्तवन्तोजनायस्मिन्काले सभुक्तवज्जनः । एवंविधूमादयोपि । शरावाणांसंपातउच्छिष्टानांभूमौत्यागः सयदाऽतीतोभवति । सर्वेणैतेन प्रथमे पाककालेभिक्षादानावसरोनिवृत्तोयदा भवति तदा भिक्षितव्यमित्याह विधूमइत्यादिना द्वितीयपाकप्रवृत्तिमाह । सन्नामुसलाऽवघट्टनान्निवृत्ताःस्थापिताः ॥ ५६ ॥

(२) सर्वज्ञनारायणः । विधूमइति न पाककालइत्यर्थः । सन्नमुसलइति न पाकार्थमन्ननिष्पादन काले । व्यङ्गारे न पाकनिष्पत्त्यनन्तरकालएव । भुक्तवज्जने न भुञ्जानेषु । वृत्ते शरावसंपाते भुक्तवत्स्वपि जनेषु न भिक्षुकेभ्योभिक्षायांदीयमानायांशरावसङ्घट्टशब्दे वर्तमानइत्यर्थः । एतेन तत्तदुत्तरकालप्रतीक्षणासंभवे तत्तदव्यवहितपूर्वकालभैक्ष्यचरणनियमउक्तः । मुख्यभिक्षाकालप्रतीक्षायांचापर्युषितालाभे पर्युषितमप्याददीतेतिगम्यते ॥ ५६ ॥

(३) कुल्लूकः । विगतपाकधूमेनिवृत्तावहननमुसलेनिर्वाणपाकाङ्गारे गृहस्थपर्यन्तभुक्तवज्जनेउत्सृष्टशरावेषु त्यक्तेषु सर्वदा यतिर्भिक्षांचरेत् । एतच्च दिनशेषमुहूर्तत्रयरूपसायान्होपलक्षणम् । तथाह याज्ञवल्क्यः । अप्रमत्तश्चरेद्भैक्ष्यं सायान्हेनाभिसंधितः ॥ ५६ ॥

(४) राघवानन्दः । एककालेपि प्रातरादिनिवर्तयन्नाह विधूमेत्यादि । गतपाकधूमे सन्नमुसले निवृत्तावघातमुसलेव्यङ्गारे पाकाङ्गारनिवृत्तौभुक्तवज्जने गृहस्थस्यापि भोजननिवृत्तौ वृत्तेशरावसंपाते परिवेषणनिवृत्तौ । एतेषांप्रत्येकसमुदाययोरननुगमात् षष्ठकालैकभोजनेतात्पर्यम् तदाह याज्ञवल्क्यः ॥ अप्रमत्तश्चरेद्भैक्ष्यंसायान्हेनाभिलक्षितइति । इदंसर्वंयाचितपरंतच्चमाधुकरंअसंक्लृप्तंतात्कालिकोपपन्नमिति त्रिविधं । असंक्लृप्तंकरपात्रमिति प्रसिद्धं । अयाचितंद्विविधंप्राक्प्रणीतमयाचितमिति । प्राक्प्रणीतंनिमन्त्रितं अत्र तु दातुरनुरोधात्कालानियमोऽयाचितेपितथा ॥ ५६ ॥

(५) नन्दनः । भक्षणे कालनियममाह विधूमइति । विधूमत्वादिविशेषणैरपराह्णकालोलक्ष्यते ॥ ५६ ॥

(६) **रामचन्द्रः** । शरावसंपातेवृत्ते निवृत्ते प्रक्षालितेत्यर्थः । एतादृशे कालेयतिर्भिक्षांचरेत् ॥ ५६ ॥

अलाभे न विषादी स्याल्लाभे चैव न हर्षयेत् ॥ प्राणयात्रिकमात्रः स्यान्मात्रासङ्गाद्विनिर्गतः॥५७॥

(१) **मेधातिथिः** । ईदृशे काले कुतश्चिन्न लभ्यते तदा विषादश्चित्तपरिखेदोन ग्रहीतव्यः । लाभालाभयोर्हर्षविषादौ न ग्राह्यौ प्राणयात्रिकी प्राणधारणार्था मात्रा परिमाणंभैक्षंयस्य । अनेनैतद्दर्शयति भैक्षासंभवे प्राणयात्रा मूलफलमूलोदकादिभिरप्यनन्यपरिगृहीतैः कर्तव्या मात्रा पात्रदण्डादि तत्र सङ्गः प्रयत्नेनोपार्जनम् । ततोविनिर्गतोनिवृत्तः अकाम इतियावत् ॥ ५७ ॥

(२) **सर्वज्ञनारायणः** । प्राणयात्रिकमात्रः प्राणस्थित्यर्थमात्रप्रवृत्तः । मात्रा परिच्छदःकम्बलादिः तत्र सङ्गाद्विनिर्गतोबहिर्भूतः ॥ ५७ ॥

(३) **कुल्लूकः** । भिक्षादेरलाभे न विषीदेत् लाभे च हर्षं न कुर्यात् । प्राणस्थितिमात्रोपचितान्नभोजनपरःस्यात् । दण्डकमण्डलुमात्रास्वपीदमशोभनंत्यजामीदंरुचिरंगृह्णामीत्यादिप्रसङ्गंन कुर्यात् ॥ ५७ ॥

(४) **राघवानन्दः** । तस्मिन्समयेऽपि लाभालाभयोरौदासीन्यमाह अलाभइति । लाभः प्राप्तिरपि । न हर्षयेन्न मोदयेत् । एनंयतिं । प्राणयात्रिकमात्रंस्यात् प्राणस्य यात्राव्यवहारसामर्थ्ययावन्मात्रेणतत्प्राणयात्रिकंतावन्मात्रंस्वीकृतंयेन सः । मात्रासंगाद्विवर्जितः मात्रातु दण्डकमण्डल्वादि तेष्वपि इदमशोभनं त्यजामि इदंशोभनंगृण्हामीत्यभिनिवेशरहितः द्वन्द्वातीतोवा ॥ ५७ ॥

(५) **नन्दनः** । उदरपूरणविधिः । मात्रा तत्र सङ्गोमात्रासङ्गः ॥ ५७ ॥

(६) **रामचन्द्रः** । अलाभे भिक्षालाभे न विषादीस्यात । प्राणयात्रिकएवस्यात । यावद्दत्तेन प्राणानांयात्रानिर्वाहःस्यात्तावदेव ग्राह्यंनाधिकमित्यर्थः । मात्रासंगात् मात्रा परिच्छदः दण्डकमण्डलुकम्बलादिः । शब्दस्पर्शरूपरसगन्धावा तस्मात् विनिर्गतःविरहितः भवेदित्यर्थः ॥ ५७ ॥

अभिपूजितलाभांस्तु जुगुप्सेतैव सर्वशः ॥ अभिपूजितलाभैश्च यतिर्मुक्तोऽपि बध्यते ॥ ५८ ॥

(१) **मेधातिथिः** । अभ्यर्च्ययंददाति सोऽभिपूजितलाभः तंजुगुप्सेतेति निन्देद्गर्हेत अतश्चनिन्दितंनसमाचरेत् सर्वशः सर्वकालंएकमप्यहरतादृशंभैक्षं न गृह्णीयात् । उत्तरेऽर्थवादः । नहिमुक्तस्यबन्धसंभवः ॥ ५८ ॥

(२) **सर्वज्ञनारायणः** । अभिपूजिताः ससंमानालाभाः । जुगुप्सेतेति त्यजेदित्यर्थः । बध्यते अभिपूजितदातरिप्रत्युपकाराभिसन्धिना ॥ ५८ ॥

(३) **कुल्लूकः** । पूजापूर्वकभिक्षालाभंसर्वकालंनिन्देन्नस्वीकुर्यादित्यर्थः यस्मात्पूजापूर्वकलाभस्वीकारे दातृगोचरस्नेहममत्वादिभिरासन्नमुक्तिरपि यतिर्जन्मबन्धाल्लभते ॥ ५८ ॥

(४) **राघवानन्दः** । पूजापूर्वकभैक्ष्यप्रसक्तिरतीवानर्थायेत्याह अभीति । अजुगुप्सिनेत्वाह । मुक्तोपि जीवन्मुक्तोपि बध्यते । गर्वासक्तिभ्यामिति शेषः ॥ ५८ ॥

(५) **नन्दनः** । मुक्तोऽसक्तः ॥ ५८ ॥

(६) **रामचन्द्रः** । अभि सर्वतः पूजितान् लाभान् जुगुप्सेत ॥ ५८ ॥

अल्पान्नाभ्यवहारेण रहःस्थानासनेन च ॥ ह्रियमाणानि विषयैरिन्द्रियाणि निवर्तयेत् ॥ ५९ ॥

(१) **मेधातिथिः** । रहोनिर्जनोदेशस्तत्र स्थानासने कर्तव्ये एकारामतायाः फलमिन्द्रियजयोऽनेन प्रदर्श्यते । अथवा निष्कुतूहलतानेनोच्यते । यत्र बहवोजनसंघाताःस्त्रीपुंसात्मकाविचित्राभरणादृश्यते न तत्र क्षणमपि तिष्ठेत् ॥५९॥

(२) **सर्वज्ञनारायणः** । रहएकान्ते यत्स्थानं तत्रासनेन ॥ ५९ ॥

(३) **कुल्लूकः** । आहारलाघवेन निर्जनदेशस्थानादिना च रूपादिविषयैराकृष्यमाणानीन्द्रियाणि निवर्तयेत् ॥५९॥

(४) **राघवानन्दः** । तत्रैव दृष्टार्थमाह अल्पान्नाभ्यवहारेणेति । तथाच गीता । विविक्तसेवी लघ्वाशी यतवाक्कायमानसइत्यादि ॥ विषयैर्ह्रियमाणानीइन्द्रियाण्याकृष्यमाणानि विषयेभ्योनिवर्तयेदित्यन्वयः ॥ ५९ ॥

(६) **रामचन्द्रः** । अल्पान्नानामभ्यवहारेण च रहःस्थानासनेन विषयैः शब्दादिभिः ह्रियमाणानीन्द्रियाणि निवर्तयेत् ॥ ५९ ॥

इन्द्रियाणांनिरोधेन रागद्वेषक्षयेण च ॥ अहिंसया च भूतानाममृतत्वाय कल्पते ॥ ६० ॥

(१) **मेधातिथिः**। निरोधः स्वविषयप्रवृत्तिप्रतिबन्धः । अमृतत्वाय कल्पते अमृतत्वाय समर्थोयोग्योभवतीत्यर्थः । ६० ॥

(२) **सर्वज्ञनारायणः** । इन्द्रियाणांनिरोधेन यःकृतोरागद्वेषक्षयस्तेन ॥ ६० ॥

(३) **कुल्लूकः** । यस्मात् इन्द्रियाणामित्यादि । इन्द्रियाणांनिग्रहणं रागद्वेषाभावेन च प्राणिहिंसाविरतेन च मोक्षयोग्योभवति ॥ ६० ॥

(४) **राघवानन्दः** । तत्कारणमन्येन समुच्चित्य तत्र फलमाह इन्द्रियेति । एतैस्त्रिभिरमृतत्वाय मोक्षाय कल्पते समर्थःस्यात् ॥ ६० ॥

(६) **रामचन्द्रः** । इन्द्रियाणांनिरोधोनिग्रहः ॥ ६० ॥

अवेक्षेत गतीर्नृणां कर्मदोषसमुद्भवाः ॥ निरये चैव पतनं यातनाश्च यमक्षये ॥ ६१ ॥

(१) **मेधातिथिः** । आत्मज्ञानमेतदपीतिदर्शयति । परमार्थभावनाप्रसंख्यानाप्रसंख्यानमिदमुच्यते दुःखात्मकसंसारस्वरूपनिरूपणम् । कथन्नामायं प्रव्रज्याभैक्षचर्यादिशरीरक्लेशांस्तु सुहृत्स्वजनेभ्योपुत्रदारधनविभवत्यागदुःखहेतुं परीगमय्य विरोधतःस्वच्छन्दतश्चाविगुणमनुष्ठास्यति । मनुष्याणांगतिर्दुःखबहुला कर्मदोषेभ्यः प्रतिषिद्धसेवनेभ्योहिंसास्तेयपारदार्यपारुष्यापैशुनानिष्टसंकल्पादयः समुद्भवन्ति इहैव जीवलोके दारिद्र्याधिपरिभवाद्वा विकल्पादयोदातव्याःफलोपभोगाः । अमुत्र निरये नरके पतनं मूत्रपुरीषाद्यमेध्यस्थाने कृमिकीटादिजन्म यमगृहे च यातनाः कुम्भीपाकाद्यः दमपरमवेक्ष्यम् ॥ ६१ ॥

(२) **सर्वज्ञनारायणः** । गतीर्व्याचष्टे निरयइति । निरये नरके यातनास्तीव्रदुःखानि । यमक्षये यमगृहे ॥ ६१ ॥

(३) **कुल्लूकः** । इदानींइन्द्रियनियमोपायविषयवैराग्याय संसारतत्त्वचिन्तनमुपदिशति अवेक्षेतेत्यादि । विहिताकरणनिन्दिताचरणरूपकर्मदोषजन्यांमनुष्याणांपश्वादिदेहप्राप्तिंनरकेषु पतनंयमलोके नरकस्थस्य निशितनिस्त्रिंशच्छेदनादिभवास्तीव्रवेदनाः श्रुतिपुराणादिषूक्ताश्चिन्तयेत् ॥ ६१ ॥

(४) **राघवानन्दः** । वैराग्यंविना नमोक्षइति वैराग्योपायमाह अवेति पञ्चभिः । अवेक्षेत शास्त्रादृष्टोपपत्तिभिः । कर्मदोषेति कर्म पुण्यापुण्यं दोषोरागादिः तदुद्भवागतीर्जन्मानि । निरये असिपत्रादिनरके यातना असह्यदुःखं यमक्षये यमपुर्याम् ॥ ६१ ॥

(५) **नन्दनः** यातनानरकपतनात्पूर्वमेवानुभवितव्यःपीडाविशेषः ॥ ६१ ॥

(६) **रामचन्द्रः** । वक्ष्यमाणगतागतीरवेक्षेत । यमक्षये यमलोके ॥ ६१ ॥

विप्रयोगं प्रियैश्चैव संयोगं च तथाऽप्रियैः ॥ जरया चाभिभवनं व्याधिभिश्चोपपीडनम् ॥ ६२॥

(१) **मेधातिथिः** । अवेक्षेतेति क्रियापदसंभवात् द्वितीया । प्रियाः पुत्रादयोबान्धवास्तैर्वियोगोप्राप्तकाले मृतेः । अप्रियैःशत्रुसंग्रहगमनादिभिःसंयोगः । जरया चतुर्थे वयस्य वस्था विशेषोजरा तयाभिभवनं शरीराकारनाशः । अशक्तिः इन्द्रियवैकल्यकासश्वासादि व्याधिबाहुल्यं सर्वेषामकाम्यता उपहास्यतेत्यादिज्वराभिभवः । व्याधिभिः प्रागपि जरसा उपपीडनं केषांचित् । अथ महती तृष्णा एवंस्थितस्यापि भवति एवंतर्हि ह्ययमप्रतीकारोनिच्छतोप्युत्पद्यते ॥ ६२ ॥

(३) **कुल्लूकः** । इष्टपुत्रादिवियोगमनिष्टहिंसकादियोगंजराभिभवनंव्याध्यादिभिश्चपीडनंकर्मदोषसमुद्भवमनुचिन्तयेत् ॥ ६२ ॥

(४) **राघवानन्दः** । किंचात्र विप्रयोगं वियोगं प्रियैः पुत्रादिभिरिहामुत्राऽप्रियैः । शात्रवादिभिः ॥ ६२ ॥

(५) **नन्दनः** । अवेक्षेतेत्यनुवर्तते ॥ ६२ ॥

(६) **रामचन्द्रः** । संसारस्वरूपमाह विप्रयोगमिति चतुर्भिः । जरयाचाभिभवनं जरया वलीपलिताद्यभिभवंरूपविपर्ययं अवेक्षेत पश्येत् । व्याधिभिः उपपीडनं अवेक्षेत । प्रियैःपुत्रादिभिः अप्रियैः चौरव्याघ्रादिभिः ॥ ६२ ॥

देहादुत्क्रमणं चास्मात्पुनर्गर्भे च संभवम् ॥ योनिकोटिसहस्रेषु सृतीश्चास्यान्तरात्मनः ॥ ६३ ॥

(१) **मेधातिथिः** । प्राणानामुत्क्रमणमन्तर्विच्छेदः दुःसहा च प्राणपीडा । गर्भे संभवः । तत्र नानाविधंदुःखं इन्द्रियाणामनुद्भेदक्रमादुभयतः कुक्षिस्थस्य मातृसंबंधिनाऽऽहारेण अतिशीतोष्णेन हीनातिमात्रेण चोक्ता पीडा । योनिकोटिसहस्रेषु सृतीः सरणानि प्रामास्तिर्यक्प्रेतकृमिकीटपतङ्गश्वाद्याः क्षेत्रज्ञस्य । ननुच विभुरन्तरात्मेष्यते नित्यश्च तस्य सकल जगद्व्यापिनः कुतउत्क्रमणं क्व च योनिसरणं संभवोपि गर्भे नित्यस्यानुपपन्नः उच्यते अस्ति केषांचिद्दर्शनंयथायमन्तः शरीरमंगुष्ठमात्रः पुरुषस्तिष्ठति तस्मान्मनोबुध्यहंकारात्मकः सयावत्संसारमेति धर्मस्तस्य चोपचितस्य चैतन्यशक्तिगर्भोभवति । अतस्तदीयधर्माअन्तरात्मन उपचर्यन्ते । अथवा तस्य भावार्थाये प्राणादयस्तेषूत्क्रामत्सुसमुत्क्रामतीत्युच्यते । एवंसंभवोपि द्रष्टव्यः पुनश्चैताद्वादशेवक्ष्यामः किं बहुना ॥ ६३ ॥

(२) **सर्वज्ञनारायणः** । उत्क्रममात्मनः । योनिर्जातिः । सृतीः संसरणानि ॥ ६३ ॥

(३) **कुल्लूकः** । अस्माद्देहादस्यजीवात्मन उत्क्रमणंतथा च मर्मभिद्भिर्महारोगपतितस्य श्लेष्मादिदोषनिरुद्धकण्ठस्य महतींवेदनांगर्भेचोत्पत्तिदुःखबहुलांश्वशृगालादिनिकृष्टजातियोनिकोटिसहस्रगमनानि स्वकर्मबन्धान्यनुचिन्तयेत् ॥ ६३ ॥

(४) **राघवानन्दः** । अस्मात् स्थूलदेहात् । सृतीर्जन्मानिअन्तरात्मनः लिङ्गदेहस्यअवेक्षेतेत्यनुषङ्गः ॥ ६३ ॥

(५) **नन्दनः** । स्मृतिःसंसृतिः । अन्तरात्मनीजीवस्य ॥ ६३ ॥

(६) **रामचन्द्रः** । अस्माद्देहात् प्राणभाण्डात् । क्रमणं निष्क्रमणं अवेक्षेत । अभ्यन्तरात्मनः जीवस्य सृतीर्गतीःजन्मानि योनिकोटिसहस्रेषु अवेक्षेत तद्यथा श्वशूकरखरोरगाद्यनेकजातिषु जन्मानि पश्येदित्यर्थः ॥ ६३ ॥

अधर्मप्रभवं चैव दुःखयोगं शरीरिणाम् ॥ धर्मार्थप्रभवं चैव सुखसंयोगमक्षयम् ॥ ६४ ॥

(१) **मेधातिथिः** । अधर्मात्प्रभव उत्पत्तिः । दुःखेन योयोगः पीडानुभवः । धर्मउक्तलक्षणोयःपदार्थस्ततःसुखेनाक्षयेन संयोगः । एतदप्यन्त्यंपारिव्राज्यंच मुख्योधर्मइत्यभिप्रायः ॥ ६४ ॥

(२) **सर्वज्ञनारायणः** । धर्मार्थप्रभवं धर्मरूपादर्थादर्थ्यमानादनुष्ठीयमानात्प्रभूतं तत्र प्रवृत्तंख्यातं सुखसंयोगंस्वर्गादौ तथानिवृत्ताधर्मादक्षयंसुखसंयोगमितिविवेकः ॥ ६४ ॥

(३) **कुल्लूकः** । शरीरवतांजीवात्मनामधर्महेतुकंदुःखसम्बन्धंधर्महेतुकोऽर्थोब्रह्मसाक्षात्कारस्तत्प्रभवंमोक्षलक्षणमक्षयंब्रह्मसुखसंयोगंचिन्तयेत् ॥ ६४ ॥

(४) **राघवानन्दः** । धर्मार्थप्रभवमिति धर्मप्रभवोयोर्थः ब्रह्मसाक्षात्कारस्तत्प्रभवंमोक्षलक्षणं अन्यसुखस्य मुख्यत्वाक्षयत्वानुपपत्तेः ॥ ६४ ॥

(५) **नन्दनः** । धर्मानुष्ठानज्ञानमेवप्रधानं न लिङ्गमित्याह अधर्मेति ॥ ६४ ॥

(६) **रामचन्द्रः** । अधर्मप्रभवं अधर्मस्य उत्पन्नं अवेक्षेत् । धर्मार्थयोः प्रभवंअवेक्षेत ॥ ६४ ॥

सूक्ष्मतां चान्ववेक्षेत योगेन परमात्मनः ॥ देहेषु च समुत्पत्तिमुत्तमेष्वधमेषु च ॥ ६५ ॥

(१) **मेधातिथिः** । योगश्चित्तवृत्तिस्थैर्यं यथा पतञ्जलिना दर्शितं तेनात्मनः क्षेत्रज्ञस्य सूक्ष्मतामन्ववेक्षेत शरीरादौ प्राणादौवानात्मबुद्धिःकर्तव्या । किंतर्हि योगजेन ज्ञानातिशयेन सर्वेभ्यएतेभ्योऽन्तर्बहिस्तत्वेभ्योव्यतिरिक्तोबोद्धव्यइत्येवंपरमेतत् । ननु स्थूलादिविकल्पाआत्मनस्सन्ति । यथा चोत्तमेषु देवादिशरीरेष्वस्योपपत्तिः । शरीराधिष्ठातृतया फलोपभोगः सर्वगतस्यापि सतः एवमधमेषु तिर्यक्प्रेतपिशाचादिषु । एकत्वपक्षे परमात्मविभूतयएव क्षेत्रज्ञाइति । अतःपरमात्मनोगतीरन्ववेक्षेतेत्युक्तम् ॥ ६५ ॥

(२) **सर्वज्ञनारायणः** । योगेन ध्यानेन । सूक्ष्मतामतियत्नाधिगम्यतामवेक्षेत सदा चिन्तयेत् तेनहीनाभ्यासंमध्येविच्छिनत्ति । उपपत्तिमुत्पत्तिम् ॥ ६५ ॥

(३) **कुल्लूकः** । योगेन विषयान्तरचित्तवृत्तिनिरोधेन परमात्मनः स्थूलशरीराद्यपेक्षया सर्वान्तर्यामित्वेन सूक्ष्मतांनिरवयवतांतस्यागादुत्कृष्टापकृष्टेषु देवपश्वादिशरीरेषु जीवानांशुभाशुभफलभोगार्थमुत्पत्तिमधिष्ठानमनुचिन्तयेत् ॥ ६५ ॥

(४) **राघवानन्दः** । किंच सूक्ष्मतामिति । योगेन चित्तवृत्तिनिरोधेन । परमात्मनःसूक्ष्मतांनिरवयवतयासङ्गतां । उत्पत्तिं घटाकाशवदध्यासवशात्तत्प्रतीतिम । उत्तमेषु देवादिषु अधमेषु पश्वादिषु उत्तमाधमेषु नृष्वपि ॥ ६५ ॥

(६) **रामचन्द्रः** । संसारस्वरूपापेक्षानन्तरंकिंकार्यमित्यतआह सूक्ष्मतामिति । योगेन योगाभ्यासेन परमात्मनः सूक्ष्मतांदुर्ग्रहतामवेक्षेत ॥ ६५ ॥

दूषितोऽपि चरेद्धर्मं यत्र तत्राश्रमे रतः ॥ समः सर्वेषु भूतेषु नलिङ्गं धर्मकारणम् ॥ ६६ ॥

---

(६६) दूषितोपि=भूषितोपि (क, ग, घ, च)
=गृहस्थोपि (ख)

(१) **मेधातिथिः** । भूषितःकुसुमकटकाद्याभरणैः धर्मःपरिव्राजकस्ययद्विहितमात्मोपासनादि तद्यत्नतश्चरेत् । यस्मिन्नाश्रमेयोविहितस्तंचरेत् । नत्रिदण्डादिलिङ्गधारणमात्राद्यतिमात्मानंमन्येत अपितु समःसर्वेषु भूतेषु स्यात् । रागद्वेषलोभान्यत्नतः परिहरेदितितात्पर्यम् । न लिङ्गत्यागे नभूषणाभ्यनुज्ञानम् ॥ ६६ ॥

(२) **सर्वज्ञनारायणः** । भूषितोपि स्रगादिना गृहस्थोपीत्यर्थः । धर्मयोगधर्मं यत्रतत्रेति वानप्रस्थब्रह्मचर्याश्रमस्थोपि । समः सर्वत्र मैत्रीप्रवृत्तः । लिङ्गं परिव्राजकलिङ्गंदण्डकरकादि । धर्मस्य योगधर्मस्य कारणम् ॥ ६६ ॥

(३) **कुल्लूकः** । यस्मिन्कस्मिंश्चिदाश्रमे स्थितस्तदाश्रमविरुद्धाचारदूषितोऽप्याश्रमलिङ्गरहितोऽपि सर्वभूतेषु ब्रह्मबुद्ध्या समदृष्टिः सन्धर्ममनुतिष्ठेत् । नहि दण्डादिलिङ्गधारणमात्रंधर्मकारणं किंतु विहितानुष्ठानम् । एतच्च धर्मप्राधान्यबोधनायोक्तं नतुलिङ्गपरित्यागार्थम् ॥ ६६ ॥

(४) **राघवानन्दः** । किंच दूषितोपीति । आश्रमलिङ्गराहित्येन दूषितोभ्रष्टः अभिशस्तोवा स्त्र्यादिना । समस्तुल्योदूषकेष्वपि धर्मचाश्रमधर्मंचरेत् यत्र कुटीचकबहूदकहंसपरमहंसेषु ब्रह्मचर्याद्याश्रमेषु वा । स्वस्वधर्मंनत्यजेदिति । यद्वा स्त्र्यादिसंगदोषयुक्तोपि धर्ममधिष्ठानतया सर्वधारणाद्ब्रह्म तच्चरेत्ध्यायेत् । अतएवाह । समइति ब्रह्मैव सर्वभूतेषु धारकतया वर्तमानत्वात् । नाहमस्म्यधिकारीति बुध्यातस्यत्यक्ताश्रमान्तरप्रायश्चित्तान्तरंवा नाश्रयेत् । तथोक्तं ॥ यदि दैवात्प्रमादेन योगी कुर्याद्विगर्हितं । योगेनैव दहेदंहोनान्यत्किंचित्समाचरेत् ॥ उपपातकेषु सर्वेषु पातकेषु महत्सु च । प्रविश्य रजनीपादंब्रह्मध्यानाद्यपोहतीति ॥ कुसुमकटकमुकुटाद्यैर्भूषितइति मेधातिथिः तथासति । समइत्यादि न चारु ॥ ६६ ॥

(६) **रामचन्द्रः** । सर्वेषु भूतेषु समः सर्वत्र मैत्रीपरः लिङ्गं आश्रमलिङ्गं स्वरूपं धर्मकारणंन भवेत् ॥ ६६ ॥

फलंकतकवृक्षस्य यद्यप्यम्बुप्रसादकम् ॥ न नामग्रहणादेव तस्य वारि प्रसीदति ॥ ६७ ॥

(१) **मेधातिथिः** । कलुषितमुदकंकतकवृक्षफले निक्षिप्ते प्रसीदति स्वच्छं शुद्धरूपतामापद्यते । किंतु न तस्य फलस्य नामग्रहणेन तन्निर्मलीभवति अपित्वनुष्ठानमपेक्षते एवंलिङ्गधारणंफलनामस्थानीयं न तावन्मात्रात्सिद्धिर्यावदेकारामतोपासनसर्वसमतादिधर्मोनानुष्ठितः । पूर्वशेषार्थवादः ॥ ६७ ॥

(२) **सर्वज्ञनारायणः** । नन्वेवं संन्यासोविफलस्तंविनाप्यपेक्षितसिद्धेरतआह फलमिति । यथा कतकमानयेति कतकनामग्रहणे प्रयोजकेन कृते यदि प्रयोज्येन तदानीय पिष्ट्वा दीयते ततोजलंप्रसीदति तथात्र लिङ्गधारणं नामग्रहणस्थानीयं प्रधानसाधनंतु कतकावयवप्रक्षेपस्थानीयं कर्मफलं संन्यासएवेति प्रधानत्यागे न लिङ्गधारणमात्रप्रयोजकं । तथा यद्यपि जलस्य कलुषितस्य विक्षिप्तस्य चित्तस्य व्याक्षेपप्रसादरूपहेतुतया संन्यासस्य तदङ्गतयाच लिङ्गधारण स्यास्त्येवोपयोगोयथा कतकेऽसन्निहिते तदाहरणार्थं नामग्रहणस्य तत्प्रक्षेपस्य च जलप्रसादने नतु सर्वत्र गार्हस्थ्ये वर्तमानस्यापि शुद्धाशयतया चित्ते व्याक्षेपशून्ये जलइव स्वतःप्रसन्ने कतकप्रक्षेपस्य संन्यासतल्लिङ्गधारणयोरनुपयोगादित्याशयेनाम्बुप्रसादादिपदोपसंदानेनोदाहरणंकृतमितिमन्तव्यम् ॥ ६७ ॥

(३) **कुल्लूकः** । अत्रदृष्टान्तमाह फलमिति । यद्यपि कतकवृक्षस्य फलंकलुषजलस्वच्छताजनकंतथापि तन्नामोच्चारणवशान्न प्रसीदति किंतु फलप्रक्षेपेण एवंनलिङ्गधारणमात्रंधर्मकारणंकिंतुविहितानुष्ठानम् ॥ ६७ ॥

(४) **राघवानन्दः** । धर्मचरणंविनाऽऽश्रमाभिमानोव्यर्थइत्याह फलमिति । कतकफलचूर्णपङ्किल पायसि क्षिप्तं

कर्दमन्नाशयति । स्वयंच नश्यति न तु तत्फलनामेत्यभिप्रायः लिङ्गधारणाय प्रयोजकमव्याजेन धर्मानुष्ठानमेव परलोकहेतुरिति ॥ ६७ ॥

(५) **नन्दनः** । अत्रदृष्टान्तमाह फलमिति । यथा कतकतरुफलंमलनिर्हरणेन जलंप्रसादयति एवंधर्मोऽनादिकर्ममलनिर्हरणेनात्मानंप्रसादयति । यथा कतकफलनामग्रहणादेव न वारिप्रसीदति तथा धर्मलिङ्गधारणादेवात्मा न प्रसीदतीत्यभिप्रायः ॥ ६७ ॥

(६) **रामचन्द्रः** । तत्र दृष्टान्तमाह फलमिति । तस्य फलस्य नामग्रहणादेव वारि न प्रसीदति न निर्मलंभवति तथाश्रमधारणाद्धर्मेन भवतीत्यर्थः ॥ ६७ ॥

संरक्षणार्थं जन्तूनां रात्रावहनि वा सदा ॥ शरीरस्यात्यये चैव समीक्ष्य वसुधां चरेत् ॥ ६८॥

(१) **मेधातिथिः** । यदुक्तंदृष्टिपूतंपादंन्यसेदिति तस्यप्रयोजनप्रदर्शनश्लोकोयम् । शरीरस्यात्ययेपि शरीरपीडायामपि सत्यां रात्रावहनि वा तृणास्तरणे शयनार्थमास्तीर्णेपि शरीरनिषङ्गोऽनवेक्ष्यादृष्ट्वा कर्तव्योऽस्मिन्व्यतिक्रमे प्रायश्चित्तम् । अथवा अल्पाःसूक्ष्माः केचन क्षुद्रजन्तवःसर्वेशरीरावयवसंवलनमात्रेणैव नश्यन्ति तदर्थमिदम् ॥ ६८ ॥

(२) **सर्वज्ञनारायणः** । संरक्षणार्थं चरणाभिघातेन हिंसायानिवृत्त्यर्थंशरीरस्यात्ययेप्यस्येति अस्य स्वशरीरस्यात्यये पीडायामपीत्यर्थः ॥ ६८ ॥

(३) **कुल्लूकः** । शरीरस्यापि पीडायांसूक्ष्मपिपीलिकादिप्राणरक्षार्थंरात्रौ दिवसे वा सदा भूमिंनिरीक्ष्य पर्यटेत् । पूर्वकेशादिपरिहारार्थंदृष्टिपूतंन्यसेत्पादमित्युक्तम् इदंतुहिंसापरिहारार्थमित्यपुनरुक्तिः ॥ ६८ ॥

(४) **राघवानन्दः** । दृष्टिपूतमित्यस्यानुवादः समिति । स्वशरीरस्यात्यये पीडाप्रसक्तौतस्यांपीडायामपिभूतपीडानकार्येतिभावः॥ ६८ ॥

(५) **नन्दनः** । अत्ययेऽत्यन्तदौर्बल्ये सत्यपि ॥ ६८ ॥

(६) **रामचन्द्रः** । शरीरस्यात्यये शरीरपीडायामपि जन्तूनांसंरक्षणार्थं समीक्ष्य वसुधांचरेत् । क्वचित्सद्विजइति पाठः ॥ ६८ ॥

अह्ना रात्र्या च याञ्जन्तून्हिनस्त्यज्ञानतोयतिः ॥ तेषां स्नात्वा विशुद्ध्यर्थं प्राणायामान् षडाचरेत् ॥ ६९ ॥

(१) **मेधातिथिः** । जन्तून् क्षुद्रजन्तूनितिद्रष्टव्यं तेषांहिंसायांयत्पापंतद्विशुध्यर्थमितिसंबन्धः ॥ ६९ ॥

(२) **सर्वज्ञनारायणः** । अह्नारात्र्याचेतिविग्रहएकैककालीनहिंसादोषोपशमार्थंत्रिस्त्रिःप्राणायामकरणार्थं षट्प्राणायामान् । प्रणवव्याहृतिसहितगायत्र्या त्रिरायतप्राणेन पाठादेकःप्राणायामः इतिक्रमेण । यथा वसिष्ठः ॥ सव्याहृतिंसप्रणवांगायत्रींशिरसा सह । त्रिःपठेदायतप्राणाःप्राणायामःसउच्यतइति ॥ ६९ ॥

(३) **कुल्लूकः** । अत्रप्रायश्चित्तमाह अह्नेति । यतिर्यानज्ञानतोदिवसे रात्रौ वा प्राणिनोहन्ति तद्धननजनितपापनाशार्थंस्नात्वा षट्प्राणायामान्कुर्यात् । प्राणायामश्च सव्याहृतिंसप्रणवांगायत्रींशिरसा सह । त्रिः पठेदायतप्राणः प्राणायामः सउच्यते इतिवसिष्ठोक्त्याऽत्र द्रष्टव्यः ॥ ६९ ॥

(४) राघवानन्दः । योदत्वेति भूताभयदस्याज्ञानकृते किंस्यात्तत्राह अह्नेति ॥ ६९ ॥

(५) नन्दनः । तेषांजन्तूनाम् । शुद्ध्यर्थंहिंसादोषप्रायश्चित्तार्थम् ॥ ६९ ॥

प्राणायामाब्राह्मणस्य त्रयोऽपि विधिवत्कृताः ॥ व्याहृतिप्रणवैर्युक्ताविज्ञेयं परमं तपः ॥७०॥

(१) मेधातिथिः । ब्राह्मणशब्देनजातिर्मता तामाह । न परिव्राजकस्यैवविधिरयम् । त्रयोपि त्रिभ्यऊर्ध्वंफलाधिक्यं-त्रयस्त्ववश्यंकर्तव्याः । व्याहृतयः ओंकारपूर्विकाइत्यत्रयाउक्ताः प्रणवओंकारस्तैर्युक्ताः । प्राणायामकालएतद्ध्यातव्यम् । एते त्रिविधाः कुम्भकरेचकपूरकाख्याः । तत्रच मुख्यस्य नासिक्यस्यच वायोर्बहिर्निष्क्रमणनिरोधेन कुम्भकपूरकाख्याः अनुच्छ्वसतोबहिर्नैरन्तर्येण वायोरुत्सर्गेण रेचकोभवति । अवधिर्द्वितीयाध्याये निर्दर्शितः । यदिवा तपसा पुनर्यावता कालेन न पीडोपजायते ॥ ७० ॥

(२) सर्वज्ञनारायणः । षट्प्राणायामाशक्तवाह प्राणायामाइति । व्याहृतिप्रणवैरित्येकदेशोक्त्यावसिष्ठोक्तंप्राणायामोपलक्षणम् ॥ ७० ॥

(३) कुल्लूकः । ब्राह्मणस्येतिनिर्देशाद्ब्राह्मणजातेरयमुपदेशोन यतेरेव । त्रयोऽपि प्राणायामाः सप्तभिर्व्याहृतिभिर्दशभिःप्रणवैर्युक्ताविधिवदित्यनेन साविच्या शिरसा च युक्ताः पूरककुम्भकरेचकविधिना कृताब्राह्मणस्य श्रेष्ठंतपोज्ञातव्यम् । पूरकादिस्वरूपंस्मृत्यन्तरेषु ज्ञेयम् । तथा योगियाज्ञवल्क्यः ॥ नासकोत्कृष्टउच्छ्वासोध्मातः पूरक उच्यते । कुम्भकोनिश्चल श्वासोमुच्यमानस्तु रेचकः ॥ त्रयोऽपीत्यपिशब्देन त्रयोऽवश्यंकर्तव्याः। अधिककरणेत्वधिकपापक्षयः ॥ ७० ॥

(४) राघवानन्दः । प्राणायामलक्षणाकांक्षायांसार्थवादंतल्लक्षणमाह प्राणेति । व्याहृतीति गायत्र्युपलक्षणं तथाचवसिष्ठः । सव्याहृतिंसप्रणवांगायत्रींशिरसासह । त्रिःपठेदायतप्राणःप्राणायामःसउच्यतइति ॥ ब्राह्मणस्येति प्रकरणात्संन्यासिनः तत्रापि त्रिदण्डिनोव्याहृत्यादित्रिभिः एकदण्डिनस्तु प्रणवेनैव तदुक्तं योगियाज्ञवल्क्येन ॥ ओंकारेण तु कर्तव्यः प्राणायामोयथोदितइति ॥ ७० ॥

(५) नन्दनः । अथप्राणायामप्रसङ्गादाह प्राणायामइति । ब्राह्मणस्य द्विजस्य ॥ सव्याहृतिंसप्रणवांगायत्रींशिरसा सह । त्रिः पठेदायतप्राणःप्राणायामःसउच्यते इत्युक्तंविधिमनुवदति विधिवदिति ॥ ७० ॥

दह्यन्तेध्मायमानानां धातूनां हि यथा मलाः॥ तथेन्द्रियाणांदह्यन्ते दोषाः प्राणस्य निग्रहात् ॥७१॥

(१) मेधातिथिः । धातवस्सुवर्णादयः तेषांध्मायमानानांसुवर्णमेवावशिष्यते तथेन्द्रियाणांविषयदर्शने यौ प्रीतिपरितापौ जायेते तयोर्यत्पापंतस्यदाहः प्राणनिरोधात् । प्रीतिपरितापोत्पत्तिर्मुमुक्षोर्निषिद्धा सातु शरीरिणः त्यक्तसंगस्यापि यादृच्छिकशब्दाद्युपनतौकसाचिन्मात्रया वस्तुसामर्थ्येन नियतेन्द्रियस्याप्युपजायते अतस्तद्दोषनिवृत्त्यर्थाः प्राणायामाः ॥ ७१ ॥

(२) सर्वज्ञनारायणः । धातूनां लोहादीनां इन्द्रियाणांदोषाः स्वस्वविषयाभिषङ्गाः ॥ ७१ ॥

(३) कुल्लूकः । धातूनांस्वर्णरजतादीनांयथामूषायामग्निना ध्मायमानानांमलद्रव्याणि दह्यन्ते एवंमनसोरागादयश्चक्षुरादेश्च विषयप्रवणत्वादयोदोषाः प्राणायामेन विषयानभिध्यानाद्दह्यन्ते ॥ ७१ ॥

(४) राघवानन्दः । प्राणायामेन पापक्षये दृष्टान्तमाह दह्यन्तइति । ध्मायमानानां वह्निनेति शेषः ॥ ७१ ॥

(५) नन्दनः । प्राणस्य निग्रहात्प्राणायामात् ॥ ७१ ॥

(६) रामचन्द्रः । तथा दोषाः विषयाभिषङ्गाः प्राणस्य वायोर्निग्रहाद्दह्यन्ते ॥ ७१ ॥

प्राणायामैर्दहेद्दोषान्धारणाभिश्च किल्बिषम् ॥ प्रत्याहारेण संसर्गान्ध्यानेनानीश्वरान्गुणान् ॥७२॥

(१) मेधातिथिः । प्राणायामैरित्येतत्पूर्वश्लोकेनदर्शितम् । अपरेत्वाहुः । दोषारागादयस्तान्दहेत् । कथंप्राणायामैर्दग्धुमेतेशक्यन्ते युक्तःपापस्यतैर्दाहः । अदृष्टाचतस्योत्पत्तिःशास्त्रलक्षणं तथानिवृत्तिरपि । रागादयस्तुप्रत्यक्षवेद्याःतेषांप्राणायामानांनिवर्त्यनिवर्तकभावःप्रत्यक्षादिवेद्यएवयुक्तोभवितुंनशास्त्रीयः । यदिशास्त्रमेवंवदेद्वह्निमेनशीतंनिवर्तयेदितिकिंप्रमाणिभवेत् । तस्माद्रागादिनिमित्तमशुभाचरणंदोषशब्देनोच्यते । तस्यकार्यदाहोदाहः स्वरूपतोहित्वरसतएवकर्मणां क्षणिकत्वान्नाशः । एषएवचदाहोनत्वन्यस्येवभस्मीभावः एवंच पूर्वश्लोकार्थोनुवादः । धारणाभिश्च ननुचकिल्बिषंपापदोषश्चेत्तत्रैतावद्वक्तव्यम् प्राणायामैर्धारणाभिश्चदोषान्दहेत् किंकिल्बिषमित्यनेन किल्बिषमितिवास्तु किंदोषग्रहणेन उच्यते दोषग्रहणमवश्यंकर्तव्यंविशिष्टस्यपापस्य प्राणायामैर्दाहोयथाविज्ञायेत न सर्वस्येति । दोषशब्देन हि रागादयउच्यन्ते अतस्तन्निमित्तएव पापेउपचारोयथोक्तः । एवं तर्हि तदेव क्रियतांकिंकिल्बिषमित्यनेन पादपूरणार्थमित्यदोषः । तत्रोत्पन्नस्य पापस्य प्राणायामादहनाउच्यन्ते । धारणास्तु दोषानुत्पत्तिमेव कुर्वन्ति काः पुनरेताधारणाःशमयमादिभिर्नियमाद्विषयदर्शनाभिलाषेण प्रकुप्यमाणंमनोधार्यते तत्रैव स्थाने नियम्यते । ताश्चविषयगतदोषभावनाअस्थिरस्थूणमित्याद्याः कान्तिलावण्यतारुण्यसंस्थानशौर्यादयः स्त्रीषु दृश्यमानाअभिलाषहेतवः तेच सविकल्पंप्रत्यक्षग्राह्याः । विकल्पाश्च मनोधाराः अतोविकल्पान्तरैर्मूत्रपुरीषपूर्णनामेति तस्मिन्विषयगतदोषभावे कटककर्पटान्वितंस्त्रीद्वय्यनामाधिकंप्राणिनोयत्प्रयत्नतःपरिहर्तव्यमभिलषन्ति याप्येषा सुखलेशभ्रान्तिः सा क्षणभङ्गिनी तदासेवनेन घोरादीर्घकालाश्च यमयातनाइत्यादिभिः शक्यन्तेनिरोद्धुम् । एतदेव तत्प्रसंख्यानमुच्यते । एवंभोजनादिष्वपि भावयितव्यम् । यदेतच्छर्कराघृतपूरहैयङ्गवीनपायसादि तच्च भैक्षंकदन्नादिभिः सममेतच्छरीरधारणतया विशेषाभावात्कस्यचित्प्रकृतेर्जिव्हाग्रेक्षणलवमात्रवर्तमानस्य विशेषोयस्सविशेषतया प्रतिभासेत गन्धर्वनगरप्रख्योयंक्षणिकावभासइति । एवमन्यत्रापि स्पर्शदोषोभावयितव्यइत्येवमुपदिशति । अन्येत्वाहुः । कौष्ठ्यस्य वायोर्मुखनासिकासंचारिणःशरीरैकदेशान्तर्हृदयाकाशादभ्यासवशतो धारणंधारणा । ननुच प्राणायामेभ्यएतासांसाधारणानांकोभेदः बाहुललाटादावपि यथेच्छंध्यात्वत्यादिध्यानसहितंधारणा प्राणायामारेचनेनाधिक्रियन्तइतिविशेषः । अन्येतु मैत्रीमुदिताकरुणाउपेक्षाएताधारणाइति मन्यन्ते । मैत्रीकृपा मुदोपेक्षा सर्वप्राणिष्ववस्थिता । ब्रम्हलोकंनयन्त्याशु ध्यातारंधारणास्त्विमाः । तत्र मैत्री द्वेषाभावोनतु सुहृत्स्नेहस्तस्य बन्धात्मकत्वात् । कृपाकरुणाचित्तधर्मः दुःखितजनदर्शनेन कथमयमस्माद्दुःखादुद्धियेतेति समुद्धरणकामना । न त्वहिंसानुग्रहयोरनारम्भइत्युक्तं अतएवेदमुच्यते चित्तधर्मोयमभ्यसितव्यः । मुदिताशोकव्यावृत्तिर्व्याध्यादिनिमित्तेदुःखे नरकादिभयजेवा नतु हर्षः तस्य रागहेतुत्वात् । उपेक्षा विषयअनुग्राहकेषु उपघातेच । प्रसिद्धैव । मनसोवातहृदयाकाशे ब्रह्मचिन्तापरतयानिश्चलता धारणा । प्रत्याहारेण संसर्गमिन्द्रियाणांविषयैस्सह सम्बन्धस्तत्र प्रवृत्तिःसंसर्गस्तन्दहेत्प्रत्याहारः ततोहरणमिन्द्रियाणांप्रतिबन्धकरणंवा । आश्चर्यरूपेण न कटकादौ रूपवल्लीसंदर्शनेवास्थगयितव्ये चक्षुषी अन्यत्र वा दृष्टिरुपनेया । एवंसर्वेन्द्रियेषु । एवंच समाधानंयोगिनोऽप्रतिबद्धंभवति । ध्यानेनानीश्वरान्गुणान् । गुणान्सत्वरजस्तमांसि तेचानीश्वराः परतन्त्राःचेतनाधीनमूर्तयः पुरुषस्यानतस्यसुखादिरहितस्य योभिमानोहं सुख्यहं-

दुःखीति निर्गुणस्य गुणिताभिमानस्सगुणपुरुषविवेकध्यानेन दग्धव्यः । चिद्रूपःपुरुषोनिर्गुणोगुणमयी प्रकृतिरित्येवंगुणपुरुषविवेकःकर्तव्यः ॥ ७२ ॥

(२) **सर्वज्ञनारायणः** । धारणाभिःसाकारोकार्मिश्चिदभीष्टयेचित्तनिवेशनैः किल्बिषं योगप्रतिबन्धकंपापं । प्रत्याहारेण विषयेभ्योमनसआकर्षेण संसर्गान्विषयेणसह ज्ञानस्य संबन्धान् । ध्यानेन निराकारानुचिन्तनेनानैश्वरान् शुद्धविषयज्ञानस्थैर्यरूपैश्वर्यविरोधिनोगुणान् रजस्तमोविकारान् तन्द्रादीन् ॥ ७२ ॥

(३) **कुल्लूकः** । एवंसति अनन्तरोक्तप्रकारेण प्राणायामैरागादिदोषान्दहेत् । अपेक्षितदेशे परंब्रह्मादौ यन्मनसोधारणंसा धारणा तया पापंनाशयेत् । प्रत्याहारेण विषयेभ्यइन्द्रियाकर्षणैर्विषयसंपर्कान्वारयेत् । ब्रह्मध्यानेनेतिसोऽहमस्मीतिसजातीयप्रत्ययप्रवाहरूपेणानीश्वरान्गुणानीश्वरस्य परमात्मनोये गुणानभवन्ति क्रोधलोभासूयादयः तान्निवारयेत् ॥ ७२ ॥

(४) **राघवानन्दः** । प्राणायामप्रसंगेन प्रत्याहारादित्रीण्याह प्राणेति । धारणा षट्चक्रमध्ये पृथिव्यादिचिन्तनं । देशबन्धश्चित्तस्य धारणेति । किल्बिषंविषयशोध्यानाभ्यासं पादपूरणार्थमितिमेधातिथिः । प्रत्याहारेणेति प्रत्याहारोविषयेभ्यइन्द्रियाकर्षणं । तथाचपतञ्जलिसूत्रम् ॥ स्वविषयासंप्रयोगे चित्तस्यस्वरूपानुकारइवेन्द्रियाणांप्रत्याहारइति । संसर्गान् विषयसंपर्कजान् प्रीतिपरितापान् । ध्यानेनेश्वरस्यअनीश्वरान् ईश्वरानाश्रितान्कामक्रोधादीन् ॥ ७२ ॥

(५) **नन्दनः** । अथ योगाङ्गानि प्राणायामप्रसङ्गादाह प्राणायामैरिति । दहेत्त्यजेत् । दोषान्रागादीन् । इन्द्रियप्राणमनोबुद्ध्यात्मनामेकत्रावस्थापनंधारणा । कुष्टस्य मनसः पुनः प्रत्यानयनार्थे प्रयोजनंप्रत्याहारइतिदेवलः । इन्द्रियाणां विषयैःसंबन्धः संसर्गः । अनैश्वरान्प्राकृतान् । गुणान्सत्वरजस्तमांसि । एवंयोगउक्तः ॥ ७२ ॥

(६) **रामचन्द्रः** । प्राणायामैः दोषान् बाह्येन्द्रियजान् दहेत् । धारणाभिः चित्तस्यअवस्थापकाभिः किल्विषं योगप्रतिबन्धकं दहेत् । प्रत्याहारेण विषयेभ्योमनसःप्रकर्षेण संसर्गान् विषयान् दहेत् । ध्यानेन निराकारानुचिन्तनेन अनीश्वरान् ऐश्वर्यप्रतिबन्धकान् शुद्धिविषयज्ञानस्वरूपैश्वर्यनिरोधिनोगुणान तन्द्रादीन् दहेत् ॥ ७२ ॥

उच्चावचेषु भूतेषु दुर्ज्ञेयामकृतात्मभिः ॥ ध्यानयोगेन संपश्येद्गतिमस्यान्तरात्मनः ॥ ७३ ॥

(१) **मेधातिथिः** । सकथंकर्तव्योध्यानेन किंपुनर्ध्येयमतआह । अन्तरात्मान्तर्यामी पुरुषस्तस्य गतिः स्वरूपं यथावद्विज्ञेयं सुखदुःखाभिमानोन केवलं मनुष्यजन्मनि किंतर्हि उच्चावचेषु नानाविधेषु भूतेषु तिर्यक्प्रेतपिशाचादिष्वहंममेति प्रत्ययोऽविद्याकृतोनिवर्त्यः । अथवा कथमयंविभुरन्तरिक्षाज्ज्यायान्दिवोज्यानेभ्योलोकेभ्यः सर्वकामः सर्वरसः सर्वगन्धः सर्वस्पर्शइदमभ्यस्यतोविजिघत्सोर्विपिपासोः । एवंविधेपि सुखे दुःखे शरीरस्य शरीरेष्वसर्वभोगतया सोहंनामाह्योकर्मणांमहात्म्यं यदयं सर्वात्मकः स्वतन्त्रः परतन्त्रीक्रियते कर्मभिर्नैतानि करिष्येदुष्टस्वामिस्थानीयानि भृतकइवकर्माणि प्रतिपालयिष्ये यथा भृतकःकश्चित्स्वामिनंनिबन्धेनाराधयितुं प्रविष्टः सन्यंमन्यते यावद्दुराधर्षइव नोदण्डशीलस्तर्जनापरः परुषभाषी नैनंभूयः परिचरिष्यामि । यन्मयास्मात्किंचिद्भृत्यादि गृहीतं तदेवास्य कर्मकरणेन शोधयामि एवंध्यायन्नासीत । कृतानांकर्मणांफलोपभोगेनान्तंयास्यामि अन्यानिचनकरिष्यामीत्येवमादिध्येयम् । तथाकिमेतेक्षेत्रज्ञाःपरमात्मनोविभूतयउतस्वतन्त्राः नैवंपरवान्यःकश्चिदस्तीति वेदान्तनिषेवणादिना निश्चित्यध्यातव्यम् । अन्ये पुनराहुः ध्यानंचयोगश्च ध्यानयोगं तेनांतरात्मनःगतिंसंपश्येन्निरूप्योप्यासीत गतिंध्यानेन योगेन च । अथवा ध्यानार्थोयोगः

चिन्तस्थैर्यंतत्कृत्वाऽऽत्मनोगतिंसंपश्येदुपासनाभिरनपावृतादिगुणविशिष्टंवेदान्ताभिहितरूपंनिष्कलमग्रमभिमुखीकुर्यात्। अकृताअसंस्कृताःशास्त्रेणाऽऽत्मानोयैस्तैर्नशक्यं ज्ञातुम् ॥ ७३ ॥

(२) **सर्वज्ञनारायणः** । उच्चावचेष्वनेकविधेषु भूतेषु गतिंप्राप्तिंअस्य स्वीयस्यान्तरात्मनः ध्यानयोगेन ध्यानाभ्यासेन सम्यक्पश्येत् । अकृतात्मभिरसंस्कृतमनोभिः ॥ ७३ ॥

(३) **कुल्लूकः** । अस्य जीवस्योत्कृष्टापकृष्टेषुदेवपश्वादिषु जन्मप्राप्तिमकृतात्मभिः शास्त्रैरसंस्कृतांतःकरणैर्दुर्ज्ञेयां ध्यानाभ्यासेन सम्यक्सकारणकंजानीयात् । ततश्चाविद्याकाम्यनिषिद्धकर्मनिर्मितेयंगतिरितिज्ञात्वा ब्रह्मज्ञाननिष्ठोभवेदितितात्पर्यार्थः ॥७३ ॥

(४) **राघवानन्दः** । किंचोच्चेति । उच्चावचेषु उत्कृष्टापकृष्टेषु । देवमनुष्यतिर्यक्षुगतिर्दुर्ज्ञेयां अप्यकृतात्मभिरजितेन्द्रियैःअन्तरात्मनोजीवस्य ध्यानयोगेन । एकएवायमुपायः परम अथवाएकएवतुभूतात्माभूतेभूतेव्यवस्थितइतिचित्ताभ्यासेन अहोकर्मफलमाहात्म्यं यदेवंकर्मणानोश्वरोपिईश्वरःक्रियतेऽथवागतिमैकात्म्यलक्षणां संपादितवतोयोनिकां टिसहस्रेषु सृतीर्विमोचयतीतिकिमुवक्तव्यमित्यत्र चिन्तनस्यतात्पर्यं । तथाचतत्त्रं तत्सूत्रं तत्र प्रत्ययैकतानताध्यानमिति ॥ ७३ ॥

(५) **नन्दनः** । अथतत्प्रसङ्गात्सांख्यमाह उच्चावचेष्विति । उच्चावचेषूत्कृष्टापकृष्टेषु भूतेषु शरीरेष्वन्तरात्मनोऽन्तःपुरुषस्य ज्ञानंपञ्चविंशतितत्त्वज्ञानंतस्य योगेनाभ्यासेन संपश्येतसम्यक्पश्येत् ॥ ७३ ॥

(६) **रामचन्द्रः** । उच्चावचेषु ब्रह्मादिकीटपर्यन्तेषु अस्यान्तरात्मनः गतिं व्याप्तिं ध्यानयोगेन संपश्येत् ॥ ७३ ॥

सम्यग्दर्शनसंपन्नः कर्मभिर्न निबध्यते ॥ दर्शनेन विहीनस्तु संसारं प्रतिपद्यते ॥ ७४॥

(१) **मेधातिथिः** । आन्तरस्य विधेःफलमाह । सम्यग्दर्शनमनन्तरोक्तमात्मनोयथार्थज्ञानंतेन संपन्नः कृतसाक्षात्कारः कर्मभिर्ननिबध्यते । संसारंनानुवर्तते कृतानांकर्मणांभोगेन क्षयादन्येषामकरणात् । न पुनरनेन केवलात् ज्ञानान्मोक्षउक्तोभवति । दर्शनेनाऽऽध्यात्मिकेन वेदान्तोपदिष्टेन योविरहितःकेवलकर्मकारी संसारमेति ॥ ७४ ॥

(२) **सर्वज्ञनारायणः** । ज्ञानी कर्मभिर्धर्माधर्मरूपैरुत्पन्नैर्ननिबध्यते न फलानुभवेन संबद्धः क्रियते । दर्शनेन सम्यगात्मदर्शनेन ॥ ७४ ॥

(३) **कुल्लूकः** । ततश्चतत्त्वतोब्रह्मसाक्षात्कारवान्कर्मभिर्न निबध्यते कर्माणि तस्य पुनर्जन्मने नप्रभवन्ति पूर्वार्जितपापपुण्यस्य ब्रह्मज्ञानेन नाशात् । तद्यथा इषीका तूलमग्नौप्रोतंप्रदूयेत एवंहास्यसर्वेपाप्मानःप्रदूयन्तउभौब्रह्मैवैषभवतीतिश्रुत्या । तथा क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टेपरावरइति अविशेषश्रुत्या पुण्यसंबन्धोऽपि बोध्यते । उत्तरकाले चदैवात्पापेकर्मणि कृतेऽपि न पापसंश्लेषः । तथाचश्रुतिः पुष्करपलाशआपोन श्लिष्यन्तएवमेवंविदिपापकर्म न श्लिष्यतइति । देहारम्भकपापपुण्यसंबन्धःपरंनश्यति । अयमेवचार्थोब्रह्ममीमांसायांतदधिगमउत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशादितिसूत्रेणबादरायणेन निरणायि । ब्रह्मसाक्षात्कारशून्यस्तु जन्ममरणप्रबन्धंलभते ॥ ७४ ॥

(४) **राघवानन्दः** । अतस्तदेव दर्शनंस्तौति सम्यगिति । दर्शनेन ज्ञानेन संपन्नस्यैव सर्वपापविरहात् ॥ भिद्यते हृदयग्रन्थिश्छिद्यन्तेसर्वसंशयाः । क्षीयन्ते चास्यकर्माणि तस्मिन्दृष्टे परावरे ॥ सर्वेपाप्मानोतोनिवर्तन्ते इत्यादिश्रुतेः । तदसंपत्तौ दोषमाह दर्शनेनेति ॥ ७४ ॥

* उभेतेवैष (अ)

(५) नन्दनः । सम्यकूपश्यतः फलमाह सम्यगिति । कर्मभिर्न निबध्यते संसारमुक्तोभवति । दर्शनेन सम्यग्दर्शनेन ॥ ७४ ॥

(६) रामचन्द्रः । सम्यक् ईश्वरस्य दर्शनेन संपन्नःसंयुक्तःकर्मभिर्ननिबध्यते ॥ ७४ ॥

अहिंसयेन्द्रियासङ्गैर्वैदिकैश्चैव कर्मभिः ॥ तपसश्चरणैश्चोग्रैः साधयन्तीह तत्पदम् ॥ ७५ ॥

(१) मेधातिथिः । इदन्तु ज्ञानकर्मणोःसमुच्चयान्मोक्षइतिश्लोकद्वयंज्ञापकम् । पूर्वेण ज्ञानमुक्तमनेन कर्माण्युच्यन्ते । कानि पुनर्वैदिकानि कर्माणि येषांफलंतत्पदंप्राप्नोतीत्युच्यते । यानि तावत्काम्यानि तेषांस्वविधिवाक्येश्रुतमेव स्वर्गादिफलम् । तद्व्यतिरेकेण फलान्तरकल्पनायामतिप्रसंङ्गः । संकीर्णफलताश्रयणंवानर्थकंस्यात् । तावता च वाक्यार्थस्य समाप्तेर्विध्यनपेक्षिततत्पदप्राप्तिलक्षणफलेन कथंसंबन्धः । श्रुतेनैवान्वयिना विध्यर्थेसंपन्ने विधिर्नोपेक्षते अत्रोच्यते अस्त्येवात्र वाक्यान्तरं यज्ञेन तदाप्नोतीति रहस्याधिकारे । ततश्च संयोगपृथक्त्वात्फलद्वयंयुक्तं अतश्च सर्वेषामेव काम्यानामविच्छिन्नफलयोगिता परमपदप्राप्त्यर्थता च न विरोत्स्यते । तत्रयागद्वयेन प्रयोगभेदेन स्वर्गापवर्गौ भवतः नच तत्र यज्ञविशेषः श्रुतोयेन नित्यानामेतत्फलंस्यान्न काम्यानाम् । अथोच्यते नित्येष्वश्रुतत्वात्फलावच्छेदस्याविरोधात्तद्विषयता युक्ता न काम्येषु तावतैव यज्ञेनेत्यस्य सर्वविषयत्वालाभादितिचेत् किमत्र फलश्रवणेन कर्तव्यतानिष्ठानिच वैदिकानि वाक्यानि । साचकर्तव्यताऽन्तरेण वैदिकं फलपदंयावज्जीवादिपदेन गमितेति तत्रापि फलसंबन्धोनऽपेक्षितएव कल्प्यमानोऽधिकत्वान्नैकार्थ्ययायात् । अतोयज्ञेनेति वाक्यमप्रतिष्ठमानंविविक्ते विषयेसर्वंयज्ञशब्दवाच्यंनित्यंकाम्यंच गोचरयति । न चैतत्फलंकाम्यानां अपवर्गकामइत्यश्रुतत्वात् । एतदभिप्रायमेवोक्तं कामात्मतानप्रशस्तेति । महाभारतेपि माकर्मफलहेतुर्भूर्मातेसंगोस्त्वकर्मणीति ॥ अतश्च भेदग्राहपरिवेष्टितान्तःकरणस्य तृष्णाविद्यावतोऽनिर्मुक्ताहंकारममकारस्याभिसंहितपरिमितफलप्राप्तिः । इतरस्य त्वनभिसंधायफलविशेषचोदितत्वात्कर्तव्यमितिबुद्ध्या वर्तमानस्यापरिमितनिरतिशयानन्दरूपब्रह्मावाप्तिः । न चैतच्चोदनीयं एकस्मशतंक्रतवोयावन्तोवा तेषां सर्वेषामनुष्ठानस्याशक्यत्वादनारभ्योपदेशतास्यादिति । यतोदर्शनसंपत्त्यैवाप्रानुष्ठानसंपत्तिरिति । सर्वेच क्रतवोदर्शनसंपादनीयाः तथाचोक्तं ज्ञानेनैवापरे विप्रायजन्तइति । अथवा याल्लोकानेतीत्यवच्छेदनिर्देशः स्वर्गकामःपुत्रकामइति । अतीतानादिभेदग्रहवासितान्तरात्मानोदृष्टफललाभेनासत्येनैवप्रधाने पुरुषार्थे प्रवर्तन्ते । यथा बालःपुष्ट्यर्थे औषधेन शिखाते वर्धिष्यतइत्यसत्ययैव शिखावृद्ध्याप्रवर्त्यतइति केचित् । अपरंमतं नित्यान्यत्रकर्माण्यभिप्रेतानितान्यत्रिःप्रमाणानि प्रत्यवायहेतुतया प्रतिबंधकानि अतस्तैरनुष्ठीयमानैरसति प्रतिबन्धे उक्तंवैदिकैश्चैव कर्मभिरिति । यद्यपि तानि नमोक्षार्थतया चोदितानि उग्रैरत्यन्तंशरीरतापहेतुभिः तस्य ब्रह्मणः पदंस्थानं ब्रह्मलोकंसाधयन्ति स्वीकुर्वन्ति । अथवा तदीयपदंयादृशस्तस्याधिकारः सर्वेश्वरत्वंस्वातन्त्र्यंतद्रूपप्राप्तिरितियावत् ॥ ७५ ॥

(२) सर्वज्ञनारायणः । इन्द्रियासंगैरिन्द्रियार्थेषु रागहान्या वैदिकैःकर्मभिर्नित्यनैमित्तिकैः । तपसश्चान्द्रायणादेश्चरणैःप्रतिबन्धकपापक्षयार्थंकृतैः । तत्परं ब्रह्म साधयन्ति जानन्ति ॥ ७५ ॥

(३) कुल्लूकः । निषिद्धहिंसावर्जनेनेन्द्रियाणांच विषयसंगपरिहारेण वैदिकैर्नित्यैः कर्मभिः काम्यकर्मणांबन्धहेतुत्वात् उक्तंच कामात्मतानप्रशस्तेति तपसश्चयथासंभवमुपवासकृच्छ्रचान्द्रायणादेरनुष्ठानैरिहलोके तत्पदंब्रह्मात्यन्तिकलयलक्षणंप्राप्नुवन्ति पूर्वश्लोकेन ब्रह्मदर्शनस्य मोक्षहेतुत्वमुक्तम् । अनेन तत्सहकारितया कर्मणोऽभिहितम् ॥ ७५ ॥

(४) **राघवानन्दः** । सम्यग्दर्शनस्य सर्वसाध्यत्वंस्वीकुर्वन्नाभ्युपायमाह अहिंसयेति । तत्पदं तत्त्वज्ञानं ब्रह्मणो-साध्यत्वात् ॥ ७५ ॥

(५) **नन्दनः** । न केवलंसांख्ययोगावेवसन्यासिनः परमगतिमाप्युपायः किंतु पूर्वाश्रमकृतानि कर्माण्यपीत्याह अहिंसेति । अहिंसयेन्द्रियासङ्गैरिति ब्रह्मचर्यधर्मोलक्ष्यते । वैदिकश्चैवकर्मभिरितिगृहस्थधर्मः । तपसश्चरणैश्चेतिवान-प्रस्थधर्मः । इन्द्रियाणांविषयेसङ्गइन्द्रियासङ्गः । वैदिकंकर्माग्निहोत्रहोमभल्लातकव्रतादिकम् ॥ ७५ ॥

(६) **रामचन्द्रः** । अहिंसया इद्रियाणामसंगैः वैदिकैःकर्मभिः अष्टचत्वारिंशत्संस्कारैःउग्रैस्तपश्चरणैः तत्पदं ब्रह्म-साधयन्तीह जानन्तीत्यर्थः ॥ ७५ ॥

अस्थिस्थूणं स्नायुयुतं मांसशोणितलेपनम् ॥ चर्मावनद्धं दुर्गन्धिपूर्णं मूत्रपुरीषयोः ॥ ७६ ॥

(१) **मेधातिथिः** । वैराग्यजननमेतत् । तिष्ठन्तु तावत् कृमिकीटपतङ्गादिशरीराणि जलौकोभूमिस्वेदजादीनां अन्यदिदंमानुषशरीरंस्पृहणीयत्वेनाभिप्रेतम् । यत्राशङ्किनोनित्यभितामनुष्यास्तन्मूत्रपुरीषकुटीगृहकमिव तदिदानींकुटी-गृहकेन निरूपयति । अस्थीनिस्थूणाइव तैरवष्टब्धं स्नायुना बद्धं मांसशोणिताभ्यांदेहचर्मणाअवनद्धंततउपरि अथवा आच्छादितं पूर्णं मूत्रपुरीषयोः । ओदनस्य पूर्णइतिवत्षष्ठी ॥ ७६ ॥

(२) **सर्वज्ञनारायणः** । स्नायुभिर्युतं मिश्रितं बद्धमितियावत् चर्मणाऽवनद्धं बहिश्छादितं । भूतमयमावासंभूता-वासमिति श्लेषेण भूताख्यप्रेतानांवासतुल्यतांदर्शयन्नस्थिस्थूणत्वादिकर्मापयुक्तमिति कथयति अतएव दुर्गन्धीत्या-दिविशेषणं पूर्णमूत्रपुरीषयोः मूत्रेण पुरीषेण चान्तर्व्याप्तमित्यर्थः ॥ ७६ ॥

(३) **कुल्लूकः** । इदानींमोक्षान्तरङ्गोपायसंसारवैराग्याय देहस्वरूपमाह श्लोकद्वयेन अस्थीत्यादिजरेत्यादिच । अस्थीन्येव स्थूणाइव यस्य तमस्थिस्थूणं स्नायुरज्जुभिराबद्धंमांसरुधिराद्युपलिप्तंचर्माच्छादितंमूत्रपुरीषाभ्यांपूर्णमतएवदुर्ग-न्धि ॥ ७६ ॥

(४) **राघवानन्दः** । तदर्थंपुनर्वैराग्योपायमाह अस्थीति । नाविरक्तस्य ज्ञानेधिकारोयतःनिर्वेदमायादिति । अतः अस्थीनि स्थूलसूक्ष्माणि स्थूणास्तम्भोयस्य भूतावासमिमंत्यजेदिति द्वितीयेनान्वयः । स्नायुयुतंस्नायवःशिराःताभिरेव बद्धमन्तरे बहिश्चर्मावनद्धं पूर्णंमूत्रपुरीषयोस्ताभ्यांपूर्णमित्यर्थः ॥ ७६ ॥

(५) **नन्दनः** । सांख्ययोगयोरुभयोः साधारणधर्मान्पञ्चभिःश्लोकैराह अस्थीति । अस्थिस्थूणमितिश्लोकद्वय-मेकान्वयम् ॥ ७६ ॥

(६) **रामचन्द्रः** । शरीरस्यस्वरूपमाह युग्मेन अस्थीति । मूत्रपुरीषयोः पूर्णं संबन्धे षष्ठी ॥ ७६ ॥

जराशोकसमाविष्टं रोगायतनमातुरम् ॥ रजस्वलमनित्यं च भूतावासमिमं त्यजेत् ॥ ७७ ॥

(१) **मेधातिथिः** । जराचचरमे वयसि शरीरापचयहेतुरवस्थाविशेषः । आतुरंनित्यगृहीतं रोगैः । रज-स्वलं स्पृहयालुः सर्वपदार्थेषु तदसंपत्त्यांच महद्दुःखं सर्वस्मिन्सोऽप्रतीकारमनिवर्त्यसर्वगतत्वात्तस्य अतस्तन्ममताशरीरेण कर्तव्या ॥ ७७ ॥

(२) **सर्वज्ञनारायणः** । आतुरं दुःखवत् रजस्वलं रजोगुणेन दूषितम् ॥ ७७ ॥

(३) **कुल्लूकः** । जरोपतापाभ्यामाक्रान्तंविविधव्याधीनामाश्रयमातुरंक्षुत्पिपासाशीतोष्णादिकातरंप्रायेणरजोगुण-

युक्तंविनश्वरस्वभावंच आवासोगृहंपृथिव्यादिभूतानि तेषामावासंदेहमेव जीवस्यगृहत्वेन निरूपितंत्यजेत् । यथापुनर्देहसबन्धीन भवेत्तथा कुर्यात् गृहसाम्यमेवोक्तमस्थीत्यादिना ॥ ७७ ॥

(४) **राघवानन्दः** । आतुरंक्षुत्पिपासाशीतादियुक्तं । रजस्वलं मायेण रजोगुणयुक्तंपापजनकत्वात् त्यजेत् । अनात्मतयाजानीयात् आयुषःक्षये स्वतएव नष्टत्वात् जीवापेतंवावकिलेदंम्रियते नजीवइतिश्रुतेः । इमंदेहंजीवतस्त्यक्तुमशक्यत्वात् ॥ ७७ ॥

(५) **नन्दनः** । रजस्वलंरजोगुणबहुलंभूतावासंशरीरगृहंत्यजेत् अस्मिन्नहन्तांनकुर्यात् यथा गृहे तिष्ठन्गृहीगृहंमन्योन भवत्येवंदेहे तिष्ठन्देहम्मन्योन स्यादित्यभिप्रायः ॥ ७७ ॥

(६) **रामचन्द्रः** । रजस्वलं मलिनं भूतावासं पञ्चमहाभूतानामावासस्थानं एतादृशंशरीरज्ञानेन त्यजेत् ॥ ७७ ॥

नदीकूलं यथावृक्षोवृक्षं वा शकुनिर्यथा ॥ तथा त्यजन्निमं देहं कृच्छ्राद्ग्राहाद्विमुच्यते ॥ ७८ ॥

(१) **मेधातिथिः** । यस्तावदयंकुटीरूपकोदेहस्तस्य दृष्टान्तोनदीकूलंवृक्षइति न स्वेच्छयाग्निप्रवेशादिनात्यक्तव्यः किन्तु तृष्णा तत्र न कर्तव्या । अनुद्दिष्टोऽपूर्वआपातस्तदा भविष्यतिकर्मक्षयात् वृक्षस्येव कूलस्थस्य न प्रयुक्तंनाभिनन्दितमरणमिति यस्तु लब्धज्योतिर्वशीकृतप्राणसंचारोमोहविकारनिगृहीतमनास्तेन पूर्वमुत्क्रमणंकर्तव्यं यथा शकुनिर्वृक्षंत्यजति ग्राहइव ग्राहः दुःखहेतुत्वसाम्यात् तद्ग्राहकृच्छ्रात् प्राग्निपूर्विकस्यापियावच्छरीरंवस्तुसामर्थ्याद्भवत्येव कृच्छ्रपूर्वविप्रतिपत्तावेतदुच्यते ॥ ७८ ॥

(२) **सर्वज्ञनारायणः** नदीकूलमिति उत्पन्ने ज्ञानेऽपि यदि देहारम्भककर्माणि भोग्यानि भवन्ति तदा कर्मक्षयक्रमेण कालान्तरे देहत्यागस्तमपेक्ष्य नदीकूलंयथावृक्षइत्युक्तं नद्यभिघाताद्वृक्षस्य क्रमादेव पातात् । यदातु न तादृशंकर्मावशिष्टमस्ति तदा सद्योदेहत्यागोभोग्यकर्माभावात् तमपेक्ष्य वृक्षंवा शकुनिरित्युक्तं तत्क्षणादेव तस्य वृक्षविभागात् । कृच्छ्रात् ग्राहात् दुःखात् ग्राहात् ग्राहसदृशात् भयहेतोः ॥ ७८ ॥

(३) **कुल्लूकः** । ब्रह्मोपासकस्य देहत्यागसमयेमोक्षः आरब्धदेहस्य कर्मणोभोगेनैवनाशात् । तत्रदेहत्यक्तुर्द्वैविध्यमाह । यः कर्माधीनंदेहपातमवेक्षते सनदीकूलंयथावृक्षस्त्यजतिस्वपातमजानन्नेव नदीरयेण पात्यते तथा देहंत्यजन् यश्चज्ञानकर्मप्रकर्षाद्ब्रह्मादिवत्स्वाधीनमृत्युःसयथा पक्षी वृक्षंस्वेच्छया त्यजति तथादेहमिमंत्यजन्संसारकष्टाद्ग्राहादिव जलचरप्राणिभेदाद्विमुच्यते ॥ ७८ ॥

(४) **राघवानन्दः** । अवश्यंमुक्तिर्यास्यतीत्यत्र दृष्टान्तमाह नदीति । नदीवेगेन प्रशिथिलमूलोयथावृक्षःकृच्छ्ररूपग्राहात्संसारात् नदनिविष्टस्य नाजीर्यद्ग्राहैर्भावइत्यनुभवः ॥ ७८ ॥

(५) **नन्दनः** । उक्तमेवार्थमुदाहरणार्थं दृष्टान्ताभ्यांप्रपञ्चयति नदीति । नदीकूलस्थोयथावृक्षोनदीकूलमात्मानंनमन्यते यथा वृक्षस्थःशकुनिर्वृक्षमात्मानंनमन्यते एवंदेहस्थोदेही देहमात्मानंनमन्यतइत्यभिप्रायः । कृच्छ्राद्ग्राहात्संसारात् ॥ ७८ ॥

(६) **रामचन्द्रः** । तथा इमंपुरोवर्तिनंदेहं त्यजन् दुःखग्राहात् ग्राहसदृशकृच्छ्राद्विमुच्यते ॥ ७८ ॥

प्रियेषु स्वेषु सुकृतमप्रियेषु च दुष्कृतम् ॥ विसृज्य ध्यानयोगेन ब्रह्माभ्येति सनातनम् ॥ ७९ ॥

(१) **मेधातिथिः** । प्रीतिपरितापकृतश्चित्तसंक्षोभोहर्षशोकादिलक्षणोऽनेनोपायेन परिहर्तव्यः यत्किञ्चित्प्रियंकरोति यन्मम सुकृतविशेषस्तस्येदंफलंनिष्पन्नं अहंभर्ता मम स्नेहबुध्या प्रियं न चायमेवं शक्नोति कर्तुं यन्ममायमप्रियं-

करोति तन्ममैव दुष्कृतंपीडाकरमित्येवंविमृश्य ध्यानयोगेन चित्ते भावयेत् अतोऽस्य न प्रियकारिणि रागोनाप्रियकारिणि द्वेषोजायते । एवंकुर्वाणः सनातनंशाश्वतंब्रह्माभ्येति अभिमुखंप्राप्नोति अचिरादिपथेन न व्यवधीयते । शाश्वतग्रहणादनावृत्तिः प्रतीयते ॥ ७९ ॥

(२) **सर्वज्ञनारायणः** । प्रियेषुस्वेष्विति एतेनब्रह्मविद् एतादृशीशक्तिर्यतः कर्माण्यपीच्छन्संचारयत्यतस्तस्यापिविप्रियंनकार्यमित्यत्रतात्पर्यम् ध्यानयोगेन ध्यानाभ्यासेन ब्रह्माभ्येति ॥ ७९ ॥

(३) **कुल्लूकः** । ब्रह्मविदात्मीयेषु प्रियेषु हितकारिषु सुकृतमप्रियेष्वहितकारिषु दुष्कृतंनिक्षिप्य ध्यानयोगेन नित्यंब्रह्माभ्येति ब्रह्मणि लीयते । तथाचश्रुतिः तस्यपुत्रादायमुपयन्ति सुहृदः साधुकृत्यंद्विषन्तः पापकृत्यमिति । अपराश्रुतिः ततस्तेषु सुकृतदुष्कृतेविधुनुते तस्य प्रियाज्ञातयः सुकृतमुपयन्त्यप्रियादुष्कृतमिति । एवमादीन्येव वाक्यान्युदाहृत्य सुकृतदुष्कृतयोर्हानिमात्रश्रवणेप्युपायनंप्रतिपत्तव्यमितिब्रह्ममीमांसायाम् । हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दःस्तुत्युपगायनवत्तदुक्तमित्यादिसूत्रैर्बादरायणेन निरणायि । ननु परकीयसुकृतदुष्कृतयोः कथंपरत्रसंक्रान्तिः । उच्यते । धर्माधर्मव्यवस्थायांशास्त्रमेव प्रमाणम् संक्रामोऽपि तयोः शास्त्रप्रमाणकएव । अतः शास्त्रात्संक्रमणयोग्यावेतौसिध्यतः । अतःशास्त्रेण बाधान्न प्रतिपक्षानुमानोदयःशुचिनरशिरःकपालंप्राण्यङ्गत्वात्शङ्खादिवदितिवत् । मेधातिथिगोविन्दराजौ तु स्वेषु प्रियेषु केनचित्कृतेषु ध्यानाभ्यासेनात्मीयमेवसुकृतम् तत्रकारणत्वेनारोप्य एवमप्रियेष्वपि केनचित्कृतेष्वात्मीयमेवप्राग्जन्मार्जितंदुष्कृतंकारणत्वेन प्रकल्प्योद्धृत्य तत्संपादयितारौ पुरुषौ रागद्वेषाख्यौ त्यक्त्वा नित्यंब्रह्माभ्येति ब्रह्मस्वभावमुपगच्छतीतिव्याचक्षाते । तन्न विसृज्येतिक्रियायांसुकृतंदुष्कृतमितिकर्मद्वयत्यागेन तत्संपादयितारावित्यश्रुतकर्माध्याहारात्क द्वयेचश्रुतक्रियात्यागेनकारणत्वेनप्रकल्प्येत्याद्यश्रुतक्रियाध्याहारात् । किंच व्यासव्याख्यातवेदार्थमेवमस्यामनुस्मृतेः । मन्ये न कल्पितंगर्वादर्वाचीनैर्विचक्षणैः ॥ ७९ ॥

(४) **राघवानन्दः** । सुहृदःसाधुकृत्यंद्विषन्तःपापकृत्यमित्यादिश्रुतिमाश्रित्य विद्वत्सत्कारनिन्दाविधानार्थंस्तुतिमाह प्रियेष्विति । प्रियेषु स्वेषु ज्ञातिषु अप्रियेषु द्विषत्सु च ध्यानेन निदिध्यासनेन युज्यते जन्यतइति ध्यानयोगोब्रह्मसाक्षात्कारस्तेन ततस्तंतं पश्यत्ध्यायमानइति श्रुतेर्ध्यानसाध्याब्रह्मधीरिति कृतसाक्षात्कारस्य ज्ञानेन पुण्यापुण्ययोर्दाहादन्यागामित्वस्य न्यायविरोधाद्धानौतूपायनमित्यादिन्याये निर्णीतत्वाच्च स्तुतिमात्रम् ॥ ७९ ॥

(५) **नन्दनः** । पुरातनयोश्च पुण्यपापयोस्त्यागोपायमाहप्रियेष्विति । प्रियेषु मित्रेषु । ध्यानयोगेन ब्रह्माभ्येतीत्यन्वयः ॥ ७९ ॥

(६) **रामचन्द्रः** । स्वेषु प्रियेषु पुत्रेषु बन्धुषु वा सुकृतंसुखं अप्रियेषु शत्रुषु दुष्कृतं ध्यानयोगेन विसृज्य सनातनंब्रह्माभ्येति प्राप्नोति ॥ ७९ ॥

यदा भावेन भवति सर्वभावेषु निःस्पृहः ॥ तदा सुखमवाप्नोति प्रेत्य चेह च शाश्वतम् ॥८०॥

(१) **मेधातिथिः** । चित्तधर्मोपदेशोयं न स्पृहा कार्याभिप्रेतवस्तूपादानपरिहारेण निःस्पृहत्वं अपितु तत्कारणत्यागेन भावश्चित्तधर्मोवात्मनोवाभिलाषलक्षणः सर्वभावेषु पदार्थवचनोद्वितीयोभावशब्दः । सर्वग्रहणेनावश्यकर्तव्येष्वपि पानभोजनादिषु शरीरस्थितिहेतुष्वभिष्वङ्गोनिषिध्यते न पुनरिच्छा । सा ह्यस्य भाविनीवस्तु सामर्थ्यजा बुभुक्षा पिपासा च भिन्ना चेच्छा स्पृहातो रागानुबन्धिनी द्रव्यनिमित्ता स्पृहा इच्छातु भोजनादौ भुक्तपीताहारपरिणामसमनन्तरंस्वयं उपजायते ॥ ८० ॥

(२) **सर्वज्ञनारायणः** । यदा भावेन मनसा सर्वभावेषु सर्वपदार्थेषु निःस्पृहो भवति । इह च जीवन्मुक्तिकाले ॥ ८० ॥

(३) **कुल्लूकः** । यदा परमार्थतो विषयदोषभावनया सर्वविषयेषु निरभिलाषो भवति तदेह लोके संतोषजन्यसुखं परलोके च मोक्षसुखमविनाशि प्राप्नोति ॥ ८० ॥

(४) **राघवानन्दः** । सुखप्राप्तिप्रकारमाह यदा भावेनेति । संसारदोषभावनया परमात्मभावनया वा भावेषु विषयादिषु । तदुक्तम् ॥ रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तत इति ॥ ८० ॥

(५) **नन्दनः** । अथ सर्वसङ्गत्यागमाह यदेति भावेनान्तःकरणेन । सर्वभावेषु सर्वविषयेषु । इह सुखं विषयार्जनभयत्वदुःखाभावः । शाश्वतं सुखं परं पदम् ॥ ८० ॥

(६) **रामचन्द्रः** । सर्वभावेषु विषयेषु उपरोधेषु भावेन मनसा यदा निःस्पृहो भवति ॥ ८० ॥

अनेन विधिना सर्वांस्त्यक्त्वा सङ्गाञ्छनैः शनैः ॥ सर्वद्वन्द्वविनिर्मुक्तो ब्रह्मण्येवावतिष्ठते ॥ ८१ ॥

(१) **मेधातिथिः** । संगांस्त्यक्त्वा सर्वान् । गवाश्वहस्तिहिरण्यदासभार्याक्षेत्रायतनादिषु ममेदमिति बुद्धिः संगः । तत्त्यागादेकारामतायाः परिग्रहः ग्रहणेन च एवं प्रथममुपाश्रित्यैनं प्राधान्येन । ततोऽनेन विधिना पूर्वोक्तेन क्रियाकलापेन बाह्याध्यात्मिकेनानुष्ठितेन ब्रह्मणि चिद्रूपेऽवतिष्ठते कर्माणि वक्ष्यति । सर्वद्वन्द्वैः शुभाशुभकर्मार्थैः सुखदुःखैर्विनिर्मुक्तो भवति ॥ ८१ ॥

(२) **सर्वज्ञनारायणः** । संगान् विषयरागान् । द्वन्द्वमशनापिपासे शोकमोहौ जरामृत्यू च द्वे द्विसमुदायत्वात् ब्रह्मण्येवावतिष्ठते ब्रह्म भवतीत्यर्थः ॥ ८१ ॥

(३) **कुल्लूकः** । पुत्रकलत्रक्षेत्रादिषु ममत्वरूपान्क्रमेण सङ्गान्सर्वांस्त्यक्त्वा द्वन्द्वैर्मानापमानादिभिर्निर्मुक्तोऽनेन यथोक्तेन ज्ञानकर्मानुष्ठानेन ब्रह्मण्येवात्यन्तिकं लयमाप्नोति ॥ ८१ ॥

(४) **राघवानन्दः** । ब्रह्मण्यवसानप्रकारमाह अनेनेति । शनैःशनैरित्ययमभिप्रायः आदौ क्रमप्राप्तस्त्रिदण्डी स्यात्ततएकदण्डी ततोऽदण्डीति अतएवाहं ब्रह्मास्मीति ब्रह्मणावस्थानम् । तथा च श्रुतिः दण्डान्लोकाग्नीन्विसृजेदितीत्युपक्रम्य वैणवं दण्डकौपीनं परिग्रहेन्न तथा न दण्डं न शिखां न कमण्डलुं यज्ञोपवीतं चरति परमहंसः तथात्मन्येवावतिष्ठत इति ॥ ८१ ॥

(५) **नन्दनः** । अनेन विधिनोक्तेन चातुराश्रम्यकर्मणा शनैःशनैर्गुरुसेवया स्नातकव्रतैस्तपश्चर्यया चेत्यर्थः । चतुर्थाश्रमे सर्वद्वन्द्वविनिर्मुक्तः ॥ ८१ ॥

(६) **रामचन्द्रः** । सर्वान्संगान्शनैः शनैः त्यक्त्वा सर्वद्वन्द्वं क्षुत्पिपासे शोकमोहौ एतादृशैर्विनिर्मुक्तः । ब्रह्मण्यवतिष्ठते ब्रह्मत्वरूपं प्राप्नोति ॥ ८१ ॥

ध्यानिकं सर्वमेवैतद्यदेतदभिशब्दितम् ॥ न ह्यनध्यात्मवित्कश्चित्क्रियाफलमुपाश्नुते ॥ ८२ ॥

(१) **मेधातिथिः** । ध्याने सति भवति ध्यानिकं ध्याने क्रियमाणे लभ्यते किं तद्यदेतदनन्तरमभिशब्दितमुक्तमाभिमुख्येन तात्पर्येण प्रतिपादितम् । सुकृतदुष्कृतयोस्त्वयोः प्रियाप्रियहेतुत्वन्यासः पुरुषस्य यदप्रियकर्तृत्वं तज्ज्वरस्यैव पीडाहेतुत्वमग्निरिवदुरुपसर्पणदग्धत्वं । यथानाऽग्निदग्धोग्निं द्वेष्टि एवं पुरुषमप्यप्रियकारिणं मन्यते न प्रतिषेद्धा स्यात् । एतच्च

ध्याने सति भवति । एकाग्रे चित्ते भवति सर्वकालमेतद्धृदयेनाभ्यसितव्यम् । यथा सुखदुःखे । इमेकर्मणःफलं न राजा सुखस्य ग्रामादेर्दाता अपितु मदीयायासेन प्रथमोपसर्पणलाभः । पूर्वकृतंपुण्यं कर्म दातृ न राजा । एवं दण्डेनोद्वेजयिता-कर्माणि मामुद्वेजयन्ति न राजा नापि शक्तोन्यःकश्चित् एतत्सर्वदा ध्यातव्यं चिन्तयितव्यं यदपि संसारवैराग्यजनना-योक्तमस्थिस्थूणमित्याद्यपि नित्यंभावनीयं नह्यनध्यात्मवित् । अध्यात्मंचित्तमत्रोच्यते । यदेतदभिशब्दितं नवेत्ति नानि-श्चिनोति नाभ्यासेन भावयति । अन्नक्रियार्थेदलेषु परितुष्टःपरिव्राजकस्य या भैक्षचर्या क्रिया ग्रामैकरात्रवासादिश्च न तत्फलंमोक्षाख्यंलभते । यावदस्थिस्थूणादिभावनया भावेनैव निरभिलाषता सर्वत्र नोत्पन्ना यावच्च कर्मसु फलन्यासेन रागद्वेषप्रहाणंन कृतमित्यर्थः । तच्च नित्यंयदा एवंचिन्तंयुज्यते तदा भवति नाकस्मादिति अथवा ब्रह्मण्येवावस्थितइति । एतस्य यदेतदभिशब्दितमिति परामर्शनम् । ब्रह्मण्यावस्थानंध्यानिकं नतु क्रियानुष्ठानमात्रलभ्यं किंतद्धयेयमित्यतआह नह्यनध्यात्मविदिति । आत्मानमधिकृत्य योग्रन्थोवेदान्तादि सोध्यात्मं नवेद । अथवाऽऽत्मन्यधियोनिर्वृत्तस्तदध्यात्मं । य-थायमात्मा देहेन्द्रियमनोबुद्धिप्राणादिव्यतिरिक्तःनैषांनाशेनश्यति । कर्ताकर्मणांप्राग्भोक्ता तत्फलानां भेदग्रहाकृष्टस्य सर्व-मेतद्भवति । यदा त्वयमपहतपाप्मा नदोषैर्नकार्यैःस्पृश्यतएकत्वादेषएव सर्वमिदंन ततोन्यद्व्यतिरिक्तमस्ति । प्रभासमात्रं पृथक्त्वं । हरिसवर्णसोदकादिकाउपनिषदोयोन वेदध्यानेनैकाग्रया संततया मत्या न दार्ढ्यमुत्पादयति सन यथोक्त-क्रियाफलंलभते । अतआत्मा वेदान्ताभिहितस्वरूपोनित्यमाहारविहारकालंवर्जयित्वा ध्येयइतिश्लोकार्थः । अथवा यद्यपि प्रव्रज्याधिकारस्तथापि गृहस्थस्यापि क्रियाफलग्रहेणनिर्देशःयदिक्रियाप्रधानः । अतएतदुक्तंभवति यद्यप्यग्निहो-त्रादीनि कर्माणि कुर्वते गृहस्थारहस्यविद्याविदश्च नभवन्ति याविद्याःकर्मसूपविष्टाउद्गीथाअथवा यावतीउद्गीथमन्वयन्त-इत्यादिना तेन निपुणाःकर्मकाण्डज्ञाअपि न ततःपरिपूर्णफलंचिरकालभाविलभन्ते । एषोर्थोवाजसनेयके छान्दोग्येच श्रु-तिद्वये निर्दिशितः । योवा एतदक्षरंगार्ग्यविदित्वा यजते जुहोति तपस्तप्यते बहून्यपि वर्षसहस्राणांतदेतद्भवतीति । तथा यदेव विद्यया करोति श्रद्धया परिषदा तदेव वीर्यवत्तरं भवति । छन्दोगोक्तयस्तु यथोक्ताम्ध्यात्मोपदिष्टांविद्यांविदित्वा करोति तस्यैव फलातिशयः उक्तंच तद्यइत्थंविदुर्यइमेरण्ये श्रद्धातपइत्युपासत इति यमभिसंभवतीत्यादिविजानतांकर्म-कारिणामर्चिरादिमार्गेण ब्रह्मलोकप्राप्तिमेषांश्रुतिराह ॥ ८२ ॥

(२) **सर्वज्ञनारायणः** । यदेतदभिशब्दितमुक्तंपूर्वाध्यायेषु कर्मकाण्डफलं तदपि सर्वं ध्यानिकं ध्यानजम् । अनध्यात्मविदात्मविषयज्ञानशून्यः । क्रियाफलं संपूर्णं तथाच श्रुतिः योवाएतदक्षरंगार्ग्यविदित्वा स्मिल्लोके जुहोति यजते तपस्तप्यते बहूनिवर्षसहस्राण्यन्तवदेवास्यतद्भवतीति ॥ ८२ ॥

(३) **कुल्लूकः** । यदेतदित्यत्यन्तसन्निधानात्पूर्वश्लोकोदितंपरामृश्यते । यदेतदुक्तंपुत्रादिममत्वत्यागोमानापमाना-दिहानिर्ब्रह्मण्येवावस्थानंसर्वमेवैतद्ध्यानिकमात्मनः परमात्मत्वेन ध्याने सति भवति । यदात्मानंपरमात्मेति जानाति तदा सर्वसत्वान्न विशिष्यते । तस्यनकुत्रचिन्ममत्वंमानापमानादिकंवा भवति तथाविधज्ञानात् ब्रह्मात्मत्वंच जायते ध्यानिकविशेषात् । ध्येयविशेषलाभे परमात्मध्यानार्थमाह नह्यनध्यात्मविदिति । यस्मादात्मानंजीवमधिकृत्य यदुक्तंत-स्यपरमात्मत्वंतद्योन जानाति न ध्यायति सप्रकृतध्यानक्रियाफलंममत्वत्यागमानापमानादिहानिमोक्षंच न प्राप्नोति ॥ ८२ ॥

(४) **राघवानन्दः** । ननुविद्यमाने जगति कथंब्रह्मण्येवावस्थानंतत्राह ध्यानिकंमिति । अभिशब्दितं शब्दबोध्यं शब्दज्ञानानुपातीवस्तुशून्योविकल्पः । तथा वाचारम्भणंविकारोनामधेयंमृत्तिकेत्येवसत्यमतःसर्वंजगद्ध्यानिकं सांक-ल्पिकं अतःसंकल्पाद्यधिष्ठानंनित्यात्मेति ज्ञाने कर्मफलप्राप्तिरपीत्याह नहीति । अथयोहवाअस्माल्लोकात्स्वंलोकमदृष्ट्वाप्रैतिसए-

वमविदितोन भुनक्तीति श्रुतेः । उक्तंच नाविदित्वाऽऽत्मनःपरलोकसंबन्धंकर्मत्वधिक्रियतइति । अतएव मेधातिथिः ध्यानिकं ध्याने क्रियमाणे लक्ष्यते किंतद्यदेतदनन्तरमभिशब्दितंतात्पर्येणोक्तंब्रह्मण्यवस्थानंतदविदोन क्रियाफलमपीत्याह नहीति । अथवैतमेवात्मानंवेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसेति ॥ सर्वकर्माखिलंपार्थज्ञानेपरिसमाप्यते इतिश्रुतिस्मृतिभ्यांसर्वकर्मणामात्मविधोपयोगिनिदिध्यासने पर्यवसानार्थमाह अनध्यात्मविदिति ॥ ८२ ॥

(५) **नन्दनः** । एवंप्रतिपादितमध्यात्मज्ञानंस्तौति ध्यानिकमिति । यदेतदभिशब्दितंचातुराश्रम्यंकर्म एतत्सर्वंध्यानकर्माध्यात्मज्ञानसाध्यमित्यर्थः । हिशब्दोहेत्वर्थः । कश्चिदाश्रमीतिशेषः ॥ ८२ ॥

(६) **रामचन्द्रः** । एतत्सर्वंध्यानिकं ध्यानीयं यदेतदभिशद्धितं कथितं । अनध्यात्मवित्कश्चित्क्रियाफलंनोपाश्नुते ॥ ८२ ॥

अधियज्ञं ब्रह्म जपेदाधिदैविकमेव च ॥ आध्यात्मिकं च सततं वेदान्ताभिहितं च यत् ॥ ८३॥

(१) **मेधातिथिः** । एवमात्मज्ञानार्थंध्येयेविहितेवेदजपे प्राप्ते तत्साधनतयातस्तंविधत्ते । जपमात्रमस्याभ्यनुज्ञायते न पुनर्गृहस्थादिवदभ्यासार्थमध्ययनम् । यज्ञेष्वधियज्ञं विध्यायकर्मब्राह्मणमाधिदैविकमाधिदैवंभवंदेवताप्रकाशकमन्त्रास्तेषामेव विशेषआध्यात्मिकमिति । अहंमनुरभवमहंभवमहंरुद्रेभिरित्यादि ॥ वेदान्तइति यदभिहितं तदपि कर्मज्ञानसमुच्चयं ब्रह्मत्वाद्दर्शयति ॥ ८३ ॥

(२) **सर्वज्ञनारायणः** । ध्यानाद्विरतस्य यत्कार्यंतदाह अधियज्ञमिति । अधियज्ञं यज्ञमधिकृत्य प्रवृत्तंभागं । ब्रह्म वेदं । आधिदैविकं । देवताश्रुतिमधिकृत्य प्रवृत्तंमन्त्रभागं । आध्यात्मिकं आत्मविषयमुपनिषद्भागं । वेदान्ताभिहितं वेदान्तेषुजप्यत्वेनोक्तमोंकाररूपंब्रह्म इदंवेदान्ताभिहितम् ॥ ८३ ॥

(३) **कुल्लूकः** । पूर्वंब्रह्मध्यानस्वरूपमुपासनमुक्तम् इदानींतदङ्गतया वेदजपंविधत्ते । तथाचश्रुतिः तमेतंवेदानुवचनेनब्राह्मणाविविदिषन्तीतिविद्याङ्गतया वेदजपमुपदिशति अधियज्ञमिति । यज्ञमधिकृत्य प्रवृत्तंब्रह्मवेदंतथादेवतामधिकृत्यप्रवृत्तंतथा जीवमधिकृत्य तथावेदान्तेषूक्तं सत्यंज्ञानमनन्तंब्रह्मेत्यादिब्रह्मप्रतिपादकंसर्वदा जपेत् ॥ ८३ ॥

(४) **राघवानन्दः** । अतएवाह अधीति । अधियज्ञं यज्ञमधिकृत्य प्रवृत्तंकर्मकाण्डंइषेत्वोर्जेत्वेत्यादि । ब्रह्म वेदं जपेत् आधिदैविकं देवताईश्वरादितद्विषयकं सहस्रशीर्षादिसंकर्षणकाण्डं । आध्यात्मिकं तत्वमसि सत्यंज्ञानमनन्तंब्रह्मेत्यादि वेदान्ताभिहितं वेदान्तपदवाच्यं जपेदित्यनुषज्यते ॥ ८३ ॥

(५) **नन्दनः** । यतएवंतस्माद्वेदस्य यःकश्चित्प्रदेशः संन्यासिनोऽध्यात्मज्ञानसहितोजप्यइत्याह अधीति । अधियज्ञंयज्ञमधिकृत्यप्रवृत्तंवेदंब्राह्मणभागमाधिदैविकंब्रह्मादिदेवानधिकृत्य प्रवृत्तंमन्त्रभागमाध्यात्मिकंब्रह्मोपनिषद्भागंवेदान्ताभिहितं ब्रह्मप्रणवंजपेत् । अध्यात्मज्ञानसहितमितिभावः । सच्छब्दआध्यात्मिकप्रणवजपयोरादरातिशयसूचकः ॥ ८३ ॥

(६) **रामचन्द्रः** । अधियज्ञं यज्ञमधिकृत्य ब्रह्म जपेत् यज्ञप्रतिपादकवेदभागं च पुनः आधिदैविकं देवतामधिकृत्य तत्स्वरूपप्रतिपादकं मन्त्रभागं च पुनः अध्यात्मिकं आत्मस्वरूपप्रतिपादकं एतत्त्रयं जपेत् । च पुनः यद्वेदान्ताभिहितं वेदान्तेनकथितमोंकारंसततंजपेत् ॥ ८३ ॥

---

(८३) यत्=सत् (नं०)

इदं शरणमज्ञानामिदमेव विजानताम् ॥ इदमन्विच्छतां स्वर्गमिदमानन्त्यमिच्छताम् ॥ ८४ ॥

(१) **मेधातिथिः** । इदमितिवेदाख्यंब्रह्माचष्टे सोपि ब्रह्मैव । तथाचोक्तं ॥ द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परंच यत् । शब्दब्रह्मणि निष्णातः परंब्रह्माधिगच्छति इति । अध्ययनविज्ञानंतदर्थानुष्ठानेन निष्णातता । पूर्वस्य विधेरयमर्थवादः । अज्ञानामतदर्थविदां जपादिष्वनधिकारेण तथाच भगवता व्यासेन सिद्धिर्जापकानांदर्शिता । अथवा अज्ञाअनात्मज्ञाः शास्त्रादनवगतात्मतत्वात्मत्वात् । अपि तदुपासना पराअलब्धचित्तस्थैर्यास्तेषांवेदशरणंजपेन कर्मानुष्ठानेन वा वृत्त्या च विद्यया नरकेषु कीटपतङ्गादियोनिषु चानुपपत्तेः इदमेव विजानतांकथंपुनर्विदुषांशरणमतआह । इदमन्विच्छतांस्वर्गं एतावेदेतेकर्मकाण्डज्ञाआत्मन्यलब्धमनःप्रतिष्ठावा तेषांकर्मानुष्ठानात्स्वर्गादिफललंभ्यते । इतरे त्यक्तसङ्गाप्रेक्षणीयरागादिदोषज्ञाआत्मतत्त्वोपासनापरास्तेषामानन्त्यमपुनरावृत्तिरिति सर्वेषांवेदएव शरणं नान्यःपन्थाअस्तीत्यर्थः ॥ ८४ ॥

(२) **सर्वज्ञनारायणः** । ब्रह्मशरणं रक्षकं । अज्ञानां ध्यानोचितज्ञानशून्यानां । विजानतां तादृक्ज्ञानवतां । आनन्त्यं मोक्षम् ॥ ८४ ॥

(३) **कुल्लूकः** । इदंवेदाख्यंब्रह्म तदर्थानभिज्ञानामपि शरणंगतिःपाठमात्रेणापि पापक्षयहेतुत्वात् सुतरांतज्जानतांतदर्थाभिज्ञानांस्वर्गमपवर्गंचेच्छातामिदमेव शरणं तदुपायोपदेशकत्वेन तत्प्राप्तिहेतुत्वात् ॥ ८४ ॥

(४) **राघवानन्दः** । सर्वसाध्ये वेदस्यैवसाधनत्वमाह इदमिति । इदं वेदरूपं अज्ञानां वेदार्थानभिज्ञानां पाठमात्रेण ऋचोधीतेइत्यादिफलहेतुत्वावगमात् । विजानतां कर्मकर्तव्यतया विदुषांतदुपायभूतम् । इदमेवस्वर्गमिच्छतांयागाद्यनुष्ठायिनामपीदंसाधनं यागादिबोधहेतुत्वात् । आनन्त्यंमोक्षमिच्छतांमुमुक्षूणां तदुपायतत्वज्ञानजनकत्वादिति तदुक्तमत्रैव । ब्राह्मणेषु च विद्वांसोविद्वत्सु कृतबुद्धयः । कृतबुद्धिषु कर्तारःकर्तृषु ब्रह्मवेदिनइति । उपवीतंवातत्प्रधानत्वादिति न्यायाद्वा सर्वसाधनस्तुत्याआत्मध्यानंविधत्ते इदमिति निवीतंमनुष्याणांप्राचीनावीतंपितॄणामुपवीतंदेवानामित्यत्रोपवीतमेव निवीतादिपदाभ्यांश्रूयते उपव्ययते देवलक्ष्ममेव तत्कुरुतइत्युपवीतस्य प्राधान्यवतइति न्यायार्थः । अथवाऽज्ञानामित्यादिपदचतुष्टयेन ब्रह्मचर्यादिचतुर्णांग्रहणम् ॥ ८४ ॥

(५) **नन्दनः** । आध्यात्मिकज्ञानमेवप्रकारान्तरेणस्तौति इदमिति । इदमध्यात्मज्ञानम् ॥ ८४ ॥

(६) **रामचन्द्रः** । इदमाध्यात्मिकादित्रयमज्ञानांपुंसांशरणम् ॥ ८४ ॥

अनेन क्रमयोगेन परिव्रजति योद्विजः ॥ सविधूयेह पाप्मानं परं ब्रह्माधिगच्छति ॥ ८५ ॥

(१) **मेधातिथिः** । क्रमेण योगोऽनुष्ठानं आत्मज्ञानकर्मणोःसमुच्चयेयःक्रमउक्तस्तेनऋणापाकरणंकृत्वेत्यर्थः । विधूय पाप्मानमश्वइवरोमाण्भासितथैवात्मविद्यया । यथोक्तंयथापुष्करपलाशआपोनश्लिष्यन्त्येवमेतद्विदि पापं कर्म नश्लिष्यतीति । परंब्रह्माधिगच्छति तद्रूपंसंपद्यते । निवृत्तभेदप्रहइतिविद्याश्रमफलविधिः ॥ ८५ ॥

(२) **सर्वज्ञनारायणः** । क्रमयोगेन ऋणत्रयापाकरणपूर्वकम् ॥ ८५ ॥

(३) **कुल्लूकः** । अनेन यथाक्रमोक्तानुष्ठानेन यः प्रव्रज्याश्रममाश्रयति सइहलोके पापंविसृज्य परंब्रह्म प्राप्नोति । ब्रह्मसाक्षात्कारेणोपाधिशरीरनाशाद्ब्रह्मण्यैक्यंगच्छति ॥ ८५ ॥

(४) राघवानन्दः । अतआह अनेनेति ब्रह्मचर्यसमाप्य गृहीभवेत् गृहीभूत्वा वनीभवेत् वनीभूत्वा प्रव्रजेदिति ॥ ८५ ॥

(५) नन्दनः । एवंप्रतिपादितस्य यत्याश्रमस्य फलमाह अनेनेति अनेनोक्तेन यत्याश्रमधर्मकर्मानुष्ठानेन चातुराश्रम्यक्रमयोगेनेति ॥ ८५ ॥

(६) रामचन्द्रः । इह शरीरं विधूय परंब्रह्माधिगच्छति ॥ ८५ ॥

एषधर्मोनुशिष्टोवोयतीनां नियतात्मनाम् ॥ वेदसंन्यासिकानां तु कर्मयोगं निबोधत ॥८६॥

(१) मेधातिथिः । वेदस्य संन्यासः त्यागः सएषामस्तीति वेदसंन्यासिकाः । वेदशब्देन यागहोमादेःकर्मणस्त्यागउच्यते न पुनर्जपत्यागः । आत्मचिन्तनंतु विहितमेव केवलंअतः स्वाध्यायः शरीरक्लेशसाध्याश्च तीर्थयात्रादयउपवासादयश्च निषिध्यन्ते । यानि त्वात्मैकसाधनसाध्यानि सन्ध्याजपादिककर्माणि तेषामनिषेधः । तदेतत्स्वस्थानएव दर्शयिष्यामः । आद्येनार्धेन प्रव्रज्याश्रमोपसंहारः उत्तरेण वेदसंन्यासिकस्य कर्मोपदेशप्रतिज्ञा ॥ ८६ ॥

(२) सर्वज्ञनारायणः । यतीनां यमवतां । नियतात्मनां नियमवतां । पक्वकषायाणां परिव्राजकानामिति यावत् । वेदसंन्यासिकानां अपक्वतया कषायस्य ध्यानप्रवृत्तावशक्तानां गृहस्थानां मोक्षहेतौ वेदाभ्यासएवात्मानं संन्यस्तानां । कर्मयोगं कर्तव्यमुद्यमम ॥ ८६ ॥

(३) कुल्लूकः । एषःयतीनांयतात्मनांचतुर्णामेव कुटीचरबहूदकहंसपरमहंसानांसाधारणोधर्मोवोयुष्माकमुक्तः इदानींयतिविशेषाणांकुटीचराख्यानांवेदविहितादिकर्मयोगिनामसाधारणंवक्ष्यमाणंपुत्रैश्वर्येसुखंवसेदिति कर्मसंबन्धंशृणुत । भारते चतुर्धाभिक्षवउक्ताः ॥ चतुर्धाभिक्षवस्तु स्युः कुटीचरबहूदकौ । हंसःपरमहंसश्चयोयःपश्चात्सउत्तमइति ॥ कुटीचरस्यायंपुत्रभिक्षाचरणरूपासाधारणकर्मोपदेशः । गोविन्दराजस्तु गृहस्थविशेषमेव वेदोदिताग्निहोत्रादिकर्मत्यागिनंज्ञानमात्रसंपादितवैदिककर्माणंवेदसंन्यासिकमाह । तन्न यतोगृहस्थस्याहिताग्नेरन्त्येष्टौ विनियोगश्चतुर्थाश्रमाश्रयणे चात्मनि समारोपः शास्त्रेणोच्यते तदुभयाभावेसत्येवमेवाग्नीनांत्यागः स्यात् । गोविन्दराजोगृहस्थंवेदसंन्यासिकंब्रुवन् । एवमेवाहिताग्नीनांत्यागमर्थादुपेतवान् वेदसंन्यासिकंमेधातिथिःप्राहनिराश्रमम । तन्मतेचातुराश्रम्यनियमोक्तिः कथंमनोः ॥ ८६ ॥

(४) राघवानन्दः । यतिधर्ममुपसंहरति एषइति । यतीनां त्रयाणां बहूदकहंसपरमहंसभेदेन । वेदसंन्यासिकानां कुटीचकानां वेदोक्ताग्निहोत्रादिकर्मत्यागिनां नतु तज्जपत्यागिनामितिमेधातिथिः ॥ ८६ ॥

(५) नन्दनः । एवंप्रतिपादितस्य संन्यासउपपद्यते नान्यस्येत्याह एषइति । एतच्छब्देनात्रफलाभिसंन्धियुक्तंकर्मविवक्षितम । तस्य त्यागोवेदसंन्यासस्तद्वान्वेदसंन्यासिकः । नहि वेदस्य शब्दराशिरूपस्य संन्यासउपपद्यते । वेदसन्यासिकानांब्रह्मत्वेन नियतोवेदमभ्यस्यन्निितिवक्ष्यमाणत्वात् । कर्मयोगंवक्ष्यमाणंदशलक्षणंधर्मात्मकम ॥ ८६ ॥

(६) रामचन्द्रः । हेद्विजाः नियतात्मनां नियमवतां पक्वकषायाणांयतीनां एषधर्मअनुशिष्टः कथितः । वेदसंन्यासिकानां अपक्वकषायतया मोक्षहेतोर्वेदाभ्यासरतात्मनांकर्मयोगंनिबोधत ॥ ८६ ॥

ब्रह्मचारी गृहस्थश्च वानप्रस्थोयतिस्तथा ॥ एते गृहस्थप्रभवाश्चत्वारः पृथगाश्रमाः ॥ ८७ ॥

(१) मेधातिथिः । ननुच संन्यासिककर्माणि वक्ष्यामीति प्रतिज्ञयाऽऽश्रमानुक्रमणमप्रकृतं केचिदाहुर्नसंन्यासआश्रमान्तरमत्रैवान्तर्भावोस्येतिदर्शयितुम् । सच कस्मिन्गृहस्थेन्तर्भावितः गृहेहि वासस्तस्य । अन्यैस्तु प्रव्रज्यायांसंगत्यागसा

संन्यायतो नास्यान्तर्भावे प्रयोजनं पुरुषधर्मैर्यतिधर्मैश्च नयागादावधिकरिष्यति । वैशेषिकैश्च लशब्दविधानादनाश्रमित्वात्संवत्सरमनाश्रमीति प्रायश्चित्तप्रसङ्गादितिचेत् वचने नैवास्याव्यवस्थायाविहितत्वात्कुतःप्रायश्चित्तप्राप्तम् । तस्माद्गृहस्थादितुल्यतया संन्यासिकंप्रशंसितुमाश्रमान्तरसंकीर्तनम् तच्च समुच्चयंद्रढयितुं गृहस्थानमवस्थितिरेषामित्यर्थः । गृहस्थः प्रभवः स्थितिहेतुरेषामितिविग्रहः ॥ ८७ ॥

(२) **सर्वज्ञनारायणः** । तत्र गार्हस्थ्यमेव तावत्स्तौति ब्रह्मचारीति । एतेगृहस्थप्रभवाः । गृहस्थस्यैवापत्योत्पादकत्वात् अनुत्पन्नानांचाश्रमायोगात् ॥ ८७ ॥

(३) **कुल्लूकः** । इदानींवेदसंन्यासिकस्य प्रतिज्ञातेकर्मयोगेऽनन्तरंवक्तुमुचितेऽपि वेदसंन्यासिकः पंचमाश्रमी निराश्रमी वा चत्वारएवाश्रमानियताइति दर्शयितुमुक्तानाश्रमाननुवदति ब्रह्मचारीति । ब्रह्मचर्यादयोयएते पृथगाश्रमाउक्ताएते चत्वारएवगृहस्थजन्याभवन्ति ॥ ८७ ॥

(४) **राघवानन्दः** । कुटीचकाख्यानांवेदसंन्यासिकत्वेन पञ्चमाश्रमत्वंप्राप्तमितिशङ्कास्यात्तदर्थमुक्तानाश्रमाननुवदति ब्रह्मचारीति । एषांनैष्ठिकोपकुर्वाणषट्कर्मत्रिकर्मवालखिल्यफेनपकुटीचकबहूदकाद्यवान्तरभेदेपि चत्वारएवतइति । गृहस्थप्रभवागृहस्थमाश्रित्यैव प्रकर्षेणतेभवन्ति । गृहस्थस्यापि शिलोञ्छनादिवृत्तिर्गृहस्थमाश्रित्यैव भवति । यद्वागृहस्थस्यैव सर्वे चत्वारःपुत्रास्तदन्येषांपुत्राभावादिति तथाच गौतमसूत्रं एषा गृहस्यैकायोनिरिति ॥ ८७ ॥

(५) **नन्दनः** । न केवलं चतुर्थाश्रमएव वेदसंन्यासिकस्य परमगतिप्राप्त्युपायः किंतु यःकश्चिदप्याश्रमइति श्लोकद्वयेनाह ब्रह्मेति । ब्रह्मचारी ब्रह्मचर्यम् । भावप्रधाननिर्देशः । एवमुत्तरत्रापि । गृहस्थप्रभवागार्हस्थ्यमूलाः । अनेनगार्हस्थ्यस्य श्रैष्ठ्यंसूचितम् ॥ ८७ ॥

सर्वेऽपि क्रमशस्त्वेते यथाशास्त्रं निषेविताः ॥ यथोक्तकारिणं विप्रंनयन्तिपरमां गतिम् ॥ ८८ ॥

(२) **सर्वज्ञनारायणः** । सर्वेपि क्रमशो न व्युत्क्रमेण । यथाशास्त्रं नतु स्वेच्छया । आश्रमधर्मपरिग्रहेण यथोक्तकारिणं मोक्षानुगुणत्वेनोक्तानां क्रमान्नैष्ठिकधर्मवेदसंन्यासमहाप्रस्थानध्यानाभ्यासानां कर्तारं । परमांगतिं मोक्षं नयन्ति नतु यत्याश्रममात्रं । तथाच सर्वप्रभवत्वान्मोक्षहेतुत्वादगार्हस्थ्यं प्रशस्ततरमित्यर्थः ॥ ८८ ॥

(३) **कुल्लूकः** । एते सर्वे चत्वारोऽप्याश्रमाःशास्त्रानतिक्रमेणानुष्ठिताः । अपिशब्दात्त्रयोद्वावेकोऽपि यथोक्तानुष्ठातारंविप्रंमोक्षलक्षणांगतिंप्रापयन्ति ॥ ८८ ॥

(४) **राघवानन्दः** । सर्वे धर्माब्रह्मचर्यादयः क्रमशउक्तक्रमेण निषेविताअनुष्ठिताः । यथोक्तकारिणं यथाविध्याश्रमचतुष्टयानुष्ठातारं । विप्रमिति मनुवचनाद्बिमदेहस्यैव संन्यासात्मज्ञानान्मुक्तिः । ब्राह्मणाविविदिषन्ति ब्राह्मणाःपुत्रैषणायाश्च सब्राह्मणःकेन स्यादितिब्राह्मणश्रुतेः । गर्भस्थोवामदेवःप्रतिपेदइतिमन्त्रलिङ्गात् श्वेतकेतुभृग्वादिसंवादात् । काश्यादिमृतानामप्यन्येषांतात्कालिकविप्रदेहोनुमेयइति परमामितिविशेषणान्मोक्षाख्याम् ॥ ८८ ॥

(५) **नन्दनः** । यथोक्तकारिणंनतुयथोक्तफलैषिणम् ॥ ८८ ॥

सर्वेषामपि चैतेषां वेदस्मृतिविधानतः ॥ गृहस्थउच्यतेश्रेष्ठः सत्रीनेतान्बिभर्तिहि ॥ ८९ ॥

(१) **मेधातिथिः** । इदमयुक्तंवर्तते वेदशास्त्रश्रुत्या गार्हस्थस्य विधानंप्रतिज्ञायते । इतरेषांच भर्तव्यत्वम् । गार्हस्थस्य प्रत्यक्षश्रुतिविधानेनैवाश्रमान्तराणांसद्भावः । संनिहिततपःस्मृतिभ्योबलीयसी श्रुतिः । अथोच्येत नैवायमभिसंबन्धः

क्रियते वेदश्रुत्याविधानादित्यभिसंबन्धः सत्यपिचैतान्विविधाने गृहस्थस्य श्रैष्ठ्यंतद्भरणनिमित्तंसत्रीनेतानित्यनेन प्रतिपाद्यते । तत्र वक्तव्यंकथमाश्रमान्तराणांश्रुतत्वात् श्रौतत्वे च स्पष्टेयं स्मृतिर्विरुध्यते । प्रत्यक्षविधानाद्गार्हस्थ्यस्येत्यादिना यः संबन्धान्तरसंभवः । अथोच्येत गृहीभूत्वावनीभवेत् वनीभूत्वाप्रव्रजेदिति जाबालश्रुतिमपेक्ष्य सर्वाण्येवाश्रुतानीति स्मृतिविरोधस्तावदपरिहृतएव । किंच नैषाश्रुतिर्विधात्री न ह्येतत्श्रुतं एवंवने वा परिहर्तव्यानीमानि वनस्थेनैव कर्माणिकर्तव्यानीमानि प्रव्रजितेनेति । यथाऽऽधानात्प्रभृत्याचरमेष्टिसर्वंगृहस्थकर्म आश्रमान्तराणांकेवलंनाममात्रंश्रूयते गृहीभूत्वेत्यादि तस्मात्पूर्वापरविरुद्धंगार्हस्थ्यंवेदमूलमाश्रमाणांचोपदेश्यम् । अत्रोच्यते सत्यमाधानात्प्रभृति गृहकर्माणिप्रत्यक्षश्रुतानि कृतदारपरिग्रहस्य तत्र विवाहे प्रयुक्तिनिरूपणात्किकर्म श्रुतिभिः प्रयुज्यते अग्निहोत्रादिभिः स्वाहाकारः श्रुतेरथापत्योत्पत्तिविधिनाउतदृष्टेन पुरुषार्थेन अनुरागःस्त्रीमात्रंप्रयुङ्क्ते न विवाहं येन विनायन्ननिष्पद्यते तत्तस्य प्रयोजकमिति न्यायः । रागिणांच स्त्रीमात्रेण गृह्यकर्मनिर्वृत्तिः किमिति विवाहमपेक्षेरन सत्यं यदि वचनान्तरेस्त्रीमात्रगमनंनिषिद्धंस्यात् । समानेपि सर्वत्र वेदाधिगमे शास्त्रतोगम्यागम्यविवेकः । अतश्च धीरप्रकृतीनां न विवाहमन्तरेण स्वार्थसंपत्तिरितियुक्तेरेव वेदस्य प्रयोजकाशङ्का यद्येवं सर्वस्य न प्रयोजकानि सन्ति सर्वेषांतस्मिन्सत्यर्थनिवृत्तौ किंतेन निरूपितेन योस्ति विवाहप्रयोजकः सोस्तु आश्रमान्तराणि प्रत्यक्षविधाने गार्हस्थस्य कथमुपपद्यन्तइत्येतदधिकृतं विवाहप्रयुक्तिविनातु केन संगच्छते । उच्यते यावदुक्तंसर्वेषामर्थसिद्धिरिति सत्यं एकेन प्रयुक्तावन्यस्य प्रसंगादुपकारसिद्धौ न पृथक्प्रयोक्तृत्वकल्पना यथाव्रीयहःपुरुषार्थेन जीवनेन प्रयुक्ताःकर्मसु विनियुज्यन्ते । न कर्मणि धनार्जनंप्रयुज्यते यथा वाविद्या सत्यपि वेदस्यानधिकारे न प्रयुज्यते स्वाध्यायविधिनैवतत्सिद्धेः । एवमिह कामतःप्रवृत्तिसिद्धेर्नकर्मश्रुतयःप्रयोक्तव्याः तेनाकृतविवाहमपि कृत्यकर्मविधयउपपत्स्यन्ते अतश्च योब्रह्मचर्मएवकथंचित्परिपक्वकषायस्सन विवक्षते ततस्सद्वितीयत्वाभावान्नाधिकरिष्यते । अतश्च श्रौतेष्वनधिकारात्तादृशस्याश्रमान्तरतापत्स्येत । अन्ये मन्यन्ते नायंधनतुल्योविवाहः यथा धनेन विना जीवनमनुपपन्नमिति सर्वे जीवेद्धनतः एवं न स्त्रियमन्तरेण जीवनाभावइत्यतएव न दृष्टंनियमिनः प्रयोजनंसंभवतीतिधर्माधिकारार्थोपि युक्तोविवाहः अवश्यंचैतदेवंविज्ञेयमधिकारोत्पत्त्यर्थेयत्नः कर्तव्यइति । इतरथा हि कृतोत्सर्गस्याशुचित्वादधिकारापनये जननादि शुद्धकालावस्थे च संपादयतोन नित्यकर्मातिक्रमः स्यात् । ततश्च केनार्थेन मृतादि शुद्ध्यवधिक्लेशमादध्यात् तदपि विहितमेवेतिचेत् एवंतावन्मात्रस्यातिक्रमोनपुनर्विधिसहस्य । अथोच्येत कस्य पुनर्विधेरयंव्यापारोयदपि कृतत्वसंपत्त्यर्थमधिकृतः स्यामिति पुरुषेण यत्नः कर्तव्यइत्युपदिशति । एतावदग्निहोत्रादिविधयस्तेयस्याम्नायस्तद्विषयांकर्तव्यतांगमयन्ति न त्वग्नीनामुत्पत्तिप्रयुञ्जते । अग्नयोपि काम्येषु लिप्सया प्रवर्तमानेन तदधिकारसिध्यर्थमाधीयन्ते । तथाहि तेषु जातेष्वाहिताग्नित्वेयावज्जीवश्रुतयः । भार्यावतश्चाधानेऽधिकारः यथैवाधिकारिणमात्मानंकर्तुमग्नीनाधत्ते एवंभार्यामप्युपयच्छते अतोन कस्यचिद्विधेरर्थोविहितोयदिनाग्निहोत्रादिष्वधिकारोजनयितव्यः नच विवाहविधिरेवस्वार्थकर्तव्यतामवगमयति नित्याग्निहोत्रादिश्रुतिवत्संस्कारकर्मत्वादधिकारश्रवणाभावाच्च अत्र पूर्ववदन्ति । ऋणत्रयापाकरणश्रुतिरस्ति जायमानोवैब्राह्मणस्त्रिभिर्ऋणैर्ऋणवान्प्रजायतइत्यादि । एषा श्रुतिर्जातमात्रनिबन्धना । नचात्र जन्मद्वितीयमुपनयनाख्यमभिप्रेतंप्राक्ततस्तिर्यक्समानधर्मत्वात् । आधानेजन्मनि सति यावता कालेनाधिकारावगमोभवति तदेव ऋणश्रुत्या परिगृह्यते । ततश्च विदुषः स्सत्यधिकारे यः कन्यांयाचमानोन प्राप्नुयाद्यावत्सर्वतः पलितस्तस्य वानप्रस्थादावधिकारः । सह्येतन्निश्चिनोति यौवने वा याकन्यासर्वतरमिदानींयाचतेकथमसौ कृष्णकेशस्यैवाधानंश्रुतंभार्यामप्येवमर्थित्वा न सर्वतः पलितेनाधातव्यमितिश्रुत्यर्थंव्याचक्षते कर्मसंबन्धाद्गृहस्थः श्रेष्ठः अत-

आश्रमस्यैव श्रैष्ठ्यमुक्तंभवति त्रीनेतानिति । इदमपरंश्रैष्ठ्यकारणंयदन्येषामाश्रमाणांभरणं । तदुक्तं ज्ञानेनान्नेन चेति ॥ ८९ ॥

(२) **सर्वज्ञनारायणः** । तदेव प्रकृतमाह सर्वेषामिति । वेदेश्रुतितः शब्दाभिधानवृत्त्या गृहस्थस्य धर्माणामेव बाहुल्येन विधानदर्शनादितरधर्माणांतुक्वचिदेव विधानाद्बहुत्वत्तात्पर्यं गार्हस्थ्यधर्मएव श्रुतेरित्यर्थः । श्रेष्ठत्वेहेत्वन्तरमाह सत्रीनिति । त्रीनाश्रमान् बिभर्ति पुष्णाति तस्माद्गृहस्थाश्रमं परोपकारबाहुल्यात्तस्य च सत्त्वशुद्धित्वाद्गृहस्थएव श्रेष्ठः ॥ ८९ ॥

(३) **कुल्लूकः** । प्रकृतवेदसंन्यासिकस्य गृहे पुत्रैश्वर्यसुखेवासंवक्ष्यति तदर्थंगृहस्थोत्कर्षमाह सर्वेषामिति । सर्वेषामेतेषांब्रह्मचार्यादीनांमध्ये गृहस्थस्यश्रूयमाणत्वेन प्रायशोऽग्निहोत्रादिविधानाद्गृहस्थोमन्वादिभिः श्रेष्ठउच्यते । तथा यस्माद्ब्रह्मचारिवानप्रस्थयतीनसौ भिक्षादानेन पोषयति तेनाप्यसौश्रेष्ठः यथोक्तं यस्मात्त्रयोऽप्याश्रमिणोज्ञानेनान्नेनान्नेनचान्वहमिति ॥ ८९ ॥

(४) **राघवानन्दः** । किंच सर्वेषामिति । विधानमाचरंस्तेभ्यस्त्रीनेतान्बिभर्तीति कृत्वा श्रेष्ठः । वानप्रस्थस्यापि गृहस्थकालीनविद्याद्युपजीवित्वात् ॥ ८९ ॥

(५) **नन्दनः** । तथापिवेदसंन्यासिकस्य गृहस्थाश्रमश्रेष्ठतरइत्याह सर्वेषामिति । वेदस्यस्मृत्याःप्रत्यक्षेण विधानतःवैदिकानामाधानादीनांकर्मणांगृहस्थमधिकृत्य विधानस्य प्रत्यक्षश्रुतिमूलत्वादित्यर्थः ॥ ८९ ॥

(६) **रामचन्द्रः** । सगृहस्थः त्रीनेतानाश्रमान्बिभर्ति ॥ ८९ ॥

यथा नदीनदाः सर्वे सागरे यान्ति संस्थितम् ॥ तथैवाश्रमिणःसर्वे गृहस्थे यान्ति संस्थितम् ॥९०॥

(१) **मेधातिथिः** । एषएवार्थोदृष्टान्तेनदृढीक्रियते । नद्योगङ्गाद्याभिद्यादयोनदाः केनचिदाधारसन्निवेशभेदेन रसभेदेन च नदीनदयोर्निर्देशभेदः एकत्वविधानंतु रूढ्या लिङ्गभेदेभार्यादारशब्दवत् । संस्थितिराश्रमः समुद्रोयथासर्वजलाश्रयएवंगृहस्थः सर्वधर्माधिकृतवान् ॥ ९० ॥

(२) **सर्वज्ञनारायणः** । हेत्वन्तरमाह यथेति । संस्थितिमवस्थानं ब्रह्मचर्यपूर्वकत्वादाश्रमान्तराणां तस्यच गृहस्थाश्रयणनियतत्वात् अतोविश्वस्याश्रयणीयत्वादपि श्रेष्ठइत्यर्थः ॥ ९० ॥

(३) **कुल्लूकः** । यथा सर्वे नदीनदागङ्गाशोणाद्याः समुद्रेऽवस्थितिंलभन्ते एवंगृहस्थादपरे सर्वाश्रमिणस्तदधीनजीवनत्वाद्गृहस्थसमीपेऽवस्थितिंलभन्ते ॥ ९० ॥

(४) **राघवानन्दः** । किंच यथेति । संस्थितिं गृहस्थसमीपेइति कुल्लूकः । संस्थितिं मृतिं प्राप्य गृहस्थेष्वेव यान्तिजायन्तइति वार्थः । गृहस्थे सति सम्यकूस्थितिंवा तएव गृहस्थप्रभवाइत्युक्तं । गृहस्थंसर्वधर्मेष्वधिकृत्यर्थमर्थवादइतिमेधातिथिः ॥ ९० ॥

(५) **नन्दनः** । संस्थितिम् प्रतिष्ठाम् ॥ ९० ॥

(६) **रामचन्द्रः** । संस्थितिं एकत्रस्थितिम् ॥ ९० ॥

चतुर्भिरपि चैवैतैर्नित्यमाश्रमिभिर्द्विजैः ॥ दशलक्षणकोधर्मः सेवितव्यः प्रयत्नतः ॥ ९१ ॥

(१) **मेधातिथिः** । वक्ष्यमाणोपन्यासार्थः श्लोकः । दशलक्षणानि यस्येति बहुव्रीहिः । लक्षणंस्वरूपं । सेवि-

तव्यः सर्वकालमनुष्ठेयः । उक्तानामप्येतेषांप्रधानत्वाय पुनर्वचनं । ज्ञानकर्मसमुच्चयपक्षश्चानेन पुनर्वचनेन दृढीकृतः ॥९१॥

(२) सर्वज्ञनारायणः । वेदसंन्यासिकधर्ममप्रक्रम्य प्रसङ्गादन्येष्वप्युपदिशति चतुर्भिरिति ॥ ९१ ॥

(३) कुल्लूकः । एतैर्ब्रह्मचार्यादिभिराश्रमिभिश्चतुर्भिरपि द्विजातिभिर्वक्ष्यमाणोदशविधस्वरूपोधर्मःप्रयत्नतः । सततमनुष्ठेयः ॥ ९१ ॥

(४) राघवानन्दः । चतुर्णांसाधारणधर्मानाह चतुर्भिरिति ॥ ९१ ॥

(५) नन्दनः । एतैर्वेदसंन्यासिकैः ॥ ९१ ॥

धृतिः क्षमा दमोऽस्तेयंशौचमिन्द्रियनिग्रहः ॥ धीर्विद्या सत्यमक्रोधोदशकं धर्मलक्षणम् ॥ ९२ ॥

(१) मेधातिथिः । धृत्यादयआत्मगुणाः तत्र धृतिर्नाम धनादिसंक्षये सत्वाश्रयः । यदिक्षीणंततःकिंशक्यमर्जयितुमिति । एवमिष्टवियोगादौ संसारगतिरियमीदृशीति प्रचलतश्चित्तस्य यथापूर्वमवस्थापनम् । क्षमा अपराधमर्षणम् । कर्स्मिश्चिदपराद्धरि प्रत्युद्वेजनानारम्भः । दमः अनौद्धत्यं । विद्या मदादित्यागः । अस्तेयंप्रसिद्धं । शौचमाहारादिशुद्धिः । इन्द्रियसंयमः अप्रतिषिद्धेष्वपि विषयेष्वप्रसंगः । धीःसम्यग्ज्ञानं प्रतिपक्षसंशयादिनिराकरणम् । विद्याऽऽत्मज्ञानं कर्माध्यात्मज्ञानभेदेन धीविद्ययोर्भेदः । एतत्पौनरुक्ततया धोविद्येतिपठन्ति तन्न सम्यक् भेदस्य दर्शितत्वात । अन्यत्प्रसिद्धम् । अक्रोधः उत्पत्स्यमानस्यानुत्पत्तिः क्षमाकृतेप्यपकारेऽपकारानारम्भः ॥ ९२ ॥

(२) सर्वज्ञनारायणः । धृतिः प्रारब्धकर्मणि दुःखेसत्यनुद्वेगः । क्षमा क्रोधहेतूत्पत्तावपि तदनुत्पादः । दमस्तपःक्लेशसहता । अस्तेयं परपरिगृहीतेष्वस्पृहा । शौचं मृदादिभिः । इन्द्रियाणांनिग्रहोविषयेष्वप्रवर्तनं । ह्रीरकार्यान्निवर्तकं ज्ञानं । विद्याऽत्मोपासना । सत्यं मिथ्याहितात्मकवाक्यानुक्तिः । अक्रोधः दैवादुत्पन्ने क्रोधे तन्निवर्तनप्रयत्नः । धर्मलक्षणं धर्मकारणम् ॥ ९२ ॥

(३) कुल्लूकः । तमेवस्वरूपतःसंख्यादिभिश्चदर्शयति धृतिरित्यादि । संतोषोधृतिः । परेणापकारे कृते तस्य प्रत्यपकारानाचरणम् क्षमा । विकारहेतुविषयसन्निधानेऽप्यविक्रियत्वंमनसोदमः मनसोदमनंदमइतिसन्दवचनात् । शीतातपादिद्वन्द्वसहिष्णुतादमइति गोविन्दराजः । अन्यायेन परधनादिग्रहणं स्तेयंतद्भिन्नमस्तेयम् । यथाशास्त्रंमृज्जलाभ्यांदेहशोधनंशौचम् । विषयेभ्यश्चक्षुरादिवारणमिन्द्रियनिग्रहः । शास्त्रादितत्त्वज्ञानंधीः । आत्मज्ञानंविद्या । यथार्थाभिधानंसत्यम् । क्रोधहेतौसत्यपि क्रोधानुत्पत्तिरक्रोधः । एतद्दशविधंधर्मस्वरूपम् ॥ ९२ ॥

(४) राघवानन्दः । तानेवाह धृतिरिति । धृतिः स्वस्वधर्मास्खलनं । क्षमा द्वन्द्वसहिष्णुता । दमोमनसोनिग्रहः । शौचं बाह्यमाभ्यन्तरं । धीः शास्त्रतत्वज्ञानं । विद्यात्मज्ञानंसगुणोपासना वा ॥ ९२ ॥

(५) नन्दनः । दशलक्षणंधर्ममाह धृतिरिति । धृतिःस्वधर्मापरित्यागः । क्षमाऽवमानसहत्वम् । दमोऽनुद्धतिः । ह्रीर्निषिद्धकरणे लज्जा धीरितिपाठेऽध्यवसायः । विद्या बाहुश्रुत्यम् । अक्रोधोवाञ्छितार्थप्रतिघातिषु चित्तस्याविकारः ॥ ९२ ॥

(६) रामचन्द्रः । धृतिः कार्यानुद्वेगः । क्षमाशान्तिः । दमः तपः क्लेशसहिष्णुता । अस्तेयं परद्रव्यनिस्पृहता ।

---

(९२) धीर्विद्या=ह्रीर्विद्या (क, ख, ग, घ, ण, नन्दनश्च)

शौचं मृत्तिकादिभिः । इन्द्रियनिग्रहः । न्हीः अकार्यान्निवर्तनं । विद्या आत्मोपासना । सत्यं यथार्थभाषणं । अक्रोधः । एवंधर्मलक्षणदशकंसंपूर्णम् ॥ ९२ ॥

दशलक्षणानि धर्मस्य ये विप्राः समधीयते ॥ अधीत्य चानुवर्तन्ते ते यान्ति परमां गतिम् ॥ ९३ ॥

(१) **मेधातिथिः** । पूर्वस्य विधेःफलकथनं । अध्ययनात्फलश्रुतिरनुष्ठानश्रुत्यर्था ॥ ९३ ॥

(२) **सर्वज्ञनारायणः** । समधीयते जानन्ति । अनुवर्तन्ते अनुतिष्ठन्ति । अज्ञात्वाऽनुष्ठानस्याफलत्वात् ज्ञानेऽपि फलोक्तिः ॥ ९३ ॥

(३) **कुल्लूकः** । ये विप्राएतानि दशविधधर्मस्वरूपाणि पठन्ति पठित्वा चात्मज्ञानसाचिव्येनानुतिष्ठन्ते ते ब्रह्मज्ञानसमुत्कर्षात्परमांगतिंमोक्षलक्षणांप्राप्नुवन्ति ॥ ९३ ॥

(४) **राघवानन्दः** । वेदाभ्यासार्थमेव संन्यासी वेदसंन्यासी तस्य च कृत्यमाह दशेतिद्वाभ्यां । एतेषामध्ययनेनापि कृतकृत्यतामाह अधीयतइति । अनुवर्तन्ते शब्दतोर्थतश्चाभ्यस्यन्ति परमामनुपमाम् ॥ ९३ ॥

(५) **नन्दनः** । वेदसंन्यासिनोगृहस्थस्य कर्तव्यमाह । दशेति ॥ ९३ ॥

दशलक्षणकं धर्ममनुतिष्ठन्समाहितः ॥ वेदान्तं विधिवच्छ्रुत्वा संन्यसेदनृणो द्विजः ॥ ९४ ॥

(१) **मेधातिथिः** । संन्यस्येदनृणः यदा ऋणत्रयमपाकीर्णं तदा संन्यासइत्येवमर्थमेतत् । समानकालेप्रव्रज्यायांनाधिक्रियते एवंसंन्यासेपि । वेदान्तान्विधिवत् अविदितवेदान्तार्थस्य नास्ति संन्यासः । यद्यपि स्वाध्यायविध्यनुष्ठानाक्षिप्तंकर्म विधिशास्त्रवद्वेदान्तज्ञानमपि स्वाध्यायशब्दवाच्यत्वाविशेषात् तथापि वेदान्तानांपुनरुपन्यासो विशेषार्थः तत्परेण भवितव्यम् । अथ संन्यस्येदिति कःशास्त्रार्थः । कोयंसंन्यासोनाममेदमिति परिग्रहत्यागः । ननु वेदसंन्यासिकाइत्युक्तं तत्रेदंप्रतीयते । वेदस्य वेदार्थस्यवा संन्यासः । नचवैदिककर्मसिध्यर्थाये प्रतिग्रहादयस्तेषांसंन्यासः इदमानंत्यमिच्छतामित्यध्ययनस्य ज्ञानप्राधान्येपि विहितत्वात् । अग्निहोत्रादीनांतुद्रव्यसाध्यत्वादसति ममकारे त्यागएव । सचायंधर्मापादकोभृतभार्यस्य परनिष्ठस्य वा कृतसंमतिविधानस्य । वाजसनेयकेहि पठ्यते । यदा प्रैष्यन्मन्यतेऽथपुत्रमाहेत्यादि । अग्निसमारोपणंच तदा विहितं । अजीर्णस्य च जरया ह्वाएतस्मान्मुच्यतइत्यामनन्ति । यानिचाद्रव्यसाध्यानि संध्योपासनादीनि नित्याग्निहोत्रादीनि तेषामनिषेधात्तत्रान्त्यादुच्छ्वासादधिकारः ॥ ९४ ॥

(२) **सर्वज्ञनारायणः** । वेदसंन्यासप्रकारमाह दशलक्षणमिति । वेदान्तानुपनिषदः । विधिवदाचार्योपसदनादिना अनृणोपाकृतर्णत्रयोभूत्वा संन्यसेद्वेदाभ्यासतदनुगुणाधिकारापादकसंध्योपासनादिकर्मातिरिक्तानि कर्माणि संत्यजेत् ॥ ९४ ॥

(३) **कुल्लूकः** । उक्तंदशलक्षणकंधर्मंसंयतमनाःसम्नुतिष्ठन्नुपनिषदाद्यर्थंगृहस्थावस्थायांयथोक्ताध्ययनधर्मान्गुरुमुखादवगम्य परिशोधितदेवाद्यृणत्रयः संन्यासमनुतिष्ठेत् ॥ ९४ ॥

(४) **राघवानन्दः** । किंच दशेति अपठितवेदान्तस्य संन्यासेनाधिकारइत्याह वेदान्तानिति । विधिवदिति गुरुमुखात् षड्विधलिंगपुरःसरंश्रुत्वा वेदान्तानांतात्पर्यनिर्णयंच । षड्विधलिङ्गंतु ॥ उपक्रमोपसंहारावभ्यासोऽपूर्वताफलम् । अर्थवादोपपत्ती च लिङ्गंतात्पर्यनिर्णय इति ॥ ९४ ॥

---

(९३) दशलक्षणानिधर्मस्य=दशलक्षणकंधर्मं (ज, झ, ञ, ढ,)

(५) नन्दनः । संन्यासःकाम्यकर्मत्यागः । तथाचोक्तंभगवद्गीतायाम् ॥ काम्यानांकर्मणांन्यासं संन्यासंकवयोविदुः । नियतस्य तु संन्यासः कर्मणोनोपपद्यते ॥ यज्ञोदानंतपश्चैवनत्याज्यं कार्यमेवतत् । यज्ञोदानंतपश्चैव पावनानिमनीषिणाम् ॥ एतान्यपि च कर्माणिसङ्गंत्यक्त्वाफलानिच । कर्तव्यानीतिमेपार्थनिश्चितंमतमुत्तममिति ॥ ९४ ॥

संन्यस्य सर्वकर्माणि कर्मदोषानपानुदन् ॥ नियतोवेदमभ्यस्य पुत्रैश्वर्ये सुखं वसेत् ॥ ९५ ॥

[संन्यसेत्सर्वकर्माणि वेदमेकं न संन्यसेत् ॥ वेदसन्यासतःशूद्रस्तस्माद्वेदं न संन्यसेत्ऽऽ ॥]

(१) मेधातिथिः । वेदमभ्यस्येति वेदस्यात्यागमाह । दर्शितमेतत् । अभ्यस्यन्निति शतृप्रत्ययान्तपाठोवा । पुत्रैश्वर्ये सुखंवसेत् । पुत्रग्रहणमुत्पन्नस्य पुत्रस्य अन्योपि यस्तत्स्थानः पौत्रादिस्तत्रापि युक्तोगृहान्तरन्यासइत्याहुः ॥९५॥

(२) सर्वज्ञनारायणः । सर्वकर्माणि नित्यनैमित्तिककाम्यानि वेदाभ्यासतदनुगुणदेहशुद्धिहेत्वाचमनस्नानसंध्याकर्मादिभ्योन्यानि संन्यस्य त्यक्त्वा संन्यासात् कर्मानुष्ठानाविनाभूतान्हिंसादिदोषानपानुदन्परिहरन् नियतोयमनियमवान् । अभ्यस्यन् सततमधीयानः । पुत्रैश्वर्ये पुत्रगार्हस्थ्ये तेन पञ्चमहायज्ञानुष्ठानंपुत्रेणैव कार्यं स्वयंतु वाच्येकेजुह्वतिप्राणमित्युक्तप्रकारेण स्वाध्यायेनैव पञ्चमहायज्ञाःसंपाद्याः । पुत्रस्यैवैश्वर्यंयद्गार्हस्थ्येनत्वात्मनइत्यभिधानेन वित्तेषु ममता पुत्रेणैव कार्या न स्वयं तथाचानीहोभूत्वा निवसेदिति गम्यते ९५ ॥

(३) कुल्लूकः । सर्वाणि गृहस्थानुष्ठेयाग्निहोत्रादिकर्माणि परित्यज्याज्ञातजन्तुवधादिकर्मजनितपापानि च प्राणायामादिना नाशयन्नियतेन्द्रियउपनिषदोग्रन्थतोऽर्थतश्चाभ्यस्य पुत्रैश्वर्यइतिपुत्रगृहे पुत्रोपकल्पितभोजनाच्छादनत्वेन वृत्तिचिन्तारहितः सुखंवसेत् । अयमेवासाधारणोधर्मःकुटीचरकस्योक्तःइदमेववक्तुंवेदसंन्यासिनांत्विवितिपूर्वमुक्तम् ॥ ९५ ॥

(४) राघवानन्दः । पुत्रैश्वर्येपुत्रदत्तभिक्षादौ ॥ ९५ ॥

(५) नन्दनः । तत्तत्काम्यकर्मफलभोगानुरूपदेहप्राप्तयः । कर्मदोषास्तानपानुदंस्तेषामपनोदनहेतोः सर्वाणि काम्यकर्माणि संन्यस्य नियतोनियतकर्मकारीवेदमभ्यस्यञ्जपन् ॥ ९५ ॥

(६) रामचन्द्रः । कर्मदोषानपानुदन् दूरीकुर्वन् नियतःसन्वेदमभ्यस्य ओंकारंवा अभ्यस्य पुत्रैश्वर्येपञ्चयज्ञविधानंपुत्रेण कार्यं एवंविधः सुखंवसेत् ॥ ९५ ॥

एवंसंन्यस्य कर्माणि स्वकार्यपरमोऽस्पृहः ॥ संन्यासेनापहत्यैनः प्राप्नोति परमां गतिम् ॥ ९६ ॥

(१) मेधातिथिः । स्वकार्यमात्मोपासनं परमं प्रधानमस्येति स्वकार्यपरमः । अस्पृहः मनसापि स्पृहा न कचित्कर्तव्या ॥ ९६ ॥

(२) सर्वज्ञनारायणः । स्वकार्यपरमः स्वकर्तव्यनित्यकर्मविशेषस्वाध्यायमात्रपरः । अपहत्येनः संसारहेतुमधर्मम् । तदानेन गृहस्थएव धृत्यादिदशलक्षणधर्मानुष्ठानपरः स्वाध्यायनित्योऽनीहमानः पुत्रगृहे भुञ्जानोनित्यनैमित्तिककाम्यकर्मपरित्यागादविधितात्मदृष्टिर्वेदान्तार्थपरिभावनया ब्रह्मभवतीति दर्शितम् । तत्रस्नानाचमनसंध्योपासनानिस्वाध्यायाधिकारार्थमेवानुष्ठेयं संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मस्वितिवचनेन हि संध्यानुष्ठानमपि

ऽऽ (क) । अयमेवश्लोकः (अ, ड,) चिन्हितपुस्तके इत्थंदृश्यते ॥ संन्यसेत्सर्वकर्माणिवेदंतुनपरित्यजेत् । परित्यागाद्धिवेदस्य शूद्रतामनुगच्छति ॥

शौचहेतुतया स्मर्यंते यमानांनियमानांच मध्ये यावत्स्वाध्यायाविरोधेस्तावदनुष्ठेयम् स्वाध्यायेच क्रियमाणे निरन्तरं तदर्थोऽनुसंधेयः अर्थज्ञानशून्यस्य तस्याल्पफलत्वादिति ॥ ९६ ॥

(३) कुल्लूकः । एवमुक्तप्रकारेणवर्तमानोऽग्निहोत्रादिगृहस्थकर्माणि परित्यज्यात्मसाक्षात्कारस्वरूपस्वकार्यप्रधानः स्वर्गादावपि बन्धहेतुतया निस्पृहः प्रव्रज्यया पापानि विनाश्य ब्रह्मसाक्षात्कारेण परमांगतिमोक्षलक्षणांप्राप्नोति ॥ ९६ ॥

(४) राघवानन्दः । स्वकार्य परमः आत्मसाक्षात्कारप्रधानइति केचित् तत्र पुत्रैश्वर्यइति वचनात् । अविरक्ततया संन्यासाद्ब्रह्मणःस्थानमित्युक्तेश्च तदुपायनारायणमन्त्रोपासनया सह स्वधर्मानुष्ठानपरो भवेदित्यर्थः । संन्यासेनापहत्य एनः पापं ॥ मनोवाक्कायकर्माणि मे शुध्यन्तांज्योतिरहंविरजाविपाप्माभूयासंस्वाहेतिमन्त्रलिङ्गादिति । परमांगतिं ब्रह्मलोकावाप्तिं प्राप्नोति । परमपदप्रयोगात्पुत्रैषणायाश्चेति श्रुतेश्च । तत्राप्याश्रमं विरक्तःसन्परमहंससंन्यासंकृत्वा वा मोक्षावाप्तिरिति ॥ ९६ ॥

(५) नन्दनः । वेदसंन्यासिकस्य कर्मयोगानुष्ठाने फलमाह एवमिति । स्वकार्यपरःस्वस्यकार्यनियतःकर्मनिरतस्तत्फलेष्वस्पृहः ॥ ९६ ॥

एषवोऽभिहितोधर्मोब्राह्मणस्य चतुर्विधः ॥ पुण्योऽक्षयफलः प्रेत्य राज्ञां धर्मं निबोधत ॥ ९७ ॥

इतिमानवेधर्मशास्त्रेभृगुप्रोक्तायांसंहितायांषष्ठोध्यायः ॥ ६ ॥

(१) मेधातिथिः । चतुर्विधोधर्मश्चातुराश्रम्यम् । ब्राह्मणस्य सर्वमेतद्विहितम् । ननुच पूर्वंगृहाश्रमे स्थित्वाविधिवन्स्नातकोद्विजइति द्विजग्रहणमुपक्रमे श्रुतं तस्य चानुपजातविरोधित्वात्त्रैवर्णिकार्थिता निश्चिता अतश्चेदंब्राह्मणग्रहणं त्रैवर्णिकप्रदर्शनार्थमेव युक्तम् यद्येकवाक्यतोपक्रमोपसंहारयोर्न स्यात् । एकवाक्यत्वेतुबलवदुपक्रमार्थः शक्यः प्र-[illegible]तुं कृत्स्नवाक्यपर्यालोचनया योऽर्थःसनिश्चीयते । अतोद्विजग्रहणंब्राह्मणपरतयोपसंहर्तव्यम् । अस्ति ब्राह्मणस्य [illegible]जातित्वम् । नतुसर्वेषु द्विजातिषु ब्राह्मण्यम् । अत्रापि द्विजशब्दार्थे संभवति नान्वयिनि लक्षणा न्याय्या । तथाच महाभारते शूद्रस्यापि त्रयआश्रमाः श्रूयन्ते शुश्रूषाकृतकृत्यस्येत्युपक्रम्य आश्रमाविहिताः सर्वे वर्जयित्वा निरामिषम् । पारिव्राज्यमित्यर्थः । नैवं तस्यायमर्थः सर्वआश्रमास्तु न कर्तव्याः किंतर्हि शुश्रूषयाऽपत्योत्पादनेन च सर्वाश्रमफलंलभते द्विजातीन् शुश्रूषमाणोगार्हस्थ्येन सर्वाश्रमफलंलभते परिव्राजकफलंमोक्षंवर्जयित्वा अतोब्राह्मणधर्मएव चातुराश्रम्यमितिसिद्धम् ॥ ९७ ॥ इति भट्टवीरस्वामिसूनोर्भट्टमेधातिथिकृतौ मनुभाष्ये षष्ठोऽध्यायः ॥ ६ ॥ ॥ छ ॥ ॥ छ ॥

(२) सर्वज्ञनारायणः । उपसंहरति एषवइति । चतुर्विधः आश्रमभेदात् ब्राह्मणस्यैव चतुर्विधोन्येषांतु द्विजातीनांत्रिविधएव । संन्यासे तेषामनधिकारात् शूद्रस्यतु गार्हस्थ्यएवाधिकारादेकविधएव । ब्राह्मणस्येत्यत्र केचित् बौधायनेन परिव्राजकधर्मं प्रक्रम्य स्त्रीणांचैकइतिवचनात्पुल्लिङ्गमविवक्षितमित्याहुः एकग्रहणाद्बौधायनस्यापि स्त्रीणांपारिव्राज्यं नापेक्षितमितिविवक्षितमेव पुल्लिङ्गमित्यन्ये । चतुर्विधोपि पुण्यः स्वर्गहेतुपुण्यजनकः अक्षयफलोमोक्षहेतुः ॥ ९७ ॥

श्रीनारायणसर्वज्ञकृता वृत्तिर्मनुस्मृतेः । कुनिबन्धकृतव्याख्यामियंदूरे निरस्यते ॥ इतिसर्वज्ञश्रीनारायणकृतौ मनुस्मृत्यर्थविवृतौ वानप्रस्थयतिधर्मोनामषष्ठोऽध्यायः ॥ ६ ॥ ॥ ७ ॥ ॥ ७ ॥

(३) कुल्लूकः । ऋषीन्संबोध्यउच्यते । एषयुष्माकंब्राह्मणस्य संबन्धी क्रियाकलापोधर्मस्तस्यैव ब्रह्मचारिगृहस्थवानप्रस्थादिभेदेन चतुर्विधः परत्राक्षयफलउक्तः । इदानीराजसंबन्धिनंधर्मंशृणुत । अत्र च श्लोके ब्राह्मणस्य चातुराश्रम्योपदेशाद्ब्राह्मणः प्रव्रजेदितिपूर्वमभिधानाद्ब्राह्मणस्यैवप्रव्रज्याधिकारः ॥ ९७ ॥ ॥ ७ ॥ ॥ ७ ॥

इतिश्रीकुल्लूकभट्टविरचितायांमन्वर्थमुक्तावल्यांषष्ठोऽध्यायः ॥ ६ ॥ ॥ ७ ॥

(४) राघवानन्दः । वोयुष्मभ्यं चतुर्विधः ब्रह्मचर्यादिभेदभिन्नः पुण्यः पुण्यप्रदः अक्षयफलः अक्षयंद्विपरार्धकालपर्यन्तं स्थायिफलंयस्यसः ॥ ९७ ॥

इति श्रीराघवानन्दविरचितायां मन्वर्थचन्द्रिकायां षष्ठोध्यायः ॥ ६ ॥ ॥ ७ ॥

इति नन्दनाचार्यविरचिते मानवव्याख्याने षष्ठोध्यायः ॥ ६ ॥ ॥ ७ ॥ ॥ ७ ॥

इति श्रीमानवे धर्मशास्त्रे रामचन्द्रविरचितायां टीकायांषष्ठोध्यायः ॥ ६ ॥ ॥ ७ ॥ ॥ ७ ॥

THE ASIATIC SOCIETY, CALCUTTA